अनेकशास्त्रपारङ्गतेन

महामहोपाध्यायश्रीमद्विनयविजयगणिवरेण विरचितः

श्री लोकप्रकाशः

(द्रव्य-क्षेत्र-काल-भावात्मकः संपूर्णः)

सम्पादकः

पंन्यास जयदर्शनविजयो गणी

प्रकाशकः

श्री जिनाज्ञा प्रकाशन

शा. ठाकोरलाल अमरचन्द, नहेरु स्ट्रीट, बारी-३९६१९१. जि. बलसाड-गुजरात

अनेकशास्त्रपारङ्गतेन

महामहोपाध्यायश्रीमद्विनयविजयगणिवरेण विरचितः

श्री लोकप्रकाशः

(द्रव्य-क्षेत्र-काल-भावात्मकः संपूर्णः)

सम्पादकः

पंन्यास जयदर्शनविजयो गणी

प्रकाशकः

श्री जिनाज्ञा प्रकाशन

शा. ठाकोरलाल उत्तमचन्द, नहेरु स्ट्रीट, वापी-३९६१९१. जि. वलसाड-गुजरात

नकल : ५००

मूल्य : रु. ३४४

प्रकाशन : वि. सं. २०६२, गौतमस्वामि केवलज्ञानदिन

स्थल : विजय रामचन्द्रसूरीश्वरजी आराधना भवन, सुभानपुरा, वडोदरा

लाभार्थी

श्री रमणलाल छगनलाल चेरीटेबल ट्रस्ट

तथा रत्नत्रयी आराधक संघ

नवसारी

आ ग्रन्थ उपरोक्त श्री संघना ज्ञाननिधिमांथी प्रकाशित थयो छे तेथी
आ ग्रन्थनो उपयोग करता पहेला गृहस्थवर्गे
योग्य रकम ज्ञानखातामां समर्पित करवी आवश्यक छे.

प्राप्तिस्थानम् :

श्री जिनाज्ञा प्रकाशन

शा. ठाकोरलाल उत्तमचन्द, नहेरु स्ट्रीट, वापी-३९६१९१, जि. वलसाड-गुजरात

रमणलाल छगनलाल आराधना भवन,

के. जी. होस्पिटल सामे, सांठकुवा, नवसारी -३९६ ४४५

મુદ્રક : કેનિમેક પ્રિન્ટર્સ, અમદાવાદ-૩૮૦૦૦૭. મો. ૯૮૭૯૦-૯૦૫૭૫

લાભાર્થીની અભિવ્યક્તિ....

પૂજ્યપાદ ગણિવર્યશ્રી જયદર્શનવિજયજી મ.સા. લવાછા-અંબિકા પાર્કના શ્રી વાસુપૂજ્ય સ્વામી જિનાલયની પ્રતિષ્ઠા માટે પધારી રહ્યા હતા ત્યારે વચમાં નવસારી અમારા શ્રીસંઘમાં પધાર્યા હતા. શાસનની અનેકવિધ વિચારણા કરતા કરતા તેઓશ્રી આગળ ગ્રન્થ પ્રકાશન સંબંધી વાત નીકળી. ઘણા પ્રાચીન ગ્રન્થો પૂર્વમાં પ્રકાશિત થયા છે તેના પુનર્મુદ્રણની આવશ્યકતા અમને જાણવા મળી. એક બાજુ ગ્રન્થો ભણનારા આજના કાળમાં ઓછા થતા જાય છે તો સામે કોઈને ગ્રન્થ ભણવાની શરૂઆત કરવી હોય તો પૂરતી સંખ્યામાં ગ્રન્થો મળતા નથી. ક્યારેક એક ભાગ મળે છે તો બીજો ભાગ ગાયબ થઈ ગયો હોય છે. માટે ગ્રન્થો પરિપૂર્ણ સ્વરૂપના છૂટથી મળી શકે તે માટે ગ્રન્થોનું વારંવાર પ્રકાશન થયા કરે તો તેની પ્રાપ્તિ દુષ્કર કે દુર્લભ ન રહે.

અમે પૂ. ગણિવર્યશ્રીને વિનંતી કરી કે "સાહેબ, તેવો ઉપયોગી ગ્રન્થ પ્રકાશિત કરવો હોય તો અમારા શ્રી સંઘમાં જ્ઞાનખાતાની આવક છે જ. એક ગ્રન્થ પ્રકાશનનો લાભ અમને આપો." ત્યારે તેઓશ્રીએ **પૂજ્યપાદ મહામહોપાધ્યાય શ્રીમદ્ વિનયવિજયજી ગણિવર** રચિત **'શ્રી લોકપ્રકાશ'** મહાગ્રન્થના પ્રકાશનનું સૂચન કર્યું. અમોએ તેને સહર્ષ વધાવી લીધું. આમ આ ગ્રન્થ પ્રકાશનના મંડાણ થયા. આજે એ મહાગ્રન્થ આપના કરકમલમાં છે. તત્ત્વપ્રેમી આત્માઓની જ્ઞાનપ્રાપ્તિમાં નિમિત્ત અને સહાયક બનવાનું સૌભાગ્ય અમને મળ્યું છે તેનો અમને ખૂબ જ આનંદ છે.

જિનશાસનના મહાન જ્યોતિર્ધર-સુવિહીતશિરોમણિ-સિદ્ધાંતસંરક્ષક - સકલસંઘહિતચિંતક-ગીતાર્થમૂર્ધન્ય-અમર યુગપુરુષ સ્વ. પૂજ્યપાદ આચાર્યદેવેશ શ્રીમદ્ વિજયરામચન્દ્રસૂરીશ્વરજી મહારાજાની કૃપાદૃષ્ટિ અમારા શ્રી સંઘ ઉપર સતત વરસતી રહી હતી. તેઓશ્રીની પાટપરંપરામાં આવેલ પટ્ટધરો અને તેઓશ્રીના સામ્રાજ્યવર્તી સુવિશાલસમુદાયની પણ અમારા શ્રી સંઘ ઉપર અમી નજર છે. આ બધાના પ્રભાવે અમને શાસ્ત્રીય સત્યની પ્રાપ્તિ બહુ સહેલાઈથી થઈ જાય છે. ટ્રસ્ટીઓએ ધર્મદ્રવ્ય ઉપર માલિકીભાવ રાખવાનો નથી, ધર્મદ્રવ્યનું સંરક્ષણ, સુયોગ્ય સંવર્ધન અને સમુચિત વ્યય કરવાનો છે. આ સત્ય અમને બહુ સારી રીતે સમજાયું છે. અમારા શ્રી સંઘમાં આવતા જ્ઞાનદ્રવ્યનો આ જ રીતે સુયોગ્ય વિનિયોગ કરવાનો લાભ અમને મળતો રહે તેવી ભાવના રાખીએ છીએ.

શ્રી લોકપ્રકાશ મહાગ્રન્થના અધ્યયન અને અધ્યાપન દ્વારા જિનશાસનનાં મૌલિકતત્ત્વો સૌના હૃદયમાં પરિણમે તેવી અભ્યર્થના....

રમણલાલ છગનલાલ ચેરીટેબલ ટ્રસ્ટ
અને
શ્રી રત્નત્રયી આરાધક સંઘ

संपादनम् ।

ચરમતીર્થપતિ શ્રમણ ભગવાન શ્રી મહાવીર સ્વામીના શાસનનો શ્રુતવારસો કાન દ્વારા સીધો હૃદયમાં જતો હતો. વચમાં કોઈ લખાણનો આધાર રહેતો ન હતો. કાળક્રમે ક્ષયોપશમની મંદતા વધતા શ્રુતના રક્ષણ માટે શ્રુતને પુસ્તકારુઢ કરાયું. ત્યારે શ્રુત જેવા સ્વરૂપે હતું તેવા જ સ્વરૂપે લખી દેવામાં આવતું. હસ્તપ્રતિઓમાં સંપાદન જેવું કોઈ કાર્ય ન હતું. ફક્ત લેખન હતું. જ્યારથી શ્રુત છપાવા માંડ્યું ત્યારે પણ સંપાદનનું તત્ત્વ દાખલ થયું ન હતું અંતે સંપાદનનો જન્મ થયો. ગ્રન્થને મૂળ સ્વરૂપે તો છાપવાનો જ. વિશેષમાં ગ્રન્થનું અધ્યયન સરળ બને, સર્વગ્રાહ્ય બને અને સંલગ્ન વિવિધ વિષયોનો નિર્દેશ તેમાંથી જ પ્રાપ્ત થાય એ રીતે છપાઈ કરવાના કાર્યને સંપાદન કહેવામાં આવે છે. આ સંપાદનનું ક્ષેત્ર દિન-પ્રતિદિન વિસ્તરતું જ જાય છે. આશા એવી રાખવામાં આવે છે આ રીતના ગ્રન્થની મદદથી ભણનાર ટૂંક સમયમાં જ્ઞાનપ્રાપ્ત કરી શકે. સમયનો બચાવ અને જ્ઞાનની વ્યાપકતા સહજ બને. છતાં કબૂલ કરવું પડશે કે ભૂતકાળના મૂર્ધન્ય શાસ્ત્રકાર ભગવંતો આજના જેવા સંપાદનોથી સભર ગ્રન્થોની કોઈ જ મદદ લીધા વિના ક્લિષ્ટ લિપિ અને અક્ષરોમાં લખાયેલ ગ્રન્થો મેળવવા પણ દુર્લભ હતા તેવા કપરા સંયોગોમાં જેવી વિદ્વતા અને ગીતાર્થતા પ્રાપ્ત કરી શક્યા તેના શતાંશે પણ આજના સાધનો, સગવડોથી છલકાતા જમાનામાં વિદ્વાનો તૈયાર થાય છે કે નહિ તે સંશોધન સાથે સંપાદિત કરવા જેવો વિષય છે. કદાચ પડકારથી વ્યક્તિનું હીર ઝળકી ઉઠતું હતું. સગવડ અને સરળતાથી વ્યક્તિ વધુ પાંગળો બન્યો છે. છતાં હાલમાં દરેક ગ્રન્થ સંપાદનથી શણગારવો જોઈએ તેવી આજની માંગ હોય છે. અહીં પણ કંઈક સંપાદન કરાવમાં આવ્યું છે.

(૧) પૂર્વના સંપાદનોમાં ગ્રન્થકારના શ્લોકો અને ગ્રન્થકારે વચમાં રજું કરેલા સાક્ષી શ્લોકોને જુદા પાડ્યા વિના ક્રમસર જે નંબર આવ્યા તે આપી દીધેલા છે. આ સંપાદનમાં તેવા શ્લોકોને અલગ તારવીને મૂળગ્રન્થના શ્લોક કરતા નાના ટાઈપમાં શ્લોક નંબર આપ્યા વિના છાપ્યા છે. તેથી પૂર્વપ્રકાશનના શ્લોક નંબર સાથે આ પ્રકાશનના શ્લોક નંબરોમાં તફાવત રહેશે. હજી પણ કેટલાક શ્લોકો અન્ય ગ્રન્થના ઉદ્ધારણરૂપે હોવા જોઈએ એમ લાગે છે પરંતુ ચોક્કસ સ્થાન ન મળવાથી તેને મૂળગ્રન્થના શ્લોકો રૂપે જ રાખ્યા છે. ભવિષ્યમાં વિદ્વાનો તેમાં આગળ કાર્ય કરી શકશે.

(૨) મૂળ ગ્રન્થમાં આમ તો ગ્રન્થકારશ્રીએ મોટાભાગે તે તે આગમાદિના નામ અને શતક-અધ્યયન-ઉદ્દેશા આદિના ઉલ્લેખ સાથે જ ઉદ્ધરણો રજું કર્યા છે. છતાં જ્યાં એવું નથી કર્યું ત્યાં એ શ્લોક સાક્ષી-ગ્રન્થમાં કેટલામો છે તે શોધવાનો પ્રયાસ કર્યો છે. તે પ્રાપ્ત નંબર ને બ્રેકેટમાં [ ] રજું કર્યો છે.

(૩) આ સંપાદનમાં છપાયેલ ગ્રન્થનો જ આધાર લીધો છે. ક્યારેક છપાએલ બે જુદા જુદા પ્રકાશનોના પાઠાંતરોમાં વધુ યોગ્ય જણાયા તે પાઠો અહીં સ્વીકાર્યા છે. ખરેખર તો હસ્તપ્રતો સાથે મેળવીને નવા પાઠાંતરો શોધવા જોઈએ. તે માટે હસ્તપ્રત મેળવવા પ્રયાસ કર્યો. ત્યાંથી માહિતી મળી કે આ હસ્તપ્રતોની ઝેરોક્ષ અન્ય મહાત્માને આપી છે. તેઓ આ કાર્ય કરી રહ્યા હશે. છેવટે એ કાર્ય હાથમાં ન લીધું.

(૪) આ ગ્રન્થમાં ગ્રન્થકારે લગભગ દરેક વાતો કયા ગ્રન્થના આધારે લખી છે તેની ત્યાં જ સ્પષ્ટતા કરી છે, નામોલ્લેખ સાથે. આ ગ્રન્થ રચનાની શૈલી જ એવી છે કે અધ્યયન કરનારને આ વાત ક્યાં હશે. તેવી મુંઝવણ અનુભવવી ન પડે. આમાં પણ વિશેષ સંપાદન થઈ શકે છે. ગ્રન્થમાં વર્ણવેલા તે તે પદાર્થો આધાર ગ્રન્થમાં જે શબ્દોમાં રજુ થયા છે તેનો સંગ્રહ કરીને પરિશિષ્ટ બનાવાય. પણ આમ કરવામાં પરિશિષ્ટનું કદ અને તેના કારણે ગ્રન્થનું કદ ઘણું જ મોટું થઈ જાય છે તેથી થોડા પ્રયાસ પછી એ કાર્ય બંધ કર્યું. ફક્ત પરિશિષ્ટ-૧માં વિષય અને ગ્રન્થનો નિર્દેશ માત્ર કર્યો.

(૫) દરેક ગ્રન્થમાં વિષમસ્થાન ઉપર ટિપ્પણી લખવામાં આવે તો વાંચનારને વધુ સુગમતા રહે. ટિપ્પણીનું આ જ મુખ્ય કામ હોય છે. પૂર્વપ્રકાશનોમાં ટિપ્પણીઓ મૂકવામાં આવેલી છે. એમાં ફક્ત પદાર્થને સુગમ બનાવવાના ભાવ સિવાય પણ બીજો ભાવ દેખાય છે. ગ્રન્થકારને જ્યાં બે મતો વચ્ચે સંગતિ ન જણાઈ અને બંને મતો રજુ કર્યા ત્યાં ટિપ્પણીકારે ચપટી વગાડતા સંગતિ કરી આપી છે. ટિપ્પણીકારની પ્રતિભાને બહું મધ્યસ્થ ભાવે વિદ્વાનો માણી શકે તે માટે પૂર્વપ્રકાશનની ટિપ્પણીઓ એ જ સ્વરૂપમાં આ સંપાદનમાં પણ લેવામાં આવી છે.

(૬) પરિશિષ્ટ-૨માં આ ગ્રન્થમાં જે મતાંતરો રજુ કરવામાં આવ્યા છે તેનો વિષય અને તે તે મતાંતરવાળા ગ્રન્થોનાં નામોની સૂચિ બનાવી છે.

(૭) ગ્રન્થકારે ગ્રન્થમાં કેટલાક વિષયોનું વર્ણન કર્યું પણ બહુ વિસ્તાર ન કરતા વધુ જાણવાની જિજ્ઞાસાવાળાને જે શાસ્ત્રને જોવાની ભલામણ કરી છે તે શાસ્ત્રનાં નામોની સૂચિ વિષયનિર્દેશ સાથે પરિશિષ્ટ-૩માં મૂકી છે.

ત્યાર બાદ ગ્રન્થકારશ્રીની બીજી કૃતિઓનાં નામો અને આ ગ્રન્થમાં જે જે શાસ્ત્રોનાં આધાર લેવામાં આવ્યા તે ગ્રન્થોની સૂચિ મૂકી છે. તેમજ શરૂઆતમાં જ આ ગ્રન્થનો વિષયાનુક્રમ મૂક્યો છે.

આ ગ્રન્થ એક સંગ્રહગ્રન્થ છે. આગમશાસ્ત્રોમાં ચારેબાજુ વિસ્તરેલ પદાર્થોને એક જગ્યાએ સંગ્રહિત કરવાનું મુખ્ય કાર્ય આ ગ્રન્થમાં થયું છે. આમાં ફક્ત પદાર્થોનું સંકલન જ નથી, તે તે પદાર્થોને ગ્રન્થકારશ્રીએ પોતાની લાક્ષણિક શૈલીથી આલેખ્યા છે. આ એક જ ગ્રન્થનું અધ્યયન કરવાથી અન્ય - અન્ય અનેક ગ્રન્થોનો બોધ થઈ જાય છે. એક જ પદાર્થ વિશે અલગ-અલગ ગ્રન્થકારો શું ફરમાવે છે, તેનું જ્ઞાન પણ અહીં જ થઈ જાય છે.

ગ્રન્થકારશ્રી અંગે વિચારીએ તો તેઓશ્રીની તીવ્ર સ્મરણશક્તિ અને જ્ઞાનાવરણીયકર્મના ક્ષયોપશમ પ્રત્યે અહોભાવ જન્મે તેમ છે. તેઓશ્રીનો બોધ કેટલો વિસ્તૃત હતો તેનો અંદાજ આ ગ્રન્થમાં આપેલા સાક્ષીપાઠો દ્વારા જ આવી જાય છે. જે સમયમાં ગ્રન્થની પ્રત મેળવવી પણ મુશ્કેલ હતી તેવા સમયમાં સેંકડો ગ્રન્થોની સાક્ષી આપીને ગ્રન્થ બનાવવો કેટલું મુશ્કેલ કાર્ય છે તે સમજી શકાય છે. આજના જેવી સગવડ, શાસ્ત્રોની સુલભતા અને જોઈએ તેવો સહયોગ જો ગ્રન્થકારશ્રીના સમયમાં હોત તો કદાચ આથી પણ ઉત્કૃષ્ટ રચનાની આપણને ભેટ મળી હોત. ગ્રન્થકારશ્રીની બીજી શાસ્ત્ર રચનાઓ જોતા તેઓશ્રીની શાસ્ત્રપારંગતતા પ્રગટ થાય છે. વ્યાકરણ-ભાવના-કલ્પસૂત્રની સુબોધ શૈલીની ટીકા - રસાળ ગૂર્જર સાહિત્યની રચના વગેરેથી તેઓશ્રીના બોધની વિશાળતા સાથે ઊંડાઈનો પણ સારો પરિચય મળે છે.

આ ગ્રન્થના પ્રૂફ ચેકીંગમાં, દ્રવ્યલોક પ્રકાશનનું પ્રૂફ શુદ્ધ કરવામાં સાધ્વીશ્રી હેમરત્નાશ્રીજીના નિશ્રાવર્તિ સાધ્વીશ્રી જિનરક્ષિતાશ્રીજીએ કાળજીપૂર્વક કાર્ય કર્યું છે. તેમની સ્વાધ્યાયપ્રિયા વૃત્તિ અને પ્રવૃત્તિ યાદ રહી જાય તેવી છે. તે સિવાયના સમગ્ર ગ્રન્થનું પ્રૂફ ચેકીંગ સાધ્વીશ્રી જયધર્માશ્રીજી અને તેમની સુશિષ્યાઓ સાધ્વીશ્રી ભવ્યધર્માશ્રીજી, સાધ્વીશ્રી ભવ્યસિદ્ધિશ્રીજી, સાધ્વીશ્રી ધર્મસિદ્ધિશ્રીજી અને સાધ્વીશ્રી તત્ત્વશ્રુતિશ્રીજીએ ખૂબ મહેનત લઈને કર્યું છે. એમની સૌની પણ સ્વાધ્યાયરુચિ અતિ ઉત્તમ છે. આમ છતાં પણ મુદ્રણ અશુદ્ધિ રહી જવાની સંભાવના પૂર્ણ છે. આ બધાના સ્વાધ્યાય રસની અનુમોદના સાથે તેમના સહયોગને અહીં કૃતજ્ઞતાપૂર્વક યાદ કરું છું.

શાસ્ત્ર અને સિદ્ધાંતો પ્રત્યે અતિ આદરભાવ ઉત્પન્ન કરવાનું દુષ્કર કાર્ય સહજતાથી કરી જનારા બહુશ્રુતગીતાર્થ સ્વ-પૂજ્યપાદ આચાર્યદેવ શ્રીમદ્ વિજય રામચન્દ્રસૂરીશ્વરજી મહારાજાના ધર્મોપકારને અને પુણ્યસામ્રાજ્યને શિરસાવંદ્ય કરીને ચાલનારો રમણલાલ છગનલાલ આરાધના ભવનનો શ્રી સંઘ આ ગ્રન્થ પ્રકાશનમાં સંપૂર્ણ આર્થિક સહયોગ દેનારો બન્યો છે. આ સંઘના જ્ઞાનનિધિમાંથી આ ગ્રન્થ પ્રકાશિત કરવામાં આવ્યો છે. દરેક શ્રી સંઘો જો આ રીતનો આદર્શ આંખ સામે રાખીને પોતાના જ્ઞાનનિધિને શ્રુતપ્રકાશન માટે ખુલ્લો મૂકે તો અપ્રગટ કે પ્રગટ કોઈ પણ ગ્રન્થ દુર્લભ ન રહે. જ્ઞાનના કાર્ય માટે યોગ્ય રીતે જ્ઞાનનિધિ વાપરવામાં ન આવે અને મમત્વથી સંગ્રહ જ કર્યા કરે તો વહીવટ કરનારાને દોષ લાગે છે આ વાત કદી ભૂલાવી ન જોઈએ.

મારા પરમશ્રદ્ધેય ગુરુદેવ પૂજ્યપાદ આચાર્યભગવંત શ્રીમદ્ વિજયરવિચન્દ્રસૂરીશ્વરજી મહારાજા ઘણીવાર કહેતા કે વર્ષમાં એકવાર શ્રી લોકપ્રકાશ અને શ્રી પ્રવચન સારોદ્ધારનો સ્વાધ્યાય કરવામાં આવે તો લગભગ આગમના પદાર્થો તાજા ને તાજા રહે. આ ગ્રન્થનું સંપાદન કરતી વખતે એના વાચનથી અનેક પ્રકારની શુભપરિણતિનો આસ્વાદ મને અનાયાસે થતો રહ્યો છે. એનો આનંદ શબ્દોમાં વર્ણવી શકાય તેવો નથી. આ ગ્રન્થના અધ્યયન દ્વારા આવા જ સાત્ત્વિક આનંદ અનુભવનારા સૌ બને એ જ શુભકામના.

વિ. સં. ૨૦૬૧, જેઠ સુદ ૬, સોમવાર
તા. ૧૩-૬-૨૦૦૫, ભારજા

પંન્યાસ જયદર્શનવિજયગણી

श्री लोकप्रकाशमहाग्रन्थस्य विषयदर्शनम्।

द्रव्यलोकः

विषयः	पृष्ठः
प्रथमः सर्गः	
❑ साभिधेयं मङ्गलं	1
❑ परमाण्वादारभ्य यवमध्यपर्यन्तं मानं	2
❑ उत्से-प्रमाणा-त्माङ्गुलमानं मेयञ्च	2
❑ उत्सेधाङ्गुलादित्रयाणां सूचि-प्रतर-घनभेदाः	3
❑ अङ्कस्थानानि, भागहारविधिः	4
❑ अङ्गुलादारभ्य रज्जुपर्यन्तं मानं	4
❑ सभेदं पल्योपम-सागरोपमस्वरुपं	5
❑ सङ्ख्यातासङ्ख्यातानन्तमानं सविस्तरं	7
❑ अनवस्थित-शलाका-प्रतिशलाका-महाशलाकास्वरुपं	8
❑ अत्र कार्मग्रन्थिकमतं	10
द्वितीयः सर्गः	
❑ पञ्चास्तिकायादि षड्द्रव्याणि, तत्स्वरुपञ्च	12
❑ अलोकाकाशानन्ततायां दृष्टान्तः	13
❑ जीवास्तिकायवर्णनं	14
❑ सिद्धस्वरुपं सिद्धिगमनवर्णनञ्च	15
❑ एकसमयसिद्धादिवर्णनं	16
❑ सिद्धानामवगाहना	17
❑ सिद्धिगमनयोग्यत्वमल्पबहुत्वञ्च	19
❑ शिवसुखवर्णने म्लेच्छदृष्टान्तः	20
तृतीयः सर्गः	
❑ सप्तत्रिंशद्द्वारैः संसारिजीवानां स्वरुपं	21
❑ पर्याप्तिस्वरुपं	21
❑ योनिसङ्ख्यास्वरुपं योनिस्वरुपञ्च	22
❑ योनिकुलस्वरुपं	24
❑ भवस्थितिः	24
❑ कायस्थितिस्वरुपं	25
❑ औदारिकादिदेहपञ्चकस्वरुपं	25
❑ तत्र कारणकृत-प्रदेशसंख्याकृतविशेषौ	26
❑ स्वामिकृत - विषय - प्रयोजनकृतविशेषः	26
❑ प्रमाणावगाहकृतः विशेषः	27
❑ स्थित्यल्पबहुत्वान्तरकृतविशेषः	29
❑ संस्थानस्वरुपं	30
❑ अङ्गमानं, समुद्घाताः	31
❑ गत्यागतिस्वरुपं	34
❑ अन्तराप्त्येकसमयसिद्धिस्वरुपं, लेश्यास्थितिः	35
❑ लेश्यास्वरुपं	39
❑ आहारदिक्प्रसंगात् किञ्चिदाहारस्वरुपं	39
❑ संहनानि	40
❑ भेद-प्रभेदसहिताः कषायाः	41
❑ संज्ञाः	42
❑ द्रव्यभावेन्द्रियाणि	44
❑ संज्ञितादिवर्णनं	51
❑ वेदत्रयस्वरुपं	51
❑ सम्यग्दर्शनप्राप्तिवर्णनं, मतांतरञ्च	52
❑ सप्रभेदं सम्यक्त्वं	55
❑ पञ्चधा मिथ्यात्वं	56
❑ मतिज्ञानस्वरुपं सप्रभेदं	57
❑ विस्तृतं श्रुतज्ञानवर्णनं	61
❑ अवधिज्ञानवर्णनं	65
❑ मनःपर्यवज्ञानं	66
❑ केवलज्ञानं, मतिज्ञानविषयः	67

विषय:	पृष्ठ:
❑ श्रुतज्ञानविषयस्यावधिज्ञानविषयश्च	68
❑ मन:पर्यायविषय: केवलज्ञानविषयश्च, मत्यज्ञान-श्रुताज्ञान-विभङ्गज्ञानविषय:	70
❑ प्रत्यक्ष-परोक्षज्ञानविचारणा	71
❑ पञ्चज्ञानानां सहभाव:	72
❑ ज्ञानानां स्थितय:	73
❑ ज्ञानानामन्तराणि	74
❑ दर्शनस्वरुपं	76
❑ उपयोगा:	77
❑ आहारविवरणं	78
❑ चतुर्दशगुणस्थानानि	80
❑ योगा:	88
❑ भाषास्वरुपं	91

चतुर्थ: सर्ग:

❑ संसारिजीवानां एकादिद्वाविंशतिविधा: प्रकारा:	93
❑ निगोदगोलकप्ररुपणा	95
❑ निगोदेषु व्यावहारिकाव्यावहारिकाश्च जीवा:	96
❑ लोकव्यापीसूक्ष्मनिगोद:	97
❑ तेषां पर्यायादिद्वारचतुष्टयं, भवस्थिति:	97
❑ सूक्ष्मनिगोदजीवानां त्रिधा कायस्थिति:	97
❑ तेषां देहा:, देहमानं, समुदधाता:, गति:	98
❑ आगति:, लेश्या:, आहारदिक्, संहननानि	99
❑ कषाया:, संज्ञा:, इन्द्रियाणि, वेद:, दृष्टि:, ज्ञानं	100
❑ आहारकत्वं, गुणा:, योगा:, मानं	100
❑ लघ्व्यल्पबहुता, दिगपेक्षयाऽल्पबहुता, अन्तरं	101

पञ्चम: सर्ग:

❑ बादरेकेन्द्रियजीवा:	102
❑ पृथ्वीकायभेदा:	102
❑ अप्कायभेदा:, अग्निकायभेदा:, वायुकायभेदा:	103
❑ वनस्पतेर्भेदा:	103
❑ बीजानां ध्वस्ताध्वस्तयोनिस्वरुपं	105
❑ साधारणवनस्पतेर्लक्षणानि	106
❑ प्रत्येकवनस्पतिभेदा:	107
❑ पृथ्व्यप्तिकायस्थानानि	111
❑ वायुकायस्थानं, वनस्पतिस्थानं बादराणां स्थानानि	112
❑ तेषां पर्याप्ति:, योनि:	113
❑ योनिसंवृतत्वादि:, भवस्थिति:	114
❑ कायस्थिति:, देहा:, संस्थानं, अङ्गमानं	115
❑ समुद्घात:	117
❑ गति:, आगति:, अनन्तराप्ति:, समये मुक्ति:	118
❑ लेश्या, आहारदिक्, मानं, दिगपेक्षयाल्पबहुत्वं	119
❑ अन्तरं	121

षष्ठ: सर्ग:

❑ विकलेन्द्रियेषु द्विन्द्रियत्रीन्द्रियभेदा:	121
❑ चतुरिन्द्रियभेदा:	122
❑ विकलेन्द्रियाणां स्थानं, पर्याप्तय:, योनिस्वरुपं, भवस्थिति:, कायस्थिति:	122
❑ देहादारभ्य संज्ञितापर्यन्तं वर्णनं	123
❑ वेदादारभ्याल्पबहुत्वपर्यन्तं	124
❑ दिगपेक्षयाऽल्पबहुत्वं, अन्तरं	125
❑ पञ्चेन्द्रियजीवस्वरुपं, तत्र जलचरा:, चतुष्पदा:	125
❑ उरपरिसर्पा:, भूजपरिसर्पा:	126
❑ तेषां स्थानादारभ्यान्तरपर्यन्तं वर्णनं	127

विषय: पृष्ठ:

सप्तम: सर्ग:

- मनुष्यभेदा:, तत्र संमूर्च्छिमनराणां स्थानादारभ्य द्वारवर्णनं 132
- गर्भजनरभेदा:, आर्यदेशा: 134
- तेषां स्थानादारभ्य द्वारवर्णनं 134
- सूत्रलक्षणं 136

अष्टम: सर्ग:

- चतुर्धा सुरा: 139
- परमाधार्मिकसुरवर्णनं 139
- व्यन्तरामरवर्णनं 140
- ज्योतिष्क-वैमानिकसुरवरा: 142
- देवानां स्थानादारभ्य द्वारवर्णनं 142

नवम: सर्ग:

- सप्तधा नारका:, तेषां स्थानादारभ्य द्वारवर्णनं 147

विषय: पृष्ठ:

दशम: सर्ग:

- भवसंवेध:, जीवानां ज्येष्ठकनिष्टायुश्चतुर्भङ्गी 149
- कर्मबंधहेतव: 154
- अष्टविधकर्मवर्णनं 155

एकादश: सर्ग:

- पुद्गलास्तिकायवर्णनं 161
- पुद्गलानां दशविध: परिणाम: 162

विषय: पृष्ठ:

- पुद्गलस्य विस्रसाबन्ध: प्रयोगबन्धश्च 162
- पुद्गलस्य स्पृशदस्पृशद्गति: 163
- पुद्गलानां बन्धादिदशविधपरीणामा: 163

क्षेत्रलोक:

द्वादश: सर्ग:

- लोकसंस्थानं रज्जुमानञ्च 169
- खण्डुकमानं, खण्डुकमानेन लोकमानं 170
- रुचकप्रदेशा:, तेनोद्ध्वाधोमध्यलोकविभाग: 171
- रुचकाद् दिग्विदिग्निर्गम: 171
- लोकदिशामाकार: 172
- कृतयुग्मादिस्वरुपं 172
- दिशामन्ये भेदा: 173
- ऊर्ध्वाधोलोकमध्य: 174
- दृष्टलोकमानं, वर्गितलोकमानं 174
- घनीकृतलोकमानं 174
- लोकमानगणनायां दृष्टांत: 176
- अधोलोकस्य विशेषवर्णनं 176
- सप्तपृथिवीनामानि, तेषां मानादि 176
- रत्नप्रभापृथ्वीवर्णनं 176
- भौमेयनगराणि 177
- अष्टधा व्यन्तराणां वर्णनं 178

त्रयोदश: सर्ग:

- रत्नप्रभापृथिव्यां भवनपतिदेवानामावासा: 181
- भवनपत्यासुराणामालयसङ्ख्या 182
- चमरेन्द्रस्योत्पातपर्वत: 182
- चमरचञ्चाराजधानी 183
- चमरेन्द्रस्योत्पत्ति-कर्तव्यवर्णनं 183

विषय:	पृष्ठ:
❑ चमरस्य क्रीडारतिस्थानं	184
❑ साम्प्रतीनचमरस्य पूर्वभवः, चमरोत्पातः	184
❑ शक्रवज्रभयद्वीरशरणं	185
❑ चमरस्य त्रायस्त्रिंशकानां पूर्वभववर्णनं	185
❑ अग्रमहिषीणां पूर्वजन्मवर्णनं	186
❑ बलीन्द्रनिरुपणं	187
❑ असुराणां शरीरादिवर्णनं	189
❑ धरणेन्द्रोत्पत्तिः, परिवारशक्तिवर्णनं	189
❑ लोकपालानां शक्तिः, असुराणां शेष-वर्णनं	191

चतुर्दशः सर्गः

❑ नरकावासवीथीवर्णनं, त्रयोदश प्रस्तराः	194
❑ नरकावासाः, नरकेषु वेदनादयः	195
❑ परमाधार्मिककृताः व्यथाः	197
❑ परमाधार्मिकत्वकारणानि	197
❑ तेषां अग्रेतनजन्म, तत्र वेदना	198
❑ त्रयोदश प्रतरे नारकाणां देहमानं	198
❑ प्रतिप्रतरे नारकाणां जघन्योत्कृष्टायुः	198
❑ वंशापृथ्व्यां नरकावासाः	199
❑ प्रतिप्रतरे तेषां संख्या	199
❑ तत्र प्रतिप्रतरे देहमानं	200
❑ शैलापृथ्वीवर्णनं	200
❑ तत्र प्रतिप्रतरे नरकावाससङ्ख्या	201
❑ प्रतिप्रतरे नारकाणां देहमानं, जघन्योत्कृष्टायुः	201
❑ अञ्जनापृथ्वी निरुपणं	202
❑ प्रतिप्रतरे नरकावासाः	202
❑ तत्र परमाधार्मिककृता पीडा नास्ति	203
❑ प्रतिप्रतरे देहमानं, आयुः, लेश्या	203
❑ रीष्टापृथ्वी वर्णनं	203
❑ प्रतिप्रतरे नरकवासाः, देहमानं, आयुः, लेश्या	204
❑ मघापृथ्वीवर्णनं	204

विषय:	पृष्ठ:
❑ तत्र नरकावासाः, देहमानं, आयुः	205
❑ माघवतीपृथ्वीवर्णनं	205
❑ प्रतिप्रतरे नरकावासाः, देहमानं, आयुः	206
❑ सप्तनरकोत्पतियोग्यजीवाः	206
❑ नरकोद्वृत्तानां विशेषकथनं	206
❑ नरकायुर्बन्धकारणानि	207

पञ्चदशः सर्गः

❑ तिर्यग्लोकवर्णनं	208
❑ असङ्ख्यद्वीपसमुद्रनाम स्वरुपं	208
❑ द्वीपसमुद्रमानं	209
❑ जम्बूद्वीपवर्णनं	209
❑ जम्बूद्वीपस्य शाश्वताशाश्वतरुपता	210
❑ जम्बूद्वीपस्य जगती-वेदिकावर्णनं	210
❑ जगतीद्वाराणि, तद्वर्णनं	211
❑ अपरजम्बूद्वीपजगती वर्णनविशेषः	213
❑ रत्नमयो वप्रः, द्वाराणि, रत्नभद्रासनानि	214
❑ वनानि, प्रासादाः, सिंहासनाः, मणिपीठिकादिः	215
❑ चैत्यस्तूपाः, शाश्वतप्रतिमाः, चैत्यवृक्षः, महेन्द्रध्वजाः	216
❑ सुधर्मासभामध्यभागवर्णनं	216
❑ माणवकचैत्यस्तंभः, तन्मध्ये जिनास्थिनि	217
❑ देवच्छन्दकः, सिद्धायतनं, उपपातसभा	217
❑ अभिषेकादिसभाः	218
❑ जम्बूद्वीपस्य द्वाराणामन्तरं	218
❑ जम्बूद्वीपस्य मध्यभागवर्णनं	218

षोडशः सर्गः

❑ इषुजीवादिपरिभाषा	219
❑ क्षेत्रफलादिवर्णनं	220
❑ भरतक्षेत्रे षट्खण्डादिमानं	220

विषय:	पृष्ठ:
❑ वैताढ्यगिरिवर्णनं	221
❑ तत्र नवकूटानि	222
❑ शाश्वतप्रतिमाङ्गोपाङ्गवर्णनं	223
❑ वैताढ्यस्य द्वे गृहे	224
❑ चक्रीकृतमण्डलानि	225
❑ नवनिधिस्थानं	226
❑ उत्तरभरतार्द्धवर्णनं	226
❑ शास्त्रे मतान्तरस्य कारणम्	226
❑ हिमवान् पर्वत:	227
❑ सिद्धायतनादि कूटानि	227
❑ सिद्धालयमानं	227
❑ पद्महृद-श्रीभवनं	228
❑ पद्महृदान्निर्गतागङ्गावर्णनम्	229
❑ सिन्धुमहानदीवर्णनम्	231
❑ गजदन्तपर्वता: आन्तरद्वीपा:	232
❑ हैमवतक्षेत्रवर्णनम्	233
❑ महाहिमवानपर्वत:	234
❑ हरिवर्षक्षेत्रम्	236
❑ निषधपर्वतवर्णनम्	237
❑ प्रसङ्गात् शीतास्वरुपम्	238

सप्तदश: सर्ग:

❑ महाविदेहवर्णनम्	239
❑ अधोग्रामा:	240
❑ द्वात्रिंशत्विजया:	240
❑ विजयानां राजधान्य:, तत्रस्थानां मनुजानां शरीराहारादिमानं	243
❑ गंधमादनमाल्यवन्तौ पर्वतौ, तत्रकुटानि	246
❑ कुरुक्षेत्रे युगलिका:, तेषां वर्णनम्	248
❑ जम्बूपीठ:, जम्बूवृक्ष:	250
❑ तत्र सिद्धायतनम्	251

विषय:	पृष्ठ:
❑ मूलजम्बूवृक्षस्य परितस्त्र्येजम्बूवृक्षा:	252
❑ प्रासादा:, कूटा:	253
❑ जम्बूवृक्षस्य नामांतराणि	254
❑ अनादृतपूर्यामनादृतदेव: सपरिवार:	254
❑ सौमनसविद्युत्प्रभाभिधौ पर्वतौ	254
❑ देवकुरुरुत्तरकुरु:	256

अष्टादश: सर्ग:

❑ मेरुपर्वतवर्णने मानम्	257
❑ भद्रसालवनम्	260
❑ नन्दनवनम्	262
❑ सौमनसाभिधवनम्	265
❑ पाण्डुकवनं, तत्र चतस्र: शिला:	266

एकोनविंश: सर्ग:

❑ नीलवान् पर्वत:	269
❑ रम्यक्षेत्रं	270
❑ रुक्मिपर्वत:	271
❑ हैरण्यवतक्षेत्रम्	272
❑ शिखरीपर्वत:	272
❑ ऐरवतक्षेत्रम्	274

विंशतितम: सर्ग:

❑ सूर्यचार:, चन्द्रचार:	279
❑ सूर्यमण्डलक्षेत्रम्	280
❑ त्रिविधा मण्डलाबाधा	281
❑ मण्डलान्तरप्ररुपणा	282
❑ मण्डलचारप्ररुपणा	283
❑ दिनरात्रिप्रमाणप्ररुपणा	283
❑ कर्कसंक्रान्तौ आतपक्षेत्रतम:क्षेत्रयो: स्वरुपम्	286
❑ क्षेत्रविभागेन दिनरात्रिमानप्ररुपणा	288

विषय:	पृष्ठ:
❑ मण्डलानां परिक्षेपप्ररुपणा	288
❑ मण्डलानां मुहूर्तगतिप्ररुपणा	289
❑ मण्डलानां दृष्टिपथप्राप्तिप्ररुपणा	290
❑ अथ चन्दचारप्ररुपणा	294
❑ तत्र मण्डलक्षेत्रपरिमाणप्ररुपणा	294
❑ अबाधाप्ररुपणा	295
❑ मण्डलानां परिक्षेपप्ररुपणा	295
❑ मण्डलानां मुहूर्तगतिप्ररुपणा	296
❑ दृष्टिपथप्राप्तिप्ररुपणा	297
❑ मण्डलार्धमण्डलयो: कालमानम्	298
❑ ध्रुवराहु: पर्वराहुश्च	298
❑ तिथिमानादि	299
❑ चन्द्रस्वरुपं नक्षत्रस्वरुपञ्च	302
❑ नक्षत्राणां मण्डलसङ्ख्या, मण्डलक्षेत्रं, मेरोरबाधा, मण्डलविष्कम्भादि, मुहूर्तगति:	303
❑ चन्द्रमण्डलावेश:	304
❑ नक्षत्राणामाकृति:	308
❑ अहोरात्रसमापकनक्षत्राणि	310
❑ ग्रहा:	312

एकविंशतितम: सर्ग:

❑ लवणोदधि:, तस्य गोतीर्थम्	313
❑ समुद्रस्य द्वाराणि, पातालकलशा:	315
❑ लघुपातालकलशा:, समुद्रवेलाकारणम्	316
❑ वेलन्धराणामावासपर्वता:	319
❑ लवणसमुद्रे गौतमद्वीप:	322
❑ लवणाधिपतिसुस्थितदेवस्य परिवार:	322
❑ चन्द्रसूर्यद्वीपा:	323
❑ लवणसमुद्रशिखरया ज्योतिष्काणां गतेर्न व्याघात:	324

विषय:	पृष्ठ:

द्वाविंशतितम: सर्ग:

❑ धातकीखण्ड निरुपणम् जम्बूद्वीपवद्विशदवर्णनम्	326

त्रयोविंशतितम: सर्ग:

❑ पुष्करवरद्वीप:	339
❑ मानुषोत्तरनगवर:	339
❑ नृक्षेत्रम्	341
❑ नृक्षेत्रात्परतो न भवेच्नृणां गर्भाधानं, जन्ममृत्यू संमूर्च्छिमनरोद्भव:	347
❑ नरक्षेत्रे वर्षक्षेत्रादिसंग्रह:	347
❑ विहरमान जिननामानि	349

चतुर्विंशतितम: सर्ग:

❑ स्थिर सूर्यचन्द्र व्यवस्था	353
❑ परिरयश्रेणि:	355
❑ पुष्करोदद्यादिसमुद्रद्वीपवर्णनम्	357
❑ नन्दीश्वरद्वीपवर्णनम्	359
❑ द्वीपमध्ये चत्वारोऽञ्जनपर्वता:	359
❑ तत्र शाश्वतजिनालया:	362
❑ नन्दीश्वरद्वीपमध्ये चत्वार: रतिपर्वता:	366
❑ अग्रेतनद्वीपसमुद्रवर्णनम्	367
❑ रुचकद्वीप-रुचकपर्वत-शाश्वतचैत्य-दिक्कुमारिका निवासकूटानि	369

पञ्चविंश: सर्ग:

❑ तिर्यग्लोके ज्योतिश्चक्रम्	370
❑ समभूतलात्सूर्यचन्द्रोच्चत्वम्	370
❑ ग्रहपटलोच्चत्वं नक्षत्रपटलञ्च	371

विषय:	पृष्ठ:
ज्योतिश्चक्रे विमानानि कपित्थार्द्धाकृतीनि	372
ज्योतिष्कविमानानि स्वयमेव चरन्ति तथाप्याभियोगिका अधः स्थित्वा वहन्ते,	373
तेषां वर्णनम्	
विमानेषु पर्षदादि वर्णनम्	376
चन्द्रसूर्याग्रमहिषीपूर्वभवः परिवारश्च	377
चन्द्रसूर्यविमाने देवदेवीनां जघन्योत्कृष्टस्थितिः	378
ग्रहानुकूल्य-प्रातिकूल्यरहस्यम्	379

षड्विंशः सर्गः

उर्ध्वलोकस्वरुपम्	380
सौधर्मेशानादिदेवलोकाः	381
वृत्तादि विमानव्यवस्था	382
चतस्रो दिव्यगतयः	386
देवानां सुखभोगः	388
सुधर्मासभा	390
तत्र सिद्धायतनम्	391
अभिषेकालङ्कारव्यवसायादिसभा	391
उपपातशय्या, तत्र देवोत्पत्तिः, तेषामाचारः	392
नवोत्पन्नदेवः जिनार्चां पूजयन्ति	394
कल्पातीतदेववर्णनम्	397
देवानां भाषा	398
स्वर्गसुखम्	398
देवाः कथं नामागच्छन्ति	400
स्नेहादिकारणाद्नरकेऽपि देवा गच्छन्ति	402
अवधिज्ञानक्षेत्रवर्णनम्	403
वैक्रियशरीरमानम्	404
परिगृहितापरिगृहितादेवीस्वरुपम्	405
देवाः कदाचिद्दुःखमप्युपभुञ्जते	406
च्यवनचिह्नानि	407
उत्पत्तिच्यवनयोर्देवलोके विरहकालः	408
सौधर्मेशानेन्द्रयोः स्वरुपं, द्वयोः पूर्वभवौ	409
शक्रस्य परिवारादिसमृद्धिः	409
शक्राग्रमहिषीपूर्वजन्म	414
शक्रस्य कामक्रीडा	414
लोकपालानां स्वरुपम्	415
सोमराजयमराजसेवकाः, तत्कार्याणि	415
वरुणवैश्रमणसेवकाः, तत्कार्याणि	416
शक्रस्य जीवनप्रसङ्गः	417
ईशानेन्द्रपूर्वजन्म	418
इशानेन्द्रस्य दृष्टिशक्तिः	419
अग्रमहिषीपूर्वजन्म	420
ईशानेन्द्रस्यपरिवारादिसमृद्धिः	420
शक्रेशानेन्द्रयोर्विग्रहेसति सनत्कुमारेन्द्रः समाधानं करोति	422

सप्तविंशतितमः सर्गः

तृतीयतुर्यदेवलोकवर्णनम्	423
विमानपंक्तिः	424
देवानामायुः	425
अवधिज्ञानक्षेत्रम्	426
सनत्कुमारेन्द्रस्य परिवारादिसमृद्धिः	426
माहेन्द्राधिपतिवर्णनम्	427
ब्रह्मलोकस्वर्गवर्णनम्	428
तमस्कायस्वरुपम्	430
द्वे कृष्णराज्यौ	431
लोकान्तिकदेवानां विमानानि नामानि च	432
लान्तकस्वर्गः, विमानपङ्क्तिः,	433
लान्तकेन्द्रसमृद्धिः	434
किल्बिषिकदेवाः	435

विषय:	पृष्ठ:
❑ जमालिदृष्टांत:	436
❑ महाशुक्रदेवलोक:, तस्य वर्णनम्	437
❑ महाशुक्रसुरेश्वरसमृद्धि:	438
❑ सहस्रारसुरालय:, तस्य वर्णनम्	439
❑ सहस्रारदेवराजसमृद्धि:	439
❑ आनतप्राणतस्वर्गवर्णनम्	440
❑ आरणाच्युतस्वर्गवर्णनम्	442
❑ अच्युतेन्द्रपूर्वजन्म	443
❑ ग्रैवेयकानुत्तरवर्णनम्	445
❑ गैवेयकसुखानि	446
❑ अनुत्तरस्वर्गवर्णनम्	448
❑ सर्वार्थसिद्धविमानवर्णनं	449
❑ सिद्धशिलास्वरुपम्	451

काललोक:

अष्टाविंशतितम: सर्ग:

❑ कालस्य व्याख्या	453
❑ षड्ऋतुप्रभाव:, कालद्रव्यसिद्धि:	454
❑ त्रिधा परिणाम:	456
❑ कालशब्दस्येकादश निक्षेपा:	457
❑ दशधा सामाचारी	458
❑ उपक्रमचर्चा	459
❑ त्रिधा प्रमाणकाल:	461
❑ कालविशेष: समयकाल:	462
❑ क्षुल्लकभवप्रकरणम्	462
❑ क्षुल्लकभवप्रयोजनम्	463
❑ तौल्यमेयस्वरुपं, तुलाया मानं स्वरुपञ्च	464
❑ नालिकाकालादिस्वरुपम्	465
❑ सूर्य-चन्द्रसंवत्सरमानम्	466

विषय:	पृष्ठ:
❑ अभिवर्धितवर्णनम्	467
❑ चन्द्रमासप्रयोजनम्	469
❑ नक्षत्रवर्षे तौल्यमेयमानम्	470
❑ कर्मसंवत्सरस्य लक्षणम्	470
❑ युगस्वरुपवर्णनम्	471
❑ सूर्यमुहूर्तप्रमाणानयनोपाय:	472
❑ भरतादिक्षेत्रे युगादिदिन:	473
❑ प्रतियुगमयनानि, सूर्यायनज्ञानविषये करणम्	475
❑ विषुवत्प्रकरणम्	479
❑ अयनप्रकरणम्	480
❑ सूर्यर्तुज्ञानविषये करणनिरुपणम्	481
❑ ऋतुपूरकतिथिज्ञानाय करणनिरुपणम्	483
❑ अथ चन्द्रर्तूस्वरुपं करणञ्च	484
❑ मास-दिन-रात्रिनामानि	486
❑ तिथिनामानि-तिथिस्वामिन:, तिथिमानम्	487
❑ मुहूर्तप्रकरणम्	493
❑ सूर्यचन्द्र संबन्धिनक्षत्राणां परावर्तम्	493
❑ पौरुषीनिरुपणम्	497
❑ पादोनपौरुषी, सार्द्धपौरुषी, पूर्वार्द्धम्	501

एकोनत्रिंशत्तम: सर्ग :

❑ माथुरवालभ्यवाचनागतगणित:	503
❑ पल्यसागरभेदत: द्विधोपमेयम्	505
❑ कल्पतरुवर्णनम्	506
❑ युगलिकमनुष्यवर्णनम्	508
❑ मानवस्य द्वात्रिंशल्लक्षणा:	509
❑ युगलिकस्त्रीवर्णनम्	509
❑ युगलिकजीवनं प्रथमारके	511
❑ द्वितीयारकवर्णनम्	516

विषय:	पृष्ठ:
❑ तृतीयारकवर्णनम्	517
❑ कुलकर-प्रथमतीर्थेश-तद्दर्शितव्यवस्था	518
❑ प्रथमचक्रवर्ती-तीर्थप्रवर्तनादि	519

त्रिंशत्तमः सर्गः

❑ विंशतिस्थानकानि	520
❑ तत्तपोविधिसम्प्रदायः	522
❑ जिनगर्भोत्पत्तिः	523
❑ चतुर्दशस्वप्नदर्शन-दोहदादि	524
❑ उच्चग्रहाः, छत्रादियोगाः, दिक्कुमारिकाकल्पः	525
❑ जन्मकल्याणकोत्सवः	527
❑ आदीक्षान्तं प्रभोर्जीवनम्	533
❑ द्वाविंशतिः परिषहाः	537
❑ ध्यानस्वरुपम्	539
❑ प्रभोर्ज्ञानोत्पत्तिः, समवसरणम्	544
❑ जिनदेशनावर्णनम्	550
❑ श्रावकाणां द्वादशव्रताः	552
❑ अष्टप्रवचनमातरः, तीर्थस्थापना	554
❑ शीलाङ्गनामष्टादशसहस्राणि	555
❑ द्वादशव्रतानां भङ्गसङ्कलना	559
❑ समवसरणे द्वादशपर्षदा, प्रभोः प्रभावः	562
❑ बलिविधिनां, प्रतिहार्याष्टकं	564
❑ चतुस्त्रिंशदतिशयाः, अष्टादशदोषाः	565
❑ निर्वाणकल्याणकं	566

एकत्रिंशत्तमः सर्गः

❑ चक्रवर्तिस्वरुपम्	568
❑ चक्रवर्तिनामकर्मबन्धकारणानि	568
❑ षट्त्रिंशन्नृगुणाः	569
❑ चक्ररत्नोत्पत्तिः, दिग्विजयः	570
❑ चक्रवर्तित्वाभिषेकः	580
❑ चक्र-दण्ड-खड्गरत्नवर्णनम्	581
❑ छत्र-चर्मरत्नवर्णनम्	582
❑ मणि-काकिणीरत्नवर्णनम्	583
❑ सेनापतिरत्नवर्णनम्	584
❑ गृहपतिवार्द्धकीरत्नवर्णनम्	585
❑ पुरोहित-गजाश्वरत्नवर्णनम्	589
❑ स्त्रीरत्न-नवनिधिवर्णनम्	591
❑ चक्रवर्तिशेषवर्णनम्	593
❑ वासुदेव बलदेवस्वरुपम्	594
❑ प्रतिविष्णु स्वरुपं, नव नारदाः	596

द्वात्रिंशत्तमः सर्गः

❑ सप्तकुलकरवर्णनम्	598
❑ प्रथमजिनचरित्रम्	600
❑ अजितजिनचरित्रम्	611
❑ सम्भवजिन चरित्रम्	612
❑ अभिनन्दनजिनचरित्रम्	613
❑ सुमतिजिनचरित्रम्	614
❑ पद्मप्रभजिनचरित्रम्	615
❑ सुपार्श्वजिनचरित्रम्	616
❑ चन्द्रप्रभजिनचरित्रम्	617
❑ सुविधिजिनचरित्रम्	618
❑ शीतलजिनचरित्रम्	619
❑ श्रेयांसजिनचरित्रम्	620
❑ श्रीवासुपूज्यजिनचरित्रम्	621
❑ श्रीविमलजिनचरित्रम्	622
❑ श्रीअनंतजिनचरित्रम्	623
❑ श्रीधर्मजिनचरित्रम्	624
❑ श्रीशांतिजिनचरित्रम्	625

विषय:	पृष्ठ:
❑ श्रीकुंथुजिनचरित्रम्	627
❑ श्रीअरजिनचरित्रम्	628
❑ श्रीमल्लिजिनचरित्रम्	629
❑ श्रीमुनिसुव्रतजिनचरित्रम्	630
❑ श्रीनमिजिनचरित्रम्	631
❑ श्रीनेमिजिनचरित्रम्	632
❑ श्री पार्श्वजिनचरित्रम्	633
❑ श्री वीरजिनचरित्रम्	634

त्रयस्त्रिंशत्तम: सर्ग:

❑ भरतचक्रीचरित्रं	644
❑ सगर - मघवा - सनत्कुमार चक्रीचरित्रं	645
❑ सुभूमचक्रीचरित्रम्	646
❑ महापद्मचक्रीचरित्रम्	648
❑ हरिषेण-जय-ब्रह्मदत्तचक्रीचरित्रम्	650
❑ नववासुदेवचरित्राणि	655
❑ रामायणसार:	655

चतुस्त्रिंशत्तम: सर्ग:

❑ पञ्चमारकस्वरुपम्	661
❑ षष्ठारक स्वरुपम्	667
❑ उत्सर्पिण्या: अरका:	672
❑ अनागतजिनजीवादिवर्णनम्	674

पञ्चत्रिंशत्तम: सर्ग:

❑ पुद्गलपरावर्तस्वरुपम्	682
❑ द्रव्यपुद्गलपरावर्त:	683
❑ क्षेत्रपुद्गलपरावर्त:	684
❑ काल-भावपुद्गलपरावर्त:	685
❑ अनुभागबन्धस्थानस्वरुपनिरुपणा	686

विषय:	पृष्ठ:

भावलोक:

षट्त्रिंशत्तम: सर्ग:

❑ औपशमिकादय: भावा:	692
❑ षड्भाववर्णनम्	693

सप्तत्रिंशत्तम: सर्ग:

❑ लोकप्रकाशग्रन्थस्थ बीजानि	704
❑ द्रव्यलोकस्य पदार्था:	705
❑ क्षेत्रलोकस्य पदार्था:	705
❑ काललोकस्य पदार्था:	706
❑ भावलोकस्य पदार्था:	707
❑ ग्रन्थकर्तु: प्रशस्ति:	708
❑ परिशिष्ट:- १	712
❑ परिशिष्ट-२	714
❑ परिशिष्ट-३	718
❑ ग्रन्थकाराणामन्यकृतय:	718
❑ साक्षीग्रन्था:	719

॥ ॐ ह्रीँ अर्हं नमः ॥

॥ ऐं नमः ॥

महामहोपाध्याय श्रीमद् विनयविजयगणिवरविरचितः

श्री लोकप्रकाशः

प्रथमो द्रव्यलोकः

अथ प्रथमः सर्गः ।

नमः श्रीपरमानन्दनिधानाय महस्विने । शंखेश्वरपुरोत्तंसपार्श्वनाथाय तायिने ॥ १ ॥
पिपर्ति सर्वदा सर्वकामितानि स्मृतोऽपि यः । स कल्पद्रुमजित्पार्श्वो, भूयात्प्राणिप्रियङ्करः ॥ २ ॥
पार्श्वक्रमनखाः पान्तु, दीप्रदीपाङ्कुरश्रियः । प्लुष्टप्रत्यूहशलभाः, सर्वभावावभासिनः ॥ ३ ॥
जयन्ति व्यञ्जिताशेषवस्तवोऽन्तस्तमोद्रुहः । गिरः सुधाकिरस्तीर्थकृतामद्भुतदीपिकाः ॥ ४ ॥
कृपाकटाक्षनिक्षेपनिपुणीकृतसेवका । भक्तव्यक्तसवित्री सा, जयति श्रुतदेवता ॥ ५ ॥
जीयाज्जगद्गुरुर्विश्वजीवातुवचनामृतः । श्रीहीरविजयः सूरिर्मदीयस्य गुरोर्गुरुः ॥ ६ ॥
श्रीकीर्तिविजयान् सूते, श्रीकीर्तिविजयाभिधः । शतकृत्वोऽनुभूतोऽयं, मन्त्रः स्यादिष्टसिद्धिदः ॥ ७ ॥
अस्ति लोकस्वरूपं यद्विप्रकीर्णं श्रुताम्बुधौ । परोपकारिभिः पूर्वपण्डितैः पिण्ड्यते स्म तत् ॥ ८ ॥
ततः संक्षिप्य निक्षिप्तमाम्नायैः करणादिभिः । संग्रहण्यादिसूत्रेषु, भूयिष्ठार्थं मिताक्षरम् ॥ ९ ॥
साम्प्रतं च क्रमात्प्रायः, प्राणिनो मन्दमेधसः । असुबोधमतस्तैस्तत्, कवित्वमिव बालकैः ॥ १० ॥
ततस्तदुपकृत्यै तन्मया किञ्चिद्वितन्यते । करणोक्त्यादिकाठिन्यमपाकृत्य यथामतिः ॥ ११ ॥
अयि ! प्रसन्नास्ते सन्तु, सन्तः सर्वोपकारिणः । मयि प्रवृत्ते पुण्यार्थमविमृश्य स्वशक्यताम् ॥ १२ ॥
शिशुक्रीडागृहप्राया, ममेयं वचसां कला । निवेशनीयास्तत्रामी, कथमर्था द्विपोपमाः ॥ १३ ॥
श्रीगुरुणां प्रसन्नानामचिन्त्यो महिमाथवा । तेजः प्रभावादादर्शे, किं न मान्ति धराधराः ॥ १४ ॥
संक्षिप्ताः संग्रहाः प्राच्या, यथा ते सुपठा मुखे । तथासविस्तरत्वेन, सुबोधो भवतादयम् ॥ १५ ॥

---

१. जीवातुर्जीवनौषधम् । २. लक्ष्मीयशोविजयेत्येतत्त्रयम् ।

लोकप्रकाशनामानं, ग्रन्थमेनं विचक्षणाः । आद्रियध्वं जिनप्रोक्तविश्वरूपनिरूपकम् ॥ १६ ॥

प्राप्यानुशासनमिदं समुप्रक्रमेऽहमैदंयुगीनविहरद्गुरुगौतमस्य ।
श्रीमत्तपागणपतेर्विजयादिदेवसूरीशितुर्विजयसिंहमुनीशितुश्च ॥ १७ ॥

मानैरङ्गुलयोजनरज्जूनां सागरस्य पल्यस्य । संख्याऽसंख्यानन्तैरुपयोगोऽस्तीह यद् भूयान् ॥ १८ ॥
ततः प्रथमतस्तेषां, स्वरूपं किञ्चिदुच्यते । तत्राप्यादावङ्गुलानां, मानं वक्ष्ये त्रिधा च तत् ॥ १९ ॥
उत्सेधाख्यं प्रमाणाख्यमात्माख्यं चेति तत्र च । उत्सेधात्क्रमतो वृद्धेर्जातमौत्सेधमङ्गुलम् ॥ २० ॥
तथाहि–द्विविधः परमाणुः स्यात्सूक्ष्मश्च व्यावहारिकः । अनन्तैरणुभिः सूक्ष्मैरेकोऽणुर्व्यावहारिकः ॥ २१ ॥
सोऽपि तीव्रेण शस्त्रेण, द्विधाकर्तुं न शक्यते । एनं सर्वप्रमाणानामादिमाहुर्मुनीश्वराः ॥ २२ ॥
व्यवहारनयेनैव, परमाणुरयं भवेत् । स्कन्धोऽनन्ताणुको जातसूक्ष्मत्वो निश्चयात्पुनः ॥ २३ ॥
अनन्तव्यवहाराणुनिष्पन्नोत्श्लक्ष्णश्लक्ष्णिका । निष्पद्यते पुनः श्लक्ष्णश्लक्ष्णिका ताभिरष्टभिः ॥ २४ ॥

अयं भगवत्याद्यभिप्रायो, जीवसमास सूत्रे च–परमाणू य अणंता सहिया ओसह्णसह्णिया एक्का । साऽणंतगुणा संती ससह्णिया सोऽणु, ववहारी ॥१॥ आगमे चेयं पूर्वस्याः सकाशादनेकस्थानेष्वष्टगुणैव निर्णीता, अनेन त्वनन्तगुणा कुतोऽपि लिखितेति केवलिन एव वेत्तार इति तद्वृत्तौ ॥ जीवसमासवृत्तौ ॥

ताभिरष्टाभिरेकः स्यादूर्ध्वरेणुर्जिनोदितः । अष्टोर्ध्वरेणुनिष्पन्नस्त्रसरेणुरुदीरितः ॥ २५ ॥
त्रसरेणुभिरष्टाभिरेकः स्याद्रथरेणुकः । अष्टभिस्तैर्भवेदेकं, केशाग्रं कुरुयुग्मिनाम् ॥ २६ ॥
ततोऽष्टघ्नं हरिवर्षरम्यकक्षेत्रभूस्पृशाम् । ततोऽष्टघ्नं हैमवतहैरण्यवतयुग्मिनाम् ॥ २७ ॥
तस्मादष्टगुणस्थूलं, वालस्याग्रमुदीरितम् । पूर्वापरविदेहेषु, नृणां क्षेत्रानुभावतः ॥ २८ ॥
स्थूलमष्टगुणं चास्माद्धरतैरवताङ्गिनाम् । अष्टभिस्तैश्च वालाग्रैर्लिक्षामानं भवेदिह ॥ २९ ॥

अयं तावत्संग्रहणीबृहद्वृत्ति, प्रवचनसारोद्धारवृत्त्याद्यभिप्रायः, जम्बूद्वीपप्रज्ञप्तिसूत्रवृत्त्यादिषु त्वष्टभिः पूर्वापरविदेहनरकेशाग्रैरेव लिक्षामानमुक्तमिति ज्ञेयं ।

लिक्षाष्टकमिता यूका, भवेद्यूकाभिरष्टभिः । यवमध्यं ततोऽष्टाभिस्तैः स्यादौत्सेधमङ्गुलम् ॥ ३० ॥
चत्वार्युत्सेधाङ्गुलानां, शतान्यायामतो मतम् । तत्सार्द्धद्व्यङ्गुलव्यासं, प्रमाणाङ्गुलमिष्यते ॥ ३१ ॥
प्रमाणं भरतश्चक्री, युगादौ वाऽऽदिमो जिनः । तदङ्गुलमिदं यत्तत्, प्रमाणाङ्गुलमुच्यते ॥ ३२ ॥
यदुत्सेधाङ्गुलैः पञ्चधनुःशतसमुच्छ्रितः । आत्माङ्गुलेन चाद्योऽर्हन्, विंशाङ्गुलशतोन्मितः ॥ ३३ ॥
ततः षण्णवतिघ्नेषु, धनुःशतेषु पञ्चसु । शतेन विंशत्याढ्येन, भक्तेष्वाप्ता चतुःशती ॥ ३४ ॥
यच्च क्वाप्युक्तमौत्सेधात्सहस्रगुणमेव तत् । तदेकाङ्गुलविष्कम्भदीर्घश्रेणिविवक्षया ॥ ३५ ॥

यच्चतु:शतदीर्घाया:, सार्द्धद्व्यङ्गुलविस्तृते: । स्यादेकाङ्गुलविस्तारा, सहस्राङ्गुलदीर्घता ॥ ३६ ॥

दृष्टांतश्चात्र–

चतुरङ्गुलदीर्घाया:, सार्द्धद्व्यङ्गुलविस्तृते: । पट्या यथाङ्गुलव्यासश्चीरो दैर्घ्ये दशाङ्गुल: ॥ ३७ ॥

वस्तुत: पुनरौत्सेधात्सार्द्धद्विगुणविस्तृतम् । चतु:शतगुणं दैर्घ्ये, प्रमाणाङ्गुलमास्थितम् ॥ ३८ ॥

एतच्च भरतादीनामात्माङ्गुलतया मतम् । अन्यकाले त्वनियतमानमात्माङ्गुलं भवेत् ॥ ३९ ॥

यस्मिन्काले पुमांसो ये, स्वकीयाङ्गुलमानत: । अष्टोत्तरशतोत्तुङ्ग, आत्माङ्गुलं तदङ्गुलम् ॥ ४० ॥

एतत्प्रमाणतो न्यूनाधिकानां तु यदङ्गुलम् । तत्स्यादात्माङ्गुलाभासं, न पुन: पारमार्थिकम् ॥ ४१ ॥

यदाहु: प्रवचनसारोद्धारे– [श्लोक १३९४, १३९५] "जे जंमि जुगे पुरिसा, अट्ठसयंगुलसमुच्छिआ हुंति । तेसिं जं निअमंगुल–मायंगुलमित्थ तं होइ ॥ १ ॥ जे पुण एअपमाणा, ऊणा अहिगा य तेसिमेअं तु । आयंगुलं न भण्णइ, किंतु तदाभासमेवत्ति" ॥ २ ॥ प्रज्ञापनावृत्तौ तु– "जेणं जया मणूसा, तेसिं जं होई माणरुवं तु । तं भणिअमिहाऽऽयंगुल–मणिअयमाणं पुण इमं ॥ तु" ॥ १ ॥ इत्येवंरुपमात्माङ्गुलं । परमाणू रहरेणू तसरेणू जं अग्गयं च वालस्स । लिक्खा जूया य जवो, अट्ठगुण–विवड्ढिया कमसो ॥ २ ॥ इत्यादिरुपमुच्छ्रयाङ्गुलं । उस्सेहंगुलमेगं, हवइ पमाणंगुलंसहस्सगुणं । तं चेव दुगुणियं खलु, वीरस्साऽऽयंगुलं भणियं ॥ ३ ॥ इत्येवंरूपं प्रमाणाङ्गुलमित्युक्तमिति जं० प्र०

उत्सेधाङ्गुलमानेन, ज्ञेयं सर्वाङ्गिनां वपु: । प्रमाणाङ्गुलमानेन, नगपृथ्व्यादिशाश्वतम् ॥ ४२ ॥

तत्रापि—

तस्याङ्गुलस्य दैर्घ्येण, मीयते वसुधादिकम् । इत्याहु: केचिदन्ये च, तत्क्षेत्रगणितेन वै ॥ ४३ ॥

तद्विष्कम्भेण केऽप्यन्ते, पक्षेष्वेतेषु च त्रिषु । ईष्टे प्रामाणिकं पक्षं, निश्चेतुं जगदीश्वर: ॥ ४४ ॥

अत्र प्रथमपक्षे एकस्मिन् योजने उत्सेधाङ्गुलनिष्पन्नानि चत्वारि योजनशतानि भवन्ति, द्वितीयपक्षे सहस्रं, तृतीये दशक्रोशा भवन्ति, परं श्री अनुयोगद्वारचूर्णौ तृतीय एव पक्ष आदृतो दृश्यते, तथा च तद् ग्रन्थ:– "जे य पमाणंगुलाओ पुढवाइप्पमाणा आणिज्जंति ते अ पमाणंगुलविक्खंभेणं आणेयव्वा, ण पुण सूइअंगुलेणं" ति ॥ श्री मुनिचन्द्रसूरिकृताङ्गुलसप्ततिकायामप्युक्तं "एयं च खित्तगुणिएण, केइ एयस्स जं पुण भिणंति । अन्ने उ सूइअंगुलमाणेण न सुत्तभणियं तं" ॥ १ ॥ अत्र चर्चादिविस्तर: अङ्गुलसप्ततिकातोऽवसेय: ।"

वापीकूपतडागादि, पुरदुर्गगृहादिकम् । वस्त्रपात्रविभूषादि, शय्याशस्त्रादि कृत्रिमम् ॥ ४५ ॥

इन्द्रियाणां च विषया:, सर्वं मेयमिदं किल । आत्माङ्गुलैर्यथामानमुचितै: स्वस्ववारके ॥ ४६ ॥

आत्मोत्सेधप्रमाणाख्यं, त्रैधमप्यङ्गुलं त्रिधा । सूच्यङ्गुलं च प्रतराङ्गुलं चापि घनाङ्गुलम् ॥ ४७ ॥

एकप्रदेशबाहल्यव्यासैकाङ्गुलदैर्घ्ययुक् । नभ:प्रदेशश्रेणिर्या, सा सूच्यङ्गुलमुच्यते ॥ ४८ ॥

वस्तुतस्तदसंख्येयप्रदेशमपि कल्प्यते । प्रदेशत्रयनिष्पन्नं, सुखावगतये नृणाम् ॥ ४९ ॥
सूची सूच्यैव गुणिता, भवति प्रतराङ्गुलम् । नवप्रादेशिकं कल्प्यं, तद्दैर्घ्यव्यासयोः समम् ॥ ५० ॥
प्रतरे सूचीगुणिते, सप्तविंशतिखाङ्शकम् । दैर्घ्यविष्कम्भबाहल्यैः, समानं स्याद् घनाङ्गुलम् ॥ ५१ ॥
तत्र गुणनविधिश्चैवम्—
अङ्कोऽन्तिमो गुण्यराशेर्गुण्यो गुणकराशिना । पुनरुत्सारितेनोपान्त्यादयोऽप्येवमेव च ॥ ५२ ॥
उपर्यधश्चादिमान्त्यौ, राश्योर्गुणकगुण्ययोः । कपाटसन्धिवत्स्थाप्यौ, विधिरेवमनेकधा ॥ ५३ ॥
स्थानाधिक्येन संस्थाप्यं, गुणितेऽङ्के फलं च यत् । यथास्थानकमङ्कानां, कार्या संकलना ततः ॥ ५४ ॥

अङ्कस्थानानि चैवम्— [लीलावती श्लोक ११-१२] एकं दशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमतः । अर्बुदमब्जं खर्वं निखर्वमहापद्मशङ्कवस्तस्मात् ॥ जलधिश्चान्त्यं मध्यं परार्ध्यमिति दशगुणोत्तरं संज्ञाः ॥ इति ॥ अत्रोदाहरणम्—

पञ्चत्र्येकमितो राशिर्दिवाकरगुणीकृतः । स्याद्विंशा षोडशशती, क्रमोऽङ्कानां च वामतः ॥ ५५ ॥
अथ प्रसङ्गादुपयोगित्वाच्च भागहारविधिरुच्यते—
यद्गुणो भाजकः शुद्ध्येदन्त्यादेर्भाज्यराशितः । तत्फलं भागहारे स्यात्, भागाप्राप्तौ च खं फलम् ॥ ५६ ॥
अग्रे यथाऽऽप्यते भागः, पूर्वमङ्कं तथा भजेत् । षड्भिर्भागे यथा षष्टेः, प्राप्यन्ते केवलं दश ॥ ५७ ॥
अथ प्रकृतम्—
पादः स्यादङ्गुलैः षड्भिर्वितस्तिः पादयोर्द्वयम् । वितस्तिद्वितयं हस्तो, द्वौ हस्तौ कुक्षिरुच्यते ॥ ५८ ॥
कुक्षिद्वयेन दण्डः स्यात्तावन्मानं धनुर्भवेत् । युगं वा मुसलं वापि, नालिका वा समाः समे ॥ ५९ ॥
अङ्गुलैः षण्णवत्यैव, सर्वेऽपि प्रमिता अमी । सहस्राद्वितयेनाथ, क्रोशः स्याद्धनुषामिह ॥ ६० ॥
चतुष्टयेन क्रोशानां, योजनं तत्पुनस्त्रिधा । उत्सेधात्मप्रमाणाख्यैरङ्गुलैर्जायते पृथक् ॥ ६१ ॥
एवं पादादिमानानां, सर्वेषां त्रिप्रकारताम् । विभाव्य विनियुञ्जीत, स्वस्वस्थाने यथायथम् ॥ ६२ ॥
प्रमाणाङ्गुलनिष्पन्नयोजनानां प्रमाणतः । असंख्यकोटाकोटीभिरेका रज्जुः प्रकीर्तिता ॥ ६३ ॥
स्वयम्भूरमणाब्धेर्यं, पूर्वपश्चिमवेदिके । तयोः परान्तान्तरालं, रज्जुमानमिदं भवेत् ॥ ६४ ॥

लोकैश्च — यवोदरैरङ्गुलमष्टसंख्यैः हस्तोऽङ्गुलैः षड्गुणितैश्चतुर्भिः ।
हस्तैश्चतुर्भिर्भवतीह दण्डः, क्रोशः सहस्रद्वितयेन तेषाम् ॥
स्याद्योजनं क्रोशचतुष्टयेन, तथा कराणां दशकेन वंशः ।
निवर्त्तनं विंशतिवंशसंख्यैः, क्षेत्रं चतुर्भिश्च भुजैर्निबद्धम् ॥ इत्याद्यभिधीयते ।

मानं पल्योपमस्याथ, तत्सागरोपमस्य च । वक्ष्ये विस्तरतः किञ्चित्, श्रुत्वा श्रीगुरुसन्निधौ ॥ ६५ ॥

आद्यमुद्धारपल्यं स्यादद्धापल्यं द्वितीयकम् । तृतीयं क्षेत्रपल्यं स्यादिति पल्योपमं त्रिधा ॥ ६६ ॥
एकैकं द्विप्रकारं स्यात्, सूक्ष्मबादरभेदतः । त्रैधस्यैवं सागरस्याप्येवं ज्ञेया द्विभेदता ॥ ६७ ॥
उत्सेधाङ्गुलसिद्धैकयोजनप्रमितोऽवटः । उण्डत्वायामविष्कम्भैरेष पल्य इति स्मृतः ॥ ६८ ॥
परिधिस्तस्य वृत्तस्य, योजनत्रितयं भवेत् । एकस्य योजनस्योनषष्टभागेन संयुतम् ॥ ६९ ॥
संपूर्य उत्तरकुरुनृणां शिरसि मुण्डिते । दिनैरेकादिसप्तान्तै, रूढकेशाग्रराशिभिः ॥ ७० ॥

क्षेत्रसमास, बृहत्वृत्ति, जम्बूद्वीपप्रज्ञप्तिवृत्त्यभिप्रायोऽयं, प्रवचनसारोद्धारवृत्ति, संग्रहणीबृहत्वृत्त्योस्तु मुण्डिते शिरसि एकेनाह्ना द्वाभ्यामहोभ्यां यावदुत्कर्षतः सप्तभिरहोभिः प्ररुढानि वालाग्राणीत्यादि सामान्यतः कथनादुत्तरकुरु नरवालाग्राणि नोक्तानीति ज्ञेयं । 'वीरं जयसेहर' क्षेत्रविचारसत्कस्वोपज्ञवृत्तौ तु देवकुरूत्तरकुरूद्भवसप्तदिनजातोरणस्योत्सेधाङ्गुलप्रमाणं रोम सप्तकृत्वोऽष्टखण्डीकरणेन विंशतिलक्षसप्तनवतिसहस्रैकशतद्वापञ्चाशत्प्रमितखण्डभावं (२०९७१५२) प्राप्यते, तादृशै रोमखण्डैरेष पल्यो भ्रियत इत्यादिरर्थतः संप्रदायो दृश्यत इति ज्ञेयं ॥ एतानि चाङ्गुलसत्कानि रोमखण्डानि चतुर्विंशति गुणानि हस्ते, तानि चतुर्गुणानि धनुषि, तानि द्विसहस्रगुणानि क्रोशे, एवं क्रमेण समवृत्तघनयोजनपल्यगतो रोमखण्डराशिर्भवति, स चाङ्कतो यथा–

त्रयस्त्रिंशत्कोट्यः स्युः, सप्तलक्षाणि चोपरी । द्वाषष्टिश्च सहस्राणि, शतं च चतुरुत्तरम् ॥ ७१ ॥
एतावत्यः कोटिकोटिकोटाकोटयः स्मृता अथ । चतुर्विंशतिर्लक्षाणि, पञ्चषष्टिः सहस्रकाः ॥ ७२ ॥
पञ्चविंशाः शताः षट् च, स्युः कोटाकोटिकोटयः । कोटाकोटीनां च लक्षा, द्विचत्वारिंशदित्यथ ॥ ७३ ॥
एकोनविंशतिरपि, सहस्राणि शता नव । षष्टिश्चोपरिकोटिनां, मानमेवं निरूपितम् ॥ ७४ ॥
लक्षाणि सप्तनवतिस्त्रिपञ्चाशत्सहस्रकाः । षट् शतानि च पल्येऽस्मिन्, स्युः सर्वे रोमखण्डकाः ॥ ७५ ॥
त्रित्रिखाश्वरसाक्ष्याशावार्द्धर्यक्ष्यब्धिरसेन्द्रियाः । षट्द्विपञ्चचतुर्द्व्येकाकाङ्कषट्खाङ्कवाजिनः ॥ ७६ ॥
पञ्च त्रीणि च षट् किञ्च, नव खानि ततः परम् । आदितः पल्यरोमांशराशिसंख्याङ्कसंग्रहः ॥ ७७ ॥
अत्रोक्त शेषो विस्तरस्तु उपाध्यायश्रीशान्तिचन्द्रगणिकृतश्रीजंबूद्वीपप्रज्ञप्तिवृत्तेरवसेयः ।
तथा निबिडमाकण्ठं, भ्रियते स तथा हि तत् । नाग्निर्दहति वालाग्रं, सलिलं च न कोथयेत् ॥ ७८ ॥
यथा च चक्रिसैन्येन, तमाक्रम्य प्रसर्पता । न मनाक् क्रियते नीचैरेवं निबिडतां गतात् ॥ ७९ ॥
समये समये तस्मात्, वालखण्डे समुद्धृते । कालेन यावता पल्यः, स भवेन्निष्ठितोऽखिलः ॥ ८० ॥
कालस्य तावतः संज्ञा, पल्योपममिति स्मृता । तत्राप्युद्धारमुख्यत्वादिदमुद्धारसंज्ञितम् । ॥ ८१ ॥
इदं बादरमुद्धारपल्योपममुदीरितम् । प्रमाणमस्य संख्याताः, समयाः कथिता जिनैः ॥ ८२ ॥
अस्मिन्निरूपिते सूक्ष्मं, सुबोधमबुधैरपि । अतो निरूपितं नान्यत्किञ्चिदस्य प्रयोजनम् ॥ ८३ ॥

एतेषामथ पल्यानां, दशभिः कोटिकोटिभिः । भवेद्बादरमुद्धारसंज्ञकं सागरोपमम् ॥ ८४ ॥
अथैकैकस्य पूर्वोक्तवालाग्रस्य मनीषया । असंख्येयानि खण्डानि, कल्पनीयानि धीधनैः ॥ ८५ ॥
यत्सूक्ष्मं पुद्गलद्रव्यं, छद्मस्थश्चक्षुषेक्षते । तदसंख्यांशमानानि, तानि स्युर्द्रव्यमानतः ॥ ८६ ॥
सूक्ष्मपनकजीवाङ्गावगाढक्षेत्रतोऽधिके । असंख्येयगुणे क्षेत्रेऽवगाहन्त इमानि च ॥ ८७ ॥
व्याचक्षतेऽथ वृद्धास्तु, मानमेषां बहुश्रुताः । पर्याप्तबादरक्ष्मोणीकायिकाङ्गेन सम्मितम् ॥ ८८ ॥
समानान्येव सर्वाणि, तानि च स्युः परस्परम् । अनन्तप्रादेशिकानि, प्रत्येकमखिलान्यपि ॥ ८९ ॥
ततस्तैः पूर्यते प्राग्वत्, पल्यः पूर्वोक्तमानकः । समये समये चैकं, खण्डमुद्धियते ततः ॥ ९० ॥
निःशेष निष्ठिते चास्मिन्, सूक्ष्ममुद्धारपल्यकम् । संख्येयवर्षकोटिभिर्मितमेतदुदाहृतम् ॥ ९१ ॥
सुसूक्ष्मोद्धारपल्यानां, दशभिः कोटिकोटिभिः । सूक्ष्मं भवति चोद्धाराभिधानं सागरोपमम् ॥ ९२ ॥
आभ्यां सागरपल्याभ्यां, मीयन्ते द्वीपसागराः । अस्याः सार्द्धद्विसागर्याः, समयैः प्रमिता हि ते ॥ ९३ ॥
यद्वैतासु पल्यकोटाकोटीषु पञ्चविंशतौ । यावन्ति वालखण्डानि, तावन्तो द्वीपसागराः ॥ ९४ ॥
एकादिसप्तान्तदिनोद्गतैः केशाग्रराशिभिः । भृतादुक्तप्रकारेण, पल्यात्पूर्वोक्तमानतः ॥ ९५ ॥
प्रतिवर्षशतं खण्डमेकमेकं समुद्धरेत् । निशेषं निष्ठिते चास्मिन्नद्धापल्यं हि बादरम् ॥ ९६ ॥
एतेषामथ पल्यानां, दशभिः कोटिकोटिभिः । भवेद्बादरमद्धाख्यं, जिनोक्तं सागरोपमम् ॥ ९७ ॥
पूर्वरीत्याऽथ वालाग्रैः, खण्डीभूतैरसंख्यशः । पूर्णात्पल्यात्तथा खण्डं, प्रतिवर्षशतं हरेत् ॥ ९८ ॥
कालेन यावता पल्यः, स्यान्निर्लेपोऽखिलोऽपि सः । तावान्कालो भवेत्सूक्ष्ममद्धापल्योपमं किल ॥ ९९ ॥
एतेषामथ पल्यानां, दशभिः कोटिकोटिभिः । सूक्ष्ममद्धाभिधं ज्ञान-सागराः सागरं जगुः ॥ १०० ॥
सूक्ष्माद्धापल्यवार्द्धिभ्यामाभ्यां मीयन्त आर्हतैः । आयूंषि नारकादीनां, कर्मकायस्थिती तथा ॥ १०१ ॥
एतेषामेव वार्द्धीनां, दशभिः कोटिकोटिभिः । उत्सर्पिणी भवेदेका, तावत्येवावसर्पिणी ॥ १०२ ॥
एकादिसप्तान्तघस्मरूढकेशाग्रराशिभिः । भृतादुक्तप्रकारेण, पल्यात्पूर्वोक्तमानतः ॥ १०३ ॥
तत्तद्वालाग्रसंस्पृष्टखप्रदेशापकर्षणे । समये समये तस्मिन्, प्राप्ते निःशेषतां तथा ॥ १०४ ॥
कालचक्रैरसंख्यातैर्मितं तत्क्षेत्रनामकम् । बादरं जायते पल्योपममेवं जिनैर्मतम् ॥ १०५ ॥
कोटाकोट्यो दशैषां च, बादरं क्षेत्रसागरम् । सुबोधतायै सूक्ष्मस्य, कृतमेतन्निरूपणम् ॥ १०६ ॥
छिन्नैरसंख्यशः प्राग्वत्, केशाग्रैः पल्यतो भृतात् । समये समये चैकः, खप्रदेशोऽपकृष्यते ॥ १०७ ॥
एवं केशांशसंस्पृष्टा संस्पृष्टाभ्रांशकर्षणात् । तस्मिन्निःशेषिते सूक्ष्मं, क्षेत्रपल्योपमं भवेत् ॥ १०८ ॥

यद्यप्यत्र वालाग्रखण्डस्पृष्टाऽस्पृष्टनभःप्रदेशकर्षणेऽधिकृतैकैकस्य वालाग्रस्यासंख्यभागकरणं नोपयुक्तं, उभयथाऽप्याविशेषात्, तथाऽपि प्रवचनसारोद्धारवृत्त्यादिषु पूर्वग्रन्थेषु तथा दर्शनादत्रापि तथोक्तमिति ज्ञेयं[1] ॥

नन्वेवं निचिते पल्ये, वालाग्रैः सम्भवन्ति किम् । नभःप्रदेशा अस्पृष्टास्तदुद्धारो यदीरितः ॥ १०९ ॥
उच्यते सम्भवत्येवास्पृष्टास्ते सूक्ष्मभावतः । नभोंऽशकानां वालाग्रखण्डौघात्तादृशादपि ॥ ११० ॥
यथा कुष्माण्डभरिते, मातुलिङ्गानि मञ्चके । मान्ति तैश्च भृते धात्रीफलानि बदराण्यपि ॥ १११ ॥
तत्रापि मान्ति चणकादयः सूक्ष्मा यथाक्रमम् । एवं वालाग्रपूर्णेऽपि, तत्रास्पृष्टा नभोंऽशकाः ॥ ११२ ॥
यद्वा–
यतो घनेऽपि स्तम्भादौ, शतशो मान्ति कीलकाः । ज्ञायन्तेऽस्पृष्टखांशानां, ततस्तत्रापि सम्भवेत् ॥ ११३ ॥
एवं वालाग्रखण्डौघैरत्यन्तनिचितेऽपि हि । युक्तैव पल्ये खांशानामस्पृष्टानां निरूपणा ॥ ११४ ॥
एतेषामथ पल्यानां, दशभिः कोटिकोटिभिः । सूक्ष्मं सूक्ष्मेक्षिभिः क्षेत्रं, सागरोपममीक्षितम् ॥ ११५ ॥
बादरक्षेत्रपल्याम्भोनिधिभ्यां सूक्ष्मके इमे । असंख्यगुणमाने स्तः, कालतः पल्यसागरे ॥ ११६ ॥
क्षेत्रसागरपल्याभ्यामाभ्यां प्रायः प्रयोजनम् । द्रव्यप्रमाणचिन्तायां, दृष्टिवादे क्वचिद्भवेत् ॥ ११७ ॥
पल्यं पल्योपमं चापि, ऋषिभिः परिभाषितम् । सारं वारिधिपर्यायं, सागरं सागरोपमम् ॥ ११८ ॥
अथ संख्यातादिकानां, स्वरूपं किञ्चिदुच्यते । श्रोतव्यं तत्सावधानैर्जनैस्तत्त्वबुभुत्सुभिः ॥ ११९ ॥
त्रिधा संख्यातं जघन्यमध्यमोत्कृष्टभेदतः । असंख्यातानन्तयोस्तु, भेदा नवनवोदिताः ॥ १२० ॥
परित्तासंख्यातमाद्यं, युक्तासंख्यातकं परम् । तार्तीयिकमसंख्यातासंख्यातं परिकीर्तितम् ॥ १२१ ॥
परित्तानन्तमाद्यं स्याद्युक्तानन्तं द्वितीयकम् । अनन्तानन्तकं तार्तीयिकं च गदितं जिनैः ॥ १२२ ॥
षडप्येते स्युर्जघन्यमध्यमोत्कृष्टभेदतः । अष्टादशाथ संख्यातैस्त्रिभिः सहैकविंशतिः ॥ १२३ ॥
द्वावेव लघुसंख्यातं, त्र्यादिकं मध्यमं ततः । अर्वागुत्कृष्टसंख्यातात्, नैकस्तु गणनां भजेत् ॥ १२४ ॥
यत्तु संख्यातमुत्कृष्टं, तत्तु ज्ञेयं विवेकिभिः । चतुष्पल्याद्युपायेन, सर्षपोत्करमानतः ॥ १२५ ॥
तच्चैवम्–
जम्बूद्वीपसमायामविष्कम्भपरिवेषकाः । सहस्रयोजनोद्वेधाः, पल्याश्चत्वार ईरिताः ॥ १२६ ॥
उच्चया योजनान्यष्टौ, जगत्या ते विराजिताः । जगत्युपरि च क्रोशद्वयोच्चवेदिकाञ्चिताः ॥ १२७ ॥
दिदृक्षवो द्वीपवार्धीन्, स्वीकृतोद्ग्रीविका इव । ध्यायन्तो ज्येष्ठसंख्यातं, योगपट्टभृतोऽथवा ॥ १२८ ॥

---

१ आह - यदि स्पृष्टा अस्पृष्टाश्च नभःप्रदेशा गृह्यन्ते, तर्हि वालाग्रैः किं प्रयोजनम् ?, यथोक्तपल्यान्तर्गतनभःप्रदेशापहारमात्रतः सामान्येनैव वक्तुमुचितं स्यात्, सत्यं, किन्तु प्रस्तुतपल्योपमेन दृष्टिवादे द्रव्याणि मीयन्ते, तानि कानिचिद्यथोक्तवालाग्रस्पृष्टैरेवनभःप्रदेशैर्मीयन्ते, कानिचिदस्पृष्टैरित्यतो दृष्टिवादोक्तद्रव्यमानोपयोगित्वाद् वालाग्रप्ररूपणाऽत्र प्रयोजनवतीति (अनुयोगद्वारवृत्तौ)

आद्योऽनवस्थिताख्यः स्याच्छलाकाख्यो द्वितीयकः । तृतीयः प्रतिशलाकस्तुर्यो महाशलाककः ॥ १२९ ॥
आवेदिकान्तं सशिखस्तत्र पल्योऽनवस्थितः । मायादेकोऽपि न यथा, सर्षपैर्भ्रियते तथा ॥ १३० ॥
असत्कल्पनया कश्चिद्देवस्तमनवस्थितम् । कृत्वा वामकरे तस्मात्सर्षपं परपाणिना ॥ १३१ ॥
जम्बूद्वीपे क्षिपेदेकं, द्वितीयं लवणोदधौ । तृतीयं धातकीखण्डे, तुर्यं कालोदवारिधौ ॥ १३२ ॥
एवं द्वीपे समुद्रे वा, स पल्यो यत्र निष्ठितः । तत्समायामविष्कम्भपरिधिः कल्प्यते पुनः ॥ १३३ ॥
उद्वेधतोत्सेधतः प्राग्वद् भ्रियते सर्षपैश्च सः । क्रमाद्द्वीपे समुद्रे च, पूर्ववन्न्यस्यते कणः ॥ १३४ ॥
एवं द्वितीयवारं च, रिक्तीभूतेऽनवस्थिते । मुच्यते सर्षपः साक्षी, शलाकाभिधपल्यके ॥ १३५ ॥
पूर्यमाणै रिच्यमानैरेवं भूयोऽनवस्थितैः । शलाकाख्योऽपि सशिखं, पूर्यते साक्षिसर्षपैः ॥ १३६ ॥
अत्रेदं ज्ञेयम्–
आद्येऽनवस्थिते रिक्तीभूते साक्षी न मुच्यते । सर्वैः पल्यैः समानत्वान्नानवस्थितताऽस्य यत् ॥ १३७ ॥
यास्याऽनवस्थितेत्याह्वा, ज्ञेया योग्यतया तु सा । घृतयोग्यो घटो यद्वद्, घृतकुम्भोऽभिधीयते ॥ १३८ ॥
साक्षी च सर्षपकणो, मुच्यते यः शलाकके । अनवस्थितसत्कं तं, जगुरेके परे परम् ॥ १३९ ॥
पूर्णीभूते शलाकेऽथ, स्थाप्यस्तत्राऽनवस्थितः । क्रमागतद्वीपवार्द्धिसमानः सर्षपैर्भृतः ॥ १४० ॥
अथोत्पाट्य शलाकाख्यं, प्राग्वत्तस्य कणान् क्षिपेत् । अनवस्थान्तिमकणाक्रान्तद्वीपाम्बुधेः पुरः ॥ १४१ ॥
रिक्तीभूते शलाकेऽथ, पल्ये प्रतिशलाकके । क्षिप्यते सर्षपस्तस्य, साक्षीभूतस्तृतीयके ॥ १४२ ॥
अथ तत्र स्थितं पूर्णं, तं गृहीत्वाऽनवस्थितम् । शलाकान्त्यकणाक्रान्तादग्रे प्राग्वत् कणान् क्षिपेत् ॥ १४३ ॥
पूर्यमाणै रिच्यमानैर्भूयोभूयोऽनवस्थितैः । पुनः शलाको भ्रियते, प्राग्वत्तथाऽनवस्थितः ॥ १४४ ॥
प्राग्वत् शलाकमुत्पाट्य, परतो द्वीपवार्धिषु । रिक्तीकृत्य च तत्साक्षी, स्थाप्यः प्रतिशलाकके ॥ १४५ ॥
एवं प्रतिशलाकेऽपि, सशिखं सम्भृते सति । अवस्थशलाकाख्यौ, स्वयमेव भृतौ स्थितौ ॥ १४६ ॥
शलाकसाक्षिणः स्थानाऽभावात्स रिच्यते कथम् । आद्यस्यापि तदभावात्, कथं सोऽपि हि रिच्यते ॥ १४७ ॥
ततः प्रतिशलाकाख्यमुत्पाट्य तस्य सर्षपान् । क्षिपेत् पूर्वोक्तया रीत्या, परतो द्वीपवार्धिषु ॥ १४८ ॥
एवं प्रतिशलाकेऽपि, निखिलं निष्ठिते सति । साक्षीभूतं कणमेकं, क्षिपेन्महाशलाकके ॥ १४९ ॥
ततः शलाकमुत्पाट्य, द्वीपाब्धिषु तदग्रतः । सर्षपान्न्यस्य तत्साक्षी, स्थाप्यः प्रतिशलाकके ॥ १५० ॥
ततः क्रमाद्वर्द्धमानविस्तारमनवस्थितम् । उत्पाट्य परतो द्वीपपाथोधिषु कणान् क्षिपेत् ॥ १५१ ॥
प्राग्वदेतत्साक्षिकणैः, शलाकाख्यः प्रपूर्यते । तमप्यनेकशः प्राग्वत्, संरिच्यैतस्य साक्षिभिः ॥ १५२ ॥
तृतीयः परिपूर्यताऽसकृदेतस्य साक्षिभिः । पल्यो महाशलाकोऽपि, सशिखं पूर्यते ततः ॥ १५३ ॥
यथोत्तरमथो साक्षिस्थानाभावादिमे समे । भृताः स्थिता दिक्कुनीनां, क्रीडासमुद्गका इव ॥ १५४ ॥

यत्रान्तिमायां वेलायां, रिक्तीभूतोऽनवस्थितः । तावन्मानस्तदाऽस्त्येष, त्रयस्त्वन्ये यथोदिताः ॥ १५५ ॥
अथैतांश्चतुरः पल्यान्, सावकाशे स्थले क्वचित् । उद्धम्य तत्सर्षपाणां, निचयं रचयेद्धिया ॥ १५६ ॥
ततश्च जम्बूद्वीपादिद्वीपवार्धिषु सर्षपान् । उच्चित्य पूर्वनिक्षिप्तांस्तत्रैव निचये क्षिपेत् ॥ १५७ ॥
एकसर्षपरूपेण, न्यूनोऽयं निचयोऽखिलः । भवेदुत्कृष्ट संख्यातमानमित्युदितं जिनैः ॥ १५८ ॥
एतदुत्कृष्टसंख्यातमेकरूपेण संयुतम् । भवेत्परीत्तासंख्यातं, जघन्यमिति तद्विदः ॥ १५९ ॥
ज्येष्ठात्परीत्तासंख्यातादर्वाग् जघन्यतः परम् । मध्यं परीत्ताऽसंख्यातं, भवेदिति जिनैः स्मृतम् ॥ १६० ॥
जघन्ययुक्तासंख्यातमेकरूपविवर्जितम् । भवेत्परीत्तासंख्यातमुत्कृष्टमिति तद्विदः ॥ १६१ ॥
जघन्ययुक्तासंख्यातप्रकारश्चायम्–
यावत्प्रमाणो यो राशिर्भवेत्स्वरूपसंख्यया । स न्यस्य तावतो वारान्, गुणितोऽभ्यास उच्यते ॥ १६२ ॥
यथा पञ्चात्मको राशिः, पञ्चवारान् प्रतिष्ठितः । मिथः संगुणितो जातः, प्रथमं पञ्चविंशतिः ॥ १६३ ॥
शतं सपादं सञ्जातो, गुणितः सोऽपि पञ्चभिः । पुनः संगुणितः पञ्चविंशानि स्युः शतानि षट् ॥ १६४ ॥
जातश्चतुर्थवेलायामेकत्रिंशच्छतानि सः । पञ्चविंशत्युपचितान्यभ्यासगुणितं ह्यदः ॥ १६५ ॥
ततश्च–
प्रागुक्ते सार्षपे पुञ्जे, यावन्तः किल सर्षपाः । तत्संख्यान् मुख्यनिचयतुल्यान् राशीन् पृथक्पृथक् ॥ १६६ ॥
कृत्वा मिथस्तद्गुणने, यो राशिर्जायतेऽन्तिमः । जघन्ययुक्तासंख्यं तदावलीसमयैः समम् ॥ १६७ ॥
इयमत्र भावना-
स सर्षपाणां निकरः, कल्प्यते चेद्दशात्मकः । प्राग्वदभ्यासगुणितः सहस्रकोटिको भवेत् ॥ १६८ ॥
गरिष्ठयुक्तासंख्यातादर्वाग् जघन्यतः परम् । मध्यमं जायते युक्तासंख्यातमिति तद्विदः ॥ १६९ ॥
जघन्ययुक्तासंख्यातं, प्राग्वदभ्यासताडितम् । हीनमेकेन रूपेण, युक्तासंख्यातकं गुरुः ॥ १७० ॥
एतदेव रूपयुक्तमसंख्यासंख्यकं लघुः । मध्यासंख्यातासंख्यातमस्मादुत्कृष्टतावधि ॥ १७१ ॥
जघन्यासंख्यासंख्यातं, भवेदभ्यासताडितम् । एकरूपोनितं ज्येष्ठासंख्यासंख्यातकं स्फुटम् ॥ १७२ ॥
अत्रैकरूपक्षेपे च, परीत्तानन्तकं लघुः । मध्यं चास्मात्समुत्कृष्टपरीत्तानन्तकावधिः ॥ १७३ ॥
ह्रस्वं परीत्तानन्तं च, प्राग्वदभ्याससंगुणम् । परीत्तानन्तकं ज्येष्ठमेकरूपोनितं भवेत् ॥ १७४ ॥
सैकरूपं तज्जघन्ययुक्तानन्तकमीरितम् । परमस्मात्पराच्चार्वाग्, युक्तानन्तं हि मध्यमम् ॥ १७५ ॥
युक्तानन्तं तज्जघन्यमभ्यासपरिताडितम् । निरेकरूपमुत्कृष्टयुक्तानन्तकमाहितम् ॥ १७६ ॥
अत्रैकरूपक्षेपे स्यादनन्तानन्तकं लघु । अस्माद्यदधिकं मध्यानन्तानन्तं च तत्समम् ॥ १७७ ॥
उत्कृष्टानन्तानन्तं तु, नास्ति सिद्धान्तिनां मते । अनुयोगद्वारसूत्रे, यदुक्तं गणधारिभिः ॥ १७८ ॥

एवमुक्कोसयं अणंताणंतयं नत्थित्ति ।

अभिप्रायः समग्रोऽयं, प्रोक्तः सूत्रानुसारतः । अथ कार्मग्रन्थिकानां, मतमत्र प्रपञ्च्यते ॥ १७९ ॥
समद्विघातो वर्गः स्यात्, इति वर्गस्य लक्षणम् । पञ्चानां वर्गकरणे, यथा स्युः पञ्चविंशतिः ॥ १८० ॥
जघन्ययुक्तासंख्यातावधिः तुल्यं मतद्वये । अतः परं विशेषोऽस्ति, स चायं परिभाव्यते ॥ १८१ ॥
जघन्ययुक्तासंख्यातादारभ्योत्कृष्टतावधिः । मध्यमं युक्तासंख्यातं, स्यादुत्कृष्टमथोच्यते ॥ १८२ ॥
जघन्ययुक्तासंख्यातं, वर्गितं रूपवर्जितम् । उत्कृष्टयुक्तासंख्यातं, प्राप्तरूपैः प्ररूपितम् ॥ १८३ ॥
एकरूपेण युक्तं तदसंख्यासंख्यकं लघुः । अर्वागुत्कृष्टतो मध्यमथोत्कृष्टं निरूप्यते ॥ १८४ ॥
जघन्यासंख्यासंख्यातं, यत्ततो वर्गितं त्रिशः । अमीभिर्दशभिः क्षेपैर्वक्ष्यमाणैर्विमिश्रितम् ॥ १८५ ॥
तच्चैवम्–
त्रिंशत्कोटिकोटिसारा, ज्ञानावरणकर्मणः । स्थितिरुत्कर्षतो ज्ञेया, जघन्याऽऽन्तर्मुहूर्त्तिकी ॥ १८६ ॥
अनयोरन्तराले च, मध्यमाः स्युरसंख्यशः । आसां बन्धहेतुभूताऽध्यवसाया असंख्यशः ॥ १८७ ॥
एवमेवाध्यवसाया, अपरेष्वपि कर्मसु । स्युरसंख्येयलोकाभ्रप्रदेशप्रमिता इमे ॥ १८८ ॥
जघन्यादिभेदवन्तोऽनुभागाः कर्मणां रसाः । तेप्यसंख्येयलोकाभ्रप्रदेशप्रमिताः किल ॥ १८९ ॥
ततश्च–लोकाभ्रधर्माधर्मैकजीवानां ये प्रदेशकाः । अध्यवसायस्थानानि, स्थितिबन्धानुभागयोः ॥ १९० ॥
मनोवचःकाययोगविभागा निर्विभागकाः । कालचक्रस्य समयास्तथा प्रत्येकजन्तवः ॥ १९१ ॥
अनन्ताङ्गिदेहरूपा, निगोदाश्च दशाप्यमून् । त्रिवर्गिते लघ्वसंख्यासंख्येऽसंख्यान्नियोजयेत् ॥ १९२ ॥
त्रिशः पुनर्वर्गयेच्च, भवेदेवं कृते सति । असंख्यासंख्यमुत्कृष्टमेकरूपविनाकृतम् ॥ १९३ ॥
तत्रैकरूपप्रक्षेपे, परीत्तानन्तकं लघुः । परीत्तानन्तकाज्ज्येष्ठाद्यदर्वाक् तच्च मध्यमम् ॥ १९४ ॥
अभ्यासगुणिते प्राग्वत्परीत्तानन्तके लघौ । परीत्तानन्तमुत्कृष्टमेकरूपोज्झितं भवेत् ॥ १९५ ॥
सैकरूपे पुनस्तस्मिन्, युक्तानन्तं जघन्यकम् । अभव्यजीवैस्तुलितं, मध्यं तूत्कृष्टकावधि ॥ १९६ ॥
जघन्ययुक्तानन्ते च, वर्गिते रूपवर्जिते । स्याद्युक्तानन्तमुत्कृष्टमित्युक्तं पूर्वसूरिभिः ॥ १९७ ॥
अत्रैकरूपप्रक्षेपादनन्तानन्तकं लघुः । प्राग्वदेतदपि ज्ञेयं, मध्यमुत्कृष्टकावधिः ॥ १९८ ॥
जघन्यानन्तानन्तं तत्, वर्गयित्वा त्रिशस्ततः । क्षेपानमूनन्तान् षट्, वक्ष्यमाणान्नियोजयेत् ॥ १९९ ॥
ते चामी—
वनस्पती न्निगोदानां, जीवान् सिद्धांश्च पुद्गलान् । सर्वकालस्य समयान्, सर्वालोकनभोंशकान् ॥ २०० ॥
पुनस्त्रिवर्गिते जातराशौ तस्मिन् विनिक्षिपेत् । पर्यायान् केवलज्ञानदर्शनानामनन्तकान् ॥ २०१ ॥

अनन्तानन्तमुत्कृष्टं, भवेदेवंकृते सति । मेयाभावादस्य मध्ये, नैव व्यवहृतिः पुनः ॥ २०२ ॥
एवं च नवधाऽनन्तं, कर्मग्रन्थमते[1] भवेत् । भवत्यष्टविधं किञ्च, सिद्धान्ताश्रयिणं मते ॥ २०३ ॥
सर्वेषां रूपमेकमेषां ज्येष्ठकनीयसाम् । मध्यमानां तु रूपाणि, भवन्ति बहुधा किल ॥ २०४ ॥
संख्यातभेदं संख्यातमसंख्यातविधं पुनः । असंख्यातमनन्तं चानन्तभेदं प्रकीर्तितम् ॥ २०५ ॥
प्रयोजनं त्वेतेषाम्–
अभविअ चउत्थणंते, पंचम्मि सम्माइपरिवडिअ सिद्धा । सेसा अट्ठमणंते, पज्जथूलवणाइ बावीसम् ॥
ते चामी–
बायरपज्जत्तवणा[१] बायरेपज्ज[२] अपज्जबायरवणा[३] य । बायरअपज्ज[४] बायर[५] सुहुमापज्जवण[६] सुहुमअपज्जा[७] ॥
सुहुमवणापज्जत्ता[८] पज्जसुहुमा[९] सुहुम[१०] भव्वय[११] निगोया[१२] । वण[१३] एगिंदिय[१४] तिरिया[१५] मिच्छदिट्ठी[१६] अविरया[१७] य ॥
सकसाइणो[१८] य[१९] छउमा[२०] सजोगि[२१] संसारि[२२] सव्वजीवा य । जहसंभवमब्भहिया, बावीसं अट्ठमेऽणंते ॥
इत्यादि यथास्थानं ज्ञेयम् ॥

इत्यङ्गुलादिप्रकृतोपयोगिमानं मयाप्तोक्तिमपेक्ष्य दृब्धम् ।
अतो यथास्थानमिदं नियोज्यं, कोशस्थितं द्रव्यमिवागमज्ञैः ॥ २०६ ॥

विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिष–द्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे, सर्गो निर्गलितार्थसार्थसुभगो पूर्णः सुखेनादिमः ॥ २०७ ॥

॥ इति श्री लोकप्रकाशे प्रथमः सर्गः समाप्तः ॥

---

१. दृष्टिवादभृदाचार्यप्रणीतकर्मप्रकृत्यादिशास्त्राणामप्रामाण्यमापादयितुमशक्यत्वात् । अग्रतः संख्याऽभावात् पूर्वानन्तप्रक्षेपेऽनवस्थानात् ।

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

अथ द्वितीयः सर्गः ।

स्तुमः शङ्खेश्वरं पार्श्वं, मध्यलोके प्रतिष्ठितम् । देहलीदीपकन्यायाद्, भुवनत्रयदीपकम् ॥ १ ॥
प्रस्तूयतेऽथ प्रकृतं, स्वरूपं लोकगोचरम् । द्रव्यतः क्षेत्रतः कालभावतस्तच्चतुर्विधम् ॥ २ ॥
एकः पञ्चास्तिकायात्मा, द्रव्यतो लोक इष्यते । योजनानामसंख्येयाः, कोटयः क्षेत्रतोऽमितः ॥ ३ ॥
कालतोऽभूच्च भाव्यस्ति, भावतोऽनन्तपर्यवः । लोकशब्दप्ररूप्यास्तिकायस्थगुणपर्यवैः ॥ ४ ॥
अथवा-
जीवाजीवास्वरूपाणि, नित्यानित्यत्ववन्ति च । द्रव्याणि षट् प्रतीतानि, द्रव्यलोकः स उच्यते ॥ ५ ॥

तथोक्तं स्थानाङ्गवृत्तौ–

जीवमजीवे रुवमरुवि सपएसमप्पएसे अ । जाणाहि दव्वलोगं, निच्चमनिच्चं च जं दव्वं ॥
ये संस्थानविशेषेण तिर्युगूर्ध्वमधःस्थिताः । आकाशस्य प्रदेशास्तं, क्षेत्रलोकं जिनाः जगुः ॥ ६ ॥
समयावलिकादिश्च, काललोको जिनैः स्मृतः । भावलोकस्तु विज्ञेयो, भावा औदयिकादयः ॥ ७ ॥

यदाहुः स्थानाङ्गवृत्तौ–

उदईए उवसमिए, खइए अ तहा खओवसमिए अ । परिणामसन्निवाए, छव्विहो भावलोओत्ति ॥

तत्र प्रथमतो द्रव्यलोकः किञ्चिद्वितन्यते । मया श्रीकीर्तिविजयप्रसादप्राप्तबुद्धिना ॥ ८ ॥
धर्मास्तिकायाधर्मास्तिकायावाकाश[१] [२] [३] एव च । जीवपुद्गलकालाश्च[४] [५] [६], षड् द्रव्याणि जिनागमे ॥ ९ ॥
धर्माधर्माभ्रजीवाख्याः, पुद्गलेन समन्विताः । पञ्चामी अस्तिकायाः स्युः, प्रदेशप्रकरात्मकाः ॥ १० ॥
अनागतस्यानुपत्तेरुत्पन्नस्य[१] च नाशतः । प्रदेशप्रचयाभावात्, काले नैवास्तिकायता ॥ ११ ॥
विना जीवेन पञ्चामी, अजीवा कथिताः श्रुते । पुद्गलेन विना चामी, जिनैरुक्ता अरूपिणः ॥ १२ ॥
धर्मास्तिकायं तत्राह, पञ्चधा परमेश्वरः । द्रव्यतः क्षेत्रतः कालभावाभ्यां गुणतस्तथा ॥ १३ ॥
द्रव्यतो द्रव्यमेकं स्यात्, क्षेत्रतो लोकसम्मितः । कालतः शाश्वतो यस्मादभूद्भाव्यस्ति चानिशम् ॥ १४ ॥
वर्णरूपरसैर्गंधस्पर्शैः शून्यश्च भावतः । गत्युपष्टम्भधर्मश्च[२], गुणतः स प्रकीर्तितः ॥ १५ ॥
स्वभावतः सञ्चरतां लोकेऽस्मिन् पुद्गलात्मनाम् । पानीयमिव मीनानां, साहाय्यं कुरुते ह्यसौ ॥ १६ ॥
जीवानामेष चेष्टासु, गमनागमनादिषु । भाषामनोवचःकाययोगादिष्वेति हेतुताम् ॥ १७ ॥
अस्याऽसत्त्वादलोके हि, नात्मपुद्गलयोर्गतिः । लोकालोकव्यवस्थापि, नाभावेऽस्योपपद्यते ॥ १८ ॥
द्रव्यक्षेत्रकालभावैर्धर्मभ्रातेव युग्मजः । स्यादधर्मास्तिकायोऽपि, गुणतः किन्तु भिद्यते ॥ १९ ॥
स्थित्युपष्टम्भकर्त्ता हि, जीवपुद्गलयोरयम् । मीनानां स्थलवद्येनालोके नासौ न तत्स्थितिः ॥ २० ॥
अयं निषदनस्थानशयनालम्बनादिषु । प्रयाति हेतुतां चित्तस्थैर्यादिस्थिरतासु च ॥ २१ ॥

इदमर्थतो भग० श० १३ ॥

गतिस्थितिपरिणामे, सत्येवैतौ सहायकौ । जीवादीनां न चेत्तेषां, प्रसज्येते सदापि ते ॥ २२ ॥
भवेदभ्रास्तिकायस्तु, लोकालोकभिदा द्विधा । लोकाकाशास्तिकायः स्यात्तत्रासंख्यप्रदेशकः ॥ २३ ॥
स भात्यलोकाकाशेन, परीतोऽतिगरीयसा । गोलकं मध्यशुषिरं, महान्तमनुकुर्वता ॥ २४ ॥

तथोक्तं भगवती शतक ११ उ ११ "अलोएणं भंते ! किं संठिए पं. ? गो० ! झुसिर गोलगसंठिए पं." इत्यादि

असौ च धर्माधर्माभ्यां, स्वतुल्याभ्यां सदान्वितः । भूपाल इव मन्त्रिभ्यां, बिभर्ति सकलं जगत् ॥ २५ ॥

---

१. समयादि समूहस्य । २. स्वभावः ।

अलोकाभ्रं तु धर्माद्यैर्भावैः पञ्चभिरुज्झितम् । अनेनैव विशेषेण, लोकाभ्रात् पृथगीरितम् ॥ २६ ॥
अनन्तस्याप्यस्य पूज्यैर्महत्तायां निदर्शनम् । असद्भावस्थापनया, पञ्चमाङ्गे प्रकीर्तितम् ॥ २७ ॥
तथा हि–
सुदर्शनं सुरगिरिं, परितो निर्जरा दश । केऽपि कौतुकिनः सन्ति, स्थिता दिक्षु दशस्वपि ॥ २८ ॥
मानुषोत्तरपर्यन्तेऽष्टासु दिक्षु बहिर्मुखाः । बलिपिंडान् दिक्कुमार्यः, किरन्त्यष्टौ स्वदिक्ष्वथ ॥ २९ ॥
विकीर्णान् युगपत्ताभिस्तान् पिंडानगतान् क्षितिम् । यया गत्या सुरस्तेषामेकः कोऽप्याहरेद्रयात् ॥ ३० ॥
तया गत्याथ ते देवा, अलोकान्तदिदृक्षया । गन्तुं प्रवृत्ता युगपद्यदा दिक्षु दशस्वपि ॥ ३१ ॥
तदा च वर्षलक्षायुः, पुत्रोऽभूत्कोऽपि कस्यचित् । तस्यापि तादृशः पुत्रः, पुनस्तस्यापि तादृशः ॥ ३२ ॥
कालेन तादृशाः सप्त, पुरुषाः प्रलयं गताः । ततस्तदस्थिमज्जादि, तन्नामापि गतं क्रमात् ॥ ३३ ॥
अस्मिंश्च समये कश्चित्सर्वज्ञं यदि पृच्छति । स्वामिंस्तेषां किमगतं, क्षेत्रं किं वा गतं बहु ॥ ३४ ॥
तदा वदति सर्वज्ञो, गतमल्पं परं बहु । अगतस्यानन्ततमो, भागो गतमिहोह्यताम् ॥ ३५ ॥
स्थित्वा सुरोऽपि लोकान्ते, नालोके स्वकरादिकम् । ईष्टे लम्बयितुं गत्यभावात्पुद्गलजीवयोः ॥ ३६ ॥

तदुक्तम्–"देवेणं भंते ! महिड्ढिए जाव महेसक्खेऽलोगंसि[1] हत्थं वा पायं वा जाव ऊरुं वा आउंटावित्तए वा पसारित्तए वा ? णो इणट्ठे समट्ठे" ॥ इति भग० शतक १६ उद्दे० ८ ।

वस्तुतस्तु नभोद्रव्यमेकमेवास्ति सर्वगम् । धर्मादिसाहचर्येण, द्विधा जातमुपाधिना ॥ ३७ ॥
लोकालोकप्रमाणत्वात्, क्षेत्रतोऽनन्तमेव तत् । असंख्येयप्रमाणं च, परं लोकविवक्षया ॥ ३८ ॥
कालतः शाश्वतं वर्णादिभिर्मुक्तं च भावतः । अवगाहगुणं तच्च, गुणतो गदितं जिनैः ॥ ३९ ॥
अवकाशे पदार्थानां, सर्वेषां हेतुतां दधत् । शर्कराणां दुग्धमिव, वह्नेर्लोहादिगोलवत् ॥ ४० ॥
यतः–परमाण्वादिना द्रव्येणैकेनापि प्रपूर्यते । खप्रदेशस्तथा द्वाभ्यामपि ताभ्यां तथा त्रिभिः ॥ ४१ ॥
अपि द्रव्यशतं मायात्तत्रैवैकप्रदेशके । मायात् कोटिशतं मायादपि कोटिसहस्रकम् ॥ ४२ ॥
अवगाहस्वभावत्वादन्तरिक्षस्य तत्समम् । चित्रत्वाच्च पुद्गलानां, परिणामस्य युक्तिमत् ॥ ४३ ॥
द्वयोरपि क्रमात् दृष्टान्तौ–
दीप्रदीपप्रकाशेन, यथापवरकोदरम् । एकेनापि पूर्यते तत्, शतमप्यत्र माति च ॥ ४४ ॥
तथा–विंशत्यौषधसामर्थ्यात्, पारदस्यैककर्षके । सुवर्णस्य कर्षशतं, तौल्ये कर्षाधिकं न तत् ॥ ४५ ॥
पुनरौषधसामर्थ्यात्तद्द्वयं जायते पृथक् । सुवर्णस्य कर्षशतं, पारदस्यैककर्षकः ॥ ४६ ॥

इत्यर्थतो भगवतीशतक १३ उ० ४ वृत्तौ ।

---

१. लोकान्तेः (लोगंसि ठिच्चा पभू अलोगंसि हत्थं वा० भग० ७७७)

किं च–धर्मास्तिकायस्तद्देशस्तत्प्रदेश इति त्रयम् । एवं त्रयं त्रयं ज्ञेयमधर्माभ्रास्तिकाययोः ॥ ४७ ॥
तत्रास्तिकायः सकलस्वप्रदेशात्मको भवेत् । कियन्मात्रांशरूपाश्च, तस्य देशाः प्रकीर्तिताः ॥ ४८ ॥

स्कन्दन्ति शुष्यन्ति पुद्गलविचटनेन, धीयन्ते च पुष्यन्ते पुद्गलचटनेनेति स्कन्धाः, 'पृषोदरादयः' (सिद्धहैमसूत्र ३–२–१५५ इति रुपनिष्पत्तिः) इति प्रज्ञापनावृत्तौ व्युत्पादितत्वादेते स्कन्धव्यपदेशं नार्हन्ति । अत एव सूत्रे प्रायः 'धम्मत्थिकाए धम्मत्थिकायस्स देसे' इत्याद्येव श्रूयते ॥ नवतत्त्वावचूरौ तु चतुर्दशरज्ज्वात्मके लोके सकलोऽपि यो धर्मास्तिकायः स सर्वः स्कन्धः कथ्यते इत्युक्तमिति ज्ञेयम् ॥

उत्तराध्ययनबृहद्वृत्तौ धर्मास्तिकायादीनां स्कन्धता स्पष्टैव (संयोगपद निर्युक्तौ) प्रज्ञापनीया स्कन्धव्युत्पत्तिः पुद्गलस्कन्धप्रकरणगता, अनुयोगे तत्त्वार्थे च जीवराशेरपि स्कन्धतोक्ता । अन्यथा कायशब्दोऽपि चिन्त्य एव ।

निर्विभागा विभागाश्चा, प्रदेशा इत्युदाहृताः । ते चानन्तास्तृतीयस्यासंख्येया आद्ययोर्द्वयोः ॥ ४९ ॥
अनन्तैश्चागुरुलघुपर्यायैः संश्रिता इमे । त्रयोऽपि यदमूर्त्तेषु, संभवन्त्येत एव हि ॥ ५० ॥
अथ जीवास्तिकायस्य, स्वरूपं वच्मि तस्य च । चेतनालक्षणो जीव, इति सामान्यलक्षणम् ॥ ५१ ॥
मतिश्रुतावधिमनःपर्यायकेवलान्यपि । मत्यज्ञानं श्रुताज्ञानं, विभङ्गज्ञानमित्यपि ॥ ५२ ॥
अचक्षुश्चक्षुरवधिकेवलदर्शनानि च । द्वादशामी उपयोगा, विशेषाज्जीवलक्षणम् ॥ ५३ ॥
उपयोगं विना कोऽपि, जीवो नास्ति जगत्त्रये । अक्षरानन्तभागो यद्व्यक्तो निगोदिनामपि ॥ ५४ ॥
तं चाक्षरानन्तभागमपि त्रैलोक्यवर्तिनः । न शक्नुवन्त्यावरितुं, पुद्गलाः कर्मतां गताः ॥ ५५ ॥
एषोऽप्याव्रियते चेत्तत्, स्याज्जीवाजीवयोर्न भित् । अक्षरं त्विह साकारेतरोपयोगलक्षणम्[१] ॥ ५६ ॥
खेर्यथातिसान्द्राभ्रच्छन्नस्यापि भवेत्प्रभा । कियत्यनावृत्ता रात्रिदिनाभेदोऽन्यथा भवेत् ॥ ५७ ॥
इयं चाल्पीयसी ज्ञानमात्राद्यसमये भवेत्[२] । अपर्याप्तनिगोदानां[३], सूक्ष्माणां क्रमतस्ततः ॥ ५८ ॥
शेषैकाक्षद्वित्रिचतुष्पञ्चाक्षादिषु मात्रया[४] । वर्धमानेन्द्रिययोगलब्धिवृद्धिव्यपेक्षया ॥ ५९ ॥
क्षयोपशमवैचित्र्यान्नानारूपाणि बिभ्रती । सर्वज्ञेयग्राहिणी स्याद्, घातिकर्मक्षयेण[५] सा ॥ ६० ॥
नन्वेवमात्मनो ज्ञानं, यदि लक्षणमुच्यते । अभेदः स्यात्तदनयोः, सास्नावृषभयोरिव[६] ॥ ६१ ॥
एवं चास्य सदा ज्ञानमिष्यतेऽखिलवस्तुगम् । ज्ञानरूपो न जानातीत्येतद्युक्तिसहं न यत् ॥ ६२ ॥
कथं च ज्ञानरूपस्यात्मनः स्युः संशयस्तथा । अव्यक्तबोधाबोधौ च, किञ्चिद्बोधविपर्ययाः ॥ ६३ ॥
अत्रोच्यते–सत्यप्यस्य चिदात्मत्वे, नोपयोगो निरन्तरम्[७] । भवत्यावरणीयानां, कर्मणां वशतः खलु ॥ ६४ ॥

---

१. सुयकेवलक्खराणं (४९६ वि.) तस्स उ अणंतभागो (४९१ वि.) । २. लब्ध्या ३. जघन्ययोगिनां ४. अंशेन ५. ज्ञानात्मनः ६. कम्बल ७. नाविर्भावेन

तथाहि–आत्मा सर्वप्रदेशेषु, त्यक्त्वांशानष्टमध्यगान् । प्रक्वथ्यमानोदकवत् सदा विपरिवर्त्तते ॥ ६५ ॥
ततः स चिरमेकस्मिन्न वस्तुन्युपयुज्यते । अर्थान्तरोपयुक्तः स्याच्चपलः कृकलासवत्[१] ॥ ६६ ॥
उत्कर्षेणोपयोगस्य, कालोप्यान्तर्मुहूर्त्तिकः । उपयोगान्तरं याति, स्वभावात्तदनन्तरम् ॥ ६७ ॥
न सर्वमपि वेत्त्येष, प्राणी कर्मावृत्तो यथा । नार्कस्याभ्राभिभूतस्य, प्रसरन्त्यभितः प्रभाः ॥ ६८ ॥
संशयाव्यक्तबोधाद्या, अप्यस्य कर्मणां वशात् । कुर्वतां ज्ञानवैचित्र्यं, क्षयोपशमभेदतः ॥ ६९ ॥
किं च –
आभोगानाभोगोद्भववीर्यवतो यदा क्षयोपशमः । लब्धिकरणानुरुपं[२] तदाऽऽत्मनो ज्ञानमुद्भवति ॥ ७० ॥
वीर्यापगमे च पुनस्तदेव[३] कर्मावृणोत्यपाकीर्णम्[४] । शैवलजालमिवाम्भो दर्पणमिव विमलितं पङ्कः[५] ॥ ७१ ॥
अथ प्रकृतम् –
द्विधा भवन्ति ते जीवाः, सिद्धसंसारिभेदतः । सिद्धाः पञ्चदशविधास्तीर्थातीर्थादिभेदतः ॥ ७२ ॥
यदाहुः नवतत्वप्रकरणे- [गाथा. ५५]
जिणअजिणतित्थातित्थ, गिहिअन्नसलिंगथीनरनपुंसा । पत्तेयसयंबुद्धा, बुद्धबोहीक्कणिक्का य ॥
जीवन्तीति स्मृता जीवा, जीवनं प्राणधारणम् । ते च प्राणा द्विधा प्रोक्ता, द्रव्यभावविभेदतः ॥ ७३ ॥
सिद्धानामिन्द्रियोच्छ्वासादयः प्राणा न यद्यपि । ज्ञानादिभावप्राणानां, योगाज्जीवास्तथाप्यमी ॥ ७४ ॥
अलोकस्खलिताः सिद्धा, लोकाग्रे च प्रतिष्ठिताः । इह संत्यज्य देहादि, स्थितास्तत्रैव शाश्वताः ॥ ७५ ॥
ते ज्ञानावरणीयाद्यैर्मुक्ताः कर्मभिरष्टभिः । ज्ञानदर्शनचारित्राद्यनन्ताष्टकसंयुताः ॥ ७६ ॥

तथोक्तं गुणस्थानक्रमारोहे– अनन्तं केवलज्ञानं, ज्ञानावरणसंक्षयात् । अनन्तं दर्शनं चापि, दर्शनावरणक्षयात् ॥ क्षायिके शुद्धसम्यक्त्वचारित्रे मोहनिग्रहात् । अनन्ते सुखवीर्ये च, वेद्यविघ्नक्षयात्क्रमात् ॥ आयुषः क्षीणभावत्वात्, सिद्धानामक्षया स्थितिः । नामगोत्र क्षयादेवामूर्त्तानन्ताऽवगाहना ॥ [श्लोक - १३० थी १३२]

रोगमृत्युजराद्यर्त्तिहीना अपुनरुद्भवाः । अभावात्कर्महेतूनां, दग्धे बीजे हि नाङ्कुरः ॥ ७७ ॥
यावन्मात्रं नरक्षेत्रं, तावन्मात्रं शिवास्पदम् । यो यत्र म्रियते तत्रैवोर्ध्वं गत्वा स सिद्ध्यति ॥ ७८ ॥
उत्पत्योर्ध्वं समश्रेण्या, लोकान्तस्तैरलङ्कृतः । यत्रैकस्तत्र तेऽनन्ता, निर्बाधाः सुखमासते ॥ ७९ ॥

---

१. केवलिनामप्यात्मप्रदेशानां चलत्वाच्चिन्त्यमेतत् २. वीर्यं द्विधा - लब्धेः करणाच्च ३. ज्ञानं ४. कर्मरहितं ५. धर्माधर्मान्तरिक्षाणामिव जीवस्य नाभिगाः । अष्टौ मध्यप्रदेशाः स्युः, कर्माशैस्ते त्वनावृताः ॥ ७२ ॥ तथोक्तं - "तदनेन पञ्चदशविधेनापि योगोनात्माऽष्टौ प्रदेशान् विहाय तप्तभाजनोदकवद् उद्वर्त्तमानैः सर्वैरात्मप्रदेशैरात्मप्रदेशावष्टब्धाकाशप्रदेशस्थं कार्मणशरीरयोग्यं कर्मदलिकं यद्बध्नाति तत्प्रयोगकर्मेत्युच्यते" इत्याचारांगे द्वितीयस्य लोकविजयाध्ययनस्यादौ निर्युक्तिवृत्तौ, अयमेवार्थो भगवत्यां श. २५ उ. ४ । श. ८ उ. ९ अपि तत्त्वार्थभाष्यवृत्तौ द्वितीयाध्यायप्रारंभे, ज्ञानदीपिकायां च इति प्र. अधिकं ।

तथोक्तं तत्त्वार्थभाष्ये– कृत्स्नकर्मक्षयादूर्ध्वं, निर्वाणमधिगच्छति । यथा दग्धेन्धनो वह्निर्निरुपादानसन्ततिः ॥ तदनन्तरमेवोर्ध्वमालोकान्तात्स गच्छति । पूर्वप्रयोगाऽसंगत्वबन्धच्छेदोर्ध्वगौरवैः ॥ कुलालचक्रे दोलायामिषौ चापि यथेष्यते । पूर्वप्रयोगात्कर्मेह, तथा सिद्धगतिः स्मृता ॥ मृल्लेपसंगनिर्मोक्षाद्यथा दृष्टाऽप्स्वलाबुनः । कर्मसंगविनिर्मोक्षात्तथा सिद्धगतिः स्मृता ॥ एरंडयन्त्रपेडासु, बन्धच्छेदाद्यथा गतिः । कर्मबन्धनविच्छेदात्, सिद्धस्यापि तथेष्यते ॥

व्याघ्रपादबीजबन्धनच्छेदात् यन्त्रबन्धनच्छेदात् पेडाबन्धनच्छेदात् च गतिर्दृष्टा मिञ्जाकाष्टपेडापुटानाम् एवं कर्मबन्धनविच्छेदात् सिद्धस्य गतिरिति भावः । ऊर्ध्वगौरवधर्माणो, जीवा इति जिनोत्तमैः । अधोगौरवधर्माणः, पुद्गला इति चोदितम् ॥ ऊर्ध्वगमन एव गौरवं धर्मः स्वभावो जीवानाम् । पुद्गलास्तु अधोगमनधर्माण इति सर्वज्ञवचन- मिति भावः ॥ यथाऽधस्तिर्यगूर्ध्वं च, लोष्टवाय्वग्निवीचयः । स्वभावतः प्रवर्त्तन्ते, तथोर्ध्वगतिरात्मनः ॥ अतस्तु गतिवैकृत्यमेषां यदुपलभ्यते । कर्मणः प्रतिघाताच्च, प्रयोगाच्च तदिष्यते ॥ अधस्तिर्यगथोर्ध्वं च, जीवानां कर्मजा गतिः । ऊर्ध्वमेव तु तद्धर्मा, भवति क्षीणकर्मणाम् ॥

[श्लोक ७-९ थी १६]

तत्रापि गच्छतः सिद्धिं, संयतस्य महात्मनः । सर्वैरंगैर्विनिर्याति, चेतनस्तनुपञ्जरात् ॥ ८० ॥

तदुक्तं स्थानाङ्गपञ्चमस्थानके–"पंचविहे जीवस्स णिज्जाणमग्गे पन्नते । पाएहिं १, उरूहिं २, उरेणं ३, सिरेणं ४, सव्वंगेहिं ५, ॥ पाएहिं निज्जायमाणे निरयगामी भवति । उरूहिं निज्जायमाणे तिरियगामी भवति । उरेण निज्जायमाणे मणुयगामी भवति । सिरेणं निज्जायमाणे देवगामी भवति । सव्वंगेहिं निज्जायमाणे सिद्धिगतिपज्जवसाणे पण्णत्ते" ॥

भवोपग्राहिकर्मान्तक्षण एव स सिद्धयति । उद्गच्छन्नस्पृशद्गत्या, ह्यचिन्त्या शक्तिरात्मनः ॥ ८१ ॥

अत्र च अस्पृशन्ती सिद्धयन्तरालप्रदेशान् गतिर्यस्य सः अस्पृशद्गतिः । अन्तरालप्रदेशस्पर्शने हि नैकेन समयेन सिद्धिः, इष्यते च तत्रैक एव समयः, अतोऽन्तराले समयान्तरस्याभावा- दन्तराल्प्रदेशानामसंस्पर्शनमित्यौपपातिकसूत्रवृत्तौ ॥ अवगाढप्रदेशेभ्योऽपराकाशप्रदेशान् त्वस्पृशन् गच्छतीति महाभाष्यवृत्तौ ॥ यावत्स्वाकाशप्रदेशेष्विहावगाढस्तावत एव प्रदेशान्ऊर्ध्वमप्यवगाहमानो गच्छतीति पञ्चसंग्रहवृत्तौ ॥ तत्त्वं तु केवलिगम्यम् ।

एकस्मिन्समये चोर्ध्वलोके चत्वार एव ते । सिद्धयन्त्युत्कर्षतो दृष्टमधोलोके मतत्रयम् ॥ ८२ ॥

विंशतिर्द्वाविंशतिश्च, चत्वारिंशदिति स्फुटम् । उत्तराध्ययने संग्रहण्यां च सिद्धप्राभृते ॥ ८३ ॥

---

१ सामान्येन जीवानां शरीरिणां परप्रयुक्तजीवानाम् २ अवगाहनापेक्षया पूर्वे गमनापेक्षया उत्तरे वाऽन्तःपात्यसौ, स्पर्शवदभावात्,

'वीस अहे तहेव' इत्युत्तराध्ययने । जीवाजीवविभक्त्यध्ययने ॥ 'उड्ढाहोतिरियलोए चउबावीसइसयं' इति संग्रहण्याम् ॥ 'वीसं पुहुत्तं अहोलोए' इति सिद्धप्राभृते । तट्टीकायां 'विंशतिपृथक्त्वं द्वे विंशती'[1] इति ॥

अष्टोत्तरशतं तिर्यग्लोके च द्वौ पयोनिधौ । नदीनदादिके शेषजले चोत्कर्षतस्त्रयः ॥ ८४ ॥
विंशतिश्चैकविजये, चत्वारो नन्दने वने । पण्डके द्वावष्टशतं, प्रत्येकं कर्मभूमिषु ॥ ८५ ॥
प्रत्येकं संहरणतो, दशाऽकर्ममहीष्वपि । पञ्चचापशतोच्चौ द्वौ, चत्वारो द्विकराङ्गकाः ॥ ८६ ॥
जघन्योत्कृष्टदेहानां, मानमेतन्निरूपितम् । मध्याङ्गास्त्वेकसमये, सिद्ध्यन्त्यष्टोत्तरं शतम् ॥ ८७ ॥
उत्सर्पिण्यवसर्पिण्योस्तार्त्तीयीकतुरीययोः । अरयोरष्टसहितं, सिद्ध्यन्त्युत्कर्षतः शतम् ॥ ८८ ॥

यत्त्वस्या अवसर्पिण्यास्तृतीयारकप्रान्ते श्रीऋषभदेवेन सहाष्टोत्तरं शतं सिद्धास्तदाश्चर्यमध्येऽन्तर्भवतीति[2] समाधेयम् ॥

विंशतिश्चावसर्पिण्याः, सिद्ध्यन्ति पञ्चमेऽरके । उत्सर्पिण्यवसर्पिण्योः, शेषेषु दश संहृताः ॥ ८९ ॥
पुंवेदेभ्यः सुरादिभ्यश्च्युत्वा जन्मन्यनन्तरे । भवन्ति पुरुषाः केचित्, स्त्रियः केचिन्नपुंसकाः ॥ ९० ॥
स्त्रीभ्योऽपि देव्यादिभ्यः स्युरेवं त्रेधा महीस्पृशः । क्लीबेभ्यो नारकादिभ्योऽप्येवं स्युर्मनुजास्त्रिधा ॥ ९१ ॥
नवस्वेतेषु भङ्गेषु, पुंभ्यः स्युः पुरुषा हि ये । सिद्ध्यन्त्यष्टोत्तरशतं, तेऽन्ये दशदशाखिलाः ॥ ९२ ॥
दशान्यभिक्षुनेपथ्याश्चत्वारो गृहिवेषकाः । सिद्ध्यन्त्यष्टोत्तरशतं, मुनिनेपथ्यधारिणः ॥ ९३ ॥
विंशतिर्योषितः किञ्च, पुमांसोऽष्टोत्तरं शतम् । एकस्मिन्समये क्लीबाः, सिद्ध्यन्ति दश नाधिकाः ॥ ९४ ॥

एकसमये अष्टोत्तरशतसिद्धियोग्यतासंग्रहश्चैवम्—

तिर्यग्लोके क्षपितकलुषाः कर्मभूमिस्थलेषु, जाता वैमानिकपुरुषतो मध्यमाङ्गप्रमाणाः ।
सिद्धयन्त्यष्टाधिकमपि शतं साधुवेषाः पुमांसः, तार्त्तीयीके नियतमरके चिन्त्यतां वा तुरीये ॥ ९५ ॥
यत्रैको निर्वृतः सिद्धस्तत्रान्ये परिनिर्वृताः । अनन्ता नियमाल्लोकपर्यन्तस्पर्शिनः समे ॥ ९६ ॥

अयमर्थः—

सम्पूर्णमेकसिद्धस्यावगाहक्षेत्रमाश्रिताः । अनन्ताः पुनरन्ये च, तस्यैकैकं प्रदेशकम् ॥ ९७ ॥
समाक्रम्यावगाढाः स्युः, प्रत्येकं तेऽप्यनन्तकाः । एवं परे द्वित्रिचतुःपञ्चाद्यंशाभिवृद्धितः ॥ ९८ ॥

तथा—

सिद्धावगाहक्षेत्रस्य, तस्यैकैकं प्रदेशकम् । त्यक्त्वा स्थितास्तेऽप्यनन्ता, एवं द्वयादिप्रदेशकान् ॥ ९९ ॥

एवं च—

प्रदेशवृद्धिहानिभ्यां, येऽवगाढा अनन्तकाः । पूर्णक्षेत्रावगाढेभ्यः, स्युस्ते संख्यगुणाधिकाः ॥ १०० ॥

---

१. दोवीसन्ति पाठे मतत्रयी २. उत्कृष्टावगाहनास्ते यतः, — उत्कृष्टावगाहनापेक्षयैवाश्चर्यरूपत्वात्, मध्याङ्गानां त्वष्टशतस्य सिद्धिः स्यादेव,

ततश्च—

एकः सिद्धः प्रदेशैः स्वैः, समग्रैरतिनिर्मलैः । सिद्धाननन्तान् स्पृशति, व्यवगाढैः परस्परम् ॥ १०१ ॥
तेभ्योऽसंख्यगुणान् देशप्रदेशैः स्पृशति ध्रुवम् । क्षेत्रावगाहानाभेदैरन्याऽन्यैः पूर्वदर्शितैः ॥ १०२ ॥

तथोक्तं—प्रज्ञापनायां औपपातिके आवश्यके च—फुसइ अणन्ते सिद्धे, सव्वपएसेहिं नियमसो सिद्धो । तेवि असंखिज्जगुणा, देसपएसेहिं जे पुट्ठा ॥

अशरीरा जीवघना, ज्ञानदर्शनशालिनः । साकारेण निराकारेणोपयोगेन लक्षिताः ॥ १०३ ॥
ज्ञानेन केवलेनैते, कलयन्ति जगत्त्रयीम् । दर्शनेन च पश्यन्ति, केवलेनैव केवलाम्[1] ॥ १०४ ॥
पूर्वभवाकारस्यान्यथाव्यवस्थापनाच्छुषिरपूर्त्या । संस्थानमनित्थंस्थं, स्यादेषामनियताकारम् ॥ १०५ ॥
केनचिदलौकिकेन, स्थितं प्रकारेण निगदितुमशक्यम् । अत एव व्यपदेशो, नैषां दीर्घादिगुणवचनैः ॥ १०६ ॥

तथाहुः—'से न दीहे, से न हस्से, से न वट्टे' इत्यादि ॥ ननु—संस्थानं ह्याकारः, स कथममूर्त्तस्य भवति सिद्धस्य ? अत्रोच्यते—परिणामवत्यमूर्त्तेऽप्यसौ भवेत्कुम्भनभसीव[2] ॥

पूर्वभवभाविदेहाकारमपेक्ष्यैव सिद्धजीवस्य । संस्थानं स्यादौपाधिकमेव न वास्तवं किञ्चित् ॥ १०७ ॥

तथाहुरावश्यकनिर्युक्तिकारः—

ओगाहणाइ सिद्धा, भवति भागेण हुंति परिहीणा । संठाणमणित्थंत्थं, जरामरणविप्पमुक्काणं ॥
उत्ताणओ व पासिल्लओ व, अहवा निसन्नओ चेव । जो जह करेई कालं, सो तह उववज्जए सिद्धो[3] ॥
इहभवभिन्नागारो, कम्मवसाओ भवंतरे होई । न य तं[4] सिद्धस्स तओ, तंमिठितो से तयागारो ॥
जं संठाणं तु इहं, भवं चयंतस्स चरमसमयम्मि । आसीअ पएसघणं, तं संठाणं तहिं तस्स ॥
शतानि त्रीणि धनुषां, त्रयस्त्रिंशद्धनूंषि च । धनुस्त्रिभागश्च परा, सिद्धानामवगाहना ॥ १०८ ॥
जघन्याऽष्टाङ्गुलोपेतहस्तमाना प्ररूपिता । जघन्योत्कृष्टयोरन्तराले मध्या त्वनेकधा ॥ १०९ ॥
षोडशाङ्गुलयुक्ता या, मध्या करचतुष्टयी । आगमे गीयते सर्वमध्यानां सोपलक्षणम्[5] ॥ ११० ॥
प्राच्ये जन्मनि जीवानां, या भवेदवगाहना । तृतीयभागन्यूना सा, सिद्धानामवगाहना ॥ १११ ॥
उत्कृष्टा च भवे प्राच्ये, धनुःपञ्चशतीमिता । मध्यमा च बहुविधा, जघन्या हस्तयोर्द्वयम् ॥ ११२ ॥
जघन्या सप्तहस्तैव, जिनेन्द्राणामपेक्षया । त्र्यंशोनत्वे किलैतासां[6], ताः स्युः[7] सिद्धावगाहनाः ॥ ११३ ॥

एतदभिप्रेत्यैवौपपातिकोपाङ्गे उक्तम्—

"जीवाणं भंते ! सिज्झमाणा कयरंमि उच्चते सिज्झन्ति ? गोयमा ! जहण्णेणं सत्तरयणीए, उक्कोसेणं पंचधणुसइए सिज्झन्ति" ॥

---

१ संपूर्णां २. यथा तत्र घट उपाधिरेवमत्र अन्त्यभवशरीरं, तन्नाशानन्तरं च संस्थानपरावर्त्तकारणाभावात्, तदैवात्र त्रिभागोनाकारेण भवति. ३. सिद्धतया भवति ४. कर्म ५. तीर्थकरानाश्रित्य सा, यतो जघन्यतस्ते सप्तकरा एव ६. अवगाहनानां ७. पूर्वोक्ताः

मरुदेवा कथं सिद्धा, नन्वेवं जननी विभोः । साग्रपञ्चचापशतोत्तुङ्गा नाभिसमोच्छ्राया ॥ ११४ ॥

'संघयणं संठाणं, उच्चत्तं चेव कुलगरेहिं समम्'–इति वचनात् ।

अत्र उच्यते–

स्त्रियो ह्युत्तमसंस्थानाः, पुंसः कालार्हसंस्थितेः । किंचिदूनप्रमाणाः स्युर्नाभेरूनोच्छ्रयेति सा ॥ ११५ ॥

गजस्कन्धाधिरूढत्वान्मनाक्संकुचितेति वा । पञ्चचापशतोच्चैव, सेति किञ्चिन्न दूषणम् ॥ ११६ ॥

अयं च भाष्यकृदभिप्रायः ॥ संग्रहणीवृत्त्यभिप्रायस्त्वयम्–

यदिदमागमे पञ्चधनुःशतान्युत्कृष्टं मानमुक्तं तद्बाहुल्यात् । अन्यथा एतद् धनुःपृथक्त्वै
रधिकमपि स्यात्, तच्च पञ्चविंशत्यधिकपञ्चधनुःशतरूपं बोद्धव्यम् ॥

सिद्धप्राभृतेऽपि उक्तम्– [ओगाहणाद्वार - श्लो. १०५]

"ओगाहणा जहण्णा, रयणिदुगं अह पुणाइ उक्कोसा । पंचेव धणुसयाइं, धणुअपुहुत्तेण अहियाइंति ॥

एतद्वृत्तिश्च–पृथक्त्वशब्दोऽत्र बहुत्ववाची[1] । बहुत्वं चेह पञ्चविंशतिरूपं द्रष्टव्यमिति ।

आद्यसंहनना एव, सिद्ध्यन्ति न पुनः परे । संस्थानानां त्वनियमस्तेषु षट्स्वपि निर्वृत्तिः ॥ ११७ ॥

पूर्वकोट्यायुरुत्कर्षात्, सिद्धयेन्नाधिकजीवितः । जघन्यान्नववर्षायुः, सिद्धयेन्न न्यूनजीवितः ॥ ११८ ॥

द्वात्रिंशदन्ता एकाद्याश्चेत् सिद्ध्यन्ति निरन्तरम् । तदाऽष्टसमयान् यावन्नवमे त्वन्तरं ध्रुवम् ॥ ११९ ॥

अष्टचत्वारिंशदन्तास्त्रयस्त्रिंशन्मुखा यदि । सिद्ध्यन्ति समयान् सप्त, ध्रुवमन्तरमष्टमे ॥ १२० ॥

एकोनपञ्चाशदाद्याः षष्ट्यन्ता यदि देहिनः । सिद्ध्यन्ति समयान् षट् वै, सप्तमे त्वन्तरं भवेत् ॥ १२१ ॥

एकषष्टिप्रभृतयो, यावद् द्वासप्ततिप्रमाः । सिद्ध्यन्ति समयान् पञ्च, षष्ठे त्ववश्यमन्तरम् ॥ १२२ ॥

त्रिसप्ततिप्रभृतयश्चतुरशीतिसीमकाः । चतुरः समयान् यावत्, सिद्ध्यन्त्यग्रेतनेऽन्तरम् ॥ १२३ ॥

पञ्चाशीत्याद्याः क्षणांस्त्रीन्, यान्त्याऽऽषण्णवतिं शिवम् । क्षणौ सप्तनवत्याद्या, द्वौ च द्व्याद्यशतावधि ॥ १२४ ॥

त्र्याधिकशताद्याश्चेत् यावदष्टोत्तरं शतम् । सिद्ध्यन्ति चैकसमयं, द्वितीयेऽवश्यमन्तरम् ॥ १२५ ॥

जघन्यमन्तरं त्वेकसमयं परमं पुनः । षण्मासान्नास्ति सिद्धानां, च्यवनं शाश्वता हि ते ॥ १२६ ॥

सर्वस्तोका क्लीबसिद्धास्तेभ्यः संख्यगुणाधिकाः । स्त्रीसिद्धाः पुनरेभ्यः पुंसिद्धाः संख्यगुणाधिकाः ॥ १२७ ॥

सर्वस्तोका दक्षिणस्यामुदीच्यां च मिथः समाः । प्राच्यां संख्यगुणाः पश्चिमायां विशेषतोऽधिकाः ॥ १२८ ॥

न तत्सुखं मनुष्याणां, देवानामपि नैव तत् । यत्सुखं सिद्धजीवानां, प्राप्तानां पदमव्ययम् ॥ १२९ ॥

त्रैकालिकानुत्तरान्तनिर्जराणां त्रिकालजम् । भुक्तं भोग्यं भुज्यमानमनन्तं नाम यत्सुखम् ॥ १३० ॥

पिण्डीकृतं तदेकत्रानन्तैर्वर्गैश्च वर्गितम् । शिवसौख्यस्य समतां लभते न कदाचन ॥ १३१ ॥

---

१. भाष्यं मरुदेवाश्रितं, एतत्तु ऊर्ध्वबाहूत्कृष्टतनोः

सर्वाद्धापिण्डितः सिद्धसुखराशिर्विकल्पतः । अनन्तवर्गभक्तोऽपि, न मायाद् भुवनत्रये ॥ १३२ ॥

वर्गविभागश्चैवम्–

स्युः षोडश चतुर्भक्ताश्चत्वारो वर्गभागतः । द्वावेव परिशिष्येते, चत्वारोऽपि द्विभाजिताः ॥ १३३ ॥

सुखस्य तस्य माधुर्यं, कलयन्नपि केवली । वक्तुं शक्नोति नो जग्धगुडादेर्मूकदेहिवत् ॥ १३४ ॥

यथेप्सितान्नपानादिभोजनानन्तरं पुमान् । तृप्तः सन् मन्यते सौख्यं, तृप्तास्ते सर्वदा तथा ॥ १३५ ॥

एवमापातमात्रेण, दर्श्यते तन्निदर्शनम् । वस्तुतस्तु तदाह्लादोपमानं नास्ति विष्टपे ॥ १३६ ॥

औपम्याप्यविषयस्ततः सिद्धसुखं खलु । यथा पुरसुखं जज्ञे, म्लेच्छवाचामगोचरः ॥ १३७ ॥

तथा चाहुः– म्लेच्छः कोऽपि महारण्ये, वसति स्म निराकुलः । अन्यदा तत्र भूपालो, दुष्टाश्वेन प्रवेशितः ॥ म्लेच्छेनासौ नृपो दृष्टः, सत्कृतश्च यथोचितम् । प्रापितश्च निजं देशं, सोऽपि राज्ञा निजं पुरम् ॥ ममायमुपकारीति, कृतो राज्ञाऽतिगौरवात् । विशिष्टभोगभूतीनां, भाजनं जनपूजितः ॥ तुङ्गप्रासादशृङ्गेषु, रम्येषु काननेषु च । वृतो विलासिनीवृन्दैर्भुंक्ते भोगसुखान्यसौ ॥ अन्यदा प्रावृषः प्राप्तौ, मेघाडम्बरमम्बरे । दृष्ट्वा मृदङ्गमधुरैर्गर्जितैः केकिनर्त्तनम् ॥ जातोत्कण्ठो दृढं जातोऽरण्यवासागमं प्रति । विसर्जितश्च राज्ञापि, प्राप्तोऽरण्यमसौ ततः ॥ पृच्छन्त्यरण्यवासास्तं, नगरं तात कीदृशम् । परं नगरवस्तूनामुपमाया अभावतः ॥ न शशाकतमां तेषां, गदितुं स कृतोद्यमः । एवमत्रोपमाऽभावात्, वक्तुं शक्यं न तत्सुखम् ॥

सिद्धा बुद्धा गताः पारं, परं पारंगता अपि । सर्वामनागतामद्धां, तिष्ठन्ति सुखलीलया ॥ १३८ ॥

अरूपा अपि प्राप्तरूपप्रकृष्टा, अनङ्गा स्वयं ये त्वनङ्गद्रुहोऽपि ।
अनन्ताक्षराश्चोज्झिताशेषवर्णाः, स्तुमस्तान् वचोऽगोचरान् सिद्धजीवान् ॥ १३९ ॥

इति सिद्धाः ॥

विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिष-द्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्वप्रदीपोपमे, सर्गो निर्गलितार्थसार्थसुभगः पूर्णो द्वितीयः सुखम् ॥ १४० ॥

॥ इति श्री लोकप्रकाशे द्वितीयः सर्गः समाप्तः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

१ भाव्यं मरुदेवाश्रितं, एतत्तु ऊर्ध्वबाहूत्कृष्टतनोः

अथ तृतीयः सर्गः ।

अथ संसारिजीवानां, स्वरूपं वर्णयाम्यहम् । द्वारैः सप्तत्रिंशता तान्यमूनि स्युर्यथाक्रमम् ॥ १ ॥
भेदाः स्थानानि पर्याप्तिः, संख्ये योनिकुलाश्रिते । योनीनां संवृतत्वादि, स्थिती च भवकाययोः ॥ २ ॥
देहसंस्थानाङ्गमानसमुद्घाता गतागती । अनन्तराप्तिः समये, सिद्धिर्लेश्या दिगाहृतौ ॥ ३ ॥
संहननानि कषायाः, संज्ञेन्द्रियसंज्ञितास्तथा वेदाः । दृष्टिर्ज्ञानं दर्शनमुपयोगाहारगुणयोगाः ॥ ४ ॥
मानं लघ्वल्पबहुता, सैवाऽन्या दिगपेक्षया । अन्तरं भवसंवेधो, महाल्पबहुताऽपि च ॥ ५ ॥
भेदा इह प्रकाराः स्युर्जीवानां स्वस्वजातिषु । समुद्घातनिजस्थानोपपातैः स्थानकं त्रिधा ॥ ६ ॥
पर्याप्ता व्यपदिश्यन्ते, याभिः पर्याप्तयस्तु ताः । पर्याप्तापर्याप्तभेदादत एव द्विधाङ्गिनः ॥ ७ ॥
पर्याप्तयः स्वयोग्या यैः, सकलाः साधिताः सुखम् । पर्याप्तिनामकर्मानुभावात्पर्याप्तकास्तु ते ॥ ८ ॥
द्विधाऽमी लब्धिकरणभेदात्तत्रादिमास्तु ये । समाप्य स्वार्हपर्याप्तीर्म्रियन्ते नान्यथा ध्रुवम् ॥ ९ ॥
करणानि[१] शरीराक्षादीनि निर्वर्त्तितानि यैः । ते स्युः करणपर्याप्ताः, करणानां समर्थनात् ॥ १० ॥
अपर्याप्ता द्विधाः प्रोक्ता, लब्ध्या च करणेन च । द्वयोर्विशेषं शृणुत, भाषितं गणधारिभिः ॥ ११ ॥
असमाप्य स्वपर्याप्तीर्म्रियन्ते येऽल्पजीविताः[२] । लब्ध्या ते स्युरपर्याप्ता, यथा निःस्वमनोरथाः ॥ १२ ॥
निर्वर्त्तितानि नाद्यापि, प्राणिभिः करणानि यैः । देहाक्षादीनि[३] करणाऽपर्याप्तास्ते प्रकीर्त्तिताः ॥ १३ ॥
म्रियन्तेऽल्पायुषो लब्ध्यपर्याप्ता इह येऽङ्गिनः । तेऽपि भूत्वैव करणपर्याप्ता नान्यथा पुनः ॥ १४ ॥
याऽऽहारादिपुद्गलानामादान[४]परिणामयोः । जन्तोः पर्याप्तिनामोत्था, शक्तिः पर्याप्तिरत्र सा ॥ १५ ॥
पुद्गलोपचयादेव, भवेत्सा सा च षड्विधा । आहाराङ्गेन्द्रिय श्वासोच्छ्वासभाषामनोऽभिधाः ॥ १६ ॥
तत्रैषाऽऽहारपर्याप्तिर्ययाऽऽदाय निजोचितम् । पृथक्खलरसत्वेनाहारं परिणतिं नयेत् ॥ १७ ॥
वैक्रियाहारकौदारिकाङ्गयोग्यं यथोचितम् । तं रसीभूतमाहारं, यया शक्त्या पुनर्भवी ॥ १८ ॥
रसासृग्मांसमेदोऽस्थिमज्जशुक्रादिधातुताम् । नयेद्यथासम्भवं सा, देहपर्याप्तिरुच्यते ॥ १९ ॥
धातुत्वेन परिणतादाहारादिन्द्रियोचितात् । आदाय पुद्गलांस्तानि, यथास्वं प्रविधाय च ॥ २० ॥
इष्टे तद्विषयज्ञप्तौ[५], यया शक्त्या शरीरवान् । पर्याप्तिः सेन्द्रियाह्वाना, दर्शिता सर्वदर्शिभिः ॥ २१ ॥

इति संग्रहणीवृत्त्यभिप्रायः ॥ प्रज्ञापनाजीवाभिगमप्रवचनसारोद्धारवृत्त्यादिषु तु यया धातुतया परिणमितमाहारमिन्द्रियतया परिणमयति सा इन्द्रियपर्याप्तिरित्येतावदेव दृश्यते ॥

---

१. विहिते शरीराक्षाख्ये, करणे यैस्तु जन्तुभिः इति सम्यक्, करणापर्याप्तानामायुषोऽबन्धात् २. मरिष्यन्त्यल्पजीविताः ३. विरोधग्रस्त आदिशब्दः ४. जोएण कम्मएणं आहारेइ अणंतरं जीवो ५. करोतीन्द्रियनिर्वृत्तिं, रचनायाः फलं ज्ञानं, सामर्थ्यज्ञापनावेदं.

ययोच्छ्वासार्हमादाय, दलं परिणमय्य च । तत्तयाऽऽलम्ब्य मुञ्चेत्सोच्छ्वासपर्याप्तिरुच्यते ॥ २२ ॥
ननु देहोच्छ्वासनामकर्मभ्यामेव सिद्धयतः । देहोच्छ्वासौ किमेताभ्यां, पर्याप्तिभ्यां प्रयोजनम् ? ॥ २३ ॥
अत्रोच्यते पुद्गलानां, गृहीतानामिहात्मना । साध्या परिणतिर्देहतया तन्नामकर्मणा ॥ २४ ॥
आरब्धाङ्गसमाप्तिस्तु, तत्पर्याप्त्या प्रसाध्यते । एवं भेदः साध्यभेदाद्देहपर्याप्तिकर्मणोः ॥ २५ ॥
एवमुच्छ्वासलब्धिः स्यात्साध्या तन्नामकर्मणः । साध्यमुच्छ्वासपर्याप्तेस्तस्या व्यापारणं पुनः ॥ २६ ॥
सतीमप्युच्छ्वासलब्धिमुच्छ्वासनामकर्मजाम् । व्यापारयितुमीशः स्यात्तत्पर्याप्त्यैव नान्यथा ॥ २७ ॥
सतीमपि शरक्षेपशक्तिं नैव भटोऽपि हि । विना चापादानशक्तिं, सफलीकर्त्तुमीश्वरः ॥ २८ ॥
भाषार्हं दलमादाय, गीस्त्वं नीत्वाऽवलम्ब्य च । यया शक्त्या त्यजेत्प्राणी, भाषापर्याप्तिरित्यसौ ॥ २९ ॥
दलं लात्वा मनोयोग्यं, तत्तां नीत्वाऽवलम्ब्य च । यया मननशक्तः स्यान्मनःपर्याप्तिरत्र सा ॥ ३० ॥
म्रियन्ते येऽप्यपर्याप्ताः, पर्याप्तित्रयमादिमम् । पूर्णीकृत्यैव न पुनरन्यथा सम्भवेन्मृतिः ॥ ३१ ॥
तथाहि—पर्याप्तित्रययुक्तोऽन्तर्मुहूर्तेनायुरग्रिमम् । बद्ध्वा ततोऽन्तर्मुहूर्तमबाधान्तस्य जीवति ॥ ३२ ॥
ततो निबद्धायुर्योग्यां, याति तां गतिमन्यथा । अबद्धायुरनापूर्णतदाबाधो व्रजेत्क्व सः ॥ ३३ ॥

तथोक्तं प्रज्ञापनावृत्तौ—यस्मादागामिभवायुर्बद्ध्वा म्रियन्ते सर्वदेहिनो नाबद्ध्वा । तच्च शरीरेन्द्रियपर्याप्तिभ्यां पर्याप्तानां बन्धमायाति, नापर्याप्तानाम् ॥

समयेभ्यो नवेभ्यः स्यात्प्रभृत्यन्तर्मुहूर्त्तकम् । समयोनमुहुर्त्तान्तमसंख्यातविधं यतः ॥ ३४ ॥
ततः सूक्ष्मक्षमादीनामन्तर्मुहूर्त्तजीविनाम् । अन्तर्मुहूर्त्तानेकत्वमिदं सङ्गतिमङ्गतिः ॥ ३५ ॥
उत्पत्तिक्षण एवैताः, स्वा स्वा युगपदात्मना । आरभ्यन्ते संविधातुं, समाप्यन्ते त्वनुक्रमात् ॥ ३६ ॥
तद्यथा—आदावाहारपर्याप्तिस्ततः शरीरसंज्ञिता । तत इन्द्रियपर्याप्तिरेवं सर्वा अपि क्रमात् ॥ ३७ ॥
तत्रैकाहारपर्याप्तिः समाप्येतादिमे क्षणे । शेषा असंख्यसमयप्रमाणान्तर्मुहूर्त्ततः ॥ ३८ ॥
अनुक्रमोऽयं विज्ञेय, औदारिकशरीरिणाम् । वैक्रियाहारकवतां, ज्ञातव्योऽयं पुनः क्रमः ॥ ३९ ॥
एका शरीरपर्याप्तिर्जायतेऽन्तर्मुहूर्त्ततः । एकैकक्षणवृद्ध्याऽतः, समाप्यन्ते पराः पुनः ॥ ४० ॥
निष्पत्तिकालः सर्वासां, पुनरान्तर्मुहूर्त्तिकः । आरम्भसमयाद्यान्ति, निष्ठां ह्यन्तर्मुहूर्त्ततः ॥ ४१ ॥
आहारपर्याप्तिस्त्वत्रापि प्राग्वत् ॥
मनोवचःकायबलान्यक्षाणि पञ्च जीवितम् । श्वासश्चेति दश प्राणा, द्वारेऽस्मिन्नेव[1] वक्ष्यते ॥ ४२ ॥
इति पर्याप्तिस्वरूपम् ॥ ३ ॥ अथ योनिसंख्यास्वरूपम्—
तैजसकार्मणवन्तो, युज्यन्ते यत्र जन्तवः स्कन्धैः । औदारिकादियोग्यैः, स्थानं तद्योनिरित्याहुः ॥ ४३ ॥

१. सङ्गतिमङ्गति बहुवचनम्, तेन वक्ष्यन्तरे द्वारि प्रस्तुते इति युक्तम् ।

तथा च–

व्यक्तितोऽसंख्यभेदास्ताः, संख्यार्हा नैव यद्यपि । तथापि समवर्णादिजातिभिर्गणनां गताः ॥ ४४ ॥

तथोक्तं प्रज्ञापनावृत्तौ—केवलमेव विशिष्टवर्णादियुक्ताः संख्यातीताः स्वस्थाने व्यक्तिभेदेन योनयः । जातिं अधिकृत्य एकैव योनिर्गण्यते ।

लक्षाश्चतुरशीतिश्च, सामान्येन भवन्ति ताः । विशेषात्तु यथास्थानं, वक्ष्यन्ते स्वामिभावतः ॥ ४५ ॥

किं च–संवृता विवृता चैव, योनिर्विवृतसंवृता । दिव्यशय्यादिवद्धस्त्राद्यावृता तत्र संवृता ॥ ४६ ॥

तथा विस्पष्टमनुपलक्ष्यमाणापि संवृता । विवृता तु स्पष्टमुपलक्ष्या जलाशयादिवत् ॥ ४७ ॥

उक्तोभयस्वभावा तु, योनिर्विवृतसंवृता । बहिर्दश्याऽदृश्यमध्या, नारीगर्भाशयादिवत् ॥ ४८ ॥

तृतीययोनिजाः स्तोकास्ततो द्वितीययोनयः । असंख्यघ्नास्ततोऽन्तगुणिताः स्युरयोनयः ॥ ४९ ॥

तेभ्योऽप्यनन्तगुणिताः, ख्याताः प्रथमयोनयः । एवं शीतसचित्तादिष्वप्यल्पबहुतोह्यताम् ॥ ५० ॥

शीता चोष्णा च शीतोष्णा, तत्तत्स्पर्शान्वयात् त्रिधा । सचित्ताऽचित्तमिश्रेति, भेदतोऽपि त्रिधा भवेत् ॥ ५१ ॥

जीवप्रदेशैरन्योऽन्यानुगमेनोररीकृता । जीवद्देहादिः सचित्ता, शुष्ककाष्ठादिवत् परा ॥ ५२ ॥

अत एवाङ्गिभिः सूक्ष्मैस्त्रैलोक्ये निचितेऽपि हि । न तत्प्रदेशैर्योनीनामचित्तानां सचित्तता ॥ ५३ ॥

सचित्ताचित्तरूपा तु, मिश्रा योनिः प्रकीर्त्तिता । नृतिरश्चां यथा योनौ, शुक्रशोणितपुद्गलाः ॥ ५४ ॥

आत्मसाद्विहिता ये स्युस्ते सचित्ताः परेऽन्यथा । सचित्ताचित्तयोगे तद्योनेर्मिश्रत्वमाहितम् ॥ ५५ ॥

योषितां किल नाभेरधस्तात् शिराद्वयं पुष्पमालावैक्ष्यकाकारमस्ति । तस्याधस्तात् अधोमुखसंस्थितकोशाकारा योनिः । तस्याश्च बहिः चूतकलिकाकृतयो मांसमञ्जर्यो जायन्ते । ताः किल असृक्स्यन्दित्वादृतौ भवन्ति । तत्र केचिदसृजो लवाः कोशाकारकां योनिमनुप्रविश्य सन्तिष्ठन्ते, पश्चात् शुक्रसंमिश्रांस्तानाहारयन् जीवः तत्रोत्पद्यते । तत्र ये योन्या आत्मसात् कृताः ते सचिताः, कदाचित् मिश्रा इति । ये तु न स्वरूपतामापादिताः ते अचित्ताः । अपरे वर्णयन्ति असृक् सचेतनं शुक्रमचेतनं इति । अन्ये ब्रुवते शुक्रशोणितम् अचित्तं योनिप्रदेशाः सचित्ता इत्यत योनिर्मिश्रेति तु तत्त्वार्थवृत्तौ द्वितीयेऽध्याये ॥

योनिस्त्रिधा मनुष्याणां, शङ्खावर्त्तादिभेदतः । यस्यां शङ्ख इवावर्त्तः, शङ्खावर्त्ता तु तत्र सा ॥ ५६ ॥

कूर्मोन्नता भवेद्योनिः, कूर्मपृष्ठमिवोन्नता । वंशीपत्रा तु संयुक्तवंशीपत्रद्वयाकृतिः ॥ ५७ ॥

स्त्रीरत्नस्य भवेच्छङ्खावर्त्ता सा गर्भवर्जिता । व्युत्क्रामन्ति तत्र गर्भा, निष्पद्यन्ते न ते यतः ॥ ५८ ॥

अतिप्रबलकामाग्नेर्विलीयन्ते हि ते यथा । कुरुमत्या करस्पृष्टोऽप्यद्रवल्लोहपुत्रकः ॥ ५९ ॥

तथा च प्रज्ञापनायाम् । संख्यावत्ताणं जोणी इत्थिरयणस्स ।

अर्हच्चक्रिविष्णुबलदेवाम्बानां द्वितीयिका । तृतीया पुनरन्यासां, स्त्रीणां योनिः प्रकीर्तिता ॥ ६० ॥

इदं च योनीनां त्रिधा त्रैविध्यं स्थानाङ्गतृतीयस्थाने ॥

आचाराङ्गवृत्तौ तु शुभाशुभभेदेन योनीनामनेकत्वमेवं गाथाभिः प्रदर्शितम्—

सीआदीजोणीओ, चउरासीती अ सयसहस्सेहिं । असुहाओ य सुहाओ, तत्थ सुहाओ इमा जाण ॥ अस्संखाउ मणुस्सा, राइसरसंखमादिआऊं । तित्थयरनामगोअं, सव्वसुहं होइ नायव्वं ॥ तत्थविय जाइसंपन्नाइ सेसाओ होंति असुहाओ । देवेसु किब्बिसाइ, सेसाओ होंति उ सुहाओ ॥ पंचेंदियतिरिएसु हयगयरयणा हवंति उ सुहाओ । सेसाओ असुहाओ सुहवन्नेगिंदियादीया ॥ देविंदचक्कवट्टित्तणाइं मोत्तुं च तित्थयरभावं । अणगारभावियाविय, सेसाओ अणंतसो पत्ता ॥ इति योनिस्वरूपम् ॥ ४ ॥

कुलानि योनिप्रभवान्याहुस्तानि बहून्यपि । भवन्ति योनावेकस्यां, नानाजातीयदेहिनाम् ॥ ६१ ॥
कृमिवृश्चिककीटादिनानाक्षुद्राङ्गिनां यथा । एकगोमयपिण्डान्तः, कुलानि स्युरनेकशः ॥ ६२ ॥
कोट्येका सप्तनवतिर्लक्षाः सार्धा भवन्ति हि । सामान्यात्कुलकोटीनां, विशेषो वक्ष्यतेऽग्रतः ॥ ६३ ॥
इति योनिकुलस्वरूपं ॥ ५ ॥ तत्संवृतत्वादि च ॥ ६ ॥

भवस्थितिस्तद्भवायुर्द्विविधं तच्च कीर्त्तितम् । सोपक्रमं स्यात्तत्राद्यं, द्वितीयं निरुपक्रमम् ॥ ६४ ॥
कालेन बहुना वेद्यमप्यायुर्यत्तु भुज्यते । अल्पेनाध्यवसानाद्यैरागमोक्तैरुपक्रमैः ॥ ६५ ॥
आयुः सोपक्रमं तत्स्यादन्यद्धा कर्म तादृशम् ॥ यद् बंधसमये बद्धं, श्लथं शक्यापवर्तनम् ॥ ६६ ॥
दत्ताग्निरेकतो रज्जुर्यथा दीर्घीकृता क्रमात् । दह्यते संपिण्डिता तु, सा झटित्येकहेलया ॥ ६७ ॥
यत्पुनर्बन्धसमये, बद्धं गाढनिकाचनात् । क्रमवेद्यफलं तद्धि, न शक्यमपवर्त्तितुम् ॥ ६८ ॥
क्षीयतेऽध्यवसानाद्यैर्यैः स्वोत्थैः स्वस्य जीवितम् । परैश्च विषशस्त्राद्यैस्ते स्युः सर्वेऽप्युपक्रमाः ॥ ६९ ॥
यदाहुः—अज्झवसाणनिमित्ते आहारे वेयणापराघाए । फासे आणापाणू सत्तविहं जिज्झए आउं ॥
[बृहत्संग्रहणी गाथा. ३३७]

त्रिधा तत्राध्यवसानं, रागस्नेहभयोद्भवम् । व्यापादयन्ति रागाद्या, अप्यत्यन्तविकल्पिताः ॥ ७० ॥
यथा प्रपापालिकाया, युवानमनुरागतः । पश्यन्त्याः क्षीणमायुर्यत्कामस्यान्त्या दशा मृतिः ॥ ७१ ॥
यतः—चिंतेइदट्ठुमिच्छइ दीहं नीससइ तह जरे दाहे । भत्तअरोयण मुच्छा उम्माय न याणई मरणं ॥
कस्याश्चित् सार्थवाह्याश्च, विदेशादागते प्रिये । मित्रैः स्नेहपरीक्षार्थं, विपन्ने कथितेऽथ सा ॥ ७२ ॥
सार्थवाही विपन्नैव, सार्थवाहोऽपि तां मृताम् । श्रुत्वा तत्संगमायैव, तूर्णं स्नेहाद् व्यपद्यत ॥ ७३ ॥
भयाद्यथा वासुदेवदर्शनात् सोमिलो द्विजः । हत्वा गजसुकुमारं, नगरीमाविशन् मृतः ॥ ७४ ॥
निमित्ताद्विषशस्त्रादेराहाराद्बहुतोऽल्पतः । स्निग्धतश्चास्निग्धतश्च, विकृतादहितावहात् ॥ ७५ ॥
शूलादेर्वेदनायाश्च, गर्त्ताप्रपतनादिकात् । पराघातात्स्पर्शतश्च, त्वग्विषादिसमुद्भवात् ॥ ७६ ॥

श्वासोच्छ्वासाच्च विकृतत्वेनात्यन्तं प्रसर्पतः । निरुद्धाद्धा म्रियेताङ्गी, तस्मादेते उपक्रमाः ॥ ७७ ॥
स्युः केषाञ्चिद्यदप्येतेऽनुपक्रमायुषामपि । स्कंदकाचार्यशिष्याणामिव यंत्रनिपीलना ॥ ७८ ॥
तथापि कष्टदास्तेषां, न त्वायुःक्षयहेतवः । सोपक्रमायुष इव, भासन्ते तेऽपि तैर्मृताः ॥ ७९ ॥
अथ प्रकृतम्—सोपक्रमायुषः केऽप्यनुपक्रमायुषः परे । इति स्युर्द्विविधा जीवास्तत्र सोपक्रमायुषः ॥ ८० ॥
तृतीये नवमे सप्तविंशे भागे निजायुषः । बध्नन्ति परजन्मायुरन्त्ये वाऽन्तर्मुहूर्त्तके ॥ ८१ ॥

यदाहुः श्यामाचार्याः । सियतिभागे, सियतिभागतिभागे, सियतिभागतिभागतिभागे इति ॥

केचित्तु सप्तविंशादप्यूर्ध्वं विकल्पयन्ति वै । त्रिभागकल्पनां यावदन्त्यमन्तर्मुहूर्त्तकम् ॥ ८२ ॥
असंख्यायुर्नृतिर्यंचश्चरमाङ्गाश्च नारकाः । सुराः शलाकापुमांसोऽनुपक्रमायुषः स्मृताः ॥ ८३ ॥

अपरे वर्णयन्ति । तीर्थंकरौपपातिकानां नोपक्रमतो मृत्युः । शेषाणामुभयथा । इति तत्वार्थवृत्तौ ॥ कर्मप्रकृतिवृत्तावपि 'अद्धाजोगुक्कोसं' इति गाथाव्याख्यानेऽभोगभूमिजेषु तिर्यक्षु मनुष्येषु च त्रिपल्योपमस्थितिषूत्पन्नः पश्चादाशु सर्वाल्पजीवितमन्तर्मुहूर्त्तं विहाय शेषमायुः त्रिपल्योपमस्थितिकं अपवर्त्तयन्ति अन्तर्मुहूर्त्तानम् इति ॥

सुरनैरयिकाऽसंख्यजीवितिर्यग्मनुष्यकाः । बध्नन्ति षण्मासशेषायुषोऽग्रयभवजीवितम् ॥ ८४ ॥

मतान्तरेण उत्कर्षतः षण्मासावशेषे जघन्यतश्च अन्तर्मुहूर्त्तशेषे नारकाः परभवायुर्बध्नन्ति इति भगवतीसूत्रे (शतक १४ उद्देश १) ॥

निजायुषस्तृतीयेंऽशे, शेषेऽनुपक्रमायुषः । नियमादन्यजन्मायुर्निर्बध्नन्ति परे पुनः ॥ ८५ ॥
यावत्यायुष्यवशिष्टे, परजन्मायुरर्ज्यते । कालस्तावानबाधाख्यस्ततः परमुदेति तत् ॥ ८६ ॥
इति भवस्थितिः ॥ ७ ॥
कायस्थितिस्तु पृथिवीकायिकादिशरीरिणाम् । तत्रैव कायेऽवस्थानं, विपद्योत्पद्य चासकृत् ॥ ८७ ॥
इति कायस्थितिस्वरूपम् ॥ ८ ॥
औदारिकं वैक्रियं च, देहमाहारकं तथा । तैजसं कार्मणं चेति, देहाः पञ्चोदिता जिनैः ॥ ८८ ॥
उदारैः पुद्गलैर्जातं, जिनदेहाद्यपेक्षया । उदारं सर्वतस्तुङ्गमिति चौदारिकं भवेत् ॥ ८९ ॥
क्रिया विशिष्टा नाना वा, विक्रिया तत्र संभवम् । स्वाभाविकं लब्धिजं च, द्विविधं वैक्रियं भवेत् ॥ ९० ॥
यत्तदेकमनेकं वा, दीर्घं ह्रस्वं महल्लघु । भवेत् दृश्यमदृश्यं वा, भूचरं वापि खेचरम् ॥ ९१ ॥
आकाशस्फटिकस्वच्छं, श्रुतकेवलिना कृतम् । अनुत्तरामरेभ्योऽपि, कान्तमाहारकं भवेत् ॥ ९२ ॥
श्रुतावगाहाप्तामर्षौषध्याद्यृद्धिः करोत्यदः । मनोज्ञानी[1] चारणो वोत्पन्नाहारकलब्धिकः ॥ ९३ ॥

---

१. चिन्त्यमिदं, यतो मनःपर्यवज्ञानिपृष्टप्रत्युत्तराय मनःपरिणतिर्द्रव्यतस्तीर्थकृतामित्यभियुक्तोक्तिः, एवं चारणेष्वपि गमनसामर्थ्यात्, अश्रुतत्वाच्च तेषां तस्य, ऋद्धिदर्शनप्राणिदयार्थमेव परं तस्य संभवः ।

तैजसं चोष्णतालिङ्गं[1], तेजोलेश्यादिसाधनम् । कार्मणानुगमाहारपरिपाकसमर्थकम् ॥ ९४ ॥
अस्मात्तपोविशेषोत्थलब्धियुक्तस्य भूस्पृशः । तेजोलेश्यानिर्गमः स्यादुत्पन्ने हि प्रयोजने ॥ ९५ ॥
तथोक्तं जीवाभिगमवृत्तौ—
सव्वस्स उन्हसिद्धं, रसाइआहारपागजणगं च । तेअगलद्धिनिमित्तं च तेअगं होइ नायव्वम् ॥
अस्मादेव भवत्येव, शीतलेश्याविनिर्गमः । स्यातां च रोषतोषाभ्यां, निग्रहानुग्रहावितः ॥ ९६ ॥
तथोक्तं तत्त्वार्थवृत्तौ—

यदा उत्तरगुणप्रत्यया लब्धिः उत्पन्ना भवति तदा परं प्रति दाहाय विसृजति रोषविषाध्मातो, गोशालादिवत् । प्रसन्नस्तु शीततेजसा अनुगृह्णातीति ॥

क्षीरनीरवदन्योऽन्यं, श्लिष्टा जीवप्रदेशकैः । कर्मप्रदेशा येऽनन्ताः, कार्मणं स्यात्तदात्मकम् ॥ ९७ ॥
सर्वेषामपि देहानां, हेतुभूतमिदं भवेत् । भवान्तरगतौ जीवसहायं च सतैजसम् ॥ ९८ ॥
नन्वेताभ्यां शरीराभ्यां, सहात्मायाति याति चेत् । प्रविशन्निरयन्वापि, कुतोऽसौ तर्हि नेक्ष्यते ॥ ९९ ॥
अत्रोच्यते–
न चक्षुर्गोचरः सूक्ष्मतया तैजसकार्मणे । ततो नोत्पद्यमानोऽपि, म्रियमाणोप्यसौ स्फुटः ॥ १०० ॥
परैरप्युक्तम्–
अन्तरा भवदेहोऽपि, सूक्ष्मत्वान्नोपलभ्यते । निष्क्रामन्प्रविशन्वापि, नाऽभावोऽनीक्षणादपि ॥ १०१ ॥
स्वरूपमेवं पञ्चानां, देहानां प्रतिपादितम् । कारणादिकृतांस्तेषां, विशेषान् दर्शयाम्यथ ॥ १०२ ॥
संजातं पुद्गलैः स्थूलैर्देहमौदारिकं भवेत् । सूक्ष्मपुद्गलजातानि, ततोऽन्यानि यथोत्तरम् ॥ १०३ ॥
इति कारणकृतो विशेषः ॥
यथोत्तरं प्रदेशैः स्युरसंख्येयगुणानि च । आतृतीयं ततोऽनन्तगुणे तैजसकार्मणे ॥ १०४ ॥
इति प्रदेशसंख्याकृतो विशेषः ॥
आद्यं तिर्यग्मनुष्याणां, देवनारकयोः परम् । केषाञ्चिल्लब्धिमद्वायुसंज्ञितिर्यग्नृणामपि ॥ १०५ ॥
आहारकं सलब्धीनां, स्याच्चतुर्दशपूर्विणाम् । सर्वसंसारिजीवानां, ध्रुवे तैजसकार्मणे ॥ १०६ ॥

तत्वार्थभाष्ये तूक्तम्— एके त्वाचार्याः नयवादापेक्षं व्याचक्षते कार्मणमेवैकमनादिसम्बद्धम् । तेनैवैकेन जीवस्यानादिः सम्बन्धो भवतीति । तैजसं तु लब्ध्यपेक्षं भवति । सा च तैजसलब्धिर्न सर्वस्य, कस्यचिदेव भवति ॥ एतट्टीकालेशः अपि–एवं एकीयमतेन प्रत्याख्यातमेव तैजसं शरीरमनादिसम्बन्धतया, सर्वस्य चेति । या पुनरभ्यवहृताहारं प्रति पाचकशक्तिः विनाऽपि लब्ध्या सा तु कार्मणस्यैव भविष्यति, कर्मोष्णत्वात् । कार्मणं हीदं शरीरं अनेकशक्तिगर्भत्वादनुकरोति विश्वकर्मणः । तदेव हि तथासमासादितपरिणतिर्व्यपदिश्यते यदि तैजसशरीरतया[1] ततो न कश्चिद्दोष इति ।. अत्र भूयान् विस्तरोऽस्ति । स तु तत्वार्थवृत्तेरवसेयः ॥ [अध्या-२. सूत्र. ४३]

---

१. उष्णादिलिङ्गकारणाहारपाकजनकतया, पराभिमतकार्योत्पादकतयेत्यर्थः, तथाच न पार्थक्यं तन्मते । समुद्घातेहेतुर्न सर्वस्येति तत्त्वं ।

युगपच्चैकजीवस्य, द्वयं त्रयं चतुष्टयम् । स्याद्देहानां न तु पञ्च, नाप्येकं भववर्त्तिनः ॥ १०७ ॥
वैक्रियस्याहारकस्याऽसत्त्वादेकस्य चैकदा । न पञ्च स्युः सदा सत्त्वादन्त्ययोर्नैकमप्यदः ॥ १०८ ॥
स्यादेकमपि पूर्वोक्तमतान्तरव्यपेक्षया । भवान्तरं गच्छतस्तन्मते स्यात्कार्मणं परम् ॥ १०९ ॥
इति स्वामिकृतो विशेषः ॥

आद्यस्य तिर्यगुत्कृष्टा, गतिरारुचकाचलम् । जङ्घाचारणनिर्ग्रंथानाश्रित्य कलयन्तु ताम् ॥ ११० ॥
आनन्दीश्वरमाश्रित्य, विद्याचारणखेचरान् । ऊर्द्ध्वं चापण्डकवनं, तत्त्रयापेक्षया भवेत् ॥ १११ ॥
विषयो वैक्रियाङ्गस्याऽसंख्येया द्वीपवार्धयः । महाविदेहा विषयो, ज्ञेय आहारकस्य च ॥ ११२ ॥
लोकः सर्वोऽपि विषयस्तुर्यपञ्चमयोर्भवेत् । भवाद्भवान्तरं येन, गच्छतामनुगे इमे ॥ ११३ ॥
इति विषयकृतो भेदः ॥

धर्माधर्मार्जनं[१] सौख्यदुःखानुभव एव च । केवलज्ञानमुक्त्यादिप्राप्तिराद्यप्रयोजनम् ॥ ११४ ॥
एकानेकत्वसूक्ष्मत्वस्थूलत्वादि नभोगतिः । संघसाहाय्यमित्यादि[२], वैक्रियस्य प्रयोजनम् ॥ ११५ ॥
सूक्ष्मार्थसंशयच्छेदो, जिनेन्द्रर्द्धिविलोकनम् । ज्ञेयमाहारकस्यापि, प्रयोजनमनेकधा ॥ ११६ ॥
यदाहु :— [प्रवचनसारोद्धारे श्लो. १५८२]
तित्थयररिद्धिदंसणसुहुमपयत्थावगाहेउं वा । संसयवोच्छेयत्थं, गमणं जिणपायमूलंमि ॥
शापानुग्रहयोः शक्तिर्भुक्तिपाकः प्रयोजनम् । तैजसस्य कार्मणस्य, पुनरन्यभवे[३] गतिः ॥ ११७ ॥
इति प्रयोजनकृतो विशेषः ॥

उत्कर्षतः सातिरेकसहस्रयोजनप्रमम् । औदारिकं वैक्रियं साधिकैकलक्षयोजनम् ॥ ११८ ॥
आहारकं हस्तमानं, लोकाकाशमिते उभे । समुद्घाते केवलिनः, स्यातां तैजसकार्मणे ॥ ११९ ॥
अवगाढं प्रदेशेषु, स्वल्पेष्वाहारकं किल । ततः संख्यगुणांशस्थमुत्कृष्टौदारिकं स्मृतम् ॥ १२० ॥
ततोऽपि संख्यगुणितदेशस्थं गुरु[४] वैक्रियम् । समुद्घातेऽर्हतोऽन्त्ये द्वे, सर्वलोकावगाहके ॥ १२१ ॥
दीर्घे मृत्युसमुद्घाते, तूत्पत्तिस्थानकावधि[५] । अन्यदा तु यथास्थानं, स्वस्वदेहावगाहिनी ॥ १२२ ॥
मरणान्तसमुद्घातं, गतानां देहिनां भवेत् । यावत्येकेन्द्रियादीनां, तैजसस्यावगाहना ॥ १२३ ॥
ब्रवीमि तां जिनप्रोक्तस्वरूपां सोपपत्तिकम् । भाव्यैवं कार्मणस्यापि, सोभयोः साहचर्यतः ॥ १२४ ॥
स्वस्वदेहमिता व्यासस्थौल्याभ्यां सर्वदेहिनाम् । मरणान्तसमुद्घाते, स्यात्तैजसावगाहना ॥ १२५ ॥
आयामतो विशिष्येत, तत्रैकेन्द्रियदेहिनाम् । अङ्गुलासंख्येयभागप्रमाणा सा जघन्यतः ॥ १२६ ॥

---

१. चारित्रलक्षधर्ममहारम्भादिकाधर्मापेक्षयेदम् २. चतुर्दशपूर्विप्रभृतिविकुर्वणाद्यपेक्ष्य ३. अन्यमतापेक्षम्, उपलक्षणात् केवलिसमुद्घाते ४. उत्तरवैक्रियस्य अपेक्ष्यावगाहनामिदम् ५. पूर्वापरे दक्षिणोत्तरे वा लोकान्ते.

उत्कर्षतश्च लोकान्ताल्लोकान्तं यावदाहिता । एकेन्द्रियाणां जीवानामेवमुत्पत्तिसंभवात् ॥ १२७ ॥
सामान्यतोऽपि जीवानां, विभाव्यैतदपेक्षया । लोकान्तावधि लोकान्तात्तैजसस्यावगाहना ॥ १२८ ॥
अङ्गुलासंख्यभागेन, प्रमिताथ जघन्यतः । निर्दिष्टा विकलाक्षाणां, तैजसस्यावगाहना ॥ १२९ ॥
तिर्यग्लोकाच्च लोकान्तावधि तेषां गरीयसी । संभवो विकलाक्षाणां, यत्तिर्यग्लोक एव हि ॥ १३० ॥
अधोलोकेऽप्यधोलोकग्रामेषु दीर्घिकादिषु । ऊर्द्ध्वं च पाण्डकवनवर्त्तिवापी ह्रदादिषु ॥ १३१ ॥
सम्भवो विकलाक्षाणां, यद्यप्यस्ति तथापि हि । सूत्रे स्वस्थानमाश्रित्य, तिर्यग्लोको निरूपितः ॥ १३२ ॥
तत उक्तातिरिक्तापि, विकलानां भवत्यसौ । अधोग्रामात्पाण्डाकाच्च, लोकाग्रान्ता गरीयसी ॥ १३३ ॥
सातिरेकं योजनानां, सहस्रं स्याज्जघन्यतः । नारकाणां तैजसावगाहना साथ भाव्यते ॥ १३४ ॥
सन्ति पातालकलशाश्चत्वारोऽब्धौ चतुर्दिशम् । अधो लक्षं योजनानामवगाढा इह क्षितौ ॥ १३५ ॥
सहस्रयोजनस्थूलकुड्यास्तेषां च निश्चिते । अधस्तने तृतीयांशे, वायुर्वर्त्ति केवलम् ॥ १३६ ॥
मध्यमे च तृतीयांशे, मिश्रितौ सलिलानिलौ । तथोपरितने भागे, तृतीये केवलं जलम् ॥ १३७ ॥
ततश्च—सीमन्तकादिनरकवर्त्ती कश्चन नारकः । पातालकलशासन्नो, मरणान्तसमुद्धतः ॥ १३८ ॥
कुड्यं पातालकुम्भानां, विभिद्योत्पद्यते यतः । मत्स्यत्वेन तृतीयांशे, मध्यमे चरमेऽपि वा ॥ १३९ ॥
तस्मादर्वाक् तु नैवास्ति, तिर्यग्मनुजसम्भवः । उत्पत्तिर्नारकाणां च, न तिर्यग्मनुजौ विना ॥ १४० ॥
उत्कर्षतस्त्वधो यावत्सप्तमीं नरकावनीम् । नारकाणामेतदन्तं, स्वस्थानस्थितिसम्भवात् ॥ १४१ ॥
तिर्यक् स्वयम्भूरमणसमुद्रावधि सा भवेत् । नारकाणां तत्र मत्स्यादित्वेनोत्पत्तिसम्भवात् ॥ १४२ ॥
ऊर्द्ध्वं च पण्डकवनस्थायितोयाश्रयावधि । अत ऊर्द्ध्वं तु कुत्रापि, नृतिर्यक्सम्भवोऽस्ति न ॥ १४३ ॥
पञ्चेन्द्रियतिरश्चां च, जघन्या परमापि च । विकलेन्द्रियवत् ज्ञेया, तैजसस्यावगाहना ॥ १४४ ॥
अङ्गुलासंख्येयभागमात्रा नृणां जघन्यतः । उत्कर्षतश्च नृक्षेत्राल्लोकान्तावधि कीर्तिता ॥ १४५ ॥
भवनव्यन्तरज्योतिष्काद्यद्विस्वर्गनाकिनाम् । अङ्गुलासंख्येयभागमाना ज्ञेया जघन्यतः ॥ १४६ ॥
ममत्वाभिनिविष्टानां, स्वरत्नाभरणादिषु । पृथिव्यादितया तेषां, तत्रैवोत्पत्तिसम्भवात् ॥ १४७ ॥
उत्कर्षतस्त्वधः शैलानरकक्ष्मातलावधि । गतानां तत्र केषाञ्चित्तेषां मरणसम्भवात् ॥ १४८ ॥
तिर्यक् स्वयंभूरमणापरान्तवेदिकावधि । ऊर्द्ध्वं तथेषत्प्राग्भारापृथिव्यूर्द्ध्वतलावधि ॥ १४९ ॥
एतावदन्तं पृथिवीकायत्वेन समुद्भवात् । ततः परं च पृथिवीकायादीनामसम्भवात् ॥ १५० ॥
सनत्कुमारकल्पादिदेवानां स्याज्जघन्यतः । अङ्गुलासंख्येयभागमाना सैवं विभाव्यते ॥ १५१ ॥
देवा सनत्कुमाराद्या, उत्पद्यन्ते स्वभावतः । गर्भजेषु नृतिर्यक्षु, ध्रुवं नैकेन्द्रियादिषु ॥ १५२ ॥
यदा सनत्कुमारादिसुधाभुग्मन्दरादिषु । दीर्घिकादौ जलक्रीडां, कुर्वाणः स्वायुषः क्षयात् ॥ १५३ ॥

उत्पद्यते मत्स्यतया, स्वात्यासन्नप्रदेशके । तदा जघन्या स्यादस्य, यद्भवं सम्भवत्यसौ ॥ १५४ ॥
पूर्वसम्बन्धिनीं नारीमुपभुक्तां महीस्पृशा । कश्चित्सनत्कुमारादिर्देवः प्रेमवशीकृतः ॥ १५५ ॥
तदवाच्यप्रदेशे स्वमवाच्यांशं विनिक्षिपन् । परिष्वज्य मृतस्तस्या, एव गर्भे समुद्भवेत् ॥ १५६ ॥
उत्कर्षतस्त्वधो यावत्पातालकलशाश्रितम् । मध्यमीयं तृतीयांशं, तत्र मत्स्यादिसम्भवात् ॥ १५७ ॥
तिर्यक् स्वयंभूरमणपर्यन्तावधि सा भवेत् । अच्युतस्वर्गपर्यन्तमूर्द्ध्वं सा चेति भाव्यते ॥ १५८ ॥
कश्चिदच्युतनाकस्थसुहृद्देवस्य निश्रया । देवः सनत्कुमारादिर्गतस्तत्र म्रियेत यत् ॥ १५९ ॥
सहस्रारान्तदेवानां, भावनीयानया दिशा । कनिष्टा च गरिष्टा च, तैजसस्यावगाहना ॥ १६० ॥
आनताद्यच्युतान्तानां, देवानां स्याज्जघन्यतः । अङ्गुलासंख्येयभागपरिमाणावगाहना ॥ १६१ ॥
उत्पद्यन्ते नरेष्वेव, देवा नन्वानतादयः । नराश्च नृक्षेत्र एव, तदियं घटते कथम् ॥ १६२ ॥
अत्रोच्यते—उपभुक्तां मनुष्येण, मानुषीं पूर्ववल्लभाम् । उपलभ्यावधिज्ञानात्प्रेमपाशनियन्त्रितः ॥ १६३ ॥
इहागत्यासन्नमृत्युतया बुद्धिविपर्ययात् । मलिनत्वाच्च कामानां, वैचित्र्यात्कर्ममर्मणाम् ॥ १६४ ॥
गाढानुरागादालिङ्ग्य तदवाच्यप्रदेशके । परिक्षिप्य निजावाच्यं, म्रियते स्वायुषः क्षयात् ॥ १६५ ॥
गर्भेऽस्या एव मृत्वायं, यद्युत्पद्येत निर्जरः । आनतादिक्रतुभुजस्तदेयमुपपद्यते ॥ १६६ ॥
आनतादिक्रतुभुजां, मनोविषयसेविनाम् । कायेनास्पृशतां देवीमपि क्षीणमनोभुवाम् ॥ १६७ ॥
मनुष्यस्त्रियमाश्रित्य, यद्येवं स्याद्विडम्बना । तर्हि को नाम दुर्वारं, कन्दर्पं जेतुमीश्वरः ॥ १६८ ॥
अधो[1] यावदधोग्रामास्तिर्यग् नृक्षेत्रमेव च । ततः परं मनुष्याणामुत्पत्तिस्थित्यसंभवात् ॥ १६९ ॥
ऊर्ध्वमच्युतनाकान्तं, गतानां मित्रनिश्रया । आनतादिक्रतुभुजामच्युते मृत्युसम्भवात् ॥ १७० ॥
ऊर्ध्वमच्युतजानां तु, स्वविमानशिरोऽवधि । स्वैरं तत्र गतानां यत्, केषाञ्चित् सम्भवेन्मृतिः ॥ १७१ ॥
ग्रैवेयकानुत्तरस्थसुराणां साऽवगाहना । यावद्विद्याधरश्रेणीमास्वस्थानाज्जघन्यतः ॥ १७२ ॥
खेचरश्रेणिपरतो, मनुष्याणामसम्भवात् । ग्रैवेयकादिदेवानामप्यत्रागत्यसम्भवात् ॥ १७३ ॥
अधो यावदधोग्रामानूर्द्ध्वं च स्वाश्रयावधि । तिर्यक् पुनर्नरक्षेत्रपर्यन्तं सा प्रकीर्त्तिता ॥ १७४ ॥
यावन्नंदीश्वरं खेटाः, सस्त्रीका यान्ति यद्यपि । संभोगमपि कुर्वन्ति, तत्र कामेषु निर्जिताः ॥ १७५ ॥
परं नोत्पद्यते गर्भे, नरो नृक्षेत्रतो बहिः । ततः उत्कर्षतस्तिर्यग्, नृक्षेत्रावधि सोदिता ॥ १७६ ॥
इत्यर्थतः प्रज्ञापनसूत्रैकविंशतितमपदे ॥ इति प्रमाणावगाहकृतः विशेषः ॥
स्थितिरौदारिकस्यान्तर्मुहूर्तं स्याज्जघन्यतः । उत्कृष्टा त्रीणि पल्यानि, सा तु युग्मिव्यपेक्षया ॥ १७७ ॥
दशवर्षसहस्राणि, जघन्या जन्मवैक्रिये[2] । त्रयस्त्रिंशत्सागराणि, स्थितिरुत्कर्षतः पुनः ॥ १७८ ॥

---

१. कायस्पर्शादिप्रविचारणापेक्षया, अन्यथा मनःप्रविचारणा त्वस्त्येव तेषां, ग्रैवेयकानुत्तरालया एवेदृशाः, २. भवधारणीयेतिदर्शनाय

वैक्रियस्य कृतस्यापि, जघन्याऽऽन्तर्मुहूर्तिकी । ज्येष्टा तु जीवाभिगमे, गदिता गाथयानया ॥ १७९ ॥

अंतमुहुत्तं नरएसु होइ चत्तारि तिरियमणुएसु । देवेसु अद्धमासो, उक्कोस विउव्वणाकालो ॥

[प्रवचनसारोद्धार श्लो. १३१०]

पञ्चमाङ्गे तु वायूनां, संज्ञितिर्यग्नृणामपि । ज्येष्टाप्येकान्तर्मुहूर्त्ता, प्रोक्तो वैकुर्विकस्थितिः ॥ १८० ॥

श्रीसूत्रकृताङ्गे तु—वेयालिए नाम महब्भियावे, एगायए पव्वतमंतलिक्खे । हम्मंति तत्था बहुकूरकम्मा, परं सहस्सा उ मुहुत्तयाणं ॥ "नामेति संभावने । एतन्नरकेषु यथाऽन्तरिक्षे महाभितापे महादुःखे, एकशिलाघटितः दीर्घः वेयालिएत्ति वैक्रियः परमाधार्मिकनिष्पादितः पर्वतः । तत्र हस्तस्पर्शिकया समारुहन्तो नारका बहुक्रूरकर्माणो हन्यन्ते पीड्यन्ते । सहस्रसंख्यानां परं मुहूर्त्तानां प्रकृष्टं प्रभूतं कालं हन्यन्ते । इत्यर्थः" अत्र परमाधार्मिकदेवविकुर्वितस्य पर्वतस्य अर्धमासाधिकापि स्थितिरुक्ता इति ज्ञेयम् । तत्वं तु जिनो जानाति !

अन्तर्मुहूर्तं द्वेधापि, स्थितिराहारकस्य च । अनादिके प्रवाहेण, सर्वतैजसकार्मणे ॥ १८१ ॥

सावसाने तु भव्यानां, सिद्धत्वे तदभावतः । अभव्यानां निरन्ते च, पङ्गूनां मुक्तिवर्त्मनि ॥ १८२ ॥

इति स्थितिकृतः विशेषः ।

आहारकं सर्वतोऽल्पं, यत्कदाचिद्भवेदिदम् । भवेद्यदि तदाप्येतदेकं द्वे वा जघन्यतः ॥ १८३ ॥

सहस्राणि नवोत्कर्षादसत्तास्य जघन्यतः । एकं समयमुत्कृष्टा, षण्मासावधि विष्टपे ॥ १८४ ॥

उक्तं च—आहारगाइं लोगे, छम्मासा जा न होंतिऽविकयाइ । उक्कोसेणं नियमा, एक्कं समयं जहन्नेणं ॥

[प्रवचनसारोद्धार श्लो. १५८२ टीकान्तर्गत श्लो.]

आहारकादसंख्येयगुणानि वैक्रियाणि च । तत्स्वामिनामसंख्यत्वान्नारकाङ्गिसुपर्वणाम् ॥ १८५ ॥

अप्यौदारिकदेहाः स्युस्तदसंख्यगुणाधिकाः । आनन्त्येऽपि तदीशानामसंख्या एव ते यतः ॥ १८६ ॥

प्रत्यङ्गं प्राणिनो यत्स्युः, साधारणवनस्पतौ । अनन्तास्तानि चासंख्यान्येवाङ्गानि भवन्ति हि ॥ १८७ ॥

तेभ्योऽनन्तगुणास्तुल्या मिथस्तैजसकार्मणाः । यत्प्रत्येकमिमे स्यातां, द्वे देहे सर्वदेहिनाम् ॥ १८८ ॥

इत्यल्पबहुत्वकृतो विशेषः ॥

एकजीवापेक्षया स्याज्ज्येष्ठमौदारिकान्तरम् । अन्तर्मुहूर्त्ताभ्यधिकास्त्रयस्त्रिंशत्पयोधयः ॥ १८९ ॥

तथोक्तं जीवाभिगमवृत्तौ—उत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि अन्तर्मुहूर्त्ताभ्यधिकानि ॥ तानि चैवम् । कश्चिच्चारित्री वैक्रियशरीरं कृत्वान्तर्मुहूर्तं जीवित्वा स्थितिक्षयादविग्रहेणानुत्तरसुरेषु जायत इति ॥

वैक्रियस्यान्तरं कायस्थितिकालो वनस्पतेः । अर्धश्च पुद्गलपरावर्त्त आहारकान्तरम् ॥ १९० ॥

लघु चाद्यस्य समयोऽन्तर्मूहूर्त्तं तदन्ययोः । न सम्भवत्यन्तरं च, देहयोरुक्तशेषयोः ॥ १९१ ॥

इत्यन्तरकृतो विशेषः । इति देहस्वरूपम् ॥ ९ ॥

सदसल्लक्षणोपेतप्रतीकसन्निवेशजम् । शुभाशुभाकाररूपं, षोढा संस्थानमङ्गिनाम् ॥ १९२ ॥

समचतुरस्रं न्यग्रोधसादिवामनककुब्जहुण्डनि । संस्थानान्यङ्गे स्युः, प्राक्कर्मविपाकतोऽसुमताम् ॥ १९३ ॥
तत्र चाद्यं चतुरस्रं, संस्थानं सर्वतः शुभम् । न्यग्रोधमूर्ध्वं नाभेः सत्, सादि नाभेरधः शुभम् ॥ १९४ ॥
इदं साचीति केऽप्याहुः, साचीति शाल्मलीतरुः । मूले स्याद् वृत्तपुष्टोऽसौ, न च शाखासु तादृशः ॥ १९५ ॥

तथोक्तं पञ्चसंग्रहवृत्तौ—अपरे तु साचीति पठन्ति, तत्र साचीति प्रवचनवेदिनः शाल्मलीतरुमाचक्षते । ततः साचीव यत्संस्थानं तत्साचीति । एवं च न्यग्रोधसाचिनोरन्वितार्थता भवतीति ज्ञेयम् ।

मौलिग्रीवापाणिपादे, कमनीयं च वामनम् । लक्षितं लक्षणैर्दुष्टैः, शेषेष्ववयवेषु च ॥ १९६ ॥
रम्यं शेषप्रतीकेषु, कुब्जं संस्थानमिष्यते । दुष्टं किन्तु शिरोग्रीवापाणिपादे भवेदिदम् ॥ १९७ ॥
हुंडं तु सर्वतो दुष्टं, केचिद्वामनकुब्जयोः । विपर्यासमामनन्ति, लक्षणे कृतलक्षणाः ॥ १९८ ॥
इति संस्थानस्वरूपम् ॥ १० ॥

अङ्गमानं तु तुङ्गत्वमानमङ्गस्य देहिनाम् । स्थूलतापृथुताद्यं तु, ज्ञेयमौचित्यतः स्वयम् ॥ १९९ ॥
इत्यङ्गमानस्वरूपम् ॥ ११ ॥

समित्येकीभावयोगाद्वेदनादिभिरात्मनः । उत्प्राबल्येन कर्मांशघातो यः स तथोच्यते ॥ २०० ॥
यतः—समुद्घातगतो जीवः, प्रसह्य कर्मपुद्गलान् । कालान्तरानुभवार्हानपि क्षपयति द्रुतम् ॥ २०१ ॥
तच्चैवम् ।
कालान्तरवेद्यानयमाकृष्योदीरणेन कर्मांशान् । उदयावलिकायां च प्रवेश्य परिभुज्य शातयति ॥ २०२ ॥
ते चैवम् ।
वेदनोत्थः कषायोत्थो, मारणान्तिकवैक्रियौ । आहारकस्तैजसश्च, छद्मस्थानां षडप्यमी ॥ २०३ ॥
स्यात्केवलिसमुद्घातः, सप्तमः सर्ववेदिनाम् । अष्टसामयिकश्चायमान्तर्मुहूर्त्तिकाः परे ॥ २०४ ॥
तथा हि—
करालितो वेदनाभिरात्मा स्वीयप्रदेशकान् । विक्षिप्यानन्तकर्माणुवेष्टितान् देहतो बहिः ॥ २०५ ॥
आपूर्यांसाद्यन्तराणि, मुखादिशुषिराणि च । विस्तारायामतः क्षेत्रं, व्याप्य देहप्रमाणकम् ॥ २०६ ॥
तिष्ठेदन्तर्मुहूर्त्तं च, तत्र चान्तर्मुहूर्त्तके । असातवेदनीयांशान्, शातयत्येष भूरिशः ॥ २०७ ॥
इति वेदनासमुद्घातः ।
समाकुलः कषायेण, जीवः स्वीयप्रदेशकैः । मुखादिरंध्राण्यापूर्य, तान् विक्षिप्य च पूर्ववत् ॥ २०८ ॥
विस्तारायामतः क्षेत्रं, व्याप्य देहप्रमाणकम् । कषायमोहनीयाख्यकर्मांशान् शातयेद्बहून् ॥ २०९ ॥
शातयंश्चापरान् भूरीन्, समादत्ते स्वहेतुभिः । ज्ञेयं सर्वत्र नैवं चेदस्मात् मुक्तिः प्रसज्यते ॥ २१० ॥

कषायस्य समुद्घातश्चतुर्द्धाऽयं प्रकीर्त्तितः । क्रोधमानमायालोभैर्हेतुभिः परमार्थतः ॥ २११ ॥

इति कषायसमुद्घातः ।

अन्तर्मुहूर्त्तशेषायुर्मरणान्तकरालितः । मुखादिरन्ध्राण्यापूर्य, शरीर स्वप्रदेशकैः ॥ २१२ ॥
स्वाङ्गविष्कम्भबाहल्यं, स्वशरीरातिरेकतः । जघन्यतोऽङ्गुलासंख्येयांशमुत्कर्षतः पुनः ॥ २१३ ॥
असंख्ययोजनान्येकदिश्युत्पत्तिस्थलावधि । आयामतोऽभिव्याप्यान्तर्मुहूर्त्तान्म्रियते ततः ॥ २१४ ॥
मरणान्तसमुद्घातं, गतो जीवश्च शातयेत् । आयुषः पुद्गलान् भूरीनादत्ते च नवान्न तान् ॥ २१५ ॥

अत्रायं विशेषः, कश्चिज्जीवः एकेनैव मारणान्तिकसमुद्घातेन नरकादिषूत्पद्यते तत्राहारं करोति, शरीरं च बध्नाति । कश्चित्तु समुद्घातान्निवृत्य स्वशरीरमागत्य पुनः समुद्घातं कृत्वा तत्रोपपद्यते । अयमर्थो भगवतीषष्टशतकषष्ठोद्देशके नरकादिषु अनुत्तरान्तेषु सर्वस्थानेषु भावितोऽस्तीति ज्ञेयम् ॥

इति मरणान्तिकसमुद्घातः ।

वैकुर्विकसमुद्घातं, प्राप्तो वैक्रियशक्तिमान् । कर्मावृतानामात्मीयप्रदेशानां तनोर्बहिः ॥ २१६ ॥
निसृज्य दंडं विष्कम्भबाहल्याभ्यां तनुप्रमम् । आयामतस्तु संख्यातयोजनप्रमितं ततः ॥ २१७ ॥
वैक्रियाङ्गाभिधनामकर्माशान् पूर्वमर्जितान् । शातयन् वैक्रियाङ्गार्हान् स्कन्धाँल्लात्वा करोति तत् ॥ २१८ ॥

इति वैक्रियसमुद्घातः ।

समुद्धतस्तैजसेन, तेजोलेश्याख्यशक्तिमान् । कर्मावृतात्मप्रदेशराशेर्वैक्रियवद्बहिः ॥ २१९ ॥
देहविस्तारबाहल्यं, संख्येययोजनायतम् । निसृज्य दंडं प्राग्बद्धान्, शातयेत्तैजसाणुकान् ॥ २२० ॥
अन्यानादाय तद्योग्यान्, तेजोलेश्यां विमुञ्चति । तैजसोऽयं समुद्घातः, प्रज्ञप्तस्तत्वपारगैः ॥ २२१ ॥

इति तैजससमुद्घातः ।

चतुर्दशानां पूर्वाणां, धर्त्ताऽऽहारकलब्धिमान् । जिनर्द्धिदर्शनादीनां, मध्ये केनापि हेतुना ॥ २२२ ॥
आहारकसमुद्घातं, कुर्वन्नात्मप्रदेशकैः । दण्डं स्वाङ्गपृथुस्थूलं, संख्येययोजनायतम् ॥ २२३ ॥
निसृज्यपुद्गलानाहारकनाम्नः पुरातनान् । विकीर्यादाय तद्योग्यान् देहमाहारकं सृजेत् ॥ २२४ ॥

इत्याहारकसमुद्घातः ।

यस्यायुषोऽतिरिक्तानि, कर्माणि सर्ववेदिनः । वेद्याख्यनामगोत्राणि, समुद्घातं करोति सः ॥ २२५ ॥
आन्तर्मुहूर्त्तिकं पूर्वमावर्जीकरणं सृजेत् । अन्तर्मुहूर्त्तशेषायुः, समुद्घातं ततो व्रजेत् ॥ २२६ ॥
आवर्जीकरणं शस्तयोगव्यापारणं मतम् । इदं त्ववश्यं कर्तव्यं, सर्वेषां मुक्तिगामिनाम् ॥ २२७ ॥
आत्मप्रदेशैर्लोकान्तस्पृशमूर्ध्वमधोऽपि च । कुर्यादाद्यक्षणे दण्डं, स्वदेहस्थूलविस्तृतम् ॥ २२८ ॥

द्वितीये समये तस्य, कुर्यात्पूर्वापरायतम् । कपाटं पाटवापेतः, समयेऽथ तृतीयके ॥ २२९ ॥
ततो विस्तार्य प्रदेशानुदीचीदक्षिणायतम् । मन्थानं कुरुते तुर्ये, ततोऽन्तराणि पूरयेत् ॥ २३० ॥
स्वप्रदेशैस्तदा सर्वान्, लोकाकाशप्रदेशकान् । स व्याप्नोति समा ह्येते, लोकाकाशैकजीवयोः ॥ २३१ ॥
संहरेत् पञ्चमे चासौ, समयेऽन्तरपूरणम् । षष्ठे संहृत्य मन्थानं, संहरेत्सप्तमेऽरिम् ॥ २३२ ॥
संहरेदष्टमे दण्डं, शरीरस्थस्ततो भवेत् । अन्तर्मुहूर्त्तं जीवित्वा, योगरोधाच्छिवं व्रजेत् ॥ २३३ ॥

यदाहु :–यस्य पुनः केवलिनः, कर्म भवत्यायुषोऽतिरिक्ततरम् । स समुद्घातं भगवानुपगच्छति तत्समीकर्तुम् ॥ दण्डं प्रथमे समये कपाटमथ चोत्तरे तथा समये । मन्थानमथ तृतीये, विश्वव्यापी चतुर्थे तु ॥ संहरति पञ्चमे त्वन्तराणि मन्थानमथ पुनः षष्ठे । सप्तमके तु कपाटं, संहरति ततोऽष्टमे दण्डम् ॥ औदारिकप्रयोक्ता, प्रथमाष्टमसमयोरसाविष्टः । मिश्रौदारिकयोक्ता, सप्तमषष्ठद्वितीयेषु ॥ कार्मणशरीरयोक्ता, चतुर्थके पञ्चमे तृतीये च । समयत्रयेऽपि तस्मिन्, भवत्यनाहारको नियमात् ॥ [प्रशमरति श्लोक २७२ थी २७६] किञ्च ।

समुद्घातान्निवृत्यासौ, त्रिधा योगान् युनक्त्यपि । सत्यासत्यामृषाभिख्यौ, योगौ मानसवाचिकौ ॥ २३४ ॥
पृष्टेषु मनसाऽर्थेषु, तत्रानुत्तरनाकिभिः । दातुं तदुत्तरं चेतोयोगयुग्मं युनक्ति सः ॥ २३५ ॥
तथा मनुष्यादिना च, पृष्टोऽपृष्टोऽपि स प्रभुः । प्रयोजनविशेषेण, युनक्त्येतौ च वाचिकौ ॥ २३६ ॥
काययोगं प्रयुञ्जानो, गमनागमनादिषु । चेष्टते पीठपट्टाद्यमर्पयेत्प्रातिहारिकम् ॥ २३७ ॥
एवं च–कैश्चिदित्युच्यते यत्तु, शेषषण्मासजीवितः । जिनः कुर्यात्समुद्घातं, तदसद्यत्तथा सति ॥ २३८ ॥
प्रातिहारिकपीठादेरादानमपि सम्भवेत् । श्रुते तु केवलं प्रोक्तं, तत्प्रत्यर्पणमेव हि ॥ २३९ ॥
इत्याद्यधिकं प्रज्ञापनान्तिमपदवृत्तितोऽवसेयम् ।

ततश्च–पर्याप्तसंज्ञिपञ्चाक्षमनोयोगाज्जघन्यतः । असंख्यगुणहीनं तं, निरुन्धानः क्षणे क्षणे ॥ २४० ॥
असंख्येयैः क्षणैरेवं, साकल्येन रुणद्धि तम् । ततः पर्याप्तकद्वयक्षवचोयोगाज्जघन्यतः ॥ २४१ ॥
असंख्यगुणहीनं तं, निरुन्धानः क्षणे क्षणे । एवं क्षणैरसंख्येयैः, साकल्येन रुणद्धि सः ॥ २४२ ॥
ततः पर्याप्तसूक्ष्मस्य, काययोगाज्जघन्यतः । असंख्यगुणहीनं तं, निरुन्धानः क्षणे क्षणे ॥ २४३ ॥
असंख्यैः समयैरेवं, साकल्येन रुणद्धि सः । योगान् रुन्धश्च स ध्यायेत्, शुक्लध्यानं तृतीयकम् ॥ २४४ ॥
एतेन स उपायेन, सर्वयोगनिरोधतः । अयोगतां समासाद्य, शैलेशीं प्रतिपद्यते ॥ २४५ ॥
पञ्चानां ह्रस्ववर्णानामुच्चारप्रमितां च ताम् । प्राप्तः शैलेशनिष्कम्पः, स्वीकृतोत्कृष्टसंवरः ॥ २४६ ॥
शुक्लध्यानं चतुर्थं च, ध्यायन् युगपदञ्जसा । वेद्यायुर्नामगोत्राणि, क्षपयित्वा स सिद्ध्यति ॥ २४७ ॥
अगत्वापि समुद्घातमनन्ता निर्वृता जिनाः । अवाप्यापि समुद्घातमनन्ता निर्वृता जिनाः ॥ २४८ ॥

अत्रायं विशेषः । यः षण्मासाधिकायुष्को, लभते केवलोद्गमम् । करोत्यसौ समुद्घातमन्ये कुर्वन्ति वा न वा ॥
इति गुणस्थानक्रमारोहे ॥ [श्लोक - ९४]

छम्मासाऊसेसे उप्पणं जेसिं केवलं नाणम् । ते नियमा समुघाइय सेसा समुघाय भइयव्वा ॥ इत्यस्य वृत्तौ ॥
इति केवलिसमुद्घातः ॥

आद्याः पञ्च समुद्घाताः, सर्वेषामपि देहिनाम् । अनुभूता अनन्ताः स्युर्यथास्वं सर्वजातिषु ॥ २४९ ॥
भाविनस्तु न सन्त्येव, केषाञ्चिल्लघुकर्मणाम् । केषाञ्चित्त्वङ्गिनामेकद्व्यादयः स्युरनेकशः ॥ २५० ॥
यावद् गण्या अगण्या वा, स्युः केषाञ्चिदनन्तकाः । यथास्वं सर्वजातित्वे, विज्ञेया बहुकर्मणाम् ॥ २५१ ॥
नवरम्—सूक्ष्मादिनिगोदैस्तु, निगोदे त्रय एव ते । अनुभूता अनन्ताः स्युर्भाविनस्ते तु सर्ववत् ॥ २५२ ॥
आहारका[1] नरान्[2]येषां, केषाञ्चिन्नृभवे त्रयः । अतीताः स्युर्भाविनस्तु, ते चत्वारो न चाधिकाः ॥ २५३ ॥
सम्भवेयुश्च चत्वारोऽनुभूता नृभवे नृणाम् । भविष्यन्तोऽपि विज्ञेयास्तावन्ता नृभवे नृणाम् ॥ २५४ ॥
चत्वारोऽपि व्यतीतास्तु, नान्येषां नॄन् विना यतः । आहारकं तुर्यवारं, कृत्वा सिध्यति[3] तद्भवे ॥ २५५ ॥
तथोक्तं प्रज्ञापनावृत्तौ—

इह यश्चतुर्थवेलमाहारकं करोति स नियमात्तद्भव एव मुक्तिमासादयति, न गत्यन्तरमिति ।
सप्तमस्तु न कस्यापि, स्यादतीतो नरं विना । भाव्यप्येकोऽन्यजन्तूनां, केषाञ्चिन्नृत्व एव सः ॥ २५६ ॥
समुद्घातोत्तीर्णजिनं, प्रतीत्यैको निषेवितः । मनुष्यस्य मनुष्यत्वेऽनागतोऽप्येक एव सः ॥ २५७ ॥
असद्वेद्याश्रितश्चाद्यो, मोहनीयाश्रितः परः । अन्तर्मुहूर्त्तशेषायुःसंश्रितः स्यात्तृतीयकः ॥ २५८ ॥
तुर्यपञ्चमषष्टाश्च, नामकर्मसमाश्रिताः । नामगोत्रवेद्यकर्मसंश्रितः सप्तमो भवेत् ॥ २५९ ॥
इति जीवसमुद्घाताः ॥

योऽप्यचित्तमहास्कन्धः, समुद्घातोऽस्त्यजीवजः । अष्टसामयिकः सोऽपि, ज्ञेयः सप्तमवत्सदा ॥ २६० ॥
पुद्गलानां परीणामाद्विश्रसोत्थात्स जायते । अष्टभिः समयैर्जातसमाप्तो जिनसत्कवत् ॥ २६१ ॥
इति समुद्घाताः ॥ १२ ॥

विवक्षितभवादन्यभवे गमनयोग्यता । या भवेद्देहिनां साऽत्र, गतिर्गतं च कथ्यते ॥ २६२ ॥
इति गतिस्वरूपम् ॥ १३ ॥

विवक्षिते भवेऽन्येभ्यो, भवेभ्यो या च देहिनाम् । उत्पत्तौ योग्यता सात्रागतिरित्युपदर्शिता ॥ २६३ ॥
एकसामयिकी संख्या, मृत्यूत्पत्त्योस्तथाऽन्तरम् । द्वारेऽस्मिन्नेव वक्ष्यन्ते, तद्द्वाराणि पृथग् न तत् ॥ २६४ ॥

---

१. आहारकसमुद्घाताः २. नरान्विहाय परेषाम् ३. सिध्यन्तीति पा०

इत्यागतिस्वरूपम् ॥ १४ ॥

विवक्षितभवान्मृत्वोत्पद्य चानन्तरे भवे । यत्सम्यक्त्वाद्यश्रुतेर्ङ्गी, सानन्तराप्तिरुच्यते ॥ २६५ ॥

इत्यन्तराप्तिस्वरूपम् ॥ १५ ॥

लब्ध्वा नृत्वादिसामग्रीं, यावन्तोऽधिकृताङ्गीनः । सिद्ध्यन्त्येकक्षणे सैकसमये सिद्धिरुच्यते ॥ २६६ ॥

इत्येकसमयसिद्धिस्वरूपम् ॥ १६ ॥

कृष्णादिद्रव्यसाचिव्यात्परिणामो य आत्मनः । स्फटिकस्येव तत्रायं, लेश्याशब्दः प्रवर्त्तते ॥ २६७ ॥

द्रव्याण्येतानि योगान्तर्गतानीति विचिन्त्यताम् ॥ सयोगत्वेन लेश्यानामन्वयव्यतिरेकतः ॥ २६८ ॥

यावत्कषायसद्भावस्तावत्तेषामपि स्फुटम् । अमून्युपबृंहकाणि, स्युः साहायककृत्तया ॥ २६९ ॥

दृष्टं योगान्तर्गतेषु, द्रव्येषु च परेष्वपि । उपबृंहणसामर्थ्यं, कषायोदयगोचरम् ॥ २७० ॥

यथा योगान्तर्गतस्य, पित्तद्रव्यस्य लक्ष्यते । क्रोधोदयोद्दीपकत्वं, स्याद्यच्चण्डोऽतिपित्तकः ॥ २७१ ॥

द्रव्येषु बाह्येष्वप्येवं, कर्मणामुदयादिषु । सामर्थ्यं दृश्यते तत्किं, न योगान्तर्गतेषु तत् ॥ २७२ ॥

सुरादध्यादिकं ज्ञानदर्शनावरणोदये । तत्क्षयोपशमे हेतुर्भवेद्ब्राह्मीवचादिकम् ॥ २७३ ॥

एवं च ।

कषायोद्दीपकत्वेऽपि, लेश्यानां न तदात्मता । तथात्वे ह्यकषायाणां, लेश्याभावः प्रसज्यते ॥ २७४ ॥

लेश्याः स्युः कर्मनिस्यन्द, इति यत्कैश्चिदुच्यते । तदप्यसारं निस्यन्दो, यदि तत्कस्य कर्मणः ॥ २७५ ॥

चेद्यथायोगमष्टानामप्यसौ कर्मणामिति । तच्चतुःकर्मणामेताः, प्रसज्यन्तेऽप्ययोगिनाम् ॥ २७६ ॥

न यद्ययोगिनामेता, घातिकर्मक्षयान्मताः । तत एव तदा न स्युर्योगिकेवलिनामपि ॥ २७७ ॥

ननु च ।

योगस्य परिणामत्वे, लेश्यानां हेतुता भवेत् । प्रदेशबन्धं प्रत्येव, न पुनः कर्मणां स्थितौ ॥ २७८ ॥

"जोगा पयडिपएसं ठिइअणुभागं कसायओ कुणइ" इति वचनात् [पञ्चमकर्मग्रन्थ गाथा ९६] ।

अत्रोच्यते ।

न कर्मस्थितिहेतुत्वं, लेश्यानां कोऽपि[१] मन्यते । कषाया एव निर्दिष्टा, यत्कर्मस्थितिहेतवः ॥ २७९ ॥

लेश्याः पुनः कषायान्तर्गतास्तत्पुष्टिकृत्तया । तत्स्वरूपा एव सत्योऽनुभागं प्रति हेतवः ॥ २८० ॥

एतेन । यत्क्वचिल्लेश्यानामनुभागहेतुत्वमुच्यते, शिवशर्माचार्यकृतशतकग्रन्थे च कषायाणामनुभागहेतुत्वमुक्तं तदुभयमप्युपपन्नम् ।

कषायोदयोपबृंहिकाणां लेश्यानामप्युपचारनयेन कषायस्वरूपत्वादित्याद्यधिकं प्रज्ञापनालेश्यापदवृत्तितोऽवसेयम् ॥

१. तत्र प्रदेशबन्धो योगात्तदनुभवनं कषायवशात् । स्थितिपाकविशेषस्तस्य भवति लेश्याविशेषेण [इति प्रशमरतौ श्लोक ३७]

सा च षोढा कृष्णनीलकापोतसंज्ञितास्तथा । तेजोलेश्यापद्मलेश्या, शुक्ललेश्येति नामतः ॥ २८१ ॥
खञ्जनाञ्जनजीमूतभ्रमद्भ्रमरसन्निभा । कोकिलाकलभीकल्पा, कृष्णलेश्या स्ववर्णतः ॥ २८२ ॥
पिच्छतः शुकचाषाणां, केकिकापोतकंठतः । नीलाब्जवनतो नीला, नीललेश्या स्ववर्णतः ॥ २८३ ॥
जैत्रा खदिरसाराणामतसीपुष्पसोदरा । कापोतलेश्या वर्णेन, वृन्ताककुसुमौघजित् ॥ २८४ ॥
पद्मरागनवादित्यसंध्यागुञ्जार्धतोऽधिका । तेजोलेश्या स्ववर्णेन, विद्रुमाङ्कुरजित्वरी ॥ २८५ ॥
सुवर्णयूथिकास्वर्णकर्णिकारौधचम्पकान् । पराभवन्ती वर्णेन, पद्मलेश्या प्रकीर्त्तिता ॥ २८६ ॥
गोक्षीरदधिडिण्डीरपिण्डादधिकपाण्डुरा । वर्णतः शरदभ्राणां, शुक्ललेश्याऽभिभाविनी ॥ २८७ ॥
किराततिक्तत्रपुषी, कटुतुम्बीफलानि च । त्वचः फलानि निम्बानां, कृष्णलेश्या रसैर्जयेत् ॥ २८८ ॥
पिप्पलीशृंगबेराणि, मरीचानि च राजिकाम् । हस्तिपिप्पलिकां जेतुं, नीललेश्या रसैः प्रभुः ॥ २८९ ॥
आमानि मातुलिङ्गानि, कपित्थबदराणि च । फणसामलकानीष्टे, रसैर्जेतुं तृतीयिका ॥ २९० ॥
वर्णगन्धरसापन्नपक्वाम्रादिसमुद्भवान् । रसानधिकमाधुर्या, तुर्याऽधिकुरुते रसैः ॥ २९१ ॥
द्राक्षाखर्जूरमाध्वीकवारुणीनामनेकधा । चन्द्रप्रभादिसीधूनां, जयिनी पञ्चमी रसैः ॥ २९२ ॥
शर्करागुडमत्स्यन्डीखन्डाखन्डादिकानी च । माधुर्यधुर्यवस्तूनि, शुक्ला विजयते रसैः ॥ २९३ ॥
आद्यास्तिस्रोऽतिदुर्गन्धा, अप्रशस्ता मलीमसाः । स्पर्शतः शीतरुक्षाश्च, संक्लिष्टा दुर्गतिप्रदाः ॥ २९४ ॥
अन्त्यास्तिस्रोऽतिसौगन्ध्याः, प्रशस्ता अतिनिर्मलाः । स्निग्धोष्णाः स्पर्शगुणतोऽसंक्लिष्टाः सुगतिप्रदाः ॥ २९५ ॥
परस्परमिमाः प्राप्य, यान्ति तद्रूपतामपि । वैदूर्यरक्तपटयोर्ज्ञेये तत्र निदर्शने ॥ २९६ ॥
तत्रापि-देवनारकलेश्यासु, वैदूर्यस्य निदर्शनम् । तिर्यग्मनुजलेश्यासु, रक्तवस्त्रनिदर्शनम् ॥ २९७ ॥
तथाहि । देवनारकयोर्लेश्या, आभवान्तभवस्थिताः । नानाकृतिं यान्ति किन्तु, द्रव्यान्तरोपधानतः ॥ २९८ ॥
न तु सर्वात्मना स्वीयं, स्वरूपं संत्यजन्ति ताः । सद्वैडूर्यमणिर्यद्धन्नानासूत्रप्रयोगतः ॥ २९९ ॥
जपापुष्पादिसान्निध्याद्यथा वादर्शमण्डलम् । नानावर्णान् दधदपि, स्वरूपं नोज्झति स्वकम् ॥ ३०० ॥
अत एव भावपरावृत्त्या नारकनाकिनोः । भवन्ति लेश्याः षडपि, तदुक्तं पूर्वसूरिभिः ॥ ३०१ ॥
बृहत्संग्रहणी–सुरनारयाण ताओ, दव्वलेसा अवट्ठिया भणिया । भावपरावत्तीए पुण एसा हुन्ति छल्लेसा ॥
[श्लोक २५७]
दुष्टलेश्यावतां नारकाणामप्यत एव च । सम्यक्त्वलाभो घटते, तेजोलेश्यादिसम्भवी ॥ ३०२ ॥
यदाहुः सम्मत्तस्स य तिसु उवरिमासु पडिवज्जमाणओ होइ । पुव्वपडिवन्नओ पुण, अन्नयरीए उ लेसाए ॥
तथैव तेजोलेश्याढ्ये, घटते संगमामरे । वीरोपसर्गकर्त्तृत्वं, कृष्णलेश्यादिसम्भवि ॥ ३०३ ॥
स्वरूपत्यागतः सर्वात्मना तिर्यग्मनुष्ययोः । लेश्यास्तद्रूपतां यान्ति, रागक्षिप्तपटादिवत् ॥ ३०४ ॥
अत एवोत्कर्षतोऽप्यन्तर्मुहूर्त्तमवस्थिताः । तिर्यग्नृणां परावर्त्तं, यान्ति लेश्यास्ततः परम् ॥ ३०५ ॥

बहुधाऽऽसां परीणामस्त्रिधा वा नवधा भवेत् । सप्तविंशतिधा चैकाशीतिधा त्रिगुणस्तथा ॥ ३०६ ॥
जघन्यमध्यमोत्कृष्टभेदतस्त्रिविधो भवेत् । प्रत्येकमेषां स्वस्थानतारतम्यविचिन्तया ॥ ३०७ ॥
भवेन्नवविधस्तेषामपि भेदविवक्षया । सप्तविंशतिधामुख्योऽप्येवं भेदैस्त्रिभिस्त्रिभिः ॥ ३०८ ॥

तथाहुः प्रज्ञापनायाम्—कण्हलेसाणं भंते कतिविहं परिणामं परिणमति । गोयमा ! तिविहं वा णवविहं वा, सत्तावीसतिविहं वा एक्कासीतिविहं वा, तेआलदुसयविहं, वा बहुं वा बहुविहं वा परिणामं परिणमति ॥

लेश्यापरिणामस्याऽऽदिमान्त्ययोर्नाङ्गिनां मृतिः क्षणयोः । अन्तर्मुहूर्त्तकेऽन्त्ये शेषे वाऽऽद्ये गते सा स्यात् ॥ ३०९ ॥
तत्राप्यन्तर्मुहूर्त्तेऽन्त्ये, शेषे नारकनाकिनः । म्रियन्ते नरतिर्यञ्चश्चाद्येऽतीत इति स्थितिः ॥ ३१० ॥
कृष्णायाः स्थितिरुत्कृष्टा, त्रयस्त्रिंशत्पयोधयः । प्राच्याग्र्यभवसम्बन्ध्यन्तर्मुहूर्त्तद्वयाधिका ॥ ३११ ॥
पल्यासंख्येयभागाढ्या, नीलायाः सा दशाब्धयः । पल्यासंख्यांशसंयुक्ताः, कापोत्यास्तु त्रयोऽब्धयः ॥ ३१२ ॥
प्राच्याग्र्यभवसत्कान्तर्मुहूर्त्तद्वयमेतयोः । पल्यासंख्यांश एवान्तर्भूतं नेत्युच्यते पृथक् ॥ ३१३ ॥
एवं तैजस्यामपि भाव्यम् ।
तैजस्या द्वौ पयोराशी, पल्यासंख्यलवाधिकौ । द्वयन्तर्मुहूर्त्ताभ्यधिकाः, पद्माया दश वार्धयः ॥ ३१४ ॥
द्वयन्तर्मुहूर्त्ताः शुक्लायास्त्रयस्त्रिंशत्पयोधयः । अन्तर्मुहूर्त्तं सर्वासां, जघन्यतः स्थितिर्भवेत् ॥ ३१५ ॥
आद्यात्र सप्तममहीगरिष्ठस्थित्यपेक्षया । धूमप्रभाद्यप्रतरोत्कृष्टायुश्चिन्तया परा ॥ ३१६ ॥
शैलाद्यप्रतरे ज्येष्ठमपेक्ष्यायुस्तृतीयिका । तुर्या चैशानदेवानामुत्कृष्टस्थित्यपेक्षया ॥ ३१७ ॥
पञ्चमी ब्रह्मलोकस्थगरिष्ठायुरपेक्षया । षष्ठी चानुत्तरसुरपरमायुरपेक्षया ॥ ३१८ ॥

अत्र यद्यपि पङ्कप्रभाशैलाद्यप्रस्तटयोः पूर्वोक्तादधिकापि स्थितिरस्ति परं प्रस्तुतलेश्यावतामियमेवोत्कृष्टा स्थितिरिति ज्ञेयम् । यत्तु प्रज्ञापनोत्तराध्ययनसूत्रादौ कृष्णादीनामन्तर्मुहूर्त्ताभ्यधिकत्वमुच्यते तत् प्राच्याग्र्यभवसत्कान्तर्मुहूर्त्तयोरेकस्मिन्नन्तर्मुहूर्त्ते समावेशात् । इत्थञ्चैतदन्तर्मुहूर्त्तस्यासंख्यातभेदत्वादुपपद्यते, इत्यादिप्रज्ञापनावृत्तौ ॥

इति सामान्यतः लेश्यास्थितिः ॥

स्थितिं वक्ष्येऽथ लेश्यानां, नारकस्वर्गिणोर्नृणाम् । तिरश्चां च जघन्येनोत्कर्षेण च यथागमम् ॥ ३१९ ॥
दशवर्षसहस्राणि, कापोत्याः स्याल्लघुः स्थितिः । उत्कृष्टा त्रीण्यतराणि, पल्यासंख्यलवस्तथा ॥ ३२० ॥
जघन्या तत्र धर्माद्यप्रस्तटापेक्षयाभवेत् । उत्कृष्टा च तृतीयाद्यप्रस्तटापेक्षयोदिता ॥ ३२१ ॥
नीलाया लघुरेषैवोत्कृष्टा च दश वार्धयः । पल्यासंख्येयभागाढ्याः, कृष्णायाः स्यादसौ लघुः ॥ ३२२ ॥
स्थितिर्जघन्या नीलायाः, शैलाद्यप्रस्तटे भवेत् । रिष्टाद्यप्रस्तटे त्वस्या ज्येष्ठा कृष्णास्थितिर्लघुः ॥ ३२३ ॥
कृष्णायाः पुनरुत्कृष्टा, त्रयस्त्रिंशत्पयोधयः । इयं माघवतीवर्त्तिज्येष्ठायुष्कव्यपेक्षया ॥ ३२४ ॥

इत्थं नारकलेश्यानां, स्थितिः प्रकटिता मया । अथ निर्जरलेश्यानां, स्थितिं वक्ष्ये यथाश्रुतम् ॥ ३२५ ॥
दशवर्षसहस्राणि, कृष्णायाः स्याल्लघुः स्थितिः । एतस्याः पुनरुत्कृष्टा, पल्यासंख्यांशसंमिता ॥ ३२६ ॥
इवमेवैकसमयाधिका नीलास्थितिर्लघुः । पल्यासंख्येयभागश्च नीलोत्कृष्टस्थितिर्भवेत् ॥ ३२७ ॥
पल्यासंख्येयभागोऽयं, पूर्वोक्तासंख्यभागतः । बृहत्तरो भवेदेवं, ज्ञेयमग्रेऽपि धीधनैः ॥ ३२८ ॥
या नीलायाः स्थितिर्ज्येष्ठा, समयाभ्यधिका च सा । कापोत्या लघुरस्याः स्यात्पल्यासंख्यलवो गुरुः ॥ ३२९ ॥
लेश्यानां तिसृणामासां, स्थितिर्याऽदर्शि सा भवेत् । भवनेशव्यन्तरेषु, नान्येषु तदसम्भवात् ॥ ३३० ॥
एवं वक्ष्यमाणतेजोलेश्याया अप्यसौ स्थितिः । भवनव्यन्तरज्योतिराद्यकल्पद्वयावधिः ॥ ३३१ ॥
पद्मायाश्च स्थितिर्ब्रह्मावधीशानादनन्तरम् । लान्तकात्परतः शुक्ललेश्याया भाव्यतामिति ॥ ३३२ ॥
अथ प्रकृतम् ।
दशवर्षसहस्राणि, तेजोलेश्यालघुस्थितिः । भवनेशव्यन्तराणां, प्रज्ञप्ता ज्ञानभानुभिः ॥ ३३३ ॥
उत्कृष्टा भवनेशानां, साधिकं सागरोपमम् । व्यन्तराणां समुत्कृष्टा, पल्योपममुदीरिता ॥ ३३४ ॥
स्यात्पल्यस्याष्टमो भागो, ज्योतिषां सा लघीयसी । उत्कृष्टा वर्षलक्षेणाधिकं पल्योपमं भवेत् ॥ ३३५ ॥
सा लघुर्वैमानिकानामेकं पल्योपमं मता । उत्कृष्टा द्वौ पयोराशी, पल्यासंख्यलवाधिकौ ॥ ३३६ ॥
समयाभ्यधिकैषैव, पद्मायाः स्याल्लघुः स्थितिः । उत्कृष्टा पुनरेतस्या, स्थितिर्दशपयोधयः ॥ ३३७ ॥
इयमेव च शुक्लायाः, स्थितिर्लघ्वी क्षणाधिका । उत्कृष्टा पुनरेतस्यास्त्रायस्त्रिंशत्पयोधयः ॥ ३३८ ॥
इत्थं नारकदेवानां, लेश्यास्थितिरुदीरिता । अथ तिर्यग्मनुष्याणां, लेश्यास्थितिरुदीर्यते ॥ ३३९ ॥
या या लेश्या येषु येषु, नृषु तिर्यक्षु वक्ष्यते । आन्तर्मुहूर्त्तिकी सा सा, शुक्ललेश्यां विना नृषु ॥ ३४० ॥
शुक्ललेश्यास्थितिर्नृणां जघन्याऽऽन्तर्मुहूर्त्तिकी । उत्कृष्टा नववर्षोना, पूर्वकोटी प्रकीर्त्तिता ॥ ३४१ ॥
यद्यप्यष्टवर्षवयाः, कश्चिद्दीक्षामवाप्नुयात् । तथापि तादृग्वयसः, पर्यायं वार्षिकं विना ॥ ३४२ ॥
नोदेति केवलज्ञानमतो युक्तमुदीरिता । पूर्वकोटी नवाब्दोना, शुक्ललेश्यागुरुस्थितिः ॥ ३४३ ॥
इति उत्तराध्ययनसूत्रवृत्तिप्रज्ञापनावृत्त्यभिप्रायः ॥

तथैव संग्रहण्यामप्युक्तम्—'चरमा नराण पुण नववासूणा पुव्वकोडीवि' [गाथा. ३११] इति । संग्रहणीवृत्तौ प्रवचनसारोद्धारवृत्तौ च नराणां पुनश्चरमा शुक्ललेश्या उत्कर्षतः किञ्चिन्न्यूनववर्षोन-पूर्वकोटिप्रमाणापि, इयं च पूर्वकोटेरूर्ध्वं संयमावाप्तेरभावात्पूर्वकोट्यायुषः किञ्चित्समधिकवर्षाष्ट-कादूर्ध्वमुत्पादितकेवलज्ञानस्य केवलिनोऽवसेया इत्युक्तम् ॥ अत्र च पूर्वकोट्या नववर्षोनत्वं किञ्चिन्न्यूननववर्षोनत्वं किंचित्समधिकाष्टवर्षोनत्वं इति त्रयं मिथो यथा न विरुध्यते तथा बहुश्रुतेभ्यो भावनीयम् ॥[1]

१. आद्यः परमशुक्ललेश्यां केवलित्वभावनीमाश्रित्य इतरौ तु केवलकारणभूतशुक्ललेश्यामाश्रित्य नवरमन्त्ये विशेषेणाप्रमत्तताया आश्रयणम् ।

प्रत्येकं सर्वलेश्यानामनन्ता वर्गणाः स्मृताः । प्रत्येकं निखिला लेश्यास्तथाऽनन्तप्रदेशिकाः ॥ ३४४ ॥
असंख्यातप्रदेशावगाढाः सर्वा उदाहृताः । स्थानान्यध्यवसायस्य, तासां संख्यातिगानि च ॥ ३४५ ॥
क्षेत्रतस्तान्यसंख्येयलोकाभ्रांशसमानि वै । कालतोऽसंख्येयकालचक्रक्षणमितानि च ॥ ३४६ ॥
यदुक्तम्—"असंखेज्जाण उस्सप्पिणीण ओसप्पिणीण जे समया । संखाईया लोगा, लेस्साणं हुंति ठाणाइं" ॥
[उत्तराध्ययन. अध्य. ३४. गा. ३३]

अभिप्रायो यादृशः स्यात्, सतीष्वेतासु देहिनाम् । स मया समयोक्ताभ्यां, दृष्टान्ताभ्यां प्रदर्श्यते ॥ ३४७ ॥
यथा पथःपरिभ्रष्टाः, पुरुषाः षण्महाटवीम् । प्राप्ताः समन्तादैक्षन्त, भक्ष्यं दिक्षु बुभुक्षिताः ॥ ३४८ ॥
जम्बूवृक्षं क्वचित्तत्र, ददृशुः फलभङ्गुरम् । आह्वयन्तमिवाध्वन्यान्, मरुच्चपलपल्लवैः ॥ ३४९ ॥
एकस्तत्राह वृक्षोऽयं, मूलादुन्मूल्यते ततः । सुखासीनाः फलास्वादं, कुर्मः श्रमविवर्जिताः ॥ ३५० ॥
अन्यः प्राह किमेतावान्, पात्यते प्रौढपादपः ?। शाखा महत्यच्छिद्यन्ते, सन्ति तासु फलानि यत् ॥ ३५१ ॥
तृतीयोऽथावदत् शाखा, भविष्यन्ति कदेदृशः । प्रशाखा एव पात्यन्ते, यत एताः फलैर्भृताः ॥ ३५२ ॥
उवाच वाचं तुर्योऽथ, तिष्टन्त्वेता वराकिकाः । यथेच्छं गुच्छसंदोहं, छिंद्मो येषु फलोद्गमः ॥ ३५३ ॥
न नः प्रयोजनं गुच्छैः, फलैः किन्तु प्रयोजनम् । तान्येव भुवि कीर्यन्ते, पञ्चमः प्रोचिवानिति ॥ ३५४ ॥
षष्टेन शिष्टमतिना, समादिष्टमिदं ततः । पतितानि फलान्यद्मो, माभूत्पातनपातकम् ॥ ३५५ ॥
भाव्याः षण्णामप्यमीषां, लेश्याः कृष्णादिकाः क्रमात् । दर्श्यतेऽन्योऽपि दृष्टान्तो, दृष्टः श्रीश्रुतसागरे ॥ ३५६ ॥
केचन ग्रामघाताय, चौराः क्रूरपराक्रमाः । क्रामन्तो मार्गमन्योऽन्यं, विचारमिति चक्रिरे ॥ ३५७ ॥
एकस्तत्राह दुष्टात्मा, यः कश्चिद्दृष्टिमेति नः । हन्तव्यः सोऽद्य सर्वोऽपि, द्विपदो वा चतुष्पदः ॥ ३५८ ॥
अन्यः प्राह चतुष्पद्भिरपराद्धं न किञ्चन । मनुष्या एव हन्तव्या, विरोधो यैः सहात्मनाम् ॥ ३५९ ॥
तृतीयाः प्राह न स्त्रीणां, हत्या कार्याऽतिनिन्दिता । पुरुषा एव हन्तव्या, यतस्ते क्रूरचेतसः ॥ ३६० ॥
निरायुधैर्वराकैस्तैर्हतैः किं नः प्रयोजनम् ?। घात्याः सशस्त्रा एवेति, तुर्यश्चातुर्यवान् जगौ ॥ ३६१ ॥
सशस्त्रैरपि नश्यद्भिर्हतैः किं नः फलं भवेत् ?। सायुधो युध्यते यः स, वध्य इत्याह पञ्चमः ॥ ३६२ ॥
परद्रव्यापहरणमेकं पापमिदं महत् । प्राणापहरणं चान्यच्चेत्कुर्मस्तर्हि का गतिः ॥ ३६३ ॥
धनमेव तदादेयं, मारणीयो न कश्चन । षष्टः स्पष्टमभाषिष्ट, प्राग्वदत्रापि भावना ॥ ३६४ ॥
सर्वस्तोकाः शुक्ललेश्या जीवास्तेभ्यो यथोत्तरम् । पद्मलेश्यास्तेजोलेश्या, असंख्येयगुणाः क्रमात् ॥ ३६५ ॥
अनन्तघ्नास्ततो लेश्याः, कापोत्याढ्यास्ततस्तथा । तेभ्यो नीलकृष्णलेश्याः, क्रमाद्विशेषतोऽधिकाः ॥ ३६६ ॥
इति लेश्यास्वरूपम् ॥ १७ ॥

निर्व्याघातं प्रतीत्य स्यादाहारः षड्दिगुद्भवः । व्याघाते त्वेष जीवानां, त्रिचतुष्पञ्चदिग्भवः ॥ ३६७ ॥
अलोकवियताऽऽहारद्रव्याणां स्खलनं हि यत् । स व्याघातस्तदभावो, निर्व्याघातमिहोच्यते ॥ ३६८ ॥

भावनात्वेवम्—

सर्वाधस्तादधोलोकनिष्कूटस्याग्निकोणके । स्थितो भवेद्यदैकाक्षस्तदाऽसौ त्रिदिगुद्भवः ॥ ३६९ ॥
पूर्वस्यां च दक्षिणस्यामधस्तादिति दिक्त्रये । संस्थितत्वादलोकस्य, ततो नाहारसम्भवः ॥ ३७० ॥
अपरस्या उत्तरस्या, ऊर्द्ध्वतश्चेति दिक्त्रयात् । पुद्गलानाहरत्येवं, सूक्ष्माः पञ्चानिलोऽनणुः ॥ ३७१ ॥

तथोक्तम्—इह लोकचरमान्ते बादरपृथिवीकायिकाप्कायिकतेजोवनस्पतयो न सन्ति । सूक्ष्मास्तु पञ्चापि सन्ति, बादरा वायुकायिकाश्चेति पर्याप्तापर्याप्तकभेदेन द्वादशस्थानान्यनुसर्त्तव्यानीति" भगवतीसूत्र शतक ३४ उद्देश १ वृत्तौ ।

द्वयोर्दिशोस्तथैकस्या, अलोकव्याहतौ बुधैः । चतुः पञ्चदिगुत्पन्नोऽप्येषामेव विभाव्यताम् ॥ ३७२ ॥

तथाहि—

सर्वाधस्तादधोलोक, एव चेत्पश्चिमां दिशम् । स्थितोऽनुसृत्यैकाक्षः स्यात् प्राच्यां न व्याहतिस्तदा ॥ ३७३ ॥
अधस्तनी दक्षिणा च, द्वे एवं व्याहते इति । दिग्भ्योऽन्याभ्यश्चतसृभ्यः पुद्गलानाहरत्यसौ ॥ ३७४ ॥
द्वितीयादिप्रतरेषु, यदोर्द्ध्वं पश्चिमां दिशम् । स्थितोऽनृसृत्यैकाक्षः, स्यान्न व्याहतिरधोऽपि तत् ॥ ३७५ ॥
व्याहता दक्षिणैवैका, ततः पञ्च दिगागतान् । पुद्गलानाहरत्येष, एवं सर्वत्र भावना ॥ ३७६ ॥
द्रव्यतश्च स आहारः, स्यादनन्तप्रदेशकः । संख्यासंख्यप्रदेशौ हि, नात्मग्रहणगोचरः ॥ ३७७ ॥
असंख्याभ्रप्रदेशानां, क्षेत्रतः सोऽवगाहकः । जघन्यमध्यमोत्कृष्टस्थितिकः कालतः पुनः ॥ ३७८ ॥
भावतः पञ्चधा वर्णरसैर्गन्धैर्द्विधाऽष्टधा । स्पर्शैरेकगुणत्वादिभेदैः पुनरनेकधा ॥ ३७९ ॥
किञ्च—अन्तरावगाढानि, स्वगोचरगतानि च । द्रव्याण्यभ्यवहार्याण्यणूनि वा बादराणि च ॥ ३८० ॥
आहरन्ति वर्णगन्धरसस्पर्शान्पुरातनान् । विनाश्यान्यांस्तथोत्पाद्यापूर्वान् जीवाः स्वभावतः ॥ ३८१ ॥
इत्याहारदिक्प्रसंगात् किञ्चिदाहारस्वरूपं च ॥ १८ ॥

अस्थिसम्बन्धरूपाणि, तत्र संहननानि तु । षोढा खलु विभिद्यन्ते, दार्ढ्यादितारतम्यतः ॥ ३८२ ॥
तथाहुः-"वज्जरिसहनारायं, पढमं बीयं च रिसहनारायं । नारायमद्धनारायं कीलिया तहय छेवट्टं" ॥
[बृहत्संग्रहणी गाथा १५९]

कीलिका वज्रमृषभः, पट्टोऽस्थिद्वयवेष्टकः । अस्थ्नोर्मर्कटबन्धो यः, स नाराच इति स्मृतः ॥ ३८३ ॥
ततश्च—बद्धे मर्कटबन्धेन सन्धौ सन्धौ यदस्थिनी । अस्था च पट्टाकृतिना, भवतः परिवेष्टिते ॥ ३८४ ॥
तदस्थित्रयमाविद्ध्य, स्थितेनास्था दृढीकृतम् । कीलिकाकृतिना वज्रर्षभनाराचकं स्मृतम् ॥ ३८५ ॥
अन्यदृषभनाराचं, कीलिकारहितं हि तत् । केचित्तु वज्रनाराचं, पट्टोज्झितमिदं जगुः ॥ ३८६ ॥
अस्थ्नोर्मर्कटबन्धेन, केवलेन दृढीकृतम् । आहुः संहननं पूज्या, नाराचाख्यं तृतीयकम् ॥ ३८७ ॥
बद्धं मर्कटबन्धेन, यद्भवेदेकपार्श्वतः । अन्यतः कीलिकानद्धमर्धनाराचकं हि तत् ॥ ३८८ ॥

तत्कीलिताख्यं यत्रास्थ्नां, केवलं कीलिकाबलम् । अस्थ्नां पर्यन्तसम्बन्धरूपं सेवार्त्तमुच्यते ॥ ३८९ ॥
सेवयाऽभ्यङ्गाद्यया वा, ऋतं व्याप्तं ततस्तथा । छेदैः खण्डैर्मिथःस्पृष्टं, छेदस्पृष्टमतोऽथवा ॥ ३९० ॥
यद्यपि स्युरन्नस्थीनामेतान्यस्थ्यात्मकानि[1] न । तद्गतः शक्तिविशेषस्तथाप्येषूपचर्यते ॥ ३९१ ॥
एकेन्द्रियाणां सेवार्तं, तमपेक्ष्यैव कथ्यते । जीवाभिगमानुसृतैः, कैश्चिच्चाद्यं सुधाभुजाम् ॥ ३९२ ॥
संग्रहणीकारैस्तु-छ गब्भतिरिनराणां, समुच्छिमपणिंदिविगलछेवट्ठम् । सुरनेरइया एगिन्दिया य सव्वे असंघयणा ॥ [श्लोक १६१]
इत्युक्तम् ॥ इति संहननानि ॥ १९ ॥

कषं संसारकान्तारमयन्ते यान्ति यैर्जनाः । ते कषायाः क्रोधमानमायालोभा इति श्रुताः ॥ ३९३ ॥

तत्र च–

क्रोधोऽप्रीत्यात्मको मानोऽन्येर्ष्यास्वोत्कर्षलक्षणः । मायाऽन्यवंचनारूपा, लोभस्तृष्णाभिगृध्नुता ॥ ३९४ ॥
चत्वारोऽन्तर्भवन्त्येते, उभयोर्द्वेषरागयोः । आदिमौ द्वौ भवेद्द्वेषो, रागःस्यादन्तिमौ च तौ ॥ ३९५ ॥

केचिच्च–

स्वपक्षपातरूपत्वान्मानोऽपि राग एव यत् । ततस्त्रयात्मको रागो, द्वेषः क्रोधस्तु केवलम् ॥ ३९६ ॥
चत्वारोऽपि चतुर्भेदाः, स्युस्तेऽनन्तानुबन्धिनः । अप्रत्याख्यानकाः प्रत्याख्याना: संज्वलना इति ॥ ३९७ ॥

एतल्लक्षणानि च श्रीहेमचन्द्रसूरिभिरित्थमूचिरे– [योगशास्त्र प्रकाश-४ श्लो. ७-८]

पक्षं संज्वलनः प्रत्याख्यानो मासचतुष्टयम् । अप्रत्याख्यानको वर्षं, जन्मानन्तानुबन्धिकः ॥
वीतरागयतिश्राद्धसम्यग्दृष्टित्वघातकः । ते देवत्वमनुष्यत्वतिर्यक्त्वनरकप्रदाः ॥

प्रज्ञापनावृत्तौ च—"अनन्तान्यनुबध्नन्ति, यतो जन्मानि भूत्रये । तेनानन्तानुबन्ध्याख्या, क्रोधाद्येषु नियोजिता" ॥

एषां 'संयोजना' इति द्वितीयमपि नाम ॥

संयोजयन्ति यन्नरमनन्तसंख्यैर्भवैः कषायास्ते । संयोजनताऽनन्तानुबन्धिता वाऽप्यतस्तेषाम् ॥ ३९८ ॥
नाल्पमप्युल्लसेदेषां, प्रत्याख्यानमिहोदयात् । अप्रत्याख्यानसंज्ञाऽतो, द्वितीयेषु नियोजिता ॥ ३९९ ॥
सर्वसावद्यविरतिः, प्रत्याख्यानमिहोदितम् । तदावरणतः संज्ञा, सा तृतीयेषु योजिता ॥ ४०० ॥
सम् ज्वलयन्ति यतिं यत्संविग्नं सर्वपापविरतमपि । तस्मात् संज्वलना इत्यप्रशमकरा निरुच्यन्ते ॥ ४०१ ॥
अन्यत्रापि उक्तम्—"शब्दादीन् विषयान्प्राप्य, संज्वलन्ति यतो मुहुः । ततः संज्वलनाह्वानं, चतुर्थानामिहोच्यते" ॥
स्युः प्रत्येकं चतुर्भेदा, भेदाः संज्वलनादयः । एवं षोडशधैकैकश्चतुःषष्टिर्विधा इति ॥ ४०२ ॥
यथा कदाचिच्छिष्टोऽपि, क्रोधादेर्याति दुष्टताम् । एवं संज्वलनोऽप्येति, क्वाप्यनन्तानुबन्धिताम् ॥ ४०३ ॥

१. तत्संबन्धिन्यसंबन्धिनि वा टादौ स्वरे परे अन् (इति हैमश०) ।

एवं सर्वेष्वपि भाव्यं ॥

तत एवोपपद्येतानन्तानुबन्धिभाविनी । कृष्णादेर्दुर्गतिर्नूनं, क्षीणानन्तानुबन्धिनः ॥ ४०४ ॥

एवं च–वर्षावस्थायिमानस्य[1], श्रीबाहुबलिनो मुनेः । कैवल्यहेतुश्चारित्रं, ज्ञेयं संज्वलनोचितम् ॥ ४०५ ॥

कर्मग्रन्थकारैश्च सदृष्टान्ता एवमेते जगदिरे– [प्रथम कर्मग्रन्थ गाथा १९–२०]

जलरेणुपुढवीपव्वयराईसरिसो चउव्विहो कोहो । तिणिसलयाकट्ठट्ठियसेलत्थंभोवमो माणो ॥

माया वलेहिगोमुत्तिमिंढसिंगघणवंसिमूलसमा । लोहो हलिद्दखंजणकद्दमकिमिरागसारिच्छो ॥

तथा प्रज्ञापनायां प्रज्ञप्ताः, स्वान्योभयप्रतिष्ठिताः । अप्रतिष्ठितकाश्चैवं, चत्वारोऽपि चतुर्विधाः ॥ ४०६ ॥

तथाहि स्वदुश्चेष्टिततः कश्चित्, प्रत्यपायमवेक्ष्य यत् । कुर्यादात्मोपरि क्रोधं, स एषः स्वप्रतिष्ठितः ॥ ४०७ ॥

उदीरयेद्यदा क्रोधं, परः सन्तर्जनादिभिः । तदा तद्विषयक्रोधो, भवेदन्यप्रतिष्ठितः ॥ ४०८ ॥

एतच्च नैगमनयदर्शनं चिन्त्यतां यतः । स तद्विषयतामात्रान्मन्यते तत्प्रतिष्ठितम् ॥ ४०९ ॥

यश्चात्मपरयोस्तादृगपराधकृतो भवेत् । क्रोधः परस्मिन् स्वस्मिंश्च, स स्यादुभयसंश्रितः ॥ ४१० ॥

विना पराक्रोशनादि, विना च स्वकुचेष्टितम् । निरालम्बन एव स्यात्, केवलं क्रोधमोहतः ॥ ४११ ॥

स चाप्रतिष्ठितः क्रोधो, दृश्यतेऽयं च कस्यचित् । क्रोधमोहोदयात्क्रोधः, कर्हिचित्कारणं विना ॥ ४१२ ॥

अत एवोक्तं पूर्वमहर्षिभिः— सापेक्षाणि च निरपेक्षाणि च कर्माणि फलविपाकेषु । सोपक्रमं च निरुपक्रमं च दृष्टं यथायुष्कम् ॥ इत्याद्यर्थतः प्रज्ञापनातृतीयपदे ॥ एवमन्येऽपि त्रयः कषाया भाव्याः ॥

चतुर्भिः कारणैरेते, प्रायः प्रादुर्भवन्ति च । क्षेत्रं वास्तु शरीरं च, प्रतीत्योपधिमङ्गिनाम् ॥ ४१३ ॥

सर्वस्तोका निष्कषाया, मानिनोऽनन्तकास्ततः । क्रुद्धमायाविलुब्धाश्च, स्युर्विशेषाधिकाः क्रमात् ॥ ४१४ ॥

एकेन्द्रियाणां चत्वारोऽप्यनाभोगाद्भवन्त्यमी । अदर्शितबहिर्देहविकारा अस्फुटात्मकाः ॥ ४१५ ॥

सर्वदा सहचारित्वात्कषायाऽव्यभिचारिणः । नोकषाया नव प्रोक्ता, नमनीयक्रमाम्बुजैः ॥ ४१६ ॥

तदुक्तं प्रज्ञापनावृत्तौ—

"कषायसहवर्तित्वात्कषायप्रेरणादपि । हास्यादिनवकस्योक्ता, नोकषायकषायता ॥ हासो रत्यरतीभीतिर्जुगुप्सा शोक एव च । पुंस्त्रीक्लीबाभिधाः वेदाः नोकषाया अमी मताः" ॥

इति कषायाः ॥ २० ॥

संज्ञा स्यात् ज्ञानरूपैका, द्वितीयाऽनुभवात्मिका । तत्राद्या पञ्चधा ज्ञानमन्या च स्यात् स्वरूपतः ॥ ४१७ ॥

असातवेदनीयादिकर्मोदयसमुद्भवा । आहारादिपरीणामभेदात्सा च चतुर्विधा ॥ ४१८ ॥

---

१. यावज्जीवादिः कालो नरकादिका गतिश्चानन्तानुबन्ध्यादीनां फरुसवयणेणेत्यादिवद्व्यवहारात्, तेन न बाहुबलिनो मानेऽन्येषां चाकर्षादौ मिथ्यात्विनां ग्रैवयकोत्पादे च क्षतिरिति देवेन्द्रसूरिपादाः ।

तथाहुः ।

"चत्तारि सण्णाओ पण्णत्ताओ तंजहा आहारसण्णा, भयसण्णा, मेहुणसण्णा, परिग्गहसण्णा" । इति स्थानाङ्गे ॥

आहारे योऽभिलाषः स्याज्जन्तोः क्षुद्वेदनीयतः । आहारसंज्ञा सा ज्ञेया, शेषाः स्युर्मोहनीयजाः ॥ ४१९ ॥

भयसंज्ञा भयं त्रासरूपं यदनुभूयते । मैथुनेच्छात्मिका वेदोदयजा मैथुनाभिधा ॥ ४२० ॥

स्यात्परिग्रहसंज्ञा च, लोभोदयसमुद्भवा । अनाभोगाऽव्यक्तरूपा, एताश्चैकेन्द्रियाङ्गिनाम् ॥ ४२१ ॥

भगवतीसप्तमशतकाष्टमोद्देशके तु

आहारभयपरिग्गहमेहुण तह कोह माण माया य । लोभो लोगो ओहो, सन्ना दस सव्वजीवाणं ॥

एताश्च-वृक्षोपलक्षणेन सर्वैकेन्द्रियाणां साक्षादेवं दर्शिताः । तद्यथा–

> रुक्खाण जलाहारो, संकोअणिआ भयेण संकुयइ । निअतन्तुएहिं वेढइ, वल्ली रुक्खे परिगहेइ ॥ इत्थिपरिरंभणेणं कुरुबगतरुणो फलंति मेहुणे । तह कोकनदस्स कंदे हुंकारे मुअइ कोहेणं ॥ माणे झरइ रुअंती, छायइ वल्ली फलाइं मायाए । लोभे बिल्लपलासा खिवंति मूले निहाणुवरिं ॥ रयणीए संकोओ, कमलाणं होइ लोगसन्नाए ॥ ओहे चेइत्तु मग्गं, चडंति रुक्खेसु वल्लीओ ॥

अन्यैरपि वृक्षाणां मैथुनसंज्ञाऽभिधीयते । तथोक्तं शृङ्गारतिलके ।

> सुभग ! कुरुबकस्त्वं नो किमालिङ्गनोत्कः, किमु मुखमदिरेच्छुः केसरो नो हृदिस्थः । त्वयि नियतमशोके युज्यते पादघातः, प्रियमितिपरिहासात्पेशलं काचिदूचे ॥ तथा पारदोऽपि स्फारशृङ्गारया स्त्रियाऽवलोकितः कूपादुल्ललतीति लोके श्रूयते इति ॥

स्तोका मैथुनसंज्ञोपयुक्ता नैरयिकाः क्रमात् । संख्येयघ्ना जगि[1]धपरिग्रहत्रासोपयुक्तकाः ॥ ४२२ ॥

स्युः परिग्रहसंज्ञाढ्यास्तिर्यञ्चोऽल्पास्ततः क्रमात् । ते मैथुनभयाहारसंज्ञाः संख्यगुणाधिकाः ॥ ४२३ ॥

भयसंज्ञान्विताः स्तोका, मनुष्या स्युर्यथाक्रमम् । संख्येयघ्ना भुक्तिपरिग्रहमैथुनसंज्ञ[2]काः ॥ ४२४ ॥

आहारसंज्ञाः स्युः स्तोका, देवाः संख्यगुणाधिकाः । संत्रासमैथुनपरिग्रहसंज्ञा यथाक्रमम् ॥ ४२५ ॥

> प्रवचनसारोद्धारवृत्तौ तु एवं लिखितम् । तथा मतिज्ञानावरणकर्मक्षयोपशमात् शब्दार्थगोचरा सामान्यावबोधक्रिया ओघसंज्ञा । तद्विशेषावबोधक्रिया लोकसंज्ञा । एवं चेदमापतितम्– दर्शनोपयोगरोघसंज्ञा, ज्ञानोपयोगो लोकसंज्ञा । एषः स्थानाङ्गटीकाभि[3]प्रायः ॥ आचाराङ्गटीकायां पुनरभिहितं–ओघसंज्ञा त्वव्यक्तोपयोगरूपा वल्लीवितानारोहणादिसंज्ञा । लोकसंज्ञा तु स्वच्छन्दघटितविकल्परूपा लोकोपचरिता । यथा न सन्त्यनपत्यस्य सद्गतयः, श्वानो यक्षाः, विप्राः देवाः, काकाः पितामहाः, बर्हिणां पक्षवातेन गर्भ इत्यादिका इति [श्लोक ९२४ नी टीका] ॥ आचाराङ्गे तु ॥

---

१. आहार० । २. संज्ञिनः प्र० । ३. स्पर्शाद्यव्यक्तज्ञानापेक्ष्या स्यातामेते सर्वेषां । ४. संज्ञाषोऽशकापेक्षयोक्तत्वात् न सर्वेषां सद्भावोऽनयोः ।

मोहधर्मसुखदुःखजुगुप्साशोकनामभिः । दश ताः षड्भिरेताभिः, सह षोडश वर्णिताः ॥ ४२६ ॥
अथवा त्रिविधाः संज्ञाः, प्रथमा दीर्घकालिकी । द्वितीया हेतुवादाख्या, दृष्टिवादाभिधा परा ॥ ४२७ ॥
सुदीर्घमप्यतीतार्थं, स्मरत्यथ विचिन्तयेत् । कथं नु नाम कर्त्तव्यमित्यागामिनमाद्यया ॥ ४२८ ॥
तथा विचिन्त्येष्टानिष्टच्छायातपादिवस्तुषु । द्वितीयया स्वसौख्यार्थं, स्यात्प्रवृत्तिनिवृत्तिमान् ॥ ४२९ ॥
भवेत्सम्यग्दृशामेव, दृष्टिवादोपदेशिकी[1] । एतामपेक्ष्य सर्वेऽपि, मिथ्यादृशो ह्यसंज्ञिनः ॥ ४३० ॥
सुरनारकगर्भोत्थजीवानां दीर्घकालिकी । संमूर्च्छिमान्तद्वयक्षादिजीवानां हेतुवादिकी ॥ ४३१ ॥
छद्मस्थसम्यग्दृष्टीनां, श्रुतज्ञानात्मिकाऽन्तिमा । मतिव्यापारनिर्मुक्ताः, संज्ञातीता जिनाः समे[2] ॥ ४३२ ॥
इति संज्ञाः ॥ २१ ॥

इन्दुः स्यात् परमैश्वर्ये, धातोरस्य प्रयोगतः । इन्दनात्परमैश्वर्यादिन्द्र आत्माऽभिधीयते ॥ ४३३ ॥
तस्य लिङ्गं तेन सृष्टमितीन्द्रियमुदीर्यते । श्रोत्रादि पञ्चधा तच्च, तथाह्युवाच भाष्यकृत् ॥ ४३४ ॥
इन्दो जीवो सव्वोवलद्धिभोगपरमेसरत्तणओ ॥ सोत्ताइभेयमिंदियमिह तल्लिंगाइ भावाओ ॥
श्रोत्राक्षिघ्राणरसनस्पर्शनानीति पञ्चधा । तान्येकैकं द्विभेदं तद्, द्रव्यभावविभेदतः ॥ ४३५ ॥
तत्र निवृत्तिरूपं स्यात्तथोपकरणात्मकम् । द्रव्येन्द्रियमिति द्वेधा, तत्र निर्वृत्तिराकृतिः ॥ ४३६ ॥
साऽपि बाह्यान्तरङ्गा च, बाह्या तु स्फुटमीक्ष्यते । प्रतिजाति पृथग्रूपा, श्रोत्रपर्पटिकादिका ॥ ४३७ ॥
नानात्वान्नोपदेष्टुं सा, शक्या नियतरूपतः । नानाकृतीनीन्द्रियाणि, यतो वाजिनरादिषु ॥ ४३८ ॥
अभ्यन्तरा तु निर्वृत्तिः, समाना सर्वजातिषु । उक्तं संस्थाननैयत्यमेनामेवाधिकृत्य च ॥ ४३९ ॥
तथाहि-श्रोत्रं कदम्बपुष्पाभमांसैकगोलकात्मकम् । मसूरधान्यतूल्या स्याच्चक्षुषोऽन्तर्गताकृतिः ॥ ४४० ॥
अतिमुक्तकपुष्पाभं, घ्राणं च काहलाकृति । जिह्वा क्षुरप्राकारा स्यात्, स्पर्शनं विविधाकृतिः ॥ ४४१ ॥
स्पर्शनेन्द्रियनिर्वृत्तौ, बाह्याभ्यन्तरयोर्न भित्[3] । तथैव प्रतिपत्तव्यमुक्तत्वात्पूर्वसूरिभिः ॥ ४४२ ॥
बाह्यनिर्वृत्तीन्द्रियस्य, खड्गेनोपमितस्य या । धारोपमान्तर्निवृत्तिरत्यच्छपुद्गलात्मिका ॥ ४४३ ॥
तस्याः शक्तिविशेषो यः, स्वीयस्वीयार्थबोधकः । उक्तं तदेवोपकरणेन्द्रियं तीर्थपार्थिवैः ॥ ४४४ ॥

तदुक्तं प्रज्ञापनावृत्तौ—उपकरणम् । खड्गस्थानीयायाः बाह्यनिर्वृत्तेः या खड्गधारासमाना स्वच्छतरपुद्गलसमूहात्मिका अभ्यन्तरा निर्वृत्तिः तस्याः शक्तिविशेष[4] इति ॥

आचारांगवृत्तौ तु—"निर्वृत्यते इति निर्वृत्तिः । केन निर्वृत्त्यते ?, कर्मणा । तत्र उत्सेधाङ्गुलासंख्येयभागाप्रमितानां शुद्धानां आत्मप्रदेशानां प्रतिनियतचक्षुरादीन्द्रियसंस्थानेनावस्थितानां या वृत्ति-

---

१. दृष्टिर्दर्शनं - सम्यक्त्वादि वदनं वादः दृष्टीनां वादो दृष्टिवादस्तदुपदेशेन तदपेक्षयेत्यर्थः, संज्ञा सम्यग्ज्ञानं तदस्यास्तीति संज्ञी सम्यग्दृष्टिस्तस्य यत् श्रुतं तत्सम्यग्दृष्टिश्रुतं सम्यक् श्रुतमिति भावार्थः (इति मलयगिरिपादाः) । २. सर्वे । ३. अङ्गुलासंख्यभागामानत्वेन सर्वत्वग्गत्वेन च भेदस्यालक्ष्यत्वमिति । ४. खड्गधारयोरिवाभेदापत्तिरभ्यन्तरबहिर्निर्वृत्योरेवं न च द्वैविध्यमुपकरणस्य ॥

रभ्यन्तरा निवृत्तिः, तेष्वेवात्मप्रदेशेष्विन्द्रियव्यपदेशभाग् यः प्रतिनियतसंस्थान निर्माणनाम्ना पुद्गलविपाकिना वर्द्धकीसंस्थानीयेनारचित[1]ः कर्णशष्कुल्यादिविशेषः, अङ्गोपाङ्गनाम्ना तु निष्पादितरति[2] बाह्यनिर्वृत्तिः, तस्या एव निर्वृत्तेः द्विरूपायाः येनोपकारः क्रियते तदुपकरणम् । तच्च इन्द्रियकार्यं सत्यामपि निवृत्तावनुपहतायामपि मसूराद्याकृतिरूपायां निर्वृत्तौ तस्योपघातात् न पश्यति, तदपि निर्वृत्तिवत् द्विधा" इति ॥

एवं च प्रज्ञापनावृत्त्यभिप्रायेण स्वच्छतरपुद्गलात्मिका अभ्यन्तरनिर्वृत्तिः । प्रथमाङ्गवृत्त्यभिप्रायेण तु शुद्धात्मप्रदेशरूपा अभ्यन्तरनिवृत्तिः इति[3] ध्येयम्[4] ॥

इदमान्तरनिर्वृत्तेर्न तूपकरणेन्द्रियम् । अर्थान्तरं शक्तिशक्तिमतोर्भेदात् कथञ्चन ॥ ४४५ ॥

कथञ्चित् भेदश्च–

तस्यामान्तरनिर्वृत्तौ, सत्यामपि पराहते । द्रव्यादिनोपकरणेन्द्रियेऽर्थाज्ञानदर्शनात् ॥ ४४६ ॥

इति द्रव्येन्द्रियम् ॥

द्विधा भावेन्द्रियमपि, लब्धितश्चोपयोगतः । यथाश्रुतमथो वच्मि, स्वरूपमुभयोरपि ॥ ४४७ ॥

जन्तोः श्रोत्रादिविषयस्तत्तदावरणस्य यः । स्यात् क्षयोपशमो लब्धिरूपं भावेन्द्रियं हि तत् ॥ ४४८ ॥

स्वस्वलब्ध्यनुसारेण, विषयेषु य आत्मनः । व्यापार उपयोगाख्यं, भवेद्भावेन्द्रियं च तत् ॥ ४४९ ॥

उपयोगेन्द्रियं चैकमेकदा नाधिकं भवेत् । एकदा ह्युपयोगः स्यादेक एव यदङ्गिनाम् ॥ ४५० ॥

तथाहि इन्द्रियेणेह येनैव, मनः संयुज्यतेऽङ्गिनः । तदेवैकं स्वविषयग्रहणाय प्रवर्त्तते ॥ ४५१ ॥

सशब्दां सुरभिं मृद्वीं, खादतो दीर्धशष्कुलीम् । पञ्चानामुपयोगानां, यौगपद्यस्य यो भ्रमः ॥ ४५२ ॥

स चेन्द्रियेषु[5] सर्वेषु, मनसः शीघ्रयोगतः । सम्भवेद्युगपत्पत्रशतवेधाभिमानवत् ॥ ४५३ ॥

अन्यथा तूपयोगौ द्वौ, युगपन्नार्हतोऽपि चेत् । छद्मस्थानां पञ्च तर्हि, सम्भवेयुः कथं सह ? ॥ ४५४ ॥

तदुक्तं प्रथमाङ्गवृत्तौ–आत्मा सहैति मनसा मन इन्द्रियेण, स्वार्थेन चेन्द्रियमिति क्रम एष शीघ्रः । योग्योऽयमेव मनसः किमगम्यमस्ति, यस्मिन्मनो व्रजति तत्र गतोऽयमात्मा ॥

किंच–

एकाक्षादिव्यवहारो, भवेत् द्रव्येन्द्रियैः[6] किल । अन्यथा बकुलः पञ्चाक्षः स्यात् पञ्चोपयोगतः ॥ ४५५ ॥

यदुक्तम् –"पंचिन्दिओ उ बउलो नरोव्व सव्वोवलद्धिभावाओ । तहवि न भणइ पंचिन्दिओत्ति दव्विन्दियाभावा" ॥

रणन्नूपुरशृङ्गारचारुलोलेक्षणा मुखात् । निर्यत्सुगन्धिमदिरागण्डुषादेष पुष्यति ॥ ४५६ ॥

---

१. रचितुमारब्धः २. समापितः । ३. निर्वृत्तिरङ्गोपाङ्गनामनिर्वर्त्तितानीन्द्रियद्वाराणि कर्मविशेषसंस्कृताः शरीरप्रदेशाः - निर्माणनामाङ्गोपाङ्गप्रत्यया मूलगुणनिवर्त्तनेत्यर्थः । उपकरणं बाह्यमभ्यन्तरं च निर्वर्त्तितस्यानुपघातानुग्रहाभ्यामुपकारीति (तत्त्वार्थभाष्यं अ०२ - सू. १७) ४. कर्मनिर्वर्त्तितत्वाभिधानाच्चिन्त्यमिदं, शरीरावयवात्मप्रदेशानामभेदापेक्षया स्यात्समाचीनता ।

५. स त्विन्द्रियेषु प्र० । ६. तत्तज्जातिनाम्नेति देवेन्द्रसूर्याद्याः, छिन्ननासान्ध्रादीनां तेन न काचित्क्षतिः ।

ततः पञ्चाप्युपयोगा भाव्या इति ॥

अङ्गुलासंख्येयभागबाहल्यानि जिनेश्वराः । ऊचुः पञ्चापीन्द्रियाणि, बाहल्यं स्थूलता किल ॥ ४५७ ॥

नन्वङ्गुलासंख्यभागबहले स्पर्शनेन्द्रिये । खड्गादिघाते देहान्तर्वेदनानुभवः कथम् ? ॥ ४५८ ॥

अत्रोच्यते—

त्वगिन्द्रियस्य विषयः, स्पर्शाः शीतादयो यथा । चक्षुषो रूपमेवं तु, विषयो नास्य वेदना ॥ ४५९ ॥

दुःखानुभवरूपा सा, तां त्वात्माऽनुभवत्ययम् । सकलेनापि देहेन, ज्वरादिवेदनामिव ॥ ४६० ॥

अथ शीतलपानीयपानेऽन्तर्वेद्यते कथम् ?। शीतस्पर्शोऽन्तरा कौतस्कुतं स्यात्स्पर्शनेन्द्रिय ? ॥ ४६१ ॥

अत्रोच्यते–सर्वत्राङ्गप्रदेशान्तर्वर्त्ति[1] त्वगिन्द्रियं किल । भवेदेवेति मन्तव्यं, पूर्वर्षिसम्प्रदायतः ॥ ४६२ ॥

यदाह प्रज्ञापनामूलटीकाकारः— "सर्वप्रदेश[2]पर्यन्तवर्तित्वात्ततोऽभ्यन्तरतोऽपि शुषिरस्योपरि त्वगिन्द्रियस्य भावादुपपद्यतेऽन्तरेपि शीतस्पर्शवेदनानुभव इति" ॥

ततोऽन्तरेऽपि शुषिरपर्यन्तेऽस्ति त्वगिन्द्रियम् । अतः संवेद्यते शैत्यं, कर्णादिशुषिरेष्विव ॥ ४६३ ॥

पृथुत्वमङ्गुलासंख्यभागोऽतीन्द्रियवेदिभिः । त्रयाणामपि निर्दिष्टः, श्रवणघ्राणचक्षुषाम् ॥ ४६४ ॥

अङ्गुलानां पृथक्त्वं च, पृथुत्वं रसनेन्द्रिये । स्वस्वदेहप्रमाणं च, भवति स्पर्शनेन्द्रियम् ॥ ४६५ ॥

त्वगिन्द्रियं विनाऽन्येषां, चतुर्णां पृथुता भवेत् । आत्माङ्गुलेन सोत्सेधाङ्गुलेन स्पर्शनस्य तु ॥ ४६६ ॥

ननूत्सेधाङ्गुलेनैव, मितो देहो भवेत्ततः । मातुं तेनैव युज्यन्ते, तद्गतानीन्द्रियाण्यपि ॥ ४६७ ॥

आत्माङ्गुलेन चत्वार्यौत्सेधिकेनैकमिन्द्रियम् । तानीत्थं मीयमानानि, कथमौचित्यमियति ॥ ४६८ ॥

अत्रोच्यते–जिह्वादीनां पृथुलत्वे, औत्सेधेनोररीकृते । त्रिगव्यूतनरादीनां, न स्याद्विषयवेदिता ॥ ४६९ ॥

तथाहि–त्रिगव्यूतादिमनुजाः, षड्गव्यूतादिकुञ्जराः । स्वस्वदेहानुसारात्स्युः, विस्तीर्णरसनेन्द्रियाः ॥ ४७० ॥

तेषामान्तरनिर्वृत्तिरूपं चेद्रसनेन्द्रियम् । उत्सेधाङ्गुलपृथक्त्वमितं स्यादल्पकं हि तत् ॥ ४७१ ॥

न व्याप्नु[3]यात्सर्वजिह्वां, ततोऽतिविदितोऽनया[4] । सर्वात्मना रसज्ञानव्यवहारो न सिद्ध्यति ॥ ४७२ ॥

गन्धादिव्यवहारोऽपि, भावनीयो दिशाऽनया । तत आत्माङ्गुलेनैव, पृथुत्वं रसनादिषु ॥ ४७३ ॥

जघन्यतोऽक्षिवर्जाण्यङ्गुलासंख्येयभागतः । गृह्णन्ति विषयं चक्षुस्त्वङ्गुलसंख्यभागतः ॥ ४७४ ॥

अयं भावः—

प्राप्यार्थावच्छेदकत्वात्, श्रवणादीनि जान[5]ते । अङ्गुलासंख्येयभागादपि शब्दादिमागतम् ॥ ४७५ ॥

चतुर्णामत एवैषां, व्यञ्जनावग्रहो भवेत् । दृष्टान्तान्नव्यमृत्पात्रशयितोद्बोधनात्मकात् ॥ ४७६ ॥

---

१. भवितव्यमत्र अन्तशब्देन २. उदरादिषु, गर्भाशयादौ तु न । ३. रसनेन्द्रियं ४. प्रसिद्धः ५. गृह्णते प्र०

यथा शरावकं नव्यं, नैवैकेनोदबिन्दुना । क्लिद्यते किन्तु भूयोभिः, पतद्भिस्तैर्निरन्तरम् ॥ ४७७ ॥
एवं सुप्तोऽपि नैकेन, शब्देन प्रतिबुध्यते । किन्तु तैः पञ्चषैः कर्णे, शब्दद्रव्यैर्भृते सति[1] ॥ ४७८ ॥
एवं व्यञ्जनावग्रहभावना नन्दीसूत्रे ॥
चक्षुस्त्वप्राप्यकारित्वादङ्गुलसंख्यभागतः । अर्थं जघन्यादगृह्णाति, ततोऽप्यर्वाक्तरं नतु ॥ ४७९ ॥
तत एवातिपार्श्वस्थं, नैवाञ्जनमलादिकम् । चक्षुः परिच्छिनत्तीति, प्रतीतं सर्वदेहिनाम् ॥ ४८० ॥
तथा-श्रुतिर्द्वादशयोजन्याः, शृणोति शब्दमागतम् । रूपं पश्यति चक्षुः, साधिकयोजनलक्षतः ॥ ४८१ ॥
आगतं नवयोजन्याः, शेषाणि त्रीणि गृह्णते । गन्धं रसमथ स्पर्शमुत्कृष्टो विषयो ह्ययम् ॥ ४८२ ॥
ननु च प्राप्यकारीणि, श्रोत्रादीनीन्द्रियाणि चेत् । पस्तोऽप्यागतान् शब्दादीन् गृह्णन्ति कथं न तत् ? ॥ ४८३ ॥
द्वादशयोजनादिर्यो, नियमः सोऽपि निष्फलः । गृह्णाति प्राप्तसम्बन्धं[2], सर्वमित्येव यौक्तिकम् ॥ ४८४ ॥
अत्रोच्यते–
शब्दादीनां पुद्गला ये, परतः स्युः समागताः । तथा मन्दपरीणामास्ते जायन्ते स्वभावतः ॥ ४८५ ॥
यथा स्वविषयं ज्ञानं, नोत्पादयितुमीशते । स्वभावान्नास्ति शक्तिश्चेन्द्रियाणामपि तद्ग्रहे ॥ ४८६ ॥
ततो विषयनियमो, युक्तोऽयं दर्शितः श्रुते । प्राप्यकारित्वे चतुर्णामिन्द्रियाणां स्थितेऽपि हि ॥ ४८७ ॥
किञ्च –
नास्ति शक्तिश्चक्षुषोऽपि, विषयात्परतः स्थितम् । परिच्छेत्तुं द्रव्यजातं, युक्तस्तस्याप्यसौ[3] ततः ॥ ४८८ ॥
जिह्वाघ्राणस्पर्शनानि, त्रीण्यप्येतानि गृह्णते । बद्धस्पृष्टं द्रव्यजातं, स्पृष्टमेव परं श्रुतिः ॥ ४८९ ॥
यदुक्तम्–"पुट्ठं सुणेइ सद्दं, रुवं पुण पासइ अपुट्ठं तु । गंधं रसं च फासं च बद्धपुट्ठं वियागरे" ॥
[विशेषावश्यक ३३६]
बद्धं तत्रात्मप्रदेशैरात्मीकृतमिहोच्यते । स्पृष्टमालिङ्गितमात्रं, ज्ञेयं वपुषि रेणुवत् ॥ ४९० ॥
"बद्धमप्पीकयं पएसेहिं, पुट्ठं रेणुं व तणुंमि" । इति वचनात् ॥
समेऽपि प्राप्यकारित्वे, चतुर्णामपि नन्वयम् । को विशेषः स्पृष्टबद्धस्पृष्टार्थग्रहणात्मकः? ॥ ४९१ ॥
अत्रोच्यते-
स्पर्शगन्धरसद्रव्यौघानां शब्दव्यपेक्षया । अल्पत्वात् बादरत्वाच्चाभावुकत्वाच्च सत्वरम् ॥ ४९२ ॥
स्पर्शनघ्राणजिह्वानां, मन्दशक्तितयाऽपि च । बद्धस्पृष्टं वस्तुजातं, गृह्णन्त्येतानि निश्चितम् ॥ ४९३ ॥
स्पर्शादिद्रव्यसंघातापेक्षया शब्दसंहतिः । बह्वी सूक्ष्मासन्नशब्दयोग्यद्रव्याभिवासिका[4] ॥ ४९४ ॥
तन्निर्वृत्तीन्द्रियस्यान्तर्गत्वोपकरणेन्द्रियम् । स्पृष्ट्वाऽपि सद्यः कुरुतेऽभिव्यक्तिं सा स्वगोचरम् ॥ ४९५ ॥

---

१. व्यंजनावग्रहस्य प्राणावानपृथक्त्वमानत्वात् उत्कर्षतः चिन्त्यमिदम् । २. संबन्धे प्र० । ३. विषयनियमः । ४. शब्दसंहतिः ।

अन्येन्द्रियापेक्षया च, श्रवणं पटुशक्तिकम् । ततः स्पृष्टानेव शब्दान् गृह्णातीत्युचितं जगुः[1] ॥ ४९६ ॥
श्रुतेर्यत्प्राप्यकारित्वे, बौधोक्तं स्पर्शदूषणम् । चंडालशब्दश्रवणादिष्वयौक्तिकमेव तत् ॥
स्पृश्यास्पृश्यविचारो हि, स्याल्लोकव्यवहारतः । नेन्द्रियाणां च विषयेष्वसौ कस्यापि सम्मतः ॥
स्पृष्टार्थग्राहकत्वं यत्, परैरक्ष्णोऽपि कथ्यते । तदयुक्तं तथात्वे हि, दाहः स्याद्वह्न्यवेक्षणात् ॥ ४९७ ॥
तथा-काचपात्राद्यन्तरस्थं, दूरादेवेक्ष्यते जलम् । तद्भित्त्वान्तःप्रवेशे तु, जलश्रावः प्रसज्यते ॥ ४९८ ॥

इत्याद्यधिकं रत्नावतारिकादिभ्योऽवसेयम् । विस्तारभयान्नेह प्रतन्यते । यच्च सिद्धान्ते 'चक्खुफासं हव्वमागच्छइ' इति श्रूयते तत्र स्पर्शशब्देन इन्द्रियार्थसन्निकर्ष उच्यते, तथाहुः – 'सूरिए चक्खुफासं हव्वमागच्छइ' इत्येतज्जम्बूद्वीपप्रज्ञप्तिप्रतीकवृत्तौ । "अत्र च स्पर्शशब्द इन्द्रियार्थसन्निकर्षपरश्चक्षुषोऽप्राप्यकारित्वेन तदसम्भवादिति[2]" ॥

मेया आत्माङ्गुलैरेव, प्रागुक्तेन्द्रियगोचराः । प्रमाणाङ्गुलमाने स्युर्महीयांसोऽधुना हि ते ॥ ४९९ ॥
उत्सेधाङ्गुलमाने तु, कथं भरतचक्रिणः । पुर्यादौ स्वाङ्गुलमितनवद्वादशयोजने ॥ ५०० ॥
एकत्र वादिता भम्भा, सर्वत्र श्रूयते जनैः । तस्मादात्माङ्गुलोन्मेया, विषया इति युक्तिमत् ॥ ५०१ ॥
आह - प्रमाणाङ्गुलजानेकलक्षयोजनसम्मिते । स्वर्विमाने कथं घण्टा, सर्वत्रः श्रूयते सुरैः ॥ ५०२ ॥
त्रैधैरप्यङ्गुलैर्नैष, विषयो घटते श्रुतेः । द्वितीयोपाङ्गटीकायामस्योत्तरमवेक्ष्यताम् ॥ ५०३ ॥

तथाहि – तस्यां मेघौघरसितगम्भीरमुधरशब्दायां योजनपरिमण्डलायां सुस्वराभिधानायां घण्टायां त्रिस्ताडितायां सत्यां यत्सूर्याभं विमानं तत्प्रासादनिष्कुटेषु ये आपतिताः शब्दवर्गणापुद्गलास्तेभ्यः समुच्छलितानि यानि घण्टाप्रतिश्रुतिशतसहस्राणि घण्टाप्रतिशब्दलक्षास्तैः संकुलमपि जातमभूत्, किमुक्तं भवति ? घण्टायां महता प्रयत्नेन ताडितायां ये विनिर्गताः शब्दपुद्गलास्तत्प्रतिघाततः सर्वासु दिक्षु विदिक्षु च दिव्यानुभावतः समुच्छलितैः प्रतिशब्दैः सकलमपि विमानमनेकयोजनलक्षमानमपि बधिरितमुपजायते इति, एतेन द्वादशभ्यो योजनेभ्यः समागतः शब्दः श्रोत्रग्राह्यो भवति न परतः, ततः कथमेकत्र ताडितायां घण्टायां सर्वत्र तच्छब्दश्रुतिरुपजायते इति यदुच्यते तदपाकृतमवसेयम् । सर्वत्र दिव्यानुभावतस्तथारूपप्रतिशब्दोच्छलने यथोक्तदोषासम्भवात् ॥

अपरं च – इगवीसं खलु लक्खा, चउतीसं एव तह सहस्साइं । तह पंचसया भणिया, सत्तत्तीसाय अइरित्ता ॥ इति नयणविसयमाणं, पुक्खरदीवड्ढवासिमणुआणं । पुव्वेण य, अवरेण य पिहं पिहं होइ नायव्वं ॥ [प्रवचनसारोद्धार श्लो. ११०८ नी टीकान्तर्गत श्लो. १, २]

एवं च-स प्रागुक्तोऽक्षिविषयो, न विसंवदते कथम् । अत्रैतत्सूत्रतात्पर्यं, व्याचचक्षे बुधैरिदम् ॥ ५०४ ॥

---

१. श्रुतेर्यत्प्राप्यकारित्वे, बौद्धोक्तं स्पर्शदूषण् । चण्डालशब्दश्रवणादिष्वयौक्तिकमेव तत् ॥ १ ॥ स्पृश्यास्पृश्यविचारो हि, स्याल्लोकव्यवहारतः । नेन्द्रियाणां च विषयेष्वसौ कस्यापि संमतः ॥ २ ॥ प्र. ।

२. योग्यदेशावस्थितिः यतो ग्रहणम् ।

लक्षयोजनमानो दृगविषयः परमस्तु यः । अभास्वरं पर्वतादि, वस्त्वपेक्ष्य स निश्चितः ॥ ५०५ ॥
स्याद्भास्वरं तु सूर्यादिवस्त्वपेक्ष्याधिकोऽपि यः । व्याख्यानतो विशेषार्थप्रतिपत्तिरियं किल ॥ ५०६ ॥
इदं विशेषावश्यकेऽर्थतः ॥
अनन्ताणूद्भवान्येतानीन्द्रियाण्यखिलान्यपि । असंख्येयप्रदेशावगाढानि निखिलानि च ॥ ५०७ ॥
स्तोकावगाहा दृक् श्रोत्रघ्राणे संख्यगुणे क्रमात् । ततोऽसंख्यगुणा जिह्वा, संख्यघ्नं स्पर्शनं ततः ॥ ५०८ ॥
स्तोकप्रदेशं नयनं, श्रोत्रं संख्यगुणाधिकम् । ततोऽसंख्यगुणं[1] घ्राणं, जिह्वाऽसंख्यगुणा ततः ॥ ५०९ ॥
ततोऽप्यसंख्यगुणितप्रदेशं स्पर्शनेन्द्रियम् । इत्यल्पबहुतैषां स्यादवगाहप्रदेशयोः ॥ ५१० ॥
तुर्योपाङ्गे[2] तु
श्रोत्राक्षिनासिकं द्वे द्वे, जिह्वैका स्पर्शनं तथा । एवं द्रव्येन्द्रियाण्यष्टौ, भावेन्द्रियाणि पंच तु[3] ॥ ५११ ॥
सर्वेषां सर्वजातित्वे, द्रव्यतो भावतोऽपि च । अतीतानीन्द्रियाणि स्युरनन्तान्येव देहिनाम् ॥ ५१२ ॥
विनाऽनादिनिगोदेभ्यो[4], ज्ञेयमेतत्तु कोविदैः । स्वजातावेव तेषां तु, तान्यतीतान्यनन्तशः ॥ ५१३ ॥
किंच – येषामनन्तः कालोऽभून्निर्गतानां निगोदतः । तेषामपेक्षया ज्ञेयमेतच्छ्रुतविशारदैः ॥ ५१४ ॥
एवमन्यत्रापि यथासम्भवं भाव्यम् ॥
एकादीनि सन्ति पञ्चान्तानि भावेन्द्रियाणि च । एकद्वित्रिचतुःपञ्चेन्द्रियाणां स्युर्यथाक्रमम् ॥ ५१५ ॥
भावीनि नैव केषाञ्चिद्वर्त्तन्ते मुक्तियायिनाम् । केषाञ्चित् पञ्च षट् सप्त, संख्यासंख्यान्यनन्तशः ॥ ५१६ ॥
सिद्ध्यतां भाविनि भवे, नरनारकनाकिनाम् । पञ्चाक्षतिर्यक्पृथ्व्यम्बुद्रूणां पञ्च जघन्यतः ॥ ५१७ ॥
पृथ्व्यादिजन्मान्तरितमुक्तीनां तु मनीषिभिः । षट्सप्तप्रमुखाण्येवं, भाव्यानि प्रोक्तदेहिनाम् ॥ ५१८ ॥
संख्येयानि च तानि स्युः, संख्यातभवकारिणाम् । असंख्येयान्यनन्तान्यसंख्येयानन्तजन्मनाम् ॥ ५१९ ॥
रिष्टामघामाघवतीनारकाणां च युग्मिनाम् । नृणां तिरश्चां भावीनि, दश तानि जघन्यतः ॥ ५२० ॥
पञ्चाक्षेभ्योऽन्यत्र नैषामुत्पत्तिर्नाप्यनन्तरे । भवे मुक्तिस्तत एषां, दशोक्तानि जघन्यतः ॥ ५२१ ॥
वाय्वग्निविकलाक्षाणां, जघन्यतो भवन्ति षट् । क्ष्मादिजन्मान्तरितैषां, मुक्तिर्नानन्तरं यतः ॥ ५२२ ॥
एकद्वित्रिचतुःपञ्चेन्द्रियाणां स्युरनुक्रमात् । द्रव्येन्द्रियाणि सन्त्येकं द्वे चत्वारि षडष्ट च ॥ ५२३ ॥
भविष्यन्ति न केषाञ्चित्केषाञ्चिदष्ट वा नव । दश षोडश केषाञ्चित्संख्यासंख्यान्यनन्तशः ॥ ५२४ ॥
भावना प्राग्वत् ॥
नारकस्य नारकत्वे, भावतो द्रव्यतोऽपि च । तान्यतीतान्यनन्तानि, सन्ति पञ्चाष्ट च स्फुटम् ॥ ५२५ ॥

---

१. तद० प्र० । २ च प्र० । ३. लब्धीन्द्रियापेक्षया ४. गोदिभ्यो प्र० ।

भविष्यन्ति न केषाञ्चित्केषाञ्चित्पञ्च चाष्ट च । ज्ञेयानि तान्येकवारं, नरकं यास्यतोऽङ्गिनः ॥ ५२६ ॥
संख्येयान्येतानि संख्यावारं नरकयायिनः । असंख्येयान्यप्यनन्तान्येवं भाव्यानि धीधनैः ॥ ५२७ ॥
अतिक्रान्तान्यनन्तानि, सुरत्वे नारकस्य च । वर्त्तमानानि नैव स्युर्भावीनि पुनरुक्तवत् ॥ ५२८ ॥
विजयादिविमानित्वे, यदि स्युर्नारकाङ्गिनाम् । नातीतानि भविष्यन्ति, पञ्चाष्ट दश षोडश ॥ ५२९ ॥
एवं सर्वगतित्वेन, सर्वेषामपि देहिनाम् । भावनीयान्यतीतानि, सन्ति भावीनि च स्वयम् ॥ ५३० ॥
नृत्वे नृणामतीतान्यनन्तान्यष्ट पञ्च च । सन्ति तद्भवमुक्तीनां, तानि भावीनि नैव च ॥ ५३१ ॥
अन्येषां तु मनुष्यत्वे, भावीनि पञ्च चाष्ट च । जघन्यतोऽपि स्युर्मुक्तिर्यन्न मानुष्यमन्तरा ॥ ५३२ ॥
अनुत्तरामराणां च, स्वत्वे सन्त्यष्ट पञ्च च । यदि स्युर्भूतभावीनि, तावन्त्येव तदा खलु ॥ ५३३ ॥
विजयादिविमानेषु, द्विरुत्पन्नो ह्यनन्तरे । भवे विमुक्तिमाप्नोति, ततो युक्तं यथोदितम् ॥ ५३४ ॥
अन्यजातित्वे त्वनन्तान्यतीतान्यथ सन्ति न । भावीनि संख्यान्येवैषां, नृत्ववैमानिकत्वयोः ॥ ५३५ ॥

तथोक्तं प्रज्ञापनावृत्तौ— इह विजयादिषु चतुर्षु गतो जीवो नियमात् ततरुध्धृतो न जातुचिदपि नैरयिकादिषु पञ्चेन्द्रियतिर्यक्पर्यवसानेषु[1] तथा व्यन्तरेषु ज्योतिष्केषु च मध्ये समागमिष्यति, मनुष्येषु सौधर्मादिषु वा गमिष्यति इति ॥

सर्वार्थसिद्धदेवत्वे, सर्वार्थसिद्धनाकिनाम् । न स्युर्भूतभविष्यन्ति, सन्ति पञ्चाष्ट च स्फुटम् ॥ ५३६ ॥
तेषामन्यगतित्वे चातीतानि स्युरनन्तशः । नैव सन्ति भविष्यन्ति, नृगतावष्ट पञ्च च ॥ ५३७ ॥
संज्ञिपञ्चेन्द्रियाणां यत्, स्मृत्यादिज्ञानसाधनम् । मनो नोइन्द्रियं तच्च, द्विविधं द्रव्यभावतः ॥ ५३८ ॥
तत्र च-मनःपर्याप्त्यभिधाननामकर्मोदयादिह । मनोयोग्यवर्गणानामादाय दलिकान्यलम् ॥ ५३९ ॥
मनस्त्वेनापादितानि, जन्तुना द्रव्यमानसम् ॥ जिनैरुचै तथा चाह, नन्द्यध्ययनचूर्णिकृत् ॥ ५४० ॥

"मणपज्जत्तिनामकम्मोदयतो जोग्गे मणोदव्वे घेत्तुं मणत्तेण परिणामिया दव्वा दव्वमणो भन्नइ" इति ॥

मनोद्रव्यावलम्बेन, मनःपरिणतिस्तु या । जन्तोर्भावमनस्तत्स्यात्तथोक्तं पूर्वसूरिभिः ॥ ५४१ ॥

"जीवो पुण मणपरिणामकिरियावंतो भावमणो, किं भणियं होइ । मणदव्वालंबणो जीवस्स मणणवावारो भावमणो भन्नइ ।" इति नन्द्यध्ययनचूर्णौ ॥

अत एव च –

द्रव्यचित्तं विना भावचित्तं न स्यादसंज्ञिवत् । विनापि भावचित्तं तु, द्रव्यतो जिनवद्भवेत् ॥ ५४२ ॥

तथोक्तं प्रज्ञापनावृत्तौ–"भावमनो विनापि च द्रव्यमनो भवति, यथा भवस्थकेवलिनः", इति ॥

---

१. शतके तूत्कृष्टबन्धान्तरदर्शनप्रसंगे विजयाइसु इति जलहिसयं इति च गाथावृत्तौ अधिका भवाः, तिरिनिरयेतिवृत्तौ बन्धश्चान्यगतीनां

स्तोका मनस्विनोऽसंख्यगुणाः श्रोत्रान्विितास्ततः । चक्षुर्घ्राणरसज्ञाढ्याः, स्युः क्रमेणाधिकाधिकाः ॥ ५४३ ॥
अनिन्द्रियाश्च निर्दिष्टा, एभ्योऽनन्तगुणाधिकाः । स्पर्शनेन्द्रियवन्तस्तु, तेभ्योऽनन्तगुणाधिकाः ॥ ५४४ ॥

लोकैश्च—चक्षुः श्रोत्रघ्राणरसनत्वङ्मनोवाक्पाणिपायूपस्थलक्षणान्येकादशेन्द्रियाणि सुश्रुतादौ उक्तानि ॥ नाममालायामपि बुद्धीन्द्रियं स्पर्शनादि, पाण्यादि तु क्रियेन्द्रियम्, इत्यभिहितम्, इतीन्द्रियाणि ॥ २२ ॥

संज्ञा येषां सन्ति ते स्युः, संज्ञिनोऽन्ये त्वसंज्ञिनः । संज्ञिनस्ते च पञ्चाक्षा, मनःपर्याप्तिशालिनः ॥ ५४५ ॥
ननु संमूर्च्छिमपञ्चाक्षान्तेष्वेकेन्द्रियादिषु । आहाराद्याः सन्ति संज्ञास्ततस्ते किं न संज्ञिनः ॥ ५४६ ॥
अत्रोच्यते—
ओघरूपा[1] दशाप्येतास्तीव्रमोहोदयेन च । अशोभना अव्यक्ताश्च, तन्नाभिः संज्ञिता मताः ॥ ५४७ ॥
निद्राव्याप्तोऽसुमान् कण्डूयनादि कुरुते यथा । मोहाच्छादितचैतन्यास्तथाऽऽहाराद्यमी अपि ॥ ५४८ ॥
ततश्च—संज्ञासम्बन्धमात्रेण, न संज्ञित्वमुरीकृतम् । न ह्येकेनैव निष्केण, धनवानुच्यते जनैः ॥ ५४९ ॥
अतादृगूपयुक्तोऽपि, रूपवान्नाभिधीयते । धनी किन्तु बहुद्रव्यैः, रूपवान् रम्यरूपतः ॥ ५५० ॥
महत्या व्यक्तया कर्मक्षयोपशमजातया । संज्ञया शस्तयैवाङ्गी, लभते संज्ञितां तथा ॥ ५५१ ॥
इदमर्थतो विशेषावश्यके ॥
ततश्च—येषामाहारादिसंज्ञा[2], व्यक्तचैतन्यलक्षणाः । कर्मक्षयोपशमजाः, संज्ञिनस्तेऽपरेऽन्यथा ॥ ५५२ ॥
दीर्घकालिक्यादिका वा, संज्ञा येषां भवन्ति ते । संज्ञिनः स्युर्यथायोगमसंज्ञिनस्तदुज्झिताः ॥ ५५३ ॥
इति संज्ञितादि ॥ २३ ॥
वेदस्त्रिधा स्यात्पुंवेदः, स्त्रीवेदश्च तथा परः । क्लीबवेदश्च तेषां स्युर्लक्षणानि यथाक्रमम् ॥ ५५४ ॥
पुंसां यतो योषिदिच्छा, स पुंवेदोऽभिधीयते । पुरुषेच्छा यतः स्त्रीणां, स स्त्रीवेद इति स्मृतः ॥ ५५५ ॥
यतो द्वयाभिलाषः स्यात्, क्लीबवेदः स उच्यते । तृणपुंफुमकद्रङ्गज्वलनोपमिता इमे ॥ ५५६ ॥
पुरुषादिलक्षणानि चैवं प्रज्ञापनावृत्तौ स्थानाङ्गवृत्तौ च ।
योनिमृदुत्वमस्थैर्यं मुग्धता क्लीबता स्तनौ । पुंस्कामितेति लिङ्गानि, सप्त स्त्रीत्वे प्रचक्षते ॥ ५५७ ॥
मेहनं खरता दार्ढ्यं शौण्डीर्यं श्मश्रु धृष्टता । स्त्रीकामितेति लिङ्गानि, सप्त पुंस्त्वे प्रचक्षते ॥ ५५८ ॥
स्तनादिश्मश्रुकेशादिभावाभावसमन्वितम् । नपुंसकं बुधाः प्राहुर्मोहानलसुदीपितम् ॥ ५५९ ॥
अभिलाषात्मकं देहाकारात्मकमथापरम् । नेपथ्यात्मकमेकैकमिति लिङ्गं त्रिधा विदुः ॥ ५६० ॥
पुमांसोऽल्पाः स्त्रियः संख्यगुणाः क्रमादनन्तकाः । अवेदाः क्लीबवेदाश्च, सवेदा अधिकास्ततः ॥ ५६१ ॥

---

१. सामान्यरूपाः । २. संप्रधारणसंज्ञापेक्षयैव ।

पुंस्त्वसंज्ञित्वयोः कायस्थितिरान्तर्मुहूर्त्तिकी । लघ्वी गुर्वी चाब्धिशतपृथक्त्वं किञ्चनाधिकम् ॥
स्त्रीत्वकायस्थितिः प्रज्ञापनायां समयो लघुः । उक्ताऽथास्यां गरीयस्यामादेशाः पञ्च दर्शिताः ॥
चतुर्दशाष्टादश वा, शतं वाथ दशोत्तरम् । पूर्णं शतं वा पल्यानि, पल्यानां वा पृथक्त्वकम् ॥
पूर्वकोटिपृथक्त्वाढ्याः, पञ्चाप्येते विकल्पकाः । पञ्चसंग्रहवृत्त्यादेर्ज्ञेयैस्तेषां च विस्तृतिः ॥
आद्ये द्वितीये स्वर्गे द्विः, पूर्वकोट्यायुषः स्त्रियाः । सभर्तृकान्यदेवीत्वेनोत्पत्त्यैषां च भावना ॥
इति वेदः ॥ २४ ॥

जिनोक्तादविपर्यस्ता, सम्यग्दृष्टिर्निगद्यते । सम्यक्त्वशालिनां सा स्यात्तच्चैवं जायतेऽङ्गिनाम् ॥ ५६२ ॥
चतुर्गतिकसंसारे, पर्यटन्ति शरीरिणः । वशीकृता विपाकेन, गुरुस्थितिककर्मणाम् ॥ ५६३ ॥
अथैतेषु कश्चिदङ्गी, कर्माणि निखिलान्यपि ॥ कुर्याद्यथाप्रवृत्ताख्यकरणेन स्वभावतः ॥ ५६४ ॥
[1]पल्यासंख्यलवोनैक–कोट्याब्धिस्थितिकानि वै । परिणामविशेषोऽत्र, करणं प्राणिनां मतम् ॥ ५६५ ॥
तत्त्रिधा तत्र चाद्यं स्याद्यथाप्रवृत्तनामकम् । अपूर्वकरणं नामाऽनिवृत्तिकरणं तथा ॥ ५६६ ॥
वक्ष्यमाणग्रन्थिदेशावधि प्रथममीरितम् । द्वितीयं भिद्यमानेऽस्मिन्, भिन्ने ग्रन्थौ तृतीयकम् ॥ ५६७ ॥
त्रीण्यप्यमूनि भव्यानां, करणानि यथोचितम् । सम्भवन्त्येकमेवाद्यमभव्यानां तु सम्भवेत् ॥ ५६८ ॥
आद्येन करणेनाङ्गी, करोति कर्मलाघवम् । धान्यपल्यगिरिसरिद्दृषदादिनिदर्शनैः ॥ ५६९ ॥
यथा धान्यं भूरिभूरि, कश्चिद्गृह्णाति पल्यतः । क्षिपत्यत्राल्पमल्पं च, कालेन कियताऽप्यथ ॥ ५७० ॥
धान्यपल्यः सोऽल्पधान्यशेष एवावतिष्ठते । एवं बहूनि कर्माणि, जरयन्नसुमानपि ॥ ५७१ ॥
बध्नंश्चाल्पानि तानि, कालेन कियताऽपि हि । स्यादल्पकर्माऽनाभोगात्मकाद्यकरणेन सः ॥ ५७२ ॥
यथाप्रवृत्तकरणं, नन्वनाभोगरूपकं । भवत्यनाभोगतश्च, कथं कर्मक्षयोऽङ्गिनाम् ॥ ५७३ ॥
अत्रोच्यते –
यथा मिथो घर्षणेन, ग्रावाणोऽद्रिनदीगताः । स्युश्चित्राकृतयो ज्ञानशून्या अपि स्वभावतः ॥ ५७४ ॥
तथा यथाप्रवृत्तात्स्युरप्यनाभोगलक्षणात् । लघुस्थितिककर्माणो, जन्तवोऽत्रान्तरेऽथ च ॥ ५७५ ॥
रागद्वेषपरिणामरूपोऽस्ति ग्रन्थिरुत्कटः । दुर्भेदो दृढकाष्टादिग्रन्थिवद्गाढचिक्कणः ॥ ५७६ ॥
मिथ्यात्वं नोकषायाश्च, कषायाश्चेति कीर्त्तितः । जिनैश्चतुर्दशविधोऽभ्यन्तरग्रन्थिरागमे ॥ ५७७ ॥
प्रागुक्तरूपस्थितिककर्माणः केऽपि देहिनः । यथाप्रवृत्तकरणाद्ग्रन्थेरभ्यर्णमियर्ति ॥ ५७८ ॥
एतावच्च प्राप्तपूर्वा, अभव्या अप्यनन्तशः । नत्वीशन्ते ग्रन्थिमेनमेते भेत्तुं कदापि हि ॥ ५७९ ॥
श्रुतसामायिकस्य स्याल्लाभः केषाञ्चिदत्र च । शेषाणां सामायिकानां, लाभस्तेषां न सम्भवेत् ॥ ५८० ॥

---

१. पल्यासंख्यलवोनैक कोटाकोट्यब्धि कानि वै–इति पाठः साधुः ।

तथोक्तम्–तित्थंकराइपूअं, दट्टुणऽण्णेण वावि कज्जेण । सुअसामाइयलाभो, होई अभव्वस्स गंठिंमि ॥

अर्हदादिविभूतिं अतिशयवतीं दृष्ट्वा धर्मादेवंविधः सत्कारः देवत्वराज्यादयः वा प्राप्यन्ते इत्येवमुत्पन्नबुद्धेरभव्यस्यापि ग्रन्थिस्थानं प्राप्तस्य तद्विभूतिनिमित्तमिति शेषः । देवत्वनरेन्द्रत्वसौभाग्यबलादिलक्षणेन अन्येन वा प्रयोजनेन सर्वथा निर्वाणश्रद्धानरहितस्याभव्यस्यापि कष्टानुष्ठानं किञ्चित् अङ्गीकुर्वतरज्ञानरूपस्य श्रुतसामायिकमात्रस्य लाभो भवेत् । तस्यापि एकादशाङ्गपाठानुज्ञानात् [इति विशेषावश्यकसूत्रवृत्तौ श्लो. १२२४]

भव्या अपि वलन्तेऽत्रागत्य रागादिभिर्जिताः । केचित्कर्माणि बध्नन्ति, प्राग्वद्दीर्घस्थितीनि ते ॥ ५८१ ॥
केचित्तत्रैव तिष्ठन्ति, तत्परीणामशालिनः । न स्थितीः कर्मणामेते, वर्धयन्त्यल्पयन्ति वा ॥ ५८२ ॥
चतुर्गतिभवा भव्याः, संज्ञिपर्याप्तपञ्चखाः । अपार्द्धपुद्गलपरावर्त्तान्तर्भाविमुक्तयः ॥ ५८३ ॥
तीव्रधारपर्शुकल्पाऽपूर्वाख्यकरणेन हि । आविष्कृत्य परं वीर्यं, ग्रन्थिं भिन्दन्ति केचन ॥ ५८४ ॥
यथा जनास्त्रयः केऽपि, महापुरं यियासवः । प्राप्ताः क्वचन कान्तारे, स्थानं चौरभयङ्करम् ॥ ५८५ ॥
तत्र द्रुतं द्रुतं यान्तो, ददृशुस्तस्करद्वयम् । तद्दृष्ट्वा त्वरितं पश्चादेको भीतः पलायितः ॥ ५८६ ॥
गृहीतश्चापरस्ताभ्यामन्त्यस्त्ववगणय्य तौ । भयस्थानमतिक्रम्य, पुरं प्राप पराक्रमी ॥ ५८७ ॥
दृष्टान्तोपनयश्चात्र, जना जीवा भवोऽटवी । पन्थाः कर्मस्थितिर्ग्रन्थिदेशस्त्विह भयास्पदम् ॥ ५८८ ॥
रागद्वेषौ तस्करौ द्वौ, तद्भीतो वलितस्तु सः । ग्रन्थिं प्राप्यापि दुर्भावाद्यो ज्येष्ठस्थितिबन्धकः ॥ ५८९ ॥
चौररुद्धस्तु स ज्ञेयस्तादृग्रागादिबाधितः । ग्रन्थिं भिनत्ति यो नैव, न चापि वलते ततः ॥ ५९० ॥
स त्वभीष्टपुरं प्राप्तो, योऽपूर्वकरणाद्द्रुतम् । रागद्वेषावपाकृत्य, सम्यग्दृर्शनमाप्तवान् ॥ ५९१ ॥
सम्यक्त्वमौपशमिकं, ग्रन्थिं भित्वाऽश्नुतेऽसुमान् । महानन्दं भट इव, जितदुर्जयशात्रवः ॥ ५९२ ॥
तच्चैवम्—अथानिवृत्तिकरणेनातिस्वच्छाशयात्मना । करोत्यन्तकरणमन्तर्मुहूर्त्तसम्मितम् ॥ ५९३ ॥
कृते च तस्मिन्मिथ्यात्वमोहस्थितिर्द्विधाभवेत् । तत्राद्यान्तरकरणादधस्तन्यपरोर्ध्वगा ॥ ५९४ ॥
तत्राद्यायां स्थितौ मिथ्यादृक् स तद्दलवेदनात् । अतीतायामथैतस्यां, स्थितावन्तर्मुहूर्त्ततः ॥ ५९५ ॥
प्राप्नोत्यन्तरकरणं, तस्याद्यक्षण एव सः । सम्यक्त्वमौपशमिकमपौद्गलिकमाप्नुयात् ॥ ५९६ ॥
यथा वनदवो दग्धेन्धनः प्राप्यातृणं स्थलम् । स्वयं विध्यायति तथा, मिथ्यात्वोग्रदवानलः ॥ ५९७ ॥
अवाप्यान्तरकरणं क्षिप्रं विध्यायति स्वयम् । तदौपशमिकं नाम, सम्यक्त्वं लभतेऽसुमान् ॥ ५९८ ॥
अत्रायमौपशमिकसम्यक्त्वेन सहाप्नुयात् । देशतो विरतिं सर्वविरतिं वाऽपि कश्चन ॥ ५९९ ॥

तथोक्तं शतकचुर्णौ—उवसमसम्मदिट्ठी अन्तरकरणे ठिओ कोई देसविरइंपि लभेइ, कोई पमत्तापमत्तभावंपि । सासायणो पुण न किंपि लभेइत्ति ॥

कर्मप्रकृतिवृत्तावपि इत्यर्थतः ॥ किञ्च–

बध्नते त्यक्तसम्यक्त्वैरुत्कृष्टा कर्मणां स्थितिः । भिन्नग्रन्थिभिरप्युग्रो, नानुभागस्तु तादृशः ॥ ६०० ॥

इत्येतत्कार्मग्रन्थिकमतम् ॥

भवेद्भिन्नग्रन्थिकस्य, मिथ्यादृष्टेरपि स्फुटम् । सैद्धान्तिकमते ज्येष्ठः, स्थितिबन्धो न कर्मणाम् ॥ ६०१ ॥

अथ प्रकृतम्—

इदं चोपशमश्रेण्यामपि दर्शनसप्तके । उपशान्ते भवेच्छ्रेणिपर्यन्तावधि देहिनाम् ॥ ६०२ ॥

तथा–यथौषधविशेषेण, जनैर्मदनकोद्रवाः । त्रिधा क्रियन्ते शुद्धार्धविशुद्धाशुद्धभेदतः ॥ ६०३ ॥

तथाऽनेनौपशमिकसम्यक्त्वेन पटीयसा । विशोध्य क्रियते त्रेधा, मिथ्यात्वमोहनीयकम् ॥ ६०४ ॥

तत्राशुद्धस्य पुञ्जस्योदये मिथ्यात्ववान् भवेत् । पुञ्जस्यार्धविशुद्धस्योदये भवति मिश्रदृग् ॥ ६०५ ॥

उदये शुद्धपुञ्जस्य, क्षायोपशमिकं भवेत् । मिथ्यात्वस्योदितस्यान्तादन्यस्योपशमाच्च तत् ॥ ६०६ ॥

आरब्धक्षपकश्रेणेः, प्रक्षीणे सप्तके भवेत् । क्षायिकं तद्भवसिद्धेस्त्रिचतुर्जन्मनोऽथवा ॥ ६०७ ॥

तत्त्वार्थभाष्ये चैतेषां स्वरूपमेवमुक्तम्—क्षयादि त्रिविधं सम्यग्दर्शनम्, तदावरणीयस्य कर्मणो दर्शनमोहस्य च क्षयादिभ्य इति ॥ अस्य वृत्तिः—"मत्याद्यावरणीयदर्शनमोहसप्तकक्षयात् उपजातं क्षयसम्यग्दर्शनमभिधीयते । तेषामेवोपशमाज्जातं उपशमसम्यग्दर्शनमुच्यते । तेषामेव क्षयोपशमाभ्यां जातं क्षयोपशमसम्यग्दर्शनमभिदधति प्रवचनाभिज्ञाः" । इति तत्त्वार्थप्रथमाध्याये ॥ [सूत्र. ७]

ननु च–तत्त्वश्रद्धानजनकं, क्षायोपशमिकं यदि । सम्यक्त्वस्य क्षायिकस्य, कथमावारकं तदा ? ॥ ६०८ ॥

यदि मिथ्यात्वजातीयतया तदपवारकम् । तदात्मधर्मश्रद्धानं, कथमस्मात् प्रवर्त्तते ? ॥ ६०९ ॥

अत्रोच्यते—

यथा श्लक्ष्णाभ्रकान्तःस्था, दीपादेर्द्योतते द्युतिः । तस्मिन् दूरीकृते सर्वात्मना [1]संजृम्भतेऽधिकम् ॥ ६१० ॥

यथा वा मलिनं वस्त्रं, भवत्यावारकं मणेः । निर्ण्णिज्योज्ज्वलिते तस्मिन्, भाति काचन तत्प्रभा ॥ ६११ ॥

मूलाद्दूरीकृते चास्मिन्, सा स्फुटा स्यात्स्वरूपतः । मिथ्यात्वपुद्गलेष्वेवं, रसापवर्त्तनादिभिः ॥ ६१२ ॥

क्षायोपशमिकत्वं द्राक्, प्राप्तेषु प्रकटीभवेत् । आत्मधर्मात्मकं तत्त्वश्रद्धानं किञ्चिदस्फुटम् ॥ ६१३ ॥

क्षायोपशमिके क्षीणे, स्फुटं सर्वात्मना भवेत् । आत्मस्वरूपं सम्यक्त्वं, तच्च क्षायिकमुच्यते ॥ ६१४ ॥

एवं च–तत्त्वश्रद्धानजनकसम्यक्त्वपुद्गलक्षये । कथं श्रद्धा भवेत्तत्त्वे, शङ्केषाऽपि निराकृता ॥ ६१५ ॥

तथाहुर्भाष्यकारः–सो तस्स विसुद्धयरो, जायइ सम्मत्तपोग्गलक्खयओ । दिट्ठिव्वसण्ह[2] सुद्धस्स पडलविगमे मणूसस्स ॥ [विशेषावश्यक श्लो. १३२७] इदं कर्मग्रन्थमतम् ॥ सिद्धान्तस्य मते पुनः अपूर्वकरणेनैव मिथ्यात्वं कुरुते त्रिधा ॥

---

१. सा जृम्भते इति पाठान्तर २. सुद्धब्भ

सम्यक्त्वावारकरसं, क्षपयित्वा विशोधिताः । मिथ्यात्वपुद्गलास्ते स्युः, सम्यक्त्वमुपचारतः ॥ ६१६ ॥
अर्धशुद्धा अशुद्धाश्च, मिश्रमिथ्यात्वसंज्ञकाः । एवं कोद्रवदृष्टान्तात्, त्रिषु पुञ्जेषु सत्स्वपि ॥ ६१७ ॥
यदाऽनिवृत्तिकरणात्, सम्यक्त्वमेव गच्छति । मिश्रमिथ्यात्वपुञ्जौ तु, तदा जीवो न गच्छति ॥ ६१८ ॥
पुनः पतितसम्यक्त्वो, यदा सम्यक्त्वमश्नुते । तदाप्यपूर्वकरणेनैव पुञ्जत्रयं सृजन् ॥ ६१९ ॥
करणेनानिवृत्ताख्येनैव प्राप्नोति पूर्ववत् । नन्वत्रापूर्वकरणे, प्राग्लब्धेऽन्वर्थता कथम् ॥ ६२० ॥
अत्रोच्यते—अपूर्ववदपूर्वं स्यात्, स्तोकवारोपलम्भतः । अपूर्वत्वव्यपदेशो, भवेल्लोकेऽपि दुर्लभे ॥ ६२१ ॥
इदमर्थतो विशेषावश्यकवृत्तौ ॥
सम्यग्दृष्टिव्यपदेशनिबन्धनमितीरीतम् । सम्यक्त्वं त्रिविधं शुद्धश्रद्धारूपं मनीषिभिः ॥ ६२२ ॥
यदि वैकद्वित्रिचतुःपञ्चभेदं भवेदिदम् । जिनोक्ततत्त्वश्रद्धानरूपमेकविधं भवेत् ॥ ६२३ ॥
द्विधा नैसर्गिकं चौपदेशिकं चेति भेदतः । भवेन्नैश्चयिकं व्यावहारिकं चेति वा द्विधा ॥ ६२४ ॥
द्रव्यतो भावतश्चेति, द्विधा वा परिकीर्तितम् । तत्र नैसर्गिकं स्वाभाविकमन्यद्गुरोर्गिरा ॥ ६२५ ॥
यथा पथश्च्युतः कश्चिदुपदेशं विना भ्रमन् । मार्गं प्राप्नोति कश्चित्तु, मार्गविज्ञोपदेशतः ॥ ६२६ ॥
यथा वा कोद्रवाः केचित्स्युः कालपरिपाकतः । स्वयं निर्मदनाः केचित् गोमयादिप्रयत्नतः ॥ ६२७ ॥
कश्चिज्ज्वरो यथा दोषपरिपाकाद् व्रजेत् स्वयम् । कश्चित्पुनर्भेषजादिप्रयत्नेनोपशाम्यति ॥ ६२८ ॥
स्वभावादथवोपायाद्यथा शुद्धं भवेत्पयः । यथोज्ज्वलं स्याद्वस्त्रं वा, स्वभावाद्यत्नतोऽपि वा ॥ ६२९ ॥
सम्यक्त्वमेवं केषाञ्चिदङ्गिनां स्यान्निसर्गतः । गुरुणामुपदेशेन, केषाञ्चित्तु भवेदिदम् ॥ ६३० ॥
नैश्चयिकं सम्यक्त्वं ज्ञानादिमयात्मशुद्धपरिणामः ॥ स्याद्व्यावहारिकं तद्धेतुसमुत्थं च सम्यक्त्वम् ॥ ६३१ ॥
जिनवचनं तत्त्वमिति, श्रद्दधतोऽकलयतश्च परमार्थम् ॥ तद्द्रव्यतो भवेद्भावतस्तु परमार्थविज्ञस्य ॥ ६३२ ॥
क्षायोपशमिकमुत पौद्गलिकतया द्रव्यतस्तदुपदिष्टम् । आत्मपरिणामरूपे च भावतः क्षायिकोपशमिके ते ॥ ६३३ ॥
कास्क्रोचकदीपकभेदादेतत् त्रिधाऽथवा त्रिविधम् ॥ ख्यातं क्षायोपशमिकमुपशमजं क्षायिकं चेति ॥ ६३४ ॥
जिनप्रणीताचारस्य, करणे कारकं भवेत् । रुचिमात्रकरं तस्य, रोचकं परिकीर्त्तितम् ॥ ६३५ ॥
स्वयं मिथ्यादृष्टिरपि, परस्य देशनादिभिः । यः सम्यक्त्वं दीपयति, सम्यक्त्वं तस्य दीपकम् ॥ ६३६ ॥
क्षायोपशमिकादीनां, स्वरूपं तूदितं पुरा । सास्वादनयुते तस्मिंस्त्रये तत्स्याच्चतुर्विधम् ॥ ६३७ ॥
वेदकेनान्विते तस्मिंश्चतुष्के पञ्चधाऽपि तत् । सास्वादनं च स्यादौपशमिकं वमतोऽङ्गिनः ॥ ६३८ ॥
त्रयाणामुक्तपुञ्जानां, मध्ये प्रक्षीणयोर्द्वयोः । शुद्धस्य पुञ्जस्यान्त्याणुवेदने वेदकं भवेत् ॥ ६३९ ॥
षट्षष्टिः साधिकाऽब्धीनां, क्षायोपशमिकस्थितिः । उत्कृष्टा सा जघन्या चान्तर्मुहूर्त्तमिता मता ॥ ६४० ॥
ज्येष्ठाऽन्या चौपशमिकस्थितिरान्तर्मुहूर्त्तिकी । क्षायिकस्य स्थितिः सादिरनन्ता वस्तुतः स्मृता ॥ ६४१ ॥

साधिका: स्युर्भवस्थत्वे, सा त्रयस्त्रिंशदब्धय: । उत्कर्षतो जघन्या च, सा स्यादान्तर्मुहूर्तिकी ॥ ६४२ ॥
सास्वादनस्यावल्य: षट्, ज्येष्ठा लघ्वी क्षणात्मिका । एक: क्षणो वेदकस्योत्कर्षाज्जघन्यतोऽपि च ॥ ६४३ ॥
उत्कर्षादौपशमिकं, सास्वादनं च पञ्चश: । वेदकं क्षायिकं चैकवारं जीवस्य सम्भवेत् ॥ ६४४ ॥
वारान् भवत्यसंख्येयान्, क्षायोपशमिकं पुन: । अथैतेषां गुणस्थाननियम: प्रतिपाद्यते ॥ ६४५ ॥
साखादनं स्यात्सम्यक्त्वं, गुणस्थाने द्वितीयके । तुर्यादिषु चतुर्थेषु, क्षायोपशमिकं भवेत् ॥ ६४६ ॥
अष्टासु तुर्यादिष्वौपशमिकं परिकीर्त्तितम् । तुर्यादिष्वेकादशसु, सम्यक्त्वं क्षायिकं भवेत् ॥ ६४७ ॥
तुर्यादिषु चतुर्ष्वेषु, वेदकं कीर्त्तितं जिनै: । गुणस्थानप्रकरणाद्विशेष: शेष उह्यताम् ॥ ६४८ ॥
सम्यक्त्वं लभते जीवो, यावत्यां कर्मणां स्थितौ । क्षपितायां तत: पल्यपृथक्त्वप्रमितस्थितौ ॥ ६४९ ॥
लभेत देशविरतिं, क्षपितेषु ततोऽपि च । संख्येषु सागरेषु, चारित्रं लभतेऽसुमान् ॥ ६५० ॥
एवं चोपशमश्रेणिं, क्षपकश्रेणिमप्यथ । क्रमात्संख्येयपाथोधिस्थितिह्रासादवाप्नुयात् ॥ ६५१ ॥
एतानभ्रष्टसम्यक्त्वोऽन्यान्यदेवनृजन्मसु । लभेतान्यतरश्रेणिवर्जान् कोऽप्येकजन्मनि ॥ ६५२ ॥

श्रेणिद्वयं चैकभवे सिद्धान्ताभिप्रायेण न स्यादेव ॥ आहुश्च सम्मत्तंमि उ लद्धे, पलिअपुहुत्तेण सावओ हुज्जा । चरणोवसमखयाणं, सागरसंखंतरा हुंति ॥ एवं अप्परिवडिए, सम्मत्ते देवमणुअजम्मेसु । अन्नयरसेढिवज्जं, एगभवेणं च सव्वाइं ॥ इति महाभाष्यसूत्रवृत्त्यादिषु ॥ [विशेषावश्यक श्लो. १२२७, १२२८]

सम्यक्त्वं च श्रुतं चेति, देशत: सर्वतोऽपि च । विरती इति निर्दिष्टं, सामायिकचतुष्टयम् ॥ ६५३ ॥
चारित्रस्याष्ट समयान्, प्रतिपत्तिर्निरन्तरम् । शेषत्रयस्य चावल्यसंख्येयांशमितान् क्षणान् ॥ ६५४ ॥
उत्कर्षेण प्रतिपत्तिकाल एष निरन्तर: । जघन्यतो द्वौ समयौ, चतुर्णामपि कीर्त्तित: ॥ ६५५ ॥
द्वादशपञ्चदशाहोरात्रास्तृतीयतुर्ययो: । आद्ययो: सप्त विरहो, ज्येष्ठोऽन्यश्च क्षणत्रयम् ॥ ६५६ ॥
सम्यक्त्वं देशविरतिं, चाप्नोत्युत्कर्षतोऽसुमान् । क्षेत्रपल्योपमासंख्यभागक्षणमितान् भवान् ॥ ६५७ ॥
चारित्रं च भवानष्टौ, श्रुतसामायिकं पुन: । भवाननन्तान् सर्वाणि, भवमेकं जघन्यत: ॥ ६५८ ॥
आकर्षाणां खलु शतपृथक्त्वं सर्वसंवरे । स्यात्सहस्रपृथक्त्वं च, त्रयाणामेकजन्मनि ॥ ६५९ ॥
नानाभवेषु चाकर्षा, असंख्येया: सहस्रका: । आद्यत्रये तुरीये च, स्यात्सहस्रपृथक्त्वकम् ॥ ६६० ॥
यत् त्रयाणां प्रतिभवं, स्यु: सहस्रपृथक्त्वकम् । असंख्येया भवाश्चेति, युक्तास्तेऽमी यथोदिता: ॥ ६६१ ॥
चारित्रे यत्प्रतिभवं, तेषां शतपृथक्त्वकम् । भवाश्चाष्टौ ततो युक्तं, तत्सहस्रपृथक्त्वकम् ॥ ६६२ ॥

आकर्ष: प्रथमतया ग्रहणं मुक्तस्य वा ग्रहणम् इति । इदमर्थत: आवश्यकसूत्रवृत्त्यादिषु ॥

मिथ्यादृष्टिर्विपर्यस्ता, जिनोक्ताद्धस्तुतत्त्वत: । सा स्यान्मिथ्यात्विनां तच्च, मिथ्यात्वं पञ्चधा मतम् ॥ ६६३ ॥

आभिग्रहिकमाद्यं स्यादनाभिग्रहिकं परम् । तृतीयं किल मिथ्यात्वमुक्तमाभिनिवेशिकम् ॥ ६६४ ॥
तुर्यं सांशयिकाख्यं स्यादनाभोगिकमन्तिमम् । अभिग्रहेण निर्वृत्तं, तत्राभिग्रहिकं स्मृतम् ॥ ६६५ ॥
नानाकुदर्शनेष्वेकमस्मात्प्राणी कुदर्शनम् । इदमेव शुभं नान्यदित्येवं प्रतिपद्यते ॥ ६६६ ॥
मन्यतेऽङ्गी दर्शनानि, यद्वशादखिलान्यपि । शुभानि माध्यस्थ्यहेतुरनाभिग्रहिकं हि तत् ॥ ६६७ ॥
यतो गोष्ठामाहिलादिवदात्मीयकुदर्शने । भवत्यभिनिवेशस्तं, प्रोक्तमाभिनिवेशिकम् ॥ ६६८ ॥
यतो जिनप्रणीतेषु, देशतः सर्वतोऽपि वा । पदार्थेषु संशयः स्यात्तत्सांशयिकमीरितम् ॥ ६६९ ॥
अनाभोगेन निर्वृत्तमनाभोगिकसंज्ञिकम् । यत्स्यादेकेन्द्रियादीनां, मिथ्यात्वं पञ्चमं तु तत् ॥ ६७० ॥
यस्यां जिनोक्ततत्त्वेषु, न रागो नापि मत्सरः । सम्यग्मिथ्यात्वसंज्ञा सा, मिश्रदृष्टिः प्रकीर्त्तिता ॥ ६७१ ॥
धान्येष्विव नरा नालिकेरद्वीपनिवासिनः । जिनोक्तेषु मिश्रदृशो, न द्विष्टा नापि रागिणः ॥ ६७२ ॥

यदाहुः कर्मग्रन्थकाराः— जिंअअजिअपुण्णपावासवसंवरबंधमुक्खनिज्जरणा । जेणं सद्दहइतयं सम्मं खइगाइबहुभेयं ॥ मीसा न रागदोसो, जिणधम्मे अंतमुहु जहा अन्ने । नालीअरदीवमणुणो, मिच्छं जिणधम्मविवरीयं ॥ [कर्मग्रंथ १. गाथा १५-१६]

गुणस्थानक्रमारोहे त्वेवमुक्तम्— जात्यन्तरसमुद्भूतिर्वडवाखरयोर्यथा । गुडदध्नोः समायोगे, रसभेदान्तरं यथा ॥ तथा धर्मद्वये श्रद्धा, जायते समबुद्धितः । मिश्रोऽसौ जायते तस्माद्भावो जात्यन्तरात्मकः ॥ [श्लोक १५-१६]

सम्यग्मिथ्यादृशः स्तोकास्तेभ्योऽनन्तगुणाधिकाः । सम्यग्दृशस्ततो मिथ्यादृशोऽनन्तगुणाधिकाः ॥ ६७३ ॥

इति दृष्टिः ॥ २५ ॥

मतिश्रुतावधिमनःपर्यायाण्यथ केवलम् । ज्ञानानि पञ्च तत्राद्यमष्टाविंशतिधा स्मृतम् ॥ ६७४ ॥

तथाहि—

[1]अवग्रहेहापायाख्या, धारणा चेति तीर्थपैः । मतिज्ञानस्य चत्वारो, मूलभेदाः प्रकीर्त्तिताः ॥ ६७५ ॥
शब्दादीनां पदार्थानां, प्रथमग्रहणं हि यत् । अवग्रहः स्यात्स द्वेधा, व्यञ्जनार्थविभेदतः ॥ ६७६ ॥
व्यज्यन्ते येन सद्भावा, दीपेनेव घटादयः । व्यञ्जनं ज्ञानजनकं, तच्चोपकरणेन्द्रियम् ॥ ६७७ ॥
शब्दादिभावमापन्नो, द्रव्यसंघात एव वा । व्यज्यते यद् व्यञ्जनं तदितिव्युत्पत्त्यपेक्षया ॥ ६७८ ॥
ततश्च-व्यञ्जनैर्व्यञ्जनानां यः, सम्बन्धः प्रथमः स हि । व्यञ्जनावग्रहोऽस्पष्टतरावबोधलक्षणः ॥ ६७९ ॥

अस्य च स्वरूपमेवं तत्वार्थवृत्तौ—

यदोपकरणेन्द्रियस्य स्पर्शनादिपुद्गलैः स्पर्शाद्याकारपरिणतैः संबन्ध उपजातो भवति न च किमप्येतदिति गृह्णाति, किंत्वव्यक्तज्ञानोऽसौ सुप्तमत्तादिसूक्ष्मावबोधसहितपुरुषवदिति । तदा तैः स्पर्शाद्युपकरणेन्द्रियसंश्लिष्टैर्या च यावती च विज्ञानशक्तिराविरस्ति सा एवंविधा ज्ञानशक्तिः

अवग्रहाख्या तस्य स्पर्शनाद्युपकरणेन्द्रियसंश्लिष्टस्पर्शाद्याकारपरिणतपुद्गलराशेः व्यंजनाख्यस्य ग्राहिकाऽवग्रह इति भण्यते, तेनैतदुक्तं भवति – स्पर्शनाद्युपकरणेन्द्रियसंश्लिष्टाः स्पर्शाद्याकारपरिणताः पुद्गला भण्यन्ते व्यञ्जनम् । विशिष्टार्थावग्रहकारित्वात्तस्य व्यञ्जनस्य परिच्छेदकोऽव्यक्तोऽवग्रहो भण्यते, अपरोऽपि तस्मान्मनाग् निश्चिततरः किमप्येतदित्येवंविध-सामान्यपरिच्छेदोऽवग्रहो भण्यते । ततः परमीहादयः प्रवर्तन्ते इति ॥

रत्नाकरावतारिकायां त्ववग्रहलक्षणमेवमुक्तम्—

विषय विषयि सन्निपातानन्तरसमुद्भूतसत्तामात्रगोचरदर्शनात् जातम् आद्यम् अवान्तर-सामान्याकारविशिष्टवस्तुग्रहणमवग्रह इति ॥ विषयः - सामान्यविशेषात्मकोऽर्थो विषयी चक्षुरादिः तयोः समीचीनः भ्रान्त्याद्यजनकत्वेनानुकूलो निपातः योग्यदेशाद्यवस्थानम् तस्मादनन्तरं समुद्भूतम्-उत्पन्नं यत्सत्तामात्रगोचरं निःशेषविशेषवैमुख्येन सन्मात्रविषयदर्शनं निराकारो बोधः तस्माज्जातम् आद्यम् सत्त्वसामान्यादवान्तरैः सामान्याकारैर्मनुष्यत्वादिभिर्जातिविशेषैर्विशिष्टस्य वस्तुनो यद्ग्रहणम् ज्ञानम् तदवग्रह इति नाम्नाभिधीयते इति ॥

अत्र च प्राच्यमते दर्शनस्यावकाशं[१] न पश्यामो, द्वितीयमते च व्यंजनावग्रहावकाशं[२] न पश्यामः तदत्र तत्वं बहुश्रुतेभ्योऽवसेयम् ॥ वक्ष्यमाणो वा महाभाष्याभिमतो व्यञ्जनावग्रहादीनां दर्शनस्य चाभेदरनुकरणीयरित्यलं प्रसंगेन ।

आवल्यसंख्येयभागो, व्यञ्जनावग्रहे भवेत् । कालमानं लघु ज्येष्ठमानं प्राणपृथक्त्वकम् ॥ ६८० ॥
स चतुर्धा श्रोत्रजिह्वाघ्राणस्पर्शनसम्भवः । अप्राप्यकारिभावात्स्यान्न चक्षुर्मनसोरसौ ॥ ६८१ ॥
शब्दादेर्यः परिच्छेदो, मनाक्स्पष्टतरो भवेत् । किञ्चिदित्यात्मकः सोऽयमर्थावग्रह उच्यते ॥ ६८२ ॥
कालतोऽर्थावग्रहस्तु, स्यादेकसमयात्मकः । निश्चयाद्धव्यवहारात्तु, स स्यादान्तर्मुहूर्त्तिकः ॥ ६८३ ॥
तस्यैवावगृहीतस्य, धर्मान्वेषणरूपिका । ईहा भवेत्कालमानमस्या अन्तर्मुहूर्त्तकम् ॥ ६८४ ॥
अथेहितस्य तस्येदमिदमेवेति निश्चयः । अवायो मानमस्यापि, स्मृतमन्तर्मुहूर्त्तकम् ॥ ६८५ ॥
निर्णीतार्थस्य मनसा, धरणं धारणा स्मृता । कालः संख्य उतासंख्यस्तस्या मानमवस्थितेः ॥ ६८६ ॥
बाल्ये दृष्टं स्मरत्येव, पर्यन्तेऽसंख्यजीवितः । ततः स्याद्धारणामानमसंख्यकालसम्मितम्[३] ॥ ६८७ ॥
यथा[४] हि सृज्यते पूर्वं, श्रोत्रेण शब्दसंहतिः । ततश्च किञ्चिदश्रौषमित्यर्थावग्रहो भवेत् ॥ ६८८ ॥
ततः स्त्र्यादिशब्दनिष्ठं, माधुर्यादि विचिन्तयेत् । इयमीहा ततोऽवायो, निश्चयात्मा धृतिस्ततः ॥ ६८९ ॥
एवं गन्धरसस्पर्शेष्वपि भाव्या मनीषिभिः । घ्राणजिह्वास्पर्शनानां, व्यञ्जनावग्रहादयः ॥ ६८० ॥
व्यञ्जनावग्रहाभावाच्चक्षुर्मानसयोः पुनः । चत्वारोऽर्थावग्रहाद्या, धारणान्ता भवन्ति हि ॥ ६९१ ॥

---

१. न ह्यवर्णनमात्रादनवकाशो भवति, व्यञ्जनाख्यशक्तिग्रहादर्वागविशिष्टग्रहणे दर्शनता २. वैशिष्ट्यग्रहात्प्राक् व्यपदेशः ३. तद्भवापेक्षया निर्णीतिः । ४. पाठान्तर यथा हि भज्यते (लभ्यते) पूर्वं, श्रोत्रेभ्यः शब्दसंहति ।

यथा प्रथमतो वृक्षे, चक्षुगोचरमागते । किञ्चिदेतदिति ज्ञानं, स्यादर्थावग्रहो ह्ययम् ॥ ६९२ ॥
ततस्तद्गतधर्माणां, समीक्षेहा प्रजायते । निश्चयस्तरुरेवायमित्यवायस्ततो भवेत् ॥ ६९३ ॥
ततस्तथा निश्चितस्य, धरणं धारणा भवेत् । भाव्यते मनसोऽप्येवमथार्थावग्रहादयः ॥ ६९४ ॥
यथा हि विस्मृतं वस्तु, पूर्वं किञ्चिदिति स्मरेत् । ततश्च तद्गता धर्माः, स्मर्यन्ते लीनचेतसा ॥ ६९५ ॥
ततश्च तत्तद्धर्माणां, स्मरणात्तद्विनिश्चयः । ततः स्मृत्या निश्चितस्य, पुनस्तस्यैव धारणम् ॥ ६९६ ॥
अनिन्द्रियनिमित्तं च, मतिज्ञानमिदं भवेत् । अत एव त्रिधैतत्स्यादाद्यमिन्द्रियहेतुकम् ॥ ६९७ ॥
अनिन्द्रियसमुत्थं चेन्द्रियानिन्द्रियहेतुकम् । तत्राद्यमेकाक्षादीनां, मनोविरहिणां हि यत् ॥ ६९८ ॥
केवलं हीन्द्रियनिमित्तकमेव भवेदिदम् । अभावान्मनसो नास्ति, व्यापारोऽत्र मनागपि ॥ ६९९ ॥
अनिन्द्रियनिमित्तं च, स्मृतिज्ञानं निरुपितम् । व्यापाराभावतोऽक्षाणां, तदक्षनिरपेक्षकम् ॥ ७०० ॥
ओघज्ञानमविभक्तरूपं यदपि लक्ष्यते । वल्ल्यादीनां वृतिनीत्याद्यभिसर्पणलक्षणम् ॥ ७०१ ॥
तदप्यनिन्द्रियनिमित्तकमेव प्रकीर्त्यते । हेतुभावं भजन्तीह, नाक्षाणि न मनोऽपि यत् ॥ ७०२ ॥
मत्यज्ञानावरणीयक्षयोपशम एव हि । केवलं हेतुतामोघज्ञानेऽस्मिन्नश्नुते च यत् ॥ ७०३ ॥
यत्तु जाग्रदवस्थायामुपयुक्तस्य चेतसा । स्पर्शादिज्ञानमेतच्चेन्द्रियानिन्द्रियहेतुकम ॥ ७०४ ॥

इदमर्थतस्तत्वार्थवृत्तौ ॥ अथ प्रकृतम् ।

एवमर्थावग्रहेहा, अवायधारणा इह । स्युश्चतुर्विंशतिः षड्भिर्हेता इन्द्रियमानसैः ॥ ७०५ ॥
व्यञ्जनावग्रहैःपूर्वोदितैश्चतुर्भिरन्विताः । स्युस्तेऽष्टाविंशतिर्भेदा, मतिज्ञानस्य निश्चिताः ॥ ७०६ ॥

भगवतीवृत्तौ तु

षोढा श्रोत्रादिभेदेनावायश्च धारणा पि च । इत्येवं द्वादशविधं, मतिज्ञानमुदाहृतम् ॥ ७०७ ॥
द्वादशेहावग्रहयोश्चत्वारो व्यञ्जनस्य च । उक्ता भेदाः षोडशैते, दर्शने चक्षुरादिके ॥ ७०८ ॥

यदाह भाष्यकारः—"नाणम् अवायधिइओ, दंसणमिट्ठं जहोग्गहेहाओ" ॥ [विशेषावश्यक श्लो. ५३९]

नन्वष्टाविंशतिविधं, मतिज्ञानं यदागमे । जेगीयते तन्न कथमेवमुक्ते विरुध्यते ॥ ७०९ ॥
अत्रोच्यते – मतिज्ञानचक्षुरादिदर्शनानां मिथो भिदम् । अविवक्षित्वैव मतिमष्टाविंशतिधा विदुः ॥ ७१० ॥
किंच–एकैकश्च प्रकारोऽयं, द्वादशधा विभिद्यते । ज्ञानस्यास्य ततो भेदाः, स्युः षट्त्रिंशं शतत्रयम् ॥ ७११ ॥

तथोक्तं तत्त्वार्थभाष्ये— एवमेतन्मतिज्ञानं द्विविधं चतुर्विधं अष्टाविंशतिविधं अष्टषष्ट्युत्तरशतविधं षट्त्रिंशत्त्रिशतविधं च भवति इति । [अध्याय १. सूत्र. १९]

ते चैवम् – बहु बहुबहुविधाऽन्यक्षिप्राक्षिप्राख्यनिश्रिततदन्याः[1] । संदिग्धासंदिग्धध्रुवाध्रुवाख्या मतेर्भेदाः ॥ ७१२ ॥
तथाहि – आस्फालिते तूर्यवृन्दे, कश्चिद्यथैकहेलया । भेरीशब्दा इयन्तोऽत्रैतावन्तः शंखनिःस्वनाः ॥ ७१३ ॥
इत्थं पृथक्पृथक् गृह्णन्, बहुग्राही भवेदथ[2] । ओघतोऽन्यस्तूर्यशब्दं, गृह्णन्नबहुविद्भवेत् ॥ ७१४ ॥
माधुर्यादिविविधबहुधर्मयुक्तं वेत्ति यः स बहुविधवित् । अबहुविधवित्तु शब्दं, वेत्त्येकद्वयादिधर्मयुतम् ॥ ७१५ ॥
वेत्ति कश्चिदचिरेण, चिरेणान्यो विमृश्य च । क्षिप्राक्षिप्रग्राहिणौ तौ, निर्दिष्टव्यौ यथाक्रमम् ॥ ७१६ ॥
लिङ्गापेक्षं वेत्ति कश्चिद्, ध्वजेनेव सुरालयम् । स भवेन्निश्रितग्राही, परो लिङ्गानपेक्षया ॥ ७१७ ॥
निःसंशयं यस्तु वेत्ति, सोऽसंदिग्धविदाहितः । ससंशयं यस्तु वेत्ति, संदिग्धग्राहको हि सः ॥ ७१८ ॥
ज्ञाते य एकदा भूयो, नोपदेशमपेक्षते । ध्रुवग्राही भवेदेष, तदन्योऽध्रुवविद् भवेत् ॥ ७१९ ॥
नन्वेकसमयस्थायी, प्रोक्तः प्राच्यैरवग्रहः । संभवन्ति कथं तत्र, प्रकारा बहुतादयः ॥ ७२० ॥
सत्यमेतन्मतः किन्तु, द्विविधोऽवग्रह श्रुते । निश्चयात्क्षणिको व्यावहारिकश्चामितक्षणः ॥ ७२१ ॥
अपेक्ष्यावग्रहं भाव्यास्ततश्च व्यावहारिकम् । भेदा यथोक्ता बहुतादयो नैश्चयिके तु न ॥ ७२२ ॥

तथोक्तं तत्वार्थवृत्तौ— [अध्या. १ सूत्र. १६]

> ननु चावग्रह एकसामायिकः शास्त्रे निरूपितः । न चैकस्मिन् समये चैवैकोऽवग्रह एवंविध युक्तऽल्पकालत्वादिति, उच्यते, सत्यमेवैतत् । किन्त्ववग्रह द्विधा नैश्चयिको व्यावहारिकश्च । तत्र नैश्चयिको नाम सामान्यपरिच्छेदः, स चैकसामयिकः शास्त्रेऽभिहितः । ततो नैश्चयिकादनन्तर मीहौवमात्मिका प्रवर्तते किमेषः स्पर्श उतास्पर्श इति । ततश्चानन्तरोऽपायः स्पर्शोऽयमिति । अयं चापायोऽवग्रह इत्युपचर्यते ॥ यस्मादेतेनागामिनो भेदानङ्गीकृत्य सामान्यमवच्छिद्यते । यतः पुनरेतस्मादीहा प्रवर्त्तिष्यते कस्यायं स्पर्शस्ततश्चापायो भविष्यत्यस्यायमिति । अयमपि चापायः पुनरवग्रह इत्युपचर्यते अतोऽन्तरवर्त्तिनीमीहामपायं चाश्रित्य, एवं यावदस्यान्ते निश्चय उपजातो भवति (यत्रापरं विशेषं नाकाङ्क्षतीत्यर्थः) अपाय एव भवति, न तत्रोपचार इति । अतो य एष औपचारिकोऽवग्रहस्तमङ्गीकृत्य बहु अवगृह्णातीत्येतदुच्यते । न त्वेकसमयवर्तिनं नैश्चयिक (अंगीकृत्य) मिति । एवं सर्वत्रौपचारिकाश्रयणाद् व्याख्येयमिति ॥

औत्पत्तिकी वैनयिकी, कार्मिकी पारिणामिकी । आभिः सहामी भेदाः स्युश्चत्वारिंशं शतत्रयम् ॥ ७२३ ॥
न दृष्टो न श्रुतश्च प्राग्, मनसाऽपि न चिन्तितः । यथाऽर्थस्तत्क्षणादेव, यथार्थो गृह्यते धिया ॥ ७२४ ॥
लोकद्वयाविरुद्धा सा, फलेनाव्यभिचारिणी । बुद्धिरौत्पत्तिकी नाम, निर्दिष्टा रोहकादिवत् ॥ ७२५ ॥
गुरूणां विनयात्प्राप्ता, फलदाऽत्र परत्र च । धर्मार्थकामशास्त्रार्थपटुः वैनयिकी मतिः ॥ ७२६ ॥
नैमित्तिकस्य शिष्येण, विनीतेन यथोदितः । स्थविरायाः घटध्वंसे, सद्यः सुतसमागमः ॥ ७२७ ॥

---

१. अबहुविधग्रहः २. भवेदसौ प्र० ।

शिल्पमाचार्योपदेशाल्लब्धं स्यात्कर्म च स्वतः । नित्यव्यापारश्च शिल्पं, कादाचित्कं तु कर्म वा ॥ ७२८ ॥
या कर्माभिनिवेशोत्थलब्धतत्परमार्थिका । कर्माभ्यासविचाराभ्यां, विस्तीर्णा तद्यशः फला[१] ॥ ७२९ ॥
तत्तत्कर्मविशेषेषु, समर्था कार्मिकी मतिः । केषुचिद् दृश्यते सा च चित्रकारादिकारुषु ॥ ७३० ॥
सुदीर्घकालं यः पूर्वापरार्थालोचनादिजः । आत्मधर्मः सोऽत्र परिणामस्तत्प्रभवा तु या ॥ ७३१ ॥
अनुमानहेतुमात्रदृष्टान्तैः साध्यसाधिका । वयोविपाकेन पुष्टीभूताऽभ्युदयमोक्षदा ॥ ७३२ ॥
अभयादेरिव ज्ञेया, तुर्या सा पारिणामिकी । आभ्योऽधिका पञ्चमी तु, नार्हताऽप्युपलभ्यते ॥ ७३३ ॥
यद् द्वेधैव मतिर्लोके, प्रथमा श्रुतनिश्रिता । शास्त्रसंस्कृतबुद्धेः सा, शास्त्रार्थालोचनोद्भवा ॥ ७३४ ॥
सर्वथा शास्त्रसंस्पर्शरहितस्य तथाविधात् । क्षयोपशमतो जाता, भवेदश्रुतनिश्रिता ॥ ७३५ ॥
सर्वाप्यन्तर्भवत्यस्मिन्, मतिरश्रुतनिश्रिता । यथोक्तधीचतुष्केऽतः, पञ्चम्या नास्ति सम्भवः ॥ ७३६ ॥
इदमर्थतो नन्दीसूत्रवृत्तिस्थानाङ्गसूत्रवृत्त्यादिषु ॥
जातिस्मृतिरप्यतीतसंख्यातभवबोधिका ॥ मतिज्ञानस्यैव भेदः, स्मृतिरूपतया किल ॥ ७३७ ॥
यदाहाचाराङ्गटीका—जातिस्मरणं त्वाभिनिबोधिकाविशेष इति । इति मतिज्ञानम् ॥
श्रूयते तत्श्रुतं शब्दः, स श्रुतज्ञानमुच्यते । भावश्रुतस्य हेतुत्वाद्धेतौ कार्योपचारतः ॥ ७३८ ॥
श्रुताच्छब्दादुत ज्ञानं, श्रुतज्ञानं तदुच्यते । श्रुतग्रन्थानुसारी यो, बोधः श्रोत्रमनः कृतः ॥ ७३९ ॥
ननु श्रुतज्ञानमपि, श्रोत्रेन्द्रियनिमित्तकम् । तन्मतिज्ञानतः कोऽस्य, भेदो यत्कथ्यते पृथक् ॥ ७४० ॥
अत्रोच्यते– वर्तमानार्थविषयं, मतिज्ञानं परं ततः । गरीयोविषयं त्रैकालिकार्थविषयं श्रुतम् ॥ ७४१ ॥
विशुद्धं च व्यवहितानेकसूक्ष्मार्थदर्शनात् । छद्मस्थोऽपि[३] श्रुतबलादुच्यते श्रुतकेवली ॥ ७४२ ॥
तदुक्तम् – "न य णं अणाइसेसी[४], वियाणइ एस छउमत्थोत्ति" ।
जीवस्य ज्ञस्वभावत्वान्मतिज्ञानं हि शाश्वतम् । संसारे भ्रमतोऽनादौ, पतितं न कदापि यत् ॥ ७४३ ॥
अक्षरस्यानन्तभागो, नित्योद्घाटित एव हि । निगोदिनामपि भवेदित्येतत्पारिणामिकम् ॥ ७४४ ॥
यदागमः– "सव्वजीवाणं पिअणं अक्खरस्स[५] अणंतभागो निच्चुग्घाडिओ चिट्ठइ । जइ सोवि आवरिज्जा[६] ता जीवो अजीवत्तणं पावेज्जा" ॥ इति ॥
श्रुतज्ञानं पुनर्नैवं, भवेज्जीवस्य सर्वदा । आप्तोपदेशापेक्षं यत्स्यादेतन्मतिपूर्वकम् ॥ ७४५ ॥

---

१. शिल्पिषु २. षट्षष्टिसागरोपमस्थितिस्तु सम्यग्ज्ञानापेक्षिका यद्वा अन्तराऽन्तरा स्मरणादिना कालपूर्तिः । ३. यत इत्याध्यहार्यम् ४. अवधिज्ञानादिविकलः ५. श्रुतज्ञानरुपस्य केवलस्योभयस्य वा ६. श्रुताक्षरस्यानन्तभागसत्वेऽपि औपदेशिकश्रुतभावापेक्षयाः

मतिज्ञानं स्पर्शनादीन्द्रियानिन्द्रियहेतुकम् । श्रुतं तु स्याल्लब्धितोऽपि, पदानुसारिणामिव[१] ॥ ७४६ ॥
इत्याद्यधिकं तत्वार्थवृत्त्यादिभ्योऽवसेयम् ।

चतुर्दशविधं तच्च, यद्वा विंशतिधा भवेत् । चतुर्दशविधत्वं तु, तत्रैवं परिभाव्यते ॥ ७४७ ॥
अक्षरश्रुतमित्येकं, स्याद् द्वितीयमनक्षरम् । तार्त्तीयिकं संज्ञिश्रुतं, तुर्यं श्रुतमसंज्ञिनः ॥ ७४८ ॥
सम्यक् श्रुतं पञ्चमं स्यात्, षष्ठं मिथ्याश्रुतं भवेत् । सादिश्रुतं सप्तमं स्यादनादिश्रुतमष्टमम् ॥ ७४९ ॥
सान्तश्रुतं तु नवममनन्तं दशमं श्रुतम् । एकादशं गमरूपमगमं द्वादशं पुनः ॥ ७५० ॥
त्रयोदशं त्वङ्गरूपमङ्गबाह्यं चतुर्दशम् । प्रायो व्यक्ता अमी भेदास्तथापि किञ्चिदुच्यते ॥ ७५१ ॥
तत्राक्षरं त्रिधा संज्ञाव्यञ्जनलब्धिभेदतः । तत्र संज्ञाक्षरमेता लिपयोऽष्टादशोदिताः ॥ ७५२ ॥

तथाहि—

हंसलिवी[१] भूअलिवी[२] जक्खी[३] तह रक्खसीय[४] बोधव्वा । उड्डी[५] जवणी[६] तुरुक्की[७] कीरा[८] दविडी[९] य सिंधविआ[१०] ॥
मालविणी[११] नडि[१२] नागरी[१३] लाडलिवी[१४] पारसी[१५] य बोधव्वा । तह अनिमित्तीअलिवी[१६] चाणक्की[१७] मूलदेवी[१८] य ॥

अकारादिहकारान्तं, भवति व्यञ्जनाक्षरम् । अज्ञानात्मकमप्येतद्, द्वयं स्यात् श्रुतकारणम् ॥ ७५३ ॥
ततः श्रुतज्ञानतया, प्रज्ञप्तं परमर्षिभिः । लब्ध्यक्षरं त्वक्षरोपलब्धिरर्थावबोधिका ॥ ७५४ ॥
तच्च लब्ध्यक्षरं षोढा, यत् श्रोत्रादिभिरिन्द्रियैः । बोधोऽक्षरानुविद्धः स्याच्छब्दार्थालोचनात्मकः ॥ ७५५ ॥
यथा शब्दश्रवणतो, रूपदर्शनतोऽथवा । देवदत्तोऽयमित्येवंरूपो बोधो भवेदिह[२] ॥ ७५६ ॥
एवं शेषेन्द्रियभावना कार्या ॥

तैरक्षरैरभिलाप्यभावानां प्रतिपादकम् । अक्षरश्रुतमुद्दिष्टमनक्षरश्रुतं परम् ॥ ७५७ ॥

तथोक्तम्—ऊससिअं नीससिअं, निच्छूढं खासिअं च छीअं च । निस्संधियमणुसारं अणक्खरं छेलियाईयं[३] ॥
[विशेषावश्यक श्लो. ५०५]

अयं भावः—

कासितक्ष्वेडिताद्यं यन्मामाह्वयति वक्ति वा । इत्याद्यन्याशयग्राहि, तत्स्यात् श्रुतमनक्षरम् ॥
इह च शिरः कम्पनादिचेष्टानां पराभिप्रायज्ञानहेतुत्वे सत्यपि श्रवणाभावान्न श्रुतत्वम् ।

तदुक्तं विशेषावश्यकसूत्रवृत्तौ— "रुढीइ तं सुअं सुच्चइति चेट्ठा न सुच्चइ कयावि त्ति" ॥ [विशेषावश्यक श्लो. ५०४] उक्तन्यायेन श्रुतत्वप्राप्तौ समानीतायामपि तदेवोच्छ्वसितादि श्रुतं न शिरोधूननकरचालनादिचेष्टा । यतः शास्त्रज्ञलोकप्रसिद्धा रूढिरियमिति ॥ कर्मग्रन्थवृत्तौ तु शिरःकम्पनादीनामपि[४] अनक्षरश्रुतत्वमुक्तम् ।

---

१. औत्पत्तिक्यादौ अनिश्रितादौ च मतिभेदे एवं भावः, परचित्तज्ञानाद्यपि तत्र लब्धिभूतं । २. स्वातन्त्र्येण लक्षितमिदं, संज्ञाव्यञ्जनाक्षरोत्पन्नमपि तथा ३. बालक्रीडापनशब्दादि ४. संज्ञाव्यञ्जनाक्षरोपयोगाभावेऽपि विवक्षारूपभावश्रुतज्ञानोत्पत्तेः, श्रवणरुढेस्तुव्युत्पत्त्यङ्गतयैवोपयोगात्

तथा च तद्ग्रंथः—अनक्षरश्रुतं क्ष्वेडितशिरःकम्पनादिनिमित्तं मामाह्वयति वारयति वा इत्यादि रूपमभिप्रायपरिज्ञानमिति ॥

स्याद्दीर्घकालिकी संज्ञा, येषां ते संज्ञिनो मताः । श्रुतं संज्ञिश्रुतं तेषां, परं त्वसंज्ञिकश्रुतम् ॥ ७५८ ॥
सम्यक्श्रुतं जिनप्रोक्तं भवेदावश्यकादिकम् । तथा मिथ्याश्रुतमपि, स्यात्सम्यग्दृक्परिग्रहात् ॥ ७५९ ॥
आवश्यकं तदपरमिति सम्यक् श्रुतं द्विधा । षोढा चावश्यकं तत्र, सामायिकादिभेदतः ॥ ७६० ॥

तथाहि—"सामाइयं चउवीसत्थओ वंदणयं पडिक्कमणं काउसग्गो पच्चक्खाणं" इति ॥

आवश्यकेतरच्चाङ्गानङ्गात्मकतया द्विधा । अङ्गान्येकादश दृष्टिवादश्चाङ्गात्मकं भवेत् ॥ ७६१ ॥
आचाराङ्गं सूत्रकृतं, स्थानाङ्गं समवाययुग् । पञ्चमं भगवत्यङ्गं, ज्ञाताधर्मकथापि च ॥ ७६२ ॥
उपासकान्तकृदनुत्तरोपपातिकादृशाः । प्रश्नव्याकरणं चैव, विपाकश्रुतमेव च ॥ ७६३ ॥
परिकर्म[१]सूत्र[२]पूर्वानु[३]योग[४]पूर्वगतचूलिका[५]ः पञ्च । स्युर्दृष्टिवादभेदाः, पूर्वाणि चतुर्दशापि पूर्वगते ॥ ७६४ ॥

तानि चैवम्—

उत्पादपूर्वमग्रायणीयमथ वीर्यतः प्रवादं स्यात् । अस्तेर्ज्ञानात्सत्त्वात्तदात्मनः कर्मणश्च परम् ॥ ७६५ ॥
प्रत्याख्यानं विद्याप्रवादकल्याणनामधेये च । प्राणावायं च क्रियाविशालमथ लोकबिन्दुसारमिति ॥ ७६६ ॥
दृष्टिवादः पञ्चधाऽयमङ्गं द्वादशमुच्यते । उपाङ्गमूलसूत्रादि, स्यादनङ्गात्मकं च तत् ॥ ७६७ ॥
एवं च—यदुक्तमर्थतोऽर्हद्भिः संदृब्धं सूत्रतश्च यत् । महाधीभिर्गणधरैस्तत्स्यादङ्गात्मकं श्रुतम् ॥ ७६८ ॥
ततो गणधराणां यत्पारंपर्याप्तवाङ्मयैः । शिष्यप्रशिष्यैराचार्यैः, प्राज्यवाङ्मतिशक्तिभिः ॥ ७६९ ॥
कालसंहननायुर्दोषादल्पशक्तिधीस्पृशाम् । अनुग्रहाय संदृब्धं, तदनङ्गात्मकं श्रुतम् ॥ ७७० ॥
सृष्टान्यङ्गोपकाराय, तेभ्योऽप्यर्वाक्तनर्षिभिः । शास्त्रैकदेशसंबद्धान्येवं प्रकरणान्यपि ॥ ७७१ ॥

एतल्लक्षणं चैवम्—

शास्त्रैकदेशसम्बद्धं, शास्त्रकार्यान्तरे स्थितम् । आहुः प्रकरणं नाम, ग्रन्थभेदं विपश्चितः ॥ ७७२ ॥
एवं च वक्तृवैशिष्ट्यादस्य द्वैविध्यमीरितम् । वस्तुतोऽर्हत्यप्रणीतार्थमेकमेवाखिलं श्रुतम् ॥ ७७३ ॥

तथोक्तं तत्वार्थभाष्ये—'वक्तृविशेषात् द्वैविध्यमिति' ॥ [प्रथमोऽध्यायः, सूत्र. २०]

किं च—व्याकरणच्छन्दोऽलङ्कृति काव्य[१]नाट्यतर्कगणितादि । सम्यग्दृष्टिपरिग्रहपूतं सम्यक्श्रुतं जयति ॥
मिथ्याश्रुतं तु मिथ्यात्विलोकैः स्वमतिकल्पितम् । रामायणभारतादि, वेदवेदाङ्गकादि च ॥ ७७४ ॥

उक्तं च भाष्यकृता— सदसदविसेसणाओ, भवहेउजहिच्छि[२]ओवलंभाओ । नाणफलाभावाओ मिच्छद्दिट्ठिस्स अन्नाणम् ॥ (पूर्वान्तर्गतेयं गाथा) [विशेषावश्यक श्लो. ११५]

---

१. नाटक काव्य इति पाठ २. जहिच्छि इतिपाठः ।

ऋग्यजुःसामाथर्वाणो, वेदा अंगानि षट् पुनः । शिक्षाकल्पो व्याकरणं, छन्दोज्योतिर्निरुक्तयः ॥ ७७५ ॥
ततश्च–षडंगी वेदाश्चत्वारो, मीमांसाऽऽन्वीक्षिकी तथा । धर्मशास्त्रं पुराणं च, विद्या एताश्चतुर्दश ॥ ७७६ ॥
तथा – आयुर्वेदो धनुर्वेदो, गान्धर्वं चार्थशास्त्रकम् । चतुर्भिरेतैः संयुक्ताः, स्युरष्टादश ताः पुनः ॥ ७७७ ॥
अपूर्णदशपूर्वान्तमपि सम्यक् श्रुतं भवेत् । मिथ्यात्विभिः संगृहीतं, मिथ्याश्रुतं विपर्ययात् ॥ ७७८ ॥
द्रव्यक्षेत्रकालभावैः, साद्यन्तं भवति श्रुतम् । अनाद्यपर्यवसितमपि ज्ञेयं तथैव च ॥ ७७९ ॥
एकं पुरुषमाश्रित्य, साद्यन्तं भवति श्रुतम् । अनाद्यपर्यवसितं, भूयसस्तान् प्रतीत्य च ॥ ७८० ॥
भवान्तरं गतस्याशु, पुंसो यन्नश्यति श्रुतम् । कस्यचित्तद्भव एव, मिथ्यात्वगमनादिभिः ॥ ७८१ ॥

तदुक्तं विशेषावश्यके [श्लो. ५४२] चउदसपुव्वी मणुओ, देवत्ते तं न संभरइ सच्चम् ॥
देसंमि होई भयणा, सट्ठाणभवेवि भयणाओ ॥ देशे पुनरेकादशाङ्गलक्षणे इति कल्पचुर्णिः ।
स्वस्थानभवे इति मनुष्यभवेऽपि तिष्ठतः भजना ॥ तत्र श्रुतज्ञाननाशकारणानि अमूनि—
"मिच्छभवंतरकेवलगेलन्न-पमायमाइणा[१] नासोत्ति" । षष्ठाङ्गचतुर्दशाध्ययने तु तेतलिमन्त्रिणः
पूर्वाधीतचतुर्दशपूर्वस्मरण[२] मुक्तमस्तीति ज्ञेयम् ।

साद्यन्तं क्षेत्रतो ज्ञेयं, भरतैरवताश्रयात् । अनाद्यपर्यवसितं, विदेहापेक्षया पुनः ॥ ७८२ ॥
कालतश्चावसर्पिण्युत्सर्पिण्योः सादि[३]सान्तकम् । महाविदेहकालस्यापेक्षयाद्यन्तवर्जितम् ॥ ७८३ ॥
भवसिद्धिकमाश्रित्य, साद्यन्तं भावतो भवेत् । छद्मस्थिकज्ञाननाशो, यदस्य केवलक्षणे ॥ ७८४ ॥
'नट्ठंमि य छाउमत्थिए नाणे' इति वचनात् ॥
अनाद्यनन्तं चाभव्यमाश्रित्य श्रुतमुच्यते । श्रुतज्ञानश्रुताज्ञानभेदस्यात्राविवक्षणात् ॥ ७८५ ॥
क्षायोपशमिकभावे, यद्वाऽनाद्यन्तमीहितम् । एवं साद्यनादिसान्तमनन्तं श्रुतमूह्यताम् ॥ ७८६ ॥
गमाः सदृशपाठाः स्युर्यत्र तद्गमिकं श्रुतम् । तत्प्रायो दृष्टिवादे स्यादन्यच्चागमिकं भवेत् ॥ ७८७ ॥
अंगाविष्टं द्वादशाङ्गन्यन्यदावश्यकादिकम् । इत्थं प्ररूपिताः प्राज्ञैः, श्रुतभेदाश्चतुर्दश ॥ ७८८ ॥
ये भेदा विंशतिस्तेऽपि, कथ्यन्ते लेशमात्रतः । न ग्रन्थविस्तरभयादिह सम्यक् प्रपञ्चिताः ॥ ७८९ ॥
तथाहुः— [कर्मविपाकनाम्नि प्रथमकर्मग्रन्थे गाथा-७]
पज्जय अक्खरपयसंघाया पडिवत्ति तह य अणुओगो । पाहुडपाहुड पाहुड वत्थुपुव्वा य ससमासा ॥
तत्र च-अविभागः परिच्छेदो, यो ज्ञानस्य प्रकल्पितः । स पर्यायो द्व्यादयस्ते, स्यात्पर्यायसमासकः ॥ ७९० ॥
लब्ध्यपर्याप्तस्य सूक्ष्मनिगोदस्थशरीरिणः । यदाद्यक्षणजातस्य, श्रुतं सर्वजघन्यतः ॥ ७९१ ॥
तस्मादन्यत्र यो जीवान्तरे ज्ञानस्य वर्धते । अविभागपरिच्छेदः, स पर्याय इति स्मृतः ॥ ७९२ ॥

---

१. भयणाउ इतिपाठः । २. देवत्वे पूर्वाणामस्मरणमिति चूर्णिवचसस्तत्त्वं, तेतली तु नरः, तस्य जातिस्मृत्या पूर्वज्ञाने का हानिः ?!
३. सादिसान्तिकम् इति पाठः ।

येऽविभागपरिच्छेदा, द्व्यादयोऽन्येषु देहिषु । वृद्धिं गतास्ते पर्यायसमास इति कीर्तिताः ॥ ७९३ ॥

तथोक्तमाचाराङ्गवृत्तौ—

"सर्वनिकृष्टो जीवस्य, दृष्ट उपयोग एव' वीरेण । सूक्ष्मनिगोदापर्याप्तानां स च भवति विज्ञेयः ॥
तस्मात्प्रभृतिर्ज्ञानविवृद्धिर्दृष्टा जिनेन जीवानाम् ॥ लब्धिनिमित्तैः करणैः कायेन्द्रियवाङ्मनोदृग्भिः" ॥

मध्ये लब्ध्यक्षराणां स्याद्यदन्यतरदक्षरम् । तदक्षरं तत्संदोहोऽक्षरसमास इष्यते ॥ ७९४ ॥
पदानां यादृशानां स्यादाचाराङ्गादिषु ध्रुवम् । अष्टादशसहस्रादिप्रमाणं तत्पदं[२] भवेत् ॥ ७९५ ॥
द्व्यादीनि तत्समासः स्यादेवं सर्वत्र भाव्यताम् । संघातप्रतिपत्त्यादौ, समासो ह्यनया दिशा ॥ ७९६ ॥
गतीन्द्रियादिद्वाराणां, द्वाषष्टेरेकदेशकः । गत्यादिरेकदेशोऽस्याः, स्वर्गतिस्तत्र मार्गणा ॥ ७९७ ॥
जीवादेः क्रियते सोऽयं, संघात इति कीर्त्यते । गत्यादिद्व्याद्यवयवमार्गणा तत्समासकः ॥ ७९८ ॥
संपूर्णगत्यादिद्वारे, जीवादेर्मार्गणा तु या । प्रतिपत्तिरियं जीवाभिगमे दृश्यतेऽधुना ॥ ७९९ ॥
सत्पदप्ररूपणाद्यनुयोगद्वारमुच्यते । प्राभृतान्तःस्थोऽधिकारः, प्राभृतप्राभृतं भवेत् ॥ ८०० ॥
वस्त्वन्तर्वर्त्ध्यधिकारः, प्राभृतं परिकीर्तितम् । पूर्वान्तर्वर्त्ध्यधिकारो, वस्तुनाम्ना प्रचक्षते ॥ ८०१ ॥
पूर्वमुत्पादपूर्वादि, ससमासाः समेऽप्यमी[३] । श्रुतस्य विंशतिर्भेदा, इत्थं संक्षेपतः स्मृताः ॥ ८०२ ॥

इति श्रुतज्ञानम् ॥

अवधानं स्यादवधिः, साक्षादर्थविनिश्चयः । अवशब्दोऽव्ययं यद्वा, सोऽधःशब्दार्थवाचकः ॥ ८०३ ॥
अधोऽधो विस्तृतं वस्तु, धीयते परिबुध्यते । अनेनेत्यवधिर्यद्वा, मर्यादावाचकोऽवधिः ॥ ८०४ ॥
मर्यादा रूपिद्रव्येषु, प्रवृत्तिर्नत्वरूपिषु । तयोपलक्षितं ज्ञानमवधिज्ञानमुच्यते ॥ ८०५ ॥
अनुगाम्यननुगामी, वर्धमानस्तथा क्षयी । प्रतिपात्यप्रतिपातीत्यवधिः षड्विधो भवेत् ॥ ८०६ ॥
यद्धि देशान्तरगतमप्यन्वेति स्वधारिणम् । अनुगाम्यवधिज्ञानं, तद्विज्ञेयं स्वनेत्रवत् ॥ ८०७ ॥
यत्र क्षेत्रे समुत्पन्नं, यत्तत्रैवावबोधकृत् । द्वितीयमवधिज्ञानं, तच्छृंखलितदीपवत् ॥ ८०८ ॥
यदङ्गुलस्यासंख्येयभागादिविषयं पुरा । समुत्पद्यानुविषयविस्तारेण विवर्धते ॥ ८०९ ॥
अलोके लोकमात्राणि, यावत्खण्डान्यसंख्यशः । स्यात्प्रकाशयितुं शक्तं, वर्धमानं[४] तदीरितम् ॥ ८१० ॥
अप्रशस्ताध्यवसायात्, हीयते यत्प्रतिक्षणम् । आहुस्तदवधिज्ञानं, हीयमानं मुनीश्वराः ॥ ८११ ॥
स्याद्वर्धमानं शुष्कोपचीयमानेन्धनाग्निवत् । हीयमानं परिमितातादृगिन्धनवह्निवत् ॥ ८१२ ॥
योजनानां सहस्राणि, संख्येयान्यप्यसंख्यशः । यावल्लोकमपि[५] दृष्ट्वा, पतति प्रतिपाति तत् ॥ ८१३ ॥

१. एष इतिपाठः २. एकस्मिन्पदे ५१०८८६८४० श्लोकाः अष्टाविंशतिश्चाक्षराणीत्यनुयोगद्वारवृत्ताविति सेनप्रश्ने । ३. अपिना तद्द्व्यादिपरिग्रह. ४. अलोके रुपिद्रव्याभावाद् दृश्याभावेऽपि लोके द्रव्यादिकस्य साक्ष्म्येण ज्ञानवृद्धिसाफल्यम्, स्वभावादेव नाग्रतः ५. अलोकस्यैकप्रदेशेऽपि दृष्टे नैव प्रतिपातीत्येवमुक्तं

प्रमादेन पतत्येतद्भवान्तराश्रयेण वा । यथाश्रुतं स्वरूपं च, वक्ष्येऽथाप्रतिपातिनः ॥ ८१४ ॥
यत्प्रदेशमलोकस्य, द्रष्टुमेकमपि क्षमम् । तत्स्यादप्रतिपात्येव, केवलं तदनन्तरम् ॥ ८१५ ॥
हीयमानप्रतिपातिनोश्चायं विशेषः—
प्रतिपाति हि निर्मूलं, विध्यायत्येकहेलया । हीयमानं पुनः ह्रासमुपयाति शनैः शनैः ॥ ८१६ ॥

इदं कर्मग्रन्थवृत्त्यभिप्रायेण । तत्त्वार्थभाष्ये तु - अनवस्थितावस्थिताख्ययोः अन्त्यभेदयोः एवं स्वरूपमुक्तम्— अनवस्थितं हीयते वर्धते च वर्धते हीयते च प्रतिपतति च उत्पद्यते च इति पुनः पुनः उर्मिवत्, अवस्थितं यावति क्षेत्रे उत्पन्नं भवति ततो न प्रतिपतत्याकेवलप्राप्तेरवतिष्ठते । आभवक्षयाद्वा जात्यन्तरस्थायि वा भवति लिङ्गवत् । यथा लिंगं पुरुषादिवेदमिह जन्मन्युपादाय जन्मान्तरं याति जन्तुस्तथाऽवधिज्ञानमपि, इति भावः ॥

नृतिरश्चामयं षोढा, क्षायोपशमिकोऽवधिः । भवेद्भवप्रत्ययश्च, देवनारकयोरिह ॥ ८१७ ॥
तदुक्तम्— द्विविधोऽवधिर्[१]भवप्रत्ययः क्षयोपशमनिमित्तश्[२]चेति तत्त्वार्थसूत्रे [प्रथमोऽध्यायः, सूत्र. २१]
स्याद्भवप्रत्ययोऽप्येष, न क्षयोपशमं विना । अन्वयव्यतिरेकाभ्यां, हेतुत्वादस्य किन्त्विह ॥ ८१८ ॥
स्यात्क्षयोपशमे हेतुर्भवोऽयं तदसौ तथा । उपचाराद्धेतुहेतुरपि हेतुरिहोदितः ॥ ८१९ ॥
इति अवधिज्ञानम् ॥

मनस्त्वेन परिणतद्रव्याणां यस्तु पर्यवः । परिच्छेदः स हि मनःपर्यवज्ञानमुच्यते ॥ ८२० ॥
यद्वा—मनोद्रव्यस्य पर्याया, नानावस्थात्मका हि ये । तेषां ज्ञानं खलु मनःपर्यायज्ञानमुच्यते ॥ ८२१ ॥
स्यादृजुधीविपुलधीलक्षणस्वामिभेदतः । तद् द्विभेदं संयतस्याप्रमत्तस्यर्द्धिशालिनः ॥ ८२२ ॥
अनेन चिन्तितः कुम्भ, इति सामान्यग्राहिणी । मनोद्रव्यपरिच्छित्तिर्यस्यासावृजुधीः श्रुतः ॥ ८२३ ॥
अनेन चिन्तितः कुम्भः, स सौवर्णः स माथुरः । इयत्प्रमाणोऽद्यतनः, पीतवर्णः सदाकृतिः ॥ ८२४ ॥
एवं विशेषविज्ञाने, मतिर्यस्य पटीयसी । ज्ञेयोऽयं विपुलमतिर्मनःपर्यायलब्धिमान् ॥ ८२५ ॥
ननु च—अवधिश्च मनःपर्यवश्चोभे अप्यतीन्द्रिये । रूपिद्रव्यविषये च, भेदस्तदिह कोऽनयोः ॥ ८२६ ॥
अत्रोच्यतेऽवधिज्ञानमुत्कर्षात्सर्वलोकवित् । संयतासंयतनरतिर्यक्स्वामिकमीरितम् ॥ ८२७ ॥
अन्यद्विशदमेतस्माद्बहुपर्यायवेदनात् । अप्रमत्तसंयतैकलभ्यं नृक्षेत्रगोचरम् ॥ ८२८ ॥
उक्तं च तत्त्वार्थभाष्ये—विशुद्धिक्षेत्रस्वामिविषयेभ्योऽवधिमनःपर्[३][४]ययोर्विशेषः । इति ॥ [प्रथमोऽध्यायः सूत्र. २६]
सामान्यग्राहि ननु यन्मनःपर्यायमादिमम् । तदस्य दर्शनं किं न, सामान्यग्रहणात्मकम् ? ॥ ८२९ ॥
अत्रोच्यते, विशेषमेकं द्वौ त्रीन्वा, गृह्णात्यृजुमतिः किल । ईष्टे बहून् विशेषांश्च, परिछेत्तुमयं न यद् ॥ ८३० ॥

१. एतावान् सूत्रपाठः (१-२१) २. भवादिर्भाष्यपाठः ।
३. एतावान् सूत्रभागः (१-२६) ४. विशुद्ध्यप्रतिपाताभ्यां विशेष इति तद्विशेषः (१-२५) इत्यतोऽनुवृत्तं

सामान्यग्राह्यसौ तस्मात्, स्तोकग्राहितया भवेत् । सामान्यशब्दः स्तोकार्थो, नत्वत्र दर्शनार्थकः[1] ॥ ८३१ ॥
कर्मक्षयोपशमजोत्कर्षाद्विपुलधीः पुनः । बहून् विशेषान्वेत्त्यत्र, बह्वर्थो विपुलध्वनिः ॥ ८३२ ॥
न चाभ्यधायि सिद्धान्ते, कुत्राप्येतस्य दर्शनम् । दर्शनात्मकसामान्यग्राहिता नैतयोस्ततः ॥ ८३३ ॥
विशेषरूपग्राहित्वे, प्राप्ते नन्वेवमेतयोः । द्वयोर्मनोविषययोर्द्वैविध्ये किं निबन्धनम् ॥ ८३४ ॥
अत्रोच्यते—अल्पपर्यायवेद्याद्यं, घटादिवस्तुगोचरम् । नानाविधविशेषावच्छेदि शुद्धतरं परम् ॥ ८३५ ॥
कस्यचिन्न पतत्याद्यं, कस्यचिच्च पतत्यपि । अन्त्यं चाकेवलप्राप्तेर्न पतत्येव तिष्ठति ॥ ८३६ ॥

तथोक्तं तत्त्वार्थवृत्तौ—यस्य पुनः विपुलमतेः मनःपर्यायज्ञानं समजनि तस्य न पतति आकेवलप्राप्तेः ॥ इति ॥ तत्त्वार्थसूत्रेऽपि—'विशुद्ध्यप्रतिपाताभ्यां तद्विशेष' [अध्या. १. सू. २५] इत्युक्तम् ॥ योगशास्त्रप्रथमप्रकाशवृत्तौ अपि— ऋजुश्च विपुलश्चेति, स्यान्मनःपर्यवो द्विधा । विशुद्ध्यप्रतिपाताभ्यां, विपुलस्तु विशिष्यते ॥ इति मनःपर्यायज्ञानम् ॥

केवलं यन्मतिज्ञानाद्यन्यज्ञानानपेक्षणात् । ज्ञेयानन्त्यादनन्तं वा शुद्धं, वाऽऽवरणक्षयात्[2] ॥ ८३७ ॥
सकलं वाऽऽदित एव, निःशेषावरणक्षयात् । अनन्यसदृशत्वेनाथवाऽसाधारणं भवेत् ॥ ८३८ ॥
भूतभाविभवद्भावस्वरूपोद्दीपकं स्वतः । तद्ज्ञानं केवलज्ञानं, केवलज्ञानिभिर्मतम् ॥ ८३९ ॥
इति केवलज्ञानम् ॥

कुत्सितज्ञानमज्ञानं, कुत्सार्थस्य नञोऽन्वयात् । कुत्सितत्वं तु मिथ्यात्वयोगात्तत्त्रिविधं पुनः ॥ ८४० ॥
मत्यज्ञानं श्रुताज्ञानं, विभंगज्ञानमित्यपि । अथ स्वरूपमेतेषां, दर्शयामि यथाश्रुतम् ॥ ८४१ ॥
मतिज्ञानश्रुतज्ञाने, एव मिथ्यात्वयोगतः । अज्ञानसंज्ञां भजतो, नीचसङ्गादिवोत्तमः ॥ ८४२ ॥
तथोक्तम्—'अविसेसिया मइ च्चिय, सम्मदिट्ठिस्स सा मइन्नाणं । मइअन्नाणं मिच्छादिट्ठिस्स सुअंपि एमेव' ॥ [विशेषावश्यक श्लो. ११४]
भंगा विकल्पा विरुद्धाः, स्युस्तेऽत्रेति विभङ्गकम् । विरूपो वाऽवधेर्भङ्गो, भेदोऽयं तद्विभंगकम् ॥ ८४३ ॥
एतच्च ग्रामनगरसन्निवेशादिसंस्थितम् । समुद्रद्वीपवृक्षादिनानासंस्थानसंस्थितम् ॥ ८४४ ॥
अष्टानामप्यथैतेषां, विषयान्वर्णयाम्यहम् । द्रव्यक्षेत्रकालभावैः द्रव्यतस्तत्र कथ्यते ॥ ८४५ ॥
सामान्यतो मतिज्ञानी, सर्वद्रव्याणि बुध्यते । विशेषतोऽपि देशादिभेदैस्तानवगच्छति ॥ ८४६ ॥
किन्तु तद्गतनिःशेषविशेषापेक्षयाऽस्फुटान् । एष धर्मास्तिकायादीन्[3], पश्येत्सर्वात्मना तु न ॥ ८४७ ॥
योग्यदेशस्थितान् शब्दादीस्तु जानाति पश्यति । श्रुतभावितया[4] बुद्धया, सर्वद्रव्याणि वेत्ति वा ॥ ८४८ ॥
लोकालोकौ क्षेत्रतश्च, कालतस्त्रिविधं च तम् । सर्वाद्धां वा भावतस्तु, भावानौदायिकादिकान् ॥ ८४९ ॥

---

१. जातिसूचकः २. वाऽऽवरण, चावरणक्षयात् ३. ओघार्थके आदेशशब्दे ४. श्रुतमर्थो यदा आदेशशब्दस्य

आह च भाष्यकारः आएसोत्ति पगारो, ओघादेसेण सव्व दव्वाइं । धम्मत्थिकाइयाइं जाणइ न उ सव्वभावेणं ॥ खेत्तं लोगालोगं कालं सव्वद्धमहव तिविहंपि । पंचोदइयाईए, भावे जन्नेयमेवइयं ॥ आएसोत्तिव्व सुत्तं सुओवलद्धे सुतस्स मइनाणं । पसरइ तज्झावणया विणावि सुत्ताणुसारेणं ॥ [विशेषावश्यक श्लो. ४०३ थी ४०५]

तत्त्वार्थवृत्ताप्युक्तम्—मतिज्ञानी तावत् श्रुतज्ञानोपलब्धेषु अर्थेषु यदाऽक्षरपरिपाटीमन्तरेण स्वभ्यस्तविद्यः द्रव्याणि ध्यायति तदा मतिज्ञानविषयः सर्वद्रव्याणि, न तु सर्वे पर्यायाः अल्पकालविषयत्वान्मनसश्चाशक्तेः ॥ इति ॥ इति मतिज्ञानविषयः ॥

भावश्रुतोपयुक्तः सन्, जानाति श्रुतकेवली[1] । दशपूर्वादिभृद्द्रव्याण्यभिलाप्यानि केवलम् ॥ ८५० ॥
यद्यप्यभिलाप्यार्थानन्तांशोऽस्ति श्रुते तथाप्येते ॥ सर्वे स्युः श्रुतविषयः, प्रसङ्गतोऽनुप्रसङ्गाच्च ॥ ८५१ ॥

यथाहु :— पन्नवणिज्जा भावा, अणंतभागो उ अणभिलप्पाणं । पन्नवणिज्जाणं पुण, अणंतभागो सुअनिबद्धो ॥ [विशेषावश्यक श्लो. १४१]

तथा—श्रुतानुवर्तिमनसा, ह्यचक्षुर्दर्शनात्मना । दशपूर्वादिभृद्द्रव्याण्यभिलाप्यानि पश्यति ॥ ८५२ ॥
तदारतस्तु भजना, विज्ञेया धीविशेषतः । वृद्धैस्तु पश्यतीत्यत्र, तत्त्वमेतन्निरूपितम् ॥ ८५३ ॥
सर्वात्मनादर्शनेऽपि, पश्यत्येव कथञ्चन । ग्रैवेयकानुत्तरादिविमानालेख्यनिर्मितेः ॥ ८५४ ॥
नोचेत्स्यात्सर्वथादृष्टस्यालेख्यकरणं कुतः । तुर्योपाङ्गे श्रुतज्ञानपश्यत्ताऽपि प्ररुपिता ॥ ८५५ ॥
क्षेत्रतः कालतोऽप्येवं, भावतो वेत्ति सश्रुतः । भावानौदयिकादीन् वा, पर्यायान् वाऽभिलाप्यगान् ॥ ८५६ ॥

इति श्रुतज्ञानविषयः ॥

द्रव्यतोऽथावधिज्ञानी, रूपिद्रव्याणि पश्यति । भाषातैजसयोरन्तःस्थानि तानि जघन्यतः ॥ ८५७ ॥
उत्कर्षतस्तु सर्वाणि, सूक्ष्माणि बादराणि च । विशेषाकारतो वेत्ति, ज्ञानत्वादस्य निश्चितम् ॥ ८५८ ॥
क्षेत्रतोऽथावधिज्ञानी, जघन्योद्धेत्ति पश्यति । असंख्येयतमं भागमङ्गुलस्योपयोगतः ॥ ८५९ ॥

विशेषश्च अत्र—'जावइया तिसमयाहारगस्स सुहुमस्स पणगजीवस्स । ओगाहणा जहण्णा ओहिखित्तं जहन्नं तु' ॥ इति नन्दीसूत्रादिषु नन्दीवृत्तौ च ॥ [विशेषाव्यक श्लो. ५९१]

योजनसहस्रमानो, मत्स्यो मृत्वा स्वकायदेशे यः । उत्पद्यते हि पनकः, सूक्ष्मत्वेनेह स ग्राह्यः ॥ ८६० ॥
संहृत्य चाद्यसमये, स ह्यायामं करोति च प्रतरम् । संख्यातीताख्याङ्गुलविभागबाहल्यमानं तु ॥ ८६१ ॥
स्वतनूपृथुत्वमात्रं, दीर्घत्वेनापि जीवसामर्थ्यात् । तमपि द्वितीयसमये, संहृत्य करोत्यसौ सूचिम् ॥ ८६२ ॥
संख्यातीताख्याङ्गुलविभागविष्कम्भमाननिर्दिष्टम् । निजतनु पृथुत्वदीर्घं, तृतीयसमये तु संहृत्य ॥ ८६३ ॥

---

१. चतुर्दशपूर्वविदः श्रुतकेवलिनः २. परिणाहलक्षणम्

उत्पद्यते च पनकः, स्वदेहदेशे सुसूक्ष्मपरिणामः । समयत्रयेण तस्यावगाहना यावती भवति ॥ ८६४ ॥
तावज्जघन्यमवधेरालम्बनवस्तुभाजनं क्षेत्रम् । इदमित्थमेव मुनिगणसुसम्प्रदायात्समवसेयम् ॥ ८६५ ॥

तथा–'मच्छो महल्लकाओ, संखित्तो जोउ तीहिं समएहिं । स किर पयत्तविसेसेण, सण्हमोगाहणं कुणइ ॥ सण्हयरासण्हयरो, सुहुमो पणओ जहन्नदेहो य । स बहुविसेससिद्धो, सण्हयरो सव्वदेहेसु ॥ पढमबितीये सण्हो, जायइ थूलो चउत्थयाइसु । तइयसमयंमि जुग्गो, गहिओ तो तिसमयाहारो ॥ [विशेषावश्यक श्लो. ५९६, ५९७, ५९८]

अलोके लोकमात्राणि, पश्येत् खण्डान्यसंख्यशः । उत्कृष्टतोऽवधिज्ञानविषयः शक्त्यपेक्षया ॥ ८६६ ॥
असंख्यभागमावल्या, जघन्यादेष पश्यति । उत्सर्पिण्यवसर्पिण्यः, उत्कर्षेण त्वसंख्यकाः ॥ ८६७ ॥
अतीता अपि तावत्यस्तावत्योऽनागता अपि । तावत्काले भूतभाविरुपिद्रव्यावबोधतः ॥ ८६८ ॥
पर्यायान् भावतोऽनन्तानेष वेत्ति जघन्यतः । आधारद्रव्यानन्त्येन, प्रतिद्रव्यं तु नो यतः ॥ ८६९ ॥
उत्कर्षतोऽपि पर्यायाननन्तान् वेत्ति पश्यति । सर्वेषां पर्यवाणां चानन्तेंऽशे तेऽपि पर्यवाः ॥ ८७० ॥
अथावधेर्विषययोर्नियमः क्षेत्रकालयोः । मिथो विभाव्यते वृद्धिमाश्रित्य श्रुतवर्णितः ॥ ८७१ ॥
अङ्गुलस्यासंख्यभागं क्षेत्रतो यो निरीक्षते । आवल्यसंख्येयभागं, कालतः स निरीक्षते ॥ ८७२ ॥
प्रमाणाङ्गुलमत्राहुः, केचित् क्षेत्राधिकारतः । अवधेरधिकाराच्च, केचनात्रोच्छ्रयाङ्गुलम् ॥ ८७३ ॥
यश्चाङ्गुलस्य संख्येयं, क्षेत्रतो भागमीक्षते । आवल्या अपि संख्येयं, कालतोंऽशं स वीक्षते ॥ ८७४ ॥
सम्पूर्णमङ्गुलं यस्तु, क्षेत्रतो वीक्षते जनः । पश्येदावलिकान्तः स, कालतोऽवधिचक्षुषा ॥ ८७५ ॥
पश्यन्नावलिकां पश्येदङ्गुलानां पृथक्त्वकम् । क्षेत्रतो हस्तदर्शी च, मुहूर्त्तान्तः प्रपश्यति ॥ ८७६ ॥
कालतो भिन्नदिनदृक् गव्यूतं क्षेत्रमीक्षते । योजनक्षेत्रदर्शी च, भवेद्दिनपृथक्त्वदृक् ॥ ८७७ ॥
कालतो भिन्नपक्षेक्षी, पञ्चविंशतियोजनीम् । क्षेत्रतो वेत्ति भरतदर्शी पक्षमनूनकम् ॥ ८७८ ॥
जानाति जम्बूद्वीपं च, कालतोऽधिकमासवित् । कालतो वर्षवेदी स्यात्, क्षेत्रतो नरलोकवित् ॥ ८७९ ॥
रुचकद्वीपदर्शी च, पश्येत् वर्षपृथक्त्वकम् । संख्येयकालदर्शी च, संख्येयान् द्वीपवारिधीन् ॥ ८८० ॥
सामान्यतोऽत्र प्रोक्तोऽपि, कालः संख्येयसंज्ञकः । विज्ञेयः परतो वर्षसहस्रादिह धीधनैः ॥ ८८१ ॥
असंख्यकालविषयेऽवधौ च द्वीपवार्धयः । भजनीया असंख्येयाः, संख्येया अपि कुत्रचित् ॥ ८८२ ॥
विज्ञेया भजना चैवं, महान्तो द्वीपवार्धयः । संख्येया एव किञ्चैकोऽप्येकदेशोऽपि सम्भवेत् ॥ ८८३ ॥
तत्र स्वयम्भूरमणतिरश्चोऽसंख्यकालिके । अवधौ विषयस्तस्याम्भोधेः स्यादेकदेशकः ॥ ८८४ ॥
योजनापेक्षयाऽसंख्यमेव क्षेत्रं भवेदिह । असंख्यकालविषयेऽवधाविति तु भाव्यताम् ॥ ८८५ ॥
कालवृद्धौ द्रव्यभावक्षेत्रवृद्धिरसंशयम् । क्षेत्रवृद्धौ तु कालस्य, भजना क्षेत्रसौक्ष्म्यतः ॥ ८८६ ॥

द्रव्यपर्याययोर्वृद्धिरवश्यं क्षेत्रवृद्धित: । अत्र शेषो विशेषश्च, ज्ञेय आवश्यकादित: ॥ ८८७ ॥
अवध्यविषयत्वेनामूर्त्तयो: क्षेत्रकालयो: । उक्तक्षेत्रकालवर्त्तिद्रव्ये कार्याऽत्र लक्षणा[१] ॥ ८८८ ॥
इत्यवधिज्ञानविषय: ॥

स्कन्धाननन्तानृजुधीरुपयुक्तो हि पश्यति । नृक्षेत्रे संज्ञिपर्याप्तेर्मनस्त्वेनोररीकृतान् ॥ ८८९ ॥
मनोज्ञानस्य नितरां, क्षयोपशमपाटवात् । विशेषयुक्तमेवासौ, वेत्ति वस्तु घटादिकम् ॥ ८९० ॥
स्कन्धान् जानाति विपुलधीश्च तानेव साधिकान् । अपेक्ष्य द्रव्यपर्यायान्, तथा स्पष्टतरानपि ॥ ८९१ ॥
द्विधा मन:पर्यवस्य, द्रव्यतो विषयो ह्ययम् । विषयं क्षेत्रतोऽथास्य, ब्रवीमि ऋजुधीरिह ॥ ८९२ ॥
अधस्तिर्यग्लोकमध्याद्धेत्ति रत्नप्रभाक्षितौ । ऋजुधीर्योजनसहस्रान्तं संज्ञिमनांस्यसौ ॥ ८९३ ॥
ज्योतिश्चक्रोपरितलं, यावदूर्ध्वं स वीक्षते । तिर्यक् क्षेत्रं द्विपाथोधिसार्धद्वीपद्वयात्मकम् ॥ ८९४ ॥
उक्तं क्षेत्रं विपुलधीर्निर्मलं वीक्षते तथा । विष्कम्भायामबाहल्यै:, सार्धद्वयङ्गुलसाधिकम् ॥ ८९५ ॥

अयं भगवतीसूत्रवृत्तिराजप्रश्नीयवृत्तिनन्दीसूत्रनन्दीमलयगिरीयावृत्ति विशेषावश्यकवृत्ति कर्मग्रन्थवृत्त्याद्यभिप्राय: । सामान्यं घटादिवस्तुमात्रचिन्तनपरिणामग्राहि किञ्चिदविशुद्धतरं अर्धतृतीयाङ्गुलहीनमनुष्यक्षेत्रविषयं ज्ञानं ऋजुमतिलब्धि: । संपूर्णमनुष्यक्षेत्रविषयं विपुलमतिलब्धि: ॥ इति प्रवचनसारोद्धारवृत्त्यौपपातिकवृत्त्यो: लिखितम् ॥ अर्धतृतीयद्वीपसमुद्रेष्वर्धतृतीयाङ्गुलहीनेषु संज्ञिमनांसि ऋजुमतिर्जानाति । विपुलमतिरर्धतृतीयैरङ्गुलैरभ्यधिकेषु ॥ इति चार्थत: श्रीज्ञानसूरिकृतावश्यकचूर्णौ ॥

ऋजुधी: कालत: पल्यासंख्यभागं जघन्यत: । अतीतानागतं जानात्युत्कर्षादपि तन्मितम् ॥ ८९६ ॥
तावत्कालभूतभाविमन: पर्यायबोधत: । तावन्तमेव विपुलधीस्तु पश्यति निर्मलम् ॥ ८९७ ॥
सर्वभावानन्तभागवर्त्तिनोऽनन्तपर्यवान् । ऋजुधीर्भावतो वेत्ति, विपुलस्तांश्च निर्मलान् ॥ ८९८ ॥
इति मन:पर्यायविषय: ॥

केवली द्रव्यत: सर्वं, द्रव्यं मूर्त्तममूर्त्तकम् । क्षेत्रत: सकलं क्षेत्रं, सर्वं कालं च कालत: ॥ ८९९ ॥
भावत: सर्वपर्यायान्, प्रतिद्रव्यमनन्तकान् । भवतो भाविनो भूतान्, सम्यग् जानाति पश्यति ॥ ९०० ॥
विहाय: कालयो: सर्वद्रव्येषु संगतावपि । पृथगुक्ति: पुन: क्षेत्रकालरुढ्येति चिन्त्यताम् ॥ ९०१ ॥
इति केवलज्ञानविषय: ॥

मत्यज्ञानी तु मिथ्यात्वमिश्रेणावग्रहादिना । औत्पत्तिक्यादिना यद्वा, पदार्थान् विषयीकृतान् ॥ ९०२ ॥
वेत्त्यपायादिना तांश्च, पश्यत्यवग्रहादिना । मत्यज्ञानेन विशेषसामान्यावगमात्मना ॥ ९०३ ॥
मत्यज्ञानपरिगतं, क्षेत्रं कालं च वेत्त्यसौ । मत्यज्ञानपरिगतान्, स वेत्ति पर्यवानपि ॥ ९०४ ॥

१. आधेयदर्शनादाधारदर्शनकथनात् खारीमुद्रा इतिवत् ।

श्रुताज्ञानी पुनर्मिथ्याश्रुतसन्दर्भगर्भितान् । द्रव्यक्षेत्रकालभावान्, वेत्ति प्रज्ञापयत्यपि ॥ ९०५ ॥
एवं विभङ्गानुगतान्, विभङ्गज्ञानवानपि । द्रव्यक्षेत्रकालभावान्, कथञ्चिद्वेत्ति पश्यति ॥ ९०६ ॥
यथा स शिवराजर्षिर्दिशाप्रोक्षकतापसः । विभङ्गज्ञानतोऽपश्यत्, सप्तद्वीपपयोनिधीन् ॥ ९०७ ॥
निशम्य तानसंख्येयान्, जगद्गुरुनिरूपितान् । संदिहानो वीरपार्श्वं, प्रव्रज्य स ययौ शिवम् ॥ ९०८ ॥
इदं पञ्चविधं ज्ञानं, जिनैर्यत्परिकीर्त्तितम् । तद् द्वे प्रमाणे भवतः, प्रत्यक्षं च परोक्षकम् ॥ ९०९ ॥
स्वस्य ज्ञानस्वरूपस्य, घटादेर्यत्परस्य च । निश्चायकं ज्ञानमिह, तत्प्रमाणमिति स्मृतम् ॥ ९१० ॥
यदाहु :— 'स्वपरव्यवसायि ज्ञानं प्रमाणम्' । इति ॥
तत्रेन्द्रियानपेक्षं यज्जीवस्यैवोपजायते । तत्प्रत्यक्षं प्रमाणं स्यादन्त्यज्ञानत्रयात्मकम् ॥ ९११ ॥
इन्द्रियैर्हेतुभिर्ज्ञानं, यदात्मन्युपजायते । तत्परोक्षमिति ज्ञेयमाद्यज्ञानद्वयात्मकम् ॥ ९१२ ॥
प्रत्यक्षे च परोक्षे चापायांशो[1] निश्चयात्मकः । यः स एवात्र साकारः, प्रमाणव्यपदेशभाक् ॥ ९१३ ॥
यथाभिहितम्—'साकारः प्रत्ययः सर्वो, विमुक्तः संशयादिना । साकारार्थपरिच्छेदात्प्रमाणं तन्मनीषिणाम्' ॥
सामान्यैकगोचरस्य, दर्शनस्यात एव च । न प्रामाण्यं संशयादेरप्येवं न प्रमाणता ॥ ९१४ ॥
अत एव मतिज्ञाने, सम्यक्त्वदलिकान्वितः । योऽपायांशः स प्रमाणं, स्यात्पौद्गलिकसदृशाम् ॥ ९१५ ॥
प्रक्षीणसप्तकानां चापायांश एव केवलः । प्रमाणमप्रमाणं चावग्रहाद्या अनिर्णयात् ॥ ९१६ ॥

अयं च तत्त्वार्थवृत्त्याद्यभिप्रायः ॥ रत्नावतारिकादौ च मतिज्ञानस्य तद्भेदानामवग्रहादीनां च सांव्यावहारिकप्रत्यक्षप्रमाणत्वमुक्तम् । तथा च तद्ग्रन्थः—अवग्रहश्च ईहा च अवायश्च धारणा च ताभिर्भेदोविशेषस्तस्मात् प्रत्येक इन्द्रियानिन्द्रियनिबन्धनं प्रत्यक्षं चतुर्भेदम् । इति ॥

श्रुतज्ञानेऽप्यपायांशः, प्रमाणमनया दिशा । निमित्तापेक्षणादेते, परोक्षे इति कीर्त्तिते ॥ ९१७ ॥
परोक्षं ह्यनलज्ञानं, धूमज्ञाननिमित्तकम् । लोके तद्वदिमे ज्ञेये, इन्द्रियादिनिमित्तके ॥ ९१८ ॥
इदं च निश्चयनयापेक्षया व्यपदिश्यते । प्रत्यक्षव्यपदेशोऽपि, व्यवहारान्मतोऽनयोः ॥ ९१९ ॥

तथोक्तं नन्द्याम्—तं समासओ दुविहं पण्णत्तं । तं इंदियपच्चक्खं च नोइन्दियपच्चक्खं च इत्यादि ॥

ननु च–प्रत्यक्षमनुमानं चागमश्चेति त्रयं विदुः । प्रमाणं कापिला आक्षपादास्तत्रोपमानकम् ॥ ९२० ॥
मीमांसकाः षडर्थापत्त्यभावाभ्यां सहोचिरे । द्वे त्रीणि वा काणभुजा, द्वे बौद्धा आदितो विदुः ॥ ९२१ ॥
एकं च लौकायतिकाः, प्रमाणानीत्यनेकधा । परैरुक्तानि किं तानि, प्रमाणान्यथवान्यथा ॥ ९२२ ॥

---

१. प्रत्यक्षेऽपायांशकथनं विचारणीयम् ।

अत्रोच्यते—

एतान्याद्यज्ञानयुग्मेऽन्तर्भूतान्यखिलान्यपि । इन्द्रियार्थसंन्निकर्षनिमित्तकतया किल ॥ ९२३ ॥
अप्रमाणानि वाऽमूनि, मिथ्यादर्शनयोगतः । असद्बोधव्यापृतेश्चोन्मत्तवाक्यप्रयोगवत् ॥ ९२४ ॥
पञ्चानामप्यथैतेषां, सहभावो विचार्यते । एकं द्वे त्रीणि चत्वारि, स्युः सहैकत्र देहिनि ॥ ९२५ ॥
तथाहि—प्राप्तं निसर्गसम्यक्त्वं, येन स्यात्तस्य केवलम् । मतिज्ञानमनवाप्तश्रुतस्यापि शरीरिणः ॥ ९२६ ॥
अत एव मतिर्यत्र, श्रुतं तत्र न निश्चितम् । श्रुतं यत्र मतिज्ञानं तत्र निश्चितमेव हि ॥ ९२७ ॥

अयं तत्त्वार्थवृत्त्याद्यभिप्रायः ॥ नन्दीसूत्रादौ तु—'जत्थ मइनाणं तत्थ सुअनाणं । जत्थ सुअनाणं तत्थ मइनाणं' । इत्युक्तम् ॥ अतैवैकेन्द्रियाणामपि श्रुतज्ञानं स्वीकृतं श्रुते ॥ यथा — 'जह सुहुमं भाविंदियनाणं दव्विंदियावरोहेऽवि । दव्वसुआभावम्मिवि भावसुअं पत्थिवाईणं ॥ भावेन्द्रियोपयोगश्च बकुलादिवदेकेन्द्रियाणां सर्वेषां भाव्यः ॥ तथा मलयगिरिपूज्या अप्याहुः नन्दीवृत्तौ—यद्यपि तेषामेकेन्द्रियादीनां परोपदेशश्रवणासम्भवः तथापि तेषां तथाविधक्षयोपशमभावतः कश्चिदव्यक्तोऽक्षरलाभो भवति । यद्वशादक्षरानुषक्तं श्रुतज्ञानमुपजायते । इत्थं चैतदङ्गीकर्तव्यम्—तेषामप्याहाराद्यभिलाष उपजायते । अभिलाषश्च प्रार्थना । सा च यदीदमहं प्राप्नोमि तदा भव्यं भवतीत्याद्यक्षरानुविद्धैव । ततस्तेषामपि काचिदव्यक्ताक्षरोपलब्धिरवश्यं प्रतिपत्तव्या ॥ इति ॥

मतिज्ञानश्रुतज्ञानरूपे द्वे भवतः सह । त्रीणि ते सावधिज्ञाने, समनःपर्यवे तु वा ॥ ९२८ ॥
चतुर्णां सहभावोऽपि, छद्मस्थश्रमणे भवेत् । पञ्चानां सहभावे तु, मतद्वितयमुच्यते ॥ ९२९ ॥
केचिदूचुर्न नश्यन्ति, यथाऽर्केऽभ्युदिते सति । महांसि चन्द्रनक्षत्रदीपादीन्यखिलान्यपि ॥ ९३० ॥
भवन्त्यकिञ्चित्कराणि, किन्तु प्रकाशनं प्रति । छाद्मस्थिकानि ज्ञानानि, प्रोद्भूते केवले तथा ॥ ९३१ ॥
ततो न केवलेनैषां, सहभावो विरुध्यते । अव्यापारान्निष्फलानामप्यक्षाणामिवार्हति ॥ ९३२ ॥
अन्ये त्वाहुर्न सन्त्येव, केवलज्ञानशालिनि । छाद्मस्थिकानि ज्ञानानि, युक्तिस्तत्राभिधीयते ॥ ९३३ ॥
अपायसद्द्रव्याभावात्, मतिज्ञानं न सम्भवेत् । न श्रुतज्ञानमपि यत्तन्मतिज्ञानपूर्वकम् ॥ ९३४ ॥
रूपिद्रव्यैकविषये, न तृतीयतुरीयके । लोकालोकविषयकज्ञानस्य सर्ववेदिनः ॥ ९३५ ॥
क्षयोपशमजान्यन्यान्यन्त्यं च क्षायिकं मतम् । सहभावस्तदेतेषां, पञ्चानामेति नौचितीम् ॥ ९३६ ॥
कटे सत्युपकल्प्यन्ते, जालकान्यतराऽन्तरा । मूलतः कटनाशे तु, तेषां व्यवहृतिः कुतः? ॥ ९३७ ॥
किंच—ज्ञानदर्शनयोरेवोपयोगौ स्तो यथाक्रमम् । अशेषपर्यायद्रव्यबोधिनः सर्ववेदिनः ॥ ९३८ ॥
एकस्मिन् समये ज्ञानं दर्शनं चापरक्षणे । सर्वज्ञस्योपयोगौ द्वौ समयान्तरितौ सदा ॥ ९३९ ॥

तथाहु :— "नाणंमि दंसणंमि य, एत्तो एक्कतरयंमि उवउत्ता । सव्वस्स केवलिस्सवि, जुगवं दो नत्थि उवओगा" ॥
[आवश्यकनिर्युक्ति श्लो. ९०९]

इदं सैद्धान्तिकमतं, तार्किका: केचनोचिरे । स्यातामेवोपयोगौ द्वावेकस्मिन् समयेऽर्हत: ॥ ९४० ॥
अन्यथा कर्मण इव, स्यादावारकता मिथ: । एकैकस्योपयोगस्यान्योपयोगोदयद्रुह: ॥ ९४१ ॥
यच्चैतयो: साद्यनन्ता, स्थितिरुक्तोपयोगयो: । व्यर्था स्यात्साऽप्यनुदयादेकैकसमयान्तरे ॥ ९४२ ॥
अन्ये च केचन प्राहु: ज्ञानदर्शनयोरिह । नास्ति केवलिनो भेदो, नि:शेषावरणक्षयात् ॥ ९४३ ॥
ज्ञानैकदेश: सामान्यमात्रज्ञानं हि दर्शनम् । तत्कथं देशतो ज्ञानं, सम्भवेत्सर्ववेदिन: ॥ ९४४ ॥

उक्तं च— केइ भणंति जुगवं जाणइ पासइ य केवली नियमा । अन्ने एगंतरियं इच्छन्ति सुओवएसेणं ॥ अन्ने न चेव वीसुं, दंसणमिच्छन्ति जिणवरिन्दस्य । जं चिय केवलनाणं, तं चिय से दंसणं बिंति' ॥ अत्र च भूयान् युक्तिसन्दर्भोऽस्ति । स तु नन्दीवृत्तिसम्मत्यादिभ्योऽवसेय: ।

अथ प्रकृतम्—

विनैताभ्यां पर: कश्चिन्नोपयोगोऽर्हतां मत: । तत: कथं भवेत्तेषां, मत्यादिज्ञानसम्भव: ॥ ९४५ ॥

इत्यादि प्राय: अर्थत: तत्त्वार्थभाष्यवृत्तिगतम् ॥

अथ ज्ञानस्थितिर्द्वेधा, प्रज्ञप्ता परमेश्वरै: । साद्यनन्ता सादिसान्ता, तत्राद्या केवलस्थिति: ॥ ९४६ ॥
शेषज्ञानानां द्वितीया, तत्राद्यज्ञानयोर्लघु: । अन्तर्मुहूर्त्तमुत्कृष्टा, षट्षष्टि: सागराणि च ॥ ९४७ ॥

इयं चैवम्–

त्रयस्त्रिंशत्वार्धिमानौ, भवौ द्वौ विजयादिषु । द्वाविंशत्यब्धिमानान् वा, भवांस्त्रीनच्युतादिषु ॥ ९४८ ॥
कृत्वोत्कर्षात् शिवं यायात्, सम्यक्त्वमथवा त्यजेत् । सातिरेका नरभवै:, षट्षष्टिर्वार्धयस्तदा ॥ ९४९ ॥

यदाहु :– 'दो वारे विजयाइसु, गयस्स तिन्नच्चुए अहव ताइं । अइरेगं नरभवियं, नाणाजीवाण सव्वद्धं ॥ [विशेषावश्यक श्लो. ४३६]

अथोत्कृष्टावधिज्ञानस्थितिरेषैव वर्णिता । जघन्या चैकसमयं, सा त्वेवं परिभाव्यते ॥ ९५० ॥
यदा विभङ्गकज्ञानी, सम्यक्त्वं प्रतिपद्यते । तदा विभङ्गसमये, तस्मिन्नेवावधिर्भवेत् ॥ ९५१ ॥
क्षणे द्वितीये तद्ज्ञानं, चेत्पतेन्मरणादिना । तदा जघन्या विज्ञेयाऽवधिज्ञानस्थितिर्बुधै: ॥ ९५२ ॥
संयतस्याप्रमत्तत्वे, वर्तमानस्य कस्यचित् । मनोज्ञानं समुत्पद्य, द्वितीयसमये पतेत् ॥ ९५३ ॥
एवं मन:पर्यवस्य, स्थितिर्लघ्वी क्षणात्मिका । देशोना पूर्वकोटी तु, महती साऽपि भाव्यते ॥ ९५४ ॥
पूर्वकोट्यायुषो दीक्षाप्रतिपत्तेरनन्तरम् । मनोज्ञाने समुत्पन्ने, यावज्जीवं स्थिते च सा ॥ ९५५ ॥
स्थितिर्लघ्वी ऋजुमतिमनोज्ञानव्यपेक्षया । अन्यत्त्वप्रतिपातित्वादाकैवल्यं हि तिष्ठति ॥ ९५६ ॥
केवलस्थितिरुक्तैव, साद्यनन्तेत्यनन्तरम् । मत्यज्ञानश्रुताज्ञानस्थितिस्त्रेधा भवेदथ ॥ ९५७ ॥
अनाद्यनन्ताऽभव्यानां, भव्यानां द्विविधा पुन: । अनादिसान्ता साद्यन्ता, तत्राद्या ज्ञानसम्भवे ॥ ९५८ ॥
सादिसान्ता पुनर्द्वेधा, जघन्योत्कृष्टभेदत: । जघन्याऽन्तर्मुहूर्त्तं स्यात्, सा चैवं परिभाव्यते ॥ ९५९ ॥

जन्तोर्भ्रष्टस्य सम्यक्त्वात्, पुनरन्तर्मुहूर्त्ततः । सम्यक्त्वलब्धौ लघ्वी स्यादज्ञानद्वितयस्थितिः ॥ ९६० ॥
अनन्तकालचक्राणि, कालतः परमा स्थितिः । देशोनं पुद्गलपरावर्त्तार्द्धं, क्षेत्रतस्तु सा ॥ ९६१ ॥
भावना —
सम्यक्त्वतः परिभ्रश्य, वनस्पत्यादिषु भ्रमन् । सम्यक्त्वं लभतेऽवश्यं, कालेनैतावता पुनः ॥ ९६२ ॥
जघन्या त्वेकसमयं, विभङ्गस्य स्थितिः किल । उत्पद्य समयं स्थित्वा, भ्रश्यतः सा पुनर्भवेत् ॥ ९६३ ॥
त्रयस्त्रिंशत्सागराणि, विभङ्गस्य स्थितिर्गुरुः । देशोनया पूर्वकोट्याऽधिकानि तत्र भावना ॥ ९६४ ॥
देशोनपूर्वकोट्यायुः, कश्चिदङ्गी विभङ्गवान् । ज्येष्ठायुरप्रतिष्ठाने, तिष्ठेत् विभङ्गसंयुतः ॥ ९६५ ॥
इति ज्ञानस्थितिः ॥ अथान्तरम्—
मत्यादिज्ञानतो भ्रष्टः, पुनः कालेन यावता । ज्ञानमाप्नोति मत्यादिज्ञानानामन्तरं हि तत् ॥ ९६६ ॥
अनन्तकालचक्राणि, कालतः स्यान्मतिश्रुते । देशोनं पुद्गलपरावर्त्तार्द्धं क्षेत्रतोऽन्तरम् ॥ ९६७ ॥
एवमेवावधिमनःपर्यायज्ञानयोः परम् । अन्तर्मुहूर्त्तमात्रं च सर्वेष्वेष्वन्तरं लघु ॥ ९६८ ॥
केवलस्यान्तरं नास्ति, साद्यनन्ता हि तत्स्थितिः । अनाद्यन्तानादिसान्तेऽज्ञानद्वयेऽपि नान्तरम् ॥ ९६९ ॥
सादिसान्ते पुनस्तत्राधिकः षट्षष्टिसागराः । इयमुत्कृष्टसम्यक्त्वस्थितिरेव तदन्तरम् ॥ ९७० ॥
अन्तरं स्याद्विभङ्गस्य, ज्येष्ठं कालो वनस्पतेः । अन्तमुर्हूर्त्तमेतेषु, त्रिषु ज्ञेयं जघन्यतः ॥ ९७१ ॥
स्तोका मनोज्ञा अवधिमन्तोऽसंख्यगुणास्ततः । मतिश्रुतज्ञानवन्तो, मिथस्तुल्यास्ततोऽधिकाः ॥ ९७२ ॥
असंख्येयगुणास्तेभ्यो, विभङ्गज्ञानशालिनः । केवलज्ञानिनोऽनन्तगुणास्तेभ्यः प्रकीर्त्तिताः ॥ ९७३ ॥
तदनन्तगुणास्तुल्या मिथो द्व्यज्ञानवर्त्तिनः । अप्यष्टस्वेषु पर्याया, अनन्ताः कीर्त्तिता जिनैः ॥ ९७४ ॥
सर्वेषां पर्यवा द्वेधा, स्वकीयापरभेदतः । स्वधर्मरूपास्तत्र स्वे, परधर्मात्मकाः परे ॥ ९७५ ॥
क्षयोपशमवैचित्र्यान्मतेरवग्रहादयः । अनन्तभेदाः षट्स्थानपतितत्वाद् भवन्ति हि ॥ ९७६ ॥
षट् स्थानानि चैवम्—
संख्येयासंख्येयानन्तभागैर्वृद्धिर्यथाक्रमम् । संख्येयासंख्येयानन्तगुणैर्वृद्धिरितीह षट् ॥ ९७७ ॥
अनन्तासंख्यसंख्यानामनन्तासंख्यसंख्यकाः । भेदाः स्युरित्यनन्तास्ते, मतिज्ञानस्य पर्यवाः ॥ ९७८ ॥
प्रतिज्ञेयं मतिज्ञानं, विभिद्येत यतोऽथवा । ज्ञेयानन्त्यात्ततोऽनन्ता, मतिज्ञानस्य पर्यवाः ॥ ९७९ ॥
स्वेभ्योऽनन्तगुणा ये च, सन्त्यर्थान्तरर्पयवाः । यतस्तेऽत्रोपयुज्यन्ते, ततस्तेऽप्यस्य पर्यवाः ॥ ९८० ॥
निर्विभागैः परिच्छेदैः च्छिन्नं कल्पनयाथवा । अनन्तखण्डं भवतीत्यनन्ता मतिपर्यवाः ॥ ९८१ ॥
यद्यप्यस्मिन्नसंबद्धास्तथाप्यस्योपयोगतः । तेऽदसीया असंबद्धस्वोपयोगिधनादिवत् ॥ ९८२ ॥

आह च—ननु जह ते परपज्जाया, न तस्स अह तस्स न परपज्जाया । आचार्यः प्राह—
जं तंमि असंबद्धा तो परपज्जायववदेसो ॥ चायसपज्जायविसेसणाइणा तस्स जमुवजुज्जन्ति ।
सधणमिवासंबद्धं हवन्ति तो पज्जवा तस्स ॥ [विशेषावश्यक श्लो. ४८२, ४८३]

'चाय'त्ति त्यागेन स्वपर्यायविशेषणादिना च परपर्याया घटादिपर्याया येन कारणेन तस्य ज्ञानस्य उपयुज्यन्ते-उपयोगं यान्ति । यतः घटादिसकलवस्तुपर्यायपरित्यागे एव ज्ञानादिरर्थः सुज्ञातो भवतीति सर्वे पर पर्यायाः परित्यागमुखेन उपयुज्यन्ते । तथा परपर्यायसद्भावे एवैते स्वपर्यायेति विशेषयितुं शक्या इति । स्वपर्यायविशेषणेन परपर्याया उपयुज्यन्त इति तात्पर्यम् ॥

श्रुतेऽप्यनन्ताः पर्याया:, प्रोक्ताः स्वपरभेदतः । स्वीयास्तत्र च निर्दिष्टास्तेऽक्षरानक्षरादयः ॥ ९८३ ॥
क्षयोपशमवैचित्र्याद्विषयानन्त्यतश्च ते । श्रुतानुसारिबोधानामानन्त्यात्स्युरनन्तकाः ॥ ९८४ ॥
अविभागपरिच्छेदैरनन्ता वा भवन्ति ते । अनन्ताः परपर्याया, अप्यस्मिंस्ते तु पूर्ववत् ॥ ९८५ ॥
अथवा स्यात् श्रुतज्ञानं, श्रुतग्रन्थानुसारतः । श्रुतग्रन्थश्चाक्षरात्मा, तान्यकारादिकानि च ॥ ९८६ ॥
तच्चैकैकमुदात्तानुदात्तस्वरितभेदतः । अल्पानल्पप्रयत्नानुनासिकान्यविशेषतः ॥ ९८७ ॥
संयुक्तासंयुक्तयोगद्ध्यादिसंयोगभेदतः । आनन्त्याच्चाभिधेयानां, भिद्यमानमनन्तधा ॥ ९८८ ॥
केवलो लभतेऽकारः, शेषवर्णयुतश्च यान् । ते सर्वेऽस्य स्वपर्यायास्तदन्ये परपर्यवाः ॥ ९८९ ॥
एवं च—अनन्तस्वान्यपर्यायमेकैकमक्षरं श्रुते । पर्यायास्तेऽखिलद्रव्यपर्यायराशिसम्मिताः ॥ ९९० ॥

आह च— 'एक्केकमक्खरं पुण, सपरपज्जायभेयओ भिन्नम् । तं सव्वदव्वपज्जायरासिमाणं मुणेयव्वम् ॥ जे लहइ केवलो से सवण्णसहिओ अ पज्जवेऽगारो । ते तस्स पज्जाया सेसा परपज्जवा तस्स' ॥ [विशेषावश्यक श्लो. ४८०, ४८१]

अयं भावः—यान् पर्यायान् केवलः अकारः शेषवर्णसहितश्च लभते ते तस्य स्वपर्यायाः । शेषाः शेषवर्णसम्बन्धिनो घटाद्यपरपदार्थसम्बन्धिनश्च परपर्यायाः तस्य अकारस्य इति ॥

एवंविधानेकवर्णपर्यायौघैः समन्वितम् । ततश्चानन्तपर्यायं, श्रुतज्ञानं श्रुतं श्रुते ॥ ९९१ ॥
अथावधेः स्वपर्याया, विविधा या भिदोऽवधेः । क्षायोपशमिकभवप्रत्ययादिविभेदतः ॥ ९९२ ॥
तिर्यग्नैरयिकस्वर्गिनरादिस्वामिभेदतः । अनन्तभित्स्वविषयद्रव्यपर्यायभेदतः ॥ ९९३ ॥
असंख्यभित्स्वविषयक्षेत्राद्धाभेदतोऽपि च । निर्विभागैर्विभागैश्च ते चैवं स्युरनन्तकाः ॥ ९९४ ॥
एवं मनःपर्यवस्य केवलस्य च पर्यवाः । निर्विभागैर्विभागैः स्वैः स्वाम्यादिभेदतोऽपि च ॥ ९९५ ॥
अनन्तद्रव्यपर्यायज्ञानाच्च स्युरनन्तकाः । अज्ञानत्रितयेऽप्येवं, ज्ञेया अनन्तपर्यवाः ॥ ९९६ ॥
परपर्यवास्तु सर्वत्र प्राग्वत् ॥

अष्टाप्येतानि तुल्यानि, व्यपेक्ष्य स्वान्यपर्यवान् । यद्वक्ष्येऽल्पबहुत्वं तदपेक्ष्य स्वीयपर्यवान् ॥ ९९७ ॥

तत्र स्युः सर्वतः स्तोका, मनःपर्यायपर्यवाः । मनोद्रव्यैकविषयमिदं ज्ञानं भवेद्यतः ॥ ९९८ ॥
एभ्योऽनन्तगुणाः किं च, विभङ्गज्ञानपर्यवाः । मनोज्ञानापेक्षया यद्विभङ्गविषयो महान् ॥ ९९९ ॥
आरभ्य नवमग्रैवेयकादासप्तमक्षितिम् । ऊर्ध्वाधः क्षेत्रके तिर्यक्, चासंख्यद्वीपवार्धिके ॥ १००० ॥
रूपिद्रव्याणि कतिचित्तत्पर्यायांश्च वेत्ति सः । अनन्तघ्नास्ते च मनोज्ञानज्ञेयव्यपेक्षया ॥ १००१ ॥
समस्तरूपिद्रव्याणि प्रतिद्रव्यमसंख्यकान् । भावान् वेत्तीत्यनन्तघ्ना, विभङ्गापेक्षयाऽवधौ ॥ १००२ ॥
अनन्तगुणितास्तेभ्यः, श्रुताज्ञानं इदं यतः । सर्वमूर्त्तामूर्त्तद्रव्यसर्वपर्यायगोचरम् ॥ १००३ ॥
श्रुताज्ञानाविषयाणां, केषाञ्चित् विषयत्वतः । स्पष्टत्वाच्च श्रुतज्ञाने, तेभ्यो विशेषतोऽधिकाः ॥ १००४ ॥
अभिलाप्यानभिलाप्यविषयेऽनन्तसंगुणाः । मत्यज्ञाने श्रुतज्ञानादभिलाप्यैकगोचरात् ॥ १००५ ॥
मतिज्ञानपर्यवाश्च, ततो विशेषतोऽधिकाः । मत्यज्ञानाविषयाणां, विषयत्वात् स्फुटत्वतः ॥ १००६ ॥
तेभ्योऽप्यनन्तगुणिताः, केवलज्ञानपर्यवाः । सर्वोद्धाभाविनिखिलद्रव्यपर्यायभासनात् ॥ १००७ ॥
इति ज्ञानम् ॥ २६ ॥ अथ दर्शनम् ।
द्विरूपं हि भवेद्वस्तु, सामान्यतो विशेषतः । तत्र सामान्यबोधो यस्तद्दर्शनमिहोदितम् ॥ १००८ ॥
यथा प्रथमतो दृष्टो घटोऽयमिति बुध्यते । तद्दर्शनं तद्विशेषबोधो ज्ञानं भवेत्त्वतः ॥ १००९ ॥
उपचारनयेनेदं, दर्शनं परिकीर्त्तितम् । विशुद्धनयतस्तच्चानाकारज्ञानलक्षणम् ॥ १०१० ॥
इदं साकारबोधात्प्रागवश्यमभ्युपेयते । अन्यथेदं किञ्चिदिति, स्यात्कुतोऽव्यक्तबोधनम् ॥ १०११ ॥
अनेन च विनापि स्यात्, बोधो साकार एव चेत् । तदैकसमयेनैव, स्याद्घटादिविशेषवित् ॥ १०१२ ॥

तथोक्तं तत्त्वार्थवृत्तौ—"औपचारिकनयश्च ज्ञानप्रकारमेव दर्शनमिच्छति । शुद्धनयः पुनरनाकारमेव संगिरते दर्शनम् । आकारवच्च विज्ञानम् । आकारश्च विशेषनिर्देशो भावस्य पर्यायतः प्रोक्तः स च दर्शनसमनन्तरमेव संपद्यते, अन्तर्मुहूर्तकालभावित्वात् । आकारपरिज्ञानाच्च प्रागालोचनमवश्यमभ्युपेयम् । अन्यथा प्रथमत एव पश्यतः किमपि इदमिति कुतोऽव्यक्तबोधनं स्यात् ? यदि चालोचनमन्तरेणाकारपरिज्ञानोत्पाद एव पुंसः स्यात् तथासत्येकसमयमात्रेण स्तम्भकुम्भादीन् विशेषान् गृह्णीयात्" इति ॥

सामान्येनावबोधो यश्चक्षुषा जायतेऽङ्गिनाम् । तच्चक्षुदर्शनं प्राहुस्तत्स्यादाचतुरिन्द्रियात् ॥ १०१३ ॥
यः सामान्यावबोधः स्याच्चक्षुर्वर्जापरेन्द्रियैः । अचक्षुर्दर्शनं तत्स्यात्, सर्वेषामपि देहिनाम् ॥ १०१४ ॥

तथोक्तं तत्त्वार्थवृत्तौ—"चक्षुर्दर्शनमित्यादि । चक्षुषा दर्शनं – उपलब्धिः सामान्यार्थग्रहणम् । स्कन्धावारोपयोगवत् तदहर्जातबालदारकनयनोपलब्धिवत् वा व्युत्पन्नस्यापि । अचक्षुर्दर्शनं – शेषेन्द्रियैः श्रोत्रादिभिः सामान्यार्थग्रहणम् ॥ इति ॥

येनावधेरुपयोगे, सामान्यमवबुध्यते । अवधिज्ञानिनामेव, तत्स्यादवधिदर्शनम् ॥ १०१५ ॥

यथैवमवधिज्ञाने, भवत्यवधिदर्शनम् । एवं विभङ्गेऽप्यवधिदर्शनं कथितं श्रुते ॥ १०१६ ॥

अयं भावः—

सम्यग्दृगवधिज्ञाने, सामान्यावगमात्मकम् । यथैतत्स्यात्तथा मिथ्यादृग्विभङ्गेऽपि तद् भवेत् ॥ १०१७ ॥

नाम्ना च कथितं प्राज्ञैस्तदप्यवधिदर्शनम् । अनाकारत्वाविशेषाद्विभङ्गदर्शनं न तत् ॥ १०१८ ॥

अयं सूत्राभिप्रायः ॥

आहुः कार्मग्रन्थिकास्तु, यद्यपि स्तः पृथक्पृथक् । साकारेतरभेदेन, विभङ्गावधिदर्शने ॥ १०१९ ॥

तथापि मिथ्यारूपत्वान्न सम्यग्वस्तुनिश्चयः । विभङ्गान्नाप्यनाकारत्वेनास्यावधिदर्शनात् ॥ १०२० ॥

ततोऽनेन दर्शनेन, पृथग्विवक्षितेन किम् । तत्कार्मग्रन्थिकैर्नास्य, पृथगेतद्विवक्षितम् ॥ १०२१ ॥

तथोक्तम्— 'सुत्ते अ विभंगस्स य, परूवियं ओहिदंसणं बहुसो । कीस पुणो पडिसिद्धं, कम्मपगडीपगरणंमि ॥

इत्याद्यधिकं विशेषणवत्याः प्रज्ञापनाष्टादशपदवृत्तितश्चावसेयम् ॥ तत्त्वार्थवृत्तिकृताऽपि विभङ्गज्ञानेऽवधिदर्शनं नाङ्गीकृतम् । तथा च तद्ग्रन्थः—"अवधिदृगावरणक्षयोपशमात् विशेषग्रहणविमुखोऽवधिदर्शनमित्युच्यते । नियमतस्तु तत्सम्यग्दृष्टिस्वामिकम्" । इति ॥

सर्वं भूतभवद्भाविवस्तु सामान्यभावतः । बुध्यते केवलज्ञानादनु केवलदर्शनात् ॥ १०२२ ॥

आदौ दर्शनमन्येषां, ज्ञानं तदनु जायते । केवलज्ञानिनामादौ, ज्ञानं तदनु दर्शनम् ॥ १०२३ ॥

अत एव 'सव्वन्नूणं सव्वदरिसीणं' इति पठ्यते ॥ [शक्रस्तव]

प्रज्ञप्ताः सर्वतः स्तोका, जन्तवोऽवधिदर्शनाः । असंख्यगुणितास्तेभ्यश्चक्षुर्दर्शनिनो मताः ॥ १०२४ ॥

अनन्तगुणितास्तेभ्यो, मताः केवलदर्शनाः । अचक्षुर्दर्शनास्तेभ्योऽप्यनन्तगुणिताधिकाः ॥ १०२५ ॥

कालश्चक्षुर्दर्शनस्य, जघन्योऽन्तर्मुहूर्त्तकम् । सातिरेकं पयोराशिसहस्रं परमः पुनः ॥ १०२६ ॥

अचक्षुर्दर्शनस्यासावभव्यापेक्षया भवेत् । अनाद्यन्तोऽनादिसान्तो, भव्यानां सिद्धियायिनाम् ॥ १०२७ ॥

जघन्येनैकसमयः, स्यात्कालोऽवधिदर्शने । उत्कर्षतो द्विःषट्षष्टिर्वार्धयः साधिका मताः ॥ १०२८ ॥

ज्येष्ठो नन्ववधिज्ञानकालः षट्षष्टिवार्धयः । अवधेर्दर्शने तर्हि यथोक्तो घटते कथम् ॥ १०२९ ॥

अत्रोच्यते—

अवधौ च विभङ्गे चावधिदर्शनमास्थितम् । ततो द्वाभ्यां सहभावाद्युक्तः सोऽवधिदर्शने ॥ १०३० ॥

अत्र बहु वक्तव्यम्, तत्तु प्रज्ञापनाष्टादशपदवृत्तितोऽवसेयम् ॥

कालः सादिरनन्तश्च, भवेत्केवलदर्शने । एषु कस्याप्यनादित्वं, नाचक्षुर्दर्शनं विना ॥ १०३१ ॥

इति दर्शनम् ॥ २७ ॥

चतुष्टयी दर्शनानां, त्र्यज्ञानी ज्ञानपञ्चकम् । अमी द्वादश निर्दिष्टा, उपयोगा बहुश्रुतैः ॥ १०३२ ॥

ज्ञानपञ्चकज्ञानत्रयं साकारका अमी । उक्ताः शेषास्त्वनाकाराश्चतुर्दर्शनलक्षणाः ॥ १०३३ ॥

इत्युपयोगाः ॥ २८ ॥

आहारकाः स्युः छद्मस्थाः, सर्वे वक्रगतिं विना । त्रिचतुः समयान्ता स्यात्तत्रानाहारितापि च ॥ १०३४ ॥

गतिर्द्विधा हि जन्तूनां, प्रस्थितानां परं भवम् । सरला कुटिला चापि, तत्रैकसमयाऽऽदिमा ॥ १०३५ ॥

उत्पत्तिदेशो यत्र स्यात्समश्रेणिव्यवस्थितः । तत्रैकसमयेनैव, ऋजुगत्याऽसुमान् व्रजेत् ॥ १०३६ ॥

परजन्मायुराहारौ, क्षणेऽस्मिन्नेव सोऽश्नुते । तुल्यमेतदृजुगतौ, निश्चयव्यवहारयोः ॥ १०३७ ॥

द्वितीयसमयेऽनृज्व्या, व्यवहारनयाश्रयात् । उदेति परजन्मायुरिदं तात्पर्यमत्र च ॥ १०३८ ॥

प्राग्भवान्त्यक्षणो वक्रपरिणामाभिमुख्यतः । कैश्चिद्वक्रादिसमयो, गण्यते व्यवहारतः ॥ १०३९ ॥

ततश्च—भवान्तराद्यसमये, गतेस्त्वस्मिन् द्वितीयके । समये परजन्मायुरुदेति खलु तन्मते ॥ १०४० ॥

यदाहुः—'उज्जुगइ पढमसमए परभवियं आउअं तहाहारो । वक्काइ बीअसमए परभविआउं उदयमेइ ॥ [बृहत्संग्रहणी गाथा-३३०]

निश्चयनयाश्रयाच्च—

संमुखोऽङ्गी गतेर्यद्यप्यन्त्यक्षणे तथापि हि । सत्त्वात्प्राग्भवसम्बन्धिसंघातपरिशाटयोः ॥ १०४१ ॥

समयः प्राग्भव[1]स्यैष, सम्भवेन्न पुनर्गतेः । प्राच्याङ्गसर्वशाटोऽग्रभवाद्यक्षण एव यत् ॥ १०४२ ॥

'परभवपढमे साडो'त्ति आगमवचनात् ॥

उदेति समयेऽत्रैव, गतिः सह तदायुषा । ततोऽन्यजन्मायुर्वक्रगतावप्यादिमक्षणे ॥ १०४३ ॥

तत्र संघातपरिशाटस्वरूपं चैवमागमे—

संघातः परिशाटश्च, तौ द्वौ समुदिताविति । औदारिकादिदेहानां, प्रज्ञप्तं करणत्रयम् ॥ १०४४ ॥

सर्वात्मना पुद्गलानामाद्ये हि ग्रहणं क्षणे । चरमे सर्वथा त्यागो, द्वितीयादिषु चोभयम् ॥ १०४५ ॥

यथा तप्ततापिकायां, सस्नेहायामपूपकः । गृह्णाति प्रथम स्नेहं, सर्वात्मना न तु त्यजेत् ॥ १०४६ ॥

ततश्च किञ्चिद् गृह्णाति, स्नेहं किञ्चित्पुनस्त्यजेत् । संघातभेदरूपत्वात्पुद्गलानां स्वभावतः ॥ १०४७ ॥

तथैव प्रथमोत्पन्नः, प्राणभृत् प्रथमक्षणे । सर्वात्मनोत्पत्तिदेशस्थितान् गृह्णाति पुद्गलान् ॥ १०४८ ॥

ततश्चाभवपर्यन्त, द्वितीयादिक्षणेषु तु । गृह्णस्त्यजंश्च तान् कुर्यात्, संघातपरिशाटनम् ॥ १०४९ ॥

तत आयुःसमाप्तौ च, भाव्यायुःप्रथमक्षणे । स्यात् शाट एव प्राग्देहपुद्गलानां तु न ग्रहः ॥ १०५० ॥

औदारिकवैक्रियाहारकेषु स्युस्त्रयोऽप्यमी । संघातपरिशाटः स्यात्तैजसे कार्मणे सदा ॥ १०५१ ॥

अनादित्वात् भवेन्नैव, संघातः केवलोऽनयोः । केवलः परिशाटश्च, सम्भवेन्मुक्तियायिनाम् ॥ १०५२ ॥

---

१. सयैव—सयैव इति पाठः ।

अत्र च भूयान् विस्तरोऽस्ति स चावश्यकवृत्त्यादिभ्योऽवसेयः अथ प्रकृतम्–

वक्रा गतिश्चतुर्धा स्याद्वक्रैरेकादिभिर्युता । तत्राद्या द्विक्षणैकैकक्षणवृद्ध्या क्रमात्परा: ॥ १०५३ ॥

तथाहि—

यदोर्ध्वलोकपूर्वस्या, अधः श्रयति पश्चिमाम् ॥ एकवक्रा द्विसमया, ज्ञेया वक्रा गतिस्तदा ॥ १०५४ ॥

समश्रेणिगतित्वेन, जन्तुरेकेन यात्यधः । द्वितीयसमये तिर्यग्, उत्पत्तिदेशमाश्रयेत् ॥ १०५५ ॥

पूर्वदक्षिणोर्ध्वदेशादधश्चेदपरोत्तराम् । व्रजेत्तदा द्विकुटिला, गतिस्त्रिसमयात्मिका ॥ १०५६ ॥

एकेनाधस्समश्रेण्या, तिर्यगन्येन पश्चिमाम् । तिर्यगेव तृतीयेन, वायव्यां दिशि याति सः ॥ १०५७ ॥

त्रसानामेतदन्तैव, वक्रा स्यान्नाधिका पुनः । स्थावराणां चतुःपञ्चसमयान्तापि सा भवेत् ॥ १०५८ ॥

तत्र चतुःसमया त्वेवं—

त्रसनाड्या बहिरधोलोकस्य विदिशो दिशम् । यात्येकेन द्वितीयेन, त्रसनाड्यन्तरे विशेत् ॥ १०५९ ॥

ऊर्ध्वं याति तृतीयेन, चतुर्थे समये पुनः । त्रसनाड्या विनिर्गत्य, दिश्यं स्वस्थानमाश्रयेत् ॥ १०६० ॥

दिशो विदिशि याने तु, नाडीमाद्ये द्वितीयके । ऊर्ध्वं [1]चाधस्तृतीये तु, बहिर्विदिशि तुर्यके ॥ १०६१ ॥

यदोक्तरीत्या विदिशो, जायेत विदिशि क्वचित् । तदा तत्समयाधिक्यात्, स्यात्पञ्चसमया गतिः ॥ १०६२ ॥

उक्तं च—'विदिसाओ दिसं पढमे, बीए पइसरइ नाडिमज्झंमि । उड्ढं तइए तुरिए उ, नीइ विदिसं तु पंचमए' ॥

इति भगवतीवृत्तौ शतक १४ प्रथमोद्देशके ॥ भगवतीसप्तमशतकप्रथमोद्देशके तु पञ्चसामयिकीं विग्रहगतिमाश्रित्य इत्थमुक्तं दृश्यते । इदं च सूत्रे न दर्शितम् । प्रायेणेत्थमनुत्पत्तिरिति ॥

व्यवहारापेक्षया च, भवेदाहारकोऽसुमान् । गतौ किलैकवक्रायां, समयद्वितयेऽपि हि ॥ १०६३ ॥

तथाहि समये पूर्वे, शरीरमेष उत्सृजेत् । तस्मिन्पुनः तच्छरीरयोग्याः केचन पुद्गलाः ॥ १०६४ ॥

लोमाहारेण सम्बन्धमायान्ति जीवयोगतः । औदारिकादिपुद्गलादानं चाहार उच्यते ॥ १०६५ ॥

एवमत्राद्यसमये, आहारः परिभावितः । सर्वत्रैव द्विवक्रादावप्याद्यक्षण आहृतिः ॥ १०६६ ॥

द्वितीयसमये चासावुत्पत्तिदेशमापतेत् । तदा तद्भवयोग्याणून्, यथासम्भवमाहरेत् ॥ १०६७ ॥

द्विवक्रा तु त्रिसमया, मध्यस्तत्र निराहृतिः । आद्यन्तयोः समययोराहारः पुनरुक्तवत् ॥ १०६८ ॥

एवं च त्रिचतुर्वक्रे, चतुःपञ्चक्षणात्मके । मध्यास्तयोर्निराहाराः, साहारावादिमान्तिमौ ॥ १०६९ ॥

यदाहुः–इगदुतिचउवक्कासु, दुगाइसमयेसु परभवाहारो । दुगवक्काइसु समया, इगदोतिन्नि उ अणाहारा ॥ [बृहत्संग्रहणी गाथा-३३१]

भवस्य भाविनः पूर्वे, क्षणे प्राग्वपुषा सह । असम्बन्धादनाप्त्या च, भाविनोऽङ्गस्य नाहृतिः ॥ १०७० ॥

---

१. वा इति पाठः

द्वितीयसमये तु स्वं, स्थानं प्राप्याहरेत्ततः । समयः स्यादनाहार, एकवक्रागतावपि ॥ १०७१ ॥
अन्यस्यां द्वावनाहारौ, तृतीयस्यां त्रयस्तथा । चतुर्थ्यामपि चत्वारः, साहारोऽन्त्योऽखिलासु यत् ॥ १०७२ ॥
ततश्च व्यवहारेणोत्कर्षतः समयास्त्रयः । निश्चयेन तु चत्वारो, निराहाराः प्रकीर्त्तिताः ॥ १०७३ ॥
सामान्यात् सर्वतः स्तोका, निराहाराः शरीरिणः । आहारका असंख्येयगुणास्तेभ्यः प्रकीर्त्तिताः ॥ १०७४ ॥
त्रिविधश्च स आहार, ओज आहार आदिमः । लोमाहारो द्वितीयश्च, प्रक्षेपाख्यस्तृतीयकः ॥ १०७५ ॥
तत्राद्यं देहमुत्सृज्य, ऋज्व्या कुटिलयाथवा । गत्वोत्पत्तिस्थानमाप्य, प्रथमे समयेऽसुमान् ॥ १०७६ ॥
तैजसकार्मणयोगेनाहारयति पुद्गलान् । औदारिकाद्याङ्गयोग्यान्, द्वितीयादिक्षणेष्वथ ॥ १०७७ ॥
औदारिकादिमिश्रेणारब्धत्वाद्वपुषस्ततः । यावच्छरीरनिष्पत्तिरन्तर्मुहूर्त्तकालिकी ॥ १०७८ ॥
यदाहु :—'तेएण कम्मएणं, आहारेइ अणंतरं जीवो । तेण परं मीसेणं, जाव सरीरस्स निप्फत्ती' ॥
स सर्वोऽप्योजआहार, ओजो देहार्हपुद्गलाः । ओजो वा तैजसः कायस्तद्रूपस्तेन वा कृतः ॥ १०७९ ॥
शरीरोपष्टम्भकानां, पुद्गलानां समाहृतिः । त्वगिन्द्रियादिस्पर्शेन, लोमाहारः स उच्यते ॥ १०८० ॥
मुखे कवलनिक्षेपादसौ कावलिकाभिधः । एकेन्द्रियाणां देवानां, नारकाणां च न ह्यसौ ॥ १०८१ ॥
जीवाः सर्वेऽप्यपर्याप्ता, ओज आहारिणो मताः । देहपर्याप्तिपर्याप्ता, लोमाहाराः समेऽङ्गिनः ॥ १०८२ ॥
ओजसोऽनाभोग एव लोमस्त्वाभोगजोऽपि च । एकेन्द्रियाणां लोमोऽपि, स्यादनाभोग एव हि ॥ १०८३ ॥

तथोक्तं संग्रहणीवृत्तौ—'एकेन्द्रियाणामतिस्तोकापदुमनोद्रव्यलब्धीनामाभोगमान्द्यात् वस्तुतोऽनाभोगनिर्वर्त्तित एव' ॥ यदागमः—'एगेंदियाणं नो आभोगः निव्वत्तिए, अणाभोगनिव्वत्तिए । इति ॥

द्विक्षणोनो भवः क्षुल्लो, जघन्या कायसंस्थितिः । आहारित्वे गरिष्ठा च, कालचक्राण्यसंख्यशः ॥ १०८४ ॥
इत्याहारः ॥ २९ ॥
गुणा नाम गुणस्थानान्यमूनि च चतुर्दश । वक्ष्मि स्वरूपमेतेषामन्वर्थं व्यक्तिपूर्वकम् ॥ १०८५ ॥
तथाहुः—कर्मग्रन्थादौ [कर्मग्रन्थ-२ गाथा-२]
मिच्छे सासण मीसे, अविरय देसे पमत्त अपमत्ते । नियट्टी अनियट्टी, सुहुमुवसम खीण सजोगि अजोगि गुणा ॥
गुणा ज्ञानदयस्तेषां, स्थानं नाम स्वरूपभित् । शुद्ध्यशुद्धिप्रकर्षापकर्षोत्थाऽत्र प्रकीर्त्यते ॥ १०६६ ॥
तत्र मिथ्या विपर्यस्ता, जिनप्रणीतवस्तुषु । दृष्टिर्यस्य प्रतिपत्तिः, स मिथ्यादृष्टिरुच्यते ॥ १०८७ ॥
यत्तु तस्य गुणस्थानं, सम्यग्दृष्टिमबिभ्रतः । मिथ्यादृष्टिगुणस्थानं, तदुक्तं पूर्वसूरिभिः ॥ १०८८ ॥
ननु मिथ्यादृशां दृष्टेर्विपर्यासात्कुतो भवेत् । ज्ञानादिगुणसद्भावो यद्गुणस्थानतोच्यते ॥ १०८९ ॥
अत्र ब्रूमः—भवेद्यद्यपि मिथ्यात्ववतामसुमतामिह । प्रतिपत्तिर्विपर्यस्ता, जिनप्रणीतवस्तुषु ॥ १०९० ॥

तथापि काचित् मनुजपश्वादिवस्तुगोचरा । तेषामप्यविपर्यस्ता, प्रतिपत्तिर्भवेद् ध्रुवम् ॥ १०९१ ॥
आस्तामन्ये मनुष्याद्या, निगोददेहिनामपि । अस्त्यव्यक्तस्पर्शमात्रप्रतिपत्तिर्यथास्थिता ॥ १०९२ ॥
यथा घनघनच्छन्नेऽर्केऽपि स्यात्कापि तत्प्रभा । अनावृत्ता न चेद्रात्रिदिनाभेदः प्रसज्यते ॥ १०९३ ॥
इति प्रथमगुणस्थानम् ॥
आयमौपशमिकाख्यं, सम्यक्त्वस्यात्र सादयेत् । योऽनन्तानुबन्धिकषायोदयः साऽऽयसादनः ॥ १०९४ ॥
उत्कर्षादावलीषट्कात्, सम्यक्त्वमपगच्छति । अनन्तानुबन्ध्युदये, जघन्यात्समयेन यत् ॥ १०९५ ॥
पृषोदरादित्वाल्लोपे, यकारस्य भवेत्पदम् । आसादनमित्यनन्तानुबन्ध्युदयवाचकम् ॥ १०९६ ॥
ततश्च–
आसादनेन युक्तो यः, स सासादन उच्यते । स चासौ सम्यग्दृष्टिस्तद्, गुणस्थानं द्वितीयकम् ॥ १०९७ ॥
तच्चैवम्– प्रागुक्तस्यौपशमिकसम्यक्त्वस्य जघन्यतः । शेषे क्षणे षट्सु शेषासूत्कर्षादावलीष्वथ ॥ १०९८ ॥
महाबिभीषिकोत्थानकल्पः केनापि हेतुना । कस्याप्यनन्तानुबन्धिकषायाभ्युदयो भवेत् ॥ १०९९ ॥
अथैतस्मिन्ननन्तानुबन्धिनामुदये सति । सासादनसम्यग्दृष्टिगुणस्थानं स्पृशत्यसौ ॥ ११०० ॥
यदिवोपशमश्रेण्याः, स्यादिदं पततोऽङ्गिनः । सम्यक्त्वस्यौपशमिकस्यान्ते कस्यापि पूर्ववत् ॥ ११०१ ॥
तत ऊर्ध्वं च मिथ्यात्वमवश्यमेष गच्छति । पतन् द्वितीयसोपानादाद्यमेव हि गच्छति ॥ ११०२ ॥
नाम्ना सास्वादनसम्यग्दृग्गुणस्थानमप्यदः । उच्यते तत्र चान्वर्थो, मतिमद्भिरयं स्मृतः ॥ ११०३ ॥
उद्गम्यमानसम्यक्त्वास्वादनेन सहास्ति यः । स हि सास्वादनसम्यग्दृष्टिरित्यभिधीयते ॥ ११०४ ॥
यथाहि भुक्तं क्षीरान्नमुद्गमन्मक्षिकादिना । किञ्चिदास्वादयत्येव, तद्रसं व्यग्रमानसः ॥ ११०५ ॥
तथाऽयमपि मिथ्यात्वाभिमुखो भ्रान्तमानसः । सम्यक्त्वमुद्गमन्नास्वादयेत्किञ्चन तद्रसम् ॥ ११०६ ॥
इति द्वितीयम् ॥
पूर्वोक्तपुञ्जत्रितये, स यद्यर्धविशुद्धकः । समुदेति तदा तस्योदयेन स्याच्छरीरिणः ॥ ११०७ ॥
श्रद्धा जिनोक्ततत्त्वेऽर्धविशुद्धाऽसौ तदोच्यते । सम्यग्मिथ्यादृष्टिरिति, गुणस्थानं च तस्य तत् ॥ ११०८ ॥
अन्तर्मुहूर्तं कालोऽस्य, तत ऊर्ध्वं स देहभृत् । अवश्यं याति मिथ्यात्वं, सम्यक्त्वमथवाऽऽप्नुयात् ॥ ११०९ ॥
इति तृतीयम् ॥
सावद्ययोगाविरतो, यः स्यात्सम्यक्त्ववानपि । गुणस्थानमविरतसम्यग्दृष्ट्याख्यमस्य तत् ॥ १११० ॥
पूर्वोक्तमौपशमिकं, शुद्धपुञ्जोदयेन वा । क्षायोपशमिकाभिख्यं, सम्यक्त्वं प्राप्तवानपि ॥ ११११ ॥
सम्यक्त्वं क्षायिकं वाऽऽप्तो, क्षीणदर्शनसप्तकः । कलयन्नपि सावद्यविरतिं मुक्तिदायिनीम् ॥ १११२ ॥
नैवाप्रत्याख्याननामकषायोदयविघ्नतः । स देशतोऽपि विरतिं, कर्त्तुं पालयितुं क्षमः ॥ १११३ ॥

इति चतुर्थम् ॥

स्थूलसावद्यविरमाद्यो देशविरतिं श्रयेत् । स देशविरतस्तस्य, गुणस्थानं तदुच्यते ॥ १११४ ॥
सर्वसावद्यविरतिं, जानतोऽप्यस्य मुक्तिदाम् । तदावृतौ प्रत्याख्यानावरणा यान्ति विघ्नताम् ॥ १११५ ॥

इति पंचमम् ॥

संयतस्सर्वसावद्ययोगेभ्यो विरतोऽपि यः । कषायनिद्राविकथादिप्रमादैः प्रमाद्यति ॥ १११६ ॥
स प्रमत्तः संयतोऽस्य, प्रमत्तसंयताभिधम् । गुणस्थानं प्राक्तनेभ्यः, स्याद्विशुद्धिप्रकर्षभृत् ॥ १११७ ॥
वक्ष्यमाणेभ्यश्च तेभ्यः, स्याद्विशुद्ध्यपकर्षभृत् । शुद्धिप्रकर्षापकर्षावेवं भाव्यौ परेष्वपि ॥ १११८ ॥

इति षष्ठम् ॥

यश्च निद्राकषायादिप्रमादरहितो यतिः । गुणस्थानं भवेत्तस्याप्रमत्तसंयताभिधम् ॥ १११९ ॥

इति सप्तमम् ॥

स्थितिघातो रसघातो, गुणश्रेणिस्तथा परा । गुणानां संक्रमश्चैव बन्धो भवति पञ्चमः ॥ ११२० ॥
एषां पञ्चानामपूर्वं करणं प्रागपेक्षया । भवेद्यस्यासावपूर्वकरणो नाम कीर्त्तितः ॥ ११२१ ॥
गरीयस्याः स्थितेर्ज्ञानावरणीयादिकर्मणाम् । योऽपवर्त्तनया घातः, स्थितिघातः स उच्यते ॥ ११२२ ॥
कर्मद्रव्यस्थकटुकत्वादिकस्य रसस्य हि । योऽपवर्त्तनया घातो, रसघातः स कीर्त्यते ॥ ११२३ ॥
एतौ पूर्वगुणस्थानेष्वल्पावेव करोति सः । विशुद्ध्यल्पतयाऽस्मिंस्तु, महान्तौ शुद्धिवृद्धितः ॥ ११२४ ॥
यत्प्रागाश्रित्य दलिकरचनां तां लघीयसीम् । चकार कालतो द्राघीयसीं शुद्ध्यपकर्षतः ॥ ११२५ ॥
अस्मिंस्त्वाश्रित्य दलिकरचनां तां प्रथीयसीम् । करोति कालतोऽल्पां तदपूर्वा प्रागपेक्षया ॥ ११२६ ॥
तथा बध्यमानशुभप्रकृतिष्वशुभात्मनाम् । तासामबध्यमानानां, दलिकस्य प्रतिक्षणे ॥ ११२७ ॥
असंख्यगुणवृद्ध्या यः, क्षेपः स गुणसंक्रमः । तमप्यपूर्वं कुर्वीत, सोऽत्र शुद्धिप्रकर्षतः ॥ ११२८ ॥
स्थितिं द्राघीयसीं पूर्वगुणस्थानेषु बद्धवान् । अशुद्धत्वादिह पुनस्तामपूर्वां विशुद्धितः ॥ ११२९ ॥
पल्यासंख्येयभागेन, हीनहीनतरां सृजेत् । तद् गुणस्थानमस्य स्यादपूर्वकरणाभिधम् ॥ ११३० ॥
क्षपकश्चोपशमकश्चेत्यसौ भवति द्विधा । क्षपणोपशमार्हत्वादेवायं प्रोच्यते तथा ॥ ११३१ ॥
न यद्यपि क्षपयति, न चोपशमयत्ययम् ॥ तथाप्युक्तस्तथा राज्यार्हः कुमारो यथा नृपः ॥ ११३२ ॥
अन्तर्मुहूर्त्तमानाया, अपूर्वकरणस्थितेः । आद्य एव क्षण एतद्गुणस्थानं प्रपन्नकान् ॥ ११३३ ॥
त्रैकालिकाङ्गिनोऽपेक्ष्य, जघन्यादीन्यसंख्यशः । स्थानान्यध्यवसायस्योत्कृष्टान्तानि भवन्ति हि ॥ ११३४ ॥
असंख्यलोकाकाशांशमितानि स्युरमूनि च । ततोऽधिकाधिकानि स्युर्द्वितीयादिक्षणेषु तु ॥ ११३५ ॥
आद्ये क्षणे यज्जघन्यं, ततोऽनन्तगुणोज्जलम् । भवेदाद्यक्षणोत्कृष्टं, ततोऽनन्तगुणाधिकम् ॥ ११३६ ॥

क्षणे द्वितीये जघन्यमेवमन्त्यक्षणावधि । मिथः षट्स्थानपतितान्येकक्षणभवानि तु ॥ ११३७ ॥
समकालं प्रपन्नानां, गुणस्थानमिदं खलु । बहूनां भव्यजीवानां, वर्त्तते यत्परस्परम् ॥ ११३८ ॥
उक्तरूपाध्यवसायस्थानव्यावृत्तिलक्षणा । निवृत्तिस्तन्निवृत्त्याख्यमप्येतत्कीर्त्यते बुधैः ॥ ११३९ ॥
इत्यष्टमम् ॥ तथा—
परस्पराध्यवसायस्थानव्यावृत्तिलक्षणा । निवृत्तिर्यस्य नास्त्येषोऽनिवृत्ताख्योऽसुमान् भवेत् ॥ ११४० ॥
तथा किट्टीकृतसूक्ष्मसम्परायव्यपेक्षया । स्थूलो यस्यास्त्यसौ स स्यादबादरसंपरायकः ॥ ११४१ ॥
ततः पदद्वयस्यास्य, विहिते कर्मधारये । स्यात्सोऽनिवृत्तिबादरसंपरायाभिधस्ततः ॥ ११४२ ॥
तस्यानिवृत्तिबादरसम्परायस्य कीर्तितम् । गुणस्थानमनिवृत्तिबादरसम्परायकम् ॥ ११४३ ॥
अन्तर्मुहूर्त्तमानस्य, यावन्तोऽस्य क्षणाः खलु । तावन्त्येवाध्यवसायस्थानान्याहुर्जिनेश्वराः ॥ ११४४ ॥
अस्मिन् यदेकसमये, प्राप्तानां भूयसामपि । एकमेवाध्यवसायस्थानकं कीर्त्तितं जिनैः ॥ ११४५ ॥
अनन्तगुणशुद्धं च, प्रतिक्षणं यथोत्तरम् । स्थानमध्यवसायस्य, गुणस्थानेऽत्र कीर्त्तितम् ॥ ११४६ ॥
क्षपकश्चोपशमकश्चेत्यसौ भवति द्विधा । क्षपयेद्वोपशमयेद्वाऽसौ यन्मोहनीयकम् ॥ ११४७ ॥
इति नवमम् ॥
सूक्ष्मः कीट्टीकृतो लोभकषायोदयलक्षणः । संपरायो यस्य सूक्ष्मसंपरायः स उच्यते ॥ ११४८ ॥
क्षपकश्चोपशमकश्चेति स्यात्सोऽपि हि द्विधा । गुणस्थानं तस्य सूक्ष्मसंपरायाभिधं स्मृतम् ॥ ११४९ ॥
इति दशमम् ॥
येनोपशमिता विद्यमाना अपि कषायकाः ॥ नीता विपाकप्रदेशोदयादीनामयोग्यताम् ॥ ११५० ॥
उपशान्तकषायस्य, वीतरागस्य तस्य यत् । छद्मस्थस्य गुणस्थानं, तदाख्यातं तदाख्यया ॥ ११५१ ॥
असौ ह्युपशमश्रेण्यारम्भेऽनन्तानुबन्धिनः । कषायान् द्रागविरतो, देशेन विरतोऽथवा ॥ ११५२ ॥
प्रमत्तो वाऽप्रमत्तः सन्, शमयित्वा ततः परम् । दर्शनमोहत्रितयं, शमयेदथ शुद्धधीः ॥ ११५३ ॥

कर्मग्रन्थावचूरौत्विहोपशमश्रेणिकृदप्रमत्तयतिरेव । केचिदाचार्या अविरतदेशविरत-प्रमत्ताप्रमत्तयतीनामन्यतम इत्याहुरिति दृश्यते ॥

श्रयन्त्युपशमश्रेणिमाद्यं संहननत्रयम् । दधाना नार्धनाराचादिकं संहननत्रयम् ॥ ११५४ ॥
तथोक्तम् । 'उपशमश्रेणिस्तु प्रथमसंहननत्रयेण आरुह्यते' । इति कर्मस्तववृत्तौ ॥
परिवृत्तिशतान् कृत्वाऽसौ प्रमत्ताप्रमत्तयोः । गत्वा चापूर्वकरणगुणस्थानं ततः परम् ॥ ११५५ ॥
क्लीबस्त्रीवेदौ हास्यादिषट्कं पुंवेदमप्यथ । क्रमात् प्रत्याख्यानाप्रत्याख्यानसंज्वलनाः क्रुधः ॥ ११५६ ॥
तथैव त्रिविधं मानं, मायां च त्रिविधां तथा । द्वितीयतृतीयौ लोभौ, विंशतिः प्रकृतीरिमाः ॥ ११५७ ॥

शमयित्वा गुणस्थाने, नवमे दशमे ततः । शमी संज्वलनं लोभं, शमयत्यतिदुर्जयम् ॥ ११५८ ॥
एकं क्षणं जघन्येनोत्कर्षेणान्तर्मुहूर्त्तकम् । उपशान्तकषायः स्यादूर्ध्वं च नियमात्ततः ॥ ११५९ ॥
श्रद्धाक्षयात् भवान्ताद्वा, पतत्यद्धाक्षयात्पुनः । पतन्पश्चानुपूर्व्याऽसौ, याति यावत्प्रमत्तकम् ॥ ११६० ॥
गुणस्थानद्वयं याति, कश्चित्ततोऽप्यधस्तनम् । कश्चित्सासादनभावं, प्राप्य मिथ्यात्वमप्यहो ॥ ११६१ ॥
पतितश्च भवे नास्मिन्, सिद्ध्येदुत्कर्षतो वसेत् । देशोनपुद्गलपरावर्त्तार्धं कोऽपि संसृतौ ॥ ११६२ ॥
तथोक्तं महाभाष्ये— [विशेषावश्यक श्लो. १३१६]
'जइ उवसंतकसाओ, लहइ अणंतं पुणोवि पडिवायम् । न हु भे वीससियव्वं, थोवे वि कसायसेसंमि' ॥
भवक्षयाद्यः पतति, आद्य एव क्षणे स तु । सर्वाण्यपि बन्धनादिकरणानि प्रवर्त्तयेत् ॥ ११६३ ॥
बद्धायुरायुःक्षयतो, म्रियते श्रेणिगो यदि । अनुत्तरसुरेष्वेष, नियमेन तदोद्भवेत् ॥ ११६४ ॥

तथोक्तं भाष्यवृत्तौ—'यदि बद्धायुरुपशमश्रेणिं प्रतिपन्नः श्रेणिमध्यगतगुणस्थानवर्ती वा उपशान्तमोहो वा भूत्वा कालं करोति तदा नियमेन अनुत्तरसुरेष्वेवोत्पद्यते' ॥ इति ॥ [विशेषावश्यक श्लो. १३११]

गुणस्थानस्यास्य प्रोक्ता, स्थितिरेकं क्षणं लघुः । अनुत्तरेषु व्रजतः, सा ज्ञेया जीवितक्षयात् ॥ ११६५ ॥
कुर्यादुपशमश्रेणिमुत्कर्षादेकजन्मनि । द्वौ वारौ चतुरो वारांश्चाङ्गी संसारमावसन् ॥ ११६६ ॥
श्रेणिरेकैवैकभवे, भवेत् सिद्धान्तिनां मते । क्षपकोपशमश्रेण्योः, कर्मग्रन्थमते पुनः ॥ ११६७ ॥

कृतैकोपशमश्रेणिः, क्षपकश्रेणिमाश्रयेत् । भवे तत्र द्विःकृतोपशमश्रेणिस्तु नैव ताम् ॥ इति कर्मग्रन्थलघुवृत्तौ ॥ इत्येकादशम् ॥

क्षीणाः कषाया यस्य स्युः, स स्यात्क्षीणकषायकः । वीतरागः छद्मस्थश्च, गुणस्थानं यदस्य तत् ॥ ११६८ ॥
क्षीणकषायच्छद्मस्थवीतरागाह्वयं भवेत् । गुणस्थानं केवलित्वद्रङ्गाधिगमगोपुरम् ॥ ११६९ ॥
तत्र च-श्रेष्ठसंहननो वर्षाष्टकाधिकवयो नरः । सद्ध्यानः क्षपकश्रेणिमप्रमादः प्रपद्यते ॥ ११७० ॥

तथोक्तं कर्मग्रन्थलघुवृत्तौ—"क्षपकश्रेणिप्रतिपन्नः मनुष्यः वर्षाष्टकोपरिवर्त्यविरतादीनामन्यतमोऽत्यन्तशुद्धपरिणाम उत्तमसंहननः, तत्र पूर्वविदप्रमतः शुक्लध्यानोपगतोऽपि, केचन धर्मध्यानोपगत, इत्याहुः ॥ विशेषावश्यकवृत्तौ च, पूर्वधरप्रमत्तः शुक्लध्यानोपगतोऽप्येतां प्रतिपद्यते, शेषास्तत्वविरतादयो धर्मध्यानोपगता इति निर्णयः ॥ तत्क्रमश्चायम्—

स तुर्यादिगुणस्थानचतुष्कान्यतरेऽन्तयेत् । अन्तर्मुहूर्त्ताद्युगपत्, प्रागनन्तानुबन्धिनः ॥ ११७१ ॥
ततः क्रमेण मिथ्यात्वं, मिश्रं सम्यक्त्वमन्तयेत् । उच्यते कृतकरणः, क्षीणेऽस्मिन् सप्तके च सः ॥ ११७२ ॥
बद्धायुः क्षपकश्रेण्यारम्भकश्चेन्निवर्त्तते । अनन्तानुबन्धिनाशानन्तरं जीवितक्षयात् ॥ ११७३ ॥
तदा मिथ्यात्वोदयेन, भूयोऽनन्तानुबन्धिनः । बध्नाति मिथ्यात्वरूपतद्बीजस्याविनाशतः ॥ ११७४ ॥
क्षीणे मिथ्यात्वबीजे तु, भूयोऽनन्तानुबन्धिनाम् । न बन्धोऽस्ति क्षितिरुहो, बीजे दग्धे हि नाङ्कुरः ॥ ११७५ ॥

सूरेषूत्पद्यतेऽवश्यं, बद्धायुः क्षीणसप्तकः । चेत्तदानीमपतितपरिणामो म्रियते सः ॥ ११७६ ॥
निपतत्परिणामस्तु, बद्धायुर्म्रियते यदि । गतिमन्यतमां याति, स विशुद्ध्यनुसारतः ॥ ११७७ ॥
बद्धायुष्कोऽथाक्षतायुः, क्षपको म्रियते न चेत् । नियमात् सप्तके क्षीणे, विश्राम्यति तथाऽप्यसौ ॥ ११७८ ॥
सकलक्षपकश्चाथ, विधाय सप्तकक्षयम् । क्षयं नयेत् स्वर्नरकतिर्यगायूंष्यतः परम् ॥ ११७९ ॥
प्रत्याख्यानाप्रत्याख्यानाष्टकमन्तयेत् गुणे नवमे । तस्मिन्नर्द्धक्षपिते, क्षपयेदिति षोडशप्रकृतीः ॥ ११८० ॥
तिर्यग्नरकस्थानवरयुगलान्युद्योतमातपं चैव । स्त्यानर्द्धित्रयसाधारणविकलैकाक्षजातीश्च ॥ ११८१ ॥

अत्र तिर्यग्युगलं तिर्यग्गतितिर्यगानुपूर्वीरुपम् । नरकयुगलं-नरकगति नरकानुपूर्वीरूपम् । स्थावरयुगलं-स्थावरसूक्ष्माख्यम् ॥ इति ज्ञेयम् ॥

अर्धदग्धेन्धनो वह्निर्दहेत्प्राप्येन्धनान्तरम् । क्षपकोऽपि तथाऽत्रान्तः, क्षपयेत्प्रकृतीः पराः ॥ ११८२ ॥
कषायाष्टकशेषं च, क्षपयित्वाऽन्तयेत् क्रमात् । क्लीबस्त्रीवेदहास्यादिषट्कपूरुषवेदकान् ॥ ११८३ ॥

एषः सूत्रादेशः ॥ अन्ये पुनः आहुः—षोडश कर्माण्येव पूर्वं क्षपयितुमारभते ॥ केवलमपान्तरालेऽष्टौ कषायान् क्षपयति, पश्चात् षोडश कर्माणि, इति कर्मग्रन्थवृत्तौ ॥

क्रमः पुंस्यारम्भकेऽयं, स्त्री तु क्षपयति क्रमात् । क्लीबपुंवेदहास्यादिषट्कं स्त्रीवेदमेव च ॥ ११८४ ॥
क्लीबस्त्वारम्भको नूनं, स्त्रीवेदं प्रथमं क्षपेत् । पुंवेदं हास्यषट्कं च, नपुंवेदं ततः क्रमात् ॥ ११८५ ॥
ततः संज्वलनक्रोधमानमायाश्च सोऽन्तयेत् । ततः संज्वलनं लोभं, क्षपयेद्दशमे गुणे ॥ ११८६ ॥
लोभे च मूलतः क्षीणे, निस्तीर्णो मोहसागरम् । विश्राम्यति स तत्रान्तर्मुहूर्त्तं क्षपको मुनिः ॥ ११८७ ॥

तथोक्तं महाभाष्ये—'खीणे खवगनियट्टो वीसमये मोहसागरं तरिउम् । अंतोमुहुत्तमुदहिं, तरिउं थाहे जहा पुरिसो' ॥ [विशेषावश्यक श्लो. १३४०]

गतोऽथ द्वादशे क्षीणकषायाख्ये गुणेऽसुमान् । निद्रां च प्रचलां चास्यान्तयेदन्त्यादिमक्षणे ॥ ११८८ ॥
पञ्चज्ञानावरणानि, चतस्रो दर्शनावृतीः । पञ्चविघ्नांश्च क्षणेऽन्त्ये, क्षपयित्वा जिनो भवेत् ॥ ११८९ ॥

एवं च—

अष्टचत्वारिंशदाद्यं, शतं प्रकृतयोऽत्र याः । सत्तायामभवंस्तासु, षट्चत्वारिंशतः क्षयात् ॥ ११९० ॥
द्वयाद्यं शतं प्रकृतयोऽवशिष्टा दशमे गुणे । क्षीणमोहद्विचरमक्षणावध्येकयुक्शतम् ॥ ११९१ ॥
सत्तायां नवनवतिः, क्षीणमोहान्तिमक्षणे । चतुर्दशक्षयादत्र, पञ्चाशीतिः सयोगिनि ॥ ११९२ ॥
ततोऽयोगिद्विचरमक्षणे द्वासप्ततिक्षयः । अयोगिनः क्षणेऽन्त्ये च, शेषत्रयोदशक्षयः ॥ ११९३ ॥

अत्र भाष्यम्—'आवरणक्खयसमये, निच्छइयनयस्स केवलुप्पत्ती । तत्तोऽणंतरसमये, ववहारो केवलं भणइ' ॥ इति द्वादशम् ॥ [विशेषावश्यक श्लो. १३४२]

योगो नामात्मनो वीर्यं, तत्स्याल्लब्धिविशेषतः । वीर्यान्तरायक्षपणक्षयोपशमसम्भवात् ॥ ११९४ ॥

योगो द्विधा सकरणोऽकरणश्चेति कीर्त्तितः । तत्र केवलिनो ज्ञेयदृश्येष्वखिलवस्तुषु ॥ ११९५ ॥
उपयुञ्जानस्य किल, केवले ज्ञानदर्शने । योऽसावप्रतिघो वीर्यविशेषोऽकरणः स तु ॥ ११९६ ॥
अयं च नात्राधिकृतो, योगः सकरणस्तु यः । मनोवाक्कायकरणहेतुकोऽधिकृतोऽत्र सः ॥ ११९७ ॥
केवल्युपेतस्तैर्योगैः, सयोगी केवली भवेत् । सयोगिकेवल्याख्यं स्यात्, गुणस्थानं च तस्य यत् ॥ ११९८ ॥
मनोवाक्कायजाश्चैवं, योगाः केवलिनोऽपि हि । भवन्ति कायिकस्तत्र, गमनागमनादिषु ॥ ११९९ ॥
वाचिको यतमानानां, जिनानां देशनादिषु । भवत्येवं मनोयोगोऽप्येषां विश्वोपकारिणाम् ॥ १२०० ॥
मनःपर्यायवद्भिर्वा, देवैर्वाऽनुत्तरादिभिः । पृष्टस्य मनसाऽर्थस्य, कुर्वतां मनसोत्तरम् ॥ १२०१ ॥
द्विचत्वारिंशतः कर्मप्रकृतीनामिहोदयः । जिनेन्द्रस्यापरस्यैकचत्वारिंशत एव च ॥ १२०२ ॥
औदारिकाङ्गोपाङ्गे च, शुभान्यखगतिद्वयम् । अस्थिरं चाशुभं चेति, प्रत्येकं च स्थिरं शुभम् ॥ १२०३ ॥
संस्थानषट्कमगुरुलघूपघातमेव च । पराघातोच्छ्वासवर्णगन्धस्पर्शरसा इति ॥ १२०४ ॥
निर्माणाद्यसंहनने, देहे तैजसकार्मणे । असातसातान्यतरत्, तथा सुस्वरदुःस्वरे ॥ १२०५ ॥
एतासां त्रिंशतः कर्मप्रकृतीनां त्रयोदशे । गुणस्थाने व्यवच्छेद, उदयापेक्षया भवेत् ॥ १२०६ ॥
भाषापुद्गलसंघातविपाकित्वादयोगिनि । नोदयो दुःस्वरनामसुस्वरनामकर्मणोः ॥ १२०७ ॥
शरीरपुद्गलदलविपाकित्वादयोगिनि । शेषा न स्युः काययोगा, भावात्प्रकृतयस्त्विमाः ॥ १२०८ ॥
ततश्च-यशः सुभगमादेयं, पर्याप्तं त्रसबादरे । पञ्चाक्षजातिर्मनुजायुर्गती जिननाम च ॥ १२०९ ॥
उच्चैर्गोत्रं तथा सातासातान्यतरदेव च । अन्त्यक्षणावध्युदया, द्वादशैता अयोगिनः ॥ १२१० ॥
इति त्रयोदशम् ॥
नास्ति योगोऽस्येत्ययोगी, तादृशो यश्च केवली । गुणस्थानं भवेत्तस्यायोगिकेवलिनामकम् ॥ १२११ ॥
तच्चैवम्—
अन्तर्मुहूर्त्तशेषायुः, सयोगी केवली किल । लेश्यातीतं प्रतिपित्सुर्ध्यानं योगान् रुणद्धि सः ॥ १२१२ ॥
तत्र पूर्वं बादरेण, काययोगेन बादरौ । रुणद्धि वाग्मनोयोगौ, काययोगं ततश्च तम् ॥ १२१३ ॥
सूक्ष्मक्रियं चानिवृत्तिशुक्लध्यानं विभावयन् । रुन्ध्यात् सूक्ष्माङ्गयोगेन, सूक्ष्मौ मानसवाचिकौ ॥ १२१४ ॥
रुणद्ध्यथो काययोगं, स्वात्मनैव च सूक्ष्मकम् । स स्यात्तदा त्रिभागोनदेहव्यापिप्रदेशकः ॥ १२१५ ॥
शुक्लध्यानं समुच्छिन्नक्रियमप्रतिपाति च । ध्यायन् पञ्चह्रस्ववर्णोच्चारमानं स कालतः ॥ १२१६ ॥
शैलेशीकरणं याति, तच्च प्राप्तो भवत्यसौ । योगव्यापाररहितोऽयोगी सिद्ध्यत्यसौ ततः ॥ १२१७ ॥
गत्यानुपूर्व्यौ देवस्य, शुभान्यखगतिद्वयम् । द्वौ गन्धावष्ट च स्पर्शा, रसवर्णाङ्गपञ्चकम् ॥ १२१८ ॥
तथा पञ्च बन्धनानि, पञ्च संघातनान्यपि । निर्माणं षट् संहननान्यस्थिरं वाशुभं तथा ॥ १२१९ ॥

दुर्भगं च दुःस्वरं चानादेयमयशोऽपि च । संस्थानषट्कमगुरुलघूपघातमेव च ॥ १२२० ॥
पराघातमथोच्छ्वासमपर्याप्ताभिधं तथा । असातसातयोरेकं, प्रत्येकं च स्थिरं शुभम् ॥ १२२१ ॥
उपाङ्गत्रितयं नीचैर्गोत्रं सुस्वरमेव च । अयोग्युपान्तसमये, इति द्वासप्ततेः क्षयः ॥ १२२२ ॥
मनुजस्य गतिश्चायुश्चानुपूर्वीति च त्रयम् । त्रसबादरपर्याप्तयशांसीति चतुष्टयम् ॥ १२२३ ॥
उच्चैर्गोत्रमथादेयं, सुभगं जिननाम च । असातसातयोरेकं, जातिः पञ्चेन्द्रियस्य च ॥ १२२४ ॥
त्रयोदशैताः प्रकृतीः, क्षपयित्वाऽन्तिमे क्षणे । अयोगी केवली सिद्ध्येन्निर्मूलगतकल्मषः ॥ १२२५ ॥
मतान्तरेऽत्रानुपूर्वी क्षिपत्युपान्तिमक्षणे । ततस्त्रिसप्ततिं तत्र, द्वादशान्त्ये क्षणे क्षिपेत् ॥ १२२६ ॥
इति चतुर्दशम् ॥

आद्यं द्वितीयं तुर्यं च, गुणस्थानान्यमूनि वै । गच्छन्तमनुगच्छन्ति, परलोके शरीरिणम् ॥ १२२७ ॥
मिश्रदेशविरत्यादीन्येकादश पराणि च । सर्वथाऽत्र परित्यज्य जीवा यान्ति परं भवम् ॥ १२२८ ॥
तत्र मिश्रे स्थितः प्राणी, मृतिं नैवाधिगच्छति । स्युर्देशविरतादीनि, यावज्जीवावधीनि च ॥ १२२९ ॥
यत्तृतीयं गुणस्थानं, द्वादशं च त्रयोदशम् । विनाऽन्येष्वेकादशसु, गुणेषु म्रियतेऽसुमान् ॥ १२३० ॥
स्तोका एकादशगुणस्थिता उत्कर्षतोऽपि यत् । चतुःपञ्चाशदेवामी, युगपत् सम्भवन्ति हि ॥ १२३१ ॥
तेभ्यः संख्यगुणाः क्षीणमोहास्ते ह्यष्टयुक् शतम् । युगपत्स्युरष्टमादित्रिगुणस्थास्ततोऽधिकाः ॥ १२३२ ॥
मिथस्तुल्याश्च यच्छ्रेणिद्वयस्था अपि संगताः । स्युर्द्वाषष्ट्युत्तरशतं, प्रत्येकं त्रिषु तेषु ते ॥ १२३३ ॥
योग्यप्रमत्तप्रमत्तास्तेभ्यः संख्यगुणाः क्रमात् । यत्ते मिताः कोटिकोटिशतकोटिसहस्रकैः ॥ १२३४ ॥
पञ्चमस्था द्वितीयस्था, मिश्राश्चाविरताः क्रमात् । प्रत्येकं स्युरसंख्येयगुणास्तेभ्यस्त्वयोगिनः ॥ १२३५ ॥
स्युरनन्तगुणा मिथ्यादृशस्तेभ्योऽप्यनन्तकाः । इदमल्पबहुत्वं स्यात्, सर्वत्रोत्कर्षसम्भवे ॥ १२३६ ॥
विपर्ययोऽप्यन्यथा स्यात्, स्तोकाः स्युर्जातुचिद्यथा । उत्कृष्टशान्तमोहेभ्यो, जघन्याः क्षीणमोहकाः ॥ १२३७ ॥
एवं सास्वादनादिष्वपि भाव्यम् ॥

मिथ्यात्वं कालतोऽनादि, सान्तं स्यात्सादिसान्तकम् । अनाद्यनन्तं च न तत्साद्यनन्तं तु सम्भवेत् ॥ १२३८ ॥
स्यादाद्यं तत्र भव्यानामनाप्तपूर्वसद्दृशाम् । द्वितीयं प्राप्य सम्यक्त्वं, पुनर्मिथ्यात्वमीयुषाम् ॥ १२३९ ॥
स्यात्तृतीयमभव्यानां, सदा मिथ्यात्ववर्त्तिनाम् । आनन्त्यासम्भवात् सादेस्तुर्यं युक्तमसम्भवि ॥ १२४० ॥
सासादनं चोक्तमेव षडावलिमितं पुरा । तुर्यं मितं समधिकत्रयस्त्रिंशत्पयोधिभिः ॥ १२४१ ॥
सर्वार्थसिद्धदेवत्वे, त्रयस्त्रिंशत्पयोनिधीन् । धृत्वाऽविरतसम्यक्त्वं, ततोऽत्राप्यागतोऽसकौ ॥ १२४२ ॥
यावदद्यापि विरतिं, नाप्नोति तावदेष यत् । तुर्यमेव गुणस्थानमुररीकृत्य वर्त्तते ॥ १२४३ ॥
किञ्चिन्न्यूननवाब्दोनपूर्वकोटिमिते मते । त्रयोदशं पञ्चमं च, गुणस्थाने उभे अपि ॥ १२४४ ॥

अन्तिमं ङञणनमेत्येवंरूपैः किलाक्षरैः । अविलम्बात्वरितयोच्चारितैः प्रमितं भवेत् ॥ १२४५ ॥
आन्तर्मुहूर्त्तिकानि स्युः, रोषाण्यष्टाप्यमूनि च । केचिदूचुर्न्यूनपूर्वकोटिके षष्ठसप्तके ॥ १२४६ ॥

तथोक्तं भगवतीसूत्रे—"पमत्तसंजयस्स णं पमत्तसंजमे वट्टमाणस्स सव्वाविणं पमत्तद्धाकालओ केवच्चिरं होइ ?! मंडिआ ! एक जीवं पडुच्च जह० एगं समयं उक्कोसेणं देसूणा पुव्वकोडी । णाणाजीवे पडुच्च सव्वद्धा, अस्यवृत्तिः—जह० एक्कं समयंति कथं ! उच्यते, प्रमत्तसंयतप्रतिपत्तिसमयसमनन्तरमेव मरणात्, 'देसूणा पुव्वकोडित्ति', किल प्रत्येकमन्तर्मुहूर्त्तप्रमाणे एव प्रमत्ताप्रमत्तगुणस्थाने । ते च पर्यायेण जायमाने देशोनपूर्वकोटिं यावदुत्कर्षेण भवतः । महान्ति चाप्रमत्तापेक्षया प्रमत्तान्तर्मुहूर्त्तानि कल्प्यन्ते । एवं चान्तर्मुहूर्त्तप्रमाणानां प्रमत्ताद्धानां सर्वासां मिलने देशोनपूर्वकोटीकालमानं भवति ॥ अन्ये त्वाहुः । अष्टवर्षानां पूर्वकोटिं यावदुत्कर्षतः प्रमत्तता स्यात् । एवमप्रमत्तसूत्रमपि ॥ नवरं ॥ 'जह० अंतमुहुत्तं'ति । किलाप्रमत्ताद्धायां वर्त्तमानस्य अन्तर्मुहूर्त्तमध्ये मृत्युर्न भवतीति ॥ चूर्णिकारमतं तु प्रमत्तसंयतवर्जः सर्वोऽपि सर्वविरतोऽप्रमत्त उच्यते प्रमादाभावात् । स चोपशमश्रेणिं प्रतिपद्यमानः मुहूर्त्ताभ्यन्तरे कालं कुर्वन् जघन्यकालो लभ्यते इति ॥ देशोनपूर्वकोटी तु केवलिनमाश्रित्य इति" ॥

यन्निर्दिष्टं जिनाधीशैरेकजीवव्यपेक्षया । त्यक्त्वा पुनः प्राप्तिरूपमथैषामुच्यतेऽन्तरम् ॥ १२४७ ॥
जघन्यं सासादनस्य पल्यासंख्यांशसंमितम् । शेषेषु च दशानां स्यादन्तर्मुहूर्त्तमन्तरम् ॥ १२४८ ॥
मिथ्यात्वस्य तदुत्कृष्टं, द्विःषट्षष्टिः पयोधयः । साधिकाः कथितास्तत्र, श्रूयतां भावना त्वियम् ॥ १२४९ ॥
अनुभूय स्थितिं कश्चित्, सम्यक्त्वस्य गरीयसीम् । मिश्रं ततोऽन्तर्मुहूर्त्तमनुभूय ततः पुनः ॥ १२५० ॥
षट्षष्ट्यम्भोनिधिमितां, सम्यक्त्वस्य गुरुस्थितिम् । समाप्य कोऽपि मिथ्यात्वं, जातु याति तदा हि तत् ॥ १२५१ ॥
देशोनपुद्गलपरावर्त्तार्द्धप्रमितं भवम् । द्वितीयादीनां दशानां, गुणानां ज्येष्ठमन्तरम् ॥ १२५२ ॥
क्षपकस्यान्तरं जातु, न स्यात् त्रिष्वष्टमादिषु । सकृत्प्राप्तेः क्षीणमोहादित्रयेऽप्यन्तरं न हि ॥ १२५३ ॥

इति गुणाः ॥ ३० ॥ अथ योगः ॥

दश पञ्चाधिका योगाः, सप्त स्युस्तत्र कायिकाः । चत्वारो मानसोद्भूतास्तावन्त एव वाचिकाः ॥ १२५४ ॥
औदारिकस्तन्मिश्रः स्याद्वैक्रियस्तेन मिश्रितः । आहारकस्तन्मिश्रः सप्तमस्तैजसकार्मणः ॥ १२५५ ॥
पर्याप्तानां नृतिरश्चामौदारिकाभिधो भवेत् । स्यात्तन्मिश्रस्तु पर्याप्तापर्याप्तानां तथोच्यते ॥ १२५६ ॥
कार्मणेन वैक्रियेणाहारकेणेति च त्रिधा । औदारिकमिश्रकाययोगं योगीश्वरा जगुः ॥ १२५७ ॥
औदारिकाङ्गनामादितादृक्कर्मनियोगतः । उत्पत्तिदेशं प्राप्तेन, तिरश्चा मनुजेन वा ॥ १२५८ ॥
यदौदारिकमारब्धं, न च पूर्णीकृतं भवेत् । तावदौदारिकमिश्रः, कार्मणेन सह ध्रुवम् ॥ १२५९ ॥

तथा चोक्तं निर्युक्तिकारेण शस्त्र(आहार) परिज्ञाध्ययने— "तेएण कम्मएणं, आहारेइ अणंतरं जीवो । तेण परं मिस्सेणं, जाव सरीरस्स निप्फत्ती" ॥

ननु मिश्रत्वमुभयनिष्ठमौदारिकं यथा । मिश्रं भवेत्कार्मणेन, तथा तेनापि कार्मणम् ॥ १२६० ॥
ततश्चौदारिकामिश्रमेवेदं कथमुच्यते? । अस्य कार्मणमिश्रत्वमपि किं नाभिधीयते ? ॥ १२६१ ॥
अत्राहुः—आसंसारं कार्मणस्यावस्तित्वेन सर्वदा । सकलेष्वपि देहेषु, सम्भवेदस्य मिश्रता ॥ १२६२ ॥
ततश्च—कार्मणमिश्रमित्युक्ते, निर्णेतुं नैव शक्यते । किमौदारिकसम्बन्धि, किं वाऽपरशरीरजम् ॥ १२६३ ॥
औदारिकस्य चोत्पत्तिं, समाश्रित्य प्रधानता । कादाचित्कतया चास्य, प्रतिपत्तिरसंशया ॥ १२६४ ॥
तदौदारिकमिश्रत्वव्यपदेशोऽस्य यौक्तिकः । न तु कार्मणमिश्रत्वव्यपदेशस्तथाविधः ॥ १२६५ ॥
यदाप्यौदारिकदेहधरो वैक्रियलब्धिमान् । पञ्चाक्षतिर्यङ्मर्त्यश्च, पर्याप्तो बादरानिलः ॥ १२६६ ॥
वैक्रियाङ्गमारभते, न च पूर्णीकृतं भवेत् । तदौदारिकमिश्रः स्याद्वैक्रियेण सह ध्रुवम् ॥ १२६७ ॥
एवमाहारकारम्भकाले तल्लब्धिशालिनः । सहाहारकदेहेन, मिश्र औदारिको भवेत् ॥ १२६८ ॥
यद्यप्यत्रोभयत्रापि, मिथस्तुल्यैव मिश्रता । तथाप्यारम्भकत्वेनौदारिकस्य प्रधानता ॥ १२६९ ॥
तत औदारिकेणैव, व्यपदेशो द्वयोरपि । न वैक्रियाहारकाभ्यां, व्यपदेशो जिनैः कृतः ॥ १२७० ॥
मतं सिद्धान्तिनामेतत्, कर्मग्रन्थविदः पुनः । वैक्रियाहारकमिश्रे, एव प्राहुरिमे क्रमात् ॥ १२७१ ॥
यदारम्भे वैक्रियस्य, परित्यागेऽपि तस्य ते । वदन्ति वैक्रियं मिश्रमेवमाहारकेऽपि च ॥ १२७२ ॥
वैक्रिय देहपर्याप्त्या, पर्याप्तस्य शरीरिणः । वैक्रियः काययोगः स्यात्तन्मिश्रस्तु द्विधा भवेत् ॥ १२७३ ॥
योऽपर्याप्तदशायां स्यान्मिश्रो नारकनाकिनाम् । योगः समं कार्मणेन, स स्याद्वैक्रियमिश्रकः ॥ १२७४ ॥
तथा यदा मनुष्यो वा, तिर्यक्पञ्चेन्द्रियोऽथवा । वायुः वा वैक्रियं कृत्वा, कृतकार्योऽथ तत्त्यजन् ॥ १२७५ ॥
औदारिकशरीरान्तः, प्रवेष्टुं यतते तदा । योगो वैक्रियमिश्रः स्यात्सममौदारिकेण च ॥ १२७६ ॥
मिश्रीभावो यदप्यत्रोभयनिष्ठस्तथाप्यसौ । प्राधान्याद्वैक्रियेणैव, ख्यातो नौदारिकेण तु ॥ १२७७ ॥
प्राधान्यं तु वैक्रियस्य, प्राज्ञैर्निरूपितं ततः । औदारिकेतु प्रवेश, एतस्यैव बलेन यत् ॥ १२७८ ॥
आहारकाङ्गपर्याप्त्या, पर्याप्तानां शरीरिणाम् । आहारकः काययोगः, स्याच्चतुर्दशपूर्विणाम् ॥ १२७९ ॥
आहारकवपुः कृत्वा, कृतकार्यस्य तत्पुनः । त्यक्त्वा स्वाङ्गे प्रविशतः, स्यादाहारकमिश्रकः ॥ १२८० ॥
द्वयोः समेऽपि मिश्रत्वे, बलेनाहारकस्य यत् । औदारिकेऽनुप्रवेशस्तेनेत्थं व्यपदिश्यते ॥ १२८१ ॥
तैजसं कार्मणं चेति, द्वे सदा सहचारिणी । ततो विवक्षितः सैको, योगस्तैजसकार्मणः ॥ १२८२ ॥
जन्तूनां विग्रहगतावयं केवलिनां पुनः । समुद्घाते समयेषु, स्यात्तृतीयादिषु त्रिषु ॥ १२८३ ॥
एवं निरूपिताः सप्त, योगाः कायसमुद्भवाः । अथ चित्तवचोजातांश्चतुरश्चतुरो ब्रुवे ॥ १२८४ ॥
सत्यो मृषा सत्यमृषा, न सत्यो न मृषाऽपि च । मनोयोगश्चतुर्धैवं, वाग्योगोऽप्येवमेव च ॥ १२८५ ॥
तत्र च—सन्त इत्यभिधीयन्ते, पदार्थामुनयोऽथवा । तेषु साधु हितं सत्यमसत्यं च ततोऽन्यथा ॥ १२८६ ॥

पदार्थानां हितं तत्र, यथावस्थितचिन्तनात् । मुनीनां च हितं यस्मान्मोक्षमार्गैकसाधनम् ॥ १२८७ ॥
स्वतो विप्रतिपत्तौ वा, वस्तु स्थापयितुं किल । सर्वज्ञोक्तानुसारेण, चिन्तनं सत्यमुच्यते ॥ १२८८ ॥
यथाऽस्ति जीवः सदसद्रूपो व्याप्य स्थितस्तनुम् । भोक्ता स्वकर्मणां सत्यमित्यादिपरिचिन्तनम् ॥ १२८९ ॥
प्रश्ने विप्रतिपत्तौ वा, स्वभावादुत वस्तुषु । विकल्प्यते जैनमतोत्तीर्णं यत्तदसत्यकम् ॥ १२९० ॥
नास्ति जीवो यथैकान्तनित्योऽनित्यो महानणुः । अकर्त्ता निर्गुणोऽसत्यमित्यादिपरिचिन्तनम् ॥ १२९१ ॥
किञ्चित्सत्यमसत्यं वा, यत्स्यादुभयधर्मयुक् । स्यात्तत्सत्यमृषाभिख्यं, व्यवहारनयाश्रयात् ॥ १२९२ ॥
यथाऽन्यवृक्षमिश्रेषु, बहुष्वशोकशाखिषु । अशोकवनमेवेदमित्यादिपरिचिन्तनम् ॥ १२९३ ॥
सत्त्वात्कतिपयाशोकतरूणामत्र सत्यता । अन्येषामपि सद्भावात्, भवेदसत्यतापि च ॥ १२९४ ॥
भवेदसत्यमेवेदं, निश्चयापेक्षया पुनः । विकल्पितस्वरूपस्यासद्भावादिह वस्तुनः ॥ १२९५ ॥
विनार्थप्रतितिष्ठासां, स्वरूपमात्रचिन्तनम् । उक्तलक्षणायोगान्न सत्यं न मृषा च तत् ॥ १२९६ ॥
यथा चैत्राद्याचनीया, गौरानेयो घटस्ततः । पर्यालोचनमित्यादि, स्यादसत्यामृषाभिधम् ॥ १२९७ ॥
व्यवहारापेक्षयैव, पृथगेतदुदीर्यते । निश्चयापेक्षया सत्येऽसत्ये वाऽन्तर्भवेदिदम् ॥ १२९८ ॥
तथाहि—
गौर्याच्येत्यादिसंकल्पं दम्भेन विदधीत चेत् । अन्तर्भवेत्तदाऽसत्ये, सत्ये पुनः स्वभावतः ॥ १२९९ ॥
सर्वमेतद्भावनीयं, वाग्योगेऽप्यविशेषतः । भाविताश्चिन्तने भेदा, भाव्यास्तेऽत्र तु जल्पने ॥ १३०० ॥
एवं मनोवचोयोगाः, स्युः प्रत्येकं चतुर्विधाः । ततो योगाः पञ्चदश, व्यवहारनयाश्रयात् ॥ १३०१ ॥
किमु कश्चिद्विशेषोऽस्ति, भाषावाग्योगयोर्ननु । भाषाधिकारो यत्प्रोक्तः, सूत्रे वाग्योगतः पृथक् ॥ १३०२ ॥
अत्रोच्यते—
युज्यते इति योगः स्यादितिव्युत्पत्तियोगतः । भाषाप्रवर्त्तको जन्तुयत्नो वाग्योग उच्यते ॥ १३०३ ॥
भाषात्वेनापादिता या, भाषार्हद्रव्यसंततिः । सा भाषा स्यादतो भेदो, भाषावाग्योगयोः स्फुटः ॥ १३०४ ॥

तथोक्तमावश्यकबृहद्वृत्तौ—"गिण्हइ य काइएणं, निसिरइ तह वाइएण जोगेणंति" ॥

अत्र कश्चिदाह—तत्र कायिकेन गृह्णातीत्येतद्, युक्तम् तस्यात्मव्यापाररूपत्वात् । निसृजति तु कथं वाचिकेन ? कोऽयं वाग्योग ? इति । किं वागेव व्यापारापन्ना आहोस्वित् तद्विसर्गहेतुः कायसंरम्भ इति ? । यदि पूर्वः विकल्पः स खल्वयुक्तः, तस्या योगत्वानुपपत्तेः । तथा च न वाक्केवला जीवव्यापारः, तस्याः पुद्गलमात्रपरिणामरूपत्वात् रसादिवत् । योगश्च आत्मनः शरीरवतः व्यापार इति । न च तया भाषा निसृज्यते, किन्तु सैव निसृज्यते इत्युक्तम् । अथ द्वितीयः पक्षः । ततः स कायव्यापारः एव इति कृत्वा कायिकेनैव निसृजति इत्यापन्नं, अनिष्टं चैतत् ॥

अत्रोच्यते—न । अभिप्रायापरिज्ञानात् । इह तनुयोगविशेष एव वाग्योगो मनोयोगश्च इति, कायव्यापारशून्यस्य सिद्धवत् तदभावात् । ततश्च आत्मनः शरीरव्यापारे सति येन शब्दद्रव्योपादानं करोति स कायिकः । येन तु कायसंरम्भेण तान्येव मुञ्चति स वाचिक इति । तथा येन मनोद्रव्याणि मन्यते स मानस इति । कायव्यापार एवायं व्यवहारार्थं त्रिधा विभक्त इति । अतोऽदोषः ॥

अथ प्रसंगतो भाषास्वरूपं वच्मि साऽपि हि । चतुर्विधोक्तन्यायेन, सत्याऽसत्यादिभेदतः ॥ १३०५ ॥
सन्तो जीवादयो भावाः, सन्तो वा मुनयोऽथवा । मूलोत्तरगुणास्तेभ्यो, हिता सत्याऽभिधीयते ॥ १३०६ ॥
अयं भावः—
मुक्तिमार्गाराधनी या, सा गीः सत्योच्यते हिता । सा तु सत्याऽप्यसत्यैव, याऽन्येषामहितावहा ॥ १३०७ ॥
असत्या तु भवेद्भाषा, मुक्तिमार्गविराधनी । द्विस्वभावा तृतीयाऽन्त्या, नाराधनविराधनी ॥ १३०८ ॥

उक्तं च—"सच्चा हिया सयामिह, संतो मुणयो गुणा पयत्था वा । तव्विवरीया मोसा मीसा जा तदुभयसहावा ॥ १३६० अणहिगया जा तीसुवि सद्दो च्चिय केवला असच्चमोसा" ॥ इति ॥ [विशेषावश्यक श्लो. ३७६, ३७७]

तत्र सत्या दशविधा, प्रज्ञप्ता परमर्षिभिः । एभिः प्रकारैर्दशभिर्वदन्न स्याद्विराधकः ॥ १३०९ ॥
तथाऽऽहुः— [प्रवचनसारोद्धार श्लोक. ८९१]
जणवयसम्मयठवणा, नामे रूपे पडुच्च सच्चे अ । ववहारभावजोगे, दसमे उवम्मसच्चे अ ॥
तस्मिंस्तस्मिन् जनपदे, वचोऽर्थप्रतिपत्तिकृत् । सत्यं जानपदं पिच्चं, कोंकणादौ यथा पयः ॥ १३१० ॥
भवेत्संमतसत्यं तद्यत्सर्वजनसम्मतम् । यथाऽन्येषां पङ्कजत्वेऽप्यरविन्दं हि पङ्कजम् ॥ १३११ ॥
तद् भवेत्स्थापनासत्यं, स्थापितं यत्प्रतीतिकृत् । यथैकः पुरो बिन्दुद्वययुक्तः शतं भवेत् ॥ १३१२ ॥
अर्हदादिविकल्पेन, कर्म लेप्यादिकं हि यत् । स्थाप्यते तदपि प्राज्ञैः, स्थापनासत्यमीरितम् ॥ १३१३ ॥
यद्यस्य निर्मितं नाम, नामसत्यं तु तद्भवेत् । अवर्धयन्नपि कुलं, यथा स्यात् कुलवर्धनः ॥ १३१४ ॥
तत्तद्वेषाद्युपादानाद्रूपसत्यं भवेदिह । यथाऽऽत्तमुनिनेपथ्यो, दाम्भिकोऽप्युच्यते मुनिः ॥ १३१५ ॥
वस्त्वन्तरं प्रतीत्य स्याद्दीर्घताह्रस्वतादिकम् । यदेकत्र तत्प्रतीत्यं, सत्यमुक्तं जिनेश्वरैः ॥ १३१६ ॥
दैर्घ्यं यथाऽनामिकाया, अधिकृत्य कनिष्ठिकाम् । तस्या एव च ह्रस्वत्वं, मध्यमामधिकृत्य तु ॥ १३१७ ॥
यथा चैत्रस्य पुत्रत्वं, स्यात्तत्पितुरपेक्षया । पितृत्वमपि तस्यैव स्वपुत्रस्य व्यपेक्षया ॥ १३१८ ॥
विवक्षया यल्लोकानां, तत्सत्यं व्यवहारतः । गलत्यमत्रं शिखरी, दह्यतेऽनुदरा कनी ॥ १३१९ ॥
भूभृत्तत्स्थतृणादीनाममत्रोदकयोरपि । अविभेदं विवक्षित्वा, लोको ब्रूते तथाविधम् ॥ १३२० ॥
संभोगबीजप्रभवोदराभावे वदन्ति च । कन्यामनुदरां सत्यमित्यादिव्यवहारतः ॥ १३२१ ॥

१. भिधा इति पाठः

भावो वर्णादिकस्तेन, सत्यं तु भावतो यथा । नैकवर्णोऽपि नीलस्य, प्रबलत्वाच्छुको हरित् ॥ १३२२ ॥
स्थूलस्कन्धेषु सर्वेषु सर्वे वर्णरसादयः । निश्चयाद्व्यवहारस्तु, प्रबलेन प्रवर्त्तते ॥ १३२३ ॥
योगोऽन्यवस्तुसम्बन्धो, योगसत्यं ततो भवेत् । छत्रयोगाद्यथा छत्री, छत्राभावेऽपि कर्हिचित् ॥ १३२४ ॥
हृद्यं साधर्म्यमौपम्यं, तेन सत्यं तु भूयसा । काव्येषु विदितं यद्वत्तटाकोऽयं पयोधिवत् ॥ १३२५ ॥
मृषाभाषाऽपि दशधा, क्रोधमानविनिःसृताः । मायालोभप्रेमहास्यभयद्वेषविनिःसृताः ॥ १३२६ ॥
आख्यायिकानिःसृता तु, कथास्वसत्यवादिनः । चौर्यादिनाऽभ्याख्यातोऽन्यमुपघातविनिःसृताः ॥ १३२७ ॥
तथाहु :— "कोहे माणे मायालोभे पेज्जे तहेव दोसे य । हासे भयअक्खाइय, उवघाइय णिस्सिया दसमा" ॥
[प्रवचनसारोद्धार श्लो. ८९२]
सत्यामृषापि दशधा, प्रथमोत्पन्नमिश्रिता । विगतमिश्रिता चान्योत्पन्नविगतमिश्रिता ॥ १३२८ ॥
जीवाजीवमिश्रिते द्वे, स्याज्जीवाजीवमिश्रिता । प्रत्येकमिश्रिताऽनन्तमिश्रिताऽद्धाविमिश्रिता ॥ १३२९ ॥
अद्धाद्धामिश्रितेत्यत्र, प्रथमोत्पन्नमिश्रिता । उत्पन्नानामनिश्चित्य, संख्यानं वदतो भवेत् ॥ १३३० ॥
यथाऽत्र नगरे जाता, नूनं दशाद्यदारकाः । मृतांस्तान् वदतोऽप्येवं, भवेद्विगतमिश्रिता ॥ १३३१ ॥
एवं च—उत्पन्नांश्च विपन्नांश्च, युगपद्वदतो भवेत् । उत्पन्नविगतमिश्राह्वयो भेदस्तृतीयकः ॥ १३३२ ॥
शंखशंखनकादीनां, राशौ तान् जीवतो बहून् । दृष्ट्वाऽल्पांश्च मृतान् जीवराश्युक्तौ जीवमिश्रिता ॥ १३३३ ॥
तत्रैव च मृतान् भूरीन्, दृष्ट्वा स्वल्पांश्च जीवतः । अजीवराशिरित्येवं, वदतोऽजीवमिश्रिता ॥ १३३४ ॥
एतावन्तोऽत्र जीवन्त, एतावन्तो मृता इति । तत्रानिश्चित्य वदतो, जीवाजीवविमिश्रिता ॥ १३३५ ॥
अनन्तकायनिकरं, दृष्ट्वा प्रत्येकमिश्रितम् । अनन्तकायं तं सर्वं, वदतोऽनन्तमिश्रिता ॥ १३३६ ॥
एवं प्रत्येकनिकरमनन्तकायमिश्रितम् । प्रत्येकं वदतः सर्वं, भवेत्प्रत्येकमिश्रिता ॥ १३३७ ॥
अद्धा कालः स च दिनं, रात्रिर्वा परिगृह्यते । यस्यां'शमिश्रिता साऽद्धामिश्रिता जायते यथा ॥ १३३८ ॥
कश्चन त्वरयन् कश्चिद्वदेदुत्तिष्ठ भो लघु । रात्रिर्जातेति दिवसे, रात्रौ च रविरुद्गतः ॥ १३३९ ॥
अद्धाद्धा त्वेकदेशः स्याद्रात्रेर्वा दिवसस्य वा । सा मिश्रिता ययाऽद्धाद्धामिश्रिता सा भवेदिह ॥ १३४० ॥
कश्चिद्यथाऽऽद्यपौरुष्यां, कञ्चन त्वरयन् वदेत् । त्वरस्व जातो मध्याह्न, एवमेव निशास्वपि ॥ १३४१ ॥
या त्वसत्यामृषाभिख्या, भाषा साऽपि जिनेश्वरैः । प्रज्ञप्ता द्वादशविधा, विविधातिशयान्वितैः ॥ १३४२ ॥
आमंत्रण्याऽऽज्ञापनी च, याचनी पृच्छनी तथा । प्रज्ञापनी प्रत्याख्यानी भाषा चेच्छाऽनुकूलिका ॥ १३४३ ॥
अनभिगृहीता भाषाऽभिगृहीता तथा परा । सन्देहकारिणी भाषा, व्याकृताऽव्याकृता तथा ॥ १३४४ ॥
हे देवेत्यादि तत्राद्या, द्वितीया त्वमिदं कुरु । तृतीयेदं ददस्वेति, तुर्याऽज्ञातार्थनोदनम् ॥ १३४५ ॥
पञ्चमी तु विनीतस्य, विनेयस्योपदेशनम् । यथा हिंसाया निवृत्ता, जन्तवः स्युश्चिरायुषः ॥ १३४६ ॥
उक्तं च—'पाणिवहाओ नियत्ता, हवन्ति दीहाउया अरोगा य । इमाइ पन्नत्ता, पन्नवणी वीयरागेहिं' ॥

---

१. भिधा, इति पाठः २. गे, इति पाठः

षष्ठी तु याचमानस्य, प्रतिषेधात्मिका भवेत् । सप्तमी पृच्छतः कार्यं, स्वीयानुमतिदानतः ॥ १३४७ ॥
कार्यं यथाऽऽरभमाणः, कश्चित्कञ्चन पृच्छति । स प्राहेदं कुरु लघु, ममाप्येतन्मतं सखे ॥ १३४८ ॥
उपस्थितेषु बहुषु, कार्येषु युगपद्यदि । किमिदानीं करोमीति, कश्चित्कञ्चन पृच्छति ॥ १३४९ ॥
स प्राह सुन्दरं यत्ते, प्रतिभाति विधेहि तत् । भाषाऽनभिगृहीताख्या, सा प्रज्ञप्ता जिनेश्वरैः ॥ १३५० ॥
अभिगृहीता तत्रैव, नियतार्थावधारणम् । यथाऽधुनेदं कर्त्तव्यं, न कर्त्तव्यमिदं पुनः ॥ १३५१ ॥
अनेकार्थवादिनी तु, भाषा संशयकारिणी । संशयः सैन्धवस्योक्तौ, यथा लवणवाजिनोः ॥ १३५२ ॥
व्याकृता तु भवेद् भाषा, प्रकटार्थाभिधायिनी । अव्याकृता गभीरार्थाऽथवाऽव्यक्ताक्षरान्विता ॥ १३५३ ॥
आद्यास्तिस्रो दशविधास्तुर्या द्वादशधा पुनः । द्विचत्वारिंशदित्येवं, भाषाभेदा जिनैः स्मृताः ॥ १३५४ ॥
स्तोकाः सत्यगिरः शेषास्त्रयोऽसंख्यगुणाः क्रमात् । अभाषकाश्चतुर्भ्योऽपि, स्युरनन्तगुणाधिकाः ॥ १३५५ ॥
इति योगाः ॥ ३१ ॥
के के जीवाः कियन्तः स्युरिति दृष्टान्तपूर्वकम् । निरूपणं यत्तन्मानमित्यत्र परिकीर्तितम् ॥ १३५६ ॥
परस्परं कतिपयसजातीयव्यपेक्षया । वक्ष्यते याऽल्पबहुता, साऽत्र ज्ञेया कनीयसी ॥ १३५७ ॥
भूयांसो दिशि कस्यां के, जीवाः कस्यां च केऽल्पकाः । एवंरूपाऽल्पबहुता, विज्ञेया दिगपेक्षया ॥ १३५८ ॥
प्राप्य पृथ्व्यादित्वमङ्गी, जघन्योत्कर्षतः पुनः । कालेन यावताऽऽप्नोति, तद्भावं स्यात्तदन्तरम् ॥ १३५९ ॥
विवक्षितभवात्तुल्येऽतुल्ये च यद्भवान्तरे । गत्वा भूयोऽपि तत्रैव, यथासम्भवमागतिः ॥ १३६० ॥
जघन्यादुत्कर्षतश्च, वारानेतावतो भवेत् । इत्यादि यत्रोच्यतेऽसौ, भवसंवेध उच्यते ॥ १३६१ ॥
सर्वजातीयजीवानां, परस्परव्यपेक्षया । वक्ष्यते याऽल्पबहुता, महाल्पबहुताऽत्र सा ॥ १३६२ ॥
भवतु सुगमं द्वारैरेभिः सदागमशोभनैः नगरमिव सश्रीकं जीवास्तिकायनिरूपणम् ।
विमलमनसां चेतांसीह प्रविश्य परां मुदम् । दधतु विविधैरर्थैर्व्यक्तीकृतैश्च पदे पदे ॥ १३६३ ॥
विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्टविनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे, सर्गो निर्गलितार्थसार्थसुभगः पूर्णस्तृतीयः सुखम् ॥ १३६४ ॥

॥ इति श्रीलोकप्रकाशे तृतीयः सर्गः समाप्तः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

अथ चतुर्थं सर्गः ।

द्वाराण्येवं वर्णितानि, सप्तत्रिंशदिति क्रमात् । निर्दिश्यन्तेऽथ संसारिजीवेष्वमूनि तत्र च ॥ १ ॥
ओघतो भाव्यते संसारिषु द्वारकदम्बकम् । आदौ ततो विशेषेण, प्रत्येकं भावयिष्यते ॥ २ ॥
द्विधा संसारिणो जीवास्त्रसस्थावरभेदतः । त्रिविधाः स्युस्त्रिभिर्वेदैर्गतिभेदैश्चतुर्विधाः ॥ ३ ॥

एकद्वित्रिचतु:पञ्चेन्द्रिया इति च पञ्चधा । षोढा कायप्रकारैः स्युर्भवन्त्येवं च सप्तधा ॥ ४ ॥
एकाक्षा बादराः सूक्ष्माः, पञ्चाक्षाः संज्ञ्यसंज्ञिनः । चत्वारोऽमी विकलाक्षैस्त्रिभिः सह समन्विताः ॥ ५ ॥
चतुर्धैकेन्द्रियाः सूक्ष्मान्यपर्याप्तान्यभेदतः । पञ्चाक्षा विकलाक्षाश्च, भवन्तीत्येवमष्टधा ॥ ६ ॥
अण्डजादिभेदतोऽष्टौ, त्रसास्तत्राण्डजाः किल । पक्षिसर्पाद्या रसोत्था, मद्यकीटादयोऽङ्गिनः ॥ ७ ॥
जरायुजा नृगवाद्या, यूकाद्याः स्वेदजा मताः । संमूर्च्छजा जलूकाद्या, पोतजाः कुञ्जरादयः ॥ ८ ॥
उद्भेदजाः खञ्जनाद्याः, देवाद्याश्चौपपातिकाः । स्थावरेणैकेन युक्ता, नवधेत्यङ्गिनो मताः ॥ ९ ॥
अथवा—
नवधा स्थावराः पञ्च, पञ्चाक्षविकलैर्युताः । दशधा विकलैः क्ष्माद्यैः, पञ्चाक्षैः संज्ञ्यसंज्ञिभिः ॥ १० ॥
स्थावरैर्विकलैः पञ्चेन्द्रियैश्च वेदतस्त्रिभिः । एकादश द्वादश स्युः, कायैः पर्याप्तकापरैः ॥ ११ ॥
पर्याप्तापर्याप्तकैश्च, स्थावरैस्त्रिविधैस्त्रसैः । वेदभेदात् भवन्त्येवं, त्रयोदशविधाः किल ॥ १२ ॥
प्रागुक्ताः सप्तधा पर्याप्तकापर्याप्तभेदतः । चतुर्दशविधा जीवाः, स्युः पञ्चदशधाप्यमी ॥ १३ ॥
पञ्चाक्षा नरतिर्यंचस्त्रिविधा वेदभेदतः । देवा द्विधा नारकश्चेत्येवं पञ्चेन्द्रिया नव ॥ १४ ॥
द्विविधा बादरैकाक्षाः, पर्याप्तापरभेदतः । सूक्ष्मैकाक्षाः विकलाक्षाः, स्युः पञ्चदश संयुताः ॥ १५ ॥
तिर्यंचः पञ्चधैकाक्षादिकाः पञ्चाक्षसीमकाः । नृदेवनारकाश्चाष्टाप्येते पर्याप्तकापराः ॥ १६ ॥
प्रागुक्ता नवधा पञ्चेन्द्रियाश्च पञ्चधैकखाः । त्रिविधा विकला एवं, स्युः सप्तदशधाऽङ्गिनः ॥ १७ ॥
प्रागुक्ता नवधा जीवाः, पर्याप्तापरभेदतः । भवन्त्यष्टादशविधा, जीवा एवं विवक्षिताः ॥ १८ ॥
पञ्चाक्षा नवधा प्राग्वद्दशधा च परेऽङ्गिनः । पर्याप्तान्याः स्थूलसूक्ष्मैकाक्षाः सविकलेन्द्रियाः ॥ १९ ॥
एकोनविंशतिविधा, भवन्त्येवं शरीरिणः । प्रागुक्ता दशधा पर्याप्तान्या विंशतिधेति च ॥ २० ॥
स्थावरा विंशतिः सूक्ष्मान्यपर्याप्तान्यभेदतः । त्रसेन च समायुक्ता, एकविंशतिधाऽङ्गिनः ॥ २१ ॥
पूर्वोदिताः प्रकारा ये, एकादश शरीरिणाम् । द्वाविंशतिविधाः पर्याप्तान्यभेदात् द्विधाकृताः ॥ २२ ॥
एवं विविक्षावशतो, जीवा भवन्त्यनेकधा । जीवानामोघतः स्थानं, लोकः सर्वोऽप्युदीरितः ॥ २३ ॥
द्वाराणि पर्याप्त्यादीनि, सर्वाण्यप्यविशेषतः । सम्भवन्त्योघतो जीवे, विज्ञेयानि यथाऽऽगमम् ॥ २४ ॥
इति सामान्यतः संसारिजीवनिरूपणम् ॥
संसारिणो द्विधोक्ताः प्राक्, त्रसस्थावरभेदतः । स्थावरास्तत्र पृथ्व्यम्बुतेजोवायुमहीरुहः ॥ २५ ॥
पञ्चामी स्थावराः स्थावराख्यकर्मोदयात्किल । हुताशमरुतौ तत्र, जिनैरुक्तौ गतित्रसौ ॥ २६ ॥

---

१. निगोअमज्झे, इति पाठः

इति जीवाभिगमाभिप्रायेण ॥ आचारांगनिर्युक्तिवृत्त्यभिप्रायेण तु—'दुविहे'त्यादि । त्रसा एव जीवाः त्रसजीवाः, लब्धित्रसाः गतित्रसाश्च । तेजोवायू लब्ध्या त्रसौ इति । अन्ये च नारकादयः गतित्रसाः । इति तात्पर्यम् ॥

वनस्पतिश्च प्रत्येकः, साधारण इति द्विधा । सर्वेऽमी बादराः सूक्ष्मा, विना प्रत्येकभूरुहम् ॥ २७ ॥
एकादशैकेन्द्रिया स्युरेवं प्रत्येकसंयुताः । अपर्याप्ताश्च पर्याप्ता, एवं द्वाविंशतिः कृताः ॥ २८ ॥
तत्र क्ष्माम्भोऽग्निपवनाः, साधारणवनस्पतिः । एतेऽपर्याप्तपर्याप्ता, दशैवं सूक्ष्मदेहिनः ॥ २९ ॥
सूक्ष्मनामकर्मयोगाद्ये, प्राप्ताः सूक्ष्मतामिह । चर्मचक्षुरगम्यास्ते, सूक्ष्माः पृथ्व्यादयः स्मृताः ॥ ३० ॥
सूक्ष्माः साधारणवनस्पतयो येऽत्र शंसिताः । ते च सूक्ष्मनिगोदा इत्युच्यन्ते श्रुतकोविदैः ॥ ३१ ॥
अनन्तानामसुमतामेकसूक्ष्मनिगोदिनाम् । साधारणं शरीरं यत्, स निगोद इति स्मृतः ॥ ३२ ॥
तच्चैकं सर्वतद्वासिसम्बन्धि स्तिबुकाकृति । औदारिकं स्यात्प्रत्येकं, त्वेषां तैजसकार्मणे ॥ ३३ ॥
ते सहोच्छ्वासनिःश्वासाः, समं चाहारकारिणः । अनन्ता अतिसूक्ष्मेऽङ्गे, सहन्ते हन्त यातनाम् ॥ ३४ ॥

तथोक्तम्—"जं नरए नेरइया, दुक्खं पावंति गोअमा, तिक्खं । तं पुण [1]निगोअजीवा, अणंतगुणियं वियाणाहि" ॥ सूक्ष्मा अनन्तजीवात्मका निगोदा भवन्ति भुवनेऽस्मिन् । पृथ्व्यादिसर्वजीवाः, संख्येयकसंमिता असंख्येयाः ॥ इति भगवतीवृत्तौ ॥

एभिः सूक्ष्मनिगोदैश्च, निचितोऽस्त्यखिलोऽपि हि । लोकोऽञ्जनचूर्णपूर्णसमुद्गवत्समन्ततः ॥ ३५ ॥

जीवाभिगमवृत्तौ—

असंख्येयैर्निगोदैश्च, स्यादेकः किल गोलकः । गोलकास्तेऽप्यसंख्येया, भवन्ति भुवनत्रये ॥ ३६ ॥

गोलक[2]प्ररूपणा चैवम्—

षड्दिशं यत्र लोकः स्यात्तत्र संपूर्णगोलकः । निष्पद्यते तन्मध्ये च, स्यादुत्कृष्टपदं खलु ॥ ३७ ॥
भूम्यासन्नापवरककोणान्तिमप्रदेशकम् । देशोऽनुकुर्यात् त्रिदिशमलोकावरणेन यः ॥ ३८ ॥
तत्र खण्डस्य गोलस्य, निष्पत्तिः सकलस्य न । स्याज्जघन्यपदं तस्मिन्, स्पष्टमल्पैर्निगोदकैः ॥ ३९ ॥
लोकान्तर्यत्रकुत्रापि, संस्थितः स्यान्निगोदकः । एकोऽङ्गुलासंख्यभागमितक्षेत्रावगाहनः ॥ ४० ॥
अन्येऽपि तत्रासंख्येयास्तावन्मात्रावगाहनाः । अन्योऽन्यानुप्रवेशेन, स्थितास्सन्ति निगोदकाः ॥ ४१ ॥
तत्रान्यापेक्षया प्राज्यैः, स्पृष्टं जीवप्रदेशकैः । विवक्षणीयमुत्कृष्टपदमेकप्रदेशकम् ॥ ४२ ॥
तस्यामेव निगोदावगाहनायां समन्ततः । अन्ये निगोदास्तिष्ठन्ति, प्रदेशवृद्धिहानितः ॥ ४३ ॥

---

१. निगोअमज्झे, इति पाठः २. वनस्पतेरुपादानमापः, ताश्च स्तिबुकसंस्थाना इति निगोदा अपि तथा, यद्वा षट्स्वपि दिक्षु मध्यबिन्दोः समावगाहात् गोलकनिष्पत्तिः ।

विवक्षितनिगोदस्य, मुक्त्वा कांश्चित् प्रदेशकान् । आक्रम्य चापरानेतैरवस्थितैर्निगोदकैः ॥ ४४ ॥

विवक्षितममुञ्चद्भिस्तदुष्कृष्टपदं किल । एको निष्पाद्यते गोलो, ह्यसंख्येयनिगोदकः ॥ ४५ ॥

तथोक्तम्—"उक्कोसपयममोत्तुं, निगोअओगाहणाए सव्वत्तो । निप्फाइज्जइ गोलो, पएसपरिवुड्ढिहाणीहिं" ॥

अथ गोलकमाश्रित्यैतमेव प्रोक्तलक्षणम् । अन्यो निष्पद्यते गोलो, मुक्त्वोत्कृष्टपदं हि तत् ॥ ४६ ॥

निरुक्तगोलकोत्कृष्टपदास्पर्शिनिगोदके । परिकल्प्योत्कृष्टपदमन्यगोलककल्पनात् ॥ ४७ ॥

इत्येककनिगोदावगाहनाप्रमिते किल । क्षेत्रे भवति निष्पत्तिरेककगोलकस्य वै ॥ ४८ ॥

विवक्षितनिगोदावगाहनायास्तु येऽधिकाः । निगोदांशास्तत्प्रदेशहानिस्थित्या व्यवस्थिताः ॥ ४९ ॥

विवक्षणीयास्ते गोलकान्तरानुप्रविष्टकाः । एवं गुरूपदेशेन, ज्ञेया गोलकपद्धतिः ॥ ५० ॥

उक्तं हि—"तत्तोच्चियगोलाओ, उक्कोसपयं मुइत्तु जो अण्णो । होइ निगोओ तम्मिवि, अन्नो निप्फज्जइ गोलो ॥ एवं निगोयमित्ते, खेत्ते गोलस्स होइ निप्फत्ती । एवं निप्फज्जंते, लोगे गोला असंखिज्जा" ॥ इत्याद्यर्थतो भगवतीशतक ११ उद्देशके १० ॥

निगोदा निचिताश्चैतेऽनन्तानन्ताङ्गिभिस्तथा । निर्गच्छद्भिर्यथा नित्यं, न ह्येकोऽपि स हीयते ॥ ५१ ॥

यद्व्यावहारिकाङ्गिभ्यो, यावन्तो यान्ति निर्वृतिम् । निर्यान्ति तावन्तोऽनादिनिगोदेभ्यः शरीरिणः ॥ ५२ ॥

तथोक्तम्—"सिज्झन्ति जत्तिया किर, इह संववहाररासिमज्झाओ । इन्ति अणाइवणस्सइमज्झाओ तत्तिआ तम्मि" ॥ इति प्रज्ञापनावृत्तौ ॥

अनन्तेनापि कालेन, यावन्तः स्युः शिवं गताः । सर्वेऽप्येकनिगोदैकानन्तभागमिता हि ते ॥ ५३ ॥

कालेन भाविनाऽप्येवमनन्ता मुक्तिगामिनः । चिन्त्यन्ते तैः समुदितास्तथापि नाधिकास्ततः ॥ ५४ ॥

एवं च—न तादृक् भविता कालः, सिद्धाः सोपचया अपि । यत्राधिका भवन्त्येकनिगोदानन्तभागतः ॥ ५५ ॥

तथाहुः—"जइया य होइ पुच्छा, जिणाणमग्गंमि उत्तरं तइया । इक्कस्स निगोअस्स य, अणंतभागो उ सिद्धिगओ" ॥ [नवतत्त्व गा. ६०]

निगोदेऽपि द्विधा जीवास्तत्रैके व्यावहारिकाः । व्यवहारादतीतत्वात्, परे चाव्यावहारिकाः ॥ ५६ ॥

सूक्ष्मान्निगोदतोऽनादेर्निर्गता एकशोऽपि ये । पृथ्व्यादिव्यवहारं च, प्राप्तास्ते व्यावहारिकाः ॥ ५७ ॥

सूक्ष्मानादिनिगोदेषु, यान्ति यद्यपि ते पुनः । ते प्राप्तव्यवहारत्वात्तथापि व्यवहारिणः ॥ ५८ ॥

कदापि ये न निर्याता, बहिः सूक्ष्मनिगोदतः । अव्यावहारिकास्ते स्युर्दरीजातमृता इव ॥ ५९ ॥

तदुक्तं विशेषणवत्याम्— "अत्थि अणंता जीवा, जेहिं न पत्तो तसाइपरिणामो । तेऽवि अणंताणंता, निगोअवासं अणुहवन्ति" ॥

इति सूक्ष्माणां भेदाः ॥ १ ॥

एभिर्लोकोऽखिलो व्याप्तः, कज्जलेनेव कुम्पिका । क्वापि प्रदेशो नास्त्येभिर्विहीनः पुद्गलैरिव ॥ ६० ॥

इति स्थानम् ॥ २ ॥

आद्याश्चतस्रस्तिस्रः स्युरेषां पर्याप्तयः क्रमात् । पर्याप्तान्येषामथायुः, श्वासः कायबलं तथा ॥ ६१ ॥

त्वगिन्द्रियं चेत्यमीषां, प्राणाश्चत्वार ईरिताः । संख्या योनिकुलानां तु, पृथगेषां न लक्ष्यते ॥ ६२ ॥

ततश्च–संख्या योनिकुलानां या, बादराणां प्रवक्ष्यते । एतेषामपि सैवामी, सर्वे संवृतयोनयः ॥ ६३ ॥

इति पर्याप्त्यादिद्वारचतुष्टयम् ॥ ३-६ ॥

अन्तर्मुहूर्त्तमुत्कृष्टा, भवत्येषां भवस्थितिः । जघन्या क्षुल्लकभवरूपमन्तर्मुहूर्त्तकम् ॥ ६४ ॥

तथोक्तम्–"दससहससमा सुरनारयाण सेसाण खुद्दभवो" ॥ इति भवस्थितिः ॥

सूक्ष्मनिगोदजीवानां, त्रिधा कायस्थितिर्भवेत् । अनाद्यन्ताऽनादिसान्ता, साद्यन्ता चेतिभेदतः ॥ ६५ ॥

सूक्ष्मान्निगोदतोऽनादेर्निर्गता न कदापि ये । नैवापि निर्गमिष्यन्ति, तेषामाद्या स्थितिर्भवेत् ॥ ६६ ॥

अनन्तपुद्गलपरावर्त्तमाना भवेदियम् । सन्ति चैवंविधा जीवा, येषामेषा स्थितिर्भवेत् ॥ ६७ ॥

यदुक्तम्—"सामग्गिअभावाओ ववहारियरासिअप्पवेसाओ । भव्वावि ते अणंता, जे सिद्धिसुहं न पावंति" ॥

निगोदात्सूक्ष्मतो ये च, निर्गता न कदाचन । निर्यास्यन्ति पुनर्जातु, स्थितिस्तेषां द्वितीयिका ॥ ६८ ॥

अनन्तपुद्गलपरावर्त्तमाना त्वसावपि । गतस्य कालस्यानन्त्यात्, केषाञ्चित् भाविनोऽपि च ॥ ६९ ॥

[1]अनादिस्थितिका न स्युर्यद्यनन्ता निगोदिनः । तदा वक्ष्यमाणवनस्पतिकायस्थितिक्षये ॥ ७० ॥

कृते कायपरावर्त्ते, निखिलैर्वनकायिकैः । वनस्पतीनां निर्लेपोऽनभिष्टोऽपि प्रसज्यते ॥ ७१ ॥

अनारतं किञ्च मुक्तिं, गच्छद्भिर्भव्यदेहिभिः । अचिरादेव जगति, भव्याभावः प्रसज्यते ॥ ७२ ॥

मुक्तिमार्गव्यवच्छेदोऽप्येतच्च नेष्यते बुधैः । सन्तीति प्रतिपत्तव्यं, ततोऽनादिनिगोदिनः ॥ ७३ ॥

इत्याद्यधिकं प्रज्ञापनाष्टादशपदवृत्तितोऽवसेयम् ॥

पुनः प्राप्ता निगोदं येऽनुभूय व्यवहारिताम् । कायःस्थितिः स्यात्साद्यन्ता, तेषां तां वच्मि मानतः ॥ ७४ ॥

उत्सर्पिण्यवसर्पिण्यः, संख्यातीताः प्रकीर्त्तिताः । कालतः क्षेत्रतश्चास्याः, स्थितेर्मानमथ ब्रुवे ॥ ७५ ॥

लोकाकाशमितासंख्यखण्डानां प्रदेशकाः । एकैकस्यापहारेण, ह्रियमाणाः क्षणे क्षणे ॥ ७६ ॥

यावद्भिः कालचक्रैः स्युर्निर्लेपा मूलतोऽपि हि । तावन्ति तानि स्यात्कायस्थितिरेषां तृतीयिका ॥ ७७ ॥

---

१. सर्वेषां मूलस्थानं निगोदो, जघन्यतमचैतन्यशक्तेस्तत्रैव सत्त्वात्, न च तच्चेतनातोऽल्पा चेतनाऽन्यत्र कुत्रापि, अवसानं चान्त्यमत्र, उत्कृष्टोऽन्तः सिद्धत्वे, स च प्रयत्नातिरेकसाध्यः, निगोदीयजघन्यता तु स्वभावसिद्धा, किंच नान्यत् स्थानमनन्तानामसुमतां संसारे, ततोऽप्यनादिनिगोदसत्ता ।

कालचक्राण्यसंख्यानि, भवन्त्येतानि संख्यया । कालतो हि सूक्ष्मतरं, क्षेत्रमाहुर्जिनेश्वराः ॥ ७८ ॥
यतोऽङ्गुलमिताकाशश्रेण्या अभ्रप्रदेशकाः । गण्यमानाः समानाः स्युरसंख्योत्सर्पिणीक्षणैः ॥ ७९ ॥
यदाहुः—"सुहुमो य होइ कालो, तत्तो सुहुमयरं इवइ खित्तम् । अंगुलसेढीमित्ते, ओसप्पिणिओ असंखिज्जा" ॥
[विशेषावश्यक श्लो. ६२४]

सूक्ष्मक्ष्माम्भोऽग्निमरुतां, कालतः क्षेत्रतोऽपि च । स्यात्कायस्थितिरेषैव, सूक्ष्मत्वेऽपि तथौघतः ॥ ८० ॥
एकेन्द्रियत्वतिर्यक्त्वासंज्ञित्वेषु प्रसङ्गतः । वनस्पतित्वे क्लीबत्वे, कायस्थितिमथ ब्रुवे ॥ ८१ ॥
आवल्यसंख्यभागस्य, यावन्तः समयाः खलु । स्युः पुद्गलपरावर्त्तस्तावन्तः कायसंस्थितिः ॥ ८२ ॥
सर्वेषामियमुत्कृष्टा, कायस्थितिरुदाहृता । जघन्या तु भवेदन्तर्मुहूर्त्तमविशेषतः ॥ ८३ ॥
इति कायस्थितिः ॥ ८ ॥

तैजसं कार्मणं चौदारिकं चेति वपुस्त्रयम् । पृथ्व्यादिसूक्ष्मजीवानां, प्रज्ञप्तं परमेष्ठिभिः ॥ ८४ ॥
निगोदानां त्वनन्तानामेकमौदारिकं वपुः । सर्वसाधारणं द्वे च परे प्रत्येकमीरिते ॥ ८५ ॥
इति देहाः ॥ ९ ॥

एकेन्द्रियाणां संस्थानं, सर्वेषां हुंडमीरितम् । तत्राप्येष विशेषस्तु दृष्टो दृष्टजगत्त्रयैः ॥ ८६ ॥
मसूरचन्द्रसंस्थाना[१], सूक्ष्मा क्ष्मोणी द्विधापि हि । सूक्ष्माः स्तिबुक[२]संस्थाना, आपः पापहरैः स्मृताः ॥ ८७ ॥
सूचीकलापसंस्थानां, तेजो[३] वायुर्ध्वजा[४]कृतिः । सूक्ष्मो निगोदोऽनियतसंस्थानः परिकीर्त्तितः ॥ ८८ ॥
इति जीवाभिगमा[५]भिप्रायः ॥ संग्रहणीवृत्तौ च—निगोदौदारिकदेहं स्तिबुकाकारमुक्तम् ॥ इति संस्थानम् ॥ १० ॥

अङ्गुलासंख्यांशमानं, सूक्ष्मैकेन्द्रियदेहिनाम् । सामान्यतः शरीरं स्याद्विशेषतस्तु वक्ष्यते ॥ ८९ ॥
इति देहमानम् ॥ ११ ॥

कषायानां वेदनाया, मृत्योश्चेति जिनैस्त्रयः । निरूपिताः समुद्घाताः, सूक्ष्मैकाक्षशरीरिणाम् ॥ ९० ॥
इति समुद्घाताः ॥ १२ ॥

एकेन्द्रियेषु सर्वेषु, विकलेन्द्रियकेषु च । संख्येयायुर्गर्भजेषु, तिर्यक्पञ्चेन्द्रियेष्वपि ॥ ९१ ॥
तादृशेष्वेव मर्त्येषु, तेषु संमुर्च्छिमेषु च । एते विपद्योत्पद्यन्ते, सूक्ष्मा दशविधा अपि ॥ ९२ ॥
तेजोऽनिलौ तु नवरं, नोत्पद्येते स्वभावतः । मनुष्येष्विति गच्छन्ति, ते पूर्वोक्तेषु तान्विना[६] ॥ ९३ ॥

---

१. यद्यप्यतीन्द्रियार्थवेदिज्ञानवेद्यानि सूक्ष्मबादराङ्गिनां प्रत्येकानां संस्थानानि तथापि चतुरस्त्रादिसर्वसंस्थानानां पृथ्व्यां सत्तादर्शनात् सुखावगम्यता २. अनेकानामप्यप्कायानां बिन्दुसंस्थानोपलब्धेः ३. बादरतेजसः प्रत्यक्षेण सूक्ष्माग्रत्वं दृश्यते, तथाऽन्यस्यापि । ४. अत एव वालुकास्वाकारो वायुजन्यः, ऊर्ध्वभागादधोभागेऽपि वायोरागमश्च । ५. व्यवहारार्थाभावान्नैकतमत् संस्थानं, संग्रहण्यादौ जलसंस्थानमनुश्रित्य तन्मूलत्वाद्वनस्पतेः । ६. तौ. इति पाठः

इति गतिः ॥ १३ ॥

उत्पद्यन्ते च पूर्वोक्ताः, सूक्ष्मैकाक्षेषु तेऽखिलाः । स्वस्वकर्मानुभावेन गरिष्ठेन वशीकृताः ॥ ९४ ॥
नारका निर्जरास्तिर्यग्नराश्चासंख्यजीविनः । नैषां सूक्ष्मेषु गमनं, न चाप्यागमनं ततः ॥ ९५ ॥
गतिष्वेवं चतसृषु, संक्षेपात्ते विवक्षिताः । द्विगतयो द्व्यागतयो, भवन्ति सूक्ष्मदेहिनः ॥ ९६ ॥
तेजोऽनिलौ तु नृभवे, नोत्पद्येते स्वभावतः । ततस्त एकगतयः, प्रोक्ता द्व्यागतयोऽपि च ॥ ९७ ॥
सूक्ष्मेषु पृथ्वीसलिलतेजोऽनिलेषु जन्तवः । उत्पद्यन्ते च्यवन्ते च, असंख्येया निरन्तरम् ॥ ९८ ॥
वनस्पतौ त्वनन्तानामुत्पत्तिविलयौ सदा । स्वस्थानतः परस्थानात्त्वसंख्यानां गमागमौ ॥ ९९ ॥
एकस्यापि निगोदस्यासंख्यांशोऽनन्तजीवकः । जायते म्रियते शश्वत्, किं पुनः सर्वमीलने ॥ १०० ॥
तथाहि – विवक्षितनिगोदस्य, विवक्षितक्षणे यथा । असंख्येयतमो भाग, एक उद्वर्त्तते ध्रुवम् ॥ १०१ ॥
उत्पद्यतेऽन्यस्तथैव, द्वितीयसमयेऽपि हि । एक उद्वर्त्तते संख्यभाग उत्पद्यतेऽपरः ॥ १०२ ॥
उद्वर्त्तनोपपातावित्येवं स्यातां प्रतिक्षणम् । यथैकस्य निगोदस्यासंख्यभागस्य सर्वदा ॥ १०३ ॥
तथैवान्यनिगोदानामपि त्रैलोक्यवर्त्तिनाम् । उद्वर्त्तनोपपातौ स्तोऽसंख्यांशस्य पृथक् पृथक् ॥ १०४ ॥
उद्वर्त्तनोपपाताभ्यां, भवद्भ्यामित्यनुक्षणम् । परावर्त्तन्ते निगोदा, अन्तर्मुहूर्त्तमात्रतः ॥ १०५ ॥
जायमानैर्म्रियमाणैरन्तर्मुहूर्त्तजीविभिः । निगोदिभिर्नवनवैः, स्युः शून्यास्तु मनाग् न ते ॥ १०६ ॥

तथोक्तं—"एगो असंखभागो, वट्टइ उव्वट्टणोववायंमि । एगनिगोए निच्चं, एवं सेसेसु वि स एवम्" ॥ अंतोमुहूत्तमित्ता, ठिई निगोआण जं विणिद्दिट्ठा । पल्लट्टंति निगोआ, तम्हा अंतोमुहूत्तेणं ॥ [प्राचीन गाथा]

एषामुत्पत्तिमरणे, विरहस्तु न विद्यते । यज्जायन्ते म्रियन्ते चासंख्यानन्ता निरन्तरम् ॥ १०७ ॥

इति आगतिः ॥ १४ ॥

अनन्तराप्तिः समये, सिद्धिर्बादरवद्बुधैः । ज्ञेयैषां प्राच्यशास्त्रेषु, विभागेनाविवक्षणात् ॥ १०८ ॥

इति द्वारद्वयम् ॥ १५–१६ ॥

कृष्णा नीला च कापोती, लेश्यात्रयमिदं भवेत् । सर्वेषां सूक्ष्मजीवानामित्युक्तं सूक्ष्मदर्शिभिः ॥ १०९ ॥

इति लेश्याः ॥ १७ ॥

निर्व्याघातं प्रतीत्यैषामाहारः षड्दिगुद्भवः । भवेद्व्याघातमाश्रित्य, त्रिचतुष्पञ्चदिग्भवः ॥ ११० ॥

इत्याहारदिक् ॥ १८ ॥

न संहननमेतेषां, सम्भवत्यस्थ्यभावतः । मतान्तरेण चैतेषां, सेवार्त्तं तदुरीकृतम् ॥ १११ ॥

इति संहननानि ॥ १९ ॥

सर्वे कषायाः संज्ञास्तु, स्युश्चतस्रोऽथवा दश । इन्द्रियं चैकमाख्यातमेतेषां स्पर्शनेन्द्रियम् ॥ ११२ ॥

इति द्वारत्रयम् ॥ ॥ २०-२१-२२ ॥

भूतभाविभवद्भावस्वभावालोचनात्मिका । संज्ञा नैकेन्द्रियाणां स्यात्तदेतेऽसंज्ञिनः स्मृताः ॥ ११३ ॥

इति संज्ञिता ॥ २३ ॥

अमी जिनेश्वरैः क्लीबवेदा एव प्रकीर्त्तिताः । वेदस्त्वव्यक्तरूपः स्यादेषां संज्ञाकषायवत् ॥ ११४ ॥

इति वेदः ॥ २४ ॥

संक्लिष्टपरिणामत्वात्सर्वैकेन्द्रियदेहिनाम् । मिथ्यादृष्टय एवामी, निर्दिष्टाः परमेष्ठिभिः ॥ ११५ ॥

इति दृष्टिः ॥ २५ ॥

मत्यज्ञानश्रुताज्ञाने, सूक्ष्मैकेन्द्रियदेहिनाम् । ते अप्यत्यन्तमल्पिष्टे, शेषजीवव्यपेक्षया ॥ ११६ ॥

इति ज्ञानम् ॥ २६ ॥

चतुर्षु दर्शनेष्वेषामचक्षुदर्शनं भवेत् । उपयोगास्त्रयोऽज्ञानद्वयमेकं च दर्शनम् ॥ ११७ ॥

निराकारोपयोगाः स्युरचक्षुर्दर्शनाश्रयात् । द्व्यज्ञानतस्तु साकारोपयोगाः सूक्ष्मदेहिनः ॥ ११८ ॥

इति द्वारद्वयम् ॥ २७–२८ ॥

आहारका सदाप्येते, स्युर्विग्रहगतिं विना । तस्यां त्वनाहारका अप्येते त्रिचतुरान् क्षणान् ॥ ११९ ॥

एषामुत्पन्नमात्राणामोज आहार ईरितः । लोमाहारस्ततो द्वेधाप्यनाभोगज एव च ॥ १२० ॥

सचित्तः स्यादचित्तः स्यादुभयात्मापि कर्हिचित् । आहारे चान्तरं नास्ति, सदाहारार्थिनो ह्यमी ॥ १२१ ॥

तथोक्तं प्रज्ञापनायाम्—"पुढवीकाइयस्स णं भंते ! केवइकालस्स आहारट्ठे समुप्पज्जइ ॥
गोअम ! अणुसमयं अविरहिए । एवं जाव वणस्सइकाइया" ॥ इति ॥

इत्योहारकत्वम् ॥ २९ ॥

आद्यमेव गुणस्थानमेकं सूक्ष्मशरीरिणाम् । अनाभोगिकमिथ्यात्ववतामेषां निरूपितम् ॥ १२२ ॥

इति गुणाः ॥ ३० ॥

दशानामपि सूक्ष्माणां, त्रयो योगाः प्रकीर्त्तिताः । औदारिकस्तन्मिश्रश्च कार्मणश्चापि विग्रहे ॥ १२३ ॥

इति योगाः ॥ ३१ ॥

असंख्येयलोकमाननभःखण्डप्रदेशकैः । तुल्याः सूक्ष्माग्निपृथव्यम्बुमरुतः किन्तु तत्र च ॥ १२४ ॥

लोकाकाशमिताः खण्डा, असंख्येया अपि क्रमात् । अन्यादिषु भूरिभूरितरभूरितमा मताः ॥ १२५ ॥

पर्याप्तापर्याप्तसूक्ष्मबादरानन्तकायिकाः । चत्वारोऽपि स्युरनन्तलोकाकाशांशसम्मिताः ॥ १२६ ॥

अयं भावः—लोकाकाशप्रदेशेषु, निगोदसत्कजन्तुषु । प्रत्येकं स्थाप्यमानेषु, पूर्यतेऽसावनन्तशः ॥ १२७ ॥
तत्रापि-बादरसाधारणेभ्यः, पर्याप्तेभ्यो भवन्ति हि । अपर्याप्ताबादरास्ते, असंख्येयगुणाधिकाः ॥ १२८ ॥
बादरापर्याप्तकेभ्यः, सूक्ष्मपर्याप्तका इमे । असंख्येयगुणास्तेभ्यः, सूक्ष्मपर्याप्तकास्तथा[1] ॥ १२९ ॥
इति मानम् ॥ ३२ ॥

सूक्ष्मास्तेजस्कायिकाः स्युः, सर्वस्तोकास्ततः क्रमात् । सूक्ष्मक्षमाम्बुमरुतो, विशेषाभ्यधिकाः स्मृताः ॥ १३० ॥
असंख्येयलोकमाननभःखण्डप्रदेशकैः । तुल्याः सर्वेऽप्यमी किन्तु, यथोत्तराधिकाधिकाः ॥ १३१ ॥
असंख्येयगुणाः सूक्ष्मवायुभ्यः स्युर्निगोदकाः । असंख्येयप्रमाणत्वादेतेषां प्रतिगोलकम् ॥ १३२ ॥
तेभ्योऽनन्तगुणाः सूक्ष्माः, स्युर्वनस्पतिकायिकाः । तेभ्यः सामान्यतः सूक्ष्मा, विशेषाभ्यधिकाः स्मृताः ॥ १३३ ॥
स्वस्वजातिष्वपर्याप्तकेभ्योऽसंख्यगुणा मताः । पर्याप्तका यदेतेऽन्यापेक्षयाऽधिकजीविनः ॥ १३४ ॥
उत्पद्यन्ते तथैकेकापर्याप्तकस्य निश्रया । पर्याप्तका असंख्येयास्ततोऽमी बहवो मताः ॥ १३५ ॥

तथोक्तमाचाराङ्गवृत्तौ—"सूक्ष्मा अपि पर्याप्तकापर्याप्तकभेदेन द्विधैव । किन्तु अपर्याप्तकनिश्रया पर्याप्तकाः समुत्पद्यन्ते । यत्र चैकोऽपर्याप्तकस्तत्र नियमादसंख्येयाः पर्याप्ताः स्युः" । इति ॥

अत एवैकेन्द्रियाः स्युः, सामान्यतो विवक्षिताः । पर्याप्ता एव भूयांसो, जीवा अप्योघतस्तथा ॥ १३६ ॥
इति लघ्वल्पबहुता ॥ ३३ ॥

दिशामपेक्षया त्वल्पबहुतैषां न सम्भवेत् । अमी प्रायः सर्वलोकापन्नाः सर्वत्र यत्समाः ॥ १३७ ॥

तथोक्तं प्रज्ञापनावृत्तौ—"इदं ह्यल्पबहुत्वं बादरानधिकृत्य दृष्टव्यं, न सूक्ष्मान् । सूक्ष्माणां सर्वलोकापन्नानां प्रायः सर्वत्र समत्वात्" ॥

इति दिगपेक्षयाऽल्पबहुता ॥ ३४ ॥

ओघतः सूक्ष्मजीवानामन्तरं यदि चिन्त्यते । अन्तर्मुहूर्त्तं सूक्ष्मत्वे, जघन्यं कथितं जिनैः ॥ १३८ ॥
यदुत्पद्य बादरेषु, सूक्ष्मः संत्यज्य सूक्ष्मताम् । स्थित्वा तत्रान्तर्मुहूर्त्तं, पुनः सूक्ष्मत्वमाप्नुयात् ॥ १३९ ॥
उत्कर्षतः कालचक्राण्यसंख्येयानि तानि च । निष्पाद्यान्यङ्गुलासंख्यांशस्थखांशमितैः क्षणैः ॥ १४० ॥
अयं भावः—

एकस्मिन्नङ्गुलासंख्यभागे येऽभ्रप्रदेशकाः । यावन्ति कालचक्राणि, हृतैस्तैः स्युः प्रतिक्षणम् ॥ १४१ ॥
उत्कर्षतो बादरत्वे, तावती वर्णिता स्थितिः । तां समाप्य पुनः सौक्ष्म्यप्राप्तौ युक्तमदोऽन्तरम् ॥ १४२ ॥
सूक्ष्मक्ष्माम्भोऽग्निमरुतामिह प्रत्येकमन्तरम् । लघु स्यादन्तर्मुहूर्त्तमनन्ताद्धामितं गुरुः ॥ १४३ ॥

---

१. असंख्यघ्नाः सूक्ष्मपर्याप्तकाः संख्यगुणास्ततः इतिपाठः

तच्च सूक्ष्मक्ष्मादिजन्तोः, सूक्ष्मस्थूलवनस्पतौ । गत्वा स्थित्वाऽनन्तकालं, सूक्ष्मक्ष्मादित्वमीयुषः ॥ १४४ ॥
वनस्पतेश्च सूक्ष्मस्यान्तरमुत्कर्षतो भवेत् । कालचक्राण्यसंख्येयलोकमानानि पूर्ववत् ॥ १४५ ॥
तच्च सूक्ष्मक्ष्मादितयोत्पद्य सूक्ष्मवनस्पतेः । स्थित्वोक्तकालं पुनरप्युत्पन्नस्य वनस्पतौ ॥ १४६ ॥
न सम्भवति चैतेषामनन्तकालमन्तरम् । विना वनस्पतीन् कुत्राप्यनन्तस्थित्यभावतः ॥ १४७ ॥
जघन्यमन्तरं त्वेषामन्तर्मुहूर्त्तमीरितम् । क्ष्मादिष्वन्तर्मुहूर्त्तं तत्, स्थित्वोत्पत्तौ भवेदिह ॥ १४८ ॥
इत्यन्तरम् ॥ ३५ ॥
प्रायो भवसंवेधो, महाल्पबहुता त्वनेकजीवानाम् । वक्तव्ये इत्युभयं, वक्ष्ये जीवप्रकरणान्ते ॥ १४९ ॥

वर्णिताः किमपि सूक्ष्मदेहिनः, सूक्ष्मदर्शिवचनानुसारतः ।
यत्तु नेह कथितं विशेषतः, तद् बहुश्रुतगिराऽवसीयताम् ॥ १५० ॥

विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्वप्रदीपोपमे सर्गो निर्गलितार्थसार्थसुभगः पूर्णश्चतुर्थः सुखम् ॥ १५१ ॥

॥ इति श्री लोकप्रकाशे चतुर्थः सर्गः समाप्तः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

अथ पञ्चमः सर्गः ।

वर्ण्यन्तेऽथ क्रमप्राप्ता, बादरैकेन्द्रियाङ्गिनः । ते च षोढा पृथिव्यम्बुतेजोऽनिलास्तथा द्रुमाः ॥ १ ॥
प्रत्येकाः साधारणाश्च, षडप्येते द्विधा मताः । पर्याप्तापर्याप्तभेदादेवं द्वादश बादराः ॥ २ ॥
बादराख्यनामकर्मोदयाद्ये स्थूलतां गताः । चर्मचक्षुर्दृश्यमाना, बादरास्ते प्रकीर्त्तिताः ॥ ३ ॥
तत्र च—अपर्याप्तास्त्वविस्पष्टवर्णाद्या अल्पजीवनात् । पर्याप्तानां च वर्णादिभेदैर्भेदाः सहस्रशः ॥ ४ ॥
बादरा पृथिवी द्वेधा, मृदुरेका खराऽपरा । भेदाः सप्त मृदस्तत्र, वर्णभेदविशेषजाः ॥ ५ ॥
कृष्णा नीलाऽरुणा पीता, शुक्लेति पञ्च मृद्भिदः । षष्ठी देशविशेषोत्था, मृत्स्ना पाण्डुरिति श्रुता ॥ ६ ॥
नद्यादिपूरापगमे, देशे तत्रातिपिच्छिले । मृदुश्लक्ष्णा पङ्करूपा, सप्तमी पनकाभिधा ॥ ७ ॥
इत्यर्थतः प्रज्ञापनावृत्तौ ॥

उत्तराध्ययनवृत्तौ तु—"पांडुत्ति" ॥ पाण्डु पाण्डुरा, इषच्छुक्लत्ववतीत्यर्थः । इति वर्णभेदेन षड्विधत्वमुक्तम् ॥ इह च पाण्डुरग्रहणं कृष्णादिभेदानामपि स्वस्थाने भेदान्तरसम्भवसूचकम् । पनकोऽत्यन्तसूक्ष्मरजोरूपः स एव मृत्तिका पनकमृत्तिका । पनकस्य च नभसि विवर्त्तमानस्य लोके पृथ्वीत्वेन रूढत्वादभेदेनोपादानम् ॥ इत्याद्युक्तम् ॥

चत्वारिंशत् खरायाश्च, भेदाः प्रज्ञापिताः क्षितेः । अष्टादश मणीभेदास्तथा द्वाविंशतिः परे ॥ ८ ॥
गोमेधकाङ्कस्फटिकलोहिताक्षा हरिन्मणिः । षष्ठो मसारगल्लः स्यात्सप्तमो भुजमोचकः ॥ ९ ॥
इन्द्रनीलश्चन्दनश्च, गैरिको हंसगर्भकः । सौगन्धिकश्च पुलकस्ततश्चन्द्रप्रभाभिधः ॥ १० ॥
वैडूर्यं जलकान्तश्च, रुचकार्कोपलाविति । खरक्ष्माया एव भेदानन्यान् द्वाविंशतिं ब्रुवे ॥ ११ ॥
भूर्नदीतटभित्त्यादेः, शर्करोपलकर्कराः । सिकताः सूक्ष्मकणिकाः, उपला लघवोऽश्मकाः ॥ १२ ॥
शिला महान्ती क्षाराभूरुषो लवणमब्धिजम् । सुवर्णरूप्यताम्रायस्त्रपुसीसकधातवः ॥ १३ ॥
वज्रं च हरितालश्च, हिङ्गुलश्च मनःशिला । प्रवालं पारदश्चापि, सौवीराभिधमञ्जनम् ॥ १४ ॥
पटलं पुनरभ्राणां तथा तन्मिश्रवालुकाः । अन्येऽप्येवंविधा ग्राह्या, जेयावण्णेतिवाक्यतः ॥ १५ ॥
इत्यर्थतः प्रज्ञापनावृत्तौ ॥ इति पृथ्वीकायभेदाः ॥
जलभेदा जलं शुद्धं, शीतमुष्णं स्वभावतः । क्षारमीषदतिक्षारमम्लमीषत्तथाधिकम् ॥ १६ ॥
हिमावश्यायकरका, धूमरी क्ष्मान्तरिक्षजम् । क्ष्मामुद्भिद्य तृणाग्रस्थं, नाम्ना हरतनूदकम् ॥ १७ ॥
घृतेक्षुवारुणीदुग्धोदकं तत्तद्रसाङ्कितम् । घनोदध्यादयश्चास्य, भेदा येऽन्येऽपि तादृशाः ॥ १८ ॥
इत्यप्कायभेदाः ॥
शुद्धाग्निरशनिर्ज्वाला, स्फुलिङ्गोऽङ्गारविद्युतः । अलातोल्कामुर्मुराख्या, निर्घातकणकाभिधाः ॥ १९ ॥
काष्टसंघर्षसम्भूतः, सूर्यकान्तादिसम्भवः । वह्निभेदा अमी ग्राह्या, ये चान्येऽपि तथाविधाः ॥ २० ॥
इत्यग्निभेदाः ॥
प्राच्योदीच्यप्रतीचीनदाक्षिणात्या विदिग्भवाः । ऊर्ध्वाधः सम्भवा वाता, उद्भ्रामोत्कलिकानिलाः ॥ २१ ॥
गुंजाझंझाख्य संवर्तो, वातो मंडलिकाभिधः । घनवातस्तनुवातस्तत्रोद्भ्रामोऽनवस्थितः ॥ २२ ॥
लहर्य इव पाथोधेर्वातस्योत्कलिकास्तु याः । रेणुकासु स्फुटव्यंग्यास्तद्वानुत्कलिकानिलः ॥ २३ ॥
गुञ्जन् सशब्दं यो वाति, स गुञ्जावात उच्यते । झंझानिलो वृष्टियुक्तः, स्याद्वा योऽत्यन्तनिष्ठुरः ॥ २४ ॥
आवर्त्तकस्तृणादीनां, वायुः संवर्त्तकाभिधः । मंडलाकृतिरामूलात्, मंडलीवात उच्यते ॥ २५ ॥
घनो घनपरीणामो, धराद्याधार ईरितः । विरलः परिणामेन, तनुवातस्ततोऽप्यधः ॥ २६ ॥
मन्दंमन्दं च यो वाति, शीतः स्पर्शसुखावहः । स उच्यते शुद्धवात, इत्याद्याः स्युर्मरुद्भिदः ॥ २७ ॥
इति वायुकायभेदाः ॥
क्रमप्राप्ता निरूप्यन्ते, भेदा अथ वनस्पतेः । साधारणस्य प्रत्येकवपुषश्च यथाक्रमम् ॥ २८ ॥
स्थावराणां सात्मकत्वमनङ्गीकुर्वतः प्रति । आदौ वनस्पतिद्वारा, स्पष्टं तदुपपाद्यते ॥ २९ ॥
पृथ्व्यादीनां सात्मकत्वे, युक्तियुक्तेऽपि युक्तयः । वनस्पतेः सात्मकत्वे, गम्याः स्थूलदृशामपि ॥ ३० ॥

दिग्मात्रेणात्र ता एव, दर्श्यन्ते व्यक्तिपूर्वकम् । ततस्तदनुसारेण, ज्ञेयाऽन्येष्वपि चेतना ॥ ३१ ॥
मूले सिक्तेषु वृक्षेषु, फलादिषु रसः स्फुटः । स चोच्छ्वासमन्तरेण[1], कथमूर्ध्वं प्रसर्प्पति ॥ ३२ ॥
रसप्रसर्प्पणं स्पष्टं, सत्युच्छ्वासेऽस्मदादिषु । तदभावे तदभावो, दृष्टश्च मृतकादिषु ॥ ३३ ॥
अन्वयव्यतिरेकाभ्यां, ततो रसप्रसर्प्पणम् । उच्छ्वासमाक्षिपति यत्, व्याप्यं न व्यापकं विना ॥ ३४ ॥
उच्छ्वासश्चात्मनो धर्मो, निर्विवादमिदं खलु । धर्मश्च धर्मिणं ब्रूते, स्वाविनाभावतः स्फुटम् ॥ ३५ ॥
किं च—
दृश्यते दोहदोत्पत्तिर्द्रूणामपि नृणामिव । यत्तत्प्राप्य फलन्त्येते, हृष्टाः शुष्यन्ति चान्यथा ॥ ३६ ॥
दोहदश्चात्मनो धर्मः, कथं नात्मानमाक्षिपेत् । इच्छारूपो दोहदो हि, नेच्छावन्तं विना भवेत्[2] ॥ ३७ ॥
संज्ञा नियतसंकोचविकासप्रमुखा अपि । संज्ञिनं कथमात्मानं, न ज्ञापयन्ति युक्तिभिः ॥ ३८ ॥
यद्वा[3] तारतम्यमेवं, द्रुमेष्वपि नरेष्विव । केऽप्येरण्डादिवन्नीचाः, केऽप्याम्रादिवदुत्तमाः ॥ ३९ ॥
उत्कटाः कण्टकैः केचित्, केचिदत्यन्तकोमलाः । कुटिलाः केऽपि सरलाः, कुब्जा दीर्घाश्च केचन ॥ ४० ॥
हृद्यवर्णगन्धरसस्पर्शाः केचित्ततोऽन्यथा । सविषा निर्विषाः केऽपि, सफला निष्फलाः परे ॥ ४१ ॥
जाताः केचिदवकरे सूद्यानादौ च केचन । केचिच्चिरायुषः शस्त्राद्यैः केचित्क्षिप्रमृत्यवः ॥ ४२ ॥
विना कर्माणि नानात्वमिदं युक्तिसहं कथम् । विना कारणनानात्वं, कार्ये तद्धि न सम्भवेत् ॥ ४३ ॥
कर्माणि च कार्यतयाऽऽत्मानं कर्त्तारमेव हि । आक्षिपन्त्यविनाभूताः, कुलालं कलशा इव ॥ ४४ ॥
वनस्पतेः सात्मकत्वं, स्फुटमेव प्रतीयते । जन्यादिधर्मोपेतत्वात् मनुष्यादिशरीरवत् ॥ ४५ ॥
अनुमानं पुरस्कृत्य, साधयत्यागमोऽपि च । वनस्पतेः सचैतन्यमाचाराङ्गे यथोदितम् ॥ ४६ ॥

इमंपि जाइधम्मयं एयंपि जाइधम्मयं । इमंपि वुड्ढिधम्मयं एयंपि वुड्ढिधम्मयं । इमंपि चित्तमंतयं एयंपि चित्तमंतयं । इमंपि छिन्नं मिलायइ एयंपि छिन्नं मिलायइ । इमंपि आहारगं एयंपि आहारगं । इमंपि अणिच्चयं एयंपि अणिच्चयं । इमंपि असासयं एयंपि असासयं । इमंपि चओवचइयं एयंपि चओवचइयं । इमंपि विपरिणामधम्मयं एयंपि विपरिणामधम्मयं" । इत्यादि ॥ (अत्रैकं इदंशब्दवाच्यं मनुष्यशरीरं द्वितीयं च एतच्छब्दवाच्यं वनस्पति शरीरम् । इत्यनयोः दृष्टान्तदार्ष्टान्तिकयोजना)

वनस्पतेः सचैतन्यमेवं सिद्धं नराङ्गवत् । ततोऽस्य योनिजातत्वमपि सिद्धं तदुच्यते ॥ ४७ ॥
तथाहि—
बीजस्य द्विविधावस्था, योन्यवस्था तथाऽपरा । तन्मध्ये योन्यवस्था या, सा चैवं परिभाव्यते ॥ ४८ ॥

१. परिणामान्तरसद्भावे सतीतिविशेष्यं, तेन न जलाकर्षकवस्त्रादिना व्यभिचारः । २. विद्युच्छक्त्योस्तु संयोगः न तु दोहदः ।
३. विचित्रकर्मवेदका वनस्पतयः जीववत्त्वे सति विचित्राकारधारित्वात् वामनेतरनरादिवत् ।

जन्तूत्पत्तिक्षणे पूर्वजन्तुना स्याद्यदुज्झितम् । अत्यक्तयोन्यवस्थं च, तद्बीजं योनिभूतकम् ॥ ४९ ॥
तत्र च–जन्तूज्झितं निश्चयेनाधुना ज्ञातुं न शक्यते । ततोऽनतिशयी बीजं, सचेतनमुतेतरत् ॥ ५० ॥
योनिभूतं व्यवहरेद्यावदध्वस्तयोनिकम् । ध्वस्तयोनित्वजीवत्वादयोनिभूतमेव हि ॥ ५१ ॥
यन्नष्टेऽपि सजीवत्वे, योनित्वं जातुचिद्भवेत् । परिभ्रष्टे तु योनित्वे, सजीवत्वं न सम्भवेत् ॥ ५२ ॥
एवं च–
उत्पत्तिस्थानकं जन्तोर्यदविध्वस्तशक्तिकम् । सा योनिस्तत्र शक्तिस्तु, जन्तूत्पादनयोग्यता ॥ ५३ ॥

तथोक्तं प्रज्ञापनावृत्तौ—"अथ योनिरिति किमभिधीयते ? उच्यते । जन्तोरुत्पत्तिस्थानमविध्वस्तशक्तिकं तत्रस्थजीवपरिणमनशक्तिसंपन्नम्" । इति ॥

अत एव श्रुतेऽपि—
यवा यवयवाश्चापि, गोधूमव्रीहिशालयः । धान्यानां श्रीजिनैरेषामुक्ता योनिस्त्रिवार्षिकी ॥ ५४ ॥
कलादमाषचपलतिलमुद्गमसूरकाः । कुलत्थतुवरीवृत्तचणका वल्लकास्तथा ॥ ५५ ॥
लट्टातसीशणकङ्गुकोरदूषककोद्रवाः । प्रज्ञप्ता योनिरेतेषां, श्रीजिनैः पञ्चवार्षिकी ॥ ५६ ॥
बीजानि मूलकानां सर्षपावरट्टरालकाः । प्रज्ञप्ता योनिरेतेषामागमे सप्तवार्षिकी ॥ ५७ ॥
इयमत्र भावना—
कोष्ठकादिषु निक्षिप्यैतेषां पिधानशालिनाम् । लिप्तानां मुद्रितानां चोत्कृष्टैषा योनिसंस्थितिः ॥ ५८ ॥
तदनु क्षीयते योनिरङ्कुरोत्पत्तिकारणम् । भवेद्विजमबीजं तन्नोप्तमङ्कुरितं भवेत् ॥ ५९ ॥
अन्तर्मुहूर्त्तं सर्वेषामेषां योनिर्जघन्यतः । तत्केषाञ्चिदचित्तत्वं, जायतेऽन्तर्मुहूर्त्ततः ॥ ६० ॥
परं तत्सर्वविद्वेद्यं, व्यवहारपथे तु न । व्यवहारात्तु पूर्वोक्तैः, कालमानैरचित्तता ॥ ६१ ॥

इदमर्थतः पञ्चमाङ्गे प्रवचनसारोद्धारे च ॥ ततश्च—
बीजे च योनिभूते, व्युत्क्रामति सैव जन्तुरपरो वा । मूलस्य यश्च कर्ता, स एव तत्प्रथमपत्रस्य ॥ ६२ ॥
इयमत्र भावना—
बीजस्य निर्वर्त्तकेन, जीवेन स्वायुषः क्षयात् । यद्बीजं स्यात्परित्यक्तमथ बीजस्य तस्य च ॥ ६३ ॥
अम्बुकालक्ष्मादिरूपसामग्रीसम्भवे सति । स एव जातु बीजाङ्गी, बद्धतादृशकर्मकः ॥ ६४ ॥
उत्पद्यते तत्र बीजेऽन्यो वा भूकायिकादिकः । निबद्धमूलादिनामगोत्रकर्मात्र जायते ॥ ६५ ॥
स एव निर्वर्त्तयति, मूलं पत्रं तथाऽऽदिमम् । मूलप्रथमपत्रे च, तत एवैककर्तृके ॥ ६६ ॥

यदागमः—"जोऽविय मूले जीवो सोविय पत्ते पढमयाएत्ति" । अत्राह परः—
नन्वेवमादिमदले, मूलजीवकृते सति । उद्गच्छत्किशलेऽनन्तकायिकत्वं विरुध्यते ॥ ६७ ॥

यदागमः—"सव्वोवि किसलओ खलु उग्गममाणो अणंतओ भणिओत्ति" ॥ अत्र उच्यते–[बृहत्संग्रहणी गा-२]

बीजे मूलतयोत्पद्य, बीजजीवोऽथवापरः । करोत्युत्सूनतावस्थां, ततोऽनन्तरभाविनीम् ॥ ६८ ॥
ध्रुवं किसलयावस्थां, सृजन्त्यनन्तजन्तवः । ततश्च तेषु जीवेषु, विनष्टेषु स्थितिक्षयात् ॥ ६९ ॥
स एव मूलजीवस्तां, तनूमनन्तदेहिनाम् । समाप्याद्यस्वांगतया, तावद्वर्द्धयते किल ॥ ७० ॥
यावत्प्रथमपत्रं स्यात्ततश्च न विरुध्यते । किशलेऽनन्तकायित्वमेककर्तृकतापि च ॥ ७१ ॥

अन्ये तु व्याचक्षते—

इह बीजसमुत्सूनावस्थैव प्रतिपाद्यते । प्रथमपत्रशब्देन, तस्याः प्रथममुद्भवात् ॥ ७२ ॥
ततश्च–मूलं बीजसमुत्सूनावस्था चेत्येककर्तृके । अनेन चैवं नियमो, लभ्यते सूत्रसूचितः ॥ ७३ ॥
एकजीवकृते एव, मूलं चोत्सूनतादशा । नावश्यं मूलजीवोत्थं, शेषं किसलयादिकम् ॥ ७४ ॥

ततश्चोभयमप्यविरुद्धम् (१) जोऽविय मूले जीवो सोऽविय पत्ते पढमयाएत्ति (२) सव्वोऽवि किसलओ खलु उग्गममाणो अणंतओ भणिओ ॥ इति ॥

एतच्चार्थतः प्रज्ञापनावृत्तौ ॥ आचरांगवृत्तावपि तथैव ॥ यदुक्तम्—"यश्च मूलतया जीवः परिणमते स एव प्रथमपत्रतया अपि इति" । एकजीवकर्तृके मूलप्रथमपत्रे इति यावत् । प्रथमपत्रकं च यासौ बीजस्य समुत्सूनावस्था भूजलकालापेक्षा सैवोच्यते । इति ॥ नियमप्रदर्शनमेतत् ॥ शेषं तु किसलयादिसकलं न मूलजीवपरिणामाविर्भावितमेवेत्यवगन्तव्यम् ॥

उद्गच्छन् प्रथमाङ्कुरः, सर्वः साधारणो भवेत् । वर्धमानो यथायोगं, स्यात्प्रत्येकोऽथवापरः ॥ ७५ ॥

तत्र साधारणलक्षणं सामान्यतः एवम्—

शरीरोच्छ्वासनिःश्वासाहाराः साधारणाः खलु । येषामनन्तजीवानां, ते स्युः साधारणाङ्गिनः ॥ ७६ ॥

विशेषतः तल्लक्षणम् चैवम्—

मूलादिदशकस्येह, यस्य भङ्गो समो भवेत् । अनन्तजीवं तद् ज्ञेयं, मूलादिदशके खलु ॥ ७७ ॥

वनस्पतिसप्ततौ समभङ्गलक्षणमेवमुक्तम्—"खडिआइ चुन्ननिप्फाइयाइ, वत्तीइ जारिसो भंगो । सव्वत्थ समसरूवो, केआरतरीइ तुल्लो वा ॥ इत्थ पुण विसेसोऽयं, समभंगा हुंति जे सयाकालम् । ते च्चिय अणंत्तकाया, न पुणो जे कोमलत्तेणं" ॥

मूलादिदशकं तु एवम्—मूले कंदे खंधे, तया य साले पवाल पत्ते य । पुप्फे फले बीएविय, पत्तेयं जीवठाणाइं ॥

मूलादेर्यस्य भग्नस्य, मध्ये हीरो न दृश्यते । अनन्तजीवं तद् ज्ञेयं, यदन्यदपि तादृशम् ॥ ७८ ॥

हीरो नाम विषमः छेदः उद्दन्तुरो वा ॥

यत्र स्कन्धकन्दमूलशाखासु खलु वीक्ष्यते । त्वचा स्थूलतरा काष्ठात्, सा त्वचाऽनन्तजीविका ॥ ७९ ॥

येषां मूलकन्दपत्रफलपुष्पत्वचां भवेत् । चक्राकारः समच्छेदो, भङ्गेऽनन्तात्मकं हि तत् ॥ ८० ॥
ग्रन्थिः पर्वात्मिका भङ्गस्थानं सामान्यतोऽथवा । रजसाच्छुरितं यस्य, भङ्गेऽनन्तात्मकं हि तत् ॥ ८१ ॥
केदारशुष्कतरिकापुटवद्विद्यते च यत् । प्रागुक्तलक्षणाभावेऽप्यनन्तकायिकं हि तत् ॥ ८२ ॥
यदागमः—चक्कागं भज्जमाणस्सं, गंठीचुण्णघणो भवे । पुढवीसरिसभेएण, अणंतजीवं वियाणाहि ॥
सक्षीरं वापि निःक्षीरं, पत्रं गूढशिरं च यत् । अलक्ष्यमाणपत्रार्धद्वयसन्धि च यद्भवेत् ॥ ८३ ॥
अनन्तजीवं तत्सर्वं, ज्ञेयमित्यादिलक्षणैः । बहुश्रुतेभ्यो ज्ञेयानि, लक्षणान्यपराण्यपि ॥ ८४ ॥
अयोगोलो यथाऽऽध्मातो, जातस्तप्तसुवर्णरुक् । सर्वोऽप्यग्निपरिणतो, निगोदोऽपि तथाऽद्भिभिः ॥ ८५ ॥
तत्रापि बादरानन्तकायिकः स्युरनेकधा । मूलकशृंगबेराद्या, प्रत्यक्षा जनचक्षुषाम् ॥ ८६ ॥

तथाहि— सव्वाउ कंदजाई, सूरणकंदो य वज्जकंदो य । अल्लहलिद्दा य तहा, अदं तह अल्लकच्चूरो ॥ सतावरी विराली, कुंआरि तह थोहरी गलोईअ । लसणं वंसकरिल्ला, गज्जरतहलूणओ लोढो ॥ गिरिकन्नि किसलपत्ता, खरिंसुआ थेग अल्लमोत्था य । तह लूणरुक्खछल्ली, खिल्लहडो अमयवल्ली य ॥ मूला तह भूमिरुहा, विरुहा तह टक्कवत्थुलो पढमो । सूअरवल्लो अ तहा, पल्लंको कोमलंबिलिया ॥ आलू तह पिंडालू, हवंति एए अणंतनामेहिं । अन्नमणंतं नेयं, लक्खणजुत्तीइ समयाओ ॥ [प्रवचनसारोद्धार श्लो. २३६ थी २४०] अन्येऽपि स्नुहीप्रभृतयोऽनन्तकायिकाः 'अवए पणए' इत्यादि प्रज्ञापनोक्तवाक्यप्रबन्धतो ज्ञेयाः ॥

इति साधारणवनस्पतिभेदाः ॥ प्रत्येकलक्षणं चैवम्—

यत्र मूलादिदशके, प्रत्यङ्गं जन्तवः पृथक् । प्रत्येकनामकर्माढ्यास्तत्प्रत्येकमिहोच्यते ॥ ८७ ॥
तथा चाहुर्जीवविचारे— [गाथा-१३]
"एगसरीरे एगो, जीवो जेसिं तु ते उ पत्तेया । फलफुल्लछल्लिकट्ठा, मूलग पत्ताणि बीआणि"
किंच—मूलादेर्यस्य भग्नस्य, मध्ये हीरः प्रदृश्यते । प्रत्येकजीवं तद्विन्द्याद्यदन्यदपि तादृशम् ॥ ८८ ॥
यत्र मूलस्कन्धकन्दशाखासु दृश्यते स्फुटम् । त्वचा कनीयसी काष्ठात्, सा त्वक् प्रत्येकजीविका ॥ ८९ ॥
तस्य द्वादश भेदाः स्युः, प्रत्येकस्य वनस्पतेः । यथा प्रसिद्धि तान् कांश्चित्, दर्शयामि समासतः ॥ ९० ॥
वृक्षा गुच्छा गुल्मा, लताश्च वल्ल्यश्च पर्वगाश्चैव । तृणवलयहरीतकौषधिजलरुहकुहणाश्च विज्ञेयाः ॥ ९१ ॥
वृक्षास्तत्र द्विभेदाः स्युः, फलोद्यद्बीजभेदतः । एकबीजफलाः केचित्, भूरिबीजफलाः परे ॥ ९२ ॥
अंकुल्लजम्बूनिम्बाम्राः, प्रियालसालपीलवः । सल्लकीशैलुबकुलभिल्लातकबिभीतकाः ॥ ९३ ॥
हरीतकीपुत्रजीवाः, करञ्जारिष्टकिंशुकाः । अशोकनागपुन्नागप्रमुखा एकबीजकाः ॥ ९४ ॥
कपित्थतिन्दुकप्लक्षधवन्यग्रोधदाडिमाः । कदम्बकुटजा लोध्रः, फणसश्चन्दनार्जुनाः ॥ ९५ ॥
काकोदुम्बरिका मातुलिङ्गस्तिलकसंज्ञकः । सप्तपर्णदधिपर्णप्रमुखा बहुबीजकाः ॥ ९६ ॥

प्रत्येकमेषां वृक्षाणां, प्रत्येकासंख्यजीवकाः । मूलकन्दस्कन्धशाखात्वक्प्रवाला उदीरिताः ॥ ९७ ॥
पुष्पाण्यनेकजीवानि, एकैकोऽङ्गी दले दले । प्रत्येकमेकजीवानि, बीजानि च फलानि च ॥ ९८ ॥
एकः पूर्णतरुस्कन्धव्यापी भवति चेतनः । मूलादयो दशाप्यस्य, भवन्त्यवयवाः किल ॥ ९९ ॥
तथोक्तं सूत्रकृताङ्गवृत्तौ श्रुतस्कन्ध २ अध्ययन ३—

"आहावरमित्याद्यालापकस्यार्थः—अथापरं एतदाख्यातं, तद् दर्शयति—इहेऽस्मिन् जगत्येके न तु सर्वे, तथाकर्मोदयवर्त्तिनो वृक्षयोनिकाः सत्त्वा भवन्ति । तदवयवाश्रिताः चापरे वनस्पतिरूपा एव प्राणिनो भवन्ति । तथाहि-यो ह्येको वनस्पतिजीवः सर्ववृक्षावयवव्यापी भवति, तस्य चापरे तदवयवेषु मूलकन्दस्कन्धत्वक्शाखाप्रवालपुष्पपत्रफलबीजभूतेषु दशसु स्थानेषु जीवाः समुत्पद्यन्ते ॥ ते च तत्रोत्पद्यमाना वृक्षयोनिका वृक्षव्युत्क्रमाश्चोत्पद्यन्ते" ॥

मूलं स्यात् भूमिसम्बद्धं, तत्र कन्दः समाश्रितः । तत्र स्कन्ध इति मिथो, बीजान्ताः स्युर्युताः समे ॥ १०० ॥
अतः पृथ्वीगतरसमाहरन्ति समेऽप्यमी । यावत् फलानि पुष्पस्थं, बीजानि फलसंगतम् ॥ १०१ ॥
श्रावणादिचतुर्मास्यां, प्रावृड्वर्षासु भूरुहः । सर्वतो बहुलाहारा, अपां बाहुल्यतः स्मृताः ॥ १०२ ॥
ततः शरदि हेमन्ते, क्रमादल्पाल्पभोजिनः । यावद्वसन्तेऽल्पाहारा, ग्रीष्मेऽत्यन्तमिताशनाः ॥ १०३ ॥
यत्तु ग्रीष्मेऽपि द्रुमाः स्युर्दलपुष्पफलाद्भूताः । तदुष्णयोनिजीवानामुत्पादात्तत्र भूयसाम् ॥ १०४ ॥
इति भगवतीसूत्रशतक ७ उद्देश ३ ॥
ननु च—मूलादयो दशाप्येवं, यदि प्रत्येकदेहिभिः । जाता अनेकैस्तत्तस्मिन्नेकमूलादिधीः कथम् ?॥ १०५ ॥
अत्रोच्यते ।
श्लेषणद्रव्यसंमिश्रैर्घटितानेकसर्षपैः । भूरिसर्षपरूपाऽपि, वर्त्तिरेकैव भासते ॥ १०६ ॥
यथा ते सर्षपाः सर्वे, स्वस्वमानाः पृथक् पृथक् । वर्त्तेर्बुद्धिं सृजन्तोऽपि, स्थिताः स्वस्वावगाहनाः ॥ १०७ ॥
तथा प्रत्येकजीवास्ते, पृथक् स्वस्ववपुर्भृतः । सृजन्त्येकत्र मिलिता, एकमूलादिवासनाम् ॥ १०८ ॥
इह यद् द्वेषरागाभ्यां, सञ्चितं पूर्वजन्मनि । हेतुरेकत्र सम्बन्धे, तत्कर्म श्लेषणोपमम् ॥ १०९ ॥
कृतैवंविधकर्माणो, जीवास्ते सर्षपोपमाः । मूलादि वर्त्तिस्थानीयमिति दृष्टान्तयोजना ॥ ११० ॥
तिलशष्कुलिका पिष्टमयी तिलविमिश्रिता । अनेकतिलजातापि, यथैका प्रतिभासते ॥ १११ ॥
इहापि दृष्टान्तयोजना प्राग्वत् । अथ गुच्छादयः ।
वृन्ताकीबदरीनीली, तुलसीकरमर्द्दिकाः । यावासाघाडनिर्गुंड्य, इत्याद्या गुच्छजातयः ॥ ११२ ॥
मल्लिकाकुन्दकोरिंटयूथिकानवमल्लिकाः । मुद्गरः कणवीरश्च, जात्याद्या गुल्मजातयः ॥ ११३ ॥
अशोकचम्पकलता, नामपद्मलता अपि । अतिमुक्तकवासन्तीप्रमुखाः स्युर्लता इमाः ॥ ११४ ॥

एकैव शाखा यत्स्कन्धै, महत्यूर्ध्वं विनिर्गता । नैवान्यास्ताश्च: स स्याल्लताख्यश्चम्पकादिक: ॥ ११५ ॥
कुष्माण्डी त्रपुषी तुम्बी, कालिङ्गी चिर्भटी तथा । गोस्तनी कारवेल्ली च, वल्ल्य: कर्कोटकादिका: ॥ ११६ ॥
इक्षु: वंश वीरणानि, द्रक्कुड: शर इत्यपि । वेत्र: नडश्च काशश्च, पर्वगा एवमादय: ॥ ११७ ॥
दूर्वादर्भार्जुनैरण्डा:, कुरुविन्दकरोहिषा: । सुकल्याख्यं क्षीरबिसमित्याद्या: तृणजातय: ॥ ११८ ॥
पूगखर्जूरसरला, नालिकेर्यश्च केतका: । तमालतालकन्दल्य:, इत्याद्या: वलयाभिधा: ॥ ११९ ॥
आर्यकदमनकमरुबकमन्डुकीसर्षपाभिधौ शाकौ । अपि तन्दुलीयवास्तुकमित्याद्या हरितका ज्ञेया: ॥ १२० ॥
औषध्य: फलपाकान्तास्ता: स्फुटा धान्यजातय: । चतुर्विंशतिरुक्तानि, तानि प्राधान्यत: किल ॥ १२१ ॥

तथाहि— "धन्नाइं चउव्वीसं, जव गोहुम सालि वीहि सट्ठिका । कोद्दव अणुया कंगू, रायल तिल मुग्ग मासा य ॥ अयसि हरिमंथ तिउडग, निप्फाव सिलंध रायमासा य । उक्खू मसूर तुवरी, कुलत्थ तह धन्नय कलाया" ॥ इति ॥ [प्रवचनसारोद्धार श्लोक १००४, १००५]

रुहन्ति जलमध्ये ये, ते स्युर्जलरुहा इमे । कदम्बशैवलकशेरुका: पद्मभिदो मता: ॥ १२२ ॥
कुहणा अपि बोधव्या, नामान्तरतिरोहिता: । स्फुटा देशविशेषेषु, चतुर्थोपाङ्गदर्शिता: ॥ १२३ ॥

तद्यथा । से किं तं कुहणा ? कुहणा अणेगविहा पण्णत्ता । तं जहा । आए काए कुहणे कुण्णके दव्वहलिया सप्पाए सज्जाए सत्ताए वंसीणहिया कुरुए । जे यावण्णे तहप्पगारा सेत्तं कुहणा । इत्यादि ॥

गुच्छादीनां च मूलाद्या, अपि षट् संख्यजीवका: । सूत्रे हि वृक्षमूलादेरेवोक्ताऽसंख्यजीवता ॥ १२४ ॥

तथोक्तं वनस्पतिसप्ततौ—"रुक्खाणमसंखजिआ, मूला कंदा तया य खंधा य । साला तहा पवाला, पुढो पुढो हुंति नायव्वा ॥ गुच्छाईणं पुण संखजीवया नज्जए इमं पायम् । रुक्खाणं चिय जमसंखजीवभावो सुए भणिओ" ॥

अत्रायं विशेष:—

तालश्च नालिकेरी च, सरलश्च वनस्पति: । एकजीवस्कन्ध एषां, पत्रपुष्पादि सर्ववत् ॥ १२५ ॥
तथा–पञ्चमाङ्गे त्रिधा वृक्षा:, प्रज्ञप्ता गणधारिभि: । अनन्तासंख्यसंख्यातजीवकास्ते क्रमादिमे ॥ १२६ ॥
तत्राद्या: शृंगबेराद्या:, कपित्थाम्रादिका: परे । संख्यातजीवका ये च, ज्ञेया गाथाद्वयेन ते ॥ १२७ ॥

तच्चेदम्—"ताले तमाले तक्कलि तेतलिसाले य सालकल्लाणे । सरले जीवइ केयइ कंदलि तह चम्मरुक्खे य ॥ चुअरुक्खहिंगुरुक्खे लवंगुरुक्खे य होइ बोधव्वे । पूयफलीखज्जूरी बोधव्वा नालिएरी य" ॥

तथा प्रज्ञापनावृत्तौ अपि "तालसरलनालिकेरीग्रहणं उपलक्षणम् । तेन अन्येषां अपि यथाऽऽगमं एकजीवाधिष्ठितत्वं स्कन्धस्य प्रतिपत्तव्यम्" । इति ॥

शृङ्गाटकस्य गुच्छ: स्यादनेकजीवक: किल । पत्राण्येकैकजीवानि, द्वौ द्वौ जीवौ फलं प्रति ॥ १२८ ॥

पुष्पाणां त्वयं विशेषः—

जलस्थलोद्भूततया, द्विधा सुमनसः स्मृताः । नालबद्धा वृन्तबद्धाः, प्रत्येकं द्विविधास्तु ताः ॥ १२९ ॥
याः काश्चिन्नालिकाबद्धास्ताः स्युः संख्येयजीवकाः । अनन्तजीवका ज्ञेयाः, स्नुहीप्रभृतिजाः पुनः ॥ १३० ॥
किंच—पद्मोत्पलनलिनानां सौगन्धिकसुभगकोकनदकमनाम् । अरविन्दानां च तथा शतपत्रसहस्रपत्राणाम् ॥ १३१ ॥
वृन्तं बाह्यदलानि च सकेसराणि स्युरेकजीवस्य । पृथगेकैकजीवान्यन्तर्दलकेसराणि बीजानि ॥ १३२ ॥

पर्वगाणां तृणानां च अयं विशेषः—

इक्कुडीक्षुनडादीनां, सर्ववंशभिदां तथा । भवन्त्येकस्य जीवस्य, पर्वाक्षिपरिमोटकाः ॥ १३३ ॥
तत्राक्षि प्रोच्यते ग्रन्थिः, प्रतीतं पर्व सर्वतः । चक्राकारं पर्वपरिवेष्टनं परिमोटकः ॥ १३४ ॥
पत्राणि प्रत्येकमेषामेकजीवाश्रितानि वै । पुष्पाण्यनेकजीवानि, प्रोक्तानि परमर्षिभिः ॥ १३५ ॥

फलेषु च एषामयं विशेषः—

पुष्पफलं कालिङ्गं तुम्बं चिर्भटमथ त्रपुषसंज्ञम् । घोषातकं पटोलं तिन्दूकं चैव तेन्दूषम् ॥ १३६ ॥

एतेषां च—

वृन्तगर्भकटाहानामेको जीवः समर्थकः । पृथग्जीवानि पत्राणि, बीजानि केसराण्यपि ॥ १३७ ॥

एतच्च सर्वमर्थतः क्वचित् पाठतश्च प्रायः प्रज्ञापनागतमेव ॥
श्रीहेमचन्द्रसूरिभिश्चाभिधानचिन्तामणावित्युक्तम्—"कुरणटाद्या अग्रबीजा, मूलजास्तूत्पलादयः ।
पर्वयोनय इक्ष्वाद्याः, स्कन्धजाः सल्लकीमुखाः ॥ शाल्यादयो बीजरुहाः, संमूर्छजास्तृणादयः ।
स्युर्वनस्पतिकायस्य, षडेता मूलजातयः" ॥

इदमर्थतः प्रथमाङ्गेऽपि दशवैकालिकेऽपि ॥ जीवाभिगमे तु—

चतस्रो मुख्यवल्लयः स्युः, तावच्छताश्च तद्भिदः । ख्याता मुख्यलता अष्टौ, तावच्छताश्च तद्भिदः ॥ १३८ ॥
नामग्राहं तु ता नोक्ताः, प्राक्तनैरपि पण्डितैः । ततो न तत्र दोषो नः, तत्पदव्यनुसारिणाम् ॥ १३९ ॥
त्रयो हरितकायाः स्युः, जलस्थलोभयोद्भवाः । भेदाः शतानि तावन्ति, तदवान्तरभेदजाः ॥ १४० ॥
सहस्रं वृन्तबद्धानि, वृन्ताकादिफलान्यथ । सहस्रं नालबद्धानि, हरितेष्वेव तान्यपि ॥ १४१ ॥
किंच—मूलत्वक्काष्ठनर्यासपत्रपुष्पफलान्यपि । गन्धांगभेदाः सप्तामी, जिनैरुक्ता वनस्पतौ ॥ १४२ ॥
मूलमौशीरवालादि,त्वक् प्रसिद्धा तजादिका । काष्ठं च काकतुण्डादि, निर्यासो घनसारवत् ॥ १४३ ॥
पत्रं तमालपत्रादि, प्रियङ्ग्वादिसुमान्यपि । कक्कोलैलालवङ्गादि, फले जातिफलाद्यपि ॥ १४४ ॥
मूलादयस्ते सप्तापि, नानावर्णा भवन्त्यतः । गुणिताः पञ्चभिर्वर्णैः, पञ्चत्रिंशत् भवन्ति हि ॥ १४५ ॥
दुर्गन्धाभावतः श्रेष्ठगन्धेनैकेन ताडिताः । ते पञ्चत्रिंशदेव स्युरेकेन गुणितं हि तत् ॥ १४६ ॥

नानारसाश्च ते सर्वे, ततः पञ्चरसाहताः । संजातः शतमेकं ते, पञ्चसप्ततिसंयुतम् ॥ १४७ ॥
स्पर्शास्तु यद्यप्यष्टापि, संभवन्त्येव वस्तुतः । तथाप्येषां प्रशस्तत्वात्, गृह्यन्ते तेऽपि तादृशाः ॥ १४८ ॥
तल्लघूष्णमृदुस्निग्धैः, स्पर्शैरेते चतुर्गुणाः । शतानि सप्त जातानि, गन्धाङ्गनां दिशाऽनया ॥ १४९ ॥

उक्तं च जीवाभिगमवृत्तौ—"मूलतयकट्ठनिज्जासपत्तपुप्फफलमाइ गन्धंगा । वण्णादुत्तरभेया गन्धंग सया मुणेयव्वा" ॥ १६५ ॥

सूत्रालापश्च—"कति णं भंते ! गंधंगा प० ? गोयम ! सत्त गंधंगा सत्तगंधंगसया प०" । इत्यादि ॥ एवं वल्ल्यादिसूत्रालापा अपि वाच्याः ॥

लोकैश्च—शून्यसप्तांकहस्ताश्वसूर्येन्दुवसुवह्नयः । एतत्संख्यांकनिर्दिष्टो, वनभारः प्रकीर्तितः ॥ पाठान्तरे च—रामो वसवश्चन्द्रः, सूर्यो भूमिस्तथैव च । मुनिः शून्यं समादिष्टं भारसंख्या निगद्यते ॥ एकैकजातेरेकैकपत्रप्रचयतो भवेत् । प्रोक्तसंख्यैर्मणैर्भारस्ते त्वष्टादश भूरुहाम् ॥ तथा-चत्वारोऽपुष्पका भारा, अष्टौ च फलपुष्पिताः । स्युर्वल्लीनां च षड् भाराः, शेषनागेन भाषितम् ॥ इत्यादि उच्यते ॥ इति बादराणां भेदाः ॥ १ ॥

प्रसिद्धाः सप्त याः पृथ्व्यः, वसुमत्यष्टमी पुनः । ईषत्प्राग्भाराभिधा स्यात्तासु स्वस्थानतोऽष्टसु ॥ १५० ॥
अधोलोके च पातालकलशावलिभित्तिषु । भवनेष्वसुरादीनां, नारकावसथेषु च ॥ १५१ ॥
ऊर्ध्वलोके विमानेषु, विमानप्रस्तटेषु च । तिर्यग्लोके च कूटाद्रिप्राग्भारविजयादिषु ॥ १५२ ॥
वक्षस्कारवर्षशैलजगतीवेदिकादिषु । द्वारद्वीपसमुद्रेषु, पृथिवीकायिकोद्भवः ॥ १५३ ॥
इति पृथ्वीकायस्थानानि ॥

स्वस्थानतोऽम्बुकायानां, स्थानान्युक्तानि सूरिभिः । घनोदधिवलयेषु, घनोदधिषु सप्तसु ॥ १५४ ॥
अधः पातालकुम्भेषु, भवनेष्वासुरेषु च । ऊर्ध्वलोके विमानेषु, स्वर्गपुष्करणीषु च ॥ १५५ ॥
तिर्यग्लोके च कूपेषु, नदीनदसरस्सु च । निर्झरोज्झरवापीषु, गर्त्ताकेदारपङ्क्तिषु ॥ १५६ ॥
जलाशयेषु सर्वेषु, शाश्वताशाश्वतेषु च । द्वीपेषु च समुद्रेषु, बादराप्कायसम्भवः ॥ १५७ ॥
इत्यप्कायस्थानानि ॥

स्वस्थानतोऽग्निकायानां, स्थानमाहुर्जिनेश्वराः । नरक्षेत्रं द्विपाथोधिसार्धद्वीपद्वयात्मकम् ॥ १५८ ॥
तत्रापि—
काले युगलिनामग्निः, काले च बिलवासिनाम् । विदेहेष्वेव सर्वासु, कर्मभूषु ततोऽन्यदा ॥ १५९ ॥
किंच—ऊर्ध्वाधोलोकयोर्नायं, तिर्यग्लोकेऽप्यसौ भवेत् । सदा विदेहे भरतैरवतेषु च कर्हिचित् ॥ १६० ॥
पाकदाहादिसंतापं, तनुते नरकेषु यः । स नाग्निः किन्तु तत्तुल्यांस्ते विकुर्वन्ति पुद्गलान् ॥ १६१ ॥
या चोष्णवेदना तेषु, श्रूयतेऽत्यन्तदारुणा । पृथिव्यादिपुद्गलानां, परिणामः स तादृशः ॥ १६२ ॥

तथोक्तम्—"ननु सप्तस्वपि पृथ्वीषु तेजस्कायिकवर्जपृथ्वीकायिकादिस्पर्शा नारकाणां युक्तः, तेषां तासु विद्यमानत्वात् । तेजस्कायस्पर्शस्तु कथम् ? बादरतेजसां समयक्षेत्रे एव सद्भावात् । सूक्ष्मतेजसां पुनस्तत्र सद्भावेऽपि स्पर्शनेन्द्रियाविषयत्वात् इति ॥ अत्रोच्यते । इह तेजस्कायिकस्येव परमाधार्मिकनिर्मितज्वलनसदृशवस्तुनः स्पर्शः तेजस्कायिकस्पर्शः इति व्याख्येयम् । न तु साक्षात्तेजस्कायिकस्यैव ॥ अथवा भवान्तरानुभूततेजस्कायिकपर्यायपृथिवीकायिकस्पर्शापेक्षया व्याख्येयम्" ॥ इति भगवतीशतक १३ उद्देश ४ वृत्तौ ॥

स्वर्गादौ धूपघट्यादि, श्रूयते यत्किलागमे । तत्तुल्याः पुद्गलास्तेऽपि, कृत्रिमाकृत्रिमात्मकाः ॥ १६३ ॥

एतच्च अर्थतः प्रायः तृतीयतुर्यापाङ्क्त्योरेव ॥ ग्रन्थान्तरेऽपि— "पंचिंदिय एगिंदिय, उड्ढे य अहे य तिरियलोए य । विगलिंदियजीवा पुण, तिरियलोए मुणेयव्वा ॥ पुढवीआउवणस्सइ, बारसकप्पेसु सत्तपुढवीसु । पुढवी जा सिद्धिसिला, तेऊनरखित्ततिरिलोए ॥ सुरलोअवाविमज्झे, मच्छाई नत्थि जलयरा जीवा । गेविज्जे नहु वावी, वाविअभावे जलं नत्थि" ॥

इत्यग्निकायस्थानम् ॥

घनानिलवलयेषु, घनानिलेषु सप्तसु । तनुवातवलयेषु, तनुवातेषु सप्तसु ॥ १६४ ॥
अधोलोके च पातालकुम्भेषु भवनेषु च । छिद्रेषु निष्कुटेष्वेवं, स्वस्थानं वायुकायिनाम् ॥ १६५ ॥
ऊर्ध्वलोके च कल्पेषु, विमानेषु तदालिषु । विमानप्रस्तटच्छिद्रनिष्कुटेषु तदुद्भवः ॥ १६६ ॥
तिर्यग्लोके दिक्षु विदिक्ष्वधश्चौर्ध्वं च तज्जनिः । जगत्यादिगवाक्षेषु, लोकनिष्कुटकेषु च ॥ १६७ ॥

इति वायुकायस्थानम् ॥

प्रत्येकः साधारणश्च, द्विविधोऽपि वनस्पतिः । प्रायोऽप्कायसमः स्थानैः, जलाभावे ह्यसौ कुतः ॥ १६८ ॥

इति वनस्पतिस्थानम् ॥

उपपातसमुद्घातनिजस्थानैः भवन्ति हि । लोकासंख्यातमे भागे, पर्याप्ता बादरा इमे ॥ १६९ ॥

तत्र वायोस्त्वयं विशेषः पञ्चसंग्रहवृत्तौ— बायरपवणा असंखेसुत्ति ॥ लोकस्य यत्किमपि शुषिरं तत्र सर्वत्र पर्याप्तबादरवायवः प्रसर्पन्ति । यत्पुनरतिनिबिडनिचितावयवतया शुषिरहीनं कनकगिरिमध्यादि तत्र न । तच्च लोकस्यासंख्येयभागमात्रम् । ततः एकमसंख्येयभागं मुक्त्वा शेषेषु सर्वेष्वप्यसंख्येयेषु भागेषु वायवो वर्तन्ते" । इति ॥

पर्याप्तबादरवनस्पतयः उपपातसमुद्घाताभ्यां सर्वलोकव्यापिनः स्वस्थानतो लोकासंख्येयभागे ।
इति प्रज्ञापनावृत्तौ ॥

अपर्याप्तास्तु सर्वे स्वस्थानैः पर्याप्तसन्निभाः । उपपातसमुद्घातैस्त्वशेषलोकवर्तिनः ॥ १७० ॥
नवरम्—वह्निकायस्त्वपर्याप्तस्तिर्यग्लोकस्य तट्टके । उपपातेन निर्दिष्टो, द्वयोर्लोककपाटयोः ॥ १७१ ॥

तच्चैवम् ।

आलोकान्तं दीर्घं सार्धद्वीपाम्बुधिद्वयविशाले । अधऊर्ध्वलोकान्तस्पृशी कपाटे उभे कल्प्ये ॥ १७२ ॥
तयोः कपाटयोः तिर्यग्लोकेऽन्त्याम्भोधिसीमनि । योजनाष्टादशशतबाहल्ये सर्वतोऽपि हि ॥ १७३ ॥
अपर्याप्तबादराग्नेः, स्थानं स्यादुपपाततः । तिर्यग्लोकं कपाटस्थमेव केऽप्यत्र मन्वते ॥ १७४ ॥
त्रिधाऽबादरापर्याप्ताः, तेजस्कायिकदेहिनः । स्युरेकभविका बद्धायुषश्चाभ्युदितायुषः ॥ १७५ ॥
तत्र येऽनन्तरभवे, उत्पत्स्यन्तेऽग्निकायिषु । अपर्याप्तबादरेषु त, एकभविकाः स्मृताः ॥ १७६ ॥
ये तु पूर्वभवसत्कतृतीयांशादिषु ध्रुवम् । बद्धस्थूलाऽपर्याप्त्याग्न्यायुष्का बद्धायुषश्च ते ॥ १७७ ॥
ये तु पूर्वभवं त्यक्त्वा, साक्षादनुभवन्ति वै । स्थूलापर्याप्तवह्न्यायुस्ते भवन्त्युदितायुषः ॥ १७८ ॥
तत्रैकभविका बद्धायुषश्च द्रव्यतः किल । स्थूलापर्याप्ताग्नयः स्युः, भावतस्तूदितायुषः ॥ १७९ ॥
अत्र च–
द्रव्यतो बादराऽपर्याप्ताग्निभिर्नप्रयोजनम् । स्थूलापर्याप्ताग्नयो ये, भावतः तैः प्रयोजनम् ॥ १८० ॥
ततश्च–
यद्यप्युक्तकपाटाभ्यां, तिर्यग्लोकाच्च ये बहिः । उदितबादरापर्याप्ताग्न्यायुष्का भवन्ति हि ॥ १८१ ॥
तेऽप्युच्यन्ते तथात्वेन, ऋजुसूत्रनयाश्रयात् । तथापि व्यवहारस्य, नयस्याश्रयणादिह ॥ १८२ ॥
ये स्वस्थानसमश्रेणिकपाटद्वयसंस्थिताः । स्वस्थानानुगते ये च, तिर्यग्लोके प्रविष्टकाः ॥ १८३ ॥
ते एव व्यपदिश्यन्तेऽपर्याप्तबादराग्नयः । शेषाः कपाटान्तरालस्थिता नैव तथोदिताः ॥ १८४ ॥
ये नाद्याप्यागतास्तिर्यग्लोकेऽथवा कपाटयोः । ते प्राक्तनभवावस्था, एव गण्या मनीषिभिः ॥ १८५ ॥
उक्तं च प्रज्ञापनावृत्तौ—
"पणयाललक्खपिहुला, दुन्नि कवाडा य छद्दिसिं पुट्ठा । लोगंते तेसिंतो, जे तेउ ते ऊ धिप्पन्ति" ॥
तत उक्तम्—"उववाएणं दोसु कवाडेसु तिरियलोअतट्टे य" ॥
पृथ्व्यादिषु चतुर्ष्वेकपर्याप्तनिश्रया मताः । असंख्येया अपर्याप्ता, जीवा वनस्पतेः पुनः ॥ १८६ ॥
पर्याप्तस्यचैककस्य, पर्याप्ता निश्रया स्मृताः । असंख्येयाश्च संख्येया, अनन्ता अपि कुत्रचित् ॥ १८७ ॥
ततश्च—संख्यासंख्यास्तु पर्याप्तप्रत्येकतरुनिश्रया । अनन्ता एव पर्याप्तसाधारणवनाश्रिताः ॥ १८८ ॥
इति बादराणां स्थानानि ॥ २ ॥
पर्याप्तयस्त्रिचतुरा, अपर्याप्तान्यभेदतः । प्राणाश्चत्वारोऽङ्गबलश्वासायूंषि त्वगिन्द्रियम् ॥ १८९ ॥
इति पर्याप्तिः ॥ ३ ॥
पृथ्व्यम्बुह्निमरुतां, प्रत्येकं परिकीर्त्तिताः । योनिलक्षाः सप्त सप्त, सप्तसप्तिसमप्रभैः ॥ १९० ॥

योनीनां दशलक्षाणि, स्युः प्रत्येकमहीरुहाम् । साधारणतरुणां च, योनिलक्षाश्चतुर्दश ॥ १९१ ॥

इति योनिः ॥ ४ ॥

द्वादश सप्त त्रीणि च, सप्ताष्टाविंशतिश्च लक्षाणि । कुलकोटीनां पृथ्वीजलाग्न्यनिलभूरुहां क्रमतः ॥ १९२ ॥

एवं च सप्तपञ्चाशल्लक्षाणि कुलकोटयः । एकेन्द्रियाणां जीवानां, संग्रहण्यनुसारतः ॥ १९३ ॥

आचाराङ्गवृत्तौ तु—"कुलकोडि सयसहस्सा, बत्तीसट्ठनव य पणवीसा । एगिंदियबितिइंदियचउरिंदियहरियकायाणम्" ॥ अद्धत्तेरसबारसदसदसनव चेव कोडिलक्खाइं । जलयरपक्खिचउपयउरभुअपरिसप्पजीवाणं ॥ पणवीसं छव्वीसं च, सयसहस्साइं नारयसुराणं । बारस य सयसहस्सा, कुलकोडीणं मणुस्साणं ॥

एवं द्वीन्द्रियादिष्वपि संग्रहण्यभिप्रायेण वक्ष्यमाणासु कुलकोटिसंख्यासु मतान्तरं अत एवाभ्यूह्यम् ॥

तथा—लक्षाणि कुलकोटीनां, षोडशोक्तानि तात्त्विकैः । केवलं पुष्पजातीनां, तृतीयोपाङ्गदेशकैः ॥ १९४ ॥

तानि चैवम्—

चतस्रो लक्षकोट्योऽम्भोरुहाणां जातिभेदतः । कोरिंटकादिजातीनां, चतस्रः स्थलजन्मनाम् ॥ १९५ ॥

चतस्रो गुल्मजातीनां, जात्यादीनां विशेषतः । मधूकादिमहावृक्षजानां तत्संख्यकोटयः ॥ १९६ ॥

इति कुलानि ॥ ५ ॥

मिश्रा सचित्ताऽचित्ता च, योनिरेषां भवेत्त्रिधा । उष्णाशीतोष्णशीताऽग्निन्, विना ते ह्युष्णयोनयः ॥ १९७ ॥

पञ्चाप्येते विनिर्दिष्टा, जिनैः संवृतयोनयः । उत्पत्तिस्थानमेतेषां, स्पष्टं यन्नोपलक्ष्यते ॥ १९८ ॥

इति योनिसंवृतत्वादि ॥ ६ ॥

द्वाविंशतिः सहस्राणि, वर्षाणामोघतो भवेत् । पृथ्वीकायस्थितिर्ज्येष्ठा, विशेषस्तत्र दर्श्यते ॥ १९९ ॥

एकं वर्षसहस्रं स्यात्, स्थितिर्ज्येष्ठा मृदुक्ष्मिते: । द्वादशाब्दसहस्राणि, कुमारमृत्तिकास्थितिः ॥ २०० ॥

चतुर्दश सहस्राणि, सिकतायास्तु जीवितम् । मनःशिलायाश्चोत्कृष्टं, षोडशाब्दसहस्रकाः ॥ २०१ ॥

अष्टादशसहस्राणि, शर्कराणां गुरुस्थितिः । द्वाविंशतिस्सहस्राणि, स्यात्साऽश्मादिखरक्ष्मिते: ॥ २०२ ॥

सप्त वर्षसहस्राणि, ज्येष्ठा स्यादम्भसां स्थितिः । त्रयो वर्षसहस्राश्च, मरुतां परमा स्थितिः ॥ २०३ ॥

अहोरात्रास्त्रयोऽग्नीनां, दशवर्षसहस्रकाः । प्रत्येकभूरुहामन्येषां तु साऽन्तर्मुहूर्त्तकम् ॥ २०४ ॥

अनितेऽन्तर्मुहूर्त्तं च, स्वस्वोत्कृष्टस्थितेः खलु । पञ्चानामप्यमीषां स्यात्, ज्येष्ठा पर्याप्ततास्थितिः ॥ २०५ ॥

अन्तर्मुहूर्त्तं सर्वेषां, यतोऽपर्याप्ततास्थितिः । अन्तर्मुहूर्त्ते क्षिप्तेऽस्मिन्, स्थितयस्ताः स्युरोघतः ॥ २०६ ॥

पञ्चानामप्यथैतेषां, जघन्यतो भवस्थितिः । अन्तर्मुहूर्त्तमानैव, दृष्टा दृष्टजगत्त्रयैः ॥ २०७ ॥

अपर्याप्तानां पञ्चानामप्येषां स्याद्भवस्थितिः । अन्तर्मुहूर्त्तप्रमिता, जघन्यापरमाऽपि च ॥ २०८ ॥

इति भवस्थितिः ॥ ७ ॥

स्थूलक्ष्मादीनां चतुर्णां, स्थूलद्वैधवनस्य च । सप्ततिः कोटिकोट्योऽब्धीनां कायस्थितिः पृथक् ॥ २०९ ॥

ओघतो बादरत्वे सा, बादरे च वनस्पतौ । उत्सर्पिण्यवसर्पिण्योः, यावत्यः ता ब्रवीम्यथ ॥ २१० ॥

अङ्गुलासंख्यांशमाननभःस्थाभ्रदेशकैः । प्रतिक्षणं हृतैर्याः स्युः, तावतीः ता विचिन्तय ॥ २११ ॥

निगोदे त्वोघतःसूक्ष्मबादरत्वाविवक्षया । द्वौ पुद्गलपरावर्त्तौ, सार्द्धौ कायस्थिति र्भवेत् ॥ २१२ ॥

पर्याप्तत्वे क्ष्मादीनां, प्रत्येकं कायसंस्थितिः । संख्येयाब्दसहस्रात्मा, वह्नेः संख्यदिनात्मिका ॥ २१३ ॥

विशेषश्चात्र—

पर्याप्तत्वे बादरायाः, क्षितेः कायस्थितिर्भवेत् । वत्सराणां लक्षमेकं, षट्सप्ततिसहस्रयुक् ॥ २१४ ॥

तथाहि–

भवेदष्टभवान् यावत्, ज्येष्ठायुः क्षितिकायिकः । ज्येष्ठायुष्कक्षितित्वेनोत्पद्यमानः पुनः पुनः ॥ २१५ ॥

यदुक्तं भगवत्याम्—"भवादेसेणं जहण्णेणं दोभवग्गहणाइं, उक्कोसेणं अट्ठभवग्गहणाइं" ॥ इति ॥

स्थितिरुत्कर्षतश्चैकभवे प्रोक्ता क्ष्माऽङ्गिनाम् । द्वाविंशतिसहस्राब्दलक्षणा परमर्षिभिः ॥ २१६ ॥

अष्टभिर्गुणने चास्या, भवत्येव यथोदितम् । षट्सप्ततिवर्षसहस्राधिकं वर्षलक्षकम् ॥ २१७ ॥

षट्पञ्चाशद्वर्षसहस्राण्येव जलकायिनाम् । स्युश्चतुर्विंशतीरात्रिंदिवानि वह्निकायिनाम् ॥ २१८ ॥

स्युश्चतुर्विंशतिर्वर्षसहस्राण्यनिलाङ्गिनाम् । अशीतिश्च सहस्राणि, वर्षाणां वनकायिनाम् ॥ २१९ ॥

एषु सर्वेषु परमा, लब्ध्यपर्याप्ततास्थितिः । अन्तर्मुहूर्त्तप्रमिता, वच्मि तत्रापि भावनाम् ॥ २२० ॥

क्ष्माद्यन्यतरत्वेनोत्पद्य यद्यल्पजीवितः । असकृत्कोप्यपर्याप्त, एव याति भवान्तरम् ॥ २२१ ॥

भवांश्च तादृशान् कांश्चित्, कुर्यादन्तर्मुहूर्त्तकान् । तैर्लघ्वन्तर्मुहूर्तैश्च, स्याद् गुर्वन्तर्मुहूर्त्तकम् ॥ २२२ ॥

अन्तर्मुहूर्त्तमानाश्च, सर्वा एता जघन्यतः । प्ररूपिताः श्रुते कायस्थितयः पुरुषोत्तमैः ॥ २२३ ॥

इति कायस्थितिः ॥ ८ ॥

औदारिकं सतैजसकार्मणमेतद्धपुस्त्रय ह्येषाम् । मरुतां च वैक्रियाद्यं, चतुष्टयं संभवेद्धपुषाम् ॥ २२४ ॥

इति देहाः ॥ ९ ॥

मसूरचन्द्रसंस्थानं, बादराणां भुवां वपुः । जलानां स्तिबुकाकारं, सूच्योघाकृति तेजसाम् ॥ २२५ ॥

मरुतां तद् ध्वजाकारं, द्वैधानामपि भूरुहाम् । स्युः शरीराण्यनियतसंस्थानानीति तद्विदः ॥ २२६ ॥

इति संस्थानम् ॥ १० ॥

असंख्येयोऽङ्गुलस्यांशः, क्ष्मादीनां देहसंमितिः । जघन्यादुत्कर्षतश्च, स एव हि महान् भवेत् ॥ २२७ ॥

जघन्यादुत्कर्षतश्च, वायोर्यद्वैक्रियं वपुः । स्यात्तदप्यलङ्गुलासंख्यभागमात्रावगाहनम् ॥ २२८ ॥
अङ्गुलासंख्यांशमानं, प्रत्येकद्रोर्जघन्यतः । उत्कर्षतो योजनानां, सहस्रं साधिकं वपुः ॥ २२९ ॥
उत्सेधाङ्गुलनिष्पन्नसहस्रयोजनोन्मिते । जलाशये यथोक्ताङ्गाः, स्युर्लताकमलादयः ॥ २३० ॥
प्रमाणाङ्गुलमानेषु, यानि वार्धिह्रदादिषु । भौमान्येवाब्जानि तानि, विरोधः स्यान्मिथोऽन्यथा ॥ २३१ ॥
तद्यथा—
उद्वेधः क्व समुद्राणां, प्रमाणाङ्गुलजो महान् । क्व लघून्यब्जनालानि, मितान्यौत्सेधिताङ्गुलैः ॥ २३२ ॥
किंच—शाल्यादिधान्यजातीनां, स्यान्मूलादिषु सप्तसु । धनुःपृथक्त्वप्रमिता, गरीयस्यवगाहना ॥ २३३ ॥
उत्कृष्टैषां बीजपुष्पफलेषु त्ववगाहना । पृथक्त्वमङ्गुलानां यत्, प्रोक्तं पूर्वमहर्षिभिः ॥ २३४ ॥

"मूले कन्दे खंधे, तया य साले पवालपत्ते य । सत्तसुवि धणुपुहुत्तं, अंगुल पुप्फफलबीए" ॥

इति भगवती शतक २१ वृत्तौ, तत्सूत्रेऽपि, "सालि कल अयसि, वंसे इक्खु दब्भे अ अब्भ तुलसी य । अट्ठेते दसवग्गा, असीति पुण होंति उद्देसा" ॥

एकैकस्मिन् वर्गे मूलादयो दशदशोद्देशका इत्यर्थः ॥

सर्वेऽमी शालिवज्ज्येष्ठामिहापेक्ष्यावगाहनाम् । शाल्यादयोऽमी सर्वेऽब्दपृथक्त्वपरमायुषः ॥ २३५ ॥
किंच—"तालेगट्ठिय बहुबीयगा य, गुच्छा य गुम्मवल्ली य । छ दसवग्गा एए, सट्ठिं पुण होंति उद्देसा" ॥
तालादीनां ज्येष्ठावगाहना मूलकन्दकिशलेषु । चापपृथक्त्वं पत्रेऽप्येवं, कुसुमे तु करपृथक्त्वं सा ॥ २३६ ॥
स्कन्धशाखात्वचासु स्यात्, गव्यूतानां पृथक्त्वकम् । अङ्गुलानां पृथक्त्वं च, सा भवेत्फलबीजयोः ॥ २३७ ॥
तालादीनां च मूलादिपञ्चकस्य स्थितिर्गुरुः । दशवर्षसहस्राणि, लघ्वी चान्तर्मुहूर्तिकी ॥ २३८ ॥
प्रवालादिपञ्चकस्य, त्वेषामुत्कर्षतः स्थितिः । नव वर्षाणि लघ्वी तु, प्राग्वदान्तर्मुहूर्त्तिकी ॥ २३९ ॥
तालादयश्च 'तालेतमाले' इत्यादिगाथायुग्मतः ज्ञेयाः ॥
एकास्थिकबहुबीजकवृक्षाणामाम्रदाडिमादीनाम् । मूलादेः दशकस्यावगाहना तालवत्स्थितिश्चापि ॥ २४० ॥
गुच्छानां गुल्मानां, स्थितिरुत्कृष्टावगाहना चापि । शाल्यादिवदवसेया, वल्लीनां स्थितिरपि तथैव ॥ २४१ ॥
वल्लीनां च फलस्यावगाहना स्यात्पृथक्त्वमिह धनुषाम् । शेषेषु नवसु मूलादिषु तालप्रभृतिवद् ज्ञेया ॥ २४२ ॥
एवं च—अङ्गुलासंख्यांशमानमेकाक्षाणां जघन्यतः । उत्कर्षतोऽङ्गमधिकं, योजनानां सहस्रकम् ॥ २४३ ॥
तत्रापि—देहः सूक्ष्मनिगोदानामङ्गुलासंख्यभागकः । सूक्ष्मानिलाग्न्यम्बुभुवामसंख्येयगुणः क्रमात् ॥ २४४ ॥
वाय्वादीनां बादराणां, ततोऽसंख्यगुणः क्रमात् । बादराणां निगोदानामसंख्येयगुणस्ततः ॥ २४५ ॥
स्वस्वस्थाने तु सर्वेषामङ्गुलासंख्यभागता । अङ्गुलासंख्यभागस्य, वैचित्र्यादुपपद्यते ॥ २४६ ॥
पर्याप्तानां बादरणां, मरुतां यत्तु वैक्रियम् । जघन्यादुत्कर्षतश्च, तदप्येतावदेव हि ॥ २४७ ॥

विशेषतश्च –

निगोदपवनाग्न्यम्बुभुवः पञ्चाप्यमी द्विधा । सूक्ष्माश्च बादरास्तेऽपि, पर्याप्तान्यभिदा द्विधा ॥ २४८ ॥
एवं विंशतिरप्येते, जघन्योत्कृष्टभूघना । जाताश्चत्वारिंशदेवमथ प्रत्येकभूरुहः ॥ २४९ ॥
पर्याप्तापर्याप्तहीनोत्कृष्टभूघनभेदतः । चतुर्धैवं चतुश्चत्वारिंशदेकेन्द्रियाङ्गिनः ॥ २५० ॥
अथावगाहनास्वेषां, तारतम्यमितीरीतम् । पञ्चमाङ्गैकोनविंशशतोद्देशे तृतीयके ॥ २५१ ॥
अपर्याप्तनिगोदस्य, स्यात्सूक्ष्मस्यावगाहना । सर्वस्तोका ततोऽष्टानामसंख्येयगुणाः क्रमात् ॥ २५२ ॥
अपर्याप्तानिलाग्न्यम्बुभुवां सूक्ष्मगरीयसां । ततोऽपर्याप्तयोः स्थूलानन्तप्रत्येकभूरुहोः ॥ २५३ ॥
असंख्येयगुणे तुल्ये, मिथोऽवगाहने लघू । ततः सूक्ष्मनिगोदस्य, पर्याप्तस्यावगाहना ॥ २५४ ॥
असंख्येयगुणा लघ्वी, क्रमात्ततोऽधिकाधिके । अपर्याप्तपर्याप्तस्योत्कृष्टे तस्यावगाहने ॥ २५५ ॥
ततः सूक्ष्मवायुवह्न्यम्भोभुवां स्युर्यथाक्रमम् । पर्याप्तानां जघन्याऽपर्याप्तानां च गरीयसी ॥ २५६ ॥
पर्याप्तानां तथोत्कृष्टा, क्रमेणासंख्यसंगुणा । विशेषाभ्यधिका चैव, विशेषाभ्यधिका पुनः ॥ २५७ ॥
एवं स्थूलानिलाग्न्यम्भःपृथ्वीनिगोदिनामपि । प्रत्येकं त्रितयी भाव्याऽवगाहनाभिदां क्रमात् ॥ २५८ ॥
इत्येकचत्वारिंशत्स्युः, किलावगाहनाभिदः । पर्याप्तस्थूलनिगोदज्येष्ठावगाहनावधिः ॥ २५९ ॥
पर्याप्तप्रत्येकतरोर्लघ्व्यसंख्यगुणा ततः । तस्यापर्याप्तस्य गुर्वी, स्यादसंख्यगुणा ततः ॥ २६० ॥
ततोऽसंख्यगुणा तस्य, पर्याप्तस्यावगाहना । सातिरेकं योजनानां, सहस्रं सा यतो भवेत् ॥ २६१ ॥

यत्तु श्रीजिनवल्लभसूरिभिः स्वकृतदेहाल्पबहुत्वोद्धारे अपर्याप्तप्रत्येकतरूकृष्टावगाहनातः पर्याप्ततरूत्कृष्टावगाहना विशेषाभ्यधिका उक्ता, तत् चिन्त्यम् । अङ्गुलासंख्येयभागमानापर्याप्तप्रत्येकतरूत्कृष्टावगाहनातः सातिरेकयोजनसहस्रमानायाः पर्याप्तप्रत्येकतरूत्कृष्टावगाहनायाः विशेषाधिकत्वस्यासंगत्वात्, भगवतीसूत्रेण सह विरोधाच्च । तथा च तद्ग्रंथः—

"पत्तेअसरीरबादरवणस्सइकाइयस्स पज्जत्तगस्स जहण्णिआ ओगाहणा असंखेज्जगुणा । तस्स चेव अपज्जत्तगस्स उक्कोसिआ ओगाहणा असंखिज्जगुणा । तस्स चेव पज्जत्तगस्स उक्कोसिया ओगाहणा असंखिज्जगुणा" । इति भगवती शतक १९ तृतीययोद्देशके ॥ भावार्थस्तु यंत्रकात् ज्ञेयः ॥

अत्र जीवभेदाः चतुश्चत्वारिंशत् । अवगाहना भेदाश्च त्रिचत्वारिंशदेव । अपर्याप्तबादरनिगोदजघन्यावगाहनाया अपर्याप्तप्रत्येकवनस्पतिजघन्यावगाहनायाश्च मिथस्तुल्यत्वात् ॥ अत एव कोष्ठकाः चतुश्चत्वारिंशदङ्कास्त्रिचत्वारिंशदेव । पञ्चमैकचत्वारिंशयोः कोष्ठयोर्दशकस्यैव सद्भावात् । इति ध्येयम् ॥

इत्यङ्गमानम् ॥ ११ ॥

एषां त्रयः समुद्घाता, आद्याः स्युर्वेदनादयः । क्ष्मादीनां तेऽनिलानां तु, चत्वारः स्युः सवैक्रियाः ॥ २६२ ॥

इति समुद्घातः ॥ १२ ॥

बादरक्षितिनीरागि, प्रत्येकान्यद्रुमा अपि । मृत्वोत्पद्यन्तेऽग्निलेषु, तिर्यक्ष्वेकेन्द्रियादिषु ॥ २६३ ॥
पञ्चाक्षेष्वपि तिर्यक्षु, गर्भसंमूच्छजन्मसु । नरेष्वपि द्विभेदेषु, संख्येयायुष्कशालिषु ॥ २६४ ॥
गच्छतो वह्निवायू तु, सर्वेष्वेषु नरान्विना । ततः पूर्वे द्विगतयोऽमी त्वेकगतयः स्मृताः ॥ २६५ ॥

इति गतिः ॥ १३ ॥

एकद्वित्रिचतुरक्षाः, पञ्चाक्षाः संख्यजीविनः । तिर्यञ्चो मनुजाश्चैव, गर्भसंमूर्छनोद्भवाः ॥ २६६ ॥
अपर्याप्ताश्च पर्याप्ताः, सर्वेऽप्येते सुरास्तथा । भवनव्यन्तरज्योतिष्काद्यकल्पद्वयोद्भवाः ॥ २६७ ॥
मृत्वा प्रत्येकविटपिबादरक्षितिवारिषु । आयान्ति तेषु देवास्तु, पर्याप्तेष्वपरेषु न ॥ २६८ ॥
अपर्याप्तेषु त्रिष्वेषु, निगोदाग्न्यनिलेषु च । उत्पद्यन्ते च पूर्वोक्ताः, प्राणिनो निर्जरान्विना ॥ २६९ ॥
निर्जरोत्पत्तियोग्यानामुक्तः प्रत्येकभूरुहाम् । विशेषः पञ्चमाङ्गस्यैकविंशादिशतद्वये ॥ २७० ॥
शाल्यादिधान्यजातीनां, पुष्पे बीजे फलेषु च । देव उत्पद्यतेऽन्येषु, न मूलादिषु सप्तसु ॥ २७१ ॥
कोरण्टकादिगुल्मानां, देवः पुष्पादिषु त्रिषु । उत्पद्यते न मूलादिसप्तके किल शालिवत् ॥ २७२ ॥
इक्षुवाटिकमुख्यानां, मूलादिनवके सुरः । उत्पद्यते नैव किन्तु, स्कन्धे उत्पद्यते परम् ॥ २७३ ॥

इक्षुवाटिकादयस्त्वमी पञ्चमाङ्गे प्रायो रूढिगम्याः पर्वकविशेषाः ॥ "अह भंते उक्खुवाडिय–वीरण–इक्कड–भामास–संवत्त–सत्तवन्न–तिमिर–सेसय–चोरग–तलाण एएसिणं जे जीवा मूलत्ताए वक्कमंति, एवं जहेव वंसवग्गे तहेव एत्थावि मूलादीया दसउद्देसगा ॥ नवरं । खंधुद्देसए देवो उववज्जइ चत्तारिलेसाओ" ॥

तालप्रभृतिवृक्षाणां, तथैकास्थिकभूरुहाम् । तथैव बहुबीजानां, वल्लीनामप्यनेकधा ॥ २७४ ॥
उत्पद्यते प्रवालादिष्वेव पञ्चसु निर्जरः । न मूलादिपञ्चकेऽथ, नोक्तशेषवनस्पतौ ॥ २७५ ॥

तथोक्तम् । "पत्तपवाले पुप्फे फले य बीए य होइ उववाओ । रुक्खेसु सुरगणाणं पसत्थरसवण्णगंधेसु" ॥ इति भगवतीद्वाविंशशतवृत्तौ ॥

एकसामयिकीसंख्योत्पत्तौ च मरणेऽपि च । विज्ञेया सूक्ष्मवन्नास्ति, विरहोऽत्रापि सूक्ष्मवत् ॥ २७६ ॥

इत्यागतिः ॥ १४ ॥

विपद्यानन्तरभवे, तिर्यक्पञ्चाक्ष्यतां गताः । सम्यक्त्वं देशविरतिं, लभन्ते भूदकद्रुमाः ॥ २७७ ॥
विपद्यानन्तरभवे, प्राप्य गर्भजमर्त्यताम् । सम्यक्त्वं विरतिं मोक्षमप्याप्नुवन्ति केचन ॥ २७८ ॥
विपद्यानन्तरभवे, न लभन्तेऽग्निवायवः । सम्यक्त्वमपि दुष्कर्मतिमिरावृतलोचनाः ॥ २७९ ॥

इत्यनन्तराप्तिः ॥ १५ ॥

पृथ्व्यम्बुकायिका मुक्तिं, यान्त्यनन्तरजन्मनि । चत्वार एकसमये, षड् वनस्पतिकायिकाः ॥ २८० ॥

इति समयेसिद्धिः ॥ १६ ॥

पृथ्व्यम्बुप्रत्येकतरुष्वाद्यलेश्याचतुष्टयम् । आद्यं लेश्यात्रयं साधारणद्रुमाग्निवायुषु ॥ २८१ ॥

चतुर्थलेश्यासम्भवस्तु एवम्—

तेजोलेश्यावतां येषु, नाकिनां गतिसंभवः । आद्यमन्तर्मुहूर्त्तं स्यात्तेजोलेश्याऽपि तेषु वै ॥ २८२ ॥

इति लेश्या ॥ १७ ॥

एषां स्थूलक्ष्मादीनामाहारः षड्दिगुद्भवः । स्थूलानिलस्य त्रिचतुःपञ्चदिक्संभवोऽप्यसौ ॥ २८३ ॥

इत्याहारदिक् ॥ १८ ॥

एकोनविंशतितमादीन्येकादश सूक्ष्मवत् । द्वाराणि स्थूलपृथ्व्यादिजीवानां जगुरीश्वरः ॥ २८४ ॥

आद्यं गुणस्थानमेषु, मतं सिद्धान्तिनां मते । कर्मग्रन्थमते त्वाद्यं, तद्द्वयं भूजलद्रुषु ॥ २८५ ॥

स्युस्तथा स्थूलमरुतां, योगाः पञ्च यतोऽधिकौ । एषां वैक्रियतन्मिश्रौ, त्रयोऽन्येषां च पूर्ववत् ॥ २८६ ॥

एवं द्वाराणि १९–३१ ॥

अङ्गुलासंख्यांशमाना, यावन्तोऽशा भवन्ति हि । एकस्मिन् प्रतरे सूचीरूपा लोके घनीकृते ॥ २८७ ॥

तावन्तः पर्याप्ता निगोदप्रत्येकतरुधराश्चापः । स्युः किञ्चिन्न्यूनावलिघनसमयमितास्त्वनलजीवाः ॥ २८८ ॥

अत्र च–

यद्यपि पूर्वार्धोक्ताश्चत्वारस्तुल्यमानकाः प्रोक्ताः । तदपि यथोत्तरमधिकाः, प्रत्येतव्या असंख्यगुणाः ॥ २८९ ॥

उक्तोऽङ्गुलासंख्यभागो, यः सूचीखण्डकल्पने । तस्यासंख्येयभेदत्वात्, घटते सर्वमप्यदः ॥ २९० ॥

घनीकृतस्य लोकस्यासंख्येयभागवर्त्तिषु । असंख्यप्रतरेषु स्युः, यावन्तोऽभ्रप्रदेशकाः ॥ २९१ ॥

तावन्तो बादराः पर्याप्तकाः स्युः वायुकायिकाः । इदं प्रज्ञापनावृत्तावाद्याङ्गविवृतौ त्विदम् ॥ २९२ ॥

सुसंवर्त्तितलोकैकप्रतरासंख्यभागकैः । प्रदेशैः परिमिताः स्थूलापर्याप्तक्ष्माम्बुवायवः ॥ २९३ ॥

क्षेत्रपल्योपमासंख्यभागप्रदेशसम्मिताः । पर्याप्ता बादरहविर्भुजः प्रोक्ताः पुरातनैः ॥ २९४ ॥

संवर्त्तितचतुरस्रीकृतलोकश्रेण्यसंख्यभागगतैः । वियदंशैः पर्याप्तास्तुल्याः प्रत्येकतरुजीवाः ॥ २९५ ॥

संवर्त्तित चतुरस्रीकृतस्य लोकस्य यः प्रतर एकः । तदसंख्यभागखांशप्रमिताः पर्याप्तबादरनिगोदाः ॥ २९६ ॥

अतःपरं तु ग्रंथद्वयेऽपि तुल्यमेव ॥

बादराः स्थावराः सर्वेऽप्येते पर्याप्तकाः पुनः । स्युः प्रत्येकमसंख्येयलोकाभ्रांशमिताः खलु ॥ २९७ ॥

लोकमानाभ्रखण्डानामनन्तानां प्रदेशकैः । तुल्याः स्थूलानन्तकायजीवाः प्रोक्ता जिनेश्वरैः ॥ २९८ ॥

इति मानम् ॥ ३२ ॥

पर्याप्ताः बादराः सर्वस्तोकाः पावककायिकाः । असंख्येयगुणास्तेभ्यः, प्रत्येकधरणीरुहः ॥ २९९ ॥

असंख्येयगुणास्तेभ्यः, स्युर्बादरनिगोदकाः । तेभ्यो भूकायिकास्तेभ्यश्चापस्तेभ्यश्च वायवः ॥ ३०० ॥
तेभ्योऽनन्तगुणाः स्थूलाः, स्युर्वनस्पतिकायिकाः । सामान्यतो बादराश्चाधिकाः पर्याप्तकास्ततः ॥ ३०१ ॥
स्वस्वजातीयपर्याप्तकेभ्योऽसंख्यगुणाधिकाः । अपर्याप्ताः स्वजातीयदेहिनः परिकीर्त्तिताः ॥ ३०२ ॥
यद्बादरस्य पर्याप्तकस्यैकैकस्य निश्रया । असंख्येयाः अपर्याप्ताः तज्जातीयाः भवन्ति हि ॥ ३०३ ॥

तथोक्तं प्रज्ञापनायाम् । "पज्जत्तगनिस्साए अपज्जत्तगा वक्कमन्ति । जत्थ एगो तत्थ नियमा असंखेज्जा" । इत्यल्पबहुत्वम् ॥ ३३ ॥

सर्वस्तोका दक्षिणस्यां, भूकाया दिगपेक्षया । उदक् प्राक् च ततः प्रत्यक्, क्रमात्विशेषतोऽधिकाः ॥ ३०४ ॥
उपपत्तिश्चात्र—
यस्यां दिशि घनं तस्यां, बहवः क्षितिकायिकाः । यस्यां च शुषिरं तस्यां, स्तोका एव भवन्त्यमी ॥ ३०५ ॥
दक्षिणस्यां च नरकनिवासा भवनानि च । भूयांसि भवनेशानां, प्राचुर्यं शुषिरस्य तत् ॥ ३०६ ॥
अल्पा उदिच्यां नरका, भवनानीति तत्र ते । घनप्राचुर्यतोऽनल्पाः, स्युर्याम्यदिगपेक्षया ॥ ३०७ ॥
प्राच्यां रविशशिद्वीपसद्भावात् घनभूरितः । उत्तरापेक्षया तत्र, बहवः क्षितिकायिकाः ॥ ३०८ ॥
प्राक्प्रतीच्योः रविशशिद्वीपसाम्येऽपि गौतमः । द्वीपोऽधिकः प्रतीच्यां स्यात्ततस्तेऽत्राधिकाः स्मृताः ॥ ३०९ ॥
ननु प्रतीच्यामधिको, द्वीपो यथाऽस्ति गौतमः । तथाऽत्र सन्त्यधोग्रामाः, सहस्रयोजनोण्डताः ॥ ३१० ॥
तत्खातपूरितन्यायात्, घनस्य शुषिरस्य च । साम्यात् पृथ्वीकायिकानां, प्रत्यक् प्रचूरता कथम् ॥ ३११ ॥
अत्र उच्यते—
यथा प्रत्यगधोग्रामास्तथा प्राच्यामपि ध्रुवम् । गर्त्तादिसंभवोऽस्त्येव, किञ्च द्वीपोऽपि गौतमः ॥ ३१२ ॥
वक्ष्यमाणोच्छ्रयायामव्यासः प्रक्षिप्यते धिया । यद्यधोग्रामशुषिरे, तदप्येषोऽतिरिच्यते ॥ ३१३ ॥
एवं च घनबाहुल्यात्, प्रतीच्यां प्रागपेक्षया । पृथ्वीकायिकबाहुल्यं, युक्तमेव यथोदितम् ॥ ३१४ ॥
भवन्त्यप्यकायिकाः स्तोकाः पश्चिमायां ततः क्रमात् । प्राच्यां याम्यामुदीच्यां च, विशेषेणाधिकाधिकाः ॥ ३१५ ॥
उपपत्तिश्च अत्र—
प्रतीच्यां गौतमद्वीपस्थाने वारामभावतः । सर्वस्तोका जिनैरुक्ता, युक्तमेवाम्बुकायिकाः ॥ ३१६ ॥
पूर्वस्यां गौतमद्वीपाभावाद्विशेषतोऽधिकाः । दक्षिणस्यां चन्द्रसूर्यद्वीपाभावात्ततोऽधिकाः ॥ ३१७ ॥
उदीच्यां मानससरः, सद्भावात्सर्वतोऽधिकाः । अस्ति ह्यस्यां तदसंख्ययोजनायतविस्तृतम् ॥ ३१८ ॥
याम्युदीच्योर्वह्निकायाः, स्तोकाः प्रायो मिथः समाः । अग्न्यारंभकबाहुल्यात्, प्राच्यां संख्यगुणाधिकाः ॥ ३१९ ॥
ततः प्रतीच्यामधिका, वह्न्याद्यारंभकारिणाम् । ग्रामेष्वधोलौकिकेषु, बाहुल्याद्धरणीस्पृशाम् ॥ ३२० ॥
पूर्वस्यां मरुतः स्तोकास्ततोऽधिकाधिका मताः । प्रतीच्यामुत्तरस्यां च, दक्षिणस्यां यथाक्रमम् ॥ ३२१ ॥

यस्यां स्यात् शुषिरं भूरि, तस्यां स्युर्भुरयोऽनिलाः । घनप्राचुर्ये च तेऽल्पास्तच्च प्रागेव भावितम् ॥ ३२२ ॥
स्युर्यदपि खातपूरितयुक्त्या प्रत्यग्धराऽधिका तदपि । प्रत्यगधोग्रामभुवां निम्नत्वाद्वास्तवी शुषिरबहुता ॥ ३२३ ॥
वनानामल्पबहुता, भाव्याऽप्कायिकवद्बुधैः । तरूणां ह्यल्पबहुता, जलाल्पबहुतानुगा ॥ ३२४ ॥
सामान्यतोऽपि जीवानामल्पता बहुतापि च । वनाल्पबहुतापेक्षा, ह्यनन्ता एत एव यत् ॥ ३२५ ॥
इति दिगपेक्षयाऽल्पबहुता ॥ ३४ ॥
कायस्थितिर्या सूक्ष्माणां, प्रागुक्ता तन्मितं मतम् । सामान्यतो बादराणां, बादरत्वे किलान्तरम् ॥ ३२६ ॥
स्थूलक्ष्माम्भोऽग्निपवनप्रत्येकद्रुषु चान्तरम् । अनन्तकालो ज्येष्ठं स्याल्लघु चान्तर्मुहूर्त्तकम् ॥ ३२७ ॥
कालं निगोदेषु यत्तेऽनन्तं चान्तर्मुहूर्त्तकम् । स्थित्वा स्थूलक्ष्मादिभावं, पुनः केचिदवाप्नुयुः ॥ ३२८ ॥
बादरस्य निगोदस्यान्तरमुत्कर्षतो भवेत् । कालोऽसंख्यः पृथिव्यादिकायस्थितिमितश्च सः ॥ ३२९ ॥
सामान्यतः स्थूलवनकायत्वेऽप्येतदन्तरम् । जघन्यतस्तु सर्वेषामन्तर्मुहूर्त्तमेव तत् ॥ ३३० ॥
इत्यन्तरम् ॥ ३५ ॥

स्वरूपमेकेन्द्रियदेहिनां मया, धियाऽल्पया किञ्चिदिदं समुद्धृतम् ।
श्रुतादगाधादिव दुग्धवारिधेः जलं स्वचञ्च्वा शिशुना पतत्रिणा ॥ ३३१ ॥

विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्री तेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे, सर्गो निर्गलितार्थसार्थसुभगः पूर्णः सुखं पञ्चमः ॥ ३३२ ॥

॥ इति श्री लोकप्रकाशे पञ्चमः सर्गः समाप्तः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

॥ अथ षष्ठः सर्गः ॥

विकलान्यसमग्राणि, स्युर्येषामिन्द्रियाणि वै । विकलेन्द्रियसंज्ञास्ते, स्युर्द्वित्रिचतुरिन्द्रियाः ॥ १ ॥
तत्र प्रथमं भेदाः ॥ १ ॥
अन्तर्जाः कृमयो द्वेधा, कुक्षिपायुसमुद्भवाः । विष्टाद्यमेधजाः कीटाः, काष्ठकीटा घुणाभिधाः ॥ २ ॥
गण्डोला अलसा वंशीमुखा मातृवहा अपि । जलौकसः पूतरका, मेहरा [1]जालका अपि ॥ ३ ॥
नानाशङ्खाः शङ्खनकाः, कपर्दशुक्तिचन्दनाः । इत्याद्या द्वीन्द्रियाः पर्याप्तापर्याप्तया द्विधा ॥ ४ ॥
इति द्वीन्द्रियभेदाः ।
पीपिलिका बहुविधा, घृतेल्यश्चौपदेहिकाः । लिक्षा मर्कोटका यूका, गर्दभा मत्कुणादयः ॥ ५ ॥

१. जालकाभिधाः इतिपाठः ।

इन्द्रगोपालिका सावा, गुल्मीगोमयकीटकाः । चौरकीटाः धान्यकीटाः, पञ्चवर्णाश्च कुन्थवः ॥ ६ ॥
तृणकाष्ठफलाहाराः, पत्रवृन्ताशना अपि । इत्याद्यास्त्रीन्द्रियाः पर्याप्तापर्याप्ततया द्विधा ॥ ७ ॥
इति त्रीन्द्रियभेदाः ।

वृश्चिका ऊर्णनाभाश्च, भ्रमर्यो भ्रमरा अपि । कंसार्यो मशकास्तिड्डा, मक्षिका मधुमक्षिकाः ॥ ८ ॥
पतङ्गा झिल्लिका दंशाः, खद्योता ढिङ्कुणा अपि । रक्तपीतहरित्कृष्णचित्रपक्षाश्च कीटकाः ॥ ९ ॥
नन्द्यावर्ताश्च कपिलडोलाद्याश्चतुरिन्द्रियाः । भवन्ति तेऽपि द्विविधाः, पर्याप्तान्यतयाऽखिला : ॥ १० ॥
इति चतुरिन्द्रियभेदाः ॥ अथ स्थानम् ॥

ऊर्ध्वाधोलोकयोरेकदेशभागे भवन्ति ते । तिर्यग्लोके नदीकूपतटाकदीर्घिकादिषु ॥ ११ ॥
द्वीपाम्भोधिषु सर्वेषु, तथा नीराश्रयेषु च । षोढापि विकलाक्षाणां, स्थानान्युक्तानि तात्त्विकैः ॥ १२ ॥
उपपातात्समुद्घातान्निजस्थानादपि स्फुटम् । असंख्येयतमेभागे, ते लोकस्य प्रकीर्तिताः ॥ १३ ॥
इति स्थानम् ॥ २ ॥

आहाराङ्गेन्द्रियोच्छ्वासभाषाख्या एषु पञ्च च । पर्याप्तयस्तथा प्राणाः, षट्सप्ताष्टौ यथाक्रमम् ॥ १४ ॥
चत्वारः स्थावरोक्तास्ते, जिह्वावाग्बलवृद्धितः । षड्द्वीन्द्रियेष्वथैकैकेन्द्रियवृद्धिस्ततो द्वयोः ॥ १५ ॥
इति पर्याप्तयः ॥ ३ ॥

लक्षद्वयं च योनीनामेषु प्रत्येकमिष्यते । लक्षाणि कुलकोटीनां, सप्ताष्ट नव च क्रमात् ॥ १६ ॥
इति योनिसंख्या कुलसंख्या च ॥ ४–५ ॥ इति योनिकुलसंख्या ॥

विवृता योनिरेतेषां, त्रिविधा सा प्रकीर्तिता । सचित्ताऽचित्तमिश्राख्या, भावना तत्र दर्श्यते ॥ १७ ॥
जीवद्गवादिदेहोत्थकृम्यादीनां सचित्तका । अचित्तकाष्ठाद्युत्पन्नघूणादीनामचित्तका ॥ १८ ॥
सचित्ताचित्तकाष्ठादिसंजातानां तु मिश्रका । उष्णा शीता च शीतोष्णेत्यपि सा त्रिविधा मता ॥ १९ ॥
इति योनिस्वरूपम् ॥ ६ ॥

द्व्यक्षाणां द्वादशाब्दानि, भवेज्ज्येष्ठा भवस्थितिः । त्र्यक्षाणां पुनरेकोनपञ्चाशदेव वासराः ॥ २० ॥
षण्मासाश्चतुरक्षाणां, जघन्याऽन्तर्मुहूर्त्तकम् । सान्तर्मुहूर्त्तोना त्वेषा, स्यात्पर्याप्ततया स्थितिः ॥ २१ ॥
इति भवस्थितिः ॥ ७ ॥

ओघतो विकलाक्षेषु, कायस्थितिरुरीकृता । संख्येयाब्दसहस्राणि, प्रत्येकं च तथा त्रिषु ॥ २२ ॥
पर्याप्तत्वे तु नवरं, द्व्यक्षकायस्थितिर्मता । संख्येयान्येव वर्षाणि, श्रूयतां तत्र भावना ॥ २३ ॥
भवस्थितिद्वीन्द्रियाणामुत्कृष्टा द्वादशाब्दिकी । तादृग्निरन्तरकियत्भवादानादसौ भवेत् ॥ २४ ॥

एवमग्रेऽपि-संख्येयदिनरूपा च, पर्याप्तत्रीन्द्रियाङ्गिनाम् । पर्याप्तचतुरक्षाणां, संख्येयमासरूपिका ॥ २५ ॥
इति कायस्थितिः ॥ ८ ॥

कार्मणं तैजसं चौदारिकमेतत्तनुत्रयम् । इति देहाः ॥ ९ ॥

केवलं हुंडसंस्थानमेतेषां परिकीर्तितम् ॥ २६ ॥ इति संस्थानम् ॥ १० ॥

योजनानि द्वादशैषां, त्रिगव्यूत्येकयोजनम् । क्रमाज्ज्येष्ठा तनुर्लभ्यङ्गुलासंख्यलवोन्मिता ॥ २७ ॥
आहुश्च—"बारसजोअणा संखो तिकोस गुम्मी य जोअणं भमरो" इति ॥ इत्यङ्गमानम् ॥ ११ ॥
[बृहत्संग्रहणी गा. २९६]

वेदनोत्थः कषायोत्थो, मरणान्तिक इत्यपि । विकलेन्द्रियजीवानां, समुद्घाता अमी त्रयः ॥ २८ ॥
इति समुद्घाताः ॥ १२ ॥

पृथ्व्याद्याः स्थावराः पञ्च, द्वीन्द्रियाद्यास्त्रयः पुनः । संख्येयजीविनः पञ्चेन्द्रियतिर्यग्नरा अपि ॥ २९ ॥
स्थानकेषु दशस्वेषु, गच्छन्ति विकलेन्द्रियाः । दशभ्य एवैतेभ्यश्चोत्पद्यन्ते विकलेन्द्रियाः ॥ ३० ॥
न देवनारकासंख्यजीवतिर्यग्नरेषु च । एषां गमागमौ तस्मात्, द्विगता द्व्यागता इति ॥ ३१ ॥
उपपातच्यवनयोर्विरहो द्वीन्द्रियादिषु । अन्तर्मुहूर्त्तमुत्कृष्टो, जघन्यः समयावधिः ॥ ३२ ॥
उत्पद्यन्ते विपद्यन्ते, चैकेन समयेन ते । एको द्वौ वा त्रयः संख्या, असंख्या विकलेन्द्रियाः ॥ ३३ ॥
इति गत्यागती ॥ १३–१४ ॥

लब्ध्वा नृत्वादिसामग्रीं, केचिदासादयन्त्यमी । यावद्दीक्षां भवे गम्ये, न तु मोक्षं स्वभावतः ॥ ३४ ॥
इत्यनन्तराप्तिः ॥ १५ ॥

एकस्मिन् समये सिद्धिर्विकलानां न सम्भवेत् । ग्रामो नास्ति कुतः सीमा, मोक्षो नास्तीति सा कुतः ॥ ३५ ॥
इत्येकसमयसिद्धिः ॥ १६ ॥

कृष्णा नीला च कापोतीत्येषां लेश्यात्रयं स्मृतम् । इति लेश्या ॥ १७ ॥

त्रसनाड्यन्तरे सत्त्वादाहारः षड्दिगुद्भवः ॥ ३६ ॥ इत्याहारदिक् ॥ १८ ॥

एषां संहननं चैकं, सेवार्त्तं परिकीर्तितम् । इति संहननम् ॥ १९ ॥

मानमायाक्रोधलोभाः, कषाया एषु वर्णिताः ॥ ३७ ॥ इति कषायाः ॥ २० ॥

आहारप्रमुखाः संज्ञाश्चतस्र एषु दर्शिताः । इति संज्ञाः ॥ २१ ॥

द्व्यक्षाणां स्पर्शनं जीह्वेत्याख्यातमिन्द्रियं द्वयम् ॥ ३८ ॥

तत् त्र्यक्षचतुरक्षाणां, क्रमाद् घ्राणेक्षणाधिकं । इतीन्द्रियम् ॥ २२ ॥

असत्त्वाद्व्यक्तसंज्ञानां, ते निर्दिष्टा असंज्ञिनः ॥ ३९ ॥

यद्वा—

न दीर्घकालिकी नापि, दृष्टिवादोपदेशिकी । स्याद्धेतुवादिकी ह्येषां, न तया संज्ञिता पुनः ॥ ४० ॥

इति संज्ञिता ॥ २३ ॥

केवलं क्लीबवेदाश्च मिथ्यादृष्टय एव ते । सम्यग्दृशो ह्यल्पकालं, विद्युज्ज्योतिर्निदर्शनात् ॥ ४१ ॥

सास्वादनाख्यसम्यक्त्वे, किञ्चित् शेषे मृतिं गताः । विकलाक्षेषु जायन्ते, ये केचित्तदपेक्षया ॥ ४२ ॥

अपर्याप्तदशायां स्युः, सम्यग्दृशोऽपि केचन । पर्याप्तत्वे तु सर्वेऽपि, मिथ्यादृष्टय एव ते ॥ ४३ ॥

इति वेदः दृष्टिश्च ॥ २४–२५ ॥

मतिश्रुताभिधं ज्ञानद्वयं सम्यग्दृशां भवेत् । मत्यज्ञानश्रुताज्ञाने, तेषां मिथ्यात्विनां पुनः ॥ ४४ ॥

इति ज्ञानम् ॥ २६ ॥

अचक्षुर्दर्शनोपेता, द्वित्र्यक्षाश्चतुरिन्द्रियाः । सचक्षुर्दर्शनाचक्षुर्दर्शनाः कथिता जिनैः ॥ ४५ ॥

इति दर्शनम् ॥ २७ ॥

स्युः साकारोपयोगास्ते, ज्ञानाज्ञानव्यपेक्षया । निराकारोपयोगास्ते, दर्शनापेक्षया पुनः ॥ ४६ ॥

इत्युपयोगः ॥ २८ ॥

द्विवक्रस्त्रिक्षणान्तश्च, संभवत्येषु विग्रहः । ततस्तत्रैकसमयं, व्यवहारादनाहृतिः ॥ ४७ ॥

निश्चयात्तु द्विसमया, स्यादनाहारिता किल । विग्रहे विकलाक्षाणामाहारकत्वमन्यदा ॥ ४८ ॥

एते प्रागोजआहारास्ततः पर्याप्तभावतः । लोमाहाराः कावलिकाहारा अपि भवन्त्यमी ॥ ४९ ॥

सचित्ताचित्तमिश्राख्य, एषामाहार इष्यते । अन्तर्मुहूर्त्तमुत्कृष्टमाहारस्यान्तरं मतम् ॥ ५० ॥

इत्याहारः ॥ २९ ॥

पर्याप्तानां गुणस्थानमेतेषामुक्तमादिमम् ॥ अपर्याप्तानां तदाद्यं, द्वितीयमपि जातुचित् ॥ ५१ ॥

इति गुणाः ॥ ३० ॥

औदारिकः कामयोगस्तन्मिश्रः कार्मणस्तथा । वागसत्यामृषा चेति, योगाश्चत्वार एष्वमी ॥ ५२ ॥

इति योगाः ॥ ३१ ॥

एकस्मिन् प्रतरे सूच्योऽङ्गुलसंख्यांशकायति । तावन्तो द्वित्रिचतुरिन्द्रियाः पर्याप्तकाः पृथक् ॥ ५३ ॥

एकस्मिन् प्रतरे सूच्योऽङ्गुलासंख्यांशकायति । अपर्याप्ता द्वित्रिचतुरक्षास्तावन्त ईरिताः ॥ ५४ ॥

उक्तं च— "पज्जत्तापज्जत्ता, बितिचउ अस्सन्निणो अवहरंति । अंगुलसंखासंखप्पएसभइयं पुढो पयरं" ॥

इति मानम् ॥ ३२ ॥

सर्वस्तोकाः चतुरक्षाः, पर्याप्ताः परिकीर्तिताः । पर्याप्तद्वीन्द्रियास्तेभ्योऽधिकास्तेभ्यस्त्रिखास्तथा ॥ ५५ ॥

असंख्येयगुणास्तेभ्योऽपर्याप्तचतुरिन्द्रियाः । त्रिद्वीन्द्रिया अपर्याप्तास्ततोऽधिकाधिकाः क्रमात् ॥ ५६ ॥
इत्यल्पबहुत्वम् ॥ ३३ ॥
इमे प्रतीच्यामत्यल्पाः, प्राच्यां विशेषतोऽधिकाः । दक्षिणस्यामुत्तरस्यामेभ्योऽधिकाधिकाः क्रमात् ॥ ५७ ॥
अल्पतां बहुतां चानुसरन्त्येतेऽम्बुकायिनाम् । प्रायो जलाशयेष्वेषां, भूम्नोत्पत्तिः प्रतीयते ॥ ५८ ॥
द्व्यक्षाः पूतरशङ्खाद्याः, स्युः प्रायो बहवो जले । शेवालादौ च कुन्थ्वाद्या, भृङ्गाद्याश्चाम्बुजादिषु ॥ ५९ ॥
इति दिगपेक्षयाऽल्पबहुत्वम् ॥ ३४ ॥
अल्पमन्तर्मुहूर्त्तं स्यात्, कालोऽनन्तोऽन्तरं महत् । वनस्पत्यादिषु स्थित्वा, पुनर्विकलताजुषाम् ॥ ६० ॥
इत्यन्तरम् ॥ ३६ ॥ पञ्चेन्द्रियजीवस्वरूपम् ॥
तिर्यञ्चो मनुजा देवा, नारकाश्चेति तात्त्विकैः । स्मृता पञ्चेन्द्रिया जीवाश्चतुर्धा गणधारिभिः ॥ ६१ ॥
त्रिधा पञ्चाक्षतिर्यञ्चो, जलस्थलखचारिणः । अनेकधा भवन्त्येते, प्रतिभेदविवक्षया ॥ ६२ ॥
दृष्टा जलचरास्तत्र, पञ्चधा तीर्थपार्थिवैः । मत्स्याश्च कच्छपा ग्राहा, मकरा शिशुमारकाः ॥ ६३ ॥
तत्रानेकविधा मत्स्याः, श्लक्ष्णास्तिमितिमिङ्गलाः । नक्रास्तण्डुलमत्स्याश्च, रोहिताः कणिकाभिधाः ॥ ६४ ॥
पीठपाठीनशकुलाः, सहस्रदंष्ट्रसंज्ञकाः । नलमीना उलूपी च, प्रोष्ठि च मद्गुरा अपि ॥ ६५ ॥
चटाश्चटकराश्चापि, पताकातिपताकिकाः । सर्वे ते मत्स्यजातीया, ये चान्येऽपि तथाविधाः ॥ ६६ ॥
कच्छपा द्विविधा अस्थिकच्छपा मांसकच्छपाः । ज्ञेया संज्ञाभिरेताभिः ग्राहाः पञ्चविधा पुनः ॥ ६७ ॥
॥ दिली, वेढला, सुद्धला, पुलगा, सीसागारा इति ॥
द्विविधा मकराः शोण्डा, मट्टा अति विभेदतः । एकाकाराः शिशुमाराः, सर्वेऽमी जलचारिणः ॥ ६८ ॥
इति जलचराः ॥
चतुष्पदाः परिसर्पा, इति स्थलचरा द्विधा । चतुष्पदाश्चतुर्भेदैस्तत्र प्रोक्ता विशारदैः ॥ ६९ ॥
केचिदेकखुराः केचिद्, द्विखुरा अपरे पुनः । गण्डीपदाश्च सनखपदा अन्ये प्रकीर्त्तिताः ॥ ७० ॥
अभिन्नाः स्युः खुरा येषां, ते स्युरेकखुराभिधाः । गर्दभाश्वादयस्ते तु, रोमन्थं रचयन्ति न ॥ ७१ ॥
भिन्ना येषां खुरास्तेस्युर्द्विखुरा बहुजातयः । महिषा गवया उष्ट्रा, वराहच्छगलेडकाः ॥ ७२ ॥
रुरवः शरभाश्चापि, चमरा रोहिषा मृगाः । गोकर्णाद्या अमी सर्वे, रोमन्थं रचयन्ति वै ॥ ७३ ॥
स्यात्पद्मकर्णिका गण्डी, तद्वद्येषां पदाश्च ते । हस्तिगण्डकखड्गाद्या, गण्डीपदाः प्रकीर्त्तिताः ॥ ७४ ॥
इत्युत्तराध्ययनवृत्तौ ॥ प्रज्ञापनावृत्तौ तु—"गण्डी सुवर्णकाराधिकरणस्थानमिति" ॥
येषां पदा नखैर्दीर्घैः, संयुताः स्युः शुनामिव । तीर्थंकरैस्ते सनखपदा इति निरूपिताः ॥ ७५ ॥
सिंहा व्याघ्रा द्वीपिनश्च, तरक्षा ऋक्षका अपि । शृगालाः शशकाश्चित्राः, श्वानश्चान्ये तथाविधाः ॥ ७६ ॥

इति चतुष्पदाः ॥

भुजोरःपरिसर्पत्वात्, परिसर्पा अपि द्विधा । तत्रोरःपरिसर्पाश्च, चतुर्धा दर्शिता जिनैः ॥ ७७ ॥
अहयोऽजगरा आसालिका महोरगा इति । अहयो द्विविधा दर्वीकरा मुकुलिनस्तथा ॥ ७८ ॥
दर्वीकरा फणभृतो, या देहावयवाकृतिः । फणाभावोचिता सा स्यात्, मुकुलं तद्युताः परे ॥ ७९ ॥
दर्वीकरा बहुविधा, दृष्टा दृष्टजगत्त्रयैः । आशीविषा दृष्टिविषा, उग्रभोगविषा अपि ॥ ८० ॥
लालाविषास्त्वग्विषाश्च, श्वासोच्छ्वासविषा अपि । कृष्णसर्पाः स्वेदसर्पाः, काकोदरादयोऽपि च ॥ ८१ ॥
तत्र च–
आशीर्दंष्ट्रा विषं तस्यां, येषामाशीविषा हि ते । जम्बूद्वीपमितं देहं, विषसात्कर्त्तुमीश्वराः ॥ ८२ ॥
शक्तेर्विषय एवायं, भूतं भवति भावि नो । तादृक्शरीरासम्पत्त्या, पञ्चमाङ्गेऽर्थतो ह्यदः ॥ ८३ ॥
घोणसाद्या मुकुलिन, इत्येवमहयो द्विधा । एकाकारा अजगरा, आसालिकानथ ब्रुवे ॥ ८४ ॥
अन्तर्मनुष्यक्षेत्रस्य, केवलं कर्मभूमिषु । काले पुनर्युगलिनां, विदेहेष्वेव पञ्चसु ॥ ८५ ॥
चक्र्यर्धचक्रिरामाणां, महानृपमहीभृताम् । स्कन्धावारनिवेशानां, विनाशे समुपस्थिते ॥ ८६ ॥
एवं च–नगरग्रामनिगमखेटादीनामुपस्थिते । विनाशे तदधः सम्मूर्च्छन्त्यासालिकसंज्ञकाः ॥ ८७ ॥
अङ्गुलासंख्यभागाङ्गाः, प्रथमोत्पन्नका अमी । वर्धमानशरीराश्चोत्कर्षाद् द्वादशयोजनाः ॥ ८८ ॥
बाहल्यपृथुलत्वाभ्यां, ज्ञेयास्तदनुसारतः । अज्ञानिनोऽसंज्ञिनश्च, ते मिथ्यादृष्टयो मताः ॥ ८९ ॥
उत्पन्ना एव ते नश्यन्त्यन्तर्मुहूर्त्तजीविताः । नष्टेषु तेषु तत्स्थाने, गर्त्ता पतति तावती ॥ ९० ॥
भयङ्करोऽथ सा गर्त्ता, राक्षसीव बुभुक्षिताः । क्षिप्रं ग्रसति तत्सर्वं, स्कन्धावारपुरादिकम् ॥ ९१ ॥
उक्तं जीवसमासे तु, स्युरेते द्वीन्द्रिया इति । शरीरोत्कर्षसाधर्म्याद्भेद तत्वं तु केवली ॥ ९२ ॥
महोरगा बहुविधाः, केचिदङ्गुलदेहकाः । तत्पृथक्त्वाङ्गकाः केचिद्वितस्तितनवः परे ॥ ९३ ॥
एवं रत्निकुक्षिचापैर्योजनैस्तच्छतैरपि । पृथक्त्ववृद्ध्या यावत्ते, सहस्रयोजनाङ्गकाः ॥ ९४ ॥
स्थले जलेऽपि विचरन्त्येते स्थलोद्भवा अपि । नरक्षेत्रे न सन्त्येते, बाह्यद्वीपसमुद्रगाः ॥ ९५ ॥
इत्युरःपरिसर्पाः ॥

वक्ष्ये भुजपरिसर्पास्ते त्वनेकविधाः स्मृताः । नकुलाः सरटा गोधा, ब्राह्मणीगृहगोधिका[1]ः ॥ ९६ ॥
छुच्छुंदरीमूषकाश्च, हालिनीजाहकादयः । एवं स्थलचरा उक्ता, उच्यन्ते खचरा अथ ॥ ९७ ॥
ते चतुर्धा लोमचर्मसमुद्गविततच्छदाः । तत्र हंसाः कलहंसाः, कपोतकेकिवायसाः ॥ ९८ ॥
ढङ्काः कङ्काश्चक्रवाकाश्चकोरक्रौञ्चसारसाः । कपिञ्जलाः कुर्कुटाश्च शुकतित्तिरलावकाः ॥ ९९ ॥

---

१. गृहगोलिकाः इत्यपिपाठः

हारीताः कोकिलाश्चाषाः, बकचातकखञ्जनाः । शकुनिचटकागृद्धाः, सुगृहश्येनसारिकाः ॥ १०० ॥
शतपत्रभरद्वाजाः, कुम्भकाराश्च टिट्टिभाः । दुर्गाकौशिकदात्यूहप्रमुखा लोमपक्षिणः ॥ १०१ ॥
वल्गुलीचर्मचटिका, आटिर्भारुण्डपक्षिणः । समुद्रवायसा जीवंजीवाद्याश्चर्मपक्षिणः ॥ १०२ ॥
समुद्गवत्संघटितौ, येषामुडुयनेऽपि हि । पक्षौ स्यातां ते समुद्गपक्षिणः परिकीर्त्तिताः ॥ १०३ ॥
अवस्थानेऽपि यत्पक्षौ, ततो ते विततच्छदाः । इमौ स्तः पक्षिणां भेदौ, द्वौ बाह्यद्वीपवार्धिषु ॥ १०४ ॥
संमूर्च्छिमा गर्भजाश्चेत्यमी स्युर्द्विविधाः समे । विना ये गर्भसामग्रीं, जाताः संमूर्च्छिमाश्च ते ॥ १०५ ॥
तथा गर्भादिसामग्र्या, ये जातास्ते हि गर्भजाः । आसालिकान्विना संमूर्च्छिमा एव हि ते ध्रुवम् ॥ १०६ ॥

यत्तु सूत्रकृताङ्गे आहारपरिज्ञाध्ययने आसालिका गर्भतया उक्ताः ते तत्सदृशनामानो विजातीयैव संभाव्यन्ते । अन्यथा प्रज्ञापनादिभिः सह विरोधापत्तेः ॥

अपर्याप्ताश्च पर्याप्ताः, प्रत्येकं द्विविधा इमे । एवं पञ्चाक्षतिर्यञ्चः, सर्वेऽपि स्युश्चतुर्विधाः ॥ १०७ ॥
इति भेदाः ॥ १ ॥
विकलाक्षवदुक्तानि, स्थानान्येषां जिनेश्वरैः । तत्तत्स्थानविशेषस्तु, स्वयं भाव्यो विवेकिभिः ॥ १०८ ॥
इति स्थानानि ॥ २ ॥
पञ्च पर्याप्तयोऽमीषां, पर्याप्तिं मानसीं विना । संमूर्च्छिमानामन्येषां, पुनरेता भवन्ति षट् ॥ १०९ ॥
असंज्ञिनोऽमनस्का यत्प्रवर्त्तन्तेऽशनादिषु । आहारसंज्ञा सा ज्ञेया, पर्याप्तिर्न तु मानसी ॥ ११० ॥
अथवाऽल्पं मनोद्रव्यं, वर्त्ततेऽसंज्ञिनामपि । प्रवर्त्तन्ते निवर्त्तन्ते, तेऽपीष्टानिष्टयोस्ततः ॥ १११ ॥
संमूर्च्छिमानां प्राणाः स्युर्नवान्येषां च ते दश । इति पर्याप्तयः ॥ ३ ॥

लक्षाश्चतस्रो योनीनामेषां सामान्यतः स्मृताः ॥ ११२ ॥ इति योनिसंख्याः ॥ ४ ॥

एवं संमूर्च्छिमगर्भोद्भवभेदाविवक्षया । लक्षाणि कुलकोटीनामेषामित्याहुरीश्वराः ॥ ११३ ॥
अध्यर्धानि द्वादशैव, भवन्ति जलचारिणाम् । खचराणां द्वादशाथ, चतुष्पदाङ्गिनां दश ॥ ११४ ॥
दशैवोरगजीवानां, भुजगानां नवेति च । एषां सार्धत्रिपञ्चाशल्लक्षाणि कुलकोटयः ॥ ११५ ॥
इति कुलसंख्या ॥ ५ ॥
विवृता योनिरेतेषां, संमूर्च्छिमशरीरिणाम् । गर्भजानां भवत्येषां, योनिर्विवृतसंवृता ॥ ११६ ॥
संमूर्च्छिमानां त्रैधेयं, सचित्ताचित्तमिश्रका । गर्भजानां तु मिश्रैव, यदेषां गर्भसम्भवे ॥ ११७ ॥
जीवात्मसात्कृतत्वेन, सचित्ते शुक्रशोणिते । तत्रोपयुज्यमानाः स्युरचित्ताः पुद्गलाः परे ॥ ११८ ॥
संमूर्च्छिमानां त्रिविधा, शीतोष्णमिश्रभेदतः । गर्भजानां तिरश्चां तु, भवेन्मिश्रैव केवलम् ॥ ११९ ॥

इति योनिसंवृतत्वादि ॥ ६ ॥

पूर्वकोटिमितोत्कृष्टा, स्थितिः स्याज्जलचारिणाम् । चतुष्पदानां चतुरशीतिवर्षसहस्रकाः ॥ १२० ॥
वत्सराणां त्रिपञ्चाशत्, सहस्राण्युरगाङ्गिनाम् । भुजगानां द्विचत्वारिंशत्सहस्राः स्थितिर्मता ॥ १२१ ॥
खचराणां सहस्राणि, द्वासप्ततिः स्थितिर्गुरुः । संमूर्च्छिमानां सर्वेषामित्युत्कुष्टा स्थितिर्भवेत् ॥ १२२ ॥
गर्भजानां पूर्वकोटिरुत्कृष्टा जलचारिणाम् । चतुष्पदानामुत्कृष्टा, स्थितिः पल्योपमत्रयम् ॥ १२३ ॥
भुजोरःपरिसर्पाणां, पूर्वकोटिः स्थितिर्गुरुः । खचराणां च पल्यस्यासंख्येयांशो गुरुः स्थितिः ॥ १२४ ॥
गर्भजानां तिरश्चां स्यादोघेनोत्कर्षतः स्थितिः । पल्यत्रयं समेषामप्यवशंतर्मुहूर्त्तकम् ॥ १२५ ॥

इति भवस्थितिः ॥ ७ ॥

संमूर्च्छिमानां पञ्चाक्षतिरश्चां कायसंस्थितिः । सप्तकं पूर्वकोटीनां, तदेवं परिभाव्यते ॥ १२६ ॥
मृत्वा मृत्वाऽसकृत्संमूर्च्छिमस्तिर्यग् भवेद्यदि । तदा सप्तभवान् यावत्, पूर्वकोटीमितस्थितीन् ॥ १२७ ॥
यद्यष्टमे भवेऽप्येष, तिर्यग्भवमवाप्नुयात् । तदाऽसंख्यायुष्कतिर्यग्गर्भजः स्यात्ततः सुरः ॥ १२८ ॥
कोटयः सप्त पूर्वाणां, पल्योपमत्रयान्विताः । कायस्थितिर्गर्भजानां, तिरश्चां तत्र भावना ॥ १२९ ॥
संख्येयायुर्गर्भजेषु, तिर्यक्षूत्पद्यतेऽसुमान् । उत्कर्षेण सप्तवारान्, पूर्वैककोटिजीविषु ॥ १३० ॥
अष्टम्यां यदि वेलायां, तिर्यग्भवमवाप्नुयात् । असंख्यायुस्तदा स्यात्ततस्थितिः पल्यत्रयं गुरुः ॥ १३१ ॥

अत एव श्रुतेऽप्युक्तम्— [उत्तराध्ययनसूत्रे, दशमं अध्ययनम् गाथा १३.]

"पंचिंदियकायमइगओ, उक्कोसं जीवो उ संवसे । सत्तट्ठभवग्गहणे समयं गोयम ! मा पमायए" ॥

अत्र संख्यातायुर्भवापेक्षया सप्त, उभयापेक्षया तु अष्टौ इति ॥

पूर्वकोट्यधिकायुस्तु, तिर्यक् सोऽसंख्यजीवितः । तस्य देवगतित्वेन, मृत्वा तिर्यक्षु नोद्भवः ॥ १३२ ॥
अष्टसंवत्सरोत्कृष्टा, जघन्याऽन्तर्मुहूर्त्तिकी । गर्भस्थितिस्तिरश्चां स्यात्, प्रसवो वा ततो मृतिः ॥ १३३ ॥
संख्याताब्दाधिकं वार्धिसहस्रमोघतो भवेत् । पञ्चेन्द्रियतया कायस्थितिरुत्कर्षतः किल ॥ १३४ ॥
पर्याप्तपञ्चाक्षतया, कायस्थितिर्गरीयसी । शतपृथक्त्वमब्धीनां, जघन्याऽन्तर्मुहूर्त्तकम् ॥ १३५ ॥

इति कायस्थितिः ॥ ८ ॥

देहास्त्रयस्तैजसश्च, कार्मणौदारिकाविति । सांमूर्च्छानां युग्मिनां च, तेऽन्येषां वैक्रियान्विताः ॥ १३६ ॥

इति देहाः ॥ ९ ॥

संमूर्च्छिमानां संस्थानं, हुंडमेकं प्रकीर्त्तितम् । गर्भजानां यथायोगं, भवन्ति निखिलान्यपि ॥ १३७ ॥

इति संस्थानम् ॥ १० ॥

संमूर्च्छिमानामुत्कृष्टं, शरीरं जलचारिणाम् । सहस्रं योजनान्येतन्मत्स्यादीनामपेक्षया ॥ १३८ ॥

चतुष्पदानां गव्यूतपृथक्त्वं परिकीर्त्तितम् । भुजगानां खगानां च, कोदण्डानां पृथक्त्वकम् ॥ १३९ ॥
योजनानां पृथक्त्वं चोरगाणां स्याद्वपुर्गुरु । गर्भजानां वाश्वराणां, संमूर्च्छिमाम्बुचारिवत् ॥ १४० ॥
चतुष्पदानां गव्यूतषट्कं भुजगदेहिनाम् । गव्यूतानां पृथक्त्वं स्यादुत्कृष्टं खलु भूघनम् ॥ १४१ ॥
तथोरःपरिसर्पाणां, सहस्रयोजनं वपुः । यतोऽनेकविधा उक्ता, एतज्जातौ महोरगाः ॥ १४२ ॥
अङ्गुलेन मिताः केचित्तत्पृथक्त्वाङ्गका: परे । केचित्क्रमाद्वर्धमानाः, सहस्रयोजनोन्मिताः ॥ १४३ ॥
गर्भजानां खचराणां धनुःपृथक्त्वमेव तत् । अङ्गुलासंख्यांशमानं, सर्वेषां तज्जघन्यतः ॥ १४४ ॥
वैक्रियं योजनशतपृथक्त्वप्रमितं गुरु । आरम्भेऽङ्गुलसंख्यांशमानं तत्स्याज्जघन्यतः ॥ १४५ ॥
इति देहमानम् ॥ ११ ॥
आद्यस्त्रयः समुद्घाताः, संमूर्च्छिमशरीरिणाम् । गर्भजानां तु पञ्चैते, कैवल्याहारकौ विना ॥ १४६ ॥
इति समुद्घाताः ॥ १२ ॥
यान्ति संमूर्च्छिमा नूनं, सर्वास्वपि गतिष्वमी । तत्रापि नरके यान्तो, यान्त्याद्यनरकावधि ॥ १४७ ॥
एकेन्द्रियेषु सर्वेषु, तथैव विकलेष्वपि । संख्यासंख्यायुर्युतेषु, तिर्यक्षु मनुजेषु च ॥ १४८ ॥
असंख्यायुर्नृतिर्यक्षूत्पद्यमानास्त्वसंज्ञिनः । उत्कर्षाद्यान्ति तिर्यञ्चः, पल्यासंख्यांशजीविषु ॥ १४९ ॥
असंज्ञिनो हि तिर्यञ्चः, पल्यासंख्यांशलक्षणम् । आयुश्चतुर्विधमपि, बध्नन्त्युत्कर्षतः खलु ॥ १५० ॥
अन्तर्मुहूर्त्तमानं च, नृतिरश्चोर्जघन्यतः । देवनारकयोर्वर्षसहस्रदशकोन्मितम् ॥ १५१ ॥
तत्रापि देवायुर्हूस्वपल्यासंख्यांशसंमितम् । नृतिर्यग्नारकायूंष्यसंख्यघ्नानि यथाक्रमम् ॥ १५२ ॥
[इदमर्थतो भगवतीशतक १ द्वितीयोद्देशके ॥]
देवेषूत्पद्यमानाः स्युर्भवनव्यन्तरावधि । एतद्योग्यायुषोऽभावान्न ज्योतिष्कादिनाकिषु ॥ १५३ ॥
यान्ति गर्भजतिर्यञ्चोऽप्येवं गतिचतुष्टये । विशेषस्तत्र नरकगतावेष निरुपितः ॥ १५४ ॥
सप्तस्वपि क्ष्मासु यान्ति, मत्स्याद्या जलचारिणः । रौद्रध्यानार्जितमहापाप्मानो हिंसका मिथः ॥ १५५ ॥
चतुष्पदाश्च सिंहाद्याश्चतसृष्वाद्यभूमिषु । पञ्चसूरःपरिसर्पास्तिसृष्वाद्यासु पक्षिणः ॥ १५६ ॥
भुजप्रसर्पा गच्छन्ति, प्रथमद्विक्षमावधि । देवेषु गच्छतामेषां, सर्वेषां समता गतौ ॥ १५७ ॥
भवनेशव्यन्तरेषु, ज्योतिष्केषु च यान्त्यमी । वैमानिकेषु चोत्कर्षादष्टमत्रिदिवावधि ॥ १५८ ॥
सुरेषु यान्ति सर्वेऽपि, तिर्यञ्चोऽसंख्यजीविनः । निजायुःसमहीनेषु, नाधिकस्थितिषु क्वचित् ॥ १५९ ॥
असंख्यजीविखचरा, अन्तरद्वीपजा अपि । तिर्यक्पञ्चेन्द्रिया यान्ति भवनव्यन्तरावधि ॥ १६० ॥
ततः परं यतो नास्ति, पल्यासंख्यांशिका स्थितिः । न चैवमीशानादग्रे, यान्ति केऽप्यमितायुषः ॥ १६१ ॥

इति गतिः ॥ १३ ॥

एकाक्षा विकलाक्षाश्च, तिर्यञ्चः संज्ञ्यसंज्ञिनः । संमूर्च्छिमेषु तिर्यक्ष्वायान्ति नो देवनारकाः ॥ १६२ ॥

एकद्वित्रिचतुरक्षाः, पञ्चाक्षाः संज्ञ्यसंज्ञिनः । भवनव्यन्तरज्योतिःसहस्रारान्तनिर्जराः ॥ १६३ ॥

संमूर्च्छिमा गर्भजाश्च, मनुष्याः सर्वनारकाः । गर्भोद्भवेषु तिर्यक्षु, जायन्ते कर्मयन्त्रिताः ॥ १६४ ॥

अन्तर्मुहूर्त्तमुत्कृष्टमुत्पत्तिमरणान्तरम् । सांमूर्च्छानां गर्भजानां, द्वादशान्तर्मुहूर्त्तकाः ॥ १६५ ॥

समयप्रमितं ज्ञेयं, जघन्यं तद् द्वयोरपि । एकसामयिकी संख्या, ज्ञेयैषां विकलाक्षवत् ॥ १६६ ॥

इत्यागतिः ॥ १४ ॥

लभन्तेऽनन्तरभवे, सम्यक्त्वादि शिवावधि । ते चैकस्मिन् क्षणे मुक्तिं, यान्तो यान्ति दशैव हि ॥ १६७ ॥

इत्यनन्तराप्तिः समयेसिद्धिश्च ॥ १५ ॥ १६ ॥

लेश्यात्रितयमाद्यं स्यात्, संमूर्च्छिमशरीरिणाम् । गर्भजानां यथायोगं, लेश्याः षडपि कीर्त्तिताः ॥ १६८ ॥

इति लेश्याः ॥ १७ ॥

षडप्याहारककुभो, द्वयानामन्त्यमेव च । सांमूर्च्छानां संहननमन्येषामखिलान्यपि ॥ १६९ ॥

अत्र च श्री जीवाभिगमाभिप्रायेण संमूर्च्छिमपञ्चाक्षतिरश्चामन्त्यमेवैकं संहननं संस्थानं च स्यात् । षष्ठकर्मग्रन्थाभिप्रायेण तु षडपि तानि स्युः । इत्यर्थतः संग्रहणीबृहद्वृत्तौ ॥

इत्याहारदिक् संहननं च ॥ १८ ॥ १९ ॥

सर्वे कषायाः संज्ञाश्च, निरवलानीन्द्रियाणि च । द्वयानां संमूर्च्छिमाः स्युरसंज्ञिनः परेऽन्यथा ॥ १७० ॥

इति कषायसंज्ञेन्द्रियसंज्ञिताः ॥ २०–२३ ॥

संमूर्च्छिमेषु तिर्यक्षु, स्त्री पुमांश्च न सम्भवेत् । केवलं क्लीबवेदास्ते, केवलज्ञानिभिर्मताः ॥ १७१ ॥

स्त्रियः पुमांसः क्लीबाश्च, तिर्यञ्चो गर्भजास्त्रिधा । पुंभ्यः स्त्रियस्त्रिभीरुपैरधिकास्त्रिगुणस्तथा ॥ १७२ ॥

इति वेदाः ॥ २४ ॥

विकलेन्द्रियवत् दृष्टिद्वयं संमूर्च्छिमाङ्गिनाम् । तिस्रोऽपि दृष्टयोऽन्येषां, तत्र सम्यग्दृशो द्विधा ॥ १७३ ॥

केचिद्देशेन विरताः, परे त्वविरताश्रयाः । अभावः सर्वविरतेस्तेषां भवस्वभावतः ॥ १७४ ॥

इति दृष्टिः ॥ २५ ॥

संमूर्च्छिमाः स्युर्द्व्यज्ञाना, द्विज्ञाना अपि केचन । द्वित्राज्ञाना गर्भजा द्वित्रज्ञाना अपि केचन ॥ १७५ ॥

इति ज्ञानम् ॥ २६ ॥

दर्शनद्वयमाद्यं स्यादुभयेषामपि स्फुटम् । अवधिज्ञानभाजां तु, गर्भजानां त्रिदर्शनी ॥ १७६ ॥

इति दर्शनम् ॥ २७ ॥

संमूर्च्छिमानां चत्वार, उपयोगाः प्रकीर्त्तिताः । गर्भजानां तु चत्वारः, षट् पञ्चौघान्नवापिते ॥ १७७ ॥

यदेषां केवलज्ञानं, मुक्त्वा केवलदर्शनम् । ज्ञानं मनःपर्यवं च, सर्वेऽन्ये सम्भवन्ति ते ॥ १७८ ॥

इत्युपयोगाः ॥ २८ ॥

स्यादनाहारिता त्वेषामेकद्विसमयावधि । ओजआदिस्त्रिधाऽऽहारः, सचित्तादिरपि त्रिधा ॥ १७९ ॥

प्रथमं त्वोजआहारो, लोमकावलिकौ ततः । अन्तरं द्वौ दिनौ ज्येष्ठं, लघु चान्तर्मुहूर्त्तकम् ॥ १८० ॥

ज्येष्ठं चैतत्कावलिकाहारस्य स्मृतमन्तरम् । स्वाभाविकं त्रिपल्यायुर्युक्ततिर्यगपेक्षया ॥ १८१ ॥

इत्याहारः ॥ २९ ॥

गुणस्थानद्वयं संमूर्च्छिमानां विकलाक्षवत् । गर्भजानां पञ्च तानि, प्रथमानि भवन्ति [1]हि ॥ १८२ ॥

इति गुणाः ॥ ३० ॥

संमूर्च्छिमानां चत्वारो, योगाः स्युर्विकलाक्षवत् । आहारकद्वयं मुक्त्वा, गर्भजानां त्रयोदश ॥ १८३ ॥

इति योगाः ॥ ३१ ॥

प्रतरासंख्यभागस्थाऽसंख्येयश्रेणिवर्तिभिः । नभःप्रदेशैःप्रमितास्तिर्यञ्चः खचराःस्मृता ॥ १८४ ॥

एवमेव स्थलचरास्तथा जलचरा अपि । भवन्ति किन्तु संख्येयगुणाधिकाः क्रमादिमे ॥ १८५ ॥

यदसौ प्रतरासंख्यभागः प्रागुदितः खलु । यथाक्रमं श्रुते प्रोक्तो, बृहत्तरोबृहत्तमः ॥ १८६ ॥

षट्पञ्चाशाङ्गुलशतद्वयमानानि निश्चितम् । यावन्ति सूचीखण्डानि, स्युरेकप्रतरे स्फुटम् ॥ १८७ ॥

तावज्ज्योतिष्कदेवेभ्यः, स्युः संख्येयगुणाः क्रमात् । तिर्यक्पञ्चेन्द्रियाः षण्ढा, नभःस्थलाम्बुचारिणः ॥ १८८ ॥

एतत्संमूर्च्छिमगर्भोत्थानां समुदितं खलु । क्लीबानां मानमाभाव्यं, श्रुते पृथगनुक्तितः ॥ १८९ ॥

इति मानम् ॥ ३२ ॥

एष्वल्पाः खचरास्तेभ्यः, संख्यघ्नाः खचरस्त्रियः । ताभ्यः स्थलचरास्तेभ्यः, संख्यघ्नाः स्युस्तदङ्गनाः ॥ १९० ॥

ताभ्यो जलचरास्तेभ्यो, जलचर्यस्ततः क्रमात् । नपुंसकाः संख्यगुणाः, नभःस्थलाम्बुचारिणः ॥ १९१ ॥

एते च संमूर्च्छिमयुक्ता इति ज्ञेयम् ॥

इति लघ्वल्पबहुता ॥ ३३ ॥

स्तोकाः पञ्चाक्षतिर्यञ्चः, प्रतीच्यां स्युस्ततः क्रमात् । प्राच्यां याम्यामुदीच्यां च, विशेषतोऽधिकाधिकाः ॥ १९२ ॥

इति दिगपेक्षयाल्पबहुता ॥ ३४ ॥

तिर्यक्पञ्चेन्द्रियाणां स्यादन्तर्मुहूर्त्तसंमितम् । जघन्यमन्तरं ज्येष्ठं, त्वनन्तकालसम्मितम् ॥ १९३ ॥

---

१. च इति पाठः ।

एतत् वनस्पतेः कायस्थितिं भुक्त्वा गरीयसीम् । पुनः पञ्चाक्षतिर्यक्त्वं, लभमानस्य सम्भवेत् ॥ १९४ ॥
इत्यन्तरम् ॥ ३५ ॥

द्व्यक्षादितिर्यक्तनुभृत्स्वरूपमेवं मयोक्तं किल लेशमात्रम् ।
विशेषविस्ताररसार्थिना तु, सिद्धान्तवारांनिधयोऽवगाह्याः ॥ १९५ ॥

विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ॥
काव्यं यत्किल तत्र निश्चितजगत्तत्वप्रदीपोपमे, सर्गो निर्गलितार्थसार्थसुभगः षष्ठः समाप्तः सुखम् ॥ १९६ ॥

। इति श्रीलोकप्रकाशे षष्ठः सर्गः समाप्तः ।

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

अथ सप्तमः सर्गः ।

संमूर्च्छिमा गर्भजाश्च, द्विविधा मनुजा अपि । वक्ष्ये संक्षेपतस्तत्र, प्रथमं प्रथमानिह ॥ १ ॥
अन्तर्द्वीपेषु षट्पञ्चाशत्यथो कर्मभूमिषु । पञ्चाधिकासु दशसु, त्रिंशत्यकर्मभूमिषु ॥ २ ॥
पुरीषे च प्रश्रवणे, श्लेष्मसिंघाणयोरपि । वान्ते पित्ते शोणिते च, शुक्रे मृतकलेवरे ॥ ३ ॥
पूये स्त्रीपुंससंयोगे, शुक्रपुद्गलविच्युतौ । पुरनिर्द्धमने सर्वेष्वपवित्रस्थलेषु च ॥ ४ ॥
स्युर्गर्भजमनुष्याणां, सम्बन्धिष्वेषु वस्तुषु । समूर्च्छिमनराः सैकं, शतं ते क्षेत्रभेदतः ॥ ५ ॥
इति भेदाः ॥ १ ॥

स्थानमेषां द्विपाथोधिसार्धद्वीपद्वयावधि । स्थानोत्पादसमुद्घातैः लोकासंख्यांशगा अमी ॥ ६ ॥
इति स्थानम् ॥ २ ॥

आरभ्य पञ्च पर्याप्तीस्ते म्रियन्तेऽसमाप्य ताः । संभवन्ति[1] नव प्राणा, एषां चेतोबलं विना ॥ ७ ॥
नव प्राणा इति तु संग्रहण्यवचूर्णौ । इति पर्याप्तिः ॥ ३ ॥

संख्या योनिकुलानां च, नैषां गर्भजतः पृथक् । योनिस्वरूपं त्वेतेषां, विज्ञेयं विकलाक्षवत् ॥ ८ ॥
इति द्वारत्रयम् ॥ ४ । ५ । ६ ॥

जघन्योत्कर्षयोरन्तर्मुहूर्त्तं स्यात् भवस्थितिः । पृथक्त्वं च मुहूर्त्तानामेषां कायस्थितिर्मता ॥ ९ ॥
इति द्वारद्वयम् ॥ ७ । ८ ॥

आद्या त्रिदेही संस्थानं, हुण्डं देहोड्गुलस्य च । असंख्यांशमितः पूर्वे, समुद्घातास्त्रयो मताः ॥ १० ॥

---

१. प्राणा भवन्ति सप्ताष्टावेषां वाङ्मनसी विना ॥ इति पाठः ।

इति द्वारचतुष्टयम् ॥ ९–१२ ॥

एषां गतिर्विकलवत्तथैवागतिरप्यहो । किन्त्वमी वह्निवायुभ्यां, नागच्छन्ति नरत्वतः ॥ ११ ॥

अष्टचत्वारिंशदेषां, नाड्यो जन्मात्ययान्तरम् । एकसामयिकी संख्या, विज्ञेया विकलाक्षवत् ॥ १२ ॥[1]

इति गत्यागती ॥ १३–१४ ॥

अनन्तराप्तिः समये, सिद्ध्यतां गणनाऽपि च । पृथग् न लक्ष्यते ह्येषां, सा विज्ञेया बहुश्रुतात् ॥ १३ ॥

इति द्वारद्वयम् ॥ १५–१६ ॥

द्वाराणि लेश्यादीन्यष्टावेतेषां विकलाक्षवत् । उक्तानि किन्त्विन्द्रियाणि, पञ्चैतेषां श्रुतानुगैः ॥ १४ ॥

इति द्वाराष्टकम् ॥ १७–२४ ॥

मिथ्यादृशोऽमी एतेषामाद्याज्ञानद्वयं तथा । आद्ये द्वे दर्शने तस्मादुपयोगचतुष्टयम् ॥ १५ ॥

इति द्वारचतुष्टयम् ॥ २५–२८ ॥

साकारान्योपयोगाश्चाज्ञानदर्शनवत्तया । विकलाक्षवदाहारकृतः कावलिकं विना ॥ १६ ॥

इत्याहारः ॥ २९ ॥

आद्यं गुणस्थानमेषामिदं योगत्रयं पुनः । औदारिकस्तन्मिश्रश्च कार्मणश्चेति कीर्त्तितम् ॥ १७ ॥

इति द्वारद्वयम् ॥ ३०–३१ ॥

अङ्गुलप्रमितक्षेत्रप्रदेशराशिवर्तिनि । तृतीयवर्गमूलघ्ने, वर्गमूले किलादिमे ॥ १८ ॥

यावान् प्रदेशराशिः स्यात्, खण्डास्तावत्प्रदेशकाः । यावन्त एकस्यामेकप्रादेशिक्यां स्युरावल्यौ ॥ १९ ॥

तावन्तः संमूर्च्छिमा हि, मनुजा मनुजोत्तमैः । निर्दिष्टा दृष्टविस्पष्टसचराचरविष्टपैः ॥ २० ॥

इति मानम् ॥ ३२ ॥

द्वाराण्यथोक्तशेषाणि, पञ्चैतेषां मनीषिभिः । भाव्यानीह वक्ष्यमाणगर्भोद्भवमनुष्यवत् ॥ २१ ॥

इति द्वारपञ्चकम् ॥ ३३–३७ ॥

कर्माकर्मधरान्तर्द्वीपभवा गर्भजा नरास्त्रिविधाः । स्युः पञ्चदशत्रिंशत्षट्पञ्चाशद्विधाः क्रमतः ॥ २२ ॥

म्लेच्छा आर्या इति द्वेधा, मनुजाः कर्मभूमिजाः । म्लेच्छाः स्युः शकयवनमुरुंडशबरादयः ॥ २३ ॥

आर्याः पुनर्द्विधाः प्रोक्ता, ऋद्धिप्राप्तास्तथापरे । ऋद्धिप्राप्तास्तत्र षोढा, प्रज्ञप्ताः परमेश्वरैः ॥ २४ ॥

अर्हन्तः सार्वभौमाश्च, महैश्वर्यमनोहराः । बलदेवा वासुदेवाः, स्युर्विद्याधरचारणाः ॥ २५ ॥

अनृद्धयो नवविधाः, क्षेत्रजातिकुलार्यकाः । कर्मशिल्पज्ञानभाषाचारित्रदर्शनार्यकाः ॥ २६ ॥

---

१. गर्भजनराणां सदा सत्वेऽपि तदुत्पादकारणानामुच्चारादीनां च सद्भावेऽपि तथाविधतीव्रतापशैत्यादिना नैतदुत्पत्तिः कालमियन्तमिति ।

तत्र च–

क्षेत्रार्या आर्यदेशोत्थास्ते सार्धा पञ्चविंशतिः । अङ्ग बङ्गाः कलिङ्गाश्च, मगधाः कुरुकोशलाः ॥ २७ ॥
काश्यः कुशार्त्ताः पञ्चाला, विदेहा मलयास्तथा । वत्साः सुराष्ट्राः शाण्डिल्या, वराटा वरणास्तथा ॥ २८ ॥
दशार्णा जङ्गला चेद्यः, सिन्धुसौवीरका अपि । भंग्यो वृत्ताः सूरसेनाः, कुणाला लाटसंज्ञकाः ॥ २९ ॥
केकयार्धमिमे सार्धपञ्चविंशतिरीरिताः । नामानि राजधानीनां, ब्रवीम्येषु क्रमादथ ॥ ३० ॥
चम्पा तथा ताम्रलिप्ती, स्यात्काञ्चनपुरं पुरम् । राजगृहं गजपुरं, साकेतं च वराणसी ॥ ३१ ॥
शौर्यपुरं च कांपिल्यं, मिथिला भद्दिलं पुरम् । कौशाम्बी च द्वारवती, नन्दिवत्साभिधे पुरे ॥ ३२ ॥
अच्छापुरं मृत्तिकावत्यहिच्छत्राभिधा पुरी । शुक्तिमती वीतभयं, पापा माषपुरं पुरम् ॥ ३३ ॥
मथुरानगरी चैव, श्रावस्तीनगरी वरा । कोटिवर्षं श्वेताम्बिका, राजधान्यः क्रमादिमाः ॥ ३४ ॥
एष्वेवार्हच्चक्रिरामवासुदेवोद्भवो भवेत् । आर्यास्तत इमेऽन्ये च, तदभावादनार्यकाः ॥ ३५ ॥

सूत्रकृताङ्गवृत्तौ च आर्यलक्षणमेवं उक्तम्—"धम्मोत्तिअक्खराइं जेसु वि सुमिणे न सुव्वंति ॥

विज्ञेयास्तत्र जात्यार्या, ये प्रशस्तेभ्यजातयः । उग्रभोगादिकुलजाः, कुलार्यास्ते प्रकीर्त्तिताः ॥ ३६ ॥
कर्मार्याः वास्त्रिकाः सौत्रिकाद्याः कार्पासिकादयः । शिल्पार्यास्तु तुन्नकारास्तन्तुवायादयोऽपि च ॥ ३७ ॥
भाषार्या येऽर्धमागध्या, भाषन्ते भाषयाऽत्र ते । ज्ञानदर्शनचारित्रार्यास्तु ज्ञानादिभिर्युताः ॥ ३८ ॥
अत्र भूयान् विस्तरोऽस्ति, स तु प्रज्ञापनादितः । विज्ञेयो विबुधैर्नेह, प्रोच्यते विस्तृतेर्भयात् ॥ ३९ ॥
इति भेदाः ॥ १ ॥

एषां तिर्यग् नरक्षेत्रावधि जन्मात्ययादिकम् । योजनानां दशशतीमधो न परतः पुनः ॥ ४० ॥
इति स्थानम् ॥ २ ॥

एषां पर्याप्तयः सर्वाः, पर्याप्तानां प्रकीर्त्तिताः । यथासम्भवमन्येषां, प्राणाश्च निखिला अपि ॥ ४१ ॥
इति पर्याप्तयः ॥ ३ ॥

चतुर्दशयोनिलक्षाणां, एषां संमूर्च्छिमैः सह । द्वादश स्युः कुलकोट्यो, योनिर्विवृतसंवृता ॥ ४२ ॥
मिश्रा सचित्ताचित्तत्वात्, शीतोष्णत्वाच्च सा भवेत् । वंशपत्रा तथा शङ्खावर्ता कूर्मोन्नतापि च ॥ ४३ ॥
इतिद्वारत्रयम् ॥ ४ । ५ । ६ ॥

पल्योपमानां त्रितयमुत्कृष्टैषां भवस्थितिः । सा युग्मिनां परेषां तु, पूर्वकोटिः प्रकीर्त्तिता ॥ ४४ ॥
जघन्या नरगर्भस्य, स्थितिरान्तर्मुहूर्त्तिकी । उत्कृष्टाद्वादशाब्दानि, विज्ञेया मध्यमाऽपरा ॥ ४५ ॥
पित्तादिदूषितः पापी, कार्मणादिवशोऽथवा । द्वादशाब्दानि गर्भान्तस्तिष्ठेत् सिद्धनृपादिवत् ॥ ४६ ॥
चतुर्विंशतिवर्षा च, गर्भकायस्थितिर्नृणाम् । उत्कृष्टस्थितिगर्भस्य, मृत्वोत्पन्नस्य तत्र सा ॥ ४७ ॥

स्थित्वा द्वादशवर्षाणि, गर्भे कश्चिन्महाऽघवान् । विपद्योत्पद्य तत्रैव, तावत्तिष्ठत्यसौ यतः ॥ ४८ ॥

इति भवस्थितिः ॥ ७ ॥ इत्यर्थतो भगवतीशतक २ पञ्चमोद्देशके ॥

पूर्वाणां कोटयः सप्त, तथा पल्योपमत्रयम् । भाव्या गर्भजतिर्यग्वदेषां कायस्थितिर्गुरुः ॥ ४९ ॥

इति कायस्थितिः ॥ ८ ॥

संख्येयजीविनां देहाः, पञ्चासंख्येयजीविनाम् । भवेत् देहत्रयमेव, विनाऽऽहारकवैक्रिये ॥ ५० ॥

इति देहाः ॥ ९ ॥

संख्येयजीविनां नृणां, संस्थानान्यखिलान्यपि । चतुरस्रं भवेदेतदसंख्येयायुषां पुनः ॥ ५१ ॥

इति संस्थानम् ॥ १० ॥

शतानि पञ्च धनुषां, वपुः संख्येयजीविनाम् । गव्यूतत्रयमन्येषामुत्कर्षेण प्रकीर्त्तितम् ॥ ५२ ॥

जघन्यतोऽङ्गुलासंख्यभागमानमिदं भवेत् । उभयेषां तदारम्भकाल एवास्य सम्भवः ॥ ५३ ॥

संख्यायुषां वैक्रियं साधिकैकलक्षयोजनम् । उत्कर्षेण जघन्याच्चाङ्गुलसंख्यांशसंमितम् ॥ ५४ ॥

आहारकशरीरं यत्, स्यादेषां लब्धिशालिनाम् । श्रुतकेवलिनां तत्तु, मानतो हस्तसंमितम् ॥ ५५ ॥

इत्यङ्गमानम् ॥ ११ ॥

स्युः सप्तापि समुद्घाता, नृणां संख्येयजीविनाम् । असंख्येयायुषामाद्यास्त्रय एव भवन्ति ते ॥ ५६ ॥

इति समुद्घाताः ॥ १२ ॥

यान्ति सर्वे सुरेष्वेव, नरा असंख्यजीविनः । निजायुः समहीनेषु, नाधिकस्थितिषु क्वचित् ॥ ५७ ॥

ततोऽन्तर्द्वीपजातास्ते, भवनव्यन्तरावधि । यान्तीशानदिवं यावत्, हरिवर्षादिजास्तु ते ॥ ५८ ॥

सौधर्मान्तं हैमवतहैरण्यवतजा इमे । जघन्यापि यदीशानेऽधिकपल्योपमा स्थितिः ॥ ५९ ॥

सर्वसंसारिगतिषु, नराः संख्येयजीविनः । गच्छन्ति कर्मविगमादेति मुक्तिगतावपि ॥ ६० ॥

तत्र च—तीव्ररोषास्तपोमत्तास्तथा बालतपस्विनः । द्वैपायनादिवद्वैरपरा यान्त्यसुरेष्वमी ॥ ६१ ॥

जलाग्निझंपासंपातगलपाशविषाशनैः । तृट्क्षुदाद्यैर्मृतास्ते स्युर्व्यन्तराः शुभभावतः ॥ ६२ ॥

अविराद्धचारित्राणां, जघन्यादाद्यताविषः । उत्कर्षेण च सर्वार्थसिद्धः स्याद्विषयो गतेः ॥ ६३ ॥

विराद्धसंयमानां तु, भवनेशाद्यताविषौ । क्रमाज्जघन्योत्कर्षाभ्यामेवमग्रेऽपि भाव्यताम् ॥ ६४ ॥

आराद्धदेशविरतेः, सौधर्माच्युतताविषौ । विराद्धदेशविरतेः भवनज्योतिरालयौ ॥ ६५ ॥

तापसानामपि तथा, तावेव गतिगोचरौ । कांदर्पिकाणां भवनाधिपसौधर्मताविषौ ॥ ६६ ॥

चरकाणां परिव्राजां, भवनब्रह्मताविषौ । सौधर्मलान्तकौ कल्पौ, ख्यातौ किल्बिषिकाङ्गिनाम् ॥ ६७ ॥

विमानेषूत्पद्यमानापेक्षयेदं यतोऽन्यथा । सन्ति किल्बिषिका देवा, भवनाधिपतिष्वपि ॥ ६८ ॥

आजीविकाभियोगानां, भवनाच्युततावधौ । निह्नवानां च भवनेशान्त्यग्रैवेयकौ किल ॥ ६९ ॥
भव्यानामप्यभव्यानां, साधुवेषगुणस्पृशाम् । अपि मिथ्यादृशामेष, विषयस्सत्क्रियाबलात् ॥ ७० ॥
निर्ग्रंथगुणवत्त्वेऽपि, ते स्युः मिथ्यादृशो यतः । अश्रद्दधन् पदमपि, मिथ्यात्वी सूत्रभाषितम् ॥ ७१ ॥
सूत्रलक्षणं चैवमाहुः—
"सुत्तं गणहररइयं तहेव पत्तेअबुद्धरइयं च । सुअकेवलिणा रइयं अभिन्नदसपुव्विणा रइयं" ॥
[बृहत्संग्रहणी गा. १५६]
देवेषु गच्छतामेषां, स्यादुक्तो गतिगोचरः । न त्वेषां गतिरेषैवेत्याशंक्यं मतिशालिभिः ॥ ७२ ॥
कान्दर्पिकादिलक्षणं चैवम्:—
कन्दर्पः परिहासोऽस्ति, यस्य कान्दर्पिकश्च सः । कन्दर्पविकथाशंसी, तत्प्रशंसोपदेशकृत् ॥ ७३ ॥
नानाहासकलाः कुर्वन्, मुखतुर्याङ्गचेष्टितैः । अहसन् हासयंश्चान्यान् नानाजीवरुतादिभिः ॥ ७४ ॥
किल्बिषं पापमस्यास्ति, स किल्बिषिक उच्यते । मायावी ज्ञानसद्धर्माचार्यसाध्वादिनिन्दकः ॥ ७५ ॥
वर्तयेद्यस्तु नटवत्, वेषमाजीविकाकृते । बाह्योपचारचतुरः, स आजीविक उच्यते ॥ ७६ ॥
अभियोगः कार्मणादिस्तत्प्रयोक्ताऽऽभियोगिकः । द्रव्याभियोगमन्त्रादिः, स द्विधा द्रव्यभावतः ॥ ७७ ॥
तथोक्तम्—"दुविहो खलु अभियोगो दव्वे भावे य होइ नायव्वो । दव्वंमि होन्ति जोगा, विज्जामंता य भावंमि" ॥
इति भगवतीवृत्तिप्रथमशतकद्वितीयोद्देशके ॥
व्यवहारेण चारित्रवन्तोऽप्येतेऽचरित्रिणः । लभन्त इदृशीः संज्ञा, दोषैरेतैर्यथोदितैः ॥ ७८ ॥
प्रयान्ति नरकेष्वेव, नियमादर्धचक्रिणः । तथैव च गतिर्ज्ञेया, प्रत्यर्धचक्रिणामपि ॥ ७९ ॥
चक्रिणो येऽत्यक्तराज्याः, प्रयान्ति नरकेषु ते । सप्तस्वपि यथाकर्मोत्कृष्टायुष्कतया परम् ॥ ८० ॥
तथोक्तं भगवतीशतक १२ नवमोद्देशकवृत्तौ चक्रवर्त्तित्वान्तरनिरुपणाधिकारे—

"जहण्णेणं सातिरेगं सागरोवमं"ति कथम् । अपरित्यक्तसङ्गाः चक्रवर्तिनो नरकपृथिवीषूत्पद्यन्ते, तासु च यथास्वमुत्कृष्टस्थितयो भवन्ति । ततश्च नरदेवो मृतः प्रथमपृथिव्यामुत्पन्नस्तत्र चोत्कृष्टां स्थितिं सागरोपमप्रमाणमनुभूय नरदेवो जायत इत्येवं सागरोपमम् ॥ सातिरेकत्वं च नरदेवभवे चक्ररत्नोत्पत्तेरर्वाचीनकालेन दृष्टव्यमिति ॥

श्रीहरिभद्रसूरिकृतदशवैकालिकवृत्तौ हैमवीरचरित्रे नवपदप्रकरणवृत्तौ च चक्रिणः सप्तम्यां नरकपृथिव्यामेवात्यक्तराज्या यान्ति इत्युक्तम् ॥[1]

त्यक्तराज्यास्तु ये सार्वभौमास्ते यान्ति ताविषम् । मुक्तिं वाऽथ सीरिणोऽपि, ध्रुवं स्वर्मुक्तिगामिनः ॥ ८१ ॥
इति गतिः ॥ १३ ॥
असंख्यायुनृतिरश्चः, सप्तमक्षितिनारकान् । वाय्वग्नी च विना सर्वेऽप्युत्पद्यन्ते नृजन्मसु ॥ ८२ ॥

---

१. कोणिकाख्यानकापेक्षं हि तत्, तथा तस्य तथाविधामवस्थामवलोक्य जिनेनोक्तं, ततो न नियामकं वच एतत् ।

अर्हन्तो वासुदेवाश्च, बलदेवाश्च चक्रिणः । सुरनैरयिकेभ्यः स्युर्नुतिर्यग्भ्यो न कर्हिचित् ॥ ८३ ॥
तत्रापि–प्रथमादेव नरकात्, जायन्ते चक्रवर्तिनः । द्वाभ्यामेव हरिबलास्त्रिभ्यः एव च तीर्थपाः ॥ ८४ ॥
चतुर्विधाः सुराश्च्युत्वा, भवन्ति बलचक्रिणः । जिना वैमानिका एव, हरयोऽप्यननुत्तराः ॥ ८५ ॥
एवं मनुष्यरत्नानि, यानि स्युः पञ्च चक्रिणाम् । तान्यागत्या विभाव्यानि, सामान्येन मनुष्यवत् ॥ ८६ ॥
वैमानिकेभ्यश्च यदि, भवन्ति तानि तर्हि च । अनुत्तरसुरान् मुक्त्वाऽन्येभ्यः स्युर्वासुदेववत् ॥ ८७ ॥
मुहूर्त्ता द्वादशोत्कृष्टं, समयो लघु चान्तरम् । तिर्यग्वदेकसमयसंख्या संमूर्च्छिमैः सह ॥ ८८ ॥
उक्तं च–नानाङ्गिनामपर्याप्तनृत्वेनोत्पत्तिरीरिता । उत्कर्षतोऽविच्छेदेन, पल्यासंख्यलवावधि ॥ ८९ ॥
अपर्याप्तनरत्वेनोत्पत्तिरेकस्य चाङ्गिनः । उत्कर्षतो जघन्याच्चान्तर्मुहूर्त्तं निरन्तरम् ॥ ९० ॥
इत्यर्थतः पञ्चसंग्रहे ॥ इत्यागतिः ॥ १४ ॥
सम्यक्त्वं देशविरतिं, चारित्रं मुक्तिमप्यमी । लभन्तेऽनन्तरभवे, लब्ध्वा नरभवादिकम् ॥ ९१ ॥
अनन्तरभवे चैते, न लभन्ते कदाचन । अर्हत्त्वं चक्रवर्तित्वं, बलत्वं वासुदेवताम् ॥ ९२ ॥
लब्धिष्वष्टाविंशतौ या, येषामिह नृजन्मनि । संभवन्ति प्रसङ्गेन, दर्श्यन्ते ता यथागमम् ॥ ९३ ॥
कफविप्रुण्मलामर्शसर्वौषधिमहर्द्धयः । संभिन्नश्रोतोलब्धिश्च, विपुलर्जुधियावपि ॥ ९४ ॥
चारणाशीविषावधिसार्वज्ञ्यगणधारिताः । चक्रितार्हत्त्वबलताविष्णुत्वं पूर्वधारिता ॥ ९५ ॥
क्षीरमध्वाज्याश्रवाश्च, बीजकोष्ठधियौ तथा । पदानुसारिता तेजोलेश्याऽऽहारकवैक्रिये ॥ ९६ ॥
शीतलेश्याऽक्षीणमहानसी पुलाकसंज्ञिता । इत्यष्टाविंशतिर्भव्यपुंसां सल्लब्धयो मताः ॥ ९७ ॥
चक्रचर्हद्विष्णुबलसंभिन्नश्रोतस्त्वपूर्विताः । गणभृत्वं चारणत्वं, पुलाकाहारके अपि ॥ ९८ ॥
विना दशामूः स्त्रीष्वन्याः, स्युरष्टादशलब्धयः । आस्वार्हन्त्यं कदाचिद्यत्तत्वाश्चर्यतयोदितम् ॥ ९९ ॥
दशैताः केवलित्वं च, विपुलर्जुधियावपि । अभव्यपुंसां नैवैताः, संभवन्ति त्रयोदश ॥ १०० ॥
अभव्ययोषितामेताः, क्षीराद्याश्रवसंयुताः । न स्युश्चर्तुदशैतासां, ततो ज्ञेयाश्चर्तुदश ॥ १०१ ॥
इत्यनन्तराप्तिः ॥ १५ ॥
अनन्तरभवे चैते, प्राप्य मानुष्यकादिकम् । सिद्ध्यन्त्येकत्रसमये, विंशतिर्नाधिकाः पुनः ॥ १०२ ॥
तत्रापि पुंमनुष्येभ्यो, जाताः सिद्ध्यन्ति ते दश । नारीभ्योऽनन्तरं जाताः, क्षणे ह्येकत्र विंशतिः ॥ १०३ ॥
इति समयेसिद्धिः ॥ १६ ॥
लेश्याहारदिशः सर्वा, एषां संहननान्यपि । सर्वे कषायाः स्युः संज्ञाश्चेन्द्रियाण्यखिलान्यपि ॥ १०४ ॥
लेश्याश्चतस्रः कृष्णाद्या, भवन्त्यसंख्यजीविनाम् । एषामाद्यं संहननमेकमेव प्रकीर्त्तितम् ॥ १०५ ॥

इति द्वारषट्कम् ॥ १७–२२ ॥

सद्भावाद्व्यक्तसंज्ञानामेते संज्ञितया मताः । दीर्घकालिक्यादिकानामपि सत्वान्तथैव ते ॥ १०६ ॥

इति संज्ञिता ॥ २३ ॥

एतेषु भवतः पुंस्त्रीवेदावसंख्यजीविषु । पुंभिस्तुल्याः स्त्रियश्चैषु, स्युर्युग्मित्वेन सर्वदा ॥ १०७ ॥

पुंस्त्रीक्लीबास्त्रिधाऽन्ये स्युस्तत्र पुंभ्यः स्त्रियो मताः । सप्तविंशत्यतिरिक्ताः, सप्तविंशतिसंगुणाः ॥ १०८ ॥

गर्भजाः क्लीबास्तु पुमाकारभाजः पुंसु स्त्र्याकारभाजस्तु स्त्रीषु गण्यन्ते इति वृद्धवादः ।

इति वेदाः ॥ २४ ॥

तिस्रो दृशो ज्ञानाज्ञानदर्शनान्यखिलान्यपि । द्वादशेत्युपयोगाः स्युस्त्रिधौजः प्रमुखाहृतिः ॥ १०९ ॥

आहारस्य कावलिकस्यान्तरं स्यात्स्वभावजम् । ज्येष्ठं दिनत्रयं प्राग्वदनाहारकतापि च ॥ ११० ॥

द्विक्षणा विग्रहगतौ, समुद्घाते तु सप्तमे । भवत्यनाहारकता, तृतीयादिक्षणत्रये ॥ १११ ॥

अयोगित्वे पुनः सा स्यादसंख्यसमयात्मिका । गुणस्थानानि निखिलान्येषु योगास्तथाखिलाः ॥ ११२ ॥

इति द्वारसप्तकम् ॥ २५–३१ ॥

गर्भजानां मनुष्याणामथ मानं निरूप्यते । एकोनत्रिंशताऽङ्कैस्ते, मिता जघन्यतोऽपि हि ॥ ११३ ॥

ते च अमी । छ ति ति ख पण नव तिग चउ पण तिग नव पंच सग ति तिग चउरो । छ दु चउ इग पण दु छ इग अड दु दु नव सग जहन्न नरा ॥ इति पर्यन्तवर्तिनोऽङ्कस्थानादारभ्योऽङ्कस्थानसंग्रहः ॥

॥ ७९२२८१६२५१४२६४३३७५९३५४३९५०३३६ ॥

एकं, दस, सयं, सहस्सं, दससहस्सं, लक्खं, दसलक्खं, कोडिं, दसकोडिं, कोडिसयं, कोडिसहस्सं, दसकोडिसहस्सं, कोडिलक्खं, दसकोडिलक्खं, कोडाकोडि, दसकोडाकोडि, कोडाकोडिसयं, कोडाकोडिसहस्सं, दसकोडाकोडिसहस्सं, कोडाकोडिलक्खं, दसकोडाकोडीलक्खं, कोडाकोडिकोडि, दसकोडाकोडिकोडी, कोडाकोडिकोडिसयं, कोडाकोडिकोडिसहस्सं, दसकोडाकोडिकोडिसहस्सं, कोडाकोडिकोडिलक्खं, दसकोडाकोडिकोडिलक्खं, कोडाकोडिकोडिकोडि इत्याद्यङ्कवाचनप्रकारः ॥

एतेषामेवैकोनत्रिंशतोऽङ्कस्थानानां पूर्वपुरुषैः पूर्वपूर्वाङ्गैः परिसंख्यानं कृतम् । तदुपदर्श्यते । तत्र चतुरशीतिर्लक्षाणि पूर्वाङ्गम् । चतुरशीतिलक्षाः चतुरशीतिलक्षैः गुण्यन्ते ततः पूर्वं भवति । तस्य परिमाणं सप्ततिः कोटिलक्षाणि षट्पञ्चाशत् कोटिसहस्राणि (७०५६०००००००००) ।

एतेन पूर्वोक्ताङ्कराशेः भागो ह्रियते तत इदमागतम्—

“मणुआणं जहन्नपदे, एगारस पूव्वकोडिकोडिओ । बावीसकोडिलक्खा, कोडिसहस्सा च चुलसीइ ॥ अट्ठेव य कोडिसया, पुव्वाण दसुत्तरा तओ हुंति । एक्कासीई लक्खा, पंचाणउई सहस्सा य ॥

छप्पन्ना तिन्नि सया, पुव्वाणं पुव्ववणिआ अण्णे । एत्तो पुव्वंगाइं, इमाइं अहियाइं अण्णाइं ॥
लख्खाइं एगवीसं, पुव्वंगाण सयरीसहस्साइं । छच्चेवेगूणट्ठा, पुव्वंगाणं सया होंति ॥
तेसीइ सयसहस्सा, पण्णासं खलु भवे सहस्सा य । तिन्निसया छत्तीसा, एवइया अविगला मणुआ" ॥
उत्कर्षेण समुदिता, गर्भसंमूर्च्छजा नराः । असंख्येयकालचक्रसमयैः प्रमिता मताः ॥
मनुष्या हि उत्कृष्टपदेऽपि श्रेण्यसंख्येयभागगतप्रदेशराशिप्रमाणा लभ्यन्ते इति तु प्रज्ञापनावृत्तौ ॥
इति मानम् ॥ ३२ ॥

गर्भजाः पुरुषाः स्तोकास्ततः संख्यगुणाः स्त्रियः । ततोऽसंख्यगुणाः षण्ढनराः संमूर्च्छिमैर्युताः ॥ ११४ ॥
इति लघ्व्यल्पबहुता ॥ ३३ ॥

दक्षिणोत्तरयोः स्तोकाः, स्युर्मनुष्या मिथः समाः । प्राच्यां ततः संख्यगुणाः, प्रतीच्यां च ततोऽधिकाः ॥ ११५ ॥
भरतैवरतादीनि, क्षेत्राण्यल्पान्यपागुदग् । ततः संख्यगुणानि स्युः, पूर्वपश्चिमयोर्दिशोः ॥ ११६ ॥
किन्त्वधोलौकिकग्रामेष्वनल्पाःस्युर्नरा यतः । ततः प्रतीच्यामधिका, मनुष्याः प्राच्यपेक्षया ॥ ११७ ॥
इति दिगपेक्षयाऽल्पबहुता ॥ ३४ ॥

अर्न्मुहूर्त्तमल्पिष्टं, मनुष्याणां महान्तरम् । कालोऽनन्तः स चोत्कृष्टा, कायस्थितिर्वनस्पतेः ॥ ११८ ॥
चक्रित्वे चान्तरं प्रोक्तं, साधिकाब्धिमितं लघु । ज्येष्ठं च पुद्गलपरावर्त्तार्धं पञ्चमाङ्गके ॥ ११९ ॥
इत्यन्तरम् ॥ ३५ ॥

नृणामिति व्यतिकरा विवृता मयैवम् । सम्यग् विविच्य समयात् स्वगुरुप्रसत्या ।
पूर्णापणादिव कणाः कलमौक्तिकानाम् । दीपत्विषाऽऽप्तवणिजा मणिजातिवेत्रा ॥ १२० ॥
विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रांतिषद्राजश्रीतनयोऽतनिष्ट विनयः श्री तेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्वप्रदीपोपमे । सर्गो निर्गलितार्थसार्थसुभगः पूर्णः सुखं सप्तमः ॥ १२१ ॥

॥ इति श्रीलोकप्रकाशे मनुष्याधिकाररुपः सप्तमः सर्गः समाप्तः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

अथाष्टमः सर्गः ।

सुराश्चतुर्धा भवनव्यन्तरज्योतिषा अपि । वैमानिका इति प्रोक्तास्तान्प्रभेदैरथ ब्रुवे ॥ १ ॥
दशधा भवनेशाश्चासुरनागसुपर्णकाः । विद्युदग्निद्वीपवार्धिदिग्वायुस्तनिता इति ॥ २ ॥
एते च सर्वे कुमारोपपदा इति ज्ञेयम् ॥
परमाधार्मिकाः पञ्चदशधाः परिकीर्त्तिताः । यथार्थैर्नामभिः ख्याता, अम्बप्रभृतयश्च ते ॥ ३ ॥

अम्बाम्बरीषशबलश्यामरौद्रोपरुद्रकाः । असिपत्रधनुःकुम्भा, महाकालश्च कालकः ॥ ४ ॥
वैतरणी वालुकश्च, महाघोषः खरस्वरः । एतेऽसुरनिकायान्तर्गताः पञ्चदशोदिताः ॥ ५ ॥
नीत्वोर्ध्वं पातयत्याद्यो, नारकान् खण्डशः परः । करोति भ्राष्ट्रपाकार्हान्, तृतीयोऽन्त्रह्रदादिभित् ॥ ६ ॥
शातनादिकरस्तेषां, तुरीयः पञ्चमः पुनः । कुन्तादौ प्रोतकस्तेषां षष्ठोऽङ्गेपाङ्गभङ्गकृत् ॥ ७ ॥
अस्याकारपत्रयुक्तं, वनं सृजति सप्तमः । धनुर्मुक्तार्धचन्द्रादिबाणैर्विध्यति चाष्टमः ॥ ८ ॥
नवमः पाककृत्तेषां, कुम्भादौ दशमः पुनः । खण्डयित्वाऽसकृत् श्लक्ष्णमांसखण्डानि क्वादति ॥ ९ ॥
तान् कुण्डादौ पचत्येकादशश्च द्वादशः सृजेत् । नदीं वैतरणीं तप्तरक्तपूयादिपूरिताम् ॥ १० ॥
कदम्बपुष्पाद्याकारवालुकासु पचेत्परः । नश्यतस्तान् महाशब्दो, निरुणद्धि चतुर्दशः ॥ ११ ॥
आरोप्य शाल्मलीवृक्षं, वज्रकण्टकभीषणम् । खरस्वरः पञ्चदशः, समाकर्षति नारकान् ॥ १२ ॥
परमाधार्मिकास्ते च, सञ्चितानन्तपातकाः । मृत्वाऽण्डगोलिकतयोत्पद्यन्तेऽत्यन्तदुःखिताः ॥ १३ ॥
यत्र सिन्धुः प्रविशति, नदी लवणवारिधिम् । योजनैर्दक्षिणे याम्यायां, पञ्चपञ्चाशता ततः ॥ १४ ॥
अस्ति स्थलं वेदिकान्तः, प्रतिसन्तापदायकम् । प्रमाणतो योजनानि, सार्धानि द्वादशैव तत् ॥ १५ ॥
योजनानि त्रीणि सार्धान्युद्वेधोऽत्र महोदधेः । सप्तचत्वारिंशदत्र, गुहाः सन्त्यतितामसाः ॥ १६ ॥
आद्यसंहननास्तासु, वसन्त्युरुपराक्रमाः । नरा जलचरा मद्यमांसस्त्रीभोगलोलुपाः ॥ १७ ॥
दुर्वर्णाः कठिनस्पर्शाः, भीषणा घोरदृष्टयः । अध्यर्धद्वादशकरदेहाः संख्येयजीविताः ॥ १८ ॥
तत्र रत्नद्वीपमस्ति, स्थलात् संतापदायकात् । वारिधौ योजनैरेकत्रिंशता भूरिमानवम् ॥ १९ ॥
घरट्टान् वाज्रिकांस्तेऽथ, मनुष्यास्तन्निवासिनः । लिम्पन्ति मद्यैर्मांसैश्च, तेषु तानि क्षिपन्ति च ॥ २० ॥
मद्यमांसालाबुपात्रैः, प्रपूर्य वहनानि ते । गच्छन्ति जलधौ मद्यमांसैस्तान् लोभयन्ति च ॥ २१ ॥
मद्यमांसास्वादलुब्धास्ततस्तदनुपातिनः । निपतन्ति घरट्टेषु, क्रमात्ते जलमानुषाः ॥ २२ ॥
मांसानि वह्निपक्वानि, जीर्णमद्यानि ते नराः । यावद्दिनानि द्वित्राणि, भुञ्जानाः सुखमासते ॥ २३ ॥
तावद् भटाः सुसन्नद्धाः, रत्नद्वीपनिवासिनः । संयोजितान् घरट्टांस्तान्, वेष्टयन्ति समन्ततः ॥ २४ ॥
वर्षं यावद्वाहयन्ति, घरट्टानतिदुःसहान् । तथापि तेषामस्थीनि, न स्फुटन्ति मनागपि ॥ २५ ॥
ते दारुणानि दुःखानि, सहमाना दुराशयाः । प्रपीड्यमाना वर्षेण, म्रियन्तेऽत्यन्तदुर्भराः ॥ २६ ॥
अथाण्डगोलकांस्तेषां, जनास्ते रत्नकांक्षिणः । चमरीपुच्छवालाग्रैर्गुम्फित्वा कर्णयोर्द्वयोः ॥ २७ ॥
निबद्ध्य प्रविशन्त्यब्धौ, तानन्ये जलचारिणः । कुलीरतन्तुमीनाद्याः, प्रभवन्ति न बाधितुम् ॥ २८ ॥
इति महानिशीथचतुर्थाध्ययनेऽर्थतः ॥
पिशाचा भूतयक्षाश्च, राक्षसाः किन्नरा अपि । किंपुरुषा महोरगा, गन्धर्वा व्यन्तरा इमे ॥ २९ ॥

पिशाचास्तत्र सहजसुरुपाः सौम्यदर्शनाः । रत्नाभरणवद्ग्रीवाहस्ताः षोडशधा मताः ॥ ३० ॥
कुष्माण्डाः पटका जोषाः, अह्निकाः कालका अपि । चोक्षाऽचोक्षमहाकालास्तथा वनपिशाचकाः ॥ ३१ ॥
तूष्णीकास्तालमुखरपिशाचा देहसंज्ञकाः । विदेहाश्च महादेहास्तथाऽधस्तारका इति ॥ ३२ ॥
सुरुपप्रतिरुपातिरूपा भूतोत्तमा इति । स्कन्दिकाक्षा महावेगा, महास्कन्दिकसंज्ञकाः ॥ ३३ ॥
आकाशकाः प्रतिच्छन्ना, भूता नवविधा अमी । सौम्याननाः सुरुपाश्च, नानाभक्तिविलेपनाः ॥ ३४ ॥
मानोन्मानप्रमाणोपपन्नदेहा विशेषतः । रक्तपाणिपादतलतालुजिह्वौष्ठपाणिजाः ॥ ३५ ॥
किरीटधारिणो नानारत्नात्मकविभूषणाः । यक्षास्त्रयोदशविधा, गम्भीराः प्रियदर्शनाः ॥ ३६ ॥
पूर्णमाणिश्वेतहरिसुमनोव्यतिपाकतः । भद्राः स्युः सर्वतोभद्राः, सुभद्रा अष्टमाः स्मृताः ॥ ३७ ॥
यक्षोत्तमा रूपयक्षा, धनाहारा धनाधिपाः । मनुष्ययक्षा इत्येवं, सर्वेऽप्येते त्रयोदश ॥ ३८ ॥
करालरक्तलम्बौष्ठास्तपनीयविभूषणाः । राक्षसाः सप्तधा प्रोक्तास्तेऽमी भीषणदर्शनाः ॥ ३९ ॥
विघ्ना भीममहाभीमास्तथा राक्षसराक्षसाः । परे विनायका ब्रह्मराक्षसा जलराक्षसाः ॥ ४० ॥
मुखेष्वधिकरुपाढ्याः, किन्नरा दीप्रमौलयः । दशधा किन्नरा रुपशालिनो हृदयङ्गमाः ॥ ४१ ॥
रतिप्रिया रतिश्रेष्ठाः, किंपुरुषा मनोरमाः । अनिन्दिताः किंपुरुषोत्तमाश्च किन्नरोत्तमाः ॥ ४२ ॥
मुखोरुबाहूद्यदूपाश्चित्रस्रगनुलेपनाः । दश किंपुरुषास्ते सत्पुरुषाः पुरुषोत्तमाः ॥ ४३ ॥
यशस्वन्तो महादेवा, मरुन्मेरुप्रभा इति । महातिपुरुषाः किंच, पुरुषाः पुरुसर्षभाः ॥ ४४ ॥
महोरगा दशविधा, भुजगा भोगशालिनः । महाकाया अतिकाया, भास्वन्तः स्कन्धशालिनः ॥ ४५ ॥
महेश्वक्षा मेरुकान्ता, महावेगा मनोरमाः । सर्वेऽप्यमी महावेगा, महाङ्गश्चित्रभूषणाः ॥ ४६ ॥
गन्धर्वा द्वादशविधाः, सुस्वराः प्रियदर्शनाः । सुरूपा मौलिमुकुटधरा हारविभूषणाः ॥ ४७ ॥
हाहाहूहूतुम्बरवो, नारदा ऋषिवादिकाः । भूतवादिककादम्बा, महाकादम्बरैवताः ॥ ४८ ॥
विश्वावसुगीतरतिसद्गीतयशसस्तथा । सप्ताशीतिरिमे सर्वे, तृतीयाङ्गेऽष्ट ते त्वमी ॥ ४९ ॥
"अणपन्नी पणपन्नी, इसिवाई भूअवाइए चेव । कंदी य महाकंदी, कोहंडे चेव पयए य" ॥
तथा—अन्नपानवस्त्रवेश्मशय्यापुष्पफलोभये । येऽल्पानल्पत्वसरसविरसत्वादिकारकाः ॥ ५० ॥
अन्नादिजृम्भकस्तेऽष्टौ, स्युर्विद्याजृम्भकाः परे । ये त्वन्नाद्यविभागेन, जृम्भन्तेऽव्यक्तजृम्भकाः ॥ ५१ ॥
विचित्रचित्रयमकवैताढ्यकाञ्चनादिषु । वसन्ति शैलेषु दशाप्यमी पल्योपमायुषः ॥ ५२ ॥
नित्यं प्रमुदिताः क्रीडापराः सुरतसेविनः । स्वच्छन्दचारित्वादेते, जृम्भन्त इति जृम्भकाः ॥ ५३ ॥
कुद्धानेतांश्च यः पश्येत्, सोऽयशोऽनर्थमाप्नुयात् । तुष्टान् पश्येन् यशोविद्यां, विन्ते वज्रमुनीन्द्रवत् ॥ ५४ ॥
शापानुग्रहशीलत्वमेषां शक्तिश्च तादृशी । अयमर्थः पञ्चमाङ्गे, शते प्रोक्तश्चतुर्दशे ॥ ५५ ॥

शतं पञ्चोत्तरं भेदप्रभेदैर्व्यन्तरामराः । भवन्ति नानाक्रीडाभिः, क्रीडन्तः काननादिषु ॥ ५६ ॥
ज्योतिष्का पञ्च चन्द्रार्कग्रहनक्षत्रतारकाः । द्विधा स्थिराश्चराश्चेति, दशभेदा भवन्ति ते ॥ ५७ ॥
वैमानिका द्विधा कल्पातीतकल्पोपपन्नकाः । कल्पोत्पन्ना द्वादशधा, ते त्वमी देवलोकजाः ॥ ५८ ॥
सौधर्मेशानसनत्कुमारमाहेन्द्रब्रह्मलांतकजाः । शुक्रसहस्रारानतप्राणतजा आरणाच्युतजाः ॥ ५९ ॥
आद्यकल्पद्वयाधःस्थास्तृतीयाधस्तना अपि । लान्तकत्रिदिवाधःस्थास्त्रिधा किल्बिषिका अमी ॥ ६० ॥
कल्पातीता द्विधा ग्रैवेयकानुत्तरसम्भवाः । स्वामिसेवकभावादिकल्पेन रहिता इमे ॥ ६१ ॥
अधस्तनाधस्तनं च, स्यादधस्तनमध्यमम् । अधस्तनोपरितनं, मध्यमाधस्तनं ततः ॥ ६२ ॥
भवेन्मध्यममध्यं च, मध्योपरितनं ततः । उपरिस्थाधस्तनं चोपरिस्थमध्यमं पुनः ॥ ६३ ॥
उपरिस्थोपरिपतनं, तज्जा ग्रैवेयकाः सुराः । विजयादिविमानोत्थाः, पञ्चधाऽनुत्तरामराः ॥ ६४ ॥
सारस्वतादित्यवह्निवरुणा गर्दतोयकाः । तुषिताऽव्याबाधाग्नेयरिष्ठा लोकान्तिका अमी ॥ ६५ ॥
पर्याप्तापरभेदेन, सर्वेऽपि द्विविधा अमी । जाताः षट्पञ्चाशमेवं, सुरभेदाः शतत्रयम् ॥ ६६ ॥
पञ्चमाङ्गे तु–द्रव्यदेवा नरदेवा, धर्मदेवास्तथा परे । देवाधिदेवा ये भावदेवास्ते पञ्चमा मताः ॥ ६७ ॥
तत्र च– पञ्चेन्द्रियो नरस्तिर्यक् सम्पादितशुभायतिः । उत्पत्स्यते यो देवत्वे, द्रव्यदेवः स उच्यते ॥ ६८ ॥
नरदेवाः सार्वभौमा, धर्मदेवास्तु साधवः । देवाधिदेवा अर्हन्तो, भावदेवाः सुरा इमे ॥ ६९ ॥
इह भावदेवैरधिकारः ॥ इति भेदाः ॥ १ ॥
त्रैलोक्येऽपि स्थानमेषां, क्षेत्रलोके प्रवक्ष्यते । स्थानोत्पादसमुद्घातैर्लोकासंख्यांशगा अमी ॥ ७० ॥
इति स्थानम् ॥ २ ॥
पर्याप्तयः षडप्येषां, पञ्चाप्यैक्यविवक्षया । वाक्चेतसोर्दश प्राणा, एतेषां परिकीर्त्तिताः ॥ ७१ ॥
इति पर्याप्तिः ॥ ३ ॥
चतस्रो योनिलक्षाः स्युर्लक्षाश्च कुलकोटिजाः । द्वादशैषामचित्ता स्याद्योनिः शीतोष्णसंवृत्ता ॥ ७२ ॥
इति द्वारत्रयम् ॥ ४ । ५ । ६ ॥
पयोधयस्त्रयस्त्रिंशदुत्कर्षेण भवस्थितिः । सहस्राणि दशाब्दानां स्यादेषां सा जघन्यतः ॥ ७३ ॥
इति भवस्थितिः ॥ ७ ॥ कायस्थितिस्त्वेषां भवस्थितिरेव ॥ ८ ॥
देहास्त्रयस्तैजसं च, कार्मणं वैक्रियं तथा । संस्थानं चतुरस्रं स्याद्रम्यं पुण्यानुसारतः ॥ ७४ ॥
इति द्वारद्वयम् ॥ ९ । १० ॥
उत्कर्षतः सप्तहस्ता, वपुर्जघन्यतः पुनः । अङ्गुलासंख्याभागः स्यादादौ स्वाभाविकं ह्यदः ॥ ७५ ॥
तत्कृत्रिमं वैक्रियं साधिकैकलक्षयोजनम् । ज्येष्ठमङ्गुलसंख्यांशमानमादौ च तल्लघु ॥ ७६ ॥

इत्यङ्गमानम् ॥ ११ ॥

आद्याः पञ्च समुद्घाताः, पञ्चस्त्वेतेषु यान्त्यमी ॥ पर्याप्तगर्भजनरतिर्यक्षु संख्यजीविषु ॥ ७७ ॥
पर्याप्तबादरक्ष्माम्बुप्रत्येकक्षितिजेषु च । गर्भजा मनुजाः पञ्चेन्द्रियास्तिर्यञ्च एव च ॥ ७८ ॥
संमूर्च्छिमा गर्भजाश्चागच्छन्त्यमृतभोजिषु । विशेषस्त्वत्रोदितः प्राक्, क्षेत्रलोकेऽपि वक्ष्यते ॥ ७९ ॥
मुहूर्तानि द्वादशैषामुत्पत्तिच्यवनान्तरम् । सामान्यतः स्यादुत्कृष्टं, जघन्यं समयावधि ॥ ८० ॥
उत्पद्यन्ते च्यवन्तेऽमी, एकस्मिन् समये पुनः । एको द्वित्राश्च संख्येया, असंख्येयाश्च कर्हिचित् ॥ ८१ ॥
इति द्वास्त्रयम् ॥ १२ ॥ ॥ १३ ॥ ॥ १४ ॥

सम्यक्त्वं देशविरतिं, चारित्रं मुक्तिमप्यमी । लभन्ते लघुकर्माणो, विपद्यानन्तरे भवे ॥ ८२ ॥
इत्यनन्तरप्तिः ॥ १५ ॥

सिद्ध्यन्त्यनन्तरभवे, एकस्मिन् समये त्वमी । उत्कर्षतः साष्टशतं, विशेषस्त्वेष तत्र च ॥ ८३ ॥
भवनेषा व्यन्तराश्च, सर्वे दशदशैव हि । तद्देव्यः पञ्चपञ्चैव, दश ज्योतिष्कनिर्जराः ॥ ८४ ॥
ज्योतिष्कदेव्यश्चैकस्मिन्, क्षणे सिद्ध्यन्ति विंशतिः । वैमानिकाः साष्टशतं, तद्देव्यो विंशतिः पुनः ॥ ८५ ॥
इति समये सिद्धिः ॥ १६ ॥

लेश्याहारदिशां षट्कं, न संहननसम्भवः । कषायसंज्ञेन्द्रियाणि, सर्वाण्येषां भवन्ति च ॥ ८६ ॥
इति द्वारषट्कम् ॥ १७ – २२ ॥

सर्वेऽप्येते संज्ञिनः स्युः, पुंस्त्रीवेदयुजः परम् । देव्यः सुरेभ्यो द्वात्रिंशद्गुणा द्वात्रिंशताऽधिकाः ॥ ८७ ॥
इति द्वारद्वयम् ॥ २३–२४ ॥

एषां स्युर्दृष्टयः तिस्त्र, आद्यं ज्ञानत्रयं भवेत् । सम्यग्दृशां परेषां तु, स्यादज्ञानत्रयं ध्रुवम् ॥ ८८ ॥
इति द्वारद्वयम् ॥ २५–२६ ॥

दर्शनत्रयमाद्यं स्यादेषां सम्यक्त्वशालिनाम् । दर्शनद्वयमन्येषामुपयोगो द्विधा ततः ॥ ८९ ॥
उपयोग षडेतेषां, ज्ञानदर्शनयोस्त्रयम् । सम्यग्दृशां परेषां तु, त्र्यज्ञानी द्वे च दर्शने ॥ ९० ॥
इति द्वारद्वयम् ॥ २७–२८ ॥

एतेषामोजआहारो, लोमाहारोऽपि सम्भवेत् । न स्यात्कावलिकः स्यात्तु, मनोभक्षणलक्षणः ॥ ९१ ॥
अन्तरं पुनरेतस्य, चतुर्थभक्तसम्मितम् । जघन्यमन्यत्त्वब्दानां, त्रयस्त्रिंशत्सहस्रकाः ॥ ९२ ॥
इत्याहारः ॥ २९ ॥

गुणस्थानानि चत्वारि, योगाश्चैकादशोदिताः । औदारिकाहारकाख्यतन्मिश्रांश्च विनाऽखिलाः ॥ ९३ ॥
इति द्वारद्वयम् ॥ ३०–३१ ॥

प्रतरासंख्यभागस्थासंख्येयश्रेणिवर्तिभिः । नभःप्रदेशैः प्रमिताः, प्रोक्ताः सामान्यतः सुराः ॥ ९४ ॥

क्षेत्रपल्योपमासंख्यभागस्थाभ्रांशसंमिताः । देवा अनुत्तरोत्पन्नाः, संख्येयास्तत्र पञ्चमे ॥ ९५ ॥
बृहत्तरक्षेत्रपल्यासंख्यांशाभ्रांशसंमिताः । भवन्त्यथोपरितनग्रैवेयकत्रिकामराः ॥ ९६ ॥
मध्यमेऽधस्तनेऽप्येवं, त्रिके कल्पेऽच्युतेऽपि च । आरणे प्राणते चैवानतेऽपीयन्त एव ते ॥ ९७ ॥
किन्तु पल्यासंख्यभागो, बृहत्तरो यथोत्तरम् । एकमानमितेष्वेवं, स्यात् परेष्वपि भावना ॥ ९८ ॥
सहस्रारमहाशुक्रलांतकब्रह्मवासिनः । माहेन्द्रसनत्कुमारदेवाः प्रत्येकमीरिताः ॥ ९९ ॥
घनीकृतस्य लोकस्य, श्रेण्यसंख्यांशवर्त्तिभिः । नभःप्रदेशैः प्रमिता, विशेषोऽत्रापि पूर्ववत् ॥ १०० ॥
अङ्गुलप्रमितक्षेत्रप्रदेशराशिसंगते । तृतीयवर्गमूलघ्ने, द्वितीयवर्गमूलके ॥ १०१ ॥
यावान् प्रदेशराशिः स्यादेकप्रादेशिकीष्वथ । श्रेणीषु तावन्मानासु, लोकस्यास्य घनात्मकः ॥ १०२ ॥
नभःप्रदेशा यावन्तस्तावानीशाननाकगः । देवदेवीसमुदायो, निर्दिष्टः श्रुतपारगैः ॥ १०३ ॥
त्रयस्त्रिंशत्तमोंऽशोऽस्य, किञ्चिदूनश्च यो भवेत् । ईशानदेवास्तावन्तः, केवलाः कथिताः श्रुते ॥ १०४ ॥
एवं च–सौधर्मभवनाधीशव्यन्तरज्योतिषामपि । भाव्या स्वस्वसमुदायत्रयस्त्रिंशांशमानता ॥ १०५ ॥
केवलं देवदेवीसमुदाय एव वक्ष्यते –
ईशानतश्च सौधर्मे, स्यात् संख्येयगुणाधिकः । देवदेवीसमुदायो, भवनेशानथ ब्रुवे ॥ १०६ ॥
अङ्गुलप्रमितक्षेत्रप्रदेशराशिवर्तिनि । द्वितीयवर्गमूलघ्ने, वर्गमूले किलादिमे ॥ १०७ ॥
यावान् प्रदेशराशिः स्यात्तावन्मानासु पङ्क्तिषु । घनीकृतस्य लोकस्याथैकप्रादेशिकीषु वै ॥ १०८ ॥
नभःप्रदेशा यावन्तस्तावान् पुरुषपुङ्गवैः । देवदेवीसमुदायः, ख्यातो भवनवासिनाम् ॥ १०९ ॥
यावन्ति संख्ययोजनकोटीमानानि दैर्घ्यतः । सूचिरुपाणि खण्डानि, स्युरेकप्रतरे किल ॥ ११० ॥
व्यन्तराणां देवदेवीसमुदायो भवेदियान् । ज्योतिष्कदेवदेवीनां, प्रमाणमथ कीर्त्यते ॥ १११ ॥
षट्पञ्चाशांगुलशतद्वयमानं हि दैर्घ्यतः । यावन्त एकप्रतरे, सूचिरूपाः स्युरंशकाः ॥ ११२ ॥
ज्योतिष्कदेवदेवीनां, तावान् समुदयो भवेत् । उक्तं प्रमाणमित्येवमथाल्पबहुतां ब्रुवे ॥ ११३ ॥
इति मानम् ॥ ३२ ॥
स्तोकाः सर्वार्थसिद्धस्था, असंख्येयगुणास्ततः । शेषा अनुत्तरा देवास्ततः संख्यगुणाः क्रमात् ॥ ११४ ॥
ऊर्ध्वमध्याधःस्थिते स्युर्ग्रैवेयकत्रिकत्रये । अच्युते चारणे चैव, प्राणते चानतेऽपि च ॥ ११५ ॥
अधोऽधोग्रैवेयकादावनुत्तराद्यपेक्षया । भाव्या विमानबाहुल्याद्देवाः संख्यगुणाः क्रमात् ॥ ११६ ॥
समश्रेणिस्थयोर्यद्यप्यारणाच्युतकल्पयोः । विमानसंख्या तुल्यैव, तथापि कृष्णपाक्षिकाः ॥ ११७ ॥
उत्पद्यन्ते स्वभावेन, दक्षिणस्यां हि भूरयः । शुक्लपाक्षिकजीवेभ्यो, बहवश्च भवन्ति ते ॥ ११८ ॥
ततोऽच्युतापेक्षया स्युर्निर्जरा आरणेऽधिकाः । समश्रेणिस्थितितेष्वेवमन्येष्वपि विभाव्यताम् ॥ ११९ ॥

शुक्लपाक्षिककृष्णपाक्षिकलक्षणं च एवम् –

बहुपापोदयाः क्रूरकर्माणः कृष्णपाक्षिकाः । स्युर्दीर्घतरसंसारा, भूयांसोऽन्यव्यपेक्षया ॥ १२० ॥
तथास्वभावात्ते भव्या, अपि प्रायः सुरादिषु । उत्पद्यन्ते दक्षिणस्यां प्राचुर्येणान्यदिक्षु न ॥ १२१ ॥

तथाहुः–"पायमिह कूरकम्मा, भवसिद्धीयावि दाहिणिल्लेसु । नेरइयतिरियमणुआसुराइठाणेसु गच्छंति ॥ किञ्च–जेसिमवड्ढो पुग्गलपरियट्टो सेसओ उ संसारो । ते सुक्कपक्खिया खलु, अहिए पुण कण्हपक्खीओ ॥ इति प्रज्ञापनावृत्तौ ॥

आनतेभ्योऽसंख्यगुणाः, सहस्रारसुराः स्मृताः । महाशुक्रे लान्तके च, ब्रह्ममाहेन्द्रयोरपि ॥ १२२ ॥
सनत्कुमार ईशानेऽप्यसंख्यघ्ना यथोत्तरम् । ऐशानेभ्यश्च सौधर्मदेवाः संख्यगुणाधिकाः ॥ १२३ ॥
ननु–कृष्णपाक्षिकबाहुल्याद्यथा माहेन्द्रनाकिनः । असंख्येयगुणाः प्रोक्ताः, सनत्कुमारनाकिनः ॥ १२४ ॥
विमानानां कृष्णपाक्षिकाणां चाधिक्यतस्तथा । ते सौधर्मेऽप्यसंख्यघ्नाः, कथं नेशाननाकिनः ॥ १२५ ॥
अत्रोच्यते हि वचनप्रामाण्यादुच्यते तथा । विचारगोचरो नास्मादृशामाप्तोदितं वचः ॥ १२६ ॥

तथोक्तं प्रज्ञापनावृत्तौ –"ननु इयं युक्तिर्माहेन्द्रसनत्कुमारयोऽप्युक्ता । परं तत्र माहेन्द्र कल्पापेक्षया सनत्कुमारकल्पे देवा असंख्येयगुणा उक्ताः । इह तु सौधर्मे कल्पे संख्येयगुणा उक्ताः । तदेतत् कथम् ? । उच्यते । वचनप्रामाण्यात् । न च अत्र पातभ्रमः । यतोऽन्यत्राप्युक्तम्– "इसाणे सव्वत्थवि, बत्तीसगुणाउ होन्ति देवीओ । संखेज्जा सोहम्मे, तओ असंखा भवणवासी" ॥

असंख्यघ्नाश्च सौधर्मदेवेभ्यो भवनाधिपाः । भवन्ति भवनेशेभ्योऽसंख्यघ्ना व्यन्तराः सुराः ॥ १२७ ॥
ज्योतिष्काणां देवदेवीवृन्दः संख्यगुणस्ततः । स्वस्वदेवेभ्यश्च देव्यः, सर्वाः संख्यगुणाः स्मृताः ॥ १२८ ॥
इति लघ्वल्पबहुता ॥ ३३ ॥

पूर्वस्यां च प्रतीच्यां च, स्तोका भवनवासिनः । उत्तरस्यां दक्षिणस्यामसंख्येयगुणाः क्रमात् ॥ १२९ ॥
प्राक्प्रतीच्योर्हि भवनाल्पत्वात्स्तोका अमी किल । दक्षिणोत्तरयोस्तेषां, क्रमाधिक्यादिमेऽधिकाः ॥ १३० ॥
पूर्वस्यां व्यन्तराः स्तोका, विशेषेणाधिकाधिकाः । अपरस्यामुत्तरस्यां, दक्षिणस्यां यथाक्रमम् ॥ १३१ ॥
व्यन्तराः शुषिरे भूम्ना, प्रचरन्ति ततोऽधिकाः । साधोग्रामायां प्रतीच्याममी स्युः प्राच्यपेक्षया ॥ १३२ ॥
उदीच्यां दक्षिणस्यां च, युक्तमेवाधिकाधिकाः । स्वस्थाननगरावासबाहुल्यतो यथाक्रमम् ॥ १३३ ॥
पूर्वस्यां पश्चिमायां च, स्तोका ज्योतिष्कनाकिनः । दक्षिणस्यामुदीच्यां च, स्युः क्रमेणाधिकाधिकाः ॥ १३४ ॥
प्राक्प्रतीच्योश्चन्द्रसूर्यद्वीपेषूद्यानदेशवत् । क्रीडास्पदेषु ज्योतिष्काः, स्वल्पाः प्रायेण सत्तया ॥ १३५ ॥
तेभ्योऽधिका दक्षिणस्यां, विमानानां बहुत्वतः । तथा कृष्णपाक्षिकाणां, बाहुल्येनोपपाततः ॥ १३६ ॥

उदीच्यां मानससरस्येते क्रीडापरायणाः । आसते नित्यमेवं स्युर्दक्षिणापेक्षयाधिकाः ॥ १३७ ॥

किं च–

मानसाख्ये सरस्यस्मिन्, मत्स्याद्या येऽम्बुचारिणः । ते समीपस्थितज्योतिर्विमानादिनिरीक्षणात् ॥ १३८ ॥
उत्पन्नजातिस्मरणाः, किञ्चिदाचर्य च व्रतम् । विहितानशनाः कृत्वा, निदानं सुखलिप्सया ॥ १३९ ॥
मृत्वा ज्योतिर्विमानेषूत्पद्यन्तेऽन्तिकवर्तिषु । ततः स्युर्दाक्षिणात्येभ्य, औत्तराहा इमेऽधिकाः ॥ १४० ॥
स्युः सौधर्मप्रभृतिषु, ताविषेषु चतुर्ष्वपि । पूर्वस्यां पश्चिमायां च, स्तोका एव सुधाभुजः ॥ १४१ ॥
ततश्चासंख्येयगुणा, उतरस्यां ततोऽधिकाः । दक्षिणस्याममी प्रोक्ताः, श्रूयतां तत्र भावना ॥ १४२ ॥
तुल्या दिक्षु चतुसृषु, विमानाः पङ्क्तिवर्त्तिनः । असंख्ययोजनततताः, पुष्पावकीर्णकाः पुनः ॥ १४३ ॥
याम्योदीच्योरेव भूम्ना, स्युः पूर्वापरयोस्तु न । उदक् ततोऽसंख्यगुणाः, प्राचीप्रतीच्यपेक्षया ॥ १४४ ॥
भूम्ना कृष्णपाक्षिकाणां, दक्षिणस्यां समुद्भवात् । दक्षिणस्यां समधिका, उत्तरापेक्षया ततः ॥ १४५ ॥

तथाहुः प्रज्ञापनायाम् –"दिसाणुवाएणं सव्वत्थोवा देवा सोहम्मे कप्पे पुरच्छिमपच्चच्छिमेणं, उत्तरेणं असंखेज्जगुणा, दाहिणेणं विसेसहिया ॥ अत्र यद्यपि 'विविहा पुप्फकिन्ना तयन्तरे मुत्तु पुव्वदिसिं' इति वचनात् प्राच्यां पुष्पावकीर्णकाभावात् प्रतीच्यां च तन्निषेधाभावात् प्राच्यपेक्षया प्रतीच्यां देवा अधिका वक्तव्याः स्युस्तथाप्यत्र सूत्रे पूर्वपश्चिमावल्योरुभयतः सर्वापि दक्षिणोत्तरतयैव दिग्विवक्षितेति संभाव्यते इति वृद्धाः । यथा दक्षिणोत्तरार्धलोकाधिपती सौधर्मेशानेन्द्रौ इत्यत्र पूर्वपश्चिमे अपि दक्षिणोत्तरतयैव विवक्षिते । इति ॥

पूर्वोत्तरपश्चिमासु, ब्रह्मलोकेऽल्पकाः सुराः । ततश्चासंख्येयगुणा, दक्षिणस्यां दिशि स्मृताः[1] ॥ १४६ ॥
याम्यां हि बहवः प्रायस्तिर्यञ्चः कृष्णपाक्षिकाः । उत्पद्यन्तेऽन्यासु शुक्लपाक्षिकास्ते किलाल्पकाः ॥ १४७ ॥
एवं च लांतके शुक्रे, सहस्रारेऽपि नाकिनः । भूयांसो दक्षिणस्यां स्युस्तिसृष्वन्यासु चाल्पकाः ॥ १४८ ॥
आनतादिषु कल्पेषु, ततश्चानुत्तरावधि । प्रायश्चतुर्दिशमपि, समाना एव नाकिनः ॥ १४९ ॥

तथाहुः प्रज्ञापनायाम् –

"तेण परं बहुसमोववण्णगा समणाउसो" ! इति ॥ इति दिगपेक्षया अल्पबहुता ॥ ३४ ॥

जघन्यतोऽन्तर्मुहूर्त्तं, कालोऽनन्तोऽन्तरं गुरु । ज्येष्ठकायस्थितिरूपः, स च कालो वनस्पतेः ॥ १५० ॥

इत्यन्तरम् ॥ ३५ ॥

इति यदिह मयोक्तं निर्जराणां स्वरूपम्, तदुरुसमयवाचां वर्णिकामात्रमेव ।
तदुपहित विशेषान् को ह्यशेषान् विवेक्तुम्, प्रभुरिव नृपकोष्टागारजाग्रत्कणौघान् ॥ १५१ ॥

---

१. प्रज्ञापनासूत्रादर्शे असंखेज्जगुणा इति वृत्त्यादर्शे तु संख्येयगुणा इति दृश्यते ।

विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्वप्रदीपोपमे, सर्गो निर्गलितार्थसार्थसुभगः सौख्येन पूर्णोऽष्टमः ॥ १५२ ॥

॥ इति श्रीलोकप्रकाशे देवाधिकाररुपोऽष्टमः सर्गः समाप्तः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

अथ नवमः सर्ग : ।

अथ नारकाः –

रत्नशर्कराबालुकापङ्कधूमतमःप्रभाः । महातमःप्रभैतज्जाः, सप्तधा नारका मताः ॥ १ ॥
पर्याप्तापरभेदेन, चतुर्दश भवन्ति ते । स्थानोत्पातसमुद्घातैर्लोकासंख्यांशवर्तिनः ॥ २ ॥
स्वस्थानतस्त्वधोलोकस्यैकदेशे भवन्त्यमी । विशेषस्थानयोगस्तु, क्षेत्रलोके प्रवक्ष्यते ॥ ३ ॥
इति भेदाः स्थानानि च ॥ १ । । २ ॥
पर्याप्तयः षडप्येषां, चतस्रो योनिलक्षकाः । लक्षाणि कुलकोटीनामुक्तानि पञ्चविंशतिः ॥ ४ ॥
इति द्वारत्रयम् ॥ ३ । ४ । ५ ॥
स्युः शीतयोनयः केचित्, केचित्तथोष्णयोनयः । जिनैरुक्ता नैरयिकाः, संवृताचित्तयोनयः ॥ ५ ॥
इति योनिसंवृतत्वादि ॥ ६ ॥
दशवर्षसहस्राणि, जघन्यैषां भवस्थितिः । उत्कृष्टा तु त्रयस्त्रिंशत्सागरोपमसंमिता ॥ ६ ॥
इति भवस्थितिः ॥ ७ ॥ कायस्थितिस्तेषां भवस्थितिरेव ॥ ८ ॥
कायस्थितिस्त्रसत्वे स्याज्जघन्याऽन्तर्मुहूर्त्तिकी । द्वौ सागरसहस्रौ च, कियद्वर्षाधिकौ गुरुः ॥ ७ ॥
देहास्त्रयस्तैजसं च, कार्मणं वैक्रियं तथा । स्वाभाविककृत्रिमयोर्हुण्डं संस्थानमङ्गयोः ॥ ८ ॥
इति देहाः संस्थानं च ॥ ९ । १० ॥
शतानि पञ्च धनुषां, ज्येष्ठा स्वाभाविकी तनुः । लघ्व्यङ्गुलासंख्यभागमानाऽऽरम्भक्षणे मता ॥ ९ ॥
स्वस्वस्वाभाविकतनोर्द्विगुणोत्तरवैक्रिया । गुर्वी लघ्व्यङ्गुलसंख्यभागमाना भवेदसौ ॥ १० ॥
इत्यंगमानम् ॥ ११ ॥
स्युश्चत्वारः समुद्घाता, आद्या एषां गतिः पुनः । पर्याप्तगर्भजनरतिरश्चोः संख्यजीविनोः ॥ ११ ॥
इति द्वाद्वयम् ॥ १२ । ॥ १३ ॥ (इति गतिः)
नरपञ्चाक्षतिर्यञ्चः, पर्याप्ताः संख्यजीविनः । नारकेषु यान्ति संख्या, सामयिक्येषु देववत् ॥ १२ ॥
इषूत्पत्तिच्यवनमयोर्मुहूर्त्ता द्वादशान्तरम् । उत्कर्षतो जघन्याच्च, प्रज्ञप्तं समयात्मकम् ॥ १३ ॥

इत्यागतिः ॥ १४ ॥

सामान्यतो नैरयिका, लभन्तेऽनन्तरे भवे । सम्यक्त्वं देशविरतिं, चारित्रं मुक्तिमप्यमी ॥ १४ ॥

विशेषतस्तु क्षेत्रलोके वक्ष्यते ॥ इत्यनन्तराप्तिः ॥ १५ ॥

उद्वृत्यौघान्नारकेभ्यो, लब्ध्वा नरभवादिकम् । यद्येकसमये यान्ति, शिवं तर्हि दश ध्रुवम् ॥ १५ ॥

प्रत्येकमाद्यनरकत्रयोद्वृत्ता अमी पुनः । सिद्धिं यान्ति दश दश, तुर्योद्वृत्तास्तु पञ्च ते ॥ १६ ॥

इति समयेसिद्धिः ॥ १६ ॥

लेश्यास्तिस्रो भवन्त्याद्या, षडाहारदिशोऽपि च । न संहननसद्भावः, कषाया निखिला अपि ॥ १७ ॥

इति द्वारचतुष्टम् ॥ १७–२० ॥

संज्ञाः सर्वाश्चेन्द्रियाणि, सर्वाण्येषां च संज्ञिता । दीर्घकालिक्यादिमत्वाद्व्यक्तसंज्ञतयाऽपि च ॥ १८ ॥

इति द्वारत्रयम् ॥ २१–२३ ॥

एषां वेदः क्लीब एव, दृष्टिर्ज्ञानं च दर्शनम् ॥ उपयोगा इति द्वारचतुष्कं सुखन्मतम् ॥ १९ ॥

इति द्वारपञ्चकम् ॥ २४–२८ ॥

ओजोलोमाभिधावेषामाहारावशुभौ भृशम् । गुणस्थानानि योगाश्च, भवन्त्यमृतभोजिवत् ॥ २० ॥

लोमाहारोद्विधाऽऽभोगादनाभोगाच्च तत्र च । स्यादादिमोऽन्तुर्मुहूर्त्तात्, द्वितीयश्च प्रतिक्षणम् ॥ २१ ॥

इतिद्वारत्रयम् ॥ २९–३१ ॥ इति लेश्यादीनि योगान्तानि पञ्चदश द्वाराणि

अङ्गुलप्रमितक्षेत्रप्रदेशराशिवर्तिनि । तृतीये वर्गमूलघ्ने, प्रथमे [1]वर्गमूलके ॥ २२ ॥

यावान् प्रदेशराशिः स्यात्तावतीषु च पङ्क्तिषु । एकप्रादेशिकीषु स्युर्यावन्तः खप्रदेशकाः ॥ २३ ॥

तावन्तो नारकाः प्रोक्ताः, सामान्येन जिनेश्वरैः । विशेषतो मानमेषामथ किञ्चिद्वितन्यते ॥ २४ ॥

अङ्गुलप्रमितक्षेत्रप्रदेशराशिसङ्गते । तृतीयवर्गमूलघ्ने, प्रथमे वर्गमूलके ॥ २५ ॥

यावान् प्रदेशनिकरस्तत्प्रमाणासु पङ्क्तिषु । एकप्रादेशिकीषु स्युर्यावन्तः खप्रदेशकाः ॥ २६ ॥

तावन्तो मानतः प्रोक्ता, नारकाः प्रथमक्षितौ । शेषासु षट्सु च क्ष्मासु, ख्याता नैरयिकाङ्गिनः ॥ २७ ॥

घनीकृतस्य लोकस्य, श्रेण्यसंख्यांशवर्तिभिः । नभःप्रदेशैः प्रमिता, विशेष एष तत्र च ॥ २८ ॥

आरभ्य सप्तमक्ष्माया, द्वितीयवसुधावधि । असंख्येयगुणत्वेन, यथोत्तराधिकाधिकाः ॥ २९ ॥

इति मानम् ॥ ३२ ॥

सर्वाल्पाः सप्तमक्ष्मायामसंख्येयगुणास्ततः । भवन्ति नारकाः क्ष्मासु, षष्ट्यादिषु यथाक्रमम् ॥ ३० ॥

---

१. यथा असत्कल्पनया २५६ रुपराशौ प्रथमवर्गम् २, द्वितीयवर्गम् ४, तृतीयवर्गम् १६, तत्र प्रथमवर्गम् २, तृतीयवर्गम् १६, गुणिते ३२ । अत्र प्रज्ञापनाजीवाभिगमसूत्रवृत्ती विलोकनीयः ॥ वि. टि. ॥

संज्ञिपञ्चेन्द्रितिर्यग्मनुष्याः सप्तमक्षितौ । सर्वोत्कृष्टपापकृत, उत्पद्यन्तेऽल्पकाश्च ते ॥ ३१ ॥
किञ्चिद्धीनहीनतरपाप्मानः प्रोद्भवन्ति च । षष्ट्यादिषु ते च भूरिभूरयः स्युर्यथोत्तरम् ॥ ३२ ॥
इति लघ्व्यल्पबहुता ॥ ३३ ॥
सर्वासु नारकाः स्तोकाः, पूर्वोत्तरापरोद्भवाः । असंख्येयगुणास्तेभ्यो, दक्षिणाशासमुद्भवाः ॥ ३३ ॥
पुष्पावकीर्णनरकावासा ह्यल्पा दिशां त्रये । ये सन्ति तेऽपि प्रायेण, संख्ययोजनविस्तृताः ॥ ३४ ॥
दक्षिणस्यां च पुष्पावकीर्णका बहवः स्मृताः । प्रायस्ते सन्त्यसंख्येययोजनायतविस्तृताः ॥ ३५ ॥
किं च—
भूम्ना कृष्णपाक्षिकाणां, दक्षिणस्यां यदुद्भवः । दिक्त्रयापेक्षयैतस्यां, भूयांसो नारकास्ततः ॥ ३६ ॥
इति दिगपेक्षयाऽल्पबहुता ॥ ३४ ॥
वनस्पतिज्येष्ठकायस्थितिमानं किलान्तरम् । एषां गरीयो विज्ञेयं, लघु चान्तर्मुहूर्त्तकम् ॥ ३७ ॥
इत्यन्तरम् ॥ ३५ ॥

नारकलोकनिरूपणमेवं, क्लृप्तमशेषविशेषविमुक्तम् ।
शेषमधोजगदुक्त्यधिकारे, किञ्चिदिहैव विशिष्य च वक्ष्ये ॥ ३८ ॥

विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ॥
काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे, संपूर्णोऽनवमः सुखेन नवमः सर्गो निसर्गोज्ज्वलः ॥ ३९ ॥

इति श्री लोकप्रकाशे नवमः सर्गः समाप्तः ।

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

अथ दशमः सर्गः ।

इदानीं भवसंवेधः, प्रागुद्दिष्टो निरुप्यते । तत्र ज्येष्ठकनिष्टायुश्चतुर्भङ्गी प्रपञ्च्यते ॥ १ ॥
आद्यः प्राच्याग्रभवयोर्ज्येष्ठमायुर्यदा भवेत् । भङ्गेऽन्यः प्राग्भवे ज्येष्ठमल्पिष्टं स्यात्परे भवे ॥ २ ॥
तृतीयः प्राग्भवेऽल्पीयो, ज्येष्ठमायुर्भवे परे । आयुर्लघु द्वयोस्तुर्यो, भङ्गेष्वेषु चतुर्ष्वथ ॥ ३ ॥
संज्ञी नरोऽथवा तिर्यक्, षट्स्वाद्यनरकेषु वै । पृथक्पृथक् भवानष्टावुत्कर्षेण प्रपूरयेत् ॥ ४ ॥
यथा संज्ञी नरस्तिर्यगुत्पन्नो नरके क्वचित् । ततो मृतो मनुष्ये वा, तिरश्चि वा ततः पुनः ॥ ५ ॥
तत्रैव नरके भूयो, मर्त्ये तिरश्चि वेति सः । भवानष्टौ समापूर्य, नवमे च भवे ततः ॥ ६ ॥
अवश्यमन्यपर्यायं, नरस्तिर्यगवाप्नुयात् । वक्ष्यमाणेष्वपि बुधैः, कार्यैवं भावना स्वयम् ॥ ७ ॥
तथैव भवनेशेषु, ज्योतिष्कव्यंतरेष्वपि । तिर्यग्नरौ किलाष्टासु, सौधर्मप्रभृतिद्युषु ॥ ८ ॥

भवानष्टो पूरयतो, भवौ द्वौ च जघन्यतः । इमौ पूरयतः प्रोक्तनारकेषु सुरेषु च ॥ ९ ॥
जघन्यायुष्टया माघवत्यामुत्पाद्यमानकः । तिर्यङ् ज्येष्ठायुरन्यो वा, भवान्सप्तैव पूरयेत् ॥ १० ॥
तथाहि—संज्ञी पञ्चेन्द्रियस्तिर्यक्, पूर्वकोट्यायुरन्वितः । जघन्यायुष्टयोत्पन्नः, सप्तम्यां नरकावनौ ॥ ११ ॥
ततश्चोद्वृत्य तिर्यक्षु, सप्तम्यां च ततः पुनः । तिर्यक्षु च ततः क्ष्मायां, सप्तम्यां च ततः पुनः ॥ १२ ॥
तिर्यक्ष्वेव ततश्चासौ, नोद्भवेत्सप्तमक्षितौ । एवं सप्तभवान् कृत्वाऽष्टमेऽन्यं भवमाप्नुयात् ॥ १३ ॥
तिर्यग् ज्येष्ठायुर्जघन्यायुष्कोऽथोत्कृष्टजीविताम् । अवाप्नुवन्माघवत्यां, भवान् पञ्चैव पूरयेत् ॥ १४ ॥
उत्पद्यते द्विर्नरके, तत्र तिर्यक्षु च त्रिशः । ततश्चासौ षष्टभवे, नोद्भवेत्सप्तमक्षितौ ॥ १५ ॥
उत्कृष्टायुष्टयाऽल्पायुष्टया वा सप्तमक्षितौ । तिर्यग् ज्येष्ठायुरन्यो वा, त्रिभवः स्याज्जघन्यतः ॥ १६ ॥
तत्र तिर्यग्भवौ तु द्वावेकः स्यात्सप्तमक्षितौ । माघवत्या नारकाणां, तिर्यक्ष्वेव गतिर्यतः ॥ १७ ॥
चतुर्भङ्ग्याः नरः संज्ञी, सप्तमं नरकं व्रजन् । जघन्यादुत्कर्षतोऽपि, संपूरयेद्भवद्वयम् ॥ १८ ॥
आनतादिचतुःकल्प्यां, सर्वग्रैवेयकेषु च । चतुर्भंग्योद्भवन् मर्त्यः, सप्तोत्कर्षात् भवान् सृजेत् ॥ १९ ॥
त्रिर्देवेषु चतुस्तत्र, समुत्पद्य नरेष्वसौ । अवश्यमन्यपर्यायमवाप्नोत्यष्टमे भवे ॥ २० ॥
विजयादिचतुष्के च, भवान् पञ्चैव पूरयेत् । त्रीन् भवान् नृषु मध्यौ च, द्वौ भवौ विजयादिषु ॥ २१ ॥
जघन्यस्त्वानतादिष्वेतेषु निखिलेष्वपि । भवांस्त्रीन्मनुजः संज्ञी, समर्थयेत् समुद्भवन् ॥ २२ ॥
यदानतादिदेवानां, नृभ्य एवाप्तजन्मनाम् । नरेष्वेवोत्पत्तिरिति, जघन्येन भवास्त्रयः ॥ २३ ॥
जघन्याच्चोत्कर्षतोऽपि, पञ्चमेऽनुत्तरे नरः । त्रीन्भवान् पूरयेत् मोक्षमवश्यं यात्यसौ ततः ॥ २४ ॥
भवनव्यन्तरज्योतिष्काद्यकल्पद्वयावधि । युग्मिनो नरतिर्यंचः, पूरयन्ति भवद्वयम् ॥ २५ ॥
जघन्यादुत्कर्षतोऽपि, युग्मिनां यत्सुधाशिषु । उत्पन्नानां पुनरपि, स्यादुत्पत्तिर्न युग्मिषु ॥ २६ ॥
रत्नप्रभायां भवनाधिपतिव्यन्तरेष्वपि । असंज्ञी पर्याप्ततिर्यग्भवयुग्मं समर्थयेत् ॥ २७ ॥
यदस्य नरके स्वर्गे, चोत्पन्नस्य ततः पुनः । असंज्ञितिर्यक्षूत्पत्तिर्भवे नानन्तरे भवेत् ॥ २८ ॥
भवनव्यन्तरज्योतिःसहस्रारान्तनाकिनः । आद्यषड्नरकोत्पन्नानारकाश्च समेऽप्यमी ॥ २९ ॥
उत्पद्यमानाः पर्याप्तसंज्ञितिर्यग्नरेषु वै । पूरयन्ति भवानष्ट, प्रत्येकं तत्र भावना ॥ ३० ॥
कश्चिद्भवनपत्यादिश्च्युत्वैकान्तरमुद्भवन् । चतुर्वारं हि पर्याप्तसंज्ञी तिर्यग्नरो भवेत् ॥ ३१ ॥
ततः स तिर्यग्मर्त्यो वा, नाप्नुयान्नवमे भवे । पूर्वोक्तभवनेशादिभावं तादृक्स्वभावतः ॥ ३२ ॥
संज्ञिपर्याप्ततिर्यक्षु, सप्तमक्षितिनारकाः । पूरयन्ति भवान् षड् येऽनुत्कृष्टस्थितिशालिनः ॥ ३३ ॥
उत्कृष्टस्थितियुक्तास्तु, सप्तमक्षितिनारकाः । [1]तेषूत्कर्षाज्जायमानाः, स्युश्चतुर्भवपूरकाः ॥ ३४ ॥

१. उत्पद्यमाना उत्कर्षात्, पूरयन्ति चतुर्भवीम् वि

आनतादिस्वश्चतुष्कसर्वग्रैवेयकामराः । उत्पद्यमाना उत्कर्षान्नृषु षड्भवपूरकाः ॥ ३५ ॥
मनुष्येषूत्पद्यमाना, विजयादिविमानगाः । भवांश्चतुर उत्कर्षात्, पूरयन्ति निरन्तरम् ॥ ३६ ॥
जघन्यतस्त्वानतादिदेवा द्विभवपूरकाः । यतश्च्युतानामेतेषां, नोत्पत्तिर्मनुजान्विना ॥ ३७ ॥
उत्कर्षतो जघन्याच्च, सुराः सर्वार्थसिद्धिजाः । मनुष्येषु समुत्पद्य, पूरयन्ति भवद्वयम् ॥ ३८ ॥
भवनव्यन्तरज्योतिःसौधर्मेशाननाकिनः । पृथिव्यप्तरुषूत्पद्यमाना द्विभवपूरकाः ॥ ३९ ॥
जघन्यादुत्कर्षतोऽपि, भूयोऽप्युत्पत्त्यसम्भवात् । तेषां निर्गत्य पृथ्व्यादेर्भवनेशादिनाकिषु ॥ ४० ॥
वायुतेजःकाययोस्तु, देवानां गत्यसम्भवात् । तदीयो भवसंवेधो, नात्र प्रोक्तो जिनेश्वरैः ॥ ४१ ॥
असंज्ञिसंज्ञितिर्यञ्चो, नराः संज्ञिन एव च । असंख्यायुर्नृतिर्यक्षु, पूरयन्ति भवद्वयम् ॥ ४२ ॥
युग्मिनां नृतिरश्चां यद्विपद्यानन्तरे भवे । गतिर्देवगतावेव, भगवद्भिर्निरूपिता ॥ ४३ ॥
भूकायिकोऽम्भोऽग्निवायुष्वेकान्तरे परिभ्रमन् । भवानसंख्यान् प्रत्येकमनुत्कृष्टस्थितिः सृजेत् ॥ ४४ ॥
एवमम्बुकायिकोऽपि, प्रत्येकं क्ष्माग्निवायुषु । उत्पद्यमानोऽसंख्येयान्, भवानुत्कर्षतः सृजेत् ॥ ४५ ॥
वह्निकायोऽपि पृथ्व्यम्बुकायिष्वेकान्तरं भवान् । कुर्यादसंख्याननिलोऽप्येवं पृथ्व्यम्बुवह्निषु ॥ ४६ ॥
तथा क्ष्माम्भोऽग्निमरुतः, प्रत्येकं च वनस्पतौ ।भवानसंख्यान् कुर्वन्ति, जायमाना निरन्तरम् ॥ ४७ ॥
एवं वनस्पतिरपि, पृथिव्यादिचतुष्टये । प्रत्येकमुत्पद्यमानः, कुर्यादसंख्यकान् भवान् ॥ ४८ ॥
वनस्पतिकायिकेषूत्पद्यमानो वनस्पतिः । भवानन्तान् कुर्वीत, निरन्तरं परिभ्रमन् ॥ ४९ ॥
प्रत्येकमुत्पद्यमानाः, पृथिव्यादिषु पञ्चसु । भवान् संख्यान् विदधति, प्रत्येकं विकलेन्द्रियाः ॥ ५० ॥
प्रत्येकं विकलेष्वेवं, पञ्चभूकायिकादयः । प्रत्येकमुत्पद्यमानाः, संख्येयभवपूरकाः ॥ ५१ ॥
विकलाक्षेषु संख्येयान्, सर्वेऽपि विकलेन्द्रियाः । भवान् विदध्युः प्रत्येकं, जायमानाः परस्परम् ॥ ५२ ॥
पूर्वोक्तायुश्चतुर्भङ्ग्यां, ज्येष्ठायुरुपलक्ष्यते । भङ्गत्रये भवानष्टौ, कुर्युः सर्वे क्ष्मादयः ॥ ५३ ॥
तथाहि – पृथ्वीकायिक उत्कृष्टायुष्क उत्कृष्टजीविषु । अप्कायिकेषूत्कर्षणोद्भवेद्वारचतुष्टयम् ॥ ५४ ॥
एवमेकान्तरं वारानुत्पद्य चतुरस्ततः । अवश्यमन्यपर्यायं, लभते नवमे भवे ॥ ५५ ॥
उत्कृष्टायुर्भूमिकायोऽनुत्कृष्टायुष्कवारिषु । उत्पद्यमानोऽप्युत्कर्षाद्भवानष्टैव पूरयेत् ॥ ५६ ॥
एवं भूकायिकोऽनुत्कृष्टायुरुत्कृष्टजीविषु । उद्भवन्नम्बुषूत्कर्षात्, स्यादष्टभवपूरकः ॥ ५७ ॥
अप्कायादिनामपीत्थं, विकलानां च भाव्यताम् । भवाष्टकात्मा संवेधो, ज्येष्ठायुर्भङ्गकत्रये ॥ ५८ ॥
अनुत्कृष्टायुषां त्वेषां, स्यादनुत्कृष्टजीविषु । संवेधः प्रागुक्त एवासंख्यसंख्यभवात्मकः ॥ ५९ ॥
पृथ्व्यादीनाम् असंख्यभवात्मकः विकलानाम् संख्यभवात्मकः इति ॥
क्ष्मादयो विकलाक्षाश्च, जघन्यतो भवद्वयम् । कुर्युः ज्येष्ठकनिष्टायुरूपे भङ्गचतुष्टये ॥ ६० ॥

युग्मिवर्जाश्च मनुजास्तिर्यञ्चः संज्ञ्यसंज्ञिनः । प्रत्येकं जायमानाः स्युर्मिथोऽष्टभवपूरकाः ॥ ६१ ॥
जघन्योत्कृष्टायुरुत्थचतुर्भङ्ग्यामपि स्फुटम् । भवान् कृत्वाऽष्ट नवमे, तेऽन्यं पर्यायमाप्नुयुः ॥ ६२ ॥
तथैव एव पृथ्व्यादिपञ्चके विकलत्रये । जायमानाश्चतुर्भङ्ग्यां, कुर्युः प्रत्येकमष्ट तान् ॥ ६३ ॥
तथा क्ष्माद्याः सविकलास्तिर्यक्षु संज्ञ्यसंज्ञिषु । नृष्वयुग्मिषु चोत्पद्यमाना भङ्गचतुष्टये ॥ ६४ ॥
पूरयन्ति भवानष्टौ स च पृथ्व्यादिकोऽसुमान् । नरतिर्यग्भवात्तस्मान्न पृथ्व्यादित्वमाप्नुयात् ॥ ६५ ॥
जघन्यादुत्कर्षतोऽपि, मनुष्याः पवनाग्निषु । उत्पद्यमाना द्वावेव, पूरयन्ति भवौ खलु ॥ ६६ ॥
यतो हि पवनाग्निभ्य, उद्वृत्तानां शरीरिणाम् । अनन्तरभवे नैव, नरेषूत्पत्तिसम्भवः ॥ ६७ ॥
यथोक्तानामथ भवसंवेधानां यथागमम् । कालमानं विनिश्चेतुमाम्नायोऽयं वितन्यते ॥ ६८ ॥
जघन्यादान्तर्मुहूर्त्तमुत्कर्षात्पूर्वकोटिकाम् । स्थितिं बिभ्रद्याति तिर्यग्, नरकेष्वखिलेष्वपि ॥ ६९ ॥
तावदायुर्युतेष्वेति, तेभ्यो मृत्वाऽपि नारकः । सहस्रारान्तदेवेष्वप्यसौ तादृक्स्थितिर्व्रजेत् ॥ ७० ॥
देवास्तेऽपीदृशायुष्केष्वेष्वायान्ति ततश्च्युताः । असंख्यजीवी तिर्यक्तु, यातीशानान्तनाकिषु ॥ ७१ ॥
नरो मासपृथक्त्वायुर्धर्मां याति जघन्यतः । वंशादिषु क्ष्मासु षट्सु, वर्षपृथक्त्वजीवितः ॥ ७२ ॥
उत्कर्षात्पूर्वकोट्यायुर्यात्यसौ क्ष्मासु सप्तसु । आयान्त्युक्तस्थितिष्वेव, नृषूक्तनारका अपि ॥ ७३ ॥
ना जघन्यात् मासपृथक्त्वायुरा स्वर्द्वयं व्रजेत् । ऊर्ध्वं त्वब्दपृथक्त्वायुर्याति यावदनुत्तरान् ॥ ७४ ॥
उत्कर्षात्तु त्रिपल्यायुः, स्वर्द्वयं यावदेति सः । ऊर्ध्वं ततः पूर्वकोट्यायुष्क एव स गच्छति ॥ ७५ ॥
तिर्यक् युग्मिनृतिर्यक्षु, त्वन्तर्मुहूर्त्तजीवितः । गच्छेज्जघन्यतो मासपृथक्त्वायुर्नरः पुनः ॥ ७६ ॥
उत्कर्षतः पूर्वकोटिमानायुष्कावुभावपि । असंख्यायुर्नृतिर्यक्षूत्पद्येते नाधिकायुषौ ॥ ७७ ॥
उक्तशेषाणां तु पूर्वापरयोर्भवयोः स्थितिः । गुरुर्लघुश्च ज्ञेया तज्ज्येष्ठान्यायुरपेक्षया ॥ ७८ ॥
एवं च–
विवक्षितभवप्राप्यभवयोः परमां स्थितिम् । लघ्वीं वा भवसंख्यां च, जघन्यां वा गरीयसीम् ॥ ७९ ॥
स्वयं विभाव्य निष्टंक्यं, विवक्षितशरीरिणाम् । भवसंवेधकालस्य, मानं ज्येष्ठमथावरम् ॥ ८० ॥
यथा गरिष्ठायुष्कस्य, मनुष्यस्यादिमक्षितौ । उत्कृष्टायुर्नारकत्वं, लभमानस्य चासकृत् ॥ ८१ ॥
उत्कृष्टो भवसंवेधकालः संकलितो भवेत् । चतुपूर्वकोटियुक्तचतुःसागरसंमितः ॥ ८२ ॥
द्वयोरुत्कृष्टायुषोस्तु, संवेधः स्याज्जघन्यतः । पूर्वकोटिसमधिकसागरोपमसंमितः ॥ ८३ ॥
उत्कृष्टायुर्नरलघुस्थितिनारकयोर्गुरुः । सोऽब्दायुतचतुष्काढ्यं, पूर्वकोटिचतुष्टयम् ॥ ८४ ॥
उत्कृष्टायुर्नरलघुस्थितिनारकयोर्लघुः । संवेधोऽब्दायुतयुतपूर्वकोटिमितो मतः ॥ ८५ ॥
जघन्यायुर्नरोत्कृष्टस्थितिनारकयोर्गुरुः । चतुर्मासपृथक्त्वाढ्यं, स स्याद्धार्धिचतुष्टयम् ॥ ८६ ॥

जघन्यायुर्नरोत्कृष्टजीविनारकयोर्लघुः । एकमासपृथक्त्वाढ्यवार्द्धिमानो भवत्यसौ ॥ ८७ ॥
उत्कृष्टो भवसंवेधो, जघन्यजीविनोर्द्धयोः । चतुर्मासपृथक्त्वाढ्यं, वर्षायुतचतुष्टयम् ॥ ८८ ॥
जघन्यो भवसंवेधो, जघन्यजीविनोर्द्धयोः । एकमासपृथक्त्वाढ्या, दशवर्षसहस्रकाः ॥ ८९ ॥
यथा वा–ज्येष्ठायुषस्तिरश्चः प्रोद्भवतः सप्तमक्षितौ । जघन्यायुष्टयोत्कृष्टा, भवसंवेधसंस्थितिः ॥ ९० ॥
चतुपूर्वकोटियुक्ताः, स्युः षट्षष्टिः पयोधयः । अल्पायुषोऽन्तर्मुहूर्त्तचतुष्टययुजोऽथ ते ॥ ९१ ॥
यथा वा–
ज्येष्ठायुषां नृणां ज्येष्ठायुष्टया सप्तमक्षितौ । ज्येष्ठः कालः पूर्वकोट्याढ्यास्त्रयस्त्रिंशदब्धयः ॥ ९२ ॥
जघन्यायुर्नृणामल्पायुष्टया सप्तमक्षितौ । जघन्योऽब्दपृथक्त्वाढ्या, द्वाविंशति:पयोधयः ॥ ९३ ॥
एवं सर्वेषु भङ्गेषु, सर्वेषामपि देहिनाम् । विभाव्यो भवसंवेधकालो गुरुर्लघुः स्वयम् ॥ ९४ ॥
स्याद् भूयान् विस्तर इति, नेह व्यक्त्या विविच्यते । पञ्चमाङ्गे चतुर्विंशशतं भाव्यं तदर्थिभिः ॥ ९५ ॥
अथाष्टनवतेर्जीवभेदानामुच्यते क्रमात् । क्रमप्राप्ताऽल्पबहुता, महाल्पबहुताभिधा ॥ ९६ ॥
गर्भजा मनुजाः स्तोका, नार्यः संख्यगुणास्ततः । ताभ्यश्च स्थूलपर्याप्ताग्नयोऽनुत्तरनाकिनः ॥ ९७ ॥
क्रमाद्संख्यघ्नास्तेभ्यश्चोर्ध्वग्रैवेयकत्रये । मध्यत्रयेऽधस्त्रये चाच्युते चैवारणेऽपि च ॥ ९८ ॥
प्राणतेऽथानते स्वर्गे, समुत्पन्नाः सुधाशिनः । क्रमेण संख्येयगुणाः, सप्ताप्येते निरूपिताः ॥ ९९ ॥
ततो माघवतीजाता, मघाजाताश्च नारकाः । सहस्रारसुरास्तेभ्यो, महाशुक्रसुरास्ततः ॥ १०० ॥
तेभ्योऽरिष्ठा नैरयिकास्तेभ्यो लांतकनाकिनः । तेभ्योंजनानारकाश्च, ब्रह्मलोकसुरास्ततः ॥ १०१ ॥
तेभ्यः शैलानैरयिका, माहेन्द्रत्रिदशास्ततः । तेभ्यः सनत्कुमारस्था, वंशानैरयिकास्ततः ॥ १०२ ॥
तेभ्यः संमूर्च्छिमनरास्तेभ्यश्चेशाननाकिनः । क्रमादसंख्येयगुणाश्चतुर्दशाप्यमी स्मृताः ॥ १०३ ॥
ईशानस्थसुरेभ्यस्तद्देव्यः संख्यगुणास्ततः । सौधर्मदेवास्तद्देव्यस्तेभ्यः संख्यगुणाः स्मृताः ॥ १०४ ॥
असंख्येयगुणास्तेभ्यो, भवनाधिपनाकिनः । भवनाधिपदेव्यश्च, तेभ्यः संख्यगुणाधिकाः ॥ १०५ ॥
ताभ्योऽसंख्यगुणाः प्रोक्ताः, प्रथमक्षितिनारकाः । तेभ्योऽप्यसंख्येयगुणाः, पुमांसः पक्षिणः स्मृताः ॥ १०६ ॥
पक्षिण्योऽथ स्थलचरास्तत्स्त्रियोऽम्बुचरा अपि । अम्बुचर्यो व्यन्तराश्च, व्यन्तर्यो ज्योतिषामराः ॥ १०७ ॥
ज्योतिष्कदेव्यः खचरक्लीबाः स्थलपयश्चराः । नपुंसका एव ततः, पर्याप्ताश्चतुरिन्द्रियाः ॥ १०८ ॥
क्रमेण संख्येयगुणा पक्षिण्याद्यास्त्रयोदश । ततः पर्याप्तपञ्चाक्षा, अधिकाः संज्ञ्यसंज्ञिनः ॥ १०९ ॥
तेभ्यः पर्याप्तका द्व्यक्षाः, पर्याप्तस्त्रीन्द्रियास्ततः । क्रमाद्विशेषाभ्यधिकाः, प्रज्ञप्ताः परमेश्वरैः ॥ ११० ॥
तेभ्योऽपर्याप्तपञ्चाक्षा, असंख्येयगुणास्ततः । अपर्याप्ताश्चतुस्त्रिद्वीन्द्रियाः स्युरधिकाधिकाः ॥ १११ ॥
तेभ्यः प्रत्येकपर्याप्ता, द्रुमाः पर्याप्तकास्ततः । निगोदा बादराः स्थूलपृथ्व्यम्बुमरुतोऽपि च ॥ ११२ ॥

स्थूलापर्याप्तका अग्निप्रत्येकद्रुनिगोदकाः । पृथ्वीजलवायवश्च, सूक्ष्माऽपर्याप्तवह्नयः ॥ ११३ ॥
पर्याप्तप्रत्येकद्रुमादयो द्वादशाप्यसंख्यगुणाः । क्रमतस्ततश्च सूक्ष्मापर्याप्ताः क्ष्माम्बुवायवोऽभ्यधिकाः ॥ ११४ ॥
ततश्च संख्येयगुणाः, पर्याप्तसूक्ष्मवह्नयः । ततः पर्याप्तसूक्ष्मक्ष्माम्भोऽनिला अधिकाधिकाः ॥ ११५ ॥
असंख्यघ्नास्ततोऽपर्याप्तकसूक्ष्मनिगोदकाः । ततः संख्यगुणाः पर्याप्तकाः सूक्ष्मनिगोदकाः ॥ ११६ ॥
क्रमात्ततोऽनन्तगुणाश्चत्वारोऽमी अभव्यकाः । भ्रष्टसम्यक्त्वाश्च सिद्धाः, स्थूलपर्याप्तभूरुहः ॥ ११७ ॥
तेभ्यश्च बादराः पर्याप्तकाः स्युरोघतोऽधिकाः । स्थूलापर्याप्ततरवस्ततोऽसंख्यगुणाः स्मृताः ॥ ११८ ॥
अपर्याप्ता बादराः स्युस्तेभ्यो विशेषतोऽधिकाः । सामान्यतो बादराश्च, विशेषाभ्यधिकास्ततः ॥ ११९ ॥
असंख्येयगुणास्तेभ्यो, सूक्ष्मापर्याप्तभूरुहः । ततः सामान्यतः सूक्ष्मापर्याप्तकाः किलाधिकाः ॥ १२० ॥
स्युः संख्येयगुणास्तेभ्यः, सूक्ष्मपर्याप्तभूरुहः । इतोऽधिकाधिका ज्ञेया, वक्ष्यमाणाश्चतुर्दश ॥ १२१ ॥
सूक्ष्माः पर्याप्तका ओघात्, सूक्ष्माः सामान्यतोऽपि च । भव्या निगोदिनश्चौघादोघाच्च वनकायिकाः ॥ १२२ ॥
ओघादेकेन्द्रिया ओघात्तिर्यञ्चश्च ततः पुनः । मिथ्यादृशश्चाविरताः, सकषायास्ततोऽपि च ॥ १२३ ॥
छद्मस्थाश्च सयोगाश्च संसारिणस्तथौघतः । सर्वजीवाश्चेति सार्वैर्महाल्पबहुतोदिता ॥ १२४ ॥
एवं जीवास्तिकायो यो, द्वारैः प्रोक्तः पुरोदितैः । द्रव्यक्षेत्रकालभावगुणैः स पञ्चधा भवेत् ॥ १२५ ॥
अनन्तजीवद्रव्यात्मा, द्रव्यतोऽसावुदीरितः । क्षेत्रतो लोकमात्रोऽसौ, सत्त्वात्तेषां जगत्त्रये ॥ १२६ ॥
कालतः शाश्वतो वर्णादिभिः शून्यश्च भावतः । उपयोगगुणश्चासौ, गुणतः परिकीर्त्तितः ॥ १२७ ॥
निरन्तरं बध्यमानैः, स च कर्मकदम्बकैः । विसंस्थुलो भवाम्भोधौ, बहुधा चेष्टतेऽङ्गभाक् ॥ १२८ ॥
पुद्गलैर्निचिते लोकेऽञ्जनपूर्णसमुद्गवत् । मिथ्यात्वप्रमुखैर्भूरिहेतुभिः कर्मपुद्गलान् ॥ १२९ ॥
करोति जीवः संबद्धान्, स्वेन क्षीरेण नीरवत् । लोहेन वह्निवद्वा यत्, तत्कर्मेत्युच्यते जिनैः ॥ १३० ॥
तच्च कर्म पौद्गलिकं, शुभाशुभरसान्वितम् । नत्वन्यतीर्थिकाभीष्टादृष्टादिवदमूर्त्तकम् ॥ १३१ ॥
व्योमादिवदमूर्त्तत्वे त्वस्य विश्वाङ्गिसाक्षिकौ । नैतत्कृतानुग्रहोपघातौ संभवतः खलु ॥ १३२ ॥
हेतवः कर्मबन्धे च, चत्वारो मूलभेदतः । सप्तपञ्चाशदेते च, स्युस्तदुत्तरभेदतः ॥ १३३ ॥
मिथ्यात्वाविरतिकषाययोगसंज्ञाश्च मूलभेदाः स्युः । तत्र च पञ्चविधं स्यान्मिथ्यात्वं तच्च कथितं प्राक् ॥ १३४ ॥
असंयतात्मनां स्यात्, द्वादशधाऽविरतिः खलु । षट्कायारम्भपञ्चाक्षचित्तासंवरलक्षणा ॥ १३५ ॥
कषाया नोकषायाश्च, प्राक् षोडश नवोदिताः । योगास्तथा पञ्चदश, सप्तपञ्चाशदित्यमी ॥ १३६ ॥
कर्मबन्धः प्रकृत्यात्मा, स्थितिरूपो रसात्मकः । प्रदेशबन्ध इत्येवं, चतुर्भेदः प्रकीर्त्तितः ॥ १३७ ॥
प्रकृतिस्तु स्वभावः स्यात्, ज्ञानावृत्यादिकर्मणाम् । यथाज्ञानाच्छादनादिः, स्थितिः कालविनिश्चयः ॥ १३८ ॥
बद्धं विवक्षितं कर्म, कर्मत्वेन हि तिष्ठति । यावत्कालं स्थितिः सा स्यात्, त्यजेत्तत्तां ततः परम् ॥ १३९ ॥

रसो मधुरकट्वादिः, सदसत्कर्मणां मतः । भवेत् प्रदेशबन्धस्तु, दलिकोपचयात्मकः ॥ १४० ॥
यथा हि मोदकः कश्चित्, प्रकृत्या वातहृत् भवेत् । शुंठ्यादिजन्मा कश्चित्तु, पित्तमुज्जीरकादिजः ॥ १४१ ॥
कश्चित्पक्षस्थितिः कश्चिन्मासप्रभृतिकस्थितिः । स्यात्कश्चिन्मधुरः कश्चित्तिक्तः कश्चित्कटुस्तथा ॥ १४२ ॥
कश्चित्सेरदलः कश्चित् द्व्यादिसेरदलात्मकः । कार्यैवं भावना विज्ञैः, प्रकृत्यादिषु कर्मणाम् ॥ १४३ ॥
मूलप्रकृतिभेदेन, तच्च कर्माष्टधा मतम् । स्यात् ज्ञानावरणीयाख्यं, दर्शनावरणीयकम् ॥ १४४ ॥
वेदनीयं मोहनीयमायुर्गोत्रं च नाम च । अन्तरायं चेत्यथैषामुत्तरप्रकृतीर्ब्रुवे ॥ १४५ ॥
ज्ञानानि पञ्चोक्तानि प्राक्, यच्च तेषां स्वभावतः । आच्छादकं पट इव, दृशां तत् पञ्चधा मतम् ॥ १४६ ॥
मतिश्रुतावधिज्ञानावरणानि पृथक् पृथक् । मनःपर्यायावरणं, केवलावरणं तथा ॥ १४७ ॥
आवृतिश्चक्षुरादीनां, दर्शनानां चतुर्विधा । निद्राः पञ्चेति नवधा, दर्शनावरणं मतम् ॥ १४८ ॥
सुखप्रबोधा निद्रा स्यात्, सा च दुःखप्रबोधका । निद्रानिद्रा प्रचला च, स्थितिस्योर्ध्वस्थितस्य वा ॥ १४९ ॥
गच्छतोऽपि जनस्य स्यात्प्रचलाप्रचलाभिधा ॥ स्त्यानर्द्धिर्वासुदेवार्धबलाऽहश्चिन्तितार्थकृत् ॥ १५० ॥

"स्त्याना संघातीभूता गृद्धिः, दिनचिन्तितार्थविषयाभिकांक्षा यस्यां सा स्त्यानगृद्धिः" इति तु कर्मग्रन्थावचूर्णौ ॥

आद्यसंहननापेक्षमिदमस्या बलं मतम् । अन्यथा तु वर्त्तमानयुवभ्योऽष्टगुणं भवेत् ॥ १५१ ॥

अयं कर्मग्रंथवृत्ताद्यभिप्रायः ॥ जीतकल्पवृत्तौ तु "यदुदयेऽतिसंक्लिष्टपरिणामात् दिनदृष्टमर्थमुत्थाय प्रसाधयति केशवार्धबलश्च जायते, तदनुदयेऽपि च स शेषपुरुषेभ्य स्त्रिचतुर्गुणबलो भवति । इयं च प्रथमसंहनिन एव भवती"ति ज्ञेयम् ॥

दर्शनानां हन्ति लब्धिं, मूलाद्यं चतुष्टयम् । लब्धां दर्शनलब्धिं द्राक्, निद्रा निघ्नन्ति पञ्च च ॥ १५२ ॥
वेदनीयं द्विधा साताऽसातरूपं प्रकीर्त्तितम् । स्यादिदं मधुदिग्धासिधारालेहनसन्निभम् ॥ १५३ ॥
यद्वेद्यते प्रियतया स्रगादियोगात् भवेत्तदिह सातम् । यत्कंटकादितोऽप्रियरूपतया वेद्यते त्वसातं तत् ॥ १५४ ॥
यन्मद्यवन्मोहयति, जीवं तन्मोहनीयकम् । द्विधा दर्शनचारित्रमोहभेदात्तदीरितम् ॥ १५५ ॥
मिथ्यात्वमिश्रसम्यक्त्वभेदात्तत्रादिमं त्रिधा । चारित्रमोहनीयं तु, पञ्चविंशतिधा भवेत् ॥ १५६ ॥
कषायाः षोडश नव, नोकषायाः पुरोदिताः । इत्यष्टाविंशतिविधं, मोहनीयमुदीरितम् ॥ १५७ ॥
एति गत्यन्तरं जीवो, येनायुस्तच्चतुर्विधम् । देवायुश्च नरायुश्च, तिर्यङ्नैरयिकायुषी ॥ १५८ ॥
इदं निगडतुल्यं स्यादसमाप्येदमङ्गभाक् । जीवः परभवं गन्तुं, न शक्नोति कदापि यत् ॥ १५९ ॥
गूयते शब्द्यते शब्दैर्यस्मादुच्चावचैर्जनः । तत् गोत्रकर्म स्यादेतत्, द्विधोच्चनीचभेदतः ॥ १६० ॥
इदं कुलालतुल्यं स्यात्, कुलालो हि यथा सृजेत् । किंचित् कुम्भादिभाण्डं तत्, तथा लोकैः प्रशस्यते ॥ १६१ ॥

किञ्चिच्च कुत्सिताकारं, तथा कुर्यादसौ यथा । अक्षिप्तमद्याद्यपि तत्, भाण्डं लोकेन निन्द्यते ॥ १६२ ॥
कर्मणाऽपि तथाऽनेन, धनरूपोज्झितोऽपि हि । उच्चैर्गोत्रतया कश्चित्, प्रशस्यः क्रियतेऽसुमान् ॥ १६३ ॥
कश्चिच्च नीचैर्गोत्रत्वात्, धनरूपादिमानपि । क्रियते कर्मणाऽनेन, निन्द्यो नन्दनृपादिवत् ॥ १६४ ॥
गतिजात्यादिपर्यायानुभवं प्रतिदेहिनः । नामयति प्रह्वयति, यत्तन्नामेति कीर्त्तितम् ॥ १६५ ॥
चित्रकृत्सदृशं चैतत्, विचित्राणि सृजेद्यथा । चित्राण्येष मिथोऽतुल्यान्येवं नामापि देहिनः ॥ १६६ ॥
द्विचत्वारिंशद्विधं तत्, स्थूलभेदविवक्षया । स्याद्वा त्रिनवतिविधं, त्रियुक्शतविधं तु वा ॥ १६७ ॥
सप्तषष्टिविधं वा स्याद्यथाक्रममथोच्यते । विकल्पानां चतुर्णामप्येषां विस्तृतिरागमात् ॥ १६८ ॥
गतिर्जातिर्वपुश्चैवोपाङ्गं बन्धनमेव च । संघातनं संहननं, संस्थानं वर्ण एव च ॥ १६९ ॥
गन्धो रसश्च स्पर्शश्चानुपूर्वी च नभोगतिः । चतुर्दशैता निर्दिष्टाः, पिण्डप्रकृतयो जिनैः ॥ १७० ॥
स्युः प्रत्येकप्रकृतयोऽष्टाविंशतिरिमाः पुनः । त्रसस्थावरदशके, पराघातादि चाष्टकम् ॥ १७१ ॥
त्रसबादरपर्याप्तप्रत्येकस्थिरशुभानि सुभगं च । सुस्वरमादेययशोनाम्नी चेत्याद्यदशकं स्यात् ॥ १७२ ॥
स्थावरसूक्ष्मापर्याप्तकानि साधारणास्थिरे अशुभम् । दुःस्वरदुर्भगनाम्नी भवत्यनादेयमयशश्च ॥ १७३ ॥
द्वितीयं दशकं चैतत्, पराघाताष्टकं त्विदम् । पराघातं तथोच्छ्वासातपोद्योताभिधानि च ॥ १७४ ॥
भवत्यगुरुलघ्वाख्यं, तीर्थकृन्नामकर्म च । निर्माणमुपघातं च, द्विचत्वारिंशदित्यमी ॥ १७५ ॥
चतुर्दशोक्ता गत्याद्याः, पिण्डप्रकृतयोऽत्र याः । पञ्चषष्टिः स्युरेवं ताः, प्रतिभेदविवक्षया ॥ १७६ ॥
गतिश्चतुर्धा नरकतिर्यङ्नरसुरा इति ॥ एकद्वित्रिचतुःपञ्चेन्द्रियाः पञ्चेति जातयः ॥ १७७ ॥
देहान्यौदारिकादीनि, पञ्च प्रागुदितानि वै । त्रिधाऽङ्गोपाङ्गानि तेषां, विना तैजसकार्मणे ॥ १७८ ॥
तत्राङ्गानि बाहुपृष्ठोरुरोमूर्धादिकानि वै । अङ्गुल्यादीन्युपाङ्गानि, भेदोऽङ्गोपाङ्गयोरयम् ॥ १७९ ॥
नखाङ्गुलीपर्वरेखाप्रमुखाण्यपराणि च । अङ्गोपाङ्गानि निर्दिष्टान्युत्कृष्टज्ञानशालिभिः ॥ १८० ॥
औदारिकाद्यङ्गसक्तपुद्गलानां परस्परम् । निबद्धबध्यमानानां, सम्बन्धघटकं हि यत् ॥ १८१ ॥
तद् बन्धनं स्वस्वदेहतुल्याख्यं पञ्चधोदितम् । दार्वादिसन्धिघटकजत्वादिसदृशं ह्यदः ॥ १८२ ॥
औदारिकाद्यङ्गयोग्यान्, संघातयति पुद्गलान् । यत्तत् संघातनं पञ्चविधं बन्धनवत् भवेत् ॥ १८३ ॥
यद्वा पञ्चदशविधमेवं भवति बन्धनम् । औदारिकौदारिकाख्यं, बन्धनं प्रथमं भवेत् ॥ १८४ ॥
औदारिकतैजसाख्यं, तथौदारिककार्मणम् । स्याद्वैक्रियवैक्रियाख्यं, तथा वैक्रियतैजसम् ॥ १८५ ॥
वैक्रियकार्मणाख्यं चाहारकाहारकं तथा । आहारकतैजसं च, तथाऽऽहारककार्मणम् ॥ १८६ ॥
औदारिकतैजसकार्मणं बन्धनमीरितम् । वैक्रियतैजसकार्मणबन्धनमथावरम् ॥ १८७ ॥
आहारकतैजसकार्मणबन्धनमेव च । तैजसतैजसबन्धनं च तैजसकार्मणम् ॥ १८८ ॥

कार्मणकार्मणं चेति, स्युः पञ्चदश तानि हि । तत्र पूर्वसंगृहीतैर्यदौदारिकपुद्गलैः ॥ १८९ ॥
गृह्यमाणौदारिकाङ्गपुद्गलानां परस्परम् । सम्बन्धकृत्तदौदारिकौदारिकाख्यबन्धनम् ॥ १९० ॥
एवं च–औदारिकपुद्गलानां, सह तैजसपुद्गलैः । सम्बन्धघटकं त्यौदारिकतैजसबन्धनम् ॥ १९१ ॥
औदारिकपुद्गलानां, सह कार्मणपुद्गलैः । सम्बन्धकृत्भवत्यौदारिक कार्मणबन्धनम् ॥ १९२ ॥
भावनैवं वैक्रियवैक्रियादिबन्धनेष्वपि । स्वयं विचक्षणैः कार्या, दिङ्मात्रं तु प्रदर्शितम् ॥ १९३ ॥
षट्कं संहननानां संस्थानानां षट्कमेव च । वर्णाः पञ्च रसाः पञ्चाष्टौ स्पर्शा गन्धयोर्द्वयम् ॥ १९४ ॥
तत्र वर्णौ नीलकृष्णौ, कटुतिक्तभिधौ रसौ । गुरुः खरो रुक्षशीताविति स्पर्शचतुष्टयम् ॥ १९५ ॥
दुर्गन्धश्चेति नवकमशुभं परिकीर्त्तितम् । वर्णगन्धरसस्पर्शाः, शेषास्त्वेकादशोत्तमाः ॥ १९६ ॥
आनुपूर्व्यश्चतस्रः स्युश्चतुर्गतिसमाभिधाः । द्विधा विहायोगतिः स्यात्, प्रशस्तेतरभेदतः ॥ १९७ ॥
एवं भेदाः पञ्चषष्टिः, पिण्डप्रकृतिजाः स्मृताः । पञ्चानामौदारिकादिबन्धनानां विवक्षया ॥ १९८ ॥
सा पञ्चषष्टिरष्टाविंशत्या प्रकृतिभिः पुरोक्ताभिः । प्रत्येकाभिर्युक्ताः स्युर्नाम्नस्त्रिनवतिर्भेदाः ॥ १९९ ॥
बन्धनानां पञ्चदशभेदत्वे च विवक्षिते । स्युर्नामकर्मणो भेदास्त्रिभिः समधिकं शतम् ॥ २०० ॥
बन्धनसंघातननाम्नामिह पञ्चदशपञ्चसंख्यानाम् । सह बन्धसजातीयत्वाभ्यां, न स्वाङ्गतः पृथग्गणनम् ॥ २०१ ॥
कृष्णादिभेदभिन्नाया, वर्णादिविंशतेः पदे । सामान्येनैव वर्णादिचतुष्कमिह गृह्यते ॥ २०२ ॥
पूर्वोक्तत्र्युत्तरशतादेषां षट्त्रिंशतस्ततः । कृतेऽपसारणे सप्तषष्टिर्भेदा भवन्ति ते ॥ २०३ ॥
बन्धे तथोदये नाम्नः, सप्तषष्ठिरियं मता । षड्विंशतिश्च मोहस्य, बन्धे प्रकृतयः स्मृताः ॥ २०४ ॥
सम्यक्त्वमिश्रमोहौ यज्जातु नो बन्धमर्हतः । एतौ हि शुद्धार्धशुद्धमिथ्यात्वपुद्गलात्मकौ ॥ २०५ ॥
त्रिपञ्चाशत् प्रकृतयस्तेदेवं शेषकर्मणाम् । नाम्नश्च सप्तषष्टिः स्युः, शतं विंशं च मीलिताः ॥ २०६ ॥
अधिक्रियन्ते बन्धे ता, उदयोदीरणे पुनः । सम्यक्त्वमिश्रसहितास्ता द्वाविंशं शतं खलु ॥ २०७ ॥
नाम्नख्याढयं शतं पञ्चपञ्चाशत् शेषकर्मणाम् । सत्तायामष्टपञ्चाढ्यमेवं प्रकृतयः शतम् ॥ २०८ ॥
चेत् बन्धनानि पञ्चैव, विवक्ष्यन्ते तदा पुनः । अष्टचत्वारिंशशतं, सत्तायां कर्मणां भिदः ॥ २०९ ॥
नामकर्मप्रकृतीनामथैतासां निरूप्यते । प्रयोजनं गुरुपान्ते, समीक्ष्य समयोदधिम् ॥ २१० ॥
चतुर्भ्यो गतिनामभ्यः, प्राप्तिः स्वस्वगतेर्भवेत् । पञ्चभ्यो जातिनामभ्योऽप्येकद्व्याद्यक्षता भवेत् ॥ २११ ॥
पञ्चानां वपुषां हेतुः, स्याद्वपुर्नाम पञ्चधा । औदारिकवैक्रियाहारकाङ्गोपाङ्गसाधनम् ॥ २१२ ॥
त्रिधाऽङ्गोपाङ्गनाम स्यात्, बन्धनानि च पञ्चधा । स्युः पञ्चदश वाङ्गनां, मिथः सम्बन्धहेतवः ॥ ११३ ॥
असत्सु बन्धनेष्वेषु, संघातनामकर्मणा । संहृतानां पुद्गलानां, बन्धो न घटते मिथः ॥ २१४ ॥
सक्तूनां संगृहीतानां, यथा पत्रकरादिना । घृतादिश्लेषणद्रव्यं, विना बन्धो मिथो न हि ॥ २१५ ॥

औदारिकादियोग्यानां, स्यात् संघातननाम तु । संग्राहकं पुद्गलानां, दन्तालीव तृणावलेः ॥ २१६ ॥
षण्णां संहननानां च, संस्थानानां च तावताम् । तत्तद्विशेषकारीणि, स्युर्नामानि तदाख्यया ॥ २१७ ॥
तत्तद्वर्णगन्धरसस्पर्शनिष्पत्तिहेतवः । वर्णादिनामकर्माणि, विंशतिः स्युः शरीरिणाम् ॥ २१८ ॥
द्वित्रिचतुःसमयेन प्रसर्पतां विग्रहेण परलोकम् । कूर्परलाङ्गलगोमूत्रिकादिवद्गमनरूपायां ॥ २१९ ॥
स्यादुदय आनुपूर्व्याः वक्रगतौ वृषभरज्जुकल्पायाः । स्वस्वगतिसमाभिख्याः चतुर्विधास्ताश्च गतिभेदात् ॥ २२० ॥
गतिर्वृषभवत् श्रेष्ठा, सद्विहायोगतेर्भवेत् । खरादिवत् सा दुष्टा स्यादसत्खगतिनामतः ॥ २२१ ॥
त्रसा द्वित्रिचतुः पञ्चेन्द्रिया स्युस्त्रसनामतः । स्युः बादरा बादराख्यात्, स्थूलपृथ्व्यादयोऽङ्गिनः ॥ २२२ ॥
लब्धिकरणपर्याप्ताः, पर्याप्तनामकर्मतः । प्रत्येकतनवो जीवाः, स्युः प्रत्येकाख्यकर्मणा ॥ २२३ ॥
स्थिरनामोदयाद्दन्तास्थ्यादि स्यात् स्थिरमङ्गिनाम् । नाभेरुर्ध्वं च मूर्धादि, शुभनामोदयात् शुभम् ॥ २२४ ॥
स्पृष्टो मूर्धादिना ह्यन्यः, शुभत्वादेव मोदते । अशुभत्वादेव परः, स्पृष्टः क्रुध्येत् पदादिना ॥ २२५ ॥
स्यात्प्रियोऽनुपकर्त्ताऽपि, लोकानां सुभगोदयात् । मनोरमस्वरः प्राणी, भवेत्सुस्वरनामतः ॥ २२६ ॥
अयुक्तवाद्यप्यादेयवाक् स्यादादेयनामतः । यशोनाम्नो यशःकीर्तिः, व्याप्नोति भुवि देहिनाम् ॥ २२७ ॥
तत्र च–
पराक्रमतपस्त्यागाद्युद्भूतयशसा हि यत् । कीर्त्तनं श्लाघनं ज्ञेया, सा यशःकीर्तिरुत्तमैः ॥ २२८ ॥
यद्वा दानादिजा कीर्तिः, पराक्रमकृतं यशः । एकदिग्गामिनी कीर्तिः, सर्वदिग्गामुकं यशः ॥ २२९ ॥
स्थावरः स्यात् स्थावराख्यात्, सूक्ष्मः स्यात्सूक्ष्मनामतः । अपर्याप्तोऽङ्गी म्रियेतापर्याप्तनामकर्मतः ॥ २३० ॥
साधारणाङ्गः स्यात् साधरणाख्यनामकर्मतः । अस्थिरास्थिदन्तजिह्वाकर्णादिः अस्थिरोदयात् ॥ २३१ ॥
नाभेरधोऽशुभं पादादिकं चाशुभनामतः । उपकर्त्ताऽप्यनिष्टः स्याल्लोकानां दुर्भगोदयात् ॥ २३२ ॥

उक्तं च प्रज्ञापनावृत्तौ—"अणुवकए वि बहूणं, जो हु पिओ तस्स सुभगनामुदओ । उवगारकारगो विहु, न रुच्चए दुब्भगस्सुदए ॥ सुभगुदयेऽ वि हु कोई, किंचीआसज्ज दुब्भग्गो जइवि । जायइ तद्दोसाओ जहा अभव्वाण तित्थयरो" ॥

दुष्टानिष्टस्वरो जन्तुर्भवेत् दुःस्वरनामतः । युक्तवाद्यप्यनादेयवाक्योऽनादेयनामतः ॥ २३३ ॥
अयशोऽकीर्तिभाग्जीवोऽयशोनाममोदयात् भवेत् । त्रसस्थावरदशके, एवमुक्ते स्वरूपतः ॥ २३४ ॥
परापघातोदयात् प्राणी, परेषां बलिनामपि । स्यात् दुर्द्धर्षः सदुच्छ्वासलब्धिश्चोच्छ्वासनामतः ॥ २३५ ॥
यतः स्वयमनुष्णोऽपि, भवत्युष्णप्रकाशकृत् । तदातपनामकर्म, रविबिम्बाङ्गिनामिव ॥ २३६ ॥
उष्णस्पर्शोदयादुष्णस्याग्नेर्या तु प्रकाशिता । न ह्यातपात्सा किन्तु स्यात्तादृग्लोहितवर्णतः ॥ २३७ ॥
तदुद्योतनामकर्म, यतोऽनुष्णप्रकाशकृत् । भवति प्राणिनामङ्गं, खद्योतज्योतिरादिवत् ॥ २३८ ॥

रत्नौषध्यादयोऽप्येवमुद्योतनामकर्मणा । द्योतन्ते मुनिदेवाश्च, विहितोत्तरवैक्रियाः ॥ २३९ ॥
यतो वपुर्नातिगुरु, नातिलघ्वङ्गिनां भवेत् । नामकर्मागुरुलघु, तदुक्तं युक्तिकोविदैः ॥ २४० ॥
तद्भवेत्तीर्थकृन्नाम, यतस्त्रिजगतोऽपि हि । अर्चनीयो भवत्यङ्गी, प्रातिहार्याद्यलङ्कृतः ॥ २४१ ॥
तद्विंशतेः स्थानकानामाराधनान्निकाच्यते । भवे तृतीये नृगतावेव सम्यक्त्वशालिना ॥ २४२ ॥
उदयश्च भवत्यस्य, केवलोत्पत्त्यनन्तरम् । वेद्यते चैतदग्लान्या, धर्मोपदेशनादिभिः ॥ २४३ ॥
यथास्थाने नियमनं, कुर्यान्निर्माणनाम तु । अङ्गोपाङ्गानां गृहादिकाष्ठानामिव वार्धकिः ॥ २४४ ॥
प्रतिजिह्वादिना स्वीयावयवेनोपहन्यते । यतः शरीरी तदुपघातनाम प्रकीर्त्तितम् ॥ २४५ ॥
भवेद्दानलाभभोगोपभोगवीर्यविघ्नकृत् । अन्तरायं पञ्चविधं, कोशाध्यक्षसमं ह्यदः ॥ २४६ ॥
यथा दित्सावपि नृपे, न प्राप्नोति धनं जनः । प्रातिकूल्यं गते कोशाध्यक्षे केनापि हेतुना ॥ २४७ ॥
अपि जानन् दानफलं, वित्ते पात्रे च सत्यपि । तथा दातुं न शक्नोति, दानान्तरायविघ्नितः ॥ २४८ ॥
तथैवोपायविज्ञोऽपि, कृतयत्नोऽपि नासुमान् । हेतोः कुतोऽपि प्राप्नोति, लाभं लाभान्तरायतः ॥ २४९ ॥
भोगोपभोगौ प्राप्तावप्यङ्गी भोक्तुं न शक्नुयात् । भोगोपभोगान्तरायविघ्नितो मम्मणादिवत् ॥ २५० ॥
इष्टानिष्टवस्तुलब्धिपरिहारादिषूद्यमम् । शक्तोऽपि कर्त्तुं तं कर्त्तुं, नेष्टे वीर्यान्तरायतः ॥ २५१ ॥
ज्ञानानां च ज्ञानिनां च, गुर्वादीनां तथैव च । ज्ञानोपकरणानां चाशातनाद्वेषमत्सरैः ॥ २५२ ॥
निन्दोपघातान्तरायैः, प्रत्यनीकत्वनिह्नवैः । बध्नात्यावरणकर्म, ज्ञानदर्शनयोर्भवी ॥ २५३ ॥
गुर्वादिभक्तिकरुणाकषायविजयादिभिः । बध्नाति कर्म साताख्यं, दाता सद्धर्मदार्ढ्ययुक् ॥ २५४ ॥
गुर्वादिभक्तिविकलः, कषायकलुषाशयः । असातावेदनीयं च, बध्नाति कृपणोऽसुमान् ॥ २५५ ॥
उन्मार्गदेशको मार्गापलापी साधुनिन्दकः । बध्नाति दर्शनमोहं, देवादिद्रव्यभक्षकः ॥ २५६ ॥
कषायहास्यविषयादिभिर्बध्नाति देहभृत् । कषायनोकषायाख्यं, कर्म चारित्रमोहकम् ॥ २५७ ॥
निबध्नाति नारकायुर्महारम्भपरिग्रहः । तिर्यगायुः शल्ययुक्तो, धूर्त्तश्च जनवञ्चकः ॥ २५८ ॥
नरायुर्मध्यमगुणः, प्रकृत्याऽल्पकषायकः । दानादौ रुचिमान् जीवो, बध्नाति सरलाशयः ॥ २५९ ॥
चतुर्थादिगुणस्थानवर्त्तिनोऽकामनिर्जराः । जीवा बध्नन्ति देवायुस्तथा बालतपस्विनः ॥ २६० ॥
गुणप्रेक्षी त्यक्तमदोऽध्ययनाध्यापनोद्यतः । उच्चं गोत्रमर्हदादिभक्तो नीचमतोऽन्यथा ॥ २६१ ॥
अगौरवश्च सरलः, शुभं नामान्यथाशुभम् । बध्नाति हिंसको विघ्नमर्हत्पूजादिविघ्नकृत् ॥ २६२ ॥
स्थितिरुत्कर्षतो ज्ञानदर्शनावरणीययोः । वेदनीयस्य च त्रिंशदम्भोधिकोटिकोटयः ॥ २६३ ॥
मोहनीयस्य चाब्धीनां, सप्ततिः कोटिकोटयः । आयुषः स्थितिरुत्कर्षात्त्रयस्त्रिंशत्पयोधयः ॥ २६४ ॥
अबाधाकालरहिता, प्रोक्तैषाऽऽयुर्गुरुस्थितिः । तद्युक्तेयं पूर्वकोटीतार्त्तीयीकलवाधिका ॥ २६५ ॥

गोत्रनाम्नोः साऽम्बुधीनां, विंशतिः कोटिकोटयः । स्थितिर्ज्येष्ठान्तरायस्य, स्यात् ज्ञानावरणीयवत् ॥ २६६ ॥
स्थितिर्जघन्यतो ज्ञानदर्शनावरणीययोः । अन्तर्मुहूर्त्तप्रमिता, तत्वविद्भिर्निरुपिता ॥ २६७ ॥
कषायप्रत्ययबन्धमाश्रित्याल्पीयसी स्थितिः । स्यात् द्वादशमुहूर्त्तात्मा, वेदनीयस्य कर्मणः ॥ २६८ ॥
उपशान्तक्षीणमोहादिकानां त्वकषायिणाम् । योगैकहेतुबद्धस्य, वेद्यस्य द्वौ क्षणौ स्थितिः ॥ २६९ ॥
स्थितिर्लघ्यर्न्मुहूर्त्तं, मोहनीयस्य कर्मणः । आयुषः क्षुल्लकभवप्रमिता सा प्रकीर्त्तिता ॥ २७० ॥
अष्टाष्टौ च मुहूर्त्तानि, गोत्रनाम्नोर्लघुः स्थितिः । अन्तर्मुहूर्त्तप्रमिता, साऽन्तरायस्य कर्मणः ॥ २७१ ॥
यावत्कालमनुदयो, बद्धस्य यस्य कर्मणः । तावानबाधाकालोऽस्य, स जघन्येतरो द्विधा ॥ २७२ ॥
अबाधाकाल उत्कृष्टस्त्रयोऽब्दानां सहस्रकाः । आद्यकर्मत्रये सुष्ठु, निर्द्दिष्टो दृष्टविष्टपैः ॥ २७३ ॥
सप्तवर्षसहस्राणि, मोहनीयस्य कर्मणः । पूर्वकोट्यास्तृतीयोऽंशः, स भवत्यायुषो गुरुः ॥ २७४ ॥
गोत्रनाम्नोः कर्मणोस्तु, द्वे द्वे सोऽब्दसहस्रके । त्रीण्येवाब्दसहस्राणि, सोऽन्तरायस्य कर्मणः ॥ २७५ ॥
जघन्यतस्त्वबाधाद्धा, सर्वेषामपि कर्मणाम् । अन्तर्मुहूर्त्तप्रमिता, कथिता तत्त्ववेदिभिः ॥ २७६ ॥
अबाधाकालहीनायां, यथास्वकर्मणां स्थितौ । भवेत्कर्मनिषेकस्तत्, परिभोगाय देहिनाम् ॥ २७७ ॥
कर्मणां दलिकं यत्र, प्रथमे समये बहु । द्वितीयसमये हीनं, ततो हीनतरं क्रमात् ॥ २७८ ॥
एवं या कर्मदलिकरचना क्रियतेऽङ्गिभिः । वेदनार्थमसौ कर्मनिषेक इति कीर्त्यते ॥ २७९ ॥
कर्माण्यमूनि प्रत्येकं, प्राणिनामखिलान्यपि । भवेऽनादौ तिष्ठतां स्युरनादीनि प्रवाहतः ॥ २८० ॥
स्वभावतोऽकर्मकाणां, जीवानां प्रथमं यदि । संयोगः कर्मणामङ्गीक्रियते समये क्वचित् ॥ २८१ ॥
तदा कर्मक्षयं कृत्वा, सिद्धानामपि देहिनाम् । पुनः कदाचित्समये, कर्मयोगः प्रसज्यते ॥ २८२ ॥
विश्लेषस्तु भवेज्जीवादनादित्वेऽपि कर्मणाम् । ज्ञानादिभिः पावकाद्यैरुपलस्येव काञ्चनात् ॥ २८३ ॥
नन्वेवमन्तरायाणां, पञ्चानां मूलतः क्षये । संजाते किं ददात्यर्हन्, सततं लभते च किम् ॥ २८४ ॥
भुङ्क्ते किमुपभुङ्क्ते वा, वीर्यं किं वा प्रवर्त्तयेत् । न चेत्किञ्चित्तदा तेषां, विघ्नानां किं क्षये फलम् ॥ २८५ ॥
अत्रोच्यतेऽर्हतः क्षीणनिःशेषघातिकर्मणः । गुणः प्रादुर्भवत्येषोऽन्तरायाणां क्षये यतः ॥ २८६ ॥
ददतो लभमानस्य, भुञ्जतो वोपभुञ्जतः । वीर्यं प्रयुञ्जतो वाऽस्य, नान्तरायो भवेत्क्वचित् ॥ २८७ ॥
दानलाभादिकं त्वस्य, न सम्भवति सर्वदा । तत्तत्कारणसामग्र्यां, सत्यां भवति नान्यथा ॥ २८८ ॥
नृदेवगत्यानुपूर्व्यौ, जातिः पञ्चेन्द्रियस्य च । उच्चैर्गोत्रं सातवेद्यं, देहाः पञ्च पुरोदिताः ॥ २८९ ॥
अङ्गोपाङ्गत्रयं संहननं संस्थानमादिमम् । वर्णगन्धरसस्पर्शाः, श्रेष्ठा अगुरुलघ्वपि ॥ २९० ॥
पराघातमथोच्छ्वासमातपोद्योतनामनी । नृदेवतिर्यगायूंषि, निर्माणं सन्नभोगतिः ॥ २९१ ॥
तथैव त्रसदशकं, तीर्थकृन्नामकर्म च । द्विचत्वारिंशदित्येवं, पुण्यप्रकृतयो मताः ॥ २९२ ॥

भेदाः पञ्च नव ज्ञानदर्शनावरणीययोः । नीचैर्गोत्रं च मिथ्यात्वमसातवेदनीयकम् ॥ २९३ ॥
नरकस्यानुपूर्वी च, गतिरायुरिति त्रयम् । तिर्यग्गत्यानुपूर्व्यौ च, कषायाः पञ्चविंशतिः ॥ २९४ ॥
एकद्वित्रिचतुरक्षजातयोऽसन्नभोगतिः । अप्रशस्ताश्च वर्णाद्यास्तथोपघातनाम च ॥ २९५ ॥
अनाद्यानि पञ्च संस्थानानि संहननानि च । तथा स्थावरदशकमन्तरायाणि पञ्च च ॥ २९६ ॥
उक्ता द्व्यशीतिरित्येताः, पापप्रकृतयो जिनैः । न भूयान् विस्तरश्चात्र, क्रियते विस्तृतेर्भिया ॥ २९७ ॥
एतेषु कर्मस्वष्टासु, भवत्याद्यं चतुष्टयम् । घातिसंज्ञं जीवसत्कज्ञानादिगुणघातकृत् ॥ २९८ ॥
अन्यं चतुष्टयं च स्यात् भवोपग्राहिसंज्ञकम् । छद्मस्थानां तथा सर्वविदामप्येतदाभवम् ॥ २९९ ॥

पारावारानुकारादिति जिनसमयात् भूरिसारादपारात्
उच्चित्योच्चित्य मुक्ता इव नवसुषमायुक्तिपङ्क्तीरनेकाः ॥
कल्पता जीवस्वरूपप्रकरणरचना योरुमुक्तावलीव,
सोत्कण्ठं कण्ठपीठे कुरुत कृतधियस्तां चिदुद्बोधसिद्ध्यै ॥ ३०० ॥

विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे, सर्गोऽयं दशमः सुधारससमः पूर्णः सुखेनासमः ॥ ३०१ ॥

॥ इति श्रीलोकप्रकाशे दशमः सर्गः संपूर्णः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

अथैकादशः सर्गः ।

पुद्गलानामस्तिकायमथ किञ्चित्तनोम्यहम् । गुरुश्रीकीर्त्तिविजयप्रसादप्राप्तधीधनः ॥ १ ॥
द्रव्यक्षेत्रकालभावगुणैरेषोऽपि पञ्चधा । अनन्तद्रव्यरूपोऽसौ, द्रव्यतस्तत्र वर्णितः ॥ २ ॥
लोक एवास्य सद्भावात्, क्षेत्रतो लोकसंमितः । कालतः शाश्वतो वर्णादिभिर्युक्तश्च भावतः ॥ ३ ॥
गुणतो ग्रहणगुणो, यतो द्रव्येषु षट्स्वपि । भवेत् ग्रहणमस्यैव, न परेषां कदाचन ॥ ४ ॥
भेदाश्चत्वार एतेषां, प्रज्ञप्ताः परमेश्वरैः । स्कन्धा देशाः प्रदेशाश्च, परमाणव एव च ॥ ५ ॥
अनन्तभेदाः स्कन्धाः स्युः, केचन द्विप्रदेशकाः । त्रिप्रदेशादयः संख्यासंख्यानन्तप्रदेशकाः ॥ ६ ॥
सूक्ष्मस्थूलपरिणामाः, स्युः प्रत्येकमनन्तकाः । एकक्षणाद्यसंख्येयकालान्तस्थितिशालिनः ॥ ७ ॥
द्विप्रदेशादिकोऽनन्तप्रदेशान्तो विवक्षितः । स्कन्धसम्बद्धो विभागः, स भवेत् देशसंज्ञकः ॥ ८ ॥
निर्विभाज्यो विभागो यः, स्कन्धसंबद्ध एव हि । परमाणुप्रमाणोऽसौ, प्रदेश इति कीर्त्तितः ॥ ९ ॥
कार्यकारणरूपाः स्युर्द्विप्रदेशादयो यथा । द्विप्रदेशो द्वयोरण्वोः, कार्यं त्र्यणुककारणम् ॥ १० ॥
परमाणुस्त्वप्रदेशः, प्रत्यक्षो ज्ञानचक्षुषाम् । कार्यानुमेयोऽकार्यश्च, भवेत्कारणमेव सः ॥ ११ ॥

यदाहुः "कारणमेव तदन्त्यं, सूक्ष्मो नित्यश्च भवति परमाणुः । एकरसवर्णगन्धो, द्विस्पर्शः कार्यलिङ्गश्च" ॥

तत्रापि—शीतोष्णस्निग्धरूक्षेषु, द्वौ चतुर्ष्वविरोधिनौ । स्पर्शौ स्यातां परमाणुष्वपरे न कथञ्चन ॥ १२ ॥

तथाहुः । "परमाण्वादीनामसंख्यातप्रदेशकस्कन्धपर्यन्तानां केषाञ्चिदनन्तप्रादेशिकानामपि स्कन्धानां, तथैकप्रदेशावगाढानां यावत्संख्यातप्रदेशावगाढानां शीतोष्णस्निग्धरूक्षरुपाश्चत्वार एव स्पर्शा" इति प्रज्ञापनावृत्तौ ॥

द्रव्यक्षेत्रकालभावैः, परमाणुश्चतुर्विधः । द्रव्यतोऽणुः पुद्गलाणुश्चतुर्लक्षण एव सः ॥ १३ ॥
अदाह्योऽग्राह्य एवासावभेद्योऽच्छेद्य एव च । क्षेत्राणुस्त्वभ्रप्रदेशश्चतुर्लक्षण एव सः ॥ १४ ॥
अप्रदेशोऽविभागश्चामध्योऽनर्ध इति स्मृतः । कालाणुः समयाख्यः स्याच्चतुर्लक्षण एव सः ॥ १५ ॥
वर्णगन्धरसस्पर्शैः, रहितश्चाथ भावतः । द्रव्याणुरेव वर्णादिभावप्राधान्यतो मतः ॥ १६ ॥
भावाणुरथवा सर्वजघन्यश्यामतादिकम् । इह प्रयोजनं द्रव्यपरमाणुभिरेव हि ॥ १७ ॥

इति भगवतीशतक २० उद्देश ५ ॥

स नित्यानित्यरुपः स्यात्, द्रव्यपर्यायभेदतः । तत्र च द्रव्यतो नित्यः, परमाणोरनाशतः ॥ १८ ॥
पर्यायतस्त्वनित्योऽसौ, यतो वर्णादिपर्यवाः । नश्यन्त्येके भवन्त्यन्ये, विस्रसादिप्रभावतः ॥ १९ ॥
अस्य शाश्वतभावेन, केचित् पर्यवनित्यताम् । मन्यन्ते तदसद्यस्मात्, पञ्चमाङ्गे स्फुटं श्रुतम् ॥ २० ॥

"परमाणुपुग्गलेणं भंते, सासए असासए । गोयम सिअ सासए, सिअ असासए ॥ से केणट्ठेणं भंते, एवं वुच्चति ॥ गोअम, दव्वट्ठयाए सासए, पज्जवट्ठयाए असासए" इति ॥

पुद्गलानां दशविधः, परिणामोऽथ कथ्यते । बन्धनाख्यो गतिनामा, संस्थानाख्यस्तथाऽपरः ॥ २१ ॥
भेदाख्यः परिणामः स्यात्, वर्णगन्धरसाभिधाः । स्पर्शोऽगुरुलघुः शब्दः, परिणामा दशेत्यमी ॥ २२ ॥
स्याद्विस्रसाप्रयोगाभ्यां, बन्धः पौद्गलिको द्विधा । तत्र यो विस्रसाबन्धः, सोऽपि त्रिविध इष्यते ॥ २३ ॥
बन्धनप्रत्ययः पात्रप्रत्ययः परिणामजः । बन्धनप्रत्ययस्तत्र, स्कन्धेषु द्व्यणुकादिषु ॥ २४ ॥
भवेद्धि द्व्यणुकादीनां विमात्रस्नैग्ध्यरौक्ष्यतः । मिथो बन्धोऽसंख्यकालमुत्कर्षात्समयोऽन्यथा ॥ २५ ॥

यदाहुः—"समनिद्धयाए बन्धो, न होइ समलुक्खयाएऽवि न होइ । वेमायनिद्धलुक्खत्तणेण बन्धोउ खंधाणं" ॥ विषममात्रानिरुपणार्थं चोच्यते । "निद्धस्स निद्धेण दुयाहिएण । लुक्खस्स लुक्खेण दुयाहिएण । निद्धस्स लुक्खेण उवेति बंधो । जहन्नवज्जो विसमो समो वा" ॥

जीर्णमद्यगुडादीनां, भाजने स्त्यानता तु या । स पात्रप्रत्ययः संख्यकालो वाऽऽन्तर्मुहूर्तिकः ॥ २६ ॥
परिणामप्रत्ययस्तु, सोऽभ्रादीनामनेकधा । जघन्यश्चैकसमयं, षण्मासान् परमः पुनः ॥ २७ ॥

इति विस्रसाबन्धः ॥

अथ प्रयोगबन्धो यः, स चैषां स्याच्चतुर्विधः । आलापनश्चालीनश्च, शारीरतत्प्रयोगकौ ॥ २८ ॥

तृणकाष्ठादिभाराणां, रज्जुवेत्रलतादिभिः । संख्यकालन्तर्मुहूर्त्तौ, बन्ध आलापनाभिधः ॥ २९ ॥
चतुर्धाऽऽलीनबन्धस्तु, प्रथमः श्लेषणाभिधः । समुच्चयोच्चयौ बन्धौ, तुर्यः संहननाभिधः ॥ ३० ॥
यः कुड्यकुट्टिमस्तम्भघटकाष्ठादिवस्तुषु । सुधामृत्पङ्कलाक्षाद्यैर्बन्धः स श्लेषणाभिधः ॥ ३१ ॥
तटाकदीर्घिकावप्रस्तूपदेवकुलादिषु । बन्धः सुधादिभिर्यः स्यात्, बहूनां स समुच्चयः ॥ ३२ ॥
तृणावकरकाष्ठानां, तुषगोमयभस्मनाम् । उच्चत्वेन च यो बन्धः, स स्यादुच्चयसंज्ञकः ॥ ३३ ॥
द्विधा संहननाख्यस्तु, देशसर्वविभेदतः । तत्राद्यः शकटाङ्गादौ, परः क्षीरोदकादिषु ॥ ३४ ॥
आरभ्यालापनादेषां, जघन्योत्कर्षतः स्थितिः । अन्तर्मुहूर्त्तसंख्यातकालौ ज्ञेया विचक्षणैः ॥ ३५ ॥
द्विधा शरीरबन्धः स्यादेकः पूर्वप्रयोगजः । प्रत्युत्पन्नप्रयोगोत्थः, परः सोऽभूतपूर्वकः ॥ ३६ ॥
तत्राद्योऽन्यसमुद्घाते, क्षिप्तानां देहतो बहिः । तैजसकार्मणाणूनां, पुनः संकोचने भवेत् ॥ ३७ ॥
समुद्घातान्निवृत्तस्य, परः केवलिनोऽष्टसु । स्यात् पञ्चमे क्षणे तेजःकार्मणाणुसमाहृतौ ॥ ३८ ॥
आत्मप्रदेशविस्तारे, तेजःकार्मणयोरपि । विस्तारः संहृतौ तेषां, संघातः स्यात्तयोरपि ॥ ३९ ॥
देहप्रयोगबन्धस्तु, बहुधौदारिकादिकः । स पञ्चमाङ्गे शतकेऽष्टमे ज्ञेयः सविस्तरः ॥ ४० ॥
इति बन्धपरिणामः ॥ १ ॥

गतेः परिणतिर्द्वेधा, संस्पृशन्त्यस्पृशन्त्यपि । द्वयोरयं विशेषस्तु, वर्णितस्तत्त्वपारगैः ॥ ४१ ॥
पुद्गलस्यान्तरा वस्त्वन्तरं संस्पृशतो गतिः । याऽसौ भवेत् संस्पृशन्ती, द्वितीया स्यात्ततोऽन्यथा ॥ ४२ ॥
अथवा–द्विधा गतिपरीणामो, दीर्घान्यगतिभेदतः । दीर्घदेशान्तरप्राप्तिहेतुराद्योऽन्यथापरः ॥ ४३ ॥
एकेन समयेनैव, पुद्गलः किल गच्छति । लोकान्तादन्यलोकान्तं, गतेः परिणतेर्बलात् ॥ ४४ ॥

तथाहुः । "परमाणुपुग्गलेणं भंते ! लोगस्स पुरत्थिमिल्लातो चरिमंताओ पच्चत्थिमिल्लं चरिमंतं एग समएणं गच्छति ? (पच्चत्थिमिल्लाओ चरिमंताओ पुरच्छिमिल्लं चरिमंतं एगसमएणं गच्छति ?) दाहिणिल्लाओ चरिमंताओ उत्तरिल्लं चरिमंतं, उत्तरिल्लाओ चरिमंताओ दाहिणिल्लं चरिमंतं, उवरिल्लाओ चरिमंताओ हेट्ठिल्लं चरिमंतं, हेट्ठिल्लाओ चरिमंताओ उवरिल्लं चरिमंतं एगेणं समएणं गच्छति ? हंता गोयमा ! जाव गच्छति" ॥ इति भगवतीसूत्रे शतक १६ उद्देश ८ ॥ इति गतिपरीणामः ॥ २ ॥

परिमण्डलं च वृत्तं, त्र्यस्रं च चतुरस्रकम् । आयतं च रूप्यजीवसंस्थानं पञ्चधा मतम् ॥ ४५ ॥
मण्डलावस्थिताण्वोघं, बहिः शुषिरमन्तरे । वलयस्येव तद् ज्ञेयं, संस्थानं परिमण्डलम् ॥ ४६ ॥
अन्तःपूर्णं तदेव स्यात्, वृत्तं कुलालचक्रवत् । त्र्यस्रं शृंगाटवत् कुम्भिकादिवच्चतुरस्रकम् ॥ ४७ ॥
आयतं दण्डवत् दीर्घं, घनप्रतरभेदतः । चत्वारि स्युर्द्विधा संस्थानानि प्रत्येकमादितः ॥ ४८ ॥
आयतं तु त्रिधा श्रेणिघनप्रतरभेदतः । ओजयुग्मप्रदेशानि, द्वेधाऽमूनि विनाऽऽदिमम् ॥ ४९ ॥

ओजःप्रदेशं प्रतरवृत्तं पञ्चाणुसम्भवम् । पञ्चाकाशप्रदेशावगाढं च परिकीर्त्तितम् ॥ ५० ॥
यत्र प्रदेशाश्चत्वारश्चतुर्दिशं प्रतिष्ठिताः । एकप्रदेशोऽन्तर्वृत्तप्रतरं तद्यथोदितम् ॥ ५१ ॥
युग्मप्रदेशं प्रतरवृत्तं च द्वादशाणुकम् । तावदभ्रांशावगाढं, तच्चैवमिह जायते ॥ ५२ ॥
चतुर्ष्वभ्रप्रदेशेषु, चत्वारोऽंशा निरन्तरम् । स्थाप्यन्ते रुचकाकारास्तत्परिक्षेपतस्ततः ॥ ५३ ॥
द्वौ द्वौ चतुर्दिशं स्थाप्यौ, प्रदेशौ जायते ततः । युग्मप्रदेशं प्रतरवृत्तमुक्तं पुरातनैः ॥ ५४ ॥
सप्ताणुकं सप्तखांशावगाढं च भवेदिह । ओजःप्रदेशनिष्पन्नं, घनवृत्तं हि तद्यथा ॥ ५५ ॥
पञ्चप्रदेशे प्रतरवृत्ते किल पुरोदिते । अध ऊर्ध्वं च मध्याणोरेकैकोऽणुर्निवेश्यते ॥ ५६ ॥
द्वात्रिंशदणुसंपन्नं, तावत्खांशावगाढकम् । युग्मप्रदेशं हि घनवृत्तं भवति तद्यथा ॥ ५७ ॥
उक्तप्रतरवृत्तस्य, द्वादशांशात्मकस्य वै । उपरिष्टात् द्वादशान्ये, स्थाप्यन्ते परमाणवः ॥ ५८ ॥
ततः पुनर्मध्यमाणुचतुष्कस्याप्युपर्यधः । स्थाप्यन्ते किल चत्वारश्चत्वारः परमाणवः ॥ ५९ ॥
ओज प्रदेशं प्रतरत्र्यस्रं तु त्रिप्रदेशकम् । त्रिप्रदेशावगाढं च, तदेवं जायते यथा ॥ ६० ॥
स्थाप्येते द्वावणू पङ्क्त्या, ह्येकस्याधस्ततः परम् । एकोऽणुः स्थाप्यत इति, निर्दिष्टं शिष्टदृष्टिभिः ॥ ६१ ॥
युग्मप्रदेशं प्रतरत्र्यस्रं तु षट्प्रदेशकम् । षट्प्रदेशावगाढं च, तदेवं किल जायते ॥ ६२ ॥
त्रयः प्रदेशाः स्थाप्यन्ते, पङ्क्त्याऽणुद्वितयं ततः । आद्यस्याधो द्वितीयस्य, त्वध एको निवेश्यते ॥ ६३ ॥
ओजाणुकं घनत्र्यस्रं, पञ्चत्रिंशत्प्रदेशकम् । पञ्चत्रिंशत्खप्रदेशावगाढं च भवेद्यथा ॥ ६४ ॥
तिर्यक् निरन्तराः पञ्च, स्थाप्यन्ते परमाणवः । तानधोऽधः क्रमेणैवं, स्थाप्यन्ते परमाणवः ॥ ६५ ॥
तिर्यगेव हि चत्वारस्त्रयो द्वावेक एव च । जातोऽयं प्रतरः पञ्चदशांशः पञ्चपङ्क्तिकः ॥ ६६ ॥
ततश्चास्योपरि सर्वपङ्क्तिष्वन्त्यान्त्यमंशकम् । विमुच्यांश दश स्थाप्यास्तस्याप्युपरि षट् तथा ॥ ६७ ॥
इत्थमेव तदुपरि, त्रय एकस्ततः पुनः । उपर्यस्यापीति पंचत्रिंशत्स्युः परमाणवः ॥ ६८ ॥
युग्मप्रदेशं तु घनत्र्यस्रं चतुःप्रदेशकम् । चतुर्व्योमांशावगाढं, तदप्येवं भवेदिह ॥ ६९ ॥
पूर्वोक्ते प्रतरत्र्यस्रे, त्रिप्रदेशात्मके किल । अणोरेकस्योर्ध्वमेकः, स्थाप्यते परमाणुकः ॥ ७० ॥
ओजःप्रदेशं प्रतरचतुरस्रं नवांशकम् । नवाकाशांशावगाढमित्थं तदपि जायते ॥ ७१ ॥
तिर्यग् निरन्तरं तिस्रः, पङ्क्तयस्त्रिप्रदेशिकाः । स्थाप्यन्ते तर्हि जायेत, चतुरस्रमयुग्मजम् ॥ ७२ ॥
युग्मप्रदेशं प्रतरचतुरस्रं तु तद् भवेत् । चतुरभ्रांशावगाढं, चतुःप्रदेशसम्भवम् ॥ ७३ ॥
द्विद्विप्रदेशे द्वे पङ्क्ती, स्थाप्येते तत्र जायते । युग्मप्रदेशं प्रतरचतुरस्रं यथोदितम् ॥ ७४ ॥
सप्तविंशत्यणुजातं, तावदभ्रांशसंस्थितम् । ओजःप्रदेशं हि घनचतुरस्रं भवेदिह ॥ ७५ ॥
नवप्रदेशप्रतरचतुरस्रस्य तस्य वै । उपर्यधो नव नव, स्थाप्यन्ते परमाणवः ॥ ७६ ॥

अष्टव्योमांशावगाढं, स्पष्टमष्टप्रदेशकम् । युग्मप्रदेशं तु घनचतुरस्रं भवेद्यथा ॥ ७७ ॥
चतु:प्रदेशप्रतरचतुरस्रस्य चोपरि । चतु:प्रादेशिकोऽन्योऽपि, प्रतरः स्थाप्यते किल ॥ ७८ ॥
ओज:प्रदेशजं श्रेण्यायतं स्यात्त्रिप्रदेशजम् । त्र्यंशावगाढमणुषु, त्रिषु न्यस्तेषु संततम् ॥ ७९ ॥
निरन्तरं स्थापिताभ्यामणुभ्यां द्विप्रदेशजम् । युग्मप्रदेशजं श्रेण्यायतं द्व्यभ्रांशसंस्थितम् ॥ ८० ॥
ओज:प्रदेशं प्रतरायतं पञ्चदशांशकम् । तावद्व्योमांशावगाढमित्थं तदपि जायते ॥ ८१ ॥
पङ्क्तित्रयेऽपि स्थाप्यन्ते, पञ्चपञ्चाणवस्तदा । ओज:प्रदेशजनितं, भवति प्रतरायतम् ॥ ८२ ॥
षट्खांशस्थं षट्प्रदेशं, स्याद्युग्मप्रतरायतम् । त्रिषु त्रिषु द्वयोः पङ्क्त्योर्न्यस्तेषु परमाणुषु ॥ ८३ ॥
पञ्चचत्वारिंशदंशमोजाणुकं घनायतम् । पञ्चचत्वारिंशदभ्रप्रदेशेषु प्रतिष्ठितम् ॥ ८४ ॥
तत्र च–पूर्वमुक्ते पञ्चदशप्रदेशप्रतरायते । पञ्चदश पञ्चदशाणवः स्थाप्या उपर्यधः ॥ ८५ ॥
द्वादशांशं द्वादशाभ्रांशावगाढं घनायतम् । युग्मप्रदेशजं ज्ञेयमित्थं तदपि जायते ॥ ८६ ॥
षडंशकस्य प्रतरायतस्योपरि विन्यसेत् । षट्प्रदेशांस्ततो युग्मप्रदेशं स्यात् घनायतम् ॥ ८७ ॥
विंशत्यभ्रांशावगाढं, विंशत्यंशात्मकं भवेत् । युग्मप्रदेशं प्रतरपरिमण्डलनामकम् ॥ ८८ ॥
चतुर्दिशं तु चत्वारश्चत्वारः परमाणवः । विदिक्षु स्थाप्य एकैको, भवेदेवं कृते सति ॥ ८९ ॥
अणूनां विंशतेरेषामुपर्यणुषु विंशतौ । स्थापितेषु युग्मजातं, स्यात् घनं परिमण्डलम् ॥ ९० ॥
एतच्चत्वारिंशदंशं, तावत्खांशप्रतिष्ठितम् । ओज:प्रदेशजनितौ, त्वत्र भेदौ न संमतौ ॥ ९१ ॥
उक्तप्रदेशन्यूनत्वे, सम्भवन्ति न निश्चितम् । संस्थानानि यथोक्तानि, तत इत्थं प्ररुपणा ॥ ९२ ॥
यथा पूर्वोक्तत: पञ्चाणुकप्रतरवृत्तत: । एकत्रांशे कर्षिते स्यात्, समांशं चतुरस्रकम् ॥ ९३ ॥
एतान्यतीन्द्रियत्वेन, नैवातिशयवर्जितैः । ज्ञेयान्यतः स्थापनाभिः, प्रदर्श्यन्ते इमास्तु ताः ॥ ९४ ॥
जघन्यानि किलैतानि, सर्वाण्युत्कर्षतः पुनः । अनन्ताणुस्वरुपाणि, मध्यमान्यपराणि तु ॥ ९५ ॥

तथोक्तमुत्तराध्ययननिर्युक्तौ । "परिमंडले य वट्ट, तंसे चउरंस आयए चेव । घणपयरपढमवज्जं, ओजपएसे य जुम्मे य ॥ पंचगबारसगं खलु सत्तगबत्तीसगं च वट्टंमि । तिअ छक्कगपणतीसा चतारि य होंति तंसंमि ॥ नव चेव तहा चउरो सत्तावीसा य अट्ठ चउरंसे । तिगदुगपन्नरसेव य छच्चेव य आयए होंति ॥ पणयालाबारसगं तह चेव य आययंमि संठाणे । वीसा चत्तालीसा परिमंडलए य संठाणे" ॥

पञ्चमाङ्गे त्वनित्थंस्थं, षष्ठं संस्थानमीरितम् ॥ पञ्चभ्योऽपि व्यतिरिक्तं, द्व्यादिसंयोगसंभवम् ॥ ९६ ॥
संस्थानयोर्द्वयोर्यद्यप्येकद्रव्ये न संभवः । तथापि भिन्नभिन्नांशे, ते स्यातां दर्विकादिवत् ॥ ९७ ॥
एषु चाल्पाल्पप्रदेशावगाहीनि स्वभावतः । भूयांस्यल्पानि भूयिष्ठखांशस्थायीनि तानि च ॥ ९८ ॥

संस्थानमायतं षोढा, द्विविधं परिमण्डलम् । चतुर्विधानि शेषाणि, संस्थानानीति विंशतिः ॥ ९९ ॥
इति संस्थानपरीणामः ॥ ३ ॥
भेदाख्यः पुद्गलपरीणामो भवति पञ्चधा । खण्डप्रतरभेदौ द्वौ, चूर्णिकाभेद इत्यपि ॥ १०० ॥
भेदोऽनुतटिकाभिख्यो, भेद उत्करिकाभिधः । स्वरूपमप्यथैतेषां, यथाश्रुतमथोच्यते ॥ १०१ ॥
लोहखण्डादिवत्खण्डभेदो भवति निश्चितम् । भूर्जपत्राभ्रपटलादिवत् प्रतरसंज्ञितः ॥ १०२ ॥
स भवेच्चूर्णिकाभेदः, क्षिप्तमृत्पिण्डवत्किल । इक्षुत्वगादिवदनुतटिकाभेद इष्यते ॥ १०३ ॥
उत्कीर्यमाणे प्रस्थादौ, स स्यादुत्करिकाभिधः । तटाकावटवाप्यादिष्वप्येवं भाव्यतामयम् ॥ १०४ ॥
द्रव्याणि भिद्यमानानि, स्तोकान्युत्करिकाभिदा । पश्चानुपूर्व्या शेषाणि, स्युरनन्तगुणानि च ॥ १०५ ॥
इति भेदपरीणामः ॥ ४ ॥
वर्णैः परिणतानां तु, भेदाः पञ्च प्ररुपिताः । कृष्णनीलारुणपीतशुक्ला इति विभेदतः ॥ १०६ ॥
स्युः कज्जलादिवत्कृष्णा, नीला नील्यादिवन्मताः । स्युर्हिङ्गुलादिवद्रक्ताः, पीताश्च काञ्चनादिवत् ॥ १०७ ॥
इति वर्णपरीणामः ॥ ५ ॥
शुक्लाः शङ्खादिवत् गन्धपरिणत्या तु ते द्विधा । पुष्पादिवत्सुरभयो, दुर्गन्धा लशुनादिवत् ॥ १०८ ॥
इति गन्धपरीणामः ॥ ६ ॥
रसैः परिणतास्ते तु, प्रकारैः पञ्चभिर्मताः । तिक्तकटुकषायाम्लमधुरा इति भेदतः ॥ १०९ ॥
कोशातक्यादिवत्तिकाः, कटवो नागरादिवत् । प्रोक्ता आमकपित्थादिवत् कषायरसाञ्चिताः ॥ ११० ॥
अम्लिकादिवदम्लाः स्युर्मधुराः शर्करादिवत् । स्पर्शैः परिणता येऽपि, तेषामष्टौ विधाः पुनः ॥ १११ ॥
इति रसपरीणामः ॥ ७ ॥
उष्णशीतौ मृदुखरौ, स्निग्धरुक्षौ गुरुर्लघुः । उष्णस्पर्शास्तत्र वह्न्यादिवत् शीता हिमादिवत् ॥ ११२ ॥
बर्हादिवच्च मृदवः, खराश्च प्रस्तरादिवत् । स्निग्धा घृतादिवत् ज्ञेया, रुक्षा भस्मादिवन्मताः ॥ ११३ ॥
गुरुस्पर्शपरिणता, वज्रादिवत्प्रकीर्त्तिताः । लघुस्पर्शपरिणता, अर्कतूलादिवन्मताः ॥ ११४ ॥
इति स्पर्शपरीणामः ॥ ८ ॥ अगुरुलघुपरीणामव्यवस्था चैवम् ।
धूमो लघुरुपलो गुरुः ऊर्ध्वाधोगमनशीलतो ज्ञेयौ । गुरुलघुरनिलस्तिर्यग्गमनादाकाशमगुरुलघु ॥ ११५ ॥
व्यवहारतश्चतुर्धा भवन्ति वस्तूनि बादराण्येव । निश्चयतश्चागुरुलघु गुरुलघु चेति द्विभेद्येव ॥ ११६ ॥
तत्रापि–
बादरमष्टस्पर्शं द्रव्यं रुप्येव भवति गुरुलघुकम् । अगुरुलघु चतुःस्पर्शं सूक्ष्मं वियदाद्यमूर्त्तमपि ॥ ११७ ॥
वैक्रियमौदारिकमपि तैजसमाहारकं च गुरुलघुकम् । कार्मणमनोवचांसि च सोच्छ्वासान्यगुरुलघुकानि ॥ ११८ ॥

तथोक्तम्– "निच्छयओ सव्वगुरुं सव्वलहुं वा न विज्जए दव्वम् । ववहारओ उ जुज्जइ बायरखंधेसु नऽण्णेसु" ॥ अगुरुलहू चउफासा अरुविदव्वा य होंति नायव्वा । सेसा उ अट्ठफासा गुरुलहुआ निच्छयनयस्स ॥ ओरालिय वेउव्विय आहारग तेय गुरुलहू दव्वा । कम्मगमणभासाई एयाइं अगुरुलहुआइं" ॥ इति भगवतीवृत्तौ ॥ इति अगुरुलघुपरीणामः ॥ ९ ॥

वर्णगन्धरसस्पर्शसंस्थानैर्मुख्यभावतः । प्रत्येकं चिन्तितैर्भेदाः, स्युर्भूयांसोऽत्र ते त्वमी ॥ ११९ ॥
एकस्योज्जवलवर्णस्य, द्वौ भेदौ गंधभेदतः । संस्थानैश्च रसैश्चापि, पञ्च पञ्च भिदो मताः ॥ १२० ॥
स्पर्शैस्तथाष्ट भेदाः स्युरेवमेकस्य विंशतिः । इतीह पञ्चभिर्वर्णैभेदानां शतमाप्यते ॥ १२१ ॥
संस्थानानां रसानां च, प्राधान्येनैवमिष्यते । शतं शतं विभेदानां, ततो जातं शतत्रयम् ॥ १२२ ॥
सुगन्धीनां पञ्च पञ्च, भेदा वर्णै रसैस्तथा । संस्थानैश्चाष्ट तु स्पर्शैः, स्युस्त्रयोविंशतिस्ततः ॥ १२३ ॥
दुर्गन्धानामपीत्थं स्युस्त्रयोविंशतिरेव हि । षट्चत्वारिंशदुभययोगे स्युर्गंधजा इति ॥ १२४ ॥
शीतस्पर्शस्यापि भेदौ, द्वौ मतौ गन्धभेदतः । संस्थानरसवर्णैश्च, पञ्च पञ्च भिदस्तथा ॥ १२५ ॥
शीतस्याधिकृतत्वेन, तत्रोष्णस्य त्वसंभवात् । भिदोऽस्य शेषैः स्पर्शैः षट्, स्युस्त्रयोविंशतिस्ततः ॥ १२६ ॥
स्पर्शानामेवमष्टानां, प्रत्येकं गन्धयोरपि । त्रयोविंशतिभेदत्वात्, द्विशती त्रिंशदुत्तरा ॥ १२७ ॥
एवमेते पुद्गलानां, भेदाः सर्वे प्रकीर्तिताः । शतानि पञ्च सत्रिंशान्येवमजीवरूपिणाम् ॥ १२८ ॥

अथ दशमः शब्दपरीणामः ।

योऽसौ शब्दपरीणामो, द्विधा सोऽपि शुभोऽशुभः । पुद्गलानां परीणामा, दशाप्येवं निरुपिताः ॥ ११९ ॥
गन्धद्रव्यादिवद्घ्रातानुकूल्येन प्रसर्पणात् । तादृशद्रव्यवच्छ्रोत्रोपघातकतयापि च ॥ १३० ॥
ध्वनेः पौद्गलिकत्वं स्याद्यौक्तिकं यत्तु केचन । मन्यन्ते व्योमगुणतां, तस्य तन्नोपयुज्यते ॥ १३१ ॥
अस्य व्योमगुणत्वे तु दूरासन्नस्थशब्दयोः । श्रवणे न विशेषः स्यात्, सर्वगं खलु यन्नभः ॥ १३२ ॥
यथा शब्दस्तथा छायातपोद्योततमांस्यपि । सन्ति पौद्गलिकान्येवेत्याहुः श्रीजगदीश्वराः ॥ १३३ ॥
यदादर्शादौ मुखादेः, प्रतिबिम्बं निरीक्ष्यते । सोऽपि छायापुद्गलानां, परिणामो न तु भ्रमः ॥ १३४ ॥
भ्रमो ज्ञानान्तरबाध्यः, स्यान्नैतत्तु तथेक्ष्यते । न च भ्रमः स्यात्सर्वेषां, युगपत्पदुचक्षुषाम् ॥ १३५ ॥
सर्वस्थूलपदार्थानां, ते छायापुद्गलाः पुनः । साक्षादेव प्रतीयन्ते, छायादर्शनतः स्फुटाः ॥ १३६ ॥
सर्वं ह्यैन्द्रियकं वस्तु, चयापचयधर्मकम् । रश्मिवच्च रश्मयस्तु, छायापुद्गलसंहतिः ॥ १३७ ॥

तथोक्तं प्रज्ञापनावृत्तौ । "सर्वमैन्द्रियकं वस्तु स्थूलं चयापचयधर्मकं रश्मिवच्चेति" ॥

अवाप्य तादृक्सामग्रीं, ते छायापुद्गलाः पुनः । विचित्रपरिणामाः स्युः, स्वभावेन तथोच्यते ॥ १३८ ॥
यदातपादियुक्ते ते, गता वस्तुन्यभास्वरे । तदा स्वसम्बन्धिवस्त्वाकाराः स्युः श्यामरुपकाः ॥ १३९ ॥

दृश्यते ह्यातपज्योत्स्नादीपालोकादियोगतः । स्थूलद्रव्याकृतिश्छाया, भूम्यादौ श्यामरुपिका ॥ १४० ॥
यदा तु खड्गादर्शादिभास्वरद्रव्यसङ्गताः । तदा स्युस्ते स्वसंबंधिद्रव्यवर्णाकृतिस्पृशः ॥ १४१ ॥
आदर्शादौ प्रतिच्छाया, यत्प्रत्यक्षेण दृश्यते । मूलवस्तुसदृग्वर्णाकारादिभिः समन्विता ॥ १४२ ॥
एषां स्वरूपवैचित्र्यं, न चैतन्नोपपद्यते । सामग्रीसहकारेण, नानावस्था हि पुद्गलाः ॥ १४३ ॥
यथा दीपादिसामग्र्या, तामसा अपि पुद्गलाः । प्रकाशरूपाः स्युर्दीपापगमे तादृशाः पुनः ॥ १४४ ॥
आतपोद्योतयोः पौद्गलिकत्वं तु निर्विवादम् ॥
पुद्गलत्वं तु तमसां, शीतस्पर्शतया स्फुटम् । नीलं चलत्यन्धकारमित्यादिप्रत्ययादपि ॥ १४५ ॥
याश्चाप्रतीघातिताद्याः, परोक्ताः प्रतियुक्तयः । तास्तु दीपप्रकाशादिप्रतिबन्धिपराहताः ॥ १४६ ॥
इति उपरम्यते विस्तरात्तदर्थिना रत्नाकरावतारिकादयो विलोक्याः ॥

इति पुद्गलतत्त्वमागमे, गदितं यत्किल तत्वदर्शिभिः ।
तदनूदितमत्र मद्गिरा, गुहयेव प्रतिशब्दितस्पृशा ॥ १४७ ॥

विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्वप्रदीपोपमे, सर्गो निर्गलितार्थसार्थसुभगः पूर्णोऽयमेकादशः ॥ १४८ ॥

॥ इति श्रीलोकप्रकाशे एकादशः सर्गः संपूर्णः ॥

इति महोपाध्यायश्रीविनयविजयगणिविरचिते लोकप्रकाशे
समाप्तो द्रव्यलोकः ॥

॥ ॐ ह्रीँ अर्हं नमः ॥

ऐं नमः

महामहोपाध्याय श्रीमद् विनयविजयगणिवरविरचितः

श्री लोकप्रकाशः

क्षेत्रलोकः

अथ द्वादशः सर्गः

जयत्यभिनवः कोऽपि, शङ्खेश्वरजिनेश्वरः । त्रिविष्टपोद्योतहेतुर्नरक्षेत्रस्थितोऽपि यः ॥ १ ॥
स्वरूपं क्षेत्रलोकस्य, यथाश्रुतमथोच्यते । गुरुश्रीकीर्तिविजयप्रसादाप्तधिया मया ॥ २ ॥
नरं वैशाखसंस्थानस्थितपादं कटीतटे । न्यस्तहस्तद्वयं सर्वदिक्षु लोकोऽनुगच्छति ॥ ३ ॥
चिरमूर्द्ध्वंदमतया, चिरन्तनतयापि च । असौ लोकनरः श्रान्त, इव कट्यां न्यधात् करौ ॥ ४ ॥
अथवाधोमुखस्थायिमहाशरावपृष्टगम् । एष लोकोऽनुकुरुते, शरावसंपुटं लघु ॥ ५ ॥
धृतः कृतो न केनापि, स्वयंसिद्धो निराश्रयः । निरालम्बः शाश्वतश्च, विहायसि परं स्थितः ॥ ६ ॥
उत्पत्तिविलयध्रौव्यगुणषड्द्रव्यपूरितः । मौलिस्थसिद्धमुदितो, नृत्यायेवाततक्रमः ॥ ७ ॥
अस्य सर्वस्य लोकस्य, कल्प्या भागाश्चतुर्दश । एकैकश्च विभागोऽयमेकैकरज्जुसम्मितः ॥ ८ ॥
सर्वाधस्तनलोकान्तादारभ्योपरिगं तलम् । यावत् सप्तममेदिन्या, एका रज्जुरियं भवेत् ॥ ९ ॥
प्रत्येकमेवं सप्तानां, भुवामुपरिवर्तिषु । तलेषु रज्जुरेकैका, स्युरेवं सप्त रज्जवः ॥ १० ॥
रत्नप्रभोपरितलादारभ्यादिमताविषे । पर्याप्तेषु विमानेषु, स्यादेषा रज्जुरष्टमी ॥ ११ ॥
तत आरभ्य नवमी, महेन्द्रान्ते प्रकीर्त्तिता । अतः परं तु दशमी, लान्तकान्ते समाप्यते ॥ १२ ॥
भवेदेकादशी पूर्णा, सहस्रारान्तसीमनि । स्यात् द्वादश्यच्युतस्यान्ते, क्रमादेवं त्रयोदशी ॥ १३ ॥
भवेत् ग्रैवेयकस्यान्ते, लोकान्ते च चतुर्दशी । धर्मोद्ध्वभागादूद्ध्वाधः, सप्त सप्तेति रज्जवः ॥ १४ ॥

अयं चावश्यकनिर्युक्तिचूर्णिसंग्रहण्याद्यभिप्रायः ॥ भगवत्यादौ च घर्माया अधोऽसंख्य-योजनैर्लोकमध्यमुक्तम् । तदनुसारेण तत्र सप्त रज्जवः समाप्यन्ते । परं तदिह स्वल्पत्वान्न विवक्षितमिति संभाव्यते ॥ योगशास्त्रवृतौ तु तत्र धरणीतलात् समभागात् सौधर्मेशानौ यावत् सार्द्धरज्जुः सनत्कुमारमाहेन्द्रौ यावत् सार्धरज्जुद्वयं ब्रह्मलोकेऽर्द्धचतुर्था रज्जवेऽच्युतं यावत्

पञ्च रज्जव ग्रैवेयकं यावत् षट् रज्जव लोकान्तं यावत् सप्त रज्जव इत्युक्तम् ज्ञेयं ॥ जीवाभिगमवृत्तावपि बहुसमरमणिज्जाओ भूमिभागाओ उड्ढं चंदिमसूरियगहगणणक्खत्ततारारूवाणं बहुइओ जोयणकोडिओ यावत् दूरं उड्ढं उप्पइत्ता एत्थणं सोहम्मीसाणेत्यादिसूत्रव्याख्याने । "अत्र बह्वीर्योजनकोटीरूर्ध्वं दूरमुत्प्लुत्य गत्वा । एतच्च सार्धरज्जूपलक्षणम् इत्युक्तमिति ॥

लोकनालिस्तवेऽपि

सोहम्मंमि दिवड्ढा अड्ढाइज्झा य रज्जु माहिंदे । चत्तारि सहस्सारे पणऽच्चुए सत्त लोगन्ते ॥ इत्युक्तमिति

रज्ज्वाश्चतुर्थो भागो यस्तत्खण्डुकमिति स्मृतम् । विष्कम्भायामपिण्डस्तत्समानं घनहस्तवत् ॥ १५ ॥
षट्पञ्चाशत्खण्डुकोच्चा, सच्चतुःखण्डुकायता । त्रसनाडी भवेदत्र, त्रसजीवाश्रयावधिः ॥ १६ ॥
रेखाः पञ्चोर्द्ध्वगाः सप्तपञ्चाशत्तिर्यगायताः । आलिख्य क्वापि पट्टादौ, भावनीया तदाकृतिः ॥ १७ ॥
सा चतुर्दशरज्जूच्चा, तथैकरज्जुविस्तृता । सर्वलोकस्याथ मानं, वक्ष्ये खण्डुकसंख्यया ॥ १८ ॥
रज्ज्वाः सर्वाधः स्थितायाः, खण्डुकेषु चतुर्ष्वपि । स्युरष्टाविंशतिस्तिर्यक्खण्डुकानीति तद्विदः ॥ १९ ॥
तत्रोह्यं त्रसनाडीस्थं, खडुकानां चतुष्टयम् । द्वादश द्वादश ततः, परितः पार्श्वयोर्द्वयोः ॥ २० ॥
एवं सर्वत्रापि ॥
षड्विंशतिर्द्वितीयस्या, रज्ज्वाः खण्डचतुष्टये । तृतीयस्याः खण्डुकेषु, चतुर्षु जिनसंख्यया ॥ २१ ॥
नखसंख्यानि तुर्याया, रज्ज्वा तेषु चतुर्ष्वपि । पञ्चम्याः षोडश दश, षष्ठ्याः खण्डचतुष्टये ॥ २२ ॥
सप्तम्या अपि खण्डेषु, चतुर्षु तच्चतुष्टयम् । अष्टम्याः प्राक् खण्डुके द्वे, चतुःखण्डुकविस्तृते ॥ २३ ॥
अपरे द्वे खण्डुके च, षट्खण्डुकसमातते । अष्टखण्डुकविस्तारं, नवम्या आद्यखण्डुकम् ॥ २४ ॥
दशखण्डुकविस्तारं, द्वितीयं द्वे ततः परे । द्वादशखण्डुकव्यासे, स्युरित्थं नवरज्जवः ॥ २५ ॥
दशम्याः प्राच्यमर्धं च, षोडशखण्डुकाततम् । परमर्धं तथैतस्या, नखखण्डुकविस्तृतम् ॥ २६ ॥
एकादश्याः पूर्वमर्धमपि तावत्समाततम् । द्वितीयमर्धमस्याश्च षोडशखण्डुकाततम् ॥ २७ ॥
द्वादश्याः प्राक्तनं त्वर्द्धं, प्रोक्तं द्वादशखण्डुकम् । दशखण्डुकविस्तारमन्त्यमर्धमुदीरितम् ॥ २८ ॥
आद्यं खण्डं त्रयोदश्या, निर्दिष्टं तावदाततम् । अष्टखण्डुकविस्तीर्णमग्रिमं खण्डुकत्रयम् ॥ २९ ॥
चतुर्दश्याः प्राक्तनेऽर्द्धे, खण्डुकानि षडायतिः । चत्वारि खण्डुकान्यस्या, विस्तृतिः पश्चिमेऽर्द्धके ॥ ३० ॥
प्रत्येकमेषामङ्कानां, स्वस्ववर्गविधानतः । भवेद्वर्गितलोकस्य, मितिः खण्डुकसंख्यया ॥ ३१ ॥
भवेत्स तद्गुणो वर्ग, इति वर्गस्य लक्षणम् । यथाष्टाविंशतेः सप्तशती चतुरशीतियुक् ॥ ३२ ॥
एवं सर्वत्र स्थापना विलोक्या ॥
खण्डुकानां शतान्यष्टावधिकानि च षोडश । दृष्टलोके दृष्टलोकैरुक्तानि सर्वसंख्यया ॥ ३३ ॥

प्रोक्तं वर्गितलोके च, सर्वाग्रं खण्डुकोद्भवम् । सहस्राणि पञ्चदश, द्वे शते नवतिश्च षट् ॥ ३४ ॥
लोकस्य वर्गकरणे, ज्ञेयमेतत् प्रयोजनम् । प्रमाणं सर्वतोऽनेन, लोकस्य भवति ध्रुवम् ॥ ३५ ॥
दशहस्तपृथोर्यद्वत्तावद्दीर्घस्य वेश्मनः । दशनां वर्गकरणे, सर्वं क्षेत्रफलं भवेत् ॥ ३६ ॥
षट्पञ्चाशत्खण्डुकोच्चयथोक्तपृथुलस्य च । लोकस्यास्य त्रयो भेदा, मध्याधऊर्ध्वभेदतः ॥ ३७ ॥
ऊर्ध्व मध्याधः स्थितत्वाद्व्यपदिश्यन्त इत्यमी । यद्वोत्कृष्टमध्यहीनपरिणामात्तथोदिताः ॥ ३८ ॥

यदुक्तं भगवतीवृत्तौ स्थानाङ्गवृत्तौ च । अहवा अहपरिणामो खेत्तणुभावेण जेण ओसन्नम् । असुहो अहोत्ति भणिओ दव्वाणं तेणहोलोगो ॥ १ ॥ उड्ढं उवरिं जं ठिअं सुरखेत्तं खेत्तओ अ दव्वगुणा । उप्पज्जंति सुभावा जेण तओ उड्ढलोगोत्ति ॥ २ ॥ मज्झणुभावं खेत्तं जं तं तिरियं ति वयणपज्जवओ । भणइ तिरिय विसालं अओ य तं तिरियलोगोत्ति ॥ ३ ॥

रत्नप्रभाया उपरि, क्षुल्लकप्रतरद्वये । मेर्वन्तःकन्दोर्द्ध्वभागे, रुचकोऽष्टप्रदेशकः ॥ ३९ ॥
तत्रोपरिस्थे प्रतरे, खप्रदेशचतुष्टयम् । विद्यते गोस्तनाकारं, तथैवाधस्तनेऽपि तत् ॥ ४० ॥
खप्रदेशाष्टकं तच्चोपर्यधो भावतः स्थितम् । चतुरश्चतुरस्त्रात्म, प्रोच्यते रुचकाख्यया ॥ ४१ ॥
तस्मान्नवशतान्यूर्द्ध्वमधो नवशतानि च । एतावान् मध्यलोकः स्यादाकृत्या झल्लरीनिभः ॥ ४२ ॥
योजनानां नवशतान्यतीत्य रुचकादितः । आलोकांतमधोलोकस्तप्राकृतिरुदाहृतः ॥ ४३ ॥
गत्वा नवशतान्येव, रुचकाद्योजनान्यथ । ऊर्ध्वीकृतमृदङ्गाभ, ऊर्द्ध्वलोकः प्रकीर्त्तितः ॥ ४४ ॥
सातिरेकसप्तरज्जुमानोऽधोलोक इष्यते । ऊर्द्ध्वलोकः किञ्चिदूनसप्तरज्जुमितः स्मृतः ॥ ४५ ॥
घर्माधनोदधिघनतनुवातान् विहायसः । असंख्यभागं चातीत्य, मध्यं लोकस्य कीर्तितम् ॥ ४६ ॥
अस्मादूर्द्ध्वमधश्चैव, संपूर्णा सप्तरज्जवः । अथ त्रयाणां लोकानां, प्रत्येकं मध्यमुच्यते ॥ ४७ ॥
घर्मायां सर्वतः क्षुल्लमत्रास्ति प्रतरद्वयम् । मण्डकाकारमेकैकं, खप्रदेशात्मकं च तत् ॥ ४८ ॥
रुचकेऽत्र प्रदेशानां, यच्चतुष्कद्वयं स्थितम् । तत्समश्रेणिकं तच्च, विज्ञेयं प्रतरद्वयम् ॥ ४९ ॥
लोकवृद्धिरुर्द्ध्वमुखी, तयोरुपरि संस्थितात् । अधः स्थितात्पुनस्तमाल्लोकवृद्धिरधोमुखी ॥ ५० ॥
तस्मिंश्च लोकपुरुषकटीतटपटीयसि । मध्यभागे समभूमिज्ञापको रुचकोऽस्ति यः ॥ ५१ ॥
स एव मध्यलोकस्य, मध्यमुक्तं महात्मभिः । दिग्विदिग्निर्गमश्चास्मान्नाभेरिवशिरोद्गमः ॥ ५२ ॥
तथाहु : अट्ठपएसो रुअगो तिरिअलोगस्स मज्झयारंमि । एस पभावो दिसाणं एसेव भवे अणुदिसाणम् ॥
[आवश्यकनिर्युक्ति श्लो. ८०९ टीकान्तर्गत श्लो.]

पूर्वा पूर्वदक्षिणा च, दक्षिणा दक्षिणापरा । पश्चिमा पश्चिमोदीची, चोत्तरोत्तरपूर्विका ॥ ५३ ॥
ऊर्द्ध्वा तथाधस्तनी च, दशैवं गदिता दिशः । दिशःषट् तत्र शुद्धाख्याः, चतस्रो विदिशोऽपराः ॥ ५४ ॥
विजयद्वारदिक् प्राची, प्रादक्षिण्यात्ततः पराः । एतासां देवतायोगान्नामान्यूचुः पराण्यपि ॥ ५५॥

ऐन्द्याग्नेयी तथा याम्या, नैर्ऋती किंच वारुणी । वायव्येत: परा सौम्येशानी च विमला तमा ॥ ५६ ॥
रुचकानन्तरं दिक्षु, द्वौ द्वौ व्योम्न: प्रदेशकौ । विदिक्षु पुनरेकैक, एषाद्या पङ्क्तिरहिता ॥ ५७ ॥
द्वितीयस्यां पुन: पङ्क्तौ, चत्वारो दिक्प्रदेशका: । एवं द्वौ द्वौ विवर्धेते, प्रतिपङ्क्तिप्रदेशकौ ॥ ५८ ॥
एवं च, असंख्येयतमा पङ्क्तिरसंख्येयप्रदेशिका । लोकान्तं स्पृशति द्वाभ्यामन्ताभ्यां भृशमायता ॥ ५९ ॥
ततो लोकस्य वृत्तत्वात्प्रतिपङ्क्तिप्रदेशकौ । हीयेते तेन लोकान्ते, पङ्क्तिश्चतु:प्रदेशिका ॥ ६० ॥
एकतो द्विप्रदेशत्वं, चतु:प्रदेशतान्यत: । ततो हि मुरजाकारो, भवेल्लोकदिशामिह ॥ ६१ ॥
एकतो यस्य संकीर्णं, मुखं पृथुलमन्यत: । स मृदङ्गविशेष: स्यान्मुरजेति प्रसिद्धिभाक् ॥ ६२ ॥
यथैकस्मिन् खप्रतरे, भाविता मुरजाकृति: । सर्वेष्वपि प्रतरेषु, तथा भाव्या दिगाकृतौ ॥ ६३ ॥
शकटोर्ध्वीस्थिता: किंचालोकव्यपेक्षया दिश: । तुण्डं तु शकटस्यास्य, रुचकोपरि भाव्यताम् ॥ ६४ ॥
रुचकस्योपरितनं, यत्प्रदेशचतुष्टयम् । विमलाया दिशस्तच्च, प्रोक्तमादितया जिनै: ॥ ६५ ॥
तत्समश्रेणिकैस्तावन्मितैर्जाता प्रदेशकै: । ऊर्ध्वलोकालोकगता, विमला दिगुदीरिता ॥ ६६ ॥
रुचकस्याधस्तनं यत्प्रदेशानां चतुष्टयम् । तत्तमाया दिश: प्रोक्तं, जिनैरादितया श्रुते ॥ ६७ ॥
तन्मूला विमलातुल्या, किंत्वधोगामिनी तमा । तदिमे रुचकाकारे, चतु:प्रदेशविस्तृते ॥ ६८ ॥
द्वयोर्द्वयोर्दिशोरन्तश्छिन्नमुक्तावलीसमा: । एकप्रदेशा विदिशो, लोकालोकान्तसीमया ॥ ६९ ॥
दिश: स्युर्द्विप्रदेशाढ्या, द्व्युत्तरा रुचकोद्भवा: । विदिशोऽनुत्तरा एकप्रदेशा रुचकोद्भवा: ॥ ७० ॥
दिशोऽप्येता असंख्येयप्रदेशा लोकसीमया । अलोकापेक्षया सर्वा:, स्युरनन्तप्रदेशिका: ॥ ७१ ॥
प्रत्येकामासां सर्वासां, दिशां सर्वे प्रदेशका: । कृतयुग्ममिता: सन्ति, सिद्धान्तपरिभाषया ॥ ७२ ॥

तदुक्तमाचाराङ्गनिर्युक्तौ । सव्वा य हवंति कडजुम्मेत्ति ॥ कृतयुग्मादिस्वरूपं चैवम् ।

चतुष्केण ह्रियमाणश्चतु:शेषो हि यो भवेत् । अभावात् भागशेषस्य स ख्यात: कृतयुग्मक: ॥ ७३ ॥

तदुक्तं भगवत्यष्टादश शतकस्य चतुर्थोद्देशकवृत्तौ । कृतं सिद्धं पूर्णं तत: परस्य शशि-
संज्ञान्तरस्याभावेन न त्वोज:प्रभृतिवदपूर्णं यत् युग्मं समराशिविशेष: तत् कृतयुग्ममिति ॥

चतुष्केण ह्रियमाणस्त्रिशेषस्त्र्योज उच्यते । द्विशेषो द्वापरयुग्म:, कल्योजश्चैकशेषक: ॥ ७४ ॥

तथा च भगवतीसूत्रे । गोयम ! जेणं रासीचउक्कगेणं अवहारेणं अवहीरमाणे अवहीरमाणे चउ पज्जवसिए से णं कडजुम्मे । एवं ति पज्जवसिए तेउए । दु पज्जवसिए दावरजुम्मे । एग पज्जवसिए कलिओगे । इति ॥

यो मुलतोऽपि राशि: स्याच्चतुस्त्रिद्व्येकरुपक: । सोऽपि ज्ञेय: कृतयुग्मत्र्योजादिनामधेयभाक् ॥ ७५ ॥

तदुक्तं भगवतीवृत्तौ । त्रिभिरादित एव कृतयुग्माद्धोपरिवर्तिभिरोजो विषमराशिविशेषस्त्र्योज इति । द्वाभ्यामादित एव कृतयुग्माद्धोपरिवर्तिभ्यां यदपरं युग्मादन्यन्नामनिपातनविधिर्द्वापरयुग्मम् । कल्येनेकेनादित एव कृतयुग्माद्धोपरिवर्तिनौजः विषमराशिविशेषः कल्योज इति ॥

कर्मप्रकृतिवृत्तौ त्वेतेषां निरुक्तिरेवं दृश्यते ॥ इह कश्चिद्विवक्षितो राशिः स्थाप्यते । तस्य कलिद्वापरत्रेताकृतयुगसंज्ञैश्चतुर्भिर्भागः ह्रियते । भागे च हृते सति यद्येकः शेषो भवति तर्हि स राशिः कल्योजः उच्यते यथा त्रयोदश । अथ द्वौ शेषौ तर्हि द्वापरयुग्मः, यथा चतुर्दश । अथ त्रयः शेषास्ततस्त्रेतौजः, यथा पञ्चदश । यदा तु न किञ्चिदवतिष्ठते किन्तु सर्वात्मना निर्लेप एव भवति तदा स कृतयुगः, यथा षोडशेत्यादि ॥

लोकमाश्रित्य साद्यन्ता, एताः सर्वा अपि स्फुटम् । साद्यनन्ता विनिर्दिष्टा, अलोकापेक्षया पुनः ॥ ७६ ॥
दिशामन्येऽपि भेदाः स्युर्नामदिक् स्थापनाख्यदिक् । द्रव्यक्षेत्रतापभावप्रज्ञापकाभिधा दिशः ॥ ७७ ॥
यद् द्रव्यस्य सचित्तादेर्दिगित्येवं कृताभिधा । सा नामदिग् विनिर्दिष्टा, शिष्टैर्दृष्टजगत्त्रयैः ॥ ७८ ॥
पट्टादौ चित्रितस्याथ, जम्बूद्वीपादिकस्य यत् । दिग्विदिक्स्थापनं सोक्ता, स्थापनाशा विशारदैः॥ ७९ ॥
स्यात् द्रव्यदिगागमतो, नोआगमत इत्यपि । दिक्पदार्थबुधस्तत्रानुपयुक्तः किलादिमा ॥ ८० ॥
त्रिधा च नोआगमतः, प्रज्ञप्ता द्रव्यतो दिशः । तत्राद्या दिक्पदार्थज्ञशरीरं जीववर्जितम् ॥ ८१ ॥
द्वितीया च दिक्पदार्थं, ज्ञास्यन् बालादिरुच्यते । ज्ञशरीरभव्यदेहव्यतिरिक्ताप्यथोच्यते ॥ ८२ ॥
या प्रवृत्ता समाश्रित्य, द्रव्यं त्रयोदशाणुकम् । तावद्व्योमांशावगाढं द्रव्यदिक् सा निवेदिता ॥ ८३ ॥
इतो न्यूनाणुजाते तु, दिग्विदिक्परिकल्पनम् । न स्यात् द्रव्ये ततश्चैतज्जघन्यं दिगपेक्षया ॥ ८४ ॥
त्रिबाहुकं नवप्रादेशिकं समभिलिख्य च । कार्यैकैकगृहवृद्धिः, ध्रुवं दिक्षु चतसृषु ॥ ८५ ॥
क्षेत्राशास्त्वधुनैवोक्तास्तापाशाः पुनराहिताः । सूर्योदयापेक्षयैव, पूर्वाद्याः ता यथाक्रमम् ॥ ८६ ॥
तत्र यत्रोदेति भानुः, सा पूर्वानुक्रमात् पराः । विसंवदन्त एताश्च, क्षेत्रदिग्भिर्यथायथम् ॥ ८७ ॥
तथाहि, रुचकापेक्षया या स्याद्दक्षिणा क्षेत्रलक्षणा । तापाशापेक्षया सा स्यादस्माकं ध्रुवमुत्तरा ॥ ८८ ॥
अष्टादशविधा भावदिशस्तु जगदीश्वरैः । प्रोक्ता मनुष्यादिभेदभिन्ना इत्थं भवन्ति ताः ॥ ८९ ॥
कर्माकर्मभूमिजान्तर्द्वीपसंमूर्च्छजा नराः । तथा द्वित्रिचतुःपञ्चेन्द्रियास्तिर्यञ्च आहिताः ॥ ९० ॥
कायाश्चतुर्द्धा पृथिवीजलतेजोऽनिला इति । स्युर्वनस्पतयो मूलस्कन्धाग्रपर्वसम्भवाः ॥ ९१ ॥
षोडशैता दिशो देवनारकाङ्गिसमन्विताः । भवन्त्यष्टादश भावदिशस्तीर्थकरोदिताः ॥ ९२ ॥
यत्र क्वचिदपि स्थित्वा, प्रज्ञापको दिशां बलात् । निमित्तं वक्ति धर्मं वा, गुरुः प्रज्ञापकाख्यदिक् ॥ ९३ ॥
यस्या दिशः संमुखस्थः, प्रज्ञापकः प्ररुपयेत् । धर्मं निमित्तादिकं वा, सा पूर्वानुक्रमात्पराः ॥ ९४ ॥
एताश्चाष्टादशविधाः, स्युस्तिर्यक् तत्र षोडश । तिस्रस्तिस्रः प्रतिविदिक् दिक्ष्वेकैकेति कल्पनात् ॥ ९५ ॥

शकटोद्धास्थिताः प्रज्ञापकोपान्तेऽतिसङ्कटाः । विस्तीर्णा बहिरुर्ध्वाधोयुक्ताश्चाष्टादश स्मृताः ॥ ९६ ॥
अथ प्रकृतम् ।
पृथिव्योस्तुर्यपञ्चम्योर्मध्ये यद्विद्यदन्तरम् । तदर्धेऽधस्तने न्यूनेऽधोलोकमध्यमीरितम् ॥ ९७ ॥
अधस्तात् ब्रह्मलोकस्य, रिष्टाख्यप्रस्तटे स्फुटम् । मध्यं तत्रोर्द्ध्वलोकस्य, लोकनाथैर्विलोकितम् ॥ ९८ ॥
तथा - पूर्णैकरज्जुपृथुलात्, क्षुल्लकप्रतरादितः । ऊर्द्ध्वं गतेऽङ्गुलासंख्यभागे तिर्यग्विवर्द्धते ॥ ९९ ॥
अङ्गुलस्यासंख्यभागः, परमत्रेति भाव्यताम् । ऊर्द्ध्वगादङ्गुलस्यांशादंशस्तिर्यग्गतो लघुः ॥ १०० ॥
एवमधोऽपि ॥
एवं चोर्ध्वलोकमध्यं, पृथुलं पञ्चरज्जवः । हीयतेऽतस्तथैवोर्ध्वं, रज्जुरेकावशिष्यते ॥ १०१ ॥
किंच, रज्जुमानात् द्वितीयस्मात्, क्षुल्लकप्रतारच्छितिः । अधोमुखी च तिर्यक् चाङ्गुलासंख्यांशभागिका ॥ १०२ ॥
एवं चाधोलोकमूले, पृथुत्वं सप्तरज्जवः । अथात्र सूचीरज्जवादिमानं किञ्चिन्निगद्यते ॥ १०३ ॥

इदं च संग्रहणीवृत्त्यनुसारेण ॥ लोकनाडीस्तवे तु प्रदेशवृद्धिहानी दृश्येते लोकतिर्यग्वृद्धौ ॥

चतुर्भिः खण्डुकैः सूचीरज्जुः श्रेण्या व्यवस्थितैः । ताभिश्चतुर्भिः प्ररररज्जुः षोडशखण्डुका ॥ १०४ ॥
चतसृभिश्च प्ररररज्जुभिर्जायते किल । घनरज्जुश्चतुःषष्टिः खण्डुकाः सर्वतः समाः ॥ १०५ ॥
अष्टाविंशं शतमध, ऊर्द्ध्वं षट्सप्ततिर्मता । सर्वाश्चतुर्भिरधिके, द्वे शते सूचिरज्जवः ॥ १०६ ॥
दन्तैर्मिता अधोलोके, ऊर्द्ध्वमेकोनविंशतिः । एकपञ्चाशदाख्याताः, सर्वाः प्ररररज्जवः ॥ १०७ ॥
अधोऽष्टावूर्द्ध्वलोके च, निर्दिष्टा घनरज्जवः । पादोनाः पञ्च सर्वाग्रे, स्युः पादोनास्त्रयोदश ॥ १०८ ॥
इदं दृष्टलोकमानम् ॥
वर्गितस्य च लोकस्याधोलोके घनरज्जवः । सार्धया पञ्चसप्त्याधिकमेकं शतं मतम् ॥ १०९॥
ऊर्द्ध्वलोके भवेत्सार्धा, त्रिषष्टिः सर्वसंख्यया । ध्रुवमेकोनया चत्वारिंशताढ्यं शतद्वयम् ॥ ११० ॥
आसां चतुर्गुणत्वे च, सर्वाः प्ररररज्जवः ॥ शतानि नव षट्पञ्चाशता युक्तानि तत्र च ॥ १११ ॥
शतानि सप्त द्व्यधिकान्यधोलोके प्रकीर्त्तिताः । ऊर्द्ध्वलोके द्वे शते च, चतुःपञ्चाशताधिके ॥ ११२ ॥
चतुर्गुणत्वे चैतासां, भवन्ति सूचिरज्जवः । चतुर्विंशत्युपेतानि, त्वष्टात्रिंशच्छतानि वै ॥ ११३ ॥
तत्रापि, अधोलोके शतान्यष्टाविंशतिः स्फुटमष्ट च । ऊर्द्ध्वलोके पुनस्तासां, सहस्रं षोडशाधिकम् ॥ ११४ ॥
इति वर्गितलोकमानम् ॥
घनीकृतो भवेल्लोकः, सप्तरज्जुमितोऽभितः । विष्कम्भायामबाहल्यैः, सद्बुद्ध्यैवं विधीयते ॥ ११५ ॥
एकरज्जुविस्तृतायास्त्रसनाड्यास्तु दक्षिणम् । अधोलोकवर्तिखण्डमूनरज्जुत्रयाततम् ॥ ११६ ॥
सर्वाधस्तात् हीयमानविस्तारत्वादुपर्यथ । रज्ज्वसंख्येयभागोरुसप्तरज्जूच्छ्रयं च तत् ॥ ११७ ॥

गृहीत्वोत्तरदिग्भागे, त्रसनाड्याः प्रकल्प्यते । विरचय्याधस्तनांशमुपर्युपरिगं त्वधः ॥ ११८ ॥
ततोऽधस्तनलोकार्धं, किञ्चिदूनचतुष्टयम् । रज्जूनामाततं सातिरेकं सप्तकमुच्छ्रितम् ॥ ११९ ॥
क्वचित्किञ्चिदूनसप्तरज्जुबाहल्यमप्यधः । अपरत्र त्वनियतं, बाहल्यमिदमास्थितम् ॥ १२० ॥
किंच-ऊर्द्ध्वलोके त्रसनाड्या, दक्षिण भागवर्तिनी । द्वे खण्डे ये कटीन्यस्तहस्तकूर्परसंस्थिते ॥ १२१ ॥
ब्रह्मलोकमध्यदेशादधस्तनं तथोर्द्ध्वगम् । ते प्रत्येकं ब्रह्मलोके, मध्ये द्विरज्जुविस्तृते ॥ १२२ ॥
किञ्चिदूनार्धार्धरज्जुत्रयोच्छ्रिते च ते उभे । त्रसनाड्या वामपार्श्वे, वैपरीत्येन कल्पयेत् ॥ १२३ ॥
ततश्च रज्ज्वाततया, त्रसनाड्या समन्वितम् । यादृक्षमूर्ध्वलोकार्धं, जातं तदभिधीयते ॥ १२४ ॥
अङ्गुलसहस्रांशाभ्यां, द्वाभ्यां रज्जुत्रयं युतम् । विष्कम्भतः किञ्चिदूना, रज्जवः सप्त चोच्छ्रयात् ॥ १२५ ॥
बाहल्यतो ब्रह्मलोकमध्ये तत् पञ्चरज्जुकम् । अन्यस्थले त्वनियतबाहल्यमिदमास्थितम् ॥ १२६ ॥
तदेतदुपरितनं, गृहीत्वार्धं निवेशयेत् । अधस्तनं संवर्तितलोकार्धस्योत्तरान्तिके ॥ १२७ ॥
एवं संयोजने चाधोलोकखण्डोच्छ्रयेऽस्ति यत् । अतिरिक्तमुपरितनात्खण्डित्वाभिगृह्य च ॥ १२८ ॥
ऊर्द्ध्वलोकार्धबाहल्यपूर्त्यै चोर्ध्वायतं न्यसेत् । एवमस्य सातिरेका, बाहल्यं पञ्च रज्जवः ॥ १२९ ॥
तथास्त्यधोलोकखण्डं, देशोनसप्तरज्जुकम् । बाहल्येनोपरितनं, त्वधिकपञ्चरज्जुकम् ॥ १३० ॥
ततश्चाधस्तने खण्डे, न्यूनं रज्जुद्वयं किल । अतिरिक्तमतोऽस्यार्धं, द्वितीयस्मिन्निवेशयेत् ॥ १३१ ॥
सर्वस्यास्य चतुरस्रीकृतस्य भवति क्वचित् । रज्ज्वसंख्येयभागाढ्या, बाहल्यं रज्जवो हि षट् ॥ १३२ ॥
तथापि व्यवहारेण, बाहल्यं सप्त रज्जवः । मन्यते व्यवहारो हि, वस्तुन्यूनेऽपि पूर्णताम् ॥ १३३ ॥
विष्कम्भायामतोऽप्येवं, देशोनाः सप्त रज्जवः । व्यवहारेण विज्ञेयाः, संपूर्णाः सप्त रज्जवः ॥ १३४ ॥
एवमेष सप्तरज्जुमानो लोको घनीकृतः । यत्र क्वाप्यागमेऽभ्रांशश्रेणिरुक्तास्य सा ध्रुवम् ॥ १३५ ॥
अस्मिन् घनीकृते लोके प्रज्ञप्ता घनरज्जवः । त्रिचत्वारिंशताढ्यानि, शतानि त्रीणि तात्त्विकैः ॥ १३६ ॥
तच्चैवम् । आयामरज्जवः सप्त, सप्तभिर्व्यासरज्जुभिः । हता एकोनपञ्चाशत्, भवन्ति घनरज्जवः ॥ १३७ ॥
सप्तभिर्गुणिता एता, बाहल्यसप्तरज्जुभिः । यथोक्तमानाः पूर्वोक्ता, भवन्ति घनरज्जवः ॥ १३८ ॥
चतुर्गुणत्वे चासां स्युः, सर्वाः प्रतररज्जवः । अधिकानि द्विसप्तत्या, शतान्येव त्रयोदश ॥ १३९ ॥
आसामपि चतुर्घ्नत्वे, भवन्ति सूचिरज्जवः । चतुःपञ्चाशच्छतानि, ह्यष्टाशीत्यधिकानि च ॥ १४० ॥
चतुर्भिर्गुणने त्वासां, खण्डुकान्येकविंशतिः । सहस्राणि नवशती, द्विपञ्चाशत्समन्विता ॥ १४१ ॥
इति घनीकृतलोकमानम् ॥
असंख्याभिर्योजनानां, कोटाकोटीभिरून्मितः । नायं लोको गणनया, वक्तुं केनापि शक्यते ॥ १४२ ॥
ततो दृष्टान्ततः स्पष्टं, निर्दिष्टो ज्ञानदृष्टिभिः । स चायमुदितः पञ्चमाङ्गस्यैकादशे शते ॥ १४३ ॥

तथाहि, जम्बूद्वीपाभिधे द्वीपे, परितो मेरुचूलिकाम् । षट् निर्जराः स्थिताः किंच, चतस्रो दिक्कुमारिकाः ॥ १४४ ॥
बलिपिण्डान् समादाय, बाह्याभिमुखतः स्थिताः । जम्बूद्वीपस्य पर्यन्तदेशे दिक्षु चतसृषु ॥ १४५ ॥
क्षिपन्ति बलिपिण्डांस्ताः, स्वस्वदिक्षु बहिर्मुखान् । तेषामथैकतः कश्चित्, षण्णां मध्यात् सुधाभुजाम् ॥ १४६ ॥
पृथ्वीपीठमसंप्राप्तान्, सर्वानप्याददीत तान् । जम्बूद्वीपस्य परितो, भ्राम्यन् गत्या यया द्रुतम् ॥ १४७ ॥
तया गत्याथ ते देवा, लोकान्तस्य दिदृक्षया । आशासु षट्सु युगपत्, प्रस्थिताः पथिका इव ॥ १४८ ॥
इतश्च तस्मिन् समये, कस्यचिद्धव्यवहारिणः । पुत्रो वर्षसहस्रायुर्जातोऽसौ वर्धते क्रमात् ॥ १४९ ॥
क्रमादथास्य पितरौ, विपन्नावायुषः क्षयात् । स्वायुः समापयामास, तत एषोऽप्यनुक्रमात् ॥ १५० ॥
कालेन कियता चास्यास्थिमज्जाः क्षयं गताः । लोकान्तं न च ते देवाः, प्रापुः श्रान्ता इवाश्रयम् ॥ १५१ ॥
अस्य वंशः सप्तमोऽपि, क्रमेणैवं क्षयं गतः । कालेन तस्य नामादि, समस्तमस्तमीयिवत् ॥ १५२ ॥
अथास्मिन् समये कश्चित्, सर्वज्ञं यदि पृच्छति । क्षेत्रं तेषां किमगतं, गतं वा बहुलं प्रभो ॥ १५३ ॥
तदादिशेज्जिनस्तेषां, गतं बह्वगतं मितम् । गतादन्यदसङ्ख्यांशं, संख्यघ्नमगताच्च तत् ॥ १५४ ॥
संवर्तितचतुरस्रीकृतस्य लोकस्य मानमेतदिति । सम्भवति यथावस्थितलोके तु तस्य वैषम्यात् ॥ १५५ ॥
इति भगवतीशतक ११ उद्देशे १० ॥
वसन्ति तत्राधोलोके, भवनाधिपनारकाः । तिर्यक् च व्यन्तरनराब्धिद्वीपज्योतिषादयः ॥ १५६ ॥
वैमानिकाः सुराः सिद्धा, ऊर्द्ध्वलोके वसन्ति च । इति सामान्यतो लोकस्वरुपमिह वर्णितम् ॥ १५७ ॥
अथ त्रयाणां लोकानां, प्रत्येकं तन्निरुप्यते । तत्रादौ कथ्यते किञ्चिदधोलोको विशेषतः ॥ १५८ ॥
पृथिव्यस्तत्र निर्दिष्टा, सप्त सप्तभयापहैः । गोत्रतो नामतश्चैवं, गोत्रभित्प्रणतक्रमैः ॥ १५९ ॥
आद्या रत्नप्रभा पृथ्वी, द्वितीया शर्कराप्रभा । ततः परा च पृथिवी, तृतीया बालुकाप्रभा ॥ १६० ॥
पङ्कप्रभा चतुर्थी स्यात्, धूमप्रभा च पञ्चमी । षष्ठी तमःप्रभा सप्तमी स्यात्तमस्तमःप्रभा ॥ १६१ ॥
अन्वर्थजानि सप्तानां, गोत्राण्याहुरमूनि वै । रत्नादीनां प्रभायोगात्प्रथितानि तथा तथा ॥ १६२ ॥
घर्मा वंशा तथा शैलांजना रिष्टा मघा तथा । माघवतीति नामानि, निरन्वर्थान्यमूनि यत् ॥ १६३ ॥
अधो महत्तमं छत्रं, तस्योपरि ततो लघु । छत्राणामिति सप्तानां, स्थापितानां समा इमाः ॥ १६४ ॥
स्यातामायामविष्कम्भौ, सप्तम्याः सप्त रज्जवः । षष्ट्याः षट् पञ्च पञ्चम्यास्ताश्चतस्त्रोऽनाभुवः ॥ १६५ ॥
रज्जुत्रयं तृतीयाया, द्वितीयायास्तु तद् द्वयम् । स्यातामायामविष्कम्भौ, रज्जुरेकादिमक्षितेः ॥ १६६ ॥
रत्नप्रभाया बाहल्यं, योजनानां प्रकीर्त्तितम् । एकं लक्षं सहस्राणामशीत्या साधिकं किल ॥ १६७ ॥
तच्चैवम् । सहस्राणि षोडशाद्यं, खरकाण्डं द्वितीयकम् । सहस्राः पङ्कबहुलं, चतुरशीतिरीरितम् ॥ १६८ ॥
तृतीयं जलबहुलं, स्यादशीतिसहस्रकम् । ततोऽशीतिसहस्राढ्यं, लक्षं पिण्डोऽग्रिमक्षितेः ॥ १६९ ॥

खरकाण्डे च काण्डानि, षोडशोक्तानि तात्त्विकैः । प्रत्येकमेषां बाहल्यं, योजनानां सहस्रकम् ॥ १७० ॥
तत्रादिमं रत्नकाण्डं, वज्रकाण्डं द्वितीयकम् । वैडूर्यं लोहिताख्यं च, मसारगल्लसंज्ञकम् ॥ १७१ ॥
हंसगर्भं च पुलकं, सौगन्धिकाभिधं परम् । ज्योतीरसमञ्जनं चाञ्जनपुलकसंज्ञकम् ॥ १७२ ॥
रजतं जातरूपं च अङ्कं स्फटिकसंज्ञकम् । रिष्टकाण्डं चेत्यमूनि, यथार्थाख्यान्यनुक्रमात् ॥ १७३ ॥
एतेषु तत्तज्जातियरत्नबाहुल्ययोगतः । रत्नप्रभेति गोत्रेण, पृथ्वीयं परिकीर्त्यते ॥ १७४ ॥
तिर्यग्लोके भवन्त्यस्या, योजनानां शता नव । ऊर्द्ध्वगाः शेषपिण्डस्तु, स्यादधोलोकसंस्थितः ॥ १७५ ॥
चतुर्भिश्च किलाधारैर्भूमिरेषा प्रतिष्ठिता । घनोदधिघनवाततनुवातमरुत्पथैः ॥ १७६ ॥
त्रिभिश्च वलयैरेषा, परितः परिवेष्टिता । घनोदधिघनवाततनुवातात्मकैः क्रमात् ॥ १७७ ॥
तत्र प्रतिष्ठिता भूमिराधारेण घनोदधेः । महाकटाहविन्यस्तस्त्यानाज्यघनपिण्डवत् ॥ १७८ ॥
योजनानां सहस्राणि, विंशतिः परिकीर्त्तितम् । घनोदधेर्मध्यभागे, बाहल्यं क्रमतस्ततः ॥ १७९ ॥
प्रदेशहान्यासौ हियमानोऽत्यन्ततनूभवन् । पृथ्वीं वलयाकारेण, स्वयमावृत्य तिष्ठति ॥ १८० ॥
वलयस्यास्य विष्कम्भः, प्रज्ञप्तो योजनानि षट् । उच्चत्वं तु वसुमतीबाहल्यस्यानुसारतः ॥ १८१ ॥
असौ घनोदधिरपि, घनवाते प्रतिष्ठितः । असंख्यानि योजनानि, मध्ये तस्यापि पुष्टता ॥ १८२ ॥
प्रदेशहान्या तनुतां, भजमानो घनोदधेः । आवृत्य वलयं तस्थौ, वलयाकृतिनात्मना ॥ १८३ ॥
अस्यापि वलयस्यैवं, मानमाद्यैरुदीरितम् । चतुष्टयी योजनानां, सार्धोच्चत्वं तु पूर्ववत् ॥ १८४ ॥
घनवातोऽपि सततं, तनुवाते प्रतिष्ठितः । अस्यापि मध्ये बाहल्यमसंख्यघ्नं घनानिलात् ॥ १८५ ॥
ततस्तनूभवन्नेष, घनवातस्य सर्वतः । आवृत्य वलयं तस्थौ, वलयाकृतिनात्मना ॥ १८६ ॥
तनुवातस्य वलये, विष्कम्भः परिकीर्त्तितः । एकं योजनमध्यर्द्धमुच्चत्वं पुनरुक्तवत् ॥ १८७ ॥
तनुवातोऽप्यसौ तस्थावाधारेण विहायसः । तच्च प्रतिष्ठितं स्वस्मिन्नसंख्ययोजनोन्मितम् ॥ १८८ ॥
सप्तस्वपि महीष्वेवं, घनोदध्यादयो मताः । वलयानां तु विष्कम्भो, यथास्थानं प्रवक्ष्यते ॥ १८९ ॥
भाति भूः स्वसमश्रेणिस्थायिभिर्वलयैस्त्रिभिः । पूर्णेन्दुवत्परिधिभिः, सुधाकुण्डमिवोरगैः ॥ १९० ॥
भवत्येवमलोकश्च, घर्मापर्यन्तभागतः । योजनैर्दशभिर्द्वाभ्यामतिरिक्तैः समन्ततः ॥ १९१ ॥
अथैतस्यां रत्नकाण्डस्याधस्तनं तथोर्ध्वगम् । विमुच्य शतमेकैकं, मध्येऽष्टशतयोजने ॥ १९२ ॥
असंख्येयानि भौमेयनगराण्यासते सदा । बहिर्विभागे वृत्तानि, चतुरस्राणि चान्तरे ॥ १९३ ॥
अधोभागेऽनुकुर्वन्ति, चारुपुष्करकर्णिकाम् । गम्भीरखातपरिखाप्राकारालङ्कृतानि च ॥ १९४ ॥
शतघ्न्यादिमहायन्त्रजटिलानि समन्ततः । दुःप्रवेश्यान्ययोध्यानि, गुप्तानि श्रीभृतानि च ॥ १९५ ॥
उल्लासिपूर्णकलशतोरणद्वारवन्ति च । अनारतं रक्षितानि, दण्डिभिः किङ्करामरैः ॥ १९६ ॥

परिष्कृतानि कुसुमैः पञ्चवर्णैः, सुगन्धिभिः । काकतुण्डतुरुष्कादिधूपसौरभ्यवन्ति च ॥ १९७ ॥
जम्बूद्वीपोपमानानि, विष्कम्भायाममानतः । उत्कृष्टानि विदेहानुकारीणि मध्यमान्यपि ॥ १९८ ॥
अपि यान्यल्पमानानि, निरूपितानि तान्यपि । भरतक्षेत्रसदृशान्येतेषु च वसन्त्यमी ॥ १९९ ॥
अष्टधा व्यन्तरा देवा, महासमृद्धिशालिनः । पिशाचा भूतयक्षाख्या, राक्षसाः किन्नरा अपि ॥ २०० ॥
किंपुरुषा महोरगा, गन्धर्वाश्च तथा परे । सर्वेऽप्येते दाक्षिणात्योदिच्यभेदात् स्मृता द्विधा ॥ २०१ ॥
सर्वेऽप्येतेऽतिसुभगाः, सुरूपाः सौम्यदर्शनाः । हस्तग्रीवादिषु रत्नमयभूषणभूषिताः ॥ २०२ ॥
गान्धर्वगीतरतयः, कौतुकाक्षिप्तचेतसः । प्रियक्रीडाहास्यलास्या, अनवस्थितचेतसः ॥ २०३ ॥
विकुर्वितस्फारवनमालामुकुटकुण्डलाः । स्वैरोल्लापाः स्वैररूपधारिणः स्वैरचारिणः ॥ २०४ ॥
नानावर्णवस्त्रनानादेशनेपथ्यधारिणः । मुद्गरासिकुन्तशक्तिचापादिव्यग्रपाणयः ॥ २०५ ॥
तत्र यक्षाः पिशाचाश्च, गन्धर्वाश्च महोरगाः । किञ्चित् कृष्णाः किंपुरुषा, राक्षसाश्च सितत्विषः ॥ २०६ ॥
किन्नराः श्यामभासोऽपि, किञ्चिन्नीलत्विषो मताः । भूताः पुनः कालवर्णाः, कज्जलैर्घटिता इव ॥ २०७ ॥
कदम्बः सुलसश्चैव, वटः खट्वाङ्गमेव च । अशोकश्चम्पको नागस्तुम्बरुश्च यथाक्रमम् ॥ २०८ ॥
भवन्ति चिह्नान्यष्टानां, पिशाचादिसुधाभुजाम् । ध्वजेषु तत्र खट्वाङ्गं, विना सर्वेऽपि पादपाः ॥ २०९ ॥
खट्वाङ्गं तूपकरणं, तापसानामुदीरितम् । प्रायः क्रीडाविनोदार्थं, नरलोके चरन्त्यमी ॥ २१० ॥
चैत्यवृक्षास्तथैवैषामष्टानां क्रमतो मताः । कदम्बाद्यास्तथा चोक्तं, तृतीयाङ्गे गणाधिपैः ॥ २११ ॥

एएसिणं अट्ठविहाणं वाणमंतरदेवाणं अट्ठ चइत्तरुक्खा पण्णत्ता । तं जहा ।
कलंबो उ पिसायाणं, वडो जक्खाण चेति तं । तुलसी भूयाण भवे, रक्खसाणं च कंडओ ॥
असोओ किन्नराणं च, किंपुरिसाण य चंपओ । णागरुक्खो भुअंगाणं, गंधव्वाण य तेंदुओ ॥
चैत्यवृक्षा मणिपीठिकानामुपरिवर्त्तिनः सर्वरत्नमया, उपरि छत्रध्वजादिभिरलङ्कृताः सुधर्मादिसभानामग्रतो ये श्रूयन्ते, त एतैति संभाव्यन्ते । ये तुं 'चिंधाइं कलंबझए' इत्यादि ते चिह्नभूता एतेभ्योऽन्य एवेति । स्थानाङ्ग ८ सूत्रवृत्योः ॥

प्रायः शैलकन्दरादौ, यच्चरन्ति वनान्तरे । ततः पृषोदरादित्वादेते स्युर्वानमन्तराः ॥ २१२ ॥
भृत्यवच्चक्रवर्त्याद्याराधनादिकृतस्ततः । व्यन्तरा वाभिधीयन्ते, नरेभ्यो विगतान्तराः ॥ २१३ ॥
एकैकस्मिन्निकायेऽथ, द्वौ द्वाविन्द्रावुदाहृतौ । दक्षिणोत्तरभेदेन, कालाद्यास्ते च षोडश ॥ २१४ ॥
कालश्चैव महाकालः, पिशाचचक्रवर्तिनौ । सुरूपः प्रतिरूपश्च, भूतेन्द्रौ दक्षिणोत्तरौ ॥ २१५ ॥
पूर्णभद्रमाणिभद्रौ, यक्षाणामधिपावुभौ । भीमश्चैव महाभीमो, राक्षसानामधीश्वरौ ॥ २१६ ॥
किन्नरश्च किम्पुरुषः, किन्नराणां महीक्षितौ । इन्द्रौ किम्पुरुषाणां च, सन्महापुरुषौ स्मृतौ ॥ २१७ ॥

अतिकायमहाकायौ, महोरगधराधिपौ । गन्धर्वाधिपति गीतरतिर्गीतयशा इति ॥ २१८ ॥
सुरेन्द्राः षोडशाप्येते, महाबला महाश्रियः । महासौख्या महोत्साहाः, स्युरनुत्तरशक्तयः ॥ २१९ ॥
कमला चैव कमलप्रभोत्पला सुदर्शना । प्रत्येकमेतन्नाम्न्यः स्युः, प्रियाः पिशाचराजयोः ॥ २२० ॥
रूपवती बहुरूपा, सुरूपा सुभगापि च । भूताधिराजयोरग्रमहिष्यः कथिता जिनैः ॥ २२१ ॥
पूर्णा बहुपुत्रिका चोत्तमा तथा च तारका । पूर्णभद्रमाणिभद्रदेवयोर्दयिता इमाः ॥ २२२ ॥
वसन्तिका केतुमती, रतिसेना रतिप्रिया । गदिता दयिता एताः, किन्नराणामधीशयोः ॥ २२३ ॥
रोहिणी च नवमिका, ह्रीनाम्नी पुष्पवत्यपि । प्राणप्रिया इमाः प्रोक्ता, जिनैः किम्पुरुषेन्द्रयोः ॥ २२४ ॥
भुजगा भुजगवती, महाकच्छा स्फुटाभिधा । चतस्रो जीवितेश्वर्यो, महोरगाधिराजयोः ॥ २२५ ॥
सुघोषा विमला चैव, सुस्वरा च सरस्वती । चतस्रः प्राणदयिता, गन्धर्वाणामधीशयोः ॥ २२६ ॥
साम्प्रतीनास्तु–
कालादीनां दाक्षिणात्येन्द्राणां याः कमलादयः । ता नागपुरवास्तव्या, द्वात्रिंशत्पूर्वजन्मनि ॥ २२७ ॥
महाकालाद्योत्तरात्येन्द्राणां याः कमलादयः । साकेतपुरवास्तव्यास्ता द्वात्रिंशदपि स्मृताः ॥ २२८ ॥
एवं चतुःषष्टिरपि, महेभ्यवृद्धकन्यकाः । स्वस्वनामप्रतिरूपजननी जनकाभिधाः ॥ २२९ ॥
पुष्पचूलार्यिकाशिष्याः, श्रीपार्श्वार्पितसंयमाः । शबलीकृतचारित्रा, मासार्धानशनस्पृशः ॥ २३० ॥
अतिचाराननालोच्याप्रतिक्रम्य मृतास्ततः । कालादिव्यन्तरेंद्राणां, बभूवुः प्राणवल्लभाः ॥ २३१ ॥
प्रत्येकमासां साहस्रः परिवारो भवेदथ । एकैकेयं च देवीनां, सहस्रं रचितुं क्षमाः ॥ २३२ ॥
प्रत्येकमेषामिन्द्राणां, चतुःसहस्रसंमिताः । अवरोध भवन्त्येवं, देव्यो लावण्यबन्धुराः ॥ २३३ ॥
प्रत्येकमेषां सर्वेषां, तिस्रो भवन्ति पर्षदः । ईषा तथा च त्रुटिता, सभा द्रढरथाभिधा ॥ २३४ ॥
सहस्राण्यष्ट देवानां, तत्राभ्यन्तरपर्षदि । मध्यायां दश बाह्यायां, द्वादशेति यथाक्रमम् ॥ २३५ ॥
देवीनां शतमेकैकं, पर्षत्सु स्यात्तिसृष्वपि । देवदेवीनामथात्र, स्थितिः क्रमान्निरूप्यते ॥ २३६ ॥
पूर्णं पल्योपमस्यार्धं, तद्देशोनं तथाधिकम् । पल्योपमस्य तुर्योऽशो, देवानां क्रमशः स्थितिः ॥ २३७ ॥
साधिकः पल्यतुर्यांशः, पूर्णः स एव च स्थितिः । स एव देशेन न्यूनो, देवीनां क्रमतः स्मृता ॥ २३८ ॥
एवं च—सामानिकानामेतेषां, तथाग्रयोषितामपि । पर्षदस्तिस्र ईषा, त्रुटिता द्रढरथाभिधा ॥ २३९ ॥
चतुर्भिरेवं सर्वेऽमी, सामानिकसहस्रकैः । प्रेयसीभिश्चतसृभिः, स्वपरिच्छदचारुभिः ॥ २४० ॥
पार्षदैस्त्रिविधैर्देवैः, सप्तभिः सैन्यनायकैः । गन्धर्वनटहस्त्यश्वरथपादात्यकामरैः ॥ २४१ ॥
अमीभिः सप्तभिः सैन्यैश्चतुर्भिश्चात्मरक्षिणाम् । स्थितैः प्रत्याशं सहस्रैरन्वहं सेवितांह्रयः ॥ २४२ ॥
स्वस्वभौमेयनगरलक्षाणां चक्रवर्तिताम् । असंख्येयानामजस्रं, प्रत्येकं बिभ्रतोऽद्भुताम् ॥ २४३ ॥

व्यन्तराणां व्यन्तरीणां, स्वस्वनिकायजन्मनाम् । स्वस्वदिग्वर्त्तिनां स्वैरं, साम्राज्यमुपभुञ्जते ॥ २४४ ॥
दिव्यस्त्रीसंप्रयुक्तेषु, नाट्येषु व्यापृतेन्द्रियाः । न जानते गतमपि, कालं पल्योपमायुषः ॥ २४५ ॥
तथोक्तम्, "तहिं देवा वंतरिया, वरतरुणीगीयवाइयरवेणम् । निच्चं सुहिया पमुइया, गयंपि कालं न याणंति" ॥
[बृहत्संग्रहणी गा. ३३]

व्यन्तराणामभी अष्टौ, मूलभेदाः प्रकीर्त्तिताः । अष्टावान्तरभेदाः स्युर्ऋणपर्णीमुखाः परे ॥ २४६ ॥
तथाहि, अणपन्नी पणपन्नी, इसिवाई भूयवाईए चेव । कंदी च महाकंदी, कोहंडे चेव पयए ॥
[बृहत्संग्रह गा. ४०]

प्राग्वत् प्रतिनिकायेऽत्र, द्वौ द्वाविन्द्रावुदीरितौ । क्षेत्रयोः रुचकाद्याम्यौत्तराहयोरधीश्वरौ ॥ २४७ ॥
इन्दौ सन्निहितः सामानिकश्चाद्यनिकाययोः । धाता विधातेत्यधिपौ, निकाये च द्वितीयके ॥ २४८ ॥
तार्त्तीयिकनिकायेन्द्रौ, ऋषिश्च ऋषिपालितः । चतुर्थस्य निकायस्य, तावीश्वरमहेश्वरौ ॥ २४९ ॥
सुवत्सश्च विशालश्च, निकाये पञ्चमेऽधिपौ । षष्टे निकाये नेतारौ, हास्यहास्यरती इति ॥ २५० ॥
श्रेयोमहाश्रेयांसौ च, निकाये सप्तमेऽधिपौ । पदगः पदगपतिर्निकायस्याष्टमस्य तौ ॥ २५१ ॥
तथाहुः स्थानाङ्गे – 'दो अणपन्निंदा पन्नत्ता' इत्यादि ॥
एतेऽपि रत्नकाण्डस्य, शतं शतमुपर्यधः ॥ परित्यज्य वसन्त्यष्टशतयोजनमध्यतः ॥ २५२ ॥
तथाहुः प्रज्ञापनायाम् –

> "कहिणं भंते ! वाणमंतराणं देवाणं भोमेज्जा नगरा पण्णत्ता ? कहिणं भंते ! वाणमंतरा देवा परिवसन्ति ? गोयमा ! से रयणप्पभाए पुढवीए रयणामयस्स कंडस्स जोअणसहस्स बाहलस्स उवरिं एगं जोअणसयं ओगाहेत्ता हेट्ठावि एगं जोअणसयं वज्जेता मज्झे अट्ठसु जोअणसएसु एत्थणं वाणमंतराणं तिरियमसंखेज्जा भोमेज्जा नगरावाससयसहस्सा भवंतीति मक्खाया, तेणं" इत्यादि । "तत्थणं बहवे वाणमंतरा देवा परिवसन्ति, तं जहा – पिसाया भूया जक्खा यावत् अणपन्निय पणपन्निय इत्यादि" ॥

संग्रहण्यां तु–"इय पढमजोअणसए रयणाए अट्ठवंतरा अवरे । तेसिं इह सोलसिंदा रुअगहो दाहिणुत्तरओ" ॥
[गा. ४१]

> योगशास्त्रचतुर्थप्रकाशवृत्तौ त्वेवम् – "रत्नप्रभायामेव प्रथमस्य शतस्याध उपरि च दशदश योजनानि मुक्त्वा मध्येऽशीतियोजनेषु अणपन्नियपणपन्नियप्रभृतय" इति ॥

एषां वक्तव्यता सर्वा, विज्ञेया प्राक्तनेन्द्रवत् । जाता द्वात्रिंशदित्येवं, व्यन्तरामरनायकाः ॥ २५३ ॥
भौमेयनगरेष्वेषु, व्यन्तराः प्रायशः खलु । उत्पद्यन्ते प्राच्यभवानुष्ठिताज्ञानकष्टतः ॥ २५४ ॥
मृताः पाशविषाहारजलाग्निक्षुत्तृडादिभिः । भृगुपातादिभिश्च स्युर्व्यन्तराः शुभभावतः ॥ २५५ ॥
स्थितिरुत्कर्षतोऽमीषां, पल्यमर्धं च योषिताम् । सहस्राणि दशाब्दानामुभयेषां जघन्यतः ॥ २५६ ॥
स्वाभाविकं सप्तहस्तमानमुत्कर्षतो वपुः । अङ्गुलासंख्यांशमानं, जघन्यं प्रथमक्षणे ॥ २५७ ॥
लक्षयोजनमानं चोत्कृष्टमुत्तरवैक्रियम् । प्रक्रमेऽङ्गुलसंख्येयभागमानं जघन्यतः ॥ २५८ ॥

एषां लेश्याश्चतस्रः स्युः, पद्मां शुक्लां विना पराः । उच्छ्वसन्ति सप्तभिस्ते, स्तोकैर्जघन्यजीविनः ॥ २५९ ॥
बुभुक्षवश्चैकदिनान्तरेऽथोत्कृष्टजीविनः । समुच्छ्वसन्त्याहरन्ति, मुहूर्त्ताहःपृथक्त्वकैः ॥ २६० ॥
आहारे चित्तसंकल्पोपस्थिताः सारपुद्गलाः । सर्वाङ्गेषु परिणमन्त्येषां कावलिकस्तु न ॥ २६१ ॥
ये तु हिंस्राः सुरा वीरचण्डिकाकालिकादयः । मद्यमांसाद्याहुतिभिस्तुष्यन्ति तर्पिता इव ॥ २६२ ॥
तेऽपि पूर्वभवाभ्यासात्, पापा मिथ्यात्वमोहिताः । मद्यमांसादि वीक्ष्यैव, तुष्यन्ति न तु भुञ्जते ॥ २६३ ॥
संमूर्च्छिमा गर्भजाश्च, तिर्यञ्चो गर्भजा नराः । उत्पद्यन्ते षड्भिरपि, युताः संहननैरिह ॥ २६४ ॥
च्युत्वोत्पद्यन्त एते नृतिरश्चोर्गर्भजन्मनोः । पर्याप्तबादरक्ष्माम्भःप्रत्येकभूरुहेषु च ॥ २६५ ॥
एकेन समयेनैकादयोऽसंख्यावसानकाः । उत्पद्यन्ते च्यवन्तेऽमी, उत्कृष्टमेषु चान्तरम् ॥ २६६ ॥
ज्ञेयं मुहूर्त्तानि चतुर्विंशतिस्तज्जघन्यतः । एकसामयिकं नूनं, च्यवनोत्पत्तिगोचरम् ॥ २६७ ॥
पश्यन्त्यवधिना पञ्चविंशतियोजनान्यमी । जघन्यजीविनोऽन्ये च, संख्येययोजनावधिः ॥ २६८ ॥
तिर्यग्लोकवासिनोऽपि, व्यन्तरा यदिहोदिताः । तद्धै रत्नप्रभापृथ्वीवक्तव्यताप्रसंगतः ॥ २६९ ॥

इति व्यन्तराणां सुराणां पुराणाम् पुराणोपदिष्टा व्यवस्था न्यरूपि ।
तृतीयाच्चतुर्थादुपाङ्गाच्च शेषं विशेषं विदन्तु प्रबुद्धाः समेधाः ॥ २७० ॥

विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिष-द्राज़श्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्वप्रदीपोपमे सर्गो निर्गलितार्थसार्थसुभगः पूर्णः सुखं द्वादशः ॥ २७१ ॥

इति श्री लोकप्रकाशे द्वादशः सर्गः समाप्तः ।

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

अथ त्रयोदशः सर्गः

योजनानां सहस्रं च, मुक्त्वैकैकमुपर्यधः । मध्येऽष्टसप्ततिसहस्राढ्ये लक्षे क्षिताविह ॥ १ ॥
वसन्ति भवनाधीशनिकाया असुरादयः । दशैतेऽपि द्विधा प्राग्वद्दक्षिणोत्तरभेदतः ॥ २ ॥
तेषु प्रत्येकमिन्द्रौ द्वौ, भवतो दक्षिणोत्तरौ । भवनेन्द्रा विंशतिः स्युरित्येवं चमरादयः ॥ ३ ॥
तथोक्तम् – [बृहत्संग्रहणी गाथा-१९]

"असुरा नागसुवण्णा, विज्जु अग्गी य दीव उदही य । दिसिपवणथणिय दसविह, भवणवइ तेसु दु दु इंदा" ॥

अन्ये त्वाहुः । 'नवतियोजनसहस्राणामधस्तात् भवनानि' ॥ अन्यत्र चोपरितनमधस्तनं च योजनसहस्रमुक्त्वा सर्वत्रापि यथासंभवमावासा' इति ॥ 'आवासा नाम कायमानसन्निभा

महामंडपा' इति लघुसंग्रहणीवृत्तौ तत्त्वार्थभाष्येऽपि, "तत्र भवनानि रत्नप्रभायां बाहल्यार्धमवगाह्य मध्ये भवन्ति इत्युक्तम्" । इति ज्ञेयम् ॥ [सर्ग. ४ सूत्र. ११]

चतुस्त्रिंशत्क्रमात्त्रिंशल्लक्षाः स्युर्दक्षिणोत्तराः । भवना असुराणां ते, चतुःषष्टिश्च मीलिता ॥ ४ ॥
लक्षाश्चतुश्चत्वारिंशच्चत्वारिंशद्द्वयोर्दिशोः । नागालयानां चतुरशीतिर्लक्षाश्च मीलिताः ॥ ५ ॥
अष्टात्रिंशच्चतुस्त्रिंशल्लक्षाः क्रमात् द्वयोर्दिशोः । सर्वाग्रेण सुपर्णानां, गृहलक्षा द्विसप्ततिः ॥ ६ ॥
चत्वारिंशच्च षट्त्रिंशद्दक्षिणोत्तरयोः क्रमात् । वैद्युतावासलक्षाः स्युः, षट्सप्ततिश्च मीलिताः ॥ ७ ॥
एवमग्निकुमाराणां, द्वीपवार्धिदिशां तथा । विद्युत्कुमारवत् संख्या, भवनानां प्रकीर्त्तिता ॥ ८ ॥
पञ्चाशदथ षट्चत्वारिंशद्दिशोर्द्वयोः क्रमात् । लक्षा वायुसुरावासाः, सर्वे षण्णवतिश्च ते ॥ ९ ॥
चत्वारिंशत्तथा षट्त्रिंशदुक्ता दिग्द्वये क्रमात् । स्तनितानां गृहाः सर्वे, लक्षाः षट्सप्ततिः किल ॥ १० ॥
चतस्रः कोटयो, लक्षाः, षट् गृहा दक्षिणाश्रिताः । उत्तराहास्तु षट्षष्टिः, लक्षास्तिस्रश्च कोटयः ॥ ११ ॥
द्वयोर्दिशोश्च सर्वाग्रं, भवनानामुदाहृतम् । कोटयः सप्त लक्षाणां, द्वासप्तत्या समन्विताः ॥ १२ ॥
आकारेण सुषमया, प्राकारपरिखादिभिः । व्यन्तराणां नगरवत्, प्रायो ज्ञेयान्यमून्यपि ॥ १३ ॥
गुरूणि तान्यसंख्येयैर्मितानि खलु योजनैः । मध्यानि संख्येयैर्जम्बूद्वीपाभानि लघून्यपि ॥ १४ ॥
तत्रासुरनिकायस्य, दक्षिणस्यां दिशि प्रभुः । चमरेन्द्रः शरच्चन्द्रचन्द्रिकाविलसद्यशाः ॥ १५ ॥
तथाहि – विद्यते दक्षिणदिशि, तिर्यग्मेरोः सुदर्शनात् । असंख्यद्वीपाब्धिपरो, द्वीपोऽरुणवराभिधः ॥ १६ ॥
तस्य बाह्यवेदिकान्तात्, मध्येऽरुणवराम्बुधेः । योजनानां द्विचत्वारिंशत्सहस्राण्यतीत्य वै ॥ १७ ॥
चमरस्यासुरेन्द्रस्य, महानुत्पातपर्वतः । तिगिञ्छिकूटनामास्ति, प्रशस्तश्रीभरोद्भुरः ॥ १८ ॥
योजनानां सप्तदश, शतान्यथैकविंशतिः । उच्छ्रितस्तस्य तुर्यांशो, निमग्नो वसुधान्तरे ॥ १९ ॥
मूले सहस्रं द्वाविंशं, योजनानां स विस्तृतः । मध्ये शतानि चत्वारि, चतुर्विंशानि विस्तृतः ॥ २० ॥
शतानि सप्त विस्तीर्णस्त्रयोविंशानि चोपरि । ऊर्ध्वाधो विस्तृतो मध्ये, क्षामो महामुकुन्दवत् ॥ २१ ॥
मुकुन्दो वाद्यविशेष इति ॥
सर्वरत्नमयस्यास्य, वेदिकावनशालिनः । शिरस्तले मध्यदेशे, स्यात्प्रासादावतंसकः ॥ २२ ॥
सार्द्धे द्वे योजनशते, तुङ्गः सपञ्चविंशतिः । ततः शतं योजनानि, रम्योल्लोकमहीतलः ॥ २३ ॥
अष्टयोजनमानाथ, तत्रास्ति मणिपीठिका । चमरेन्द्रस्यात्र सिंहासनं सहपरिच्छदम् ॥ २४ ॥
तिर्यग्लोकं जिगमिषुर्जिनजन्मोत्सवादिषु । प्रथमं चमरेन्द्रोऽस्मिन्नुपैति स्वाश्रयात् गिरौ ॥ २५ ॥
ततो यथेप्सितं स्थानमुत्पतत्यविलम्बतः । तेनायं चमरेन्द्रस्य, ख्यात उत्पातपर्वतः ॥ २६ ॥
षट् शतान्यथ कोटीनां, पञ्चपञ्चाशदेव च । कोट्यो लक्षाण्यथ पञ्चत्रिंशल्लक्षार्धमेव च ॥ २७ ॥

योजनानि तिर्यगस्मात्तिगिञ्छिकूटपर्वतात् । अतिक्रम्य दक्षिणस्यां, मध्येऽरुणवरोदधेः ॥ २८ ॥
यो देशस्तदधोभागे, मध्ये रत्नप्रभाक्षितेः । चत्वारिंशद्योजनानां, सहस्राण्यवगाह्य च ॥ २९ ॥
राजधान्यस्ति चमरचञ्चा चञ्चन्मणिमयी । व्यासायामपरिक्षेपैर्जम्बूद्वीपसधर्मिणी ॥ ३० ॥
वप्रश्चास्या योजनानामध्यर्धं शतमुन्नतः । पञ्चाशद्विस्तृतो मूले, मौलौ द्वादश सार्द्धकाः ॥ ३१ ॥
आयतैर्योजनस्यार्धं, न्यूनार्धयोजनोच्छ्रितैः । क्रोशं विस्तीर्णैश्च रम्यो, रत्नजैः कपिशीर्षकैः ॥ ३२ ॥
एकैकस्यां स बाहायां, पञ्चद्वारशताञ्चितः । सार्धे द्वे योजनशते, द्वारं चैकैकमुच्छ्रितम् ॥ ३३ ॥
सपादशतविस्तीर्णतोरणाद्युपशोभितम् । मध्येऽथ वप्रस्यैतस्य, पीठबन्धो विराजते ॥ ३४ ॥
योजनानां षोडशैष, सहस्रान्विस्तृतायतः । पद्मवरवेदिकया, परीतः काननेन च ॥ ३५ ॥
तस्य मध्ये रम्यभूमावस्ति प्रासादशेखरः । सार्धे द्वे योजनशते, तुङ्गस्तदर्द्धविस्तृतः ॥ ३६ ॥
चतुर्भिरेष प्रासादैश्चतुर्दिशमलङ्कृतः । शतं सपादमुत्तुङ्गैः, सार्धद्विषष्टिविस्तृतैः ॥ ३७ ॥
प्रत्येकमेतेऽपि चतुर्दिशं चतुर्भिराश्रिताः । सार्धं द्विषष्टिमुत्तुङ्गैस्तदर्धविस्तृतैस्तथा ॥ ३८ ॥
सपादैकत्रिंशदुच्चैस्तदर्धविस्तृतैर्वृताः । प्रासादास्तेऽपि प्रत्येकं, पुनस्तेऽपि चतुर्दिशम् ॥ ३९ ॥
ससार्द्धद्विक्रोशपञ्चदशयोजनतुङ्गकैः । तदर्धविस्तृतैरेवं चतुर्दिशामलङ्कृताः ॥ ४० ॥
एवं समूलप्रासादाः, प्रासादाः सर्वसंख्यया । चमरस्य भवन्त्येकचत्वारिंशं शतत्रयम् ॥ ४१ ॥
प्रासादास्ते रत्नमया, मरुच्चञ्चलकेतवः । मृदुस्पर्शाक्षारुगन्धा दृश्याः सुवर्णवालुकाः ॥ ४२ ॥
अथ प्रासादेभ्य एभ्य, ऐशान्यां स्युर्यथाक्रमम् । सभा सुधर्मा सिद्धायतनं सभोपपातकृत् ॥ ४३ ॥
ह्रदोऽभिषेकालङ्कारव्यवसायसभाः क्रमात् । सर्वेऽप्यमी सुधर्माद्या, षट्त्रिंशद्योजनोच्छ्रिताः ॥ ४४ ॥
दीर्घा पञ्चाशतं पञ्चविंशतिविस्तृता इह । वैमानिकसभादिभ्यो, मानतोऽर्धमिता इति ॥ ४५ ॥

इत्यर्थतो भगवती द्वितीयशतकाष्टमोद्देशके ॥ अत्रायं विशेषः ॥ "चमरस्स णं सभा सुहम्मा एकावन्नखंभसयसन्निविट्ठापं । एवं बलीयस्सवि" । इति तुर्याङ्गे ॥

अथैतस्यामुपपातसभायां सुकृती जनः । देवदूष्यच्छन्नशय्योत्सङ्ग उत्पद्यते क्षणात् ॥ ४६ ॥
चमरेन्द्रतयाथासावुत्थाय शयनीयतः । गत्वा ह्रदे कृतस्नानस्ततोऽभिषेकपर्षदि ॥ ४७ ॥
कृताभिषेकः सोत्साहैरसुरैः समहोत्सवम् । अलङ्कारसभायां च, गत्वालङ्कृतभूषनः ॥ ४८ ॥
व्यवसायसभां गत्वा, पुस्तकावसितस्थितिः । स्नात्वा नन्दापुष्करिण्यां, भक्त्या कृतजिनार्चनः ॥ ४९ ॥
समागत्य सुधर्मायां, सभायां सपरिच्छदः । दिव्यान् सिंहासनासीनो, भोगान् भुङ्क्ते यथारुचि ॥ ५० ॥
कामकेलिलालसस्तु, जिनस्याशातनाभयात् । गत्वा बहिः सुधर्माया, रमते रुचितास्पदे ॥ ५१ ॥
कदाचिच्चैष चमरचञ्चावासे मनोरमे । सकान्तः क्रीडितुं याति, क्रीडोद्याने नृपादिवत् ॥ ५२ ॥

स चैवम्,

अस्याश्चमरचञ्चाया, नैऋत्यां ककुभि ध्रुवम् । षट्कोटीनां शतान् पञ्चपञ्चाशत्कोटीसंयुतान् ॥ ५३ ॥
पञ्चत्रिंशच्च लक्षाणि, पञ्चाशच्च सहस्रकान् । योजनानामतिक्रम्य, तस्मिन्नेवारुणोदधौ ॥ ५४ ॥
आवासो भाति चमरचञ्चश्चञ्चच्छ्रियां निधिः । क्रमः क्रीडारतिस्थानं चमरस्यासुरेशितुः ॥ ५५ ॥
सहस्राण्येष चतुरशीतिमायतविस्तृतः । समन्ततः परिक्षिप्तः, प्राकारेण महीयसा ॥ ५६ ॥
सर्वं चमरचञ्चावत्, प्रासादादि भवेदिह । न विद्यन्ते परं पञ्च, सुधर्माद्याः सभाः शुभाः ॥ ५७ ॥
स एष साम्प्रतीनस्तु, जम्बूद्वीपेऽत्र भारते । बेभेलाख्ये सन्निवेशे, विन्ध्याचलसमीपगे ॥ ५८ ॥
आसीत् गृहपतिश्रेष्ठः, पूरणाख्यो महर्द्धिकः । जाग्रत्कुटुम्बजागर्यां, निशि संवेगमाप सः ॥ ५९ ॥
प्रातर्निमन्त्र्य स्वजनान्, भोज्यवस्त्रादिभिर्भृशम् । सन्तोष्य ज्येष्ठपुत्राय, कुटुम्बभारमार्पयत् ॥ ६० ॥
पतद्ग्रहं दारुमयं, कारयित्वा चतुःपुटं । दीक्षां लात्वा दानमयीं, चक्रे सातापनं तपः ॥ ६१ ॥
षष्टस्यैव पारणायामुत्तीर्यातापनास्थलात् । भिक्षार्थमाटीत् बेभेले, करे धृत्वा पतत्ग्रहम् ॥ ६२ ॥
भिक्षां ददानः पान्थेभ्यः, पतितां प्रथमे पुटे । काकशालावृकादीनां, द्वितीयपुटसंगताम् ॥ ६३ ॥
तां मत्स्यकच्छपादीनां, तृतीयपुटगां ददत् । पतितां च पुटे तुर्ये, भिक्षामादत्स्वयं मिताम् ॥ ६४ ॥
एवं द्वादशवर्षाणि, तपः कृत्वातिदुष्करम् । स पादपोपगमनमङ्गीकृत्यैकमासिकम् ॥ ६५ ॥
मृत्वामुष्यां राजधान्यां, चमरेन्द्रतयाभवत् । सर्वपर्याप्तिपर्याप्तस्तत्कालोत्पन्न एव सः ॥ ६६ ॥
ऊर्द्ध्वमालोकयामास, स्वभावात् ज्ञानचक्षुषा । आसौधर्मदेवलोकं, तत्र दृष्ट्वा सुरेश्वरम् ॥ ६७ ॥
शक्रसिंहासनासीनं, पीनतेजःसुखश्रियम् । अचिन्तयन् मुमुर्षुः कः, क्रीडत्येष ममोपरि ॥ ६८ ॥
ततः सामानिकान् देवान्, स आहूयेति पृष्टवान् । भो भो क एष योऽस्माकमपि मूर्द्धनि तिष्ठति ॥ ६९ ॥
तेऽपि व्यजिज्ञपन् नत्वा, स्वामिन्नेष सुधर्मराट् । नित्या स्थानव्यवस्थेयं, सौधर्मेन्द्रासुरेन्द्रयोः ॥ ७० ॥
हन्त तेऽन्ये येऽसुरेन्द्रा, एनमित्थं शिरःस्थितम् । सेहिरे न सहेऽहं तु, पातयिष्याम्यधः क्षणात् ॥ ७१ ॥
निश्चित्येति पुनश्चित्ते, व्यमृशत् सोऽपि वज्रभृत् । यद्यनेनाभिहन्येऽहं, शरणं मम कस्तदा ॥ ७२ ॥
विचिन्त्येत्यवधिज्ञानोपयोगाच्चमराधिपः । सुसुमारपुरोद्यानेऽपश्यत् वीरजिनेश्वरम् ॥ ७३ ॥
दध्यौ चायं जिनो वीरः, प्रतिमामेकरात्रिकीम् । प्रतिपद्याष्टमतपा, एकपुद्गलदत्तदृक् ॥ ७४ ॥
निर्निमेषो निष्प्रकम्पः, कायोत्सर्गेऽस्त्यवस्थितः । एकादशाब्दपर्याये, शरण्योऽस्तु स एव मे ॥ ७५ ॥
इति ध्यात्वावश्यकार्यं, त्यक्त्वार्हदर्चनादिकम् । उत्थायोत्पादशय्यायास्तद्देवदूष्यसंवृतः ॥ ७६ ॥
उपादाय प्रहरणरत्नं परिधमुद्धतः । तिगिञ्छिकूटमुत्पातगिरिमागत्य सत्वरम् ॥ ७७ ॥
नव्यं वपुर्विधायैत्य, सुसुमारपुरात् बहिः । अशोककाननेऽशोकतरोर्मूले शिलोपरि ॥ ७८ ॥

नमस्कृत्य जिनं युष्मन्निश्रया याम्यहं युधे । यूयं मे त्राणमित्युक्त्वा, भूयोऽप्युत्तरवैक्रियम् ॥ ७९ ॥
वपुर्भीष्मं माषराशिकुहूरात्रिसहोदरम् । कृत्वा योजनलक्षोच्चमुत्पपात नभस्तलम् ॥ ८० ॥
कुर्वन्क्वचित् सिंहनादं, क्वचिच्च गजगर्जितम् । हयहेषारवं क्वापि, क्वचित्कलकलध्वनिम् ॥ ८१ ॥
क्षोभयन्निव पातालं, कम्पयन्निव मेदिनीम् । तिर्यग्लोकं व्याकुलयन्, स्फोटयिष्यन्निवाम्बरम् ॥ ८२ ॥
विद्युद्वृष्टिगर्जितानि, रजस्तमांसि चोत्किरन् । त्रायसन् व्यन्तरान् देवान्, कुर्वन् ज्योतिषिकान् द्विधा ॥ ८३ ॥
विमानस्याथ सौधर्मावतंसकस्य वेदिकाम् । आक्रम्यैकेनापरेण, सुधर्मासंसदं पदा ॥ ८४ ॥
जघान परिघेणेन्द्रकीलकं त्रिस्ततोऽवदत् । क्व रे शक्रः क्व रे सामानिकाः क्व रे सुराः परे ॥ ८५ ॥
पातयामि घातयामि, शातयाम्यधुनाखिलान् । करोम्यप्सरसः सर्वाः, स्वायत्ताः सह वैभवैः ॥ ८६ ॥
फलं मदाशातनायाः, शक्रोऽनुभवतादिति । गिरः श्रुत्वाश्रुतपूर्वाः, भ्रुकुटीभीषणो हरिः ॥ ८७ ॥
सक्रोधहासमित्याह, किं रे चमर दुर्दश । नवोत्पन्नोऽसि रे मूढ, मुमूर्षस्यधुनैव किम् ॥ ८८ ॥
यद्वा तवेयानुत्साहोऽनर्थायैव न संशयः । पक्षौ पिपीलिकानां हि, जायेते मृत्युहेतवे ॥ ८९ ॥
इमां गृहाणातिथेयीं, मदवज्ञाफलं मनाक् । मुमोच वज्रमित्युक्त्वा, ज्वलज्ज्वालाकरालितम् ॥ ९० ॥
तद् दृष्ट्वा चकितोऽत्यन्तं, नश्यन् संकोच्य भूघनम् । प्रविष्टो रक्ष रक्षेति, वदन् वीरक्रमान्तरे ॥ ९१ ॥
ततः शक्रोऽपि विज्ञाय, वीरं तच्छरणीकृतम् । चतुरङ्गुलमप्राप्तमादाय पविमित्यवक् ॥ ९२ ॥
कम्पसे किमिदानीं भोः, पशुः सिंहेक्षणादिव । वीरप्रसादात् मुक्तोऽसि, न ते मत्तोऽधुना भयम् ॥ ९३ ॥
इत्युक्त्वा वामपादेन, त्रिः प्रहृत्य वसुन्धराम् । क्षमयित्वा जिनेन्द्रं च, सुरेन्द्रः स्वास्पदं ययौ ॥ ९४ ॥
ततो वज्रभयात् मुक्तश्चमरेन्द्रो निजाश्रयम् । गत्वा सामानिकादीनामुवाचोदन्तमादितः ॥ ९५ ॥
भद्रं स्तात् त्रैशलेयाय, तस्मै त्रैलोक्यबन्धवे । येन त्रातोऽस्मि मरणात्, हंत वज्राग्निदुस्सहात् ॥ ९६ ॥
उपकारमिति प्राज्ञस्तं स्मरन् सपरिच्छदः । गत्वा पुनर्महावीरमभ्यर्च्च ताण्डवादिभिः ॥ ९७ ॥
आगत्य स्वास्पदं प्रीतो, विस्मृतेन्द्रपराभवः । धर्मकर्मस्थितिं सर्वामाराध्य सुखभागभूत् ॥ ९८ ॥
अयं च चमरोऽयासीद्यत्सौधर्मावतंसकम् । आश्चर्यमेतद्विज्ञेयमनन्तकालसम्भवि ॥ ९९ ॥
चतुःषष्टिसहस्राणि, सामानिकसुधाभुजः । अस्य त्रायस्त्रिंशकाश्च, त्रयस्त्रिंशत्सुधाशिनः ॥ १०० ॥
एते च जम्बुद्वीपेऽत्र, क्षेत्रे भारतनामनि । काकन्द्यां पुर्यवर्त्तन्त, त्रयस्त्रिंशत् महर्द्धिकाः ॥ १०१ ॥
श्रद्धालवो ज्ञाततत्त्वाः, सहायाश्च परस्परम् । पूर्वं ते भावितात्मानोऽभूवन्नुग्रक्रियाश्रयाः ॥ १०२ ॥
पश्चाच्च कर्मवशतो, जाता धर्मे श्लथाशयाः । पार्श्वस्था अवसन्नाश्च, कुशीलाः स्वैरचारिणः ॥ १०३ ॥
एवं च भूरिवर्षाणि, श्रमणोपासकक्रियाम् । आराध्यार्द्धमासिकीं ते, कृत्वा संलेखनामपि ॥ १०४ ॥
अनालोच्याप्रतिक्रम्यातिचारांस्तान् पुराकृतान् । मृत्वा त्रयस्त्रिंशकत्वं, लेभिरे चमरेशितुः ॥ १०५ ॥

त्रायस्त्रिंशकरूढिस्तु, नैतेभ्य एव किन्तु ते । उत्पद्यन्ते च्यवन्ते च, स्वस्वस्थित्या परापरा: ॥ १०६ ॥
तिस्रोऽस्य पर्षदस्तत्राभ्यन्तरा समिताभिधा । मध्या चण्डाभिधा ज्ञेया, बाह्या जाताह्वया पुन: ॥ १०७ ॥
स्युश्चतुर्विंशतिर्देवसहस्राण्याद्यपर्षदि । सार्धपल्योपमद्वन्द्वस्थितीन्यथात्र पर्षदि ॥ १०८ ॥
शतान्यर्द्धतृतीयानि, सार्द्धपल्योपमायुषाम् । देवीनां मध्यमायां चाष्टाविंशति: सहस्रका: ॥ १०९ ॥
द्विपल्यायुर्निर्जराणां, देवीनां त्विहपर्षदि । शतानि त्रीण्येकपल्यायुषामथान्त्यपर्षदि ॥ ११० ॥
स्युर्द्वात्रिंशत्सहस्राणि, सार्द्धपल्यायुष: सुरा: । शतान्यर्द्धचतुर्थानि, देव्योर्द्धपल्यजीविता: ॥ १११ ॥
यथैव पर्षदस्तिस्रो, वर्णिताश्चमरेशितु: । एवं सामानिकत्रायस्त्रिंशकानां तदाह्वया: ॥ ११२ ॥
पर्षदो लोकपालानां, पुनस्तिस्रो भवन्ति ता: । तपाथ त्रुटिता पर्वा, इत्येतैर्नामभिर्युता: ॥ ११३ ॥
इदमर्थत: स्थानाङ्गसूत्रे ॥
काली राजी च रत्नी, च विद्युन्मेघाभिधा परा । पञ्चास्याग्रमहिष्य: स्यू, रूपलावण्यबन्धुरा: ॥ ११४ ॥
कालीयं प्राग्भवे जम्बूद्वीपे दक्षिणभारते । पुर्यामामलकल्पायां, कालाख्यस्य गृहेशितु: ॥ ११५ ॥
कालश्रीतनुसंभूता, कालीनामाभवत् सुता । बृहत्कुमारी श्रीपार्श्वपुष्पचूलार्पितव्रता ॥ ११६ ॥
यथाछन्दीभूय दोषानप्रतिक्रम्य पाक्षिकीम् । कृत्वा संलेखनां मृत्वा, चमरेन्द्रप्रियाभवत् ॥ ११७ ॥
कालावतंसं भवनं, कालं सिंहासनं भवेत् । काल्या देव्या: परासामप्येवं स्वाख्यानुरूपत: ॥ ११८ ॥
स्वस्वनामसदृक्नामजननीजनका इति । ज्ञेया: शेषाश्चतस्राऽपि तथैव मलिनव्रता: ॥ ११९ ॥
स्वाख्यावतंसे भवने, स्वाख्ये सिंहासनेऽभवन् । चमरेन्द्रप्रिया एता:, सार्द्धपल्यद्वयायुष: ॥ १२० ॥
बलीन्द्रदयितानामप्यैतिह्यमनया दिशा । श्रावस्त्यासां पुरी सार्द्धमायु: पल्यत्रयं पुन: ॥ १२१ ॥
एकैकाग्रमहिष्यष्टसहस्रपरिवारयुक् । सहस्राण्यष्ट देवीनां, नव्यानां रचितुं क्षमा ॥ १२२ ॥
चत्वारिंशत् सहस्राणि, स्युर्देव्य: सर्वसंख्यया । भुङ्क्तेऽसुरेन्द्रश्चैताभि:, कृतैतावत्तनु: सुखम् ॥ १२३ ॥
सोमो यमश्च वरुणस्तथा वैश्रमणाभिध: । चत्वारोऽस्य लोकपालाश्चतुर्दिगधिकारिण: ॥ १२४ ॥
चतुर्णामप्यथैतेषां, चतस्र: प्राणवल्लभा: । कनका कनकलता, चित्रगुप्ता वसुन्धरा ॥ १२५ ॥
एकैकेयं च साहस्रपरिवारविराजिता । देवी सहस्रमेकैकं, नव्यं विकुर्वितुं क्षमा ॥ १२६ ॥
स्वस्वनामराजधान्यां, स्वस्वसिंहासने स्थिता: । चत्वारोऽमी लोकपाला भुञ्जते दिव्यसम्पदम् ॥ १२७ ॥
तथास्य चमरेन्द्रस्य, सप्त सैन्यानि तत्र च । पादात्याश्वेभमहिषरथसंज्ञानि पञ्च वै ॥ १२८ ॥
एते सुरा अपि स्वामिशासनात् कार्यहेतवे । तादूप्यं प्रतिपद्यन्ते, नायकोक्तेर्नटा इव ॥ १२९ ॥
एतानि पञ्च सैन्यानि, युद्धसज्जान्यहर्निशम् । गन्धर्वनटसैन्ये ये, ते भोगायेति सप्तकम् ॥ १३० ॥
सप्त सेनान्योऽप्यमीषां, सर्वदा वशवर्तिन: । सेवन्तेऽसुरनेतारं, चमरं विनयानता: ॥ १३१ ॥

द्रुमः सौदामश्च कुंथुः, लोहिताक्षश्च किंन्नरः । रिष्टो गीतरतिश्चेति, सेनान्यामभिधाः क्रमात् ॥ १३२ ॥
द्रुमस्य तत्र पादात्याधिपस्य चमरेशितुः । स्युः सप्त कच्छाः कच्छा च, स्ववशो नाकिनां गणः ॥ १३३ ॥
आद्यकच्छायां सुराणां, चतुःषष्टिः सहस्रकाः । ततो यथोत्तरं कच्छाः, षडपि द्विगुणाः क्रमात् ॥ १३४ ॥
इन्द्राणामपरेषामप्येवं पत्तिचमूपतेः । वाच्याः सप्त सप्त कच्छाः, स्थानद्विगुणिता मिथः ॥ १३५ ॥
चतुःषष्टिः सहस्राणि, प्रत्याशमात्मरक्षकाः । लक्षद्वयं षट्पञ्चाशत्सहस्राणीति तेऽखिलाः ॥ १३६ ॥
एवमुक्तपरीवारसुरैराराधितक्रमः । घनश्यामस्निग्धवर्णः किञ्चिदारक्तलोचनः ॥ १३७ ॥
विद्रुमोष्ठः श्वेतदन्तः, सरलोत्तुङ्गनासिकः । दीप्ररक्ताम्बरो मेघ, इव सन्ध्याभ्रसंभृतः ॥ १३८ ॥
मुकुटेनाङ्कितो मौलौ, सच्चुडामणिलक्ष्मणा । पूर्वाद्रिरिव तिग्मांशुबिम्बेनोदित्वरश्रिया ॥ १३९ ॥
चतुस्त्रिंशल्लक्षमानभवनानामधीश्वरः । सर्वेषां दाक्षिणात्यानामसुराणां सयोषिताम् ॥ १४० ॥
साम्राज्यं शासित दिव्यस्त्रीनाटकादिषु दत्तदृक् । एकार्णवायुश्च्युत्वेतो, भवे भाविनी सेत्स्यति ॥ १४१ ॥
च्युते चास्मिन्नस्य पदे, पुनरुत्पत्स्यतेऽपरः । एवमव्युच्छितिनयान्नित्य एवैष उच्यते ॥ १४२ ॥
पूर्णं जम्बुद्वीपमेकमेष पूरयितुं क्षमः । असुरैरसुरीभिश्च, निजशक्त्या विकुर्वितैः ॥ १४३ ॥
तिर्यक् पुनरसंख्येयान्, द्वीपपाथोनिधींस्तथा । एवं सामानिकाः त्रायस्त्रिंशाः चास्य प्रभूष्णवः ॥ १४४ ॥
अस्यैवं लोकपालाग्रमहिष्योऽप्यथ किन्तु ते । शक्ताः पूरयितुं तिर्यक्संख्येयद्वीपवारिधीन् ॥ १४५ ॥
इत्यर्थतो भगवत्याम् ॥ देवेन्द्रस्तवे तु,
जावय जम्बुद्दीवो, जावय चमरस्स चमरचंचाओ । असुरेहिं असुरकन्नाहिं, अत्थि विसओ भरेओ से ॥
अथान्योऽसुरदेवेन्द्रो, बली नामा निरूप्यते । उत्तरस्यां दिशि विभुर्योऽसौ सौभाग्यसेवधिः ॥ १४६ ॥
तथाहि दिशि कौबेर्यां, जम्बूद्वीपस्थमेरुतः । असंख्यद्वीपाब्धिपरो, द्वीपोऽरुणवराभिधः ॥ १४७ ॥
तस्य बाह्यवेदिकान्तात्, तस्मिन्नेव पयोनिधौ । द्विचत्वारिंशत्सहस्रयोजनानां व्यतिक्रमे ॥ १४८ ॥
रुचकेन्द्राभिधोऽस्त्यत्र, बलेरुत्पातपर्वतः । तिर्यग्लोके जिगमिषोर्बलेरुत्पतनास्पदम् ॥ १४९ ॥
तिगिञ्छिकूटतुल्योऽसौ, प्रमाणादिस्वरूपतः । बलेः प्रासादोऽस्ति तत्र, प्राग्वत् सिंहासनाञ्चितः ॥ १५० ॥
कोटयः पञ्चपञ्चाशत्, षट् कोटीनां शतानि च । पञ्चत्रिंशच्च लक्षाणि, पञ्चाशच्च सहस्रकाः ॥ १५१ ॥
योजनानि व्यतिक्रम्याम्भोधावुत्पातपर्वतात् । गर्भे रत्नाप्रभापृथ्व्या, गत्वाधो योजनानि च ॥ १५२ ॥
चत्वारिंशत्सहस्राणि, वर्त्तते तत्र मञ्जुला । बलिचञ्चा राजधानी, स्त्यानीभूताः इव त्विषः ॥ १५३ ॥
अस्याः चमरचञ्चावत्, स्वरूपमखिलं भवेत् । वप्रप्रासादादि तेषां, प्रमाणानुक्रमादि च ॥ १५४ ॥
अत्रोपपादसदसि, देवदूष्यपरिष्कृते । इन्द्रत्वेनोत्पद्यतेऽङ्गी, शय्योत्सङ्गे महातपाः ॥ १५५ ॥
अस्य षष्टिः सहस्राणि, सामानिकसुधाभुजाम् । त्रायस्त्रिंशकदेवाश्च, त्रयस्त्रिंशदुदीरिताः ॥ १५६ ॥

साम्प्रतीनास्त्वमी बेभेलकग्रामनिवासिनः । श्रद्धालवस्त्रयस्त्रिंशत्, सुहृदश्च परस्परम् ॥ १५७ ॥
प्रागेते दृढधर्माणः, पश्चाद्विश्लथचेतसः । उत्पन्ना अत्र चमरत्रायस्त्रिंशकदेववत् ॥ १५८ ॥
प्राग्वत्तिस्रः पर्षदोऽस्य, तिसृष्वपि सुराः क्रमात् । सहस्राणां विंशतिः स्युः, चतुरष्टाधिका च सा ॥ १५९ ॥
सार्द्धे द्वे च शते द्वे च, सार्द्धं शतमनुक्रमात् । देव्यः पर्षत्सु तिसृषु, देवानां क्रमतः स्थितिः ॥ १६० ॥
पल्यानां त्रितयं सार्धं, सार्धं त्रयं द्वयं क्रमात् । देवीनां तु स्थितिः सार्धं, द्वे ते द्वे सार्धमेव च ॥ १६१ ॥
तिस्रस्तिस्रः पर्षदोऽस्य, भवन्ति प्राग्वदेव च । सामानिकत्रायस्त्रिंशलोकपालाग्रयोषिताम् ॥ १६२ ॥
शुभा निशुम्भा रम्भा च, निरम्भा मदनेति च । स्युः पञ्चाग्रमहिष्योऽस्य, प्राग्वदासां परिच्छदः ॥ १६३ ॥
एवं सहस्रैः चत्वारिंशताऽन्तःपुरिकाजनैः । सुधर्माया बहिर्भुंक्ते, कृतैतावद्वपुः सुखम् ॥ १६४ ॥
चत्वारोऽस्य लोकपालाश्चतुर्दिगधिकारिणः । सोमो यमश्च वरुणस्तुर्यो वैश्रमणाभिधः ॥ १६५ ॥
एषां चतस्रः प्रत्येकं, दयिताः नामतस्तु ताः । मीनका च सुभद्रा च, विद्युदाख्या तथाशनिः ॥ १६६ ॥
स्वस्वनामराजधान्यां, सिंहासने स्वनामनि । उपविष्टाः सुखं दिव्यं, मुदा तेऽप्युपभुञ्जते ॥ १६७ ॥
महाद्रुमो महासौदासाह्वयः परिकीर्त्तितः । मालङ्कारोऽपि च महालोहिताक्षाभिधः सुरः ॥ १६८ ॥
किंपुरुषो महारिष्टस्तथा गीतयशा इति । बलिनाम्नोः सुरपतेः, क्रमात् सप्तेति सैन्यपाः ॥ १६९ ॥
पत्तीशस्याद्यकच्छायां, षष्टिर्देवसहस्रकाः । कच्छाः षडन्याश्च ततः, स्युरस्य द्विगुणाः क्रमात् ॥ १७० ॥
एवं सामानिकैस्त्रायस्त्रिंशकैर्लोकपालकैः । सेव्योऽग्रमहिषीभिश्च, सप्तभिः सैन्यसैन्यपैः ॥ १७१ ॥
षष्ट्या सहस्रैः प्रत्याशं, सेव्यमानोऽङ्गरक्षकैः । चत्वारिंशत्सहस्राढ्यलक्षद्वयमितैः समैः ॥ १७२ ॥
श्यामवर्णो रक्तवासाश्चूडामण्यङ्कमौलिभृत् । सुरूपः सातिरेकैकसागरोपमजीवितः ॥ १७३ ॥
भवनावासलक्षाणां, त्रिंशतोऽनुभवत्यसौ । असुरीणां चासुराणामुदीच्यानामधीशताम् ॥ १७४ ॥
परिवारयुतस्यास्य, शक्तिर्विकुर्वणाश्रिता । चमरेन्द्रस्येव किन्तु, सर्वत्र सातिरेकता ॥ १७५ ॥
इत्येवमस्मिन्नसुरनिकाये प्रभवो दश । चमरेन्द्रो बलीन्द्रश्च, लोकपालास्तथाष्ट च ॥ १७६ ॥
लक्षेष्वेवं चतुःषष्टौ, भवनेष्वपरेऽपि हि । उत्पद्यन्तेऽसुरवराः, स्वस्वपुण्यानुसारतः ॥ १७७ ॥
उत्पत्तिकाले शय्यायां, भूषणाम्बरवर्जिताः । ततश्चालङ्कृतास्तेन, वपुषा नूतनेन वा ॥ १७८ ॥
सर्वेऽप्यमी श्यामवर्णा, बिम्बोष्ठाः कृष्णमूर्द्धजाः । शुभ्रदन्ता वामकर्णावसक्तदीप्रकुण्डलाः ॥ १७९ ॥
दन्ताः केशाश्चामीषां वैक्रिया दृष्टव्या न स्वाभाविकाः । वैक्रिय-शरीरत्वात् । इति जीवाभिगमवृत्तौ ॥
आर्द्रचन्दनलिप्ताङ्गा, अरुणाम्बरधारिणः । चिह्नेन चूडामणिना, सदालङ्कृतमौलयः ॥ १८० ॥
कुमारत्वमतिक्रान्ता, असंप्राप्ताश्च यौवनम् । ततोऽतिमुग्धमधुरमृदुयौवनशालिनः ॥ १८१ ॥
केयूराङ्गदहाराद्यैर्भूषिता विलसन्ति ते । दीप्रा दशस्वङ्गुलीषु, मणिरत्नाङ्गुलीयकैः ॥ १८२ ॥

देव्योऽप्येवंविधाः कामक्रीडाविधिविचक्षणाः । घनस्तना युवजनोन्मादिलावण्ययौवनाः ॥ १८३ ॥
सप्त हस्ताः देहमानमेषामुत्कर्षतो भवेत् । अङ्गुलासंख्यांशमानमुत्पत्तौ तज्जघन्यतः ॥ १८४ ॥
लक्षयोजनमानं चोत्कर्षादुत्तरवैक्रियम् । प्रारम्भेऽङ्गुलसंख्येयभागमानं जघन्यतः ॥ १८५ ॥
एषां च दाक्षिणात्यानां, स्थितिरुत्कर्षतो भवेत् । सागरोपममेकं तदुदीच्यानां च साधिकम् ॥ १८६ ॥
देवीनां दाक्षिणात्यानां, सार्धं पल्यत्रयं स्थितिः । ज्येष्ठोत्तराहदेवीनां, सार्धं पल्यचतुष्टयम् ॥ १८७ ॥
जघन्या तु वत्सराणां, सहस्राणि दश स्थितिः । सर्वेषां मध्यमा ज्येष्ठाकनिष्ठान्तरनेकधा ॥ १८८ ॥
ज्येष्ठायुषो दाक्षिणात्या, मासार्धनोच्छ्वसन्त्यथ । आहारकांक्षिणो वर्षसहस्रेण भवन्ति च ॥ १८९ ॥
उदीच्याः सातिरेकेण, मासार्धेनोच्छ्वसन्ति वै । साधिकाब्दसहस्रेण, भवन्त्याहारकांक्षिणः ॥ १९० ॥
मध्यमस्थितयस्त्वेते, स्वस्वस्थित्यनुसारतः । मुहूर्त्ताहःपृथक्त्वैः स्युरुच्छ्वासाहारकांक्षिणः ॥ १९१ ॥
जघन्यजीविनः स्तोकैः सप्तभिः प्रोच्छ्वसन्त्यमी । एकाहान्तरमाहारं, समीहंते च चेतसा ॥ १९२ ॥
ततः संकल्पमात्रेणोपस्थितैः सारपुद्गलैः । ते तृप्येयुः कावलिकाहारानपेक्षिणः सदा ॥ १९३ ॥
विषयः स्यात् गतेरेषामधस्तमस्तमावधि । तृतीयां पुनरवनीं, गता यास्यन्ति च स्वयम् ॥ १९४ ॥
प्रयोजनं तत्र पूर्वरिपोः पीडाप्रवर्धनम् । प्राग्जन्मसुहृदस्तावत्कालं पीडानिवर्त्तनम् ॥ १९५ ॥
तिर्यक् चैषामसंख्याब्धिद्वीपाः स्युर्विषयो गतेः । नन्दीश्वरं पुनर्द्विपं, गता यास्यन्ति च स्वयम् ॥ १९६ ॥
तत्र प्रयोजनं त्वर्हत्कल्याणकेषु पञ्चसु । संवत्सरचतुर्मासादिषु चाष्टाहिकोत्सवः ॥ १९७ ॥
तथैषां गतिविषय, ऊर्द्ध्वमप्यच्युतावधि । स्वर्गं सौधर्मं च यावत्, गता यास्यन्ति च स्वयम् ॥ १९८ ॥
प्रयोजनं तत्र भवप्रत्ययं वैरमूर्जितम् । मातङ्गपञ्चाननवदेषां वैमानिकैः सह ॥ १९९ ॥
ततो वैरादमी मत्ता, गत्वा वैमानिकाश्रयान् । कुर्वन्ति व्याकुलं स्वर्गं, त्रासयन्त्यात्मरक्षकान् ॥ २०० ॥
शक्रमप्याक्रोशयन्ति, प्रागुक्तचमरेन्द्रवत् । वैरप्रसिद्धिर्लोकेऽपि, देवदानवयोरिति ॥ २०१ ॥
रत्नान्यप्सरसस्तेषां, प्रसह्यापहरन्ति च । गत्वैकान्ते स्वानुरक्तास्ताः स्वैरं रमयन्त्यपि ॥ २०२ ॥
अथ नागनिकायस्य, दाक्षिणात्यः सुरेश्वरः । धरणेन्द्रो वरिवर्ति, साम्प्रतीनस्त्वसौ पुरा ॥ २०३ ॥
आसीदहिर्बहिः काशीपुरतः काननान्तरे । शुष्ककाष्टकोटरान्तः, सोऽर्कतापार्दितोऽविशत् ॥ २०४ ॥
कमठेन परिप्लुष्टः, पञ्चाग्निकष्टकारिणा । तापार्त्तः कर्षितः काष्टात्, श्रीपार्श्वेन कृपालुना ॥ २०५ ॥
स चार्हद्दर्शनान्नष्टपाप्मा श्रुतनमस्कृतिः । उपार्जितोर्जितश्रेयान्, धरणेन्द्रतयाभवत् ॥ २०६ ॥
ततो मेघसूरीभूतकमठेनाकालिकाम्बुदैः । एष पार्श्वमुपद्रूयमानमाच्छादयत्फणैः ॥ २०७ ॥
श्रीपार्श्वस्तोत्रमंत्राख्यास्मरणात्तृष्टमानसः । अद्यापि शमयन् कष्टामिष्टानि वितरत्यसौ ॥ २०८ ॥
षष्टिश्च सप्ततिश्चैवाशीतिः क्रमात् सहस्रकाः । पर्षत्त्रये स्युर्देवानां, स्थितिश्चैषां यथाक्रमम् ॥ २०९ ॥

पल्यस्यार्धं सातिरेकमर्धं देशोनितं च तत् । सपञ्चसप्तति शतं, पञ्चाशं पञ्चविंशकम् ॥ २१० ॥
देव्यः पर्षत्सु देशोनं, पल्यस्यार्धमिह स्थितिः । साधिकः पल्यतुर्यांशस्तुर्यांश एव च क्रमात् ॥ २११ ॥
समिताचण्डाजयाख्याः, स्युः सभाः धरणेशितुः । अपि सामानिकत्रायस्त्रिंशानामेतदाह्वयाः ॥ २१२ ॥
लोकपालानां तथाग्रमहिषीणां भवन्ति ताः । ईषा तथान्या त्रुटिता, ततो दृढरथाभिधा ॥ २१३ ॥
शेषाणां भवनेन्द्राणां, पर्षदामभिधाः किल । तृतीयमङ्गमालोक्य, विज्ञेया धरणेन्द्रवत् ॥ २१४ ॥
स्युः षडग्रमहिष्योऽस्य, अला मक्का शतेरिका । सोदामिनीन्द्रा च घनविद्युतेति च नामतः ॥ २१५ ॥
षड्भिः सहस्रैः देवीनां, प्रत्येकं परिवारिताः । षट् सहस्राणि देवीनां, विकुर्वितुमपि क्षमाः ॥ २१६ ॥
शेषाणामप्यथेन्द्राणामष्टानां याम्यदिग्भुवाम् । षड् षडग्रमहिष्यः स्युरेतैरेव च नामभिः ॥ २१७ ॥
काशीनगरवास्तव्याश्चतुपञ्चाशदप्यमूः । बृहत्कन्याः स्वाभिधानुरुपाख्यपितरोऽभवन् ॥ २१८ ॥
पार्श्वपार्श्वादत्तदीक्षाः, शिक्षिताः पुष्पचूलया । विराद्धसंयमाः पक्षं, संलिख्य च मृतास्ततः ॥ २१९ ॥
स्वाख्यावतंसभवने, स्वाख्यसिंहासनस्पृशि । देवीत्वेन समुत्पन्नाः, सार्धपल्यमितायुषः ॥ २२० ॥
भूतानन्दाद्योत्तराहेन्द्राणामपि मनःप्रियाः । सन्ति षड् षड् वक्ष्यमाणैरुपाद्यैः षड्भिराह्वयैः ॥ २२१ ॥
चतुष्पञ्चाशतोऽप्यूनपल्योपमयुगायुषाम् । प्रागासां नगरी चम्पा, वाच्या शेषमिहोक्तवत् ॥ २२२ ॥
कालपालः कोलपालः, शैलपालोऽस्य च क्रमात् । शंखपालश्च चत्वारो, लोकपालाः सुरेशितुः ॥ २२३ ॥
अशोका विमला चैव, सुप्रभा च सुदर्शना । एषां चतस्रो दयिताः, प्रत्येकमेतदाह्वयाः ॥ २२४ ॥
भद्रसेनोऽस्य च यशोधरः सुदर्शनः क्रमात् । नीलकण्ठस्तथानन्दो, नन्दनस्तेतलीति च ॥ २२५ ॥
पत्तिवाजीभमहिषरथाख्यानां यथाक्रमम् । नटगन्धर्वयोश्चापि, सैन्यानामधिपाः स्मृताः ॥ २२६ ॥
अस्याद्यकच्छायां पत्तिनेतुर्देवसहस्रकाः । स्युरष्टाविंशतिः कच्छाः, षडन्या द्विगुणाः क्रमात् ॥ २२७ ॥
एतदेव च सप्तानां, कच्छानां मानमूह्यताम् । उक्तान्यभवनेशेन्द्रपत्तिसैन्याधिकारिणाम् ॥ २२८ ॥
षड्भिः सहस्रैरिन्द्रोऽयं, सामानिकैरुपासितः । पर्षत्त्रायस्त्रिंशलोकपालसैन्यतदीश्वरैः ॥ २२९ ॥
प्रत्याशं सेवितः षड्भिः, सहस्रैरात्मरक्षिणाम् । सर्वाग्रेण चतुर्विंशत्या सहस्रैर्महाबलैः ॥ २३० ॥
भवनानां चतुश्चत्वारिंशल्लक्षाणि पालयन् । समृद्धः शास्ति साम्राज्यं, सार्धपल्योपमस्थितिः ॥ २३१ ॥
दधिपाण्डुरवर्णोऽङ्गो, नीलाम्बरमनोरमः । सर्पस्फटाचिह्नशालिभूषणो गतदूषणः ॥ २३२ ॥
भूषणमत्र मुकुटो द्रष्टव्य इति जीवाभिगमवृत्तौ, एवमग्रेऽपि ।
एकया स्फटया जम्बूद्वीपं छादयितुं क्षमः । धरणेन्द्रः साधिकं तं, वक्ष्यमाणो भुजङ्गराट् ॥ २३३ ॥
इन्द्रो नागनिकायस्योदीच्योऽथ परिकीर्त्यते । भूतानन्दोऽस्य पर्षत्सु, तिसृष्वपि सुराः क्रमात् ॥ २३४ ॥
पञ्चाशदथ षष्टिश्च, सप्ततिश्च सहस्रकाः । पल्यं देशोनमर्धं च, पल्यस्य साधिकं तथा ॥ २३५ ॥

अर्धं पल्योपमं चैषां, स्थितिः क्रमात् शतद्वयम् । पञ्चविंशं द्वे शते च, शतं देव्यः क्रमादिह ॥ २३६ ॥
आसां पल्योपमस्यार्धं, देशोनमर्धमेव च । सातिरेकश्च तुर्यांशः, स्थितिर्ज्ञेया यथाक्रमम् ॥ २३७ ॥
रूपा रूपांशा सुरूपा, प्रेयस्यो रूपकावती । रूपकान्ता तथा रूपप्रभास्य नागचक्रिणः ॥ २३८ ॥
आसां परिच्छदः प्राग्वल्लोकपालास्तथास्य च । कालकौलशंखशैलाः, स्युः पालोपपदा अमी ॥ २३९ ॥
सुनन्दा च सुभद्रा च, सुजाता सुमना इति । एषां चतुर्णां प्रत्येकं, चतस्रो दयिताः स्मृताः ॥ २४० ॥
सप्त सेनान्योऽस्य दक्षः, सुग्रीवश्च सुविक्रमः । श्वेतकण्ठः क्रमान्नन्दोत्तरो रतिश्च मानसः ॥ २४१ ॥
सैन्यक्रमस्तु प्रागुक्त एव ॥
षड्भिः सहस्रैरिन्द्रोऽयं, सामानिकैरुपासितः । त्रायस्त्रिंशैः लोकपालैः, पार्षदैः सैन्यसैन्यपैः ॥ २४२ ॥
सहस्रैः षड्भिरेकैकदिश्यात्मरक्षकैः श्रितः । चतुर्विंशत्या सहस्रैरित्येवं सर्वसंख्यया ॥ २४३ ॥
चत्वारिंशच्च भवनलक्षाणि परिपालयन् । साम्राज्यं शास्ति नागानां, न्यूनद्विपल्यजीवितः ॥ २४४ ॥
देहवस्त्रवर्णचिन्होत्कृष्टस्थित्यादिकं भवेत् । सर्वेषां भवनेशानां, स्वजातीयसुरेन्द्रवत् ॥ २४५ ॥
इन्द्राणां वक्ष्यमाणेषु, निकायेष्वष्टसु स्थितिः । तिसृणां पर्षदां देवदेवीसंख्याथ तत्स्थितिः ॥ २४६ ॥
लोकपालप्रियाभिख्याः, सामानिकात्मरक्षिणाम् । संख्याग्रमहिषीणां च, संख्यानामपरिच्छदाः ॥ २४७ ॥
अष्टानां दाक्षिणात्यानां, विज्ञेया धरणेन्द्रवत् । अष्टानामौत्तराहाणां, भूतानन्दसुरेन्द्रवत् ॥ २४८ ॥
केवलं लोकपालनां, सुरेन्द्राणां च नामसु । विशेषोऽस्ति स एवाथ, लाघवाय प्रतन्यते ॥ २४९ ॥
दक्षिणोत्तरयोर्लोकपालानां किन्तु नामसु । सर्वत्रापि व्यतीहारः, स्यात्तृतीयतुरीययोः ॥ २५० ॥
दक्षिणास्यां तृतीयो यः, तुरीयः स भवत्युदक् । दाक्षिणात्यतुरीयस्तु, स्यादुदीच्यां तृतीयकः ॥ २५१ ॥
वेणुदेवो वेणुदारी, स्वर्णाभौ श्वेतवाससौ । द्वौ सुपर्णकुमारेन्द्रौ, गरुडाङ्कितभूषणौ ॥ २५२ ॥
चित्रो विचित्रश्च चित्रपक्षो विचित्रपक्षकः । एतयोरिन्द्रयोर्लोकपालाः स्युरिति नामतः ॥ २५३ ॥
जम्बूद्वीपं वेणुदेवः, पक्षेणावरितुं क्षमः । एनमेव सातिरेकं, वेणुदारी सुपर्णराट् ॥ २५४ ॥
इन्द्रौ विद्युत्कुमारेषु, हरिकान्तहरिस्सहौ । तप्तस्वर्णारुणौ नीलाम्बरौ वज्राङ्कभूषणौ ॥ २५५ ॥
प्रभस्तथा सुप्रभश्च, प्रभाकान्तस्तथापरः । सुप्रभाकान्त इत्येते, लोकपालाः स्युरेतयोः ॥ २५६ ॥
एकया विद्युता जम्बूद्वीपं हरिः प्रकाशयेत् । विद्युत्कुमाराधिपतिः, साधिकं तं हरिस्सहः ॥ २५७ ॥
स्यातामग्निकुमारेन्द्रावग्निशिखाग्निमाणवौ । तप्तस्वर्णतनू नीलवस्त्रौ कुम्भाङ्कभूषणौ ॥ २५८ ॥
तेजस्तेजः शिखस्तेजःकान्तस्तेजःप्रभोऽपि च । एतयोः स्युर्लोकपाला, विशिष्टोत्कृष्टबुद्धयः ॥ २५९ ॥
एकाग्निज्वालया जम्बूद्वीपं प्लोषयितुं क्षमः । सुरेन्द्रोऽग्निशिखस्तं सातिरेकमग्निमाणवः ॥ २६० ॥
इन्द्रौ द्वीपकुमाराणां, पूर्णो वसिष्ट इत्युभौ । तप्तस्वर्णप्रभौ नीलक्षौमौ सिंहाङ्कभूषणो ॥ २६१ ॥

रूपो रूपांशश्च रूपकान्तो रूपप्रभोऽपि च । लोकपाला अमी द्वीपकुमारचक्रवर्तिनोः ॥ २६२ ॥
जम्बूद्वीपं हस्ततलेनैकं स्थगयितुं क्षमः । पूर्णो द्वीपकुमारेन्द्रो, वसिष्ठस्तं च साधिकम् ॥ २६३ ॥
अथोदधिकुमारेन्द्रौ, जलकान्तजलप्रभौ । शुक्लद्युती नीलवस्त्रावश्वरूपाङ्कभूषणौ ॥ २६४ ॥
जलश्च जलरूपश्च, जलकान्तो जलप्रभः । लोकपालाः स्युरुदधिकुमारसुरराजयोः ॥ २६५ ॥
एकेनाम्बुतरङ्गेण, जम्बूद्वीपं प्रपूरयेत् । जलकान्तः सुराधीशः, साधिकं तं जलप्रभः ॥ २६६ ॥
दिक्कुमारेशावमितगतिश्चामितवाहनः । स्वर्णगौरौ शुभ्रवस्त्रौ, गजरूपाङ्कभूषणौ ॥ २६७ ॥
एतयोस्त्वरितः क्षिप्रः, सिंहश्च सिंहविक्रमः । चत्वारो गत्युपपदा, लोकपालाः प्रकीर्त्तिताः ॥ २६८ ॥
एकपार्ष्णिप्रहारेण, जम्बूद्वीपं प्रकम्पयेत् । इन्द्रोऽमितगतिः सातिरेकं त्वमितवाहनः ॥ २६९ ॥
इन्द्रौ वायुकुमारेषु, वेलम्बाख्यप्रभञ्जनौ । श्यामौ सन्ध्यारागवस्त्रौ मकराङ्कितभूषणौ ॥ २७० ॥
कालश्चाथ महाकालोऽञ्जनश्च रिष्ट एव च । स्युर्लोकपाला वेलम्बप्रभञ्जनसुरेन्द्रयोः ॥ २७१ ॥
मरुत्तरङ्गेणैकेन, जम्बूद्वीपं प्रपूरयेत् । वेलम्बेन्द्रः सातिरेकं, तं पूरयेत् प्रभञ्जनः ॥ २७२ ॥
इन्द्रौ घोषमहाघोषौ, स्तनिताख्यकुमारयोः । स्वर्णवर्णौ शुक्लवस्त्रौ, वर्द्धमानाङ्कभूषणौ ॥ २७३ ॥
आवर्त्तो व्यावर्त्तनामा, नन्द्यावर्त्तस्तथापरः । महानन्द्यावर्त्त एते, लोकपालाः स्युरेतयोः ॥ २७४ ॥
स्तनितध्वनिनैकेन, बधिरीकर्त्तुमीश्वरः । घोषो जम्बूद्वीपमेनं, महाघोषस्तु साधिकम् ॥ २७५ ॥
एवं सर्वनिकायेषु, देवा दश दशाधिपाः । दाक्षिणात्योत्तराहेन्द्रौ, लोकपालास्तथाष्ट च ॥ २७६ ॥
एवं च धरणेन्द्राद्या, इन्द्रा अष्टादशाप्यमी । स्वैः स्वैः सामानिकैस्त्रायस्त्रिंशकैर्लोकपालकैः ॥ २७७ ॥
पार्षदैः त्रिविधैरग्रमहिषीभिरुपासिताः । सेनानीभिस्तथा सैन्यैः, समन्तादात्मरक्षकैः ॥ २७८ ॥
दाक्षिणात्योदीच्यनिजनिकायजैः परैरपि । सेविताः स्वस्वभवनलक्षाणां दधतीशताम् ॥ २७९ ॥
रूपलावण्यसौभाग्यादिभिस्तु चमरेन्द्रवत् । महर्द्धिका महासौख्या, महाबला महोदयाः ॥ २८० ॥
एकं जम्बूद्वीपमेते, रूपैः पूरयितुं क्षमा । स्वजातीयैर्नवैस्तिर्यक्, संख्येयद्वीपवारिधीन् ॥ २८१ ॥
एवं सामानिकास्त्रायस्त्रिंशका लोकपालकाः । एषामग्रमहिष्योऽपि, कर्तुं विकुर्वणां क्षमाः ॥ २८२ ॥
अल्पाल्पकान् किन्तु तिर्यक्, द्विपाब्धीन् पूरयन्त्यमी । प्राच्यपुण्यप्रकर्षाप्तस्वस्वलब्ध्यनुसारतः ॥ २८३ ॥
तथाहुः । धरणेणं भंते नागकुमारिन्द्रे नागकुमारराया । इत्यादि भगवतीसूत्रे ॥
जम्बूद्वीपं मेरुमूर्ध्नि, धृत्वा छत्राकृतिं क्षणात् । कर्तुमेषामन्यतमः, क्षमः स्वबललीलया ॥ २८४ ॥
इयं प्रत्येकं प्रागुक्ता चैषा शक्तिर्देवेन्द्रस्तवे ॥
शक्तेर्विषय एवायं, नाकरोन्न करिष्यति । न चैवं कुरुते कश्चिद्विकुर्वणादिशक्तिवत् ॥ २८५ ॥
उत्पद्यन्ते परेऽप्येवं, निकायेषु नवस्विह । सुखानि भुञ्जते देवाः, प्राच्यपुण्यानुसारतः ॥ २८६ ॥

दशानामसुरादीनां, भवनाधिपनाकिनाम् । अश्वत्थाद्याश्चैत्यवृक्षा, दश प्रोक्ता यथाक्रमम् ॥ २८७ ॥
तथोक्तं स्थानाङ्गे दशमस्थानके ।
अस्सत्थ सत्तवन्ने, सामलि उम्बर सिरीस दहिवन्ने । वंजुल पलास वप्पोतत्ते य कणियाररुक्खे य ॥
अनेन क्रमेण अश्वत्थादयः चैत्यवृक्षाः ये सिद्धायतनादिद्वारेषु श्रूयन्ते । इति स्थानाङ्गवृत्तौ ॥
एतेषां दाक्षिणात्यानां, सार्धं पल्योपमं स्थितिः । उदीच्यानां तु देशोनं, स्थितिः पल्योपमद्वयम् ॥ २८८ ॥
देवीनां दाक्षिणात्यानामर्धपल्योपमं स्थितिः । उदीच्यानां तु देशोनमेकं पल्योपमं स्थितिः ॥ २८९ ॥
दशाब्दानां सहस्राणि, सर्वेषां सा जघन्यतः । आहारोच्छ्वासकालाङ्गमानं व्यन्तरदेववत् ॥ २९० ॥
वसन्ति यद्यप्यसुरा, आवासापरनामसु । प्रायो महामण्डपेषु, रामणीयकशालिषु ॥ २९१ ॥
कदाचिदेव भवनेष्वन्ये नागादयः पुनः । वसन्ति भवनेष्वेव, कदाचित् मण्डपेषु तु ॥ २९२ ॥
तथापि भवनेष्वेषां, निवासरूढ्यपेक्षया । सामान्यतोऽमी भवनवासिनः स्युर्दशापि हि ॥ २९३ ॥
सम्मूर्च्छिमा गर्भजाश्च, तिर्यञ्चो गर्भजा नराः । षट्संहननसंपन्ना, विराद्धार्हतदर्शनाः ॥ २९४ ॥
मिथ्यात्विनश्चोग्रबालतपसः प्रोत्कटक्रुधः । गर्वितास्तपसा वैरक्रूरा द्वैपायनादिवत् ॥ २९५ ॥
उत्पद्यन्त एषु मृत्वा, च्युत्वामी यान्ति चामराः । गर्भजेषु नृतिर्यक्षु, संख्येयस्थितिशालिषु ॥ २९६ ॥
पर्याप्तबादरक्ष्माम्बुप्रत्येकपादपेषु च । आरभ्यैकमसंख्येयावध्येकसमयेन ते ॥ २९७ ॥
उत्पद्यन्ते च्यवन्तेऽत्र, जघन्यं गुरु चान्तरम् । समयश्च मुहूर्त्ताश्च, चतुर्विंशतिसम्मिताः ॥ २९८ ॥
एषां लेश्याः कृष्णनीलतेजःकापोतसंज्ञिकाः । स्युश्चतस्रो नान्तिमे द्वे, तथाभवस्वभावतः ॥ २९९ ॥
किञ्चिन्न्यूनार्धपाथोधिजीविनोऽवधिचक्षुषा । संख्येयानि योजनानि, पश्यन्ति भवनाधिपाः ॥ ३०० ॥
परे पुनरसंख्यानि, तान्येवं तत्र भावना । यथा यथायुषो वृद्धिः, क्षेत्रवृद्धिस्तथा तथा ॥ ३०१ ॥
एवं च, अवधेर्विषयो नागादिषु संख्येययोजनः । असुरेषु त्वसंख्येयद्वीपवार्द्धिमितो गुरुः ॥ ३०२ ॥
सर्वेष्वपि लघुः पञ्चविंशत्या योजनैर्मितः । विषयः स्यात् स च दससहस्रवर्षजीविषु ॥ ३०३ ॥
भवनेशा व्यन्तराश्च, पश्यन्त्यवधिना बहु । ऊर्ध्वं यथासौ चमरोऽद्राक्षीत्सौधर्मवासवम् ॥ ३०४ ॥
अधस्तिर्यक् चाल्पमेवामाकृतिर्जायतेऽवधेः । तप्रस्येवायतत्र्यस्रस्तप्रः स विदितो जने ॥ ३०५ ॥
भवनपतिभिरेवं भूषितः स्वप्नभाभिस्तिमिरनिकरभीष्मं कोऽप्यधोलोक एषः ।
ततिभिरिव निशीथो दीप्रदीपाङ्कुराणामिव घनवनखण्डः पुण्डरीकैः प्रफुल्लैः ॥ ३०६ ॥
विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्वप्रदीपोपमे, सर्गोऽयं सुभगस्त्रयोदशतमः सार्थ : समाप्तः सुखम् ॥ ३०७ ॥

इति श्री लोकप्रकाशे त्रयोदशः सर्गः समाप्तः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

अथ चतुर्दशः सर्गः ।

मुक्त्वैकं सहस्रं चोपर्यधः प्रथमक्षितेः । सहस्रैरष्टसप्तत्याऽधिके योजनलक्षके ॥ १ ॥
त्रयोदश प्रस्तटाः स्युर्नरकावासवीथयः । समश्रेणिस्थायिभिस्तैरेकैकः प्रस्तटो यत् ॥ २ ॥

तथोक्तम् श्रीजीवाभिगमे । इमीसे णं रयणप्पभाए पुढवीए असीउत्तरजोअणसयसहस्स बाहल्लाए उवरिं एगं जोअणसहस्सं ओगाहेत्ता हेट्ठा चेगं जोअणसहस्सं वज्जित्ता मज्झे अट्ठहुत्तरे जोअणसयसहस्से इत्थ णं रयणप्पभाए पुढवीए तीसं नरयावाससयसहस्सा भवन्तीतिमक्खाया ॥

सर्वेऽप्यमी योजनानां, सहस्रत्रयमुच्छ्रिताः । सर्वास्वपि क्षितिष्वेषां, मानं ज्ञेयमिदं बुधैः ॥ ३ ॥
एकादश सहस्राणि, शतानि पञ्च चोपरि । त्र्यशीतिर्योजनान्यंशस्तृतीयो योजनस्य च ॥ ४ ॥
एतावदन्तरं ज्ञेयं, प्रस्तटानां परस्परम् । प्रतिप्रतरमेकैके, भवेच्च नरकेन्द्रकः ॥ ५ ॥
तथाहि । सीमन्तकः स्यात्प्रथमे, द्वितीये रोरकाभिधः । भ्रान्तस्तृतीये उद्भ्रान्तश्चतुर्थे प्रस्तटे भवेत् ॥ ६ ॥
संभ्रान्तः पञ्चमे ज्ञेयः, षष्टेऽसंभ्रान्तसंज्ञकः । विभ्रान्तः सप्तमे तप्तसंज्ञितः पुनरष्टमे ॥ ७ ॥
नवमे शीतनामा स्याद्वक्रान्तो दशमे भवेत् । एकादशे त्ववक्रान्तो, विक्रान्तो द्वादशे भवेत् ॥ ८ ॥
त्रयोदशे रोरुकः स्यादेवमेते त्रयोदश । प्रतिप्रतरमेभ्यश्च, निर्गता नरकालयाः ॥ ९ ॥
प्रथमप्रतरे तत्र, सीमन्तनरकेन्द्रकात् । निर्गता नरकावासावल्यो दिक्षु विदिक्षु च ॥ १० ॥
एकोनपञ्चाशद्वासा, दिशां नरकपङ्क्तिषु । अष्टचत्वारिंशदेते, विदिक्नरकपङ्क्तिषु ॥ ११ ॥
त्रिंशत्येकोननवतिः, प्रथमे सर्वपङ्क्तिगाः । प्रतिप्रतरमेकैकन्यूना अष्टापि पङ्क्तयः ॥ १२ ॥
सैकाशीतिस्त्रिशती च, त्रिंशती च त्रिसप्ततिः । त्रिंशती पञ्चषष्टिश्च, स्यात् द्वितीयादिषु त्रिषु ॥ १३ ॥
त्रिंशती सप्तपञ्चाशत्, पञ्चमे प्रतरे भवेत् । त्रिंशत्येकोनपञ्चाशत्, षष्टे प्रतर इष्यते ॥ १४ ॥
एकचत्वारिंशदाढ्या, त्रिंशती सप्तमे मता । त्रिंशती च त्रयस्त्रिंशत्, त्रिंशती पञ्चविंशतिः ॥ १५ ॥
त्रिंशती सप्तदश च, त्रिंशती स्यान्नवोत्तरा । एकाधिका च त्रिंशती, प्रतरेष्वष्टमादिषु ॥ १६ ॥
त्रयोदशेऽथ प्रतरे, आवलीनरकालयाः । त्रिनवत्यधिके प्रोक्ते, द्वे शते तत्त्ववेदिभिः ॥ १७ ॥
शेषाः पुष्पावकीर्णाः स्युः, पङ्क्तीनामन्तरेषु ते । सर्वेष्वपि प्रतरेषु, विकीर्णकुसुमौघवत् ॥ १८ ॥
चत्वारि स्युः सहस्राणि, तावन्त्येव शतानि च । त्रयस्त्रिंशच्च घर्मायामावलीनरकालयाः ॥ १९ ॥
एकोनत्रिंशल्लक्षाणि, शतानि पञ्च चोपरि । सहस्राः पञ्चनवतिः, सप्तषष्टिः प्रकीर्णकाः ॥ २० ॥
त्रिंशल्लक्षाश्च निखिला, घर्मायां नरकालयाः । सर्वेऽपि चैतेऽन्तर्वृत्ता, बहिश्च चतुरस्रकाः ॥ २१ ॥

यदुक्तं प्रज्ञापनायां । तेणं णरगा अन्तो वट्टा बाहिं चउरंसा । इति ॥

पीठादि सर्वं चापेक्ष्य, वृत्ताः स्युः केऽपि केऽपि च । त्र्यस्राश्च चतुरस्राश्च पाङ्क्तेया नरकालयाः ॥ २२ ॥
वृत्ता एव भवन्त्यत्र, सर्वेऽपि नरकेन्द्रकाः । ततश्चानन्तरं त्र्यस्रा, नूनमष्टासु पङ्क्तिषु ॥ २३ ॥
चतुरस्रास्ततो वृत्ताः, त्र्यस्राश्चेति यथाक्रमम् । ज्ञेयाः पुष्पावकीर्णास्तु, नानासंस्थानसंस्थिताः ॥ २४ ॥
योजनानां सहस्राणि, त्रीणि सर्वेऽपि चोच्छ्रिताः । अधोमुखन्यस्तकुण्डाकाराः कारागृहोपमाः ॥ २५ ॥
योजनानां सहस्रं च, पीठे बाहल्यमीरितम् । सहस्रमेकं शुषिरं, स्तुपिकैकसहस्रिका ॥ २६ ॥
यदुक्तम् । हेट्ठा घणा सहस्सं, उप्पिं संकोयओ सहस्सं तु । मज्झे सहस्स झुसिरा, तिन्निसहस्सूसिया निरया ॥
[बृहत्संग्रहणी गा. २३७]

संख्यातयोजनाः केऽपि, परेऽसंख्यातयोजनाः । विस्तारादैर्ध्यतश्चापि, प्रज्ञप्ता नरकालयाः ॥ २७ ॥
सर्वास्वपि पृथिवीषु, तादृशाः किन्तु मानतः । सीमन्तकः पञ्चचत्वारिंशद्योजनलक्षकः ॥ २८ ॥
अप्रतिष्ठानश्च लक्षयोजनः सप्तमक्षितौ । परितस्तं च चत्वारोऽसंख्यातकोटियोजनाः ॥ २९ ॥
घर्माद्यप्रतरे सीमन्तकाद्यनरकेन्द्रकात् । आवलीनरकाः प्रोक्ताः, सीमन्तकप्रभादयः ॥ ३० ॥

तदुक्तं स्थानाङ्गवृत्तौ ।

सीमन्तगप्पभो खलु, नरओ सीमन्तगस्स पुव्वेण । सीमन्तगमज्झिमओ, उत्तरपासे मुणेयव्वो ॥
सीमन्तावत्तो पुण, नरओ सीमन्तगस्स अवरेण । सीमन्तगावसिट्ठो, दाहिणपासे मुणेयव्वो ॥

आवल्याश्चान्तिमौ द्वौ स्तो, लोललोलुपसंज्ञकौ । विंशतितमैकविंशौ, सीमन्तनरकेन्द्रकात् ॥ ३१ ॥
उद्दग्धनिर्दग्धसंज्ञौ, ज्वरप्रज्वरकौ पुनः । पञ्चत्रिंशषट्त्रिंशौ, प्राच्यावल्यां स्मृता अमी ॥ ३२ ॥
उदीच्याद्यावलिकासु, मध्यावर्त्तावशिष्टकैः । पदैर्विशिष्टाः प्रज्ञप्ताः, प्रागुक्ता नरकाः क्रमात् ॥ ३३ ॥
यथोदीच्यां लोलमध्यलोलुपमध्यसंज्ञकैः । पश्चिमायां लोलावर्त्तलोलुपावर्तसंज्ञकौ ॥ ३४ ॥
लोलावशिष्टलोलुपावशिष्टसंज्ञकावपाग् । भाव्या नामव्यवस्थैवं, प्रागुक्तेष्वखिलेष्वपि ॥ ३५ ॥

तदुक्तं स्थानाङ्गवृत्तौ ।

मज्जा उत्तरपासे, आवत्ता अवरओ मुणेयव्वा । सिट्ठा दाहिणपासे, पुव्विलाओवि भइयव्वत्ति ॥

सर्वेऽपि ते रौद्ररूपाः, क्षुरप्रोपमभूमयः । देहिनां दर्शनादेवोद्वेजकाः कम्पकारिणः ॥ ३६ ॥
पुद्गलानां परिणतिर्दशधा बन्धनादिका । सापि क्षेत्रस्य स्वभावात्तत्र दुःखप्रदा भवेत् ॥ ३७ ॥
तथाहि । बन्धनं चानुसमयमाहार्यैः पुद्गलैः सह । सम्बन्धो नारकाणां स, ज्वलज्ज्वलनदारुणः ॥ ३८ ॥
गतिरुष्ट्रखरादीनां, सदृशी दुस्सहश्रमा । तप्तलोहपदन्यासादपि दुःखप्रदा भृशम् ॥ ३९ ॥
संस्थानमत्यन्तहुण्डं, लूनपक्षाण्डजोपमम् । कुड्यादिभ्यः पुद्गलानां, भेदः सोऽप्यस्त्रवत्कटुः ॥ ४० ॥
वर्णः सर्वनिकृष्टोऽतिभीषणो मलिनस्तथा । नित्यान्धतमसा ह्येते, द्वारजालादिवर्जिताः ॥ ४१ ॥

किञ्चामी श्लेष्मविण्मूत्रकफाद्यालिप्तभूतलाः । मांसकेशनखदन्तचर्मास्तीर्णाः श्मशानवत् ॥ ४२ ॥
कुथितश्वाहिमार्जारमृतकेभ्योऽपि दारुणः । गन्धस्तत्र रसो निम्बघोषातक्यादितः कटुः ॥ ४३ ॥
स्पर्शो वह्निवृश्चिकादिस्पर्शादप्यतिदारुणः । परिणामोऽगुरुलघुरप्यतीव व्यथाकरः ॥ ४४ ॥
शब्दोऽपि सततं पीडाक्रान्तानामतिदारुणः । विलापरूपः श्रवणादपि दुःखैककारणम् ॥ ४५ ॥
तथोक्तं तत्त्वार्थवृत्तौ ।

शीतोष्णक्षुत्पिपासाख्याः, कण्डुश्च परतन्त्रता । ज्वरो दाहो भयं शोकस्तत्रैता दश वेदना ॥

कुड्येषु वाज्रिकेष्वत्र, सन्ति वातायनोपमाः । अचित्ता योनयस्तासूत्पद्यन्ते नारकाः किल ॥ ४६ ॥
माघरात्रौ शीतवायौ, हिमाद्रौ खेऽभ्रवर्जिते । निरग्नेर्वातविकृतेर्दुःस्थपुंसो निरावृतेः ॥ ४७ ॥
तुषारकणसिक्तस्य, या भवेच्छीतवेदना । ततोऽप्यनन्तगुणिता, तेषु स्याच्छीतवेदना ॥ ४८ ॥
तेभ्यः शीतवेदनेभ्यो, नरकेभ्यश्च नारकाः । यथोक्तपुरुषस्थाने, स्थाप्यन्ते यदि ते तदा ॥ ४९ ॥
प्राप्नुवन्ति सुखं निद्रां, निर्वातस्थानगा इव । अथोष्णकाले मध्याह्ने, निरभ्रे वियदङ्गणे ॥ ५० ॥
पुंसः पित्तप्रतप्तस्य, परितो ज्वलनस्पृशः । योष्णपीडा ततोऽनन्तगुणा तेषूष्णवेदना ॥ ५१ ॥
तथोष्णवेदनेभ्यस्ते, नरकेभ्यश्च नारकाः । उत्पाट्य किंशुकाकारखदिराङ्गारराशिषु ॥ ५२ ॥
ध्मायन्ते यदि निक्षिप्य, तदा ते चन्दनद्रवैः । लिप्ता इवात्यन्तसुखान्निद्रां यान्ति क्षणादपि ॥ ५३ ॥
सदा क्षुद्वह्निना दह्यमानास्ते जगतोऽपि हि । घृतान्नादिपुद्गलौघैर्न तृप्यन्ति कदाचन ॥ ५४ ॥
तेषां पिपासा तु तालुकण्ठजिह्वादिशोषणी । सकलाम्भोधिपानेऽपि, नोपशाम्यति कर्हिचित् ॥ ५५ ॥
क्षुरिकाद्यैरप्यजय्या, कण्डूर्देहेऽतिदुःखदा । अनन्तगुणितोऽत्रत्याद्यावज्जीवं ज्वरस्तथा ॥ ५६ ॥
अनन्तघ्नं पारवश्यं, दाहशोकभयाद्यपि । कष्टं विभङ्गमप्येषां, वैरिशस्त्रादिदर्शनात् ॥ ५७ ॥
तत्रत्यक्ष्माम्भोऽग्निमरुत्द्रुमस्पर्शोऽतिदुःखदः । अग्निस्त्वत्रोपचरितः, क्ष्मादिकायास्तु वास्तवाः ॥ ५८ ॥

तथोक्तम् । रयणप्पभापुढविनेरइआ णं भन्ते केरिसयं पुढविफासं पच्चणुब्भवमाणा विहरन्ति ।
गोयम अणिट्ठं जाव अमणामं एवं जाव अहे सत्तमापुढविणेरइआ एवं वाउफासं जाव वणस्सइफासं ।
इति भगवत्याम् शतक १३ उद्देश ४ ॥

इत्येवं विविधा तेषु, वर्त्तते क्षेत्रवेदना । मिथ्यादृशां नारकाणां, परस्परकृतापि सा ॥ ५९ ॥
तथाहि, दूरादन्योऽन्यमालोक्य, श्वानः श्वानमिवापरम् । ते युद्धयन्ते ससंरम्भं, ज्वलन्तः क्रोधवह्निना ॥ ६० ॥
विधाय वैक्रियं रूपं, शस्त्रैः क्षेत्रानुभावजैः । पृथ्वीरूपैर्वैक्रियैर्वा, कुन्तासितोमरादिभिः ॥ ६१ ॥
करांहिदन्ताघातैश्च, ते निघ्नन्ति परस्परम् । भूमौ लुठन्ति कृत्ताङ्गाः, शूनान्तर्महिषादिवत् ॥ ६२ ॥
परोदीरितदुःखानि, सहन्ते नापरेषु ते । उदीरयन्ति सम्यक्त्ववन्तस्तत्त्वविचारणात् ॥ ६३ ॥

अत एव स्वल्पपीडाः, स्वल्पकर्माण एव च । मिथ्यादृग्भ्यो नारकेभ्यो, नारकाः शुद्धदृष्टयः ॥ ६४ ॥
मिथ्यादृशस्तु क्रोधेनोदीरयन्तः परस्परम् । पीडाः कर्माण्यर्जयन्ति, भूयांसि भूरिवेदनाः ॥ ६५ ॥

तथाहुः ॥ नेरइआ दुविहा प. तं. – माइमिच्छदिट्ठीउववण्णगा अमाइसम्मदिट्ठीउववण्णगा य । तत्थ णं जे से माइमिच्छदिट्ठी से णं महाकम्मतराए चेव जाव महावेयणतरा ए चेव । तत्थ णं जे से अमाइसम्मदिट्ठी से णं अप्पकम्मतराए चेव अप्पवेयणतराए चेव ॥ भगवती शतक १८ उद्देश ५ ॥

मनोदुःखापेक्षया तु, सदृशो भूरिवेदनाः । यदेते पूर्वकर्माणि, शोचन्ति न तथा परे ॥ ६६ ॥

तथाहुः ॥ तत्थ णं जे ते सन्निभूया ते णं महावेयणा । तत्थं णं जे ते असन्निभूया तेणं अप्पवेअणतरागा ॥ अत्र सन्निभूय इति ॥ संज्ञा सम्यक् दर्शनम् तद्वन्तो भूताः । यद्वा पूर्वभवे संज्ञिपञ्चेन्द्रियाः सन्तोः नारकं प्राप्ताः । अथवा संज्ञीभूताः पर्याप्तकीभूताः तद्वीपरीताः सर्वत्रासंज्ञीभूताः ॥ इति भगवती शतक १ उ० २ ॥

तप्तायःपुत्रिकाश्लेषः, संतप्तत्रपुपायनम् । अयोधनादिघाताश्चारोपणं कूटशाल्मलौ ॥ ६७ ॥
क्षते क्षारोष्णतैलादिक्षेपणं भ्राष्ट्रभर्जनम् । कुन्तादिप्रोतनं यन्त्रे, पीडनं च तिलादिवत् ॥ ६८ ॥
क्रकचैः पाटनं तप्तवालुकास्ववतारणम् । वैक्रियोलूकहर्यक्षकङ्कादिभिः कदर्थनम् ॥ ६९ ॥
प्लावनं वैतरण्यां च, योधनं कुर्कुटादिवत् । प्रवेशनं चासिपत्रवने कुम्भीषु पाचनम् ॥ ७० ॥
परमाधार्मिकैः क्लृप्ता, इत्याद्या विविधा व्यथाः । वेदयन्ते नारकास्ते, दुःकर्मवशवर्त्तिनः ॥ ७१ ॥

यदाहुः "श्रवणलवनं नेत्रोद्धारं करक्रमपाटनम् हृदयदहनं नासाछेदं प्रतिक्षणदारुणम् ।
कटविदहनं तीक्ष्णाघातत्रिशूलविभेदनम् दहनवदनैः कङ्कैर्घोरैः सहन्ति च भक्षणम् ॥
छिद्यन्ते कृपणाः कृतान्तपरशोस्तीक्ष्णेन धारासिना, क्रन्दन्तो विषविच्छुभिर्परिवृताः संभक्षणव्यापृतैः ।
पाट्यन्ते क्रकचेन दारुवदसिप्रच्छिन्नबाहुद्वयाः, कुम्भीषु त्रपुपानदग्धतनवो मूषासु चान्तर्गताः ॥
भृज्यन्ते ज्वलदम्बरीषहुतभुग्ज्वालाभिरारावणाः, दीप्ताङ्गारनिभेषु वज्रभवनेष्वङ्गारकेषूत्थिताः ।
दह्यन्ते विकृतोर्ध्वबाहुवदनाः क्रन्दन्त आर्त्तस्वराः, पश्यन्तः कृपणा दिशो विशरणास्त्राणाय को नो भवेत् ॥
तीक्ष्णैरसिभिर्दीप्तैः, कुन्तैर्विषमैः परश्वधैश्चक्रैः । परशुत्रिशूलमुद्गरतोमरवासीमुसुण्ढीभिः ॥
संभिन्नतालुशिरसश्छिन्नभुजाश्छिन्नकर्णनासौष्टाः । भिन्नहृदयोदरान्त्रा, भिन्नाक्षिपुटाः सुदुःखार्त्ताः ॥
निपतन्त उत्पतन्तो, विचेष्टमाना महीतले दीनाः । नेक्षन्ते त्रातारं, नैरयिकाः कर्मपटलान्धाः ॥" इत्यादि ॥

तथा, कुम्भीषु पच्यमानास्ते, प्रोच्छलन्त्यूर्ध्वमर्दिताः । उत्कर्षतो योजनानां, शतानि पञ्च नारकाः ॥ ७२ ॥
त्रोट्यन्ते निपतन्तस्ते, वज्रचञ्चूविहङ्गमैः । व्याघ्रादिभिर्विलुप्यन्ते, पतिता भुवि वैक्रियैः ॥ ७३ ॥
परमाधार्मिकास्ते च, पापिनोऽत्यन्तनिर्दयाः । पञ्चाग्न्यादितप कष्टप्राप्तासुरविभूतयः ॥ ७४ ॥
मृगयासक्तवत् मेषमहिषाद्याजिदर्शिवत् । एते हृष्यन्ति ताच्छील्यात्, दृष्ट्वार्तान् हन्त नारकान् ॥ ७५ ॥

हृष्टाः कुर्वन्त्यट्टहासं, त्रिपद्यास्फालनादिकम् । इत्थं यथैषां स्यात् प्रीतिर्न तथा नाटकादिभिः ॥ ७६ ॥
मृत्वाण्डगोलिकाभिख्यास्तेऽपिस्युर्जलमानुषाः । भक्ष्यैः प्रलोभ्यानीतास्ते, तटेऽण्डगोलकार्थिभिः ॥ ७७ ॥
यन्त्रेषु पीड्यमानाश्च, सोढकष्टकदर्थनाः । षड्भिर्मासैर्मृता यान्ति, नरकेष्वसकृत्तथा ॥ ७८ ॥
घर्मायां च त्रिधाप्येताः, पूर्वोक्ताः सन्ति वेदनाः । परं शीतोष्णयोर्मध्ये, उष्णैव क्षेत्रवेदना ॥ ७९ ॥
तथाहि, उत्पत्तिस्थानकान्येषां, सन्त्यावृतगवाक्षवत् । तत्रोत्पत्याधः पतन्ति, कष्टात् पुष्टवपुर्भृतः ॥ ८० ॥
अन्यत्र चोत्पत्तिदेशात्, प्रालेयाचलशीतलात् । सर्वत्र नरकेषु क्ष्मा, खदिराङ्गारसन्निभा ॥ ८१ ॥
ततः शीतयोनिकानां, तेषां नारकदेहिनाम् । जनयत्यधिकं कष्टं, क्षेत्रमुष्णं हुताशवत् ॥ ८२ ॥
प्रथम-प्रतरे चास्यां, नारकाणां भवेद्वपुः । हस्तत्रयं द्वितीयऽस्मिन्, हस्ताः पञ्चाधिकानि च ॥ ८३ ॥
अष्टाङ्गुलानि सार्धानि, तृतीये प्रस्तटे पुनः । सप्तहस्ताः सप्तदशांगुलान्युपरि निर्दिशेत् ॥ ८४ ॥
चतुर्थे प्रस्तटे हस्ता, दश सार्धं तथाङ्गुलम् । दशाङ्गुलाधिका ज्ञेया, हस्ता द्वादश पञ्चमे ॥ ८५ ॥
षष्टे चतुर्दश कराः, ससार्द्धाष्टादशाङ्गुलाः । सप्तमे च सप्तदश, कराः स्युः त्र्यङ्गुलाधिकाः ॥ ८६ ॥
एकोनविंशतिर्हस्ताः, ससार्धैकादशाङ्गुलाः । अष्टमे प्रस्तटे देहो, नवमप्रस्तटे पुनः ॥ ८७ ॥
युक्ताङ्गुलानां विंशित्या, कराणामेकविंशतिः । दशमे जिनसंख्यास्ते, ससार्धचतुरङ्गुलाः ॥ ८८ ॥
एकादशे कराः षड्विंशतिस्त्रयोदशाङ्गुलाः । द्वादशेऽष्टाविंशतिस्तेऽङ्गुलाः सार्धैकविंशतिः ॥ ८९ ॥
षडङ्गुलाधिका एकत्रिंशद्धस्तास्त्रयोदशे । प्रतरेषु वपुर्मानं, क्रमाद्रत्नप्रभाक्षितेः ॥ ९० ॥
स्वाभाविकतनोर्देहमानमेतदुदीरितम् । स्वस्वदेहात् द्विगुणितं, सर्वत्रोत्तरवैक्रियम् ॥ ९१ ॥
जघन्यतस्तु सहजोत्तरवैक्रिययोः क्रमात् । अङ्गुलासंख्यसंख्यांशौ, मानं प्रारंभ एव तत् ॥ ९२ ॥
सर्वास्वपि क्षितिष्वेवं, सर्वेषां नारकाङ्गिनाम् । स्वाभाविकाङ्गात् द्विगुणं, ज्ञेयमुत्तरवैक्रियम् ॥ ९३ ॥
अत्रायमाम्नायः ।
पइपयरवुड्ढि अंगुल, सड्ढाछप्पन्न हुंति रयणाए । तिकर तिअंगुल करसत्त, अंगुला सद्धिगुणवीसम् ॥
पणधणु अंगुलवीसं, बारसधणु दुन्नि हत्थ सड्ढा य । बासट्ठिधणुह सड्ढा, बीयाइसु पयरवुड्ढि कमा ॥
सहस्राणि दशाब्दानां, प्रथमप्रतरे स्थितिः । जघन्या पुनरुत्कृष्टा, सहस्रा नवतिः स्मृताः ॥ ९४ ॥
दशलक्षाश्च वर्षाणां, लक्षाणां नवतिस्तथा । क्रमाज्जघन्योत्कृष्टा च, द्वितीयप्रतरे स्थितिः ॥ ९५ ॥
एवं च । नवत्यब्दसहस्रेभ्यः, समयाद्यधिकस्थितिः । दशाब्दलक्षोनायुश्च, न संभवति नारकः ॥ ९६ ॥
वर्षाणां नवतिर्लक्षाः, पूर्वकोटिस्तथैव च । तृतीयप्रतरे ज्ञेया, जघन्योत्कर्षतः स्थितिः ॥ ९७ ॥
जघन्या पूर्वकोट्येका, चतुर्थप्रतरे स्थितिः । दशभागीकृतस्यैको, भागोऽब्धेः परमा पुनः ॥ ९८ ॥
एको भागः पञ्चमे च, जघन्योत्कर्षतः पुनः । स्यातां द्वौ दशमौ भागौ, तौ षष्टे च जघन्यतः ॥ ९९ ॥

उत्कर्षतश्च षष्टे स्युस्त्रयो भागास्त एव च । जघन्यतः सप्तमे स्युरुत्कर्षात्तच्चतुष्टयम् ॥ १०० ॥
जघन्यतोऽष्टमे भागाश्चत्वार एव तादृशाः । उत्कर्षतश्चाष्टमे स्युर्भागाः पञ्च पयोनिधेः ॥ १०१ ॥
पञ्चैव भागास्तादृक्षा, नवमे तु जघन्यतः । उत्कर्षान्नवमे षट् ते, दशमे षड् जघन्यतः ॥ १०२ ॥
उत्कर्षाद्दशमे सप्तैकादशे ते जघन्यतः । एकादशेऽष्ट चोत्कर्षात्, द्वादशेऽष्ट जघन्यतः ॥ १०३ ॥
द्वादशे पुनरुत्कर्षान्नव भागास्त्रयोदशे । नव भागा जघन्येनोत्कर्षतः सागरोपमम् ॥ १०४ ॥
अस्यां लेश्या च कापोती, जघन्योऽवधिगोचरः । गव्यूतानां त्रयं सार्द्धं, परस्तेषां चतुष्टयम् ॥ १०५ ॥
उत्पद्यन्ते च्यवन्ते च, सर्वदा नारका इह । कदाचित् विरहोऽपि स्याज्जघन्यः समयं स च ॥ १०६ ॥
उत्कर्षतो मुहूर्त्तानां, चतुर्विंशतिराहिता । सर्वासां समुदाये च, मुहूर्त्ता द्वादशान्तरम् ॥ १०७ ॥
एकेन समयेनैकादयोऽसंख्यावसानकाः । उत्पद्यन्ते च्यवन्तेऽस्यामेवं सर्वक्षितिष्वपि ॥ १०८ ॥
इति रत्नप्रभापृथिवी ॥ १ ॥
अथ वंशाभिधा पृथ्वी, द्वितीया परिकीर्त्यते । या शर्कराणां बाहुल्यात्, गोत्रेण शर्कराप्रभा ॥ १०९ ॥
घनोदध्यादिकं सर्वं, ज्ञेयमत्रापि पूर्ववत् । घनोदध्यादिवलयविष्कम्भस्तु विशिष्यते ॥ ११० ॥
सचैवम् ।
योजनैकतृतीयांशयुतानि योजनानि षट् । वंशायामाद्यवलये, विष्कम्भः परिकीर्त्तितः ॥ १११ ॥
पादोनानि योजनानि, पञ्च मानं द्वितीयके । योजनं योजनस्य द्वादशांशाः सप्त चान्तिमे ॥ ११२ ॥
त्रयोदशभिरित्येवं, तृतीयभागवर्जितैः । अलोकः शर्करापृथ्वीपर्यन्तात् किल योजनैः ॥ ११३ ॥
एकं लक्षं योजनानां, सद्वात्रिंशत्सहस्रकम् । अस्या बाहल्यमादिष्टं विशिष्टज्ञानशालिभिः ॥ ११४ ॥
मुक्त्वैकैकं सहस्रं च, प्राग्वदस्यामुपर्यधः । एकलक्षे योजनानां, सहस्रैस्त्रिंशतान्विते ॥ ११५ ॥
एकादश प्रस्तटाः स्युस्तेषां प्रत्येकमन्तरम् । योजनानां सहस्राणि, नव सप्त शतानि च ॥ ११६ ॥
प्रतिप्रतरमेकैको, भवेच्च नरकेन्द्रकः । मध्येभागोऽथ नामानि, तेषां ज्ञेयान्यनुक्रमात् ॥ ११७ ॥
धनिको धनकश्चैव, मनको वनकस्तथा । घट्टसंघट्टजिह्वाख्या, अपिजिह्वस्तथापरः ॥ ११८ ॥
लोलश्च लोलावर्तश्च, घनलोलस्तथैव च । प्रतिप्रतरमेभ्योऽष्टावष्टौ स्युर्नरकालयाः ॥ ११९ ॥
तत्राद्यप्रतरमध्यनरकादावलीं प्रति । षट्त्रिंशत् दिक्षु नरकाः, पञ्चत्रिंशत् विदिक्षु च ॥ १२० ॥
प्रथमे पङ्क्तिगाः पञ्चाशीतियुक्तं शतद्वयम् । द्वितीयादिषु चैकैकहीनाः स्युः सर्वपङ्क्तयः ॥ १२१ ॥
द्वितीयप्रतरे तस्मात्, द्विशती सप्तसप्ततिः । तृतीये पङ्क्तिनरका, द्विशत्येकोनसप्ततिः ॥ १२२ ॥
चतुर्थे पङ्क्तिनरका, द्वे शते सैकषष्टिके । पञ्चमे द्विशती तेषां, त्रिपञ्चाशत्समन्विता ॥ १२३ ॥
पञ्चचत्वारिंशदाढ्ये, द्वे शते षष्ट ईरिताः । सप्तमप्रस्तटे सप्तत्रिंशताढ्या शतद्वयी ॥ १२४ ॥

एकोनत्रिंशदधिके द्वे, शते प्रस्तटेऽष्टमे । एकविंशत्यधिके च, द्वे शते नवमे मता: ॥ १२५ ॥
शतद्वयं च दशमे, त्रयोदशाधिकं भवेत् । एकादशे प्रस्तटे च, पञ्चोत्तरं शतद्वयम् ॥ १२६ ॥
षड्विंशति: शतानि स्युर्नवति: पञ्चभिर्युता । वंशायां नरकावासा:, सर्वे पङ्क्ति गता: किल ॥ १२७ ॥
सहस्रा: सप्तनवतिश्चतुर्विंशतिलक्षण: । त्रिशती पञ्चभिर्युक्ता, प्राग्वत्पुष्पावकीर्णका: ॥ १२८ ॥
सर्वे च नरकावासा, लक्षा: स्यु: पञ्चविंशति: । वंशायां ज्ञानिभिर्दृष्टा, ज्ञानेन सर्वगामिना ॥ १२९ ॥
एषां संस्थानमुच्चत्वं, स्वरूपं वेदनादिकम् । रत्नप्रभावद्विज्ञेयं, त्र्यस्राद्यनुक्रमोऽपि च ॥ १३० ॥
षडङ्गुलाधिका एकत्रिंशत्करा वपुर्भवेत् । प्रथमप्रस्तटे वंशापृथिव्यां नारकाङ्गिनाम् ॥ १३१ ॥
द्वितीये च चतुस्त्रिंशत्करा: नवाङ्गुलाधिका: । द्वादशाङ्गुलयुक्सप्तत्रिंशत्करास्तृतीयके ॥ १३२ ॥
चत्वारिंशत्करास्तुर्येऽधिकपञ्चदशाङ्गुला: । पञ्चमे ते त्रिचत्वारिंशत् सहाष्टादशाङ्गुला: ॥ १३३ ॥
कराणां सप्त चत्वारिंशद्विहीनाङ्गुलैस्त्रिभि: । षष्टेऽथ सप्तमे पूर्णा:, करा पञ्चाशदाहिता: ॥ १३४ ॥
अष्टमे च त्रिपञ्चाशत्, करास्त्र्यङ्गुलशालिन: । नवमेऽङ्गुलषट्काढ्या:, षट्पञ्चाशत् करा:मता: ॥ १३५ ॥
एकोनषष्टिर्हस्तानां, दशमे सनवाङ्गुला: । एकादशे च द्वाषष्टि:, करा: सद्वादशाङ्गुला: ॥ १३६ ॥
स्थिति: जघन्यास्यामाद्येऽम्बुधिमानाऽपरा तु सा । कृतैकादशभागस्याम्बुधैर्भागद्वयान्विता ॥ १३७ ॥
द्वितीयप्रस्तटे लघ्वी, द्विभागसहितोऽम्बुधि: । उत्कृष्टा चैकादशांशैश्चतुर्भिरधिकोऽम्बुधि: ॥ १३८ ॥
तृतीये प्रस्तटे वार्धिर्चतुर्भागयुतो लघु: । षड्भिर्भागैर्युतश्चाब्धिरुत्कृष्टा स्थितिराहिता ॥ १३९ ॥
जघन्या प्रस्तटे तुर्ये, षड्भागयुतवारिधि: । उत्कृष्टा चाष्टभिर्भागैर्युक्त एक: पयोनिधि: ॥ १४० ॥
पञ्चमेऽल्पीयसी भागैरष्टभि: सह वारिधि: । गरीयसी चात्र भागैर्दशभि: सह तोयधि: ॥ १४१ ॥
दशभागान्वितश्चाब्धि:, षष्टे तु स्याज्जघन्यत: । उत्कर्षतश्चैकभागसंयुक्तं सागरद्वयम् ॥ १४२ ॥
सागरद्वयमेकांशसंयुक्तं सप्तमे लघु: । त्रिभिरेकादशांशैश्च, युक्तमब्धिद्वयं गुरु: ॥ १४३ ॥
अष्टमे तु त्रिभिर्भागै:, सहाब्धिद्वितयं लघु: । अञ्चितं पञ्चभिर्भागैर्वारिधिद्वितयं गुरु: ॥ १४४ ॥
नवमेऽल्पीयसी पञ्चभागाढ्यमम्बुधिद्वयम् । पयोधिद्वितयं सप्तभागोपेतं गरीयसी ॥ १४५ ॥
जघन्या दशमे सप्तभागाढ्यं सागरद्वयम् । उत्कृष्टा सागरद्वन्द्वं, भागैर्नवभिरन्वितम् ॥ १४६ ॥
नवभागान्वितवार्धिद्वयमेकादशे लघु: । उत्कृष्टा च वारिधीनां, संपूर्णं त्रितयं भवेत् ॥ १४७ ॥
प्राग्वत् लेश्या च कापोती, ह्यवधेर्गोचरो गुरु: । गव्यूतानां त्रयं सार्द्धं, गव्यूतत्रितयं लघु: ॥ १४८ ॥
नारकच्यवनोत्पत्तिविरहोऽत्र जघन्यत: । समयं यावदुत्कर्षात् दिनानि सप्त कीर्त्तित: ॥ १४९ ॥
इति शर्कराप्रभापृथिवी ॥ २ ॥

अथ शैलाभिधा पृथ्वी, तृतीया परिकीर्त्यते । या वालुकाना बाहुल्यात्, गोत्रेण वालुकाप्रभा ॥ १५० ॥

अस्यां प्रथमवलये, विष्कम्भो योजनानि षट् । द्वौ त्रिभागौ योजनस्य, द्वितीये वलये पुनः ॥ १५१ ॥
पञ्चैव योजनानि स्युःर्वलयेऽथ तृतीयके । योजनस्य द्वादशांशैरष्टभिः सह योजनम् ॥ १५२ ॥
त्रयोदशभिरित्येवं, सतृतीयांशयोजनैः । अलोको वालुकापृथ्वीपर्यन्ततः प्ररूपितः ॥ १५३ ॥
शेषं घनोदध्यादिस्वरूपं घर्मावत् ॥

अष्टाविंशत्या सहस्रैः, योजनानां समन्वितम् । लक्षं बाहल्यमादिष्टमस्यां दृष्टजगत्त्रयैः ॥ १५४ ॥
मुक्त्वा चैकैकं सहस्रं, प्राग्वदस्यामुपर्यधः । मध्ये षड्विंशतिसहस्राढ्यैकलक्षयोजनम् ॥ १५५ ॥
नव स्युः प्रस्तटास्तेषां, प्रत्येकमिदमन्तरम् । सहस्राणि द्वादशैव, त्रिंशती पञ्चसप्ततिः ॥ १५६ ॥
प्रतिप्रतरमेकैको, मध्ये स्यान्नरकेन्द्रकः । ते च तप्तस्तापितश्च, तपनस्तापनस्तथा ॥ १५७ ॥
निदाघश्च प्रज्वलितः, पर उज्ज्वलिताभिधः । तथा संज्वलिताभिख्यः, संप्रज्वलितसंज्ञकः ॥ १५८ ॥
एभ्यश्च पङ्क्तयो दिक्षु, विदिशासु च निर्गताः । पञ्चविंशतिरावासास्तत्र दिग्वर्त्तिपङ्क्तिषु ॥ १५९ ॥
विदिशापङ्क्तिषु चतुर्विंशतिर्नरकालयाः । प्रथमप्रतरे सप्तनवत्याढ्यं शतं समे ॥ १६० ॥
द्वितीयादिप्रस्तटे स्युः, श्रेण्य एकैकवर्जिताः । ततो द्वितीय एकोननवत्याढ्यं शतं समे ॥ १६१ ॥
सैकाशीति तृतीये तच्चतुर्थे सत्रिसप्तति । पञ्चमे प्रतरे प्रोक्तं, पञ्चषष्टियुतं शतम् ॥ १६२ ॥
षष्टे च प्रस्तटे सप्तपञ्चाशं सम्मतं शतम् । शतमेकोनपञ्चाशद्युक्तमुक्तं च सप्तमे ॥ १६३ ॥
अष्टमे त्वेकचत्वारिंशतोपेतं शतं मतम् । त्रयस्त्रिंशं शतं चैकं, नवमे प्रस्तटे भवेत् ॥ १६४ ॥
एवं चतुर्दशशती, पञ्चाशीतिसमन्विता । वालुकायां पङ्क्तिगताः, सर्वेऽपि नरकालयाः ॥ १६५ ॥
सहस्राण्यष्टनवतिस्तथा लक्षाश्चतुर्दश । शताः पञ्च पञ्चदशाधिकाः पुष्पावकीर्णकाः ॥ १६६ ॥
एवं च वालुकापृथ्व्यां, नरकाः सर्वसंख्यया । लक्षाः पञ्चदश प्रोक्तास्तत्त्वज्ञानमहार्णवैः ॥ १६७ ॥
शेषं सर्वं स्वरूपं घर्मावत् ॥

द्वाषष्टिः पाणयः सार्द्धाः, प्रथमप्रस्तटे तनुः । सार्द्धसप्ताङ्गुलाढ्याश्च, द्वितीये सप्ततिः कराः ॥ १६८ ॥
तृतीयेऽष्टसप्ततिस्ते, संयुक्ता अङ्गुलैस्त्रिभिः । तुर्ये सार्द्धाङ्गुलन्यूनाः, षडशीतिः कराः किल ॥ १६९ ॥
पञ्चमे च त्रिनवतिः, कराः साष्टादशाङ्गुलाः । एकोत्तरशतं षष्ठेऽध्यर्द्धत्रयोदशाङ्गुलाः ॥ १७० ॥
नवोत्तरं शतं हस्ताः, सप्तमे सनवाङ्गुलाः । सार्द्धाङ्गुलचतुष्काढ्यं, शतं सप्तदशोत्तरम् ॥ १७१ ॥
कराणामष्टमे ज्ञेयं, नवमप्रस्तटे तथा । शतं सपादं संपूर्णं, द्विघ्नं तूत्तरवैक्रियम् ॥ १७२ ॥
प्रथमेऽब्धित्रयं लघ्वी, स्थितिरुत्कर्षतोऽम्बुधेः । नवभागीकृतस्यांशचतुष्काढ्यास्त्रयोर्णवाः ॥ १७३ ॥
एषैव च द्वितीये स्याज्जघन्या परमा पुनः । वार्द्धित्रयं प्रोक्तरूपैर्भागैरष्टभिरञ्चितम् ॥ १७४ ॥
तृतीये तु जघन्याब्धित्रयं भागैः सहाष्टभिः । उत्कर्षतस्त्रिभिर्भागैर्युक्तमब्धिचतुष्टयम् ॥ १७५ ॥

भागत्रयान्वितं तुर्ये, जघन्याब्धिचतुष्टयम् । उत्कर्षतः सप्तभागयुक्तमब्धिचतुष्टयम् ॥ १७६ ॥
एषैव प्रतरे लघ्वी, पञ्चमे परिकीर्त्तिता । उत्कर्षतो द्विभागाढ्या, प्रज्ञप्ता पञ्चसागरी ॥ १७७ ॥
षष्ठे जघन्यतः पञ्चपारावारी द्विभागयुक् । उत्कर्षतः पञ्चपारावारी षड्भागसंयुता ॥ १७८ ॥
इयमेव जघन्या च, सप्तमप्रतरे भवेत् । युक्तान्येकेन भागेन, परमा सागराणि षट् ॥ १७९ ॥
सागराणि षडेकांशसंयुक्तान्यष्टमे लघु । उत्कृष्टा षट् सागराणि, पञ्चभागयुतानि च ॥ १८० ॥
नवमे पञ्चभागाढ्या, जघन्या षट् पयोधयः । उत्कर्षतः स्थितिश्चात्र, संपूर्णाः सप्त सागराः ॥ १८१ ॥
प्रथमप्रतरे चात्र, केषांचिन्नारकाङ्गिनाम् । कापोतलेश्या सर्वेषु, नीललेश्यापरेषु च ॥ १८२ ॥
स्थितिः कापोतलेश्याया, भवेदुत्कर्षतोऽपि यत् । पल्योपमासंख्यभागाभ्यधिकं सागरत्रयम् ॥ १८३ ॥
द्वितीयादिप्रस्तटे तु, जघन्यापि न सा स्थितिः । तदाद्य एव प्रतरे, कापोत्यस्यामिति स्थितम् ॥ १८४ ॥
तत्रापि पल्यासंख्यांशाधिकाम्भोधित्रयावधि । बिभ्रतामायुरेषा स्यान्नीलैवातोऽधिकायुषाम् ॥ १८५ ॥
सजातीयापि लेश्या स्यादधोऽधोऽनुक्रमादिह । क्लिष्टा क्लिष्टतरा क्लिष्टतमा सर्वासु भूमिषु ॥ १८६ ॥
उत्कर्षतोऽवधिक्षेत्रं, गव्यूतत्रयमत्र च । जघन्यतश्च गव्यूतद्वयं सार्द्धं तदाहितम् ॥ १८७ ॥
अत्रोत्पत्तिच्यवनयोरन्तरं परमं भवेत् । दिनानि पञ्चदश तज्जघन्यं समयात्मकम् ॥ १८८ ॥

इति वालुकाप्रभापृथिवी ॥ ३ ॥

अथाञ्जनाभिधा पृथ्वी, चतुर्थीयं निरूप्यते । या प्रोक्ता पङ्कबाहुल्यात्, पङ्कप्रभेति गोत्रतः ॥ १८९ ॥
सप्तयोजनविस्तीर्णमस्या वलयमादिमम् । सपादपञ्चपादोनद्वयमाने क्रमात् परे ॥ १९० ॥
चतुर्दशभिरित्येवं, संपूर्णैर्ननु योजनैः । पङ्कप्रभायाः पर्यन्तादलोकः परिकीर्त्तितः ॥ १९१ ॥
लक्षं सहस्रैर्विंशत्याधिकं बाहल्यमत्र च । मुक्त्वा सहस्रमेकैकं, प्राग्वदत्राप्युपर्यधः ॥ १९२ ॥
मध्ये चाष्टादशसहस्राढ्ययोजनलक्षके । भवन्ति प्रस्तटाः सप्त, तेषां प्रत्येकमन्तरम् ॥ १९३ ॥
योजनानां सहस्राणि, षोडशैकं तथा शतम् । सषट्षष्टि द्वौ त्रिभागौ, योजनस्येति कीर्त्तितम् ॥ १९४ ॥
प्रतिप्रतरमेकैको, भवेच्च नरकेन्द्रकः । ते चामी गदिता आरनारौ मारस्तथापरः ॥ १९५ ॥
वर्चस्तमः खाडखडस्तथा खडखडाभिधः । प्रतिप्रतरमेभ्यश्च, प्राग्वदष्टाष्टपङ्क्तयः ॥ १९६ ॥
स्युः षोडश पञ्चदशावासा दिक्षु विदिक्षु च । शतं सपादं प्रथमप्रतरे सर्वसंख्यया ॥ १९७ ॥
द्वितीयादिषु चैकैकहीना अष्टापि पङ्क्तयः । ततो द्वितीयप्रतरे, सर्वे सप्तदशं शतम् ॥ १९८ ॥
नवोत्तरं तृतीये तत्, तुर्ये एकोत्तरं शतम् । पञ्चमे च त्रिनवतिः, पञ्चाशीतिश्च षष्टके ॥ १९९ ॥
सर्वे च पङ्क्तिनरकाः, सप्तमे सप्तसप्ततिः । सप्ताधिका सप्तशती, सर्वेऽस्यां पङ्क्तिसंश्रयाः ॥ २०० ॥
सहस्रा नवनवतिर्नव लक्षास्तथा परे । द्विशती सत्रिनवतिरस्यां पुष्पावकीर्णकाः ॥ २०१ ॥

एवं च सर्वे नरकावासाः पङ्कप्रभाक्षितौ । निर्दिष्टा दश लक्षाणि, साक्षात्कृतचराचरैः ॥ २०२ ॥
इत आरभ्य नो पीडाः, परमाधार्मिकोद्भवाः । ततोऽस्यां द्विविधा एव, क्षेत्रजाश्च मिथःकृताः ॥ २०३ ॥
परमेताः प्राक्तनाभ्योऽनन्तानन्तगुणाधिकाः । तीव्रास्तीव्रतरास्तीव्रतमाश्चानुक्रमादधः ॥ २०४ ॥
तत्राप्यत्रोपरितनप्रतरेषु बहुष्वपि । उष्णा स्तोकेष्वधः स्थेषु, शीता च क्षेत्रवेदना ॥ २०५ ॥
उष्णेषु च नरकेषु, नारकाः शीतयोनयः । नरकेषु च शीतेषु, नारकाः उष्णयोनयः ॥ २०६ ॥
सर्वेष्वपि नरकेषु, ज्ञेय एवं विपर्ययः । नारकोत्पत्तिदेशान्यक्षेत्रयोः सोऽतिदुःखदः ॥ २०७ ॥

हैमत्रिषष्टिचरिते सप्तमपर्वणि त्वत्रापि परमाधार्मिककृता वेदनोक्ता, तथाहि–"सिंहादिरूपैः
विकृतैस्तत्र शम्बूकरावणौ । लक्ष्मणेन समं कृद्धौ, युद्ध्यमानौ ददर्श सः नैवं वो युद्ध्यमानानां,
दुःखं भावीति वादिनः । परमाधार्मिकाः कुद्धा, अग्निकुण्डेषु तान्न्यधुः ॥

शतं सपादं हस्तानां, प्रथमेऽङ्गं द्वितीयके । स्यात् षट्चत्वारिंशतमूनं चतुर्भिरङ्गुलैः ॥ २०८ ॥
करास्तृतीये षट्षष्टिशतं सषोडशाङ्गुलम् । सप्ताशीतिशतं तुर्येऽङ्गुलैर्द्वादशभिर्युतम् ॥ २०९ ॥
अष्टाधिके द्वे शते च, पञ्चमेऽष्टाङ्गुलाधिके । षष्ठे च प्रस्तटे देहमानं हस्तशतद्वयम् ॥ २१० ॥
एकोनत्रिंशता हस्तैश्चतुर्भिश्चाङ्गुलैर्युतम् । सप्तमप्रस्तटे देहो, हस्ताः सार्द्धं शतद्वयम् ॥ २११ ॥
प्रथमप्रस्तटेऽथायुर्जघन्यं सप्तसागरी । उत्कृष्टा सा त्रिभिर्वार्द्धिभागैर्युक्ता च साप्तिकैः ॥ २१२ ॥
द्वितीयप्रस्तटे त्वेषा, जघन्या कीर्त्तिता स्थितिः । उत्कृष्टा षट्साप्तिकांशसमेताः सप्तवार्द्धयः ॥ २१३ ॥
तृतीये तु जघन्यैषा, गदिता परमा पुनः । द्वाभ्यां साप्तिकभागाभ्यां, संयुक्ता अष्ट सागराः ॥ २१४ ॥
अष्टाब्धयो द्विभागाढ्यास्तुर्ये जघन्यतः स्थितिः । पञ्चभिः साप्तिकैर्भागैः, सहाष्टाम्भोधयः पराः ॥ २१५ ॥
पञ्चमे पञ्चभिर्भागैः, सहाष्टसिन्धवो लघुः । एकेन साप्तिकांशेन, सहोत्कृष्टा नवार्णवाः ॥ २१६ ॥
षष्टे जघन्या त्वेकांशसंयुक्ता सागरा नव । चतुर्भिः साप्तिकैर्भागैः, सहोत्कृष्टा नवाब्धयः ॥ २१७ ॥
इयमेव जघन्येन, सप्तमे स्थितिरास्थिता । उत्कर्षतः स्थितिश्चात्र, जिनैरुक्ता दशाब्धयः ॥ २१८ ॥
नीला भवेदत्र लेश्या, परमोऽवधिगोचरः । गव्यूतद्वयमध्यर्द्धं, गव्यूतद्वितयं लघुः ॥ २१९ ॥
उत्पत्तेश्च्यवनस्यापि, नारकाणामिहान्तरम् । मासमेकं भवेज्ज्येष्ठं, जघन्यं समयावधि ॥ २२० ॥

इति पङ्कप्रभापृथिवी ॥ ४ ॥

अथ रिष्टाभिधा पृथ्वी, पञ्चमी परिकीर्त्यते । या धूमरूपबाहुल्याद्धूमप्रभेति गोत्रतः ॥ २२१ ॥
वलयस्येह विष्कंभः प्रथमस्य प्ररूपितः । योजनस्य तृतीयांशसंयुता सप्तयोजनी ॥ २२२ ॥
द्वितीयवलये सार्द्धपञ्चयोजनविस्तृतिः । तृतीये च द्वादशांशैर्दशभिः सह योजनम् ॥ २२३ ॥
इत्येवं पञ्चदशभिर्योजनैश्च समन्ततः । स्यादलोकस्तृतीयांशन्यूनैर्धूमप्रभान्ततः ॥ २२४ ॥

अष्टादशसहस्राढ्यलक्षयोजनसंमितम् । बाहल्यमस्यामुदितमुदितामितवाङ्मयैः ॥ २२५ ॥
मुक्त्वा सहस्रमेकैकं, प्राग्वदत्राप्युपर्यधः । मध्येऽत्र षोडशसहस्राढ्योजनलक्षके ॥ २२६ ॥
भवन्ति प्रस्तटाः पञ्च, तेषां प्रत्येकमन्तरम् । योजनद्विशती सार्धा, सहस्राः पञ्चविंशतिः ॥ २२७ ॥
तेषु प्रत्येकमेकैकः, कथितो नरकेन्द्रकः । ख्यातस्तमोः भ्रमश्चान्धस्तथांधतमसोऽपि च ॥ २२८ ॥
प्रतिप्रतरमेभ्यश्च, निर्गता अष्ट पङ्क्तयः । चतस्रो दिग्गतास्तद्वत्, चतस्रः स्युर्विदिग्गताः ॥ २२९ ॥
दिक्पङ्क्तिषु नव नव, भवन्ति नरकाश्रयाः । परास्वष्टाष्ट सर्वाग्रमाद्ये एकोनसप्ततिः ॥ २३० ॥
प्रतिप्रतरमेकैकहीना अष्टापि पङ्क्तयः । ततो द्वितीये पाङ्क्तेया, एकषष्टिः प्ररूपिताः ॥ २३१ ॥
तृतीये च त्रिपञ्चाशत्, तुरीये प्रस्तटे पुनः । पञ्चचत्वारिंशदेव, सप्तत्रिंशच्च पञ्चमे ॥ २३२ ॥
एवं पङ्क्तिगताः सर्वे, द्विशती पञ्चषष्टियुक् । शेषाः पुष्पावकीर्णास्तु, लक्षयोर्द्वितयं तथा ॥ २३३ ॥
सहस्रा नवनवतिः, शतानि सप्त चोपरि । पञ्चत्रिंशदिति त्रीणि, लक्षाणि सर्वसंख्यया ॥ २३४ ॥
पङ्क्तिप्रभावद्विज्ञेया, द्विधा पीडात्र किन्त्विह । स्तोकेषु नरकेषूष्णा, शेषेषु शीतवेदना ॥ २३५ ॥
कराणां द्विशती सार्द्धा, प्रथमे प्रस्तटे तनुः । द्वितीये त्रिशती द्वादशोत्तराः द्वादशाङ्गुलाः ॥ २३६ ॥
हस्ताः तृतीये त्रिशती, पञ्चसप्ततिसंयुता । सार्धसप्तत्रिंशदाढ्या, तुर्ये चतुःशती कराः ॥ २३७ ॥
शतानि पञ्च हस्तानां, पञ्चमे प्रस्तटे जिनैः । पञ्चमज्ञानपटुभिस्तनुमानं निरूपितम् ॥ २३८ ॥
दशाब्धयो जघन्येन, प्रथमप्रस्तटे स्थितिः । उत्कृष्टा च पञ्चभागीकृतस्य जलधेः किल ॥ २३९ ॥
युक्ता द्वाभ्यां विभागाभ्यामेकादश पयोधयः । एषैव च जघन्येन, द्वितीयप्रस्तटे भवेत् ॥ २४० ॥
ज्येष्ठा चात्र युता भागैश्चतुर्भिर्द्वादशाब्धयः । इयमेव जघन्येन, तृतीयप्रतरे स्थितिः ॥ २४१ ॥
उत्कर्षतस्तृतीये च, स्युश्चतुर्दश वार्द्धयः । पञ्चभागीकृतस्याब्धेर्भागेनैकेन संयुताः ॥ २४२ ॥
एषा लघुश्चतुर्थे स्यादुत्कृष्टात्र स्थितिः पुनः । त्रिभिः पूर्वोदितैर्भागैर्युताः पञ्चदशाब्धयः ॥ २४३ ॥
पञ्चमैंशत्रयोपेता, लघुः पञ्चदशाब्धयः । उत्कृष्टा च सप्तदश, संपूर्णा जलराशयः ॥ २४४ ॥
केषाञ्चिदाद्यप्रतरे, नारकाणां भवेदिह । नीललेश्या यदुत्कर्षादप्यस्याः स्थितिराहिता ॥ २४५ ॥
पल्योपमासंख्यभागाधिका दश पयोधयः । ततोऽधिकस्थितीनां तु, तेषां कृष्णैव केवलम् ॥ २४६ ॥
गव्यूतद्वयमुत्कृष्टो, भवेदवधिगोचरः । जघन्यतस्तु गव्यूतं, सार्द्धमुक्तोऽत्र पारगैः ॥ २४७ ॥
च्यवनोत्पत्तिविरहो, नारकाणां भवेदिह । मासयोर्द्वयमुत्कर्षाज्जघन्यात्समयावधिः ॥ २४८ ॥
इति धूमप्रभापृथ्वी ॥ ५ ॥
मघाभिधाऽथ पृथिवी, षष्ठी स्पष्टं निरूप्यते । तमसामतिबाहुल्याद्या गोत्रेण तमःप्रभा ॥ २४९ ॥
तृतीयांशोनितान्यष्टौ, योजनानि घनोदधेः । वलये विस्तृतिः षट् च, पादोनानि द्वितीयके ॥ २५० ॥

योजनं योजनस्य द्वादशभागीकृतस्य च । भागा एकादशेत्युक्ता, तृतीये वलये मितिः ॥ २५१ ॥
योजनैः पञ्चदशभिस्तृतीयभागसंयुतैः । भवत्येवमलोकश्च, मघापर्यन्तभागतः ॥ २५२ ॥
लक्षमेकं योजनानां, सषोडशसहस्रकम् । बाहल्यमस्यां निर्दिष्टं, प्राग्वदत्राप्युपर्यधः ॥ २५३ ॥
मुक्त्वा सहस्रमेकैकं, मध्ये स्युः प्रस्तटास्त्रयः । सहस्राणि द्विपञ्चाशत्, सार्द्धान्येतेषु चान्तरम् ॥ २५४ ॥
हिमवार्द्दललल्लकास्त्रयोऽमी नरकेन्द्रकाः । क्रमात् त्रिषु प्रस्तटेषु, प्राग्वदेभ्योऽष्ट पङ्क्तयः ॥ २५५ ॥
दिश्यपङ्क्तिषु चत्वारश्चत्वारः नरकालयाः । त्रयस्त्रयः विदिक्ष्वेवमेकोनत्रिंशदादिमे ॥ २५६ ॥
द्वितीयादिषु चैकैकहीना अष्टापि पङ्क्तयः । एवं द्वितीयप्रतरे, पाङ्क्तेया एकविंशतिः ॥ २५७ ॥
त्रयोदश तृतीये स्युर्त्रिषष्टिः सर्वसंख्यया । मघायां पङ्क्तिनरकाः, शेषाः पुष्पावकीर्णकाः ॥ १५८ ॥
सहस्रा नवनवतिः, शतानि नव चोपरि । द्वात्रिंशदिति सर्वाग्रं, लक्षं पञ्चोनमाहिताः ॥ २५९ ॥
द्वेधात्र वेदना किन्तु, शीतैव क्षेत्रवेदना । मिथःकृता वेदनाश्च, विना प्रहरणैरिह ॥ २६० ॥
मघामाघवतीजाताः, शस्त्राणि न हि नारकाः । विकुर्वितुं शक्नुवन्ति, तथा भवस्वभावतः ॥ २६१ ॥
ततः प्रहरणाभावात्, मिथोऽङ्गेषु प्रवेशितैः । वज्रतुण्डकुन्थुरूपैः, पीडयन्ति विकुर्वितैः ॥ २६२ ॥

तथोक्तं जीवाभिगमे । छट्ठसत्तमासु णं पुढवीसु नेरइया महंताइं लोहियकुंथुरूवाइं वयरमयतुंडाइं गोमयकीडसमाणाइं विउव्वित्ता अन्नमन्नस्स कायं समतुरंगेमाणा २ खाएमाणा २ सयपोरा किमिया इव दालेमाणा २ अन्तो २ अणुपविसेमाणा वेयणं उइरेंति ॥ अत्र समतुरंगेमाणा २ इति समतुरंगायमाणा अश्वा इवान्योन्यमारोहन्त इत्यर्थः । सयपोरा किमियत्ति शतपर्वकृमयः इक्षुकृमयः ॥

प्रथमप्रस्तटे हस्ताः, शतानि पञ्च भूघनम् । शतानि सप्त सार्द्धानि, द्वितीयप्रस्तटे तनुः ॥ २६३ ॥
सहस्रं पाणयः पूर्णाः, तृतीयप्रस्तटे वपुः । स्थितिः जघन्या प्रथमे, स्यात् सप्तदश वार्द्धयः ॥ २६४ ॥
त्रिभागीकृतपाथोधेर्भागद्वयसमन्विताः । उत्कर्षतः स्थितिश्चाद्यप्रस्तटेऽष्टादशाब्धयः ॥ २६५ ॥
द्वितीये लघुरेषैव, ज्येष्ठा विंशतिरब्धयः । वार्द्धेस्त्रिधा खण्डितस्य, भागेनैकेन संयुताः ॥ २६६ ॥
इयमेव जघन्येन, तृतीयप्रस्तटे स्थितिः । उत्कर्षतश्च सम्पूर्णा, द्वाविंशतिपयोधयः ॥ २६७ ॥
अवधेर्विषयो ज्येष्ठः, सार्धगव्यूतसम्मितः । लघीयांश्चैकगव्यूतमानः प्रोक्तोऽत्र तात्त्विकैः ॥ २६८ ॥
अन्तरं मरणोत्पत्त्योर्जघन्यं समयावधि । चतुष्टयं च मासानामुत्कृष्टं तन्निरूपितम् ॥ २६९ ॥
इति तमःप्रभापृथ्वी ॥ ६ ॥

अथ माघवती नाम्ना, सप्तमी कथ्यते मही । या घोरध्वान्तरूपत्वात्, गोत्रात् तमस्तमःप्रभा ॥ २७० ॥
प्रथमे योजनान्यष्टौ, द्वितीये योजनानि षट् । तृतीये द्वे योजने च, वलयाततयः क्रमात् ॥ २७१ ॥

एवं षोडशभिः पूर्णैर्योजनैर्जिनभानुभिः । तमस्तमायाः पर्यन्तादलोकः परिकीर्त्तितः ॥ २७२ ॥
लक्षमेकं योजनानां, सहस्रैरष्टभिः सह । बाहल्यमस्यामादिष्टमत्र चोपर्यधः पृथक् ॥ २७३ ॥
द्विपञ्चाशत् सहस्राणि, सार्द्धान्युन्मुच्य मध्यतः । एक एव प्रस्तटः स्यात्, सहस्रत्रितयोन्नतः ॥ २७४ ॥
लक्षयोजनविस्तारस्तन्मध्ये नरकेन्द्रकः । अप्रतिष्टानको नाम्ना, तस्मात्प्राग्वच्चतुर्दिशम् ॥ २७५ ॥
एकैको नरकावासस्त्र्यस्रो भूरिभयङ्करः । असंख्ययोजनायामविष्कम्भपरिधिः स्मृतः ॥ २७६ ॥
तथाहि, प्राच्यां कालः प्रतीच्यां च, महाकाल इति स्मृतः । महारोरुरुत्तरस्यां, रोरुर्दक्षिणतो भवेत् ॥ २७७ ॥
विदिक्षु चात्र नैकोऽपि, तत्पङ्क्तीनां परिक्षयात् । प्रतरोऽयं यदेकोनपञ्चाशत्तम आहितः ॥ २७८ ॥
तमःप्रभावद्विज्ञेया, द्विविधात्रापि वेदना । सर्वोत्कृष्टा तीव्रतमाऽनन्तघ्ना सर्वतोऽपि हि ॥ २७९ ॥
देहमानं भवेदत्र, सहस्रद्वितयं कराः । स्वाभाविकं कृत्रिमं तु, सर्वत्र द्विगुणं भवेत् ॥ ३८० ॥
द्वाविंशतिर्जलधयः, स्थितिरत्र जघन्यतः । उत्कर्षतस्तु सम्पूणास्त्रयस्त्रिंशत्पयोधयः ॥ २८१ ॥
नारकोद्वर्त्तनोत्पत्तिविरहोऽत्र जघन्यतः । समयं यावदुत्कर्षात्, षण्मासावधिराहितः ॥ २८२ ॥
गव्यूतं च तदर्धं चोत्कर्षाज्जघन्यतः क्रमात् । अवधेर्विषयः प्रोक्तो, जिनैर्द्रष्टजगत्त्रयैः ॥ २८३ ॥
अथासु येषां जीवानां, यैश्च संहननैर्गतिः । लब्धिश्चाभ्यो निर्गतानां, या स्यात्तत्सर्वमुच्यते ॥ २८४ ॥
संमूर्च्छिमा हि तिर्यञ्च, उत्कर्षात् प्रथमां क्षितिम् । यावदुत्पद्यन्त एते, न द्वितीयादिषु ध्रुवम् ॥ २८५ ॥
तत्राप्येषां दशाब्दानां, सहस्राणि स्थितिर्लघुः । ज्येष्ठा पल्यासंख्यभागो, भवेन्नातः परा पुनः ॥ २८६ ॥
उत्पद्यमानाश्चैतेऽत्र, प्राग्जन्मबोधिमांश्चतः । अपर्याप्तत्वे लभन्ते ह्यव्यक्तमपि नावधिम् ॥ २८७ ॥
तथाह-जीवाभिगमे । नेरइया अच्छेगइया दुअन्नाणि अच्छेगइया तिअन्नाणि ॥
द्वितीयामेव यावच्च, गर्भजाताः सरीसृपाः । तृतीयावधि गच्छन्ति, गृध्राद्याः पापपक्षिणः ॥ २८८ ॥
क्ष्मां चतुर्थीमेव यावत्सिंहादयश्चतुष्पदाः । तथोरःपरिसर्पास्तां, पञ्चमीं यावदेव च ॥ २८९ ॥
स्त्रियः षष्टीमेव यावद्यान्ति यावत्तमस्तमाम् । नरा महारम्भमग्ना, मत्स्याद्याश्च जलाङ्गिनः ॥ २९० ॥
ससेवार्त्तसंहनना, आद्यपृथ्वीद्वयावधि । यान्ति यावत्तृतीयां च, कीलिकाञ्चितभूधनाः ॥ २९१ ॥
सार्धनाराचाश्चतुर्थीं, सनाराचाश्च पञ्चमीम् । षष्टीं यावत्सऋषभनाराचा अथ सप्तमीम् ॥ २९२ ॥
सवज्रर्षभनाराचा, एव गच्छन्ति नापरे । नरके गच्छतामेषामेषोत्कर्षाद्भवेद्गतिः ॥ २९३ ॥
आद्यक्षमाद्यप्रतरे, सर्वेषां सा जघन्यतः । जघन्योत्कृष्टयोर्मध्ये, मध्यागतिरनेकधा ॥ २९४ ॥
आद्याया एव चोद्धृता, भवन्ति चक्रवर्त्तिनः । पृथिवीभ्यो न शेषाभ्यस्तथा भवस्वभावतः ॥ २९५ ॥
एवमाद्यद्वयादेव, बलदेवार्द्धचक्रिणौ । आद्यत्रयादेव तीर्थङ्करा नान्त्यचतुष्टयात् ॥ २९६ ॥
उद्वृत्ताः स्युर्केवलिनः, आद्यपृथ्वीचतुष्टयात् । अन्त्यत्रयागतानां तु, कैवल्यं नैव संभवेत् ॥ २९७ ॥

चारित्रिणो भवन्त्याद्यपञ्चकादाद्यषट्कत: । उद्वृत्ता देशविरता:, स्यु: सप्तभ्योऽपि सद्दृश: ॥ २९८ ॥
एताश्च लब्धी: प्राक्क्लृप्तपुण्यौधा नरकेषु तु । प्राग्बद्धायुर्वशोत्पन्ना, लभन्ते नान्यनारका: ॥ २९९ ॥
ये स्युस्तीर्थकरास्तेऽपि, प्राग्बद्धनरकायुष: । पश्चात्तद्धेतुभिर्बद्धतीर्थकृन्नामकर्मका: ॥ ३०० ॥
ततो बद्धायुष्कतयाऽनुभूय नारकस्थितिम् । उद्वृत्य नारकेभ्य: स्युरर्हन्त: श्रेणिकादिवत् ॥ ३०१ ॥
गर्भजेषु नृतिर्यक्षूत्पद्यन्ते संख्यजीविषु । षड्भ्यस्तादृशतिर्यक्षु सप्तम्या निर्गता: परम् ॥ ३०२ ॥
किंच, सर्वास्वपि क्षितिष्वासु, नारका: केचनानघा: । नवीनमपि सम्यक्त्वं, लभन्ते कर्मलाघवात् ॥ ३०३ ॥
पञ्चेन्द्रियवधैर्मांसाहारैर्महापरिग्रहै: । महारंभैश्च बध्नन्ति, नरकायु: शरीरिण: ॥ ३०४ ॥

तथोक्तम् । बंधइ नरयाउ महारंभपरिग्गहरओ रुद्दो ॥ स्थानाङ्गेऽपि । चउहिं ठाणेहिं जीवा नेरइयाउयत्ताए कम्मं पकरेंति । तं० महारंभयाए महापरिग्गहाए कुणिमाहारेणं पंचिंदियवहेणं ॥

अहर्निशं नारकाणां, दु:खमायु:क्षयावधि । पीडाभि: पच्यमानानां, प्राग्भूरिकृतपाप्मनाम् ॥ ३०५ ॥
तथोक्तं जीवाभिगमे । अच्छिनिमीलणमित्तं, नत्थि सुहं दुक्खमेव अणुबद्धम् । नरए नेरइयाणं, अहोनिसं पच्चमाणाणाम् ॥

कदाचिदेव यत्सौख्यमल्पकालं तदल्पकम् । उपपातादिभिर्वक्ष्यमाणैर्भवति हेतुभि: ॥ ३०६ ॥
तथोक्तम्— उववाएण व सायं, नेरइया देवकम्मुणा वावि । अज्झवसाणनिमित्तं, अहवा कम्माणुभावेण ॥
तथाहि— विनाङ्गदाहच्छेदादि, मृतो य: पूर्वजन्मनि । नारको नातिपीडार्त्त, उत्पद्येतास्य तत्क्षणे ॥ ३०७ ॥
न प्राग्भवानुसम्बद्धं, नापि क्षेत्रादिसम्भवम् । असातं सातमित्यस्योपपातसमये भवेत् ॥ ३०८ ॥
पूर्वमित्रं सुर: कश्चिद्यथा कृष्णस्य सात्वत: । करोति पीडोपशमं, तदामी देवकर्मणा ॥ ३०९ ॥
कियत्कालं सुखं किञ्चिल्लभन्तेऽथ तत: परम् । क्षेत्राद्यन्यतरा पीडा, तेषां प्रादुर्भवेद्ध्रुवम् ॥ ३१० ॥
सम्यक्त्वलाभे प्रथमं, चक्षुर्लाभे इवान्धला: । तत: परं चार्हदादिगुणानामनुमोदनात् ॥ ३११ ॥
एवमध्यवसायेन, सुखमासादयन्त्यमी । अपेक्ष्य जिनजन्मादि, सातकर्मोदयेन वा ॥ ३१२ ॥
कतिचिदिति चिदुच्चा नारकास्तारकाणा-मुचितमनुसरन्तस्तीर्थकृन्नामकर्म ।
सुकुलजनिमवाप्य प्राप्तचारित्रचर्या: । जिनपतिपदभाज: प्राप्नुयु: मोक्षलक्ष्मीम् ॥ ३१३ ॥
विश्वाश्चर्यदकीर्तिकीर्तिविजयश्रीवाचकेन्द्रान्तिष-द्राजश्रीतनयोऽतनिष्ट विनय: श्रीतेजपालात्मज: ।
काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे । सर्गश्चारुतमश्चतुर्दशतमोऽपूर्व: समाप्त: सुखम् ॥ ३१४ ॥

इति श्री लोकप्रकाशे चतुर्दश: सर्ग: समाप्त: ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

अथ पञ्चदशः सर्गः ।

उज्जिजीव जरासंघजराजर्जरितं जवात् । यतो यदुबलं सोऽस्तु, पीयूषप्रतिमः श्रिये ॥ १ ॥
तिर्यग्लोकस्य स्वरूपमथ किञ्चिद्वितन्यते । मया श्रीकीर्तिविजयार्णवप्राप्तश्रुतश्रिया ॥ २ ॥
तत्र च, तिर्यग्लोकवर्त्तिनोऽपि, योजनानां शता नव । घर्मापिण्डस्थिता आद्यास्तद्वर्णनप्रसंगतः ॥ ३ ॥
उक्ता अधोलोक एव, तत्रस्था व्यन्तरा अपि । रत्नप्रभोपरितलं, वर्णयाम्यथ तत्र च ॥ ४ ॥
सन्ति तिर्यगसंख्येयमाना द्वीपपयोधयः । सार्धोद्धाराम्भोधियुग्मसमयैः प्रमिताश्च ते ॥ ५ ॥
तत्र जम्बूद्वीपनामा, प्रथमो मध्यतः स्थितः । लवणाब्धिस्तमावेष्ट्यावस्थितो वलयाकृतिः ॥ ६ ॥
तमावेष्ट्य पुनर्द्वीपो, धातकीखण्डसंज्ञकः । तमप्यावेष्ट्य परितः, स्थितः कालोदवारिधिः ॥ ७ ॥
कक्षीकृत्य च कालोदं, पुष्करद्वीप आस्थितः । पुष्करद्वीपमावेष्ट्य, स्थितः पुष्करवारिधिः ॥ ८ ॥
एवमग्रेऽपि सकलाः, स्थिता द्वीपपयोधयः । परः पूर्वं समावेष्ट्याब्धयो द्वीपसमाभिधाः ॥ ९ ॥
ते चैवम्–
वारुणीवरनामा च, द्वीपोऽब्धिर्वारुणीवरः । वरुणवरेत्येषापि, श्रूयतेऽस्य श्रुतेऽभिधा ॥ १० ॥
ततः क्षीरवरो द्वीपः, क्षीरोदश्चास्य वारिधिः । ततो घृतवरो द्वीपो, घृतोदः पुनरम्बुधिः ॥ ११ ॥
तत इक्षुवरो द्वीप, इक्षुदश्च तदम्बुधिः । नन्दीश्वराभिधो द्वीपो, नन्दीश्वरोदवारिधिः ॥ १२ ॥
स्युस्त्रिप्रत्यवतारााणि, नामधेयान्यतः परम् । अरुणप्रभृतिद्वीपाब्धीनां तस्मात्तथा ब्रुवे ॥ १३ ॥
अरुणश्चारुणवरोऽरुणवरावभासकः । कुण्डलः कुण्डलवरस्तथा तदवभासकः ॥ १४ ॥
शङ्खः शङ्खवरः शङ्खवरावभास इत्यपि । रुचको रुचकवरस्तथा तदवभासकः ॥ १५ ॥
भुजगो भुजगवरस्तदवभासकोऽपि च । कुशः कुशवरश्चैव, कुशवरावभासकः ॥ १६ ॥
क्रौञ्चः क्रौञ्चवरः क्रौंचवरावभासकोऽपि च । एकविंशतिरित्येते, समनामाब्धिवेष्टिताः ॥ १७ ॥
एवं चामी असंख्यत्वान्नियतैर्नामभिः कथम् । शक्यन्ते वक्तुमित्यत्राम्नायो नाम्नां निरूप्यते ॥ १८ ॥
विभूषणानि वस्त्राणि, गन्धाः पद्मोत्पलानि च । तिलकानि निधानानि, रत्नानि सरितोऽद्रयः ॥ १९ ॥
पद्मादयो ह्रदाः कच्छाप्रमुखा विजया अपि । वक्षस्काराद्रयो वर्षधराश्च कुरुमन्दराः ॥ २० ॥
सौधर्मप्रमुखाः स्वर्गाः, शक्रादयः सुरेश्वराः । चन्द्रसूर्यग्रहरुक्षताराः कूटानि भूभृताम् ॥ २१ ॥
इत्यादि शस्तवस्तूनां, यानि नामानि विष्टपे । द्वीपाब्धयः स्युस्तैः सर्वे स्त्रिशः प्रत्यवतारितैः ॥ २२ ॥
एकैकेनाभिधानेनाभिधेयास्तेऽप्यसंख्यशः । यथा जम्बूद्वीपनाम्ना, द्वीपा परेऽप्यसंख्यशः ॥ २३ ॥
यावदेवं क्रमात् द्वीपं, सूर्यवरावभासकम् । परिवेष्ट्य स्थितः सूर्यवरावभासवारिधिः ॥ २४ ॥

ततश्चैकैकेन नाम्ना, न त्रिप्रत्यवतारणम् । देवद्वीपो देववार्द्धिः, नागद्वीपस्तदम्बुधिः ॥ २५ ॥
यक्षद्वीपो यक्षवार्धिर्भूतद्वीपस्तदम्बुधिः । स्वयंभूरमणद्वीपः, स्वयंभूरमणाम्बुधिः ॥ २६ ॥
जम्बूद्वीपादयश्चैते, स्थानद्विगुणविस्तृताः । सर्वे स्वयंभूरमणार्णवान्ता द्वीपवाद्धर्यः ॥ २७ ॥
जम्बूद्वीपाद्यथा सिन्धुः, लवणो द्विगुणस्ततः । धातकीखण्ड इत्येवमन्त्यात् द्वीपात् तदम्बुधिः ॥ २८ ॥
तत्रायं सर्वतः क्षुल्लः, सर्वाभ्यन्तरतः स्थितः । विष्वक् प्रतरवृत्तश्च, पूर्णेन्दुमण्डलाकृतिः ॥ २९ ॥
अस्य द्वीपस्याधिपतेरेकपल्योपमायुषः । महर्द्धिकानादृताख्यदेवस्याश्रयभूतया ॥ ३० ॥
जम्ब्या नानारत्नमय्या, वक्ष्यमाणस्वरूपया । सदोपलक्षितो द्वीपो, जम्बूद्वीप इति स्मृतः ॥ ३१ ॥
नित्यं कुसुमितैस्तत्र, तत्र देशे विराजते । वनैरनेकैर्जम्बूनां, जम्बूद्वीपस्ततोऽपि च ॥ ३२ ॥
विष्कम्भायामतश्चैष, लक्षयोजनसम्मितः । परितः परिधिस्त्वस्य, श्रूयतां यः श्रुते श्रुतः ॥ ३३ ॥
लक्षत्रयं योजनानां, सहस्राणि च षोडश । क्रोशास्त्रयस्त्रदधिकमष्टाविंशं धनुःशतम् ॥ ३४ ॥
त्रयोदशाङ्गुलास्सार्धा, यवाः पञ्चैकयूकिका । जम्बूद्वीपस्य गणितपदं वक्ष्येऽथ तत्त्वदः ॥ ३५ ॥
शतानि सप्त कोटीनां, नवतिः कोटयः पराः । लक्षाणि सप्तपञ्चाशत्, षट्सहस्रोनितानि च ॥ ३६ ॥
सार्धं शतं योजनानां, पादोनक्रोशयामलम् । धनूंषि पञ्चदश च, सार्धं करद्वयं तथा ॥ ३७ ॥

अयं भावः—

इयन्ति जम्बूद्वीपस्य, योजनप्रमितानि वै । चतुरस्राणि खण्डानि, स्युः क्रोशाद्यतिरिच्यते ॥ ३८ ॥
असौ सहस्राणि नवनवतिः स्यात्समुच्छ्रितः । साधिकानि योजनानामूर्ध्वाधश्च सहस्रकम् ॥ ३९ ॥
उद्वेधोच्छ्रययोगे तु, स्यादूर्ध्वाधः प्रमाणतः । जम्बूद्वीपो योजनानां, लक्षमेकं किलाधिकम् ॥ ४० ॥

आह—

जलाशयादौ शैलादौ, व्यवहारो हि सम्मतः । उद्वेधोच्चत्वयोर्जम्बूद्वीपे स तु कथं भवेत् ? ॥ ४१ ॥

अत्र ब्रूमः—

हीयमाना प्रतीच्यां भूर्घर्मायां समभूतलात् । सहस्रयोजनोण्डाऽन्ते, स्यात् क्रमाद्विजयद्वये ॥ ४२ ॥
तत्राधो लौकिकग्रामाः, सन्ति सर्वेषु तेषु च । द्वीपस्यास्य व्यवहारात्तावानुद्वेध उच्यते ॥ ४३ ॥
जम्बूद्वीपार्हतामेतत्सुमेरोः पाण्डुके वने । अभिषेकशिलोत्सङ्गेऽभिषेकः क्रियते यतः ॥ ४४ ॥
जम्बूद्वीपव्यवहारं, मेरौ संभाव्य सुष्ठु तत् । प्रज्ञप्तं तावदुच्चत्वं, जम्बूद्वीपस्य तात्त्विकैः ॥ ४५ ॥

तथाह जम्बूद्वीपप्रज्ञप्त्याम् – "एगं जोअणसहस्सं उव्वेहेणं ॥ णवणउतिजोअणसहस्साइं साइरेगाइं उड्ढं उच्चत्तेणं । साइरेगं जोअणसयसहस्सं सव्वग्गेणं पण्णत्ते ॥"

पृथ्व्यप्जीवपुद्गलात्मा, जम्बूद्वीपोऽस्ति वस्तुतः । पृथ्व्यप्जीवपुद्गलानां, परिणामो यदीदृशः ॥ ४६ ॥
शाश्वतोऽशाश्वतश्चायं, द्रव्यतस्तत्र शाश्वतः । वर्णगन्धरसस्पर्शपर्यायैः स्यादशाश्वतः ॥ ४७ ॥
अथास्य जम्बूद्वीपस्य, भाति वज्रमणीमयः । प्राकाररागमे ख्यातो, जगतीत्यपराख्यया ॥ ४८ ॥
धेनुपुच्छाकृतिः सोऽष्टौ, योजनानि समुच्छ्रितः । योजनानि द्वादशास्य, मूले विस्तार आहितः ॥ ४९ ॥
मूलादुत्पत्यते यावद्धनुःक्रोशादिकं किल । मूलव्यासस्तावतोनस्तत्र तत्रास्य जायते ॥ ५० ॥
मूलादूर्ध्वं कोशयुगे, व्यतीते तत्र विस्तृतिः । सार्धरुद्रयोजनानि, सर्वत्रैवं विभाव्यताम् ॥ ५१ ॥
एवं च मूलादुत्क्रान्ते, योजनानां चतुष्टये । मूलव्यासे चतुरूने, स्याद्विस्तारोऽष्टयोजनः ॥ ५२ ॥
तथास्य मूर्ध्नि पूर्णेषु, योजनेषु किलाष्टसु । मूलव्यासेऽष्टभिर्न्यूने, व्यासोऽब्धिमितयोजनः ॥ ५३ ॥
उक्तं जम्बूद्वीपमानं जगत्या मूलविस्तृतिः । भाव्यैवमखिलद्वीपपाथोधिजगतीष्वपि ॥ ५४ ॥
इत्यर्थतो वीरंजयसेहरक्षेत्रविचारवृत्तौ ॥
अथास्योपरिभागस्य, चतुर्योजनविस्तृतेः । मध्यदेशे सर्वरत्नमयी राजति वेदिका ॥ ५५ ॥
सोपरिष्टाद्विष्टरत्नमयी वज्रमयी त्वधः । वज्रस्तम्भस्वर्णरूप्यफलकैरुपशोभिता ॥ ५६ ॥
नरकिन्नरगन्धर्ववृषोरगाश्वहस्तिनाम् । रम्या नानाविधै रूपैर्भाति सातिमनोरमैः ॥ ५७ ॥
तथा तस्यां रत्नमय्यो, राजन्ते बहुवल्लयः । वासन्तीचम्पकाशोककुन्दातिमुक्तकादयः ॥ ५८ ॥
लताश्च ताः स्तबकिताः, पुष्पिताः पल्लवान्विताः । प्रणताः क्रीडदमरमिथुनप्रश्रयादिव ॥ ५९ ॥
परिक्षेपेण जगतीसमाना विस्तृता च सा । शतानि पञ्च धनुषामुत्तुङ्गा त्वर्धयोजनम् ॥ ६० ॥
स्थाने स्थाने सर्वरत्नमयपद्मोपशोभिता । पद्मप्राधान्यतो नाम्ना, सा पद्मवरवेदिका ॥ ६१ ॥
विभाति वनखण्डभ्यां, सा पद्मवरवेदिका । उभयोः पार्श्वयोः स्थूलकुलाभ्यामिव निम्नगा ॥ ६२ ॥
परिक्षेपेण जगतीतुल्यौ तौ वनखण्डकौ । सार्धचापशतद्वन्द्वन्यूनद्वियोजनाततौ ॥ ६३ ॥
एवं च-वेदिकाव्याससंयुक्ते विस्तारे वनयोर्द्वयोः । स्यात्पूर्णो जगतीव्यासो योजनानां चतुष्टयम् ॥ ६४ ॥
पुष्पितैः फलितैः शाखाप्रशाखाशतशालितैः । अनेकोत्तमजातीयवृक्षै रम्ये च ते वने ॥ ६५ ॥
विराजते च भूभाग एतयोर्वनखण्डयोः । मरुत्कीर्णपञ्चवर्णपुष्पप्रकरपूजितः ॥ ६६ ॥
कस्तुरिकैलाकर्पूरचन्दनाधिकसौरभैः । अनिलान्दोलनोद्भूतवीणादिजित्वरारवैः ॥ ६७ ॥
अत्यन्तकोमलैर्नानावर्णैर्वर्ण्यस्तृणाङ्कुरैः । रोमोद्गमैरिव भुवः सुरक्रीडासुखस्पृशः ॥ ६८ ॥
मरुत्कृतास्फालनेनोद्गिरद्भिः मधुरध्वनीन् । पञ्चवर्णैर्मणिभिरप्यसौऽऽकीर्णः सुगन्धिभिः ॥ ६९ ॥
नवरं विपिनेऽन्तःस्थे, न स्यात्तृणमणिध्वनिः । वेदिकोन्नत्तिरुद्धस्य, तादृग्वायोरसङ्गतेः ॥ ७० ॥
वनयोरेतयोश्चित्रकरयोः स्युः पदे पदे । पुष्करिण्यो दीर्घिकाश्च, महासरोवराणि च ॥ ७१ ॥

सुखोत्तारास्तपनीयतलाः सद्वज्रभित्तयः । नानारत्नबद्धतीर्थाः, सुवर्णरूप्यवालुकाः ॥ ७२ ॥
काश्चिज्जात्यासवरसा, काश्चिच्च वारुणीरसाः । सुधोपमजलाः काश्चित्, काश्चिदिक्षुरसोदकाः ॥ ७३ ॥
एवं नानास्वादजलाः, शतपत्रादिपङ्कजैः । मनोज्ञास्ताः पुष्करिण्यः, क्रीडाभिर्भाति नाकिनाम् ॥ ७४ ॥
स्पष्टाष्टमङ्गलैः छत्रचामरध्वजराजिभिः । त्रिसोपानान्यासु चतुर्दिशं राजन्ति तोरणैः ॥ ७५ ॥
भान्ति क्रीडासरांस्येवं, यथार्हं दीर्घिका अपि । चतुर्दिशं त्रिसोपानादिभिर्रत्नमणीमयैः ॥ ७६ ॥
रम्याः क्रीडापर्वताश्च, भान्ति तत्र पदे पदे । तेषां प्रत्येकमेकैकः, प्रासादो भाति मूर्धनि ॥ ७७ ॥
प्रतिप्रासादमेकैकं, मध्ये सज्जितमासनम् । अस्ति क्रौञ्चासनं क्वापि, हंसासनमपि क्वचित् ॥ ७८ ॥
पद्मासनं च गरुडासनं सिंहासनं क्वचित् । भद्रासनं च मकरासनं चातिमनोहरम् ॥ ७९ ॥
तथा—नानाक्रीडागृहाः सन्ति, तयोश्च वनखण्डयोः । क्वचित् प्रेक्षणकगृहं, क्वचिच्च केतकीगृहम् ॥ ८० ॥
लतागृहं गर्भगृहं, क्वचिच्च कदलीगृहम् । कुत्रचित् मज्जनगृहं, प्रसाधनगृहं क्वचित् ॥ ८१ ॥
प्रत्येकं च गृहेष्वेषु, विभात्येकैकमासनम् । क्रीडतां तत्र देवानां, योग्यं रत्नमणीमयम् ॥ ८२ ॥
तथा—मृद्विकामल्लिकाजातीमालत्यादिलतातते: । रत्नात्मनस्तत्र तत्र, भूयांसो भान्ति मण्डपाः ॥ ८३ ॥
मण्डपेषु तथैतेषु, जात्यकाञ्चननिर्मिताः । शिलानां पट्टकाः सन्ति, क्रौञ्चाद्यासनसंस्थिताः ॥ ८४ ॥
एतेषु पर्वतेष्वेषु, गृहेषु मण्डपेषु च । दीर्घिकादिषु च स्वैरं, क्रीडन्ति व्यन्तरामराः ॥ ८५ ॥
परितो जगती भाति, गवाक्षवलयेन सा । गवाक्षवलयं तच्च, गव्यूतद्वितयोच्छ्रितम् ॥ ८६ ॥
शतानि पञ्च धनुषां, विस्तीर्णं चारुचित्रितम् । कृतनेत्रमनोमोदं, सुराणां रमणोचितम् ॥ ८७ ॥
लवणोदसमासन्नजगतीभित्तिमध्यगम् । दृश्यमानाब्धिकुतुकं, ज्ञातव्यं सर्वतः स्थितम् ॥ ८८ ॥

अत्रेदं गवाक्षकटकं जम्बूद्वीपप्रज्ञप्तिवृत्तौ जगतीभित्तिमध्यगतमुक्तम् ॥ जम्बूद्वीपसंग्रहणीवृत्तौ जगत्या उपर्युक्तम् । तथा च तद्ग्रन्थः – "तस्या पार्श्वद्वयेऽपि द्वौ वनखंडौ वेदिकामानदैर्घ्यौ विद्येते । नवरं विस्तारेणाभ्यन्तरः सार्धधनुः शतद्वयोनयोजनयुग्मप्रमाणः । बाह्यस्तु वनखंडेऽर्धाष्टमधनुः शतहीनयोजनयुग्ममानः । यतस्तत्राभ्यन्तरात् वनखंडादधिकानि पञ्चधनुःशतानि जालकटकेनावरुद्धानि" ॥ परं श्रीमलयगिरिपादैः न तद्विवक्षितम् । द्वयोरपि वनखण्डयोरेकमेव मानमुक्तम् । तत्त्वं तु बहुश्रुता विदन्तीति ॥

सर्वे द्वीपाः समुद्राश्च, जगत्यैवं विराजिताः । सर्वासां जगतीनां च, स्वरूपमनया दिशा ॥ ८९ ॥
अथैतस्यां जगत्यां च, द्वाराणि स्युश्चतुर्दिशम् । विजयं वैजयन्तं च, जयन्तं चापराजितम् ॥ ९० ॥
सहस्रान् पञ्चचत्वारिंशतमुल्लंघ्य मेरुतः । योजनानां दिशि प्राच्यां, शीताकूलंकषोपरि ॥ ९१ ॥
विजयं द्वारमाख्यातमेवं वित्थ पराण्यपि । दक्षिणस्यां पश्चिमायामुदीच्यां च यथाक्रमम् ॥ ९२ ॥

प्रत्येकमेषां द्वाराणामुच्छ्रयो योजनाष्टकम् । वप्रभित्तिसमाना, हि युक्ता द्वारेषु तुङ्गता ॥ ९३ ॥
प्रत्येकं तेषु विस्तारो, योजनानां चतुष्टयी । क्रोशं पृथुर्द्वारशाखा, प्रत्येकं पार्श्वयोर्द्वयोः ॥ ९४ ॥
एवं सामस्त्यतो द्वारविस्तारो यदि भाव्यते । तदा सार्धानि चत्वारि, योजनानि भवेदसौ ॥ ९५ ॥
तत्रेदं विजयं भूमिप्रदेशे वज्रनिर्मितम् । भूमेरूर्द्ध्वं रिष्टरत्नमयमुक्तं जिनेश्वरैः ॥ ९६ ॥
स्तंभा सर्वत्र वैडूर्यवर्यरत्नविनिर्मिताः ॥ पञ्चवर्णैर्मणीरत्नैर्निर्मितं तत्र कुट्टिमम् ॥ ९७ ॥
हंसगर्भरत्नमयी, देहल्यथेन्द्रकीलकः । गोमेयरत्नघटितो, द्वारशाखे तथात्र च ॥ ९८ ॥
लोहितांख्यरत्नमय्यौ, परिघो वज्रनिर्मितः । कपाटे अपि वैडूर्यमये प्रोक्ते जिनेश्वरैः ॥ ९९ ॥
नानामणिमये तत्र, कपाटचूलिकागृहे । ज्योतीरसरत्नमयमुत्तरङ्गं निरूपितम् ॥ १०० ॥
विजयस्योपरितनो, भागो भाति विभूषितः । रत्नभेदैः षोडशभिस्ते चामी कथिताः श्रुते ॥ १०१ ॥
रत्नं वज्रं वैडूर्यलोहिताक्षे मसारगल्लं च । अपि हंसगर्भपुलके, सौगन्धिकमञ्जनं रजतम् ॥ १०२ ॥
ज्योतीरसमङ्काञ्जनपुलकं रिष्टं च जातरूपं च । स्फटिकं चैताः षोडश, रत्नभिदस्तत्र राजन्ते ॥ १०३ ॥
श्रीवत्समत्स्यदर्पणभद्रासनवर्द्धमानवरकलशाः । स्वस्तिकनन्दावर्त्तौ, द्वारोपरि मंगलान्यष्टौ ॥ १०४ ॥
द्वारस्यास्य वज्रमयो, माढभागः प्रकीर्त्तितः । माढस्य शिखरं शैष्यमुल्लोचस्तपनीयजः ॥ १०५ ॥
मणिवंशलोहिताक्षप्रतिवंशै रजतबद्धभूभागैः । द्वारं गवाक्षकटकैर्विराजते तत्समुद्रदिशि ॥ १०६ ॥
भित्तावुभयतो भित्तिगुलिकाः पीठसन्निभाः । अष्टषष्ट्याधिकं शतं, शय्यास्तावत्य एव च ॥ १०७ ॥
रत्नानि व्यालरूपाणि, मणिमय्यश्च पुत्रिकाः । अलङ्कुर्वन्ति तद्द्वारं, मणिदामादिभूषितम् ॥ १०८ ॥
तथा निषदनस्थानमेकैकं पार्श्वयोर्द्वयोः । तत्र द्वौ द्वौ च प्रत्येकं, माङ्गल्यकलशौ मतौ ॥ १०९ ॥
तथा द्वौ द्वौ नागदन्तौ, मुक्तादामाद्यलङ्कृतौ । तयोरूर्ध्वं पुनः द्वौ द्वौ, धूपघट्यन्वितौ च तौ ॥ ११० ॥
साक्षादिव स्वर्गिकन्ये, द्वे द्वे च शालभञ्जिके । द्वौ द्वौ च जालकटकौ, द्वे द्वे घण्टे शुभस्वरे ॥ १११ ॥
नानाद्रुकिसलाकीर्णे, द्वे द्वे च वनमालिके । भ्रमद्भ्रमरझंकारगीतारवमनोरमे ॥ ११२ ॥
आत्मदर्शाकृती द्वौ द्वौ, पीठौ प्रकण्ठकाभिधौ । तौ च द्वियोजनस्थूलौ, चतुर्योजनविस्तृतौ ॥ ११३ ॥
चत्वारि योजनान्युच्चो, योजनद्वयविस्तृतः । तेषु प्रत्येकमेकैकः, प्रासादोऽस्ति मनोरमः ॥ ११४ ॥
प्रासादास्ते तुङ्गशृङ्ग, ध्वजच्छत्रमनोहराः । सिंहासनैः सविजयदूष्यैर्विराजितान्तराः ॥ ११५ ॥
आस्थानस्थानयोः किंच, द्वे द्वे स्तस्तोरणे तयोः । तोरणानां पुरः शालभञ्जिकानां द्वयं द्वयम् ॥ ११६ ॥
तथा च – द्वौ नागदन्तावश्वेभनरकिंपुरुषाङ्गिनाम् । किन्नरोरगगन्धर्ववृषभाणां युगानि च ॥ ११७ ॥
वीथयः षड्क्रुयश्चैषां, नित्यं कुसुमिता लताः । पद्मनागाशोकलताश्चम्पकाम्रादयोऽपि च ॥ ११८ ॥
मांगल्यकलशा भृङ्गारकास्तथात्मदर्शकाः । स्थालानि साक्षतानीव, पात्र्यः फलभृता इव ॥ ११९ ॥

सर्वौषधिप्रसाधनभाण्डभृताः सुप्रतिष्ठकाश्चैव । पीठात्ममनोगुलिका, युताः फलकनागदन्ताद्यैः ॥ १२० ॥
रात्नाः करण्डका रात्ना, हयकण्ठादयोऽष्ट च । चङ्गेर्यस्तेष्वष्टविधाः, पटलान्यपि चाष्टधा ॥ १२१ ॥
तथाहि, पुष्पैर्माल्यैश्चूर्णगन्धैर्वस्त्रसिद्धार्थभूषणैः । लोमहस्तैश्च सम्पूर्णाश्चङ्गेर्यः पटलानि च ॥ १२२ ॥
सिंहासनातपत्रे, चमराणि समुद्गकाश्च दशभेदाः । प्रतितोरणमेतेषां, द्वयं द्वयं भवति सर्वेषाम् ॥ १२३ ॥

समुद्गकसङ्ग्रहगाथा चेयम् — तेल्ले कोट्ठसमुग्गे, पत्ते चोए य तगर एला य । हरिआले हिंगुलए, मणोसिला अंजणसमुग्गे ॥

तथात्र विजयद्वारे, शतमष्टाधिकं ध्वजाः । प्रत्येकं चक्रादिचिह्ना, दशधा ते त्वमी मताः ॥ १२४ ॥
चक्रमृगगरुडसिंहाः, पिच्छवृकच्छत्रवर्यहर्यक्षाः । वृषभचतुर्दन्तगजाः, सर्वेऽशीत्यन्वितसहस्रम् ॥ १२५ ॥
विशिष्टस्थानरूपाणि, भौमानि नव संख्यया । विजयद्वारस्य पुरः, स्युर्भोग्यानि तदीशितुः ॥ १२६ ॥

तथाहुः जीवाभिगमे – "विजयस्स णं दारस्स पुरओ नव भोमा पण्णत्ता" । इत्यादि ॥ समवायाङ्गे तु "विजयस्स णं दारस्स एगमेगाए बाहाए नव नव भोमा पण्णत्ता" इति दृश्यते, तदत्र तत्त्वं सर्वविद्वेद्यम् ॥

मध्ये च तेषां भौमानां, पञ्चमे सपरिच्छदम् । सिंहासनमधीशस्यान्येषु भद्रासनानि च ॥ १२७ ॥
इत्येवं विजयद्वारं, लेशतो वर्णितं मया । तृतीयोपाङ्गमालोक्यं, विशेषविस्तरार्थिभिः ॥ १२८ ॥
यो योऽस्याधिपतिर्देवस्तं तं सामानिकादयः । आह्वयन्ति विजयेति, पुस्तकेषु तथोक्तितः ॥ १२९ ॥
तदिदं विजयस्वामियोगाद्विजयनामकम् । अथवामुष्य नामेदं, त्रैकालिकं च शाश्वतम् ॥ १३० ॥
एवं क्षेत्रद्वीपवार्धिनामानि स्युर्यथायथम् । नित्यानि स्वामियोगस्तु, यथास्थानं प्रवक्ष्यते ॥ १३१ ॥
यथेदं विजयद्वारं तथा त्रीण्यपराण्यपि । समरूपाणि किन्त्वीशा, द्वारतुल्याभिधाः सुराः ॥ १३२ ॥
वैजयन्तो जयन्तश्चापराजित इति क्रमात् । चत्वार्येषां सहस्राणि, सामानिकसुधाभुजाम् ॥ १३३ ॥
सहस्राणि च देवानामष्टाभ्यन्तरपर्षदि । देवानामयुतं मध्यपर्षदि स्फातिशालिनाम् ॥ १३४ ॥
स्युः द्वादशसहस्राणि, देवानां बाह्यपर्षदि । चतस्रोऽग्रमहिष्यश्च, स्युः साहस्रपरिच्छदाः ॥ १३५ ॥
सेनाः सेनान्यश्च सप्त, पूर्वोक्तव्यन्तरेन्द्रवत् । आत्मरक्षकदेवानां, सहस्राणि च षोडश ॥ १३६ ॥
प्रत्येकमेवं विजयप्रमुखाणां परिच्छदः । सर्वेऽपि विजयाद्यास्ते, तुल्याः पल्यायुषः स्मृताः ॥ १३७ ॥
पूर्वोक्तानां निजनिजनगरीवासिनां च ते । व्यन्तराणां व्यन्तरीणामैश्वर्यमुपभुञ्जते ॥ १३८ ॥
एवं द्वाराणि चत्वारि, सर्वासु जगतीष्वपि । तत्र जम्बूद्वीपसत्कविजयद्वारनाकिनः ॥ १३९ ॥
विजयद्वारतः प्राच्यां, दिशि तिर्यगसंख्यकान् । द्वीपाब्धीन् समतिक्रम्य, जम्बूद्वीपेऽस्त्यथापरे ॥ १४० ॥
योजनानां सहस्राणि, द्वादशायतविस्तृता । राजधानी परिक्षेपस्तस्याश्चैवमुदीरितः ॥ १४१ ॥

सप्तत्रिंशत्सहस्राणि, योजनानां शतानि च । नवैव सप्तचत्वारिंशत् किञ्चिदधिकान्यपि ॥ १४२ ॥
वप्रो रत्नमयस्तस्या, राजधान्या विराजते । सप्तत्रिंशद्योजनानि, सार्द्धानि स समुच्छ्रितः ॥ १४३ ॥

तथोक्तं जीवाभिगमे – "से पागारे सत्ततीसं जोअणाइं अद्धजोअणं च उड्ढं उच्चत्तेणं" ॥
श्रीसमवायाङ्गे तु "सव्वासु णं विजयवेजयंतजयंतअपराजिआसु रायहाणीसु पागारा सत्ततीसं जोअणाइं उड्ढं उच्चत्तेणं पण्णत्ता" इत्युक्तम् ॥

मूले च विस्तृतः सोऽयं, सार्द्धां द्वादशयोजनीम् । मध्ये च विस्तृतः क्रोशाधिकानि योजनानि षट् ॥ १४४ ॥
अर्धक्रोशाधिकं मौलौ, विस्तृतो योजनत्रयम् । असौ नानारत्नमयैः, कलितः कपिशीर्षकैः ॥ १४५ ॥
अर्धक्रोशमितायामं, क्रोशतुर्यांशविस्तृतम् । देशोनार्धक्रोशतुङ्गमेकैकं कपिशीर्षकम् ॥ १४६ ॥
वप्रस्य तस्यैकैकस्यां, बाहायां जिनपुङ्गवैः । पञ्चविंशं पञ्चविंशं, द्वाराणां शतमीक्षितम् ॥ १४७ ॥
शतानि पञ्च द्वाराणामेवं स्युः सर्वसंख्यया । विजयद्वारवत् सर्वमेषां वर्णनमीरितम् ॥ १४८ ॥
किन्त्वियान् विशेषः —
द्वाषष्टिं योजनान्युच्चं, साधानि द्वारमेककम् । योजनानि सपादान्येकत्रिंशतं च विस्तृतम् ॥ १४९ ॥
ये च प्रकण्ठकाख्ये पीठे तत्रोदिते तयोरिह तु । पञ्चदशयोजनानि च, सार्धौ क्रोशौ च तुङ्गत्वम् ॥ १५० ॥
एकत्रिंशद्योजनानि, क्रोशश्चायतिविस्तृती । प्रत्येकमेषामुपरि, स्युः प्रासादावतंसकाः ॥ १५१ ॥
एकत्रिंशद्योजनानि, सक्रोशानि समुच्छ्रिताः । उच्छ्रयार्धेन ते सर्वे, प्रासादा विस्तृतायताः ॥ १५२ ॥
द्वारस्यैकैकस्य नातिदूरासन्ने भुवस्तले । सप्तदश सप्तदश, भौमाः प्रासादशेखराः ॥ १५३ ॥
तेषां मध्ये नवमे नवमे, सिंहासनं विजयमरुतः । सामानिकादिसुरगणभद्रासनपरिवृतं भाति ॥ १५४ ॥
अष्टस्वष्टसु भौमेषु, स्थितेषूभयतस्ततः । अस्ति प्रत्येकमेकैकं, रत्नभद्रासनं महत् ॥ १५५ ॥
तथा तस्या राजधान्या, बहिर्दिक्षु चतसृषु । योजनानां पञ्चशत्याः, पुरतो वनमेककम् ॥ १५६ ॥
प्राच्यामशोकविपिनमपाच्यां साप्तपर्णिकम् । प्रतीच्यां चम्पकवनमुदक् चूतवनं क्रमात् ॥ १५७ ॥
सहस्राणि योजनानां, द्वादशायामतोऽथ ते । स्युः पञ्चशतविष्कम्भा, वनखण्डाः पृथक् पृथक् ॥ १५८ ॥
प्रत्येकं वप्रवलयपरिक्षिप्ताः समन्ततः । मध्ये तेषां तथैकैकः, स्यात् प्रासादावतंसकः ॥ १५९ ॥
द्वाषष्टिं योजनान्यर्द्धाधिकानि ते समुन्नताः । योजनान्येकत्रिंशत्, सक्रोशानि च विस्तृताः ॥ १६० ॥
प्रत्येकं रत्नघटितसिंहासनविभूषिताः । पल्योपमायुरेकैकनिर्जराधिष्ठिता अपि ॥ १६१ ॥
मध्येऽथास्या राजधान्या, भूमिभागे मनोहरे । शुद्धजाम्बूनदमयः, पीठबन्धो विराजते ॥ १६२ ॥
योजनानां शतान्येष, द्वादशायतविस्तृतः । क्रोशार्द्धमेदुरः पद्मवेदिकावनवेष्टितः ॥ १६३ ॥
त्रिसोपानकमेकैकं, द्वारं चारु विराजते । मणीमयं तोरणेन, तत्र दिक्षु चतसृषु ॥ १६४ ॥

मध्येऽस्य पीठबन्धस्य, भूमिभागेऽस्ति बन्धुरे । महानेकस्तपनीयमयः प्रासादशेखरः ॥ १६५ ॥
द्वाषष्टिं योजनान्यर्द्धाधिकानि स समुन्नतः । उच्चत्वस्यार्द्धमानेन, भवत्यायतविस्तृतः ॥ १६६ ॥
तस्य प्रासादस्य मध्ये, महती मणिपीठिका । सा द्विगव्यूतबाहल्या, योजनं विस्तृतायता ॥ १६७ ॥
तस्या मणिपीठिकाया, मध्ये सिंहासनं महत् । वृतं विजयदेवार्हं, सामानिकादिकासनैः ॥ १६८ ॥
तच्चैवम् – मूलसिंहासनाद्वायूत्तरेशानदिशां त्रये । सामानिकानां चत्वारि, सहस्राण्यासनानि वै ॥ १६९ ॥
प्राच्यामग्रमहिषीणामासनानि चतसृणाम् । चत्वार्येवातिचतुरपरिवारसुरीजुषाम् ॥ १७० ॥
मूलसिंहासनादग्निकोणेऽभ्यन्तरपर्षदः । भद्रासनसहस्राणि, भवन्त्यष्टौ सुधाभुजाम् ॥ १७१ ॥
दक्षिणास्यां दिशि तथा, भान्ति मध्यमपर्षदः । दशासनसहस्राणि, तावताममृताशिनाम् ॥ १७२ ॥
भद्रासनानि नैर्ऋत्यां, बाह्यपर्षत्सुधाभुजाम् । स्युर्द्वादशसहस्राणि, पश्चिमायामथो दिशि ॥ १७३ ॥
सेनापतीनां सप्तानां, सप्त भद्रासनानि च । ततः परं परिक्षेपे, द्वितीयस्मिंश्चतुर्दिशम् ॥ १७४ ॥
चत्वारि चत्वारि सहस्राणि भान्ति चतुर्दिशम् । आत्मरक्षकदेवानां, सहस्राणीति षोडश ॥ १७५ ॥
स चैष मूलप्रासादश्चतुःप्रासादवेष्टितः । उच्चत्वायामविष्कम्भैस्तेऽर्धमानाश्च मौलतः ॥ १७६ ॥
प्रासादास्तेऽपि चत्वारः, चतुर्भिरपरैरपि । स्वप्रमाणादर्द्धमानैः, प्रत्येकं परितो वृताः ॥ १७७ ॥
परिवारपरीवारभूता एते च मौलतः । चतुर्थभागमानेन, प्रोत्तुङ्गायविस्तृताः ॥ १७८ ॥
एतेऽपि च स्वार्द्धमानैश्चतुर्भिरपरैर्वृताः । चतुर्दिशं स्युरित्येवं, प्रत्येकमेकविंशतिः ॥ १७९ ॥
परिवारपरीवारपरीवारास्तु मौलतः । विष्कम्भायामतुङ्गत्वैरष्टमांशमिता मताः ॥ १८० ॥
पञ्चाशीतिरमी सर्वे, जीवाभिगमपुस्तके । वृत्तौ तु तुर्या प्रासादपरिपाटी निरीक्ष्यते ॥ १८१ ॥
तथा हि – परिवारपरिवारपरीवारा अपि स्फुटम् । चतुर्भिरपरैर्मौलात्, षोडशांशमितैर्वृताः ॥ १८२ ॥
तदैकैकस्यां दिशायां, पञ्चाशीतिर्भवन्त्यतः । शतानि त्रीण्येकचत्वारिंशानि सर्वसंख्यया ॥ १८३ ॥
विना च मूलप्रासादं, सर्वेऽप्येते विभूषिताः । एकैकेनैव विजययोग्यसिंहासनेन च ॥ १८४ ॥
अथास्त्युत्तरपूर्वस्यां, मूलप्रासादतः सभा । सुधर्मा नाम सततदिव्यनाट्याप्सरोभृता ॥ १८५ ॥
योजनानि द्वादशैषा, सार्द्धान्यायामतो मता । सक्रोशानि योजानानि, षड् विष्कम्भत ईरिता ॥ १८६ ॥
योजनानि नवोत्तुङ्गा द्वारैस्त्रिभिरलङ्कृता । प्राच्यामुदीच्यां चापाच्यामेकैकमथ तान्यपि ॥ १८७ ॥
द्वे योजने उच्छ्रितानि, योजनं विस्तृतानि च । तेषां पुरस्तादेकैकः, प्रत्येकं मुखमण्डपः ॥ १८८ ॥
तेऽप्युत्तप्ततपनीयचन्द्रोदयविराजिताः । सातिरेके योजने द्वे, समुत्तुङ्गा मनोरमाः ॥ १८९ ॥
ते सुधर्मासभातुल्या, विष्कम्भायामतः पुनः । तेषां पुरस्तादेकैकः, स्यात्प्रेक्षागृहमण्डपः ॥ १९० ॥
मुखमण्डपतुल्यास्ते, प्रमाणैः सर्वतो मताः । प्रत्येकं तेष्वक्षपाटश्चतुरस्राकृतिः स्मृतः ॥ १९१ ॥

मध्ये चाक्षपाटकानामेकैका मणिपीठिका । अर्धयोजनबाहल्या, योजनं विस्तृतायता ॥ १९२ ॥
तासां प्रत्येकमुपरि, सिंहासनमुरु स्फुरत् । तेषां प्रेक्षामण्डपानां, पुरतोऽथ प्रकीर्त्तिता ॥ १९३ ॥
एकयोजनबाहल्या, द्वे च ते विस्तृतायता । रचिता विविधैरत्नैरेकैका मणिपीठिका ॥ १९४ ॥
क्षेत्रसमासबृहद्वृत्तौ त्वियं द्वियोजनायामविष्कम्भबाहल्या उक्ता ॥
साधिके योजने तुङ्गस्तूपस्तदुपरि स्मृतः । देशोने च योजने द्वे, प्रत्येकं विस्तृतायतः ॥ १९५ ॥
क्षेत्रसमासबृहद्वृत्तौ तु अयं देशोनद्वियोजनायामविष्कम्भः परिपूर्णद्वियोजनोच्च उक्तः ॥
तेषां च चैत्यस्तूपानामुपर्यातन्वते श्रियम् । रात्नानि मंगलान्यष्टौ, चैत्यस्तूपपुरः पुनः ॥ १९६ ॥
योजनायामविष्कम्भा, भवेद्दिक्षु चतसृषु । अर्धयोजनबाहल्या, प्रत्येकं मणिपीठिका ॥ १९७ ॥
तासु प्रत्येकमेकैका, जिनमूर्तिर्विराजते । पञ्चचापशतोत्तुङ्ग, शाश्वती स्तूपसंमुखी ॥ १९८ ॥
तथोक्तं जीवाभिगमवृत्तौ – "जिनोत्सेध उत्कर्षतः पञ्चधनुःशतानि, जघन्यतः सप्तहस्ताः, ।
इह तु पञ्चधनुःशतानि संभाव्यन्ते" ॥
ऋषभो वर्द्धमानश्च, चन्द्राननजिनेश्वरः । वारिषेणश्चेति नित्यनामानो नाकिभिर्नुताः ॥ १९९ ॥
पुरस्तासां पीठिकानामेकैका मणिपीठिका । स्थूलैकयोजनं द्वे च, योजने विस्तृतायता ॥ २०० ॥
तासां प्रत्येकमुपरि, स्यादष्टयोजनोच्छ्रयः । चैत्यवृक्षः ते च सर्वे, नानातरुभिरावृताः ॥ २०१ ॥
वज्रमूलारिष्टकन्दा, वैडूर्यस्कन्धबन्धुराः । सद्रूप्यविडिमाः स्वर्णशाखा रत्नप्रशाखकाः ॥ २०२ ॥
सुवर्णवृन्तवैडूर्यमयपत्रमनोहराः । जम्बूनदपल्लवाश्च, रात्नैः पुष्पफलैर्भृताः ॥ २०३ ॥
अत्र स्कन्धविडिमादिमानं तु वक्ष्यमाणजम्बूवृक्षवद् ज्ञेयम् ॥
तेषां च चैत्यवृक्षाणां, पुरतो मणिपीठिका । योजनायामविष्कम्भा, योजनार्द्धं च मेदुरा ॥ २०४ ॥
महेन्द्रध्वजमेकैकस्तास्वर्द्धक्रोशविस्तृतः । सार्द्धसप्तयोजनोच्चः, पताकाछत्रमण्डितः ॥ २०५ ॥
इदं जीवाभिगमसूत्रवृत्तौ ॥ क्षेत्रसमासबृहद्वृत्तौ तु "ते महेन्द्रध्वजाः प्रत्येकमष्टयोजनोच्छ्रयाः"
इत्युक्तम् ॥
तेषां महेन्द्रध्वजानां, पुरः प्रत्येकमेकिका । नन्दापुष्करिणी पद्मवेदिकावनवेष्टिता ॥ २०६ ॥
योजनानि दशोण्डास्ताः, सार्द्धां द्वादशयोजनीम् । आयताः षड् योजनानि, क्रोशाधिकानि विस्तृताः ॥ २०७ ॥
एवं सुधर्मसभाया, बहिर्भागो निरूपितः । अथैतस्या मध्यभागो, यथाम्नायं निरूप्यते ॥ २०८ ॥
तस्यां सुधर्मासभायां, षट्सहस्राणि पीठिकाः । द्वे सहस्रे दिशि प्राच्यां, पश्चिमायां तथैव च ॥ २०९ ॥
दक्षिणस्यामुत्तरस्यां, तासां सहस्रमेककम् । ताः सर्वा अपि रैरूप्यफलकैः खचिता ध्रुवम् ॥ २१० ॥
नागदन्ता वज्रमयाः, फलकेष्वथ तेष्वपि । सुगन्धिपुष्पदामानि, लम्बमानान्यनेकशः ॥ २११ ॥

सुधर्मायां सभायां च, स्युर्धूपवासपीठिकाः । षट् सहस्राणि ताः प्राग्वत्, भावनीया यथाक्रमम् ॥ २१२ ॥
एता अपि स्वर्णरूप्यफलकैरुपशोभिताः । फलकेषु लसद्वज्रनागदन्ता अमीषु च ॥ २१३ ॥
वाज्रिकानि सिक्थकानि, सिक्थकेषु च वज्रजाः । उद्गिरन्त्यो धूपघट्यो, धूपधूपमहर्निशम् ॥ २१४ ॥
तथैतस्याः सुधर्माया, मध्येऽस्ति मणिपीठिका । योजनद्वयविष्कम्भायामा योजनमेदुरा ॥ २१५ ॥
चैत्यस्तंभ उपर्यस्या, महान् माणवकाभिधः । सार्द्धसप्तयोजनोच्चः, क्रोशार्द्धस्थूलविस्तृतः ॥ २१६ ॥
उपर्यधस्त्वसौ स्तंभः, षट् षट् क्रोशान् विहाय च । मध्यांशेऽष्टादशक्रोशे, रैरूप्यफलकाञ्चितः ॥ २१७ ॥
प्राग्वत्तेषु नागादन्ता, निरुद्धा वज्रसिक्थकैः । तेषु वज्रसिक्थकेषु, वृत्ता वज्रसमुद्गकाः ॥ २१८ ॥
तेषु वज्रसमुद्गेषु, जिनसक्थीनि सन्ति च । विजयस्वर्गिणान्यैश्चार्चितानि व्यन्तरामरैः ॥ २१९ ॥

पूज्यत्वमेषां सक्थ्नां तु, तादृग्महिमयोगतः । यदेतत्क्षालनजलं, सुराणामपि दोषहृत् ॥ तथोक्तं श्राद्धविधिवृत्तौ – नव्योत्पन्नतया तर्हि, सौधर्मेशानशक्रयोः । विवादोऽभूद्विमानार्थं, हर्म्यार्थमिव हर्म्यिणोः ॥ तयोरिवोर्वीश्वरयोर्विमानविप्रलुब्धयोः । नियुद्धादिमहायुद्धान्यप्यभूवन्ननेकशः ॥ निवार्यते हि कलहस्तिरश्चां तरसा नरैः । नराणां च नराधीशैर्नराधीशां सुरैः क्वचित् ॥ सुराणां च सुराधीशैः, सुराधीशां पुनः कथम् । केन वा स निवार्येत ?, वज्राग्निरिव दुःशमः ॥ माणवकाख्यस्तंभ-स्थार्हद्दंष्ट्राशान्तिवारिणा । साधिव्याधिमहादोषमहावैरनिवारिणा ॥ कियत्कालव्यतिक्रान्तौ, सिक्तौ महत्तरैः सुरैः । बभूवतुः प्रशान्तौ तौ, किंवा सिद्ध्येन्न तज्जलात् ॥ [प्र. १ गा. ८ श्लो. ७१०, ७१२ थी ७१६]

स्तंभस्य तस्य पूर्वस्यामस्त्येका मणिपीठिका । अर्द्धयोजनबाहल्या, योजनायतविस्तृता ॥ २२० ॥
उपर्यस्या महदेकं, सिंहासनमनुत्तरम् । स्तंभस्यास्य पश्चिमायां, तथान्या मणिपीठिका ॥ २२१ ॥
सापि योजनविष्कम्भायामा द्विक्रोशमेदुरा । उपरि स्वर्णमाणिक्यशयनीयमनोहरा ॥ २२२ ॥
तल्पादुदीच्यां क्षुल्लेन्द्रध्वजः पूर्वोक्तकेतुवत् । मानतोऽस्मात् पश्चिमायां, कोशः प्रहरणैर्भृतः ॥ २२३ ॥
तस्मिन्परिघरत्नादि, नानाप्रहरणानि च । किञ्चिदेवं सुधर्मायाः, स्वरुपमुपवर्णितम् ॥ २२४ ॥
अस्याश्चोत्तरपूर्वस्यां, सिद्धायतनमुत्तमम् । आयामादिप्रमाणेन, तत् सुधर्मासभासमम् ॥ २२५ ॥
तस्य मध्यदेशभागे, एकयोजनमेदुरा । भाति द्वियोजनायामविष्कम्भा मणिपीठिका ॥ २२६ ॥
उपर्यस्या रत्नमयोऽधिकद्वियोजनोन्नतः । द्वियोजनाययततो, देवच्छन्दक आहितः ॥ २२७ ॥

इदं श्रीजीवाभिगमवृत्तौ, क्षेत्रसमासबृहद्वृत्तौ तु असौ द्वियोजन-प्रमाणविष्कम्भोच्चत्व उक्तः ॥

तस्मिन् देवच्छन्दके च, सुरासुरनमस्कृतम् । जयत्यर्हत्प्रतिमानां, शतमष्टोत्तरं किल ॥ २२८ ॥
तस्य सिद्धायतनस्य, विभात्युत्तरपूर्वतः । उपपातसभा सापि, सुधर्मेव प्रमाणतः ॥ २२९ ॥
अर्धयोजनबाहल्या, योजनायतविस्तृता । तस्यां मणीपीठिकाऽच्छा, दिव्यशय्यास्ति तत्र च ॥ २३० ॥
तस्यां विजयदेवस्योपपातो बोभवीत्यथ । अस्या उत्तरपूर्वस्यां, दिशि चैको महाह्रदः ॥ २३१ ॥

नन्दापुष्करिणीतुल्यो, विष्कम्भोद्वेधदैर्ध्यतः । वेष्टितो वनखण्डेन, पद्मवेदिकयापि च ॥ २३२ ॥
ह्रदस्योत्तरपूर्वस्यामभिषेकसभाऽत्र च । सिंहासनपीठिकायां, विजयोऽत्राभिषिच्यते ॥ २३३ ॥
इतोऽप्युत्तरपूर्वस्यां, ससिंहासनपीठिका । अलङ्कारसभा तत्र, भूष्यते विजयामरः ॥ २३४ ॥
अस्या उत्तरपूर्वस्यां, व्यवसायसभाऽत्र च । सिंहासनपीठिकायां, विजयस्य च पुस्तकः ॥ २३५ ॥
स्वर्णरूप्यमणिमयः, समस्तस्थितिसूचकः । सपीठिके सभे चैते, उपपातसभासमे ॥ २३६ ॥
व्यवसायसभायाश्च, वर्वर्त्युत्तरपूर्वतः । द्वियोजनमितायामव्यासयोजनमेदुरम् ॥ २३७ ॥
बलिपीठं रत्नमयं, तस्याप्युत्तरपूर्वतः । नन्दापुष्करिणी प्रोक्तह्रदमाना विराजते ॥ २३८ ॥
यथा चैवं विजयस्य नगरी विजयाभिधा । तथा स्याद्वैजयन्तस्य, वैजयन्त्यभिधा पुरी ॥ २३९ ॥
वैजयन्ताभिधद्वाराद्, दक्षिणस्यामसंख्यकान् । द्वीपाब्धीन् समतिक्रम्य, जम्बूद्वीपे इहैव हि ॥ २४० ॥
जयन्तस्यापि साऽत्रैव, द्वीपे तद्द्वारतो दिशि । पश्चिमायामसंख्येयद्वीपाब्धिनामतिक्रमे ॥ २४१ ॥
अपराजितदेवस्योत्तरस्यामपराजितात् । द्वारादसंख्यद्वीपाब्धीन्, मुक्त्वा द्वीप इहैव सा ॥ २४२ ॥
एताः सर्वा राजधान्योऽवगाह्य द्वीपमेतकम् । सहस्राणि योजनानां, द्वादशाभ्यन्तरे स्थिताः ॥ २४३ ॥
एवं सर्वद्वीपवार्द्धिजगतीद्वारनाकिनां । पुर्यः स्वस्वद्वीपवार्द्धितुल्याख्यद्वीपवार्द्धिषु ॥ २४४ ॥
अथास्य जम्बूद्वीपस्य, द्वाराणामन्तरं मिथः । द्वारविस्ताररहितपरिधेः पादसंमितम् ॥ २४५ ॥
अर्धपञ्चमविस्तारं, द्वारमेकैकमग्रतः । अष्टादशयोजनानि, तैरूनं परिधिं कुरु ॥ २४६ ॥
३१६२०९ योजन ३ क्रोश १२८ धनुष्य १३ अङ्गुल ॥
तस्य तुर्यांश एकोनाशीतिः खलु सहस्रकाः । योजनानि द्विपञ्चाशत्, क्रोशश्चैकस्तथाधिकः ॥ २४७ ॥
सार्द्धं सहस्रं धनुषां, द्वात्रिंशच्चापसंयुतम् । त्रीण्यङ्गुलानि त्रियवी, यूके द्वे साधिके इति ॥ २४८ ॥
७९०५२ क्रोश १ धनुः १५३२ अङ्गुल ३ यव ३ युका २ ॥
इत्यस्य जम्बूद्वीपस्य, बहिर्भागो निरूपितः । अथैतस्य मध्यभागो, यथाम्नायं निरूप्यते ॥ २४९ ॥
क्षेत्राणि सप्त सन्त्यस्य, जम्बूद्वीपस्य मध्यतः । एकैकेन पर्वतेनान्तरितानि परस्परम् ॥ २५० ॥
प्रथमं भरतक्षेत्रं, परं हैमवताभिधम् । तृतीयं हरिवर्षाख्यं, तुर्यं महाविदेहकम् ॥ २५१ ॥
पञ्चमं रम्यकं षष्ठं, हैरण्यवतमीरितम् । ऐरावतं सप्तमं चान्तरामूनि नगा इमे ॥ २५२ ॥
आद्यद्वितीययोर्मध्ये, हिमवान्नाम पर्वतः । महाहिमवदद्रिश्च, द्वैतीयिकतृतीययोः ॥ २५३ ॥
तृतीयतुर्ययोरन्तर्निषधो नाम सानुमान् । तुर्यपञ्चमयोर्नीलवान्नगः सीमकारकः ॥ २५४ ॥
रूप्यी शैलः क्षेत्रयोः स्यात्, मध्ये पञ्चमषष्ठयोः । षष्ठसप्तमयोश्चैव, शिखरी भूधरोऽन्तरे ॥ २५५ ॥

वर्षवर्षधरनाममात्रतो, द्वीप एष कथितो यदोघतः ।
तद्विशेषविधिवर्णनेच्छयो-द्देश एव विहितोऽवसीयताम् ॥ २५६ ॥
विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिष-द्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्वप्रदीपोपमे सर्गः पञ्चदशः समाप्तिमगमत् सिद्धान्तसारोज्ज्वलः ॥ २५७ ॥
इति लोकप्रकाशे पञ्चदशः सर्गः समाप्तः ।

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

अथ षोडशः सर्गः ।

द्वीपस्यास्याथ पर्यन्ते, स्थितं दक्षिणगामिनि । नानावस्थं कालचक्रैर्भरतं क्षेत्रमीरितम् ॥ १ ॥
अधिज्यधनुराकारं, स्पृष्टां तच्च पयोधिना । पूर्वपश्चिमयोः कोट्योः, पृष्टभागे च सर्वतः ॥ २ ॥
यो योऽत्रोपद्यते क्षेत्रेऽधिष्ठाता पल्यजीवितः । तमाह्वयन्ति भरतं, तस्य सामानिकादयः ॥ ३ ॥
कल्पस्थितिपुस्तकेषु, तथालिखितदर्शनात् । तत्स्वामिकत्वात् भरतं, किंचेदं नाम शाश्वतम् ॥ ४ ॥
अत्र क्षेत्रादिप्रमाणं, षोढा विष्कम्भतस्तथा । इषुजीवाधनुःपृष्टाबाहाक्षेत्रफलैः ब्रुवे ॥ ५ ॥
तत्र विष्कम्भः प्रतीतः । शेषाणां त्विमानि लक्षणानि ॥
विवक्षितस्य क्षेत्रस्य, जीवाया मध्यभागतः । विष्कम्भो योऽर्णवं यावत्, स इषुः परिभाषितः ॥ ६ ॥
विवक्षितस्य क्षेत्रस्य, पूर्वापरान्तगोचरः । आयामः परमो योऽत्र, सा जीवेत्यभिधीयते ॥ ७ ॥
विवक्षितक्षेत्रजीवापूर्वापरान्तसीमया । योऽब्धिस्पर्शी परिक्षेपो, धनुःपृष्ठं तदूचिरे ॥ ८ ॥
पूर्वक्षेत्रधनुःपृष्ठाद्धनुःपृष्ठेऽग्रिमेऽधिकम् । खण्डं वक्रबाहुवद्यत्सा बाहेत्यभिधीयते ॥ ९ ॥
विवक्षितस्य क्षेत्रस्य, यानि योजनमात्रया । खण्डानि सर्वक्षेत्रस्य, तत् क्षेत्रफलमुच्यते ॥ १० ॥
उच्चत्वस्यापि यन्मानं, सर्वतो योजनादिभिः । एतत् घनक्षेत्रफलं, पर्वतेष्वेव सम्भवेत् ॥ ११ ॥
छिन्नस्यैकोनविंशत्या, विभागो योजनस्य यः । सा कला ताभिरेकोनविंशत्या पूर्णयोजनम् ॥ १२ ॥
एकोनविंशतितमः, कलाया अपि यो लवः । विकला ताभिरेकोनविंशत्यैका कला भवेत् ॥ १३ ॥
इति परिभाषा ॥
व्यासो भरतहिमवतादिक्षेत्रमहीभृताम् । स्थानद्विगुणितो ज्ञेय, आविदेहमतः पुनः ॥ १४ ॥
यथारोहावरोहेण, विष्कम्भोऽर्द्धार्द्धहानितः । भवेदेवमैरवते, विष्कम्भो भरतोपमः ॥ १५ ॥
तच्चैवम् । चेज्जम्बूद्वीपविष्कम्भे, भागा नवतियुक् शतम् । कल्प्यन्ते तत्र भरतमेकभागमितं भवेत् ॥ १६ ॥

इतः स्थानद्विगुणत्वात्, द्वौ भागौ हिमवद्गिरिः । हैमवतं च चत्वारोऽष्टौ महाहिमवद्गिरिः ॥ १७ ॥
षोडशांशा हरिवर्षं, द्वात्रिंशन्निषधाचलः । विदेहाश्च चतुःषष्टिर्द्वात्रिंशन्नीलवान्नगः ॥ १८ ॥
षोडशांशा रम्यकाख्यं, भागा रुक्मीनगोऽष्ट च । चत्वारो हैरण्यवन्तं, द्वौ भागौ शिखरी गिरिः ॥ १९ ॥
एक ऐरावतक्षेत्रम्, नवत्या च शतेन च । भागैरेवं योजनानां, लक्षमेकं समाप्यते ॥ २० ॥
यद्वेदं भरते क्षेत्रप्रमाणं योजनादिकम् । नवत्याढ्यशतगुणं, योजनानां हि लक्षकम् ॥ २१ ॥
जम्बूद्वीपस्य विष्कम्भो, यथैवं लक्षयोजनः । एवमायामोऽपि लक्षं, योजनानां भवेद्यथा ॥ २२ ॥
सहस्राः पञ्च वनयोर्व्यासः पूर्वापरस्थयोः । योजनानां चतुश्चत्वारिंशान्यष्टौ शतानि च ॥ २३ ॥
पञ्चत्रिंशत् सहस्राणि, षडुत्तरा चतुःशती । विजयानां षोडशानां, विष्कम्भोऽयं समुच्चितः ॥ २४ ॥
षण्णामन्तर्नदीनां च पञ्चाशा सप्तशत्यसौ । चतुःसहस्री विष्कम्भो, वक्षस्काराष्टकस्य च ॥ २५ ॥
मेरुर्दशसहस्रोरुर्भद्रसालस्य चायतिः । सहस्राणि चतुःचत्वारिंशत् पूर्वापरस्थितेः ॥ २६ ॥
एषां संकलने लक्षं, योजनानां भवेदिति । वक्ष्यमाणविदेहानामायामोऽप्येवमूह्यताम् ॥ २७ ॥
दक्षिणोत्तरवर्त्तिन्योर्जगत्योर्मूलविस्तृतिः । भरतैरवतक्षेत्रव्यासेऽन्तर्भाव्यतां क्रमात् ॥ २८ ॥
जगत्योर्मूलविष्कम्भः, पूर्वपश्चिमयोस्तु यः । स्वस्वदिक्स्थवनमुखव्यासेऽन्तर्भाव्यतामसौ ॥ २९ ॥
विष्कम्भो भरतस्याथ, शरश्च कथितो जिनैः । षड्विंशानि योजनानि, शतानि पञ्च षट् कला ॥ ३० ॥
चतुर्दशसहस्राणि, चतुःशत्येकसप्ततिः । योजनान्यस्य जीवा स्यात्किञ्चिदूनाश्च षट्कलाः ॥ ३१ ॥
धनुःपृष्ठं सहस्राणि, चतुर्दश तथोपरि । अष्टाविंशा पञ्चशती, कला एकादशाधिकाः ॥ ३२ ॥
योजनानां त्रिपञ्चाशत्, लक्षा अशीतिरेव च । सहस्राणि षट् शतानि, तथैकाशीतिरित्यथ ॥ ३३ ॥
कलाः सप्तदश तथा, तावत्यो विकला अपि । एतावत् भरतक्षेत्रे, प्रोक्तं क्षेत्रफलं जिनैः ॥ ३४ ॥
बाहा त्वत्र न संभवति ॥
तच्चेदं भरतं द्वेधा, वैताढ्यगिरिणा कृतम् । दाक्षिणात्यं भरतार्द्धमुत्तरार्द्धं तथापरम् ॥ ३५ ॥
षोढा हिमवदुत्थाभ्यां, भित्वा वैताढ्यभूधरम् । गंगासिन्धुभ्यां कृतं तत्, गत्वा पूर्वापराम्बुधी ॥ ३६ ॥
अर्धस्य दाक्षिणात्यस्य, स्याद्विष्कंभः शरोऽपि च । अष्टात्रिंशद्योजनानां, द्वे शते च कलात्रयम् ॥ ३७ ॥
योजनानां सहस्राणि, नव सप्तशतानि च । जीवाष्टचत्वारिंशानि, द्वादशात्र कलास्तथा ॥ ३८ ॥
धनुःपृष्ठं योजनानां, सहस्राणि नवोपरि । शतानि सप्त षट्षष्टिः, कलैका दक्षिणार्द्धके ॥ ३९ ॥
लक्षाण्यष्टादश पञ्चत्रिंशदेव सहस्रकाः । चतुःशती योजनानां, पञ्चाशीतिस्तथोपरि ॥ ४० ॥
कला द्वादश विकलाः, षडित्येवं जिनेश्वरैः । दाक्षिणात्ये भरतार्द्धे, सर्वं क्षेत्रफलं मतम् ॥ ४१ ॥

बाहा त्वत्र न संभवति ॥

वैताढ्याद्दक्षिणस्यां, चोत्तरस्यां लवणार्णवात् । चतुर्दशाधिकशतं, योजनानि कलास्तथा ॥ ४२ ॥
एकादशातीत्य मध्यखण्डेऽयोध्यापुरी भवेत् । नवयोजनविस्तीर्णा, द्वादशयोजनायता ॥ ४३ ॥
खण्डेऽत्रैवार्यदेशानां, स्यात् सार्द्धा पञ्चविंशतिः । खण्डोऽनार्यस्तान् विनासौ खण्डाः पञ्चापरे तथा ॥ ४४ ॥
मध्यखण्डगतेष्वार्यदेशेष्वेव भवेज्जनिः । अर्हतां चक्रिणामर्द्धचक्रिणां शीरिणां तथा ॥ ४५ ॥
अष्टात्रिंशे योजनानां द्वे, शते त्रिकलाधिके । अतिक्रम्य हिमवतो, दक्षिणस्यां तथाम्बुधेः ॥ ४६ ॥
एतावदेवातिक्रम्योत्तरस्यामत्र राजतः । वैताढ्यो मध्यस्थ इव, व्यभजत् भरतं स च ॥ ४७ ॥
पञ्चाशतं योजनानि, विस्तीर्णः पञ्चविंशतिम् । योजनान्युन्नतः क्रोशाधिकानि षड् भुवोऽन्तरे ॥ ४८ ॥
विहाय मन्दरं सर्वपर्वतानां भवेद्यतः । स्वस्योच्छ्रयस्य तुर्यांशो, व्यवगाढो भुवोऽन्तरे ॥ ४९ ॥
द्वे योजनशते साष्टाशीतिके त्रिकलाधिके । इषुर्वैताढ्यशैलस्य, प्रत्यञ्चाऽस्य प्रपञ्च्यते ॥ ५० ॥
योजनानां सहस्राणि, दश सप्त शतानि च । विंशतिश्च कलाः किञ्चिदूना द्वादश कीर्त्तिताः ॥ ५१ ॥
धनुःपृष्ठं सहस्राणि, दश सप्त शतानि च । त्रिचत्वारिंशताढ्यानि, कलाः पञ्चदशाधिकाः ॥ ५२ ॥
साष्टाशीतियोजनानां, चतुःशती तथा कलाः । सार्द्धाः षोडश बाहास्य, प्रत्येकं पार्श्वयोर्द्वयोः ॥ ५३ ॥
ऊर्ध्वं च पर्वतस्यास्य, दक्षिणोत्तरपार्श्वयोः । अतिक्रमे योजनानां, दशानां समभूमितः ॥ ५४ ॥
अत्रास्ति मेखलैकैका, दशयोजनविस्तृता । आयामेव च वैताढ्यसमाने ते उभे अपि ॥ ५५ ॥
पृथुस्त्रिंशद्योजनानि, वैताढ्यः स्यादतः परम् । प्रतिमेखलमेकैका, मानतो मेखलासमा ॥ ५६ ॥
शोभिता वनखण्डेन, पद्मवेदिकयापि च । वर्त्तते खेचरश्रेणी, रत्नबद्धमहीतला ॥ ५७ ॥
स्युस्तत्र दक्षिणश्रेणौ, वृतानि विषयैः निजैः । महापुराणि पञ्चाशत्, परस्यां षष्टिरेव च ॥ ५८ ॥
दक्षिणस्यां पुरं मुख्यं, भवेत् गगनवल्लभम् । उदीच्यां रथनूपुरचक्रवालाह्वयं भवेत् ॥ ५९ ॥
अयं जम्बूद्वीपप्रज्ञप्त्यभिप्रायः । ऋषभचरित्रादौ तु दक्षिणश्रेण्यां रथनूपुरचक्रवालमुत्तरश्रेण्यां गगनवल्लभमुक्तम् । इति
मुख्यत्वं त्वनयोर्ज्ञेयं, स्वस्वश्रेण्यधिराजयोः । राजधानीरूपतया, महासमृद्धिशालिनोः ॥ ६० ॥
वसन्तस्तेषु चोत्तुङ्गरत्नप्रासादशालिषु । तृणायापि न मन्यन्ते, स्वर्गं विद्याधरेश्वराः ॥ ६१ ॥
दशयोजनतुङ्गस्य, पञ्चाशद्विस्तृतेरपि । खण्डस्याद्यस्य सकलं, प्रतरं स्यात् भुवस्तले ॥ ६२ ॥
पञ्चलक्षाः सहस्राणि, द्वादशाथ शतत्रयम् । सप्ताढ्यं द्वादश कलाः, खण्डेऽथ प्रथमे घनम् ॥ ६३ ॥
लक्षाणामेकपञ्चाशत्, त्रयोविंशतिरेव च । सहस्रा योजनानां षट्सप्ततिः षट्कलास्तथा ॥ ६४ ॥
श्रेणीभ्यामथ चैताभ्यां, योजनानामतिक्रमे । दशानां मेखलैकैका, वर्त्तते पार्श्वयोर्द्वयोः ॥ ६५ ॥
तत्र याम्योत्तराभिख्ये, श्रेण्यौ गिरिसमायते । वसन्त्यत्र शक्रसत्कलोकपालाभियोगिनः ॥ ६६ ॥

तथाहुः क्षमाश्रमणपादाः । [बृहत्क्षेत्रसमास श्लो. १८८-१८९]

विज्जाहरसेढीओ, उड्ढं गंतूण जोअणे दसओ । दसजोअणपिहुलाए, सेढीओ सक्कस्सय ॥

सोमजमकाइयाणं, देवाणं वरुणकाइयाणं च ॥ वेसमणकाइयाणं, देवाणं आभियोगाणं ॥

बहूनि भवनान्यत्र, तेषां पल्योपमायुषाम् । बहिर्वृत्तानि रात्नानि, चतुरस्राणि चान्तरे ॥ ६७ ॥

वेदिकावनराजिन्योः, श्रेण्योर्व्यासोऽनयोर्भवेत् । योजनानि दशैतावान्, वैताढ्यस्यापि तत्र सः ॥ ६८ ॥

दशयोजनतुङ्गस्य, त्रिंशद्योजनविस्तृतेः । खण्डस्यास्य द्वितीयस्य, गणितं प्रतरात्मकम् ॥ ६९ ॥

तिस्रो लक्षाः सहस्राणि, सप्त त्रीणि शतानि च । तथा चतुरशीतिश्च, कला एकादशाधिकाः ॥ ७० ॥

अत्र च सर्वत्र यथोपयोगं योजनपदमनुक्तमपि अध्याहार्यम् ॥

तथा खण्डे द्वितीयस्मिन्, निश्चितं सर्वतो घनम् । त्रिंशल्लक्षा योजनानां, सहस्राणि त्रिसप्ततिः ॥ ७१ ॥

शतान्यष्टौ पञ्चचत्वारिंशदाढ्यानि चाधिकाः । कलाः पञ्चदशेत्युक्तं, व्यक्तं युक्तिविशारदैः ॥ ७२ ॥

अभियोगिश्रेणितश्च, योजनानामतिक्रमे । पञ्चानामूर्ध्वमत्रास्योपरिभागो विराजते ॥ ७३ ॥

नानारत्नालंकृतस्य, दशयोजनविस्तृतेः । मध्ये पद्मवेदिकाऽस्य, तस्याश्चोभयतो वने ॥ ७४ ॥

तयोः क्रीडापर्वतेषु, कदल्यादिगृहेषु च । दीर्घिकादिषु च स्वैरं, क्रीडन्ति व्यन्तरामराः ॥ ७५ ॥

पञ्चयोजनतुङ्गस्य, दशयोजनविस्तृतेः । खण्डस्यास्य तृतीयस्य, प्रतरं परिकीर्त्तितम् ॥ ७६ ॥

एकं लक्षं द्वे सहस्रे, चतुःशत्येकषष्टियुक् । कला दशाथ गणितं, ब्रवीम्यस्मिन् घनात्मकम् ॥ ७७ ॥

पञ्चलक्षा योजनानां, सहस्रा द्वादशापरे । सप्तातिरेका त्रिशती, कलाश्च द्वादशाधिकाः ॥ ७८ ॥

त्रयाणामपि खण्डानां, घनेष्वेकीकृतेषु च । वैताढ्यस्याखिलस्यापि, जायते गणितं घनम् ॥ ७९ ॥

तच्चैदम्, सप्ताशीतिश्च लक्षाणि, द्विनवतिः शतान्यपि । एकोनत्रिंशदाढ्यानि, कलाश्चतुर्दशाधिकाः॥ ८० ॥

सिद्धायतनं कूटं, दक्षिणभरतार्द्धनामधेयं च । खण्डप्रपातकूटं, तुर्यं तन्माणिभद्राख्यम् ॥ ८१ ॥

वैताढ्याख्यं पञ्चममथ षष्ठं पूर्णभद्रसंज्ञं च । भवति तमिस्रगुहं, चोत्तरभरतार्द्धं च वैश्रमणम् ॥ ८२ ॥

वैताढ्ये नव कूटान्येवं, ज्ञेयानि तत्र पूर्वाब्धेः । सविधे सिद्धायतनं, ततः क्रमात् प्रत्यगखिलानि ॥ ८३ ॥

कूटान्येतानि सक्रोशान्युच्चत्वे योजनानि षट् । तावन्त्येव मूलभूमौ, विष्कम्भायामतोऽपि च ॥ ८४ ॥

मध्ये देशोनानि पञ्च, योजनानि शिरस्यथ । साधिकानि त्रीण्युदस्तगोपुच्छसंस्थितान्यतः ॥ ८५ ॥

परिक्षेपा मूलमध्यशिरस्सूनानि विंशतिः । तथोनानि पञ्चदश, साग्राणि नव च क्रमात् ॥ ८६ ॥

अधस्ताच्छिखराद्यावदागतं तत्किलार्द्धितम् । कूटोत्सेधार्द्धयुक्कूटे, व्यासो यथेप्सितास्पदे ॥ ८७ ॥

तथाहि, सक्रोशार्द्धे योजनानां, त्रयेऽतीते शिरोऽग्रतः । यदा जिज्ञास्यतेऽमीषु, व्यासस्तदा तदर्द्धयेत् ॥ ८८ ॥

स्युः षट् क्रोशाः सपादास्ते, कूटोत्सेधार्द्धसंयुताः । सपादक्रोशहीनैवं, संजाता पञ्चयोजनी ॥ ८९ ॥

मध्यप्रदेशे विष्कम्भ, एतावानेषु जायते । एवं हिमवतादीनां, सर्वकूटेषु भावना ॥ ९० ॥
सिद्धायतनकूटस्योपरि रम्यं विराजते । सत्सिद्धायतनं मौलौ, किरीटमिव भूपतेः ॥ ९१ ॥
तदत्र कनकमणिमयमेकक्रोशायतं तदर्द्धततम् । चापशतानि चतुर्दश, चत्वारिंशानि चोत्तुङ्गम् ॥ ९२ ॥
पूर्वोत्तरादक्षिणासु, द्वारमेकैकमत्र तत् । धनुःपञ्चशतोत्तुङ्गं, तदर्द्धं किल विस्तृतम् ॥ ९३ ॥
पञ्चधनुःशतविष्कम्भायामा स्यात्तदर्द्धबाहल्या । मणिपीठिका तदन्तर्देवच्छन्दक उपरि चास्याः ॥ ९४ ॥
पञ्चचापशतान्येष, विष्कम्भायामतो मतः । तान्येव सातिरेकाणि, तुङ्गत्वेन प्ररूपितः ॥ ९५ ॥
अष्टोत्तरं शतं नित्यप्रतिमास्तत्र चार्हताम् । उत्सेधाङ्गुलनिष्पन्नधनुःपञ्चशतोच्छ्रिताः ॥ ९६ ॥
एकैकस्यां दिशि सप्तविंशतिः सप्तविंशतिः । एवं चतुर्दिशं ताः स्युर्नाम्ना च ऋषभादयः ॥ ९७ ॥
तासां च जिनमूर्तीनामङ्गरत्नमया नखाः । अन्तर्लोहिताक्षरत्नप्रतिसेकमनोहराः ॥ ९८ ॥
पाणिपादतलानि च, जिह्वा श्रीवत्सचूचुकम् । तालूनि च तपनीयमयानि रिष्टरत्नजाः ॥ ९९ ॥
श्मश्रुरोमराजयश्च, ओष्टा विद्रुमनिर्मिताः । नासा अन्तर्लोहिताक्षनिषेकास्तपनीयजाः ॥ १०० ॥
लोहिताक्षप्रतिसेकान्यक्षीण्यङ्कमयानि च । तारका अक्षिपक्ष्माणि, भ्रुवश्च रिष्टरत्नजाः ॥ १०१ ॥
ललाटपट्टश्रवणकपोलं कनकोद्भवम् । केशभूमिस्तपनीयमयी केशाश्च रिष्टजाः ॥ १०२ ॥
वज्रजाः शीर्षघटिकास्तथा कनकनिर्मिताः । ग्रीवाबाहुपादजंघागुल्फोरुतनुयष्टयः ॥ १०३ ॥
नन्वेतानि भावजिनप्रतिरूपाणि तेषु च । उचितं श्मश्रुकूर्चादि, श्रामण्यानुचितं कथम् ? ॥ १०४ ॥

तदुक्तं श्रीतपागच्छनायकश्रीदेवेन्द्रसूरिशिष्यश्रीधर्मघोषसूरिभिर्भाष्यवृत्तौ । भगवतोऽपगतकेशशीर्षमुखनिरीक्षणेन श्रामण्यावस्था सुज्ञाता एव इति ॥

अत्रोच्यते, भावार्हतामपि श्मश्रुकूर्चादीनामसंभवः । न सर्वथा किन्तु तादृग्दिव्यातिशयसंभवात् ॥ १०५ ॥
स्यादवस्थितता तेषां, श्रामण्यग्रहणादनु । पुरुषत्वप्रतिपत्तिः, सौन्दर्यं चेत्थमेव हि ॥ १०६ ॥

यदुक्तं श्री समवायाङ्गे । अवट्ठियकेसमंसुरोमणे इति ॥ औपपातिकेऽप्युक्तम् अवट्ठियसुविभत्तचित्तमंसू॥

एवं च, तासां भावजिनाधीशप्रतिरूपतया ततः । शाश्वतार्हत्प्रतिमानां, श्मश्रुकूर्चादि युक्तिमत् ॥ १०७ ॥
भाष्ये त्वकेशशीर्षास्या, या श्रामण्यदशोदिता । साऽवर्द्धिष्णुतयाल्पत्वात्तदभावविवक्षया ॥ १०८ ॥
ऐकैकस्याः प्रतिमायाः, पृष्टतश्छत्रधारिणी । द्वे द्वे चामरधारिण्यौ, पार्श्वतः पुरतः पुनः ॥ १०९ ॥
यक्षभूतकुण्डधारप्रतिमानां द्वयं द्वयम् । विनयावनतं पादपतितं घटिताञ्जलि ॥ ११० ॥
यथा देवच्छन्दकेऽस्मिन् घण्टाधूपकडुच्छकाः । तथा चन्दनकुम्भाद्याः, प्रत्येकं शतमष्टयुक् ॥ १११ ॥

तथाहि । चंदणकलसाभिंगारगा, आयसंगा य थाला य । पाईओ सुपइट्ठा, मणगुलीया वायकरगा य ॥
चित्तारयणकरंडगहयगयनकंठगा य चंगेरी । पडलगसीहासणछत्तचामरा समुग्गयझया य ॥

तथा खण्डप्रपातकूटे स्यान्नृत्तमालः सुरो विभुः । सप्तमे कृतमालश्च, स्यात्तमिस्रगुहाभिधे ॥ ११२ ॥
षण्णां च शेषकूटानां, कूटनामसमाभिधाः । सुराः कुर्वन्त्याधिपत्यं, सर्वे पल्योपमायुषः ॥ ११३ ॥
एतेषां च परीवारो, देवीसामानिकादिकः । तत्तदासनरीतिश्च, सर्वं विजयदेववत् ॥ ११४ ॥
पूर्णभद्रं माणिभद्रं, कूटं वैताढ्यनामकम् । त्रीण्येतानि स्वर्णजानि, राल्निकान्यपराणि षट् ॥ ११५ ॥
उपर्येषामथैकैकः, स्यात्प्रासादावतंसकः । राल्निकः क्रोशतुङ्गोऽर्द्धक्रोशं च विस्तृतायतः ॥ ११६ ॥

इदं जम्बूद्वीपप्रज्ञप्तिवृत्तिबृहत्क्षेत्रसमासाभिप्रायेण ॥ श्रीउमास्वातिकृते जम्बूद्वीपसमासे
त्वमी प्रासादावतंसकाः क्रोशदैर्ध्यविस्ताराः किंचिन्न्यूनतदुच्छ्राया उक्ताः सन्ति ॥

तस्य प्रासादस्य मध्ये, महती मणिपीठिका । धनुः पञ्चाशतायामव्यासा तदर्द्धमेदुरा ॥ ११७ ॥
उपर्यस्या रत्नमयं सिंहासनमनुत्तरम् । तत्तत्कूटस्वामियोग्यं, परिवारासनैर्वृतम् ॥ ११८ ॥
यदा स्वस्वराजधान्याः, कूटानां स्वामिनः सुराः । अत्रायन्ति तदैतस्मिन्, प्रासादे सुखमासते ॥ ११९ ॥
मेरोर्दक्षिणतोऽसंख्यद्वीपाब्धीनामतिक्रमे । जम्बूद्वीपेऽपरत्रैषां, राजधान्यो यथायथम् ॥ १२० ॥
वैताढ्यस्य पर्वतस्य, द्वे गुहे भवतः क्रमात् । खण्डप्रपाता प्राच्येंऽशे, तमिस्रा परतः पुनः ॥ १२१ ॥
उन्नते योजनान्यष्टौ, तानि द्वादश विस्तृते । नित्यान्धकारगहने, पञ्चाशद्योजनायते ॥ १२२ ॥
दक्षिणस्यामुदीच्यां च, द्वारमेकैकमेतयोः । उच्छ्रितं योजनान्यष्टौ, तानि चत्वारि विस्तृतम् ॥ १२३ ॥
नृत्तमालकृतमालावेकपल्यायुषौ सुरौ । महर्द्धिकौ विजयदेतयोः स्वामिनौ क्रमात् ॥ १२४ ॥
प्रतिद्वारं द्वौ कपाटौ, वाज्रिकौ घटितौ सदा । अष्टावष्टौ योजनानि, तुङ्गौ द्वे द्वे च विस्तृतौ ॥१२५ ॥
यदेह चक्री भरतोत्तरभागं जिगीषति । सेनान्या रत्नदण्डेनाहतौ तदावसर्पतः ॥ १२६ ॥
उद्घाटितस्यैकैकस्य, पश्चाद्भागेऽस्ति तोडुकः । चतुर्योजनविष्कम्भायामोऽवष्टम्भ एतयोः ॥ १२७ ॥
हस्तिरत्नं समारुह्य, कुम्भस्थलस्फुरन्मणिः । चक्री तदुद्योतिताध्वा, तमिस्रां प्रविशेत् गुहाम् ॥ १२८ ॥
तत्र प्रविश्य पाश्चात्यसैन्यप्रकाशहेतवे । रत्नेन काकिणीनाम्ना, खटीपिण्डावलेखिना ॥ १२९ ॥
ऊर्द्ध्वाधो योजनान्यष्टौ, तिर्यक् द्वादशयोजनीम् । प्रकाशयत् योजनं चैकैकं दक्षिणवामयोः ॥ १३० ॥
आदिमं योजनं मुक्त्वा, प्रथमं मण्डलं लिखेत् । पञ्चचापशतायामविष्कम्भं भानुसन्निभम् ॥ १३१ ॥
ततोऽपि योजनं मुक्त्वा, द्वितीयं मण्डलं लिखेत् । इत्येवमुत्तरद्वारे, शेषेऽन्त्ये योजनेऽन्तिमम् ॥ १३२ ॥
एवं च, स्यादेकं दाक्षिणात्यप्राक्कपाटोपरि मण्डलम् । द्वे तोडुके त्रिचत्वारिंशत्प्राग्भित्तावनुक्रमात् ॥ १३३ ॥

ततो द्वे औत्तराहप्राक्तोडुकेऽन्त्यं च मण्डलम् । उदीच्यप्राक्कपाटेऽयं, पश्चिमायामपि क्रमः ॥ १३४ ॥
एवमेकोनपञ्चाशत्, पूर्वभित्तौ भवन्ति वै । तावन्त्यपरभित्तौ तत्तुल्यानि संमुखानि च ॥ १३५ ॥

अयं च मलयगिरिकृतक्षेत्रविचारबृहद्वृत्त्याद्यभिप्रायः ॥

आवश्यकबृहद्वृत्तिटीप्पनकप्रवचनसारोद्धारबृहद्वृत्त्याद्यभिप्रायस्त्वयम् । गुहायां प्रविशन् भरतः पाश्चात्यपान्थजनप्रकाशकरणाय दक्षिणद्वारे पूर्वदिक्कपाटे प्रथमं योजनं मुक्त्वा प्रथमं मण्डलमालिखति । ततो गोमूत्रिकान्यायेनोत्तरतः पश्चिमदिक्कपाटतोडुके तृतीययोजनादौ द्वितीयमण्डलमालिखति । ततस्तेनैव न्यायेन पूर्वदिक्कपाटतोडुके चतुर्थयोजनादौ तृतीयम् । ततः पश्चिमदिग्भित्तौ पञ्चमयोजनादौ चतुर्थम् । ततः पूर्वदिग्भित्तौ षष्ठयोजनादौ पञ्चमम् । यावदष्टचत्वारिंशत्तममुत्तरद्वारसत्कपश्चिमदिक्कपाटे प्रथमयोजनादौ एकोनपञ्चाशत्तमं चोत्तरदिग्द्वारसत्कपूर्वदिक्कपाटे द्वितीययोजनादावालिखति ॥ एवमेकस्यां भित्तौ पञ्चविंशतिरपरस्यां च चतुर्विंशतिरिति समग्रेणैकोनपञ्चाशत् मण्डलानि भवन्तीति ॥

दक्षिणोत्तोडुकात् सप्तदशभिर्योजनैः परा । अस्त्युन्मग्नजला नाम, नदी त्रियोजनाततता ॥ १३६ ॥
द्वादशयोजनायामा, पूर्वभित्तिविनिर्गता । विभिद्य पश्चिमां भित्तिं, प्रविष्टा सिन्धुनिम्नगाम् ॥ १३७ ॥
अस्यां पतति यत्किञ्चित्दृषत्काष्टनरादिकम् । तत्सर्वमद्भिराहत्य, बहिः प्रक्षिप्यते स्थले ॥ १३८ ॥
ततः परं योजनयोर्द्वयोरतिक्रमे परा । स्यान्निमग्नजला नाम, नदी त्रियोजनाततता ॥ १३९ ॥
द्वादशयोजनायामा, पूर्वभित्तिविनिर्गता । प्रत्यग्भित्तिं प्रविभिद्य, सिन्धुं विशत्यसावपि ॥ १४० ॥
अस्यां पतति यत्किञ्चित्तृणकाष्टनरादिकम् । अधो मज्जति तत्सर्वमीदृक् स्वभावमेनयोः ॥ १४१ ॥
ततश्चोत्तरतः सप्तदशभिर्योजनैः परः । चतुर्योजनविष्कम्भायाम उत्तरतोडुकः ॥ १४२ ॥
ततश्च, उभाभ्यां द्वारभागाभ्यामित्येवं सर्वसंख्यया । योजनैरेकविंशत्या, नद्यौ स्यातां यथोदिते ॥ १४३ ॥
अथ वार्द्धकिरत्नेन, सद्यः सज्जितपद्यया । नद्यावुभे समुत्तीर्य, यावत् गच्छति चक्रभृत् ॥ १४४ ॥
तावद्भिना प्रयासेन, कपाटावुत्तराश्रितौ । उद्घटेते स्वयमेव, कृतक्रौञ्चारवौ रयात् ॥ १४५ ॥
निर्गत्य तेन द्वारेण, विजित्योत्तरभारतम् । दर्याः खण्डप्रपातायाश्चक्री समीपमापतेत् ॥ १४६ ॥
उत्तरद्वारमुद्घाट्य, सेनानीकृतयत्नतः । मण्डलान्यालिखन् प्राग्वत्, चक्री विशति तां गुहाम् ॥ १४७ ॥
पूर्वं निमग्नसलिलां, समुत्तरेत्ततः पराम् । तूर्णं वार्द्धकिरत्नेन, कृतया हृद्यपद्यया ॥ १४८ ॥
इमे मानादिभिः प्राग्वत्, प्रत्यग्भित्तिविनिर्गते । प्राच्यभित्तिं किन्तु भित्त्वा, प्राप्ते गङ्गामहानदीम् ॥ १४९ ॥
द्वारेण दाक्षिणात्येन, स्वयमुद्घटितेन च । निर्गत्य कृतकृत्यः सन्, चक्री निजपुरं विशेत् ॥ १५० ॥
स्याद्यावच्चक्रिणो राज्यं, तावत्तिष्ठन्ति सन्ततम् । मण्डलानि च पद्ये च, गुहामार्गे गतागते ॥ १५१ ॥

अयं प्रवचनसारोद्धारवृत्त्यभिप्रायः ॥ त्रिषष्टीयाजितचरित्रे तु

उद्घाटितं गुहाद्वारं गुहान्तर्मण्डलानि च । तावत्तान्यपिं तिष्ठन्ति, यावज्जीवति चक्रभृत् ॥

इत्युक्तम् ॥ [पर्व २. सर्ग. ४. श्लो. १८९]

द्वारात् खण्डप्रपाताया, याम्याद्याम्यदिशि ध्रुवम् । गङ्गायाः पश्चिमे कूले, वसन्ति निधयो नव ॥ १५२ ॥

इति दक्षिणार्धभरतम् ॥

उदीच्यामथ वैताढ्यात्, हिमवद्गिरिसीमया । स्यादुत्तरभरतार्द्धं, पर्यंकासनसंस्थितम् ॥ १५३ ॥

अष्टात्रिंशे योजनानां, द्वे शते त्रिकलाधिके । विष्कम्भतोऽथ बाहास्य, प्रत्येकं पार्श्वयोर्द्वयोः ॥ १५४ ॥

योजनानां शतान्यष्टादश द्विनवतिस्तथा । सार्द्धाः सप्त कलाः क्षेत्रफलमस्याथ कीर्त्यते ॥ १५५ ॥

लक्षास्त्रिंशत् सहस्राणि, द्वात्रिंशदथ चोपरि । शतान्यष्टौ योजनानामष्टाशीतिरथाधिका ॥ १५६ ॥

कला द्वादश विकला, एकादश प्रकीर्त्तिताः । उक्त सामान्यभरतवत् शेषं तु शरादिकम् ॥ १५७ ॥

नितम्बस्य हिमवतो, दाक्षिणात्यस्य सन्निधौ । क्षेत्रेऽस्मिन्नन्तरे गङ्गासिन्धुप्रपातकुण्डयोः ॥ १५८ ॥

गिरिर्वृषभकूटाख्य, उच्चत्वेनाष्टयोजनः । द्वे योजने भूनिमग्नश्चारुगोपुच्छसंस्थितः ॥ १५९ ॥

मूलेऽसौ योजनान्यष्टौ, मध्ये षट् योजनानि च । चतुष्ठयं योजनानामुपर्यायतविस्तृतः ॥ १६० ॥

पञ्चविंशतिरेवाष्टादशैव द्वादशापि च । साधिकानि परिक्षेपो, मूले मध्ये च मूर्ध्नि च ॥ १६१ ॥

द्वादशाष्ट च चत्वारि, मूल मध्ये शिरस्यपि । योजनानि क्रमादस्य, व्यासायामो मतान्तरे ॥ १६२ ॥

सप्तत्रिंशत् क्रमात् पञ्चविंशतिर्द्वादशापि च । साधिकानि परिक्षेपो, मूले मध्ये तथोपरि ॥ १६३ ॥

इदं च मतद्वयमपि जम्बूद्वीपप्रज्ञप्तिसूत्रे ॥

मतान्तरं ननु कथं, श्रुते सर्वज्ञमूलके । तुल्यकैवल्यभाजां यदेकमेवार्हतां मतम् ॥ १६४ ॥

अत्रोच्यते, दुर्भिक्षे स्कन्दिलाचार्यदेवर्द्धिगणिवारके । गणनाभावतः साधुसाध्वीनां विस्मृतं श्रुतम् ॥ १६५ ॥

ततः सुभिक्षे संजाते, सङ्घस्य मेलकोऽभवत् । वलभ्यां मथुरायां च, सूत्रार्थघटनाकृते ॥ १६६ ॥

वलभ्यां संगते संङ्घे, देवर्द्धिगणिरग्रणीः । मथुरायां सङ्गते च, स्कन्दिलार्योऽग्रणीरभूत् ॥ १६७ ॥

ततश्च वाचनाभेदस्तत्र जातः क्वचित् क्वचित् । विस्मृतस्मरणे भेदो, जातु स्यादुभयोरपि ॥ १६८ ॥

तत्तैस्ततोऽर्वाचीनैश्च, गीतार्थैः पापभीरुभिः । मतद्वयं तुल्यतया, कक्षीकृतमनिर्णयात् ॥ १६९ ॥

सत्यप्येवं साम्प्रतीना, विसंवादं श्रुतस्थितम् । निर्णेतुमुत्सहन्ते ये, ते ज्ञेया मातृशासिताः ॥ १७० ॥

एवमेवोक्तं श्रीमलयगिरिभिर्ज्योतिष्करण्डवृत्तौ ॥

देशोनक्रोशतुङ्गोऽर्द्धक्रोशविस्तृत एव च । क्रोशायाम उपर्यस्य, प्रासादोऽतिमनोरमः ॥ १७१ ॥

देवोऽत्र वृषभाभिख्य, एकपल्योपमस्थितिः । महर्द्धिको विजयवत्तथास्य राजधान्यपि ॥ १७२ ॥

शैलोऽयं चित्रित इव, चक्रिभिर्जितभारतैः । काकिणीरत्नलिखितैः, समन्तान्निजनामभिः ॥ १७३ ॥
नद्योऽष्टाविंशतिरिह, सहस्रा द्वयुत्तरा मताः । अमुष्य भरतक्षेत्रस्योर्वीशस्याङ्गना इव ॥ १७४ ॥
अरकाश्च षडप्यत्र, सुषमासुषमादयः । सदा विपरिवर्त्तन्ते, नियोगिन इवेशितुः ॥ १७५ ॥
इति भरतक्षेत्रम् ॥
अथोत्तरार्द्धभरतपर्यन्त उत्तराश्रिते । जात्यस्वर्णमयो भाति, हिमवान्नाम पर्वतः ॥ १७६ ॥
स्पृशन् द्वाभ्यां निजान्ताभ्यां, पूर्वापरपयोनिधि । योजनानां शतं तुङ्गो, भूमग्नः पञ्चविंशतिम् ॥ १७७ ॥
योजनानां दशशती, द्विपञ्चाशत्समन्विता । कला द्वादश विष्कम्भः, पर्वतस्यास्य कीर्त्तितः ॥ १७८ ॥
योजनानां पञ्चदशशतान्यथाष्टसप्ततिः । अष्टादश कलाश्चात्र, शरः प्रोक्तो जितस्मरैः ॥ १७९ ॥
योजनानां सहस्राणि, चतुर्विंशतिरेव च । स द्वात्रिंशन्नवशती, प्रत्यञ्चास्य कलार्द्धयुक् ॥ १८० ॥
धनुःपृष्ठं योजनानां, सहस्राः पञ्चविंशतिः । द्वे शते त्रिंशदधिके, चतस्रश्चाधिकाः कलाः ॥ १८१ ॥
योजनानां सहस्राणि, पञ्च त्रीणि शतानि च । सार्द्धानि बाहैकैकास्याध्यर्द्धाः पञ्चदशांशकाः ॥ १८२ ॥
कोटीद्वयं च लक्षाणि, योजनानां चतुर्दश । षट्पञ्चाशत्सहस्राणि, शतानि नव चोपरि ॥ १८३ ॥
एकसप्ततिरेवाष्टौ, कलाश्च विकला दश । भूमौ प्रतरगणितं, निर्दिष्टं हिमवद्गिरेः ॥ १८४ ॥
कोटीनां द्वे शते कोट्यश्चतुर्दशाथ लक्षकाः । षट्पञ्चाशत् तथा सप्तनवतिश्च सहस्रकाः ॥ १८५ ॥
एकं शतं चतुश्चत्वारिंशं कलाश्च षोडश । विकला द्वादशेत्युक्तं, शैलेऽस्मिन् सर्वतो घनम् ॥ १८६ ॥
वेदिकावनखण्डाभ्यां, रम्योऽयं पार्श्वयोर्द्वयोः । वेदिकावनखण्डानां, सर्वं मानादि पूर्ववत् ॥ १८७ ॥
अत्रैकादश कूटानि, बिभ्रति प्रकटप्रभाम् । सिद्धायतनमुख्यानि, प्राच्या आरभ्य पूर्ववत् ॥ १८८ ॥
स्यात् सिद्धायतनं क्षुल्लहिमवन्नामकं परम् । तृतीयं भरताभिख्यमिलाकूटं ततः परम् ॥ १८९ ॥
गङ्गावर्त्तनकूटं च, श्रीदेवीकूटमित्यपि । रोहितांशासूरीकूटं, सिन्ध्यावर्त्तनसंज्ञकम् ॥ १९० ॥
सुरादेवीकूटमिति, परं हैमवताभिधम् । एकादशं वैश्रमणं, कूटानि हिमवद्गिरेः ॥ १९१ ॥
सर्वाण्यमूनि रत्नानि, मूले च व्यासदैर्घ्यतः । योजनानां पञ्चशती, तावदेवोच्छ्रितानि च ॥ १९२ ॥
मध्ये च त्रिशती पञ्चसप्तत्याढ्य शिरस्यथ । ततानि द्वे शते सार्द्धे, गोपुच्छसंस्थितान्यतः ॥ १९३ ॥
शताः पञ्चदशैकाशीत्यधिकाः किञ्चनाधिकाः । एकादश किञ्चिदूनषडशीतियुताः शताः ॥ १९४ ॥
शताः सप्तैकनवतिसंयुताः किञ्चिदूनकाः । परिक्षेपाः क्रमादेषु, मूले मध्ये च मूर्धनि ॥ १९५ ॥
सिद्धायतनकूटस्योपरि सिद्धालयो महान् । पञ्चाशद्योजनान्यायामतः स परिकीर्त्तितः ॥ १९६ ॥
विष्कम्भतो योजनानि, प्रज्ञप्तः पञ्चविंशतिः । षड्त्रिंशद्योजनान्युच्चस्त्रिद्वारो भास्वरप्रभः ॥ १९७ ॥
विना प्रतीचीं त्रिदिशं, द्वारमेकैकमुच्छ्रितम् । योजनान्यष्ट चत्वारि, स्याद्विस्तारप्रवेशयोः ॥ १९८ ॥

सिद्धायतनमध्येऽथ, विभाति मणिपीठिका । योजनान्यष्ट विस्तीर्णायता चत्वारि मेदुरा ॥ १९९ ॥
उपर्यतस्या अथैको, देवच्छन्दक आहितः । उच्चैस्त्वेन साधिकानि, योजनान्यष्ट स श्रुतः ॥ २०० ॥
विष्कम्भायामतोऽप्येष, योजनान्यष्ट तत्र च । अष्टोत्तरशतं सिद्धप्रतिमास्तासु पूर्ववत् ॥ २०१ ॥
दशानां शेषकूटानामुपर्येकैक आलयः । द्वाषष्टिं योजनान्यर्द्धाधिकान्यायतविस्तृतः ॥ २०२ ॥
एकत्रिंशद्योजनानि, सक्रोशानि समुन्नतः । तत्तत्कूटसमाह्वानस्वामिना समधिष्ठितः ॥ २०३ ॥
कूटे द्वितीये तृतीये, दशमे रुद्रसंमिते । चतुष्वेषु सुरा ईशा, देव्यः शेषेषु षट्सु च ॥ २०४ ॥
तत्रापि, इलादेवी सुरादेवी, द्वे इमे दिक्कुमारिके । तिसृश्च नद्यधिष्ठात्र्यः, श्रीश्चेति प्रथिता इमाः ॥ २०५ ॥
देवा देव्यश्च सर्वेऽमी, एकपल्योपमायुषः । महर्द्धिका विजयवत्तथैषां राजधान्यपि ॥ २०६ ॥
एता देव्यश्च भवनपतिजातिगता मताः । व्यन्तरीणामर्द्धपल्यमायुरुत्कर्षतोऽपि यत् ॥ २०७ ॥
एवं वक्ष्यमाणा अपि देव्यो ज्ञेयाः ॥
वक्ष्यमाणपर्वतेषु, यानि चैत्यानि येऽपि च । प्रासादा देवतानां, ते सर्वेऽत्रत्यैः समाः स्मृताः ॥ २०८ ॥
गिरेरस्योपरितले, ह्रदः पद्महृदाभिधः । योजनानि दशोद्विद्धः, सहस्रयोजनायतः ॥ २०९ ॥
शतानि पञ्च विस्तीर्णो, वेदिकावनमण्डितः । चतुर्दिशं तोरणाढ्यत्रिसोपानमनोरमः ॥ २१० ॥
अयं च वक्ष्यमाणाश्च, महापद्महृदादयः । सर्वे पूर्वापरायामा, दक्षिणोत्तरविस्तृताः ॥ २११ ॥
तथाहुः, हिमवंतसेलसिहरे, वररविंदद्दहो सलिलपुण्णो । दसजोअणावगाढो, विच्छिन्नो दाहिणुत्तरओ ॥
[बृहत्क्षेत्रसमास श्लो. १९६]
तस्य मध्ये पद्ममेकं, योजनायतविस्तृतम् । अर्द्धयोजनबाहल्यं, तावदेवोच्छ्रितं जलात् ॥ २१२ ॥
जले मग्नं योजनानि, दशैतज्जगतीवृत्तम् । जम्बूद्वीपजगत्याभा, सा गवाक्षालिराजिता ॥ २१३ ॥
किन्त्वसौ योजनान्यष्टादशोच्च्या सर्वसंख्यया । जलेऽवगाढा दश यद्योजनान्यष्ट चोपरि ॥ २१४ ॥
यत्तु जम्बूद्वीपप्रज्ञप्तिमूलसूत्रे, जम्बूद्वीवजगइप्पमाणा इत्युक्तंतज्जलावगाह-प्रमाणमविवक्षित्वेति तद्वृत्तौ ॥
किंच, वज्रमूलं रिष्टकन्दं, वैडूर्यनालबन्धुरम् । वैडूर्यबाह्यपत्रं तज्जाम्बूनदान्तरच्छदम् ॥ २१५ ॥

अत्रायं विशेषोऽस्ति ॥ बृहत्क्षेत्रविचारवृत्त्यादौ बाह्यानि चत्वारि पत्राणि वैडूर्यमयानि शेषाणि तु रक्तसुवर्णमयान्युक्तानि । किंच जम्बूद्वीपप्रज्ञप्तिसूत्रे जाम्बूनदमीषद्रक्तस्वर्णं तन्मयान्यभ्यन्तरपत्राणि इत्युक्तम् । सिरिनिलयमितिक्षेत्रविचारवृत्तौ तु पीतस्वर्णमयान्युक्तानि । इति ॥

तपनीयकेसरवृत्ता, सौवर्णी कर्णिका भवेत्तस्य । द्विक्रोशायतविटता, क्रोशोच्च्या श्रीभवनमस्याम् ॥ २१६ ॥
एकक्रोशायतमेतत्तथार्द्धक्रोशविस्तृतम् । ऊनक्रोशोन्नतं तत्र, दक्षिणोत्तरपूर्वतः ॥ २१७ ॥
पञ्चाशतोत्तुङ्गं, तदर्द्धव्यासमेककम् । द्वारं तत्राथ भवनमध्येऽस्ति मणिपीठिका ॥ २१८ ॥
सापि पञ्चशतधनुर्व्यासायामार्द्धमेदुरा । उपर्यस्या शयनीयं, श्रीदेवीयोग्यमुत्तमम् ॥ २१९ ॥

षड्जातीयैः परिक्षेपैर्वेष्टितं मूलपङ्कजम् । क्रमादर्द्धार्द्धमानाब्जाः, परिक्षेपाः समेऽप्यमी ॥ २२० ॥
अष्टोत्तरं शतं पद्माः, प्रथमे परिधौ स्थिताः । मूलपद्मादर्द्धमानाः, श्रीदेवीभूषणैर्भृताः ॥ २२१ ॥
वायूत्तरेशानदिक्षु, सामानिकसुधाभुजाम् । चतुःसहस्री पद्मानां, तावतां परिकीर्त्तिताः ॥ २२२ ॥
महत्तराणां देवीनां, प्राक् चत्वार्यम्बुजानि च । सहस्राण्यष्ट चाग्नेय्यामभ्यन्तरसभाजुषाम् ॥ २२३ ॥
सहस्राणि दशाब्जानामपाच्यां मध्यपर्षदाम् । द्वादशाब्जसहस्राणि नैर्ऋत्यां बाह्यपर्षदाम् ॥ २२४ ॥
सेनापतीनां सप्तानां, प्रत्यक् सप्ताम्बुजानि च । द्वितीयोऽयं परिक्षेपो, मूलपद्मस्य वर्णितः ॥ २२५ ॥
आत्मरक्षिसहस्राणां, षोडशानां चतुर्दिशम् । चतुःसहस्री प्रत्येकं, परिवेषे तृतीयके ॥ २२६ ॥
त्रयः परे परिक्षेपा, अभियोगिपयोरुहाम् । द्वात्रिंशत् प्रथमे लक्षा, अभ्यन्तराभियोगिनाम् ॥ २२७ ॥
चत्वारिंशत्पद्मलक्षा, मध्ये मध्याभियोगिनाम् । लक्षाणामष्टचत्वारिंशत्बाह्ये बाह्यसेविनाम् ॥ २२८ ॥
कोट्येका विंशतिर्लक्षाः, पद्मानां सर्वसंख्यया । सहस्राणि च पञ्चाशत्, शतं विंशतिसंयुतम् ॥ २२९ ॥

अत्र षट् परिक्षेपा इति षट्जातीयाः परिक्षेपा इति वाच्यम् ॥

तथाहि ॥ आद्या मूलपद्मार्द्धमाना जातिः । द्वितीया तच्चतुर्थभागमाना जातिः । यावत् षष्ठी चतुःषष्टितमभागमाना जातिरिति ॥ अन्यथा तु योजनात्मना सहस्रत्रयात्मके धनुरात्मना चत्वारिंशल्लक्षाधिकद्विकोटिप्रमिते हृदपरमपरिधौ षष्ठपरिक्षेपपद्मानां षष्टिकोटिधनुः-क्षेत्रमातव्यानामेकपङ्क्त्या अवकाशो न संभवति ॥

ततश्च तत्तत्परिधिक्षेत्रपरिक्षेपपद्मसंख्याविस्तारान् परिभाव्य यत्र यावत्यः पङ्क्तयः संभवन्ति तत्र तावतीभिः पङ्क्तिभिरेक एव परिक्षेपो ज्ञेयः । पद्मानामनेक-जातीयत्वात् । एवं च पञ्चलक्षयोजनात्मके हृदक्षेत्रफले तानि सर्वाण्यपि पद्मानि सुखेन मान्त्येव । पद्मरुद्धक्षेत्रस्य सर्वसंकलनया विंशतिः सहस्राणि पञ्चाधिकानि योजनानां षोडशभागीकृतस्यैकयोजनस्य त्रयोदश भागा इति एतावत एव संभवादिति ॥ अधिकं त्युपाध्यायश्रीशान्तिचंद्रगणिकृत-जम्बूद्वीपप्रज्ञप्तिवृत्तितेऽवसेयम् ॥

ततः पद्महृदात् गङ्गा, प्राच्यतोरणनिर्गता । योजनानां पञ्चशतीं, गिरौ पूर्वेण गच्छति ॥ २३० ॥
गङ्गावर्त्तनकूटस्याधस्तादावृत्य सा ततः । दक्षिणाभिमुखी भूत्वा, प्रवृत्ता पर्वतोपरि ॥ २३१ ॥
त्रयोविंशां पञ्चशतीं, योजनानां कलात्रयम् । सार्द्धं गत्वा दक्षिणस्यां, पतेत् जिह्विकया नगात् ॥ २३२ ॥
सा च प्रणालिकारूपा, भात्यर्धक्रोशमेदुरा । द्विक्रोशदीर्घा सक्रोशषट्योजनसुविस्तृता ॥ २३३ ॥
वाज्रिकी व्यात्तमकरवक्त्राकारा तयाऽथ सा । सातिरेकं योजनानां, शतमेकं पतत्यधः ॥ २३४ ॥
योजनानि दशोद्विद्धे, षष्टिं च विस्तृतायते । कुण्डे गङ्गाप्रपाताख्ये, चारु मुक्तावलीसमा ॥ २३५ ॥

तथाहुः क्षमाश्रमणपादाः ।

आयामो विरुद्धंभो, सट्ठिं कुंडस्स जोअणा हुंति । नउअसयं किंचूणं, परिही दसजोअणोगाहो ॥

[इति बृहत्क्षेत्रसमास गाथा-२१८] ॥ श्री उमास्वातिकृतजम्बूद्वीपसमासे करणविभावनायां च मूले पण्णासं जोअणवित्थारो उवरि सट्ठी इति विशेषोऽस्ति ॥ इत्थं च कुण्डस्य यथार्थनामोपपत्तिरपि भवति । एवमन्येष्वपि यथायोग्यं ज्ञेयम् ॥

तच्च कुण्डं वेदिकया, वनखण्डेन वेष्टितम् । पूर्वापरादक्षिणासु, सोपानश्रेणिशोभितम् ॥ २३६ ॥
सोपानश्रेणयः सर्वा, वज्रस्तम्भाः सतोरणाः । रत्नालम्बनबाहाढ्या, रैरुप्यफलकाञ्चिताः ॥ २३७ ॥
गङ्गाद्वीपश्च भात्यस्मिन्, द्वौ क्रोशावुच्छ्रितो जलात् । अष्टौ च योजनान्येष, विष्कम्भायामतो मतः ॥ २३८ ॥
गङ्गाद्वीपोपरि गङ्गाभवनं पीठिकादियुक् । स्वरूपतो मानतश्च, श्रीदेवीभवनोपमम् ॥ २३९ ॥
दाक्षिणात्यतोरणेन, गङ्गाप्रपातकुण्डतः । निर्गत्य वैताढ्योपान्ते, नदीसप्तसहस्रयुक् ॥ २४० ॥
खण्डप्रपातप्राग्भागे, भित्त्वा वैताढ्यभूधरम् । दाक्षिणात्यसप्तनदीसहस्रपरिवारिता ॥ २४१ ॥
एवं चतुर्दशनदीसहस्रापूरिताभितः । पूर्वतो जगतीं भित्त्वा, गङ्गा विशति वारिधिम् ॥ २४२ ॥
सक्रोशानि योजनानि, षडस्या ह्रदनिर्गमे । व्यासः क्रोशार्धमुद्वेधः, कुण्डपातावधिः स च ॥ २४३ ॥

तथोक्तं जम्बुद्वीपप्रज्ञप्तिसूत्रे । गंगाणं महानई पवाहे छ सक्कोसाइं जोअणाइं विक्खंभेणं पणत्ता अद्धकोसं उव्वेहेणं ॥ समवायाङ्गे तु । गंगासिन्धुओ नईओ णं पवहे सातिरेगाइं चउवीसं कोसाइं वित्थरेणं पणत्ते । इत्युक्तम् ।

कुण्डोद्गमादनु व्यासो, योजनं योजनं प्रति । पार्श्वद्वये समुदितो, धनूंषि दश वर्द्धते ॥ २४४ ॥
एवं च–
वारिधेः संगमे सार्द्धा, द्वाषष्टिर्योजनान्यसौ । मौलाद्दशघ्नो यद्व्यासो, नदीनामब्धिसङ्गमे ॥ २४५ ॥
व्यासात् पञ्चाशत्तमोऽशः, सर्वत्रोद्वेध ईरितः । क्रोशस्यार्द्धं ततो मूले, प्रान्ते सक्रोशयोजनम् ॥ २४६ ॥
वेदिकावनखण्डौ च, प्रत्येकं पार्श्वयोः द्वयोः । महानदीनां सर्वासां, दृष्टौ दृष्टजगत्त्रयैः ॥ २४७ ॥

तथोक्तं जम्बूद्वीपप्रज्ञप्तिसूत्रे गङ्गावर्णने । उभओ पासिं दोहिं पउमवरवेइयाहिं दोहिं वणखंडेहिं संपरिक्खित्ता वेइयावणखंडवण्णओ भाणियव्वो इति ।

अथ गङ्गामहानद्या, यत्राम्भोनिधिसंगमः । तत्र तीर्थं मागधाख्यं, तस्येशो मागधः सुरः ॥ २४८ ॥
एवं सिन्धुनदीवार्द्धियोगे प्रभासनामकम् । एतयोरन्तराले च, वरदामं पयोनिधौ ॥ २४९ ॥

तथोक्तं जम्बूद्वीपप्रज्ञप्तिवृत्तौ । गङ्गा मागधतीर्थस्थाने समुद्रं प्रविशति तथा प्रभासनामतीर्थस्थाने सिन्धुनदी समुद्रं प्रविशति ॥

तीर्थं नामावतरणमार्गोऽम्भोधौ तटाकवत् । तीर्थस्यार्थो भाव्य एवं, शीताशीतोदयोरपि ॥ २५० ॥

तदुक्तं स्थानाङ्गवृत्तौ । "तीर्थानि चक्रवर्तिनः समुद्रशीतादिमहानद्यवतारलक्षणानि तन्नामकदेवनिवासभूतानि । तत्र भरतैरवतयोर्तानि पूर्वदक्षिणापरसमुद्रेषु । विजयेषु तु शीताशीतोदामहानद्योः पूर्वादिक्रमेणैव । इति तृतीये स्थानके ॥

एषां तीर्थसदृक्नाम्नां, देवानां स्वस्वतीर्थतः । योजनेषु द्वादशसु, राजधान्यः पयोनिधौ ॥ २५१ ॥
कृताष्टमतपाश्चकी, रथनाभिस्पृगम्भसि । स्थित्वा वार्धौ स्वनामाङ्कशरं मुक्त्वा जयत्यमून् ॥ २५२ ॥
प्रतीच्यतोरणेनाथ, हृदात्तस्माद्विनिर्गता । गत्वा प्रतीच्यामावृत्ता, सिन्ध्वावर्तनकूटतः ॥ २५३ ॥
दक्षिणाभिमुखी शैलात्, कुण्डे निपत्य निर्गता । प्रत्यग्भागे तमिस्राया, भित्त्वा वैताढ्यभूधरम् ॥ २५४ ॥
ततः पश्चिमदिग्भागे, विभिद्य जगतीमधः । विशत्यम्भोनिधिं सिन्धुर्गङ्गास्वसेव युग्मजा ॥ २५५ ॥
गङ्गावत् सर्वमस्याः स्यादारभ्य हृदनिर्गमात् । स्वरूपमब्धिसङ्गान्तं, सिन्धुनामविशेषितम् ॥ २५६ ॥
वैताढ्यतो दक्षिणस्यां, सरितोः सिन्धुगङ्गयोः । बिलानि स्युर्नव नव, पूर्वपश्चिमकूलयोः ॥ २५७ ॥
उदीच्यामपि षट्त्रिंशत्, तथैव तटयोस्तयोः । कल्पान्तेऽत्रादिबीजानां, स्थानानीति द्विसप्ततिः ॥ २५८ ॥
पञ्चस्वेवं भरतेषु, पञ्चस्वैरवतेषु च । बिलानि भावनीयानि, द्विसप्ततिः द्विसप्ततिः ॥ २५९ ॥
औत्तराहतोरणेन, तस्मात् पद्महृदादथ । निर्गता रोहितांशाख्योत्तराशाभिमुखी नदी ॥ २६० ॥
द्वे योजनशते युक्ते, षट्सप्तत्या कलाश्च षट् । पर्वतोपर्यतिक्रम्य, वज्रजिव्हिकया नगात् ॥ २६१ ॥
रोहितांशाप्रपाताख्ये, कुण्डे निपत्य हारवत् । उदीच्यतोरणेनास्मान्निर्गतोत्तरसंमुखी ॥ २६२ ॥
मार्गे चतुर्दशनदीसहस्रपरिवारिता । तत्रत्यवृत्तवैताढ्यं, मुक्त्वा क्रोशद्वयान्तरे ॥ २६३ ॥
स्थानात्ततः परावृत्य, प्रस्थिता पश्चिमामुखी । पुनश्चतुर्दशनदीसहस्रसेविताभितः ॥ २६४ ॥
अष्टाविंशत्या सहस्रैः, नदीभिरेवमन्विता । द्वेधा विदधती हैमवतस्यार्द्धं च पश्चिमम् ॥ २६५ ॥
अधो विभिद्य जगतीं, याति पश्चिमवारिधिम् । गङ्गासिन्ध्वोः सपत्नीव, द्विगुणर्द्धिः पतिप्रियाः ॥ २६६ ॥
कुण्डाद्विनिर्गमं यावदारभ्य हृदनिर्गमात् । सार्द्धानि योजनान्यस्या, विष्कम्भो द्वादशोदितः ॥ २६७ ॥
गव्यूतमेकमुद्वेधस्ततः कुण्डोद्गमादनु । प्रतियोजनमेकैकपार्श्वे व्यासो विवर्द्धते ॥ २६८ ॥
कोदण्डानि दशदशोभयतस्तानि विंशतिः । लवः पञ्चाशत्तमश्च, व्यासस्योद्वेध आहितः ॥ २६९ ॥
योजनानां शतं चैवं, सपादमब्धिसंगमे । व्यासोऽस्याः क्रोशदशकमुद्वेधश्च प्रजायते ॥ २७० ॥
व्यासायामौ जिव्हिकायाः, सार्द्धा द्वादशयोजनी । बाहल्यमस्या निर्दिष्टमेकक्रोशमितं जिनैः ॥ २७१ ॥
सविंशं योजनशतं, कुण्डस्यायतिविस्तृती । द्वीपस्यायामविष्कम्भौ, योजनानीह षोडश ॥ २७२ ॥
अस्यां प्रपातकुण्डस्योद्वेधो द्वीपस्य चोच्छ्रयः । भवनस्य स्वरूपं च, ज्ञेयं गङ्गासमं बुधैः ॥ २७३ ॥
गिरेर्हिमवतोऽथास्य, प्राचीनपश्चिमान्तयोः । लवणोदजलस्पर्शादारभ्य किल निर्गता ॥ २७४ ॥

दाढैकैका विदिशासु, गजदन्तसमाकृतिः । ऐशान्यामथ चाग्नेय्यां, नैर्ऋत्यां वायुकोणके ॥ २७५ ॥
ऐशान्यां तत्र जगतीपर्यन्ताल्लवणोदधौ । दाढायां योजनशतत्रयस्य समतिक्रमे ॥ २७६ ॥
द्वीप एकोरुकाख्योऽस्ति, योजनानां शतत्रयम् । विष्कम्भायामतः पद्मवेदिकावनमण्डितः ॥ २७७ ॥
किञ्चिदूनैकोनपञ्चाशता समधिका किल । योजनानां नवशती, परिक्षेपोऽस्य कीर्त्तितः ॥ २७८ ॥
अस्य जम्बूद्वीपदिशि, जलोपरि समुच्छ्रयः । सार्द्धं द्वयं योजनानां, भागाश्चोपरि विंशतिः ॥ २७९ ॥
पञ्चनवतिभक्तस्य, योजनस्य तथोच्छ्रयः । लवणाम्भोधि दिश्यन्ते, क्रोशद्वयमुदीरितः ॥ २८० ॥
तत्रैव दाढायां तस्मात्, द्वीपाच्चतुःशतोत्तरः । हयकर्णाभिधो द्वीपश्चतुःशतायतस्ततः ॥ २८१ ॥
शतानि द्वादश न्यूनपञ्चषष्ठियुतानि च । परिक्षेपोऽस्याब्धिदिशि, द्वौ क्रोशावुच्छ्रयो जलात् ॥ २८२ ॥
योजनानां द्वयं सार्द्धं, नवत्यांशैः समन्वितम् । अस्य जम्बूद्वीपदिशि, ख्यातः खलु समुच्छ्रयः ॥ २८३ ॥
अत्रायमाम्नायः ।
पूर्वद्वीपपरिक्षेपे, योजनानां त्रिभिः शतैः । षोडशाढ्यैः संकलिते, परिक्षेपोऽग्रिमो भवेत् ॥ २८४ ॥
तथा, जम्बूद्वीपदिशि जलात्प्राग्द्वीपे यः समुच्छ्रयः । स पाञ्चनवतेयांशसप्तत्या संयुतोऽग्रिमे ॥ २८५ ॥
जम्बूद्वीपजगत्याश्च, द्वीपस्यास्य मिथोऽन्तरम् । कर्णभूमिरूपमुक्तं, योजनानां चतुःशती ॥ २८६ ॥
तत्रैव दाढायां तस्मात्, द्वीपात् पञ्चशतान्तरः । आदर्शमुखसंज्ञोऽस्ति, द्वीपः पञ्चशतायतः ॥ २८७ ॥
तावदेव च विस्तीर्णा, जगत्यास्तावदन्तरः । सैकाशीतिः पञ्चदशशती परिरयोऽस्य च ॥ २८८ ॥
जम्बूद्वीपदिशि भवेत्, जलादस्य समुच्छ्रयः । सार्द्धा त्रियोजनी भागाः, पञ्चषष्टिः पुरोदिताः ॥ २८९ ॥
द्वौ क्रोशौ लवणदिशि, जलादस्य समुच्छ्रयः । दाढायां पुनस्तत्रैवातीत्य योजनषट्शतीम् ॥ २९० ॥
षट्योजनशतायामविष्कम्भोऽश्वमुखाभिधः । द्वीपो भाति शतैः षड्भिर्जगत्या दूरतः स्थितः ॥ २९१ ॥
योजनत्रितयोनानि, शतान्येकोनविंशतिः । द्वीपस्यास्य परिक्षेपः, प्रोक्तः शास्त्रपरीक्षकैः ॥ २९२ ॥
सार्द्धां चतुर्योजनीं सच्चत्वारिंशल्लवाधिकाम् । द्वीपदिश्युन्नतोऽद्भ्योऽब्धिदिशि तु क्रोशयामलम् ॥ २९३ ॥
सप्तभिः योजनशतैरस्ति द्वीपस्ततः परम् । अश्वकर्णाभिधः सप्तशतान्यायतविस्तृतः ॥ २९४ ॥
जगत्यास्तावता दूरे, जम्बूद्वीपदिशि स्फुटम् । योजनान्यर्द्धषष्ठानि, भागान् पञ्चदशोच्छ्रितः ॥ २९५ ॥
द्वौ क्रोशौ परतो व्यक्तः, परिक्षेपस्तथास्य च । द्वे सहस्रे द्वे शते च, योजनानि त्रयोदश ॥ २९६ ॥
अतीत्य योजनशतान्यष्टौ द्वीपात्ततः परम् । द्वीप उल्कामुखोऽस्त्यष्टौ, शतान्यायतविस्तृतः ॥ २९७ ॥
जगत्या दूरतोऽष्टाभिर्योजनानां शतैः स्थितः । अम्भोनिधेर्दिशि जलादुच्छ्रितः क्रोशयोर्द्वयम् ॥ २९८ ॥
अर्धषष्ठयोजनानि, पञ्चाशीतिं तदाधिकान् । भागान् पाञ्चनवतेयान्, जम्बूद्वीपदिशि स्फुटः ॥ २९९ ॥
एकोनत्रिंशदाढ्यानि, शतानि पञ्चविंशतिः । योजनानि परिक्षेपो, द्वीपस्यास्य निरूपितः ॥ ३०० ॥

योजनानां नवशतान्यतिक्रम्य ततः परम् । शतानि नव विस्तीर्णायतोऽस्ति घनदन्तकः ॥ ३०१ ॥
नवयोजनशत्यासौ, जगत्याः परिधिस्त्विह । शतानि पञ्चचत्वारिंशान्यष्टाविंशतिः किल ॥ ३०२ ॥
साद्धाँ षड्योजनीं तादृक्षष्टिभागसमन्विताम् । जम्बूद्वीपदिशि व्यक्तो, दिश्यब्धेस्त्वर्द्धयोजनम् ॥ ३०३ ॥
एवं च, एकोरुको हयकर्णस्तथादर्शमुखोऽपि च । अश्वमुखाश्वकर्णाल्कामुखाश्च घनदन्तकः ॥ ३०४ ॥
द्वीपाः सप्त यथैशान्यां, दाढायां कथिता इमे । तावदायामविष्कम्भाः, तावत्परस्परान्तराः ॥ ३०५ ॥
जगत्यास्तावता दूरे, तावदेवोच्छ्रिता जलात् । तथैव सप्त सप्त स्युराग्नेय्यादिविदिक्त्रये ॥ ३०६ ॥
एषां क्रमे स्वरूपे च, न विशेषो मनागपि । विशेषः केवलं नाम्नां, तान्येतानि यथाक्रमम् ॥ ३०७ ॥
आभासिको गजकर्णो, मेंढहस्तिमुखौ तथा । हरिकर्णो मेघमुखो, लष्टदन्तोऽग्निकोणके ॥ ३०८ ॥
वैषाणिकश्च गोकर्णस्तथायःसिंहतो मुखौ । अकर्णो विद्युन्मुखश्च, नैर्ऋत्यां गूढदन्तकः ॥ ३०९ ॥
वायव्यां नाङ्गोलिकाख्यः, शष्कुलीकर्ण इत्यपि । गोमुखो व्याघ्रमुखश्च, कर्णप्रावरणाभिधाः ॥ ३१० ॥
विद्युद्दन्तशुद्धदन्तावष्टाविंशतिरित्यमी । विराजन्तेऽन्तरद्वीपा, हिमवद्गिरिनिश्रया ॥ ३११ ॥
तावन्त एव शिखरिगिरेर्दाढाचतुष्टये । तथैव संस्थिता एवं, षट्पञ्चाशत् भवन्त्यमी ॥ ३१२ ॥
प्रत्येकमेते सर्वेऽपि, वेदिकावनमण्डिताः । समानं च तयोर्मानं, जगतीवेदिकावनैः ॥ ३१३ ॥
द्वीपेषु सर्वेष्वेतेषु, नरास्तिष्ठन्ति युग्मिनः । अष्टचापशतोत्तुङ्गाः, पल्यासंख्यांशजीविनः ॥ ३१४ ॥
दिनान्यशीतिमेकोनां, विहितापत्यपालनाः । चतुष्षष्ट्या लसत्पृष्टकरण्डकैस्सुशोभिताः ॥ ३१५ ॥
चतुर्थभक्ताहाराश्च, कल्पद्रुफलभोजिनः । सुन्दराकृतयो रागद्वेषशोकरुजोज्झिताः ॥ ३१६ ॥
युग्मं सुतसुतारूपं, षण्मासशेषजीविताः । प्रसूय यान्ति त्रिदिवमन्ते मृत्वा समाधिना ॥ ३१७ ॥
एवं वक्ष्यमाणहैमवतादियुग्मिनोऽपि हि । षण्मासशेषे सुवतेऽपत्यान्यायुषि नान्यथा ॥ ३१८ ॥

तथोक्तं प्रथमारकस्वरूपाधिकारे जम्बूद्वीपप्रज्ञप्तावन्तरद्वीपाधिकारे जीवाभिगमे च ।
"छम्मासावसेसाउआ जुगलं पसवंती"ति ॥ इति हिमवान् पर्वतः ॥

क्षेत्रं विभाति हिमवन्महाहिमवदन्तरे । अविभक्तं द्रव्यमिव, द्वाभ्यां ताभ्यां सुरक्षितम् ॥ ३१९ ॥
द्वाभ्यां पूर्वापरान्ताभ्यां, संस्पृष्टलवणार्णवम् । हारि हैमवताभिख्यं, वर्यपर्यङ्कसंस्थितम् ॥ ३२० ॥
ददाति हेम युग्मिभ्यः, आसनादितया ततः । यद्वा देवो हैमवतः, स्वामी हैमवतं ततः ॥ ३२१ ॥
द्वे सहस्रे योजनानां, शतं पञ्चोत्तरं तथा । कलाः पञ्चैव विष्कम्भः, क्षेत्रस्यास्य निरूपितः ॥ ३२२ ॥
तथा शतानि षट्त्रिंशच्चतुरशीतिरेव च । योजनानि चतस्रश्च, कलाः शर इह स्मृतः ॥ ३२३ ॥
सप्तत्रिंशत्सहस्राणि, योजनानां शतानि षट् । चतुः सप्ततिरस्य ज्या, न्यूनाः कलाश्च षोडश ॥ ३२४ ॥
अष्टात्रिंशत्सहस्राणि, तथा सप्तशतानि च । चत्वारिंशानि कोदण्डपृष्टमस्य कला दश ॥ ३२५ ॥

सहस्राः षट् सप्तशती, पञ्चपञ्चाशदन्विता । तिस्रः कलाश्च बाहात्र, प्रत्येकं पार्श्वयोर्द्वयोः ॥ ३२६ ॥
अत्र क्षेत्रफलं कोट्यः, षट् लक्षाणि द्विसप्ततिः । त्रिपञ्चाशत् सहस्राणि, योजनानां शतं तथा ॥ ३२७ ॥
पञ्चचत्वारिंशदाढ्यं, कलाः पञ्च तथोपरि । अष्टौ च विकलाः प्रोक्तं, खण्डैर्योजनसम्मितैः ॥ ३२८ ॥
सर्वरत्नमयो वृत्तवैताढ्यो धरणीधरः । मध्यभागे विभात्यत्र, पल्यवत्सर्वतः समः ॥ ३२९ ॥
जम्बूद्वीपसंग्रहणीवृत्तौ तु पञ्चवर्णरत्नमयः ।
नाम्ना च शब्दापातीति, सहस्रयोजनोन्नतः । शतान्यर्द्धतृतीयानि, स निमग्नो भुवोऽन्तरे ॥ ३३० ॥
सहस्रयोजनायामविष्कम्भः परिवेषतः । त्रयः सहस्रा द्वाषष्ट्या, योजनानां शतं युतम् ॥ ३३१ ॥
अभितोऽयं गिरिः पद्मवेदिकावनमण्डितः । प्रासादो भात्युपर्यस्य, स्वरूपं तस्य पूर्ववत् ॥ ३३२ ॥
स्वातिनामा सुरस्तस्य, स्वाम्येकपल्यजीवितः । राजधान्यादिकं त्वस्य, सर्वं विजयदेववत् ॥ ३३३ ॥

अयं क्षेत्रसमासाभिप्रायः, यत्तु जम्बूद्वीपप्रज्ञप्त्यामत्र शब्दापातिनामा देव उक्तस्तन्नामान्तरं वा मतान्तरं वेति सर्वविद्वेद्यम् ॥

द्विधा विभक्तं गिरिणानेन हैमवतं किल । पूर्वहैमवतं चैवापरहैमवतं तथा ॥ ३३४ ॥
पुनरेकैकमर्धं तत्, सरिद्भ्यां विहितं द्विधा । रोहितांशारोहिताभ्यां, स्नुषाभ्यामिव मन्दिरम् ॥ ३३५ ॥
दक्षिणार्द्धं चोत्तरार्द्धं, इति जातं चतुर्विधम् । षट्पञ्चाशत्सहस्राणि, द्व्युत्तराण्यत्र निम्नगाः ॥ ३३६ ॥
क्षेत्रानुभावतस्तत्र, भूः शर्करादिजित्वरी । चक्रीभोज्यजिदास्वादफलपुष्पाः सुरद्रुमाः ॥ ३३७ ॥
येऽपि यूका मत्कुणाद्या, लोकसन्तापकारिणः । यक्षभूतामयाद्युत्था, दोषास्तत्र न सन्ति ते ॥ ३३८ ॥
भवन्त्यहिंसका व्याघ्रसिंहाद्याः स्वर्गगामिनः । उद्गतान्यपि धान्यानि, नराणां नोपभुक्तये ॥ ३३९ ॥
मनुजास्तत्र गव्यूतोत्तुङ्गाः पल्योपमायुषः । उत्कर्षतो जघन्याच्च, देशोनपल्यजीविनः ॥ ३४० ॥
चतुःषष्टिपृष्टकरण्डकाः सुन्दरभूघनाः । दिनान्यशीतिमेकोनां, विहितापत्यपालनाः ॥ ३४१ ॥
सत्यपि स्वर्णरत्नादौ, ममत्वावेशवर्जिताः । सतामपि गजादीनामग्रहात् पादचारिणः ॥ ३४२ ॥
विचक्षणाश्चारुवेषाः, प्रेष्यप्रेषकतोज्झिताः । चतुर्थान्ते चामलकफलप्रमितभोजिनः ॥ ३४३ ॥
आद्यसंहननाः पृथ्वीस्वर्द्रुपुष्पफलाशिनः । प्रकृत्या प्रतनुद्वेषरागाः स्वर्लोकयायिनः ॥ ३४४ ॥
बद्धस्नेह इवैतस्मिन्, कालः सुषमदुःषमा । सार्वदीनस्तत्स्वरूपं काललोके प्रवक्ष्यते ॥ ३४५ ॥
इति हैमवतक्षेत्रम् ॥

अस्योत्तरान्ते च महाहिमवान्नाम पर्वतः । सर्वरत्नमयो भाति, द्वियोजनशतोन्नतः ॥ ३४६ ॥

अयं जम्बूद्वीपप्रज्ञप्त्यभिप्रायः ॥ बृहत्क्षेत्रविचारादौ त्वस्य पीतस्वर्णवर्णमयत्वमुक्तमिति मतान्तरमवसेयम् । अनेनैव च मतान्तराभिप्रायेण जम्बूद्वीपपट्टादावस्य पीतवर्णत्वं दृश्यते इति ॥

पञ्चाशतं योजनानि, स निमग्नो धरान्तरे । पूर्वापराम्भोनिधिस्पृक्, प्रमिमासुरिवान्तरम् ॥ ३४७ ॥
योजनानां सहस्राणि, चत्वार्यस्य शतद्वयम् । दशोत्तरं दश कला, विष्कम्भोऽथ शरं ब्रुवे ॥ ३४८ ॥
योजनानां सहस्राणि, सप्तैवाष्टौ शतानि च । चतुर्नवत्युपेतानि, चतुर्दश तथा कलाः ॥ ३४९ ॥
त्रिपञ्चाशत्सहस्राणि, शतानी नव चोपरि । एकत्रिंशद्योजनानि, ज्यास्य सार्धाश्च षट् कलाः ॥ ३५० ॥
सहस्राः सप्तपञ्चाशत्त्रिनवत्यधिकौ शतौ । महाहिमवति प्रोक्तं, धनुःपृष्ठं कला दश ॥ ३५१ ॥
सहस्राणि नव शतद्वयं षट्सप्ततिस्तथा । सार्द्धा नव कलाः प्रोक्ता, बाहास्यैकैकपार्श्वतः ॥ ३५२ ॥
एकोनविंशतिः कोट्यो, योजनानां समन्विताः । अष्टपञ्चाशता लक्षैरष्टषष्ट्या सहस्रकैः ॥ ३५३ ॥
शतं च षडशीत्याढ्यं, कला दश तथाधिकाः । विकलाः पञ्च शैलेस्मिन्, गणितं प्रतरात्मकम् ॥ ३५४ ॥
शतान्येकोनचत्वारिंशत्यकोटीनां तथा पराः । कोट्यः सप्तदश लक्षाः, षट्त्रिंशदथ चोपरि ॥ ३५५ ॥
सप्तत्रिंशत्यसहस्राणि, त्रिशती सहिताष्टभिः । विकला द्वादशेत्युक्तं, महाहिमवतो घनम् ॥ ३५६ ॥
कूटान्यष्टौ पर्वतेऽस्मिन्, सिद्धायतनमादिमम् । महाहिमवदाह्वानं, तथा हैमवताभिधम् ॥ ३५७ ॥
रोहिताख्यं च ह्रीकूटं, हरिकान्ताभिधं तथा । हरिवर्ष च वैडूर्यं, कूटानि हिमवद्गिरेः ॥ ३५८ ॥
पूर्वापरायतश्रेण्याः, स्थितिर्मानं च पूर्ववत् । प्राग्वत्सिद्धायतने च, प्रासादः शाश्वतोऽर्हताम् ॥ ३५९ ॥
शेषेषु देवदेवीनां, प्रासादास्तेऽपि पूर्ववत् । स्वरूपं राजधान्यश्च, प्राग्वत्तत्स्वामिनामपि ॥ ३६० ॥
महापद्महृदश्चास्योपरि मध्ये विराजते । द्वे सहस्रे योजनानामायामेनोदितः स च ॥ ३६१ ॥
एकं सहस्रं विस्तीर्णः, उद्विद्धो दशयोजनीम् । तस्य मध्ये पद्ममेकं, षट्परिक्षेपशोभितम् ॥ ३६२ ॥
पद्महृदाब्जतुल्यानि, पद्मान्येतानि संख्यया ॥ विष्कम्भायामबाहल्यैर्द्विगुणानि ततः पुनः ॥ ३६३ ॥
तत्समानोद्विद्धतया, हृदस्यास्य कजान्यपि । तावदेवोच्छ्रितानि स्युरेवमग्रेऽपि भाव्यताम् ॥ ३६४ ॥
मूलपद्मे च भवनं, श्रीदेवीभवनोपमम् । ह्रीदेवी च वसत्यस्मिन्नेकपल्योपमस्थितिः ॥ ३६५ ॥
दाक्षिणात्यतोरणेन, महापद्महृदात्ततः । निर्गता रोहिता नाम्नी, दक्षिणाभिमुखी नदी ॥ ३६६ ॥
सहस्रं योजनानां षट्शतीं पञ्चसमन्विताम् । कलाः पञ्च दक्षिणस्यां, सा गत्वा पर्वतोपरि ॥ ३६७ ॥
वज्रजिह्विकया शैलात्, प्रवाहेण पतत्यधः । सद्रोहिताप्रपाताख्ये, कुण्डे रज्जुरिवावटे ॥ ३६८ ॥
अत्रायमाम्नायः ।
व्यासं हृदस्य संशोध्य, गिरिव्यासेऽर्द्धिते च यत् । तावन्नदीनां क्रमणं गिरौ, स्याद्दक्षिणोत्तरम् ॥ ३६९ ॥
दाक्षिणात्यतोरणेन, तस्मान्निर्गत्य कुण्डतः । प्राच्यं हेमवतस्यार्द्धं, द्वेधा विदधती किल ॥ ३७० ॥
क्रोशद्वयेनासंप्राप्ता, शब्दापातिमहीधरम् । आलीव रोहितांशाया, हृष्टागात्पूर्वसंमुखी ॥ ३७१ ॥
अष्टाविंशत्या सहस्रैः, नदीभिः परिवारिता । अधो विभिद्य जगतीं, पूर्वाब्धिं याति रोहिता ॥ ३७२ ॥

प्रवाहजिह्विकाकुण्डद्वीपादिषु भवेदिह । विष्कम्भदैर्ध्योद्वेधादि, रोहितांशासमं समम् ॥ ३७३ ॥
औत्तराहतोरणेन, महापद्महृदात्ततः । हरिकान्तेति तटिनी, निर्गतोत्तरसन्मुखी ॥ ३७४ ॥
पूर्वोक्तमानमुल्लंघ्य, गिरिं सोत्तरसन्मुखम् । हरिकान्ताप्रपाताख्ये, कुण्डे पतति जिह्वया ॥ ३७५ ॥
औत्तराहतोरणेन, तस्मान्निर्गत्य कुण्डतः । अष्टाविंशत्या सहस्रैर्नदीभिः पथि संभृता ॥ ३७६ ॥
गन्धापातिनमप्राप्तान्तरितं योजनेन सा । स्मृतप्रयोजनेवेतः, प्रस्थिता पश्चिमामुखी ॥ ३७७ ॥
अष्टाविंशत्या सहस्रैर्नदीभिः पुनराश्रिता । एवं नदीनां षट्पञ्चाशता सहस्रकैर्वृता ॥ ३७८ ॥
हरिवर्षपश्चिमार्धं, द्वेधा विदधती किल । अधो विभिद्य जगतीं, पतिता पश्चिमाम्बुधौ ॥ ३७९ ॥
योजनानि ध्रुवं पञ्चविंशतिर्हृदनिर्गमे । विष्कम्भोऽस्या योजनार्धं, चोद्वेधः कुण्डसीमया ॥ ३८० ॥
ततश्च वर्धते व्यासो, धनूंषि प्रतियोजनम् । एकतो विंशतिश्चत्वारिंशच्चोभयतः पुनः ॥ ३८१ ॥
एवं च द्वे शते सार्धे, योजनान्यब्धिसंगमे । विष्कम्भोऽस्यास्तत्र पुनरुद्वेधः पञ्चयोजनी ॥ ३८२ ॥
योजनायामबाहल्या, जिह्विकास्याः प्रकीर्त्तिता । विष्कम्भतः पुनः पञ्चविंशतिर्योजनान्यसौ ॥ ३८३ ॥
द्वे शते योजनानां च, चत्वारिंशत्समन्विते । कुण्डस्यायामविष्कम्भावुद्वेधो दशयोजनी ॥ ३८४ ॥
द्वीपस्यायामविष्कम्भौ, द्वात्रिंशद्योजनानि च । जलात्समुच्छ्रयः क्रोशद्वयं शेषं तु पूर्ववत् ॥ ३८५ ॥
इति महाहिमवान् पर्वतः ॥
उत्तरस्यां हरिवर्षं, महाहिमवतो गिरेः । प्रौढपर्यङ्कसंस्थानमन्ताभ्यां वारिधिं स्पृशत् ॥ ३८६ ॥
व्यासोऽस्याष्टौ सहस्राणि, योजनानां चतुःशती । तथैकविंशतिश्चैका, कलाऽत्राथ शरं ब्रुवे ॥ ३८७ ॥
सहस्रां षोडश त्रीणि, योजनानां शतानि च । युक्तानि पञ्चदशभिः, कलाः पञ्चदशोपरि ॥ ३८८ ॥
त्रिसप्ततिः सहस्राणि, जीवा नवशतानि च । एकोत्तराण्यथ कलाः, सार्द्धाः सप्तदशोपरि ॥ ३८९ ॥
धनुःपृष्ठं सहस्राणि, चतुरशीतिरेव च । षोडशाढ्यान्यथ कलाश्चतस्रः परिकीर्त्तिताः ॥ ३९० ॥
त्रयोदश सहस्राणि, त्रिशती चैकषष्टियुक् । योजनानां षट् कलाश्च, सार्द्धा बाहैकपार्श्वतः ॥ ३९१ ॥
चतुःपञ्चाशच्च कोट्यो, योजनानां तथा पराः । सप्तचत्वारिंशदेव, लक्षाः किल तथोपरि ॥ ३९२ ॥
त्रिसप्ततिः सहस्राणि, सप्तत्याढ्याऽष्टशत्यथ । कलाः सप्तात्र सकलं, गणितं प्रतरात्मकम् ॥ ३९३ ॥
मध्येऽस्य गन्धापातीति, वृत्तवैताढ्यपर्वतः । स्वरूपमस्य पूर्वोक्तशब्दापातिसमं समम् ॥ ३९४ ॥
पद्मनामा सुरस्त्वस्य, स्वाम्येकपल्यजीवितः । स्वरूपं सर्वमेतस्य, ज्ञेयं विजयदेववत् ॥ ३९५ ॥
लक्षमेकं सहस्राश्च, द्वादश द्व्यधिका इह । हरिवर्षाभिधक्षेत्रे, नद्यः प्रोक्ता जिनेश्वरैः ॥ ३९६ ॥
क्षेत्रे पुनर्वसन्त्यत्र, नरा युगलधर्मिणः । क्रोशद्वयसमुत्तुङ्गाः सल्लक्षणा विचक्षणाः ॥ ३९७ ॥
आयुरुत्कर्षतस्त्वेषां, पूर्णं पल्योपमद्वयम् । पल्योपमासंख्यभागहीनं तच्च जघन्यतः ॥ ३९८ ॥

तेऽसकृत् षष्ठभक्तान्ते, बदरप्रमिताशिनः । अष्टाविंशं शतं तेषां, देहे पृष्ठकरण्डकाः ॥ ३९९ ॥
चतुःषष्टिं च दिवसान्, विधायापत्यपालनाम् । स्वर्लोकमेव ते यान्ति, कालश्च सुषमान्वहम् ॥ ४०० ॥
क्षेत्रानुभावः सर्वं च, बलसंहननादिकम् । अनन्तगुणपर्यायं, ज्ञेयं हैमवतादिह ॥ ४०१ ॥
इति हरिवर्षक्षेत्रम् ॥
हरिवर्षस्योत्तरान्ते, निषधो नाम पर्वतः । स चतुर्योजनशतोऽत्तुङ्गो रक्तसुवर्णजः ॥ ४०२ ॥
योजनानां शतं भूमौ, मग्नोऽन्तस्स्पृष्टवारिधिः । दाक्षिणात्या भित्तिरिव, महाविदेहवेश्मनः ॥ ४०३ ॥
योजनानां सहस्राणि, षोडशाष्टौ शतानि च । द्विचत्वारिंशदाढ्यानि, विष्कम्भोऽस्य कलाद्वयम् ॥ ४०४ ॥
त्रयस्त्रिंशत्सहस्राणि, सप्तपञ्चाशता युतम् । शतमेकं सप्तदश, कलाश्च निषधे शरः ॥ ४०५ ॥
योजनानां सहस्राणि, चतुर्नवतिरेव च । षट्पञ्चाशं शतमेकं, प्रत्यञ्चास्य कलाद्वयम् ॥ ४०६ ॥
लक्षं चतुर्विंशतिश्च, सहस्राणि शतत्रयम् । षट्चत्वारिंशतोपेतं, धनुःपृष्ठं कला नव ॥ ४०७ ॥
विंशतिश्च सहस्राणि, पञ्चषष्टियुतं शतम् । सार्द्धं कलाद्वयं ज्ञेयं, बाहास्यैकैकपार्श्वतः ॥ ४०८ ॥
कोटीनां शतमेकं द्विचत्वारिंशच्च कोटयः । चतुःपञ्चाशच्च लक्षाः, षट्षष्टिश्च सहस्रकाः ॥ ४०९ ॥
सैकोनसप्ततिः पञ्चशती तथाधिकाः कलाः । अष्टादशास्य प्रतरगणितं भूवि कीर्तितम् ॥ ४१० ॥
सप्तपञ्चाशत्सहस्राः, कोटीनां कोटयः पराः । अष्टादश तथा लक्षाः, षट्षष्टिरथ चोपरि ॥ ४११ ॥
सहस्राणि योजनानां, सप्तविंशतिरेव च । शतानि नव सैकोनाशीतीन्यत्र भवेत् घनम् ॥ ४१२ ॥
सिद्धायतनकूटं च, द्वितीयं निषधाभिधम् । हरिवर्षाभिधं कूटं, पूर्वविदेहसंज्ञकम् ॥ ४१३ ॥
हरिकूटं धृतिकूटं, शीतोदाकूटमित्यपि । अपरविदेहकूटं, कूटं च रुचकाह्वयम् ॥ ४१४ ॥
निषधे नव कूटानि, श्रेण्या स्थितानि पूर्ववत् । आद्ये चैत्यं देवदेव्योऽन्येषु कूटसमाभिधाः ॥ ४१५ ॥
तिगिञ्छिस्तु पौष्परजस्तत्प्रधान इह ह्रदः । तिगिञ्छिनामा चत्वारि, सहस्राण्ययमायतः ॥ ४१६ ॥
विस्तीर्णश्च द्वे सहस्रे, उद्विद्धो दशयोजनीम् । पद्मह्रदसमसंख्यैः, पद्मैः संशोभितोऽभितः ॥ ४१७ ॥
विष्कम्भादि तु पद्मेभ्यस्तेभ्य एषां चतुर्गुणम् । यथात्र स्यान्मूलपद्मं, चतुर्योजनसम्मितम् ॥ ४१८ ॥
भवनं मूलपद्मेऽत्र, श्रीदेवीभवनोपमम् ॥ धीदेवी स्वामिनी तस्य, सैकपल्योपमस्थितिः ॥ ४१९ ॥
दाक्षिणात्यतोरणेन, तिगिञ्छिह्रदतोऽमुतः । तटिनी हरिसलिला, निर्गता दक्षिणामुखी ॥ ४२० ॥
योजनानां सहस्राणि, सप्तोपरि शतानि च । चत्वारि चैकविंशानि, कलां च पर्वतोपरि ॥ ४२१ ॥
गत्वासौ हरिसलिलाकुण्डे पतति पर्वतात् । दक्षिणेन तोरणेन, तस्मान्निर्गत्य कुण्डतः ॥ ४२२ ॥
हरिवर्षपूर्वभागं, विभजन्ती द्विधा किल । एकेन योजनेनार्वाक्, गन्धापातिधराधरात् ॥ ४२३ ॥
चलिता प्राङ्मुखीभूय, विशति प्राच्यवारिधौ । षट्पञ्चाशच्छैवलिनीसहस्रैः परिवारिता ॥ ४२४ ॥

प्रमाणं जिह्विकाकुण्डद्वीपप्रवाहवृद्धिगम् । हरिकान्तासमं सर्वं, ज्ञेयमत्राविशेषितम् ॥ ४२५ ॥
औत्तराहतोरणेन, तिगिञ्छिहृदतस्ततः । शीतोदेति निर्झरिणी, निर्गतोत्तरसन्मुखी ॥ ४२६ ॥
प्रागुक्तमानमुल्लंघ्य, क्षेत्रं क्षितिधरोपरि । शीतोदाकुण्डे पतति, वज्रजिह्विकया नगात् ॥ ४२७ ॥
कुण्डादस्मादौत्तराहतोरणेनोत्तरामुखी । यान्ती कुरु हृदान् पञ्च, खलेव कुर्वती द्विधा ॥ ४२८ ॥
नदीसहस्रैश्चतुरशीत्या पथ्याश्रिता क्रमात् । यान्ती देवकुरुप्रान्ते, भद्रसालवनान्तरे ॥ ४२९ ॥
यावद्द्वाभ्यां योजनाभ्यां, सुमेरुर्दूरतः स्थितः । तावत्तत्संमुखं याता, कामुकीव रसाकुला ॥ ४३० ॥
वक्षस्कारगिरेर्विद्युत्प्रभस्याधोविभागतः । परावृत्ता पश्चिमातो, लज्जितेवाभिसारिका ॥ ४३१ ॥
द्वेधापरविदेहांश्च, कुर्वती सरितां श्रिता । अष्टाविंशत्या सहस्रैरेकैकविजयोद्गतैः ॥ ४३२ ॥
श्रिताम्भोधिप्रवेशे च, मूलतः सर्वसंख्यया । नदीनां पञ्चभिर्लक्षैः, सद्वात्रिंशत्सहस्रकैः ॥ ४३३ ॥
अधो जयन्तद्वारस्य, विभिद्य जगतीतटम् । प्रविष्टा पश्चिमाम्भोधौ, शीतोदाख्या महानदी ॥ ४३४ ॥
पञ्चाशद्योजनान्यस्या, विष्कम्भो हृदनिर्गमे । एकं योजनमुद्वेधः, स कुण्डनिर्गमावधिः ॥ ४३५ ॥
व्यासेऽशीतिश्च वर्धन्ते, धनूंषि प्रतियोजनम् । तत् पञ्चयोजनशतव्यासेयं वार्धिसंगमे ॥ ४३६ ॥
तत्रोद्वेधो योजनानि, दशैतस्याश्च जिह्विका । पञ्चाशद्विस्तृता द्वे च, योजने मेदुरायता ॥ ४३७ ॥
चत्वारि योजनशतान्यशीतिश्च तथोपरि । कुण्डस्यायामविष्कम्भौ, दशोद्वेधश्च कीर्त्तितः ॥ ४३८ ॥
चतुष्षष्टियोजनानि, द्वीपोऽस्या विस्तृतायतः । योजनार्द्धमुच्छ्रितोऽद्भ्यो, गङ्गावत् भवनादिकम् ॥ ४३९ ॥
शीतोप्येवं नीलवतो, निर्गता केसरिह्रदात् । शीताकुण्डे निपत्यातः, प्रस्थिता दक्षिणामुखी ॥ ४४० ॥
प्राग्वद्विदधती द्वेधा, पञ्चोत्तरकुरु हृदान् । नदीसहस्रैश्चतुरशीत्योदक्कुरुगैः श्रिताः ॥ ४४१ ॥
प्राप्तोत्तरकुरुप्रान्ते, भद्रसालवनं क्रमात् । असंप्राप्ता योजनाभ्यां, द्वाभ्यां मन्दरभूधरम् ॥ ४४२ ॥
गिरेर्माल्यवतोऽधस्तात्, प्रस्थिता पूर्वसंमुखी । द्वेधा विदधती पूर्वविदेहान् पथि चाश्रिता ॥ ४४३ ॥
अष्टाविंशत्या सहस्रैरेकैकविजयोद्गतैः । नदीनां पञ्चभिर्लक्षैः, सद्वात्रिंशत्सहस्रकैः ॥ ४४४ ॥
सर्वाग्रेणेति संयुक्ता, विभिद्य जगतीतटम् । द्वारस्य विजयस्याधो, विशति प्राच्यवारिधिम् ॥ ४४५ ॥
अस्या वार्धिप्रवेशान्तमारभ्य हृदनिर्गमात् । शीतोदया समं सर्वं, ज्ञातव्यमविशेषितम् ॥ ४४६ ॥
इति निषधपर्वतः प्रसङ्गात् शीतास्वरूपं च ॥

हिमवता महता च कनीयसा । जलधिना निषधेन च यत् त्रिधा ।
तदिह दक्षिणपार्श्वमिहोदितम् । बहुविधं नियतानियतारकैः ॥ ४४७ ॥

विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिष–द्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे सर्गो निर्गलितार्थसार्थसुभगः पूर्णः सुखं षोडशः ॥ ४४८ ॥

इति श्री लोकप्रकाशे षोडशः सर्गः समाप्तः ।

अथ सप्तदशः सर्गः ।

मध्ये द्वयोर्पर्वतयोर्नीलवन्निषधाख्ययोः । भात्यायतचतुरस्रं, क्षेत्रं महाविदेहकम् ॥ १ ॥
सर्वक्षेत्रगुरुत्वान्महाप्रमाणाङ्गजनयुतत्वात् वा । इदमुत महाविदेहाभिधसुरयोगान्महाविदेहाख्यम् ॥ २ ॥
त्रयस्त्रिंशद्योजनानां, सहस्राणि च षट्शति । युक्ता चतुरशीत्यास्य, व्यासः कलाचतुष्टयम् ॥ ३ ॥
वर्षवर्षधराद्रीणामन्येषां तु जिनेश्वरैः । अन्त्यप्रदेशपङ्क्तिर्या, सा जीवेति निरूपिता ॥ ४ ॥
अस्मिन्क्षेत्रे पुनर्मध्यप्रदेशपङ्क्तिरायता । सा प्रत्यञ्चा भवेत् पूर्णलक्षयोजनसम्मिता ॥ ५ ॥
ततश्चापेक्ष्य तां जीवां, धनुःपृष्ठं द्वयं भवेत् । तत्रैकं दक्षिणाब्धिस्पृगुत्तराब्धिश्रितं परम् ॥ ६ ॥
एवं शरोऽपि द्विविधो, दक्षिणोत्तरभेदतः । पूर्वापरैवं बाहापि, प्रत्येकं द्विविधा भवेत् ॥ ७ ॥
लक्षार्धं योजनान्यस्य, विशिखौ दक्षिणोत्तरौ । दाक्षिणात्येतरधनुःपृष्ठमानमथ ब्रुवे ॥ ८ ॥
अष्टपञ्चाशत्सहस्राधिकं योजनलक्षकम् । शतं त्रयोदशयुतं, सार्धाः कलाश्च षोडश ॥ ९ ॥
सहस्राः षोडशशतान्यष्टौ त्र्यशीतिरेकिका । बाहा त्रयोदश कलाः, कलातुर्यांशसंयुताः ॥ १० ॥
शतानि त्रीणि कोटीनां, कोटयः सप्तविंशतिः । लक्षाश्चतुर्दश तथा, सहस्राण्यष्टसप्ततिः ॥ ११ ॥
पञ्चभिश्चाभ्यधिकानि, योजनानां शतानि षट् । कलाद्वयं च विकला, एकादश तथोपरि ॥ १२ ॥
एतन्महाविदेहस्य, गणितं प्रतरात्मकम् । भव्यलोकोपकाराय, तत्त्वविद्भिर्निरूपितम् ॥ १३ ॥
महाविदेहक्षेत्रं तच्चतुर्धा वर्णितं जिनैः । पूर्वापरविदेहाश्च, द्विविधाः कुरवस्तथा ॥ १४ ॥
तत्र मेरोरुत्तरस्यामुत्तराः कुरवः स्मृताः । गन्धमादनसन्माल्यवतोरन्तर्गिरीन्द्रयोः ॥ १५ ॥
दक्षिणस्यां पुनर्देवकुरवः सुरभूभृतः । विद्युत्प्रभसौमनसगजदन्तनगान्तरे ॥ १६ ॥
मेरोश्च पूर्वतः पूर्वविदेहाः परिकीर्त्तिताः । तथापरविदेहाश्च, मेरोः पश्चिमतस्स्मृताः ॥ १७ ॥
शीतया सरिता पूर्वविदेहा विहिता द्विधा । कृताश्शीतोदयाऽप्येवं द्विधाऽपरविदेहकाः ॥ १८ ॥
अष्टौ पूर्वविदेहेषु, शीतोत्तरतटे किल । भवन्ति विजयाश्चक्रिजेयषट्खण्डलक्षिताः ॥ १९ ॥
अन्तर्नदीभिस्तिसृभिर्वक्षस्काराचलैस्तथा । चतुर्भिः कृतसीमानो, भवन्तीत्येवमष्ट ते ॥ २० ॥
शीताया दक्षिणतटे, तथैव विजयाष्टकम् । अष्टाष्टौ विजया एवं, शीतोदाकूलयोरपि ॥ २१ ॥
पूर्वार्धे च विदेहानां, मही करतलोपमा । ततो नद्यद्रिविजयास्समश्रेण्या स्थिता इह ॥ २२ ॥
अपरार्धे तु धरणी, वियोगिनीव हीयते । समभूमैस्समारभ्य, पश्चिमायां क्रमात्ततः ॥ २३ ॥

विजये नलिनावत्यां, वप्राख्ये चान्तवर्त्तिनः । सहस्रं योजनान्युण्डा, ग्रामा भवन्ति केचन ॥ २४ ॥
ततोऽधोलौकिकग्रामा, इति ते ख्यातिमैयरुः । तेषामन्ते स्थिता भूमिर्भित्ती रोद्धुमिवार्णवम् ॥ २५ ॥
तत्रैव जगतीभित्तिर्जयन्तद्वारराजिता । ऊर्द्ध्वं स्थिताधोग्रामाणां, दिदृक्षुरिव कौतुकम् ॥ २६ ॥
शीतोदापि स्त्रीस्वभावादिवाधोगामिनी क्रमात् । योजनानां सहस्रेऽब्धिं, याति भित्त्वा जगत्यधः ॥ २७ ॥
एवं च पश्चिमार्धस्य, क्रमनिम्ना क्षितिर्भवेत् । कूपकोशसमाकर्षिवृषगन्तव्यभूरिव ॥ २८ ॥
ततो निम्ननिम्नतरा, भवन्ति समभूतलात् । तत्रत्या विजयाश्शैलास्सरितश्च यथोत्तरम् ॥ २९ ॥
माल्यवद्गजदन्तस्य, पूर्वतो विजयो भवेत् । कच्छाख्यस्तस्य पूर्वान्ते, सीमकृच्चित्रपर्वतः ॥ ३० ॥
ततः सुकच्छविजयस्तस्यापि सीमकारिणी । गाहावती नाम नदी, महाकच्छस्ततः परम् ॥ ३१ ॥
विजयस्यास्य पूर्वान्ते, ब्रह्मकूटाभिधो गिरिः । कच्छावतीति विजयस्ततः परमुदीरितः ॥ ३२ ॥
ह्रदावती नदी तस्य, मर्यादाकारिणी ततः । आवर्त्तविजयोऽस्यान्ते, नलिनीकूटपर्वतः ॥ ३३ ॥
मङ्गलावर्त्तविजय, एतस्मात्पूर्वतो भवेत् । तस्य वेगवती नाम, नदी सीमाविधायिनी ॥ ३४ ॥
विजयः पुष्कलस्तस्याः, पूर्वतस्तस्य सीमकृत् । एकशैलगिरिस्तस्माद्विजयः पुष्कलावती ॥ ३५ ॥
विजयेस्मिन् विजयते, सीमन्धरजिनोऽधुना । जगद्दिनकरः पुण्यप्रकर्षप्राप्यदर्शनः ॥ ३६ ॥
ततःपरं वनमुखमित्येवं विजयाष्टकम् । शीताया उत्तरतटे, पर्यन्ते वनराजितम् ॥ ३७ ॥
तत्संमुखं वनमुखं, शीताया दक्षिणे तटे । तस्मात्पश्चिमतो वत्सनामा विजय आहितः ॥ ३८ ॥
युगंधरजिनश्रीमान्, विजयेऽस्मिन् विराजते । सुरेश्वरकरामर्शैरसकृन्मसृणक्रमः ॥ ३९ ॥
त्रिकूटः पर्वतोऽस्यान्ते, सुवत्सविजयस्ततः । तप्ता नामान्तरनदी, तस्य सीमाविधायिनी ॥ ४० ॥
ततो महावत्सनामा, विजयोऽस्य च सीमनि । शैलो वैश्रमणकूटस्तस्य पश्चिमतः पुनः ॥ ४१ ॥
वत्सावतीति विजयस्तस्य सीमाविधायिनी । नदी मत्ता ततः प्रत्यग्, रम्याख्यो विजयस्ततः ॥ ४२ ॥
अञ्जनाद्रिरमुष्यान्ते, रम्यको विजयस्ततः । उन्मत्ताख्या नदी तस्या, विजयो रमणीयकः ॥ ४३ ॥
मातञ्जनगिरिस्तस्य, सीम्न्यथो मङ्गलावती । विजयोऽस्य च सीमायां, गिरिः सौमनसाभिधः ॥ ४४ ॥
अस्य पश्चिमतो देवकुरवस्तदनन्तरम् । गिरिर्विद्युत्प्रभनामा, गजदन्ताकृतिः स्थितः ॥ ४५ ॥
तस्य पश्चिमतः पक्ष्मविजयः परिकीर्त्तितः । ततोऽङ्कापाती क्षितिभृत्, सुपक्ष्मो विजयस्ततः ॥ ४६ ॥
ततः क्षीरोदाख्यनदी, महापक्ष्माभिधस्ततः । विजयोऽन्तेऽस्य च पक्ष्मपातीति क्षितिभृद्भवेत् ॥ ४७ ॥
पक्ष्मावतीति विजयः, कथितस्तदनतरम् । शीतस्रोता नाम नदी, तस्य सीमाविधायिनी ॥ ४८ ॥
तस्याः पश्चिमतः शंखविजयोऽन्तेऽस्य राजते । आशीविषगिरिस्तस्माद्विजयो नलिनोऽग्रतः ॥ ४९ ॥
नद्यन्तर्वाहिनी तस्य, मर्यादाकारिणी भवेत् । तस्याः पश्चिमतः ख्यातो, विजयः कुमुदाभिधः ॥ ५० ॥

सुखावहो गिरिस्तस्य, मर्यादाकारको भवेत् । ततः परं च नलिनावतीति विजयो मतः ॥ ५१ ॥
नमस्यते सुकृतिभिः, सांप्रतं बाहुतीर्थकृत् । विजये विहरन्नस्मिन्, शतक्रतुशतस्तुतः[१] ॥ ५२ ॥
शीतोदादक्षिणतटाश्रितं वनमुखं ततः । तत्सन्मुखं वनमुखं, शीतोदोत्तरकूलजम् ॥ ५३ ॥
वनस्यैतस्य पूर्वस्यां, विजयो वप्रनामकः । पूर्वतस्तस्य चन्द्राख्यो, वक्षस्कारगिरिर्भवेत् ॥ ५४ ॥
विजये विहरतत्यस्मिन्, सुबाहुर्जगदीश्वरः । अधुना देशनासारैः, पुनानो भव्यमण्डलम् ॥ ५५ ॥
ततस्सुवप्रविजयस्ततो नद्यूर्मिमालिनी । ततो महावप्रनामा, विजयः कथितो जिनैः ॥ ५६ ॥
ततः सूरो नामा गिरिस्ततो वप्रावती भवेत् । विजयोऽन्तेऽस्य गम्भीरमालिनी कथिता नदी ॥ ५७ ॥
ततश्च वल्गुविजयस्ततो नागाभिधो गिरिः । ततः सुवल्गुविजयस्ततश्च फेनमालिनी ॥ ५८ ॥
स्यादन्तरनदी तस्या, गन्धिलो विजयः परः । ततोगिरिर्देवनामा, ततश्च विजयः किल ॥ ५९ ॥
स्यात् गन्धिलावती नाम्ना, ततश्च गन्धमादनः । गजदन्तगिरिस्तस्मादुत्तराः कुरवः पराः ॥ ६० ॥
एवं च, कच्छः सुकच्छश्च महाकच्छः कच्छावतीति च । आवर्तो मङ्गलावर्त, पुष्कलः पुष्कलावती ॥ ६१ ॥
वत्सः सुवत्सश्च महावत्सो वत्सावतीति च । रम्यो रम्यकरमणीयौ मङ्गलावतीति च ॥ ६२ ॥
पक्ष्मः सुपक्ष्मश्च महापक्ष्मः पक्ष्मावतीति च । शङ्खश्च नलिनश्चैव, कुमुदो नलिनावती ॥ ६३ ॥
वप्रः सुवप्रश्च महावप्रो वप्रावती तथा । वल्गुः सुवल्गुर्विजयो, गन्धिलो गन्धिलावती ॥ ६४ ॥
द्वात्रिंशदेते विजयाः, कच्छाद्याः सृष्टितः क्रमात् । माल्यवद्गजदन्ताद्रेरारभ्यागन्धमादनम् ॥ ६५ ॥
द्वाविंशतिः शतानीषन्यूनानि च त्रयोदश । योजनानीह विष्कम्भस्सर्वेषु विजयेष्वथ ॥ ६६ ॥
सहस्राणि षोडशैषामायामः पञ्चभिश्शतैः । योजनानां द्वानवत्या, चाढ्यानि द्विकलाढ्यया ॥ ६७ ॥
अन्तर्नदीनां सर्वासां, वक्षस्कारमहीभृताम् । सर्वेषामप्यसावेवायामो ज्ञेयो विचक्षणैः ॥ ६८ ॥
अत्रायमाम्नायः ।
शीताशीतोदयोर्वार्द्धिप्रवेश एव यद्यपि । विष्कम्भः स्याद्योजनानां, पूर्णपञ्चशतात्मकः ॥ ६९ ॥
हीनो हीनतरोऽन्यत्र, तथाप्युभयकूलयोः । कच्छादीनां विजयानां, समीपे रमणोचितौ ॥ ७० ॥
द्वौ द्वौ तयोः स्तो रमणप्रदेशौ तदपेक्षया । सर्वत्राप्यनयोर्व्यासो, भाव्यः पञ्चशतात्मकः ॥ ७१ ॥
ततो विदेहविष्कम्भे, शीताव्यासेन वर्जिते । अर्धितेऽन्तर्नदीवक्षस्काराद्रिविजयाततिः ॥ ७२ ॥
एते च विजयाः सर्वे, वैताढ्यैर्विहिता द्विधा । पूर्वापरायततया, स्थितै रजतकान्तिभिः ॥ ७३ ॥
स्वरूपतोऽमी भरतवैताढ्यस्य सहोदराः । आयामतश्च विजयविष्कम्भसदृशा इमे ॥ ७४ ॥

१ सूर्योन्दूनामसंख्येयानां भावात् शत शब्दोऽत्र शतश इत्यर्थकः, न तु शतमेवेन्द्राः, द्वात्रिंशतः चतुष्षष्टेः असंख्यातानामेव वा भावात् ।

समक्षेत्रस्थितेश्चैषां, धनुर्बाहाद्यसम्भवः । मूलादूर्ध्वं योजनानां, दशानां समतिक्रमे ॥ ७५ ॥
एषु द्वे खेचरश्रेण्यौ, तयोर्विद्याभृतामिह । पुराणि पञ्चपञ्चाशत्, प्रत्येकं पार्श्वयोर्द्वयोः ॥ ७६ ॥
ततः पुनर्योजनानां, दशानां समतिक्रमे । शक्रेशानाभियोग्यानां, द्वे श्रेण्यौ पार्श्वयोर्द्वयोः ॥ ७७ ॥
तत्रापि-शीताया दक्षिणतटे, वैताढ्याः विजयेषु ये । तत्राभियोग्यश्रेण्यो यास्ताः सौधर्मस्य वज्रिणः ॥ ७८ ॥
शीतायाश्चोत्तरतटे, वैताढ्या विजयेषु ये । तत्राभियोग्यश्रेण्यो यास्ता ईशानसुरेशितुः ॥ ७९ ॥
सर्वेऽप्यमी नवनवकूटालङ्कृतमौलयः । मानं स्वरूपं कूटानामुक्तवैताढ्यकूटवत् ॥ ८० ॥
पूर्वस्यां प्रथमं कूटं, सिद्धायतनसंज्ञितम् । ततः स्वस्वविजयाद्दक्षिणशब्दयुक् ॥ ८१ ॥
खण्डप्रपातकूटं स्यान्माणिभद्रं ततः परम् । वैताढ्यं पूर्णभद्रं च, तमिस्रगुहमित्यपि ॥ ८२ ॥
ततः स्वस्वविजयाद्दक्षिणकूटमुत्तरशब्दयुक् । वैताढ्येष्वन्तिमं कूटं, ज्ञेयं वैश्रमणाभिधम् ॥ ८३ ॥
वैताढ्येषु हि सर्वेषु, कूटं द्वितीयमष्टमम् । स्याद्दक्षिणोत्तरस्वस्वविजयाद्दर्धाभिधं क्रमात् ॥ ८४ ॥
यथा दक्षिणकच्छाद्दर्धकूटं द्वितीयमष्टमम् । भवेदुत्तरकच्छाद्दर्धं, कच्छवैताढ्यपर्वते ॥ ८५ ॥
अद्दर्धे द्वे द्वे विजयानां, वैताढ्यगिरिणा कृते । यथा दक्षिणकच्छाद्दर्धं तथा कच्छार्धमुत्तरम् ॥ ८६ ॥
अद्दर्धस्य तस्यैकैकस्य, सहस्राण्यष्ट दीर्घता । योजनानां द्विशत्येकसप्तत्याढ्या तथा कला ॥ ८७ ॥
नीलवन्निषधक्ष्माभृद्दक्षिणोदग्रितम्बयोः । शैलो वृषभकूटः स्याद्विजयं विजयं प्रति ॥ ८८ ॥
तस्य चाद्रेरुभयतः, कुण्डमेकैकमस्ति तत् । सिन्धुकुण्डं पश्चिमतो, गङ्गाकुण्डं च पूर्वतः ॥ ८९ ॥
ते च षष्टिं योजनानि, विष्कम्भायामतो मते । किञ्चिदूननवत्याढ्यं, शतं च परिवेषतः ॥ ९० ॥
योजनानि दशोद्विद्धे, विमलोदकपूरिते । द्वीपेनैकैकेन रम्ये, स्वदेवीभवनस्पृशा ॥ ९१ ॥
एताभ्यामथ कुण्डाभ्यां, सिन्धुर्गङ्गा च निम्नगे । दक्षिणेन तोरणेन, निर्गते दक्षिणामुखे ॥ ९२ ॥
अपान्तरालेऽनेकाभिर्नदीभिः पथि संश्रिते । वैताढ्यसविधे सप्तनदीसहस्रसेविते ॥ ९३ ॥
तमिस्रायाः पश्चिमतः, सिन्धुर्वैताढ्यभूधरम् । गङ्गा खण्डप्रपातायाः, प्राग्विभिद्य च निर्गते ॥ ९४ ॥
याम्यार्द्धेऽपि नदीसप्तसहस्रसंश्रिते इति । सरित्सहस्रैः प्रत्येकं, चतुर्दशभिरन्विते ॥ ९५ ॥
शीतानदीं प्रविशतो, दक्षिणाभिमुखाध्वना । ततो भवन्ति षट्खण्डाः सर्वेऽपि विजया इमे ॥ ९६ ॥
शीताया याम्यकूलेऽपि, विजयेष्वेवमष्टसु । निषधस्योदग्नितम्बे, एकैको वृषभाचलः ॥ ९७ ॥
तस्याप्युभयतः प्राग्वत्, कुण्डे द्वे द्वे तथाविधे । प्रत्यग् रक्तवतीकुण्डं, रक्ताकुण्डं च पूर्वतः ॥ ९८ ॥
एताभ्यामपि कुण्डाभ्यां, निर्गते उत्तरामुखे । रक्तारक्तवती नद्यौ, भित्त्वा वैताढ्यभूधरम् ॥ ९९ ॥
शीतानदीं प्रविशतः, स्वरूपं पुनरेतयोः । पूर्वोक्ताभिर्नदीभिः स्यान्निःशेषमविशेषितम् ॥ १०० ॥
शीतोदायाम्यकूलेऽपि, विजयेष्वेवमष्टसु । निषधस्योदग्नितम्बे, एकैको वृषभाचलः ॥ १०१ ॥

तस्याप्युभयतः कुण्डे, प्राग्वद् द्वे द्वे मनोरमे । सिन्धुकुण्डं पश्चिमतो, गङ्गाकुण्डं च पूर्वतः ॥ १०२ ॥
ताभ्यां गङ्गासिन्धुनद्यौ, प्रव्यूढे उत्तराध्वना । प्राग्वद्विभिन्नवैताढ्ये, शीतोदां विशतो नदीम् ॥ १०३ ॥
इत्थमेवोत्तरतटे, शीतोदासरितः किल । नितम्बे दक्षिणे नीलवतोऽस्ति वृषभाचलः ॥ १०४ ॥
प्राग्वद् वृषभकूटस्य, गिरेरस्यास्ति पूर्वतः । रक्ताकुण्डं रक्तवतीकुण्डं पश्चिमतस्ततः ॥ १०५ ॥
एताभ्यामपि कुण्डाभ्यां, निर्गत्य दक्षिणामुखे । रक्तारक्तवती नद्यौ, भित्त्वा वैताढ्यभूधरम् ॥ १०६ ॥
शीतोदायां प्रविशतो, याम्येन रुजुनाध्वना । गङ्गासिन्धुश्रवन्तीभ्यामिमाः सर्वात्माना समाः ॥ १०७ ॥

तथाहुः क्षमाश्रमणमिश्राः । [बृहत्क्षेत्रसमास अध्या. १. श्लो. ३८६]

सीयाइउइन्नेसु, सीओयाए य जम्मविजएसु । गङ्गासिन्धु नईओ, इयरेसु य रत्तरत्तवई ।

कुण्डान्येवं चतुःषष्टिः, द्वात्रिंशत् वृषभाद्रयः । स्वरूपमेषां भरतवर्तिकुण्डर्षभाद्रिवत् ॥ १०८ ॥
चतुःषष्टेः तथैवासां, नदीनां ह्रदनिर्गमात् । आरभ्य शीताशीतोदावाहिनीसङ्गमावधि ॥ १०९ ॥
सर्वं स्वरूपं भरतगङ्गासिन्धुसरित्समम् । प्रत्येकं परिवारोऽपि, तावान् ज्ञेयो विशारदैः ॥ ११० ॥
गङ्गारक्तान्यतरस्याः, प्रवेशे मागधाभिधम् । शीताशीतोदयोरन्यतरस्यां तीर्थमाहितम् ॥ १११ ॥
एवं सिन्धुरक्तवत्योर्योगे प्रभासनामकम् । तयोर्द्वयोरन्तराले, वरदामं भवेदिह ॥ ११२ ॥
एवं तीर्थत्रयं ज्ञेयं, विजयं विजयं प्रति । स्वरूपमेषां भरततीर्थवत् परिभाव्यताम् ॥ ११३ ॥
औत्तराहेषु शीतायाः, कच्छादिविजयेष्विमाः । राजधान्यो दक्षिणार्द्धमध्यखण्डेषु कीर्तिताः ॥ ११४ ॥
क्षेमा क्षेमपुरी चैवारिष्टा रिष्टवती पुरी । खड्गी मञ्जुषौषधिश्च, पुरी च पुण्डरीकिणी ॥ ११५ ॥
शीताया दाक्षिणात्येषु, वत्सादिविजयेष्विमाः । राजधान्य उत्तरार्द्धे, मध्यखण्डेषु वर्णिताः ॥ ११६ ॥
सुसीमा कुण्डला चैवापराजिता प्रभङ्करा । अङ्कावती पक्ष्मवती, शुभाथ रत्नसञ्चया ॥ ११७ ॥
शीतोदाया याम्यतटे, पक्ष्मादिविजयेष्विमाः । उत्तरार्द्धमध्यखण्डे, राजधान्यो निरूपिताः ॥ ११८ ॥
अश्वपुरी सिंहपुरी, महाख्या विजयाभिधा । अपराजितापराख्या, शोका च वीतशोकिका ॥ ११९ ॥
शीतोदाया उदीच्येषु, वप्रादिविजयेष्विमाः । याम्यार्द्धे मध्यखण्डेषु, राजधान्यो जिनैः स्मृताः ॥ १२० ॥
विजया वैजयन्ती च, जयन्ती चापराजिता । चक्रापुरी खड्गपुर्यवन्ध्याऽयोध्येति नामतः ॥ १२१ ॥
विजयेष्वेषु मनुजाः, पञ्चचापशतोन्नताः । जघन्योत्कर्षतः पूर्वकोटीक्षुल्लभवायुषः ॥ १२२ ॥
नानासंहनना नानासंस्थाना विविधाशयाः । मृत्वा नानागतिं यान्ति, स्वस्वकर्मानुसारतः ॥ १२३ ॥
कालः सदात्र दुःषमसुषमारकसन्निभः । साम्प्रतीनभरतवत्, गर्भापत्यावनादिकम् ॥ १२४ ॥
आहारस्यान्तरे माने, चानैयत्यं तथैव हि । ततश्चतुःशतगुणं, मानं च स्यात् गृहादिषु ॥ १२५ ॥
चित्राद्यान् देवशैलांस्तान्, वक्षस्कारगिरिन् विदुः । चतुरश्चतुरश्शीताशीतोदयोस्तटद्वये ॥ १२६ ॥

चित्रश्च ब्रह्मकूटश्च, नलिनीकूट इत्यपि । एकशैलश्चेति शीतोत्तरकूले धराधराः ॥ १२७ ॥
त्रिकूटश्च वैश्रमणोऽञ्जनो मातञ्जनोऽपि च । शीताया दक्षिणतटे, वक्षस्काराचला इमे ॥ १२८ ॥
अङ्कापाती पक्ष्मपाती, आशीविषः सुखावहः । शीतोदाया याम्यतटे, वक्षस्काराद्रयः स्मृताः ॥ १२९ ॥
चन्द्रः सूर्यश्च नागश्च, देवेशेति महीधराः । शीतोदाया उदक्कूले, सर्व एवं च षोडश ॥ १३० ॥
एकतोऽमी नीलवता, सज्यन्ते निषधेन वा । द्वितीयान्तेन शीतोदां, शीतां वा संस्पृशन्ति च ॥ १३१ ॥
योजनानां पञ्चशतान्येते विष्कम्भतो मता । सर्वत्र सर्वे सदृशाः, सर्वरत्नमया अपि ॥ १३२ ॥
नीलवन्निषधक्ष्माभृत्समीपेऽमी समुन्नताः । चतुःशतीं योजनानां, शतमेकं भुवोऽन्तरे ॥ १३३ ॥
ततश्च मात्रया वर्द्धमानाः सर्वे यथाक्रमम् । शीताशीतोदयोः पार्श्वे, जाताः पञ्चशतोन्नताः ॥ १३४ ॥
पञ्चविंशं योजनानां, शतं तत्र भुवोऽन्तरे । तुरङ्गस्कन्धसंस्थानसंस्थिता इति वर्णिताः ॥ १३५ ॥
स्वस्वाह्वानसमाह्वानैकैकवृन्दारकाश्रिताः । यथा चित्रगिरौ चित्रस्वाम्येवमपरेष्वपि ॥ १३६ ॥
अथ चत्वारि, चत्वारि कूटान्येषु किलाद्रिषु । भवन्त्येवं चतुःषष्टिरेतानि सर्वसंख्यया ॥ १३७ ॥
आद्यं विवक्षितं गिरिप्राग्वर्तिविजयाख्यया । नीलवन्निषधग्राव्णोस्समीपेऽन्यतरस्य तत् ॥ १३८ ॥
यः पश्चिमायां विजयो, द्वैतीयीकं तदाख्यया । तृतीयं निजनाम्नैव, सिद्धायतनमन्तिमम् ॥ १३९ ॥
वियच्चुम्बिचलत्केतुसिद्धायतनबन्धुरम् । शीताशीतोदयोरन्यतरस्याः सविधे च तत् ॥ १४० ॥
कच्छसुकच्छयोर्मध्यस्थिते चित्रगिरौ यथा । आद्यं सुकच्छकूटं स्यात्, कच्छकूटं द्वितीयकम् ॥ १४१ ॥
तृतीयं चित्रकूटं स्यात्, सिद्धायतनमन्तिमम् । शीताशीतोदयोरेवमुदग्रोधसि भाव्यताम् ॥ १४२ ॥
त्रिकूटे च गिरौ वत्सकूटं निषधसन्निधौ । द्वितीयं च सुवत्साख्यं, ततस्त्रिकूटसंज्ञितम् ॥ १४३ ॥
तुर्यं च सिद्धायतनं, सर्वेष्वप्येवमद्रिषु । शीताशीतोदयोर्याम्यतटस्थेषु विभाव्यताम् ॥ १४४ ॥
एवं चतुर्णां चतुर्णां, सिद्धायतनशालिनाम् । कूटानां श्रेणयः शीताशीतोदोभयकूलयोः ॥ १४५ ॥
पिधानमालिनां दिव्यकलशानामिवालयः । भान्त्यर्हदभिषेकाय, न्यस्तानामम्बुपूर्त्तये ॥ १४६ ॥
सिद्धायतनवर्जानि, स्वस्वतुल्याख्यनाकिना । तान्याश्रितानि विजयदेववत्ते महर्द्धिकाः ॥ १४७ ॥
शीताशीतोदयोर्याम्योत्तरयोर्ये सुधाभुजः । क्रमात्तेषां राजधान्यो, मेरुतो दक्षिणोत्तराः ॥ १४८ ॥
गाहावती ह्रदावती, तृतीया वेगवत्यपि । शीताया उत्तरतटे स्युस्तिस्रोऽन्तरनिम्नगाः ॥ १४९ ॥
शीतायाम्यतटे तप्ता, मत्तोन्मत्तेति निश्चिताः । क्षीरोदा शीतस्रोताश्चान्तर्वाहिनीति नामतः ॥ १५० ॥
शीतोदाया याम्यतटे, तस्या उत्तरतः पुनः । ऊर्मिगम्भीरफेनेभ्यो, मालिन्योऽन्तरनिम्नगाः ॥ १५१ ॥
द्वादशानामप्यमूषामेकैकं कुण्डमीरितम् । स्वतुल्याख्यं नीलवतस्समीपे निषधस्य वा ॥ १५२ ॥
कुण्डं पुनस्तदेकैकं, विष्कम्भायामतो मतम् । सपादं योजनशतमुद्विद्धं दशयोजनीम् ॥ १५३ ॥

परिक्षेपेण साशीति, योजनानां शतत्रयम् । मध्ये च द्वीप एकैको, नदीकुण्डसमाभिधः ॥ १५४ ॥
यथा गाहावतीनद्याः, कुण्डं गाहावतीति च । तत्र गाहावतीद्वीपो, भवत्येवं परेऽप्यमी ॥ १५५ ॥
योजनानि षोडशामी, विष्कम्भायाममानतः । सातिरेकाणि पञ्चाशत्, प्रज्ञप्ताः परिवेषतः ॥ १५६ ॥
किञ्च सर्वेऽप्यमी द्वीपा, द्वौ क्रोशावुच्छ्रिता जलात् । पद्मवेदिकया सर्वे, वनेन च विराजिताः ॥ १५७ ॥
मध्ये च तेषां द्वीपानामेकैकं भवनं भवेत् । नदीनामसदृग्नाम्ना, देव्या योग्यमनुत्तरम् ॥ १५८ ॥
अर्द्धक्रोशव्यासमेकक्रोशायतं मनोहरम् । देशोनक्रोशतुङ्गं स्वदेवीशय्याविभूषितम् ॥ १५९ ॥
एताश्च गाहावत्याद्या, निम्नगा निखिला अपि । पञ्चविंशं योजनानां, शतं विष्कम्भतो मताः ॥ १६० ॥
सार्द्धे द्वे योजने निम्ना, आरभ्य ह्रदनिर्गमात् । शीताशीतोदाप्रवेशपर्यन्तं सर्वतः समाः ॥ १६१ ॥

यत्तु श्रीमलयगिरयः क्षेत्रसमासवृत्तौ जम्बूद्वीपाधिकारे एताश्च गाहावतीप्रमुखा नद्यः सर्वा अपि सर्वत्र कुण्डाद्विनिर्गमे शीताशीतोदयोः प्रवेशे च तुल्यप्रमाणविष्कम्भोद्वेधा इति स्वयमुक्त्वा तस्मिन्नेव ग्रन्थे धातकीखण्डपुष्करार्द्धाधिकारयोस्तत्रत्यनदीनां द्विगुणविस्तारातिदेशं व्याख्यानयन्तः प्रोचुः, यथा "जम्बूद्वीपे रोहितांशारोहितासुवर्णकूलारूप्यकूलानां गाहावत्यानदीनां च द्वादशानामन्तरनदीनां सर्वाग्रेण षोडशानां नदीनां प्रवाहे विष्कम्भो द्वादशयोजनानि सार्द्धानि उद्वेधः क्रोशमेकं समुद्रप्रवेशे गाहावत्यादीनां च महानदीप्रवेशे विष्कम्भो योजनानि १२५ उद्वेधो योजने २ क्रोश २ ।" तदभिप्रायं न विद्मः । किञ्चासां सर्वत्र समविष्कम्भकत्वे आगमवत् युक्तिरप्यनुकूला । तथाहि । आसां विष्कम्भवैषम्ये उभयपार्श्ववर्तिनोर्विजययोरपि विष्कम्भवैषम्यं स्यात् । इष्यते च समविष्कम्भकत्वमिति ॥

जगतीसन्निधौ शीताशीतोदयोस्तटद्वये । स्यादेकैकं वनमुखमेवं चत्वारि तान्यपि ॥ १६२ ॥
आद्यं वनमुखं शीतानीलवद्भूधरान्तरे । द्वितीयं च वनमुखं, शीतां निषधमन्तरा ॥ १६३ ॥
तृतीयं च वनमुखं, शीतोदानिषधान्तरे । शीतोदानीलवन्मध्ये, चतुर्थं परिकीर्त्तितम् ॥ १६४ ॥
याम्योत्तरायतानां प्राक्प्रत्यग्विष्कम्भशालिनाम् । एषां विजयवद्दैर्घ्यं, सर्वेषामपि भाव्यताम् ॥ १६५ ॥
एका कलैषां विष्कम्भो, नीलवन्निषधान्तिके । ततो जगत्या चक्रत्वाद्वर्धते जगतीदिशि ॥ १६६ ॥
त्रिसहस्री योजनानामष्टसप्ततिवर्जिता । शीता शीतोदयोः पार्श्वे, वर्धमानः क्रमादभूत् ॥ १६७ ॥
अत्रायमाम्नायः—
षोडशानां विजयानां, वक्षस्कारष्टकस्य च । षण्णामन्तर्निम्नगानां, कुरुणां गजदन्तयोः ॥ १६८ ॥
नीलवन्निषधज्याभ्यां, विष्कम्भे शोधिते स्थितम् । कलाद्वयं तत्सैकैका, विष्कम्भो वनयोर्द्वयोः ॥ १६९ ॥
दैर्घ्येऽतीते योजनादौ, यावति व्यास इष्यते । निहन्यते तद् द्वाविंशैरेकोनत्रिंशता शतैः ॥ १७० ॥
पुनरेकोनविंशत्याहत्य लक्षैस्त्रिभिर्भजेत् । सहस्रपञ्चदशकसार्द्धद्विशतसंयुतैः ॥ १७१ ॥

लब्धं व्यासो योजनादिः, स्यादत्राभीप्सितास्पदे । भाज्यभाजकयोरत्रोपपत्तिर्लिख्यते स्फुटा ॥ १७२ ॥
परमव्यासरूपोऽत्र, सर्वत्र गुणको ध्रुवः । तेन हत्वैकोनविंशत्याहतिस्तु कलाकृते ॥ १७३ ॥
आयाम एव परमो, भाजकोऽत्र ध्रुवो भवेत् । उपरिस्थिकलायुग्मप्रक्षेपाय कलीकृतः ॥ १७४ ॥
अथोत्तरकुरूणां यौ, पर्वतौ सीमकारिणौ । गन्धमादनसन्माल्यवन्तौ तौ वर्णयाम्यहम् ॥ १७५ ॥
तत्रोत्तरकुरूणां यः पश्चिमायां व्यवस्थितः । वायव्यां मेरुतः सोऽयं, प्रज्ञप्तो गन्धमादनः ॥ १७६ ॥
गन्धः कोष्टपुटादिभ्यो, रम्यो यदिह पर्वते । तथा क्षेत्रस्वभावेन, ततोऽयं गन्धमादनः ॥ १७७ ॥
गन्धमादननामा च, देवः पल्योपमस्थितिः । स्वाम्यस्येति तथा ख्यातोऽपरं च शाश्वताभिधः ॥ १७८ ॥
पीतरत्नमयश्चैष, मतान्तरे हिरण्मयः । शोभितः सप्तभिः कुटैर्नानारत्नोपशोभितैः ॥ १७९ ॥

जम्बूद्वीपप्रज्ञप्तिसूत्रे त्वयं 'सव्वरयणमये' इति सर्वात्मना रत्नमय उक्तः । जम्बूद्वीपसमासे तु कनकमय उक्तः । बृहत्क्षेत्रसमासे तु 'गिरिगंधमायणो पीयओ अ' पीतकः पीतमणिमय इत्येतद्वृत्तौ ॥

तत्राद्यं मन्दरासन्नं, वायव्यां मन्दराचलात् । कूटं सिद्धायतनाख्यं, तत्रात्तुङ्गो जिनालयः ॥ १८० ॥
कूटात्ततोऽपि वायव्यां, कूटं स्यात् गन्धमादनम् । स्यात् गन्धिलावतीकूटं, वायव्याममुतो दिशि ॥ १८१ ॥
तुर्यं तूत्तरकुर्वाख्यं, स्याद्वायव्यां तृतीयतः । पञ्चमात्तद्दक्षिणस्यां, वक्रत्वेनास्य भूभृतः ॥ १८२ ॥
तुरीयादुत्तरस्यां च, पञ्चमं स्फटिकाभिधम् । अस्मादुत्तरतः षष्टं, लोहिताक्षाभिधं भवेत् ॥ १८३ ॥
लोहिताक्षादुत्तरस्यां, सप्तमं कूटमाहितम् । आनन्दाख्यमिति सप्त, कूटानि गन्धमादने ॥ १८४ ॥
भोगङ्कराभोगवत्यौ, द्वयोः पञ्चमषष्ठयोः । दिक्कुमार्यावपरेषु, कूटतुल्याभिधासुराः ॥ १८५ ॥
एतत्कूटाधिपदेवदेवीनां मन्दराचलात् । राजधान्योऽन्यत्र जम्बूद्वीपे वायव्यकोणके ॥ १८६ ॥
अथोदक्कुरुतः प्राच्यां, याम्यां नीलवतो गिरेः । ऐशान्यां मन्दरात्कच्छात् प्रतीच्यां माल्यवान् गिरिः ॥ १८७ ॥
नानाकुसुमगुल्मानि, विधूतानि समीरणैः । कुर्वन्त्येनं कीर्णपुष्पं, ततोऽयं माल्यवानिति ॥ १८८ ॥
महर्द्धिको वसत्यत्र, माल्यवान्नाम निर्जरः । पल्योपमायुरिति वा, यद्वासौ शाश्वताभिधः ॥ १८९ ॥
सद्वैडूर्यमयश्चायं, नवकूटोपशोभितः । मेर्वासन्नं कूटमाद्यं, सिद्धायतनसंज्ञितम् ॥ १९० ॥
द्वितीयं माल्यवत् कूटं, तृतीयं तु ततः परम् । भवेदुत्तरकुर्वाख्यं, तुर्यं कच्छाभिधं मतम् ॥ १९१ ॥
पञ्चमं सागराभिख्यं, षष्टं तु रजताभिधम् । शीताकूटं पूर्णभद्रकूटं हरिस्सहाभिधम् ॥ १९२ ॥
ऐशान्यां मन्दरात् पङ्क्त्यास्थितं कूटचतुष्टयम् । तुर्यात् पञ्चममैशान्यां, षष्टाद्दक्षिणतश्च तत् ॥ १९३ ॥
पञ्चमादुत्तरस्यां च, षष्टं राजतमित्यथ । दक्षिणोत्तरया पङ्क्त्या, शेषं कूटत्रयं ततः ॥ १९४ ॥
पूर्णभद्रादुत्तरस्यां, याम्यां नीलवतो गिरेः । कूटं नाम्ना सहस्राङ्कं, ख्यातं हरिस्सहं च तत् ॥ १९५ ॥

एतन्नीलवतो वर्षधरस्यासन्नमीरितम् । जात्यस्वर्णमयं दीप्रप्रभापटलपिञ्जरम् ॥ १९६ ॥
योजनानां सहस्रं तत्तुङ्गं वृत्ताकृति ध्रुवम् । अर्द्धचद्दर्धयोजनशतद्वयमुद्वेधतो भवेत् ॥ १९७ ॥

तथोक्तं जम्बूद्वीपप्रज्ञप्तिवृत्तौ । अवशिष्टं यमकगिरिप्रमाणेन नेतव्यम् । तच्चेदम् । अड्ढाइज्जाइं जोअणसयाइं उव्वेहेणं ॥

योजनानां सहस्रं च, स्यान्मूले विस्तृतायतम् । मध्ये सार्द्धां सप्तशतीं, शतानि पञ्च चोपरि ॥ १९८ ॥
योजनानां त्रिसहस्री, सद्धाषष्टिशतान्विता । द्वे सहस्रे च द्विसप्तत्यधिकद्विशताञ्चिते ॥ १९९ ॥
सहस्रं साधिकैकाशीत्याढ्यपञ्चशतान्वितम् । क्रमादस्य परिक्षेपा, मूले मध्ये तथोपरि ॥ २०० ॥
शतानि पञ्च विस्तीर्णं, गजदन्तगिराविदम् । सहस्रयोजनपृथु, कूटं माति कथं ननु ? ॥ २०१ ॥
अत्रोच्यते । गजदन्तगिरिं व्याप्य, निजार्द्धेन स्थितं ततः । गिरेरुभयतो व्योम्नि शेषार्द्धेन प्रतिष्ठितम् ॥ २०२ ॥

तथोक्तं क्षेत्रसमासबृहद्वृत्तौ । "एवं हरिकूटहरिस्सहकुटयोरपि निजनिजाश्रयगिर्यार्यथारूपं उभयपार्श्वे आकाशमवरुद्ध्य स्थितत्वं परिभावनीयमिति" ।

आद्यकूटे जिनगृहं, तथा पञ्चमषष्ठयोः । सुभोगाभोगमालिन्यौ, दिक्कुमार्यौ निरूपिते ॥ २०३ ॥
शेषेषु षट्सु कूटेषु, पल्योपमायुषस्सुराः । कूटानुरूपनामानो, महर्द्धयो विजयोपमाः ॥ २०४ ॥
एतेषां देवदेवीनामैशान्यां मन्दराद्गिरेः । जम्बूद्वीपेऽन्यत्र राजधान्यो हरिस्सहं विना ॥ २०५ ॥
हरिस्सहस्य तु ख्याता, राजधानी सुमेरुतः । उत्तरस्यामन्यज्जम्बूद्वीपे हरिस्सहाभिधा ॥ २०६ ॥
सहस्राश्चतुरशीतिर्योजनानां भवेदिह । व्यासायामावपरं तु, तुल्यं चमरचञ्चया ॥ २०७ ॥
इमावद्री योजनानां, दक्षिणोत्तरमायतौ । त्रिंशत्सहस्रान् द्विशतीं, नवोत्तरां सषट्कलाम् ॥ २०८ ॥
पूर्वापरं च विस्तीर्णौ, समीपे नीलवद्गिरेः । शतानि पञ्च पर्यन्तेऽङ्गुला संख्यांश विस्तृतौ ॥ २०९ ॥
चतुःशतीं योजनानां, गिरेर्नीलवतोऽन्तिके । अभ्युन्नतौ शतमेकमवगाढौ भुवोऽन्तरे ॥ २१० ॥
समीपे मन्दरस्याथ, स्यातां पञ्चशतोन्नतौ । निमग्नौ पञ्च गव्यूतशतानि वसुधान्तरे ॥ २११ ॥
नीलवत्पर्वतोपान्ताद्वर्द्धमानाविमौ क्रमात् । समुत्सेधावगाहाभ्यां, विस्तृत्या हीयमानकौ ॥ २१२ ॥
पूर्वोक्तमानविस्तीर्णोद्विद्धोच्चावुपमन्दरम् । नीलवच्छैलकरिणो, दशनाविव राजतः ॥ २१३ ॥
प्रत्येकं च पद्मवरवेदिकावनमण्डितौ । कुरुतस्तौ मिथो योगादधिज्यधनुराकृतिम् ॥ २१४ ॥
गन्धमादनसन्माल्यवतोः पर्वतयोरथ । अभ्यन्तरे स्थिताः कान्तभुजयोरिव कामिनी ॥ २१५ ॥
मन्दराद्रेरुतरस्यां, दक्षिणस्यां च नीलतः । उत्तराः कुरवः ख्याता, अनुत्तरचिदाश्रयैः ॥ २१६ ॥
उदग्दक्षिणविस्तीर्णास्ताः पूर्वपश्चिमायताः । अर्द्धेन्दुमण्डलाकारा, भुवो भालमिवाहिताः ॥ २१७ ॥
अत्रोत्तरकुरुर्नाम, देवः पल्योपमस्थितिः । वसत्यतस्तथा ख्याता, यद्वेदं नाम शाश्वतम् ॥ २१८ ॥

एकादश सहस्राणि, शतान्यष्ट तथोपरि । योजनानां द्विचत्वारिंशत् कलाद्वितयं तथा ॥ २१९ ॥
दक्षिणोत्तरविस्तार, एतासां वर्णितो जिनैः । ज्ञातव्यात्रोपपत्तिश्च, पूर्वाचार्यप्रदर्शिता ॥ २२० ॥
महाविदेहविष्कम्भे, मेरुविष्कम्भवर्जिते । अर्द्धीकृते कुरुव्यासमानं भवति निश्चितम् ॥ २२१ ॥
त्रिपञ्चाशद्योजनानां, सहस्राणि भवेदिह । प्रत्यञ्चा नीलवत्पार्श्वे, सा चैवं परिभाव्यताम् ॥ २२२ ॥
भद्रशालवनायामो, द्विगुणो मन्दरान्वितः । गजदन्तव्यासहीनः, कुरुजीवामितिर्भवेत् ॥ २२३ ॥
योजनानां सहस्राणि, षष्टिः किञ्च चतुःशती । अष्टादशाधिका शेषा, कला द्वादश तद्धनुः ॥ २२४ ॥
तच्चैवम् । आयाममानयोर्योगे, उभयोर्गजदन्तयोः । भवेत्कुरुधनुःपृष्ठमानं मेरुसमीपतः ॥ २२५ ॥
अत्यन्तं रमणीयात्र, क्षितिरितिविवर्जिता । कल्पद्रुमा दशविधाः, पूरयन्ति जनेप्सितम् ॥ २२६ ॥
सदा युगलधर्माणो, जना ललितमूर्त्तयः । गव्यूतत्रयमुत्तुङ्गाः कलाकौशलशालिनः ॥ २२७ ॥
दधानाश्चायुरुत्कर्षात्पूर्णं पल्योपमत्रयम् । पल्यासंख्येयभागोनं, पल्यत्रयं जघन्यतः ॥ २२८ ॥
षट्पञ्चाशत्संयुते द्वे, शते पृष्ठकरण्डकान् । धारयन्तः क्रोधमानमायालोभाल्पताजुषः ॥ २२९ ॥
ते षोढा स्युः पद्मगन्धा, मृगगन्धास्तथा समाः । सहाश्च तेजस्तलिनः, शनैश्चारिण इत्यपि ॥ २३० ॥
सकृदष्टमभक्तान्ते, तुवरीकणमात्रया । पृथ्वीकल्पद्रुमफलभोजिनो मनुजाश्च ते ॥ २३१ ॥
एकोनपञ्चाशद्घस्रविहितापत्यपालनाः । कासजृम्भादिभिस्त्यक्तप्राणा यान्ति त्रिविष्टपम् ॥ २३२ ॥
अनन्तगुणमाधुर्यो, हरिवर्षाद्यपेक्षया । पृथ्वीपुष्पफलादीनामास्वादस्तत्र वर्णितः ॥ २३३ ॥
तादृशा एव तिर्यञ्चस्तत्र हिंसादिवर्जिताः । पालयित्वा युग्मधर्मं, गच्छन्ति नियमाद्दिवम् ॥ २३४ ॥
आहारयन्त्यमी षष्ठान्तरमित्थं यथागमम् । अन्ययुग्मितिरश्चामप्याहारेऽन्तरमूह्यताम् ॥ २३५ ॥
पञ्चेन्द्रियतिरश्चां यद्बल्भने परमान्तरम् । भाषितं षष्ठरूपं तदेषामेव व्यपेक्षया ॥ २३६ ॥
तथोक्तम् । पंचिन्दियतिरिनराणं साहाविय छट्ठअट्ठमओ । इत्यादि ॥
कालः सदात्र सुषमसुषमाख्यः प्रवर्त्तते । वृद्धः साधुरिव क्षेत्रपरावृत्तिपराङ्मुखः ॥ २३७ ॥
क्षेत्रेऽस्मिंश्च नीलवतो, गिरेर्दक्षिणतः किल । योजनानां शतन्यष्टौ, चतुस्त्रिंशतमेव च ॥ २३८ ॥
चतुरः सप्तिकान् भागानतिक्रम्य स्थितावि्ह । यमकाख्यौ गिरी शीतापूर्वपश्चिमकूलयोः ॥ २३९ ॥
मिथस्तुल्यस्वरूपौ तौ, यमलभ्रातराविव । तदेतौ यमकाभिख्यौ, कथितौ जिननायकैः ॥ २४० ॥
अथवा यमकानामशकुन्याकृतिशालिनौ । ततस्तथोदितौ स्वर्णमयौ गोपुच्छसंस्थितौ ॥ २४१ ॥
व्यासायामपरिक्षेपतुङ्गत्वोद्विद्धतादिभिः । हरिस्सहोपमौ पद्मवेदिकावनमण्डितौ ॥ २४२ ॥
तयोः पर्वतयोर्मौलौ, भूमिभागोऽतिबन्धुरः । प्रत्येकं तत्र चैकैकः, स्यात्प्रासादावतंसकः ॥ २४३ ॥
द्वाषष्टिं योजनान्यर्द्धाधिकानि स समुच्छ्रितः । योजनान्येकत्रिंशतं, क्रोशं च विस्तृतायतः ॥ २४४ ॥

तन्मध्ये सपरीवारमस्ति सिंहासनं महत् । यमकाख्यामाराहं, तच्छेषं विजयदेववत् ॥ २४५ ॥
मेरोरुत्तरतो जम्बूद्वीपेऽन्यत्र निरुपिते । राजधान्यौ यमकयोर्निःशेषं विजयोपमे ॥ २४६ ॥
यदुक्तमन्तरं नीलवतो यमकभूभृतोः । यमकाद्याद्यहृदयोस्तावदेवान्तरं भवेत् ॥ २४७ ॥
परस्परं हृदानां च, तावदेवोक्तमन्तरम् । अन्त्यहृदात्तावतैव, क्षेत्रपर्यन्तभूरपि ॥ २४८ ॥
एवं च, यमक हृददीर्घत्वैः, सप्तभिश्च तथान्तरैः । यथोक्तमुत्तरकुरुव्यासमानं प्रजायते ॥ २४९ ॥

तदुक्तम् । जावइयंमि पमाणंमि, होंति जमगाओ नीलवंताओ । तावइयमंतरं खलु, जमगदहाणं दहाणं च ॥ [बृहत्क्षेत्रसमास गा. २७१ टीकान्तर्गत श्लो.]

अथाभ्यां यमकाद्रिभ्यां, दक्षिणस्यां समान्तराः । शीतायाः सरितो मध्ये, हृदाः पञ्च यथाक्रमम् ॥ २५० ॥
प्रथमो नीलवन्नामा, नीलवद्गिरिसन्निभैः । शोभितः शतपत्राद्यैस्तत्तथाप्रथिताभिधः ॥ २५१ ॥
यद्वा नागकुमारेन्द्रो, नीलवन्नाम निर्जरः । पालयत्यस्य साम्राज्यमित्येवं प्रथिताभिधः ॥ २५२ ॥
द्वितीयस्तूत्तरकुरुसंस्थानाब्जादिमत्तया । तुल्याख्यव्यन्तरावासाद्यद्वोत्तरकुरुह्रदः ॥ २५३ ॥
चन्द्राभशतपत्रादिमत्त्वाच्चन्द्राभिधो हृदः । व्यन्तरेन्द्रचन्द्रदेवस्वामित्वाद्वा तृतीयकः ॥ २५४ ॥
ऐरावताकारहारिपद्मादिमत्तयाऽथवा । व्यन्तरैरावताढ्यात्वात्तुर्यश्चैरावतो हृदः ॥ २५५ ॥
माल्यवत्पर्वताकाराम्बुजादिमत्तयाऽथवा । माल्यवद्व्यन्तरावासात्, पञ्चमो माल्यवान् हृदः ॥ २५६ ॥
पद्महृदसमाकाराः, सर्वे सहोदरा इव । तथैव पद्मवलयैः, षड्जातीयैरलङ्कृताः ॥ २५७ ॥
विशेषस्तु पद्महृदः, परिक्षिप्तः समन्ततः । एकेन वनखण्डेन, पद्मवेदिकयैकया ॥ २५८ ॥
विभक्ताभ्यां प्रविश्यान्तर्विनिर्यान्त्या च शीतया । अमी पद्मवेदिकाभ्यां, वनाभ्यां च परिष्कृताः ॥ २५९ ॥
याम्योत्तरायताश्चामी, पूर्वपश्चिमविस्तृताः । सहस्रयोजनायामाः, शतानि पञ्च विस्तृताः ॥ २६० ॥

तथाहुः । सीयासीओयाणं, बहुमज्झे हुंति पंच हरयाओ । उत्तरदाहिणदीहा, पुव्वावरवित्थडा इणमो ॥ [बृहत्क्षेत्रसमास गाथा २७१]

पद्महृदादयो ये तु, परे वर्षधरा हृदाः । ते स्युः पूर्वापरायामा, दक्षिणोत्तरविस्तृताः ॥ २६१ ॥
हृदाधिदेवतानां च, पञ्चानाममृताशिनाम् । राजधान्योऽन्यत्र जम्बूद्वीपे मेरोरुदग्दिशि ॥ २६२ ॥
एकैकस्य हृदस्यास्य, पूर्वपश्चिमयोर्दिशोः । योजनानि दश दश, मुक्त्वा तटभुवि–स्थिताः ॥ २६३ ॥
शैलाः काञ्चननामानो, मूले लग्नाः परस्परम् । एकैकतो दश दश क्षेत्रेऽस्मिन् निखिलाः शतम् ॥ २६४ ॥
सर्वेऽपि योजनशतोत्तुङ्गा रम्या हिरण्मयाः । विष्कम्भायामतो मूले, योजनानां शतं मताः ॥ २६५ ॥
मध्ये पञ्चसप्ततिं च, योजनानि प्रकीर्त्तिताः । पञ्चाशतं योजनानि, मस्तके विस्तृतायताः ॥ २६६ ॥
शतत्रयं षोडशाढ्यं, किञ्चिद्विशेषतोऽधिकम् । योजनानि परिक्षेपस्तेषां मूले प्रकीर्त्तितः ॥ २६७ ॥

मध्ये विशेषाभ्यधिका, सप्तत्रिंशा शतद्वयी । सातिरेकाष्टपञ्चाशद्युक्तं शतमथोपरि ॥ २६८ ॥
वसुन्धरावधूक्रीडास्वर्णसारिसमाः स्थिताः । दक्षिणोत्तरपङ्क्त्यैते, वेदिकावनमण्डिताः ॥ २६९ ॥
काञ्चनप्रभपाथोजाद्यलङ्कृतजलाश्रयाः । काञ्चनाख्यास्ततो यद्वा, काञ्चनाख्यैः सुरैः श्रिताः ॥ २७० ॥
सर्वेऽप्येकैकप्रसादावतंसाश्रितमौलयः । प्रासादास्ते च यमकप्रासादसदृशा मताः ॥ २७१ ॥
सपरिच्छदमेकैकं, तत्र सिंहासनं स्फुरत् । ऐश्वर्यं भुञ्जते तेषु, निर्जराः काञ्चनाभिधाः ॥ २७२ ॥
ऋद्धिश्चैषां विजयवदायुः पल्योपमं स्मृतम् । मेरोरुदग् राजधान्यो, जम्बूद्वीपे परत्र च ॥ २७३ ॥
अथोत्तरकुरुक्षेत्रस्थिता जम्बूर्निरूप्यते । सुदर्शनाख्या यन्नाम्ना, जम्बूद्वीपोऽयमुच्यते ॥ २७४ ॥
उत्तराः कुरवो द्वेधा, विभक्ताः शीतया किल । पूर्वापरार्द्धभावेन, सीमन्तेनालका इव ॥ २७५ ॥
तत्र च—
दक्षिणस्यां नीलगिरेरुदीच्यां मन्दराचलात् । पश्चिमायां माल्यवतः, शीतायाः प्राक्तने तटे ॥ २७६ ॥
उदक्कुरुप्राक्तनार्द्धमध्यभागे निरूपितम् । जाम्बूनदमयं जम्बूपीठं नम्रसुरासुरैः ॥ २७७ ॥
शतानि पञ्च विष्कम्भायामौ परिधिरस्य च । एकाशीत्यधिकं सार्द्धसहस्रं किञ्चनाधिकम् ॥ २७८ ॥
पीठस्यास्य मध्यभागे, बाहल्यं परिकीर्त्तितम् । योजनानि द्वादशान्त्यभागेषु क्रोशयोर्द्वयम् ॥ २७९ ॥
तदेकया पद्मवरवेदिकया वनेन च । समावृतं तन्मानादि, जगतीवेदिकादिवत् ॥ २८० ॥
दिक्षु पूर्वाद्यासु तस्य, जम्बूपीठस्य तीर्थपैः । एकैकं द्वारमुक्तं त्रिसोपानप्रतिरूपकम् ॥ २८१ ॥
तदेकक्रोशविस्तीर्णं क्रोशद्वयसमुच्छ्रितम् । वज्ररत्नमयैर्भूमिमूलभागैर्मनोहरम् ॥ २८२ ॥
भूमेरुर्ध्वं प्रतिष्ठानभूतैश्च रिष्टरत्नजैः । प्रदेशैः शोभितं वर्यवैडूर्यस्तम्भबन्धुरम् ॥ २८३ ॥
सुवर्णरुप्यफलकैर्वैडूर्यसन्धिबन्धुरैः । रत्नालम्बनबाहाभी, रत्नालम्बनकैर्युतम् ॥ २८४ ॥
द्वारेषु तेषु सर्वेषु, प्रत्येकं तोरणं भवेत् । रत्नस्तम्भसन्निविष्टं, वृषभाश्वादिचित्रयुक् ॥ २८५ ॥
तोरणानामुपर्येषामुत्तरङ्गेषु सन्ति वै । अष्टावष्टौ मङ्गलानि तथा तत्तोरणोपरि ॥ २८६ ॥
दण्डा वज्रमयाः पञ्चवर्णाश्च चामरध्वजाः । पताकातिपताकाश्च, छत्रातिछत्रकाणि च ॥ २८७ ॥
भूयांसि घण्टायुग्मानि, भूयांस उत्पलोच्चयाः । भूयांसः पद्मकुमुदनिकराः सन्ति रत्नजाः ॥ २८८ ॥
मध्यभागेऽस्य पीठस्य, स्याच्चतुर्योजनोन्नता । योजनान्यष्ट विस्तीर्णायतैका मणिपीठिका ॥ २८९ ॥
उपर्यस्याः पीठिकाया, जम्बूवृक्षोऽस्ति वेष्टितः । वेदिकाभिर्द्वादशभिः, प्राकाराकारचारुभिः ॥ २९० ॥
अथास्य जम्बूवृक्षस्य, मूलं वज्रमयं मतम् । मूलादुपरि यः कन्दो, भूमध्यस्थः स रिष्टजः ॥ २९१ ॥
स्कन्धः कन्दादुत्थितो यः, स तु वैडूर्यरत्नजः । सुवर्णमय्यस्तच्छाखाः, प्रशाखा जातरूपजाः ॥ २९२ ॥
शाखानां दिक्प्रसृतानां, मध्ये स्कन्धात्समुत्थिता । योर्द्ध्वशाखा विडिमाख्या, सोक्ता रजतनिर्मिता ॥ २९३ ॥

पत्राणि तस्य वैडूर्यमयानि जगदुर्जिनाः । तपनीयवृन्तवन्ति, गुच्छा जाम्बूनदोद्भवाः ॥ २९४ ॥
रजतोत्थास्तत्प्रवालाङ्कुराः पुष्पफलावली । नानारत्नमयी जम्बूतरुरिदृक् श्रुतः श्रुते ॥ २९५ ॥
शाखाप्रभवपर्यन्तः, स्कन्धः कन्दाद्य ऊर्द्ध्वगः । द्वे योजने स उत्तुङ्गो, विस्तीर्णः क्रोशयोर्द्वयम् ॥ २९६ ॥
या दिक्प्रसृत शाखान्तर्जाता शाखोर्द्ध्वगामिनी । विडिमापरपर्याया, सोत्तुङ्गा योजनानि षट् ॥ २९७ ॥
एवं च कन्दादारभ्य, सर्वाग्रेणाष्टयोजनीम् । जम्बूतरुः समुतुङ्गो, भूमग्नः क्रोशयोर्द्वयम् ॥ २९८ ॥
या तस्य प्रसृता स्कन्धाच्छाखा दिक्षु चतसृषु । पूर्वादिषु किलैकैकाः, शिष्यशाखा गुरोरिव ॥ २९९ ॥
क्रोशेनोनानि चत्वारि, योजनान्यायताश्च ताः । प्रत्येकं चित्रकृत्पत्रफलपुष्पाद्यलङ्कृताः ॥ ३०० ॥
एवं चोभयतः शाखादैर्घ्ये स्कन्धोरुतान्विते । विष्कम्भायामतः सोऽयं, भवेत् पूर्णाष्टयोजनः ॥ ३०१ ॥
शाखायाः प्रसृतायाः प्राक्, मध्यभागे विराजते । अनादृतस्य देवस्य, भवनं रत्ननिर्मितम् ॥ ३०२ ॥
अनेकरत्नस्तम्भाढ्यं, क्रोशमायामतो मतम् । विष्कम्भतस्तु क्रोशार्द्धं, देशोनं क्रोशमुन्नतम् ॥ ३०३ ॥
धनुःपञ्चशतोत्तुङ्गं, तदर्द्धं पृथुलं क्रमात् । प्राच्युदीचीदक्षिणासु, द्वारमेकैकमत्र च ॥ ३०४ ॥
धनुःपञ्चाशतायामविष्कम्भा मणिपीठिका । तदर्द्धमानबाहल्या, तत्र शय्याविराजिता ॥ ३०५ ॥
शेषशाखासु तिसृषु, स्युः प्रासादावतंसकाः । प्राक्शाखाभाविभवनानुकाराः सर्वमानतः ॥ ३०६ ॥
सर्वरत्नमयामविष्कम्भा मणिपीठिका । अनादृतस्वर्गियोग्यसिंहासनविभूषिताः ॥ ३०७ ॥

यद्यपि विषमायामविष्कम्भं भवनं श्रीदेव्यादिभवनवत् समायामविष्कम्भः प्रासादोः विजयादिप्रासादवदिति भवनप्रासादयोर्विशेषमामनन्ति तथापि श्रीजम्बूद्वीपप्रज्ञप्तिसूत्रश्रीजिनभद्रगणिक्षमाश्रमणकृतक्षेत्रसमास श्रीउमास्वातिवाचककृतजम्बूद्वीपसमासश्रीसोमतिलकसूरिकृतनव्यबृहत्क्षेत्रसमासादिष्वेतेषां वक्ष्यमाणवनगतानां च प्रासादतया व्यपदिष्टत्वात् क्रोशायामक्रोशार्द्धविष्कम्भत्वस्य चोक्तत्वात् जम्बूप्रकरणे प्रासादा अपि विषमायामविष्कम्भा इति ध्येयम् । इत्यर्थत उपाध्यायश्रीशान्तिचन्द्रोपज्ञजम्बूद्वीपप्रज्ञप्तिवृत्तौ ॥

जीवाभिगमसूत्रे त्वेषामपि समायामविष्कम्भत्वमेव दृश्यते । तथा च तद्ग्रन्थः । तत्थ जेसे दाहिणिल्ले साले एत्थ णं एगे महं पासायावडिंसए पण्णत्ते कोसं च उड्ढं उच्चतेणं अद्धकोसं आयामविक्खंभेणं इति, शेषप्रासादसूत्राण्यऽप्यस्यैव सूत्रस्यातिदेशेनोक्तानीति ज्ञेयम् ॥

चतुर्दिग्गतशाखान्तः, शाखा या विडिमाभिधा । तस्या मौलौ मध्यभागे, सिद्धायतनमुत्तमम् ॥ ३०८ ॥
विष्कम्भायामतश्चैतत्, प्राक्शाखाभवनोपमम् । देशोनक्रोशमुत्तुङ्गं, पृथुद्वारत्रयान्वितम् ॥ ३०९ ॥
तस्य मध्ये महत्येका, शोभते मणिपीठिका । धनुःपञ्चाशतायामव्यासा तदर्धमेदुरा ॥ ३१० ॥
उपर्यस्या महानेको, देवच्छन्दक आहितः । पञ्चचापशतायामविष्कम्भः सर्वरत्नजः ॥ ३११ ॥
सातिरेकधनुःपञ्चशतोत्तुङ्गोऽथ तत्र च । अष्टाधिकं जिनार्चानां, शतं वैताढ्यचैत्यवत् ॥ ३१२ ॥

एवमुक्तस्वरूपोऽयं, जम्बूवृक्षः समन्ततः । भात्यष्टाग्रेण जम्बूनां, शतेन परिवेष्टितः ॥ ३१३ ॥
अमी आद्यपरिक्षेपगता जम्बूमहीरुहः । मूलजम्बूतरोरर्द्धमाना भवन्ति सर्वथा ॥ ३१४ ॥
यथा द्वादशभिः पद्मवेदिकाभिः स वेष्टितः । तथाऽमी निखिला षड्भिर्वेदिकाभिरलङ्कृताः ॥ ३१५ ॥
श्रीदेवीपद्मवच्चैते, सर्वेऽनादृतनाकिनः । स्वीयाभरणसर्वस्वनिक्षेपवणिगापणाः ॥ ३१६ ॥

एतेषु च १०८ जम्बूवृक्षेषु श्रीजम्बूद्वीपप्रज्ञप्ति–श्रीजीवाभिगमक्षेत्रविचारादौ सूत्रकृद्भिर्वृत्तिकृद्भिश्च जिनभवनप्रासादचिन्ता न कापि चक्रे । बहवो बहुश्रुताः श्राद्धप्रतिक्रमणचूर्णिकारादयः शाश्वतजिनस्तोत्रकर्त्तुश्रीजयानन्दसूरिप्रभृतयश्च मूलजम्बूवृक्षवत् प्रथमवलयजम्बूवृक्षप्रथमवनखंडगतकूटाष्टकजिनभवनैः सह जम्बूवृक्षे सप्तदशोत्तरं जिनभवनानां शतं मन्यमाना इहाप्येकैकं सिद्धायतं पूर्वोक्तमानं मेनिरे । ततोऽत्र तत्त्वं केवलिनो विदुः । इति जम्बूद्वीपप्रज्ञप्तिवृत्तौ ॥

मूलजम्बूतरोस्तस्माद्यथाक्रमं दिशां त्रये । वायव्यामुत्तरस्यां चैशान्यां च तुल्यनाकिनाम् ॥ ३१७ ॥
जम्बूसहस्राश्चत्वारस्तावतां कीर्त्तिता जिनैः । जम्ब्वश्चतस्रः पूर्वस्यां, महिषीणां चतसृणाम् ॥ ३१८ ॥
सहस्राण्यष्ट चाग्नेय्यां, जम्ब्योऽभ्यन्तरपर्षदाम् । जम्बूसहस्राणि दश, याम्यां मध्यपर्षदाम् ॥ ३१९ ॥
ता द्वादशसहस्राणि, नैर्ऋत्यां बाह्यपर्षदाम् । प्रत्यक् च सप्त सेनान्यां, परिक्षेपे द्वितीयके ॥ ३२० ॥
जम्बूसहस्राश्चत्वारः, प्रत्येकं दिक्चतुष्टये । सहस्राः षोडशेत्यात्मरक्षकाणां तृतीयके ॥ ३२१ ॥
यद्यप्युक्तं वलययोर्मानं नैवानयोः स्फुटम् । पूर्वाचार्यैरुच्चतादेः, प्राज्ञैर्ज्ञेयास्तथापि हि ॥ ३२२ ॥
श्रीदेवीपद्मदृष्टान्तात्, प्रथमाद्वलयादिह । अर्द्धादर्द्धमानका जम्ब्योऽनयोर्वलययोर्द्वयोः ॥ ३२३ ॥

तथाहुः जिनभद्रगणिपादाः क्षेत्रसमासे । पउमद्दहे सिरीए जो परिवारो कमेण निद्दिट्ठो । सो चेव य नायव्वो जम्बूएणाढियसुरस्स ॥ तथैवोक्तं जम्बूद्वीपप्रज्ञप्तिवृत्तौ ॥

अत्राप्येकैकया पङ्क्त्या, परिक्षेपे विवक्षिते । न जम्बूनामवकाशः, श्रीदेवीपद्मवत् भवेत् ॥ ३२४ ॥
तदिहापि परिक्षेपजातयस्तिस्र इत्यहो । ज्ञेयं जम्बूपङ्क्तयस्तु, यथायोगमनेकशः ॥ ३२५ ॥
स चैवं सपरीवारो, जम्बूवृक्षः समन्ततः । काननैर्योजनशतमानैस्त्रिभिः समावृतः ॥ ३२६ ॥
आन्तरेण मध्यमेन, बाह्येन च यथाक्रमम् । तत्रादिमे वने पूर्वादिषु दिक्षु चतसृषु ॥ ३२७ ॥
पञ्चाशतं योजनानि, वगाह्यात्रान्तरे महत् । एकैकं भवनं जम्बूशाखाभवनसन्निभम् ॥ ३२८ ॥
भवनेष्वेषु सर्वेषु, प्रत्येकं मणिपीठिका । तत्रानादृतदेवस्य, शयनीयं श्रमापहम् ॥ ३२९ ॥
तस्मिन्नेवादिमवनखण्डेऽखण्डेश्रियोज्ज्वले । पञ्चाशतो योजनानामैशान्यां समतिक्रमे ॥ ३३० ॥
अत्रान्तरे पुष्करिण्यश्चतस्रः स्युश्चतुर्दिशम् । प्राच्यां पद्मा दक्षिणस्यां, पद्मप्रभेति नामतः ॥ ३३१ ॥
कुमुदाख्या पश्चिमायामुदीच्यां कुमुदप्रभा । सर्वाः क्रोशार्द्धविष्कम्भा, एकक्रोशायताश्च ताः ॥ ३३२ ॥

धनु:पञ्चशतोद्वेधाः, सचतुर्द्वारतोरणाः । वृताः पद्मवेदिकया, वनखण्डेन चाभितः ॥ ३३३ ॥
तासां चतसृणां मध्ये, प्रासादः परिकीर्त्तितः । स च जम्बूवृक्षशाखाप्रासादसदृशोऽभितः ॥ ३३४ ॥
एवमस्मिन्नेव वने, वायव्यां दिशि योजनैः । पञ्चाशता पुष्करिण्यश्चतस्रः स्युश्चतुर्दिशम् ॥ ३३५ ॥
प्राच्यामुत्पलगुल्माख्या, याम्यां च नलिनाभिधा । स्यादुत्पला पश्चिमायामुदीच्यामुत्पलोज्ज्वला ॥ ३३६ ॥

अयं जम्बूद्वीपप्रज्ञप्तिसूत्र–जीवाभिगमसूत्राभिप्रायः ॥ बृहत्क्षेत्रसमासे तु "उप्पलभोमानलिणुज्जलुप्पला उप्पला य बीयंमि ।" इति वचनात् तृतीयतुर्ययोः नाम्निः व्यत्ययः प्रथमायाः नाम्नि विशेषश्च दृश्यते । इति ज्ञेयम् ॥

उक्त पुष्करिणीतुल्या, एता अपि प्रमाणतः । मध्ये तथैव प्रासादो, जम्बूप्रासादसन्निभः ॥ ३३७ ॥
वनेऽस्मिन्नेव नैर्ऋत्यां पञ्चाशद्योजनोत्तराः । यथाक्रमं पुष्करिण्यः, प्राच्यादिदिक्चतुष्टये ॥ ३३८ ॥
भृङ्गा भृङ्गनिभा किञ्चाञ्जनाथ कज्जलप्रभा । मध्ये प्रासाद एतासां, सर्वं मानं तु पूर्ववत् ॥ ३३९ ॥
आग्नेय्यां च योजनानां, पञ्चाशतो व्यतिक्रमे । वनेऽत्रैव पुष्करिण्यो, दिक्चतुष्के यथाक्रमम् ॥ ३४० ॥
श्रीकान्ता श्रीमहिता च, श्रीचन्द्रा च ततः परम् । श्रीनीलयाख्येति शेषं, प्रासादादि तु पूर्ववत् ॥ ३४१ ॥
प्रासादेष्वेषु चैकैकमस्ति सिंहासनं महत् । अनादृतस्य देवस्य, क्रीडार्हं सपरिच्छदम् ॥ ३४२ ॥
अत्र जम्बूद्वीपप्रज्ञप्तिसूत्रे "सीहासणा सपरिवारा" इति । जीवाभिगमे च "सीहासणं अपरिवार" इति ।
अस्मिन्नेव वने पूर्वदिक्भाविभवनात् किल । उदीच्यां दक्षिणस्यां चैशानीप्रासादशेखरात् ॥ ३४३ ॥
एकः कूटो द्वितीयस्तु, प्राग्भाविभवनादितः । दक्षिणस्यामुदीच्यां चाग्नेयीप्रासादपुङ्गवात् ॥ ३४४ ॥
पश्चिमायामथाग्नेयीप्रासादात् पूर्वतोऽपि च । दाक्षिणात्यात् भवनतः, कूटोऽत्रास्ति तृतीयकः ॥ ३४५ ॥
दाक्षिणात्यभवनतोऽपरस्यां पूर्वतोऽपि च । प्रासादानैर्ऋतीनिष्टात्तुर्यः कूटो भवेदिह ॥ ३४६ ॥
प्रासादानैर्ऋतीसंस्थादुदीच्यामथ याम्यतः । प्रतीचीनभवनतः, कूटो भवति पञ्चमः ॥ ३४७ ॥
प्रतीचीनभवनतः, उदीच्यामथ याम्यतः । वायव्यकोणप्रासादात्, षष्ठः कूटः निरूपितः ॥ ३४८ ॥
वायव्यकोणप्रासादात्, प्राच्यां पश्चिमतोऽपि च । उदग्भवनतस्तत्र, कूटो भवति सप्तमः ॥ ३४९ ॥
उदग्भवनतः प्राच्यामथ पश्चिमतोऽपि च । ऐशानकोणप्रासादादत्र कूटोऽष्टमो मतः ॥ ३५० ॥
एवमष्टाप्यमी कूटा, जात्यस्वर्णमयाः स्मृताः । द्वे योजने भूनिमग्ना, योजनान्यष्ट चोच्छ्रिताः ॥ ३५१ ॥
विष्कम्भायामतो मूले, योजनान्यष्ट कीर्तिताः । मध्ये षड्डूर्ध्वं चत्वारि, गोपुच्छाकृतयस्ततः ॥ ३५२ ॥
एषां मूले परिक्षेपोऽधिकानि पञ्चविंशतिः । मध्येऽष्टादश मौलौ च, योजनान्यर्कसंख्यया ॥ ३५३ ॥

तथोक्तम् । पणविसट्ठारसबारसेव मूले अ मज्झि उवरिं च । सविसेसाई परिरओ कूडस्स इमस्स बोधव्वो ।

अयं जम्बूद्वीपप्रज्ञप्तिसूत्राभिप्रायः ॥ जिनभद्रगणिक्षमाश्रमणैस्तु "अट्टुसहकूडसरिसा सव्वे जम्बूणया भणिया ।" इत्यस्यां गाथायां ऋषभकूटसमत्वेन भणितत्वात् मूले द्वादश योजनानि अष्टौ मध्ये चत्वारि चोपर्यायामविष्कम्भेनेत्यादि ऊचे । तथैव मलयगिरिपादैर्व्याख्यातमपि ॥ जीवाभिमसूत्रेऽपीत्थमेवैषां मानं दृश्यते ॥ तत्त्वं बहुश्रुतगम्यम् ॥

प्रत्येकमेषामुपरि, चैकैकं सिद्धमन्दिरम् । एतच्च जम्बूविडिमासिद्धायतनसन्निभम् ॥ ३५४ ॥
अष्टाप्येते पद्मवरवेदिकावनमण्डिताः । दिगङ्गनानामष्टानां, क्रीडायै निर्मिता इव ॥ ३५५ ॥
एवमुक्तस्वरूपाया, अस्या जम्ब्वा महातरोः । नामानि द्वादशैतानि, प्रज्ञप्तानि जिनेश्वरैः ॥ ३५६ ॥
सुदर्शना तथामोघा, सुप्रबुद्धा यशोधरा । भद्रा विशाला सुमनाः, सुजाता नित्यमण्डिता ॥ ३५७ ॥
विदेहजम्बूर्नियता, सौमनस्येति कीर्त्तिताः । रत्नमय्या अप्यमुष्या, द्रुमेषु मुख्यतां विदुः ॥ ३५८ ॥

तथोक्तं बहुश्रुताध्ययने । जहा दुमाणपवरा, जम्बू नाम सुदंसणा । अणाढीयस्स देवस्स, एवं हवइ बहुस्सुए ॥ [उत्तराध्ययनसूत्र अध्ययन-११, गाथा-२७]

जम्बूद्वीपपतिर्देवो, वसत्यस्यामनादृतः । जम्बूस्वामिपितृव्यो यः, प्राग्भवे सोऽधुनाऽस्त्यऽसौ ॥ ३५९ ॥
चतुः सामानिकसुरसहस्रसेवितक्रमः । महिषीभिः चतसृभिः, स्नेहिनीभिः कटाक्षितः ॥ ३६० ॥
पर्षद्भिस्तिसृभिर्जुष्टः, सप्तभिः सैन्यसैन्यपैः । उदायुधैः षोडशभिः, सहस्रैश्चात्मरक्षिणाम् ॥ ३६१ ॥
व्यन्तराणां व्यन्तरीणामन्येषामपि भूयसाम् । अनादृतराजधानीवास्तव्यानामधीश्वरः ॥ ३६२ ॥
मेरोरुदीच्यामन्यत्र, जम्बूद्वीपे महर्द्धिकः । पुर्यामनादृताख्यायां, साम्राज्यं पालयत्यसौ ॥ ३६३ ॥
यौ सीमाकारिणौ देवकुरूणां धरणीधरौ । सौमनसविद्युत्प्रभाभिधौ तौ वर्णयाम्यथ ॥ ३६४ ॥
निषधाद्रेरुत्तरस्यामाग्नेय्यां मन्दराचलात् । प्रतीच्यां मङ्गलावत्या, योऽसौ सौमनसाभिधः ॥ ३६५ ॥
देवा देव्यो वसन्त्यत्र, यतः प्रशान्तचेतसः । ततः सौमनसो यद्वा, सौमनसाख्यभर्तृकः ॥ ३६६ ॥
तुरङ्गस्कन्धसंस्थानो, गजदन्तसमोऽपि सः । मनोहरो रूप्यमयः, सप्तकूटोपशोभितः ॥ ३६७ ॥
सिद्धायतनमाद्यं स्यात्, परं सौमनसाभिधम् । सन्मङ्गलावतीकूटं, देवकुर्वभिधं परम् ॥ ३६८ ॥
विमलं काञ्चनं चैव, वासिष्टं कूटमन्तिमम् । प्रमाणं ज्ञेयमेतेषां, हिमवद्गिरिकूटवत् ॥ ३६९ ॥
आग्नेय्यामादिमं कूटं, मन्दरासन्नमाहितम् । तस्याग्नेय्यां द्वितीयं तु, तस्याप्याग्नेयकोणके ॥ ३७० ॥
कूटं तृतीयमित्येतत्कूटत्रयं विदिक्स्थितम् । अथो तृतीयादाग्नेय्यामुत्तरस्यां च पञ्चमात् ॥ ३७१ ॥
कूटं चतुर्थं प्रज्ञप्तमेतस्मात्कूटतः परम् । दक्षिणोत्तरया पङ्क्त्या, शेषं कूटत्रयं भवेत् ॥ ३७२ ॥
वत्समित्रासुमित्राख्ये, षष्ठपञ्चमकूटयोः । दिक्कुमार्यौ कूटसमाभिधा देवाश्चतुर्षु च ॥ ३७३ ॥

अत्र जम्बूद्वीपप्रज्ञप्तिसूत्रे, बृहत्क्षेत्रसमासे "सिरिनिलय" इति, क्षेत्रसमासादिषु च सौमनस-पञ्चमषष्ठकूटवासिन्यौ सुवत्सावत्समित्राख्ये एव दिक्कुमार्यौ उक्ते ॥ यत्तु जम्बूद्वीपप्रज्ञप्तिसूत्रे

एव जिनजन्माधिकारे अधोलोकवासिनीनां भोगङ्करादीनामष्टानां दिक्कुमारीणां मध्ये पञ्चमी तोयधारा षष्ठी विचित्रा चेत्युक्तं तदयं लिखितदोषो नामान्तरं वेति सर्वविद् वेद ॥

एतत्कूटाधिपदेवदेवीनां मन्दराचलात् । दक्षिणस्यां राजधान्यो, जम्बूद्वीपेऽपरत्र वै ॥ ३७४ ॥
उत्तरस्यां निषधाद्रेर्नैर्ऋत्यां कनकाचलात् । पूर्वस्यां पक्ष्मविजयात्, गिरिर्विद्युत्प्रभाभिधः ॥ ३७५ ॥
तपनीयमयत्वेन, विद्युद्दीप्तिमत्तया । विद्युत्प्रभेशयोगाद्वा, ख्यातो विद्युत्प्रभाख्यया ॥ ३७६ ॥
आद्यं सिद्धायतनाख्यं, विद्युत्प्रभं द्वितीयकम् । तृतीयं देवकुर्वाख्यं, ब्रह्मकूटं तुरीयकम् ॥ ३७७ ॥
पञ्चमं कनकाभिख्यं, षष्ठं सौवस्तिकाभिधम् । सप्तमं शीतोदाकूटं, स्याच्छतज्वलमष्टमम् ॥ ३७८ ॥
हरिकूटं तु नवमं, कूटैरेभिरलङ्कृतः । विभाति सानुमानेष, वेदिकावनशोभितः ॥ ३७९ ॥
नैर्ऋत्यां मन्दरात् ज्ञेयमाद्यं कूटचतुष्टयम् । षष्ठादुत्तरतस्तुर्यान्नैर्ऋत्यां पञ्चमं मतम् ॥ ३८० ॥
दक्षिणोत्तस्या पङ्क्त्या, शेषं कूटचतुष्टयम् । मानतोऽष्टापि कूटानि, हिमवद्गिरिकूटवत् ॥ ३८१ ॥
नवमं निषधासन्नं, दक्षिणस्यां किलाष्टमात् । सर्वथा माल्यवद्भाविहरिस्सहसमं च तत् ॥ ३८२ ॥
ज्ञेया चमरचञ्चावदेतत्कूटपतेर्हरेः । मेरोरपाच्यां नगरी, जम्बूद्वीपे परत्र सा ॥ ३८३ ॥

तथोक्तं जम्बूद्वीपप्रज्ञप्तिसूत्रे । जहा मालवंतस्स हरिस्सहकूडे तह चेव हरिकूडे रायहाणी जहा चेव दाहिणेणं चमरचञ्चारायहाणी तह णेयव्वा ॥ क्षेत्रसमासवृत्तावपि सा चमरचंचाराजधानीवत् प्रत्येयेति ॥

शेषकूटपतीनां तु, नगर्यो विजयोपमाः । जम्बूद्वीपेऽन्यत्र मेरोर्दक्षिणस्यां यथायथम् ॥ ३८४ ॥
दिक्कुमार्यो निवसतः, तत्र पञ्चमषष्ठयोः । पुष्पमालाऽनिन्दिताख्ये, शेषेषु पूर्ववत् सुराः ॥ ३८५ ॥
भोगङ्करादिमा गन्धमादनाद्यद्रिसानुषु । वसन्त्यो दिक्कुमार्योऽष्टौ, या एवमिह भाषिताः ॥ ३८६ ॥
शैलेष्वमीषु क्रीडार्थं, तासां वासो भवेद् ध्रुवम् । वसन्ति च स्वस्वगजदन्ताधोभवनेष्विमाः ॥ ३८७ ॥
एकैकगजदन्ताधो, द्वे द्वे स्तो भवने तयोः । तिर्यग्लोकं व्यतिक्रम्यासुरादिभवनास्पदे ॥ ३८८ ॥
अधोलोकनिवासिन्योऽत एवामूः श्रुते मताः । भूशुद्धिसूतिवेश्मादिनियुक्ता जिनजन्मनि ॥ ३८९ ॥

यद्यप्युत्तरकुरुवक्षस्कारयोर्यथायोगं सिद्धहरिस्सहकूटवर्जकूटाधिपराजधान्यो यथाक्रमं वायव्यामैशान्यां च यथा प्रागभिहितास्तथा देवकुरुवक्षस्कारयोर्यथायोगं सिद्धहरिकूटवर्जकूटाधिपराजधान्यो यथाक्रममाग्नेय्यां नैर्ऋत्यां च वक्तुमुचितास्तथापि प्रस्तुतसूत्रसम्बन्धि यावदादर्शेषु पूज्यश्रीमलयगिरिकृतक्षेत्रविचारवृत्तौ च तथा दर्शनाभावात् अस्माभिरपि राजधान्यो दक्षिणेनेत्यलेखि ।

इति श्रीजम्बूद्वीपप्रज्ञप्तिवृत्तौ ॥

अनयोर्नगयोर्दैर्घ्यव्यासोच्चत्वादिकं समम् । गन्धमादनसन्माल्यवतोरिव विभाव्यताम् ॥ ३९० ॥

सन्त्यथाभ्यां पर्वताभ्यामङ्कपालीकृता इव । मेरोर्दक्षिणतो देवकुरवो निषधादुदक् ॥ ३९१ ॥
अत्र देवकुरुर्नाम, देवः पल्योपमस्थितिः । वसत्यतस्तथा ख्याता, यद्वेदं नाम शाश्वतम् ॥ ३९२ ॥
धनुःपृष्ठव्यासजीवादिकं मानं तु धीधनैः । अत्राप्युत्तरकुरुवद्विज्ञेयमविशेषितम् ॥ ३९३ ॥
किन्त्वत्र निषधासन्ना, जीवा कल्प्या विचक्षणैः । विद्युत्प्रभसौमनसायामानुसारतो धनुः ॥ ३९४ ॥
शतान्यष्ट योजनानां, चतुस्त्रिंशद्युतानि च । चतुरः सप्तिकान् भागान्, व्यतीत्य निषधाचलात् ॥ ३९५ ॥
शीतोदायाः पूर्वतटे, विचित्रकूटपर्वतः । चित्रकूटः परतटे, सामस्त्याद्यमकोपमौ ॥ ३९६ ॥
किन्त्वेतत्स्वामिनोर्नूनं, विचित्रचित्रदेवयोः । जम्बूद्वीपेऽन्यत्र पुर्यौ, मेरोर्दक्षिणतो मते ॥ ३९७ ॥
अथैताभ्यां पर्वताभ्यामुत्तरस्याममी स्मृताः । ह्रदाः पञ्चोत्तरकुरुह्रदतुल्याः स्वरूपतः ॥ ३९८ ॥
निषधाचलसङ्काशशतपत्रादिशोभितः । निषधाख्यसुरावासः, प्रथमो निषधह्रदः ॥ ३९९ ॥
सद्देवकुरुसंस्थानशतपत्राद्यलङ्कृतः । देवकुर्वमरावासो, ह्रदो देवकुरुः परः ॥ ४०० ॥
सूरनामा तृतीयस्तु, ह्रदः सूरसुराश्रितः । सुलसस्वामिकस्तुर्यो, ह्रदः स्यात् सुलसाभिधः ॥ ४०१ ॥
भूषितः शतपत्राद्यैर्विद्युद्द्योतपाटलैः । विद्युत्प्रभः पञ्चमः स्याद्विद्युत्प्रभाधिदैवतः ॥ ४०२ ॥
पद्मपद्मपरिक्षेपतत्संख्याभवनादिकम् । अत्रापि पद्मह्रदवत्, विज्ञेयमविशेषतः ॥ ४०३ ॥
पूर्वपश्चिमविस्तीर्णास्ते दक्षिणोत्तरायताः । प्राक् प्रत्यक् च दश दश, काञ्चनाचलचारवः ॥ ४०४ ॥
काञ्चनाद्रिह्रदेशानामेषां विजयदेववत् । समृद्धानां राजधान्यो, दक्षिणस्यां सुमेरुतः ॥ ४०५ ॥
विचित्रचित्रौ निषधात्, यावद्दूरे व्यवस्थितौ । विचित्रचित्रशैलाभ्यां, तावता निषधो ह्रदः ॥ ४०६ ॥
द्वितीयादिह्रदानामप्येवमन्योऽन्यमन्तरम् । तुल्यं तथान्तिमह्रदक्षेत्रपर्यन्तयोरपि ॥ ४०७ ॥
एताः शीतास्पर्द्धयैव, शीतोदया द्विधाकृताः । पूर्वापरार्धभावेन, सद्देवकुरवोऽपि हि ॥ ४०८ ॥
शीतोदायास्तु यत्प्राच्यां, तत्पूर्वार्द्धमिहोच्यते । शीतोदायाः प्रतीच्यां यदपरार्द्धं तदोहितम् ॥ ४०९ ॥
तत्रैतासामपरार्द्धमध्यभागे निरूपितः । समानः शाल्मलीवृक्षो, जम्बूवृक्षेण सर्वथा ॥ ४१० ॥
किञ्चैतच्छाल्मलीपीठं, ख्यातं रजतनिर्मितम् । प्रासादभवनान्तःस्थाः, कूटा अप्यत्र राजताः ॥ ४११ ॥
शिखराकृतिमत्त्वेन, ख्यातोऽयं कुटशाल्मली । वेणुदेवाख्यः सुपर्णजातीयोऽस्य च नायकः ॥ ४१२ ॥

तथोक्तं स्थानाङ्गसूत्रद्वितीयस्थानके । तत्थणं दो महती महालया महदुमा पण्णत्ता यावत् कूटसामली चेव जम्बू चेव सुदंसणा । तत्थणं दो देवा महिड्ढिया जाव महासोक्खा पलिओवमठितीया परिवसंति । तं गरुले चेव वेणुदेवे अणाढीए चेव जम्बूदिवाहिवइ । एतद्वृत्तावपि गरुडः सुपर्ण कुमारजातीयो वेणुदेवो नाम्ना इत्यादि ॥ एवं च नायं सुपर्णकुमाराणां दाक्षिणात्य इन्द्रः संभाव्यते । किन्त्वन्य एव । तस्य हीन्द्रत्वेन सार्द्धपल्योपमरूपाया उत्कृष्टस्थितेर्न्याय्यत्वात् । अयं तु पल्योपमस्थितिक इति ॥ मतान्तरे तु–

क्रीडास्थानमयं वृक्षः, स्यात्सुपर्णकुमारयोः । वेणुदेववेणुदालिसुरयोरुभयोरपि ॥ ४१३ ॥

तथा चाह सूत्रकृताङ्गचूर्णिकृत् शाल्मलीवृक्षवक्तव्यतावसरे । तत्थ वेणुदेवे वेणुदाली य वसइ ॥ तयोर्हि तत् क्रीडास्थानमिति ॥

स्वरुपमुत्तरकुरुनृतिरश्चां यदीरितम् । आयुःशरीरमानादि, तदत्राप्यनुवर्त्तते ॥ ४१४ ॥

कुरवो द्विविधाः समा इमाः, सुषमाभिः सुतमां परस्परम् ।
मिलिताः कलहाय मेरुणा, प्रविभक्ता इव मध्यवर्त्तिना ॥ ४१५ ॥

विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिष-द्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे सर्गः सप्तदशः समाप्तिमगमद्विद्वत्प्रमोदप्रदः ॥ ४१६ ॥

॥ इति श्री लोकप्रकाशे सप्तदशः सर्गः समाप्तः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

॥ अथाष्टादशः सर्गः ॥

पार्श्वं शङ्खेश्वरोत्तंसं, नत्वा तत्त्वावबोधदम् । स्वरुपं स्वर्णशैलस्य, यथाश्रुतमथोच्यते ॥ १ ॥
उत्तरस्यां स्थितो देवकुरुभ्यः कनकाचलः । उत्तराभ्यः कुरुभ्यश्च, दक्षिणस्यां प्रतिष्ठितः ॥ २ ॥
प्रत्यक् पूर्वविदेहेभ्यः, प्राक् पश्चिमविदेहतः । रत्नप्रभाचक्रनाभिरिव मध्येऽस्त्यवस्थितः ॥ ३ ॥
निमित्तहेतोर्भुवनपर्यायभाण्डसम्भवे । भ्रमतः कालचक्रस्य, भ्रमिदण्ड इवोच्छ्रितः ॥ ४ ॥
मानदण्ड इवोदस्तो जम्बूद्वीपमीमिषया । तथैव स्थापितो धात्रा, मेयं मत्वाभितोल्यकम् ॥ ५ ॥
स्निग्धयोर्द्ध्वीकृतो धात्रीमात्रा स्वाङ्केऽतिकौतुकात् । नीलचूलो बाल इव, प्रभावलयचोलकः ॥ ६ ॥
चन्द्रार्क ग्रहनक्षत्रतारावृषभसंततेः । भ्रमन्त्या मनुजक्षेत्रे, मेढिदण्ड इवाहितः ॥ ७ ॥
नीलवन्निषधोन्मत्तदन्तिनोर्युध्यतोर्मिथः । मध्ये सीमास्तम्भ इव, गजदन्ताद्रिदन्तयोः ॥ ८ ॥
तिर्यग्लोकमहाब्जस्य, स्पष्टाष्टाशादलश्रियः । बीजकोश इवान्तःस्थः, परागभरपिञ्जरः ॥ ९ ॥
जम्बूद्वीपोरुपोतस्य, मुक्तस्य लवणार्णवे । कूपस्तम्भ इवोत्क्षिप्तः, प्रभासितपटाञ्चितः ॥ १० ॥
न्यस्तपादो भद्रशालकाननास्तरणोपरि । पश्यन्निवोर्ध्वदमोऽयं, नगेन्द्रः सेविनो नगान् ॥ ११ ॥
नरक्षेत्रकटाहेऽस्मिन्नानापदार्थपायसम् । पचतो विधिसूदस्य, दर्वीदण्ड इवोन्नतः ॥ १२ ॥
प्रादुश्चूलः सौमनसोत्तरीयोंऽशुजलप्लुतः । देवार्चकइवोन्नन्दिनन्दनारामधौतिकः ॥ १३ ॥

स चैकया पद्मवरवेदिकया परिष्कृतः । वनेन चाभितो नानारत्नज्योतिःप्रभासुरः ॥ १४ ॥
सहस्रान्नवनवतिं, योजनानां स उन्नतः । योजनानां सहस्रं चावगाढो वसुधान्तरे ॥ १५ ॥
लक्षयोजनमानोऽसौ, सर्वाग्रेण भवेदिति । चत्वारिंशदधिकानि, चूलाया योजनानि तु ॥ १६ ॥
योजानानां सहस्राणि, दशान्या नवतिस्तथा । योजनस्यैकादशांशा, दश मूलेऽस्य विस्तृतिः ॥ १७ ॥

अयं जम्बूद्वीपप्रज्ञप्तिसूत्रबृहत्क्षेत्रसमासाभिप्रायः ॥ श्रीसमवायाङ्गे तु मन्दरेण पञ्चए मूले दसजोअणसहस्साइं विक्खंभेणं पण्णत्ते । इति ज्ञेयम्[1] ॥

एकत्रिंशत्सहस्राणि, शता नव दशाधिकाः । योजनानां त्रयश्चैकादशांशाः परिधिस्त्विह ॥ १८ ॥
योजनानां सहस्राणि, दशास्य समभूतले । सहस्रमेकं शिखरे, व्यासश्चुलोपलक्षिते ॥ १९ ॥
एकत्रिंशत्सहस्राणि, योजनानां शतानि षट् । त्रयोविंशत्यधिकानि, परिधिः समभूतले ॥ २० ॥
ऊर्द्ध्वं च परिधिस्तस्य, योजनानां भवेत् गिरेः । सहस्राणि त्रीणि चैकं, द्वाषष्ट्याभ्यधिकं शतम् ॥ २१ ॥

अथ सर्वत्र विष्कम्भज्ञानाय करणम् ।

सहस्रयोजनव्यासान्मेरोरुपरिभागतः । यत्रोत्तीर्य योजनादौ, विष्कम्भो ज्ञातुमिष्यते ॥ २२ ॥
तद्योजनप्रभृत्येकादशभिः प्रविभज्यते । लब्धे सहस्रसंयुक्ते, व्यासोऽस्य वाञ्छितास्पदे ॥ २३ ॥
यथाधो नवनवतिं, सहस्राण्यूर्द्ध्वभागतः । अतीत्यात्र प्रदेशे चेद्विष्कम्भं ज्ञातुमिच्छसि ॥ २४ ॥
तदेतैर्नवनवतिसहस्रैः रुद्रभाजितैः । सहस्रान्नव संप्राप्तन्, सहस्रसहितान् कुरु ॥ २५ ॥
एवं दशसहस्राणि, जातानि धरणीतले । विष्कम्भो मेरुशैलस्य, सर्वत्रेवं विभाव्यताम् ॥ २६ ॥

अथवा प्रकारान्तरेणेदमेव करणम् ।

मूलाद्यत्र योजनादावुत्पत्य ज्ञातुमिष्यते । व्यासस्तस्मिन् योजनादौ, विभक्ते रुद्रसंख्यया ॥ २७ ॥
यल्लब्धं तन्मूलसत्काद्विस्ताराच्छोधयेत् बुधः । यच्छेषं तन्मितस्तस्य, व्यासोऽभीष्टस्थले यथा ॥ २८ ॥
कन्दात्सहस्रमुत्पत्य, व्यासं जिज्ञाससे यदि । सहस्रमेकादशभिर्भज लब्धमिदं पुनः ॥ २९ ॥
नवतिर्योजनान्यंशा, दश चैकादशात्मकाः । कन्दव्यासाच्छोधयेदं, ततः शेषाणि यानि तु ॥ ३० ॥
योजनानां सहस्राणि, दशैतावान्महीतले । विष्कम्भः स्वर्णशैलस्य, सर्वत्रैवं विभाव्यताम् ॥ ३१ ॥

अथ व्यासानुसारेण सर्वत्रोच्चत्वज्ञानाय करणम् ।

यावान् यत्रास्य विस्तारो, निश्चितो भूतलादिषु । तस्मिन्मूलस्य विस्ताराच्छोधिते यत्तु शिष्यते ॥ ३२ ॥

---

१ दृश्यमानमेरुमूले, समभूतलभूभागे इत्यर्थः, अधोऽवगाढस्य सहस्रस्य त्यक्तत्वात् सैकादशदशांशनवतियोजनपातः सुखावसेयः, एकादशांशत्रुटेश्चूलामूले सहस्रमानस्य च तत्रापि संमतत्वात्, वस्तुतस्तु मूले इति पाठ एव तत्र नास्ति, रुचकनामिसूत्रे परिधिसूत्रेऽत्रापि च तत्र धरणितलस्यैव स्पष्टो ग्रहः ।

गुण्यं तदेकादशभिर्यद्भवेत्तत्प्रमाणतः । उच्चत्वमस्य विष्कम्भस्यानुसारेण तद्यथा ॥ ३३ ॥
योजनानां सहस्राणि, दश व्यासोऽस्य भूतले । मूलविष्कम्भतस्तेषु, विशोधितेष्वदः स्थितम् ॥ ३४ ॥
नवतिर्योजनान्यंशा, दश चैकादशात्मकाः । अस्मिन्नैकादशगुणे, सहस्रमियमुच्चता ॥ ३५ ॥
मूलभूतलयोर्मध्ये, सर्वत्रैवं विभाव्यताम् । विस्तारस्यानुसारेण, तुङ्गत्वमीप्सितास्पदे ॥ ३६ ॥
अथ सर्वत्र विष्कम्भवृद्धिहानिज्ञानाय करणम् ।
उपरितने विस्तारेऽधस्तनविस्तारतः कृते दूरम् । तन्मध्यवर्त्तिशैलोच्छ्रयेण शेषे हृते विदुषा ॥ ३७ ॥
यल्लब्धं तदुभयतो, वृद्धिर्गिरिमौलितो ह्यधःपतने । तावत्येव च हानिर्मौलावारोहणेऽधस्तः ॥ ३८ ॥
तथाहि, साहस्रैर्मौलिविष्कम्भे, कन्दव्यासाद्विशोधिते । शेषं नवत्यधिकानि, शतानि नवतिः स्थितम् ॥ ३९ ॥
अंशा दशैकादशोत्थाश्चैषां कर्तुं सवर्णनम् । योजनानां राशिमेकादशभिर्गुणयेत् बुधः ॥ ४० ॥
भागान् दशोपरितनान्, क्षिपेज्जाता इमे ततः । लक्षं भाज्यराशिमेनं, क्वचित् संस्थापयेत् बुधः ॥ ४१ ॥
नगोच्छ्रयो लक्षरूपो, भाजको रुद्रसंगुणः । लक्षाण्येकादश जातस्तं भागार्थमधो न्यसेत् ॥ ४२ ॥
अल्पत्वेन विभाज्यस्य, भूयस्त्वात् भाजकस्य च । भागाप्राप्त्यापवर्त्त्यते, लक्षेण भाज्यभाजकौ ॥ ४३ ॥
उपर्यकः स्थितोऽधस्तादेकादश स्थितास्ततः । लब्ध एकादश भागो, योजनं योजनं प्रति ॥ ४४ ॥
यद्वा भाज्यभाजकयोरुभयोर्लक्षरूपयोः । राशिः भाज्योऽशरूपोऽस्ति, भाजको योजनात्मकः ॥ ४५ ॥
प्रतियोजनमेकोंऽशस्तत्सुखेनैव लभ्यते । इयं मेरोरुभयतो, वृद्धिहानी निरूपिते ॥ ४६ ॥
ज्ञातुमिष्टे वृद्धिहानी, तत्र यद्येकपार्श्वतः । द्वाविंशतिविभक्तस्य, योजनस्य लवस्तदा ॥ ४७ ॥
ततोऽयं भावः ।
यावदुत्पत्यते कन्दादङ्गुलयोजनादिकम् । एकादशस्तस्य भागो, कन्दव्यासात् क्षयं व्रजेत् ॥ ४८ ॥
तथाहि । एकादशस्वङ्गुलेषु, समुत्क्रान्तेषु मूलतः । क्षीयते मूलविष्कम्भात्, संपूर्णमेकमङ्गुलम् ॥ ४९ ॥
योजनेष्वपि तावत्सु, समुद्यातेषु मूलतः । क्षीयते मूलविष्कम्भात्, संपूर्णमेकयोजनम् ॥ ५० ॥
एवं योजनशतसहस्रेष्वपि भाव्यम् ॥
अत एव योजनानां, सहस्रे मूलतो गते । नवतिर्योजनान्यंशा, एकादशोद्भवा दश ॥ ५१ ॥
एतावानेकादशोंऽशः, सहस्रस्य क्षयं गतः । ततः सहस्राणि दश, विष्कम्भो धरणीतले ॥ ५२ ॥
एकादशस्वेकादशस्वतिक्रान्तेषु भूमितः । सहस्रेषु किलैकैकं, सहस्रं व्यासतो ह्रसेत् ॥ ५३ ॥
एवं च नवनवतेः, सहस्राणामतिक्रमे । शिरोभागेऽस्य विष्कम्भः, सहस्रमवशिष्यते ॥ ५४ ॥
यद्वा कन्दाद्योजनानां, लक्षेऽतीते शिरस्तले । लक्षस्यैकादशो भाग, एतावान् परिहीयते ॥ ५५ ॥
नवतिर्योजनशतान्यधिका नवतिस्तथा । अंशा दशैकादशोत्थाः, सहस्रं शिष्यते ततः ॥ ५६ ॥

प्रत्येकं परितः पञ्चशतविस्तृतयोर्ननु । नन्दनसौमनसयोः, सद्भावात् मेखलाद्वये ॥ ५७ ॥
योजनानां सहस्रस्य, द्वि भवेत् युगपत् त्रुटिः । कथमेकादशभागहानिस्तदुपपद्यते ? ॥ ५८ ॥
अत्रोच्यते कर्णगत्या, समाधेयमिदं बुधैः । का कर्णगतिरित्येवं, यदि पृच्छसि तत् शृणु ॥ ५९ ॥
कन्दादारभ्य शिखरं, यावत्तदुभयस्पृशि । दत्तायां दवरिकायां, स्थिरहस्तेन धीमता ॥ ६० ॥
अपान्तराले यत् क्वापि, कियदाकाशमास्थितम् । तत् समग्रं कर्णगत्या, मेरोराभाव्यमित्यतः ॥ ६१ ॥
तत् प्रकल्प्य मेरुतया, प्राहुर्गणितकोविदाः । सर्वत्रैकादशभागपरिहाणिं यथोदिताम् ॥ ६२ ॥

अयं चार्थः श्रीजिनभद्रगणिक्षमाश्रमणपूज्यैरपि विशेषणवत्यां लवणोदधिघन-गणितनिरूपणावसरे दृष्टान्तद्वारेण ज्ञापित एव ॥

अतोऽयं मेखलायुग्माविवक्षया क्रमात्तनुः । मूले च विस्तृतः सुष्ठूदस्तगोपूच्छसंस्थितः ॥ ६३ ॥
अथात्र त्रीणि काण्डानि, वर्त्तन्ते कनकाचले । काण्डं विभागो नियतविशिष्टपरिणामवान् ॥ ६४ ॥
चतुर्विधं काण्डमाद्यं, मृत्तिकाबहुलं क्वचित् । पाषाणबहुलं वज्रबहुलं शर्करामयम् ॥ ६५ ॥
काण्डं द्वितीयमप्येवं, चतुर्धाऽस्य निरूपितम् । अङ्कजं स्फाटिकं क्वापि, सौवर्णं राजतं तथा ॥ ६६ ॥
जात्यजाम्बूनदमयं, तृतीयं काण्डमीरितम् । त्रयाणामपि काण्डानां, परिमाणमथोच्यते ॥ ६७ ॥
सहस्रयोजनोन्मानमाद्यमारभ्य कन्दतः । त्रिषष्टिश्च सहस्राणि, द्वितीयं समभूतलात् ॥ ६८ ॥
ततस्तृतीयं षट्त्रिंशत्सहस्रावधि कीर्त्तितम् । एवं काण्डैस्त्रिभिस्तस्य लक्षमेकं समाप्यते ॥ ६९ ॥

अयं जम्बूद्वीपप्रज्ञप्तिसूत्राभिप्रायः ॥ समवायाङ्गे त्वष्टत्रिंशत्तमे समवाये द्वितीयविभाग-रष्टत्रिंशद्योजनसहस्राण्युच्चत्वेन भवतीत्युक्तमिति ज्ञेयं[1] ॥

चतुर्विधत्वे नन्वेवमाद्यद्वितीयकाण्डयोः । मृत्तिकादिविभागानां, न पृथक्काण्डता कथम् ॥ ७० ॥
अत्रोच्यते ।
पृथ्व्यादिवस्तुजत्वेऽपि, नैयत्येनोक्तकाण्डयोः । पृथ्व्यादिरूपभागानामविवेकात् न काण्डता ॥ ७१ ॥
चतुर्भिश्चायमभितो, वनखण्डैरलङ्कृतः । दानशीलतपोभावैः, जैनधर्म इवोन्नतः ॥ ७२ ॥
तत्र भूमौ भद्रशालं, क्रमात् मेखलयोर्द्वयोः । नन्दनं सौमनसं च, शिखरे पण्डकं वनम् ॥ ७३ ॥
तत्राद्यं भद्रशालाख्यं, मेरोः पश्चिमपूर्वतः । द्वाविंशतिर्द्वाविंशतिः, सहस्राण्यायतं मतम् ॥ ७४ ॥
सार्द्धे द्वे योजनशते, दक्षिणोत्तरविस्तृतम् । स्थितं मेरुं परिक्षिप्य, वलयाकृतिनात्मना ॥ ७५ ॥
अत्रेयमुपपत्तिः ।

---

१ बहिर्दृश्यमेवंपेक्षया द्वितीयः, तथा च मूलापेक्षया तृतीयः कर्णदवरिकापेक्षया च ग्रहणं उच्चत्वस्य, दवरिकान्तौ च सौमनसबाह्यपरिधौ चूलामध्ये च, व्यवहारेण साधिकसप्तत्रिंशत्यपि तथोक्तिर्न विरुद्धा ।

पूर्वस्यां पश्चिमायां वा, य आयामोऽस्य वर्णितः । सोऽष्टाशीत्या विभक्तः सन्, विस्तारोऽत्रैकपार्श्वतः ॥ ७६ ॥
किञ्च उदीच्यो दाक्षिणात्यो वा, विस्तारोऽस्य वनस्य यः । सोऽष्टाशीत्या ताडितः सन्नायामोऽस्यैकपार्श्वतः ॥ ७७ ॥
भद्रशालवनं चैतदष्टधा विहितं किल । शीतोदया शीतया च, गजदन्ताद्रिमेरुभिः ॥ ७८ ॥
तथाहि, एको भागो मन्दरस्य, प्राच्यां पश्चिमतः परः । विद्युत्प्रभसौमनसमध्येऽपाच्यां तृतीयकः ॥ ७९ ॥
तुर्यश्चोत्तरतो माल्यवद्गन्धमादनान्तरे । भागाः सर्वेऽप्यमी शीताशीतोदाभ्यां द्विधाकृताः ॥ ८० ॥
तच्चैवम्,
उदीच्यांशो द्विधा चक्रे, शीतया प्राक्प्रवृत्तया । प्राचीं प्रति प्रस्थितया, प्राक्खण्डोऽपि द्विधाकृतः ॥ ८१ ॥
शीतोदया याम्यखण्डो, द्विधोदग्गतया कृतः । द्विधा पश्चिमखण्डोऽपि, कृतः प्रत्यक्प्रवृत्तया ॥ ८२ ॥
इत्येवमष्टभागेऽस्मिन्, मेरोर्दिक्षु चतसृषु । सिद्धायतनमेकैकं, पञ्चाशद्योजनोत्तरम् ॥ ८३ ॥
उक्तान्येतानि हिमवच्चैत्यतुल्यानि सर्वथा । स्वरूपतो मानतश्च, सेवितानि सुरासुरैः ॥ ८४ ॥
विदिक्षु पुनरेकैकः, प्रासादस्तावदन्तरे । योजनानां पञ्च शतान्युच्चोऽर्द्धं विस्तृतायतः ॥ ८५ ॥
चतुर्दिशं चतसृभिस्ते वापीभिरलङ्कृताः । योजनानि दशोद्विद्धास्ताः षोडशापि वापिकाः ॥ ८६ ॥
पञ्चाशद्योजनायामा, आयामादर्द्धं च विस्तृताः । स्वरूपतो नामतश्च, जम्बूवापीसमाः समाः ॥ ८७ ॥
आग्नेय्यामथ नैर्ऋत्यां, यौ प्रासादौ प्रतिष्ठितौ । तौ सौधर्मसुरेन्द्रस्य, तदर्हासनशालिनौ ॥ ८८ ॥
वायव्यामथ चैशान्यां, यौ प्रासादौ प्ररूपितौ । तावीशानसुरेन्द्रस्य, तद्योग्यासनशोभनौ ॥ ८९ ॥
अष्टौ दिग्गजकूटानि, वनेऽस्मिन् जगदुर्जिनाः । गजाकृतीनि कवयो, यान्याहुर्दिग्गजा इति ॥ ९० ॥
पद्मोत्तरो नीलवांश्च, सुहस्त्यथाञ्जनागिरिः । कुमुदश्च पलाशश्च वतंसो रोचनागिरिः ॥ ९१ ॥
अन्ये—तु रोचनागिरिस्थाने रोहणागिरिं पठन्ति ॥
मेरोरुत्तरपूर्वस्यां, शीतायाः सरितः पुनः । गच्छन्त्याः प्रागभिमुखमुत्तरस्यामिहादिमः ॥ ९२ ॥
प्रादक्षिण्यक्रमेणाथ, मेरोर्दक्षिणपूर्वतः । शीतायाः प्राक्प्रवृत्ताया, दक्षिणस्यां च नीलवान् ॥ ९३ ॥
मेरोर्दक्षिणपूर्वस्यां, शीतोदायाश्च पूर्वतः । मेरोर्दक्षिणदिक्स्थायाः, सुहस्ती नाम दिग्गजः ॥ ९४ ॥
अञ्जनो नाम दिग्नागो, नैर्ऋत्यां मेरुभूधरात् । शीतोदायाः पश्चिमतः, प्रयान्त्यारुत्तरां प्रति ॥ ९५ ॥
दिग्नागः कुमुदोऽप्येवं, नैर्ऋत्यामेव मेरुत । शीतोदायाः दक्षिणतः, प्रयान्त्या वारुणीं प्रति ॥ ९६ ॥
उत्तरापरतो मेरोः, पलाशो नाम दिग्गजः । पश्चिमाभिमुखं यान्त्याः, शीतोदाया उदक् च सः ॥ ९७ ॥
अथावतंसकोऽप्येवं, वायुकोणे सुमेरुतः । स शीतायाः पश्चिमतः, प्रयान्त्या दक्षिणां प्रति ॥ ९८ ॥
मेरोरुत्तरपूर्वस्यामष्टमो रोचनाचलः । दक्षिणाभिमुखं यान्त्याः, शीतायाः पूर्वतश्च सः ॥ ९९ ॥
एकैकस्यां विदिश्येवं, द्वौ द्वौ कूटौ निरूपितौ । प्रासादसिद्धायतनान्तरालेषु किलाष्टसु ॥ १०० ॥

तथाहि वृद्धसंप्रदायः ।

भद्रशालवने मेरोश्चतस्रोऽपि दिशः किल । नदीप्रवाहे रुद्धाः तद्दिक्ष्वेवार्हद्गृहाणि न ॥ १०१ ॥
किन्तु नद्यन्तिकस्थानि, भवनानि किलार्हताम् । गजदन्तसमीपस्थाः, प्रासादाश्च बिडौजसाम् ॥ १०२ ॥
तदन्तरालेष्वष्टासु, करिकूटा यथोदिताः । दर्शितः स्थाननियमस्तत्राप्येष विशेषतः ॥ १०३ ॥
बहिरुत्तरकुरुभ्यो, मेरोरुत्तरपूर्वतः । शीताया उत्तरदिशि, प्रासादः परिकीर्त्तितः ॥ १०४ ॥
मेरोः प्राच्यां दक्षिणतः, शीतायाः सिद्धमन्दिरम् । एतस्योभयतः कूटौ, द्वौ प्रज्ञप्तौ जिनेश्वरैः ॥ १०५ ॥
बहिर्देवकुरूणां च, मेरोर्दक्षिणपूर्वतः । शीताया दक्षिणदिशि, प्रासादः कीर्त्तितो जिनैः ॥ १०६ ॥
मध्ये देवकुरुणां वै, शीतोदायाश्च पूर्वतः । मेरोर्दक्षिणतः सिद्धायतनं स्मृतमागमे ॥ १०७ ॥
अस्याप्युभयतः कूटौ, समश्रेण्या व्यवस्थितौ । धुर्यौ युगन्धरस्येव, महीन्द्रस्येव चामरौ ॥ १०८ ॥
शीतोदाया दक्षिणतो, नैर्ऋत्यां स्वर्णभूभृतः । बहिर्देवकुरूणां च, प्रासादः प्राग्वदाहितः ॥ १०९ ॥
शीतोदाया उत्तरतः, पश्चिमायां सुमेरुतः । सिद्धानां सदनं कूटौ, तस्याप्युभयतः स्थितौ ॥ ११० ॥
शीतोदाया उत्तरतो, वायुकोणे सुमेरुतः । बहिरुत्तरकुरुभ्यः, प्रासादः सुरभूभृतः ॥ १११ ॥
शीतानद्याः पश्चिमायामुदीच्यां मन्दराचलात् । उत्तरासां कुरूणां च, मध्येऽस्ति सिद्धमन्दिरम् ॥ ११२ ॥
कूटौ द्वौ तदुभयतो, मेरोः सर्वेऽप्यमी स्थिताः । विहारकूटप्रासादाः, पञ्चाशद्योजनान्तरे ॥ ११३ ॥
योजनानां पञ्चशतान्युच्चैस्त्वेन भवन्त्यमी । गव्यूतानां पञ्चशती, निमग्नाश्च धरोदरे ॥ ११४ ॥
मूले पञ्च योजनानां, शतान्यायतविस्तृताः । मध्ये त्रीणि पञ्चसप्तत्यधिकानि शतानि च ॥ ११५ ॥
उपर्यर्द्धतृतीयानि, शतानि विस्तृतायताः । कूटा इमे वर्षधरगिरिकूटसमा इति ॥ ११६ ॥
सर्वेऽमी वनखण्डेन, पद्मवेदिकयान्विताः । सिंहासनाढ्यस्वस्वेशप्रासादभ्राजिमौलयः ॥ ११७ ॥
द्वाषष्टिं योजनान्येते, प्रासादा विस्तृतायताः । एकत्रिंशद्योजनोच्चाः, रम्या विविधरत्नजाः ॥ ११८ ॥
एकपल्यायुषस्तेषु, स्वस्वकूटसमाभिधाः । क्रीडन्ति नाकिनः स्वैरं, दिक्कुम्भिकूटनायकाः ॥ ११९ ॥
स्वस्वकूटविदिक्ष्वेषां, राजधान्यः प्रकीर्त्तिताः । जम्बूद्वीपेऽन्यत्र यथायोगं विजयदेववत् ॥ १२० ॥
एतेषु करिकूटेषु, पूर्वाचार्यैश्चिरन्तनैः । पठ्यन्ते जिनचैत्यानि, स्तोत्रेषु शाश्वतार्हताम् ॥ १२१ ॥
जम्बूद्वीपप्रज्ञप्त्यादिसूत्रे तूपलभामहे । न साम्प्रतं तत्र तत्त्वं, जानन्ति श्रुतपारगाः ॥ १२२ ॥

अत एवोक्तं रत्नशेखरसूरिभिः स्वोपज्ञक्षेत्रविचारे । करिकूडकुंडनइदहकुरुकंचण-
जमलसमविअड्ढेसु । जिणभवणविसंवाओ, जो तं जाणंति गीयत्था ॥ [लघुक्षेत्रसमास गा. ७८]

भद्रशालवनस्यास्य, समभूमेरुपर्यथ । स्यात्पञ्चयोजनशतातिक्रमे नन्दनं वनम् ॥ १२३ ॥
योजनानां पञ्चशतान्येतद्विष्कम्भतो मतम् । स्थितं मेरुं परिक्षिप्य, वलयाकृतिनाऽऽत्मना ॥ १२४ ॥

बाह्याभ्यन्तररूपं हि, विष्कम्भद्वितयं भवेत् । गिरीणां मेखलाभागे, ततोऽत्र द्वयमुच्यते ॥ १२५ ॥
एक एकादशभागो, योजनस्यापचीयते । प्रतियोजनमेवं च, पञ्चशत्या व्यतिक्रमे ॥ १२६ ॥
लब्धानि पञ्चचत्वारिंशद्योजनानि पञ्चभिः । एकादशांशैर्युक्तानि, त्यज्यन्ते मूलविस्तृतेः ॥ १२७ ॥
दशसहस्ररूपायास्तदैतदवशिष्यते । शतानि नवनवतिश्चतुष्पञ्चाशदेव च ॥ १२८ ॥
एकादशांशाः षट् बाह्यो, व्यासोऽयं तत्र भूभृतः । दक्षिणोत्तरयोः पूर्वापरयोर्वा वनान्तयोः ॥ १२९ ॥
एकत्रिंशद्योजनानां, सहस्राणि चतुःशती । एकोनाशीतिरधिका, परिक्षेपोऽत्र बाह्यतः ॥ १३० ॥
बाह्ये च गिरिविष्कम्भे, सहस्रयोजनोनिते । स्यादन्तर्गिरिविष्कम्भः, स चायं परिभाव्यते ॥ १३१ ॥
सहस्राणि योजनानामष्टौ नव शतानि च । चतुःपञ्चाशत्तथांशाः, षडेकादशनिर्मिताः ॥ १३२ ॥
सहस्रा योजनान्यष्टाविंशतिस्त्रिशती तथा । षोडशाढ्या तथा भागा, अष्टावेकादशोत्थिताः ॥ १३३ ॥
अन्तःपरिरयोऽयं च, भवेदस्मिन् वने गिरेः । वनमेतदथो पद्मवेदिकावनवेष्टितम् ॥ १३४ ॥
एवं चत्वार्यपि वनानि ज्ञेयानि ॥
सिद्धायतनमेकैकं पूर्वादिदिक्चतुष्टये । सुवर्णशैलतः पञ्चाशद्योजनव्यतिक्रमे ॥ १३५ ॥
विदिक्षु तावतैवास्मात्, प्रासादा भद्रशालवत् । तेषां चतुर्दिशं वाप्यः, प्रत्येकमिति षोडश ॥ १३६ ॥
नन्दोत्तरा तथा नन्दा, सुनन्दा वर्द्धनापि च । ऐशान्यां विदिशि प्राहुर्वापीनामानि सत्तमाः ॥ १३७ ॥
नन्दिषेणा तथाऽमोघा, गोस्तूपा च सुदर्शना । आग्नेय्यां विदिशि प्राहुर्वापीनामानि सत्तमाः ॥ १३८ ॥
भद्रा विशाला कुमुदा, तथा च पुण्डरीकिणी । नैर्ऋत्यां विदिशि प्राहुर्वापीनामानि सत्तमाः ॥ १३९ ॥
विजया वैजयन्ती चापराजिता जयन्त्यपि । वायव्यां विदिशि प्राहुर्वापीनामानि सत्तमाः ॥ १४० ॥
स्युश्चतस्रश्चतस्रस्ताः, पूर्वादिदिगनुक्रमात् । स्थिताः परीत्य परितः, प्रासादांस्तान् विदिग्गतान् ॥ १४१ ॥
आग्नेय्यामथ नैर्ऋत्यां, प्रासादौ शक्रभर्तुकौ । वायव्यामथ चैशान्यां, तावीशानसुरेशितुः ॥ १४२ ॥
कूटा नव भवन्त्यत्र, नन्दनाख्यं च मन्दरम् । निषधाख्यं च हिमवत्कूटं रजतनामकम् ॥ १४३ ॥
रुचकं सागरचित्रं, कूटं वज्रबलाभिधम् । पञ्चाशता योजनैः स्युर्मेरोरेतानि नन्दने ॥ १४४ ॥
पौरस्त्यसिद्धायतनैशानीप्रासादयोः किल । अन्तरे नन्दनं कूटं, तत्र मेघङ्करा सुरी ॥ १४५ ॥
जम्बूद्वीपेऽपरत्रास्या, राजधानी सुमेरुतः । ऐशान्यां विदिशि प्रोक्ता, यथार्हं विजयादिवत् ॥ १४६ ॥
पौरस्त्यसिद्धायतनाग्नेयीप्रासादयोः किल । अन्तरे मन्दरं कूटं, तत्र मेघवती सुरी ॥ १४७ ॥
राजधानी पुनरस्याः, पूर्वस्यां मेरुतो मता । जम्बूद्वीपेऽन्यत्र यथास्थानं विजयदेववत् ॥ १४८ ॥
अपाच्यसिद्धायतनाग्नेयीप्रासादयोः किल । अपान्तराले निषधं, सुमेघा तत्र देवता ॥ १५९ ॥
मेरोर्दक्षिणतस्तस्या, राजधानीं जगुर्बुधाः । सहस्रान् द्वादशातीत्य, जम्बूद्वीपेऽपरत्र वै ॥ १५० ॥

अपाच्यसिद्धायतनात्प्रतीच्यां पूर्वतः पुनः । प्रासादान्नैर्ऋतीनिष्ठात्, कूटं हैमवतं स्थितम् ॥ १५१ ॥
शोभते स्वामिनी तत्र, देवता मेघमालिनी । जम्बूद्वीपेऽन्यत्र तस्या, मेरुतो राजधान्यपाक् ॥ १५२ ॥
मेघमालिनीस्थाने हेममालिनीति जम्बूद्वीपप्रज्ञप्तिसूत्रे ॥
दक्षिणस्यां प्रतीचीनात्, सिद्धायतनतस्तथा । प्रासादान्नैर्ऋतीनिष्ठादुदीच्यां रजताभिधम् ॥ १५३ ॥
सुवत्सा देवता तत्र, प्रतीच्यां कनकाचलात् । जम्बूद्वीपेऽन्यत्र तस्या, राजधानी निरूपिता ॥ १५४ ॥
उत्तरस्यां प्रतीचीनात्, सिद्धायतनतस्तथा । वायव्यकोणप्रासादादपाच्यां रुचकाभिधम् ॥ १५५ ॥
वत्समित्रा तत्र देवी, पश्चिमायां सुमेरुतः । जम्बूद्वीपेऽन्यत्र तस्या, राजधानी जिनैः स्मृता ॥ १५६ ॥

एवं च जम्बूद्वीपप्रज्ञप्तिसूत्रवृत्ति–बृहत्क्षेत्रसमाससूत्रवृत्ति–सिरिनिलयक्षेत्रसमाससूत्रवृत्त्याद्यभिप्रायेण सौमनसगजदन्तसम्बन्धिपञ्चमकूटषष्ठकूटवासिन्यौ नन्दनवनपञ्चमकूटषष्ठकूटवासिन्यौ च दिक्कुमार्यौ तुल्याख्ये एव ॥ स्थानाङ्गसूत्रकल्पान्तर्वाच्यटीकादिषु तु ऊर्द्धलोकवासिनीषु सुवत्सावत्समित्रास्थाने तोयधाराविचित्रे दृश्येते ॥

उदीच्यसिद्धायतनात्, प्रतीच्यामथ पूर्वतः । प्रासादाद्वायुकोणस्थात्, कूटं सागरचित्रकम् ॥ १५७ ॥
बलाहका तत्र देवी, मेरोरुत्तरतः पुनः । जम्बूद्वीपेऽन्यत्र तस्या, राजधानीं जिना जगुः ॥ १५८ ॥
उदीच्यसिद्धायतनात्, प्राच्यां वायव्यकोणजात् । प्रासादात् पश्चिमायां च, वज्रकूटमिहान्तरे ॥ १५९ ॥
वज्रसेना तत्र देवी, राजधानी सुमेरुतः । उत्तरस्यामन्यजम्बूद्वीपे ज्ञेया यथागमम् ॥ १६० ॥

अयं तावत् क्षेत्रसमासबृहद्वृत्त्यभिप्रायः ॥ जम्बूद्वीपप्रज्ञप्तिसूत्रे च सागरचित्रकूटे वज्रसेना देवी, वज्रकूटे बलाहका देवी पठ्यते इति ज्ञेयम् ॥ तथा क्षेत्रसमाससूत्रे वारिसेणेति पाठः । किरणावल्यादावपि वारिषेणेति । जम्बूद्वीपप्रज्ञप्तिसूत्रे वइरसेणेति । बृहत्क्षेत्रसमासवृत्तौ च वज्रसेनेति नाम । इति ज्ञेयम् ॥

एता अष्टाप्यूर्द्धलोकवासिन्यो दिक्कुमारिकाः । सुगन्ध्यम्बुपुष्पवृष्टिं, कुर्वन्ति जिनजन्मनि ॥ १६१ ॥
भद्रशालवनकूटतुल्यत्वेन भवन्त्यमी । मूले पञ्चयोजनानां, शतान्यायतविस्तृताः ॥ १६२ ॥
वनेऽपि पञ्चशतिके पञ्चाशद्योजनोत्तरम् । स्थितेरेषां स्थितिः किञ्चिदाकाशे बलकूटवत् ॥ १६३ ॥
अत्रैव नन्दनवने, सुधाशनधराधरात् । ऐशान्यां विदिशि प्रोक्तं, बलकूटं जिनेश्वरैः ॥ १६४ ॥

तथोक्तं जम्बूद्वीपप्रज्ञप्तिसूत्रे । मंदरस्सणं पव्वयस्स उत्तरपुरच्छिमेणं एत्थ णं णंदणवणे बलकूडे णामं कूडे पण्णत्ते ॥ इत्यादि ॥

विदिशोऽपि विशालाः स्युर्महतो वस्तुनः किल । तद् घटेतावकाशोऽत्र, प्रासादबलकूटयोः ॥ १६५ ॥
अर्द्धेन नन्दनवने, कूटमेतदवस्थितम् । अपरार्द्धेन चाकाशे, तदुक्तं पूर्वसूरिभिः ॥ १६६ ॥

आह ॥ नन्दनवने बलकूटम् । नन्दनवनं च पञ्चयोजनशतविस्तीर्णायां मेरोः प्रथममेखलायां । ततः कथं तत्र माति ? उच्यते, बलकूटेन पञ्चयोजनशतानि नन्दनवनसत्कानि रुद्धानि पञ्चयोजनशतानि पुनर्मेरोर्बहिराकाशे । ततो न कश्चिद्दोषः ॥ उक्तं च, नंदनवण रुंभित्ता, पंचसए जोअणाइं नीसरिओ । आयासे पंचसए, रुंभित्ता ठाइ बलकूडो ॥ इति बृहत् क्षेत्रसमासवृत्तौ ॥ जम्बूद्वीपप्रज्ञप्तिसूत्रवृत्तौ तु मेरुतः पंचाशद्योजनातिक्रमे ईशानकोणे ऐशानप्रासादः ततोऽपीशानकोणे बलकूटमित्युक्तम् ॥ तदभिप्रायं न विद्मः[1] ॥

माल्यवद्गिरिसम्बन्धिहरिस्सहाख्यकूटवत् । सर्वात्मनेदं विज्ञेयं, व्यासायामोच्चतादिभिः ॥ १६७ ॥
बलनामा सुरस्तत्र, स्वामी तद्राजधान्यपि । मेरोरुत्तरपूर्वस्यां, जम्बूद्वीपेऽपरे मता ॥ १६८ ॥
बलाख्याया राजधान्याः, स्वरूपमखिलं ख्रलु । हरिस्सहायाः सदृशं, विज्ञेयमविशेषितम् ॥ १६९ ॥
गच्छद्भिश्चैत्यनत्यर्थं, पाण्डकेऽदो वनं पथि । विश्रान्त्यै श्रीयते विद्याचारणैर्मुनिवारणैः ॥ १७० ॥
प्रत्यागच्छद्भिरानम्य, पाण्डके शाश्वतान् जिनान् । विश्राम्यद्भिर्भूष्यतेऽदो, जङ्घाचारणसाधुभिः ॥ १७१ ॥
अथास्य नन्दनाभिख्यवनस्य समभूतलात् । योजनानां सहस्राणि, द्वाषष्टिं पञ्चभिः शतैः ॥ १७२ ॥
समन्वितान्यतीत्यास्ति, वनं सौमनसाभिधम् । योजनानां पञ्चशतीं, विस्तीर्णं सर्वतोऽपि तत् ॥ १७३ ॥
अस्मिन्नपि परिक्षिप्य, स्थिते मेरुं समन्ततः । वक्ष्ये बाह्यान्तररूपौ, विष्कम्भौ पूर्ववद्गिरेः ॥ १७४ ॥
योजनानां सहस्राणि, चत्वारि द्वे शते अपि । द्विसप्तत्यधिके भागा, अष्टावेकादशोद्भवाः ॥ १७५ ॥
बहिर्वनाद्गिरेर्व्यासः, एष पूर्वापरान्तयोः । दक्षिणोत्तरयोर्वापि, तत्रोपपत्तिरुच्यते ॥ १७६ ॥
मेरुच्छ्रयस्यातीतानि, भुवः सौमनसावधि । त्रिषष्टिर्योजनसहस्राणि रुदैर्भजेद्बुधः ॥ १७७ ॥
शतानि सप्तपञ्चाशत्, सप्तविंशानि तत्र च । लब्धानि योजनान्यंशास्त्रयश्चैकादशोद्भवाः ॥ १७८ ॥
अस्मिन् राशौ भूमिगतान्मेरुव्यासाद्विशोधिते । मानं यथोक्तं जायेत, बाह्याया गिरिविस्तृतेः ॥ १७९ ॥
व्यासो वनस्योभयतः, पञ्चपञ्चशतात्मकः । बाह्यव्यासात्तत्सहस्रै, शोधिते शेषमान्तरः ॥ १८० ॥
स चायम् ।
योजनानां सहस्राणि, त्रीणि किञ्च शतद्वयम् । द्विसप्तत्यधिकं भागारष्ट चैकादशोद्भवाः ॥ १८१ ॥
तथा गिर्बाह्यपरिक्षेपः, त्रयोदशसहस्रकाः । एकादशाः शताः पञ्च, षट् चैकादशजा लवाः ॥ १८२ ॥
अन्तर्गिरिपरिक्षेपः, सहस्राणि दश त्रयः । शताश्चैकोनपञ्चाशास्त्रयो भागाश्च रुद्रजाः ॥ १८३ ॥
एवमुक्ताभिलापेन, ज्ञेया वक्तव्यताऽखिला । अत्रापि नन्दनाभिख्यवनवत् कूटवर्जिता ॥ १८४ ॥
तथैवैकैकमाशासु, विज्ञेयं सिद्धमन्दिरम् । विदिक्षु पुनरेकैकः, प्रासादो वापिकावृतः ॥ १८५ ॥

---

१ ईशानेशास्यैशानत्वाविरोधात् न भिन्नता, सहस्रदीर्घत्वाच्चास्य न तथात्वाभावः ।

सुमनाः सौमनसा च, सौमनांसा मनोरमा । ऐशान्यां विदिशि प्रोक्ताः, वाप्यः प्राच्यादिदिक्क्रमात् ॥ १८६ ॥
सदुत्तरकुरुर्देवकुरुर्वन्हिविदिश्यथ । वाप्यश्चतस्रः क्रमतो, वारिषेणा सरस्वती ॥ १८७ ॥
विशाला माघभद्रा चाभयसेना च रोहिणी । वाप्यश्चतस्रो नैर्ऋत्यां, ज्ञेयाः पूर्वाद्यनुक्रमात् ॥ १८८ ॥
भद्रोत्तरा तथा भद्रा, सुभद्रा च तथाऽपरा । भद्रावतीति वायव्यकोणे वाप्यो यथाक्रमम् ॥ १८९ ॥
आग्नेय्यामथ नैर्ऋत्यां, प्रासादौ शक्रभर्तृकौ । ऐशान्यां वायव्यायां च, तावीशानसुरेशितुः ॥ १९० ॥
एवं वनं सौमनसं, लेशतो वर्णितं मया । वर्णयामि वनमथ, पाण्डुकं शिखरस्थितम् ॥ १९१ ॥
अतीत्योर्ध्वं सौमनसवनस्य समभूतलात् । योजनानां सहस्राणि, षट्त्रिंशतमुपर्यधः ॥ १९२ ॥
प्रज्ञप्तं पण्डकवनमनेकसुरसेवितम् । चारणश्रमणश्रेणिश्रितकल्पद्रुमाश्रयम् ॥ १९३ ॥
चतुर्नवत्या संयुक्ता, योजनानां चतुःशती । वनस्यास्य चक्रवालविष्कम्भो वर्णितो जिनैः ॥ १९४ ॥
उपपत्तिश्चात्र मेरुमौलेः सहस्रविस्तृतात् । शोधयेत् चूलिकामूलव्यासं द्वादशयोजनीम् ॥ १९५ ॥
अवशिष्टेऽर्द्धीकृते च, यथोक्तमुपपद्यते । मानमस्य मरकतमणिग्रैवेयकाकृतेः ॥ १९६ ॥
यथा मेरुं परिक्षिप्य, स्थिता पूर्ववनत्रयी । परिक्षिप्य स्थितमिह, तथेदं मेरुचूलिकाम् ॥ १९७ ॥
त्रिसहस्री योजनानां, द्वाषष्ट्या संयुतं शतम् । विशेषाभ्यधिकं किञ्चित्, परिक्षेपोऽस्य वर्णितः ॥ १९८ ॥
अस्मिन् मेरुचूलिकायाः, पञ्चाशद्योजनोत्तरम् । सिद्धायतनमेकैकं, प्राग्वद्दिशां चतुष्टये ॥ १९९ ॥
विदिक्षु पुनरेकैकः, प्रासादो वापिकावृतः । नामान्यासां वापिकानामैशान्यादिविदिक्क्रमात् ॥ २०० ॥
पुण्ड्रा पुण्ड्रप्रभा चैव, सुरक्ताख्या तथापरा । रक्तावतीति चैशानप्रासादे वापिका मताः ॥ २०१ ॥
क्षीररसा चेक्षुरसा, तथाऽमृतरसाभिधा । वारुणीति किलाग्नेयप्रासादे वापिकाः स्मृताः ॥ २०२ ॥
शङ्खोत्तरा तथा शङ्खाशङ्खावर्ता बलाहका । प्रासादे नैर्ऋतीसंस्थे, वापिकाः परिकीर्त्तिताः ॥ २०३ ॥
पुष्पोत्तरा पुष्पवती, सुपुष्पा पुष्पमालिनी । वायव्यकोणे वाप्यः स्युः, सर्वाः पूर्वादितः क्रमात् ॥ २०४ ॥
आग्नेयनैर्ऋतगतौ, प्रासादौ स्तः शतक्रतोः । वायव्यैशानसत्कौ तावीशानेन्द्रस्य वर्णितौ ॥ २०५ ॥
चैत्यप्रासादवापीनां, मानं त्रिषु वनेष्वपि । सद्भद्रशालवनवद्विज्ञेयमविशेषितम् ॥ २०६ ॥
अथास्मिन् पण्डकवनेऽभिषेकार्हाः स्वयंभुवाम् । शिलाश्चतस्रः प्रज्ञप्ताः, स्नात्रोदकपवित्रिताः ॥ २०७ ॥
आद्या पाण्डुशिलानाम्नी, द्वितीया पाण्डुकंबला । तृतीया च रक्तशिला, चतुर्थी रक्तकम्बला ॥ २०८ ॥

अमून्यासां नामानि जम्बूद्वीपप्रज्ञप्तिसूत्रे ॥ क्षेत्रसमासे तु पाण्डुकम्बला अतिपाण्डुकम्बला रक्तकम्बला अतिरक्तकम्बला एवमासां नामानि पठ्यन्ते ॥

प्राच्यां मेरुचूलिकायाः, प्राक्पर्यन्ते वनस्य च । भात्यर्जुनस्वर्णमयी, शिला पाण्डुशिलाभिधा ॥ २०९ ॥
सा पूर्वापरविस्तीर्णा, तथोदग्दक्षिणायता । आयामतो योजनानां, शतानि पञ्च कीर्त्तिता ॥ २१० ॥

शतान्यर्द्धतृतीयानि, मध्ये विष्कम्भतो मता । अर्द्धचन्द्राकृतेस्तस्या, मध्ये परमविस्तृतिः ॥ २११ ॥
पूर्वापरः शरत्वेन, व्यासोऽस्यां परमो बुधैः । जीवात्वेन च परमायामस्तु दक्षिणोत्तरः ॥ २१२ ॥
परिक्षेपो धनुःपृष्ठतया भाव्यो यथोचितः । तत्तत्करणरीत्या वा, समानेयं शरादिकम् ॥ २१३ ॥
चतुर्योजनपिण्डायामस्यां भाति चतुर्दिशम् । तोरणालङ्कृतं कम्रं, सोपानानां त्रयं त्रयम् ॥ २१४ ॥
अधिज्यचापाकाराया, वक्रता चूलिकादिशि । ऋजुता स्वस्वदिक्क्षेत्राभिमुखास्या विभाव्यताम् ॥ २१५ ॥
अत्यन्तकमनीयायामस्यां वृन्दारकव्रजाः । आसीनाश्च शयानाश्च, विदन्ति परमां मुदम् ॥ २१६ ॥
वेदिकावनखण्डाभ्यां, समन्तादियमावृता । काञ्चीदामनीलपरिधानाभ्यामिव कामिनी ॥ २१७ ॥
दक्षिणस्यामुदीच्यां च, तस्यां सिंहासने स्थिते । धनुःपञ्चशतव्यासायामे तदर्द्धमेदुरे ॥ २१८ ॥
ज्ञेयो ग्रन्थान्तरात् सिंहासनयोरिह वर्णकः । अनावृतस्थलस्थानादेषां चन्द्रोदयं विना ॥ २१९ ॥
तुल्यत्वादनयोर्व्यासायामाभ्यां चतुरस्रता । चतुरस्रपीठबन्धरूपे ज्ञेये इमे ततः ॥ २२० ॥
औत्तराहे तत्र सिंहासने देवाश्चतुर्विधाः । अभिषिञ्चन्ति कच्छादिविजयाष्टकतीर्थपान् ॥ २२१ ॥
सिंहासने दाक्षिणात्ये, विजयेषु किलाष्टसु । वत्सादिकेषु संजातान्, स्नपयन्ति जिनेश्वरान् ॥ २२२ ॥
अयं भावः –
शिलायाः संमुखं ह्यस्याः, पूर्वस्यां दिशि वर्तते । क्षेत्रं पूर्वविदेहाख्यं, विजयास्तत्र षोडश ॥ २२३ ॥
उत्कर्षतोऽपि तत्र द्वौ, जायेते युगपज्जिनौ । तत्र शीतोत्तराभाविविजयाष्टकजो जिनः ॥ २२४ ॥
सिंहासने सुराधीशैरौत्तराहेऽभिषिच्यते । दाक्षिणात्ये दाक्षिणात्यविजयाष्टकजो जिनः ॥ २२५ ॥
एवं भाव्यं पश्चिमायामपि सिंहासनद्वयम् । प्रत्यक्विदेहार्हद्योग्यं, दक्षिणोत्तरयोर्दिशोः ॥ २२६ ॥
तदेकैकं दाक्षिणात्योदीच्ययोः शिलयोः किल । यद्भारतैरवतयोरेकैकस्यार्हतो जनिः ॥ २२७ ॥
वनस्याथो दाक्षिणात्यपर्यन्ते पाण्डुकम्बला । दक्षिणस्यां दिशि मेरुचूलिकायाः प्रतिष्ठिता ॥ २२८ ॥
दक्षिणोत्तरविस्तीर्णा, प्राक्पश्चिमायता च सा । ऋजुताऽस्या दक्षिणस्यां, वक्रता चूलिकादिशि ॥ २२९ ॥
उपर्यस्या मध्यभागे, सिंहासनमनुत्तरम् । सुरेन्द्रैस्तत्र भरतजातो जिनोऽभिषिच्यते ॥ २३० ॥
अमुष्या दक्षिणामुख्याः, सम्मुखं भरतं यतः । ततस्तत्रत्यसार्वस्य, युक्तमत्राभिषेचनम् ॥ २३१ ॥
शेषं तु मानसंस्थानसोपानवेदिकादिकम् । सर्वासामपि विज्ञेयमविशेषेण पाण्डुवत् ॥ २३२ ॥
वर्णतश्चोक्तरूपे द्वे, कुमुदोदरसोदरे । वक्ष्यमाणे पुनः कोकनदविद्रुमबन्धुरे ॥ २३३ ॥

अयं तावत् जम्बूद्वीपप्रज्ञप्तिसूत्रवृत्त्यभिप्रायः ॥ बृहत्क्षेत्रसमाससूत्रवृत्तौ तु सर्वाः श्वेतसुवर्णमय्य उक्ता इति ज्ञेयं ॥

वनपश्चिमपर्यन्ते, शिला रक्तशिलाभिधा । प्रतीच्यां मेरुचूलायास्तपनीयमयी मता ॥ २३४ ॥

पूर्वपश्चिमविस्तीर्णा, सा दक्षिणोत्तरायता । ऋजुताऽस्याः पश्चिमायां, वक्रता चूलिकादिशि ॥ २३५ ॥
स्यात् प्रतीचीसंमुखायामस्यां सिंहासनद्वयम् । जिनजन्माभिषेकार्हं, दक्षिणोत्तरयोर्दिशोः ॥ २३६ ॥
शीतोदोत्तरदिग्भाविपक्ष्मादिविजयाष्टके । संजातोऽर्हन्नौत्तराहसिंहासनेऽभिषिच्यते ॥ २३७ ॥
शीतोदादक्षिणाभाविवप्रादिविजयाष्टके । जातो जिनो दाक्षिणात्यसिंहासनेऽभिषिच्यते ॥ २३८ ॥
उदीच्यां मेरुचूलाया, उदीच्यान्ते वनस्य च । रक्तस्वर्णमयी रक्तकम्बला वर्तते शिला ॥ २३९ ॥
दक्षिणोत्तरविस्तीर्णा, सा पूर्वपश्चिमायता । उदग् रुज्वी चूलिकातो, वक्रा तथोत्तरामुखी ॥ २४० ॥
अस्यां सिंहासनं मध्ये, मणिरत्नमनोहरम् । ऐरावतक्षेत्रजातो, जिनस्तत्राभिषिच्यते ॥ २४१ ॥
एवं मेरुगिरावस्मिन्नभिषेकासनानि षट् । अभिषेकस्तु युगपच्चतुर्णामथवा द्वयोः ॥ २४२ ॥
पूर्वापरविदेहेषु, निशीथेऽर्हज्जनिर्यदा । भरतैरवतक्षेत्रे, मध्याह्नः स्यात्तदा यतः ॥ २४३ ॥
शेषेष्वपि व्यवस्थेयं, तुल्या चतुर्षु मेरुषु । सिंहासनान्यतस्त्रिंशत्, भवन्ति सर्वसंख्यया ॥ २४४ ॥
त्रिंशतस्तीर्थराजां तु, युगपन्न जनिर्भवेत् । भरतैरावतविदेहेषु कालविपर्ययात् ॥ २४५ ॥
युक्तैवोक्ता ततः प्राच्यैरर्हतां युगपज्जनिः । उत्कर्षाद्विंशतेरेव, दशानां च जघन्यतः ॥ २४६ ॥
भारतेष्वैरावतेषु, कालस्य साम्यतो मिथः । हीनाधिकानां पूर्वोक्तसंख्यातो न जनिर्भवेत् ॥ २४७ ॥
पाण्डकाख्यवनस्यास्य, मध्यभागे सुनिश्चिते । चकास्ति चूलिका मेरोर्वर्यवैडूर्यरत्नजा ॥ २४८ ॥
विस्फुरत्पण्डकवनशरावान्तःप्रतिष्ठितः । यवारकस्तम्ब इव, भद्रकृज्जिनजन्मनि ॥ २४९ ॥
चत्वारिंशद्योजनानि, तुङ्गत्वेन भवेदसौ । द्वादशैव योजनानि, मूले विष्कम्भतो मता ॥ २५० ॥
मध्ये च योजनान्यष्टौ, चत्वार्युपरि विस्तृता । उदस्तादुत्थगोपुच्छसुस्थसंस्थानशालिनी ॥ २५१ ॥
सप्तत्रिंशद्योजनानि, सातिरेकाणि किञ्चन । मूलेऽस्या परिधिर्मध्ये, साधिका पञ्चविंशतिः ॥ २५२ ॥
साधिकानि द्वादशैतत्परिक्षेप उपर्यथ । व्यासानुसारतो भाव्योऽन्यत्रापि परिधिर्बुधैः ॥ २५३ ॥
अथैतस्यां चूलिकायामुत्क्रान्ते योजनादिके । मूलात्तत्पञ्चमलवः, क्षीयते मूलविस्तृतेः ॥ २५४ ॥
मेरोर्यथैकादशभिर्योजनैः योजनं ह्रसेत् । क्षीयते योजनं तद्वत्, पञ्चभिर्योजनैरिह ॥ २५५ ॥
उत्क्रान्तायां मूलभागाद्यथा योजनविंशतौ । विंशतेः पञ्चमो भागः, स्याच्चतुर्योजनात्मकः ॥ २५६ ॥
तस्मिंश्च मूलविष्कम्भादपनीते भवेदिह । विष्कम्भो योजनान्यष्टावित्थं सर्वत्र भावना ॥ २५७ ॥
यद्वा मौलेरतिक्रान्तमधो यद्योजनादिकम् । विभक्ते पञ्चभिस्तस्मिन्, लब्धे चतुर्भिरन्विते ॥ २५८ ॥
जायतेऽभीप्सिते स्थाने, विष्कम्भोऽत्र यथोर्ध्वतः । अपक्रान्तौ योजनानां, विंशतेः स विभाव्यते ॥ २५९ ॥
विंशतेः पञ्चभिर्भागे, योजनानां चतुष्टयी । लब्धा चतुर्भिर्युक्ताऽष्टौ, योजनानीति भावना ॥ २६० ॥
असौ पद्मवेदिकया, परीता काननेन च । सहकारलतेवोच्चैरालवालेन राजते ॥ २६१ ॥

एतस्याश्च शिरोभागे, कमनीयमहीतले । प्राप्नुवन्ति परां प्रीतिं, निर्जराः सुखनिर्भराः ॥ २६२ ॥
मध्येऽत्र सिद्धायतनं, तदेकं क्रोशमायतम् । तथा क्रोशार्द्धविस्तारं, देशोनं क्रोशमुन्नतम् ॥ २६३ ॥
अष्टोत्तरशतं तत्र, प्रतिमाः शाश्वतार्हताम् । वैताढ्यचैत्यवत्सर्वं, वक्तव्यमिह वर्णनम् ॥ २६४ ॥
अनेके सुरगन्धर्वाः, तत्र गायन्ति लीलया । शृण्वन्ति श्रोत्रसुभगं, जिनगीतं सुरेश्वराः ॥ २६५ ॥
जिनाग्रे तत्र नृत्यन्त्यः, कुर्वन्ति त्रिदशाङ्गनाः । मेरुमौलिस्थमरुतां, वंशारूढनटीभ्रमम् ॥ २६६ ॥
किञ्चायं मन्दरो मेरुः, सुदर्शनः स्वयंप्रभः । मनोरमो गिरिराजो, रत्नोच्चयशिलोच्चयौ ॥ २६७ ॥
लोकमध्यो लोकनाभिः, सूर्यावर्त्तोऽस्तसंज्ञितः । दिगादिसूर्यावरणावतंसकनगोत्तमाः ॥ २६८ ॥
एभिः षोडशभिः ख्यातो, नामभिर्भूधरो भुवि । स्पृशन्नभ्रमदभ्रांशुः, कलाभिरिव चन्द्रमाः ॥ २६९ ॥
तत्रापि मन्दर इति, मुख्यं नामैषु नामसु । मन्दराख्यः सुरो ह्यत्र, स्वामी पल्योपमस्थितिः ॥ २७० ॥
महर्द्धिको निवसति, ख्यातं तद्योगतो ह्रदः । यद्वेदं शाश्वतं नाम, भरतैरवतादिवत् ॥ २७१ ॥
एवं महाविदेहानां, स्वरूपं लेशतो मया । कीर्तितं कीर्तिविजयगुरुक्रमकजालिना ॥ २७२ ॥

सततमहतमोक्षं न्यक्षलक्ष्मीनिधानम् । जयति जगतिवर्षं श्रीविदेहाभिधानम् ।
अविरहितमनेकैर्देवदेवैर्नृदेवैरतिबलबलदेवैर्वासुदेवैः सदैव ॥ २७३ ॥

तत्र तीर्थकरचक्रवर्तीनाम् वासुदेवबलदेवयोरपि । स्याज्जघन्यपदतश्चतुष्टयं ब्रूमहेऽथ परमप्रकर्षतः ॥ २७४ ॥

द्वात्रिंशत्तीर्थनाथाः प्रतिविजयमिहैकैकभावेन बोध्यारष्टाढ्या विंशतिः स्यात् प्रबलहलभृतां
शार्ङ्गिणां चक्रिणां च ।
एकत्रोत्पत्तियोगाद्धरिहलधरयोश्चक्रिभिः साकमेवम् ।
व्यत्यासोऽन्योऽन्यमेषामकथि गणधरेन्द्रैः प्रकर्षाप्रकर्षे ॥ २७५ ॥

विश्वाश्चर्यदकीर्त्तिकीर्तिविजयश्रीवाचकेन्द्रान्तिष–द्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे । सर्गो निर्गलितार्थसार्थसुभगः पूर्णोऽयमष्टादशः ॥ २७६ ॥

॥ इति श्रीलोकप्रकाशेऽष्टादशः सर्गः समाप्तः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

अथैकोनविंशः सर्गः ।

अथो महाविदेहानामुदक्सीमाविधायकः । भूधरो नीलवान्नाम, स्याद्वैडूर्यमणीमयः ॥ १ ॥
स्वामिनो नीलवान्नाम्नो, योगात् पल्योपमस्थितेः । नीलवानित्यसौ ख्यातो, यद्वेदं नाम शाश्वतम् ॥ २ ॥

जम्बूद्वीपेऽन्यत्र चास्य, मेरोरुत्तरतः पुरी । वक्ष्यमाणसुराणामप्येवं पुर्यायुरादिकम् ॥ ३ ॥
दक्षिणोत्तरविस्तीर्णः, स पूर्वपश्चिमायतः । सर्वमस्य निषधवत्, ज्ञेयं धनुःशरादिकम् ॥ ४ ॥
किन्तु जीवा दक्षिणस्यामुत्तरस्यां शरासनम् । दक्षिणाभिमुखो बाण, एवमग्रेऽपि भाव्यताम् ॥ ५ ॥
दीप्रप्रभैरयं कूटैर्नवभिः शोभितोऽभितः । ब्रह्मव्रतश्रुतस्कन्ध, इव गुप्तिनिरूपणैः ॥ ६ ॥
तत्र सिद्धायतनाख्यं, समुद्रासन्नमादिमम् । द्वितीयं नीलवत्कूटं, नीलवत्पर्वतेशितुः ॥ ७ ॥
ततः पूर्वविदेहेशसुपर्वैश्वर्यशालितम् । कूटं पूर्वविदेहाख्यं, तृतीयं परिकीर्तितम् ॥ ८ ॥
शीताकूटं तुरीयं च, शीतानदीसुरीश्रितम् । नारीकान्तं पञ्चमं तन्नारीकान्तासुरीश्रितम् ॥ ९ ॥
केसरिह्रदवासिन्याः, कीर्तिदेव्या निकेतनम् । षष्ठं स्पष्टं जिनप्रष्टैः, कीर्तिकूटं प्रकीर्तितम् ॥ १० ॥
तथाऽपरविदेहाख्यं, कूटं सप्तममीरितम् । सदाऽपरविदेहेशनिर्जरस्थानमुत्तमम् ॥ ११ ॥
रम्यकक्षेत्रनाथेन, रम्यकाख्यसुधाभुजा । अधिष्ठितं यच्छिष्टेष्टैस्तन्निष्टङ्कितमष्टमम् ॥ १२ ॥
तथा चानवमज्ञानैः, कूटं नवममीरितम् । उपदर्शनसंज्ञं तदुपदर्शनदैवतम् ॥ १३ ॥
एषामाद्ये जिनगृहं, शेषेषु पुनरष्टसु । तत्तत्कूटसमाख्यानां, प्रासादाः कूटनाकिनाम् ॥ १४ ॥
उक्तवक्ष्यमाणकूटप्रासादचैत्यगोचरम् । स्वरूपं हिमवत्कूटप्रासादजिनसद्मवत् ॥ १५ ॥
अस्योपरि महानेकश्चकास्ति केसरिह्रदः । निषधोपरिभागस्थतिगिञ्छेरिव सोदरः ॥ १६ ॥
अत्यन्तसुन्दराकारकेसरालीपरिष्कृतैः । शोभते शतपत्राद्यैः, ख्यातोऽयं केसरी ततः ॥ १७ ॥
द्वे निम्नगे ह्रदादस्मान्निर्गते कन्यके इव । शीता च नारीकान्ता च, दक्षिणोत्तरगे क्रमात् ॥ १८ ॥
दाक्षिणात्यतोरणेन, निर्गत्य दक्षिणामुखी । शीता पूर्वविदेहान्तर्गत्वैति प्राक्पयोनिधिम् ॥ १९ ॥
विशेषतोऽस्याः स्वरूपं च प्रागुक्तमेव ॥
उत्तराहतोरणेन, विनिर्गत्योत्तरामुखी । नारीकान्ता स्वप्रपातकुण्डे निपत्य निर्गता ॥ २० ॥
दक्षिणार्द्धरम्यकस्य, विदधाना द्विधा खलु । असंप्राप्ता योजनेन, माल्यवन्तं नगं ततः ॥ २१ ॥
रम्यकस्यापरभागं, द्विधा कृत्वाऽपराम्बुधौ । षट्पञ्चाशच्चैवलिनीसहस्रैर्याति संश्रिता ॥ २२ ॥
अस्या वार्द्धिप्रवेशान्तं, स्वरूपमाह्रदोद्गमात् । विज्ञेयं हरिसलिलानद्या इवाविशेषितम् ॥ २३ ॥
ह्रदेऽस्मिन् मूलकमलं, चतुर्योजनसंमितम् । तदर्धार्धप्रमाणानि, पद्मानां वलयानि षट् ॥ २४ ॥
पल्योपमस्थितिस्तत्र, कीर्तिता कीर्तिदेवता । भवनादिस्थितिस्त्वस्याः, श्रीदेव्या इव भाव्यताम् ॥ २५ ॥
इति नीलवान् पर्वतः ॥
उत्तरस्यां नीलवतो, दक्षिणस्यां च रुक्मिणः । राजते रम्यकक्षेत्रं, रम्यकामरभर्तृकम् ॥ २६ ॥
स्वर्णमाणिक्यखचितैर्भूप्रदेशैर्मनोरमैः । नानाकल्पद्रुमैरम्यतयेदं रम्यकाभिधम् ॥ २७ ॥

परमायामरूपाऽस्य, प्रत्यञ्चा हरिवर्षवत् । किन्त्वत्र सा दक्षिणस्यामुत्तरस्यां शरासनम् ॥ २८ ॥
इषुबाहाक्षेत्रफलाद्यपीह हरिवर्षवत् । क्षेत्रानुभावकालादिस्वरूपं तद्वदेव च ॥ २९ ॥
क्षेत्रस्यास्य मध्यभागे, विभाजकोऽर्धयोर्द्वयोः । माल्यवानिति विख्यातो, वृत्तवैताढ्यपर्वतः ॥ ३० ॥
माल्यवत्सदृशाकारैस्तद्वदेवारुणप्रभैः । सदा राजन्नुत्पलाद्यैर्माल्यवानिति कीर्त्यते ॥ ३१ ॥
जम्बूद्वीपप्रज्ञप्तिसूत्रे तु माल्यवत्पर्याय इति नाम दृश्यते ॥
प्रभासाख्यसुरस्तत्र, स्वामी पल्योपमस्थितिः । मेरोरुत्तरतस्तस्य, पुरी नीलवदादिवत् ॥ ३२ ॥
हरिवर्षस्थायिगन्धापातिवैताढ्यशैलवत् । ज्ञेयमस्यापि सकलं, स्वरूपमविशेषितम् ॥ ३३ ॥
उदक् रम्यकवर्षस्यापाग् हैरण्यवतस्य च । रुक्मी नाम्ना वर्षधरः, प्रज्ञप्तः परमर्षिभिः ॥ ३४ ॥
स पूर्वपश्चिमायामो, दक्षिणोत्तरविस्तृतः । महाहिमवतो बन्धुरिवात्यन्तसमाकृतिः ॥ ३५ ॥
रुक्मं रूप्यं तदस्यास्तीत्यन्वर्थकलिताभिधः । सर्वात्मना रूप्यमयो, रुक्मिनामसुराश्रितः ॥ ३६ ॥
इदं जम्बूद्वीपप्रज्ञप्तौ । क्षेत्रसमासवृत्तौ तु रुक्मं श्वेतं हेम तन्मयोऽयमुक्तः इति ज्ञेयम् ॥
विशिष्टैरष्टभिः कूटैः, सोऽतितुङ्गैरलङ्कृतः । दिगङ्गनानामष्टानां, क्रीडापर्वतकैरिव ॥ ३७ ॥
आद्यं पूर्वार्णवासन्नं, सिद्धायतनसंज्ञितम् । रुक्मिदेवाधिष्ठितं च, रुक्मिसंज्ञं द्वितीयकम् ॥ ३८ ॥
रम्यकाधीश्वरस्थानं, तृतीयं रम्यकाभिधम् । तुर्यं नरकान्तादेव्या, नरकान्ताभिधं च तत् ॥ ३९ ॥
तथा महापुण्डरीकह्रदेहशायाः शुभास्पदम् । बुद्धिकूटं बुद्धिदेव्या, पञ्चमं परिकीर्तितम् ॥ ४० ॥
रूप्यकूलानदीदेव्याः, षष्टं कूटं तदाख्यया । सप्तमं हैरण्यवतं, हैरण्यवतदैवतम् ॥ ४१ ॥
मणिकाञ्चनदेवाढ्यं, मणिकाञ्चनमष्टमम् । आद्ये जिनालयोऽन्येषु, प्रासादाः स्वामिनाकिनाम् ॥ ४२ ॥
मानं स्वरूपं कूटानां, चैत्यनिर्जरसद्मनाम् । हिमवद्गिरिवत् सर्वं, तथैवास्य गिरेरपि ॥ ४३ ॥
ह्रदो महापुण्डरीको, महापद्मह्रदोपमः । विभाति सलिलैः स्वच्छैर्निर्जयन् मानसं सरः ॥ ४४ ॥
अस्मिंश्च मूलकमलं, योजनद्वयसंमितम् । तदर्द्धार्द्धप्रमाणानि, शेषाब्जवलयानि षट् ॥ ४५ ॥
अत्राधिष्ठायिका बुद्धैर्बोधिता बुद्धिदेवता । भवनादिसमृद्ध्या सा, श्रीदेवतानुकारिणी ॥ ४६ ॥
ह्रदादस्मादापगे द्वे, दक्षिणोदग्मुखे क्रमात् । विनिर्गते श्मश्रुलेखे, इवोत्तरौष्टमध्यतः ॥ ४७ ॥
दाक्षिणात्यतोरणेन, निःसृत्य दक्षिणामुखी । नरकान्ता स्वके कुण्डे, गत्वा स्नात्वेव निर्गता ॥ ४८ ॥
रम्यकोदीच्यभागस्य, द्वैधीकारभयादिव । अर्वाक् स्थिता योजनेन, माल्यवद्वरणीधरात् ॥ ४९ ॥
ततो वलित्वा भिन्दाना, पूर्वार्द्धं रम्यकस्य सा । पूर्वाम्भोधौ याति नदीषट्पञ्चाशत्सहस्रयुक् ॥ ५० ॥
औत्तराहतोरणेन, विनिर्गत्योत्तरामुखी । रूप्यकूला स्वप्रपातकुण्डे निपत्य निर्गता ॥ ५१ ॥
दक्षिणार्धं च हैरण्यवतस्य कुर्वती द्विधा । क्रोशद्वयेनासंप्राप्ता, विकटापातिनं गिरिम् ॥ ५२ ॥

ततो निवृत्त्य हैरण्यवतापरादर्द्धभेदिनी । अष्टाविंशत्या सहस्रैः, सरिद्भिराश्रिता पथि ॥ ५३ ॥
तादृक्क्षेत्रविभेदोत्थपातकानुशयादिव । पपात पश्चिमाम्भोधौ, तद्दुष्कृतजिघांसया ॥ ५४ ॥

इति रुक्मिपर्वतः ।

क्षेत्रं च हैरण्यवतमुदीच्यां रुक्मिणो गिरेः । दक्षिणस्यां शिखरिणोर्द्वयोर्लीनमिवान्तरे ॥ ५५ ॥
रूप्यं हिरण्यशब्देन, सुवर्णमपि चोच्यते । ततो हिरण्यवन्तौ द्वौ, तन्मयत्वाद्धराधरौ ॥ ५६ ॥
रुक्मी च शिखरी चापि, तद्धिरण्यवतोरिदम् । हैरण्यवतमित्याहुः, क्षेत्रमेतत् महाधियः ॥ ५७ ॥
प्रयच्छति हिरण्यं वा, युग्मिनामासनादिषु । यत् सन्ति तत्र बहवः, शिलापट्टा हिरण्यजाः ॥ ५८ ॥
प्रभूतं तन्नित्ययोगि, वाऽस्यास्तीति हिरण्यवत् । तदेव हैरण्यवतमित्याहुर्मुनिसत्तमाः ॥ ५९ ॥
हैरण्यवतनामा वा, देवः पल्योपमस्थितिः । ऐश्वर्यं कलयत्यत्र, तद्योगात् प्रथितं तथा ॥ ६० ॥
क्षेत्रानुभावो मानं च, नृतिरश्चामपि स्थितिः । निखिलं हैमवतवद्विज्ञेयमिह धीधनैः ॥ ६१ ॥
क्षेत्रस्यास्य मध्यभागे, चतुरंशविभाजकः । वैताढ्य विकटापाती, रात्निकः पल्यसंस्थितः ॥ ६२ ॥
पद्मोत्पलशतपत्रादीनि सन्त्यत्र संततम् । विकटापातिवर्णानि, विकटापात्ययं ततः ॥ ६३ ॥
आस्ते देवोऽरुणाख्योऽत्र, स्वामी पल्योपमस्थितिः । जम्बूद्वीपेऽन्यत्र नगर्युदीच्यामस्य मेरुतः ॥ ६४ ॥
शेषमस्य स्वरूपं तु, गन्धापातिनगेन्द्रवत् । एवं चत्वारोऽपि वृत्तवैताढ्या रात्निकाः समाः ॥ ६५ ॥

एवं च क्षेत्रविचारसूत्रवृत्त्यभिप्रायेण हैमवते शब्दापाती हैरण्यवते विकटापाती हरिवर्षे गन्धपाती रम्यके माल्यवानिति वृत्तवैताढ्यानां व्यवस्था ॥ जम्बूद्वीपवृत्त्यभिप्रायेण तु हैमवते शब्दापाती हरिवर्षे विकटापाती रम्यके गन्धापाती हैरण्यवते माल्यवानिति व्यवस्थेति ॥ अत्र तत्त्वं सर्वविद्वेद्यम् ॥

इति हैरण्यवतक्षेत्रम् ॥

उदीच्यां हैरण्यवतादपागैरवतादपि । षष्टो वर्षधरः ख्यातः, शिखरी नाम पर्वतः ॥ ६६ ॥
ज्ञेयः शिखरिशब्देन, वृक्षस्तदाकृतीनि च । भूयांसि रत्नकूटानि, सन्त्यत्रेति शिखर्यसौ ॥ ६७ ॥
सन्त्येकादश कूटानि, वक्ष्यमाणानि यानि तु । तेभ्योऽमून्यतिरिक्तानि, कूटानीति विभाव्यताम् ॥ ६८ ॥
अन्यथा सर्वशैलानां, यथोक्तकूटयोगतः । शिखरित्वव्यपदेशः, सम्भवन् केन वार्यते ॥ ६९ ॥
स चैकादशभिः कूटैः, परितोऽलङ्कृतो गिरिः । प्रतिमाभिरिव श्राद्धधर्मं शर्मददर्शनः ॥ ७० ॥
आद्यं सिद्धायतनाख्यं, पूर्ववारिधिसन्निधौ । द्वितीयं शिखरिस्वर्गिकूटं शिखरिसंज्ञकम् ॥ ७१ ॥
तृतीयं हैरण्यवतकूटं तत्स्वामिदैवतम् । तूर्यं सुवर्णकूलाख्यं, तन्नदीदेवतास्पदम् ॥ ७२ ॥
दिक्कुमार्याः सुरादेव्याः, पञ्चमं च तदाख्यया । षष्टं रक्तावर्त्तनाख्यं, लक्ष्मीकूटं च सप्तमम् ॥ ७३ ॥

रक्तवत्यावर्त्तनाख्यं, प्रज्ञप्तं कूटमष्टमम् । इलादेव्या दिक्कुमार्या, नाम्ना च नवमं मतम् ॥ ७४ ॥
दशमं चैरावताख्यमैरावतसुराश्रितम् । स्यात्तिगिञ्छहृदेशायास्तिगिञ्छिकूटमन्तिमम् ॥ ७५ ॥

इदं जम्बूद्वीपप्रज्ञप्तिसूत्राभिप्रायेण ॥ क्षेत्रसमासे त्वत्र पञ्चमं श्रीदेवीकूटं नवमं गन्धापातीकूटमिति दृश्यते ॥

आद्ये चैत्यं शेषकूटदशके च सुधाभुजाम् । तत्तत्कूटसमाख्यानां, स्युः प्रासादावतंसकाः ॥ ७६ ॥
पुण्डरीकहृदश्चात्र, पद्महृदसहोदरः । अस्मिंश्च मूलकमलमेकयोजनसम्मितम् ॥ ७७ ॥
तदर्द्धार्द्धप्रमाणानि, शेषाब्जवलयानि षट् । लक्ष्मीदेवी वसत्यत्र, स्थित्या श्रीदेवतेव सा ॥ ७८ ॥
हिमवद्गिरिवत् सर्वं, मानमत्रापि चिन्त्यताम् । ज्याबाहाधनुरादीनां, केवलं दिग्विपर्ययः ॥ ७९ ॥
नद्यस्तिस्रो हृदादस्मान्निर्गतास्त्रिभिरध्वभिः । नदी सुवर्णकूलाख्या, रक्ता रक्तवतीति च ॥ ८० ॥
दक्षिणेनाध्वना तत्र, निर्गत्य दक्षिणामुखी । सुवर्णकूला पतति, कुण्डे स्वसमनामनि ॥ ८१ ॥
ततो निर्गत्य हैरण्यवतोत्तरार्द्धभेदिनी । योजनार्द्धेन दूरस्था, विकटापातिभूधरात् ॥ ८२ ॥
प्राक् परावर्त्य हैरण्यवतपूर्वार्द्धमादितः । सूत्रधारस्येव रज्जुः, द्विधा विदधती क्रमात् ॥ ८३ ॥
अष्टाविंशत्या सहस्रैर्नदीभिः परिपूरिता । गृहिणीव स्वामिगेहे, विशति प्राच्यवारिधौ ॥ ८४ ॥
अस्मादेव हृदात् प्राच्यतोरणेन विनिर्गता । रक्तानदी पूर्वदिशि, प्रवृत्ता पर्वतोपरि ॥ ८५ ॥
योजनानां पञ्चशतीमतिक्रम्य ततः परम् । रक्तावर्त्तनकूटस्याधस्तादुत्तरतो भवेत् ॥ ८६ ॥
त्रयोविंशां पञ्चशतीं, योजनानां कलात्रयम् । सार्द्धं गत्वाऽधिकमुदक्, शिखरिक्ष्माधरोपरि ॥ ८७ ॥
वज्रजिह्विकयोत्तीर्य, कुण्डे रक्ताप्रपातके । शतयोजनप्रपाता, भुजङ्गीवाविशत् बिले ॥ ८८ ॥
उदीच्यतोरणेनास्माद्विनिर्गत्योत्तरामुखी । नदीसप्तसहस्राढ्या, वैताढ्यगिरिसीमया ॥ ८९ ॥
दर्याः खण्डप्रपातायाः, प्राच्यां वैताढ्यभूधरम् । भित्वोदीच्यैः सप्तनदीसहस्रैराश्रिताध्वनि ॥ ९० ॥
सहस्रैः सरितामेवं, चतुर्दशभिराश्रिता । विभिद्य जगतीं पूर्वाणवेऽसौ विशति द्रुतम् ॥ ९१ ॥
पश्चिमेन तोरणेन, हृदादस्माद्विनिर्गता । रक्तावती पश्चिमायां, प्रवृत्ता पर्वतोपरि ॥ ९२ ॥
अतिक्रम्य पञ्चशतीं, निजावर्त्तनकूटतः । पर्वतोपर्युत्तरस्यां, व्यूढा तत्र व्यतीत्य च ॥ ९३ ॥
त्रयोविंशां पञ्चशतीं, साग्रं सार्द्धकलात्रयम् । वज्रमय्या जिह्विकया, योजनैकशतोन्नतात् ॥ ९४ ॥
निपत्य पर्वताद्रक्तावतीप्रपातकुण्डके । रोषावेशात् भामिनीव, दत्तझम्पा महावटे ॥ ९५ ॥
उदीच्येनाध्वना तस्मादुदग्मुखी विनिर्गता । आवैताढ्यान्तिकं सप्तनदीसहस्रसेविता ॥ ९६ ॥
कन्दरायास्तमिस्रायाः, पश्चिमायां धराधरम् । द्रुतं विभिद्य वैताढ्यमुत्तरार्द्धं समागता ॥ ९७ ॥
उदीच्यै सप्तभिः सिन्धुसहस्रैः सह गच्छति । पश्चिमाब्धाविति नदीचतुर्दशसहस्रयुक् ॥ ९८ ॥

इति शिखरी पर्वतः ॥

उत्तरस्यां शिखरिण, उदीच्यलवणार्णवात् । दक्षिणस्यामैरवतक्षेत्रं भाति मनोहरम् ॥ ९९ ॥
ऐरावतः सुरो ह्यस्य, स्वामी पल्योपमस्थितिः । वसत्यत्र ततः ख्यातमिदमैरवताख्यया ॥ १०० ॥
भरतस्य प्रतिबिम्बमिवेदं संमुखेऽम्बुधौ । तत्प्रमाणं तेन तुल्यं, सदा तदनुवर्त्तते ॥ १०१ ॥
भानुना भासिते तस्मिंस्तेनेदमपि भासितम् । इन्दुना शोभिते तत्रादोऽपि स्यात्तेन शोभितम् ॥ १०२ ॥
तद्यदा षड्भिररकैर्भिन्नां भिन्नां दशां श्रयेत् । तथेदमपि सन्मित्रमिव मित्रानुवृत्तिकृत् ॥ १०३ ॥
जिने तत्र जिनोऽत्रापि, चक्र्यत तत्र चक्रिणि । वासुदेवादिषु सत्सु, तत्रात्रापि भवन्ति ते ॥ १०४ ॥
इदं दशाश्चर्ययुतं, स्यात्तत्राश्चर्यशालिनि । हसतीव निजं मित्रं, भरतं तुल्यचेष्टया ॥ १०५ ॥
मध्ये स्थितेन द्वेधेदं, वैताढ्यगिरिणा कृतम् । दाक्षिणात्यैरावतार्द्धमुदीच्यैरावतार्द्धकम् ॥ १०६ ॥
यदुदीच्यार्णवासन्नमुत्तरार्द्धं तदुच्यते । शिखरिक्ष्माधरासन्नं, दक्षिणार्द्धमुदीरितम् ॥ १०७ ॥
क्षेत्राशापेक्षया ह्येषा दक्षिणोदग्व्यवस्थितिः । सूर्याशापेक्षया त्वस्य, याम्यार्द्धं वार्धिसन्निधौ ॥ १०८ ॥
उदीच्यार्द्धं नगासन्नं, व्यवहारस्त्वयं पुनः । क्षेत्राशापेक्षया सर्वो, न तापदिगपेक्षया ॥ १०९ ॥
उदीच्यार्द्धमस्य याम्यभरतार्द्धेन सन्निभम् । तद्धज्जीवेषुचापानि, बाहाऽत्रापि न सम्भवेत् ॥ ११० ॥
इतः प्रभृति याम्यार्द्धादिषु सर्वं विवर्द्धते । आविदेहार्द्धमिष्वासजीवाबाहाशरादिकम् ॥ १११ ॥
वैताढ्यस्याप्यत्र तत, उत्तरस्यां किलाल्पकः । आयामो दक्षिणस्यां च, वर्द्धमानः क्रमान्महान् ॥ ११२ ॥
याम्यविद्याधरश्रेण्यां, विद्याधरपुराण्यतः । षष्टिर्भवन्त्युदीच्यायां, श्रेण्यां पञ्चाशदेव च ॥ ११३ ॥
शेषं सर्वमाभियोग्यश्रेणिवेदीवनादिकम् । ज्ञेयं भरतवैताढ्योपममुक्तानुसारतः ॥ ११४ ॥
कूटानि नव चात्रापि, तन्नामानि तथा क्रमात् । किंतु नाम्नि विशेषोस्ति, द्वितीयस्याष्टमस्य च ॥ ११५ ॥
दक्षिणैरवतार्द्धाख्यं, द्वैतीयीकं भवेदिह । उत्तरैरवतार्द्धाख्यं, भवेच्च कूटमष्टमम् ॥ ११६ ॥
रक्तारक्तावतीस्रोतस्विनीभ्यां तस्थुषान्तरे । वैताढ्येन च षट्खण्डमिदमैरावतं कृतम् ॥ ११७ ॥
तत्र च-उत्तरार्द्धमध्यखण्डे, उदीच्यलवणोदधेः । दक्षिणस्यामुदीच्यां च, वैताढ्याभिधभूधरात् ॥ ११८ ॥
चतुर्दशाधिकशतं, योजनानां कलास्तथा । एकादशातिक्रम्याब्धिवैताढ्याभ्यामिहान्तरे ॥ ११९ ॥
नगरी स्यादयोध्याख्या, नवयोजनविस्तृता । द्वादशयोजनायामालङ्कृतोत्तमपुरुषैः ॥ १२० ॥
शेषाः पञ्चापि खण्डाः स्युरनार्या धर्मवर्जिताः । अत्रापि चार्यदेशानामध्यर्द्धा पञ्चविंशतिः ॥ १२१ ॥
एतेष्वेव हि देशेषु, जिनचक्र्यर्द्धचक्रीणां । स्यादुत्तमनृणां जन्म, प्रायो धर्मव्यवस्थितिः ॥ १२२ ॥
एवं च जम्बूद्वीपेऽस्मिन्, सप्तक्षेत्री विराजते । मध्ये महाविदेहाख्यमपागुदक् त्रयं त्रयम् ॥ १२३ ॥
भरतैरावते तत्र, तुल्यरूपे निरूपिते । समस्वरूपे हैरण्यवतहैमवते अपि ॥ १२४ ॥

रम्यकाख्यहरिवर्षे, उभे तुलाधृते इव । पूर्वापरविदेहानामप्येवं तुल्यता मता ॥ १२५ ॥
देवोत्तरकुरूणामप्येवं तुल्यत्वमाहितम् । विना भरतैरवतविदेहानपराः पुनः ॥ १२६ ॥
अकर्मभूमयः षट् स्युः, कृष्यादिकर्मवर्जिताः । तिस्रो भरतैरवतविदेहाः कर्मभूमयः ॥ १२७ ॥
तथा चात्र वर्षधरपर्वताः षट् प्रकीर्तिताः । विदेहेभ्यो दक्षिणस्यामुदीच्यां च त्रयं त्रयम् ॥ १२८ ॥
हिमवच्छिखरी चैकादशकूटौ मिथः समौ । रुक्मिमहाहिमवतावष्टकूटौ तथैव च ॥ १२९ ॥
नीलवन्निषधौ तुल्यौ, नवकूटौ परस्परम् ॥ मेरुर्निरुपमः सोऽपि, नवकूटोपशोभितः ॥ १३० ॥
भरतैरवतक्षेत्रद्वात्रिंशद्विजयोद्भवाः । वैताढ्याः स्युश्चतुस्त्रिंशत्, प्रत्येकमेकभावतः ॥ १३१ ॥
सर्वेऽप्येते रूप्यवर्णा, नवकूटोपशोभिताः । दशोत्तरशतद्रङ्गाभियोग्यालिद्धयान्विताः ॥ १३२ ॥
चत्वारो वृत्तवैताढ्याः, समरूपाः परस्परम् । हरिवर्षहैमवतहैरण्यवतरम्यके ॥ १३३ ॥
देवोत्तरकुरुस्थेषु, ह्रदेषु दशसु ध्रुवम् । प्राक् प्रत्यक् च दश, दश काञ्चनाचलभावतः ॥ १३४ ॥
द्वे शते काञ्चननगाः, परस्परानुकारिणः । स्थिता भोक्तुं चतसृभिः, पङ्क्तिभिर्बान्धवा इव ॥ १३५ ॥
गजदन्तौ सौमनसगन्धमादनसंज्ञितौ । रूप्यपीतरत्नमयौ, सप्तकूटोपशोभितौ ॥ १३६ ॥
विद्युत्प्रभमाल्यवन्तौ, वैडूर्यतपनीयजौ । नवकूटाञ्चितौ तुल्या, इत्याकृत्या नगा अमी ॥ १३७ ॥
चतुःकूटाः षोडशापि, वक्षस्काराद्रयः समाः । विचित्रचित्रयमकाः, समरूपाः परस्परम् ॥ १३८ ॥
द्विशत्येकोनसप्तत्याधिकेत्यत्र धराधरः । हिमवच्छिखरीस्पृष्टाः, दंष्ट्राश्चाष्टौ मिथः समाः ॥ १३९ ॥
वैताढ्येषु नव नव, कूटाः प्रत्येकमित्यतः । सर्ववैताढ्यकूटानि, षडुत्तरं शतत्रयम् ॥ १४० ॥
प्रतिवैताढ्यमेतेषु, कूटत्रयं तु मध्यमम् । सौवर्णं शेषकूटाश्च, रात्निका इति तद्विदः ॥ १४१ ॥
सक्रोशषड्योजनोच्चाः, चैत्यप्रासादशोभिताः । सर्वेऽपि भरतस्थायिवैताढ्यकूटसोदराः ॥ १४२ ॥
कूटाः सप्त सौमनसगन्धमादनशैलयोः । रुक्मिमहाहिमवतोरष्टावष्टौ पृथक् पृथक् ॥ १४३ ॥
विद्युत्प्रभमाल्यवतोर्नीलवन्निषधागयोः । मेरोश्च नन्दनवने, कूटा नव नवोदिताः ॥ १४४ ॥
हिमवच्छिखरिकूटाः, एकादश पृथक् पृथक् । षोडशानां चतुःषष्टिर्वक्षस्कारमहीभृताम् ॥ १४५ ॥
हरिस्सहहरिकूटबलकूटोज्झिता इमे । शतं सर्वेऽष्टपञ्चाशं, हिमवत्कूटसन्निभाः ॥ १४६ ॥
योजनानां पञ्च शतान्युच्चा रात्ना मिथः समाः । साहस्राः स्वर्णजास्तुल्या, हरिस्सहादयस्त्रयः ॥ १४७ ॥
एवं च गिरिकूटानां, त्रिविधानां प्रमाणतः । सर्वसंख्या सप्तषष्ट्या, समन्विता चतुःशती ॥ १४८ ॥
द्वात्रिंशतिविजयेषु, भरतैरवताख्ययोः । चतुस्त्रिंशद्धि वृषभकूटास्तुल्याः परस्परम् ॥ १४९ ॥
भद्रसालभिधवने, जम्बूशाल्मलीवृक्षयोः । अष्टाष्टेत्यष्टपञ्चाशत्, भूमिकूटा मिथः समाः ॥ १५० ॥
एतेषां वक्तुमुचिते पर्वतत्वेऽपि वस्तुतः । कूटत्वव्यवहारोऽयं, पूर्वाचार्यानुरोधतः ॥ १५१ ॥

महाह्रदाश्च षट् पद्मपुण्डरीकौ समाविह । महापद्ममहापुण्डरीकावपि मिथः समौ ॥ १५२ ॥
तिगिञ्छिकेसरिणौ च, तुल्यौ द्विघ्नौ यथोत्तरम् । दश देवोत्तरकुरुह्रदाः पद्मह्रदोपमाः ॥ १५३ ॥
एवं ह्रदाः षोडशैते, षण्महाह्रददेवताः । श्रीह्रीधृतिकीर्तिबुद्धिलक्ष्म्यः परस्परं समाः ॥ १५४ ॥
चतुर्दश महानद्यो, गङ्गाद्याः सपरिच्छदाः । जम्बूद्वीपशुभक्षेत्रे, कुल्यातुल्या विभान्ति याः ॥ १५५ ॥
गङ्गासिन्धू रोहितांशा, रोहिता च तथापरा । हरिकान्ता हरिनदी, शीतोदा चेति नामतः ॥ १५६ ॥
मेरोर्दक्षिणतः सप्त, ख्याता एता महापगाः । मेरोरुत्तरतोऽप्येवं, शोभन्ते सप्त सिन्धवः ॥ १५७ ॥
शीता च नारीकान्ता च, नरकान्ता तथापरा । रूप्यकूला स्वर्णकूला, रक्ता रक्तवतीति च ॥ १५८ ॥
हिमवत्पर्वतस्थायिपद्मह्रदाद्विनिर्गताः । गङ्गासिन्धुरोहितांशा, नाम्न्यस्तिस्रो महापगाः ॥ १५९ ॥
महाहिमवदद्रिस्थमहापद्मह्रदात् पुनः । रोहिता हरिकान्तेति, निर्गते द्वे महापगे ॥ १६० ॥
निषधाचलमौलिस्थतिगिञ्छह्रदमध्यतः । समुद्भूते हरिनदी, शीतोदेति महापगे ॥ १६१ ॥
नीलवत्पर्वतगतकेसरिह्रदतः किल । शीता च नारीकान्ता च, निर्गते द्वे महापगे ॥ १६२ ॥
तथा महापुण्डरीकह्रदात् रुक्मिनगाश्रितात् । नरकान्ता रूप्यकूलेत्युद्गते निम्नगे उभे ॥ १६३ ॥
शिखरिक्ष्माधरस्थायिपुण्डरीकह्रदोत्थिताः । रक्तारक्तवतीस्वर्णकूलाभिधा महापगाः ॥ १६४ ॥
एवं च-तिस्रो नद्यो हिमवतस्तिस्रः शिखरिणो गिरेः । शेषवर्षधरेभ्यश्च, महानद्योर्द्वयं द्वयम् ॥ १६५ ॥
वर्षाण्याश्रित्य सरितः प्रतिवर्षं द्वयं द्वयम् । द्वे विदेहेष्वपाच्यां षट्, षडुदीच्यां ततो यथा ॥ १६६ ॥
गङ्गा सिन्धुश्च भरते, रोहितारोहितांशिके । हैमवते हरिवर्षे, हरिकान्ताहरी उभे ॥ १६७ ॥
शीताशीतोदे विदेहक्षेत्रे तथा च रम्यके । नारीकान्तानरकान्ते, हैरण्यवतगे उभे ॥ १६८ ॥
रूप्यकूलास्वर्णकूले, तथा चैरवतस्थिते । नद्यौ रक्तारक्तवत्यावेवमेताश्चतुर्दश ॥ १६९ ॥
गङ्गासिन्धुरक्तवतीरक्तानां सरितामिह । चतुर्दशसहस्राणि, परिवारः प्रकीर्तितः ॥ १७० ॥
रूप्यकूलास्वर्णकूलारोहितारोहितांशिकाः । अष्टाविंशत्या सहस्रैः, स्रोतस्विनीभिराश्रिताः ॥ १७१ ॥
नारीकान्ता नरकान्ता, हरिकान्ता हरिस्तथा । षट्पञ्चाशच्छैवलिनीसहस्रैः परिवारिताः ॥ १७२ ॥
शीताशीतोदयोर्नद्योः, प्रत्येकं च परिच्छदः । पञ्चलक्षाः सहस्राणि, द्वात्रिंशत् परिकीर्तितः ॥ १७३ ॥
श्लोकक्रमेण सरितामिह श्लोकचतुष्टये । द्विगुणं जिह्विकामानविस्तारोद्वेद्धतादिकम् ॥ १७४ ॥
एकश्लोकोदितानां तु, सर्वं तुल्यं परस्परम् । गङ्गासिन्धुरक्तवतीरक्तानां तुल्यता यथा ॥ १७५ ॥
दश लक्षाश्चतुःषष्टि, सहस्राणि विदेहगाः । नद्योऽपाच्यां लक्षमेकं, षण्णवतिसहस्रयुक् ॥ १७६ ॥
उदीच्यामपि तावन्त्य, एवं च सर्वसंख्यया । षट्पञ्चाशत्सहस्राढ्या, नदीलक्षाश्चतुर्दश ॥ १७७ ॥
जम्बूद्वीपोऽभितो रुद्धः, स्वविरुद्धेन वार्धिना । स्वमोक्षायेव दत्तेऽस्मै, कनीः शैवलिनीरिमाः ॥ १७८ ॥

चतु:षष्टिर्विजयगा, महानद्यश्चतुर्दश । अन्तर्नद्यो द्वादशातिरिच्यन्ते नवतिस्त्वियम् ॥ १७९ ॥

तथाहु: श्रीरत्नशेखरसूरय: स्वक्षेत्रसमासे ।

अडसयरि महाणइओ, बारस अंतरणइओ सेसाओ । परिअरणइओ चउदश, लख्खा छप्पण्णसहस्साय ॥ [गा. ६४]

श्रीमलयगिरयस्तु प्रवेशे च सर्वसंख्ययाऽऽत्मना सह चतुर्दशभिर्नदीसहस्रै: समन्विता भवतीति । क्षेत्रसमासवृत्तौ कच्छविजयगतसिन्धुनदीं वर्णयन्तो महानदीनां न पृथक् गणनेति सूचयाञ्चक्रु: । तथापि द्वादश अन्तरनद्योऽतिरिच्यन्त एवेत्यत्र तत्वं बहुश्रुतगम्यमिति ज्ञेयम् ॥

तथापि पूर्वाचार्यानुरोधात् संख्या तथोदिता । नात्र पर्यनुयोगार्हा, वयं प्राच्यपथानुगा: ॥ १८० ॥

केचित्तु "गाहावई महानईपवूढासमाणी सुकच्छमहाकच्छविजए दुहा विभयमाणी अट्ठाविसाए सलिलासहस्सेहिं समग्गा दाहिणेणं सीयं महानईं समप्पेइ" इत्यादि जम्बूद्वीपप्रज्ञप्तिवचनात्तथा नद्यो विजयच्छेदिन्यो रोहितावत्कुण्डा: स्वनामसमदेवीवासा अष्टाविंशतिनदीसहस्रानुगा: प्रत्येकं सर्वत्रसमा: पञ्चविंशशतविस्तृता अर्द्धतृतीययोजनावगाहा गाहावती पङ्कवती इत्यायुमास्वातिवाचकवचनाच्च द्वादशानामंतर्नदीनामपि प्रत्येकमष्टाविंशतिसहस्ररूपं परिवारं मन्यमाना: षट्त्रिंशत्सहस्राधिकनदीलक्षत्रयेणान्तर्नदीपरिवारेण सह द्विनवतिसहस्राधिकानि सप्तदश नदीलक्षाणि मन्यन्ते ॥ उक्तं च ।

सुत्ते चउद्दसलक्खा, छप्पन्नसहस्स जम्बूदीवंमि । हुंति उ सत्तरस लक्खा, बाणवइ सहस्स मेलविया ॥

अन्ये तु यद्यन्तर्नदीष्वनेकानि परिवारनदीसहस्राणि प्रवेशेयुस्तदा कथं तासां क्रमेण परत: परतो गच्छन्तीनां विस्तारविशेषो गङ्गादिनदीनामिव न संपद्येत ? यस्तु परिवार: सिद्धान्तेऽभिदधे स तु यथाष्टाशीतिर्ग्रहाश्चंद्रस्यैव परिवारतया प्रसिद्धा अपि सूर्यस्यापि स एव परिवार: । न पुन: पृथक् प्रतीयते ॥ उक्तं च समवायाङ्गवृत्तौ । अष्टाशीतिर्महाग्रहा:, एते यद्यपि चन्द्रस्यैव परिवारेऽन्यत्र श्रूयते तथापि सूर्यस्यापि इन्द्रत्वादेत एव परिवारतयाऽवसेया इति । तथा गङ्गादिसम्बन्धीन्येवाष्टाविंशतिनदीसहस्राणि अन्तर्नदीनामपि परिवार इति ॥ एवं चान्तर्नदीनां पृथक्परिवारमनभ्युपगच्छन्तो यथावस्थितामेवनदीसंख्यां मन्यन्ते इत्यादिकं जम्बूद्वीपसंग्रहणीवृत्तौ ।

तथा चाहु: श्रीहरिभद्रसूरय: । [लघुसंग्रहणी गाथा. २५]

सीया सीओयाविय, बत्तीससहस्सपंचलक्खेहिं । सव्वे चउद्दसलक्खा, छप्पन्न सहस्स मेलविया ॥

दिक्पटोऽप्येवमाह ।

जम्बूद्दीवि नराहिव, संख्या सव्वनइ चउदह य लक्खा । छप्पन्नं च सहस्सा, नवइ नइओ कहंति जिणा ॥

कुण्डोद्वेधस्तथा द्वीपोच्छ्रायस्तद्भवनस्य च । परिमाणं समग्रासु, नदीषु सदृशं भवेत् ॥ १८१ ॥

शीता च हरिसलिला, गङ्गासिन्धू च रोहिता । स्वर्णकूला नरकान्ता, नद्योऽभूर्दक्षिणामुखाः ॥ १८२ ॥
उदक् याता रक्तवती, रक्ता च रूप्यकूलिका । नारीकान्ता रोहितांशा, शीतोदा हरिकान्तिका ॥ १८३ ॥
सिन्धुं विना याः सरितो, दक्षिणां दिशमागताः । ताः पूर्वाम्बुधिं गामिन्यः, सिन्धुस्तु पश्चिमाब्धिगा ॥ १८४ ॥
उदक् याताश्च या नद्यो, विना रक्तामहानदीम् । ताः पश्चिमाब्धिगामिन्यो, रक्ता पूर्वाब्धिगामिनी ॥ १८५ ॥
स्वकीयह्रदविस्तारेऽशीतिभक्ते यदाप्यते । दक्षिणाभिमुखीनां सा, नदीनां मुखविस्तृतिः ॥ १८६ ॥
उत्तराभिमुखीनां तु, स्वकीयह्रदविस्तृतौ । चत्वारिंशद्विभक्तायां, यल्लब्धं तन्मिता मताः ॥ १८७ ॥
व्यवस्थेयं दक्षिणस्यां, सरितां मन्दराचलात् । उदक् याम्योत्तरदिशाभिमुखीनां विपर्ययात् ॥ १८८ ॥
सर्वासां मुखविस्तारे, दशघ्ने प्रान्तविस्तृतिः । व्यासपञ्चाशत्तमांशः, सर्वत्रोद्वेध आहितः ॥ १८९ ॥
मुखपर्यन्तविस्तारविश्लेषे गतयोजनैः । गुणिते पञ्चचत्वारिंशत्सहस्रविभाजिते ॥ १९० ॥
लब्धं यत्तदुभयतो, व्यासवृद्धिरभीप्सिते । योजनादौ गते सर्वास्वपि तस्यार्द्धमेकतः ॥ १९१ ॥
चतुःषष्टि विजयेषु, सप्तवर्ष्या[1] चतुर्दश । द्वादशान्तर्नदीनां च, कुण्डानां नवतिस्त्वियम् ॥ १९२ ॥
द्विघ्नद्विघ्नप्रमाणानि, कुण्डानि जिह्विकादिवत् । तुल्यान्यन्तर्निम्नगानां, मिथो विजयगानि च ॥ १९३ ॥
प्रागुक्ताः पर्वताः कूटाः, कुण्डानि च महापगाः । सर्वे वृत्ता वेदिकया, वनाढ्योभयपार्श्वया ॥ १९४ ॥
वेदिकावनखण्डानां, सर्वत्राप्यविशेषितम् । स्वरूपं जगतीस्थायिवेदिकावनखण्डवत् ॥ १९५ ॥
ऐरवते च भरते, विजयेष्वखिलेषु च । प्रत्येकं त्रित्रिसद्भावात्तीर्थानां द्व्युत्तरं शतम् ॥ १९६ ॥
श्रेण्यः चतस्रः प्रत्येकं, वैताढ्येषु गुहाद्वयम् । श्रेण्यः शतं स्युः षट्त्रिंशमष्टषष्टिश्च कन्दराः ॥ १९७ ॥
दशोत्तरं पुरशतं, प्रतिवैताढ्यपर्वतम् । सप्तत्रिंशच्छतान्येवं, चत्वारिंशानि तान्यपि ॥ १९८ ॥
द्वात्रिंशच्च विदेहस्था, भरतैरवते इति । विजयाः स्युश्चतुस्त्रिंशच्चक्रीजेतव्यभूमयः ॥ १९९ ॥
चतुस्त्रिंशद्राजधान्यो, द्वौ कुरुस्थौ महाद्रुमौ । अस्यान्तिकेऽन्तरद्वीपाः, षट्पञ्चाशच्च वार्धिगाः ॥ २०० ॥
एवं च संग्रहद्वारा, यदुक्तमप्यनूदितम् । सुखावबोधोद्यतानां, तदस्माकं न दोषकृत् ॥ २०१ ॥

जिनैश्चक्रिभिः सिरिभिः शार्ङ्गिभिश्च चतुर्भिश्चतुर्भिर्जघन्येन युक्तः ।
सनाथस्तथोत्कर्षतस्तीर्थनाथैः चतुस्त्रिंशताऽयं भवेद्द्वीपराजः ॥ २०२ ॥
चक्रवर्तिबलदेवकेशवै स्त्रिंशता परिचितः प्रकर्षतः । भास्तैरवतयोर्द्वयं तथा ते परे खलु महाविदेहगाः ॥ २०३ ॥
जम्बूद्वीपे स्युर्निधीनां शतानि षड्युक्तानि त्रीणि सत्तामपेक्ष्य ।
षट्त्रिंशत्ते चक्रिभोग्या जघन्यादुत्कर्षेण द्वे शते सप्ततिश्च ॥ २०४ ॥
चक्री गङ्गाद्यापगानां मुखस्थानेतानात्ताशेषषट्खण्डराज्यः ।

---

१ भरतादिषु गङ्गादिवत् महाविदेहेषु शीताशीतोदाभावात् सप्तवर्ष्या इति, चतुष्षष्टिः विजयेषु तु गङ्गाद्याः ।

व्यावृत्तः सन्नष्टमस्य प्रभावात् साधिष्टातृनात्मसान्निर्मिमीते ॥ २०५ ॥
पञ्चाक्षरत्नद्विशती दशाधिकोत्कर्षेण भोग्यात्र च चक्रवर्तिनाम् ।
जघन्यतोऽष्टाभ्यधिकैव विंशतिरेकाक्षरत्नेष्वपि भाव्यतामिदम् ॥ २०६ ॥
द्वौ चन्द्रौ द्वौ दिनेन्द्राविह परिलसतो दीपकौ सद्मनीव,
षट्सप्तत्या समेतं ग्रहशतमभितः कान्तिमाविष्करोति ।
षट्पञ्चाशच्च ऋक्षाण्यनिलपथपृथून्निद्रचन्द्रोन्द्रयान्त मुक्तश्रेण्याः श्रयन्ति श्रियमतिविततश्रीभरैर्विश्रुतानि ॥ २०७ ॥
एकं लक्षं सहस्राः सततमिह चतुस्त्रिंशदुद्योतहृद्या,
न्यूनाः पञ्चाशतोच्चैर्दधति रुचिरतां तारकाकोटिकोट्यः ।
प्रोद्यत्प्रस्वेदबिन्दावलय इव निशि व्योमलक्ष्मीमृगाक्ष्याः,
रत्यध्यासं विधातुं प्रियतमविधुना गाढमालिङ्गिताया: ॥ २०८ ॥
कोटीकोटीपदेन केचन बुधाः कोटिं वदन्त्यत्र यत्, क्षेत्रस्तोकतयावकाशघटना नैषां भवेदन्यथा ॥
अन्ये कोटय एव तारकततेरौत्सेधिकैरङ्गुलैः, कोटाकोटिदशां भजन्ति घटिता इत्यूचिरे सूरयः ॥ २०९ ॥

तथा च सङ्ग्रहणीवृत्तौ ॥ इह द्वे मते । तत्रैके कोटीनामेव कोटीकोटीतिसंज्ञांतरं नामान्तरं मन्यन्ते क्षेत्रस्य स्तोकत्वेन तथा पूर्वाचार्यप्रसिद्धेः । अन्ये त्वाहुः "नगपुढवीविमाणाइं, मिणसु पमाणंगुलेणं तु "इति वचनात् ताराविमानानां स्वरूपेण कोटय एव सत्यो यदौत्सेधाङ्गुलेन सर्वतो मीयन्ते तदा कोटीकोटयो जायन्ते । तथोक्तं विशेषणवत्याम् ।

कोडाकोडीसन्नंतरं तु, मन्नंति खित्तथोवतया । अन्ने उस्सेहंगुलमाणं काउण ताराणम् ॥

जयति जगति जम्बूद्वीपभूमिधवोऽयम्, सततमितरवार्दिधद्वीपसामन्तसेव्यः ।
सुरगिरिरयमुच्चैरंशुको नीलचूलः, श्रयति कनकदण्डो यस्य राजध्वजत्वम् ॥ २१० ॥
विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिष-द्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे सर्गः पूर्तिमितो युतोऽद्भुतगुणैरेकोनविंशः सुखम् ॥ २११ ॥
॥ इति श्री लोकप्रकाशैकोनविंशः सर्गः समाप्तः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

अथ विंशतितमः सर्गः

प्रणम्य परमज्ञानप्रभाप्रस्तावकं प्रभुम् । द्वीपेऽस्मिन्नथ सूर्येन्दुचाररीतिर्विभाव्यते ॥ १ ॥
सर्वेषां कालमानानामादिरादित्य एव हि । ततोऽस्य वक्तुमुचिता, पूर्वं चारनिरूपणा ॥ २ ॥

तथाहुः पञ्चमाङ्गे ॥ "से केणट्ठेणं भंते एवं वुच्चइ सूरे आइच्चे । सूरे आइच्चे गोयम सूराइयाणं समयाइ वा आवलियाइ वा जाव वा उस्सप्पिणीति वा अवसप्पिणीति वा ॥"

ततोऽत्र बहुवाच्येऽपि, प्रथमं सैव तन्यते । पञ्चानुयोगद्वाराणि, तस्यामाहुर्जिनेश्वराः ॥ ३ ॥
मण्डलानामिह क्षेत्रप्ररूपणा ततः परम् । संख्याप्ररूपणा तेषां, तदबाधाप्ररूपणा ॥ ४ ॥
ततः परं मण्डलानामन्तरस्य प्ररूपणा । चारप्ररूपणा चैषां, भाव्यन्तेऽनुक्रमादिमाः ॥ ५ ॥
इह प्रकरणे यत्र, क्वाप्यंशा अविशेषतः । कथ्यन्ते तत्रैकषष्टिछिन्नांस्तान् परिचिन्तयेत् ॥ ६ ॥
अभ्यन्तरादिभिर्बाह्यपर्यन्तैः सूर्यमण्डलैः । आकाशं स्पृश्यते यत्तन्मण्डलक्षेत्रमुच्यते ॥ ७ ॥
योजनानां पञ्चशती, दशोत्तरा तथा लवाः । अष्टचत्वारिंशदस्य, विष्कम्भश्चक्रवालतः ॥ ८ ॥
तथाहि । अष्टचत्वारिंशदंशा, विष्कम्भाः प्रतिमण्डलम् । मण्डलानां च चतुरशीत्याढ्यं शतमीरितम् ॥ ९ ॥
अष्टचत्वारिंशता सा, गुण्यते मण्डलावली । द्वात्रिंशानि शतान्यष्टाशीतिर्भागा भवन्ति ते ॥ १० ॥
विभज्यंते चैकषष्ट्या, योजनानयनाय ते । पूर्वोदितानामंशानामेकषष्ट्यात्मकत्वतः ॥ ११ ॥
चतुश्चत्वारिंशमेवं, योजनानां शतं भवेत् । अष्टचत्वारिंशदंशाः, शेषमत्रावशिष्यते ॥ १२ ॥
मण्डलानामन्तराणि स्युरेकोनाशीत्यधिकं शतम् । स्युः सर्वत्राप्यन्तराणि, रूपोनान्यङ्गुलीष्विव ॥ १३ ॥
योजनद्वयमानं स्यादेकैकं मण्डलान्तरम् । शतं त्र्यशीत्याभ्यधिकं, द्विकेन गुण्यते ततः ॥ १४ ॥
शतानि त्रीणि षट्षष्ट्याभ्यधिकानि भवन्त्यतः । प्राच्यमत्र चतुश्चत्वारिंशं प्रक्षिप्यते शतम् ॥ १५ ॥
योजनानां पञ्चशती, दशोत्तरा तथा लवाः । अष्टचत्वारिंशदेषा, मण्डलक्षेत्रविस्तृतिः ॥ १६ ॥

इति सूर्यमण्डलक्षेत्रम् ॥ १ ॥

समाक्रम्य योजनानामशीतिसंयुतं शतम् । पञ्चषष्टिर्मण्डलानि, जम्बूद्वीपे विवस्वतः ॥ १७ ॥
विशेषश्चायमत्र ।
पञ्चषष्ट्या मण्डलैः स्यादेकोनाशीतियुक्शतम् । योजनानामेकषष्टिभागैर्नवभिरञ्चितम् ॥ १८ ॥
ततः षट्षष्टितमस्य, मण्डलस्य लवैः सह । स्यात् द्विपञ्चाशताशीतियुक् योजनशतं ह्यदः ॥ १९ ॥
तथा-साष्टचत्वारिंशद्भागां, योजनशतत्रयी त्रिंशान् । व्याप्याब्धौ मण्डलशतमर्कस्यैकोनविंशं स्यात् ॥ २० ॥
एवं च मण्डलशतं, खेश्चतुरशीतिमत् । पूर्वोक्तं मण्डलक्षेत्रं, समाक्रम्य व्यवस्थितम् ॥ २१ ॥

अत्र जम्बद्वीपवर्त्तिनां पञ्चषष्टेर्मण्डलानां विषयविभागव्यवस्थायां संग्रहणीवृत्त्याद्युक्तोऽयं वृद्धसम्प्रदायः ।

यथैकतो मेरुगिरेस्त्रिषष्टिर्निषधोपरि । हरिवर्षजीवाकोट्यां, विज्ञेयं मण्डलद्वयम् ॥ २२ ॥
मेरोरपरतोऽप्यूर्ध्वं, त्रिषष्टिर्नीलवद्गिरेः । रम्यकजीवाकोट्यां च, मण्डले द्वे विवस्वतः ॥ २३ ॥
इयं भरतैरवतापेक्षया मण्डलस्थितिः । अग्निवायुस्थयोर्मेरोर्ज्ञेया निषधनीलयोः ॥ २४ ॥
प्राग्विदेहापेक्षया तु, मेरोरैशानकोणके । स्युस्त्रिषष्टिर्नीलवति, मण्डलानीति तद्विदः ॥ २५ ॥
एवं प्रत्यग्विदेहानामपेक्षया सुमेरुतः । नैर्ऋतस्थायि निषधे, विज्ञेया मण्डलावली ॥ २६ ॥
किं च-विदिग्गताभ्यां श्रेणीभ्यां, मण्डलाल्यौ स्थिते इमे । औदयिकक्षेत्रपरावर्त्तादयनयोर्द्वयोः ॥ २७ ॥
कान्तिहान्याऽयने याम्येऽर्वागर्वागागतौ रवी । दृश्येते कान्तिवृद्ध्या च, दूरतोऽप्युत्तरायणे ॥ २८ ॥
एवं हरिवर्षरम्यकजीवाकोट्योरपि भावना ॥

तथाहुः — जम्बूद्वीपप्रज्ञप्तिसूत्रे—जम्बूदीवे णं भंते ! दीवे सूरिया उदीणपाइणमुग्गच्छ पाइणदाहिणमागच्छन्ति (१) पूर्वविदेहापेक्षयेदम् । पाइणदाहिणमुग्गच्छ दाहिणपडीणमागच्छन्ति (२) भरतापेक्षयेदम् । दाहिणपडीणमुग्गच्छ पडीणउदीणमागच्छन्ति (३) पश्चिमविदेहापेक्षयेदम् । पडीणउदीणमुग्गच्छ उदीणपाइणमागच्छन्ति (४) ऐरावतापेक्षयेदम् ॥

या मण्डलानां विषयव्यवस्थेयमुदीरिता । भारतादिमध्यभागापेक्षया सा विभाव्यताम् ॥ २९ ॥
अन्यत्र तु स्वस्वभानूदयक्षेत्रे यथोदिता । मण्डलानां व्यवस्था साऽव्यक्ता वक्तुं न शक्यते ॥ ३० ॥
एवं च—
येषामदृश्यो दृश्यत्वं दृश्यो वा यात्यदृश्यताम् । यत्र तत्रैवोदयास्तौ, तेषां भानुमतो नृणाम् ॥ ३१ ॥
नन्वेवं सति सूर्यस्योदयास्तमयने खलु । स्यातामनियते बाढं, स्तो यदुक्तं पुरातनैः ॥ ३२ ॥
जह जह समए समए, पुरओ संचरइ भक्खरो गयणे । तह तह इओ वि नियमा, जायइ रयणीइ भावत्थो ॥
एवं च सइ नराणां, उदयत्थमणाइं होंतऽनिययाइं । सइ देसकालभेए, कस्सइ किंचिव दिस्सए नियमा ॥
सइ चेव अनिद्दिट्ठो, रुद्धमुहुत्तो कमेण सव्वेसिं । तेसिं चीदाणिंपि य, विसयपमाणो रवी जेसिं ॥
भगवतीसूत्रशतक ५ प्रथमोद्देशकवृत्तौ । इति सूर्यमण्डलसंख्या प्रसंगात्तद्विषयव्यवस्था च ॥
वाच्याऽथ मण्डलाबाधा, त्रिविधा सा निरूपिता । ओधतो मण्डलक्षेत्राबाधाऽधिकृत्य मन्दरम् ॥ ३३ ॥
मेरुमेवाधिकृत्यान्या, चाबाधा प्रतिमण्डलम् । मण्डले मण्डलेऽबाधा, तृतीया त्वर्कयोर्मिथः ॥ ३४ ॥
सहस्राणि चतुश्चत्वारिंशदष्टौ शतानि च । विंशानि मेरुतो दूरे, मण्डलक्षेत्रमोघतः ॥ ३५ ॥
तथाहि जम्बूद्वीपान्तः, सर्वाभ्यन्तरमण्डलम् । साशीतियोजनशतं, स्थितमवगाह्य सर्वतः ॥ ३६ ॥
ततश्च द्वीपविष्कम्भाल्लक्षरूपाद्वियोज्यते । साशीतियोजनशतं, प्रत्येकं पार्श्वयोर्द्वयोः ॥ ३७ ॥
सहस्रा नवनवतिश्चत्वारिंशा च षट्शती । ईदृग्रूपः स्थितो राशिरस्मादप्यपनीयते ॥ ३८ ॥

सहस्राणि दश व्यासो, मेरोस्ततोऽविशिष्यते । नवाशीतिः सहस्राणि, चत्वारिंशा च षट्शती ॥ ३९ ॥
एतावान् मण्डलक्षेत्रे, मेरुव्यासो न यद्यपि । तथापि भूतलगतो, व्यवहारादिहोच्यते ॥ ४० ॥

तथाहुः श्रीमलयगिरिपादा बृहत्क्षेत्रसमासवृत्तौ । "यद्यपि च नाम मण्डलक्षेत्रे मेरोर्विष्कम्भो दशयोजनसहस्रात्मको न लभ्यते किन्तु न्यूनः तथापि धरणितले दशयोजनसहस्रप्रमाणः प्राप्यते इति तत्रापि स तावान् व्यवहारतो विवक्ष्यते ॥"

अस्मिन्नाशार्द्धिते च, सम्पद्यते यथोदितम् । ओघतो मण्डलक्षेत्रान्तरं मेरुव्यपेक्षया ॥ ४१ ॥
इति मेरुं प्रतीत्य मण्डलक्षेत्राबाधा ॥ १ ॥

एतदेवान्तरं मेरोः, सर्वान्तर्मण्डलस्य च । अतः परं यदपरं, नास्ति मण्डलमान्तरम् ॥ ४२ ॥
सर्वान्तरानन्तरे तु, द्वितीयमण्डले ततः । साष्टाचत्वारिंशदंशं, वर्द्धते योजनद्वयम् ॥ ४३ ॥
इत्थं प्राग्मण्डलादग्र्यमण्डले योजनद्वयम् । साष्टाचत्वारिंशदंशमबाधायां विवर्द्धते ॥ ४४ ॥
एवं यावत्सर्वबाह्यमण्डलं मेरुतः स्थितम् । सहस्रैः पञ्चचत्वारिंशता त्रिंशैस्त्रिभिः शतैः ॥ ४५ ॥
इति मेरुं प्रतीत्य प्रतिमंडलमबाधा ॥ २ ॥

यदाऽर्कौ चरतः प्राप्य, सर्वाभ्यन्तरमण्डलम् । तदा सूर्यस्य सूर्यस्य, स्यात् परस्परमन्तरम् ॥ ४६ ॥
सहस्रा नवनवतिश्चत्वारिंशाश्च षट्शती । द्वीपव्यासादुभयतो, मण्डलक्षेत्र (१८०) कर्षणात् ॥ ४७ ॥
सर्वान्तरान्तरौ तौ, द्वितीयं मण्डलं यदा । उपसंक्रम्य चरतस्तदा मिथोऽन्तरं तयोः ॥ ४८ ॥
सहस्रा नवनवतिर्योजनानां च षट्शती । पञ्चचत्वारिंशदाढ्या, पञ्चत्रिंशत्तथा लवाः ॥ ४९ ॥
तथा ह्येकोऽप्यर्क इह, द्वितीयमण्डले व्रजन् । साष्टाचत्वारिंशदंशे, द्वे योजने व्यतिक्रमेत् ॥ ५० ॥
एवं द्वितीयोऽपि ततो, वर्द्धन्ते प्रतिमण्डलम् । योजनानि पञ्च पञ्चत्रिंशद्भागा मिथोऽन्तरे ॥ ५१ ॥
एवं यावत्सर्वबाह्यमण्डले चरतस्तदा । तयोर्मिथोऽन्तरं लक्षं, सषष्टीनि शतानि षट् ॥ ५२ ॥
अन्तर्विशन्तौ तौ सर्वबाह्यमण्डलतः पुनः । अर्वाचीने सर्वबाह्याद्वर्त्तते मण्डले यदा ॥ ५३ ॥
तदार्कयोरन्तरं स्याल्लक्षमेकं शतानि षट् । चतुःपञ्चाशानि लवाः, षड्विंशतिः पुरोदिताः ॥ ५४ ॥
एवमन्तः प्रविशतः, प्रतिमण्डलमन्तरम् । पञ्चभिर्योजनैः पञ्चत्रिंशतांशैश्च हीयते ॥ ५५ ॥
एवं पूर्वोदितमेव, सर्वाभ्यन्तरमण्डले । मिथोऽन्तरं द्वयोर्भान्वोः, पुनस्तदवशिष्यते ॥ ५६ ॥

इति मण्डले मण्डले सूर्ययोः परस्परमबाधा ॥ इति मण्डलाबाधा प्ररूपणा ॥

द्वे द्वे च योजने सूर्यमण्डलानां मिथोऽन्तरम् । कथमेतद् इति श्रोतुं, श्रद्धा चेत् श्रूयतां तदा ॥ ५७ ॥
सूर्यमण्डलविष्कम्भे, स्फुरच्चतुरशीतिना । शतेन गुणिते त्यक्ते, मण्डलक्षेत्रविस्तृतेः ॥ ५८ ॥
शेषा स्थिता योजनानां, सषट्षष्टिःशतत्रयी । सत्र्यशीतिशतेनास्यां, भक्तायामेतदन्तरम् ॥ ५९ ॥

इति मण्डलान्तरप्ररूपणा ॥ ४ ॥

कर्त्तव्या मण्डलचारप्ररूपणा च सम्प्रति । सप्तानुयोगद्वाराणि, तत्राहु तत्त्ववेदिनः ॥ ६० ॥
प्रत्यब्दं मण्डलचारसंख्याप्ररूपणा रवेः । वर्षान्तः प्रत्यहं रात्रिदिनमानप्ररूपणा ॥ ६१ ॥
मण्डले मण्डले क्षेत्रविभागेनाप्यहर्निशोः । प्ररूपणा मण्डलानां, परिक्षेपप्ररूपणा ॥ ६२ ॥
प्रतिमण्डलं मुहूर्त्तगतिमानप्ररूपणा । मण्डले मण्डले दृष्टिपथप्राप्तिप्ररूपणा ॥ ६३ ॥
प्ररूपणा सप्तमी च, ख्यातादूर्धमण्डलस्थितेः । अनुयोगद्वारमथ, प्रथमं परितन्यते ॥ ६४ ॥
चरतोऽर्कौ यदा सर्वान्तरानन्तरमण्डले । सूर्यसंवत्सरस्याहोरात्रोऽयं प्रथमस्तदा ॥ ६५ ॥
त्र्यशीतियुक्शततमे, द्वैतीयीकात्तु मण्डलात् । परिपाट्या सर्वबाह्यमण्डले तौ यदागतौ ॥ ६६ ॥
संपूर्णाः सूर्यवर्षस्य, षण्मासाः प्रथमे तदा । एतदेव च वर्षेऽस्मिन्, दक्षिणायनमुच्यते ॥ ६७ ॥
सर्वबाह्यार्वाक्तनेऽथ, मण्डलेऽर्कौ यदा पुनः । तदोत्तरायणस्याहोरात्रोऽयं प्रथमो भवेत् ॥ ६८ ॥
त्र्यशीतियुक्शततमे, बाह्यार्वाचीनमण्डलात् । यदा क्रमाद्रवी प्राप्तो, सर्वाभ्यन्तरमण्डले ॥ ६९ ॥
पूर्णा द्वितीया षण्मासाः, पूर्ण तथोत्तरायणम् । पूर्णं वर्षं सषट्षष्ट्यहोरात्रत्रिशतात्मकम् ॥ ७० ॥
एवं च–
सर्वान्तरसर्वबाह्यमण्डलयोः किलैकशः । प्रत्यब्दं सूर्यचारः स्यात्, सर्वेष्वन्येषु च द्विशः ॥ ७१ ॥

तथा चागमः ॥ जआ णं सूरिए सव्वब्भन्तराओ मंडलाओ सव्वबाहिरं मंडलं उवसंकमित्ता चारं चरइ सव्वबाहिराओ य मंडलाओ सव्वब्भतरं मंडलं उवसंकमित्ता चारं चरइ एस णं अद्धा केवइएणं राइंदियग्गेणं आहियत्ति वएज्जा ? ॥ तिन्निछावट्ठे राइंदियसए राइंदियग्गेणं आहियत्ति वएज्जा ? ॥ ता एयाएणं अद्धाए सूरिए कइ मंडलाइं चरइ ? ता चुलसीयं मंडलसयं चारं चरइ, बासीयं मंडलसयं दुक्खुत्तो चरइ । तं जहा निक्खममाणे चेव पविसमाणे चेव दुवेय खलु मंडलाइं सइं चरइ । तं जहा सव्वब्भन्तरं चेव सव्वबाहिरं चेव मंडलं ॥ इति मंडलचारसंख्याप्ररूपणा ॥

आक्रमेते यदा भानू, सर्वाभ्यन्तरमण्डले । अष्टादशमुहूर्त्तात्मा, सर्वोत्कृष्टा दिनस्तदा ॥ ७२ ॥
रात्रिःसर्वजघन्या तु, स्यात् द्वादशमुहूर्त्तिका । अथ क्रमात् रात्रिवृद्धिः, भावनीया दिनक्षतिः ॥ ७३ ॥
यदा तस्माद्विनिर्यान्तौ, सर्वाभ्यन्तरमण्डलात् । आरभमाणौ नव्याद्धमहोरात्रेऽस्य चादिमे ॥ ७४ ॥
संक्रम्य चरतः सर्वाभ्यन्तरानन्तरस्थितम् । द्वितीयं मण्डलं सूर्यौ, द्वीपमन्दिरदीपकौ ॥ ७५ ॥
द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यां दिवसस्तदा । हीयते वासतेयी च, ताभ्यामेव विवर्द्धते ॥ ७६ ॥
अहोरात्रे द्वितीयेऽस्य, तृतीयमण्डले यदा । संक्रान्तौ तरणी सर्वान्तरानन्तरमण्डलात् ॥ ७७ ॥
मुहूर्त्तैकषष्टिभागैश्चतुर्भिर्दिवसस्तदा । हीयते वर्द्धते रात्रिर्भागैस्तावद्भिरेव च ॥ ७८ ॥
एवं मुहूर्त्तैकषष्टिभागौ द्वौ प्रतिमण्डलम् । हापयन्तौ दिनक्षेत्रे, वर्द्धयन्तौ निशादिशि ॥ ७९ ॥

अर्कौ यदा सर्वबाह्यमण्डले समुपस्थितौ । अहोरात्रेऽस्य वर्षस्य, त्र्यशीतियुक्शतोन्मिते ॥ ८० ॥
तदा ताभ्यां मुहूर्त्तैकषष्ट्यंशानां शतत्रयम् । सषट्षष्टिदिनाकृष्टं, रजन्यां चाभिवर्द्धितम् ॥ ८१ ॥
तावद्भिश्च मुहूर्त्तैकषष्टिभागैर्यथोदितैः । विभाजितैरेकषष्ट्या, मुहूर्त्तानि भवन्ति षट् ॥ ८२ ॥
अहोरात्रेऽत्र तद्रात्रिरष्टादशमुहूर्त्तिका । उत्कृष्टाहश्चापकृष्टं, स्यात् द्वादशमुहूर्त्तकम् ॥ ८३ ॥
याम्यायनस्य पूर्णस्याहोरात्रोऽयं किलान्तिमः । त्र्यशीतियुगहोरात्रशतेनेदं हि पूर्यते ॥ ८४ ॥

लोके तुः– "रसद्विनाड्योऽर्कपला मृगे स्युः, सचापकुम्भेऽष्टकृतैः पलैस्ताः । अलौ च मीनेऽष्टयमाः सशक्रा, मेषे तुलायामपि त्रिंशदेव ॥ कन्यावृषे भूशिखिनोऽङ्गवेदाः, सार्कास्त्रिरामा मिथुने च सिंहे । कर्के त्रिरामा वसुवेदयुक्ता, एषा मितिः संक्रमवासराणाम् ॥ ततश्चः– एकार्कपक्षद्विशरास्त्रिदन्तास्त्रिदन्तपक्षद्विशराः कुसूर्याः । मृगादिषट्केऽहनि वृद्धिरेवम् कर्कादिषट्केऽपचितिःपलाढ्या ॥

प्रविशन्तौ सर्वबाह्यमण्डलात्तरणी यदा । संक्रम्य चरतः सर्वबाह्यार्वाचीनमण्डले ॥ ८५ ॥
तदा द्वाभ्यां मुहूर्त्तैकषष्ट्यंशाभ्यां विवर्द्धते । दिवसः क्षीयते रात्रिस्ताभ्यामेव यथोत्तरम् ॥ ८६ ॥
क्रमादेवं यदा प्राप्तौ, सर्वाभ्यन्तरमण्डले । त्र्यशीतियुक्शततमे, बाह्यार्वाचीनमण्डलात् ॥ ८७ ॥
तदोत्कृष्टं दिनमानमष्टादशमहूर्त्तकम् । रात्रिः सर्वजघन्या तु, स्यात् द्वादशमुहूर्त्तिका ॥ ८८ ॥
एतदेवोदगयनस्यान्त्यं दिनमुदीरितम् । पूर्णे चास्मिन्नहोरात्रे, संपूर्णः सूर्यवत्सरः ॥ ८९ ॥
अत्युत्कृष्टं चापकृष्टं, प्रत्यब्दमेकमेव हि । दिनं रात्रिस्तथैवैका, सर्वोत्कर्षापकर्षभाक् ॥ ९० ॥
रात्रिर्याम्यायनान्तेऽतिगुर्वी लघुतमं दिनम् । दिनः सौम्यायनान्तेऽतिगुरुर्निशा लघीयसी ॥ ९१ ॥

तथा च सिद्धान्तः ॥ इह खलु तस्सेयं आइच्चसंवच्छरस्स सइं अट्ठारसमुहुत्ते दिवसे भवइ । सइं अट्ठारसमुहुत्ता राइ भवइ । सइं दुवालसमुहुत्तो दिवसो भवइ । सइं दुवालसमुहुत्ता राइ भवइ ॥

जम्बूद्वीपे यदा मेरोर्दक्षिणोत्तरयोर्दिनम् ॥ चकितेव तदा रात्रिः, स्यात् पूर्वापरयोर्दिशोः ॥ ९२ ॥
जम्बूद्वीपे यदा मेरोर्दक्षिणोत्तरयोर्निशा । तदास्याद् वासरो मेरोः, पूर्व पश्चिमयोर्दिशोः ॥ ९३ ॥
सर्वोत्कृष्टं दिनमानं, दक्षिणोत्तरयोर्यदा । रात्रिः सर्वजघन्या स्यात्, पूर्वपश्चिमयोस्तदा ॥ ९४ ॥
सर्वोत्कृष्टं दिनमानं, पूर्वपश्चिमयोर्यदा । रात्रिः सर्वजघन्या स्यात्, दक्षिणोत्तरयोस्तदा ॥ ९५ ॥
किंच क्षेत्रेषु सर्वेषु, समं मानमहर्निशोः । किन्त्वेतयोरवस्थाने, यथोक्तः स्याद्विपर्ययः ॥ ९६ ॥
क्षेत्रे काले च सर्वस्मिन्नहोरात्रो भवेद्ध्रुवम् । त्रिंशन्मुहूर्त्तप्रमाणो, न तु न्यूनाधिकः क्वचित् ॥ ९७ ॥

लोके तुः– भवेत् पैत्रं त्वहोरात्रं मासेनाब्देन दैवतम् । दैवे युगसहस्रे द्वे ब्राह्म्यं कल्पौ तु तौ नृणाम् ॥

एवमहोरात्रे विशेषं वदन्ति । अत एव दक्षिणायनं देवानां रात्रिरुत्तरायणं तेषां दिनमिति शुभकार्यं तत्र विहितमिति मन्यन्ते ॥

ननु चाष्टादशमुहूर्त्तात्माऽहर्भरते यदि । स्यात्तदा च विदेहेषु, रात्रिः सर्वलघीयसी ॥ ९८ ॥
तर्हि रात्रेर्द्वादशानां, मुहूर्त्तानां व्यतिक्रमे । स्यात् क्षेत्रे तत्र कः काल, इति चेदुच्यते शृणु ॥ ९९ ॥
द्युरात्रिमानविश्लेषे, शेषाद्‌र्धाद्‌र्धं भवेत् द्वयोः । सामान्यं क्षेत्रयो रात्रिदिनपूर्वापरांशयोः ॥ १०० ॥
तद्यथा, क्षणेभ्योऽष्टादशभ्यो द्वादशापकर्षणे स्थिताः । षट् तदद्‌र्धं त्रयं साधारणं ज्येष्ठदिनोषयोः ॥ १०१ ॥
एवं च, अष्टादशमुहूर्त्तात्मा, यदोत्कृष्टदिनस्तदा । पश्चात्त्रिक्षणशेषेऽह्नि, भवेत् भानूदयोऽग्रतः ॥ १०२ ॥
तथाहि, मुहूर्त्तत्रयशेषेह्नि, भरतैरवताख्ययोः । भवेदभ्युदयो भानोः, पूर्वापरविदेहयोः ॥ १०३ ॥
दिने त्रिक्षणशेषे च, पूर्वापरविदेहयोः । स्यात् भारतैरवतयोस्तरणेरुदयः खलु ॥ १०४ ॥
एवं च, स्यात् भारतैरवतयोरह्नोऽन्त्यं यत्क्षणत्रयम् । ज्येष्टेऽहनि तदेवाद्यं, पूर्वापरविदेहयोः ॥ १०५ ॥
दिने गुरौ यदेवाद्यं, पूर्वापरविदेहयोः । तत् भारतैरवतयोरह्नोऽन्त्यं स्यात्क्षणत्रयम् ॥ १०६ ॥
तथा, अष्टादशमुहूर्त्ता स्यात्, यदोत्कृष्टा निशा तदा । तन्मुहूर्त्तत्रयेऽतीते, भवेदर्कोदयः पुरः ॥ १०७ ॥
तथाहि । पूर्वापरविदेहेषु, भानोरस्तात् त्रिभिः क्षणैः । स्यात् भारतैरवतयोस्तरणेरुदयः खलु ॥ १०८ ॥
भारतैरवतयोश्च, भानोरस्तादनन्तरम् । त्रिभिः क्षणैः स्यात् प्रत्यूषं, पूर्वापरविदेहयोः ॥ १०९ ॥
क्षणशब्दश्चात्र प्रकरणे मुहूर्त्तवाचीति ध्येयम् ॥
तथा च, भवेद्विदेहयोराद्यं, यन्मुहूर्त्तत्रयं निशः । स्यात् भारतैरवतयोः, तदेवान्त्यं क्षणत्रयम् ॥ ११० ॥
स्यात् भारतैरवतयोस्तदेवान्त्यं क्षणत्रयम् । भवेद्विदेहयो रात्रेस्तदेवान्त्यं क्षणत्रयम् ॥ १११ ॥
इह च प्राग्विदेहादिक्षेत्राह्वानोपलक्षिताः । पूर्वादिक्षेत्रदिग्मध्यभागा ज्ञेया विवेकिभिः ॥ ११२ ॥
तेष्विदं कालनैयत्यं, ज्ञेयमन्यत्र तु स्फुटम् । भाव्यमस्यानुसारेणार्कोदयास्तविभावनात् ॥ ११३ ॥
एवं च, अपाच्युदीच्योः प्रत्यूषात् मुहूर्त्तत्रियते गते । लघोर्निशायाः प्रारम्भः, स्यात् पूर्वापरयोर्दिशोः ॥ ११४ ॥
अपराह्णत्रिमुहूर्त्यां, शेषायां चानयोर्दिशोः । प्रत्यक् प्राक् च निशान्तः, स्यादेवं सर्वत्र भाव्यताम् ॥ ११५ ॥
इदं गुरुदिने गुर्व्यां, रात्रौ त्वस्याः क्षणत्रये । गते शेषे च कल्पाहःप्रान्तावुक्तदिशोः क्रमात् ॥ ११६ ॥
निशां चाह्नां मध्यमानामप्येवं स्तो यथोचितम् । विश्लेषशेषार्द्धशेषे, याते चादिपरिक्षयौ ॥ ११७ ॥
इति कृता वर्षमध्ये दिनरात्रिप्रमाणप्ररूपणा ॥
मण्डलस्याभ्यन्तरस्य, दशात्र परिधेर्लवाः ॥ कल्प्यास्तत्रोद्योतयेत्तांस्त्रीनेकोऽर्को दिने गुरौ ॥ ११८ ॥
त्रींश्च तत्संमुखानन्यः, षट्स्वंशेषु दिनं ततः । मध्ये तयोः लवौ द्वौ द्वौ, रजनीति लवा दश ॥ ११९ ॥
जघन्येऽहनि च द्वौ द्वौ, भागौ दीपयतो रवी । दिनं चतुर्षु भागेषु, निशा षट्सु लवेष्वतः ॥ १२० ॥

प्रकाशक्षेत्रतश्चैवं, दशांशौ दक्षिणायने । हीयेते क्रमतस्तौ च, वर्द्धेते उत्तरायणे ॥ १२१ ॥
अत्रोपपत्तिः ।
द्वाभ्यां किलाहोरात्राभ्यामेकेनार्केण मण्डलम् । पूर्यतेऽहोरात्रयोश्च, मुहूर्त्ताः षष्टिरहिताः ॥ १२२ ॥
षष्टेश्च दशमो भागः, षट् ते च त्रिगुणीकृताः । दशांशत्रयरूपाः स्युः, षष्टेरष्टादश क्षणाः ॥ १२३ ॥
तदेभिरष्टादशभिर्मुहूर्त्तैः परिधेरपि । उत्कृष्टदिवसे युक्तं, दशांशत्रयदीपनम् ॥ १२४ ॥
दशांशद्वयरूपाश्च, षष्टेर्द्वादश निश्चिताः । तत् तैर्द्वादशभिर्युक्तं, दशांशद्वयदीपनम् ॥ १२५ ॥

तथाहुः, इह छच्चिय दसभाए, जंबूद्दीवस्स दुन्नि दिवसयरा । तावित्ति दित्तलेसा, अब्भितरमंडले संता ॥
चत्तारिय दसभाए, जंबुद्दीवस्स दुन्नि दिवसयरा । तावित्ति मंदलेसा, बाहिरए मंडले संत ॥

एवं प्रकाशक्षेत्रस्य, दशांशकल्पना बुधैः । आपुष्करार्द्धं कर्तव्या, रवीनामथ तत्र च ॥ १२६ ॥
दिशत्येकोनपञ्चाशा, चतुस्त्रिंशत् सहस्रकाः । द्विचत्वारिंशच्च लक्षाः, कोट्येका परिधिर्भवेत् ॥ १२७ ॥
दशांशत्रितयं लक्षा, द्विचत्वारिंशदस्य च । सप्तत्रिंशाच्चतुस्त्रिंशत्सहस्राः परमे दिने ॥ १२८ ॥
तापक्षेत्रं तिर्यगेतत्, पुष्करार्द्धे विवस्वताम् । ततस्तदर्द्धं पश्यन्ति, तत्रत्याः सूर्यमुद्गतम् ॥ १२९ ॥

तथोक्तम्, लक्खेहिं एगवीसाइ, साइरेगेहिं पुक्खरद्धंमि । उदए पिच्छंति नरा, सूरं उक्कोसए दिवसे ॥
[विशेषावश्यक श्लो. ३४५]

सर्वान्तरमण्डलगतसूर्ययोरातपाकृतिः । ऊर्द्ध्वास्यतालिकापुष्पसंस्थानसंस्थिता मता ॥ १३० ॥
मेरुदिश्यर्धवलयाकारा वारिनिधेर्दिशि । शकटोद्धींमूलभागानुकारेयं प्रकीर्तिता ॥ १३१ ॥
मेरोर्दिशि सङ्कुचिता, विस्तृता चाम्बूधेर्दिशि । प्रत्येकमस्या आयामो, दक्षिणोत्तरयोर्दिशोः ॥ १३२ ॥
मेरोरन्तात् योजनानां, सहस्राण्यष्टसप्ततिः । शतत्रयं त्रयस्त्रिंशं, तृतीययोजनांशयुक् ॥ १३३ ॥
सहस्राः पञ्चचत्वारिंशद्योजनानि तत्र च । जम्बूद्वीपे शेषमब्धौ, द्वयोर्योगे यथोदितम् ॥ १३४ ॥
मेरुणा यन्मते सूर्यप्रकाशः प्रतिहन्यते । तेषां मते मानमिदं, तापक्षेत्रायतेः ध्रुवम् ॥ १३५ ॥
येषां मते मेरुणार्कप्रकाशो नाभिहन्यते । किन्तु मेरुगुहादीनामप्यन्तः प्रथते महः ॥ १३६ ॥
तेषां मते मन्दरादर्धादारभ्य लवणोदधेः । षड्भागं यावदायामस्तापक्षेत्रस्य निश्चितः ॥ १३७ ॥
तदा च, योजनानां सहस्राणि, पञ्च राशौ पुरातने । क्षिप्यन्ते मन्दरार्द्धस्य, ततो मानमिदं भवेत् ॥ १३८ ॥
योजनानां सहस्राणि, त्र्यशीतिः त्रिशती तथा । त्रयस्त्रिंशत्समधिका, तृतीयोंशश्च योजनः ॥ १३९ ॥
सुपर्वपर्वतादेवं, पूर्वपश्चिमयोरपि । तापक्षेत्रस्य प्रत्येकमायामो ज्ञायतामियान् ॥ १४० ॥
सर्वेषु मण्डलेष्वेष, चरतोर्भानुमालिनोः । अवस्थितः सदा तापक्षेत्रायामः प्रकीर्तितः ॥ १४१ ॥
विष्कम्भस्तु मेरुपार्श्वे, तस्यार्द्धवलयाकृतेः । स्यात् मेरुपरिधेर्भागे, दशमे त्रिगुणीकृते ॥ १४२ ॥

तथा च, सहस्रा नव षडशीत्यधिका च चतु:शती । योजनानां दशच्छिन्नयोजनस्य लवा नव ॥ १४३ ॥
विष्कम्भोऽम्भोधिपार्श्वे तु, तापक्षेत्रस्य निश्चित: । अन्तर्मण्डलपरिधेर्दशांशे त्रिगुणीकृते ॥ १४४ ॥
स चायम्, योजनानां सहस्राणि, चतुर्नवतिरेव च । षड्विंशा: पञ्चशत्यंशा:, षष्टिजा द्वयब्धिसंमिता: ॥ १४५ ॥
नन्वेवमब्धे: षड्भागं, यावद्व्याप्तिमुपेयुष: । तापक्षेत्रस्य विष्कम्भ:, संभवेत् नाधिक: कथम् ? ॥ १४६ ॥
तथाहि, पूर्वोक्तितापक्षेत्रस्य, प्रान्तेऽब्धौ परिधिस्तु य: । तद्दशांशत्रयमितो, विष्कम्भ: संभवेन्न किम् ॥ १४७ ॥
अत्रोच्यते, संभवत्येव किन्त्वत्र, करणेनैष संवदन् । चतुर्नवतिसहस्रादिक एव मतो बुधै: ॥ १४८ ॥
व्यक्तिस्तु करणस्यास्य, मुहूर्त्तगतिचिन्तया । कार्या दृग्गोचरस्येव, साम्यान् दृक्पथतापयो: ॥ १४९ ॥

तथाहु:—अत्रोदयास्तान्तरं प्रकाशक्षेत्रं तापक्षेत्रमित्येकार्था: ।

विष्कम्भस्त्वेष तापस्य, द्विविधोऽप्यनवस्थित: । याम्येऽयने हीयमान:, सौम्ये वृद्धिमवाप्नुयात् ॥ १५० ॥
मुहूर्तैकषष्टिभागद्वयगम्यं तु यद् भवेत् । क्षेत्रं तावन्मिता वृद्धिर्हानिश्च प्रतिमण्डलम् ॥ १५१ ॥
तथा च मण्डलै: सार्द्धत्रिंशतैकैकभानुमान् । क्षेत्रं गम्यं मुहूर्त्तेन, वर्धयेद्वा क्षयं नयेत् ॥ १५२ ॥
मण्डलानां सत्र्यशीतिशतेनैवमनुक्रमात् । वर्धितं क्षपितं ताभ्यां, सौम्ययाम्यायनान्तयो: ॥ १५३ ॥
मुहूर्तै: षड्भिराक्रम्य, क्षेत्रं स्यादेष एव च । बाह्यान्तरमण्डलाभ्यां, दशांशो वृद्धिहानिभाक् ॥ १५४ ॥
प्रकाशपृष्टलग्नस्यान्धस्येव तमसोऽप्यथ । आकृतिश्चिन्त्यते भान्वो:, सर्वान्तर्मण्डलस्थयो: ॥ १५५ ॥
अस्याप्याकृतिरूर्ध्वास्यतालिकापुष्पसंस्थिता । तापक्षेत्रवदायाममानं चास्याप्यवस्थितम् ॥ १५६ ॥
अस्तं गते दिनपतौ, मेरोरपि गुहादिषु । ध्वान्तोपलब्धेरायामस्तमसोऽपि प्रकाशवत् ॥ १५७ ॥
विष्कम्भो मेरुसंलग्ने, स्यादेवं ध्वान्तचोलके । मन्दराद्रिपरिक्षेपदशांशे द्विगुणीकृते ॥ १५८ ॥
षट्योजनसहस्राणि, चतुर्विंशं शतत्रयम् । दशभागीकृतस्यैकयोजनस्य लवाश्च षट् ॥ १५९ ॥
लवणाम्भोधिदिशि तु, विष्कम्भस्तमसो भवेत् । अन्तर्मण्डलपरिधेर्दशांशे द्विगुणीकृते ॥ १६० ॥
स चायम्, योजनानां सहस्रास्त्रिषष्टि: सप्तदशाधिका: । अष्टचत्वारिंशदंशा:, षष्टिजास्तत्र मण्डले ॥ १६१ ॥

इति कर्के संक्रान्तौ आतपक्षेत्रतम:क्षेत्रयो: स्वरूपम् ॥

सर्वबाह्यमण्डलं तु, प्राप्तयोरुष्णरोचिषो: । तापान्धकारयो: प्राग्वत्, संस्थानादिनिरूपणम् ॥ १६२ ॥
किन्त्वब्धिदिशि विष्कम्भे, विशेषोऽस्ति भवेत्स च । बाह्यमण्डलपरिधेर्दशांशे द्विगुणीकृते ॥ १६३ ॥
स्युस्त्रिषष्टि: सहस्राणि, सत्रिषष्टिश्च षट्शती । तद्दशांशे त्रिगुणिते, ध्वान्तव्यासोऽप्यसौ तदा ॥ १६४ ॥
सहस्रा: पञ्चनवतिश्चत्वार्येव शतानि च । चतुर्नवतियुक्तानि, त्रिंशदंशाश्च षष्टिजा: ॥ १६५ ॥
बाह्यान्तर्मण्डलस्थार्क, तापक्षेत्रानुसारत: । वृद्धिहानिव्यतीहार:, प्रकाशतमसोर्भवेत् ॥ १६६ ॥
सामीप्यात् दीप्रतेजस्त्वात्, सर्वान्तमण्डलेऽर्क्यो: । दिनातपक्षेत्रवृद्धिर्घर्मस्तीव्रस्तमोऽल्पता ॥ १६७ ॥

मन्दतेजस्तया दूरतया च बाह्यमण्डले । निशातमः क्षेत्रवृद्धिस्तापक्षेत्राल्पता हिमम् ॥ १६८ ॥

यत्तु जम्बूद्वीपप्रज्ञप्तिसूत्रे सर्वान्तर्मण्डलस्थे रवौ समुद्रदिशि तापक्षेत्रविष्कम्भः चतुर्नवतियोजनसहस्राण्यष्टौ शतान्यष्टषष्ट्यधिकानि चतुरश्च दशभागान् योजनस्योक्तः, तथा ध्वान्तविष्कम्भश्च त्रिषष्टियोजनसहस्राणि द्वे च पञ्चचत्वारिंशदधिके योजनशते षट् च दशभागा योजनस्यायमेव च सर्वबाह्यमण्डलस्थे रवौ तापक्षेत्रध्वान्तक्षेत्रयोः विपर्ययेण विष्कम्भरुक्तः, स तु जम्बूद्वीपपरिधेरेव दशांशद्वयत्रयकल्पनया इति व्यामोहो न विधेयः । यत्तु तत्र सर्वान्तर्मण्डले उभयतः समुदितं द्वीपसम्बन्धि षष्ट्यधिकं योजनशतत्रयं न्यूनतया न विवक्षितं । यच्च सर्वबाह्यमण्डले उभयतः समुदितानि समुद्रसम्बन्धीनि षष्ट्यधकानि षट् योजनशतान्यधिकतया न विवक्षितानि तत्राविवक्षैव बीजम् । इत्यादिकमर्थत उपाध्यायश्रीशान्तिचन्द्रोपज्ञ-जम्बूद्वीपप्रज्ञप्तिवृत्तेरवसेयम् ॥

तापक्षेत्रस्य च व्यासो, यावान् स्याद्यत्र मण्डले । करप्रसारस्तस्यार्द्धे, पूर्वतोऽपरतोऽपि च ॥ १६९ ॥
मेरोर्दिशि तु मेर्वर्द्धं, यावत्तेजः प्रसर्पति । पाथोधिदिशि पाथोधेः, षड्भागं यावदर्कयोः ॥ १७० ॥
करप्रसार ऊर्द्ध्वं तु, योजनानां शतं मतः । यत्तापयत एतावदूर्द्ध्वं निजविमानतः ॥ १७१ ॥
शतेष्वष्टासु सूर्याभ्यामधस्तात् समभूतलम् । सहस्रं च योजनानामधोग्रामास्ततोऽप्यधः ॥ १७२ ॥
तांश्च यावत्तापयतः, प्रसरन्ति करास्ततः । विवस्वतोर्योजनानामष्टादश शतान्यधः ॥ १७३ ॥
सप्तचत्वारिंशदथ, सहस्राणि शतद्वयम् । त्रिषष्टिश्च योजनानां, षष्टयंशा एकविंशतिः ॥ १७४ ॥
करप्रसार एतावान्, सर्वान्तर्मण्डलेऽर्कयोः । पूर्वतोऽपरतश्चाथ, दक्षिणोत्तरयोर्ब्रुवे ॥ १७५ ॥
सहस्राणि पञ्चचत्वारिंशत्स्वर्गिगिरेर्दिशि । साशीतियोजनशतोनान्यथाब्धेर्दिशि ब्रुवे ॥ १७६ ॥
त्रयस्त्रिंशत् सहस्राणि, त्रयस्त्रिंशं शतत्रयम् । योजनत्र्यंशयुक् वार्द्धौ, द्वीपेऽशीतियुतं शतम् ॥ १७७ ॥
सर्वबाह्यमण्डले तु, चरतोरुष्णरोचिषोः । करप्रसार एतावान्, स्यात् पूर्वापरयोर्दिशोः ॥ १७८ ॥
एकत्रिंशत्सहस्राणि, शतान्यष्टौ तथोपरि । एकत्रिंशद्योजनानि, त्रिंशदंशाश्च षष्टिजाः ॥ १७९ ॥
मेरोर्दिशि योजनानां, वार्द्धौ त्रिंशं शतत्रयम् । द्वीपे च पञ्चचत्वारिंशत्सहस्रास्ततः परम् ॥ १८० ॥
त्रयस्त्रिंशत्सहस्राणि, सत्र्यंशं योजनत्रयम् । करप्रसारो भान्वोः स्याल्लवणाब्धौ शिखादिशि ॥ १८१ ॥
ऊर्द्ध्वं तु योजनशतं, तुल्यं सर्वत्र पूर्ववत् । अष्टादश योजनानां, शतान्यधस्तथैव च ॥ १८२ ॥

इति क्षेत्रविभागेन दिनरात्रिमानप्ररूपणा तत्प्रसंगादातपतमःसंस्थानादिप्ररूपणा च ।

कृता क्षेत्रविभागेन, दिनरात्रिप्ररूपणा । परिक्षेपमिति ब्रूमः, साम्प्रतं प्रतिमण्डलम् ॥ १८३ ॥
वगाह्योभयतो द्वीपे, सर्वान्तर्मण्डलं स्थितम् । साशीतियोजनशतं, द्विघ्नं कार्यमिदं ततः ॥ १८४ ॥
सषष्टियोजनशतत्रयं जातमिदं पुनः । द्वीपव्यासाल्लक्षरूपाद्विशोध्यते ततः स्थितम् ॥ १८५ ॥

विष्कम्भायामतो नूनं, सर्वाभ्यन्तरमण्डलम् । सहस्रा नवनवतिश्चत्वारिंशा च षट्शती ॥ १८६ ॥
परिधिस्तु यथाम्नायमस्य लक्षत्रयं युतम् । सहस्रैः पञ्चदशभिर्नवाशीतिश्च साधिका ॥ १८७ ॥
सषष्टियोजनशतत्रयं यत्प्रागपाकृतम् । तस्य वा परिधिः कार्यः, पृथगीदृद्विधस्तु सः ॥ १८८ ॥
एकादश शतान्यष्टत्रिंशान्येनं विशोधयेत् । जम्बूद्वीपस्य परिधेः, स्यादप्येवं यथोदितः ॥ १८९ ॥
अथैकतः स्थितं सर्वान्तरानन्तरमण्डलम् । अष्टचत्वारिंशदंशान्, सर्वान्तर्मण्डलात्मकान् ॥ १९० ॥
द्वे योजने च त्यक्त्वार्वाक्, परतोप्येवमेव तत् । एवं पञ्चत्रिंशदंशं, भवद्योजनपञ्चकम् ॥ १९१ ॥
ततोऽर्क युग्मान्तरवद्धर्धन्ते प्रतिमण्डलम् । योजनानि पञ्च पञ्चत्रिंशदंशाश्च विस्तृतौ ॥ १९२ ॥
ततस्तेषां परिक्षेपा, ज्ञेया व्यासानुसारतः । स पञ्चत्रिंशदंशस्य, योजनपञ्चकस्य वा ॥ १९३ ॥
परिक्षेपः पृथक्कार्य, ईदृग्रूपः स जायते । साधिकाष्टात्रिंशदंशयुक् सप्तदशयोजनी ॥ १९४ ॥
अष्टादश योजनानि, परन्तु व्यवहारतः । संपूर्णानि विवक्ष्यन्ते, ततोऽष्टादशयोजनीम् ॥ १९५ ॥
प्राच्यप्राच्यमण्डलस्य, परिक्षेपे नियोजयेत् । ततोऽग्याग्र्यमण्डलस्य, परिक्षेपमितिर्भवेत् ॥ १९६ ॥
एवं वृद्धिः परिक्षेपे, यावच्चरममण्डलम् । ततो यथा वृद्धि हानिरासर्वान्तरमण्डलम् ॥ १९७ ॥
एवं च परिधिः सर्वान्तरानन्तरमण्डले । लक्षत्रयं पञ्चदशसहस्राः सप्तयुक्शतम् ॥ १९८ ॥
तार्तीयिके मण्डले च, सर्वाभ्यन्तरमण्डलात् । लक्षास्तिस्रः पञ्चदश, सहस्रास्तत्त्वयुक्शतम् ॥ १९९ ॥
लक्षास्तिस्रोऽष्टादशैव, सहस्रास्त्रिशती तथा । युक्तोनैः पञ्चदशभिः, सर्वान्त्ये परिधिर्भवेत् ॥ २०० ॥

तथाहुः श्रीमलयगिरिपादाः क्षेत्रविचारबृहद्वृत्तौ ॥ एवं मण्डले मण्डले आयामविष्कम्भयोः पञ्च पञ्च योजनानि पञ्चत्रिंशदेकषष्टिभागाधिकानि परिरय अष्टादश अष्टादश योजनानि परिवर्धयता तावद्वक्तव्यं यावत्सर्वबाह्यमण्डलं एकं योजनशतसहस्र षट् शतानि षष्ट्यधिकानि आयाम विष्कम्भाभ्यां त्रीणि योजनशतसहस्राणि अष्टादश सहस्राणि त्रीणि शतानि पञ्चदशोत्तराणि किञ्चिदूनानि परिरये इति । अत्र च यद्यपि प्रतिपरिक्षेपमष्टादशाऽष्टादशवृद्धौ त्र्यशीत्यधिक-शतस्याष्टादशभिर्गुणने चतुर्नवत्यधिकानि द्वात्रिंशच्छतानि भवन्ति एतेषां च सैकोननवतिपञ्चदश-सहस्राधिकलक्षत्रयरूपप्रथममण्डलपरिक्षेपेण सह योगे सर्वबाह्यमण्डलपरिरयस्तिस्रो लक्षा अष्टादश सहस्रा त्रिशती त्र्यशीत्युत्तरा भवन्ति । परन्तु प्रागुक्तानि सप्तदशयोजनानि साधिकयोजन-सत्काष्टात्रिंशदेकभागाधिकानि प्रतिपरिरयंवृद्धिरिति विभाव्यैव न्यूनपञ्चदशाधिक-शतत्रय-युक्ताष्टादशसहस्राधिकलक्षत्रयरूपः सर्वबाह्यमण्डलपरिधिरुक्त इति सम्भाव्यते । यद्यप्यत्रापि उपरितनं शतत्रयं चतुर्दशोत्तरमेव भवति तथापि उपरितनानां अष्टात्रिंशतो भागानां साधिकत्वात् न्यूनानि पञ्चदशैव विवक्षितानीति सम्यग्विभावनीयं गणितज्ञैः ॥

एवं कृता मण्डलानां, परिक्षेपप्ररूपणा । गतिं प्रतिमुहूर्त्तं च, ब्रूमहे प्रतिमण्डलम् ॥ २०१ ॥
एकैकं मण्डलं ह्येकमार्त्तण्डेन समाप्यते । द्वाभ्यां किलाहोरात्राभ्यां, मुहूर्त्ताः षष्टिरेतयोः ॥ २०२ ॥

ततः षष्ट्या विभज्यन्ते, परिक्षेपाः स्वकस्वकाः । एवं सर्वमण्डलानां, मुहूर्त्तगतिराप्यते ॥ २०३ ॥
एवं च–संक्रम्य चरतः सूर्यौ, सर्वान्तर्मण्डले यदा । तदा प्रत्येकमेकैकमुहूर्त्तेऽसौ गतिस्तयोः ॥ २०४ ॥
नूनं पञ्च सहस्राणि, योजनानां शतद्वयम् । एकपञ्चाशमेकोनत्रिंशदंशाश्च षष्टिजाः ॥ २०५ ॥
द्वितीयादिमण्डलेष्वप्येवं परिरयैः स्वकैः । मुहूर्त्तगतिरानेया, षष्ट्या भक्तैर्विवस्वतोः ॥ २०६ ॥
यद्वा प्रतिपरिक्षेपं, योक्ताष्टादशयोजनी । वृद्धिः षष्ट्या विभक्तुं तामूर्ध्वाधस्तद्द्वयं न्यसेत् ॥ २०७ ॥
राशिः षष्टेर्न दत्तेऽशं, तत्राष्टादशलक्षणः । ततोऽष्टादश षष्टिघ्नाः, स्युः सहस्रमशीतियुक् ॥ २०८ ॥
तेषां षष्ट्या हृते भागे, लब्धा अष्टादश स्फुटम् । एतावन्तः षष्टिभागाः, किञ्चिदूनास्तु निश्चयात् ॥ २०९ ॥
प्राच्यमण्डलमुहूर्त्तगतौ क्षिप्यन्त इत्यतः । यथोक्तं तत्परिमाणं, भवेदेवं यथोत्तरम् ॥ २१० ॥
एतद्याम्यायने सौम्यायने तु प्रतिमण्डलम् । अष्टादशांशाः क्षीयन्ते, मुहूर्त्तीयगतौ रवेः ॥ २११ ॥
एवं च, सर्वबाह्ये योजनानां, पञ्चोत्तरं शतत्रयम् । सहस्राणि पञ्च पञ्चदशभागाश्च षष्टिजाः ॥ २१२ ॥
सर्वान्तिमार्वाचीने तु, त्रिंशती चतुरुत्तरा । सहस्राणि पञ्च सप्तपञ्चाशत् षष्टिजा लवाः ॥ २१३ ॥
मुहूर्त्तगतिरित्येवं, विवस्वतोर्निरूपिता । अथ प्रपञ्च्यते दृष्टिपथप्राप्तिप्ररूपणा ॥ २१४ ॥
मुहूर्त्तगतिरर्कस्य, या विवक्षितमण्डले । यच्च तस्मिन् दिनमानं, द्वयमेतत् पृथग् न्यसेत् ॥ २१५ ॥
मुहूर्त्तगतिरेषाऽथ, दिनमानेन गुण्यते । एकार्कस्यः तदैकाहः, प्रकाश्यं क्षेत्रमाप्यते ॥ २१६ ॥
यावच्चैकाहःप्रकाश्यं क्षेत्रमेकत्रमण्डले । तदर्द्धेन मनुष्याणां, भवेत् दृग्गोचरो रविः ॥ २१७ ॥
अयं भावः, यावत्क्षेत्रं दिनार्द्धेन, भानुर्भावयितुं क्षमः । दृश्यते तावतः क्षेत्रात्, मण्डलेष्वखिलेष्वपि ॥ २१८ ॥
यथा पञ्च सहस्राणि, योजनानां शतद्वयम् । एकपञ्चाशमेकोनत्रिंशदंशाश्च षष्टिजाः ॥ २१९ ॥
मुहूर्त्तगतिरेषा या, प्रोक्ताऽभ्यन्तरमण्डले । गुण्यते सा दिनार्द्धेन, मुहूर्त्तनवकात्मना ॥ २२० ॥
सप्त चत्वारिंशदेवं, सहस्राणि शतद्वयम् । त्रिषष्टिश्च योजनानां, षष्ट्यंशा एकविंशतिः ॥ २२१ ॥
उद्गच्छन्नियतः क्षेत्रात्, भानुरस्तमयन्नपि । इहत्यैः दृश्यते लोकैः, सर्वाभ्यन्तरमण्डले ॥ २२२ ॥
ततश्चैतत् द्विगुणितमुदयास्तान्तरं भवेत् । प्रकाशक्षेत्रमप्येतावदेवोभयतोऽन्वितम् ॥ २२३ ॥
तथाहुः- रविणो उदयत्थंतर, चउणवइसहस्स पणसय छव्विसा । बायालसट्ठिभागा, कक्कडसंकंतिदियहंमि
[बृहत्संग्रहणी गा. ११८]
एवं च, सहस्रैः सप्तचत्वारिंशता द्वितीयमण्डले । सैकोनाशीतिनादृश्यो, योजनानां शतेन च ॥ २२४ ॥
सप्तपञ्चाशता षष्टिभागैरेकस्य तस्य च । अंशैरेकोनविंशत्या, विभक्तस्यैकषष्टिधा ॥ २२५ ॥
एवं च, त्र्यशीतिर्योजनान्यंशास्त्रयोविंशतिरेव च । षष्टिभक्तयोजनस्यैकस्य षष्टिलवस्य च ॥ २२६ ॥
एकषष्टिविभक्तस्य, द्विचत्वारिंशदंशकाः । हानिरत्रेयमाद्यात् स्यात्, पुरो हानौ ध्रुवोऽप्ययम् ॥ २२७ ॥
किं च, सर्वान्तर्मण्डलात्तार्तीयीकं यत्किल मण्डलम् । तदेवाद्यं प्रकल्प्याग्रे, येषु येषु विभाव्यते ॥ २२८ ॥

दृग्मार्गस्तरणेस्तत्र, तत्रैकद्व्यादिसंख्यया । हत्वा षट्त्रिंशतं भागं, भागांस्तान् योजयेत् ध्रुवे ॥ २२९ ॥
ततश्च, पूर्वमण्डलदृग्मार्गप्राप्तिस्तेन विवर्जिता । खरांशोः दृक्पथप्राप्तिपानं स्यादिष्टमण्डले ॥ २३० ॥
यथान्तर्मण्डलात्तार्तीयीके तरणिमण्डले । षट्त्रिंशदेकेन गुण्या, स्थितौ राशिस्तथैव सः ॥ २३१ ॥
ततः षट्त्रिंशदेवैते, त्र्यशीत्युपरिवर्तिषु । योजिता भागभागेषु, जातास्ते चाष्टसप्ततिः ॥ २३२ ॥
एकषष्ट्या लवैश्चैकः, षष्टिभागो भवेत् स च । योज्यते षष्टिभागेषु, शेषाः सप्तदश स्थिताः ॥ २३३ ॥
एवं च, त्र्यशीतियोजनान्यंशा, षष्टिजाता जिनैर्मताः । सप्तदशैकषष्ट्यंशा, शोध्यराशिः भवत्यसौ ॥ २३४ ॥
अनेन राशिना हीने, द्वितीयमण्डलाश्रिते । दृग्गोचरे तृतीये स्यात्, मण्डले दृक्पथो रवेः ॥ २३५ ॥
एवं च, सहस्रैः सप्तचत्वारिंशता षण्णवतिं श्रितैः । योजनानां षष्टिभागैस्त्रयस्त्रिंशन्मितैस्तथा ॥ २३६ ॥
एकस्य षष्टिभागस्य, विभक्तस्यैकषष्टिधा । भागद्वयेन चोष्णांशुर्दृश्यस्तृतीयमण्डले ॥ २३७ ॥
एवमुक्तप्रकारेण, बहिर्निष्क्रमतो रवेः । दृक्पथप्राप्तिविषयात्, हीयते प्रतिमण्डलम् ॥ २३८ ॥
त्र्यशीतिः साधिका क्वापि, चतुरशीतिरेव च । साधिका सा क्वापि पञ्चाशीतिः साप्यधिका क्वचित् ॥ २३९ ॥
योजनानां हानिरेवं, भाव्या गणितपण्डितैः । पूर्वोक्तगणिताम्नायात्, यावत्सर्वान्त्यमण्डलम् ॥ २४० ॥
तत्र चैकत्रिंशतैव सहस्रैरष्टभिः शतैः । एकत्रिंशैस्त्रिंशता च, षष्टयंशैर्दृश्यते रविः ॥ २४१ ॥

यद्यप्यान्तरतृतीयमण्डलापेक्षया द्व्यशीत्यधिकशततमेऽस्मिन् मण्डले पूर्वोक्तकरणप्रक्रियया शोध्यराशिः पञ्चाशीतिर्योजनानि एकादश षष्टिभागा एकस्य षष्टिभागस्य सत्काः षडेकषष्टिभागा (८५-११/६०) एवंरूपो जायते तथापि पूर्वोक्ताः षट्त्रिंशद्भागभागाः कलान्यूना अपि व्यवहारतः पूर्णा विवक्षिताः । तस्मिंश्च कलान्यूनत्वे अन्त्यमण्डले एकत्र पिण्डिते सति अष्टषष्टिरेकषष्टिभागाः त्रुट्यन्ति तदपसारेण पञ्चाशीतिर्योजनानि नव षष्टिभागा योजनस्यैकस्य षष्टिभागस्य सत्का षष्टिरेकषष्टिभागा जायन्ते ८५ ९/६० + (१/६० ६०/६१) । अयं च शोध्यराशिः सर्वबाह्यावर्वाचीनमण्डलगतदृक्पथप्राप्तिपरिमाणात् यदि शोध्यते तदा यथोक्तं सर्वान्त्यमण्डले दृक्पथप्राप्तिपरिमाणं भवतीति ध्येयम् ॥

पूर्वोक्तध्रुवकाद्युपपत्तिस्त्वत्रोपाध्यायश्रीशान्तिचन्द्रोपज्ञजम्बूद्वीपप्रज्ञप्तिसूत्रवृत्तेरवसेया । ग्रन्थगौरवभयान्नात्रोच्यते । इति ज्ञेयम् ॥

यद्वा, पञ्चयोजनसहस्राः, पञ्चोत्तरं शतत्रयम् । षष्टिभागाः पञ्चदश, मुहूर्त्तगतिरत्र हि ॥ २४२ ॥
षण्मुहूर्त्तात्मना चैषा, दिवसार्धेन गुण्यते । ततोऽप्येतत् दृक्पथाप्तिमानं सर्वान्त्यमण्डले ॥ २४३ ॥
सर्वबाह्यावर्वाक्तने तु, चतुरशीतिवर्जितैः । द्वात्रिंशता योजनानां, सहस्रैर्दृश्यते रविः ॥ २४४ ॥
अंशैश्चैकोनचत्वारिंशता षष्टिसमुद्भवैः । एकस्य षष्टिभागस्य, षष्टयांशैश्चैकषष्टिजैः ॥ २४५ ॥

॥ ३१९१६–३९/६०–(१/६१ ६०/६१) योजन ॥

पञ्चाशीतिर्योजनानि, नवभागाश्च षष्टिजाः । षष्ट्यंशस्यैकस्य भागाः, षष्टिस्तथैकषष्टिजाः ॥ २४६ ॥
सर्वान्त्यमण्डलादर्वाचीनद्वितीयमण्डले । एषा वृद्धिस्ततो वृद्धौ, पुरतो ध्रुवकोऽप्यसौ ॥ २४७ ॥
सर्वबाह्यात्तृतीयादिमण्डलेष्वथ दृक्पथम् । ज्ञातुं गुणितया षट्त्रिंशतैकद्व्यादिसंख्यया ॥ २४८ ॥
ध्रुवांके न्यूनितेऽसौ स्यात्, क्षेप्यराशिरनेन च । प्राच्यमण्डलदृग्मार्गो, युक्तः स्यादिष्टमण्डले ॥ २४९ ॥
तथाहि, तृतीये मण्डले बाह्यात्, षट्त्रिंशदेकताडिता । ध्रुवकान्तदवस्थैव, विशोध्यते ततः स्थितम् ॥ २५० ॥
पञ्चाशीतिः योजनानि, षष्टिजाश्च लवा नव । षट्यंशस्यैकस्य लवाश्चतुर्विंशतिरेव च ॥ २५१ ॥
द्वितीयमण्डलस्याक्षिगोचरोऽनेन संयुते । तृतीयमण्डले दृष्टिपथमानं भवेदिदम् ॥ २५२ ॥
योजनानां सहस्राः स्युः, द्वात्रिंशत्सैकयोजनाः । भागाः एकोनपञ्चाशद्योजनस्य च षष्टिजाः ॥ २५३ ॥
एकषष्टिविभक्तस्यैकस्य षष्टिलवस्य च । त्रयोविंशतिरेवांशा, एवं सर्वत्र भावना ॥ २५४ ॥
एवमन्तः प्रविशतः, सूर्यस्य बाह्यमण्डलात् । पूर्वोक्तरीत्या दृग्मार्गप्रमाणे वर्द्धिते रवेः ॥ २५५ ॥
पञ्चाशीतिः सातिरेका, संपूर्णा सैव कुत्रचित् । साधिका चतुरशीतिः, क्वापि सा केवला क्वचित् ॥ २५६ ॥
त्र्यशीतिः साधिका क्वापि, योजनानां यथायथम् । सर्वान्तर्मण्डलं यावद्, भाव्यं तच्च प्रदर्शितम् ॥ २५७ ॥

यद्यपि बाह्यतृतीयमण्डलात् द्व्यशीत्यधिकशततमे सर्वाभ्यन्तरमण्डले यथोक्तकरणेन त्र्यशीतियोजनानि द्वाविंशतिः षष्टिभागा योजनस्यैकस्य षष्टिभागस्य सत्काः पञ्चत्रिंशदेकषष्टिभागाः ८६ २२/६० + १/६० ३५/६१) एवंरूपः क्षेप्यराशिर्भवति तथापि येऽत्र ध्रुवकात् षट्त्रिंशत् यथोक्तरूपाः शोधिताः ते कलया न्यूना अपि पूर्णा एव विवक्षितास्ततः किञ्चिदधिकं निर्गतम् तच्चाधिकं सर्वाभ्यन्तरमण्डले एकत्र पिण्डितं सदष्टषष्टिरेकषष्टिभागा भवन्ति । ततस्ते भूयः क्षेप्यराशौ क्षिप्यन्ते तत जातः क्षेप्यराशिः ८६ २३/६० + (१/६० ४२/६१) । अस्मिंश्च राशौ सर्वाभ्यन्तरानन्तरद्वितीयमण्डलगतदृक्पथपरिमाणे योजिते सति यथोक्तं सर्वाभ्यन्तरमण्डले दृक्पथपरिमाणं भवतीति ज्ञेयम् ॥

कथं चैव योजनानां, सहस्रैः दूरगावपि । आसन्नाविव दृश्येते, तरणी उदयोस्तयोः? ॥ २५८ ॥
मध्याह्ने तु योजनानामष्टशत्यां स्थितावपि । दूरस्थाविव दृश्येते, कथमुष्णत्विषौ ननु ॥ २५९ ॥
अत्रोच्यते, दूरत्वेन प्रतिघातात्, स्वबिम्बमहसां रवी । आसन्नौ सुखदृश्यत्वात्, ज्ञायेते उदयोस्तयोः ॥ २६० ॥
मध्याह्ने चासन्नतया, प्रसर्पत्तीव्ररश्मिभिः । ज्ञायेते दुर्निरीक्ष्यत्वादासन्नावपि दूरगौ ॥ २६१ ॥

तथा चागमः लेस्सापडिघाएणं उग्गमणमुहुत्तंसि दूरे अ मूले अ दीसंति ॥ लेसाहितावेणं मज्झंति अमुहुत्तंसि मूले अ दूरे अ दीसंति, लेसापडिघाएणं अत्थमण मुहुत्तं दूरे अ मूले अ दीसंति । अत्र दूरे चेति दृष्टृस्थानापेक्षया, विप्रकृष्टे मूले चेति दृष्टृप्रतीत्यपेक्षया आसन्ने इति भगवतीसूत्रशतक ८ उद्देश ८ ॥

दूरत्वादेव भूलग्नाविव तावुदयोस्तयोः । नैकट्यादेव दृश्येते, मध्याह्ने खाग्रगाविव ॥ २६२ ॥
उच्चत्वं तु सर्वदाऽपि, समानमेव सूर्ययोः । योजनानां ह्यष्टशत्या, नार्वाक् न परतश्च तौ ॥ २६३ ॥
एवं दृष्टिपथप्राप्तिप्ररूपणा प्रपञ्चिता । अथ प्ररूपणा भान्वोः, कुर्मोऽर्धमण्डलस्थितेः ॥ २६४ ॥
एकं मण्डलमेकेनाहोरात्रेण समाप्यते । द्वाभ्यामभिमुखस्थाभ्यां, रविभ्यां प्रतिवादिवत् ॥ २६५ ॥
मेरोर्दक्षिणपूर्वस्यां, यदा प्रथममेव हि । एकः सूर्यः प्रविशति, सर्वाभ्यन्तरमण्डलम् ॥ २६६ ॥
पश्चिमोत्तरदिग्भागे, तदैवान्योऽपि भास्करः । समकालं स्पर्द्धयेव, सर्वान्तर्मण्डलं विशेत् ॥ २६७ ॥
इत्थं ताभ्यां प्रविशद्भ्यां, व्याप्तं यत्प्रथमक्षणे । क्षेत्रं व्यपेक्षया तस्य, कल्प्यमान्तरमण्डलम् ॥ २६८ ॥
प्रथमान्तु क्षणादूर्ध्वं, विवस्वतौ शनैः शनैः । क्रमादपसरन्तौ च, सर्वाभ्यन्तरमण्डलात् ॥ २६९ ॥
अनन्तरबहिर्भाविमण्डलाभिमुखं किल । सर्पन्तौ चरतश्चारं, ततश्च प्रथमक्षणे ॥ २७० ॥
स्पृष्टं क्षेत्रं यदेताभ्यां, तदपेक्ष्य प्रकल्पितम् । ज्ञेयं मण्डलतुल्यत्वात्, मण्डलं न तु तात्त्विकम् ॥ २७१ ॥

तथाहुः, रविदुगभमणवसाओ, निप्फज्जइ मंडलं इहं एगम् । तं पुण मंडलसरिसं, ति मंडलं वुच्चइ तहा हि ॥ गिरिनिसिढनीलवंतेसु, उग्गयाणं रवीण कङ्कुमि । पढमाओ चेव समयाओ, सरणेणं जओ भमणम् ॥ तो नो निच्छयरूवं, निप्पज्जइ मंडलं दिणयराणम् । चंदाण वि एवंचिय, निच्छयओ मंडलाभावो ॥

मेरोर्दक्षिणपूर्वस्यामेकोऽभ्यन्तरमण्डले । संक्रम्य याम्यदिग्भागं, यदा मेरोः प्रकाशयेत् ॥ २७२ ॥
तदापरोत्तरदिशि, प्राप्तोऽभ्यन्तरमण्डलम् । अन्यो मेरोरुदग्भागं, प्रकाशयति भानुमान् ॥ २७३ ॥
दक्षिणोत्तरयोर्मेरोः, सर्वोत्कृष्टं दिनं तदा । रात्रिः सर्वजघन्यैषोऽहोरात्रो वत्सरेऽन्तिमः ॥ २७४ ॥
अहोरात्रे नवाब्दस्य, चरतः प्रथमे यदि । द्वितीयस्मिन् मण्डलेऽर्कौ, निष्क्रम्यान्तरमण्डलात् ॥ २७५ ॥
दाक्षिणात्यस्तदा सूर्यः, सर्वान्तर्मण्डलाश्रितात् । विनिर्गत्य दक्षिणार्धात्, वायव्यां सुरभूभृतः ॥ २७६ ॥
द्वितीयस्य मण्डलस्योत्तरार्द्धं आश्रितश्चरन् । मेरोरुत्तरदिग्भागं, प्रकाशयति दीपवत् ॥ २७७ ॥
औत्तराहः पतंगस्तु, सर्वान्तर्मण्डलाश्रितात् । औत्तरार्धात् विनिर्गत्य, मेरोर्दक्षिणपूर्वतः ॥ २७८ ॥
द्वितीयस्य मण्डलस्य, दक्षिणार्धमुपाश्रितः । मेरोर्दक्षिणदिग्भागं, प्रकाशयति लीलया ॥ २७९ ॥
क्षेत्रमाभ्यां च यत्स्पृष्टं, तस्याहुः प्रथमक्षणे । द्वितीयं मण्डलं बुद्ध्या, कल्प्यते तदपेक्षया ॥ २८० ॥
एवं च, एकैकस्मिन्नहोरात्रे, एकैकमर्धमण्डलम् । संक्रम्य संचरन्तौ तावन्योन्यव्यतिहारतः ॥ २८१ ॥
प्रत्येकं द्वौ मुहूर्त्तैकषष्टिभागौ दिने दिने । क्षपयन्तौ सर्वबाह्यमण्डलावधिगच्छतः ॥ २८२ ॥
तस्मात्पुनः सर्वबाह्यार्वाचीनमण्डलस्थितात् । दक्षिणाद्र्धात् विनिर्गत्य, सर्वान्त्यमण्डलाश्रितम् ॥ २८३ ॥
उत्तरार्द्धं स विशति, यः प्रकाशितवान् पुरा । रविर्मेरोर्याम्यभागं, सर्वाभ्यन्तरमण्डले ॥ २८४ ॥

यस्तु तत्रोत्तरभागमदिदीपद्रविः पुरा । स सर्वबाह्यावाचीनमण्डलस्योत्तरादर्धतः ॥ २८५ ॥
निर्गत्य दीपयेद्याम्यमर्द्धं सर्वान्त्यमण्डले । आद्यं संवत्सरस्यार्द्धमेवमाभ्यां समाप्यते ॥ २८६ ॥
ततस्तौ द्वावपि रवी, सौम्यायनादिमक्षणे । अनन्तरं सर्वबाह्यात्, द्वितीयं मण्डलं श्रितौ ॥ २८७ ॥
उत्तरार्द्धं योऽदिदीपत्, सर्वान्त्यमण्डलाश्रितम् । दीपयेत् सोऽत्र याम्यादर्धमुत्तरादर्धं ततः परम् ॥ २८८ ॥
एवं पुनर्मण्डलादर्धमेकैकं व्यतिहारतः । एकैकस्मिन्नहोरात्रे, आक्रामन्तौ दिवाकरौ ॥ २८९ ॥
प्रत्येकं द्वौ मुहूर्त्तैकषष्टिभागौ दिने दिने । वर्धयन्तौ क्रमात् प्राप्तौ, सर्वाभ्यन्तरमण्डले ॥ २९० ॥
मण्डलेऽस्मिन्नहोरात्रे, गताब्दस्यान्तिमे रवी । यथाऽदिदीपतामर्द्धं, पुनर्दीपयतस्तथा ॥ २९१ ॥
इत्यर्द्धमण्डलस्थितिः ।
सूर्यवक्तव्यता चैवं, यथाम्नायं प्रपञ्चिता । एवं प्रपञ्चयामोऽथ, चन्द्रचारप्ररूपणाम् ॥ २९२ ॥
आदौ क्षेत्रं मण्डलानां, तदबाधा तदन्तरम् । तच्चारश्च वृद्धिहानिप्रतिभासप्ररूपणा ॥ २९३ ॥
अत्रानुयोगद्वाराणि, पञ्चाहुस्तत्त्ववेदिनः । तत्रादौ मण्डलक्षेत्रपरिमाणं प्रतन्यते ॥ २९४ ॥
मण्डलानि पञ्चदश, चन्द्रस्य सर्वसंख्यया ॥ षट्पञ्चाशद्यौजनैकषष्टिभागपृथून्यतः ॥ २९५ ॥
गुणिताः पञ्चदशभिः, षट्पञ्चाशात् भवन्ति ते । अष्टौ शतानि चत्वारिंशान्येकषष्टिजा लवाः ॥ २९६ ॥
एकषष्ट्या विभज्यन्ते, योजनानयनाय ते । त्रयोदश योजनानि, लब्धान्येतत्तु शिष्यते ॥ २९७ ॥
सप्तचत्वारिंशदंशा, योजनस्यैकषष्टिजाः । मण्डलानां पुनरेषामन्तराणि चतुर्दश ॥ २९८ ॥
पञ्चत्रिंशद्योजनानि, त्रिंशत्तथैकषष्टिजाः । लवा एकस्यैकषष्ट्यंशस्य क्षुण्णस्य सप्तधा ॥ २९९ ॥
भागाश्चत्वार एकैकमेतावदन्तरं भवेत् । शीतद्युतेर्मण्डलेषु, तत्रोपपत्तिरुच्यते ॥ ३०० ॥
चन्द्रमण्डलविष्कम्भे, प्राग्वत्पञ्चदशाहते । शोधिते मण्डलक्षेत्रात्, योजनानां चतुःशती ॥ ३०१ ॥
शेषा सप्तनवत्याढ्या, ह्येकोऽशश्चैकषष्टिजः । विभज्यन्ते च ते चतुर्दशभिर्मण्डलान्तरैः ॥ ३०२ ॥
पञ्चत्रिंशद्योजनानि, लब्धान्युद्धरिते (सप्त) हते । एकषष्ट्यैकषष्ट्यंशेनैकेन च समन्विते ॥ ३०३ ॥
अष्टाविंशा चतुःशत्येतस्याश्च भजने सति । चतुर्दशभिराप्यन्ते, त्रिंशदंशा पुरोदिताः ॥ ३०४ ॥
शेषा अष्टौ स्थिता भाज्या, भाजकाश्च चतुर्दश । भागाप्राप्त्यापवर्त्त्यते, ततो द्वाभ्यामुभावपि ॥ ३०५ ॥
भागभागास्ततो लब्धाश्चत्वारः सार्पिका इति । एतच्चतुर्दशगुणं, कर्तव्यं प्रथमं त्विह ॥ ३०६ ॥
पञ्चत्रिंशद्योजनानि, चतुर्दशगुणानि वै । शतान्यभवंश्चत्वारि, नवत्याढ्यानि येऽपि च ॥ ३०७ ॥
त्रिंशदेकषष्टिभागाश्चतुर्दशगुणीकृताः । जाताः शतानि चत्वारि, विंशत्याढ्यानि तेऽप्यथ ॥ ३०८ ॥
एकषष्ट्या विभज्यन्ते, योजनप्राप्तये ततः । लब्धा षट्योजनी शेषाश्चतुःपञ्चाशदंशकाः ॥ ३०९ ॥
सप्तभक्तस्यैकषष्टिभागस्य या चतुर्लवी । चतुर्दशगुणा सापि, षट्पञ्चाशत् भवन्त्यमी ॥ ३१० ॥

अष्टावेकषष्टिभागा, जायन्ते सप्तभाजिताः । द्वाषष्टिरेते स्युः प्राच्यचतुःपञ्चाशता युताः ॥ ३११ ॥
एकषष्ट्यैषां च भागे, प्राप्तं सैकांशयोजनम् । योज्यतेऽशक्षांशराशौ, योजनं योजनेषु च ॥ ३१२ ॥
एवं च । योजनानां पञ्चशती, दशोत्तरैकषष्टिजाः । अष्टचत्वारिंशदंशाः, मण्डलक्षेत्रसंमितिः ॥ ३१३ ॥
कृतैवं मण्डलक्षेत्र-परिमाण प्ररूपणा । संख्याप्ररूपणा त्वेषामाहुः पञ्चदशात्मिकाम् ॥ ३१४ ॥
तत्र पञ्चमण्डलानि, जम्बूद्वीपे जिना जगुः । शेषाणि तु दशाम्भोधौ, मण्डलान्यमृतद्युतेः ॥ ३१५ ॥
अबाधा तु त्रिधा प्राग्वत्, तत्राद्या मेर्वपेक्षया । ओघतो मण्डलक्षेत्राबाधाऽन्या प्रतिमण्डलम् ॥ ३१६ ॥
तृतीया तु मिथोऽबाधा, शशिनोः प्रतिमण्डलम् । तत्रौघतोऽर्कवत् मेरोर्मण्डलक्षेत्रमीरितम् ॥ ३१७ ॥
चतुश्चत्वारिंशतैव, सहस्रैरष्टभिः शतैः । विंशत्याढ्यैर्योजनानामियतैवाद्यमण्डलम् ॥ ३१८ ॥
षट्त्रिंशद्योजनान्येकषष्ट्यंशाः पञ्चविंशतिः । एकस्यैकषष्टिजस्य, चत्वारः सप्तजाः लवाः ॥ ३१९ ॥
वर्धतेन्तरमेतावत्, प्रतिमण्डलमादिमात् । सर्वान्त्यमण्डलं यावत्, ततो द्वितीयमण्डलम् ॥ ३२० ॥
सत्सहस्रैश्चतुश्चत्वारिंशताऽचाष्टभिः शतैः । षट्पञ्चाशैरेकषष्टिभागैस्तत्त्वमितैस्तथा ॥ ३२१ ॥
एकस्यैकषष्टिजस्य, चतुर्भिः सप्तजैर्लवैः । स्यात् मन्दरादन्तरितमेकतोपरतोऽपि च ॥ ३२२ ॥
सर्वबाह्यमण्डलं तु, स्थितं दूरे सुमेरुतः । सहस्रैः पञ्चचत्वारिंशता त्रिंशैस्त्रिभिः शतैः ॥ ३२३ ॥
योजनानां योजनैकषष्टिभागाष्टकोज्झितैः । अथो मिथोऽन्तरं वक्ष्ये, शशिनोः प्रतिमण्डलम् ॥ ३२४ ॥
इन्द्रोर्मिथोर्कवत्सर्वान्तरङ्गमण्डलेऽन्तरम् । सहस्रा नवनवतिश्चत्वारिंशा च षट्शती ॥ ३२५ ॥
इतश्च द्वासप्ततियोजनानामेकपञ्चाशदंशकाः । एकषष्टिभवाः सप्तभक्तस्यास्य लवोऽपि च ॥ ३२६ ॥
एतावदन्तरं ग्लावौः, वर्द्धते प्रतिमण्डलम् । बहिर्निष्क्रमतोरन्तर्विशतोः परिहीयते ॥ ३२७ ॥
एतच्च यत्पुरा प्रोक्तं, प्रतिमण्डलमेकतः । अन्तरं तद् द्विगुणितं, भवेत्पार्श्वद्वयोद्भवम् ॥ ३२८ ॥
एवं च सहस्रा नवनवतिर्योजनानां शतानि च । द्वादशोपेतानि सप्त, विभागाश्चैकषष्टिजाः ॥ ३२९ ॥
एक पञ्चाशदेकोंश, एकषष्टिलवस्य च । सप्तभागीकृतस्यैतत्, द्वितीयमण्डलेऽन्तरम् ॥ ३३० ॥
सर्वान्तिमेऽन्तरं लक्षं, सषष्टीनि शतानि षट् । योजानानामेकषष्टिभागैः षोडशभिर्विना ॥ ३३१ ॥
अष्टांशोरुव्यासमिह, मण्डलं भानुमण्डलात् । अष्टाष्टार्वाक्क्षेत्रभागाराभ्यां रुद्धास्ततोऽधिकाः ॥ ३३२ ॥
ततः षोडशभिर्भागैर्न्यूनं परममन्तरम् । सर्वान्त्यमण्डले ग्लावोरर्कयोः परमान्तरात् ॥ ३३३ ॥
एवं कृता चन्द्रमसोर्मिथोऽबाधाप्ररूपणा । साम्प्रतं मण्डलचारप्ररूपणा प्रपञ्च्यते ॥ ३३४ ॥
परिक्षेपा मण्डलानां, मुहूर्त्तगतिरत्र च । मण्डलार्धमण्डलयोः, कालसंख्याप्ररूपणा ॥ ३३५ ॥
साधारणासाधारणमण्डलानां प्ररू पणा । एवं चत्वार्यनुयोगद्वाराण्यत्र जिना जगुः ॥ ३३६ ॥
विष्कम्भायामतस्तत्र, सर्वाभ्यन्तरमण्डलम् । सहस्रा नवनवतिश्चत्वारिंशा च षट्शती ॥ ३३७ ॥

तिस्रो लक्षाः पञ्चदश, सहस्रा योजनान्यथ । नवाशीतिः परिक्षेपोऽधिकोऽभ्यन्तरमण्डले ॥ ३३८ ॥
भावना तूभयोरपि सूर्याभ्यन्तरमण्डलवत् ॥
द्वितीयमण्डलव्यासं, विभाव्योक्तानुसारतः । भावनीयः परिक्षेपः, स चायमुपपद्यते ॥ ३३९ ॥
तिस्रो लक्षाः पञ्चदश, सहस्राणि शतत्रयम् । योजनान्येकोनविंशं, साधिकं किञ्चनाथवा ॥ ३४० ॥
पूर्वमण्डलविष्कम्भात्, परमण्डलविस्तृतौ । द्वासप्ततिर्योजनानि, वृद्धिः प्राक् प्रत्यपादि या ॥ ३४१ ॥
तस्याः पृथक् परिक्षेपः, कर्त्तव्यः कोविदेन्दुना । द्वे शते त्रिंशदधिके, योजनानां भवेदसौ ॥ ३४२ ॥
पूर्वपूर्वपरिक्षेपे, यद्ययं क्षिप्यते तदा । परापरपरिक्षेपा, भावनीया यथोत्तरम् ॥ ३४३ ॥
इयमिन्दुमण्डलानां, परिक्षेपप्ररूपणा । मुहूर्त्तगतिमाख्यामि, संप्रति प्रतिमण्डलम् ॥ ३४४ ॥
उपसंक्रान्तयोरिन्द्योः, सर्वाभ्यन्तरमण्डले । पञ्च पञ्च सहस्राणि, योजनानां त्रिसप्ततिः ॥ ३४५ ॥
सहस्रैस्त्रयोदशभिः, सतत्त्वैः सप्तभिः शतैः । छिन्नस्य योजनस्यांशशताश्च सप्तसप्ततिः ॥ ५४६ ॥
चतुश्चत्वारिंशदाढ्या, मुहूर्त्तगतिरेषिका । जिज्ञास्यतेऽस्याश्चेत् बीजं, श्रूयतां तर्हि भावना ॥ ३४७ ॥
इहैकैकोऽप्यमृतांशुरेकैकमर्धमण्डलम् । एकेनाहोरात्रेणैकमुहूर्त्ताधिक्यशालिना ॥ ३४८ ॥
शताभ्यामेकविंशाभ्यां, द्वाभ्यां छिन्नस्य निश्चितम् । मुहूर्त्तस्यैकादशभिः, सार्धैर्भागैः प्रपूरयेत् ॥ ३४९ ॥
एवं शशी द्वितीयोऽपि, द्वितीयमर्धमण्डलम् । कालेनैतावतैव द्राक्, भ्रमणेन प्रपूरयेत् ॥ ३५० ॥
संपूर्णस्य मण्डलस्य, पूर्त्तिकालो यदेष्यते । अहोरात्रद्वयं द्वाभ्यां, मुहूर्त्ताभ्यां युतं तदा ॥ ३५१ ॥
एकविंशत्यधिकाभ्यां, शताभ्यां चूर्णितस्य च । त्रयोविंशतिरंशानां, मुहूर्त्तस्य विनिर्दिशेत् ॥ ३५२ ॥
मण्डले पूर्त्तिकालेऽत्र, प्रत्ययः केन चेदिति । त्रैराशिकेन तदपि, श्रूयतां यदि कौतुकम् ॥ ३५३ ॥
भानुर्लघुविमानत्वाच्छीघ्रगामितयापि च । षष्ट्या मुहूर्त्तैरेकैकं, मण्डलं परिपूरयेत् ॥ ३५४ ॥
तद्वैपरीत्या द्वाषष्ट्या, साग्रया तैर्विधुस्तु तत् । साष्टषष्टिः सप्तदशशती तानि युगे ततः ॥ ३५५ ॥
एकचन्द्रापेक्षयार्धमण्डलानि भवन्ति हि । तावन्त्येव च पूर्णानि, द्वयोरिन्द्योरपेक्षया ॥ ३५६ ॥
ततश्च साष्टषष्टिसप्तदशशतमानार्धमण्डलैः । युगान्तर्भाविभी रात्रिंदिवानां यदि लभ्यते ॥ ३५७ ॥
अष्टादशशती त्रिंशा, तदा ननु किमाप्यते । द्वाभ्यामर्धमण्डलाभ्यामिति राशित्रयं लिखेत् ॥ ३५८ ॥
अन्त्येन राशिना राशौ, मध्यमे गुणिते सति । जातः शतानि षट्त्रिंशत्, सषष्टीन्येष भज्यते ॥ ३५९ ॥
साष्टषष्टिसप्तदशशतात्मकाद्यराशिना । अहोरात्रद्वयं लब्धं, चतुर्विंशं शतं स्थितम् ॥ ३६० ॥
अहोरात्रस्य च त्रिंशन्मुहूर्त्ता इति ताडितम् । त्रिंशताभूत् विंशतीयुक्, सप्तत्रिंशच्छतात्मकम् ॥ ३६१ ॥
अस्मिन् साष्टषष्टिसप्तदशशत्या हृते द्वयम् । लब्धं मुहूर्त्तयोः शेषं, शतं चतुरशीतियुक् ॥ ३६२ ॥
भागाप्राप्ताऽपवर्त्यते, अष्टभिर्भाज्यभाजकौ । त्रयोविंशतिरेकोन्यश्चैकविंशं शतद्वयम् ॥ ३६३ ॥

एषा मुहूर्त्तद्वाषष्टिः, सवर्णनाय गुण्यते । एकविंशाभ्यां शताभ्यां, ये चोपरितना लवाः ॥ ३६४ ॥
त्रयोविंशतिरुक्ताः प्राक्, ते क्षिप्यन्ते भवेत्ततः । त्रयोदश सहस्राणि, सतत्त्वा सप्तशत्यपि ॥ ३६५ ॥
सर्वान्तर्मण्डलस्थस्य, परिधिर्यः पुरोदितः । एकविंशत्यधिकाभ्यां, शताभ्यां सोऽपि गुण्यते ॥ ३६६ ॥
जाताः षट् कोट्यः षण्णवतिर्लक्षाः स्वरूपतः । चतुस्त्रिंशत् सहस्राणि, षट्शत्येकोनसप्ततिः ॥ ३६७ ॥
सहस्रैस्त्रयोदशभिः, सतत्त्वैः सप्तभिः शतैः । एषां भागे हृते लब्धा, मुहूर्त्तगतिरैन्दवी ॥ ३६८ ॥
योजनानां सहस्राणि, पञ्चोपरि त्रिसप्ततिः । चतुश्चत्वारिंशान्यंशशतानि सप्तसप्ततिः ॥ ३६९ ॥
मुहुर्त्तगतिरित्येवं, भाव्येन्दोः प्रतिमण्डलम् । विभाज्योक्त भाजकेन, प्राग्वत् परिरयं निजम् ॥ ३७० ॥
मुहूर्त्तीयगतौ यद्वा, वर्धन्ते प्रतिमण्डलम् । त्रियोजनी पञ्चपञ्चाशांश्च षण्णवति शताः ॥ ३७१ ॥
भागा एकयोजनस्य, विभक्तस्य सहस्रकैः । त्रयोदशमितैः सप्तशत्या च पञ्चविंशया ॥ ३७२ ॥
अत्रोपपत्तिः,
योजनद्विशती त्रिंशा, या वृद्धिः प्रतिमण्डलम् । उक्ता परिरये गुण्या, सा द्विशत्येकविंशया ॥ ३७३ ॥
भक्ता त्रयोदशसहस्रादिना राशिना च सा । दत्ते त्रियोजनीं शेषानंशानपि यथोदितान् ॥ ३७४ ॥
सर्वान्तर्मण्डले चन्द्रौ, जनानां दृष्टिगोचरौ । सहस्रैः सप्तचत्वारिंशता त्रिषष्टियुक्तया ॥ ३७५ ॥
द्विशत्या च योजनानां, एकस्य योजनस्य च । षष्ट्यंशैरेकविंशत्या, तत्रोपपत्तिरुच्यते ॥ ३७६ ॥
अन्तर्मण्डलपरिधेर्दशांशे त्रिगुणीकृते । इन्दोः प्रकाशक्षेत्रं स्यात्, तापक्षेत्रमिवार्कयोः ॥ ३७७ ॥
अर्धं प्रकाशक्षेत्रस्य, पूर्वतोऽपरतोऽपि च । इन्द्वोरपि दृष्टिपथप्राप्तिर्विवस्वतोरिव ॥ ३७८ ॥

तथा च जम्बूद्वीपप्रज्ञप्तिसूत्रम् । "तयाणं इहगयस्स मणूसस्स सीयालीसाहे जोअणसहस्सेहिं दोहियतेवट्ठेहिं जोअणसएहिं एगवीसाए सट्ठिभाएहिं जोअणस्स चंदे चक्खुफासं हव्वमागच्छइ ॥"

जम्बूद्वीपप्रज्ञप्तिसूत्रवृत्तौ च "यत्तु षष्टिभागीकृतयोजनसत्कैकविंशतिभागाधिकत्वं तत्तु संप्रदायगम्यम् । अन्यथा चन्द्राधिकारे साधिकद्वाषष्टिमुहूर्त्तप्रमाणमण्डलपूर्त्तिकालस्य छेदराशित्वेन भणनात् सूर्याधिकारसत्कषष्टि-मुहूर्त्तप्रमाणमण्डलपूर्त्तिकालस्य छेदराशित्वेनानुपपद्यमानत्वात्" इति दृश्यते । तदत्र तत्त्वं बहुश्रुतगम्यम् ॥"

पञ्चयोजनसहस्राः, पञ्चविंशतियुक्शतम् । योजनस्य तथैकस्य, पञ्चविंशतिसंयुतैः ॥ ३७९ ॥
त्रयोदशभिः सहस्रैर्भक्तस्य सप्तभिः शतैः । भागा नवत्यधिकानि, शतान्येकोनसप्ततिः ॥ ३८० ॥
मुहूर्त्तगतिरेषेन्दोः, सर्वपर्यन्तमण्डले । अथात्रैव दृष्टिपथप्राप्तिर्विचिन्त्यतेऽनयोः ॥ ३८१ ॥
एकत्रिंशता योजनसहस्रैरष्टभिः शतैः । एकत्रिंशैः सर्वबाह्ये, दृश्येते मण्डले विधू ॥ ३८२ ॥

"अत्र सूर्याधिकारोक्तम् तीसाए सट्ठिभाएहिं इत्यधिकं मन्तव्यम्" । इति जम्बूद्वीपप्रज्ञप्तिवृत्तौ ॥

अत्र सर्वाभ्यन्तरसर्वबाह्यचन्द्रमण्डलयोर्दृष्टिपथप्राप्तिता दर्शिता । शेषमण्डलेषु सा चन्द्रप्रज्ञप्ति-बृहत्क्षेत्रसमास-जम्बूद्वीपप्रज्ञप्तिसूत्रवृत्त्यादिग्रन्थेषु पूर्वैः क्वापि दर्शिता नोपलभ्यते । ततोऽत्रापि न दर्शितेति ज्ञेयम् ॥

प्रतिमण्डलमित्येवं, मुहूर्त्तगतिरीरिता । मण्डलार्धमण्डलयोः, कालमानमथ ब्रुवे ॥ ३८३ ॥
नवशत्या विभक्तस्य, चत्वत्पञ्चदशाढ्यया । विभागैर्मण्डलार्धस्य, किलैकत्रिंशतोनितम् ॥ ३८४ ॥
अर्धमण्डलमेकेनाहोरात्रेण समाप्यते । एकैकेन शशांकेन, यत्रकुत्रापि मण्डले ॥ ३८५ ॥
द्विचत्वारिंशदधिकैः, शतैश्चतुर्भिरेव च । अहोरात्रस्य भक्तस्य, लवैकत्रिंशताधिकौ ॥ ३८६ ॥
अहोरात्रौ पूर्त्तिकाल, एकस्मिन् मण्डले विधोः । रविस्तु पूरयेत् पूर्णाहोरात्रद्वितयेन तत् ॥ ३८७ ॥
मण्डलार्धमण्डलयोरुक्तैवं कालसंमितिः । साधारणासाधारणमण्डलानि ब्रवीम्यथ ॥ ३८८ ॥
प्रथमं च तृतीयं च, षष्ठं सप्तममष्टमम् । दशमैकादशे पञ्चदशमित्यष्टमण्डली ॥ ३८९ ॥
नक्षत्रैरविरहिता, सदापि तु हिमद्युतेः । मण्डलेष्वेषु नक्षत्राण्यपि चारं चरन्ति यत् ॥ ३९० ॥
द्वितीयं च चतुर्थं च, पञ्चमं नवमं तथा । त्रीणि च द्वादशादीनि, किलैषा सप्तमण्डली ॥ ३९१ ॥
ऋक्षैः सदा विरहिता, मण्डलेष्वेषु नो भवेत् । कदापि चार ऋक्षाणामूषरेषु गवामिव ॥ ३९२ ॥
प्रथमं तृतीयमेकादशं पञ्चदशं तथा । रविचन्द्रोडुसामान्या, मण्डलानां चतुष्टयी ॥ ३९३ ॥
एतेषु मण्डलेष्विन्दुर्नक्षत्राणि तथा रविः । चारं चरन्ति सर्वेऽपि, राजामार्गे जना इव ॥ ३९४ ॥
षष्ठादीनि पञ्च सूर्यचारहीनानि सर्वथा । शेषाणि मण्डलानीन्दोः, किञ्चित् भानुः स्पृशेदपि ॥ ३९५ ॥
साधारणासाधारणमण्डलान्येवमूचिरे । सम्प्रतीन्दोर्वृद्धिहानिप्रतिभासः प्ररूप्यते ॥ ३९६ ॥
अवस्थितस्वभावं हि, स्वरूपेणेन्दुमण्डलम् । सदापि हानिर्वृद्धिर्वा, येक्ष्यते सा न तात्त्विकी ॥ ३९७ ॥
केवलं या शुक्लपक्षे, वृद्धिर्हानिस्तथा परे । राहुविमानावरणयोगात् सा प्रतिभासते ॥ ३९८ ॥
तथाहि । ध्रुवराहुः पर्वराहुरेवं राहुर्द्विधा भवेत् । ध्रुवराहोस्तत्र कृष्णतमं विमानमीरितम् ॥ ३९९ ॥
तच्च चन्द्रविमानस्य, प्रतिष्ठितमधस्तले । चतुरङ्गुलमप्राप्तं, चारं चरति सर्वदा ॥ ४०० ॥
तेनापावृत्त्य चावृत्त्य, चरत्यधः शनैः शनैः । वृद्धिहानिप्रतिभासः, पोस्फुरीतीन्दुमण्डले ॥ ४०१ ॥

तथोक्तम्, "चंदस्स नेव हाणी, नवि वुड्ढी वा अवट्ठिओ चंदो । सुक्किलभावस्स पुणो, दीसइ वुड्ढी य हाणि य ॥ किन्हं राहुविमाणं, निच्चं चंदेण होइ अविरहियम् । चउरंगुलमप्पत्तं, हिट्ठा चंदस्स तं चरइ ॥ तेणं वड्ढइ चंदो परिहाणी वावि होइ चंदस्स ॥" [बृहत्क्षेत्रसमास अधि. १. श्लो. ३९६ टीकान्तर्गत श्लो. १,२]

तत्र प्रकल्प्य द्वाषष्टिं, भागान् शशाङ्कमण्डले । ह्रियते पञ्चदशभिर्लभ्यतेऽशचतुष्टयम् ॥ ४०२ ॥
एतावदाव्रियते तत्, प्रत्यहं भरणीभुवा । अहोभिः पञ्चदशभिरेवमाव्रियतेऽखिलम् ॥ ४०३ ॥

द्वौ भागौ तिष्ठतः शेषौ, सदैवानावृतौ च तौ । एषा कला षोडशीति, प्रसिद्धिमगमत् भुवि ॥ ४०४ ॥
कल्प्यन्तेऽशाः पञ्चदश, विमाने राहवेऽथ सः । जयत्येकैकांशवृद्ध्या, नीतिज्ञोऽरिमिवोडुपम् ॥ ४०५ ॥
तच्चैवम्,
स्वीयपञ्चदशांशेन, कृष्णप्रतिपदि ध्रुवम् । मुक्त्वांशौ द्वावनावार्यौ, शेषषष्टेः सितत्विषः ॥ ४०६ ॥
चतुर्भागात्मकं पञ्चदशं भागं विधुंतुदः । आवृणोति द्वितीयायां, निजभागद्वयेन च ॥ ४०७ ॥
अष्टभागात्मकौ पञ्चदशांशौ द्वौ रुणद्धि सः । षष्टिं भागानित्यमायां, स्वैः पञ्चदशभिर्लवैः ॥ ४०८ ॥
ततः शुक्लप्रतिपदि, चतुर्भागात्मकं लवम् । एकं पञ्चदशं व्यक्तीकरोत्यपसरन् शनैः ॥ ४०९ ॥
द्वितीयायां द्वौ विभागौ, पूर्णिमायामिति क्रमात् । द्वाषष्ट्यंशात्मकः सर्वः, स्फुटीभवति चन्द्रमाः ॥ ४१० ॥
इन्दोश्चतुर्लवात्मांशो, यावत्कालेन राहुणा । पिधीयते मुच्यते च, तावत्कालमिता तिथिः ॥ ४११ ॥
इन्दोः पिधीयमानाः स्युः, कृष्णाः प्रतिपदादिकाः । तिथयो मुच्यमानाः स्युः, शुक्लाः प्रतिपदादिकाः ॥ ४१२ ॥
तथाहुः, "कालेण जेण हायइ, सोलसभागो तु सा तिही होइ । तह चेव य वुड्ढीए, एवं तिहिणो समुप्पत्ती ॥
एकोनत्रिंशता पूर्णैर्मुहूर्त्तैश्च द्विषष्टिजैः । द्वात्रिंशता मुहूर्त्तांशैरेकैको रजनीपतेः ॥ ४१३ ॥
चतुर्धा षष्टयंशरूपो, राहुणा छाद्यते लवः । मुच्यते च तदैतावन्माना स्युर्तिथयोऽखिलाः ॥ ४१४ ॥
एवं च, द्वाषष्टिभक्ताहोरात्रस्यैकषष्टया लवैर्मिता । तिथिरेवं वक्ष्यते यत्तद्युक्तमुपपद्यते ॥ ४१५ ॥
तिथिमानेऽस्मिंश्च हते, त्रिंशता स्याद्यथोदितः । मासश्चान्द्र एवमपि, त्रिंशत्तिथिमितः खलु ॥ ४१६ ॥
ननु राहुविमानेन, योजनार्धमितेन वै । षट्पञ्चाशद्योजनैकषष्टिभागमितं खलु ॥ ४१७ ॥
कथमाच्छादितुं शक्यं, गरीयः शशिमण्डलम् ? । लघीयसा गरीयो हि, दुरावारमिति स्फुटम् ॥ ४१८ ॥
एवमुत्तरयन्त्यत्र, केचित् प्राक्तनपण्डिताः । लघीयसोऽप्यस्य कान्तिजालैरत्यन्तमेचकैः ॥ ४१९ ॥
आच्छाद्यते महदपि, शशिबिम्बं प्रसृत्वरैः । दावानलोच्छलद्धूमस्तोमैरिव नभोङ्गणम् ॥ ४२० ॥
अन्ये त्वभिदधुर्धीरार्योजनार्धं यदुच्यते । मानं ग्रहविमानस्य, तदेतत्प्रायिकं ततः ॥ ४२१ ॥
योजनायामविष्कम्भं, तत् द्वात्रिंशांशमेदुरम् । स्वर्भानुमण्डलं तेन, विधुराव्रियते सुखम् ॥ ४२२ ॥
तथा चाहुः,
"आयामो विक्खंभो, जोअणमेगं तु तिगुणिओ परिही । अड्ढाइज्जधणुसया, राहुस्स विमाणबाहल्लम्" ॥
संग्रहण्यादर्शे प्रक्षेपगाथेयं दृश्यते ॥

भगवतीवृत्तावपि एतस्याश्चालनाया एवं प्रत्यवस्थानम् । "यदिदं ग्रहविमानमर्धयोजनप्रमाणमिति तत् प्रायिकम् ॥ ततश्च राहोर्ग्रहस्योक्ताधिकप्रमाणमपि विमानं संभाव्यते । अन्ये पुनराहुः लघीयसोऽपि राहुविमानस्य महता तमिस्ररश्मिजालेन तदाव्रियते । इति भगवतीसूत्रवृत्तौ १२ शतके पञ्चमोद्देशके । तत्त्वं तु केवलिनो विदन्ति ॥

कदाचित् ग्रहण इव, विमानमुपलभ्यते । वृत्ताकृति ध्रुवराहोः, कदाचित् न तथा च किम् ? ॥ ४२३ ॥
दिनेषु येषु तमसाभिभूतः स्यात् भृशं शशी । तेषूपलभ्यते वृत्तं, विमानमस्य येषु च ॥ ४२४ ॥
शशी विशुद्धकान्तित्वात्, तमसा नाभिभूयते । वृत्तं विमानं नैतस्य, दिनेषु तेषु दृश्यते ॥ ४२५ ॥

तथोक्तम्, "वट्टच्छेओ कइवइ, दिवसे धुवराहुणो विमाणस्स । दिसइ परं न दिसइ, जह गहणे पव्वराहुस्स ॥" "अच्चच्छं न हि तमसाभिभूयते जं ससी विसुज्झन्तो । तेण न वट्टच्छेओ, गहणे उ तमोतमो बहुलो" ॥ इति भगवतीवृत्तौ ॥

यदा तु लेश्यामावृण्वन्, पर्वराहुर्व्रजत्यधः । पुष्पदन्तमण्डलयोर्यथोक्तकालमानतः ॥ ४२६ ॥
तदा भवत्युपरागो, यथार्हं चन्द्रसूर्ययोः । जनैर्ग्रहणमित्यस्य, प्रसिद्धिः परिभाव्यते ॥ ४२७ ॥
जघन्यतस्तत्र षण्णां, मासामन्ते शशिग्रहः । उत्कर्षतो द्विचत्वारिंशतो मासामतिक्रमे ॥ ४२८ ॥
मासैर्जघन्यतः षड्भिर्जायते तरणिग्रहः । संवत्सरैरष्टचत्वारिंशतोत्कर्षतः पुनः ॥ ४२९ ॥
यदा स्वर्भानुरागच्छन्, गच्छन् वा पुष्पदन्तयोः । लेश्यामावृणुयात्तर्हि, वदन्ति मनुजा भुवि ॥ ४३० ॥
चन्द्रो रविर्वा तमसा, गृहीत इति यद्यथ । लेश्यामावृत्य पार्श्वेन, गच्छत्यर्कशशाङ्कयोः ॥ ४३१ ॥
तदा वदन्ति मनुजा, रविणा शशिनाथवा । राहोः कुक्षिर्भिन्न इति, यदा पुनर्विधुन्तुदः ॥ ४३२ ॥
अर्केन्दुलेश्यामावृत्यापसर्पति तदा भुवि । वदन्ति मनुजा वान्तौ, राहुणा शशिभास्करौ ॥ ४३३ ॥
यदा तु गच्छन् वाऽऽगच्छन्, राहुश्चन्द्रस्य वा रवेः । लेश्यामावृत्य मध्येन, गच्छत्याहुर्जनास्तदा ॥ ४३४ ॥
राहुणा रविरिन्दुर्वा, विभिन्न इति चेत्पुनः । सर्वात्मना चन्द्रसूर्यलेश्यामावृत्य तिष्ठति ॥ ४३५ ॥
वावदन्तीह मनुजाः, परमार्थाविदस्तथा । राहुणा क्षुधितेनेव, ग्रस्तश्चन्द्रोऽथवा रविः ॥ ४३६ ॥
शृङ्गाटकश्च जटिलः, क्षेत्रकः खरकस्तथा । दुर्दुरः सगरो मत्स्यः, कृष्णसर्पश्च कच्छपः ॥ ४३७ ॥
इत्यस्य नव नामानि, विमानास्त्वस्य पञ्चधा । कृष्णनीलरक्तपीतशुक्लवर्णमनोहराः ॥ ४३८ ॥
इति भगवतीसूत्रशतक १२ षष्ठोद्देशके ॥

सम्पूर्णसर्वावयवो, विशिष्टालङ्कारमाल्याम्बरसम्यरूपः ।
महर्द्धिको राजति राहुरेष, लोकप्रसिद्धो न तु मौलिमात्रः ॥ ४३९ ॥

किञ्च, विधोरेकैकमयनमहोरात्रांस्त्रयोदश । चतुश्चत्वारिंशदहोरात्रांशाः सप्तषष्टिजाः ॥ ४४० ॥
द्वाभ्यां चन्द्रायणाभ्यां स्यात्, भमासः सप्तविंशतिः । अहोरात्राः सप्तषष्टिभागास्तत्रैकविंशतिः ॥ ४४१ ॥
अत्रोपपत्तिस्त्वेवम् ।
सर्वोडूनां चन्द्रभोगो, वक्ष्यमाणः समुच्चितः । मुहूर्त्तानां शतान्यष्टैकोनविंशान्यथो लवाः ॥ ४४२ ॥
स्युः सप्तविंशतिः सप्तषष्टिजास्त्रिंशता ततः । मुहूर्त्ताङ्के हृते लब्धाहोरात्रसप्तविंशतिः ॥ ४४३ ॥

मुहूर्त्ता नव शिष्यन्ते, भागाश्च सप्तविंशतिः । मुहूर्त्ताः सप्तषष्टिघ्नाः, कार्याः कर्त्तुं सवर्णनम् ॥ ४४४ ॥
षट्शती त्र्युत्तरां स्यात् सा, सप्तविंशतिभागयुक् । बभूव षट्शती त्रिंशा, भागोऽस्यास्त्रिंशता पुनः ॥ ४४५ ॥
सप्तषष्टिभवा भागा, लभ्यन्ते एकविंशतिः । यथोक्तोऽयं भमासोऽस्याद्धार्द्धं याम्योत्तरायणे ॥ ४४६ ॥
चन्द्रोत्तरायणारम्भो, युगादिसमये भवेत् । प्रागुत्तरायणं पश्चाद्याम्यायनमिति क्रमः ॥ ४४७ ॥
प्रवृत्तिः स्याद्यतो ज्योतिश्चक्रचारैकमूलयोः । सूर्ययाम्यायनशीतांशूत्तरायणयोः किल ॥ ४४८ ॥
युगादावेव युगपत्तत्रार्कदक्षिणायनम् । पुष्यसप्तषष्टिजांशत्रयोविंशत्यतिक्रमे ॥ ४४९ ॥
युगादावभिजिद्योगप्रथमक्षण एव तु । चन्द्रोत्तरायणारम्भस्ततो युक्तं पुरोदितम् ॥ ४५० ॥

तथोक्तं जम्बूद्वीपप्रज्ञप्तिसूत्रवृत्तौ । "सकलज्योतिश्चारमूलस्य सूर्यदक्षिणायनस्य चन्द्रोत्तरायणस्य च युगपत्प्रवृत्तिर्युगादावेव । सोऽपि चन्द्रायणस्याभिजिद्योगप्रथम समय एव । सूरायणस्य तु पुष्यस्य त्रयोविंशतौ सप्तषष्टिभागेषु व्यतीतेषु । तेन सिद्धं युगस्यादित्वमिति" ॥

पुष्यस्य सप्तषष्ट्युत्थविंशत्यंशाधिके ततः । मुहूर्त्तदशके भुक्ते, मुहूर्त्तैकोनविंशतौ ॥ ४५१ ॥
भोग्यायां सप्तचत्वारिंशदंशायां समाप्यते । विधुनोदीच्यमयनं, याम्यमारभ्यतेऽपि च ॥ ४५२ ॥
एवं च सर्वनक्षत्रभोगार्धानुभवात्मके । सामर्थ्यादवसीयेते, याम्योत्तरायणे विधोः ॥ ४५३ ॥
न त्वाद्यान्त्यमण्डलाभिमुखप्रसरणात्मके । याम्योत्तरायणे स्यातां, भानोरिव विधोरपि ॥ ४५४ ॥
किञ्च, लोकप्रसिद्धमकरकर्कराशिस्थितस्ततः । औदिच्यं याम्यमयनं, विधुरारभते क्रमात् ॥ ४५५ ॥
युगे युगे चतुस्त्रिंशं, शतं चन्द्रायणानि वै । त्रिंशान्यष्टादशशतान्येभिश्च युगवासराः ॥ ४५६ ॥
युगातीतपर्वसंख्या, कार्या पञ्चदशाहता । क्षिप्यन्ते तत्र तिथयः, पर्वोपरिगतास्ततः ॥ ४५७ ॥
राशेरस्माद्विवर्ज्यन्तेऽवमरात्रास्ततः परम् । ऋक्षमासार्धेन भागे, यल्लब्धं तद्विचार्यते ॥ ४५८ ॥
लब्धे समेऽङ्के विज्ञेयमतीतं दक्षिणायनम् । विषमेऽङ्के पुनर्लब्धे, व्यतीतमुत्तरायणम् ॥ ४५९ ॥
शेषांस्तूद्धरितानंशान्, सप्तषष्ट्या हरेत् बुधः । लब्धाङ्कप्रमिता वर्त्तमानायनदिना गताः ॥ ४६० ॥
तत्राप्युद्धरिता येऽङ्कास्ते विज्ञेया विशारदैः । दिनस्य सप्तषष्ट्यंशा, दर्श्यतेऽत्र निदर्शनम् ॥ ४६१ ॥
यथा युगादेरारभ्य, नवमासव्यतिक्रमे । पञ्चम्यां केनचित् पृष्टं, किं चन्द्रायणमस्ति भोः? ॥ ४६२ ॥
कुर्यात् पञ्चदशघ्नानि, पर्वाण्यष्टादशात्र च । क्षिपेत् गतान् पञ्चतिथीन्, त्यक्त्वावमचतुष्टयम् ॥ ४६३ ॥
एकसप्तत्या समेतं, संजातं शतयोर्द्वयम् । भाजकोऽस्य भमासार्धं, पूर्णरूपात्मकं न तत् ॥ ४६४ ॥
किन्तु सप्तषष्टिभागैः, कियद्भिरधिकं ततः । एष राशिः सप्तषष्टया, भागसाम्याय गुण्यते ॥ ४६५ ॥
अष्टादश सहस्राणि, सप्तपञ्चाशताधिकं । शतं जातमितश्चोडुमासार्द्धदिवसा अपि ॥ ४६६ ॥
सप्तषष्ट्या हताः शेषैर्वेदवेदलवैर्युताः । जाताः पञ्चदशाढ्यानि, शतानि नव तैः पुनः ॥ ४६७ ॥

हृते भाज्याङ्केऽयनानि, लब्धान्येकोनविंशतिः । शेषा भागसप्तशती, द्विसप्तत्यधिका स्थिता ॥ ४६८ ॥
अस्या भागे सप्तषष्ट्या, लब्धा रुद्रमिता दिनाः । शेषाः पञ्चत्रिंशदंशास्तिष्ठन्ति सप्तषष्टिजाः ॥ ४६९ ॥
चन्द्रायणान्यतीतानीत्येवमेकोनविंशतिः । अनन्तरमतीतं यत्तच्चन्द्रस्योत्तरायणम् ॥ ४७० ॥
वर्त्तमानस्य च याम्यायनस्य वासरा गताः । एकादश लवाः पञ्चत्रिंशच्च सप्तषष्टिजाः ॥ ४७१ ॥
अत्र पूर्णा भविष्यन्ति, समाप्ते पञ्चमे तिथौ । एवमन्यत्रापि भाव्यं, करणं गणकोत्तमैः ॥ ४७२ ॥
इन्दुः तत्परिवारश्च, रूपकान्त्यादिभिः भृशम् । सश्रीक इति विख्यातः, शशी प्राकृतभाषया ॥ ४७३ ॥
मृगश्चिन्हं विमानेऽस्य, पीठिकायां प्रतिष्ठितम् । मृगाङ्कितविमानत्वात्, मृगाङ्क इति वोच्यते ॥ ४७४ ॥
तथा च पञ्चमाङ्गे ।

"से केणट्ठेणं भंते ! एवं वुच्चइ चंदे ससी ? चंदे ससी गोयम ! चंदस्स णं ज्योतिसिंदस्स जोतिसरण्णो मियंके विमाणे कन्ता देवा कन्ताओ देवीओ ।" इत्यादि ॥ १२ श. ५ उ. ।

इति चन्द्रस्वरूपनिरूपणम् ॥

एवं संक्षेपतश्चन्द्रनिरूपणं यथा कृतम् । तथैव वर्णयामोऽथ, नक्षत्राणां निरूपणम् ॥ ४७५ ॥
आदौ संख्या मण्डलानां, तेषां क्षेत्रप्ररूपणा । एक ऋक्षविमानानां, तथाऽन्तरं परस्परम् ॥ ४७६ ॥
सुमेरोर्मण्डलाबाधा, विष्कम्भादि च मण्डले । मुहूर्त्तगतिरावेशः, शशाङ्कमण्डलैः सह ॥ ४७७ ॥
दिग्योगो देवतास्तारासंख्योडूनां तथाकृतिः । सूर्येन्दुयोगाद्धामानं, कुलाद्याख्यानिरूपणम् ॥ ४७८ ॥
अमावास्यापूर्णिमानां, नक्षत्रयोगकीर्त्तनम् । प्रतिमासमहोरात्रसमापकानि तानि च ॥ ४७९ ॥
एभिश्च पञ्चदशभिर्द्वारैः पूर्गोपुरैरिव । गम्योडूपरिपाटीति, तामेव प्रथमं ब्रुवे ॥ ४८० ॥
अभिजित् श्रवणं चैव, धनिष्ठा शततारिका । पूर्वा भद्रपदा सैवोत्तरादिकाथ रेवती ॥ ४८१ ॥
अश्विनी भरणी चैव, कृत्तिका रोहिणी तथा । मृगशीर्षं तथा चार्द्रा, पुनर्वसू ततः परम् ॥ ४८२ ॥
पुष्योऽश्लेषा मघाः पूर्वाफाल्गुन्युत्तरफाल्गुनी । हस्तश्चित्रा तथा स्वातिर्विशाख्रा चानुराधिका ॥ ४८३ ॥
ज्येष्ठा मूलं तथा पूर्वाषाढा सैवोत्तरापि च । जिनप्रवचनोपज्ञो, नक्षत्राणामयं क्रमः ॥ ४८४ ॥
अश्विन्याः कृत्तिकायाः यत्, प्रसिद्धं लौकिकक्रमम् । उल्लंघ्यात्र प्रवचने, यदेतत् क्रमदर्शनम् ॥ ४८५ ॥
तत्र हेतुः प्रथमतः, संयोगः शशिना समम् । युगस्यादावभिजितः, शेषाणां तु ततः क्रमात् ॥ ४८६ ॥
कृत्तिकादिक्रमस्तु लोके सप्तशलाकचक्रादिष्वेव स्थानेषूपयोगी श्रूयते ।
आरभ्य नन्वभिजितो, नक्षत्रानुक्रमो यदि । शेषोडूनामिव कथं, व्यवहार्यत्वमस्य न ? ॥ ४८७ ॥
अत्रोच्यतेऽस्य शशिना, योगो यदल्पकालिकः । ऋक्षान्तरानुप्रविष्टतयास्य तद्विचक्षणम् ॥ ४८८ ॥

यदुक्तं समवायाङ्गे सप्तविंशे समवाये । "जम्बुद्दीवे दीवे अभीइवज्जेहिं सत्तावीसाहिं णक्खत्तेहिं संववहारे वट्टइ" ॥ एतद्वृत्तिर्यथा । "जम्बूद्वीपे न धातकीखण्डादौ अभिजिद्वर्जैः । सप्तविंशत्या नक्षत्रैर्व्यवहारः प्रवर्त्तते अभिजिन्नक्षत्रस्य उत्तराषाढाचतुर्थपादानुप्रवेशनात् । इति ॥

लोके तु, औत्तराषाढमन्त्यांह्रिचतस्रश्च श्रुतेर्घटीः । वदन्त्यभिजितो भोगं, वेधसत्ताद्यवेक्षणे ॥ ४८९ ॥
अष्टावेव मण्डलानि, स्युरष्टाविंशतेरपि । उडूनां तत्र चारस्तु, नियते स्वस्वमण्डले ॥ ४९० ॥
इति मण्डलसंख्या ॥ १ ॥

साशीतियोजनशते, द्वीपस्यान्तरवर्तिनि । उक्तं मुक्तिवधुकान्तैर्नक्षत्रमण्डलद्वयम् ॥ ४९१ ॥
त्रिंशे च योजनशतत्रये लवणवारिधेः । षड् नक्षत्रमण्डलानि, दृष्टानि विष्टपेक्षिभिः ॥ ४९२ ॥
नक्षत्रमण्डलं चक्रवालविष्कम्भतो भवेत् । गव्यूतमेकं प्रत्येकं, गव्यूतार्द्धं च मेदुरम् ॥ ४९३ ॥
एवं नक्षत्रजातीयमण्डलक्षेत्रसंमितिः । दशोत्तरा पञ्चशती, योजनानां निरूपिता ॥ ४९४ ॥
न त्वैकैकस्य ऋक्षस्य, मण्डलक्षेत्रसम्भवः । रवेरिवायनाभावात्, सदा चारात् स्वमण्डले ॥ ४९५ ॥
इति मण्डलक्षेत्रम् ॥ २ ॥

यत्र यत्र यानि यानि, वक्ष्यन्ते भानि मण्डले । स्यात्तदीयविमानानां, द्वे योजने मिथोन्तरम् ॥ ४९६ ॥
मिथोऽन्तरमुडूनां, चेदिदमेव भवेत्तदा । मण्डलक्षेत्रमन्यत् स्यात्, भूशून्यं तच्च नेष्यते ॥ ४९७ ॥

यत्तु "दो जोअणाइं णक्खत्तमंडलस्स णक्खत्तमण्डलस्स य अबाहाए अंतरे पण्णत्ते" इत्येतत् जम्बूद्वीपप्रज्ञप्तिसूत्रं तत् अष्टास्वपि मण्डलेषु यत्र यत्र मण्डले यावन्ति नक्षत्राणां विमानानि तेषामन्तरबोधकम् ॥ यच्च अभिजिन्नक्षत्रविमानस्य श्रवणनक्षत्रविमानस्य च परस्परमन्तरं द्वे योजने इति उपाध्यायश्रीशान्तिचन्द्रगणिभिः स्वकृतवृत्तौ व्याख्यायि तदभिप्रायं सम्यक् न विद्मः । यद्यप्युपाध्यायश्रीधर्मसागरगणिभिः स्वकृतवृत्तौ एतत्सूत्रव्याख्याने द्वे योजने नक्षत्रस्य नक्षत्रस्य चाबाधया अन्तरं प्रज्ञप्तमित्येव लिखितमस्ति तदप्यभिप्रायशून्यमेव ॥

चतुश्चत्वारिंशतैव, सहस्रैरष्टभिः शतैः । विंशैश्च योजनैर्मेरोः, सर्वान्तरं भमण्डलम् ॥ ४९८ ॥
सहस्रैः पञ्चचत्वारिंशता विंशैस्त्रिभिः शतैः । योजनैर्मेरुतः सर्वबाह्यं नक्षत्रमण्डलम् ॥ ४९९ ॥
इति मेरोरबाधा ॥ ४ ॥

विष्कम्भायामपरिधिप्रमुखं मानमेतयोः । रवेः सर्वान्तरसर्वबाह्यमण्डलयोरिव ॥ ५०० ॥
इति मण्डलविष्कम्भादि ॥ ५ ॥

सहस्राणि पञ्च शतद्वयं च पञ्चषष्टियुक् । योजनानि योजनस्य, भक्तस्यैकस्य निश्चितम् ॥ ५०१ ॥
एकविंशत्या सहस्रैः, षष्ट्याढ्यैर्नवभिः शतैः । विभागाश्च समधिकाः, पूर्वोक्तयोजनोपरि ॥ ५०२ ॥
अष्टादश सहस्राणि, शतद्वयं त्रिषष्टियुक् । सर्वान्तर्मण्डलोडूनां, मुहूर्त्तगतिरेषिका ॥ ५०३ ॥

उपपत्तिश्चात्र—

नक्षत्रं सर्वमप्यत्र, पूरयेत् स्वस्वमण्डलम् । मुहूर्त्तैरेकोनषष्ट्या, मुहूर्त्तस्य तथा लवैः ॥ ५०४ ॥
ससप्तषष्टित्रिशतविभक्तस्य त्रिभिः शतैः । सप्तोत्तरैः प्रत्ययश्च, त्रैराशिकात्तदुच्यते ॥ ५०५ ॥
नक्षत्रार्धमण्डलानां, संपूर्णयुगवर्त्तिनाम् । पञ्चत्रिंशत्समधिकैर्यद्यष्टादशभिः शतैः ॥ ५०६ ॥
अष्टादशशती त्रिंशाहोरात्राणामवाप्यते । द्वाभ्यामर्द्धमण्डलाभ्यां, किमाप्यते तदा वद ॥ ५०७ ॥
अत्रान्त्यराशिना राशौ, मध्यमे गुणिते सति । त्रिसहस्री षट्शती च, जाता षष्ट्यधिका किल ॥ ५०८ ॥
पञ्चत्रिंशत्समधिकेनाष्टादशशतात्मना । आद्येन राशिना भागे, रात्रिंदिवमवाप्यते ॥ ५०९ ॥
अष्टादशशती शेषा, पञ्चविंशतियुक् स्थिता । मुहूर्त्तानयनायैषा, त्रिंशता गुणिताऽभवत् ॥ ५१० ॥
चतुःपञ्चाशत्सहस्राः, सार्द्धा सप्तशतीति च । एषां भागेऽष्टादशभिः पञ्चत्रिंशद्युतैः शतैः ॥ ५११ ॥
लब्धा मुहूर्त्ता एकोनत्रिंशत् ततोऽपवर्त्तनम् । छेद्यछेदकयोः राश्योः, पञ्चभिस्तौ ततः स्थितौ ॥ ५१२ ॥
सप्ताढ्या त्रिंशती भाज्यो, भाजकः सप्तषष्टियुक् । त्रिंशती येऽत्र लब्धाश्चैकोनत्रिंशत् मुहूर्त्तकाः ॥ ५१३ ॥
त्रिंशन्मुहूर्त्तरूपेऽहोरात्रे पूर्वागतेऽन्विताः । ते मुहूर्त्ताः स्युरेकोनषष्टी राशिरसौ पुनः ॥ ५१४ ॥
गुण्यते भागसाम्याय, सप्तषष्टिसमन्वितैः । त्रिभिः शतैः क्षिप्यतेऽस्मिन्, सप्ताढ्यांशशतत्रयी ॥ ५१५ ॥
सषष्टिर्नवशत्येवं, सहस्राश्चैकविंशतिः । अयं च राशिः परिधेर्भाजकः प्रतिमण्डलम् ॥ ५१६ ॥
तिस्रो लक्षाः पञ्चदश, सहस्राणि तथोपरि । नवाशीतिः परिक्षेपः, सर्वाभ्यन्तरमण्डले ॥ ५१७ ॥
राशिर्योजनरूपोऽयं, भागात्मकेन राशिना । कथं विभाज्योऽसदृशस्वरूपत्वादसौ ततः ॥ ५१८ ॥
तेनैवार्हति गुणनं, गुणितो येन भाजकः । ततस्त्रिभिः शतैः सप्तषष्ट्याढ्यैरेष गुण्यते ॥ ५१९ ॥
जाता एकादश कोट्यः, षट्पञ्चाशच्च लक्षकाः । सप्तत्रिंशत्सहस्राणि, षट्शती च त्रिषष्टियुक् ॥ ५२० ॥
सहस्रैरेकविंशत्या, षष्ट्याढ्यैर्नवभिः शतैः । भागेऽस्य राशेः प्रागुक्ता, मुहूर्त्तगतिराप्यते ॥ ५२१ ॥
तथा योजनानां त्रिपञ्चाशच्छती सैकोनविंशतिः । सहस्रैरेकविंशत्या, षष्ट्याढ्यैर्नवभिः शतैः ॥ ५२२ ॥
भक्तस्य योजनस्यांशसहस्राः षोडशोपरि । सपञ्चषष्टिस्त्रिशती, गतिः सर्वान्त्यमण्डले ॥ ५२३ ॥
तथाहि, लक्षत्रयं योजनानामष्टादशसहस्रयुक् । शतत्रयं पञ्चदश, परिक्षेपोन्त्यमण्डले ॥ ५२४ ॥
अयं त्रिभिः सप्तषष्टिसहितैः ताडितः शतैः । कोट्य एकादश लक्षा, अष्टषष्टिः किलादिकाः ॥ ५२५ ॥
सहस्रैरेकविंशत्या, शतैः षड्भिः सपञ्चभिः । राशेरस्यैकविंशत्या, सहस्रैर्नवभिः शतैः ॥ ५२६ ॥
हृते षष्ट्यधिकैर्भागे, मुहूर्त्तगतिराप्यते । नक्षत्राणां किल सर्वबाह्यमण्डलचारिणाम् ॥ ५२७ ॥
इति मुहूर्त्तगतिः ॥ ६ ॥

षट्सु शेषमण्डलेषु, मुहूर्त्तगतिसंविदे । सुखेन तत्तत्परिधिज्ञानाय क्रियतेऽधुना ॥ ५२८ ॥

भमण्डलानां सर्वेषां, मण्डलेष्वमृतद्युतेः । समवतारस्तत्राद्यमाद्ये शशाङ्कमण्डले ॥ ५२९ ॥
भमण्डलं द्वितीयं च, तृतीये चन्द्रमण्डले । षष्ठे तृतीयं विज्ञेयं, लवणोदधिभाविनि ॥ ५३० ॥
चतुर्थं सप्तमे ज्ञेयं, तथा पञ्चममष्टमे । विज्ञेयं दशमे षष्ठमेकादशे च सप्तमम् ॥ ५३१ ॥
अष्टमं च पञ्चदशे, शेषाणि तु सदोडुभिः । सप्त चन्द्रमण्डलानि, रहितानि विनिर्दिशेत् ॥ ५३२ ॥
एषां चन्द्रमण्डलानां, परिक्षेपानुसारतः । पूर्वोक्तविधिना भानां, मुहूर्त्तगतिराप्यते ॥ ५३३ ॥
इति चन्द्रमण्डलावेशः ॥ ७ ॥

अभिजिच्छ्रवणश्चैव, धनिष्टा शततारिका । पूर्वोत्तरा भाद्रपदा, रेवती पुनरश्विनी ॥ ५३४ ॥
भरणी फाल्गुनी पूर्वा, फाल्गुन्येव तथोत्तरा । स्वातिश्च द्वादशैतानि, सर्वाभ्यन्तरमण्डले ॥ ५३५ ॥
चरन्ति तन्मण्डलाद्ऊर्ध्वं, यथोक्तकालमानतः । पूरयन्ति तदन्याद्ऊर्ध्वं, तथा तान्यपराण्यपि ॥ ५३६ ॥
पुनर्वसूमघाश्लेषेति, द्वयं द्वितीयमण्डले । तृतीये कृत्तिकास्तूर्यं चित्रा तथा च रोहिणी ॥ ५३७ ॥
विशाखा पञ्चमे षष्ठेऽनुराधा सप्तमे पुनः । ज्येष्ठाष्टमे त्वष्ट भानि, सदा चरन्ति तद्यथा ॥ ५३८ ॥
आर्द्रा मृगशिरः पुष्योऽश्लेषा मूलं करोऽपि च । पूर्वाषाढोत्तराषाढे, इत्यष्टान्तिममण्डले ॥ ५३९ ॥
पूर्वोत्तराषाढयोस्तु, चतुस्तारकयोरिह । द्वे द्वे स्तस्तारके मध्ये, बहिश्चाष्टममण्डलात् ॥ ५४० ॥
अष्टानां द्वादशानां च, बाह्याभ्यन्तरचारिणाम् । सर्वेभ्योऽपि बहिर्मूलं, सर्वेभ्योऽप्यन्तरेऽभिजित् ॥ ५४१ ॥
तथाहुः । "अह भरणि साइ उवरि बहि मूलोऽभिंतरे अभिई ॥" [बृहत्संग्रहणी गाथा ५०]

यानि द्वादश ऋक्षाणि, सर्वाभ्यन्तरमण्डले ॥ तानि चन्द्रस्योत्तरस्यां, संयुज्यन्तेऽमुना समम् ॥ ५४२ ॥
एभिर्यदोडुभिः सार्धं, योगस्तदा स्वभावतः । शेषेष्वेव मण्डलेषु, भवेच्चारो हिमद्युतेः ॥ ५४३ ॥
सर्वान्तर्मण्डलस्थानामेषामुत्तरवर्त्तिता । चन्द्रात् युक्ता तदेभ्यश्च, विधोर्दक्षिणवर्त्तिता ॥ ५४४ ॥
मध्यमीयमण्डलेषु, यान्युक्तान्यष्ट तेषु च । विना ज्येष्ठां त्रिधा योगः, सप्तानां शशिना समम् ॥ ५४५ ॥
औत्तराहो दाक्षिणात्यो, योगः प्रमर्दनामकः । आद्यो बहिश्चरे चन्द्रे, द्वितीयोन्तश्चरे स्वतः ॥ ५४६ ॥
प्रमर्दो भविमानानि, भिन्त्वेन्दोः गच्छतो भवेत् । योगः प्रमर्द एव स्याज्ज्येष्ठायाः शशिना समम् ॥ ५४७ ॥
उडून्याद्यानि षट् भेषु, बाह्यमण्डलवर्त्तिषु । इन्दोर्दक्षिणदिक्स्थानि, संयुज्यन्तेऽमुना समम् ॥ ५४८ ॥
पूर्वोत्तराषाढ्योः तु बाह्यताराव्यपेक्षया । याम्यायां शशिना योगः, प्रज्ञप्तः परमर्षिभिः ॥ ५४९ ॥
द्वयोर्द्वयोस्तारयोस्तु, चन्द्रे मध्येन गच्छति । भवेत् प्रमर्दयोगोऽपि, ततो योगोऽनयोर्द्विधा ॥ ५५० ॥
उदीच्यां दिशि योगस्तु, संभवेन्नानयोर्भयोः । यदाभ्यां परतश्चारः, कदापीन्दोर्न वर्त्तते ॥ ५५१ ॥
विभिन्नमण्डलस्थानां, पृथक्मण्डलवर्तिना । नक्षत्राणां चन्द्रमसा, यथा योगस्तथोच्यते ॥ ५५२ ॥
स्वस्वकालप्रमाणेनाष्टाविंशत्या किलोडुभिः । निजगत्या व्याप्यमानं, क्षेत्रं यावद्विभाव्यते ॥ ५५३ ॥

तावन्मानमेकमदर्धमण्डलं कल्प्यते धिया । द्वितीयोडुकदम्बेन, द्वितीयमदर्धमण्डलम् ॥ ५५४ ॥
अष्टानवतिशताढ्यं, लक्षं सम्पूर्णमण्डलेषु । स्युः सर्वेष्वंशा एष च, विज्ञेयो मण्डलच्छेदः ॥ ५५५ ॥
ननु च–
मण्डलेष् येषु यानि, चरन्त्युडूनि तेष्वियम् । चन्द्रादियोगयोग्यानां, भांशानां कल्पनोचिता ॥ ५५६ ॥
सर्वेष्वपि मण्डलेषु, सर्वोडुभागकल्पना । इयर्त्ति कथमौचित्यमिति चेत् श्रूयतामिह ॥ ५५७ ॥
भानां चन्द्रादिभिर्योगो, नैवास्ति नियते दिने । न वा नियतवेलायां, दिनेऽपि नियते न सः ॥ ५५८ ॥
तेन तत्तन्मण्डलेषु, यथोदितलवात्मसु । तत्तन्नक्षत्रसम्बन्धिसीमाविष्कम्भ आहितः ॥ ५५९ ॥
प्राप्तौ सत्यां मृगाङ्कादेर्योगः स्यादुडुभिः सह । एवमर्कस्यापि योगो, भिन्नमण्डलवर्त्तिनः ॥ ५६० ॥
एवं भसीमाविष्कम्भादिषु प्राप्तप्रयोजनः । प्रागुक्तो मण्डलच्छेद, इदानीमुपपाद्यते ॥ ५६१ ॥
त्रिविधानीह ऋक्षाणि, समक्षेत्राणि कानिचित् । कियन्ति चादर्धक्षेत्राणि, सार्द्धक्षेत्राणि कानिचित् ॥ ५६२ ॥
क्षेत्रमुष्णत्विषा यावदहोरात्रेण गम्यते । तावत्क्षेत्रं यानि भानि, चरन्ति शशिना समम् ॥ ५६३ ॥
समक्षेत्राणि तानि स्युरदर्धक्षेत्राणि तानि च । अदर्धं यथोक्तक्षेत्रस्य, यान्ति यानीन्दुना सह ॥ ५६४ ॥
यथोक्तं क्षेत्रमध्यदर्धं, प्रयान्ति यानि चेन्दुना । स्युस्तानि सादर्धक्षेत्राणि, वक्ष्यन्तेऽग्रेऽभिधानतः ॥ ५६५ ॥
तत्र पञ्चदशाद्यानि, षट्कं षट्कं परद्वयम् । अहोरात्रः सप्तषष्टिभागीकृतोऽत्र कल्प्यते ॥ ५६६ ॥
ततः समक्षेत्रभानि, प्रत्येकं सप्तषष्टिधा । कल्प्यानीति पञ्चदश, सप्तषष्टिगुणीकृताः ॥ ५६७ ॥
जातं सहस्रपञ्चाढ्यमदर्धक्षेत्रेषु भेषु च । सादर्धास्त्रयस्त्रिंशदंशाः, प्रत्येकं कल्पनोचिताः ॥ ५६८ ॥
ततश्च षडभ्नाः सार्द्धास्त्रयस्त्रिंशज्जातं सैकं शतद्वयम् । सादर्धक्षेत्रेषु प्रत्येकं, भागाश्चादर्धांशयुक्शतम् ॥ ५६९ ॥
सादर्धक्षेत्राणि षडिति, त एते षड्गुणीकृताः । सत्रीणि षट्शतान्येकविंशतिश्चाभिजिल्लवाः ॥ ५७० ॥
अष्टादश शतान्येवं, त्रिंशानि सर्वसंख्यया । एतावदंशप्रमितं, स्यादेकमदर्धमण्डलम् ॥ ५७१ ॥
तावदेवापरमिति, द्वाभ्यामिदं निहन्यते । षष्ट्यधिकानि षट्त्रिंशच्छतानीत्यभवन्निह ॥ ५७२ ॥
त्रिंशन्मुहूर्त्ता एकस्मिन्नहोरात्र इति स्फुटम् । सषष्टिषट्त्रिंशदंशशतेषु कल्पनोचिता ॥ ५७३ ॥
त्रिंशात् विभागाः प्रत्येकं, गुण्यन्ते त्रिंशतेति ते । जातं लक्षमेकमष्टानवत्या संहितं शतैः ॥ ५७४ ॥
एतस्मात् मण्डलछेदमानादेव प्रतीयते । शशाङ्कभास्करोडूनां, गत्याधिक्यं यथोत्तरम् ॥ ५७५ ॥
तथाहि । ऐकैकेन मुहूर्त्तेन, शशी गच्छति लीलया । प्रकान्तमण्डलपरिक्षेपांशानां यदा तदा ॥ ५७६ ॥
अष्टषष्ट्या समधिकैरधिकं सप्तभिः शतैः । सहस्रमेकमर्कस्तु, मुहूर्त्तेनोपसर्पति ॥ ५७७ ॥
त्रिंशान्यष्टादश शतान्युडूनि संचरन्ति च । पञ्चत्रिंशत्समधिकान्यष्टादशशतानि वै ॥ ५७८ ॥
उक्तेन्दुभास्करोडूनां, गतिः प्राक् योजनात्मिका । इयं त्वंशात्मिका चिन्त्यं, पौनरुक्त्यं ततोऽत्र न ॥ ५७९ ॥

विशेषस्त्वनयोर्गत्योः, कश्चिन्नास्ति स्वरूपतः । प्रत्ययः कोऽत्र यद्येवं, तत्रोपायो निशम्यताम् ॥ ५८० ॥
स्वस्वमण्डलपरिधिर्मण्डलच्छेदराशिना । विभज्यते यल्लब्धं तत्सुधिया ताड्यते किल ॥ ५८१ ॥
उक्तेन्द्वर्कोडूभागात्ममुहूर्त्तगतिराशिभिः । मुहूर्त्तगतिरेषां स्यात्, पूर्वोक्ता योजनात्मिका ॥ ५८२ ॥
त्रैराशिकेन यदिवा, प्रत्ययोऽस्या विधीयताम् । किं तत् त्रैराशिकमिति, यदीच्छा तन्निशम्यताम् ॥ ५८३ ॥
स्यात् मण्डलापूर्त्तिकालो, विधोः प्रागवत् स वर्णितः । पञ्चविंशाः शताः सप्त, सहस्राश्च त्रयोदश ॥ ५८४ ॥
अस्योपपत्तिर्योजनात्मकमुहूर्त्तगत्यवसरे दर्शितास्ति ॥
ततश्च, पञ्चविंशसप्तशतत्रयोदशसहस्रकैः । मुहूर्तांशैर्लक्षमष्टानवतिश्च शता यदि ॥ ५८५ ॥
मण्डलांशा अवाप्यन्ते, ब्रूताऽऽप्यन्ते तदा कति । एकेनान्तर्मुहूर्त्तेन, राशित्रयमिदं लिखेत् ॥ ५८६ ॥
आद्यो राशि मुहूर्त्तांशरूपोन्त्यस्तु मुहूर्त्तकः । सावर्ण्यार्थमेकविंशद्विशत्याऽन्त्यो निहन्यते ॥ ५८७ ॥
एकविंशा द्विशती स्यात्, मध्यराशिरथैतया । हतः कोट्टिद्वयं लक्षा, द्विचत्वारिंशदेव च ॥ ५८८ ॥
पञ्चषष्टिः सहस्राणि, शतान्यष्ट भवन्त्यतः । पञ्चविंशसप्तशतत्रयोदशसहस्रकैः ॥ ५८९ ॥
एषां भागे हृते लब्धा, मुहूर्तगतिरैन्दवी । भागात्मिका यथोक्ता च, सा खेरपि भाव्यते ॥ ५९० ॥
पूर्वोक्तो मण्डलच्छेदराशिः षष्ट्या मुहूर्त्तकैः । यद्याप्यते मुहूर्त्तेन, तदैकेन किमाप्यते ॥ ५९१ ॥
गुणितोऽन्त्येनैककेन, मध्यराशिस्तथा स्थितः । अष्टादशशतीं त्रिंशां, यच्छत्याद्येन भाजितः ॥ ५९२ ॥
भमण्डलपूर्त्तिकालमानं भवेत् सर्वर्णितम् । षष्टीयुक्ता नवशती, सहस्राश्चैकविंशतिः ॥ ५९३ ॥
उपपत्तिरस्य योजनात्मकगत्यवसरे दर्शितास्ति ॥
ततश्च, एतावद्भिर्मुहूर्त्तांशैर्मण्डलच्छेदसंचयः । प्रागुक्तश्चेल्लभ्यते, तन्मुहूर्त्तेन किमाप्यते ॥ ५९४ ॥
सावर्ण्यायाद्यान्तिमयोः, गुण्यतेऽन्तिम एककः । ससप्तषष्ट्या त्रिशत्या, तादृग्रूपः स जायते ॥ ५९५ ॥
हतोऽनेन मध्यराशिश्चतस्रः कोटयो भवेत् । द्वे लक्षे षण्णवतिश्च, सहस्राः षट् शतानि च ॥ ५९६ ॥
तस्याद्यराशिना भागे, लब्धा भानां लवात्मिका । अष्टादशशती पञ्चत्रिंशा मुहूर्त्तजा गतिः ॥ ५९७ ॥
इति दिग्योगस्तत्प्रसंगात् सीमाविष्कम्भादिनिरूपणं च ॥ ८ ॥
ब्रह्मा विष्णुर्वसुश्चैव, वरुणाजाभिवृद्धयः । पूषाश्वश्च यमोऽग्निश्च, प्रजापतिस्ततः परम् ॥ ५९८ ॥
सोमो रुद्रोऽदितिश्चैव, बृहस्पतिस्तथापरः । सर्प्पोऽपरः पितृनामा, भगोऽर्यमाभिधोऽपि च ॥ ५९९ ॥
सूरस्त्वष्टा तथा वायुरिन्द्राग्नी एकनायकौ । मित्रेन्द्रनैर्ऋता आपो, विश्वेदेवास्त्रयोदश ॥ ६०० ॥
अभिवृद्धेरहिर्बुध्न्यः इत्याख्यान्यत्र गीयते । सोमश्चन्द्रो रविः सूर, ईदृशाख्या परे सुराः ॥ ६०१ ॥
बृहस्पतिरपि प्रसिद्धो ग्रह एव ॥
अमी अभिजिदादीनामुडूनामधिपाः स्मृताः । येषु तुष्टेषु नक्षत्रतुष्टी रुष्टेषु तद्रुषः ॥ ६०२ ॥

देवानामप्युडूनां स्युर्यदधीशाः सुराः परे । तत्पूर्वोपार्जिततपस्तारतम्यानुभावतः ॥ ६०३ ॥
स्वामिसेवकभावः स्यात्, यत्सुरेष्वपि नृष्विव । यथा सुकृतमैश्वर्यतेजःशक्तिसुखादि च ॥ ६०४ ॥
विख्यातौ चन्द्रसूर्यौ यौ, सर्वज्योतिष्कनायकौ । तयोरप्यपरः स्वामी, परेषां तर्हि का कथा ? ॥ ६०५ ॥

तथा च पञ्चमाङ्गे । "सक्कस्स देविन्दस्स देवरण्णो सोमस्स महारण्णो इमे देवा आणाउववायवयणनिद्देसे चिट्ठंति । तं जहा । सोमकाइयाति वा सोमदेवकाइया वा विज्जुकुमारा विज्जुकुमारीओ अग्गिकुमारा अग्गिकुमारीओ वाउकुमारा वाउकुमारीओ चंदा सूरा गहा णक्खत्ता तारारूवा इत्यादिं ॥" इति देवताः ॥

तिस्रस्तिस्रः पञ्च शतं, द्वे द्वे द्वात्रिंशदेव च । तिस्रस्तिस्रः षट् च पञ्च, तिस्र एका च पञ्च च ॥ ६०६ ॥
तिस्रः पञ्च सप्त द्वे द्वे, पञ्चैकैकिका द्वयोः । पञ्च चतस्रस्तिस्रश्च, तत एकादश स्मृताः ॥ ६०७ ॥
चतस्रश्च चतस्रश्च, तारासंख्याऽभिजित्क्रमात् । ज्ञेयान्युडुविमानानि, ताराशब्दात् बुधैरिह ॥ ६०८ ॥
न पुनः पञ्चमज्योतिर्भेदगाः किल तारकाः । विजातीयः समुदायी, विजातीयोच्चयान्न हि ॥ ६०९ ॥
प्रथीयांसि विमानानि, नक्षत्राणां लघूनि च । तारकाणां ततोऽप्यैक्यं, युक्तिः सासहि नानयोः ॥ ६१० ॥
किंच कोटाकोटिरूपा, तारासंख्यातिरिच्यते । अष्टाविंशतिरूपा च, ऋक्षसंख्या विलीयते ॥ ६११ ॥
तत् द्वित्र्यादिविमानेशः, स्यात् देवोऽभिजितादिकः । गृहद्वयाद्यधिपतिः, यथा कश्चिन्महर्धिकः ॥ ६१२ ॥
एवं च न काप्युपपत्तिः । तारासंख्याप्रयोजनं च ॥
वारुण्यां दशमी त्याज्या, द्वितीया पौष्णभे तथा । शेषोडुष्वशुभा स्वस्वतारासंख्यासमा तिथिः ॥ ६१३ ॥
इति तारासंख्या ॥ १० ॥

गोशीर्षपुद्गलानां या, दीर्घा श्रेणिस्तदाकृतिः । गोशीर्षावलिसंस्थानमभिजित् कथितं ततः ॥ ६१४ ॥
कासाराभं श्रवणभं, पक्षिपंजरसंस्थिताः । धनिष्टा शततारा च, पुष्पोपचारसंस्थिता ॥ ६१५ ॥
पूर्वोत्तराभद्रपदे, अर्द्धार्द्धवापिकोपमे । एतदर्द्धद्वययोगे, पूर्णा वाप्याकृतिर्भवेत् ॥ ६१६ ॥
पौष्णं च नौसमाकारमश्वस्कन्धाभमश्विनम् । भरणी भगसंस्थाना, क्षुरधारेव कृत्तिकाः ॥ ६१७ ॥
शकटोद्धीसमा ब्राह्मी, मार्गं मृगशिरस्समम् । आर्द्रा रुधिरबिन्द्वाभा, पुनर्वसू तुलोपमौ ॥ ६१८ ॥
वर्धमानकसंस्थानः, पुष्योऽश्लेषाकृतिः पुनः । पताकाया इव मघाः, प्राकाराकारचारवः ॥ ६१९ ॥
पूर्वोत्तरे च फाल्गुन्यावर्द्धपल्यङ्कसंस्थिते । अत्राप्येतद्द्वययोगे, पूर्णा पल्यङ्कसंस्थितिः ॥ ६२० ॥
हस्तो हस्ताकृतिश्चित्रा, संस्थानतो भवेद्यथा । मुखमण्डनरैपुष्यं, स्वातिः कीलकसंस्थितः ॥ ६२१ ॥
विशाखा पशुदामाभा, राधैकावलिसंस्थिता । गजदन्ताकृतिर्ज्येष्ठा, मूलं वृश्चिकपुच्छवत् ॥ ६२२ ॥
गजविक्रमसंस्थानाः पूर्वाषाढाः प्रकीर्त्तिताः । आषाढाश्चोत्तराः सिंहोपवेशनसमा मताः ॥ ६२३ ॥

लोके तु स्रग्मालायाम्-तुरगमुखसदृक्षं योनिरूपं क्षुराभम् । शकटसमभथैणस्योक्तमाङ्गेन तुल्यम् । मणिगृहशरचक्रनाभिशालोपमं भं, शयनसदृशमन्यच्चात्र पर्यंकरूपम् ॥ हस्ताकारनिभं च मौक्तिकनिभं चान्यत् प्रवालोपमम्, धिष्ण्यं तोरणावत्स्थितं मणिनिभं सत्कुण्डलाभं परम् । क्रुध्यत्केसरिविक्रमेण सदृशं शय्यासमानं परम्, चान्यद्दन्तिविलासवत्स्थितमतः शृंगाटकव्यक्ति च ॥ त्रिविक्रमाभं च मृदङ्गरूपं, वृत्तं ततोऽन्यद्यमलद्वयाभम् । पर्यङ्करूपं मुरजानुकारमित्येवमश्वादिभ-चक्ररूपम् ॥ इत्याकृतिः ॥ ११ ॥ सप्तषष्टिलवैः सप्तविंशत्याभ्यधिकान्यथ । योगो नवमुहूर्त्तानि, शशिनाभिजितो मतः ॥

ज्येष्टाश्लेषाभरण्यार्द्रा, स्वातिश्च शततारिका । मुहूर्त्तानि पञ्चदश, योग एषां सुधांशुना ॥ ६२४ ॥
उत्तरात्रितयं ब्राह्मी, विशाखा च पुनर्वसू । पञ्चचत्वारिंशदेषां, मुहूर्त्तान् योग इन्दुना ॥ ६२५ ॥
पञ्चदशानां शेषाणामुडूनां शशिना सह । योगस्त्रिंशन्मुहूर्त्तानीत्येवमाहुर्जिनेश्वराः ॥ ६२६ ॥
प्रयोजनं त्वेषाम् । मृते साधौ पञ्चदशमुहूर्त्त नैव पुत्रकः । एकः त्रिंशन्मुहूर्त्तैस्तु क्षेप्यः शेषैस्तु भैरुभौ ॥
एतान्यर्द्धसार्द्धसमक्षेत्राण्याहुर्यथाक्रमम् । अथैषां रविणा योगो, यावत्कालं तदुच्यते ॥ ६२७ ॥
मुहूर्त्तैरेकविंशत्याढ्यानि रात्रिंदिवानि षट् । अर्द्धक्षेत्राणामुडूनां, योगो विवस्वता सह ॥ ६२८ ॥
सार्द्धक्षेत्राणां तु भानां, योगो विवस्वता सह । त्रिभिर्मुहूर्त्तैर्युक्तानि, रात्रिंदिवानि विंशतिः ॥ ६२९ ॥
समक्षेत्राणामुडूनामहोरात्रांस्त्रयोदश । मुहूर्त्तैश्च द्वादशभिरधिकान् रविसंगतिः ॥ ६३० ॥
रात्रिंदिवानि चत्वारि, षण्मुहूर्त्ताधिकानि च । नक्षत्राभिजित् चारं, चरत्युष्णरुचा सह ॥ ६३१ ॥
अत्रायमाम्नायः ।
सप्तषष्ट्युद्भवानंशानहोरात्रस्य यावतः । यन्नक्षत्रं चरत्यत्र, रजनीपतिना सह ॥ ६३२ ॥
तन्नक्षत्रं तावतोऽहोरात्रस्य पञ्चमान् लवान् । भानुना चरतीत्यत्र, दृष्टान्तोऽप्युच्यते यथा ॥ ६३३ ॥
सप्तषष्टिलवानेकविंशतिं शशिना सह । चरत्यभिजिदर्केण, तावतः पञ्चमान् लवान् ॥ ६३४ ॥
अहोरात्रस्येति शेषः ॥
अथैकविंशतिः पञ्चभक्ता दिनचतुष्टयम् । दद्यादेकोंशकः शेषस्त्रिंशता स निहन्यते ॥ ६३५ ॥
जाता त्रिंशत् अथैतस्याः, पञ्चभिर्भजने सति । षण्मुहूर्त्ताः करं प्राप्ता, एवं सर्वत्र भावना ॥ ६३६ ॥
तथाहुः । "जं रिक्खं जावइए, वच्चइ चंदेण भागसत्तट्ठी । तं पणभागे राइंदियस्स सुरेण तावइए" ॥
सप्तषष्टिस्तदर्द्धं च, चतुस्त्रिंशं तथा शतम् । समार्द्धसार्द्धक्षेत्रेषु, सप्तषष्टिलवाः क्रमात् ॥ ६३७ ॥
इति सूर्येन्दुयोगाद्धामानम् ॥ १२ ॥

ऋक्षेषु येषु मासानां, प्रायः परिसमाप्तयः । तानि माससमाख्यानि, स्युः ऋक्षाणि कुलाख्यया ॥ ६३८ ॥
प्रायोग्रहणतश्चात्र, कदाप्युपकुलोडुभिः । समाप्तिर्जायते मासां, भैः कुलोपकुलैरपि ॥ ६३९ ॥
कुलोडुभ्योऽधस्तनानि, भवन्त्युपकुलान्यथ । स्युः कुलोपकुलाख्यानि, तेभ्योऽप्यधस्तनानि च ॥ ६४० ॥
तानि चैवमाहुः ।
कुलभान्यश्विनी पुष्यो, मघा मूलोत्तरात्रयम् । द्विदैवतं मृगश्चित्राकृत्तिकावासवानि च ॥ ६४१ ॥
उपकुल्यानि भरणी ब्राह्मं पूर्वात्रयं करः ।
ऐन्द्रमादित्यमश्लेषा, वायव्यं पौष्णवैष्णवे । कुलोपकुलभान्यार्द्राभिजिन्मैत्राणि वारुणम् ॥ ६४२ ॥
कुलादिप्रयोजनं त्विदम् ।
पूर्वेषु जाता दातारः, संग्रामे स्थायिनां जयः । अन्येषु त्वन्यसेवार्ता, यायिनामसदाजयः ॥ ६४३ ॥
इति कुलाद्याख्यानिरूपणम् ॥ १३ ॥
धनिष्टाथोत्तराभद्रपदाश्विनी च कृत्तिकाः । मार्गः पुष्यश्चैव मघा, उत्तराफाल्गुनीति च ॥ ६४४ ॥
चित्रा विशाख्रा मूलं, चोत्तराषाढा यथाक्रमम् । श्रावणादिमासराकाः, प्रायः समापयन्ति यत् ॥ ६४५ ॥
तत एव पूर्णिमानां, द्वादशानामपि क्रमात् । एषामुडूनां नाम्ना स्युःर्नामधेयानि तद्यथा ॥ ६४६ ॥
श्राविष्ठी च प्रौष्ठपदी, तथैवाश्वयुजीत्यपि । कार्त्तिकी मार्गशीर्षी च, पौषी माघी च फाल्गुनी ॥ ६४७ ॥
चैत्री च वैशाख्री ज्येष्ठी, मौलीत्याख्या तथा परा । आषाढीत्यन्विता एताः, सदारूढाश्च कर्हिचित् ॥ ६४८ ॥
श्रविष्ठा स्याद्धनिष्ठेति, तयेन्दुयुक्तयान्विता । श्राविष्ठी पौर्णमासी स्यादेवमन्या अपि स्फुटम् ॥ ६४९ ॥
यदा चोपकुलाख्यानि, समापयन्ति पूर्णिमाः । पाश्चात्यानि तदैतेभ्यः, श्रवणादीन्यनुक्रमात् ॥ ६५० ॥
राकास्त्विमाः समाप्यन्ते, कुलोपकुलभैर्यदा । तदोपकुलपाश्चात्यैः, अभिजित्प्रमुखैरिह ॥ ६५१ ॥
यद्यप्यभिजिता क्वापि, राकापूर्त्तिः न दृश्यते । श्रुतियोगात्तथाप्येतत्, राकापूरकमुच्यते ॥ ६५२ ॥
यस्मिन् ऋक्षे पूर्णिमा स्यात्ततः पञ्चदशेऽथवा । चतुर्दशेऽमावास्या स्यात्, गणने प्रातिलोम्यतः ॥ ६५३ ॥
तद्यथा । माघे राका मघोपेताऽमावस्या च सवासवा । सवासवायां राकायां, श्रावणेऽमा मघान्विता ॥ ६५४ ॥
एवमन्यत्रापि भाव्यम् ॥ इत्यमावास्यापूर्णिमायोगकीर्त्तनम् ॥ १४ ॥
यदा यदा यैर्नक्षत्रैरस्तं यातैः समाप्यते । अहोरात्रः तानि वक्ष्ये, नामग्राहं यथाक्रमम् ॥ ६५५ ॥
तदा समाप्यते ऋक्षैः, रात्रिरप्येभिरेव यत् । उच्यते रात्रिनक्षत्राण्यप्यमून्येव तद्बुधैः ॥ ६५६ ॥
समापयति तत्राद्यानहोरात्रांश्चतुर्दश । नभोमास्युत्तराषाढा, सप्तैतान्यभिजित् तदा ॥ ६५७ ॥
ततः श्रवणमप्यष्टावेकोनत्रिंशदित्यमूः । धनिष्ठा श्रावणस्यान्त्यमहोरात्रं ततो नयेत् ॥ ६५८ ॥

नयेत् धनिष्ठाहोरात्रान्, भाद्रस्याद्यांश्चतुर्दश । ततः शतभिषक् सप्त, पूर्वाभद्रपदाष्ट च ॥ ६५९ ॥
सोत्तरान्त्यमहोरात्रं, सैवेषस्य चतुर्दश । ततः पौष्णं पञ्चदश, चरमं चैकमश्विनी ॥ ६६० ॥
अश्विन्येव कार्त्तिकस्य, नयत्याद्यांश्चतुर्दश । अहोरात्रान् पञ्चदश, भरण्येकं च कृत्तिकाः ॥ ६६१ ॥
समापयन्ति ता एव, सहस्याद्यांश्चतुर्दश । ब्राह्मी पञ्चदशान्त्यं च, मृगशीर्षं समापयेत् ॥ ६६२ ॥
पौषस्यापि तदेवाद्यानहोरात्रान् समापयेत् । चतुर्दश तथाऽऽर्द्राऽष्टौ, ततः सप्त पुनर्वसू ॥ ६६३ ॥
पुष्योऽस्यान्त्यमहोरात्रं, माघेऽप्याद्यांश्चतुर्दश । समापयेत् पञ्चदशाश्लेषा तथान्तिमं मघाः ॥ ६६४ ॥
पूरयन्ति फाल्गुनस्य, मघा आद्यांश्चतुर्दश । ततः पञ्चदश पूर्वाफाल्गुनी सोत्तरान्तिमम् ॥ ६६५ ॥
उत्तराफाल्गुनी चैत्रे, नयत्याद्यांश्चतुर्दश । ततो हस्तः पञ्चदश, चित्राहोरात्रमन्तिमम् ॥ ६६६ ॥
अहोरात्रांस्ततश्चित्रा, नयेच्चतुर्दशादिमान् । वैशाखस्य पञ्चदश, स्वातिरन्त्यं विशाखिका ॥ ६६७ ॥
समापयत्यथ ज्येष्ठे, विशाखाद्यांश्चतुर्दश । सप्तानुराधा ज्येष्ठाष्टौ, मूलः पर्यन्तवर्त्तिनम् ॥ ६६८ ॥
मूलः समापयत्याद्यानाषाढस्य चतुर्दश । पूर्वाषाढा पञ्चदशोत्तराषाढान्त्यवर्त्तिनम् ॥ ६६९ ॥

संग्रहश्चात्र । "सत्तट्ठ अभिसवणे, तह सयभिसए य पुव्वभद्दवए । अट्ठा पुण्णव्वसूए, रहा जेठा य अणुकमसो ॥ पन्नरसदिणे सेसा, रत्तिविरामं कुणंति णक्खत्ता । उत्तरसाढा आसाढचरिमदिवसा गणिज्जंति" ॥

प्रयोजनं त्वेषाम् ।

यथा नभश्चतुर्भागमारूढेऽर्के प्रतीयते । प्रथमा पौरुषी मध्यमह्नश्च व्योममध्यगे ॥ ६७० ॥
चतुर्भागावशेषं च, नभः प्राप्तेऽन्त्यपौरुषी । ज्ञायन्ते रजनीयामा, अप्येभिरुडुभिस्तथा ॥ ६७१ ॥

तथाहुरुत्तराध्ययने । "जं णेइ जया रत्तिं, णक्खत्तं तं मिणह चउप्पभागे । संपत्ते विरमेज्जा सज्झाओ पओसकालंमि ॥ तम्मेव य णक्खत्ते, गयण चउब्भागसावसेसंमि । वेरत्तियंपि कालं, पडिलेहित्ता मुणी कुणइ ॥ [अध्ययन - २६, गाथा १९-२०]

ग्रन्थान्तरे च । दह तेरह सोलहमे, विसमेइ सूरियाओ णक्खत्ता । मत्थयगयंमि णेयं, रयणी जा भाणपरिमाणम्" ॥

शीतकाले च दिनाधिकमानायां रात्रौ सूर्यभात् एकादशचतुर्दशसप्तदशैकविंशति-तमैर्नक्षत्रैर्नभोमध्यं प्राप्तैर्यथाक्रमं प्रथमादिप्रहरान्तः स्यादिति संप्रदायः ॥ लोके च ।

"रविरिक्खाओ गणियं, सिरसिखं जाव सत्तपरिहीणम् । सेसं दुगुणं किच्चा, तीया राई फुडा हवइ" ॥ इत्यादि बहुधा ॥

इत्यहोरात्रसमापकनक्षत्रकीर्तनम् ॥ १५ ॥ समाप्तं चेदं नक्षत्रप्रकरणम् ॥

विकालकोऽङ्गारकश्च, लोहिताङ्कः शनैश्चरः । आधुनिकः प्राधुनिकः, कणः कणक एव च ॥ ६७२ ॥
नवमः कणकणकस्तथा कणवितानकः । कणसन्तानकश्चैव, सोमः सहित एव च ॥ ६७३ ॥
अश्वसेनः तथा कार्योपगः कर्बुरकोऽपि च । तथाऽजकरको दुन्दुभकः शङ्खाभिधः परः ॥ ६७४ ॥
शङ्खनाभस्तथा शङ्खवर्णाभः कंस एव च । कंसनाभस्तथा कंसवर्णाभो नील एव च ॥ ६७५ ॥
नीलावभासो रूप्यी च, रूप्यावभासभस्मकौ । भस्मराशितिलतिलपुष्पवर्णदकाभिधाः ॥ ६७६ ॥
दकवर्णस्तथा कायोऽवंध्य इन्द्राग्निरेव च । धूमकेतुः हरिः पिङ्गलको बुद्धस्तथैव च ॥ ६७७ ॥
शुक्रो बृहस्पती राह्वगस्तिमाणवकास्तथा । कामस्पर्शश्च धुरकः, प्रमुखो विकटोऽपि च ॥ ६७८ ॥
विसन्धिकल्पः प्रकल्पः, स्युर्जटालारुणाग्नयः । षट्पञ्चाशत्तमः कालो, महाकालस्ततः परः ॥ ६७९ ॥
स्वस्तिकः सौवस्तिकश्च, वर्धमानः प्रलम्बकः । नित्यालोको नित्योद्योतः, स्वयंप्रभोऽवभासकः ॥ ६८० ॥
श्रेयस्करस्तथा क्षेमङ्कर आभङ्करोऽपि च । प्रभङ्करोऽरजाश्चैव, विरजानाम कीर्तितः ॥ ६८१ ॥
अशोको वीतशोकश्च, विमलाख्यो वितप्तकः । विवस्त्रश्च विशालश्च, शालः सुव्रत एव च ॥ ६८२ ॥
अनिवृत्तिश्चैकजटी, द्विजटी करिकः करः । राजार्गलः पुष्पकेतुः, भावकेतुरिति ग्रहाः ॥ ६८३ ॥
ग्रहास्तु सर्वे वक्रातिचारादिगतिभावतः । गतावनियतास्तेन, नैतेषां प्राक्तनैः कृता ॥ ६८४ ॥
गतिप्ररूपणा नापि, मण्डलानां प्ररूपणा । लोकात्तु केषाञ्चित्किञ्चिद्वृत्यादि श्रूयतेऽपि हि ॥ ६८५ ॥
मेरोः प्रदक्षिणावर्त्तं, भ्रमन्त्येतेऽपि मण्डलैः । सदानवस्थितैरेव, दिवाकरशशाङ्कवत् ॥ ६८६ ॥
नापि चक्रे तारकाणां, मण्डलादिनिरूपणम् । अवस्थायिमण्डलत्वाच्चन्द्राद्ययोगचिन्तनात् ॥ ६८७ ॥

तथोक्तं जीवाभिगमसूत्रे । "णक्खत्ततारगाणं, अवट्ठिया मंडला मुणेयव्वा । तेवि य पयाहिणावत्तमेव मेरुं अणुपरिंति" ॥

एवं स्वीन्दुग्रहऋक्षताराचारस्वरूपं किमपि न्यगादि ।
शेषं विशेषं तु यथोपयोगं, ज्योतिष्कचक्रावसरेऽभिधास्ये ॥ ६८८ ॥

विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिष-द्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्वप्रदीपोपमे । सर्गो निर्गलितार्थसार्थसुभगो विंशः समाप्तः सुखम् ॥ ६८९ ॥

इति श्री लोकप्रकाशे विंशतितमः सर्गः समाप्तः ।

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

अथैकविंशतितमः सर्गः

अथास्य जम्बूद्वीपस्य, परिक्षेपकमम्बुधिम् । कीर्त्तयामि कीर्त्तिगुरुप्रसादप्रथितोद्यमः ॥ १ ॥
तस्थुषो भोगिन इवावेष्ट्यैनं द्वीपशेवधिम् । क्षारोदकत्वादस्याब्धेर्लवणोद इति प्रथा ॥ २ ॥
चक्रवालतया चैष, विस्तीर्णो लक्षयोर्द्वयम् । योजनानां परिक्षेपपरिमाणमथोच्यते ॥ ३ ॥
एकाशीतिसहस्राढ्या, लक्षाः पञ्चदशाथ च । शतमेकोनचत्वारिंशताऽऽढ्यं किञ्चिदूनया ॥ ४ ॥
एषोऽस्य बाह्यपरिधिर्धातकीखण्डसन्निधौ । जम्बूद्वीपस्य परिधिर्यः स एवान्तरः पुनः ॥ ५ ॥
पूर्वपूर्वद्वीपवार्द्धिपरिक्षेपा हि येऽन्तिमाः । त एवाभ्यन्तरपाथोधिद्वीपेष्वभ्यन्तरा मताः ॥ ६ ॥
अभ्यन्तरबाह्यपरिक्षेपयोगेऽर्द्धिते सति । परिक्षेपा मध्यमाः स्युर्विनाऽऽद्यं द्वीपवार्द्धिषु ॥ ७ ॥
लक्षा नवाष्टचत्वारिंशत्सहस्राणि षट्शती । त्र्यशीतिश्च मध्यमोऽयं, परिधिर्लवणोदधौ ॥ ८ ॥
प्रवेशमार्गरूपो यस्तटाकादिजलाश्रये । भूप्रदेशः क्रमान्नीचः, सोऽत्र गोतीर्थमुच्यते ॥ ९ ॥
गोतीर्थं तच्च लवणाम्बुधावुभयतोऽपि हि । प्रत्येकं पञ्चनवतिं, सहस्रान् यावदाहितम् ॥ १० ॥
जम्बूद्वीपेवेदिकान्तेऽङ्गुलासंख्यांशसंमितम् । गोतीर्थं धातकीखण्डवेदिकान्तेऽपि तादृशम् ॥ ११ ॥

ततश्च—

अब्धावुभयतो यावद्गम्यतेऽशाङ्गुलादिकम् । भक्ते तस्मिन् पञ्चनवत्याऽऽप्तं यत्तन्मितोण्डता ॥ १२ ॥
यथा पञ्चनवत्यांशैरतिक्रान्तैः पयोनिधौ । भुवोऽशो हीयते पञ्चनवत्याऽङ्गुलमङ्गुलैः ॥ १३ ॥
योजनैश्च पञ्चनवत्यैकं योजनमप्यथ । शतैः पञ्चनवत्या च, योजनानां शतं ह्रसेत् ॥ १४ ॥
एवं च पञ्चनवतिसहस्रान्ते समक्षितेः । निम्नतोभयतोऽप्यत्र, जाता सहस्रयोजना ॥ १५ ॥

तथाहुः— "जत्थिच्छसि उव्वेहं, ओगाहित्ताण लवणसलिलस्स । पंचाणउइविभत्ते, जं लद्धं सो उ उव्वेहो ॥

ततश्च—

द्वयोर्गोतीर्थयोर्मध्ये, सहस्रयोजनोन्मितः । स्यादुद्वेधः सहस्राणि, दश यावत्समोऽभितः ॥ १६ ॥
जम्बूद्वीपवेदिकान्तेऽङ्गुलासङ्ख्यांशसंमितम् । सलिलं धातकीखण्डवेदिकान्तेऽपि तादृशम् ॥ १७ ॥
ततः पञ्चनवत्यांशैर्वर्द्धन्ते षोडशांशकाः । अङ्गुलैः पञ्चनवत्या, वर्द्धन्ते षोडशाङ्गुली ॥ १८ ॥

अत्रायमाम्नायः—

धातकीखण्डतो जम्बूद्वीपतो वा पयोनिधौ । जिज्ञास्यते जलोच्छ्रायो, यावत्स्वंशाङ्गुलादिषु ॥ १९ ॥
पञ्चोनशतभक्तेषु, सत्सु तेषु यदाप्यते । तत् षोडशगुणं यावत्तावांस्तत्र जलोच्छ्रयः ॥ २० ॥

यथाऽत्र पञ्चनवतेर्योजनानामतिक्रमे । विभज्यन्ते योजनानि, पञ्चोनेन शतेन वै ॥ २१ ॥
एकं योजनमाप्तं यत्तत्षोडशभिराहतम् । योजनानि षोडशैवं, ज्ञातस्तत्र जलोच्छ्रयः ॥ २२ ॥
तथाहुः क्षमाश्रमणमिश्राः— [बृहत्क्षेत्रसमास अधि. २. श्लो. ८६]
"जत्थिच्छसि उस्सेहं, ओगाहित्ताण लवणसलिलस्स । पंचाणउइविभत्ते, सोलसगुणिए गणियमाहु" ॥
एतच्च धातकीखण्डजम्बूद्वीपान्त्यभूमितः । दत्त्वा दवरिकां मध्ये, शिखोपरितलस्य वै ॥ २३ ॥
अपान्तराले च किमप्याकाशं यत् जलोज्झितम् । तत् सर्वं कर्णगत्यैतत्संबन्धीति जलैर्भृतम् ॥ २४ ॥
विवक्षित्वा मानमुक्तं, जलोच्छ्रयस्य निश्चितम् । मेरोरेकादशभागपरिहाणिरिवागमे ॥ २५ ॥

तथाहुः—श्रीमलयगिरिपादाः—"इह षोडशसहस्रप्रमाणायाः शिखायाः शिरसि उभयोश्च वेदिकान्तयोर्मूले दवरिकायां दत्तायां यदपान्तराले किमपि जलरहितमाकाशं तदपि कर्णगत्या तदाभाव्यमिति सजलं विवक्षित्वा विवक्षितमुच्यमानमुच्चत्वपरिमाणमवसेयं, यथामन्दरपर्वतस्यैकादश भागपरिहाणि" रिति ।

वस्तुतः पुनरुभयार्द्धीपयोर्वेदिकान्ततः । प्रदेशवृद्ध्योभयतो, वर्द्धतेऽम्बु क्रमात्तथा ॥ २६ ॥
यथाऽस्मिन् पञ्चनवतिसहस्रान्ते भवेज्जलम् । योजनानां सप्त शतान्युच्छ्रितं समभूतलात् ॥ २७ ॥
योजनानां सहस्रं चोद्वेधोऽत्र समभूतलात् । एवं सप्तदश शतान्युद्वेधोऽत्र पयोनिधेः ॥ २८ ॥
ततः परे मध्यभागे, सहस्रदशकातते । जलोच्छ्रयो योजनानां, स्यात्सहस्राणि षोडश ॥ २९ ॥
सहस्रमत्राप्युद्वेध, उच्छ्रयोद्वेधतस्ततः । योजनानां सप्तदश, सहस्राण्युदकोच्चयः ॥ ३० ॥
एवं जघन्योच्छ्रयोऽस्याङ्गुलासङ्ख्यांशसंमितः । उत्कर्षतो योजनानां, सहस्राणि च षोडश ॥ ३१ ॥
मध्यमस्तूच्छ्रयो वाच्यो, यथोक्ताम्नायतोऽम्बुधेः । तत्र तत्र विनिश्चित्य, जलोच्छ्रयमेनकधा ॥ ३२ ॥
अथास्य लवणाम्भोधेर्गणितं प्रतरात्मकम् । घनात्मकं च निर्णेतुं, यथाऽऽगममुपक्रमे ॥ ३३ ॥
लवणाम्बुधिविस्तारात्सहस्राणि दश स्फुटम् । शोधयित्वा शेषमर्द्धीकृतं दशसहस्रयुक् ॥ ३४ ॥
जातं पञ्चसहस्राढ्यं, लक्षमेकमिदं पुनः । अस्मिन् प्रकरणे कोटिरित्येवं परिभाषितम् ॥ ३५ ॥
अथैवंरूपया कोट्या, गणयेल्लवणाम्बुधेः । मध्यमं परिधेर्मानं, स्यादेवं प्रतरात्मकम् ॥ ३६ ॥
तच्चेदं—
सहस्रा नव कोटीनां, तथा नव शतान्यपि । एकषष्टिः कोटयश्च:, लक्षाः सप्तदशोपरि ॥ ३७ ॥
सहस्राणि पञ्चदश, योजनानामिदं जिनैः । प्रतरं लवणे प्रोक्तं, सर्वक्षेत्रफलात्मकम् ॥ ३८ ॥
मध्यभागे सप्तदश, सहस्राणि यदीरितम् । जलमानं तदनेन, प्रतरेणाहतं घनम् ॥ ३९ ॥
कोट्यः षोडश कोटीनां, लक्षास्त्रिनवतिस्तथा । एकोनचत्वारिंशच्च, सहस्राणि ततः परम् ॥ ४० ॥

सपञ्चदशकोटीनि, नव कोटीशतान्यथ । परिपूर्णा योजनानां, लक्षाः पञ्चाशदेव च ॥ ४१ ॥
एतावद् घनगणितं, कथितं लवणार्णवे । विलसत्केवलालोकविलोकितजगत्त्रयैः ॥ ४२ ॥
नन्वेतावद् घनमिह, कथमुत्पद्यते ? यतः । न सर्वत्र सप्तदश, सहस्राणि जलोच्छ्रयः ॥ ४३ ॥
किंतु मध्यभाग एव, सहस्रदशकावधि । अत्रोच्यते सत्यमेतत्तत्त्वमाकर्ण्यतां परम् ॥ ४४ ॥
अब्धेः शिखाया उपरि, द्वयोश्च वेदिकान्तयोः। दत्तायां दवरिकायामृज्यामेकान्ततः किल ॥ ४५ ॥
अन्तराले यदाकाशं, स्थितमम्बुधिवर्जितम् । तत्सर्वमेतदाभाव्यमित्यम्बुधितयाऽखिलम् ॥ ४६ ॥
विवक्षित्वा मानमेतन्निरूपितं घनात्मकम् । एतद्विवक्षाहेतुस्तु, गम्यः केवलशालिनाम् ॥ ४७ ॥
तथाहुर्दुष्षमाध्वान्तनिर्मग्नागमदीपकाः । विशेषणवतीग्रन्थे, जिनभद्रगणीश्वराः ॥ ४८ ॥

"एयं उभयवेइयंताओ सोलससहस्सुस्सेहस्स कन्नगईए जं लवणसमुद्दाभव्वं जलसुन्नंपि खित्तं तस्स गणियं, जहा मंदरस्स पव्वयस्स एक्कारसभागहाणी कण्णगइए आगासस्सवि तदाभव्वंति काऊण भणिया तहा लवणसमुद्दस्सवि."

मुखैश्चतुर्मुख इव, द्वारैश्चतुर्भिरेष च । जगत्याऽऽलिङ्गितो भाति, स्थितैर्दिक्षु चतसृषु ॥ ४९ ॥
पूर्वस्यां विजयद्वारं; शीतोदायाः किलोपरि । धातकीखण्डपूर्वार्द्धाद्विशंत्या लवणाम्बुधौ ॥ ५० ॥
द्वाराणि वैजयन्तादीन्यप्येवं दक्षिणादिषु । सन्त्यस्य दिक्षु तिसृषु, जम्बूद्वीप इव क्रमात् ॥ ५१ ॥
विजयाद्याश्च चत्वारो, द्वाराधिष्ठायकाः सुराः । ज्ञेयाः प्रागुक्तविजयसदृक्षाः सकलात्मना ॥ ५२ ॥
एतेषां राजधान्योऽपि, स्मृताः सर्वात्मना समाः । राजधान्या विजयया, प्राक्प्रपञ्चितरूपया ॥ ५३ ॥
एताः किंतु स्वस्वदिशि, क्षारोदकभयादिव । असङ्ख्यद्वीपपाथोधीनतीत्य परतः स्थिताः ॥ ५४ ॥
नाम्नैव लवणाम्भोधौ, रुचिरेक्षुरसोदके । योजनानां सहस्राणि, वगाह्य द्वादश स्थिताः ॥ ५५ ॥
सहस्राः पञ्चनवतिस्तिस्रो लक्षाः शतद्वयम् । अशीतियुक् योजनानां, क्रोशो द्वारमिहान्तरम् ॥ ५६ ॥
द्वाराणां परिमाणं च, निःशेषरचनाञ्चितम् । जम्बूद्वीपद्वारगतमनुसंधीयतामिह ॥ ५७ ॥
अथास्मिन्नम्बुधौ वेला, वर्द्धते हीयते च यत् । तत्रादिकारणीभूतान्, पातालकलशान् ब्रुवे ॥ ५८ ॥
सहस्रान् पञ्चनवतिं, वगाह्य लवणाम्बुधौ । योजनानां स एकैको, मेरोर्दिक्षु चतसृषु ॥ ५९ ॥
एवं च–
पातालकुम्भाश्चत्वारो, महालिञ्जरसंस्थिताः । वैरं स्मृत्वाऽब्धिना ग्रस्ता, अगस्त्यस्येव पूर्वजाः ॥ ६० ॥
वडवामुखनामा प्रागपाक्केयूपसंज्ञितः । प्रतीच्यां यूपनामायमुदीच्यामीश्वराभिधः ॥ ६१ ॥

दाक्षिणात्यकलशस्य बृहत्क्षेत्रसमासवृत्तौ केयूप इति नाम, प्रवचनसारोद्धारवृत्तौ केयूर इति, समवायाङ्गवृत्तौ स्थानाङ्गवृत्तौ च केतुक[1] इति ॥

---

१. केऊए इति देश्यशब्देन त्रयाणामप्यवगमनस्य नासंभवः ।

कालो महाकालनामा, वेलम्बश्च प्रभञ्जनः । क्रमादधीश्वरा एषां, पल्यायुषो महर्द्धिकाः ॥ ६२ ॥
समन्ततो वज्रमयात्मनामेषां निरूपिताः । बाहल्यतष्ठिङ्करिकाः, सहस्रयोजनोन्मिताः ॥ ६३ ॥
योजनानां सहस्राणि, दश मूले मुखेऽपि च । विस्तीर्णा मध्यभागे च, लक्षयोजनसंमिताः ॥ ६४ ॥
[२]एकप्रादेशिक्या श्रेण्या, मूलाद्विवर्द्धमानाः स्युः । मध्यावधि वक्रावधि, ततस्तथा हीयमानाश्च ॥ ६५ ॥

इति प्रवचनसारोद्धारवृत्तौ, परमेतत्तदोपपद्यते यद्येषां मध्यदेशे दश योजनसहस्राणि यावत् लक्षयोजनविष्कम्भता स्याद्, यतः प्रदेशवृद्ध्या ऊर्ध्वं पञ्चचत्वारिंशद्योजनसहस्रातिक्रम एव उभयतो मूलविष्कम्भाधिकायां पञ्चचत्वारिंशत्सहस्ररूपायां विष्कम्भवृद्धौ सत्यां यथोक्तोलक्षयोजनरूपो विष्कम्भः संपद्यते, एवं हानिरपि, सा त्वेषां मध्ये दश योजनसहस्राणि यावल्लक्षयोजनविष्कम्भता क्वाप्युक्ता न दृश्यते, तदत्र तत्त्वं बहुश्रुता विदन्ति ।

योजनानां लक्षमेकमवगाढा भुवोऽन्तरे । रत्नप्रभामूलभागं, द्रष्टुमुत्कण्ठिता इव ॥ ६६ ॥
लक्षद्वयं योजनानां, सहस्राः सप्तविंशतिः । सप्तत्याढ्यं शतमेकं, त्रयः क्रोशास्तथोपरि ॥ ६७ ॥
एतत्पातालकलशमुखानामन्तरं मिथः । एतन्मूलविभागानामप्येतावदिहान्तरम् ॥ ६८ ॥
उपपत्तिश्चात्र—एषां चतुर्णां वदनविस्तारपरिवर्जिते । पयोधिमध्यपरिधौ, चतुर्भक्ते मुखान्तरम् ॥ ६९ ॥
तथाऽब्धिमध्यपरिधेरेतेषां मध्यविस्तृतौ । शोधितायां चतुर्भक्ते, शेषे स्याज्जठरान्तरम् ॥ ७० ॥
योजनानां लक्षमेकं, सप्तत्रिंशत्सहस्रयुक् । सप्तत्याढ्यं शतं क्रोशास्त्रयस्तदिदमीरितम् ॥ ७१ ॥
कल्प्यन्तेऽशास्त्रयोऽमीषां, स चैकैकः प्रमाणतः । त्रयस्त्रिंशत्सहस्राणि, त्रयस्त्रिंशं शतत्रयम् ॥ ७२ ॥
योजनानां योजनस्य, तृतीयांशेन संयुतम् । अधस्तने तृतीयांशे, तत्र वायुर्विजृम्भते ॥ ७३ ॥
मध्यमे च तृतीयांशे, वायुर्वारि च तिष्ठतः । तृतीये च तृतीयांशे, वर्त्तते केवलं जलम् ॥ ७४ ॥
अन्येऽपि लघुपातालकलशा लवणाम्बुधौ । सन्ति तेषामन्तरेषु, क्षुद्रालिञ्जरसंस्थिताः ॥ ७५ ॥

तथोक्तं जीवाभिगमवृत्तौ—"तेषां पातालकलशानामन्तरेषु तत्र तत्र देशे यावत् क्षुद्रालिञ्जरसंस्थानाः क्षुल्लाः पातालकलशा प्रज्ञप्ता" इति, अत्रायं संप्रदायः—

जम्बूद्वीपवेदिकान्तादतीत्य लवणाम्बुधौ । सहस्रान् पञ्चनवतिं, तत्रायं परिधिः किल ॥ ७६ ॥
सल्लक्षद्वयनवतिसहस्रविस्तृतेर्भवेत् । नव लक्षाः सप्तदश, सहस्राणि च षट्शती ॥ ७७ ॥

अयं भावः, पञ्चनवतिः सहस्राः समुद्रसंबन्धिन एकपार्श्वे, तावन्त एव द्वितीयपार्श्वे, मध्ये चैकं लक्षं जम्बूद्वीपसंबन्धि, एवं द्विलक्षनवतिसहस्रविष्कम्भक्षेत्रस्य परिधिर्नव लक्षाः सप्तदश सहस्राः षट्शतीत्येवंरूपो भवतीति ॥

---

२. प्रदेशोऽत्र विवक्षितो भागः, एकस्मिन् प्रदेशे जलावगाहाभावात्, तद्वृद्धौ च समप्रमाणाविरोधात्, प्रत्यंशमेव वृद्धिरस्त्रेत्यर्थकमेतत् ।

चत्वारिंशत्सहस्रात्मा, शोध्यते मुखविस्तृतिः । महापातालकुम्भानामस्माद्राशेस्ततः स्थितम् ॥ ७८ ॥
अष्टौ लक्षाः षष्ट्यधिकाः, सहस्राः सप्तसप्ततिः । भागे चतुर्भिरेतेषां, लब्धं तत्रान्तरं भवेत् ॥ ७९ ॥
लक्षद्वयं सहस्राणामेकोनविंशतिस्तथा । सपञ्चषष्टिद्विशती, कुम्भानां महतां पृथक् ॥ ८० ॥
चतुर्ष्वप्यन्तरेष्वेषु, पङ्क्तयो नव नव स्थिताः । लघुपातालकुम्भानामाद्यपङ्क्तौ च ते स्मृताः ॥ ८१ ॥
प्रत्येकं द्वे शते पञ्चदशोत्तरे किलान्तरम् । पूर्वोक्तं गुरुकुम्भानामेवमेभिश्च पूर्यते ॥ ८२ ॥
एकैकस्योदरव्यासः, सहस्रयोजनात्मकः । ततः शतद्वयं पञ्चदशसहस्रताडितम् ॥ ८३ ॥
सहस्रैः पञ्चदशभिर्युक्तं लक्षद्वयं भवेत् । लघुकुम्भैरियद्बुद्धमेकैकस्यान्तरस्य वै ॥ ८४ ॥
शेषं सहस्राश्चत्वारो, द्विशती पञ्चषष्टियुक् । रुद्धं कथञ्चित्तत्प्रौढकुम्भान्तरमिथोऽन्तरैः ॥ ८५ ॥
परिधेर्वर्द्धमानत्वात्पङ्क्तौ पङ्क्तौ यथोत्तरम् । एकैककलशस्यापि, वृद्धिर्वाच्या वचस्विभिः ॥ ८६ ॥
ततः पङ्क्तौ द्वितीयस्यां, द्वे शते षोडशोत्तरे । पङ्क्तौ नवम्यामेवं स्युस्त्रयोविंशं शतद्वयम् ॥ ८७ ॥
एकसप्तत्युपेतानि, शतान्येकोनविंशतिः । एकैकस्मिन्नन्तरे स्युर्लघवः सर्वसङ्ख्यया ॥ ८८ ॥
चतुर्णामन्तराणां च, मिलिताः सर्वसङ्ख्यया । स्फुरच्चतुरशीतीनि, स्युः शतान्यष्टसप्ततिः ॥ ८९ ॥

अयं च संप्रदायो 'वीरं जयसेहरे' त्यादिक्षेत्रसमासवृत्त्यभिप्रायेण, बृहत्क्षेत्रसमासवृत्तौ जीवाभिगमवृत्त्यादौ त्वयं न दृश्यते ।

लघुपातालकलशा, अमी सर्वेऽप्यधिष्ठिताः । सदा महर्द्धिकैर्देवैः, पल्योपमार्द्धजीविभिः ॥ ९० ॥

अयं क्षेत्रसमासवृत्त्याद्यभिप्रायः, जीवाभिगमसूत्रवृत्तौ च अर्द्धपल्योपमस्थितिकाभिर्देवताभिः परिगृहीता इत्युक्तं ।

शतयोजनविस्तीर्णा, एते मूले मुखेऽपि च । मध्य सहस्रं विस्तीर्णाः, सहस्रं क्ष्मोदरे स्थिताः ॥ ९१ ॥
दशयोजनबाहल्यवज्रकुड्यमनोरमाः । वायुवायूदकाम्भोभिः, पूर्णत्र्यंशत्रयाः क्रमात् ॥ ९२ ॥
सयोजनतृतीयांशं, त्रयस्त्रिंशं शतत्रयम् । तृतीयो भागा एकैक, एषां निष्टङ्कितो बुधैः ॥ ९३ ॥
लघवोऽपि महान्तोऽपि, यावन्मग्ना भुवोन्तरे । उत्तुङ्गास्तावदेव स्युर्भूमीतलसमाननाः ॥ ९४ ॥
एषां पातालकुम्भानां, लघीयसां महीयसाम् । मध्यमेऽधस्तने चैवं, त्र्यंशे जगत्स्वभावतः ॥ ९५ ॥
समकालं महावाताः, संमूर्च्छन्ति सहस्रशः । क्षुभितैस्तैश्चोपरिस्थं, बहिर्निस्सार्यते जलम् ॥ ९६ ॥
तेन निस्सार्यमाणेन, जलेन क्षुभितोऽम्बुधिः । वेलया व्याकुलात्मा स्यादुद्धमन्निव वातकी ॥ ९७ ॥
जगत्स्वाभाव्यत एव, शान्तेषु तेषु वायुषु । पुनः पातालकुम्भानां, जलं स्वस्थानमाश्रयेत् ॥ ९८ ॥
जलेषु तेषु स्वस्थानं, प्राप्तेषु सुस्थितोदकः । स्वास्थ्यमापद्यतेऽम्भोधिर्वातकीव कृतौषधः ॥ ९९ ॥
मूर्च्छन्ति द्विरहोरात्रे, वाताः स्वस्थीभवन्ति च । ततो द्विः प्रत्यहोरात्रं, वर्द्धते हीयतेऽम्बुधिः ॥ १०० ॥

तथाह जीवाभिगमः—"लवणे णं भंते ! समुद्दे तीसाए मुहुत्ताणं कइखुत्तो अईरेगं वड्ढइ वा हायइ वा ?, गो० ! दुक्खुत्तो अइरेगं वड्ढइ वा हायइ वा."

राकादर्शादितिथिषु, चातिरेकेण तेऽनिलाः । क्षोभं प्रयान्ति मूर्च्छन्ति, तथा जगत्स्वभावतः ॥ १०१ ॥
ततश्च पूर्णिमाऽमादितिथिष्वतितमामयम् । वेलया वर्द्धते वार्द्धिर्दशम्यादिषु नो तथा ॥ १०२ ॥
लोकप्रथानुसारेण त्वेवमवोचं—

"यथा यथेन्दोर्निजनन्दनस्य, कालक्रमप्राप्तकलाकलस्य ।
आश्लिष्यतेऽब्धिर्मृदुभिः करागैस्तथा तथोद्वेलमुपैति वृद्धिम् ॥ १०३ ॥
दर्शे त्वपश्यन्नतिदर्शनीयं, निजाङ्गजं शीतकरं पयोधिः ।
विवृद्धवेलावलयच्छलेन, दुःखाग्नितप्तो भुवि लोलुठीति" ॥ १०४ ॥"

योजनानामुभयतो, विमुच्य लवणाम्बुधौ । सहस्रान् पञ्चनवतिं, मध्यदेशे शिखैधते ॥ १०५ ॥
योजानानां सहस्राणि, दशेयं पृथुलाऽभितः । चकास्ति वलयाकारा, जलभित्तिरिव स्थिरा ॥ १०६ ॥
सहस्राणि षोडशोच्चा, समभूमिसमोदकात् । योजनानां सहस्रं च, तत्रोद्वेधेन वारिधिः ॥ १०७ ॥
शिखामिषाद्धयोगपट्टं योगीव वारिधिः । ध्यायतीव परब्रह्म, जन्मजाड्योपशान्तये ॥ १०८ ॥
सुभगकरणीं यद्वा, हारिहारलतामिमाम् । श्यामोऽपि सुभगत्वेच्छुर्दधौ वार्द्धिः शिखामिषात् ॥ १०९ ॥
जम्बद्वीपोपाश्रयस्थान्, मुनीनुत निनंसिषुः । कृतोत्तरासङ्गसङ्गः, शिखावलयकैतवात् ॥ ११० ॥
पूर्णकुक्षि भृशं रत्नैरुन्मदिष्णुतयाऽथवा । पट्टबद्धोदर इव, विद्यादृप्तकुवादिवत् ॥ १११ ॥
भाति भूयोऽब्धिभूपालवृतो दैवतसेवितः । शिखामिषात्प्रमुकुटो, दधद्वा वार्द्धिचक्रिताम् ॥ ११२ ॥
पातालकुम्भसंमूर्च्छद्वायुविक्षोभयोगतः । उपर्यस्याः शिखायाश्च, देशोनमर्द्धयोजनम् ॥ ११३ ॥
द्वौ वारौ प्रत्यहोरात्रमुदकं वर्द्धतेतराम् । तत्प्रशान्तौ शाम्यति च, भवेद्वेलेयमूर्द्धगा ॥ ११४ ॥
तां च वेलामुच्छलन्तीं, दर्वीव्यग्रकराः सुराः । शमयन्ति सदा नागकुमारा जगतः स्थितेः ॥ ११५ ॥
तत्र जम्बूद्वीपदिशि, शिखावेलां प्रसृत्वरीम् । द्विचत्वारिंशत्सहस्रा, धरन्ति नागनाकिनः ॥ ११६ ॥
धातकीखण्डदिशि च, प्रसर्पन्तीमिमां किल । निवारयन्ति नागानां, सहस्राणि द्विसप्ततिः ॥ ११७ ॥
देशोनं योजनार्द्धं यद्वर्द्धतेऽम्बु शिखोपरि । षष्टिर्नागसहस्राणि, सततं वारयन्ति तत् ॥ ११८ ॥
लक्षमेकं सहस्राणि, चतुःसप्ततिरेव च । वेलन्धरा नागदेवा, भवन्ति सर्वसंख्यया ॥ ११९ ॥
एषामुपक्रमेणैव, निरुद्धा नावतिष्ठते । वेलेयं चपलाऽतीव, महेलेव रसाकुला ॥ १२० ॥
किंतु द्वीपस्थसंघार्हद्देवचक्रयादियुग्मिनाम् । पुण्याज्जगत्स्वभावाच्च, मर्यादां न जहाति सा ॥ १२१ ॥

इदं जीवाभिगमसूत्रवृत्त्यभिप्रायेण, पञ्चमाङ्गे तद्वृत्तौ च—"जया णं दीविच्चया ईसिं णो णं

तया सामुद्दया ईसिं, जया णं सामुद्दया ईसिं णो णं तया दीविच्चया ईसिं ?. गो० ! तेसिं णं वायाणं अन्नमन्नविवच्चासेणं लवणसमुद्दे वेलं नातिक्कमइ," "अन्योऽन्यव्यत्यासेन" यदैके ईषत् पुरोवातादिविशेषणा वान्ति तदेतरे न तथाविधा वान्तीत्यर्थः । वेलं नाइक्कमइ'त्ति तथाविधवायुद्रव्यसामर्थ्याद्वेलायास्तथास्वभावत्वाच्चे" त्युक्तं[1], अत्र ईसिं पुरोवातादिनि विशेषणानि त्वेवं–'ईसिं पुरोवाय'त्ति मनाक् सत्रेहवाताः 'पच्छा वाय'त्ति पथ्या वनस्पत्यादिहिता वायवः 'मंदा वाय'त्ति मन्दाः-शनैः शनैः संचारिणः अमहावाता इत्यर्थः 'महावाय'त्ति उद्दण्डा वाताः, अनल्पा इत्यर्थः ।

वेलन्धराणामेतेषां, भवन्त्यावासपर्वताः । अस्मिन्नेवाम्बुधौ पूर्वादिषु दिक्षु चतसृषु ॥ १२२ ॥

तथाहि—

जम्बूद्वीपवेदिकान्तात्पूर्वस्यां दिशी वारिधौ । गोस्तूपः पर्वतो भाति, वेलन्धरसुराश्रयः ॥ १२३ ॥
नानाजलाशयोद्भूतैः, शतपत्रादिभिर्यतः । गोस्तूपाकृतिभी रम्यो, गोस्तूपोऽयं गिरिस्ततः ॥ १२४ ॥
जलं यद्भासयत्यष्टयोजनीं परितोऽंशुभिः । ततो नाम्नोदकभासोऽपाच्यां वेलन्धराचलः ॥ १२५ ॥
पश्चिमायां शङ्खनामा, नगः सोऽप्यन्विताभिधः । शङ्खाभैः शतपत्राद्यैर्जलाश्रयोद्भवैर्वलसन् ॥ १२६ ॥
उत्तरस्यां दिशि वेलन्धरावासधराधरः । दकसीमाभिधः शीताशीतोदोदकसीमकृत् ॥ १२७ ॥
शीतोशीतोदयोर्नद्योः, श्रोतांसीह धराधरे । प्रतिघातं प्राप्नुवन्ति, दकसीमाभिधस्ततः ॥ १२८ ॥
एवं च शीताशीतोदे, पूर्वपश्चिमयोर्दिशोः । प्रविश्य वारिधौ याते, उदीच्यामिति निश्चयः[2] ॥ १२९ ॥
गोस्तूपे गोस्तूपसुरो, दकभासगिरौ शिवः । शङ्खे शङ्खो दकसीमपर्वते च मनःशिलः ॥ १३० ॥
सामानिकसहस्राणां, चतुर्णां च चतसृणाम् । पट्टाभिषिक्तदेवीनां, तिसृणामपि पर्षदाम् ॥ १३१ ॥
सैन्यानां सैन्यनाथनां, सप्तानामप्यधीश्वराः । आत्मरक्षिसहस्रैश्च, सेव्याः षोडशभिः सदा ॥ १३२ ॥
स्वस्वावासपर्वतानामाधिपत्यममी सदा । पालयन्ति पूर्वजन्मार्जितपुण्यानुसारतः ॥ १३३ ॥
आज्ञाप्रतीच्छका एषां, सन्त्येतदनुयायिनः । अनुवेलन्धरास्तेषां, विदिक्ष्वावासपर्वताः ॥ १३४ ॥
कर्कोटकाद्रिरैशान्यां, विद्युत्प्रभोऽग्निकोणके । कैलाशो वायवीयायां नैर्ऋत्यामरुणप्रभः ॥ १३५ ॥
कर्कोटकः कर्दमकः, कैलाशश्चारुणप्रभः । एषां चतुर्णामद्रीणामीशा गोस्तूपसश्रियः ॥ १३६ ॥
यथास्वमेषामष्टानां, रम्या दिक्षु विदिक्षु च । राजधान्यः स्वस्वनाम्ना, परस्मिन् लवणार्णवे ॥ १३७ ॥
असङ्ख्येयान् द्वीपवार्द्धीनतीत्य परतः स्थिते । योजनानां सहस्राणि, द्वगाह्य द्वादश स्थिताः ॥ १३८ ॥
जम्बूद्वीपवेदिकान्तादष्टापि स्वस्वदिक्ष्वमी । द्विचत्वारिंशत्सहस्रयोजनातिक्रमेऽद्रयः ॥ १३९ ॥

---

१ वातानां तथा वाते जगत्स्वभाववत् द्वीपस्थसङ्घादिकारणतायां का हानिः, तत्कृतश्च वेलोपगमाभावः, प्रतिकूलवातेन वेगेन वेलाया आगमः स्यात् शनैरागमस्तु दीपस्थसङ्घादिभावकृत एव, सकलेष्टप्राप्त्यनिष्टसमागमाभावस्यादृष्टकृतता ।

२ पूर्वतो महाप्रवाहागमे प्राक्स्थितजलस्योदगादिषु स्यादेव प्रवृत्तिः, तथा चोदकसीमाभिधानस्य सार्थकता ।

सुवर्णाङ्करत्नरूप्यस्फटिकैर्घटिताः क्रमात् । दिश्याश्चत्वारोऽपि शैलाः, सर्वे विदिक्षु रत्नजाः ॥ १४० ॥
अष्टाप्यमी योजनानां, सहस्रं सप्तभिः शतैः । एकविंशैः समधिकमुत्तुङ्गत्वेन वर्णिताः ॥ १४१ ॥
चतुःशतीं योजनानां, त्रिंशां क्रोशाधिकाममी । वसुधान्तर्गताः पद्मवेदिकावनमण्डिताः ॥ १४२ ॥
मूले सहस्रं द्वाविंशं, सर्वेऽपि विस्तृता अमी । त्रयोविंशानि मध्ये च, शतानि सप्त विस्तृताः ॥ १४३ ॥
योजनानां चतुर्विंशां, चतुःशतीमुपर्यमी । विस्तृताः सर्वतो व्यासज्ञानोपायोऽथ तन्यते ॥ १४४ ॥
योजनादिषु यावत्सूत्तीर्णेषु शिखराग्रतः । वेलन्धरपर्वतानां, विष्कम्भो ज्ञातुमिष्यते ॥ १४५ ॥
अतिक्रान्तयोजनादिरुपं तं राशिमञ्जसा । अष्टानवत्याऽभ्यधिकैर्गुणयेः पञ्चभिः शतैः ॥ १४६ ॥
जातं चैतेषां गिरिणामुच्छ्रयेण विभाजय । यल्लब्धं तच्चतुर्विंशचतुःशतयुतं कुरु ॥ १४७ ॥
कृते चैवं तत्र तत्र, विष्कम्भोऽभीप्सितास्पदे । वेलन्धराद्रिषु ज्ञेयो, दृष्टान्तः श्रूयतामिह ॥ १४८ ॥
सषष्टीनि शतान्यष्ट, द्वौ क्रोशौ च शिरोऽग्रतः । अतीत्य व्यासजिज्ञासा, चेदिदं गुण्यते तदा ॥ १४९ ॥
अष्टानवत्याढ्यपञ्चशत्यैवं पञ्च लक्षकाः । सहस्राः द्विः सप्त पञ्चशती सैकोनसप्ततिः ॥ १५० ॥
जातास्ते च हृताः सप्तदशशत्यैकविंशया । शतद्वयीं नवनवत्यधिकां ध्रुवमार्पयत् ॥ १५१ ॥
ततश्च सा चतुर्विंशैः, शतैश्चतुर्भिरन्विताः । त्रयोविंशा सप्तशती, जातेयं तत्र विस्तृतिः ॥ १५२ ॥
मध्यव्यासोऽयमेवैषां, सर्वत्रैवं विभाव्यताम् । स्यादुपायान्तरमेतन्मध्यविष्कम्भनिश्चये ॥ १५३ ॥
मूले शिरे च विष्कम्भौ, यौ तद्योगेऽर्द्धिते सति । सर्वत्र मध्यविष्कम्भो, लभ्योऽत्र भाव्यतां स्वयम् ॥ १५४ ॥
एषां वेलन्धराद्रीणां, मूलांशे परिधिं जिनाः । जगुः शतानि द्वात्रिंशत्, सह द्वात्रिंशतोनया ॥ १५५ ॥
मध्ये सषडशीतीनि, द्वाविंशतिः शतानि च । किञ्चित्समतिरेकाणि, परिक्षेपो निरूपितः ॥ १५६ ॥
उपरि स्यात्परिक्षेपः, शतान्येषां त्रयोदश । किञ्चिदूनैकचत्वारिंशता युक्तानि भूभृताम् ॥ १५७ ॥
द्विसप्ततिः सहस्राणि, शतमेकं चतुर्दशम् । योजनानामष्टभक्तयोजनस्य लवास्त्रयः ॥ १५८ ॥
अष्टानामेतदेतेषां, मूलभागे मिथोऽन्तरम् । वेलन्धरसुराद्रीणां, प्रत्ययश्चात्र दर्श्यते ॥ १५९ ॥
मूलभागे यदैतेषामन्तरं ज्ञातुमिष्यते । एकादशा पञ्चशत्येतदर्द्धगा तदन्विता ॥ १६० ॥
द्विचत्वारिंशत्सहस्रैर्वार्द्धिगैरेकतो यथा । क्रियते परतोऽप्येवमित्येतद् द्विगुणीकुरु ॥ १६१ ॥
पञ्चाशीतिः सहस्राणि, द्वाविंशान्यभवन्निह । मध्यस्थजम्बूद्वीपस्य, लक्षमेकं तु मील्यते ॥ १६२ ॥
एतेषां परिधिः पञ्च, लक्षा योजनसङ्ख्यया । पञ्चाशीतिः सहस्राणि, तथैकनवतिः परा ॥ १६३ ॥
अष्टानामप्यथाद्रीणां, व्यासोऽस्मादपनीयते । षट्सप्तत्याढ्यशतयुक्सहस्राष्टक संमितः ॥ १६४ ॥
अपनीतेऽस्मिंश्च पूर्वराशिरीदृग्विधः स्थितः । पञ्च लक्षाः सहस्राणि, षट्सप्ततिस्तथोपरि ॥ १६५ ॥

नव पञ्चदशाढ्यानि, शतान्येषामथाष्टभिः । भागे हृते लभ्यते यत्तदद्रीणां मिथोऽन्तरम् ॥ १६६ ॥
एषां समीपेऽम्बुवृद्धिर्जम्बूद्वीपदिशि स्फुटम् । समभूतलतुल्याम्भोऽपेक्षयोर्द्ध्वं पयोनिधौ ॥ १६७ ॥
नवोत्तरं योजनानां, शतत्रयं तथोपरि । पञ्चचत्वारिंशदंशाः पञ्चोनशतभाजिताः ॥ १६८ ॥
निश्चयः पुनरेतस्य, त्रैराशिकात्प्रतीयते । व्युत्पित्सूनां प्रमोदाय, तदप्यातस्य दर्श्यते ॥ १६९ ॥
यदि पञ्चसहस्रोनलक्षेण वर्द्धते जलम् । योजनानां सप्तशती, तदा तद्वर्द्धते कियत् ॥ १७० ॥
द्विचत्वारिंशत्सहस्रैरिति राशित्रयं लिखेत् । आद्यन्तयोस्तत्र राश्योः कार्यं शून्यापवर्त्तनम् ॥ १७१ ॥
एतयोर्हि द्वयो राश्योः, साजात्यादपवर्त्तनम् । घटते लाघवार्थं च, क्रियते गणकैरिदम् ॥ १७२ ॥
मध्यराशिः सप्तशती, द्विचत्वारिंशदात्मना । अत्येन राशिना गुण्यस्तथा चैवंविधो भवेत् ॥ १७३ ॥
नूनं सहस्राण्येकोनत्रिंशत्पूर्णा चतुःशती । ततः पञ्चनवत्याऽयं, भाज्यः प्रथमराशिना ॥ १७४ ॥
भागे हृते च यल्लब्धं, पानीयं तावदुच्छ्रितम् । जम्बूद्वीपदिश्यमीषां, समीपे तत्पुरोदितम् ॥ १७५ ॥
जम्बूद्वीपस्य दिश्येषां, गिरीणामन्तिके पुनः । गोतीर्थेन धरोद्वेधः, स्यात्समोर्वीव्यपेक्षया ॥ १७६ ॥
द्विचत्वारिंशदधिका, योजनानां चतुःशती । दश पञ्चनवत्यंशास्त्रैराशिकात्तु निश्चयः ॥ १७७ ॥
ननु पञ्चसहस्रोनलक्षान्ते यदि लभ्यते । भुवोऽवगाहः सहस्रस्तदाऽसौ लभ्यते कियान् ॥ १७८ ॥
द्विचत्वारिंशत्सहस्रपर्यन्त इति लिख्यते । राशित्रयं कार्यमाद्यान्त्ययोः शून्यापवर्त्तनम् ॥ १७९ ॥
मध्यराशिः सहस्रात्मा, द्विचत्वारिंशदात्मना । हतोऽन्त्येन द्विचत्वारिंशत्सहस्राणि जज्ञिरे ॥ १८० ॥
आद्येन पञ्चनवतिलक्षणेनाथ राशिना । भागे हृते लभ्यतेऽयमवगाहो यथोदितः ॥ १८१ ॥
योऽयं भूमेरवगाहो, यश्च प्रोक्तो जलोच्छ्रयः । एतद् द्वयं पर्वतानामुच्छ्रयादपनीयते ॥ १८२ ॥
अपनीतेऽवशिष्टं यत्तावन्मात्रो जलोपरि । जम्बूद्वीपदिश्यमीषां, गिरीणामयमुच्छ्रयः ॥ १८३ ॥
योजनानां नवशती, सैकोनसप्ततिस्तथा । चत्वारिंशद्योजनस्य, पञ्चोनशतजा लवाः ॥ १८४ ॥
अत्र चासर्गसंपूर्त्तिं, यत्र क्वाप्यविशेषतः । वक्ष्यन्तेऽशा अमी सर्वे, पञ्चोनशतभाजिताः ॥ १८५ ॥
शिखराग्रादधैतावदुत्तीर्य यदि चिन्त्यते । अत्र प्रदेशे विष्कम्भो, ज्ञेयोऽमीषामयं तदा ॥ १८६ ॥
षष्ट्याढ्यानि योजनानां, शतानि सप्त चोपरि । अशीतिर्योजनस्यांशाः, पञ्चोनशतसंभवा ॥ १८७ ॥
तिर्यक्क्षेत्रेणेयता च, जलवृद्धिरवाप्यते । किञ्चिदूनाष्टपञ्चाशदंशाढ्या पञ्चयोजनी ॥ १८८ ॥
जम्बूद्वीपदिशि प्रोक्तात्, पर्वतानां समुच्छ्रयात् । स्यादस्यामपनीतायां, शिखादिशि नगोच्छ्रयः ॥ १८९ ॥
स चायं–
योजनानां नवशती, त्रिषष्ट्याऽभ्यधिका किल । सप्तसप्ततिरंशाश्च, तथाऽत्र स्याज्जलोच्छ्रयः ॥ १९० ॥

योजनानां पञ्चदशाः, शतास्त्रयोऽष्ट चांशकाः । चतुःशती च पञ्चाशा, दशांशाश्च धरोण्डता ॥ १९१ ॥
एवं वेलन्धरावासपर्वतानां यथामतिः । स्वरूपं दर्शितं किञ्चिज्जीवाभिगमवर्णितम् ॥ १९२ ॥
सुमेरुतः पश्चिमायां, जम्बूद्वीपान्त्यभूमितः । सहस्रान् द्वादशातीत्य, लवणाम्भोनिधाविह ॥ १९३ ॥
योजनानां सहस्राणि, द्वादशायतविस्तृतः । शोभते गौतमद्वीपः, स्थानं सुस्थितनाकिनः ॥ १९४ ॥
सप्तत्रिंशत्सहस्राणि, योजनानां शतानि च । नवाष्टचत्वारिंशानि, द्वीपेऽस्मिन् परिधिर्भवेत् ॥ १९५ ॥
द्वे गव्यूते जलादूर्ध्वमुच्छ्रितोऽब्धिशिखादिशि । अन्तेऽस्यास्मिन्नम्बुवृद्धिस्त्रैराशिकात्प्रतीयते ॥ १९६ ॥
तथाहि—सहस्रेषु द्वादशसु, द्वीपोऽयं तावदाततः । चतुर्विंशतिरित्येवं, सहस्रा वारिधेर्गताः ॥ १९७ ॥
ततश्च—सहस्रपञ्चनवतिपर्यन्ते यदि लभ्यते । जलवृद्धिर्योजनानां, शतानि सप्त निश्चिता ॥ १९८ ॥
चतुर्विंशत्या सहस्रैः, कियतीयं तदाप्यते । राशित्रयेऽन्त्याद्ययोश्च, कार्यं शून्यापवर्त्तनम् ॥ १९९ ॥
मध्यराशिः सप्तशती, गुणितोऽन्त्येन राशिना । चतुर्विंशतिरूपेण, सहस्राः षोडशाभवन् ॥ २०० ॥
ततश्च पञ्चनवतिरूपेणान्त्येन राशिना । विभज्यते ततो लब्धं, षट्सप्तत्यधिकं शतम् ॥ २०१ ॥
अशीतिः पञ्चनवतिभागाश्चैतावती किल । गौतमद्वीपपर्यन्ते, जलवृद्धिः शिखादिशि ॥ २०२ ॥
जम्बूद्वीपदिश्यमुष्य, राशेरर्द्धं जलोच्छ्रयः । युक्तश्चैष सहस्राणां, द्वादशानामतिक्रमे ॥ २०३ ॥
ततः पूर्वोक्तस्य राशेरर्द्धं यदिदमास्थितम् । अष्टाशीतिर्योजनानि, चत्वारिंशत्तथा लवाः ॥ २०४ ॥
इयान् जम्बूद्वीपदिशि, द्वीपस्यास्योच्छ्रयो जलात् । शिखादिगुदितद्वीपोच्छ्रयः क्रोशद्वयाधिकः ॥ २०५ ॥
त्रिंशत्पञ्चनवत्यंशाः, षड्विंशा शतयोजनी । भूनिम्नताऽस्मिन् पर्यन्ते, द्विगुणा च शिखादिशि ॥ २०६ ॥
एवं च—
मूलादुच्चो द्वीपदिशि, चतुर्दशं शतद्वयम् । क्रोशद्वयाधिकं पञ्चनवत्यंशाश्च सप्ततिः ॥ २०७ ॥
चतुःशती योजनानामेकोनत्रिंशताऽधिका । पञ्चचत्वारिंशदंशा, द्वौ क्रोशौ च शिखादिशि ॥ २०८ ॥
वनाढ्यया पद्मवेद्या, द्वीपोऽयं शोभतेऽभितः । नीलरत्नालियुग्मुक्तामण्डलेनेव कुण्डलम् ॥ २०९ ॥
द्वीपस्य मध्यभागेऽस्य, रत्नस्तम्भशताञ्चितम् । भौमेयमस्ति भवनं, क्रीडावासाभिधं शुभम् ॥ २१० ॥
द्वाषष्टिं योजनान्येतद्, द्वौ क्रोशौ च समुच्छ्रितम् । योजनान्येकत्रिंशतं, क्रोशाधिकानि विस्तृतम् ॥ २११ ॥
एतस्यावसथस्यान्तर्भूमिभागे मनोरमे । मध्यदेशे महत्येका, शोभते मणिपीठिका ॥ २१२ ॥
योजनायामविष्कम्भा, योजनार्द्धं च मेदुरा । उपर्यस्याः शयनीयं, भोग्यं सुस्थितनाकिनः ॥ २१३ ॥
सुस्थितः सुस्थिताभिख्यो, लवणोदधिनायकः । चतुःसामानिकसुरसहस्राराधितक्रमः ॥ २१४ ॥
परिवारयुजां चारुरुचां चतसृणां सदा । पट्टाभिषिक्तदेवीनां, तिसृणामपि पर्षदाम् ॥ २१५ ॥
सप्तानां सैन्यसेनान्यामात्मरक्षकनाकिनाम् । षोडशानां सहस्राणामन्येषामपि भूयसाम् ॥ २१६ ॥

सुस्थिताख्यराजधानीवास्तव्यानां सुधाभुजाम् । भुङ्क्ते स्वाम्यं तत्र भूरिसुराराधितशासनः ॥ २१७ ॥
रत्नद्वीपादिपतयो, लवणाम्भोधिवासिनः । देव्यो देवाश्च ते सर्वेऽप्यस्यैव वशवर्त्तिनः ॥ २१८ ॥
राजधानी सुस्थितस्य, लवणाधिपतेः किल । प्रतीच्यां गौतमद्वीपादसङ्ख्यद्वीपवारिधीन् ॥ २१९ ॥
अतीत्य तिर्यगन्यस्मिल्लवणाम्भोनिधौ भवेत् । योजनानां सहस्रैर्द्वादशभिर्विजयोपमा ॥ २२० ॥
जम्बूद्वीपवेदिकान्तात्, प्रतीच्यामेव मेरुतः । योजनानां सहस्राणि, द्वादशातीत्य वारिधौ ॥ २२१ ॥
स्युश्चत्वारो रविद्वीपा, द्वौ जम्बूद्वीपचारिणोः । भान्वोर्द्वौ चार्वाक् शिखाया, लवणाम्बुधिचारिणोः ॥ २२२ ॥
मेरोः प्राच्यां दिशि जम्बूद्वीपस्य वेदिकान्ततः । स्युर्योजनसहस्राणां, द्वादशानामनन्तरम् ॥ २२३ ॥
चत्वारोऽत्र शशिद्वीपा, द्वौ जम्बूद्वीपचारिणोः । इन्द्वोर्द्वौ चार्वाक् शिखाया, लवणोदधिचारिणोः ॥ २२४ ॥
तथैव धातकीखण्डवेदिकान्तादतिक्रमे । स्युर्योजनसहस्राणां, द्वादशानामिहाम्बुधौ ॥ २२५ ॥
जम्बूद्वीपस्थायिमेरोः, प्रतीच्यां दिशि निश्चितम् । अष्टौ दिनकरद्वीपा, दीपा इव महारुचः ॥ २२६ ॥
बहिः शिखायाश्चरतोर्द्वौ द्वीपावर्कयोर्द्वयोः । षट् षण्णां धातकीखण्डार्वाचीनार्द्धप्रकाशिनाम् ॥ २२७ ॥
तथैव धातकीखण्डवेदिकान्तादनन्तरम् । योजनानां सहस्रेषु, गतेषु द्वादशस्विह ॥ २२८ ॥
प्राच्यां जम्बूद्वीपमेरोः, सन्त्यष्टौ लवणोदधौ । शशिद्वीपास्तत्र च द्वौ, शिखायाश्चरतोर्बहिः ॥ २२९ ॥
षडन्ये धातकीखण्डार्वाक्तनार्द्धप्रचारिणाम् । षण्णां हिमरुचामेवमेते सर्वेऽपि संख्यया ॥ २३० ॥
स्युश्चतुर्विंशतिश्चन्द्रसूर्यद्वीपाः सर्वेऽप्यमी । गौतमद्वीपसदृशा, मानतश्च स्वरूपतः ॥ २३१ ॥
जलोच्छ्रयावगाहादि, सर्वं ततोऽविशेषितम् । गौतमद्वीपवद्ग्राह्यं सर्वेषामपि सर्वथा ॥ २३२ ॥
किंतु तत्रास्ति भौमेयमेषु प्रासादशेखरः । वाच्यः प्रत्येकमेकैको, भौमेयसममानकः ॥ २३३ ॥
प्रतिप्रासादमेकैकं, सिंहासनमनुत्तरम् । तेषु चन्द्राश्च सूर्याश्च, प्रभुत्वमुपभुञ्जते ॥ २३४ ॥
सुस्थितामरवत्सेव्याः, सामानिकादिभिः सुरैः । वर्षलक्षसहस्राढ्यपल्योपमायुषः क्रमात् ॥ २३५ ॥
एतेषां राजधान्योऽपि, स्वस्वदिक्षु मनोरमाः । स्युः सुस्थितपुरीतुल्याः, परस्मिल्लवणार्णवे ॥ २३६ ॥
ये तु सन्त्यन्तरद्वीपाः, षट्पञ्चाशदिहाम्बुधौ । निरूपितास्ते हिमवद्गिरिप्रकरणे मया ॥ २३७ ॥
एवमेकाशीतिरस्मिन्, द्वीपा लवणवारिधौ । वेलन्धराचलाश्चाष्टौ, दृष्टा दृष्टागमाब्धिभिः ॥ २३८ ॥
महापातालकलशाश्चत्वारो लघवश्च ते । सहस्राः सप्तचतुरशीतिश्चाष्टौ शतानि च ॥ २३९ ॥
रत्नद्वीपादयो येऽन्ये, श्रूयन्तेऽम्भोनिधाविह । द्वीपास्ते प्रतिपत्तव्याः, प्राप्तरूपैर्यथागमम् ॥ २४० ॥
सुधांशवोऽस्मिंश्चत्वारश्चत्वारोऽर्काश्च तोयधौ । संचरन्ति समश्रेण्या, जम्बूद्वीपेन्दुभानुभिः ॥ २४१ ॥
यदा जम्बूद्वीपगतश्चारं चरति भानुमान् । एको मेरोर्दक्षिणस्यां, तदाऽस्मिन्नम्बुधावपि ॥ २४२ ॥
तेन जम्बूद्वीपगेन, समश्रेण्या व्यवस्थितौ । दक्षिणस्यामेवमेरोर्द्वौ चारं चरतो रवी ॥ २४३ ॥

एकस्तत्रार्वाक् शिखायाः, समश्रेण्या सहामुना । शिखायाः परतोऽन्योऽध्यावुक्षेव युगयन्त्रितः ॥ २४४ ॥
एवमुत्तरतो मेरोर्या, जम्बूद्वीपगो रविः । द्वौ पुनस्तत्समश्रेण्या, चरतोऽर्काविहाम्बुधौ ॥ २४५ ॥
तदा च चरतोर्जम्बूद्वीपे पीयूषरोचिषोः । मेरोः प्राच्यां प्रतीच्यां च, समश्रेण्याऽम्बुधावपि ॥ २४६ ॥
द्वौ द्वौ शशाङ्कौ चरतः, पूर्वपश्चिमयोर्दिशोः । अर्वाक् शिखाया एकैक , एकैकः परतोऽपि च ॥ २४७ ॥
एवं रवीन्दवो येऽग्रे, सन्ति मर्त्योत्तरावधि । जम्बूद्वीपचंद्रसूर्यसमश्रेण्या चरन्ति ते ॥ २४८ ॥
यथोत्तरं यदधिकाधिकक्षेत्राक्रमेऽपि ते । पर्याप्नुवन्ति सह तद्गत्याधिक्यात् यथोत्तरम् ॥ २४९ ॥
दृश्यते भ्रमतां श्रेण्या, मेढीमनु गवामिह । अर्वाचीनापेक्षयाऽन्यगत्याधिक्यं यथोत्तरम् ॥ २५० ॥
एवं सर्वेऽनुवर्त्तन्ते, जम्बूद्वीपेन्दुभास्कराः । मण्डलान्तरसंचारायनाहर्वृद्धिहानिभिः ॥ २५१ ॥
ततो जम्बूद्वीप इव, मर्त्योत्तराचलावधि । यदाऽहर्मरुतोऽपाच्यां, तदैवोत्तरतोऽप्यहः ॥ २५२ ॥
सहैवैवं निशा मेरोः, पूर्वपश्चिमयोर्दिशोः । एवं जम्बूद्वीपरीतिः सर्वत्राप्यनुवर्त्तते ॥ २५३ ॥

उक्तं च सूर्यप्रज्ञप्तौ—'जया णं लवणसमुद्दे दाहिणड्ढे दिवसे भवति तया णं उत्तरड्ढेवि दिवसे भवति, तया णं लवणसमुद्दे पुरत्थिमपच्चत्थिमे राई भवइ, एवं जहा जंबुद्दीवे दीवे तहेव' एवं धातकीखण्डकालोदपुष्करार्द्धसूत्राण्यपि ज्ञेयानि ।

नन्वत्र षोडशसहस्रोच्चया शिखयाऽम्बुधौ । ज्योतिष्काणां संचरतां, व्याघातो न गतेः कथम् ? ॥ २५४ ॥
ब्रूमोऽत्र ये ज्योतिषिकविमाना लवणाम्बुधौ । ते भिन्दन्तः संचरन्ति, जलस्फटिकजा जलम् ॥ २५५ ॥
तदेतेषां जलकृतो, व्याघातो न गतेर्भवेत् । जलस्फटिकरत्नं हि, स्वभावाज्जलभेदकृत् ॥ २५६ ॥
ऊर्द्ध्वलेश्याकास्तथैते, विमाना लवणोदधौ । ततः शिखायामप्येषां, प्रकाशः प्रथतेऽभितः ॥ २५७ ॥
सामान्यस्फटिकोत्थानि, शेषेषु द्वीपवार्द्धिषु । ज्योतिष्काणां विमानानि, नीचैःसर्पन्महांसि च ॥ २५८ ॥

तथाह विशेषणवती—"सोलससाहस्सियाए सिहाए कहं जोइसियविधातो न भवति ?, तत्थ भन्नइ, जेणं सूरप'ण्णत्तीए भणियं—"

"जोइसियविमाणाइं, सव्वाइं हवंति फालियमयाइं । दगफालियामया, पुण लवणे जे जोइसविमाणा ॥"

जं सव्वदीवसमुद्देसु फालियामयाइं लवणसमुद्दे चेव केवलं दगफार्लियामयाइं तत्थेदमेव कारणं—मा उदगेण विघाओ भवउत्ति, जं सूरप'ण्णत्तीए चेव भणियं—

लवणंतो (णे जे) जोइसिया, उड्ढलेसा भवंति णायव्वा । तेण परं जोइसिया, अहलेसागा (मु) णेयव्वा ॥
तंपि उदगमालावभासणत्थमेव, लोगठिई एसत्ति"

१-२ यद्यप्यत्र सामान्येन सूर्यप्रज्ञप्तिनाम्ना गाथाद्वयमेतत् संमतितया दर्शितं परमेतत् सूर्यप्रज्ञप्तिनिर्युक्तिगतं ज्ञेयं, यतः 'अद्धकाविट्ठेति' गाथावृत्तौ श्रीदेवभद्रा यत् सूर्यप्रज्ञप्तिनिर्युक्तिः—'जोइसियविमाणाई' त्याद्युदितवन्तः ।

एवं चत्वारोऽत्र सूर्याश्चत्वारश्च सुधांशवः । नक्षत्राणां शतमेकं, प्रज्ञप्तं द्वादशोत्तरम् ॥ २५९ ॥
द्विपञ्चाशत्समधिकं, ग्रहाणां च शतत्रयम् । प्रमाणमथ ताराणां, यथाऽऽम्नायं निरूप्यते ॥ २६० ॥
द्वे लक्षे सप्तषष्टिश्च, सहस्राणि शतानि च । नवैव कोटाकोटीनां, प्रोक्तानि तत्त्ववेदिभिः ॥ २६१ ॥

अत्रायमाम्नायः—

यत्र द्वीपे समुद्रे वा, प्रमाणं ज्ञातुमिष्यते । ग्रहनक्षत्रताराणां, तत्रत्यचन्द्रसङ्ख्यया ॥ २६२ ॥
एकस्य शशिनो गुण्यो, वक्ष्यमाणः परिच्छदः । एवं ग्रहोडुताराणां, मानं सर्वत्र लभ्यते ॥ २६३ ॥

एकशशिपरिवारश्चायम्—

अष्टाशीतिर्ग्रहा ऋक्षाण्यष्टाविंशतिरेव च । शराश्चाङ्करसरसास्ताराणां कोटिकोटयः ॥ २६४ ॥
लवणाब्धौ च कालोदे, स्वयम्भूरमणेऽपि च । भूयस्यो मत्स्यमकरकूर्माद्या मत्स्यजातयः ॥ २६५ ॥
तत्रास्मिन्लवणाम्भोधावुत्सेधाङ्गुलमानतः । योजनानां पञ्च शतान्युत्कृष्टमत्स्यभूघनम् ॥ २६६ ॥
शतानि सप्त कालोदे, सहस्रमंतिमेऽम्बुधौ । गुर्वङ्गमानं मत्स्यानामल्पमत्स्याः परेऽब्धयः ॥ २६७ ॥
स्युर्योनिप्रभवा जातिप्रधानाः कुलकोटयः । लवणे सप्त मत्स्यानां, नव कालोदवारिधौ ॥ २६८ ॥
अर्द्धत्रयोदश तथा, मत्स्यानां कुलकोटयः । स्वयम्भूरमणाम्भोधौ, प्रज्ञप्ताः परमेष्ठिभिः ॥ २६९ ॥

तथा च जीवाभिगमे—'लवणे णं भंते ! समुद्दे कइ मच्छजातिकुलकोडिजोणी पमुहसयसहस्सा, पण्णत्ता ?, गो० ! लवणे सत्त, कालोए नव, सयंभूरमणे अद्धतेरसत्ति.'

जम्बूद्वीपे प्रविशन्ति, मत्स्या लवणतोयधेः । नवयोजनप्रमाणा, जगतीविवराध्वना ॥ २७० ॥

एवं च— क्वचिदयमुदधिः सुधांशुचन्द्रातपघनसारसमुज्ज्वलश्चकास्ति ।
गतशिखशिरसः शिखाभिरामो, रहसि हसन्निव वारिधीनशेषान् ॥ २७१ ॥

क्वचिदुदयदमन्दभानुतेजो, धुसृणरसप्रसरारुणान्तरालः ।
प्रकटमिव वहन्नदीषु रागं, हृदि रसतः पतितासु वल्लभासु ॥ २७२ ॥

क्वचिदनणुगुणैर्विभाति मुक्तामणिभिरुडुप्रतिबिम्बितैरिवान्तः ।
अविरतगतिखिन्नभानुमुक्तैः, क्वचन करप्रकरैरिव प्रवालैः ॥ २७३ ॥

क्वचन जलगजैर्नियुद्धसज्जैरसकृदुदस्तकरोद्धुरैः करालः ।
जगदुपकृतिकारिनीरपानोपनतघनेषु धृतप्रतीभशङ्कैः ॥ २७४ ॥

स्थलचरसमसर्वजातिसत्त्वाकृतिमदनेकझषौघपूर्णमध्यः ।
प्रलयतरलितं जगद्दधानो, हरिरिव कुक्षिनिकेतने कृपार्द्रः ॥ २७५ ॥

(प्रमुदितवदना प्रभाश्च) क्वचिदिह कमलायाः कौतुकादारमंत्या, जलचरनरकन्यालीषु हल्लीसकेन ।
अयमुपनयतीवापत्यरागैकगृह्यः, पवनजवनवेलागर्जिवाद्यं विनोदात् ॥ २७६ ॥

तरलतरङ्गोत्तुङ्गतुरङ्गतुरङ्गः, प्रसरदतुलवेलामत्तमातङ्गसैन्यः ।
अतिविपुलमनोज्ञद्वीपदुर्गैरुदग्रः, कलयति नृपलक्ष्मीं वाहिनीनां विवोढा ॥ २७७ ॥
स्वच्छोन्मूर्च्छदतुच्छमत्स्यपटलीपुच्छोच्छलच्छीकरः-च्छेदोत्सेकितबुद्बुदार्बुदमिषोद्भिन्नश्रमाम्भःकणः ।
हेलोत्प्लाविततुङ्गपर्वतशतोत्सर्पत्तरङ्गेद्धतो, वीरंमन्य इवैष चिक्रमिषया दिग्भूभृतां धावति ॥ २७८ ॥
कुद्धाखण्डलवज्रमण्डलगालज्ज्वालाकरालानलत्रस्तानेकगिरीन्द्रकोटिशरणं कल्पद्रुमाणां वनम् ।
तत्तद्वस्तुवदान्यतातरलितैरप्यर्थितो निर्जरैर्यो रत्नाकर इत्यनेकविभिर्नानाविकल्पैः स्तुतः ॥ २७९ ॥
निर्व्रीडक्रीडदम्भश्चरनरतरुणीक्लृप्तदीपोपचारैर्नूत्नैरत्नैरयत्नोज्जवलघनघृणिभिः क्वापि दीप्रांतरालः ।
क्वापि प्राप्तप्रकर्षः पृथुमकरकराकृष्टपाठीनपीठ-भ्रस्यन्नक्रप्रमोदोल्ललनचलजलोत्सिक्तडिंडीरपिंडैः ॥ २८० ॥
विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे, संपूर्तिं सुखमेकविंशतितमः सर्गो मनोज्ञोऽगमत् ॥ २८१ ॥

॥ इति श्रीलोकप्रकाशे एकविंशतितमः सर्गः समाप्तः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

॥ अथ द्वाविंशतितमः सर्गः प्रारभ्यते ॥

अथास्माल्लवणाम्भोधेरनन्तरमुपस्थितः । वर्ण्यते धातकीखण्डद्वीपो गुरुप्रसादतः ॥ १ ॥
वृक्षेण धातकीनाम्ना, यदसौ शोभितः सदा । वक्ष्यमाणस्वरूपेण, ततोऽयं प्रथितस्तथा ॥ २ ॥
चतुर्योजनलक्षात्मा, चक्रवालतयाऽस्य च । विस्तारो वर्णितः पूर्णज्ञानालोकितविष्टपैः ॥ ३ ॥
परिक्षेपः पुनरस्य, कुक्षिस्थद्वीपवारिधेः । त्रयोदशलक्षरुपः, क्षेत्रलब्धोऽयमीरितः ॥ ४ ॥
लक्षाः किलैकचत्वारिंशत्सहस्राण्यथो दश । योजनानां नवशती, किञ्चिदूनैकषष्टियुक् ॥ ५ ॥
अयं कालोदपार्श्वेऽस्य, परिधिश्चरमो भवेत् । आद्यस्तु लवणाम्भोधेरन्ते यः कथितः पुरा ॥ ६ ॥
मध्यमः परिधिर्लक्षाण्यष्टाविंशतिरेव च । षट्चत्वारिंशत्सहस्राः, पञ्चाशद्योजनाधिकाः ॥ ७ ॥
जम्बूद्वीपवदेषोऽपि, द्वारैश्चतुर्भिरञ्चितः । तेषां नामप्रमाणादि, सर्वं तद्वद्भवेदिह ॥ ८ ॥
किंत्वेतद्द्वारपालानां, विजयादिसुधाभुजाम् । परस्मिन् धातकीखण्डे, राजधान्यो निरूपिताः ॥ ९ ॥

दश लक्षा योजनानां, सहस्राः सप्तविंशतिः । पञ्चत्रिंशा सप्तशती, मिथो द्वारामिहान्तरम् ॥ १० ॥
दक्षिणस्यामुदीच्यां च, द्वीपस्यैतस्य मध्यगौ । इषुकारौ नगवरौ, जगदाते जगद्धितैः ॥ ११ ॥
योजनानां पञ्च शतान्युच्चौ सहस्रविस्तृतौ । चत्वारि योजनानां च, लक्षाण्यायामतः पुनः ॥ १२ ॥
अत एव स्पृष्टवन्तौ, कालोदलवणोदधी । आभ्यां संगन्तुमन्योऽन्यं, भुजाविव प्रसारितौ ॥ १३ ॥
कूटैश्चतुर्भिः प्रत्येकं, शोभितौ रत्नभासुरैः । चैत्यमेकैकं च तत्र, कूटे कालोदपार्श्वगे ॥ १४ ॥
आभ्यां द्वाभ्यामिषुकारपर्वताभ्यामयं द्विधा । द्वीपो निर्दिश्यते पूर्वपश्चिमार्द्धविभेदतः ॥ १५ ॥
यच्च जम्बूद्वीपमेरोः, प्राच्यां पूर्वार्द्धमस्य तत् । तस्य प्रतीच्यामर्द्धं यत्तत्पश्चिमार्द्धमुच्यते ॥ १६ ॥
द्वयोरप्यर्द्धयोर्मध्ये, एकैको मन्दराचलः । तयोरपेक्षया क्षेत्रव्यवस्थाऽत्रापि पूर्ववत् ॥ १७ ॥
तथाहि—अपाच्यामिषुकारो य, इहत्यमेर्वपेक्षया । पूर्वतस्तस्य भरतक्षेत्रं प्रथमतो भवेत् ॥ १८ ॥
ततो हैमवतक्षेत्रं, हरिवर्षं ततः परम् । ततो महाविदेहाख्यं, रम्यकाख्यं ततः परम् ॥ १९ ॥
ततश्च हैरण्यवतमैरावतं ततस्ततः । औत्तराह इषुकार, एषा पूर्वार्द्धसंस्थितिः ॥ २० ॥
पश्चिमायामपि तस्माद्दाक्षिणात्येषुकारतः । प्रथमं भरतक्षेत्रं, ततो हैमवताभिधम् ॥ २१ ॥
एवं यावदौत्तराह, इषुकारधराधरः । पूर्वार्द्धवत्क्षेत्ररीतिरेवं पश्चिमतोऽपि हि ॥ २२ ॥
द्वयोरप्यर्द्धयोरेषां, क्षेत्राणां सीमकारिणोः । षट् षट् वर्षधराः प्राग्वत्, सर्वेऽपि द्वादशोदिताः ॥ २३ ॥
जम्बूद्वीपवर्षधराद्रिभ्यो द्विगुणविस्तृताः । तुङ्गत्वेन तु तैस्तुल्याः, सर्वे वर्षधराद्रयः ॥ २४ ॥
आयामतश्चतुर्लक्षयोजनप्रमिता अमी । पर्यन्तस्पृष्टकालोदलवणोदधिवारयः ॥ २५ ॥
तथाह्यत्र हिमवतोर्गिर्योः शिखरिणोरपि । विष्कम्भोऽयं जिनैरुक्तः, पूर्वापरार्द्धभाविनोः ॥ २६ ॥
योजनानां शतान्येकविंशतिः पञ्च चोपरि । कलाः पञ्चैवाथ महाहिमवतोश्च रुक्मिणोः ॥ २७ ॥
अष्टावेव सहस्राणि, योजानानां चतुःशती । एकविंशत्यभ्यधिका, तथैवैककलाधिका ॥ २८ ॥
त्रयस्त्रिंशत्सहस्राणि, योजनानां शतानि षट् । स्फुरच्चतुरशीतीनि, कलाश्चतस्र एव च ॥ २९ ॥
विष्कम्भोऽयं निषधयोर्गिर्योर्नीलवतोरपि । द्वादशानामप्यमीषां, व्याससंकलना त्वियम् ॥ ३० ॥
लक्षमेकं योजनानां षट्सप्ततिसहस्रयुक् । शतान्यष्टौ द्विचत्वारिंशता समधिकानि च ॥ ३१ ॥
द्वे योजनसहस्रे च, विष्कम्भ इषुकारयोः । तस्मिंश्च योजितेऽत्राद्रिरुद्धं क्षेत्रमिदं भवेत् ॥ ३२ ॥
एकं लक्षं योजनानां, सहस्राण्यष्टसप्ततिः । द्विचत्वारिंशदधिकान्यष्टौ शतानि चोपरि ॥ ३३ ॥
अथैतल्लवणाम्भोधिपरिधेरपनीयते । द्वादशाभ्यां शताभ्यां च, तेन न्यूनः स भज्यते ॥ ३४ ॥

लब्धानि योजनसहस्राणि षट् षट् शतानि च । चतुर्दशाढ्यानि भागाश्चैकोनत्रिंशकं शतम् ॥ ३५ ॥
द्वादशाढ्यशतद्वन्द्वक्षुण्णैकयोजनोद्भवाः । तत्रेयत्पृथवस्तेऽंशा, द्विशती द्वादशाभवन् ॥ ३६ ॥
अथ चैतादृशैरंशैर्यथास्वमुपकल्पितैः । चतुर्दशानां क्षेत्राणां, लभ्यते मुखविस्तृतिः ॥ ३७ ॥
भागकल्पना चैवं—एकैकोऽंशो भरतयोस्तथैरवतयोरपि । चत्वारो हैमवतयो–र्हैरण्यवतयोरपि ॥ ३८ ॥
हरिवर्षाख्ययोरेवं, तथा रम्यकयोरपि । पूर्वापरार्द्धं गतयोरंशाः षोडश षोडश ॥ ३९ ॥
चतुष्षष्टिश्चतुष्षष्टिर्विदेहक्षेत्रयोर्द्वयोः । द्विशती द्वादश चैवं, भागाः स्युः सर्वसंख्यया ॥ ४० ॥
भरतैरवतेभ्यो वा, चतुर्घ्ना मुखविस्तृतिः । विज्ञेया हैमवतयोः, हैरण्यवतयोरपि ॥ ४१ ॥
षोडशघ्ना हरिवर्षरम्यकद्वयविस्तृतिः । तथा चतुष्षष्टिगुणा, विदेहक्षेत्रयोर्द्वयोः ॥ ४२ ॥
एवं च धातकीखण्डे, मध्यमात्परिधेरपि । पूर्वोदितादुक्तशैलरुद्धक्षेत्रविनाकृतात् ॥ ४३ ॥
द्वादशाढ्यशतद्वन्द्वविभक्तादुपकल्पितैः । मुखविस्तृतिवद्भागैर्लभ्यैषां मध्यविस्तृतिः ॥ ४४ ॥
तथाऽत्र कालोदासन्नात्पर्यन्तपरिधेरपि । नगरुद्धक्षेत्रहीनाद्, द्वादशद्विशताहृतात् ॥ ४५ ॥
मुखविस्तृतिवद्भागैर्यथास्वमुपकल्पितैः । चतुर्दशानां क्षेत्राणां, लभ्या पर्यन्तविस्तृतिः ॥ ४६ ॥
एवं च 'वक्ष्यमाणायां, क्षेत्रत्रिविधविस्तृतौ । मा भूत्संमोह इत्येष, आम्नायः प्राक् प्रपञ्चितः ॥ ४७ ॥'
किंच–कृत्वाऽद्रिरुद्धं क्षेत्रं तत्सहस्रद्वितयोज्झितम् । कर्त्तव्याश्चतुरशीतिस्तस्याप्यंशा दिशाऽनया ॥ ४८ ॥
एकैकोऽंशो हिमवतोस्तथा शिखरिणोरपि । अंशाश्चत्वारश्च महाहिमवतोश्च रुक्मिणोः ॥ ४९ ॥
षोडशांशा निषधयोर्नीलवन्नगयोरपि । एवं चतुरशीत्याऽंशैर्वर्षभूधरविस्तृतिः ॥ ५० ॥
अत एव च वक्ष्यन्ते, भागाश्चतुरशीतिजाः । वर्षाद्रिमानेऽस्मिन् पुष्करार्द्धेऽपि योजनोपरि ॥ ५१ ॥
क्षेत्राण्येतानि दधति, चक्रारकान्तराकृतिम् । क्षाराब्धिदिशि संकीर्णान्यन्यतो विस्तृतानि यत् ॥ ५२ ॥
जम्बूद्वीपक्षारवार्द्धिमध्यनाभिमनोहरे । वर्षाचलेषुकाराद्रिचतुर्दशारकाञ्चिते ॥ ५३ ॥
अस्मिन् महाद्वीपचक्रे, कालोदायःप्रधिस्थिरे । अरकान्तरवद्भान्ति, क्षेत्राणीति चतुर्दश ॥ ५४ ॥
क्षेत्राणामिह पर्यन्त, एषां कालोदसन्निधौ । मुखं च लवणाम्भोधिसमीपे परिभाषितम् ॥ ५५ ॥
ज्ञेयाः क्षेत्रप्रकरणे, सामान्येनोदिता लवाः । द्वादशद्विशतक्षुण्णयोजनोत्था बुधैरिह ॥ ५६ ॥
तत्रेह याम्येषुकारहिमवत्पर्वतान्तरे । पूर्वार्द्धे प्रथमं भाति, क्षेत्रं भरतनामकम् ॥ ५७ ॥
चतुर्दशानि षट्षष्टिशतानि विस्तृतं मुखे । एकस्य योजनस्यांशाश्चैकोनत्रिंशकं शतम् ॥ ५८ ॥
योजनानां सहस्राणि, मध्ये द्वादश विस्तृतम् । सैकाशीतिं पञ्चशतीं, तथा षट्त्रिंशतं लवान् ॥ ५९ ॥
अष्टादश सहस्राणि, योजनानां शतानि च । पञ्चैव सप्तचत्वारिंशद्योजनाधिकान्यथ ॥ ६० ॥

पञ्चपञ्चाशदधिकमंशानां नियतं शतम् । एतावद्भरतक्षेत्रं, पर्यन्ते विस्तृतं मतम् ॥ ६१ ॥
त्रैराशिकादिना भाव्यो, विस्तारोऽन्यत्र तु स्वयम् । तादृक्क्षेत्राकृत्यभावान्नात्र ज्याधनुरादिकम् ॥ ६२ ॥
मध्यभागेऽस्य वैताढ्य, उच्चत्वपृथुतादिभिः । जम्बूद्वीपस्थभरतवैताढ्य इव सर्वथा ॥ ६३ ॥
आयामतः किन्तु चतुर्लक्षयोजनसंमितः । युक्तश्चोभयतः पञ्चपञ्चाशता महापुरैः ॥ ६४ ॥
उत्तरार्द्धमध्यखण्डे, हिमवद्गिरिसन्निधौ । जम्बूद्वीपर्षभकूटतुल्योऽत्र वृषभाचलः ॥ ६५ ॥
शेषा सर्वापि व्यवस्था, षट्खण्डभवनादिका । जम्बूद्वीपभरतवद्, ज्ञेयाऽत्राप्यविशेषिता ॥ ६६ ॥
तथाऽत्र भरतादीनां, तैर्जम्बूद्वीपगैः सह । द्रव्यक्षेत्रकालभावपर्यायाः स्युः समाः क्रमात् ॥ ६७ ॥
परोऽस्माद् हिमवानद्रिः, पञ्चाढ्यानेकविंशतिम् । शतांस्ततो लवान् द्वाविंशतिं चतुरशीतिजान् ॥ ६८ ॥

ननु जम्बूद्वीपहिमवतो माने द्विगुणिते सति यथोक्ता योजनोपरि एकोनविंशतिजाः पञ्च भागा भवन्ति, अत्र च चतुरशीतिजा द्वाविंशतिरुक्तास्ततः कथमस्य ततो द्वैगुण्यं न व्याहन्यते ?, अत्रोच्यते—एषां भागानां द्वैविध्येऽपि विशेषः कोऽपि नास्ति, यतो यावदेकोनविंशतिजैः पञ्चभिर्भागैर्भवति तावदेव चतुरशीतिजैर्द्वाविंशत्यापि भवति, उभयत्रापि किञ्चिदधिकयोजनचतुर्थभागस्यैव जायमानत्वादिति, एवमग्रेऽपि भाव्यं ।

पद्महृदाभिधानोऽस्य, मस्तकेऽस्ति महाहृदः । योजनानां द्वे सहस्रे, दीर्घः सहस्रविस्तृतः ॥ ६९ ॥
दशयोजनरुपोऽस्योद्वेधोऽब्जवलयादि च । जम्बूद्वीपपद्महृद, इवेहापि विभाव्यताम् ॥ ७० ॥
एवं येऽन्ये वर्षधराचलेषु कुरुषु हृदाः । तथा नदीनां कुण्डानि, द्वीपाः कुण्डगताश्च ये ॥ ७१ ॥
अविशेषेण ते सर्वेऽप्युद्वेधोच्छ्रयमानतः । जम्बूद्वीपस्थायितत्तद्द्वीपकुण्डहृदैः समाः ॥ ७२ ॥
ततस्तदुद्विद्धतादि, तथाऽब्जवलयादि च । अनुच्यमानमप्यत्र, स्वयं ज्ञेयं यथाऽऽस्पदम् ॥ ७३ ॥
विष्कम्भायामतस्त्वेते, सर्वेऽपि द्विगुणास्ततः । व्यासोद्वेधाभ्यां च नद्यो, व्यासैर्वनमुखान्यपि ॥ ७४ ॥

तथाहुः—"वासहरकुरुसु दहा, नइण कुण्डाइं तेसु जे दीवा । उव्वेहुस्सेहतुल्ला, विक्खंभायामओ दुगुणा ॥
सव्वाओवि नईओ, विक्खंभोव्वेहदुगुणमाणाओ । सीयासीओयाणं, वणाणि दुगुणाणि विक्खंभे ॥
[बृहत्क्षेत्रसमासास अधि. ३. श्लो. ३९, ४०]

एवं च—गङ्गासिन्धुरक्तवतीरक्तेत्याख्यास्पृशामिह । षट्त्रिंशशतसङ्ख्यानां, नदीनां हृदनिर्गमे ॥ ७५ ॥
अर्ध्दार्द्धानि योजनानि, विष्कम्भो द्वादश स्मृतः । पर्यन्ते च पञ्चविंशं, योजनानां शतं भवेत् ॥ ७६ ॥
आसां तावन्ति कुण्डानि, विस्तृतान्यायतानि च । विंशं हि योजनशतं, द्वीपाः षोडशयोजनाः ॥ ७७ ॥
स्वर्णकूला रूप्यकूला, रोहिता रोहितांशिका । इत्यष्टादौ विस्तृताः स्युः, पञ्चविंशतियोजनीम् ॥ ७८ ॥
अन्ते च सार्द्धां द्विशतीं, सर्वत्रैतावदेव च । चतुर्विंशतिरप्यन्तर्नद्यः स्युरिह विस्तृताः ॥ ७९ ॥
चत्वारिंशा द्विशत्यासां, कुण्डेष्वायतिविस्तृती । द्वात्रिंशद्योजनान्यासां, द्वीपा आयतविस्तृताः ॥ ८० ॥

नारीकान्ता नरकान्ता, हरिकान्ताभिधा नदी । हरिसलिलेत्यष्टानां, सरितां मूलविस्तृतिः ॥ ८१ ॥
पञ्चाशद्योजनान्यासां, पर्यन्तविस्तृतिः पुनः । योजनानां पञ्च शतान्युक्तानि तत्त्ववेदिभिः ॥ ८२ ॥
आसां कुण्डायतिव्यासावशीतियुक् चतुःशती । चतुष्षष्टिर्योजनानि, द्वीपाश्चायतविस्तृताः ॥ ८३ ॥
शीताशीतोदाभिधानां, निम्नगानां चतसृणाम् । आद्यन्तयोः क्रमाद्व्यासः, शतं सहस्रमेव च ॥ ८४ ॥
सषष्टिर्नवशत्यासां, कुण्डेष्वायतिविस्तृती । अष्टाविंशं शतं चासां, द्वीपा आयतविस्तृताः ॥ ८५ ॥
षट्त्रिंशं शतमष्टौ च, पुनरष्टौ चतुष्टयम् । चतुर्विधानामित्यासामाद्यन्तोद्विद्धता क्रमात् ॥ ८६ ॥
गव्यूतं योजने सार्द्धे, द्वौ क्रोशौ पञ्चयोजनी । योजनं दश चैतानि, योजने द्वे च विंशतिः ॥ ८७ ॥
अन्तर्नदीनां सर्वासामपि प्रारभ्य मूलतः । पर्यन्तं यावदुद्वेधस्तुल्यः स्यात्पञ्चयोजनी ॥ ८८ ॥
स्वकीयमूलविस्तृत्या, जिह्विकाविस्तृतिः समा । मूलोद्वेधसमश्चासां सर्वासां जिह्विकोच्छ्रयः ॥ ८९ ॥
उक्तशेषं तु स्वरुपं, सकलं वेदिकादिकम् । एतास्वप्यनुसंधेयं, जम्बूद्वीपनदीगतम् ॥ ९० ॥
पूर्वाभिमुख्यः पूर्वार्द्धे कालोदे यान्ति निम्नगाः । क्षारोदमपरोन्मुख्योऽपरार्द्धे तु विपर्ययः ॥ ९१ ॥
आसामित्युक्तो विशेषः, प्रसङ्गाल्लाघवाय च । तत्र तत्र नाममात्रं, स्थानाशौन्याय वक्ष्यते ॥ ९२ ॥
अथ प्रकृतं–अथैतस्मात्पद्महृदान्नद्यस्तिस्रो विनिर्गताः । गङ्गासिन्धुरोहितांशाः, पूर्वापरोत्तराध्वभिः ॥ ९३ ॥
तत्र गङ्गा च सिन्धुश्च, पूर्वपश्चिमयोर्दिशोः । निर्गत्य स्वदिशोर्गत्वा, यथार्हं पर्वतोपरि ॥ ९४ ॥
स्वस्वावर्त्तनकूटाभ्यां, निवर्त्त्य दक्षिणामुखे । कुण्डे निपत्य विशतः, कालाक्षारोदधीं क्रमात् ॥ ९५ ॥
रोहितांशा तूत्तरस्यां, योजनानि नगोपरि । द्विपञ्चाशां पञ्चशतीं, त्रिपञ्चाशल्लवाधिकाम् ॥ ९६ ॥
अतिक्रम्य निजे कुण्डे, निपत्य योजनान्तरा । शब्दापातिगिरेः प्रत्यक्, प्रवृत्ता लवणेऽविशत् ॥ ९७ ॥
अथास्माद्धिमवच्छैलादुत्तरस्यां व्यवस्थितम् । क्षेत्रं हैमवताभिख्यमाकृत्या भरतोपमम् ॥ ९८ ॥
षट्विंशतिं सहस्राणि, योजनानां चतुःशतीम् । अष्टपञ्चाशां लवान्, द्वानवतिं विस्तृतं मुखे ॥ ९९ ॥
पञ्चाशतं सहस्राणि, चतुर्विंशं शतत्रयम् । चतुश्चत्वारिंशमंशशतं मध्ये च विस्तृतम् ॥ १०० ॥
योजनानां सहस्राणि, चतुःसप्ततिमन्ततः । नवत्याढ्यं शतं षण्णवत्याढ्यं च शतं लवान् ॥ १०१ ॥
मध्येऽस्य शब्दापातीति, वृत्तवैताढ्यपर्वतः । सहस्रयोजनोत्तुङ्गः सहस्रं विस्तृतायतः ॥ १०२ ॥
अयं जम्बूद्वीपशब्दापातिना सर्वथा समः । तद्वत्सप्तान्येऽपि वृत्तवैताढ्या इह तत्समाः ॥ १०३ ॥
अद्रिरस्यान्ते च महाहिमवान् योजनानि सः । एकविंशानि चतुरशीतिशतान्यथांशकान् ॥ १०४ ॥
पूर्वोक्तमानांश्चतुरो, विस्तीर्णस्तस्य चोपरि । पद्मैः परिष्कृतो भाति, महापद्माभिधो ह्रदः ॥ १०५ ॥
योजनानां सहस्राणि, चत्वार्येवायमायतः । विष्कम्भतो योजनानां, सहस्रद्वितयं भवेत् ॥ १०६ ॥

दक्षिणस्यामुदीच्यां, च, नद्यौ द्वे निर्गते ततः । रोहिता हरिकान्ता च, पर्वतोपर्युभे अपि ॥ १०७ ॥
योजनानां शतान् द्वात्रिंशतं गत्वा दशोत्तरान् । चतुश्चत्वारिंशतं च, भागान् जिह्विकया गिरिः ॥ १०८ ॥
पततः स्वस्वकुण्डेऽथ, कालोदं याति रोहिता । द्विधा कृत्वा हैमवतं, वैताढ्याद्योजनान्तरा ॥ १०९ ॥
हरिकान्ता च वैताढयाद्योजनद्वितयान्तरा । हरिवर्षं विभजंती, प्रयाति लवणोदधौ ॥ ११० ॥
अथोदीच्यां क्षेत्रमस्माद्धरिवर्षं विराजते । सश्रीकमध्यं यद्गन्धापातिवैताढ्यभूभृता ॥ १११ ॥
त्रयस्त्रिंशाष्टपञ्चाशच्छताढ्यां लक्षयोजनीम् । षट्पञ्चाशमंशशतं, विस्तीर्णमिदमानने ॥ ११२ ॥
द्वे लक्षे द्वादशशतीं, मध्येऽष्टानवतिं तथा । योजनानामंशशतं, द्विपञ्चाशं च विस्तृतम् ॥ ११३ ॥
योजनानां षण्णवत्या, सहस्रकैः समन्वितम् । लक्षद्वयं सप्तशतीं, त्रिषष्ट्याऽभ्यधिकां तथा ॥ ११४ ॥
अष्टचत्वारिंशमंशशतं पर्यन्तविस्तृतम् । शेषाऽस्य जम्बूद्वीपस्थहरिवर्षसमा स्थितिः ॥ ११५ ॥
क्षेत्रस्यास्य च पर्यन्ते, निषधो नाम भूधरः । त्रयस्त्रिंशत्सहस्राणि, योजनानां शतानि षट् ॥ ११६ ॥
स्याद्विस्तीर्णः स चतुरशीतीन्यंशाश्च षोडश । तिगिञ्छिनामा वर्वर्त्ति, महाह्रदोऽस्य चोपरि ॥ ११७ ॥
सहस्राणि योजनानामष्टावायामतः स च । विष्कम्भतस्तु चत्वारि, सहस्राणि भवेदसौ ॥ ११८ ॥
दक्षिणस्यामुदीच्यां च, ह्रदादस्मान्निरीयतुः । वाहिन्यौ हरिसलिलाशीतोदे ते नगोपरि ॥ ११९ ॥
योजनानां सहस्राणि, चतुर्दश शतानि च । अष्टौ द्विचत्वारिंशानि, परिक्रम्याष्ट चांशकान् ॥ १२० ॥
स्वस्वजिह्विकया स्वस्वकुण्डे निपततस्ततः । हरिः स्ववृत्तवैताढ्याद्योजनद्वितयान्तरा ॥ १२१ ॥
हरिवर्षाभिधं वर्षं, द्विधा विदधती सती । कालोदाब्धौ निपतति, रमेवाच्युतवक्षसि ॥ १२२ ॥
शीतोदा च देवकुरुभद्रसालविभेदिनी । चतुर्भिर्योजनैर्मेरोर्दूरस्था पश्चिमोन्मुखी ॥ १२३ ॥
प्रत्यग्विदेहविजयसीमाकरणकोविदा । गोत्रवृद्धेव मध्यस्था, यात्यन्ते लवणोदधिम् ॥ १२४ ॥
शीतोप्येवं नीलवतो, निर्गता केसरिह्रदात् । कुण्डोत्थितोत्तरकुरुभद्रसालप्रभेदिनी ॥ १२५ ॥
चतुर्भिर्योजनैर्मेरोर्दरस्था पूर्वतोमुखी । प्राग्विदेहान् विभजंती, याति कालोदवारिधौ ॥ १२६ ॥
वाच्योदीच्यां रम्यकान्ता, तथैवैरवतादिका । क्षेत्रत्रयी शिखर्याद्या, नीलान्ता च नगत्रयी ॥ १२७ ॥
यथेयं हरिवर्षान्ता, त्रिवर्षी भरतादिका । उक्ता हिमवदाद्या च, निषधान्ता नगत्रयी ॥ १२८ ॥
तद्धत्त्रिधा क्षेत्रमानमादिमध्यान्तगोचरम् । तावदायामविस्तारा, ह्रदा वर्षधरोपरि ॥ १२९ ॥
तावदेवातिक्रमणं, नदीनां पर्वतोपरि । सैवाकृतिर्नाममात्रे, विशेषः सोऽभिधीयते ॥ १३० ॥
ऐरावतमुदीच्येषुकारात्स्वस्वगिरेर्दिशि । शिखरी पर्वतोऽन्तेऽस्य, पुण्डरीकह्रदाञ्चितः ॥ १३१ ॥
अस्माद्रक्ता रक्तवती, स्वर्णकूला विनिर्ययुः । रक्तैरवतमध्येन, याति कालोदवारिधिम् ॥ १३२ ॥
लवणाब्धौ प्रविशति, तथैव रक्तवत्यथ । स्वर्णकूला तु कालोदं, हैरण्यवतमध्यगा ॥ १३३ ॥

परं शिखरिणः क्षेत्रं, हैरण्यवतनामकम् । विकटापातिना वृत्तवैताढ्येन सुशोभितम् ॥ १३४ ॥
ततो रुक्मी नाम महापुण्डरीकहृदाञ्चितः । गिरिस्ततो रूप्यकूलानरकान्ते विनिर्गते ॥ १३५ ॥
हैरण्यवंतमध्येन, क्षारोदं रूप्यकूलिका । कालोदं नरकान्ता च, याति रम्यकमध्यतः ॥ १३६ ॥
ततः परं रुक्मिगिरेः, क्षेत्रं राजति रम्यकम् । मध्ये माल्यवता वृत्तवैताढ्येन विभूषितम् ॥ १३७ ॥
ततोऽपि परतो भाति, नीलवान्नाम पर्वतः । महाहृदः केसरीति, तस्योपरि विराजते ॥ १३८ ॥
शीता च नारीकान्ता च, ततो नद्यौ निरीयतुः । नारीकान्ता रम्यकान्तर्व्यूढेति लवणोदधिम् ॥ १३९ ॥
शीता नदी तु पूर्वोक्तरीत्या कालोदवारिधौ । व्रजति प्राग्विदेहस्थविजयव्रजसीमकृत् ॥ १४० ॥
योजनं द्वे च विकटापातिमाल्यवतोर्भवेत् । चत्वारि मेरोः स्वक्षेत्रनदीभ्यामन्तरं क्रमात् ॥ १४१ ॥
अथास्ति मध्ये नगयोर्नीलवन्निषधाख्ययोः । क्षेत्रं महाविदेहाख्यं, मन्दरालङ्कृतान्तरम् ॥ १४२ ॥
त्रयोविंशत्या सहस्रैर्योजनानां त्रिभिः शतैः । चतुस्त्रिंशैः समधिका, लक्षाश्चतस्र एव च ॥ १४३ ॥
द्वादशद्विशतक्षुण्णयोजनस्य लवाः पुनः । द्वे शते विस्तीर्णमेतल्लवणाम्भोधिसन्निधौ ॥ १४४ ॥
ततं लक्षाणि मध्येऽष्टावेकपञ्चाशतं शतान् । चतुर्नवत्याढ्यानंशशतं चतुरशीतियुक् ॥ १४५ ॥
अन्ते चैकादश लक्षाः, सप्ताशीतिं सहस्रकान् । चतुष्पञ्चाशान् लवानां, साष्टषष्टिशतं ततम् ॥ १४६ ॥
जातं चतुर्धैतदपि, जम्बूद्वीपविदेहवत् । देवकुरुत्तरकुरुपूर्वापरविदेहकैः ॥ १४७ ॥
स्युर्देवकुरवोऽपाच्यामुदीच्यां कुरवः पराः । मेरोः प्राच्यां प्राग्विदेहाः, प्रतीच्यामपरे पुनः ॥ १४८ ॥
शीताशीतोदानदीभ्यां, विदेहास्ते द्विधाकृताः । प्राग्वदेव चतुर्ष्वंशेष्वष्टाष्ट विजया इह ॥ १४९ ॥
तथैवोदक्कुरुप्राच्यसीमकृन्माल्यवद्गिरेः । आगन्धमादनं सृष्ट्वा, क्रमस्तैरेव नामभिः ॥ १५० ॥
चतुर्ष्वंशेष्वन्तरेषु, वक्षस्कारास्तथैव च । चत्वारश्चत्वार एव, तिस्रस्तिस्रोऽन्तरापगाः ॥ १५१ ॥
विजयेष्वेषु वैताढ्या, नदीकुण्डर्षभाद्रयः । षट् खण्डा राजधान्यश्च, तन्नामानस्तथा स्थिताः ॥ १५२ ॥
तथैव चत्वारोऽप्यंशाः, पर्यन्ते वनराजिताः । केवलं परिमाणानां, विशेषः सोऽभिधीयते ॥ १५३ ॥
वक्षस्कारवनमुखान्तर्नदीमेरुकाननैः । विष्कम्भतः संकलितैः, स्याद्राशिर्विजयान् विना ॥ १५४ ॥
लक्षद्वयं षट्चत्वारिंशत्सहस्राः शतत्रयम् । षट्चत्वारिंशतोपेतं, योजनानामनेन च ॥ १५५ ॥
चतुर्लक्षात्मके द्वीपविष्कम्भे राशिनोज्झिते । हृते षोडशभिर्मानं, लभ्यं विजयविस्तृतेः ॥ १५६ ॥
योजनानां सहस्राणि, नव त्र्याढ्या च षट्शती । षट्षोडशांशाः प्रत्येकं, ज्ञेया विजयविस्तृतिः ॥ १५७ ॥
एवमिष्टान्यविष्कम्भवर्जितद्वीपविस्तृतेः । स्वस्वसङ्ख्याविभक्ताया, लभ्यतेऽभीष्टविस्तृतिः ॥ १५८ ॥
तत्र च–
विनाऽद्रीन् विजयादीनां, व्याससङ्कलना त्वियम् । तिस्रो लक्षा द्विनवतिः, सहस्रा योजनात्मकाः ॥ १५९ ॥

अनेन वर्जिते द्वीपविष्कम्भे विहृतेऽष्टभिः । वक्षस्कारद्रिविष्कम्भो, लभ्यः सहस्रयोजनः ॥ १६० ॥
अन्तर्नदीर्विना शेषव्याससङ्कलना भवेत्। लक्षास्तिस्रोऽष्टनवतिः, सहस्राः पञ्चशत्यपि ॥ १६१ ॥
अनेन वर्जिते द्वीपविष्कम्भे षड्भिराहृते । सार्द्धे द्वे योजनशते, व्यासोऽन्तः सरितामयम् ॥ १६२ ॥
विदेहानां यत्र यावान्, स्याद्व्यासोऽन्तर्मुखादिषु । तस्मिन् सहस्रोरुशीताशीतोदान्यतरोज्झिते ॥ १६३ ॥
शेषेऽर्द्धिते तत्र तत्र, तावान् भाव्यो विवेकिभिः । विजयान्तर्नदीवक्षस्कारायामः स्वयं धिया ॥ १६४ ॥
द्वयोरप्यर्द्धयोरस्मिन्, द्वीपे वनमुखानि च । वक्षस्कारक्षितिभृतो, विजयाश्चान्तरापगाः ॥ १६५ ॥
लवणोददिशि ह्रस्वाः, क्षेत्रसांकीर्ण्यतः स्मृताः । दीर्घाः कालोदककुभि, क्षेत्रबाहुल्यतः क्रमात् ॥ १६६ ॥
अष्टानां वनमुखानां, कले द्वे विस्तृतिर्लघुः । गुरुश्चतुश्चत्वारिंशाष्टपञ्चाशच्छती भवेत् ॥ १६७ ॥
तत्र द्वयोर्द्वयोः पूर्वापरार्द्धवर्तिनोस्तयोः । क्षाराब्ध्यासन्नयोः शीताशीतोदासीम्नि सा लघुः ॥ १६८ ॥
गुरुस्तु नीलनिषधान्तयोरेतच्च युक्तिमत् । अमीषां वलयाकारं, क्षाराब्धिं स्पृशतां बहिः ॥ १६९ ॥
अपरेषां तु कालोदवलयाभ्यन्तरस्पृशाम् । लघ्वी निषधनीलान्ते, गुर्वी सा सरिदान्तिके ॥ १७० ॥

तथोक्तं वीरञ्जयक्षेत्रसमासवृत्तौ–"तथा वनमुखानां विस्तारो द्विगुणा उक्तः, परं लवणोदधिदिशि वनमुखपृथुत्वं विपरीतं संभाव्यते, यथा नद्यन्ते कलाद्वयं, गिर्यन्ते चतुश्चत्वारिंशदधिकान्यष्ट-पञ्चाशच्छतानि पृथुत्व" मिति संप्रदाय इति । बृहत्क्षेत्रसमासवृत्तौ त्वेषां जघन्यं मानं नीलवन्निषधान्ते, शीताशीतोदोपान्ते चोत्कृष्टमुक्तं, न च कश्चिद्विशेषोऽभिहितः[1] ।

अथ देवोत्तरकुरुक्षेत्रसीमाविधायिनः । गजदन्ताकृतीन् शैलान्, चतुरश्चतुरो ब्रुवे ॥ १७१ ॥
तत्र देवकुरुणां यः, प्रत्यग् विद्युत्प्रभो गिरिः । तथोत्तरकुरुणां च, प्रत्यग् यो गन्धमादनः ॥ १७२ ॥
द्वावप्यायामत इमौ, षट्पञ्चाशत्सहस्रकाः । लक्षास्तिस्रो योजनानां, सप्तविंशं शतद्वयम् ॥ १७३ ॥
अथ देवकुरुणां प्राग्गिरिः सौमनसोऽस्ति यः । तथोत्तरकुरुणां प्राक्, पर्वतो माल्यवांश्च यः ॥ १७४ ॥
एतावायामतः पञ्च, लक्षा एकोनसप्ततिः । सहस्राणि योजनानां, द्विशत्येकोनषष्टियुक् ॥ १७५ ॥
इदं प्रमाणं पूर्वार्द्धे, भावनीयं विचक्षणैः । परार्द्धे क्षेत्रविस्तारव्यत्यासेन विपर्ययः ॥ १७६ ॥
पूर्वार्द्धे हि भवेत्क्षेत्रं, प्राच्यां विस्तीर्णमन्यतः । संकीर्णमपरार्द्धे तु, प्रत्यक् पृथ्वन्यतोऽन्यथा ॥ १७७ ॥
ततः पूर्वार्द्धे यदुक्तं, मानं प्राचीनशैलयोः । सौमनसमाल्यवतोस्तत्प्रतीचीनयोरिह ॥ १७८ ॥
ज्ञेयं विद्युत्प्रभगन्धमादनाद्र्योः परार्द्धके । यत्प्रतीचीनयोस्तत्र, मानं तत्प्राच्ययोरिह ॥ १७९ ॥
एते चत्वारोऽपि शैलाः, स्वस्ववर्षधरान्तिके । सहस्रयोजनव्यासास्तनवो मेरुसन्निधौ ॥ १८० ॥
शेषवर्णविभागादि, कूटवक्तव्यतादि च । जम्बूद्वीपगजदन्तगिरिवच्चिन्त्यतामिह ॥ १८१ ॥

---

१ कालोदध्यासन्नभागापेक्षया एतदभिधाने न क्षतिः, लवणदिशि न विवक्षाऽस्येति ।

अथ स्वस्वप्रतीचीनप्राचीनगजदन्तयोः । आयाममानयोर्योगे, धनुर्मानं कुरुद्वये ॥ १८२ ॥
नव लक्षा योजनानां, सहस्राः पञ्चविंशतिः । तथा शतानि चत्वारि, षडशीत्यधिकानि च ॥ १८३ ॥
भद्रसालायतिर्द्विघ्ना, मेरुविष्कम्भसंयुता । गजदन्तद्वयव्यासहीना ज्या कुरुषु स्फुटा ॥ १८४ ॥
त्रयोविंशत्या सहस्रैरधिकं लक्षयोर्द्वयम् । योजनानामष्टपञ्चाशताधिकं तथा शतम् ॥ १८५ ॥
विदेहमध्यविष्कम्भे, मेरुविकम्भवर्जिते । अर्द्धीकृते च प्रत्येकं, लभ्यते कुरुविस्तृतिः ॥ १८६ ॥
सा चेयं–त्रिलक्षीसप्तनवतिः, सहस्राण्यष्टशत्यपि । सप्तनवतिर्योजनानां द्विनवतिर्लवाः ॥ १८७ ॥
अथापाच्यामुदीच्यां च, नीलवन्निषधाद्रितः । प्रत्येकं यमकाद्री स्तो, जम्बूद्वीपकुरुष्विव ॥ १८८ ॥
जम्बूद्वीपयमकवत्स्वरूपमेतयोरपि । सहस्रयोजनोच्चत्वविस्तारायामशालिनोः ॥ १८९ ॥
क्रमात्ततो ह्रदाः पञ्च, तन्नामानस्तथा स्थिताः । तटद्वये दश दश, काञ्चनाचलचारवः ॥ १९० ॥
ह्रदाः पञ्चाप्यमी तादृग्नामभिः सेविताः सुरैः । तद्वत्पद्माञ्चितास्तेभ्यो, द्विगुणायतविस्तृताः ॥ १९१ ॥
तटद्वये दश दश, ये चात्र काञ्चनाद्रयः । सश्रीकास्तेऽपि मानेन, तैर्जम्बूद्वीपगैः समाः ॥ १९२ ॥
किंतु संबद्धमूलास्तेऽमी तु व्यवहिता मिथः । योजनानां शतेनैकादशेन नवमांशिना ॥ १९३ ॥
तच्चैवं–एषां दशानां पृथुत्वे, सहस्रं मिलिते भवेत् । तत्सहस्रद्वयादेकह्रदायामाद्वियोज्यते ॥ १९४ ॥
शेषं स्थितं सहस्रं यन्नवभिस्तद्विभज्यते । अन्तरैः काञ्चनाद्रीणामेवं यथोक्तमन्तरम् ॥ १९५ ॥
जम्बूद्वीपे तु ह्रदानां, सहस्रायामभावतः । न किञ्चित्काञ्चनाद्रीणां, व्यवधानं परस्परम् ॥ १९६ ॥
यमकाद्रिह्रदायामवर्जितात्सप्तभिर्हृतात् । लभ्यन्ते कुरुविष्कम्भात्सप्तान्तराणि तानि च ॥ १९७ ॥
यमकाद्रयोर्नीलवतस्ताभ्यामाद्यह्रदस्य च । क्रमाच्चतुर्णां ह्रदानां, क्षेत्रान्तस्यान्तिमह्रदात् ॥ १९८ ॥
सहस्राः पञ्चपञ्चाशद्योजनानां शतद्वयम् । एकसत्याऽधिकं तद्भवेदेकैकमन्तरम् ॥ १९९ ॥
आसूत्तरासु कुरुषु, नीलवद्गिरिसन्निधौ । राजते धातकीवृक्षो, जम्बूवृक्ष इवापरः ॥ २०० ॥
माने स्वरूपे त्वनयोर्विशेषोऽस्ति न कश्चन । किंतु तस्यानादृतवदस्य देवः सुदर्शनः ॥ २०१ ॥
उदीचीनासु कुरुषु, पश्चार्द्धेऽप्येवमीदृशः । स्यान्महाधातकी वृक्षः, प्रियदर्शनदैवतः ॥ २०२ ॥
उत्तरासां कुरुणां यत्स्वरूपमिह वर्णितम् । तदेव देवकुरुषु, विज्ञेयमर्द्धयोर्द्वयोः ॥ २०३ ॥
किंत्वासु नीलवत्स्थाने, वक्तव्यो निषधाचलः । गिरी चित्रविचित्राख्यौ, वाच्यौ च यमकास्पदे ॥ २०४ ॥
पूर्वापरार्द्धयोर्देवकुरुषु स्तौ यथाऽऽस्पदम् । प्राग्वच्छाल्मलिनौ वेणुदेवाभिधसुराश्रयौ ॥ २०५ ॥

तथोक्तं स्थानाङ्गद्वितीयस्थानकवृत्तौ—'दो देवकुरुमहादुम'त्ति द्वौ कूटशाल्मलिवृक्षावित्यर्थः,
द्वौ तद्वासिदेवौ वेणुदेवावित्यर्थः ।

शेषं तु ह्रदनामादि, यदत्र नोपदर्शितम् । तज्जम्बूद्वीपवद् ज्ञेयं, विशेषो ह्यत्र दर्श्यते ॥ २०६ ॥

मध्येऽत्र मेरुश्चतुरशीतिं तुङ्गः सहस्रकान् । योजनानां सहस्रं चावगाढो वसुधांतरे ॥ २०७ ॥
शतानि पञ्चनवतिं, मूले भूमिगते पृथुः । चतुर्नवतिमेव क्ष्मातले शतानि विस्तृतः ॥ २०८ ॥
यत्रोत्तीर्य योजनादौ, व्यासोऽस्य ज्ञातुमिष्यते । तस्मिन् दशहृते लब्धे, सहस्राढ्ये च तत्र सः ॥ २०९ ॥
तथाहि—
शिरोऽग्राच्चतुरशीतेः, सहस्राणामतिक्रमे । व्यासे जिज्ञासित एतान्, सहस्रान् दशभिर्भजेत् ॥ २१० ॥
लब्धान्येवं च चतुरशीतिः शतानि तान्यथ । सहस्राढ्यानि पूर्वोक्तो, विष्कम्भोऽस्य भुवस्तले ॥ २११ ॥
मूलाद्यदोर्ध्वगमने, विष्कम्भो ज्ञातुमिष्यते । तदा यावद्यातमूर्ध्वं, तत्संख्यां दशभिर्भजेत् ॥ २१२ ॥
लब्धे च मूलविष्कम्भाच्छोधिते यत्तु तिष्ठति । तत्र तावत्प्रमाणोऽस्य, विष्कम्भो लभ्यते गिरेः ॥ २१३ ॥
यथोर्ध्वं चतुरशीतौ, सहस्रेषु भुवस्तलात् । गतेषु चतुरशीतिं सहस्रान् दशभिर्भजेत् ॥ २१४ ॥
लब्धानि चतुरशीतिः, शतानि तानि शोधयेत् । भूतलव्यासतः शेषा, साहस्री मूर्ध्नि विस्तृतिः ॥ २१५ ॥
आम्नायोऽयं कर्णगत्या, मेरुनिम्नोन्नतत्वयोः । ज्ञेयोऽविवक्षणात्प्राग्वन्मेखलायुग्मजातयोः ॥ २१६ ॥
श्रियं श्रयत्ययमपि चतुर्भिश्चारुकाननैः । दन्तैरैरावत इव, दैत्यारिरिव बाहुभिः ॥ २१७ ॥
तत्र भूमौ भद्रसालवनं तरुलताघनम् । तरणित्रासितं ध्वान्तमिवैतत्पादमाश्रितम् ॥ २१८ ॥
प्राच्यां प्रतीच्यां प्रत्येकं, तद्दीर्घं लक्षयोजनीम् । सहस्रान् सप्तसैकोनाशीतीन्यष्ट शतानि च ॥ २१९ ॥
प्राच्येऽथवा प्रतीचीने, दैर्घ्येऽष्टाशीतिभाजिते । यल्लब्धं सोऽस्य विष्कम्भो, दक्षिणोत्तरयोः स च ॥ २२० ॥
योजनानां पञ्चविंशाः, शता द्वादश कीर्त्तिताः । तथैकोनसप्ततिश्चांशा, अष्टाशीतिसमुद्भवाः ॥ २२१ ॥
अष्टाशीत्या गुणितायामेतस्यां पुनराप्यते । प्राच्यां प्रतीच्यां चायामो, यः प्रागस्य निरूपितः ॥ २२२ ॥
एवं प्रमाणविस्तारायाममेतद् वनं पुनः । गजदन्तमन्दराद्रिनदीभिरष्टधा कृतम् ॥ २२३ ॥
तच्च जम्बूद्वीपभद्रसालवद्भाव्यतां बुधैः । तथैवैतद्वक्ष्यमाणवनकूटादिकस्थितिः ॥ २२४ ॥
अथोत्क्रम्य योजनानां, शतानि पञ्च भूतलात् । कट्यां नन्दनवन्मेरो, राजते नन्दनं वनम् ॥ २२५ ॥
तच्च चक्रवालतया, शतानि पञ्च विस्तृतम् । अनल्पकल्पफलदलतामण्डपमण्डितम् ॥ २२६ ॥
बहिर्विष्कम्भोऽत्र मेरोरुक्ताम्नायेन लभ्यते । योजनानां सहस्राणि, नव सार्द्धं शतत्रयम् ॥ २२७ ॥
तथाहि–
उत्क्रान्तायाः पञ्चशत्या, दशभिर्भजने सति । लब्धपञ्चाशतोऽधःस्थव्यासात्त्यागे भवेदयम् ॥ २२८ ॥
बहिर्व्यासात्पञ्चशत्यास्त्यागे चोभयतः पृथक् । अन्तर्व्यासोऽष्टौ सहस्रास्त्रिशत्या सार्द्धयाधिकाः ॥ २२९ ॥

सहस्राणि पञ्चपञ्चाशतं पञ्चशतीं तथा । अतिक्रम्य योजनानामूर्द्ध्वं नन्दनकाननात् ॥ २३० ॥
अत्रान्तरे सौमनसं, स्यात्पञ्चशतविस्तृतम् । चक्रवालतया मेरोर्ग्रैवेयकमिवामलम् ॥ २३१ ॥
बहिर्विष्कम्भोऽत्र गिरेर्गुरुभिर्गदितो मम । योजनानां सहस्राणि, त्रीण्येवाष्टौ शतानि च ॥ २३२ ॥
तथाहि—
षट्पञ्चाशत्सहस्राणि, यान्यतीतानि भूतलात् । एषां दशमभागः स्यात्षट्पञ्चाशच्छतात्मकः ॥ २३३ ॥
असौ भूतलविष्कम्भात्पूर्वोक्तादपनीयते । तस्थुर्यथोदितान्येवमष्टात्रिंशच्छतानि वै ॥ २३४ ॥
सहस्रापगमे चास्मात्स्यादन्तर्गिरिविस्तृतिः । द्वे सहस्रे योजनानां, शतैरष्टभिरन्विते ॥ २३५ ॥
अथैतस्माद्वनादूर्द्ध्वमुत्क्रान्तैर्मेरुमुर्द्धनि । अष्टाविंशत्या सहस्रैर्योजनैः पण्डकं वनम् ॥ २३६ ॥
चक्रवालतया तच्च, विस्तीर्णं वर्णितं जिनैः । चतुर्नवत्याऽभ्यधिकां, योजनानां चतुःशतीम् ॥ २३७ ॥
तच्चैवं–
मेरुमस्तकविष्कम्भात्सहस्रयोजनोन्मितात् । मध्यस्थचूलिकाव्यासो, द्वादशयोजनात्मकः ॥ २३८ ॥
शोध्यते तच्छेषमर्द्धीकृतं पण्डकविस्तृतिः । शेषा शिलादिस्थितिर्या, सा जम्बूद्वीपमेरुवत् ॥ २३९ ॥
तथैवास्य मरकतमयी शिरसि चूलिका । नानारत्ननिर्मितेन, शोभिता जिनसद्मना ॥ २४० ॥
एवं यदन्यदप्यत्र, कूटचैत्यादि नोदितम् । जम्बूद्वीपमेरुवत्तद्वक्तव्यं सुधिया धिया ॥ २४१ ॥
एवं यथाऽस्य द्वीपस्य, पूर्वार्द्धमिह वर्णितम् । पश्चिमार्द्धमपि तथा, विज्ञेयमविशेषितम् ॥ २४२ ॥
गजदन्तप्रमाणादौ, विशेषो यस्तु कश्चन । स तु तत्तत्प्रकरणे, नामग्राहं निरुपितः ॥ २४३ ॥
किंच–
विजये पुष्कलावत्यां, वप्राख्ये विजये तथा । वत्से च नलिनावत्यां[1], विरहन्त्यधुना जिनाः ॥ २४४ ॥
प्राचीनेऽर्द्धे सुजातोऽर्हन्, स्वयंप्रभर्षभाननौ । श्रीमाननन्तवीर्यश्च, पश्चिमार्द्धे तु तेष्वमी ॥ २४५ ॥
सूरप्रभो जिनः श्रीमान्, विशालो जगदीश्वरः । जगत्पूज्यो वज्रधरश्चन्द्राननः प्रभुः क्रमात् ॥ २४६ ॥
एवं चात्र—
श्रियं दधाते द्वौ मेरू, द्वीपस्यास्य कराविव । उदस्तौ पृथुतादर्पान्नभसो निजिघृक्षया ॥ २४७ ॥
यद्बोद्दण्डकरौ बद्धकच्छौ च नन्दनच्छलात् । स्पर्द्धया संमुखीनौ द्वौ, महामल्लाविवोत्थितौ ॥ २४८ ॥
स्थापयत्येकधाऽऽत्मानं, मेर्वेकाङ्गुलिसंज्ञया । जम्बूद्वीपेऽयमेताभ्यां, द्विधा तं स्थापयन्निव ॥ २४९ ॥
अनलंभूष्णुनोत्थातुं, द्वीपेनानेन वार्द्धकात् । धृतौ दण्डाविवोद्दण्डौ, मेरू द्वाविह राजतः ॥ २५० ॥
वर्षाद्रयो द्वादशाष्टषष्टिर्वैताढ्यभूधराः । दीर्घा अष्टौ च वृत्तास्ते, काञ्चनाद्रिचतुःशती ॥ २५१ ॥

---

१. नलिनावत्यां वप्रे च इतिपाठः

वक्षस्काराद्रयो द्वात्रिंशदष्टौ गजदन्तकाः । द्वौ चित्रौ द्वौ विचित्रौ च, चत्वारो यमकाचलाः ॥ २५२ ॥
इषुकारद्वयं चैवं, सर्वाग्रेणात्र भूभृताम् । चत्वारिंशा पञ्चशती, चत्वारश्च महाद्रुमाः ॥ २५३ ॥
चतुर्दशात्र वर्षाणि, चतस्रः कुरवोऽपि च । षट् कर्मभूमयोऽकर्मभूमयो द्वादश स्मृताः ॥ २५४ ॥
दीर्घवैताढ्येषु कूटाः, प्राग्वन्नव नवोदिताः । सक्रोशषड्योजनोच्चा, द्वादशा षट्शतीति ते ॥ २५५ ॥
रुक्मिमहाहिमवन्तः, कूटैरष्टभिरष्टभिः । सप्तभिश्च सौमनसौ, तथा च गन्धमादनौ ॥ २५६ ॥
मेर्वार्द्धे नन्दनवने, निषधौ नीलवद्गिरी । विद्युत्प्रभौ माल्यवन्तौ, नवकूटाः समेऽप्यमी ॥ २५७ ॥
हिमवन्तौ शिखरिणौ, तैरेकादशभिर्युतौ । वक्षस्कारगिरिणां च, प्रत्येकं तच्चतुष्टयम् ॥ २५८ ॥
त्रयः शताः स्युर्द्वाविंशाः, कूटान्येतानि तत्र च । षोडशा त्रिशती प्रोक्तहिमवद्गिरिकूटवत् ॥ २५९ ॥
हरिकूटौ द्वयोर्विद्युत्प्रभयोर्यौ हरिस्सहौ । माल्यवतोर्बलकूटौ, मेरुनन्दनयोश्च यौ ॥ २६० ॥
एते षडपि साहस्रास्त्रैधानामिति मानतः । चतुस्त्रिंशद्गिरिकूटानामेवं नवशती भवेत् ॥ २६१ ॥
सहेषुकारकूटैर्द्वाचत्वारिंशा शता नव । तत्रेषुकारकूटानां, मानं तु नोपलभ्यते ॥ २६२ ॥
चतुःषष्टौ विजयेषु, भरतैरवतेषु च । स्युरष्टषष्टिर्वृषभकूटा एकैकभावतः ॥ २६३ ॥
धातक्यादिषु चतुष्के, द्वयोश्च भद्रसालयोः । अष्टाष्टेति च सर्वाग्रे, भूकूटाः षोडशं शतम् ॥ २६४ ॥
एतेषां वक्तुमुचिते, पर्वतत्वेऽपि वस्तुतः । कूटत्वव्यवहारस्तु, पूर्वाचार्यानुरोधतः ॥ २६५ ॥
महाह्रदा द्वादशैव, विंशतिश्च कुरुह्रदाः । श्रीह्रीधृतिकीर्त्तिबुद्धिलक्ष्मीनां च द्वयं द्वयम् ॥ २६६ ॥
सहस्रा द्वादशैकोनत्रिंशल्लक्षाश्च कीर्त्तिताः । तरङ्गिणीनामेतस्मिन्, द्वीपे मतान्तरे पुनः ॥ २६७ ॥
पञ्चत्रिंशल्लक्षाणि, चतुरशीतिः सहस्रकाश्चैव । इह संभवन्ति सरितां, तत्त्वं तु विदन्ति तत्त्वज्ञाः ॥ २६८ ॥
विदेहयुग्मे प्रत्येकं, स्युः कुण्डान्यष्टसप्ततिः । द्वे द्वे च शेषवर्षेषु, शतमेवमशीतियुक् ॥ २६९ ॥
एतेऽद्रयो ह्रदाः कूटाः, कुण्डान्येतान्यथापगाः । स्युर्वेदिकावनोपेतास्तत्स्वरूपं तु पूर्ववत् ॥ २७० ॥
एषां याम्योदीच्यवर्षसरिच्छैलादिवर्त्तिनाम् । विजयस्वर्गिवत्प्रौढसमृद्धीनां सुधाभुजाम् ॥ २७१ ॥
दक्षिणस्यामुदीच्यां च, जम्बूद्वीपस्थमेरुतः । अन्यस्मिन् धातकीखण्डे, राजधान्यो जिनैः स्मृताः ॥ २७२ ॥
श्रेण्यश्चतस्रः प्रत्येकवैताढ्येष्विति मीलिताः । श्रेण्यो भवन्ति द्वीपेऽस्मिन्, द्विशती सद्विसप्ततिः ॥ २७३ ॥
दशोत्तरं पुरः शतं, प्रतिवैताढ्यमित्यतः । तेषां सहस्राःसप्त स्युः साशीतिश्च चतुःशती ॥ २७४ ॥

जघन्यतोऽष्टेह जिना भवेयुरुत्कर्षतस्ते पुनरष्टषष्टिः ।
जघन्यतः केशवचक्रिरामा, अष्टावथोत्कृष्टपदे तु षष्टिः ॥ २७५ ॥

सद्धादशा स्युर्निधयोऽत्र षट्शती, प्रकर्षतस्तान्युपभोगभाञ्जि तु ।
द्विर्विंशतिः पञ्च शतानि च ध्रुवं, द्वासप्ततिस्तानि जघन्यतस्तथा ॥ २७६ ॥
विंशानि चत्वारि शतानि पञ्चैकाक्षाणि रत्नानि पृथग् भवेयुः ।
उत्कर्षतस्तानि जघन्यतश्च, पञ्चाशदाढ्या ननु षड्भिरेव ॥ २७७ ॥
द्वादशोष्णमहसः सुधांशवो, द्वादश ग्रहसहस्रमन्वितम् ।
षड्युतार्द्धशतकेन भानि षट्त्रिंशता समधिकं शतत्रयम् ॥ २७८ ॥
त्रिभिः सहस्रैरधिकानि लक्षाण्यष्टौ तथा सप्त शतानि चात्र ।
स्युः कोटिकोट्यः किल तारकाणां, तमोऽङ्कुरोन्मूलनकारकाणाम् ॥ २७९ ॥
द्वीपोऽयमेवं गदितस्वरूपः, कालोदनाम्नोदधिना परीतः ।
विभाति दीप्रप्रधिनेव चक्रमिवेभसेनावलयेन भूपः ॥ २८० ॥
कालो महाकाल इतीह देवौ, प्राच्यप्रतीच्यार्द्धधृताधिकारौ ।
तद्दैवतः श्यामतमोदकश्च, तदेष कालोद इति प्रसिद्धः ॥ २८१ ॥
लक्षाण्यष्टौ विस्तृतो योजनानामुद्धिद्धोऽयं योजनानां सहस्रम् ।
आदावन्ते मध्यदेशे समानोद्वेधः सर्वत्रापि पूर्णहूदाभः ॥ २८२ ॥
न चूला न वेला न च क्षोभितास्मिन्, न पातालकुम्भादिका वा व्यवस्था ।
सदम्भोदमुक्तोदकस्वादुनीरः, प्रसन्नश्च साधोर्मनोवद्गभीरः ॥ २८३ ॥
लक्षाण्यथैकनवतिः परिधिः सहस्राः, स्यात् सप्ततिः षडिह पञ्चयुताः शताश्च ।
द्वारैश्चतुर्भिरयमप्यभितो विभाति, । पूर्वादिदिक्षु विजयादिभिरुक्तरूपैः ॥ २८४ ॥
लक्षा द्वाविंशतिश्च द्विनवतिरुपरि स्युः सहस्राणि नूनं,
षट्चत्वारिंशदाढ्या जिनपतिगदिता षट्शती योजनानाम् ।
पादोनं योजनं चान्तरमिह निखिलद्वार्षु तुल्यप्रमाणं,
कालोदे द्वारपानां विजयवदुदिता राजधान्योऽपरस्मिन् ॥ २८५ ॥
प्राक्प्रतीच्योर्दिशोर्द्वादश द्वादश, द्वादशेभ्यः सहस्रेभ्य एवान्तरे ।
सन्ति कालोदधौ धातकीखण्डतोऽत्रान्तरीपा अमुष्यामृतोष्णत्विषाम् ॥ २८६ ॥
पुष्करद्वीपतोऽप्येवमत्राम्बुधौ, तावता प्राक्प्रतीच्योः सुधोष्णत्विषाम् ।
नेत्रवेदैर्मिता नेत्रवेदैर्मिता (४२), एतदब्धिस्पृशामन्तरीपाः स्थिताः ॥ २८७ ॥

अन्तरीपा अमी गौतमद्वीपवद्भावनीयाः स्वरुपप्रमाणादिभिः ।
वेदिकाकाननालङ्कृताः सर्वतः, क्रोशयुग्मोच्छ्रिता वारिधेर्वारितः ॥ २८८ ॥
अथाम्भोधावस्मिन्नमृतरुचयस्तिग्मकिरणा, द्विचत्वारिंशत्स्युर्ग्रहगृहसहस्रत्रयमथ ।
शतैः षड्भिर्युक्तं षडधिकनवत्या समधिकैः, सहस्रं षट्सप्तत्यधिकशतयुक् चात्र भगणः ॥ २८९ ॥
पञ्चाशदूना नियतं सहस्रास्त्रयोदशेभाक्षि मिताश्च लक्षाः ।
स्युस्तारकाणामिह कोटिकोट्यः कालोदधौ तीर्थकरोपदिष्टाः ॥ २९० ॥
विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिष-द्राजश्रीतनयोतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे, द्वाविंशो मधुरः समाप्तिमगमत्सर्गो निसर्गोज्ज्वलः
॥ २९१ ॥

॥ इति श्रीलोकप्रकाशे धातकीवर्णको द्वाविंशतितमः सर्गः समाप्तः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

अथ त्रयोविंशतितमः सर्गः प्रारभ्यते ॥

वक्ष्येऽथ पुष्करवरद्वीपं कैकयदेशवत् । विशेषितार्द्धमावेष्ट्य, स्थितं कालोदवारिधिम् ॥ १ ॥
वक्ष्यमाणस्वरुपैर्यच्छोभितश्चारुपुष्करैः । ततोऽयं पुष्करवर, इति प्रसिद्धिमीयिवान् ॥ २ ॥
चक्रवालतयैतस्य, विस्तारो वर्णितः श्रुते । योजनानां षोडशैव, लक्षा न्यक्षार्थवेदिभिः ॥ ३ ॥
द्वीपस्यास्य मध्यदेशे, शैलोऽस्ति मानुषोत्तरः । अन्विताख्यो नरक्षेत्रसीमाकारितयोत्तरः ॥ ४ ॥
उभयोः पार्श्वयोश्चारुवेदिकावनमण्डितः । योजनानामेकविंशान्, शतान् सप्तदशोच्छ्रितः ॥ ५ ॥
चतुःशतीं योजनानां, त्रिंशां क्रोशाधिकां भुवि । मग्नो मूले सहस्रं च, द्वाविंशं किल विस्तृतः ॥ ६ ॥
त्रयोविंशानि मध्येऽयं, शतानि सप्त विस्तृतः । चतुर्विंशानि चत्वारि, शतान्युपरिविस्तृतः ॥ ७ ॥
यथेष्टस्थानविष्कम्भज्ञानोपायस्तु साम्यतः । भाव्यो वेलन्धरावासगोस्तूपादिगिरिष्विव ॥ ८ ॥
अग्रेतनं पादयुग्मं, यथोत्तम्भ्य निषीदति । पुताभ्यां केसरी पादद्वयं संकोच्य पश्चिमम् ॥ ९ ॥
ततः शिरःप्रदेशे स, विभाति भृशमुन्नतः । तथा पाश्चात्यभागे च, निम्नो निम्नतरः क्रमात् ॥ १० ॥
तद्वदेष गिरिः सिंहोपवेशनाकृतिस्ततः । यद्वा यवार्द्धसंस्थानसंस्थितोऽयं तथैव हि ॥ ११ ॥
समभित्तिः सर्वतुङ्गे, जम्बूद्वीपस्य दिश्ययम् । प्रदेशहान्या पश्चात्तु, निम्नो निम्नतरः क्रमात् ॥ १२ ॥

अत्रायं संप्रदायः—

द्वे सहस्रे चतुश्चत्वारिंशे मूले सुविस्तृतम् । शतान्यष्टाष्टचत्वारिंशानि मूर्ध्नि च विस्तृतम् ॥ १३ ॥
एकविंशान् शतान् सप्तदशोच्चं वलयाकृतिम् । प्रकल्प्याद्रिं ततोऽस्याभ्यन्तरार्द्धेऽपहृते सति ॥ १४ ॥
विस्तारमधिकृत्याथ, शेषस्तिष्ठति यादृशः । तादृशोऽयं संप्रदायात्, प्रज्ञप्तो मानुषोत्तरः ॥ १५ ॥
वसन्त्यस्योर्द्ध्वं सुपर्णकुमारा निर्जरा बहिः । मध्ये मनुष्याश्चेत्येष, त्रिधा गिरिरलङ्कृतः ॥ १६ ॥

तथोक्तं जीवाभिगमसूत्रे—"माणुसुत्तरस्स णं पव्वयस्स अंतो मणुआ उप्पिं सुवण्णा बाहिं देवा" इति ।

जाम्बूनदमयश्चित्रमणिरत्नविनिर्मितैः । लतागृहैर्दीर्घिकाभिर्मण्डपैश्चैष मण्डितः ॥ १७ ॥
कूटैः षोडशभिश्चैष, समन्ताद्भात्यलङ्कृतः । नानारत्नमयै रम्यैः, प्राकारोऽट्टालकैरिव ॥ १८ ॥
त्रयं त्रयं स्यात्कूटानां, पङ्क्त्या दिशां चतुष्टये । द्वादशाप्येकैकदेवाधिष्ठितानि भवन्त्यथ ॥ १९ ॥

उक्तं च स्थानाङ्गवृत्तौ—

"पुव्वेण तिन्नि कूडा, दाहिणओ तिन्नि तिन्नि अवरेण । उत्तरओ तिन्नि भवे, चउद्दिसिं माणुसनगस्स ॥" त्ति ।
विदिक्षु चत्वारि तत्राग्नेय्यां रत्नाभिधं भवेत् । निवासभूतं तद्वेणुदेवस्य गरुडेशितुः ॥ २० ॥
रत्नोच्चख्यायं नैर्ऋत्यां, वेलम्बस्यानिलेशितुः । नाम्ना विलम्बसुखदमित्यप्येतन्निरूपितम् ॥ २१ ॥
पूर्वोत्तरस्यां च कूटं, सर्वरत्नाभिधं भवेत् । तत्सुपर्णकुमारेन्द्रवेणुदालेः किलास्पदम् ॥ २२ ॥
तथाऽपरोत्तरस्यां स्यात्तद्रत्नसंचयाभिधम् । प्रभञ्जनपराख्यं च, प्रभञ्जनसुरेशितुः ॥ २३ ॥

अत्र यद्यपि रत्नादीनि चत्वारि कूटानि स्थानाङ्गसूत्रे चतुर्दिशमुक्तानि तथाहि—"माणुसुत्तरस्स णं पव्वयस्स चउद्दिसिं चत्तारि कूडा पं० तं०—रयणे रयणुच्चये सव्वरयणे रयणसंचए" इति तथाप्येतत्सूत्रं श्रीअभयदेवसूरिभिरेवं व्याख्यातं—तथाहि—"इह च दिग्ग्रहणेऽपि विदिक्ष्वितिद्रष्टव्यं, तथा एवं चैतद्व्याख्यायते द्वीपसागरप्रज्ञप्तिसंग्रहण्यनुसारेणे" त्यादि ।

चतुर्दिशमिहैकैकः, कूटे भाति जिनालयः । दिशां चतसृणां रत्नकिरीट इव भासुरः ॥ २४ ॥

तथोक्तं विस्तरक्षेत्रसमाससूत्रे— [गाथा - २५७]

"चउसुवि उसुयारेसुं इक्किक्कं नरनगंमि चत्तारि । कूडोवरि जिणभवणा कुलगिरिजिणभवणपरिमाणा ॥"

साक्षान्न यद्यपि प्रोक्तः, सिद्धान्तेऽत्र जिनालयः । तथाप्यागमवाग्लिङ्गदनुमानात्प्रतीयते ॥ २५ ॥
यतो विद्याचारणर्षितिर्यग्गतिनिदर्शने । विश्रामोऽत्र गिरौ प्रोक्तश्चैत्यवन्दनपूर्वकः ॥ २६ ॥

तथाह पञ्चमाङ्गे —"विज्जाचारणस्स णं भंते ! तिरियं केवतिए गतिविसए पन्नत्ते ? गो० ! से णं इओ एगेणं उप्पाएणं माणुसुत्तरे पव्वए समोसरणं करेइ, माणु० २ त्ता तहिं चेइयाइं वंदति"

एतच्चास्मिन् विना चैत्यं, कथमौचित्यमञ्चति ? । ततोऽत्र जिनचैत्यानि, युक्तमूचुर्महर्षयः ॥ २७ ॥
एवं शाश्वतचैत्यानां, मान्यत्वं यो न मन्यते । सोऽप्यनेनैव वाक्येनोत्थातुं नेष्टे पराहतः ॥ २८ ॥
यश्चात्र चैत्यशब्दार्थं, विपर्यस्यति वातकी । तस्याप्येतच्चारणर्षिनमस्यावाक्यमौषधम् ॥ २९ ॥
न हीदृशास्तपःशक्तिलब्धैतादृशलब्धयः । विना जिनादीन् वन्दन्ते, सम्यक्त्वभ्रंशभीलुकाः ॥ ३० ॥
अथ प्रकृतं—अनेन पुष्करवरद्वीपो द्वेधा व्यधीयत । भित्त्येव गृहमस्यार्द्धद्वयं निर्दिश्यते ततः ॥ ३१ ॥
अभ्यन्तरं पुष्करार्द्धं, बाह्यं तदर्द्धमेव च । अर्वाचीनमानन्तरार्द्धं, बाह्यमर्द्धं ततः परम् ॥ ३२ ॥
मानुषोत्तरशैलस्तु, बाह्यार्द्धक्षेत्ररोधकः । इत्यान्तरार्द्धं पूर्णाष्टलक्षयोजनसंमितम् ॥ ३३ ॥

तथाहुर्ज्ञानचन्दनमलयगिरयो मलयगिरयः—"अयं च मानुषोत्तरपर्वतो बाह्यपुष्करवरार्द्धभूमौ प्रतिपत्तव्य" इति बृहत्क्षेत्रसमासवृत्तौ ।

कोटिरेका द्विचत्वारिंशल्लक्षाणि सहस्रकाः । चतुस्त्रिंशच्छतान्यष्टौ, त्रयोविंशानि चोपरि ॥ ३४ ॥
एतावद्योजनमितो, मानुषोत्तरभूभृतः । स्यान्मध्ये परिधिर्मौलौ, त्वस्यायं परिधिर्भवेत् ॥ ३५ ॥
कोटिरेकाऽथ लक्षाणि, द्विचत्वारिंशदेव च । द्वात्रिंशच्च सहस्राणि, द्वात्रिंशच्च शता नव ॥ ३६ ॥
पृथगुक्तौ परिक्षेपौ, यौ मध्येऽस्य तथोपरि । बहिर्भागापेक्षया तौ, पार्श्वेऽस्याभ्यन्तरे पुनः ॥ ३७ ॥
समानभित्तिकतया, मूले मध्ये तथोपरि । तुल्य एव परिक्षेपः, सर्वत्राप्यवसीयताम् ॥ ३८ ॥
एका कोटीद्विचत्वारिंशल्लक्षाणि सहस्रकाः । षट्त्रिंशच्च शताः सप्त, त्रयोदशसमन्विताः ॥ ३९ ॥
एतावन्ति योजनानि, दृष्टानि जिननायकैः । मानुषोत्तरशैलस्य, बाह्यस्य परिधेर्मितौ ॥ ४० ॥

इति बृहत्क्षेत्रसमासवृत्त्यभिप्रायेण, जीवाभिगमसूत्रे 'सत्त चोद्दसुत्तरे जोअणसए' इत्युक्तं ।

द्विचत्वारिंशता लक्षैरेककोटिसमन्विता । त्रिंशत्सहस्राश्चैकोनपञ्चाशा द्विशती तथा ॥ ४१ ॥
मानुषोत्तरशैलस्यैतावान् परिधिरान्तरः । एष एवाभ्यन्तरस्य, पुष्करार्द्धस्य चान्तिमः ॥ ४२ ॥
नृक्षेत्रस्यापि परिधिरेष एवावसानिकः । अथास्य पुष्करार्द्धस्य, मध्यमः परिधिस्त्वयम् ॥ ४३ ॥
एका कोटी योजनानां, लक्षाः सप्तदशोपरि । सप्तविंशत्यन्वितानि, चत्वार्येव शतानि च ॥ ४४ ॥
कालोदस्यान्त्यपरिधिर्यः पूर्वमिह दर्शितः । स एव पुष्करार्द्धस्य, भवेत्परिधिरान्तरः ॥ ४५ ॥
द्विधेदमिषुकाराभ्यां, धातकीखण्डवत्कृतम् । अभ्यन्तरे पुष्करार्द्धे, तस्थिवद्भ्यामपागुदक् ॥ ४६ ॥
धातकीखण्डेषुकारसधर्माणाविमावपि । चतुष्कूटावन्त्यकूटस्थितोत्तुङ्गजिनालयौ ॥ ४७ ॥
एकेनान्तेन कालोदं, परेण मानुषोत्तरम् । स्पृष्टवन्तौ योजनानां, लक्षाण्यष्टायताविति ॥ ४८ ॥
एवमभ्यंतरं पुष्करार्द्धं निर्दिश्यते द्विधा । पूर्वार्द्धं पश्चिमार्द्धं च, प्रत्येकं मेरुणाऽञ्चितम् ॥ ४९ ॥

१. किञ्चिदधिकस्य योजनभागस्य व्यवहारेण योजनतया विवक्षणाद् चतुर्दशोत्तरसप्तशती अत्राख्याता स्यात् ॥

पूर्वापरार्द्धयोरत्र, कालोदवेदिकान्ततः । पुरतः पुनरर्वाक् च, मानुषोत्तरपर्वतात् ॥ ५० ॥
सहस्रान्नवनवतिं, प्रत्येकं लक्षकत्रयम् । योजनानामतीत्यास्ति, कुण्डमेकैकमद्भुतम् ॥ ५१ ॥
अधस्ते विस्तृते स्तोकमुपर्युपर्यनुक्रमात् । विस्तीर्णे विस्तीर्णतरे, जायमाने शरावत् ॥ ५२ ॥
भुवस्तले द्वे सहस्रे, विस्तीर्णे योजनान्यथ । उद्विद्धे दश शुद्धाम्भोवीचीनिचयचारुणी ॥ ५३ ॥
द्वयोरप्यर्द्धयोरत्रैकैकमन्दरनिश्रया । षट् षट् वर्षधराः सप्त, सप्त क्षेत्राणि पूर्ववत् ॥ ५४ ॥
धातकीखण्डस्थवर्षधरद्विगुणविस्तृताः । भवन्त्यत्र वर्षधरा, उच्चत्वेन तु तैः समाः ॥ ५५ ॥
एवमत्रेषुकाराभ्यां, सह वर्षमहीभृताम् । विष्कम्भसंकलनया, नगरुद्धं भवेदियत् ॥ ५६ ॥
तिस्रो लक्षा योजनानां, पञ्चपञ्चाशदेव च । सहस्राणि चतुरशीत्यधिकानि शतानि षट् ॥ ५७ ॥
आद्यमध्यान्त्यपरिधौ, प्राग्वदेतेन वर्जिते । द्वादश द्विशतक्षुण्णे, कल्प्यन्ते प्राग्वदंशकाः ॥ ५८ ॥
वर्षवर्षधरभागकल्पना त्वत्र धातकीखण्डवद् ज्ञेया ।
द्वादशद्विशतोत्थास्ते, येऽत्रांशा योजनोपरि । क्षेत्राणामब्धिदिश्यादिरन्तश्चनृगिरेर्दिशि ॥ ५९ ॥
तत्र याम्येषुकारस्योभयतोऽप्यर्द्धयोर्द्धयोः । एकैकमस्ति भरतं, स्वस्वस्वर्णगिरेर्दिशि ॥ ६० ॥
सहस्राण्येकचत्वारिंशच्छतान् पञ्च विस्तृतम् । सैकोनाशीतीन् मुखेऽंशशतं च सत्रिसप्ततिः ॥ ६१ ॥
त्रिपञ्चाशत्सहस्राणि, द्वादशा पञ्चशत्यपि । शतं नवनवत्याढ्यमंशाश्च मध्यविस्तृतिः ॥ ६२ ॥
पञ्चषष्टिं सहस्राणि, योजनानां चतुःशतीम् । षट्चत्वारिंशां लवांश्च, त्रयोदशान्तविस्तृतः ॥ ६३ ॥
मध्यभागेऽस्य वैताढ्यो, लक्षाण्यष्टौ स चायतः । धातकीखण्डवैताढ्यवच्छेषं त्विह भाव्यताम् ॥ ६४ ॥
अन्येऽपि दीर्घवैताढ्याः, स्युः सप्तषष्टिरीदृशाः । भरतैरवतक्षेत्रविदेहविजयोद्भवाः ॥ ६५ ॥
उत्तरार्द्धमध्यखण्डे, गाङ्गसैन्धवकुण्डयोः । मध्ये वृषभकूटोऽस्ति, जम्बूद्वीपवृषभाद्रिवत् ॥ ६६ ॥
पर्यन्तेऽस्य ततः शैलो, हिमवान्नाम वर्त्तते । आयामतोऽष्टौ लक्षाणि, विष्कम्भतो भवेदियान् ॥ ६७ ॥
योजनानां द्विचत्वारिंशच्छता दशसंयुताः । चतुश्चत्वारिंशदंशाश्चतुरशीतिनिर्मिताः ॥ ६८ ॥
तस्योपरि पद्महृदः, प्राग्वत्पद्मालिमण्डितः । सहस्रांश्चतुरो दीर्घः, सहस्रद्वयविस्तृतः ॥ ६९ ॥
गङ्गासिन्धुरोहितांशास्ततो नद्यो विनिर्ययुः । प्राच्यां प्रतीच्यामुदीच्यां, क्रमात्तत्रादिमे उभे ॥ ७० ॥
हृदोद्गमे योजनानि, विस्तीर्णे पञ्चविंशतिम् । उद्विद्धे च योजनार्द्धं, समुद्रसंगमे पुनः ॥ ७१ ॥
विस्तीर्णे द्वे शते सार्द्धे, उद्विद्धे पञ्चयोजनीम् । तत्र सिन्धुः प्राच्यपुष्करार्द्धात्कालोदमङ्गति ॥ ७२ ॥
गङ्गा तु प्राप्य पूर्वस्यां, मानुषोत्तरभूधरम् । सुमतिर्दुष्टसंसर्गादिव तत्र विलीयते ॥ ७३ ॥
पश्चिमार्द्धात्पुनर्गङ्गा, याति कालोदवारिधौ । सिन्धुर्नरोत्तरनगपादमूले विलीयते ॥ ७४ ॥
एवं नरोत्तरनगाभिमुखाः सरितोऽखिलाः । विलीयन्त इह ततः परं तासामभावतः ॥ ७५ ॥

गङ्गासिन्धुप्रपाताख्ये, कुण्डे विष्कम्भतो मते । चत्वारिंशत्समधिकं, योजनानां शतद्वयम् ॥ ७६ ॥
तदन्तर्वर्त्तिनौ द्वीपौ, प्रज्ञप्तौ विस्तृतायतौ । द्वात्रिंशद्योजनी मूलप्रवाह इव जिह्विके ॥ ७७ ॥
गङ्गासिन्धुरक्तवतीरक्तास्वेतन्निरुपणम् । षट्त्रिंशशतसङ्ख्यासु, सर्वमप्यविशेषितम् ॥ ७८ ॥
रोहितांशा योजनानि, पञ्चाशन्नदनिर्गमे । विस्तीर्णैकयोजनं चोद्विद्धोदीच्यां नगोपरि ॥ ७९ ॥
एकादश योजनानां, शतान् पञ्चसमन्वितान् । अंशान् द्वाविंशतिं गत्वा, कुण्डं प्राप्याथ पूर्ववत् ॥ ८० ॥
क्षेत्रं हैमवतं द्वेधा, स्वप्रवाहेण कुर्वती । कालोदं याति पूर्वार्द्धे, परार्द्धे मानुषोत्तरम् ॥ ८१ ॥
अस्याः कुण्डं योजनानामशीत्याढ्या चतुःशती । विष्कम्भायामतो मूलप्रवाहवच्च जिह्विका ॥ ८२ ॥
अस्याः कुण्डान्तर्गतश्च, द्वीपो भवति यः स तु । चतुःषष्टिर्योजनानि, विष्कम्भायामतो मतः ॥ ८३ ॥
रुप्यकूले स्वर्णकूले, रोहिते रोहितांशिके । अष्टाप्येतास्तुल्यरुपाः, स्वरुपपरिवारतः ॥ ८४ ॥
अथोत्तरं हिमवतः, क्षेत्रं हैमवतं स्थितम् । वृत्तवैताढ्येन शब्दापातिनाऽलङ्कृतान्तरम् ॥ ८५ ॥
मुखे लक्षं योजनानां, षट्षष्टिं च सहस्रकान् । एकोनविंशां त्रिशतीं, षट्पञ्चाशल्लवांस्ततम् ॥ ८६ ॥
लक्षद्वयं योजनानां, सहस्राणि चतुर्दश । एकपञ्चाशानि ततं, मध्येऽंशान् षष्टियुक् शतम् ॥ ८७ ॥
अन्ते शतान् सचुतरशीतीन् सप्त सहस्रकान् । एकषष्टिं द्विलक्षीं च, द्वापञ्चाशल्लवांस्ततम् ॥ ८८ ॥
जम्बूद्वीपस्थायिवृत्तवैताढ्यैः सदृशा यथा । घातकीखण्डस्थवृत्तवैताढ्याः सर्वथा तथा ॥ ८९ ॥
अत्रापि वृत्ता वैताढ्याः, पूर्वोक्तैः सदृशाः समे । शब्दापातिप्रभृतयः, प्रत्येतव्या मनस्विभिः ॥ ९० ॥
द्वाभ्यां चतुर्भिरष्टाभिर्योजनैरन्तरं क्रमात् । स्वापगाभ्यां शब्दगन्धापातिमेरुमहीभृताम् ॥ ९१ ॥
विकटापातिनोर्माल्यवतोस्तथान्तरं क्रमात् । स्वस्वक्षेत्रापगाभ्यां द्वे, योजने तच्चतुष्टयम् ॥ ९२ ॥
अस्योत्तरस्यां च महाहिमवान् वर्त्तते गिरिः । लक्षाण्यष्टायतो मौलौ, महापद्महृदाङ्कितः ॥ ९३ ॥
योजनानां सहस्राणि, षोडशाष्टौशतानि च । द्विचत्वारिंशदाढ्यानि, कलाश्चाष्टैष विस्तृतः ॥ ९४ ॥
महापद्महृदस्त्वष्टौ, सहस्राण्यायतो भवेत् । योजनानां सहस्राणि, चत्वारि चैष विस्तृतः ॥ ९५ ॥
दक्षिणस्यामुदीच्यां च, नद्यौ द्वे निर्गते इतः । रोहिता हरिकान्ता च, ते उभे पर्वतोपरि ॥ ९६ ॥
चतुःषष्टिं शतान्येकविंशान्यंशचतुष्टयम् । अतीत्य स्वस्वकुण्डान्तर्निपत्य निर्गते ततः ॥ ९७ ॥
पूर्वार्द्धाद् हैमवतगा, नगाद्रिं याति रोहिता । अपरार्द्धात्तु सा याति, कालोदनामवारिधिम् ॥ ९८ ॥
हरिकान्ता पुनर्याति, कालोदं हरिवर्षगा । पूर्वार्द्धादपरार्द्धात्तु, याति सा मानुषोत्तरम् ॥ ९९ ॥
नद्योर्हरिसलिलयोर्हरिकान्ताख्ययोरपि । तयोर्नारीकान्तयोश्च, तथैव नरकान्तयोः ॥ १०० ॥
इत्यष्टानामापगानां, विष्कम्भो ह्रदनिर्गमे । भवेच्छतं योजनानामुण्डत्वं योजनद्वयम् ॥ १०१ ॥
पर्यन्ते च योजनानां, सहस्रमिह विस्तृतिः । उण्डत्वं च योजनानां, विंशतिः परिकीर्त्तितम् ॥ १०२ ॥

विष्कम्भायामतः कुण्डान्येतासां जगदुर्जिनाः । षष्ट्याढ्यानि योजनानां, शतानीह नव श्रुते ॥ १०३ ॥
अष्टाविंशं शतं द्वीपाश्चैतासां विस्तृतायताः । जिह्विका विस्तृतोद्विद्धाश्चासां मूलप्रवाहवत् ॥ १०४ ॥
शैलात्ततः परं क्षेत्रं, हरिवर्षं विराजते । तद्गन्धापातिवैताढ्येनाञ्चितं विस्तृतं मुखे ॥ १०५ ॥
लक्षाणि षड् योजनानां, पञ्चषष्टिं सहस्रकान् । द्वे शते सप्तसप्तत्याऽधिके द्वादश चांशकान् ॥ १०६ ॥
अष्टौ लक्षाः सहस्राणि, षट्पञ्चाशच्छतद्वयम् । सप्तोत्तरं योजनानां, मध्येऽशाश्चतुरस्ततम् ॥ १०७ ॥
सहस्रैः सप्तचत्वारिंशताढ्या दशलक्षिकाः । षट्त्रिंशं च योजनानां, शतमंशशतद्वयम् ॥ १०८ ॥
अष्टाढ्यं विस्तीर्णमन्ते, स्वरुपमपरं पुनः । जम्बूद्वीपहरिवर्षवदिहापि विभाव्यताम् ॥ १०९ ॥
इतः परश्च निषधः, पर्वतः सर्वतः स्फुरन् । ह्रदेनालङ्कृतो मूर्ध्नि, सदञ्जेन तिगिञ्छिना ॥ ११० ॥
सप्तषष्टिं सहस्राणि, साष्टषष्टि शतत्रयम् । योजनानां लवान् द्वात्रिंशतं स्यादेष विस्तृतः ॥ १११ ॥
तिगिञ्छिस्तु योजनानां, सहस्राण्यष्ट विस्तृतः । सहस्राणि षोडशैष, भवेदायामतः पुनः ॥ ११२ ॥
एतस्याद्धरिसलिला, शीतोदेति निरीयतुः । दक्षिणस्यामुदीच्यां च, पर्वतोपर्यमू उभे ॥ ११३ ॥
एकोनत्रिंशतं गत्वा, सहस्रान् षट् शतानि च । योजनानां सचतुरशीतीन् षोडश चांशकान् ॥ ११४ ॥
पततः स्वस्वकुण्डान्तर्हरिवर्षान्तराध्वना । पूर्वार्द्धाद्धरिसलिला, प्राप्नोति मानुषोत्तरम् ॥ ११५ ॥
पश्चिमार्द्धगता सा तु, कालोदमुपसर्पति । सर्वासां दिग्विनिमय, एवं पूर्वापरार्द्धयोः ॥ ११६ ॥
पूर्वार्द्धशीतोदा प्रत्यग्विदेहार्द्धविभेदिनी । कालोदमन्यार्द्धस्था तु, प्राप्नोति मानुषोत्तरम् ॥ ११७ ॥
एताश्चतस्रो विस्तीर्णा, द्वे शते ह्रदनिर्गमे । चत्वार्युण्डा योजनानि, प्रान्ते दशगुणास्ततः ॥ ११८ ॥
विस्तीर्णान्यायतान्यासां, कुण्डानि च चतसृणाम् । सविंशानि योजनानां, शतान्येकोनविंशतिम् ॥ ११९ ॥
एतत्कुण्डान्तर्गताश्च, द्वीपाः प्रोक्ता महर्षिभिः । षट्पञ्चाशे योजनानां, द्वे शते विस्तृतायताः ॥ १२० ॥
सर्वे कुण्डगता द्वीपाः, क्रोशद्वयोच्छ्रिता इति । तैर्जम्बूद्वीपगैस्तुल्या, उच्छ्रयेण नगा इव ॥ १२१ ॥
यथेदमर्द्धं व्याख्यातं, याम्यं पूर्वापरार्द्धयोः । तथा ज्ञेयमुदीच्यार्द्धमपि मानस्वरुपतः ॥ १२२ ॥
किन्तूदीच्येषुकाराद्रेः, परतः पार्श्वयोर्द्वयोः । स्यादेकैकमैरवतक्षेत्रं भरतसन्निभम् ॥ १२३ ॥
पुण्डरीकह्रदोपेतस्ततश्च शिखरी गिरिः । तस्माद्रक्ता रक्तवती, स्वर्णकूला विनिर्ययुः ॥ १२४ ॥
तत्रादिमे द्वे सरितौ, क्षेत्रमैरवतं गते । जगाम हैरण्यवतं, स्वर्णकूला तु वाहिनी ॥ १२५ ॥
ततश्च हैरण्यवतं, विकटापातिनाऽङ्कितम् । ततो महापुण्डरीकह्रदवान् रुक्मिपर्वतः ॥ १२६ ॥
एतद्भवा रुप्यकूला, हैरण्यवतगामिनी । रम्यकान्तर्नरकान्त, प्रयात्येतत्समुद्भवा ॥ १२७ ॥
ततोऽर्वाग् रम्यकक्षेत्रं, माल्यवद्वृत्तभूधरम् । केसरिह्रदवन्नीलवन्नामा पर्वतस्ततः ॥ १२८ ॥
प्रवर्त्तते विदेहान्तः, शीतैतन्नगसम्भवा । नारीकान्ता रम्यकान्तः, प्रसर्पत्येतदुद्गता ॥ १२९ ॥

एषु क्षेत्रेषु पूर्वार्द्धान्नद्यो याः पूर्वसंमुखाः । ता मानुषोत्तरं यान्ति, कालोदं पश्चिमामुखाः ॥ १३० ॥
पश्चिमार्द्धात्तु कालोदं, प्रयान्ति पूर्वसंमुखाः । पश्चिमाभिमुखास्तास्तु, प्रयान्ति मानुषोत्तरम् ॥ १३१ ॥
मध्ये क्षेत्रं विदेहाख्यं, नीलवन्निषधागयोः । एकैकं मेरुणोपेतं, भाति पूर्वापरार्द्धयोः ॥ १३२ ॥
अष्टाचत्वारिंशदंशान्, लक्षाः षड्विंशतिं मुखे । योजनान्येकषष्टिं सहस्रान् साष्टशतं ततम् ॥ १३३ ॥
तथा लक्षाश्चतुस्त्रिंशद्योजनानां समन्विताः । चतुर्विंशत्या सहस्रैरष्टाविंशं शताष्टकम् ॥ १३४ ॥
षोडशांशाश्च विस्तीर्णं, मध्ये तस्य च विस्तृतिः । लक्षाण्यथैकचत्वारिंशदष्टाशीतिरेव च ॥ १३५ ॥
सहस्राणि सप्तचत्वारिंशा पञ्चशती तथा । योजनानामंशशतं, षण्णवत्या समन्वितम् ॥ १३६ ॥
सहस्राणि योजनानामेकोनविंशतिस्तथा । सचतुर्नवतिः सप्तशती क्रोशस्तथोपरि ॥ १३७ ॥
विष्कम्भः प्रतिविजयं, प्रत्येकमर्द्धयोर्द्धयोः । योजनानां द्वे सहस्रे, वक्षस्कारादि विस्तृतिः ॥ १३८ ॥
प्रत्येकमन्तर्नद्यश्च, शतानि पञ्च विस्तृताः । स्वरुपं सर्वमत्रान्यद्धातकीखण्डवद्भवेत् ॥ १३९ ॥
अष्टानां वनमुखानां, विस्तृतिः स्याल्लघीयसी । एकोनविंशतिभवाश्चत्वारो योजनांशकाः ॥ १४० ॥
एकादश सहस्राणि, योजनानां शतानि षट् । साष्टाशीतीनि चैतेषां, विस्तृतिः स्यादगरीयसी ॥ १४१ ॥
उपवर्षधरं गुर्वी, लघ्वी च सरिदन्तिके । तेषां चतुर्णां कालोदबहिर्भागस्पृशां भवेत् ॥ १४२ ॥
चतुर्णां तु नरनगासन्नानां विस्तृतिर्गुरुः । शीताशीतोदान्तिकेऽन्या, नीलवन्निषधान्तिके ॥ १४३ ॥
पूर्वापरं भद्रसालवनायामः समन्वितः । मेरुविष्कम्भेण सह, गर्भभागात्मको भवेत् ॥ १४४ ॥
चत्वारिंशत्सहस्राणि, लक्षाश्चतस्र एव च । योजनानां नवशती, निर्दिष्टा षोडशोत्तरा ॥ १४५ ॥
षोडशानां विजयानां, व्याससंकलना त्वियम् । तिस्रो लक्षा योजनानां, सहस्राणि च षोडश ॥ १४६ ॥
सप्तशत्यष्टोत्तराऽथ, वक्षस्कारमहीभृताम् । अष्टानां तत्संकलना, स्युः सहस्राणि षोडश ॥ १४७ ॥
षण्णामन्तर्नदीनां तु, व्याससङ्कलना भवेत् । सहस्राणि त्रीणि वनमुखयोरुभयोस्त्वियम् ॥ १४८ ॥
षट्सप्ततिस्पृक् त्रिशती, सहस्रास्त्र्यक्षि संमिताः । द्वीपव्यासोऽष्ट लक्षाणि, सर्वसंकलने भवेत् ॥ १४९ ॥
अत्रापीष्टान्यविष्कम्भवर्जितद्वीपविस्तृतेः । स्वस्वसङ्ख्याविभक्ताया, लभ्यतेऽभीष्टविस्तृतिः ॥ १५० ॥
भावना धातकीखण्डवत् ।
महाविदेहविष्कम्भे, यथेष्टस्थानगोचरे । शीताशीतोदान्यतरव्यासहीनेऽर्द्धिते सति ॥ १५१ ॥
विजयांतर्नदीवक्षस्कारान्तिमवनायतिः । ज्ञायते सा तत्र तत्र, स्थाने भाव्या स्वयं बुधैः ॥ १५२ ॥
अथ देवकुरुणां यः, प्राच्यां सौमनसो गिरिः । तथोत्तरकुरूणां यः, पूर्वस्यां माल्यवानिमौ ॥ १५३ ॥
त्रिचत्वारिंशत्सहस्रान्, लक्षा विंशतिमायतौ । एकोनविंशां द्विशतीं, योजनानामुभावपि ॥ १५४ ॥
देवोत्तरकुरुभ्यश्च, प्रतीच्यां यौ व्यवस्थितौ । विद्युत्प्रभगिरिर्गन्धमादनश्चायतावुभौ ॥ १५५ ॥

योजनानां षोडशैव, लक्षाः षड्विंशतिं तथा । सहस्राणि शतमेकं, संपूर्णं षोडशोत्तरम् ॥ १५६ ॥
इदं मानं पुष्करार्द्धप्राचीनार्धव्यपेक्षया । पश्चिमार्द्धे विपर्यासो, धातकीखंडवत् स तु ॥ १५७ ॥
अष्टाप्येते गजदन्ता, नीलवन्निषधान्तिके । सहस्रद्वयविस्तीर्णाः, सूक्ष्माश्च मन्दरान्तिके ॥ १५८ ॥
विदेहमध्यविष्कम्भान्मेरुव्यासे विशोधिते । शेषेऽर्द्धिते च विष्कम्भः, प्रत्येतव्य कुरुद्वये ॥ १५९ ॥
लक्षाः सप्तदश सप्त, सहस्राणि शतानि च । चतुर्दशानि सप्तैव, योजनानां लवाष्टकम् ॥ १६० ॥
मेरुयुक्तभद्रसालायामात्प्रागुपदर्शितात् । गजदन्तद्वयहीनाच्छेषं जीवा कुरुद्वये ॥ १६१ ॥
लक्षाश्चतस्रः षट्त्रिंशत्, सहस्राणि शतानि च । नवैव षोडशाढ्यानि, योजनानीति तन्मितिः ॥ १६२ ॥
आयाममानयोः प्राच्यप्रतीच्यगजदन्तयोः । योगे भवेद्धनुःपृष्ठं, कुरुद्वय इदं तु तत् ॥ १६३ ॥
लक्षाः षट्त्रिंशदेकोनसप्ततिश्च सहस्रकाः । शतत्रयं योजनानां, पञ्चत्रिंशत्समन्वितम् ॥ १६४ ॥
धातकीखण्डवदिहाप्यग्रतो नीलवद्गिरेः । यमकावुदक्कुरुषु, सहस्रं विस्तृतायतौ ॥ १६५ ॥
ततःपरं ह्रदाः पञ्च, स्युर्दक्षिणोत्तरायताः । सहस्रांश्चतुरो दीर्घा, द्वे सहस्रे च विस्तृताः ॥ १६६ ॥
नीलवतो यमकयोस्ताभ्यामाद्यह्रदस्य च । मिथो ह्रदानां क्षेत्रान्तसीम्नश्च पञ्चमह्रदात् ॥ १६७ ॥
सप्ताप्येतान्यन्तराणि, तुल्यान्यैकैकं पुनः । लक्षद्वयं योजनानां, चत्वारिंशत्सहस्रकाः ॥ १६८ ॥
शतानि नव सैकोनषष्टीनि योजनस्य च । सप्तक्षुण्णस्यैकभागस्तत्रोपपत्तिरुच्यते ॥ १६९ ॥
दैर्घ्यं ह्रदानां पञ्चानां, यत्सहस्राणि विंशतिः । सहस्रयमकव्यासयुक्तं तत्कुरुविस्तृतेः ॥ १७० ॥
विशोध्यतेऽथ यच्छेषं, तत्सप्तभिर्विभज्यते । सप्तानां व्यवधानानामेवं मानं यथोदितम् ॥ १७१ ॥
उदक्कुरुषु पूर्वार्द्धे, पद्मनामा महातरुः । पश्चिमार्द्धे महापद्मस्तौ जम्बूवृक्षसोदरौ ॥ १७२ ॥
पद्मनाम्नो भूमिरुहः, पद्मनामा सुरः पतिः । महापद्मस्य तु स्वामी, पुण्डरीकः सुरोत्तमः ॥ १७३ ॥
स्युर्देवकुरवोऽप्येवं, किंत्वत्र निषधात्परौ । विचित्रचित्रावचलौ, ततः पञ्च ह्रदाः क्रमात् ॥ १७४ ॥
पूर्वार्द्धे चापरार्द्धे च, स्यातां शाल्मलिनाविह । जम्बूवृक्षसधर्माणावेतावपि स्वरूपतः ॥ १७५ ॥
पुष्करार्द्धेऽथ यौ मेरू, स्यातां पूर्वापरार्द्धयोः । धातकीखण्डस्थमेरुसमानौ तौ तु सर्वथा ॥ १७६ ॥
किंत्वेतयोर्भद्रसालवनयोरायतिर्भवेत् । लक्षद्वयं पञ्चदश, सहस्राणि शतानि तु ॥ १७७ ॥
अष्टपञ्चाशानि सप्त, पूर्वपश्चिमयोर्दिशोः । प्रत्येकं दक्षिणोदीच्योः स्याद्व्यासस्त्वयमेतयोः ॥ १७८ ॥
द्विसहस्रैकपञ्चाशा, योजनानां चतुःशती । अष्टाशीत्या योजनस्य, भक्तस्यांशाश्च सप्ततिः ॥ १७९ ॥
उपपत्तिस्त्वत्र प्राग्वत् ।
शेषा त्वत्र नन्दनादिवनवक्तव्यताऽखिला । धातकीखण्डमेरुभ्यां, पुनरुक्तेति नोच्यते ॥ १८० ॥
जम्बूद्वीपो महामेरुश्चतुर्भिर्मेरुभिः श्रियम् । धत्ते तीर्थंकर इव, चतुर्भिः परमेष्ठिभिः ॥ १८१ ॥

प्रागुक्ताख्येषु पूर्वार्द्धे, विजयेष्वधुना जिनाः । चन्द्रबाहुर्भुजङ्गेशेश्वरो नेमिप्रभोऽपि च ॥ १८२ ॥
पश्चिमार्द्धे तु तेष्वेव, वीरसेनो जिनेश्वरः । महाभद्रदेवयशोऽजितवीर्या इति क्रमात् ॥ १८३ ॥
द्वीपार्धेऽस्मिन्नगादीनां, संग्रहः सर्वसंख्यया । धातकीखण्डवद् ज्ञेयोऽविशेषान्नोदितः पृथक् ॥ १८४ ॥
द्विसप्ततिः शशभृतस्तावन्त एव भास्कराः । षट् सहस्राणि षट्त्रिंशा, त्रिशत्यत्र महाग्रहाः ॥ १८५ ॥
नक्षत्राणां सहस्रे द्वे, प्रज्ञप्ते षोडशोत्तरे । प्रमाणमथ ताराणां, पुष्करार्द्धे निरुप्यते ॥ १८६ ॥
अष्टचत्वारिंशदिह, लक्षा द्वाविंशतिस्तथा । सहस्राणि द्वे शते च, स्युस्ताराः कोटिकोटयः ॥ १८७ ॥
एवं च–
लक्षाण्यष्टौ पुष्करार्द्धं, तावान्कालोदवारिधिः । चत्वारि धातकीखण्डो, द्वे लक्षे लवणोदधिः ॥ १८८ ॥
एवं द्वाविंशतिर्लक्षाण्येकतः परतोऽपि च । मध्ये जम्बूद्वीप एकं, लक्षमायतविस्तृतः ॥ १८९ ॥
पञ्चचत्वारिंशदेवं, लक्षाण्यायतविस्तृतम् । नरक्षेत्रं परिक्षेपो, ज्ञेयोऽस्य पुष्करार्द्धवत् ॥ १९० ॥
तावतो नरक्षेत्रात्, परतो न भवेन्नृणाम् । गर्भाधानं जन्ममृत्यू, संमूर्छिमनरोद्भवः ॥ १९१ ॥
आसन्नप्रसवां कश्चित्स्त्रियं नयति चेत्सुरः । नरक्षेत्रात्परं नासौ, प्रसूते तत्र कर्हिचित् ॥ १९२ ॥
यदि कण्ठगतप्राणो, मनुष्यक्षेत्रतः परम् । मनुष्यो नीयते नासौ, म्रियते तत्र कर्हिचित् ॥ १९३ ॥
अथावश्यंभाविजन्मक्षीणायुष्कौ च तौ यदि । तदा सुरस्य तन्नेतुर्भवेद्वाऽन्यस्य कस्यचित् ॥ १९४ ॥
मनस्तथैव येनैनामासन्नप्रसवां स्त्रियम् । तं वा कण्ठगतप्राणं, नरक्षेत्रे पुनर्नयेत् ॥ १९५ ॥
एवं नातः परमहर्निशादिसमयस्थितिः । न बादराग्निर्न नदी, न विद्युद्गर्जिनीरदाः ॥ १९६ ॥
नार्हदाद्या न निधयो, नायने नैव चाकराः । नेन्दुवृद्धिक्षयौ नोपरागोऽर्केन्द्वोर्न वा गतिः ॥ १९७ ॥
तथाहुः"अरिहंतसमयबायरअग्गी विज्जू बलाहगा थणिआ । आगरनइनिहिउवराग निग्गमे वुड्ढिअयणं च ॥ "
एतत्सर्वमर्थतो जीवाभिगमसूत्रे चतुर्थप्रतिपत्तौ ।
क्षेत्रेषु पञ्चचत्वारिंशतीह भरतादिषु । अन्तर्द्वीपेषु षट्पञ्चाशत्येव संभवेन्नृणाम् ॥ १९८ ॥
बाहुल्याज्जन्म मृत्युश्च, वार्द्धिवर्षधरादिषु । शेषेषु तु नृणां जन्म, प्रायेण नोपपद्यते ॥ १९९ ॥
मृत्युस्तु संहरणतो, विद्यालब्धिबलेन वा । गतानां तत्र तत्रायुःक्षयात्संभवति क्वचित् ॥ २०० ॥
अथैतस्मिन्नरक्षेत्रे, वर्षक्षेत्रादिसंग्रहः । क्रियते सुखबोधाय, तदर्थोऽयं ह्युपक्रमः ॥ २०१ ॥
अध्यर्द्धौ द्वाविह द्वीपौ, द्वावेव च पयोनिधी । भरतान्यैरवतानि, विदेहाः पञ्च पञ्च च ॥ २०२ ॥
एवं पञ्चदश कर्मभूमयोऽत्र प्रकीर्त्तिताः । देवोत्तराख्याः कुरवो, हैरण्यवतरम्यके ॥ २०३ ॥

हैमवतं हरिवर्षं, पञ्च पञ्च पृथक् पृथक् । सर्वाण्यपि त्रिंशदेवं, भवन्त्यकर्मभूमयः ॥ २०४ ॥
अन्तर्द्वीपाश्च षट्पञ्चाशदेवं युग्मिभूमयः । षडशीतिर्नरस्थानान्येवमेकोत्तरं शतम् ॥ २०५ ॥
तथाऽत्र मेरवः पञ्च, विंशतिर्गजदन्तकाः । वक्षस्काराद्रयोऽशीतिः, सहस्रं काञ्चनाचलाः ॥ २०६ ॥
विचित्राः पञ्च चित्राश्च, पञ्चाथ यमकाचलाः । दश त्रिंशद्धर्षधरा, इषुकारचतुष्टयम् ॥ २०७ ॥
विंशतिर्वृत्तवैताढ्याः, शतं दीर्घाः ससप्ततिः । एकोनपञ्चाशान्यद्रिशतान्येवं त्रयोदशम् ॥ २०८ ॥
अष्टौ दाढाः पार्वताः स्युः, कूटास्त्विह चतुर्विधाः । वैताढ्यशेषाद्रिसहस्रांकभूकूटभेदतः ॥ २०९ ॥
तत्र च—
सार्द्धं सहस्रं वैताढ्यकूटानां त्रिंशताऽधिकम् । शेषाद्रिकूटानामष्टशती षडधिका भवेत् ॥ २१० ॥
सहस्राङ्काः पञ्चदशेत्येवं कूटानि भूभृताम् । सर्वाग्रेणैकपञ्चाशे, द्वे सहस्रे शतत्रयम् ॥ २११ ॥
भद्रसालवने मेरोर्यानि दिक्षु विदिक्षु च । तानि दिग्गजकूटानि, चत्वारिंशद्भवेदिह ॥ २१२ ॥
द्रूणां दशानामष्टाष्ट, यानि दिक्षु विदिक्षु च । कूटानि तान्यशीतिः स्युर्नृक्षेत्रे सर्वसंख्यया ॥ २१३ ॥
शतं वृषभकूटानां, सप्तत्याऽधिकमाहितम् । भवन्त्येवं भूमिकूटा, नवत्याढ्यं शतद्वयम् ॥ २१४ ॥
महावृक्षा दश तत्र, पञ्च शाल्मलिसंज्ञकाः । शेषा जम्बूर्धातकी च, पद्मश्चान्त्यौ महापरौ ॥ २१५ ॥
महाह्रदास्त्रिंशदिह, पञ्चाशच्च कुरुह्रदाः । भवत्यशीतिरित्येवं, ह्रदानां सर्वसंख्यया ॥ २१६ ॥
भरतादिक्षेत्रमहानदीकुण्डानि सप्ततिः । विदेहविजयस्थानि, तानि विंशं शतत्रयम् ॥ २१७ ॥
षष्टिरन्तर्नदीनां स्युरित्येवं सर्वसंख्यया । चतुःशतीह कुण्डानां, पञ्चाशदधिका भवेत् ॥ २१८ ॥
भरतादिक्षेत्रगता, महानद्योऽत्र सप्ततिः । विदेहविजयस्थानां, तासां विंशं शतत्रयम् ॥ २१९ ॥
अन्तर्नद्यः षष्टिरिति, परिच्छदजुषामिह । पञ्चाशा मुख्यसरितां, सर्वाग्रेण चतुःशती ॥ २२० ॥
सा चैवं–
गङ्गासिन्धुरक्तवतीरक्ताः प्रत्येकमीरिताः । पञ्चाशीतिस्तथा शीताशीतोदारूप्यकूलिकाः ॥ २२१ ॥
स्वर्णकूला नरकान्ता, नारीकान्ता च रोहिता । रोहितांशा हरिकान्ता, हर्यादिसलिलापि च ॥ २२२ ॥
द्वादशान्तरनद्यश्च, पञ्च पञ्चाखिला इमाः । परिच्छदापगास्त्वासां, ज्ञेयाः पूर्वोक्तया दिशा ॥ २२३ ॥
एवं द्विसप्ततिर्लक्षा, अशीतिश्च सहस्रकाः । भवन्ति मनुजक्षेत्रे, नद्योऽन्यस्मिन् मते पुनः ॥ २२४ ॥
एकोननवतिर्लक्षाः, सहस्रा षष्टिरेव च । एतच्चान्तरापगानां, पृथक्तन्त्रविवक्षया ॥ २२५ ॥

इदं च नदीसर्वाग्रं जम्बूद्वीपगतमहानदीतुल्यपरिवाराणां धातकीखण्डपुष्करार्द्धगतमहानदीनां संभावनयोक्तं, धातकीखण्डपुष्करार्द्धयोर्महानदीनां परिवारे जम्बूद्वीपवर्त्तिमहानदीपरिवारापेक्षया द्वैगुण्यादिविशेषस्तु बृहत्क्षेत्रविचारादिषु क्वापि न दृष्ट इति नोक्त इति ज्ञेयं ।

उत्कर्षतो जिना अत्र, स्युः सप्तत्यधिकं शतम् । ते द्वितीयार्हतः काले, विहरन्तोऽभवन्निह ॥ २२६ ॥
केवलज्ञानिनामेवमुत्कर्षान्नव कोटयः । नव कोटिसहस्राणि, तथोत्कर्षेण साधवः ॥ २२७ ॥
जघन्यतो विंशतिः स्युर्भगवन्तोऽधुनापि ते । विदेहेष्वेव चत्वारश्चत्वारो विहरन्ति हि ॥ २२८ ॥

ते चामी—सीमंधरं १ स्तौमि युगंधरं २ च, बाहुं ३ सुबाहुं ४ च सुजातदेवम् ५ ।
स्वयंप्रभं ६ श्रीवृषभाननाख्य ७ मनन्तवीर्यं ८ च विशालनाथम् ९ ॥ २२९ ॥
सूरप्रभं १० वज्रधरं ११ च चंद्राननं १२ नमामि प्रभुभद्रबाहुम् १३ ।
भुजङ्ग १४ नेमिप्रभ १५ तीर्थनाथावथेश्वरं १६ श्री जिनवीरसेनम् १७ ॥ २३० ॥

स्तवीमि च महाभद्रं १८, श्रीदेवयशसं १९ तथा । अर्हन्तमजितवीर्यं २०, वन्दे विंशतिमर्हताम् ॥ २३१ ॥
पञ्चस्वपि विदेहेषु, पूर्वापरार्द्धयोः किल । एकैकस्य विहरतः, संभवाज्जगदीशितुः ॥ २३२ ॥
दशैव विहरन्तः स्युर्जघन्येन जिनेश्वराः । इत्यूचुः सूरयः केचित्, तत्त्वं वेत्ति त्रिकालवित् ॥ २३३ ॥
तथोक्तं प्रवचनसारोद्धारसूत्रे—'सत्तरिसयमुक्कोसं जहन्न वीसा य दस य विहरंति' इति, [श्लोक ३२७]
उक्ताज्जघन्यादूनास्तु, विहरन्तो भवन्ति न । ततोऽन्येऽपि यथास्थानं, स्युर्गार्हस्थ्याद्यवस्थया ॥ २३४ ॥
कोटिद्वयं केवलिनो, द्वे च कोटिसहस्रके । साधवः स्युर्जघन्येन, न्यूना इतो भवन्ति न ॥ २३५ ॥
यद्येकः केवली तेभ्यः, सिद्धयेत्साधुर्दिवं व्रजेत् । तदाऽवश्यं भवेदन्यः, केवली प्रव्रजेत्परः ॥ २३६ ॥
चक्रिशार्ङ्गिशीरिणां च, शतं पञ्चाशताधिकम् । उत्कर्षतो जघन्येन, ते भवन्तीह विंशतिः ॥ २३७ ॥
तथोक्तं—प्रवचनसारोद्धारे—

"उक्कोसेणं चक्की सयं दिवड्ढं च कम्मभूमीसुं । वीसं जहन्नभावे केसवसंखावि एमेव" ॥

जम्बूद्वीपप्रज्ञप्त्या अप्ययमेवाभिप्रायः, श्रीसमवायाङ्गे तु—"धायईसंडे णं दीवे अडसट्ठिं चक्किविजया य अडसट्ठिं रायहाणीओ, तत्थ णं उक्कोसपए अडसट्ठिं अरहंता समुप्पज्जिंसु वा ३, एवं चक्कवट्टी समुप्पज्जिंसु वा ३, एवं बलदेवा वासुदेवा समु०, पुक्खरदीवड्ढेणं अडसट्ठि विजया, एवं अरिहंता समु० जाव वासुदेवा," इत्युक्तमिति ज्ञेयं ।[1]

स्यान्निधीनां पञ्चदशशती त्रिंशाऽत्र सत्तया । जघन्यतश्चक्रिभोग्यं, तेषां शतमशीतियुक् ॥ २३८ ॥
उत्कर्षतश्चक्रिभोग्यनिधीनां पुनरेकदा । पञ्चाशताधिकानीह, स्युः शतानि त्रयोदश ॥ २३९ ॥
उत्कर्षतोऽत्र रत्नानां, स्युः शतान्येकविंशतिः । जघन्यतः पुनस्तेषां, द्विशत्यशीतिसंयुता ॥ २४० ॥

---

१ भिन्न कालापक्षयैतत्, प्राक्तनं त्वेककालपेक्षमिति न विरुद्धता, मूलागम एव विदेहेषु चक्रिकालासंभविवासुदेवचतुष्कोक्तेः ।

पञ्चाक्षैकाक्षरत्नानां, चत्वारिंशं शतं भवेत् । जघन्येनोत्कर्षतश्च सपञ्चाशं सहस्रकम् ॥ २४१ ॥
शतं सप्तत्या समेतं, चक्रिजेतव्यभूमयः । भरताद्या दशक्षेत्री, विजयाः षष्टियुक् शतम् ॥ २४२ ॥
आभियोगिकविद्याभृच्छ्रेणीनां सर्वसंख्यया । साशीतीनि षट् शतानि, विद्याभृतां पुराणि च ॥ २४३ ॥
अष्टादश सहस्राणि, शतानि सप्त चोपरि । अयोध्यादिराजधान्यः, शतं सप्ततिसंयुतम् ॥ २४४ ॥
द्वे पङ्क्ती इह चन्द्राणां, द्वे च पङ्क्ती विवस्वताम् । एकैकान्तरिता एवं, चतस्र इह पङ्क्तयः ॥ २४५ ॥
प्रतिपङ्क्ति च षट्षष्टिसंख्याकाः शशिभास्कराः । सूचीश्रेण्या स्थिता जम्बूद्वीपेन्दुरविभिः समम् ॥ २४६ ॥
एवं पङ्क्त्यश्चतस्रोऽपि, पर्यटन्ति दीवानिशम् । मृगयन्त्य इवाशेषवञ्चकं कालतस्करम् ॥ २४७ ॥
द्वात्रिंशं शतमित्येवं, नरक्षेत्रे हिमांशवः । द्वात्रिंशं शतमर्काश्च, शोभन्तेऽदभ्रतेजसः ॥ २४८ ॥
नक्षत्राणां पङ्क्तयश्च, षट्पञ्चाशद्भवेदिह । प्रतिपङ्क्ति च षट्षष्टिः, षट्षष्टिः स्युरुडून्यपि ॥ २४९ ॥
जम्बूद्वीपस्थतत्तद्भैः, पङ्क्त्या चरन्त्यमून्यपि । जम्बूद्वीपग्रहैः पङ्क्त्या, चरन्त्येवं ग्रहा अपि ॥ २५० ॥
ग्रहाणां पङ्क्तयश्चात्र, षट्सप्तत्यधिकं शतम् । प्रतिपङ्क्ति च षट्षष्टिः, षट्षष्टिः स्युर्ग्रहा अपि ॥ २५१ ॥
एवं च–
भानां शतानि षट्त्रिंशत्, षण्णवत्यधिकान्यथ । एकादश ग्रहसहस्राः शताः षोडशाश्च षट् ॥ २५२ ॥
स्युस्ताराः कोटिकोट्योऽत्राष्टाशीत्या लक्षकैर्मिताः । सहस्रैरपि चत्वारिंशता शतैश्च सप्तभिः ॥ २५३ ॥
अथात्र यानि चैत्यानि, शाश्वतान्यथ तेषु याः । अर्हतां प्रतिमा वन्दे, ताः संख्याय श्रुतोदिताः ॥ २५४ ॥
शतास्त्रयोदशैकोनपञ्चाशा ये पुरोदिताः । गिरिणां तेषु ये पञ्च, मेरवः प्राग्निरूपिताः ॥ २५५ ॥
मेरौ मेरौ काननेषु, चतुर्षु दिक्चतुष्टये । चैत्यमेकैकमेकं च, मूर्ध्नि सप्तदशेति च ॥ २५६ ॥
प्रतिमाः प्रतिचैत्यं च, विंशं शतमिहोदिताः । त्रिद्वारेषु हि चैत्येषु, भवन्तीयत्य एव ताः ॥ २५७ ॥
प्रतिद्वारं शाश्वतेषु, यच्चैत्येष्वखिलेष्वपि । स्युः षट् षट् स्थानानि तथा, ह्येकः स्यान्मुखमण्डपः ॥ २५८ ॥
ततो रङ्गमण्डपः स्यात्पीठं मणिमयं ततः । स्तूपस्तदुपरि चतुःप्रतिमालङ्कृतोऽभितः ॥ २५९ ॥
ततोऽशोकतरोः पीठं, पीठं केतोस्ततः परम् । ततोऽप्यग्रे भवेद्वापी, स्वर्वापीवामलोदका ॥ २६० ॥
एवं त्रयाणां द्वाराणां, प्रतिमा द्वादशाभवन् । अष्टोत्तरं शतं गर्भगृहे विंशं शतं ततः ॥ २६१ ॥
चतुर्द्वाराणां च तेषामर्चा द्वारेषु षोडश । गर्भालये साष्टशतं, चतुर्विंशं शतं ततः ॥ २६२ ॥
नन्दीश्वरे द्विपञ्चाशत्कुण्डले रुचकेऽपि च । चत्वारि चत्वारि षष्टरित्येवं सर्वसंख्यया ॥ २६३ ॥
चतुर्द्वाराणि चैत्यानि, शेषाणि तु जगत्त्रये । त्रिद्वाराण्येव चैत्यानि, विज्ञेयान्यखिलान्यपि ॥ २६४ ॥
ज्योतिष्कभवनाधीशव्यन्तरावसथेषु च । सभार्चाभिस्सहैषु स्यात्साशीति प्रतिमाशतम् ॥ २६५ ॥
तच्चैवं—

उपपाताभिषेकाख्ये, अलङ्कारसभापि च । व्यवसायसुधर्माख्ये, भान्ति पञ्चाप्यमूः सभाः ॥ २६६ ॥
द्वारैस्त्रिभिस्त्रिभिर्द्वारि, द्वारेऽर्चाभिश्चतसृभिः । भाति स्तूपः प्रतिसभं, द्वादश द्वादशेति ताः ॥ २६७ ॥
षष्टिः पञ्चानां सभानामिति प्रतिसुरालयम् । प्राग्वद्विंशं शतं चैत्ये, इत्यशीतियुतं शतम् ॥ २६८ ॥
एवमाद्वादशस्वर्गं, साशीतिप्रतिमाशतम् । ग्रैवेयकादिषु शतं, विंशं चानुत्तरावधि ॥ २६९ ॥
अथ प्रकृतं—
पञ्चानामिति मेरूणां, पञ्चाशीतिर्जिनालयाः । जिनार्चानां सहस्राणि, दशोपरि शतद्वयम् ॥ २७० ॥
शेषेषु सर्वगिरिषु, स्यादेकैको जिनालयः । सहस्रं ते चतुश्चत्वारिंशैस्त्रिभिः शतैर्युतम् ॥ २७१ ॥
सहस्रैरेकषष्ट्याढ्यं, लक्षमेकं शतद्वयम् । अशीत्याभ्यधिकं चात्र, जिनार्चाः प्रणिदध्महे ॥ २७२ ॥
यानि दिग्गजकूटानि, चत्वारिंशदिहोचिरे । तेष्वेकैकं चैत्यमष्टचत्वारिंशच्छतानि च ॥ २७३ ॥
अर्चास्तत्र नमस्कुर्मो, भवेच्चैत्यमथैककम् । दशस्वपि कुरुष्वर्चाशतानि द्वादशात्र च ॥ २७४ ॥
जम्बूप्रभूतयो येऽत्र, महावृक्षा दशोदिताः । शतं सप्तदशं तेषु, प्रत्येकं स्युर्जिनालयाः ॥ २७५ ॥
एकस्तत्र मुख्यवृक्षे, शतमष्टाधिकं पुनः । अष्टाधिके वृक्षशते, तत्परिक्षेपवर्त्तिनि ॥ २७६ ॥
तद्दिग्विदिग्वर्त्तिकूटेष्वेकैक इति मीलिताः । एकादशशती सप्तत्याढ्या वृक्षजिनालयाः ॥ २७७ ॥
लक्षमेकं सहस्राणि, चत्वारिंशदथोपरि । चतुःशतीं जिनार्चानां, वृक्षेषु दशसु स्तुवे ॥ २७८ ॥
चतुःशतीह कुण्डानां, या पञ्चाशा निरुपिता । तत्र प्रासाद एकैकः, प्रतिमास्तत्र चार्हताम् ॥ २७९ ॥
चतुष्पञ्चाशत्सहस्रमिता नमस्करोम्यहम् । प्राक्तनैस्त्वत्र कुण्डानां, साशीतिस्त्रिशतीरिता ॥ २८० ॥
पृथग्महानदीचैत्यसप्ततिश्च मया पुनः । महानदीष्वपि कुण्डेष्वेव प्रासादसंभवः ॥ २८१ ॥
इत्थं संभाव्य पञ्चाशा, चतुःशती यदीरिता । कुण्डचैत्यानां तदत्र, नदीचैत्यविवक्षया ॥ २८२ ॥
यदि चान्यत्र कुण्डेभ्यो, नदीषु चैत्यसंभवः । तदा वृद्धोक्तिरेवास्तु, प्रमाणं नाग्रहो मम ॥ २८३ ॥
अशीतिर्ह्रदचैत्यानि, प्रत्येकमेकयोगतः । अर्चा नव सहस्राणि, तेषु वन्दे शतानि षट् ॥ २८४ ॥
एवं मनुष्यक्षेत्रेऽस्मिंश्चैत्यानां सर्वसंख्यया । शतानि सैकोनाशीतीन्येकत्रिंशद्भवन्ति हि ॥ २८५ ॥
लक्षास्तिस्रो जिनार्चानां तथैकाशीतिमेषु च । सहस्राणि नमस्यामि, साशीतिं च चतुःशतीम् ॥ २८६ ॥
नरक्षेत्रात्तु परतश्चत्वारि मानुषोत्तरे । नन्दीश्वरेऽष्टषष्टिश्च, रुचके कुण्डलेऽपि च ॥ २८७ ॥
चत्वारि चत्वारि चैत्यान्यशीतिरेवमत्र च । सहस्राणि नवार्चानां, चत्वारिंशाष्टशत्यपि ॥ २८८ ॥
एवं च तिर्यग्लोकेऽस्मिंश्चैत्यानां सर्वसंख्यया । सहस्राणि त्रीणि शतद्वयी चैकोनषष्टियुक् ॥ २८९ ॥
सहस्राण्येकनवतिं, लक्षास्तिस्रः शतत्रयम् । विंशमत्र जिनार्चानां, तिर्यग्लोके नमाम्यहम् ॥ २९० ॥
ज्योतिष्काणां व्यन्तराणामसंख्येयेष्वसंख्यशः । विमानेषु नगरेषु, चैत्यान्यर्चाश्च संस्तुवे ॥ २९१ ॥

अधोलोकेऽपि भवनाधीशानां सप्तकोटयः । लक्षा द्विसप्ततिश्चोक्ता, भवनानां पुराऽत्र याः ॥ २९२ ॥
प्रत्येकं चैत्यमेकैकं, तत्रेति सप्त कोटयः । लक्षा द्विसप्ततिश्चाधोलोके चैत्यानि संख्यया ॥ २९३ ॥
त्रयोदश कोटिशतान्येकोननवतिं तथा । कोटीः षष्टिं च लक्षाणि, तत्रार्चानां स्मराम्यहम् ॥ २९४ ॥
ऊर्द्ध्वलोकेऽपि सौधर्मात्प्रभृत्यनुत्तरावधि । विमानसंख्या चतुरशीतिर्लक्षाणि वक्ष्यते ॥ २९५ ॥
सहस्राः सप्तनवतिस्त्रयोविंशतिरेव च । तावन्त्येवात्र चैत्यानि, प्रत्येकमेकयोगतः ॥ २९६ ॥
एकं कोटिशतं पूर्णं, द्विपञ्चाशच्च कोटयः । लक्षैश्चतुर्नवत्याढ्याः, सहस्रैरपि संयुताः ॥ २९७ ॥
चतुश्चत्वारिंशतैव, षष्ट्याढ्यैः सप्तभिः शतैः । अर्चयामो जिनार्चानामूर्द्ध्वलोके सुरार्चिताः ॥ २९८ ॥
लक्षाणि सप्तपञ्चाशदित्येवमष्ट कोटयः । त्रैलोक्ये नित्यचैत्यानां, सद्व्यशीति शतद्वयम् ॥ २९९ ॥
कोटीशतानीह पञ्चदशोपरि च कोटयः । द्विचत्वारिंशदेवाष्टपञ्चाशल्लक्षसंयुताः ॥ ३०० ॥
सहस्राणि च षट्त्रिंशत्साशीतीनि जगत्त्रये । नौमि नित्यजिनार्चानां, करवै सफलं जनुः ॥ ३०१ ॥
उत्सेधाङ्गुलनिष्पन्नसप्तहस्तमिताः खलु । शाश्वत्यः प्रतिमा जैन्य, ऊर्द्ध्वाधोलोकयोर्मताः ॥ ३०२ ॥
तिर्यग्लोके तु निखिलास्ताः पञ्चभिर्धनुःशतैः । मिता निरूपितास्तत्त्वपरिच्छेदपयोधिभिः ॥ ३०३ ॥
तथाहुः—
"उस्सेहमंगुलेणं अहउड्ढमसेससत्तरयणीओ[१] । तिरिलोए पणधणुसय सासयपडिमा पणिवयामि" ॥

राजप्रश्नीयोपाङ्गवृत्तौ सूर्याभविमाने तु–'जिणुस्सेहपमाणमेत्ताओ संपलियंकनिसन्नाओ' अस्य व्याख्याने जिनोत्सेधप्रमाणमात्राः, जिनोत्सेध उत्कर्षतः पञ्च धनुःशतानि, जघन्यतः सप्त हस्ताः, इह तु पञ्च धनुःशतानि संभाव्यंते इत्युक्तमिति ज्ञेयं ।

वैमानिकविमानेषु, द्वीपे नन्दीश्वरेऽपि च । कुण्डले रुचकद्वीपे, प्रासादा ये स्युरर्हताम् ॥ ३०४ ॥
योजनानां शतं दीर्घाः, पञ्चाशतं च विस्तृताः । उत्तुङ्गाः कथिताः प्राज्ञैर्योजनानां द्विसप्ततिम् ॥ ३०५ ॥
देवकुरुत्तरकुरुसुमेरुकाननेषु च । वक्षस्कारभूधरेषु, गजदन्ताचलेष्वपि ॥ ३०६ ॥
इषुकाराद्रिषु वर्षधरेषु मानुषोत्तरे । असुराणां निवासेषु, ये प्रागुक्ता जिनालयाः ॥ ३०७ ॥
पञ्चाशतं योजनानि, दीर्घास्तदर्द्धविस्तृताः । षट्त्रिंशतं योजनानि, ते चोत्तुङ्गाः प्रकीर्त्तिताः ॥ ३०८ ॥
नागादीनां निकायानां, नवानां भवनेषु ये । जिनालया योजनानां, दीर्घास्ते पञ्चविंशतिम् ॥ ३०९ ॥
तानि द्वादश सार्द्धानि, पृथवोऽष्टादशोच्छ्रिताः । त्रिधाप्येतदर्द्धमाना, व्यन्तराणां जिनालयाः ॥ ३१० ॥
ज्योतिष्कगतचैत्यानां, न मानमुपलभ्यते । प्रायः क्वाप्यागमे तस्मादस्माभिरपि नोदितम् ॥ ३११ ॥
येऽथ मेरुचूलिकासु, तथैव यमकाद्रिषु । काञ्चनाद्रिदीर्घवृत्तवैताढ्येषु ह्रदेषु च ॥ ३१२ ॥

---

१ शिष्यते-विशिष्यते इति शेषा - उत्कृष्टा न तथा अशेषा इति व्याख्याने न विरोधः, तिर्यग्लोके तु एक एव पक्षः पञ्चधनुःशतात्मकः ।

तथा दिग्गजकूटेषु, जम्ब्वादिषु द्रुमेषु च । प्रागुक्तेषु च कुण्डेषु, निरूपिता जिनालयाः ॥ ३१३ ॥
क्रोशार्द्धपृथुलाः क्रोशदीर्घाश्चापशतानि च । चत्वारिंशानि ते सर्वे, चतुर्दश समुच्छ्रिताः ॥ ३१४ ॥
चैत्यानि यानि रचितानि जिनेश्वराणामन्यान्यपीह भरतप्रमुखैर्जगत्याम् ।
तेष्वार्हतीः प्रतिकृतीः प्रणमामि भक्त्या, त्रैकालिकीस्त्रिकरणामलतां विधाय ॥ ३१५ ॥
विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे, सर्गोऽग्न्यक्षिमितः समाप्तिमगमत्पीयूषसारोपमः ॥ ३१६ ॥
॥ इति श्रीलोकप्रकाशे मानुषोत्तरनगनरक्षेत्रनिरुपणो नाम त्रयोविंशतितमः सर्गः समाप्तः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

॥ अथ चतुर्विंशतितमः सर्गः प्रारभ्यते ॥

परस्मिन् पुष्करार्द्धेऽथ, मानुषोत्तरशैलतः । परतः स्थिरचन्द्रार्कव्यवस्था प्रतिपाद्यते ॥ १ ॥
द्वीपार्णवेषु सर्वेषु, मानुषोत्तरतः परम् । ज्योतिष्काः पञ्चधापि स्युः, स्थिराश्चन्द्रार्यमादयः ॥ २ ॥
स्थिरत्वादेव नक्षत्रयोगोऽप्येषामवस्थितः । चन्द्राः सदाऽभिजिद्युक्ताः, सूर्याः पुष्यसमन्विताः ॥ ३ ॥
तथोक्तं जीवाभिगमसूत्रे—
बहियाउ माणुसनगस्स, चंदसूराणऽवट्ठिया जोगा । चंदा अभीइजुत्ता, सूरा पुण होंति पुस्सेहिं ॥
गिरिकूटावस्थितानामेतेषामन्तरं द्विधा । तद्रवीन्द्वोरेकमन्यदिन्द्वोस्तथाऽर्कयोर्मिथः ॥ ४ ॥
योजनानां सहस्राणि, पञ्चाशत्तत्र चादिमम् । द्वितीयं तु योजनानां, लक्षं साधिकमन्तरम् ॥ ५ ॥
इदमर्थतो जीवाभिगमसूत्रचन्द्रप्रज्ञप्तिसूत्रादिषु ।
साधिकत्वं तु पूर्वोक्तं, चन्द्रार्कान्तरमीलने । तन्मध्यवर्त्तिसूर्येन्दुबिम्बविष्कम्भयोगतः ॥ ६ ॥
तथोक्तं—'ससिससि रविरवि साहिय जोअणलक्खेण अंतरं होइ' इति. [बृहत्संग्रहणी गा. ६६]
शशिनाऽन्तरितो भानुर्भानुनाऽन्तरितः शशी । राकानिशान्तवच्चित्रान्तरास्ते चन्द्रिकातपैः ॥ ७ ॥
तत एव चित्रलेश्याः, शैत्यौष्ण्यादन्तरान्तरा । वाग्मिनो वाक्यसंदर्भा, इवानुनयकाङ्क्षिणः ॥ ८ ॥
चन्द्रास्तत्र सुखलेश्या, नात्यन्तं शीतलत्विषः । मनुष्यलोके शीतर्त्तुभाविपीयूषभानुवत् ॥ ९ ॥
भानवोऽपि मन्दलेश्या, न त्वतीवोष्णकान्तयः । नरक्षेत्रे निदाघर्त्तुभावितिग्मांशुबिम्बवत् ॥ १० ॥
एषां प्रकाश्यक्षेत्राणि, विष्कम्भाल्लक्षमेककम् । योजनानामनेकानि, लक्षाण्यायामतः पुनः ॥ ११ ॥
पक्वेष्टकाकृतीन्येवं, चतुरस्राणि यद्भवेत् । पक्वेष्टका चतुष्कोणा, बह्वायामाऽल्पविस्तृतिः ॥ १२ ॥

तथाहुर्जम्बूद्वीपप्रज्ञप्तिसूत्रे—'बहिया णं भंते ! माणुसुत्तरस्स पव्वयस्स जे चंदिम जाव तारारूवा तं चेण णेयव्वं, णाणत्तं णो, विमाणोववण्णगा णो, चारोववण्णगा णो, चारट्ठिइया णो, गइरइया, पक्किट्ठगसंठाणसंठिएहिं जोअणसयसाहस्सिएहिं तावखित्तेहिं जाव ओभासंति.' इत्थमेतज्जीवाभिगमसूत्रवत्त्योरपि, जम्बूद्वीपप्रज्ञप्तिवृत्तौ त्वेतदेवं भावितं, तथाहि—"इयमत्र भावना—मानुषोत्तरपर्वताद्योजनलक्षाद्धांतिक्रमे करणविभावनोक्तकरणानुसारेण प्रथमा चन्द्रसूर्यपङ्क्तिः, ततो योजनलक्षातिक्रमे द्वितीया पङ्क्तिः. तेन प्रथमपङ्क्तिगतचन्द्रसूर्याणामेतावांस्तापक्षेत्रस्यायामः विस्तारश्च एकसूर्यादपरसूर्यो लक्षयोजनातिक्रमे तेन लक्षयोजनप्रमाणः, इयं च भावना प्रथमपङ्क्त्यपेक्षया बोद्धव्या, एवमग्रेऽपि भाव्यमित्यादि." एवं चात्र पूर्वोक्तं द्विविधमन्तरं कथं संगच्छते ? तथाऽऽतपक्षेत्रं भिन्नमतेन अन्तरं च भिन्नमतेन, तदपि कथं युक्तमित्यादि बहुश्रुतेभ्यो भावनीयं ॥

अस्मिन्नर्द्धे संख्ययाऽर्काश्चन्द्राश्च स्युर्द्विसप्ततिः । द्वीपे संपूर्णेऽत्र चतुश्चत्वारिंशं शतं हि ते ॥ १३ ॥

तथाहि—

कालोदवार्द्धेरारभ्य, संख्यां शीतोष्णरोचिषाम् । निश्चेतुमेतत्करणं, पूर्वाचार्यैः प्ररुपितम् ॥ १४ ॥
विवक्षितद्वीपवार्द्धौ, ये स्युः शीतोष्णरोचिषः । त्रिघ्नास्ते प्राक्तनैर्जम्बूद्वीपादिद्वीपवार्द्धिगैः ॥ १५ ॥
सूर्येन्दुभिर्मीलिताः स्युर्यावन्तः शशिभास्कराः । अनन्तरानन्तरे स्युर्द्वीपे तावन्त एव ते ॥ १६ ॥
चतुश्चत्वारिंशमेवं, शतं स्युः पुष्करेऽखिले । द्वयोस्तदर्द्धयोस्तस्माद्, द्विसप्ततिर्द्विसप्ततिः ॥ १७ ॥
एवं शेषेष्वपि द्वीपवार्द्धिष्विन्दुविवस्वताम् । अनेनैव करणेन, कार्यः संख्याविनिश्चयः ॥ १८ ॥
यतो मूलसंग्रहण्यां, तथा क्षेत्रसमासके । सर्वद्वीपोदधिगतार्केन्दुसंख्याभिधायकम् ॥ १९ ॥
करणं ह्येतदेवोक्तं, जिनभद्रगणीश्वरैः । न चोक्तमपरं किञ्चित्करुणावरुणालयैः ॥ २० ॥

तथा च मूलसंग्रहणीटीकायां हरिभद्रसूरिः—"एवंऽणंतराणंतरे खित्ते पुक्खरदीवे चोयालं चंदसयं हवइ, एवं शेषेष्वप्यमुनोपायेन चन्द्रादिसंख्या विज्ञेयेति" युक्ता चेयं व्याख्या, चन्द्रप्रज्ञप्तौ सूर्यप्रज्ञप्तौ जीवाभिगमे च सकलपुष्करवरद्वीपमाश्रित्येत्थमेव चन्द्रादिसंख्याभिधानात्, तथाहि तद्ग्रंथः—"पुक्खरवरदीवे णं भंते !" दीवे केवइया चंदा पभासिंसु वा पभासंति वा पभासिस्संति वा ?, गो० ! चोयालं चंदसयं पभासिंसु वा पभासंति वा पभासिस्संति वा चोयालं सूरियाण सयं तविंसु वा तवंति वा तविस्संति वा." इत्यादि.

तथा तस्मिन्नेवार्थे सूर्यप्रज्ञप्तौ संग्रहणी गाथाः— "चोयालं चंदसयं, चोयालं चेव सूरियाण सयं । पुक्खरवरंमि दीवे, चरंति एए पगासंता ॥ चत्तारि सहस्साइं, बत्तीसं चेव होंति नक्खत्ता । छच्च सया बावत्तर, महागहा बारस सहस्सा ॥ छन्नउइ सयसहस्सा, चोयालीसं भवे सहस्साइं । चत्तारिं च सयाइं, तारागणकोडिकोडीणं" ॥

---

१. शशिशशिनो रविरव्योश्चान्तरं लक्षं परस्परं चार्धलक्षं यदुक्तं तन्नासंगतं, पङ्क्तयोश्च लक्षान्तरितत्वान्नातपान्तरयोर्भिन्नमतत्वं ।

ज्योतिष्करण्डकेऽप्याहुः— "धायइसंडप्पभिई, उद्दिट्ठा तिगुणिया भवे चंदा । आइल्लचंदसहिया, ते हुंति अणंतरं परओ ॥ आइच्चाणंपि भवे, एमेव विही अणेण कायव्वा । दीवेसु समुद्देसु अ, एमेव परंपरा जाण" ॥ [श्लोक १२१, १२२]

अनन्तरं नरक्षेत्रात्सूर्यचंद्राः कथं स्थिताः ?। तदागमेषु गदितं, सांप्रतं नोपलभ्यते ॥ २१ ॥
केवलं चन्द्रसूर्याणां, यत्प्राक्कथितमन्तरम् । तदेव सांप्रतं चन्द्रप्रज्ञप्त्यादिषु दृश्यते ॥ २२ ॥

तथोक्तं चन्द्रप्रज्ञप्तिसूत्रे जीवाभिगमसूत्रे च— "चंदाओ सूरस्स य, सूरा चंदस्स अंतरं होइ । पन्नास सहस्साइं, जोअणाणं अणूणाइं ॥ सूरस्स य सूरस्स य, ससिणो ससिणो य अंतरं दिट्ठं । बहियाउ माणुसनगस्स, जोयणाणं सयसहस्सं ॥ सूरंतरिया चंदा चंदंतरिया य दिणयरा दित्ता । चित्तंतरलेसागा, सुहलेसा मंदलेसा य" ॥

ततश्च—

एषां संभाव्यते चन्द्रप्रज्ञप्त्याद्यनुसारतः । सूचीश्रेण्या स्थितिर्नैव, श्रेण्या परिरयाख्यया ॥ २३ ॥

तथोक्तं जीवाभिगमवृत्तौ सूर्यसूर्यान्तरसूत्रव्याख्याने—"एतच्चैवमन्तरपरिमाणं सूचीश्रेण्या प्रतिपत्तव्यं, न वलयाकारश्रेण्ये"ति, संग्रहणीलघुवृत्तेरप्ययमेवाभिप्रायः,

यथागमं भावनीयमन्यथा वा बहुश्रुतैः । श्रेयसेऽभिनिवेशोऽर्थे, न ह्यागमाविनिश्चिते ॥ २४ ॥
चन्द्रार्क पङ्क्तिविषये, नरक्षेत्राद्बहिः किल । मतान्तराणि दृश्यन्ते, भूयांसि तत्र कानिचित् ॥ २५ ॥
अनुग्रहार्थं शिष्याणां, दर्श्यन्ते प्रथमं त्विदम् । दिगंबराणां तत्कर्मप्रकृत्यादिषु दर्शनात् ॥ २६ ॥
लक्षार्द्धात्तिक्रमे मर्त्योत्तरशैलाभमन्तरम् । वृत्तक्षेत्रस्य विष्कम्भः, संपद्यते इयानिह ॥ २७ ॥
षट्चत्वारिंशता लक्षैर्मितोऽस्य परिधिः पुनः । कोट्येका पञ्चचत्वारिंशता लक्षैः समन्विता ॥ २८ ॥
षट्चत्वारिंशत्सहस्राः, शतैश्चतुर्भिरन्विताः । सप्तसप्तत्यभ्यधिका, योजनानामुदीरिताः ॥ २९ ॥
प्रतियोजनलक्षं चैकैकसूर्येन्दुभावतः । प्रत्येकमाद्यवल्यां पञ्चचत्वारिंशं शतं तयोः ॥ ३० ॥
पूर्वोक्तपरिधौ कोटेर्लक्षेभ्यश्चाधिकस्य तु । विभक्तस्य नवत्याढ्यद्विशत्या शशिभास्करैः ॥ ३१ ॥
लब्धे क्षिप्ते चन्द्रसूर्यान्तरेषु स्यात्तदन्तरम् । लक्षार्द्धं किञ्चिदधिकषष्टियुक्तशताधिकम् ॥ ३२ ॥
लक्षान्तरे द्वितीयैवं, पङ्क्तिर्लोकान्तसीमया । योजनलक्षान्तराला, स्युः सर्वा अपि पङ्क्तयः ॥ ३३ ॥

तथा—

यावल्लक्षप्रमाणो यो, द्वीपो वाऽभ्यधवाऽम्बुधिः । स्युस्तावत्यः परिरयश्रेण्यस्तत्रेन्दुभास्वताम् ॥ ३४ ॥
वृद्धिः पङ्क्तौ द्वितीयस्यामाद्यपङ्क्तेरनन्तरम् । षण्णां प्रत्येकमर्काणामिन्दूनां च निरूपिता ॥ ३५ ॥
तृतीयस्यां तु सप्तानां, वृद्धिः षण्णां ततो द्वयोः । पुनः पङ्क्तौ तृतीयस्यां, सप्तानां वृद्धिरेव हि ॥ ३६ ॥

तथाहि—पङ्क्तयोर्द्वयोर्योजनानां, लक्षमन्तरमेकतः । परतोऽप्यन्तरं तावत्ततो लक्षद्वयाधिके ॥ ३७ ॥
विष्कम्भे पूर्वविष्कम्भात्, प्रतिपङ्क्ति विवर्द्धते । लक्षद्वयं योजनानां, तस्यायं परिधिर्भवेत् ॥ ३८ ॥
लक्षाणि षड् योजनानां, द्वात्रिंशच्च सहस्रकाः । पञ्चपञ्चाशदाढ्यानि, चत्वार्येव शतानि च ॥ ३९ ॥
पूर्वपूर्वपङ्क्तिगतपरिधिष्वस्य योजनात् । अग्र्याग्र्यपङ्क्तिपरिधिः, सर्वत्र क्षेप एष वै ॥ ४० ॥
अथैतस्यादिमपङ्क्तिपरिधौ क्षेपतः किल । द्वितीयपङ्क्तिसंबंधी, परिधिः स भवेदियान् ॥ ४१ ॥
एकपञ्चाशता लक्षैरेका कोटी समन्विता । अष्टसप्तत्या सहस्रैर्द्वात्रिंशैर्नवभि शतैः ॥ ४२ ॥
षडेव लक्षाः पूर्वस्मात्परिधेरधिकास्ततः । षण्णां वृद्धिः प्रतिलक्षमेकैकार्केंदुवृद्धितः ॥ ४३ ॥
एवंपङ्क्तौ द्वितीयस्यां, संमिता लक्षसंख्यया । प्रत्येकमेकपञ्चाशं, शतमिन्दुदिवाकराः ॥ ४४ ॥
द्वितीयपङ्क्तिपरिधौ, ततः क्षेपाङ्कयोगतः । तृतीयपङ्क्तिपरिधिरेतावानिह जायते ॥ ४५ ॥
एका कोटयष्टपञ्चाशल्लक्षाण्येकादशापि च । सहस्राणि त्रिशती च, सप्ताशीतिसमन्विताः ॥ ४६ ॥
पूर्वस्मात्परिधेः सप्त, लक्षा जाता इहाधिकाः । वृद्धिस्ततस्तृतीयस्यां, सप्तानामिन्दुभास्वताम् ॥ ४७ ॥

तुर्यापञ्चम्योस्तु पङ्क्तयोः, षण्णां षण्णां ततः परम् ।
वृद्धिः षष्ठ्यां तु सप्तानां, षण्णां षण्णां तता द्वयोः ॥ ४८ ॥

लोकान्तं यावदाधिक्यमेवमिन्दुविवस्वताम् । वाच्यमेवं पुष्करोत्तरार्द्धेऽष्टास्वपि पङ्क्तिषु ॥ ४९ ॥
सप्तत्रिंशदधिकानि, शतान्येव त्रयोदश । प्रत्येकमिन्दुसूर्याणां, भवन्ति सर्वसंख्यया ॥ ५० ॥

एतदर्थसंग्राहिकाश्च पूर्वाचार्यकृता एव इमा गाथा :— "माणुसनगाओ परओ, लक्खद्धे होई खेत्तविक्खंभो । छायालीसं लक्खा, परिही तस्सेगकोडी उ" ॥ पणयालीसं लक्खा छायालीसं च जोअणसहस्सा । चउरो सयाइं तह सत्तहत्तरी जोअणाणं तु ॥ साहिअजोअणलक्खद्धेगंतरठिय ससीण सूराणं । पंतीए पढमाए, पणयालसयं तु पत्तेयं ॥ तप्परओ पंतीओ, जोअणलक्खंतराओ सव्वाओ । जो जइलक्ख दीवुदहि, तत्थ तावइय पंतीओ ॥ वुड्ढी दुइयगपंतीओ, छण्ह तइयाए होइ सत्तण्हं । तप्परओ वुदु पंती, छगवुड्ढी तइय सगवुड्ढी" ॥

मतान्तरं करणविभावनायामिदं स्मृतम् । लक्षार्द्धातिक्रमे पङ्क्तिराद्यामर्त्योत्तराचलात् ॥ ५१ ॥
द्विसप्ततिः शशभृतां, द्विसप्ततिश्च भास्वताम् । चतुश्चत्वारिंशमाद्यपङ्क्तावेवं शतं भवेत् ॥ ५२ ॥
यावद्योजनलक्षाणि, द्वीपः पाथोनिधिश्च यः । पङ्क्तयस्तत्र तावत्यो, मतेऽत्रापि समं ह्यदः ॥ ५३ ॥
भान्विन्द्वोः समुदितयोस्ततः शेषासु पङ्क्तिषु । चतुष्कस्य चतुष्कस्य, वृद्धिर्लोकान्तसीमया ॥ ५४ ॥
एवं च पङ्क्तावष्टम्यां, द्वीपार्द्धेऽत्रेन्दुभास्वताम् । संजातं समुदितानां, द्विसप्तत्यधिकं शतम् ॥ ५५ ॥
एवं च पुष्करार्द्धेऽस्मिन्, समुदितेन्दुभास्वताम् । शतानि द्वादश चतुःषष्टिश्च सर्वसंख्यया ॥ ५६ ॥

तत्तत्पङ्क्तिस्थपरिधौ, स्वस्वभान्विन्दुभाजिते । लब्धमन्तरमर्केन्द्वोर्द्विघ्नमिन्द्वोस्तथाऽर्कयोः ॥ ५७ ॥
यथाऽऽद्यपङ्क्तिसंबन्धिपूर्वोक्तपरिधौ किल । चतुश्चत्वारिंशशताऽर्केंदुभक्ते भवेदिदम् ॥ ५८ ॥
लक्षमेकं सहस्रं च, स्फुटं सप्तदशोत्तरम् । चतुश्चत्वारिंशशतभक्तस्य योजनस्य च ॥ ५९ ॥
एकोनत्रिंशदशाश्च–र्केन्द्वोरेतन्मिथोऽन्तरम् । अस्मिंश्च द्विगुणेऽन्योऽन्यं, भान्वोरिन्द्वोश्च तद्भवेत् ॥ ६० ॥
द्वैगुण्यायात्र भागानां, द्वाभ्यां खल्वपवर्त्यते । छेदकात् छेदके तष्टे, ह्यंशराशिर्भवेन्महान् ॥ ६१ ॥
मतेऽस्मिंश्च प्रतिद्वीपं वार्द्धीन्दुतिग्मरोचिषाम् । संख्याभिधायि करणं, न प्रोक्तं विस्तृतेर्भिया ॥ ६२ ॥
तदर्थिभिस्तु करणविभावना विभाव्यताम् । पूर्वसंग्रहणीटीका, कृता वा मलयर्षिभिः ॥ ६३ ॥

एतन्मतसंग्राहिके च गाथे इमे— "चोयालसयं पढमिल्लुयाऍ पंतीइ चंदसूराणं । तेण परं पंतीओ, चउउत्तरियाऍ वुड्ढीए ॥ बावत्तरि चंदाणं, बावत्तरि सूरियाण पंतीओ । पढमाए अंतरं पुण, चंदा चंदस्स लक्खदुगं" ॥ [बृहत्संग्रहणी गा. ८३, ८४]

अत्र 'लक्खदुगं'ति लक्षद्विकं विंशत्या शतैश्चतुस्त्रिंशैर्योजनस्य द्विसप्ततितमैरेकोनत्रिंशद्भागैरधिकं बोद्धव्यं ।

श्रेणिः परिरयाख्यैव, मतयोरेतयोर्द्वयोः । न तु सूचीश्रेणिरत्र, वेत्ति तत्त्वं तु केवली ॥ ६४ ॥

योगशास्त्रचतुर्थप्रकाशवृत्तावप्युक्तं—

मानुषोत्तरात्परतः पञ्चाशता योजनसहस्रैः परस्परमन्तरिताश्चन्द्रान्तरिताः सूर्याः सूर्यान्तरिताश्चन्द्रा मनुष्यक्षेत्रीयचन्द्रसूर्यप्रमाणाद् यथोत्तरं क्षेत्रपरिधेर्वृद्ध्या संख्येया वर्द्धमानाः शुभलेश्या ग्रहनक्षत्रतारापरिवारा घण्टाकारा असङ्ख्येया आस्वयंभूरमणाल्लक्षयोजनान्तरिताभिः पङ्क्तिभिस्तिष्ठन्ती"ति, तथा परिशिष्टपर्वण्यपि श्रीहेमचन्द्रसूरिभिः परिरयश्रेणिरेवोपमिता, तथाहि

राजगृहवप्रवर्णने— तत्र राजतसौवर्णैः, प्राकारः कपिशीर्षकैः । भाति चन्द्रांशुमद्धिम्बैर्मर्त्योत्तर इवाचलः ॥" इति श्रीपरिरयश्रेणिः ॥

परतः पुष्करद्वीपात्पुष्करोदः पयोनिधिः । समन्ततो द्वीपमेनमवगूह्य प्रतिष्ठितः ॥ ६५ ॥
अतिपथ्यमतिस्वच्छं, जात्यं लघु मनोरमम् । स्फुटस्फटिकरत्नाभमस्य वारि सुधोपमम् ॥ ६६ ॥
सदा सपरिवाराभ्यां, भासुराभ्यां महौजसा । श्रीधरश्रीप्रभाभिख्यदेवताभ्यामहर्निशम् ॥ ६७ ॥
इन्द्रर्काभ्यां पुष्करवद्विभात्यस्योदकं यतः । पुष्करोदस्तत एष, भुवि ख्यातः पयोनिधिः ॥ ६८ ॥
अस्य योजनलक्षाणि, द्वात्रिंशच्चक्रवालतः । विस्तारः परिधिस्त्वस्य, भाव्यो व्यासानुसारतः ॥ ६९ ॥
परतः पुष्कराम्भोधेर्द्वीपोऽस्ति वारुणीवरः । सद्वारुणीव वाप्यादौ, जलमस्येत्यसौ तथा ॥ ७० ॥
देवौ द्वावत्र वरुणवरुणप्रभसंज्ञितौ । तत्स्वामिकत्वाद्वरुणवरोऽप्येष निगद्यते ॥ ७१ ॥
चतुःषष्टिर्योजनानां, लक्षाणि चैष विस्तृतः । चक्रवालतया ज्ञेयः, परिधिस्त्वस्य पूर्ववत् ॥ ७२ ॥

वारुणीवरोदनामा, द्वीपादस्मात्परोऽम्बुधिः । मदकारिवरास्वादोदकप्राग्भारभासुरः ॥ ७३ ॥
सुजातपरमद्रव्यसम्मिश्रमदिरारसात् । अतिस्वादूदकयोगात्, ख्यातोऽर्थं तादृशाभिधः ॥ ७४ ॥
वारुणिवारुणकान्तस्वामिकयोगतोऽथवा । स्याद्वारुणवरोदाख्यो, वरुणोदोऽप्ययं भवेत् ॥ ७५ ॥
एका योजनकोट्यष्टाविंशत्या लक्षकैः सह । चक्रवालतयैतस्य, विस्तारो निश्चितो बुधैः ॥ ७६ ॥
अथ क्षीरवरो द्वीपः, परतोऽस्मात्पयोनिधेः । क्षीरोपमं जलं वाप्यादिषु यस्येत्यसौ तथा ॥ ७७ ॥
पुण्डरीकपुष्पदन्तौ, यद्वा क्षीरोज्ज्वलौ सुरौ । अत्रेति तत्स्वामिकत्वात्, ख्यातः क्षीरवराभिधः ॥ ७८ ॥
विष्कम्भोऽस्य योजनानां, द्वे कोट्यौ चक्रवालतः । षट्पञ्चाशल्लक्षयुक्ते, परिधिश्चिन्त्यतां स्वयम् ॥ ७९ ॥
ततः क्षीरवरद्वीपात्परं क्षीरोदवारिधिः । कर्पूरपूरडिण्डीरपिण्डडम्बरपाण्डुरः ॥ ८० ॥
त्रिभागावर्त्तितचतुर्भागसच्छर्करान्वितम् । स्वादनीयं दीपनीयं, मदनीयं क्षुष्मताम् ॥ ८१ ॥
बृंहणीयं च सर्वाङ्गेन्द्रियाह्लादकरं परम् । वर्णगन्धरसस्पर्शसंपन्नमतिपेशलम् ॥ ८२ ॥
ईदृग् यच्चक्रिगोक्षीरं, तस्मादपि मनोहरम् । अस्य स्वादूदकमिति, क्षीरोदः प्रथितोऽम्बुधिः ॥ ८३ ॥
तथा च जीवाभिगमसूत्रे— "खंडमच्छंडिओववेए रण्णो चाउरंतचक्कवट्टिस्से" त्यादि ।
क्षीरोज्ज्वलाङ्गविमलविमलप्रभदेवयोः । संबन्धि सलिलं ह्यस्येत्यपि क्षीरोदवारिधिः ॥ ८४ ॥
जिनजन्मादिषु कृतार्थोदकत्वादिवोल्लसन् । समीरलहरीसङ्गरङ्गत्कल्लोलकैतवात् ॥ ८५ ॥
गुरुश्रीकीर्त्तिविजययशोभिस्तुलितो बुधैः । इत्युद्भूताद्भूतानन्दाद्, द्विगुणश्चैत्यवानिव ॥ ८६ ॥
जिनस्नात्रार्थकलशैलङ्कृततटद्वयः । गुरुः शुश्रूषुभिः शिष्यैरिव स्वच्छामृतार्थिभिः ॥ ८७ ॥
दिव्यकुम्भेष्वाहरत्सु, प्रणम्य शिरसोदकम् । लोलत्कल्लोलनिनदैरनुज्ञां वितरन्निव ॥ ८८ ॥
समन्ततस्तटोद्भिन्नचलद्बद्बुददन्तुरः । ताटङ्क इव मेदिन्याः, स्फुरन्मौक्तिकपङ्क्तिकः ॥ ८९ ॥
लोलकल्लोलसंघट्टोच्छलच्छीकरकैतवात् । सिद्धान्नभोगतान् मुक्ताकणैरवकिरन्निव ॥ ९० ॥
घृतो निर्णिज्य विधिनातपाय स्थिरभास्वताम् । शोभतेऽसौमध्यलोकनिचोलक इवोज्ज्वलः ॥ ९१ ॥
अस्य द्वादशलक्षाढ्या, विष्कम्भः पञ्च कोटयः । योजनानां परिधिस्तु, स्वयं भाव्यो मनीषिभिः ॥ ९२ ॥
परतोऽस्मात्पयोराशेर्द्वीपो घृतवराभिधः । घृततुल्यं जलं वाप्यादिषु यस्येत्यसौ तथा ॥ ९३ ॥
घृतावर्णौ च कनककनकप्रभनामकौ । स्वामिनाविह तद्योगात्, ख्यातो घृतवराभिधः ॥ ९४ ॥
चतुर्विंशतिलक्षाढ्या, दश योजनकोटयः । व्यासोऽस्य परिधिर्ज्ञेयः, स्वयं व्यासानुसारतः ॥ ९५ ॥
एवमग्रेऽपि ।
द्वीपादस्मात्परो वार्द्धिर्घृतोदाख्यो विराजते । हैयङ्गवीनसुरभिस्वादुनीरमनोरमः ॥ ९६ ॥
अयं कान्तसुकान्ताभ्यां, स्वामिभ्यां परिपालितः । वाणिजाभ्यां घृतकुतूरिव साधारणी द्वयोः ॥ ९७ ॥

विष्कम्भोऽस्य योजनानां, विंशतिः किल कोटयः । अष्टचत्वारिंशताऽऽढ्या, लक्षैर्दक्षैर्निरूपिताः ॥ ९८ ॥
द्वीपः क्षोदवराभिख्यः, परोऽस्मात्तोयराशितः । निर्जरौ स्वामिनावस्य, स्तः सुप्रभमहाप्रभौ ॥ ९९ ॥
क्षोदो नाम क्षोदरसः, स इक्षुरस उच्यते । तद्रूपमुदकं वाप्यादिषु यस्येत्यसौ तथा ॥ १०० ॥
चत्वारिंशत्कोटयोऽस्य, विष्कम्भः कथितो जिनैः । षण्णवत्याऽन्विता लक्षैः, सुरलक्षनिषेवितैः ॥ १०१ ॥
ततः परं तु क्षोदोदाभिधानः खलु वारिधिः । वर्ततेऽत्यंतमधुरधुरन्धरपयोधरः ॥ १०२ ॥
त्वगेलाकेसरैस्तुल्यं, त्रिसुगन्धि त्रिजातकम् । मरिचैश्च समायुक्तं, चतुर्जातकमुच्यते ॥ १०३ ॥
ततश्च—चतुर्जातकसम्मिश्रात्त्रिभागावर्त्तितादपि । अतिस्वादुवारिरिक्षुरसादप्येष तोयधिः ॥ १०४ ॥
एवं च लवणाम्भोधिः, कालोदः पुष्करोदधिः । स्वयंभूवारुणीवार्द्धिर्घृतक्षीरपयोनिधी ॥ १०५ ॥
एतान् विहाय सप्ताब्धीन्, सर्वेऽप्यन्ये पयोधयः । तादृगिक्षुरसोत्कृष्टस्वादूदकमनोरमाः ॥ १०६ ॥
एकाशीतीःकोटयोऽथ, लक्षा द्विनवतिस्तथा । पयोधेरस्य वलय, विष्कम्भः परिकीर्त्तितः ॥ १०७ ॥
अथ नन्दीश्वरो द्वीपः, क्षोदोदाम्भोनिधेः परः । प्ररूपितो विष्टपेष्टैरष्टमः कष्टमर्हिभिः ॥ १०८ ॥
मधुरेक्षुरसस्वादूदकेषु दीर्घिकादिषु । जलाश्रयेषु फुल्लाब्जमकरन्दसुगन्धिषु ॥ १०९ ॥
स्फुरत्पुष्पफलोद्दामाभिरामद्रुमशालिषु । अत्रोत्पातपर्वतेषु, सर्वरत्नमयेषु च ॥ ११० ॥
आसते शेरते स्वैरं, क्रीडन्ति व्यन्तरामराः ॥ व्यन्तरीभिः सह प्राच्यपुण्यानां भुञ्जते फलम् ॥ १११ ॥
इहत्यमाधिपत्यं द्वौ, कैलासहरिवाहनौ । धत्तः समृद्धौ देवौ द्वयोः, सूर्याचन्द्रमसाविव ॥ ११२ ॥
एवं नन्द्या समृद्ध्याऽसावीश्वरः स्फातिमानिति । नन्दीश्वर इति ख्यातो, द्वीपोऽयं सार्थकाभिधः ॥ ११३ ॥
त्रिषष्ट्या कोटिभिर्युक्तमेकं कोटिशतं किल । लक्षैश्चतुरशीत्याढ्यमेतद्वलयविस्तृतिः ॥ ११४ ॥
द्वीपस्यास्य बहुमध्ये, शोभन्ते दिक्चतुष्टये । जात्याञ्जनरत्नमयाश्चत्वारोऽञ्जनपर्वताः ॥ ११५ ॥
पूर्वस्यां देवरमणो, नित्योद्योतस्वयंप्रभौ । क्रमादपाक्प्रतीच्यां चोदीच्यां च रमणीयकः ॥ ११६ ॥
वर्णशोभां वर्णयामः, किमेतेषां स्फुरद्रुचाम् ? । नाम्नैव ये स्वमौज्ज्वल्यं, प्रथयन्ति यथास्थितम् ॥ ११७ ॥
स्फुरद्गवलसब्रह्मचारितेजोभिरास्तृतैः । तेऽमुं द्वीपं सृजन्तीव, कस्तूरीद्रवमण्डितम् ॥ ११८ ॥
स्वच्छगोपुच्छसंस्थानस्थिता रजोमलोज्झिताः । अभ्रङ्कषोत्तुङ्गशृङ्गा, मृष्टाः श्लक्ष्णाः प्रभास्वराः ॥ ११९ ॥
सहस्रांश्चतुरशीतिं, भूतलात्ते समुच्छ्रिताः । सहस्रं च योजनानामवगाढा भुवोऽन्तरे ॥ १२० ॥
योजनानां सहस्राणि, पृथवो भूतले दश । योजनानां सहस्रं च, विस्तीर्णास्ते शिरस्तले ॥ १२१ ॥
मतान्तरे शतान्येते, चतुर्णवतिमानताः । स्युर्भूतले योजनानां, सहस्रं मूर्ध्नि विस्तृताः ॥ १२२ ॥

तथोक्तं स्थानाङ्गवृत्तौ—इहाञ्जनका मूले दश योजनसहस्राणि विष्कम्भेणेत्युक्तं,

द्वीपसागरप्रज्ञप्तिसंग्रहण्यां तूक्तं— "नव चेव सहस्साइं, चत्तारि य होंति जोअणसयाइं अंजणगपव्वयाणं, धरणियले होइ विक्खंभो ॥" इति । तदिदं मतान्तरमित्यवसेयं, एवमन्यत्रापि, मतान्तरबीजानि तु केवलिगम्यानीति ।

यस्मिन्मते सहस्राणि, भूतले दश विस्तृताः । वृद्धिक्षयौ मते तस्मिन्, योजनं योजनं प्रति ॥ १२३ ॥
अष्टाविंशांशत्रितयमुपर्यारोहणे क्षयः । तावत्येवोपरितलाद्वृद्धिः स्यादवरोहणे ॥ १२४ ॥
भावना त्वेवं—
महीतलगतव्यासात्, सहस्रदशकात्मकात् । सहस्राण्यपचीयन्ते, नवोपरितलावधि ॥ १२५ ॥
ततो नव सहस्राणि, भाज्यानि नाप्यते परम् । सहस्रैश्चतुरशीत्या, भागो भाज्यस्य लाघवात् ॥ १२६ ॥
ततश्च—
भाज्यभाजकयो राश्योः, कृते शून्यापवर्त्तने । भाज्यो नवात्मा चतुरशीत्यात्मा स्याच्च भाजकः ॥ १२७ ॥
उभावप्यपवर्त्येते, ततोऽंशच्छेदकौ त्रिभिः । योजनांशत्रयं लब्धमष्टाविंशतिजं ततः ॥ १२८ ॥
यद्वा—
अष्टाविंशतिगुणितो, भाज्यो राशिर्लवात्मको भवति । द्वे लक्षे द्वापञ्चाशता सहस्रैर्युते तेऽंशाः ॥ १२९ ॥
तेषां सहस्रैश्चतुरशीत्या भागे हृते सति । लब्धं विभागत्रितयमष्टाविंशतिसंभवम् ॥ १३० ॥
चतुःशताधिकनवसहस्रयोजनात्मकात् । मतान्तरे स्थुलव्यासात्सहस्रोरुशिरोऽवधि ॥ १३१ ॥
मध्ये शतानि चतुरशीतिः क्षीयन्त इत्यतः । भज्यन्ते तानि चतुरशीत्या किल सहस्रकैः ॥ १३२ ॥
भागाप्राप्त्या च चतुरशीत्या शतैस्तयोर्द्वयोः । कृतेऽपवर्त्तने लभ्यो, योजनांशो दशोद्भवः ॥ १३३ ॥
यद्वा प्राग्वद्भाज्यराशिर्दशघ्नः स्याल्लवात्मकः । सहस्राश्चतुरशीतिस्तेषां भागे च लभ्यते ॥ १३४ ॥
दशमो योजनस्यांशो, भाज्यभाजक साम्यतः । क्षयवृद्धौ मानमेतत्, स्यादारोहवरोहयोः ॥ १३५ ॥
एकत्रिंशत्सहस्राणि, योजनानां शतानि षट् । त्रयोविंशानि परिधिर्भवत्येषां महीतले ॥ १३६ ॥
योजनानां सहस्राणि, त्रीणि द्वाषष्टियुक् शतम् । साधिकं मूर्ध्नि परिधिः, प्रज्ञप्तः परमर्षिभिः ॥ १३७ ॥
अथैषामञ्जनाद्रीणां, प्रत्येकं च चतुर्दिशं । गते लक्षे योजनानां, लक्षमायतविस्तृताः ॥ १३८ ॥
पुष्करिण्यश्चतस्रः स्युरुद्विद्धा दशयोजनीम् । निर्मत्स्यस्वच्छसलिलोल्लसत्कल्लोलवेल्लिताः ॥ १३९ ॥

जीवाभिगमसूत्रवृत्तौ प्रवचनसारोद्धारवृत्तौ च एता दशयोजनोद्विद्धा उक्ताः[1], नन्दीश्वरस्तोत्रे नन्दीश्वरकल्पे च सहस्रयोजनोद्विद्धा उक्ताः,

स्थानाङ्गसूत्रेऽपि—'ताओ णं णंदाओ पुक्खरणीओ एगं जोअणसयसहस्सं आयामेणं पन्नासं जोअणसहस्साइं विक्खंभेण दस जोअणसयाइं उव्वेहेणं' इत्युक्तमिति ज्ञेयं ।

१. आयामविष्कम्भावपेक्ष्य पुष्करिणीनां दशशतोद्वेधयोग्यतेति अध्याहार्यो दशशब्दात् शतशब्दः, ततो न विरोधः केषामपि ।

चतुर्द्दिशं त्रिसोपानप्रतिरूपकबन्धुराः । चतुर्द्दिशं च प्रत्येकं, रम्यास्ता रत्नतोरणैः ॥ १४० ॥
दलच्छतदलश्रेणिगलन्मरन्दलेपतः । अन्योऽन्यमितरभ्रान्तिभ्रमद्भृङ्गतदङ्गनाः ॥ १४१ ॥
अनरालैर्मरालत्तैर्मृणालैर्ललितान्तराः । आमुक्तव्यक्तशृङ्गारहारैरिव मनोहराः ॥ १४२ ॥
सोपानावतरत्स्वःस्त्रीनूपुरध्वनिबोधितैः । मरालैर्मधुरध्वानैर्मुदोपवीणिता इव ॥ १४३ ॥
क्रीडाद्दिव्याङ्गनोत्तुङ्गवक्षोजास्फालनोर्ज्जितैः । आत्तरङ्गैः सत्तरङ्गैरिवाङ्गीकृततताण्डवाः ॥ १४४ ॥
अर्हदर्चार्चनोद्युक्तस्नातस्वःस्त्रीस्तनच्युतैः । कस्तूरीचन्द्रघुसृणैः, शोभन्ते चित्रिता इव ॥ १४५ ॥
नन्दिषेणा तथाऽमोघा, गोस्तूपा च सुदर्शना । स्युर्वाप्यो देवरमणात्पूर्वादिदिक्चतुष्टये ॥ १४६ ॥
नन्दोत्तरा तथा नन्दा, सुनन्दा नन्दिवर्द्धना । पुष्करिण्यश्चतस्रः स्युर्नित्योद्योताश्चतुर्दिशम् ॥ १४७ ॥
भद्रा विशाला कुमुदा, चतुर्थी पुण्डरीकिणी । स्वयंप्रभगिरेः पूर्वादिषु दिक्ष्वेति वापिकाः ॥ १४८ ॥
विजया वैजयन्ती च, जयन्ती चापराजिता । वाप्यः प्राच्यादिषु दिक्षु, रमणीयाञ्जनागिरेः ॥ १४९ ॥

अयं नन्दीश्वरस्तवनन्दीश्वरकल्पाभिप्रायेण षोडशानामपि पुष्करिणीनां नामक्रमः,
स्थानाङ्गजीवाभिगमाभिप्रायेण त्वेवं—

नन्दोत्तरा तथा नंदा, चानन्दा नन्दिवर्द्धना । चतुर्दिशं पुष्करिण्यः, पौरस्त्यस्याञ्जनागिरेः ॥ १५० ॥
भद्रा विशाला कुमुदा, चतुर्थी पुण्डरीकिणी । चतुर्दिशं पुष्करिण्यो, दाक्षिणात्यस्याञ्जनागिरेः ॥ १५१ ॥
नन्दिषेणा तथाऽमोघा, गोस्तूपा च सुदर्शना । चतुर्दिशं पुष्करिण्यः, प्रतीचीनाच्चनागिरेः ॥ १५२ ॥
उदीच्ये तूभयोरपि मतयोस्तुल्यमेव ॥

एकैकस्याः पुष्करिण्या, व्यतीत्य दिक्चतुष्टये । योजनानां पञ्च शतान्येकैकमस्ति काननम् ॥ १५३ ॥
अस्त्यशोकवनं प्राच्यां सप्तपर्णवनं ततः । याम्यां प्रत्यक् चम्पकानामथाम्राणामुदग् वनम् ॥ १५४ ॥
योजनानां लक्षमेकमायतान्यखिलान्यपि । शतानि पञ्च पृथुलान्यद्भुतान्यद्भुतश्रिया ॥ १५५ ॥
सच्छायैः सुमनोरम्यैर्महास्कन्धैः समुन्नतैः । विभान्ति तरुभिस्तानि, कुलानीव नरोत्तमैः ॥ १५६ ॥
सौरभ्याकृष्टमधुपा, लीलानर्तितपल्लवाः । उद्बुद्धकुसुमास्तेषु, लताः पण्याङ्गना इव ॥ १५७ ॥
तेषां कुञ्जेषु निश्छिद्रपरिच्छदाद्रिभित्तिषु । न विशन्तीशगेहेषु, चौरा इव करा रवेः ॥ १५८ ॥
षोडशानामप्यमूषां, वापिकानां किलोदरे । स्यादेकैको दधिमुखः, स्फारस्फटिकरत्नजः ॥ १५९ ॥
मुखं शिखरमेतेषां, यतो दधिवदुज्ज्वलम् । ततो ह्येते दधिमुखा, रौप्यशृङ्गमनोरमाः ॥ १६० ॥
धान्यपल्यसमाकाराः, सर्वतः सदृशा इमे । उपर्यधो योजनानां, सहस्राणि दशाततः ॥ १६१ ॥
चतुःषष्टिं सहस्राणि, कीर्त्तितास्ते समुच्छ्रिताः । सहस्रं च योजनानामुद्विद्धा वसुधान्तरे ॥ १६२ ॥

तथोक्तं जीवाभिगमे—'दस जोअणसहस्साइं विक्खंभेणं'

श्रीसमवायाङ्गे तु—"सव्वे वि णं दधिमुहपव्वया पल्लगसंठाणसंठिया सव्वत्थ समा विक्खंभुस्सेहेणं चउसट्ठिं जोअणसहस्साइं पण्णत्ता" इत्युक्तमिति ज्ञेयं ॥

पुण्करिण्यः समस्तास्तास्तेनैकैकेन भूभृता । विभान्ति प्रौढमहिला, इव क्रोडीकृतार्भकाः ॥ १६३ ॥
चतुर्णामञ्जनाद्रीणां, घनाघनघनत्विषाम् । षोडशानां दधिमुखगिरीणामुपरि स्फुरत् ॥ १६४ ॥
जिनायतनमेकैकमेवं स्युः सर्वसङ्ख्यया । तृतीयाङ्गादिसिद्धान्तेषूक्तान्येतानि विंशतिः ॥ १६५ ॥
जीवाभिगमवृत्त्यादिग्रन्थेषु च निरूपितौ । वापीचतुष्कान्तरेषु, द्वौ द्वौ रतिकराचलौ ॥ १६६ ॥
षोडशानां वापिकानां, षोडशस्वन्तरेष्वमी । द्वात्रिंशद् द्विद्विभावेन, पद्मरागनिभाः समे ॥ १६७ ॥

इति प्रवचनसारोद्धारसूत्रवृत्त्यभिप्रायेण एते पद्मरागमयाः, स्थानाङ्गवृत्त्यभिप्रायेण तु सौवर्णा[२] इति ।

उपर्येकैकमेतेषां, सर्वेषामपि भूभृताम् । चैत्यं नित्यार्हतां चारु, चलाचलध्वजाञ्चलम् ॥ १६८ ॥
चत्वारो दधिमुखस्था, एकैकोऽञ्जनभूभृतः । अष्टानां च रतिकराद्रीणामष्टौ जिनालयाः ॥ १६९ ॥
इत्येवमेकैकदिशि, त्रयोदश त्रयोदश । एवं संकलिताश्चैते, द्विपञ्चाशज्जिनालयाः ॥ १७० ॥

स्थानाङ्गवृत्तावप्युक्तं— "सोलस दहिमुहसेला, कुंदामलसंखचंदसंकासा । कणयनिभा बत्तीसं, रइकरगिरिबाहिरा तेसिं ॥ अंजणगाइगिरीणं, नाणामणिपज्जलंतसिहरेसु । बावन्नं जिणणिलया, मणिरयणसहस्सकूडवरा" ॥

प्रासादास्ते योजनानां, भवन्ति शतमायताः । पञ्चाशतं ततास्तुङ्गा, योजनानि द्विसप्ततिम् ॥ १७१ ॥
हावभावाद्यभिनयविलासोल्लासिपुत्रिकाः । दिदृक्षानिश्चलैर्दिव्याङ्गनावृन्दैरिवाञ्चिताः ॥ १७२ ॥
चित्रोत्कीर्णैर्हयगजसुरदानवमानवैः । अद्भुतालोकनरससंस्थितत्रिभुवना इव ॥ १७३ ॥
अष्टभिर्मङ्गलैः स्पष्टं, विशिष्टा अपि देहिनाम् । सेवाजुषां वितन्वानाः, कोटिशो मङ्गलावलीः ॥ १७४ ॥
प्रीत्योन्नतपदप्राप्तेर्नृत्यद्भिरिव केतुभिः । त्वरितं प्रोल्लसद्भक्तीनाह्वयन्त इवाङ्गिनः ॥ १७५ ॥
स्थिताः सिंहनिषदनाकाराः स्फारामलत्विषः । भव्याघघोरमातङ्घघटामिव जिघांसवः ॥ १७६ ॥
तथाहुः— "अंजणगपव्वयाणं सिहरतलेसुं हवंति पत्तेयं । अरिहंतायययणाइं सीहणिसायाइं तुंगाइं" ॥
द्वारैश्चतुर्भिः प्रत्येकं, ते विभान्ति सुकान्तिभिः । चतुर्गतित्रस्तलोकत्राणदुर्गा इवोद्भटाः ॥ १७७ ॥
प्राच्यां देवाभिधं द्वारं, तद्भवेद्देवदैवतम् । असुराख्यं दक्षिणस्यां, द्वारं चासुरदैवतम् ॥ १७८ ॥

---

१. सर्वत्र समा विष्कम्भेन उत्सेधेन चतुष्षष्टिः सहस्राणि इत्येवं व्याख्याने न विरोधः, अविभक्तिकनिर्देशो विष्कम्भशब्दस्यात्र, न चात्र 'विक्खंभुस्सेहेहिं'ति बहुवचनमत्ति येनागतिकता स्यात् ।

२. सुष्ठुवर्णमया इत्यर्थकत्वे न विरोधः, यद्वा पद्मरागो रक्तः सुवर्णं च रक्तमपि स्यात् ।

पश्चिमायां च नागाख्यं, तन्नागामररक्षितम् । उत्तरस्यां सुवर्णाख्यं, सुवर्णसुररक्षितम् ॥ १७९ ॥
योजनानि षोडशैतदेकैकं द्वारमुच्छ्रितम् । योजनान्यष्टविस्तीर्णं, प्रवेशे तावदेव च ॥ १८० ॥
प्रतिद्वारमथैकैकः, पुरतो मुखमण्डपः । चैत्यस्य यो मुखे द्वारे, पट्टशालासमो मतः ॥ १८१ ॥
तस्यापि पुरतः प्रेक्षामण्डपः श्रीभिरद्भुतः । प्रेक्षा प्रेक्षणकं तस्मै, गृहरूपः स मण्डपः ॥ १८२ ॥
योजनानां शतं दीर्घौ, पञ्चाशत्तानि विस्तृतौ । योजनानि षोडशोच्चौ, त्रिभिद्वरैर्मनोरमौ ॥ १८३ ॥

तथोक्तं जीवाभिगमवृत्तौ— "मुखमण्डपानां प्रत्येकं प्रत्येकं त्रिदिशं–तिसृषु दिक्षु, एकैकस्यां दिशि एकैकभावेन त्रीणि द्वाराणि," जीवाभिगमसूत्रादर्शे तु 'तेसि णं मुहमंडवाणं चउद्दिसिं चत्तारि दारा पण्णत्ता' इति दृश्यते[1] ।

प्रेक्षामण्डपमध्ये च, वज्ररत्नविनिर्मितः । एकैकोऽक्षाटकस्तस्य, मध्येऽस्ति मणिपीठिका ॥ १८४ ॥
योजनान्यष्ट विस्तीर्णायता चत्वारि चोच्छ्रिता । उपर्यस्याश्चेन्द्रयोग्यं, सिंहासनमनुत्तरम् ॥ १८५ ॥
सिंहासनस्य तस्योर्ध्वं, दूष्यं विजयनामकम् । वितानरूपं तद्रत्नवस्त्रमत्यन्तनिर्मलम् ॥ १८६ ॥
मुक्तादामालम्बनाय, मध्येऽस्य वाज्रिकोऽङ्कुशः । तस्मिन्मुक्तादामकुम्भप्रमाणमौक्तिकाञ्चितम् ॥ १८७ ॥
तच्च स्वार्द्धोच्चत्वमानैर्मुक्तादामभिरञ्चितम् । चतुर्दिशमर्द्धकुम्भप्रमाणमौक्तिकान्वितैः ॥ १८८ ॥

तथाऽऽह स्थानाङ्गे —"तेसु णं वइरामएसु अंकुसेसु चत्तारि कुंभिक्का मुत्तादामा प०, ते णं कुंभिक्का मुत्तादामा पत्तेयं पत्तेयं तदद्धुच्चत्तप्पमाणमित्तेहिं चउहिं अद्धकुंभिक्केहिं मुत्तादामेहिं सव्वतो समंता संपरिक्खित्ता," एतट्टीकापि–"कुंभो मुक्ताफलानां परिमाणतया विद्यते, येषु तानि कुंभिकानि मुक्तादामानि-मुक्तामालाः, कुंभप्रमाणं च—'दो असती पसई, दो पसइउ सेतिया, चत्तारि सेतियाओ कुलओ, चत्तारि कुलवा पत्थो, चत्तारि पत्था आढयं, चत्तारि आढया दोणो, सट्ठी आढयाइं जहन्नो कुंभो, असीइं मज्झिमो, सयमुक्कोसो'त्ति 'तदद्ध'त्ति तेषामेव मुक्तादाम्नामर्द्धमुच्चत्वस्य प्रमाणं येषां तानि तदर्द्धोच्चत्वप्रमाणानि तान्येव तन्मात्राणि तैः, 'अद्धकुंभिक्केहिं'ति मुक्ताफलार्द्धकुम्भवद्भिरिति ।"

ततः प्रेक्षामण्डपाग्रे, प्रत्येकं मणीपीठिका । उच्छ्रिता योजनान्यष्टौ षोडशायतविस्तृता ॥ १८९ ॥
चैत्यस्तूपस्तदुपरि, स योजनानि षोडश । आयतो विस्तृतस्तुङ्गः, सातिरेकाणि षोडश ॥ १९० ॥
मणिपीठिकाश्चतस्रः, स्तूपस्यास्य चतुर्दिशम् । योजनान्यष्ट विस्तीर्णायताश्चत्वारि चोच्छ्रिताः ॥ १९१ ॥

इति जीवाभिगमवृत्तौ ॥

तासामुपरि च स्तूपाभिमुख्याः श्रीमदर्हताम् । जयन्ति प्रतिमाश्चञ्चन्मरीचिनिचयाञ्चिताः ॥ १९२ ॥
चैत्यस्तूपात्परा तस्माद्विभाति मणिपीठिका । विष्कम्भायामतः स्तूपपीठिकासन्निभैव सा ॥ १९३ ॥

---

१ जीवाभिगमे सूत्रस्य वृत्तेश्च भिन्नभिन्ना आदर्शाः इति स्पष्टं व्याख्याविलोककानां ।

उपर्यस्याः पीठिकायाश्चैत्यवृक्षो विराजते । विजयाराजधान्युक्तचैत्यवृक्षसहोदरः ॥ १९४ ॥
वीक्ष्य चैत्यश्रियं रम्यां, विश्वलक्ष्मीविजित्वरीम् । मरुच्चलशिरोव्याजादाश्चर्यं व्यञ्जयन्निव ॥ १९५ ॥
योजनान्यष्ट विस्तीर्णायता चत्वारि मेदुरा । तदग्रे पीठिका तस्यां, महेन्द्रध्वज उज्ज्वलः ॥ १९६ ॥
तुङ्गः षष्टिं योजनानि, विस्तीर्णश्चैकयोजनम् । एतावदेव चोद्विद्धः, शुद्धरत्नविनिर्मितः ॥ १९७ ॥
ततो नन्दापुष्करिणी, योजनान्यायता शतम् । पञ्चाशं विस्तृता सा च, दशोद्विद्धा प्रकीर्त्तिता ॥ १९८ ॥
द्विसप्ततिं योजनानामुद्विद्धा लुब्धषट्पदैः । अब्जैरत्यन्तसुरभिमरन्दैर्वासितोदकाः ॥ १९९ ॥
अशोकसप्तपर्णाख्यचम्पकाम्रवनैः क्रमात् । पूर्वादिषु मनोज्ञेयं, ककुप्सु चतसृष्वपि ॥ २०० ॥
तथोक्तं स्थानाङ्गे —
'पुव्वेण असोगवणं, दाहिणओ होइ सत्तवण्णवणं । अवरेण चंपगवणं, चूअवणं उत्तरे पासे' ॥
द्वौ मण्डपौ स्तूप एकश्चैत्यवृक्षो महाध्वजः । वापी वनाढ्या वस्तूनि, प्रतिद्वारममूनि षट् ॥ २०१ ॥
प्रतिप्रासादमेवं च, चत्वारो मुखमण्डपाः । अभ्रङ्कषोत्तुङ्गशृङ्गाश्चत्वारो रङ्गमण्डपाः ॥ २०२ ॥
स्तूपाश्चत्वारस्तथैव, चैत्यवृक्षेन्द्रकेतवः । चतस्रः पुष्करिण्यश्च, तद्वनानि च षोडश ॥ २०३ ॥
प्रासादानामथो मध्येऽस्त्येकैका मणिपीठिका । विष्कम्भायामतः सा च, योजनानीह षोडश ॥ २०४ ॥
अष्टोच्छ्रिता तदुपरि, स्याद् देवच्छन्दकः स च । तदायतः पीठिकावत्तुङ्गोऽधिकानि षोडश ॥ २०५ ॥
चतुर्दिशं तत्र भान्ति, रत्नसिंहासनस्थिताः । अर्हतां प्रतिमा नित्याः, प्रत्येकं सप्तविंशतिः ॥ २०६ ॥
प्रतिप्रासादमित्येवं, तासामष्टोत्तरं शतम् । द्वारस्थाः षोडशेत्येवं, चतुर्विंशं शतं स्तुवे ॥ २०७ ॥
ऋषभो वर्द्धमानश्च, चन्द्राननजिनेश्वरः, । वारिषेणश्चेति नाम्ना, पर्यङ्कासनसंस्थिताः ॥ २०८ ॥
द्वे द्वे च नागप्रतिमे, जिनार्चापुरतः स्थिते । द्वे द्वे च यक्षभूतार्चे, आज्ञाभृत्प्रतिमे अपि ॥ २०९ ॥
विनयेन संमुखीनघटिताञ्जलिसंपुटे । भक्त्या पर्युपासमाने, स्थिते किञ्चिन्नते इव ॥ २१० ॥
एकैका चामरधरप्रतिमा पार्श्वयोर्द्वयोः । पृष्ठतश्च छत्रधरप्रतिमैकाऽत्र निश्चिता ॥ २११ ॥

तथोक्तमावश्यकचूर्णौ—"जिणपडिमाणं पुरओ दो दो नागपडिमाओ, दो दो जक्खपडिमाओ, दो दो भूअपडिमाओ, दो दो कुंडधरपडिमाओ" इत्यादि ।

दामानि धूपघट्योऽष्टौ, मङ्गलानि ध्वजास्तथा । भान्ति षोडश कुम्भादीन्येष्वलङ्करणानि च ॥ २१२ ॥
घण्टा वन्दनमालाश्च, भृङ्गाराश्चात्मदर्शकाः । सुप्रतिष्ठकचङ्गेर्यश्छत्रैः पटलकैर्युताः ॥ २१३ ॥
स्वर्णवर्णचारुरजोवालुकाभिर्मनोरमाः । भूमयस्तेषु राजन्ते, मूर्त्तैः शोभालवैरिव ॥ २१४ ॥
अथ कैश्चित्कृतस्नानैः, सद्धयानैर्धृतधौतिकैः । अन्तर्बहिश्चावदातैः, शरत्कालहृदैरिव ॥ २१५ ॥
कैश्चित्कृतोत्तरासङ्गैर्मुखकोशावृताननैः । तत्कालनष्टान्तःपापपरावृत्तिभयादिव ॥ २१६ ॥

मर्दयद्भिश्चन्दनेन, कैश्चित्कर्पूरकुङ्कुमे । मोहप्रतापयशसी, चूर्णयद्भिरिवोर्जिते ॥ २१७ ॥
कैश्चिद् घुसृणनिर्यासोल्लासिकच्चोलकच्छलात् । हृद्यमान्तं भक्तिरागं, दधद्भिः प्रकटं बहिः ॥ २१८ ॥
कैश्चिन्नानावर्णपुष्पोद्दामदामौघदम्भतः । श्रयद्भिरद्भुतश्रेयः, श्रेणीमिव करे कृताम् ॥ २१९ ॥
वन्दमानैः पर्युपासमानैः पूजापरायणैः । प्रासादास्तेऽभितो भान्ति, सुरासुरनभश्चरैः ॥ २२० ॥
अर्हत्कल्याणकमहचिकीर्षयाऽऽगताः सुराः । इह विश्रम्य संक्षिप्तयाना यान्ति यथेप्सितम् ॥ २२१ ॥
ततः प्रत्यावर्त्तमानाः, कृतकृत्या इहागताः । रचयन्त्यष्ट दिवसान्, यावदुत्सवमुच्चकैः ॥ २२२ ॥
प्रतिवर्षं पर्युषणाचतुर्मासकपर्वसु । इहाष्टौ दिवसान् यावदुत्सवं कुर्वते सुराः ॥ २२३ ॥

तथोक्तं जीवाभिगमसूत्रे—"तत्थणं बहवे भवणवइवाणमंतरजोइसवेमाणिया देवा चउमासियापाडिवएसु संवच्छरिएसु वा अण्णेसु बहुसु जिणजम्मणणिक्खमणणाणुप्पत्ति-परिणिव्वाणमादिएसु देवकज्जेसु य यावत् अट्ठाहितारुवाओ महामहिमाओ कारेमाणा पालेमाणा सुहंसुहेणं विहरंति" ।

तत्रापि नियतस्वस्वस्थानेषु सुरनायकाः । उत्सवान्सपरीवाराः, कुर्वन्ति भक्तिभासुराः ॥ २२४ ॥

तथाह नन्दीश्वरकल्पः— "प्राच्येऽञ्जनगिरौ शक्रः, कुरुतेऽष्टाहिकोत्सवम् । प्रतिमानां शाश्वतीनां, चतुद्वारि जिनालये ॥ तस्य चाद्रेश्चतुर्दिक्स्थमहावापीविवर्त्तिषु । स्फाटिकेषु दधिमुखपर्वतेषु चतुर्ष्वपि ॥ चैत्येष्वर्हत्प्रतिमानां, शाश्वतीनां यथाविधि । चत्वारः शक्रदिक्पालाः, कुर्वतेऽष्टाहिकोत्सवम् ॥ ईशानेन्द्रस्त्वौत्तराहेऽञ्जनाद्रौ विदधाति तम् । तल्लोकपाला-स्तद्वापीदध्याद्यद्रिषु कुर्वते ॥ चमरेन्द्रो दाक्षिणात्याञ्जनाद्रावुत्सवं सृजेत् । तद्वाप्यन्तर्दधिमुखेष्वस्य दिक्पतयः पुनः ॥ पश्चिमेऽञ्जनशैले तु, बलीन्द्रः कुरुते महम् । तद्दिक्पालास्तु तद्वाप्यन्तर्भाग्दधिमुखाद्रिषु" ॥ एतत्सर्वमर्थतो जम्बूद्वीपप्रज्ञप्तिसूत्रेऽपि ।

तत्र गायन्ति गन्धर्वा, मधुरैर्नादविभ्रमैः । समानतालविविधातोद्यनिर्घोषबन्धुरैः ॥ २२५ ॥
मृदङ्गवेणुवीणादितूर्याणि संगतैः स्वरैः । कौशलं दर्शयन्तीव, तस्यां विबुधपर्षदि ॥ २२६ ॥
नृत्यद्देवनर्त्तकीनां, रणन्तो मणिनूपुराः । वदन्तीव निर्दयांह्रिपातैर्मृद्वंह्रिपीडनम् ॥ २२७ ॥
तासां तिर्यग् भ्रमन्तीनामुच्छलन्तः स्तनोपरि । मुक्ताहारा रसावेशाद् नृत्यन्तीवाप्यचेतनाः ॥ २२८ ॥
धिल्धिधिल्धिधिमिधिमिथेईथेईतिनिस्वनाः । तासां मुखोद्गताश्चेतः, सुखयन्ति सुधाभुजाम् ॥ २२९ ॥
पूर्वं हासाप्रहासाभ्यां स्वर्णकृत् स्वपतीकृतः । कृत्रिमैर्विभ्रमैर्विप्रलोभ्य यः स्त्रीषु लम्पटः ॥ २३० ॥
सोऽत्र कण्ठान्निराकुर्वन्निपतन्तं बलाद्गले । मृदङ्गं भङ्गुरग्रीवो, विलक्षोऽहासयत्सुरान् ॥ २३१ ॥

अच्युतत्रिदशीभूतप्राग्जन्मसुहृदा कृतः । नागिलेनाग्रसम्यक्त्वः, प्राग्रेनामरपर्षदि ॥ २३२ ॥
जङ्घाविद्याचारणानां, समुदायो महात्मनाम् । इह चैत्यनमस्यार्थं, श्रद्धोत्कर्षादुपेयुषाम् ॥ २३३ ॥
ददात्युपदिशन् धर्मं, युगपद्भावशालिनाम् । सज्जङ्घमस्थावरयोस्तीर्थयोः सेवनाफलम् ॥ २३४ ॥
द्वीपस्य मध्यभागेऽस्य, चतुष्के विदिशां स्थिताः । चत्वारोऽन्ये रतिकरा, गिरयः सर्वरत्नजाः ॥ २३५ ॥
योजनानां सहस्राणि, ते दशायतविस्तृताः । सहस्रमेकमुत्तुङ्गा, आकृत्या झल्लरीनिभाः ॥ २३६ ॥
सार्द्धे द्वे योजनशते, भूमग्नाः परिवेषतः । एकत्रिंशत्सहस्राणि, त्रयोविंशा च षट्शती ॥ २३७ ॥
तेभ्यो लक्षं योजनानामतिक्रम्य चतुर्दिशम् । जम्बूद्वीपसमा राजधान्यः प्रत्येकमीरिताः ॥ २३८ ॥
तत्र दक्षिणपूर्वस्यां, स्थिताद्रतिकराचलात् । प्राच्यां पद्मानामदेव्याः, प्रज्ञप्ता सुमनाः पुरी ॥ २३९ ॥
शिवादेव्या दक्षिणस्यां, पुरी सौमनसाभिधा । अर्चिर्माली प्रतीच्यां स्याच्छचीदेव्या महापुरी ॥ २४० ॥
उत्तरस्यां मञ्जुनाम्न्या, राजधानी मनोरमा । दक्षिणपश्चिमायां च, स्थिताद्रतिकरादथ ॥ २४१ ॥
पूर्वस्याममलादेव्या, भूता नाम महापुरी । भूतावतंसका याम्यामप्सरोऽभिधभर्तृका ॥ २४२ ॥
प्रतीच्यां नवमिकाया, गोस्तूपाख्या महापुरी । स्यादुत्तरस्यां रोहिण्या, राजधानी सुदर्शना ॥ २४३ ॥
अष्टाप्येवं राजधान्योऽनयोर्दिशां चतुष्टये । अष्टानां मुख्यदेवीनां, वज्रपाणेः सुरेशितुः ॥ २४४ ॥
अथ चोत्तरपूर्वस्यां, योऽसौ रतिकराचलः । कृष्णादेव्यास्ततः प्राच्यां, पुरी नन्दोत्तराभिधा ॥ २४५ ॥
दक्षिणस्यां कृष्णराज्या, देव्या नन्दाभिधा पुरी । पश्चिमायां तु रामायाः, पुर्युत्तरकुराभिधा ॥ २४६ ॥
उदग्रामरक्षितायाः, पुरी देवकुराभिधा । योऽप्युत्तरपश्चिमायां, शैलो रतिकरस्ततः ॥ २४७ ॥
वसुदेव्या राजधानी, प्राच्यां रत्नाभिधा भवेत् । याम्यां तु वसुगुप्ताया, रत्नोच्चयाभिधा पुरी ॥ २४८ ॥
प्रतीच्यां वसुमित्रायाः सर्वरत्नाभिधा पुरी । वसुन्धरायाश्चोदीच्यां, नगरी रत्नसंचया ॥ २४९ ॥
एता ईशानेन्द्रदेवीराजधान्योऽष्ट पूर्ववत् । एकैकार्हच्चैत्यलब्धसुषमाः षोडशाप्यमूः ॥ २५० ॥
इत्यर्थतः स्थानाङ्गादिषु ।
मतान्तरे तूत्तराशासंबद्धौ यावुभौ गिरी । तयोः प्रत्येकमष्टासु, दिक्ष्वीशानसुरेशितुः ॥ २५१ ॥
महिषीणां राजधान्योऽष्टानामष्टाष्ट निश्चिताः । एवं च याम्यदिक्संबद्धयो रतिकराद्रयोः ॥ २५२ ॥
प्रत्येकमष्टासु दिक्षु वज्रपाणेर्बिडौजसः । इन्द्राणीनां राजधान्योऽष्टानामष्टाष्ट निश्चिताः ॥ २५३ ॥

तथोक्तं जिनप्रभसूरिकृते नन्दीश्वरकल्पे— तत्र द्वयो रतिकराचलयोर्दक्षिणस्थयोः । शक्रस्येशानस्य पुनरुत्तरस्थितयोः पृथक् ॥ अष्टानां महादेवीनां, राजधान्योऽष्ट दिक्षु ताः । लक्षाबाधा लक्ष्यमाना, जिनायतनभूषिताः ॥ सुजाता च सौमनसा, चार्चिर्माली प्रभाकरा । पद्मा शिवा शच्यञ्जने, भूता भूतावतंसिका ॥ गोस्तुपासुदर्शने अप्यमलाप्सरसौ तथा । रोहिणी नवमी

चाथ, रत्ना रत्नोच्चयापि च ॥ सर्वरत्ना रत्नसंचया वसुर्वसुमित्रिका । वसुभागापि च वसुन्धरानन्दोत्तरे अपि ॥ नन्दोत्तरकुरुर्देवकुरुः कृष्णा ततोऽपि च । कृष्णराजीरामारामरक्षिताः प्राक्क्रमादमूः ॥

षोडशैवं राजधानीचैत्यानि प्राक्तने मते । [1]मतान्तरे पुनर्द्वात्रिंशदेतानीति निर्णयः ॥ २५४ ॥

तथाह नन्दीश्वरस्तोत्रकारः— इअ वीसं बावन्नं च जिणहरे गिरिसिहरेसु संथुणिमो । इंदाणिरायहाणिसु बत्तीसं सोलस व वंदे" ॥ एतत्सर्वमप्यर्थतो नन्दीश्वरस्तोत्रं सर्वं सूत्रतोऽपि योगशास्त्रवृत्तावप्यस्ति ।

दीपोत्सवामावास्याया, आरभ्य प्रत्यमादिनम् । अपोषणं वितन्वाना, वर्षं यावन्निरन्तरम् ॥ २५५ ॥
भक्त्या श्रीजिनचैत्यानां, कुर्वन्तो वन्दनार्चनम् । नन्दीश्वरस्तुतिस्तोत्रपाठपावितमानसाः ॥ २५६ ॥
भव्या नन्दीश्वरद्वीपमेवमाराधयन्ति ये । तेऽर्जयन्त्यार्जवोपेताः, श्रेयसीं श्रायसीं श्रियम् ॥ २५७ ॥
इत्थं व्यावर्णितरूपं, द्वीपं नन्दीश्वराभिधम् । तिष्ठत्यावेष्ट्य परितो, नन्दीश्वरोदवारिधिः ॥ २५८ ॥
सुमनःसुमनोभद्रौ, सुरौ समृद्धिमत्तया । नन्दीश्वरौ तत्संबंधि, जलमस्येत्यसौ तथा ॥ २५९ ॥
लग्नं नन्दीश्वरे द्वीपे, जलं वाऽस्येत्यसौ तथा । असौ नन्दीश्वरद्वीपाद्वार्द्धिर्द्विगुणविस्तृतः ॥ २६० ॥
एनमावेष्ट्य परितः, स्थितो द्वीपोऽरुणाभिधः । नंदीश्वराब्धेर्द्विगुणविष्कम्भोऽसौ निरूपितः ॥ २६१ ॥
असौ निजाधीश्वरयोरशोकवीतशोकयोः । सुरयोः प्रभया रक्तकान्तित्वादरुणाभिधः ॥ २६२ ॥
यद्वैतत्पर्वतादीनां, सद्वज्ररत्नजन्मनाम् । प्रसरद्भिः प्रभाजालैररुणत्वात्तथाभिधः ॥ २६३ ॥
अरुणोदाभिधो वार्द्धिरेनमावृत्य तिष्ठति । विस्तारतोऽरुणद्वीपद्विगुणः परतोऽप्यसौ ॥ २६४ ॥
सुभद्रसुमनोभद्राभिधयोरेतदीशयोः । भूषणाभाभिररुणं, जलं यस्येत्यसौ तथा ॥ २६५ ॥
यद्वाऽरुणद्वीपपरिक्षेप्यमुष्योदकं स्फुरत् । ततोऽरुणोदाभिधानः, प्रसिद्धोऽयं पयोनिधिः ॥ २६६ ॥
एवमन्येष्वपि ज्ञेया, निःशेषद्वीपवार्द्धिषु । व्यासद्वैगुण्यनामार्थौ, स्वामिनश्च स्वयं श्रुतात् ॥ २६७ ॥
ततोऽरुणवरो द्वीपस्तमप्याश्रित्य तिष्ठति । पारावारोऽरुणवरो, महाभोगीव सेवधिम् ॥ २६८ ॥
एनं द्वीपोऽरुणवरावभासः परिषेवते । आलिङ्ग्त्यरुणवरावभासस्तं च वारिधिः ॥ २६९ ॥
ततश्च कुण्डलद्वीपो, मेदिन्या इव कुण्डलम् । अयं त्रिप्रत्यवतारापेक्षया द्वादशो भवेत् ॥ २७० ॥

स्थानाङ्गतृतीयस्थानवृत्तौ च अरुणादीनां त्रिप्रत्यवतारमनाश्रित्यायमेकादशोऽभिहितः, तथाहि—

"जंबूदीवो १ धायइ २ पुक्खरदीवो ३ अ वारुणिवरो ४ य । खीखरोवि य दीवो ५ घयवरदीवो य ६ खोदवरो ७ ॥ नंदीसरो अ ८ अरुणो ९ अरुणोवाओ य १० कुंडलवरो य ११ ॥ तह संख १२ रुअग १३ भुअवर १४ कुस १५ कुंचवरो य तो १६ दीवो ॥"

---

१ द्वयोर्वैमानिकेन्द्रयोः षोडशेन्द्राण्यःज्योतिष्कव्यन्तरेन्द्राण्योऽपि तावत्य इत्येकैकपक्षोभयपक्षयोश्च विवक्षायां न विरोधः ।

इति क्रमापेक्षयैकादशे कुण्डलद्वीपे" इत्युक्तं, एवं भगवतीशतकचतुर्थो-द्देशकवृत्तावप्ययमेकादशोऽभिहित इति, तत्त्वं बहुश्रुता विदन्ति ॥

अस्मिंश्च कुण्डलगिरिर्मानुषोत्तरवत्स्थितः । योजनानां द्विचत्वारिंशतं तुङ्गः सहस्रकान् ॥ २७१ ॥
सहस्रमेकं भूमग्नो, मूले मध्ये तथोपरि । विस्तीर्णोऽयं भवेच्छैलो, मानुषोत्तरशैलवत् ॥ २७२ ॥
चतुर्दिशं चतुर्द्वाराश्चत्वारोऽत्र जिनालयाः । चतुर्गतिभवारण्यभ्रान्ताङ्गिविश्रमा इव ॥ २७३ ॥
सर्वमेषां स्वरूपं तु, नन्दीश्वराद्रिचैत्यवत् । पार्श्वेऽथाभ्यन्तरेऽस्याद्रेर्दक्षिणोत्तरयोर्दिशोः ॥ २७४ ॥
चत्वारश्चत्वार एव, प्रत्येकं सन्ति भूधराः । सोमयमवैश्रमणवरुणप्रभसंज्ञकाः ॥ २७५ ॥
अष्टाप्येते रतिकरपर्वताकृतयो मताः । उद्वेधोच्चत्वविष्कम्भैरुद्दामरामणीयकाः ॥ २७६ ॥
एकैकस्याथ तस्याद्रेः, राजधान्यश्चतुर्दिशम् । जम्बूद्वीप इव द्वात्रिंशदेता विस्तृतायताः ॥ २७७ ॥
सोमा सोमप्रभा शिवप्राकारा नलिनापि च । राजधान्यो गिरेः सोमप्रभात्प्राच्यादिषु स्थिताः ॥ २७८ ॥
विशालाऽतिविशाला च, शय्याप्रभा तथाऽमृता । यमप्रभगिरेरेता, राजधान्यश्चतुर्दिशम् ॥ २७९ ॥
भवत्यचलनद्धाख्या, समक्वसा कुबेरिका । धनप्रभा वैश्रमणप्रभशैलाच्चतुर्दिशम् ॥ २८० ॥
वरुणप्रभशैलाच्च, वरुणा वरुणप्रभा । पुर्यपाच्यादिषु दिक्षु, कुमुदा पुण्डरीकिणी ॥ २८१ ॥
दक्षिणस्यां च या एता, नगर्यः षोडशोदिताः । चतुर्णां लोकपालानां, ताः सौधर्मेन्द्रसेविनाम् ॥ २८२ ॥
उत्तरस्यां पुनरिमा, याः षोडश निरूपिताः । चतुर्णां लोकपालानां, ताः ईशानेन्द्रसेविनाम् ॥ २८३ ॥

तथोक्तं द्वीपसागरप्रज्ञप्तिसंग्रहण्यां— "कुंडलनगस्स अब्भंतरपासे हुंति रायहाणीओ । सोलस दक्खिणपासे सोलस पुण उत्तरे पासे" ॥ इत्यादि भगवतीतृतीयशताष्टमोद्देशकवृत्तौ ।

एवं च परितो भाति, कुण्डलोदः पयोनिधिः । तं कुण्डलवरो द्वीपः, परिक्षिप्याभितः स्थितः ॥ २८४ ॥
स्यात्कुण्डलवरोदाब्धिस्ततो द्वीपः स्थितोऽभितः । कुण्डलवरावभासस्तन्नामाग्रे पयोनिधिः ॥ २८५ ॥
अग्रे शङ्खाभिधो द्वीपः, शङ्खवार्ब्धिपरिष्कृतः । ततः शङ्खवरो द्वीपस्ततः शङ्खवरोऽम्बुधिः ॥ २८६ ॥
द्वीपस्ततः शङ्खवरावभास इति विश्रुतः । स विष्वगञ्चितः शङ्खवरावभासवार्धिना ॥ २८७ ॥
ततोऽग्रे रुचकद्वीप, एष चाष्टादशो भवेत् । त्रिप्रत्यवतारमतेऽन्यथा द्वीपस्त्रयोदशः ॥ २८८ ॥

अरुणादीनां द्वीपसमुद्राणां त्रिप्रत्यवतारश्च जीवाभिगमसूत्रवृत्त्यादौ सविस्तरं स्पष्ट एव, जीवाभिगमचूर्णावपि— 'अरुणादीया दीवसमुद्दा तिपडोयारा यावत्सूर्यवरावभास' इत्युक्तमिति ज्ञेयं, संग्रहणीलघुवृत्त्यभिप्रायेण त्वयं रुचकद्वीपोऽनिश्चितसंख्याकोऽपि, जंबूधायइ पुक्खरेत्यादि संग्रहणीगाथायां 'रुणवायत्ति' पदेनारुणादीनां त्रिप्रत्यवतारस्य सूचितत्वात्, कुंडलवरावभासात्परं संख्याक्रमेणानभिधानाच्च, तथा च तद्ग्रन्थः—"एतानि च जम्बूद्वीपादारभ्य क्रमेण द्वीपानां

नामानि, अत ऊर्द्ध्वं तु शङ्खादिनामानि यथा कथञ्चित्, परं तान्यपि त्रिप्रत्यवताराणी" त्यादि, जम्बूद्वीपप्रज्ञप्तिवृत्तौ तु एकेनादेशेन एकादशे द्वितीयादेशेन त्रयोदशे तृतीयादेशेन एकविंशे रुचकद्वीपे इत्युक्तमिति ज्ञेयं,

जीवसमासवृत्तौ तु ईक्षुरससमुद्रादनन्तरं नन्दीश्वरो द्वीपः ८ अरुणवरः ९ अरुणवासः १० कुण्डलवरः ११ शंखवरः १२ रुचकवरः १३ इति, अनुयोगद्वारचूर्ण्यभिप्रायेणत्रयोदशो रुचकवरः, अनुयोगद्वारसूत्रे त्वरुणवासशङ्खवरद्वीपौ लिखितौ न दृश्येते, अतस्तदभिप्रायेणैकादशो रुचकवरः, [1]परमार्थं तु योगिनो विदन्तीति । तथा जीवसमासवृत्त्यभिप्रायेण जम्बूद्वीपादयो रुचकवरपर्यन्ता द्वीपसमुद्रा नैरन्तर्येणावस्थिता नामतः प्रतिपादिताः, अत ऊर्द्ध्वं तु भुजंगवरकुशवरक्रौंचवरा असङ्ख्येयतमा असङ्ख्येयतमा इति ध्येयं ।

द्वीपस्यास्य बहुमध्ये, वर्तते वलयाकृतिः । पर्वतो रुचकाभिख्यः, स्फारो हार इवोल्लसन् ॥ २८९ ॥
योजनानां सहस्राणि, चतुरशीतिमुच्छ्रितः । मूले दश सहस्राणि, द्वाविंशानि स विस्तृतः ॥ २९० ॥
मध्ये सप्त सहस्राणि, त्रयोविंशानि विस्तृतः । चतुर्विंशांश्च चतुरः, सहस्रान् मूर्ध्नि विस्तृतः ॥ २९१ ॥
एवं महापर्वताः स्युः, कुण्डलाकृतयस्त्रयः । मर्त्योत्तरः कुण्डलश्च, तथाऽयं रुचकाचलः ॥ २९२ ॥

तथोक्तं स्थानाङ्गे– "ततो मंडलियपव्वता पं० तं० माणुसुत्तरे कुण्डलवरे रुअगवरे"

तुर्ये सहस्रे मूर्ध्नस्य, मध्ये चतसृणां दिशाम् । अस्ति प्रत्येकमेकैकं, सुन्दरं सिद्धमन्दिरम् ॥ २९३ ॥
तानि चत्वारि चैत्यानि, नन्दीश्वराद्रिचैत्यवत् । स्वरूपतश्चतसृणां, तिलकानीव दिक्श्रियाम् ॥ २९४ ॥
चैत्यस्य तस्यैकैकस्य, प्रत्येकं पार्श्वयोर्द्वयोः । सन्ति चत्वारि चत्वारि, कूटान्यभ्रङ्कषाणि वै ॥ २९५ ॥
विदिक्षु तस्यैव मूर्ध्नि, स्याच्चतुर्थे सहस्रके । एकैकं कूटमुत्तुङ्गमभङ्गुरश्रियाऽञ्चितम् ॥ २९६ ॥
षट्त्रिंशत्येषु कूटेषु, तावत्यो दिक्कुमारिकाः । वसंति ताश्चतस्रस्तु, द्वीपस्याभ्यन्तरार्द्धके ॥ २९७ ॥

तथोक्तं षष्ठाङ्गे मल्लयध्ययनवृत्तौ—"मज्झिमरुअगवत्थव्वा इत्यत्र रुचकद्वीपस्याभ्यन्तरार्द्ध-वासिन्य" इति, एवमावश्यकवृत्त्यादिष्वपि, जम्बूद्वीपप्रज्ञप्तिवृत्तौ तु चतुर्विंशत्यधिकचतुःसहस्रप्रमाणे रुचकगिरिविस्तारे द्वितीयसहस्रे चतुर्दिग्वर्त्तिषु कूटेषु पूर्वादिदिक्क्रमेण चतस्रो वसन्ती" [2]त्युक्तमिति ज्ञेयं,

अयं च रुचकद्वीपो रुचकाब्धिपरिष्कृतः । द्वीपोऽग्रे रुचकवरस्तादृक्पाथोधिसंयुतः ॥ २९८ ॥
ततोऽग्रे रुचकवरावाभासद्वीप इष्यते । परिष्कृतोऽसौ रुचकवरावभासवार्द्धिना ॥ २९९ ॥
एवमब्धिः सूर्यवरावभासोऽन्ते ततः परम् । देवद्वीपः स्थितो देववार्द्धिश्चावेष्ट्य तं स्थितः ॥ ३०० ॥
नागद्वीपस्तमभितो, नागाब्धिश्च ततः परम् । यक्षद्वीपस्तदग्रे च, यक्षोदवारिधिस्ततः ॥ ३०१ ॥

---

१ श्रीमद्भिरभयदेवसूरिभिः त्रिप्रत्यवतारतायाः अविवक्षा यथा सूचिता कुण्डलस्थाने तथाऽत्र ग्रहणे न विरोधः कोऽपि, अनुयोगसूत्रे तु गाथाबन्धानुलोम्येन "परमाणु" इति गाथायां उच्छ्लक्ष्णश्लक्ष्णिकादीनामिवाग्रहणं, द्वादशता तु न कथञ्चनाऽपि ।

२ बहिर्वर्तिनीनां चतुर्थे सहस्रे अभ्यन्तरवासिनीनां तु द्वितीये सहस्रेऽवस्थानं स्यात् तदा न विरोधः ।

भूताभिधस्ततो द्वीपस्ततो भूतोदवारिधिः । स्वयंभूरमणद्वीपः, स्वयंभूरमणाम्बुधिः ॥ ३०२ ॥
अन्ते स्थितः सर्वगुरुः, क्रोडीकृत्याखिलानपि । पितामह इवोत्सङ्गक्रीडत्पुत्रपरम्परः ॥ ३०३ ॥
आसेवितोऽसौ जलधिर्जगत्या, वृद्धः पतिः सत्कुलभार्ययेव ।
वलीपिनद्धः पलितावदातस्तरङ्गलेखाब्धिकफच्छलेन ॥ ३०४ ॥
लोकं परीत्यायमलोकमाप्तुमिवोत्सुको लोलतरोर्मिचक्रैः ।
तस्थौ च रुद्धः प्रियया जगत्या, लोकस्थितिच्छेदकलङ्कभीतेः ॥ ३०५ ॥
तस्याः पुरस्त्वविलया वलया घनाब्धिमुख्या मिथः समुदिता उदिता दिताधैः ।
ये रक्षयन्ति परितोऽलमलोकसङ्गाद्, रत्नप्रभां कुलवधूं स्थविरा इवोच्चैः ॥ ३०६ ॥
विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोतनिष्ट विनयो श्री तेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्त्व प्रदीपोपमे-सर्गः पूर्त्तिमियाय संप्रति चतुर्विंशो निसर्गोज्ज्वलः ॥ ३०७ ॥
इति श्रीलोकप्रकाशे चतुर्विंशतितमः सर्गः ।

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

अथ लोकप्रकाशे पञ्चविंशः सर्गः ।

अथैतस्मिन्नेव तिर्यग्लोके सदा प्रतिष्ठितम् । वक्ष्ये चराचरं ज्योतिश्चक्रं गुरुपदेशतः ॥ १ ॥
मेरुमध्याष्टप्रदेशस्वरूपात् समभूतलात् । सप्तोत्पत्य योजनानां, शतानि नवतिं तथा ॥ २ ॥
ज्योतिश्चक्रोपक्रमः स्यादतीत्योर्द्ध्वं ततः परम् । दशाढ्यं योजनशतमेति सम्पूर्णतामिदम् ॥ ३ ॥
एकादशैकविंशानि, योजनानां शतान्यथ । ज्योतिश्चक्रं भ्रमत्यर्वाक्, चक्रवालेन मेरुतः ॥ ४ ॥
तिष्ठत्यलोकतश्चार्वाग्, ज्योतिश्चक्रं स्थिरात्मकम् । एकादशैर्योजनानां, नन्वेकादशभिः शतैः ॥ ५ ॥
एवं तत् सर्वतो मेरोर्न्यूनार्द्धरज्जुविस्तृतम् । दशाढ्यं योजनशतं, स्यात् सर्वत्रापि मेदुरम् ॥ ६ ॥
अन्यान्यकाष्ठाश्रयणादावृत्ताभिर्निरन्तरम् । घटिकाभिर्हरन्तीभिर्जनजीवातुजीवनम् ॥ ७ ॥
लब्धात्मलाभां दिवसनिशामालां सुबिभ्रतम् । कुर्वन्तं फलनिष्पत्तिं, विष्वक् क्षेत्रानुसारिणीम् ॥ ८ ॥
नानारकस्थितियुतं, नरक्षेत्रोरुकूपके । कालारघट्टं भ्रमयन्त्यर्कचन्द्रादिधूर्वहाः ॥ ९ ॥
ज्योतिश्चक्रस्यास्य तारापटलं स्यादधस्तनम् । योजनानां सप्तशत्या, सनवत्या समक्षितेः ॥ १० ॥
योजनैर्दशभिस्तस्मादूर्द्ध्वं स्यात्सूरमण्डलम् । अष्टभिर्योजनशतैरेतच्च समभूतलात् ॥ ११ ॥
अशीत्या योजनैः सूरमण्डलाच्चन्द्रमण्डलम् । अष्टशत्या योजनानां, साशीत्येदं समक्षितेः ॥ १२ ॥

नवत्या च योजनैस्तत्तारावृन्दादधस्तनात् । विंशत्या योजनैश्चन्द्रातारावृन्दं तथोर्द्ध्वगम् ॥ १३ ॥
नवभिर्योजनशतैः, समक्षितेरधस्तनात् । तारावृन्दाद्दशोपेतशतेन च भवेदिदम् ॥ १४ ॥
अत्र सङ्ग्रहणीवृत्त्यादावयं विशेषः—
चत्वारि योजनानीन्दोर्गत्वा नक्षत्रमण्डलम् । चतुर्भिर्योजनैस्तस्माद्बुधानां पटलं स्थितम् ॥ १५ ॥
त्रिभिश्च योजनैः शुक्रमण्डलं बुधमण्डलात् । योजनैस्त्रिभिरेतस्मात्, स्याद्बाचस्पतिमण्डलम् ॥ १६ ॥
गुरुणां पटलाद्भौममण्डलं योजनैस्त्रिभिः । त्रिभिश्च योजनैर्भौमात्, स्याच्छनैश्चरमण्डलम् ॥ १७ ॥
विंशत्या योजनैरेतत्, स्थितं शशाङ्कमण्डलात् । नवभिर्योजनशतैः, स्थितं च समभूतलात् ॥ १८ ॥
तथाऽऽह सङ्ग्रहणी— [गाथा - ५१]
"तारविचंदसिक्खा, बुहसुक्का जीवमंगलसणीया । सगसयनउअ दस असीइ, चउ चउ कमसो तिआ चउसु" ॥

जम्बूद्वीपप्रज्ञप्तिवृत्तावपि—
शतानि सप्त गत्वोर्द्ध्वं, योजनानां भुवस्तलात् । नवतिं च स्थितास्ताराः, सर्वाधस्तान्नभस्तले ॥ १९ ॥
तारकापटलाद्गत्वा, योजनानि दशोपरि । सूराणां पटलं तस्मादशीतिं शीतरोचिषाम् ॥ २० ॥
चत्वारि तु ततो गत्वा, नक्षत्रपटलं स्थितम् । गत्वा ततोऽपि चत्वारि, बुधानां पटलं भवेत् ॥ २१ ॥
शुक्राणां च गुरूणां च, भौमानां मन्दसंज्ञिनाम् । त्रीणि त्रीणि च गत्वोर्द्ध्वं, क्रमेण पटलं स्थितम् ॥ २२ ॥ इति ॥

गन्धहस्ती त्वाह— "सूर्याणामधस्तान्मङ्गलाश्चरन्ती"ति,

हरिभद्रसूरिः पुनरधस्तेन भरण्यादिकं नक्षत्रमुपरितने च स्वात्यादिकमस्तीत्याह, तथा च तट्टीका—"सत्तहिं नउएहिं उप्पिं हेट्ठिल्लो होइ तलोत्ति, भरणिमाइ जोइसपयरो भवतीत्यर्थः, तथोपरितलः स्वात्युत्तरो ज्योतिषां प्रतर इति, [1]तत्त्वं पुनः केवलिनो विदन्तीति सङ्ग्रहणीवृत्तौ,"

योगशास्त्रचतुर्थप्रकाशवृत्तावपि, अत्र सर्वोपरि किल स्वातिनक्षत्रं सर्वेषामधो भरणिनक्षत्रं सर्वदक्षिणो मूलः सर्वोत्तरश्चाभीचिरित्युक्तमिति ज्ञेयम् ।

नक्षत्रपटले सर्वान्तरङ्गमभिजिद्भवेत् । यद्यप्यभिजिदादीनि, द्वादशान्तरमण्डले ॥ २३ ॥
चरन्ति चारमृक्षाणि, मेरोर्दिशि तथाप्यदः । शेषैकादशनक्षत्रापेक्षयाऽन्तः प्रवर्त्तते ॥ २४ ॥
तद्बन्मूलं सर्वबाह्यं, यद्यप्यष्टममण्डले । बहिश्चराण्युडूनि स्युर्मृगशीर्षादिकानि षट् ॥ २५ ॥
तथाप्यपरबाह्यर्क्षापेक्षयाऽम्भोनिधेर्दिशि । किञ्चिद्बहिस्ताच्चरति, ततस्तादृशमीरितम् ॥ २६ ॥
ज्योतिश्चक्रेदशोपेतशतयोजनमेदुरे । नक्षत्रपटलांशो यश्चतुर्योजनमेदुरः ॥ २७ ॥

१ पूर्वं पटलशब्देन स्थितेरुक्तत्वाद् अत्र सूर्यचारापेक्षेणोक्तेन पाठेन तारकादीनां चारोऽनियत इति न विरोधः ।

तस्योपरितले स्वातिर्भरणी स्यादधस्तले । एवं नक्षत्रपटलं, चिह्नैश्चतुर्भिरङ्कितम् ॥ २८ ॥
इदमर्थतो जम्बूद्वीपप्रज्ञप्तिवृत्तौ ।
चरज्योतिश्चक्रगता, अपि प्रोक्ता ध्रुवा स्थिराः । तत्पार्श्ववर्तिनस्तारास्तानेवानुभ्रमन्ति च ॥ २९ ॥
ज्योतिश्चक्रे चरन्त्यस्मिन्, ज्योतिष्काः पञ्चधा सुराः । विमानैः स्वैश्चन्द्रसूर्यग्रहनक्षत्रतारकाः ॥ ३० ॥
पञ्चानामप्यथैतेषां, विमानान्यनुकुर्वते । संस्थानेन कपित्थस्य, फलमुत्तानमर्द्धितम् ॥ ३१ ॥
ननु ज्योतिर्विमानानि, कपित्थार्द्धाकृतीनि चेत् । सूर्यचन्द्रविमानानां, स्थूलानामपि तादृशाम् ॥ ३२ ॥
बाढमस्तु दूरतया, मस्तकोपरिवर्त्तिनाम् । वर्त्तुलत्वप्रतिभासोऽधोवर्त्तिषु जनेष्वयम् ॥ ३३ ॥
यत्कपित्थफलार्द्धस्याप्यूर्द्ध्वं दूरं कृतस्थितेः । परभागादर्शनतो, वर्त्तुलत्वमवेक्ष्यते ॥ ३४ ॥
किन्तूदयास्तसमये, तिर्यक् चङ्क्रमणे कथम् । न तथा तानि दृश्यन्ते, तिर्यक्क्षेत्रस्थितान्यपि ? ॥ ३५ ॥
अत्रोच्यते—
सामस्त्येन कपित्थार्द्धफलाकाराण्यमूनि न । किन्त्वमीषां विमानानां, पीठानि तादृशान्यथ ॥ ३६ ॥
प्रासादाश्चैतदुपरि, तथा कथञ्चन स्थिताः । यथा पीठैः सहाकारो, भूम्ना वर्त्तुलतां श्रयेत् ॥ ३७ ॥
एकान्ततः समवृत्ततया तु दूरभावतः । चन्द्रादिमण्डलाकारो, जनानां प्रतिभासते ॥ ३८ ॥
तथाहुः विशेषणवतीकाराः—
"अद्धकविट्ठागारा, उदयत्थमणम्मि कहं न दीसंति । ससिसूराण विमाणाइं, तिरियखेत्तट्ठियाइं च ॥
उत्ताणद्धकविट्ठागारं पीढं तदुवरि पासाओ । वट्टालेखेण तओ, समवट्टं दूरभावाओ" ॥

विशेषश्चात्र प्रज्ञापनासूत्रे— "जे य गहा जोइसम्मि चारं चरंति केऊ अगतिरतिया अट्ठावीस तिविहा णक्खत्तदेवगणा (ते) णाणासंठाणसंठिया य,"

जीवाभिगमवृत्तावपि—तथा ये ग्रहा ज्योतिश्चक्रे चारं चरन्ति केतवो ये च बाह्यद्वीप-समुद्रेष्वगतिरतिका ये चाष्टाविंशतिदेवनक्षत्रगणास्ते सर्वेऽपि नानाविधसंस्थानसंस्थिताः, चशब्दात्तप्ततपनीयवर्णाश्च ॥

एकस्य योजनस्यांशानेकषष्टिसमुद्भवान् । षट्पञ्चाशतमिन्दोः स्याद्विमानं विस्तृतायतम् ॥ ३९ ॥
अंशानेतादृशानष्टाविंशतिं तत् समुच्छ्रितम् । सर्वे ज्योतिर्विमाना हि, निजव्यासार्द्धमुच्छ्रिताः ॥ ४० ॥
अष्टचत्वारिंशतं प्रागुक्तांशान् विस्तृतायतम् । विवस्वन्मण्डलं भागाँश्चतुर्विंशतिमुच्छ्रितम् ॥ ४१ ॥
विशेषतस्तु—चतुर्दश शतान्यष्टषष्टिः क्रोशास्तथोपरि । धनुःशताः सप्तदश, चतुर्युक्ताः करत्रयम् ॥ ४२ ॥
अङ्गुलाः पञ्चदश च, चत्वारः साधिका यवाः । ततायतं चन्द्रबिम्बमुत्सेधाङ्गुलमानतः ॥ ४३ ॥
शतानि द्वादशैकोनषष्टिः क्रोशास्तथोपरि । चापा द्वात्रिंशस्त्रिहस्ती, त्रयोऽङ्गुलाश्च साधिकाः ॥ ४४ ॥

तदायतं सूर्यबिम्बमुत्सेधाङ्गुलमानतः । परिक्षेपस्तु विज्ञेयः, स्वयमेवानयोर्द्वयोः ॥ ४५ ॥
प्रमाणाङ्गुलजक्रोशद्वयमायतविस्तृताः । स्युर्ग्रहाणां विमानास्ते, क्रोशमेकं समुच्छ्रिताः ॥ ४६ ॥
नक्षत्राणां विमानाश्च, क्रोशमायतविस्तृताः । क्रोशार्द्धमुच्छ्रिताः प्रोक्ताः, प्रमाणाङ्गुलमानतः ॥ ४७ ॥
प्रमाणाङ्गुलजेष्वाससहस्रायतविस्तृताः । ताराविमानाः स्युः पञ्चशतचापसमुच्छ्रिताः ॥ ४८ ॥
एतच्च तारादेवानामुत्कृष्टस्थितिशालिनाम् । परिमाणं विमानानां, जघन्यायुर्जुषां पुनः ॥ ४९ ॥
विमाना धनुषां पञ्च, शतान्यायतविस्तृताः । तेषामर्द्धतृतीयानि, शतानि पुनरुच्छ्रिताः ॥ ५० ॥

तथा च तत्त्वार्थभाष्यम्— "सर्वोत्कृष्टायास्तारायां अर्द्धक्रोशो जघन्यायाः पञ्च धनुःशतानि, विष्कम्भार्द्धबाहल्याश्च भवन्ति सर्वे," [चतुर्थोऽध्याय सूत्र. १४]

नरक्षेत्रात्तु परतो, मानमेषां यथाक्रमम् । एतदर्द्धप्रमाणेन, विज्ञेयं स्थायिनां सदा ॥ ५१ ॥

तथोक्तम्— "नरखेत्ताउ बहिं पुण अद्धपमाणा ठिया निच्चं" [बृहत्संग्रहणी गा. ५६]

योगशास्त्रे चतुर्थप्रकाशवृत्तौ तु—"मानुषोत्तरात्परतश्चन्द्रसूर्या मनुष्यक्षेत्रीयचन्द्रसूर्यप्रमाणा[1]" इत्युक्तमिति ज्ञेयम् ।

निरालम्बान्यनाधाराण्यविश्रामाणि यद्यपि । चन्द्रादीनां विमानानि, चरन्ति स्वयमेव हि ॥ ५२ ॥
तथापीदृक्षाभियोग्यनामकर्म्मानुभावतः । स्फारितस्कन्धशिरसः, सिंहाद्याकारधारिणः ॥ ५३ ॥
अपरेषु सजातीयहीनजातीयनाकिषु । निजस्फातिप्रकटनादत्यन्तं प्रीतचेतसः ॥ ५४ ॥
स्थित्वा स्थित्वाऽधो वहन्ते, निर्जरा आभियोगिकाः । तदेककर्म्माधिकृताः, सर्वदाऽखिन्नमानसाः ॥ ५५ ॥
प्रत्यक्षं वीक्ष्यमाणत्वान्ना चैतन्नोपपद्यते । अस्मिन्मनुष्यलोकेऽपि, केचिद्यथाऽऽभियोगिकाः ॥ ५६ ॥
तादृक्कर्मानुभावेनानुभवन्तोऽपि दासताम् । सजातीयेतरेषूच्चैर्दर्शयन्तः स्ववैभवम् ॥ ५७ ॥
ख्यातस्य नेतुरस्य स्मः, संमता इति सम्मदात् । रथादिलग्ना धावन्तः, सेवन्ते स्वमधीश्वरम् ॥ ५८ ॥
नीचोत्तमानि कृत्यानि, प्रोक्तानि स्वामिना मनाक् । धावन्तः पञ्चषा एकपदे कुर्वन्ति हर्षिताः ॥ ५९ ॥

तथाह तत्त्वार्थभाष्यम्— "अमूनि च ज्योतिष्कविमानानि लोकस्थित्या प्रसक्तावस्थितगतीन्यपि ऋद्धिविशेषदर्शनार्थमाभियोग्यनामकर्म्मोदयाच्च नित्यं गतिरतयो देवा वहन्ती" ति ।

तत्रापीन्दुविमानस्य, पूर्वस्यां सुभगाग्रिमाः । गोक्षीरफेनशीतांशुदधिशङ्खतलोज्ज्वलाः ॥ ६० ॥
तीक्ष्णवृत्तस्थिरस्थलदंष्ट्राङ्कुरवरानानाः । रक्तोत्पलदलाकारलोला ललिततालवः ॥ ६१ ॥
क्षौद्रपिण्डपिङ्गलाक्षाः, पूर्णोरुस्कन्धबन्धुराः । सल्लक्षणस्वच्छसटाः, पुच्छातुच्छश्रियोद्भटाः ॥ ६२ ॥
तपनीयमयप्रौढचित्रयोक्त्रकयन्त्रिताः । सलीलगतयः स्फारबलवीर्यपराक्रमाः ॥ ६३ ॥

---

१ क्षेत्रमानपेक्ष्य चन्द्रसूर्यमानार्थमेतत्, न त्वत्र विमानायामाद्यतिदेश इति ।

सिंहनादैः कृताह्लादैः, पूरयन्तो दिशो दश । चतुःसहस्रप्रमिता, वहन्ति सिंहनिर्ज्जराः ॥ ६४ ॥
दक्षिणस्यां स्थूलवज्रमयकुम्भस्थलोद्धुराः । स्वैरं कुण्डलितोद्दण्डशुण्डामण्डलमण्डिताः ॥ ६५ ॥
तपनीयमयश्रोत्राञ्चलचाञ्चल्यचञ्चवः । सुवर्णखचितप्रान्तसद्दन्तमुशलद्वयाः ॥ ६६ ॥
भूरिसिन्दूरशिरसश्चलच्चामरचारवः । सुवर्णकिङ्किणीकीर्णमणिग्रैवेयकोग्रभाः ॥ ६७ ॥
रूप्यरज्जुलसद्घण्टायुगलध्वनिमञ्जुलाः । वैडूर्यदण्डोद्दण्डांशुतीव्रवज्रमयाङ्कुशाः ॥ ६८ ॥
पुनः पुनः परावृत्तपुच्छाः पुष्टा महोन्नताः । कूर्माकाक्रमा वल्गुगतयः स्फारविक्रमाः ॥ ६९ ॥
विमानानि शशाङ्कानां, वहन्ति गजनिर्जराः । घनवन्मञ्जु गर्जन्तश्चतुःसहस्रसम्मिताः ॥ ७० ॥
प्रतीच्यां सुभगाः श्वेता, दृप्यत्ककुदसुन्दराः । अयोघनघनस्थूलतनवः पूर्णलक्षणाः ॥ ७१ ॥
अत्यन्तकमनीयौष्ठाः, कम्रेषन्नम्रिताननाः । सुस्निग्धलोमद्युतयः, पीनवृत्तकटीतटाः ॥ ७२ ॥
सुपार्श्वा मांसलस्कन्धाः, प्रलम्बपुच्छपेशलाः । तुल्यातितीक्ष्णशृङ्गाग्रा, नानागतिविशारदाः ॥ ७३ ॥
तपनीयोद्भूतजिह्वातालवो वज्रजित्खुराः । स्फाटिकस्फारदशना, गम्भीरोर्ज्जितगर्जिताः ॥ ७४ ॥
सौवर्णभूषणा रत्नकिङ्किणीमालभारिणः । चतुः सहस्रसङ्ख्यास्तान्युद्वहन्ति वृषामराः ॥ ७५ ॥
उदीच्यां सुप्रभाः श्वेताः, युवानः पीवरोन्नताः । मल्लिकापुष्पशुभ्राक्षाः, साक्षात्ताक्ष्यार्यग्रजा इव ॥ ७६ ॥
अभ्यस्तनानागमना, जवनाः पवना इव । धावनोल्लङ्घनक्रीडाकूर्दनादिजितश्रमाः ॥ ७७ ॥
लक्षणोपेतसर्वाङ्गाः, शस्तविस्तीर्णकेसराः । व्यञ्जयन्तश्चलत्पुच्छचामरेणाश्वराजताम् ॥ ७८ ॥
तपनीयखुराजिह्वातालवः स्थासकादिभिः । रम्या रत्नमयैर्वक्त्रललाटादिविभूषणैः ॥ ७९ ॥
हरिमेलकगुच्छेन, मूर्ध्नि निर्मितशेखराः । हर्षहेषितहेलाभिः, पूरयन्तोऽभितोऽम्बरम् ॥ ८० ॥
चत्वार्येव सहस्राणि, हयरूपभृतः सुराः । सुधांशूनां विमानानि, वहन्ति मुदिताः सदा ॥ ८१ ॥
सूर्योदयाङ्किता प्राची, यथाऽन्यदेहिनां तथा । ज्योतिष्काणां निश्चितैवं, न सम्भवति यद्यपि ॥ ८२ ॥
चन्द्रादीनां तथाऽप्येषां, या दिग्गन्तुमभीप्सिता । सा प्राची स्यान्निमित्तज्ञैः, क्षुतादौ कल्प्यते यथा ॥ ८३ ॥
ततस्तदनुसारेण, दिशोऽन्या दक्षिणादिकाः । विमानवाहिनामेवं, सूक्तः प्राग्दिग्विनिश्चयः ॥ ८४ ॥
षोडशैवं सहस्राणि, कृतसिंहादिमूर्त्तयः । विमानान्यमृतांशूनां, वहन्ति त्रिदशाः सदा ॥ ८५ ॥
अनेनैव दिक्क्रमेण, विमानान् भास्वतामपि । वहन्त्येतावन्त एव, सिंहाद्याकृतयः सुराः ॥ ८६ ॥
वहन्ति च विमानानि, ग्रहाणां तादृशाः सुराः । द्वे द्वे सहस्रे प्रत्याशं, सहस्राण्यष्ट तेऽखिलाः ॥ ८७ ॥
उद्वहन्ति च नक्षत्रविमानाँस्तादृशाः सुराः । स्थिताः प्रत्याशमेकैकं, सहस्रप्रमिताः सदा ॥ ८८ ॥
समुद्वहन्ति प्रत्याशं, पञ्चपञ्चशताः स्थिताः । तारकाणां विमानानि, सिंहाद्याकृतयोऽमराः ॥ ८९ ॥
सर्वेभ्यो मन्दगतयः, शशाङ्काः शीघ्रगास्ततः । तिग्मत्विषो ग्रहास्तेभ्यः, ख्याताः सत्वरगामिनः ॥ ९० ॥

विशेषस्त्वेष तत्रापि, सर्वाल्पगतयो बुधाः। तेभ्यः शुक्राः शीघ्रतरास्तेभ्योऽपि क्षितिसूनवः ॥ ९१ ॥
प्रकृष्टगतयस्तेभ्यः, सुराचार्यास्ततोऽपि हि । ख्याताः शनैश्चराः क्षिप्रगतयस्तत्त्ववेदिभिः ॥ ९२ ॥
तेभ्यस्त्वरितयायीनि, नक्षत्राणि ततोऽपि च । तारकाः क्षिप्रगतयो, निर्दिष्टाः स्पष्टदृष्टिभिः ॥ ९३ ॥
सर्वेभ्योऽप्येवमल्पिष्ठगतयोऽमृतमानवः । सर्वेभ्यः क्षिप्रगतयस्तारकाः परिकीर्त्तिताः ॥ ९४ ॥
जम्बूद्वीपेऽथ ताराणामेषां द्वेधा मिथोऽन्तरम् । निर्व्याघातिकमित्येकं, परं व्याघातसम्भवम् ॥ ९५ ॥
तत्र मध्यस्थशैलादिव्यवधायकनिर्मितम् । व्याघातिकमन्तरं स्याद्वितीयं तु स्वभावजम् ॥ ९६ ॥
स्याद् द्विधैकैकमप्येतज्जघन्योत्कृष्टभेदतः । एवं चतुर्विधं ताराविमानानां मिथोऽन्तरम् ॥ ९७ ॥
तत्र च—
शतानि पञ्च धनुषां, स्वाभाविकं जघन्यतः । उत्कर्षतो द्वे गव्यूते, जगत्स्वाभाव्यतस्तथा ॥ ९८ ॥
जघन्यतो योजनानां, सषट्षष्टि शतद्वयम् । व्याघातिकमन्तरं स्याद्भावना तत्र दर्श्यते ॥ ९९ ॥
चत्वारि योजनशतान्युत्तुङ्गो निषधाचलः । कूटान्यस्योपरि पञ्चशततुङ्गानि तानि च ॥ १०० ॥
विष्कम्भायामतः पञ्च, योजनानां शतान्यधः । मध्यदेशे पुनः पञ्चसप्तत्याढ्यं शतत्रयम् ॥ १०१ ॥
उपर्यर्द्धतृतीयानि, शतान्यथ स्वभावतः । विमुच्य योजनान्यष्टाष्टैतेषां पार्श्वयोर्द्वयोः ॥ १०२ ॥
परिभ्रमन्ति ताराणां, विमानानि भवेत्ततः । तेषां प्रागुदितं व्याघातिकं जघन्यमन्तरम् ॥ १०३ ॥
योजनानां सहस्राणि, द्वादश द्वे शते तथा । द्विचत्वारिंशदधिके, ज्येष्ठं व्याघातिकान्तरम् ॥ १०४ ॥
एतत्ताराविमानानां, स्यान्मेरौ व्यवधायके । यद्योजनसहस्राणि, दशासौ विस्तृतायतः ॥ १०५ ॥
एकादश शतान्येकविंशान्यस्माच्च दूरतः । भ्रमन्त्युभयतस्तारास्ततः स्यादुक्तमन्तरम् ॥ १०६ ॥
यद्यप्यूर्द्ध्वं सनवतेः, सप्तशत्या व्यतिक्रमे । मेरौ यथोक्तौ न व्यासायामौ सम्भवतो यतः ॥ १०७ ॥
नवैकादशजा अंशा, योजनान्येकसप्ततिः । इयद्भूनिष्ठविष्कम्भायामादत्रास्य हीयते ॥ १०८ ॥
परमुक्तमिदं स्वल्पोनताया अविवक्षया । अन्यथा प्रत्यवस्थानं, ज्ञेयं वाऽस्य [1]बहुश्रुतात् ॥ १०९ ॥
एवं जम्बूद्वीप एव, विज्ञेयं तारकान्तरम् । लवणाब्धिप्रभृतिषु, त्वेतदुक्तं न दृश्यते ॥ ११० ॥

तथोक्तं सङ्ग्रहणीसूत्रे–"तारस्स य तारस्स य जंबूदीवम्मि अंतरं गुरुयं ।" [गा. - ६२]
जंबूद्वीपप्रज्ञप्तिसूत्रेऽपि–"जंबूद्दीवे णं दीवे ताराए य २ केवइए अबाहाए अंतरे पण्णत्ते ?"
इत्यादि ।

अमी विमानाः सर्वेऽपि, समन्ततः प्रसृत्वरैः । अत्युज्ज्वलाः प्रभापूरैर्दूरीकृततमोऽङ्कुराः ॥ १११ ॥
आश्चर्यकृन्नूत्नरत्नस्वर्णविच्छित्तिशालिनः । वातोद्धूतवैजयन्तीपताकाकान्तमौलयः ॥ ११२ ॥

---

१ सामान्येन ज्योतिषां मेरोरबाधा एकविंशत्यधिकैकादशशतमिता, ताराणां किञ्चिदूरतोऽवस्थानाद्भेदनमन्तरं स्यात् ।

छत्रातिच्छत्रकोपेताः, स्वर्णरत्नविनिर्मितैः । स्तूपिकाशिखरैः शस्ताः, सुग्रस्पर्शाः समन्ततः ॥ ११३ ॥
विकस्वरैः शतपत्रैः, पुण्डरीकैश्च पुण्ड्रकैः । रत्नार्द्धचन्द्रै रम्याश्च, विविधैर्मणिदामभिः ॥ ११४ ॥
अन्तर्बहिस्तपनीयवालुकाप्रस्तटोद्भटाः । रत्नस्तम्भशतोदञ्चन्मरीचिचक्रचारवः ॥ ११५ ॥
तत्र स्वस्वविमानेषु, स्वस्वोत्पादास्पदेषु च । उत्पद्यन्ते ज्योतिषिकाः, स्वस्वपुण्यानुसारतः ॥ ११६ ॥
ज्योतिश्चक्राधिपौ तत्र, महान्तौ शशिभास्करौ । सामानिकसहस्राणां, चतुर्णामात्मरक्षिणाम् ॥ ११७ ॥
षोडशानां सहस्राणां, पर्षदां तिसृणामपि । सेनापतीनां सप्तानां, सैन्यानामपि तावताम् ॥ ११८ ॥
तथा सपरिवाराणां, महिषीणां चतसृणाम् । ज्योतिर्विमानकोटीनामीशाते पुण्यशालिनौ ॥ ११९ ॥
सभायामभ्यन्तरायामेतयोः सन्ति नाकिनाम् । अष्टौ सहस्राणि पल्योपमार्द्धस्थितिशालिनाम् ॥ १२० ॥
निर्ज्जराणां सहस्राणि, दश मध्यमपर्षदि । न्यूनपल्योपमार्द्धायुःशालिनां गुणमालिनाम् ॥ १२१ ॥
द्वादशाथ सहस्राणि, देवानां बाह्यपर्षदि । सातिरेकपल्यचतुर्विभागस्थितिधारिणाम् ॥ १२२ ॥
देवीनां शतमेकैकं, पर्षत्स्वस्ति तिसृष्वपि । तासां स्थितिः क्रमात्पल्योपमतुर्यलवोऽधिकः ॥ १२३ ॥
एष एव परिपूर्णो, देशन्यूनोऽयमेव च । इयं च जीवाभिगमातिदिष्टाऽऽसां स्थितिः किल ॥ १२४ ॥

जम्बूद्वीपप्रज्ञप्तिसूत्रसङ्ग्रहण्याद्यभिप्रायेण तु चन्द्रसूर्यविमानेषु जघन्यतोऽपि पल्योपमचतुर्थभाग एव स्थितिः किल उक्तेति ज्ञेयम् ॥

तुम्बा च त्रुटिता पर्वाभिधा एता भवन्त्यथ । सूर्येन्द्वोः सामानिकानां, स्त्रीणामपि सभा इमाः ॥ १२५ ॥
ननु पर्षत्त्रयं सर्वसुरेन्द्राणां निरूप्यते । विशेषस्तत्र क इवान्तर्मध्यबाह्यपर्षदाम् ! ॥ १२६ ॥
अत्र ब्रूमः—शीघ्रमभ्यन्तरा पर्षदाहूतोपैति नान्यथा । प्रभोराकारणारूपं, गौरवं सा यतोऽर्हति ॥ १२७ ॥
मध्यमा पर्षदाहूताऽनाहूताऽप्युपसर्पति । सा मध्यमप्रतिपत्तिविषया यदधीशितुः ॥ १२८ ॥
अनाहूतैव बाह्या तु, पर्षदायाति सत्वरम् । कदापि नायकाह्वानगौरवं सा हि नार्हति ॥ १२९ ॥
यद्वोत्पन्ने कार्यजाते, प्रागालोचयति प्रभुः । यया स्फीतधिया संसत्, साऽभ्यन्तरा सगौरवा ॥ १३० ॥
निर्णीतमेतदस्माभिः, कृते चास्मिन्नयं गुणः । एतच्च नैव कर्त्तव्यं, दोषोऽस्मिन् विहिते ह्ययम् ॥ १३१ ॥
इत्थमालोचितं पूर्वं, यया सह प्रपञ्चयेत् । गुणदोषोद्भावनात्सा, मध्यमा नातिगौरवा ॥ १३२ ॥
आलोचनागौरवात्तु, बाह्या बाह्या भवेत्सभा । कर्त्तव्यमेतद्युष्माभिरित्याज्ञामेव साऽर्हति ॥ १३३ ॥
च्युते चन्द्रेऽथवा भानौ, यावन्नोत्पद्यतेऽपरः । तावदिन्द्रविरहिते, काले तत्स्थानकस्थितिम् ॥ १३४ ॥
सामानिकाः समुदिताश्चत्वारः पञ्च चोत्तमाः । पालयन्ति राज्यमिव, शून्यं प्रधानपुरुषाः ॥ १३५ ॥
इन्द्रशून्यश्च कालः स्याज्जघन्यः समयावधिः । उत्कर्षतश्च षण्मासानित्युक्तं सर्वदर्शिभिः ॥ १३६ ॥

तथोक्तं जीवाभिगमसूत्रे जंबूद्वीपप्रज्ञप्तिसूत्रेऽपि – "तेसि णं भंते ! देवाणं इंदे चुए से

कहमियाणिं पकरेंति ?" इत्यादि ।

ज्योतिष्काः पञ्चधाऽप्येते, देवाश्चन्द्रार्यमादयः । विशिष्टवस्त्राभरणकिरणोज्ज्वलभूधनाः ॥ १३७ ॥
नानानूत्नरत्नशालिमौलिमण्डितमौलयः । सौन्दर्यलक्ष्मीकलिता, द्योतन्ते ललितद्युतः ॥ १३८ ॥
तत्र चन्द्रमसः सर्वे, प्रभामण्डलसन्निभम् । मुकुटाग्रे दधत्यङ्कं, सच्चन्द्रमण्डलाकृतिम् ॥ १३९ ॥
सूर्यास्तु चिह्नं दधति, मुकुटाग्रप्रतिष्ठितम् । विवस्वन्मण्डलाकारं, प्रभाया इव मण्डलम् ॥ १४० ॥
एवं स्वस्वमण्डलानुकारिचिह्नाढ्यमौलयः । शीतोग्रभानुवज्ज्ञेया, ग्रहनक्षत्रतारकाः ॥ १४१ ॥

तथा च तत्त्वार्थभाष्यम्—"मुकुटेषु शिरोमुकुटोपगूहिभिः प्रभामण्डलकल्पैरुज्ज्वलैः सूर्यचन्द्रग्रहनक्षत्रतारामण्डलैर्यथास्वं चिह्नैर्विराजमाना द्युतिमन्तो ज्योतिष्का भवन्ती" ति, अत्र शिरोमुकुटोपगूहिभिरिति मुकुटाग्रभागवर्तिभिरिति । [चतुर्थोऽध्याय सूत्र. १३]

ग्रन्थान्तरे पुनरुक्तमेते चन्द्रार्यमादयः । स्वनामाङ्कप्रकटितं, मुकुटं मूर्ध्नि बिभ्रति ॥ १४२ ॥

तथोक्तं जीवाभिगमवृत्तौ – "सर्वेऽपि प्रत्येकं नामाङ्केन प्रकटितं चिह्नं मुकुटे येषां ते तथा, किमुक्तं भवति ? – चन्द्रस्य मुकुटे चन्द्रमण्डलं लाञ्छनं स्वनामाङ्कप्रकटितं, सूर्यस्य सूर्यमण्डलं, ग्रहस्य ग्रहमण्डल" मित्यादि, प्रज्ञापनायामपि, 'पत्तेयनामंकपायडियचिंधमउडा' इति ।

उत्तप्तस्वर्णवर्णाङ्गा, सर्वे ज्योतिषिकामराः । पञ्चवर्णाः पुनरमी, तारकाः परिकीर्त्तिताः ॥ १४३ ॥
सर्वेभ्योऽल्पर्द्धयस्तारास्तेभ्यो नक्षत्रनिर्जराः । महर्द्धिका ग्रहास्तेभ्यो, भवन्ति प्रचुरर्द्धयः ॥ १४४ ॥
ग्रहेभ्योऽपि विवस्वन्तो, महर्द्धिकास्ततोऽपि च । ज्योतिश्चक्रस्य राजानो, राजानोऽधिकऋद्धयः ॥ १४५ ॥
चतस्रोऽग्रमहिष्यः स्युः, शीतांशोस्ताश्च नामतः । चन्द्रप्रभा च ज्योत्स्नाभाऽर्चिर्माली प्रभङ्करा ॥ १४६ ॥

साम्प्रतं तु—

एताः पूर्वभवेऽरक्षुपुर्यां वृद्धकुमारिकाः । चन्द्रप्रभादीस्वाख्यानुरूपाख्यापितृकाः स्मृताः ॥ १४७ ॥
चन्द्रश्रीप्रभृतिस्वाख्यातुल्याख्यमातृकाः क्रमात् । पुष्पचूलार्यिकाशिष्याः, श्रीपार्श्वात् प्राप्तसंयमाः ॥ १४८ ॥
किञ्चिद्विराध्य चारित्रमप्रतिक्रम्य पाक्षिकीम् । कृत्वा संलेखनां मृत्वा, विमाने चन्द्रनामनि ॥ १४९ ॥
चन्द्राग्रमहिषीत्वेनोत्पन्नाः सिंहासनेषु च । भान्ति स्वाख्यासमाख्येषु, भर्तृस्थित्यर्द्धजीविताः ॥ १५० ॥
सूर्याग्रहमहिषीणामप्येवं चरितमूह्यताम् । किन्तु ता मथुरापुर्यामभूवन् पूर्वजन्मनि ॥ १५१ ॥
एकैकस्याः पट्टदेव्याः, परिवारः पृथक् पृथक् । चत्वार्येव सहस्राणि, देवीनामुत्कटत्विषाम् ॥ १५२ ॥
एवमुक्तप्रकारेण, सपूर्वापरमीलने । स्युः पत्नीनां सहस्राणि, षोडशानुष्णरोचिषः ॥ १५३ ॥
तथैकैकाऽग्रमहिषी, प्रागुक्ता शीतरोचिषः । भर्तुस्तथाविधामिच्छामुपलभ्य रतक्षणे ॥ १५४ ॥
विलासहासललितान् , सलीलादभ्रविभ्रमान् । देवीसहस्रांश्चतुरः, स्वात्मतुल्यान् विकुर्व्वयेत् ॥ १५५ ॥

तथोक्तं जीवाभिगमसूत्रे – "पभू णं ताओ एगमेगा देवी अन्नाइं चत्तारि देवीसहस्साइं परिवारं विउव्वित्तए" इति ।

यत्तु जम्बूद्वीपप्रज्ञप्तिसूत्रे "पभू णं ताओ एगमेगा देवी अन्नं देविसहस्सं विउव्वित्तए ।" इति उक्तं तदिदं मतान्तरं[1] ज्ञेयम् ॥

तदेतच्चन्द्रदेवस्यान्तःपुरं परिकीर्त्तितम् । सिद्धान्तभाषया चैतत्तुटिकं परिभाषितम् ॥ १५६ ॥

उक्तञ्च जीवाभिगमचूर्णौ – "त्रुटिकमन्तःपुरमपदिश्यते" इति ।

ज्योतिष्केन्द्रस्य सूर्यस्याप्येवमन्तःपुरस्थितिः । तावान् देवीपरिवारो, विकुर्वणाऽपि तावती ॥ १५७ ॥
नाम्नाऽर्काग्रमहिष्यस्तु, प्रोक्तास्तीर्थकरैरिमाः । सूर्यप्रभा चातपाभाऽर्चिर्मालीप्रभङ्करा ॥ १५८ ॥
अनेनान्तःपुरपरिच्छदेनेन्दुदिवाकरौ । नित्यं परिवृत्तौ स्वस्वविमानान्तर्यथासुखम् ॥ १५९ ॥
सुधर्मायां संसदीन्दुसूर्यसिंहासने स्थितौ । हृद्यातोद्यनादमिश्रैर्गीतैः स्फीतैश्च नाटकैः ॥ १६० ॥
भुञ्जानौ दिव्यविषयोपभोगान् भाग्यभासुरौ । न जानीतो व्यतीतानि, संवत्सरशतान्यपि ॥ १६१ ॥
न शक्नुतः सुधर्म्मायां, परं कर्त्तुं रतिक्रियाम् । तत्रासन्नजिनसक्थ्याशातनाभयभीरुकौ ॥ १६२ ॥
सन्ति ह्यत्र माणवकचैत्यस्तम्भे स्वयम्भुवाम् । वाज्रिकेषु समुद्गेषु, सक्थीनि शिवमीयुषाम् ॥ १६३ ॥
तानि चेन्दोश्च भानोश्च, परेषामपि नाकिनाम् । वन्दनीयानि पूज्यानि, स्तुत्यानि जिनचैत्यवत् ॥ १६४ ॥
एवं ग्रहाणां नक्षत्रतारकाणामपि स्फुटम् । चतस्रोऽग्रमहिष्यः स्युः, तासां नामान्यमूनि च ॥ १६५ ॥
विजया वेजयन्ती च, जयन्ती चापराजिता । भवन्त्यमीषां सर्वेषामप्येतैरेव नामभिः ॥ १६६ ॥
अथ चन्द्रविमानेऽस्मिन्, जघन्या नाकिनां स्थितिः । पल्योपमस्य तुर्यांश, उत्कृष्टाऽथ निरूप्यते ॥ १६७ ॥
एकं पल्योपमं वर्षलक्षेणैकेन साधिकम् । जघन्याऽर्द्धं विमानेऽपि, स्थितिश्चन्द्रविमानवत् ॥ १६८ ॥
उत्कृष्टाब्दसहस्रेणाधिकं पल्योपमं भवेत् । यद्यपि स्थितिरर्केन्दोः, कनीयसी न सम्भवेत् ॥ १६९ ॥
तथाप्येषु विमानेषु, त्रिविधाः सन्ति नाकिनः । विमाननायकाश्चन्द्रादयस्तत्सदृशाः परे ॥ १७० ॥
परिवारसुराश्चान्ये, स्युरात्मरक्षकादयः । तत्राधीश्वरतत्तुल्यापेक्षया परमा स्थितिः ॥ १७१ ॥
जघन्यात्मरक्षकादिपरिच्छदव्यपेक्षया । एवं ग्रहविमानादिष्वपि भाव्यं स्थितिद्वयम् ॥ १७२ ॥
चान्द्रे विमाने देवीनां, स्थितिरुक्ता गरीयसी । पल्योपमार्द्धं पञ्चाशत्संवत्सरसहस्रयुक् ॥ १७३ ॥
स्थितिः सूर्यविमानेषु, देवीनां परमा भवेत् । अर्द्धं पल्योपमस्याब्दशतैः पञ्चभिरन्वितम् ॥ १७४ ॥
सूर्यचन्द्रविमानेषु, स्थितिरासां जघन्यतः । पल्योपमचतुर्थांशः, प्रज्ञप्तो ज्ञानिपुङ्गवैः ॥ १७५ ॥
ग्रहाणां च विमानेषु, देवानामल्पिका स्थितिः । पल्योपमस्य तुर्यांशो, गुर्वी पल्योपमं मतम् ॥ १७६ ॥

---

१. स्वतन्त्रतया चेद्विकुर्वणं स्वकार्यं तदा सहस्रं, प्रभोरिच्छां चानुसृत्य पूर्वोक्तमानमिति ।

स्थितिर्देवीनां तु पल्योपमतुर्यलवो लघुः । तेषूत्कृष्टा तु निर्दिष्टा, पल्यार्द्धं जगदीश्वरैः ॥ १७७ ॥
नक्षत्राणां विमानेषु, जघन्या नाकिनां स्थितिः । पल्योपमचतुर्थांशः, पल्योपमार्द्धमुत्तरा ॥ १७८ ॥
तेषु पल्यस्य तुर्यांशो, देवीनां स्थितिरल्पिका । उत्कृष्टा तु भवेत्तासां, स एव खलु साधिकः ॥ १७९ ॥
स्थितिस्ताराविमानेषु, देवानां स्याल्लघीयसी । पल्योपमस्याष्टमोऽंशस्तुर्योऽशस्तु गरीयसी ॥ १८० ॥
स्थितिर्देवीनां तु तेषु, लघ्वी दृष्टा जिनेश्वरैः । पल्यस्यैवाष्टमो भागो, गुर्वी स एव साधिकः ॥ १८१ ॥
एषु सूर्याश्चेन्दवश्च, सर्वस्तोका मिथः समाः । तेभ्यो भानि ग्रहास्तेभ्यस्ताराः सङ्ख्ययगुणाः क्रमात् ॥ १८२ ॥
एते चन्द्रादयः प्रायः, प्राणीनां प्रसवक्षणे । तत्तत्कार्योपक्रमे वा, वर्षमासाद्युपक्रमे ॥ १८३ ॥
अनुकूलाः सुखं कुर्युस्तत्तद्राशिमुपागताः । प्रतिकूलाः पुनः पीडां, प्रथयन्ति प्रथीयसीम् ॥ १८४ ॥
ननु दुःखसुखानि स्युः, कर्म्मायत्तानि देहिनाम् । ततः किमेभिश्चन्द्राद्यैरनुकूलैरुतेतरैः ? ॥ १८५ ॥
आनुकूल्यं प्रातिकूल्यमागता अप्यमी किमु । शुभाशुभानि कर्म्माणि, व्यतीत्य कर्तुमीशते ? ॥ १८६ ॥
ततो मुधाऽऽस्तामपरे, निर्ग्रन्था निःस्पृहा अपि । ज्योतिःशास्त्रानुसारेण, मुहूर्त्तक्षणतत्पराः ॥ १८७ ॥
प्रव्राजनादिकृत्येषु, प्रवर्त्तन्ते शुभाशयाः । स्वामी मेघकुमारादिदीक्षणे तत् किमैक्षत ? ॥ १८८ ॥
अत्रोच्यतेऽपरिचितश्रुतोपनिषदामयम् । अनाघ्रातगुरुपरम्पराणां वाक्यविप्लवः ॥ १८९ ॥
श्रूयतामत्र सिद्धान्तरहस्यामृतशीतलम् । अनुत्तरसुराराध्यपारम्पर्याग्रमुत्तरम् ॥ १९० ॥
विपाकहेतवः पञ्च, स्युः शुभाशुभकर्मणाम् । द्रव्यं क्षेत्रं च कालश्च, भावो भवश्च पञ्चमः ॥ १९१ ॥

तथोक्तम्–"उदयक्खयक्खओवसमोवसमा जं च कम्मुणो भणिया । दव्वं खेत्तं कालं,
भावं च भवं च संपप्प ॥" [विशेषावश्यक श्लो. ५७८]

यथा विपच्यते सातं, द्रव्यं स्रक्चन्दनादिकम् । गृहारामादिकं क्षेत्रमनुकूलगृहादिकम् ॥ १९२ ॥
वर्षावसन्तादिकं वा, कालं भावं सुखावहम् । वर्णगन्धादिकं प्राप्य, भवं देवनरादिकम् ॥ १९३ ॥
विपच्यतेऽसातमपि, द्रव्यं खड्गविषादिकम् । क्षेत्रं कारादिकं कालं, प्रतिकूलग्रहादिकम् ॥ १९४ ॥
भावमप्रशस्तवर्णगन्धस्पर्शरसादिकम् । भवं च तिर्यङ्नरकादिकं प्राप्येति दृश्यते ॥ १९५ ॥
शुभानां कर्म्मणां तत्र, द्रव्यक्षेत्रादयः शुभाः । विपाकहेतवः प्रायोऽशुभानां च ततोऽन्यथा ॥ १९६ ॥
ततो येषां यदा जन्मनक्षत्रादिविरोधभाक् । चारश्चन्द्रार्यमादीनां, ज्योतिःशास्त्रोदितो भवेत् ॥ १९७ ॥
प्रायस्तेषां तदा कर्म्माण्यशुभानि तथाविधाम् । लब्ध्वा विपाकसामग्रीं, विपच्यन्ते तथा तथा ॥ १९८ ॥
विपाकानि च तान्येवं, दुःखं दद्युर्महीस्पृशाम् । आधिव्याधिद्रव्यहानिकलहोत्पादनादिभिः ॥ १९९ ॥
यदा तु येषां जन्मर्क्षाद्यनुकूलो भवेदयम् । ग्रहचारस्तदा तेषां, शुभं कर्म्म विपच्यते ॥ २०० ॥
तथा विपक्वं तद्दत्तेऽङ्गिनां धनाङ्गनादिजम् । आरोग्यतुष्टिपुष्टीष्टसमागमादिजं सुखम् ॥ २०१ ॥

एवं कार्यादिलग्नेऽपि, तत्तद्भावगता ग्रहाः । सुखदुःखपरिपाके, प्राणिनां यान्ति हेतुताम् ॥ २०२ ॥

तथाऽऽह भगवान् जीवाभिगमः— "रयणियरदिणयराणां, नक्खत्ताणं महग्गहाणं च ।
चारविसेसेण भवे, सुहदुक्खविही मणुस्साणं ॥

अत एव महीयांसो, विवेकोज्ज्वलचेतसः । प्रयोजनं स्वल्पमपि, रचयन्ति शुभक्षणे ॥ २०३ ॥
ज्योतिःशास्त्रानुसारेण, कार्यं प्रव्राजनादिकम् । शुभे मुहूर्त्ते कुर्वन्ति, तत एवर्षयोऽपि हि ॥ २०४ ॥
गृहीतव्रतनिर्वाह प्रचयादि शुभेच्छवः । अन्यथांगी कृततत्तद्व्रतभङ्गादि सम्भवः ॥ २०५ ॥
इत्थमेवावर्त्तताऽऽज्ञा, स्वामिनामर्हतामपि । अधिकृत्य शुभं कृत्यं, पाठप्रव्राजनादिकम् ॥ २०६ ॥
सुक्षेत्रे शुभतिथ्यादौ, पूर्वोत्तरादिसम्मुखम् । प्रव्राजनव्रतारोपादिकं कार्यं विचक्षणैः ॥ २०७ ॥

तथोक्तं पञ्चवस्तुके— "एस जिणाणं आणा, खेत्ताईया उ कम्मुणो भणिआ । उदयाइकारणं
जं, तम्हा सव्वत्थ जइयव्वं ॥ [गाथा - ११४]

अर्हदाद्याः सातिशयज्ञाना ये तु महाशयाः । ते तु ज्ञानबलेनैव, ज्ञात्वा कार्यगतायतिम् ॥ २०८ ॥
अविघ्नां वा सविघ्नां वा, प्रवर्त्तन्ते यथा शुभम् । नापेक्षन्तेऽन्यजनवन्मुहूर्त्तादिनिरीक्षणम् ॥ २०९ ॥
तद्भद्विचिन्त्यापरेषां तु, तथा नौचित्यमञ्चति । मत्तेभस्पर्द्धयाऽवीनामिवाघातो महाद्रुषु ॥ २१० ॥
इदमर्थतो जीवाभिगमवृत्तौ ।
चरं ज्योतिश्चक्रमेवं, नरक्षेत्रावधि स्मृतम् । ततः परं चालोकान्तं, ज्योतिश्चक्रमवस्थितम् ॥ २११ ॥

यत्र सन्ति नियताः सुधांशवस्तत्र भूरचलचारुचन्द्रिका ।
यत्र तीव्ररुचयः सनातनास्तत्र चातपवितान-चित्रिता ॥ २१२ ॥ (स्थोद्धता)

विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालत्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे, सम्पूर्णः खलु पञ्चविंशतितमः सर्गो निसर्गोज्ज्वलः ॥ २१३ ॥

इति श्रीलोकप्रकाशे ज्योतिश्चक्रवर्णनो नाम पञ्चविंशतितमः सर्गः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

अथ उर्ध्वलोकनिरूपणामयः षड्विंशः सर्गः ।

जीयात् शङ्खेश्वरः स्वामी, गोस्वामीव नभोभुवि । गावो यस्योर्ध्वलोकेऽपि, चेरुः क्षुण्णतमोऽङ्कुराः ॥ १ ॥
वैमानिकसुरावासशोभासंभारभासुरम् । स्वरूपमूर्ध्वलोकस्य, यथाश्रुतमथ ब्रुवे ॥ २ ॥
योजनानां नवशत्या, रुचकोर्ध्वमतिक्रमे । तिर्यग्लोकान्तः स एव, चोर्ध्वलोकादिरिष्यते ॥ ३ ॥

ततो न्यूनसप्तरज्जुप्रमाणः कथितः स च । ईषत्प्राग्भारोर्ध्वभागे, सिद्धक्षेत्रावधिर्मतः ॥ ४ ॥
तथोर्ध्वं च रुचकाद्यरज्जोरन्ते प्रतिष्ठितौ । सौधर्मेशाननामानौ, देवलोकौ स्फुरद्रुची ॥ ५ ॥
समश्रेण्या स्थितावर्द्धचन्द्रसंस्थानसंस्थितौ । चिन्त्येते चेत्समुदितौ, तदा पूर्णेन्दुसंस्थितौ ॥ ६ ॥
मेरोर्दक्षिणतस्तत्र, सौधर्माख्यः सुरालयः । ईशानदेवलोकश्च, मेरोरुत्तरतो भवेत् ॥ ७ ॥
प्राक्प्रत्यगायतावेतावुदग्दक्षिणविस्तृतौ । योजनानां कोटिकोट्योऽसंख्येया विस्तृतायतौ ॥ ८ ॥
निकाय्यभूमिकाकाराः, प्रस्तटाः स्युस्त्रयोदश । प्रायः परस्परं तुल्यविमानाद्यन्तयोस्तयोः ॥ ९ ॥
प्रत्येकमनयोर्यद्यप्येते सन्ति त्रयोदश । तथापि ह्येकवलयस्थित्या यदनयोः स्थितिः ॥ १० ॥
तत्तयोः समुदितयोस्त्रयोदश विवक्षिताः । अन्येष्वप्येकवलयस्थितेष्वेवं विभाव्यताम् ॥ ११ ॥
त्रयोदशानामप्येषां, मध्य एकैकमिन्द्रकम् । विमानं मौक्तिकमिव, प्रतरस्वस्तिकोपरि ॥ १२ ॥
उडु चन्द्रं च रजतं, वज्रं वीर्यमथापरम् । वरुणं च तथाऽऽनन्दं, ब्रह्म काञ्चनसंज्ञकम् ॥ १३ ॥
रुचिरं चञ्चसंज्ञं चारुणं दिशाभिधानकम् । त्रयोदशेन्द्रका एते, सौधर्मेशाननाकयोः ॥ १४ ॥
सनत्कुमारमाहेन्द्रस्वर्गयोः समसंस्थयोः । द्वादश प्रस्तटाः षट् ते, ब्रह्मलोके च केवले ॥ १५ ॥
लान्तके प्रस्तटाः पञ्च, शुक्रे चत्वार एव ते । सहस्रारेऽपि चत्वारः, समश्रेणिस्थयोस्ततः ॥ १६ ॥
किलानतप्राणतयोरारणाच्युतयोरपि । चत्वारश्चत्वार एव, प्रस्तटाः परिकीर्त्तिताः ॥ १७ ॥
नव ग्रैवेयकाणां ते, पञ्चस्वनुत्तरेषु च । एको द्वाषष्टिरित्येवमूर्द्ध्वलोके भवन्त्यमी ॥ १८ ॥
सौधर्मेशानयोस्तत्र, प्रथमप्रस्तटस्थितात् । उडुनाम्नो विमानेन्द्राच्चतुर्दिशं विनिर्गताः ॥ १९ ॥
पङ्क्तिरेकैका विमानैर्द्वाषष्ट्या शोभिता ततः । द्वितीयादिप्रस्तटेषु, ताश्चतस्रोऽपि पङ्क्तयः ॥ २० ॥
एकैकेन विमानेन, हीना यावदनुत्तरम् । एवं विमानमेकैकं, दिक्षु तत्रावतिष्ठते ॥ २१ ॥
पाङ्क्तेयानां विमानानामाद्यप्रतरवर्त्तिनाम् । तिर्यग्लोकानुवादेन, स्थानमेवं स्मृतं श्रुते ॥ २२ ॥
देवद्वीपे तदेकैकं, नागद्वीपे द्वयं द्वयम् । ततश्चत्वारि चत्वारि, यक्षद्वीपे जिना जगुः ॥ २३ ॥
अष्टाष्टौ भूतपाथोधौ, तानि षोडश षोडश । स्वयंभूरमणद्वीपे, स्वयंभूवारिधौ ततः ॥ २४ ॥
एकत्रिंशदेकत्रिंशदग्रिमप्रतरेषु च । स्युर्विमानानि पाङ्क्तेयान्यधस्थैः पङ्क्तिगैः सह ॥ २५ ॥
स्थितान्यूर्ध्वसमश्रेण्या, चरमैकैकहानितः । द्वितीयप्रस्तटस्येति, स्वयंभूरमणाम्बुधौ ॥ २६ ॥
त्रिंशत्त्रिंशद्विमानानि, प्रतरेऽनुत्तरे त्वतः । भवेद्विमानमेकैकं, देवद्वीपे चतुर्दिशम् ॥ २७ ॥
एवं पङ्क्तिविमानानामन्तरं नियमान्मिथः । असंख्येयानीरितानि, योजनानि जिनेश्वरैः ॥ २८ ॥
पुष्पावकीर्णानां त्वेषां, संख्येययोजनात्मकम् । केषाञ्चित्केषाञ्चिदसंख्येयोजनसंमितम् ॥ २९ ॥
विमानमिन्द्रकं यत्तु, प्रतरेष्वखिलेष्वपि । मेरोरूर्ध्वसमश्रेण्या, तदुपर्युपरिस्थितम् ॥ ३० ॥

प्रतरेषु च सर्वेषु, स्युर्विमानाः किलेन्द्रकाः । वृत्तास्तेभ्योऽनन्तरं च, संस्थिता ये चतुर्दिशम् ॥ ३१ ॥
ते त्रिकोणाः प्रतिपङ्क्ति, त्रिकोणानन्तरं पुनः । चतुरस्रा विमानाः स्युस्तेभ्यः पुनरनन्तरम् ॥ ३२ ॥
वृत्ता विमानास्तेभ्योऽपि, पुनस्त्र्यस्रास्ततः पुनः । चतुरस्राः पुनर्वृत्ताः, पङ्क्तिरेवं समाप्यते ॥ ३३ ॥
वृत्तत्र्यस्रचतुरस्रा, अग्रिमप्रतरेष्वपि । ज्ञेयाः क्रमेणानेनैवानुत्तरप्रतरावधि ॥ ३४ ॥
यदुक्तं–"सव्वेसु पत्थडेसुं, मज्झे वट्टं अणंतरं तंसं । तयणंतरं चउरंसं, पुणोवि वट्टं तओ तंसं" ॥
अधस्तनप्रस्तटेषु, ये ये वृत्तादयः स्थिताः । तेषामूर्ध्वसमश्रेण्या, सर्वेषु प्रतरेष्वपि ॥ ३५ ॥
वृत्तास्त्र्यस्राश्चतुरस्रा, विमानाः संस्थिताः समे । तत एवानुत्तराख्ये, प्रस्तटे स्युश्चतुर्दिशम् ॥ ३६ ॥
विमानानि त्रिकोणानि, वृत्तान्मध्यस्थितेन्द्रकात् । त्रिकोणान्येव सर्वासु, यद्भवन्तीह पङ्क्तिषु ॥ ३७ ॥
यदाह—"वट्टं वट्टस्सुवरिं, तंसं तंसस्स उप्परिं होइ । चउरंसे चउरंसं उड्ढं च विमाणसेढीओ" ॥
[बृहत्संग्रहणी गा. ९७]

द्वाषष्टि रेकषष्टिश्च, षष्टि रेकोनषष्टकिः । तथाऽष्ट सप्त षट् पञ्च चतु स्रि द्वये ककाधिकाः ॥ ३८ ॥
पञ्चाशदथ पञ्चाश त्सौधर्मेशानयोः क्रमात् । प्रतरेषु विमानानां, पङ्क्तौ पङ्क्तौ मितिर्मता ॥ ३९ ॥
स्वस्वपङ्क्तिविमानानि, विभक्तानि त्रिभिस्त्रिभिः । त्र्यस्राणि चतुरस्राणि, वृत्तानि स्युर्यथाक्रमम् ॥ ४० ॥
त्रिभिर्विभागे शेषं चेदेकमुद्धरितं भवेत् । क्षेप्यं त्र्यस्रेऽथ शेषे द्वे, ते त्र्यस्रचतुरस्रयोः ॥ ४१ ॥
प्रतिपङ्क्त्यत्र वक्ष्यन्ते, वृत्तत्रिचतुरस्रकाः । चतुर्गुणास्ते प्रतरे, प्रतरे सर्वसंख्यया ॥ ४२ ॥
त्र्यस्राणि चतुरस्राणि, प्रतिपङ्क्त्येकविंशतिः । प्रथमप्रस्तटे वृत्तविमानानि च विंशतिः ॥ ४३ ॥
प्रथमप्रतरे पङ्क्तिविमानाः सर्वसंख्यया । अष्टाचत्वारिंशतैवमधिकं शतयोर्द्वयम् ॥ ४४ ॥
द्वितीयप्रतरे पङ्क्तौ, पङ्क्तौ त्र्यस्रा विमानकाः । एकविंशतिरन्ये च, विंशतिर्विंशतिः पृथक् ॥ ४५ ॥
चतुश्चत्वारिंशमेवं, विमानानां शतद्वयम् । द्वितीयप्रतरे पङ्क्तिगतानां सर्वसंख्यया ॥ ४६ ॥
तार्तीयीके प्रस्तटे तु, चतसृष्वपि पङ्क्तिषु । वृत्तत्र्यस्रचतुरस्रा, विमाना विंशतिः पृथक् ॥ ४७ ॥
चत्वारिंशत्समधिके, द्वे शते सर्वसंख्यया । प्रतरे ऽथ तुरीयेऽपि, निखिलास्वपि पङ्क्तिषु ॥ ४८ ॥
एकोनविंशतिर्वृत्तास्त्र्यस्राश्च चतुरस्रकाः । विंशतिर्विंशतिः सर्वे, ते षट्त्रिंशं शतद्वयम् ॥ ४९ ॥
पञ्चमे च प्रतिपङ्क्ति, त्रिकोणाः किल विंशतिः । चतुरस्राश्च वृत्ताश्च, पृथगेकोनविंशतिः ॥ ५० ॥
शतद्वयं च द्वात्रिंशमस्मिंस्ते सर्वसंख्यया । षष्ठे च प्रतिपङ्क्तयेते, त्रयेऽप्येकोनविंशतिः ॥ ५१ ॥
अष्टाविंशे द्वे शते चास्मिन्नमी सर्वसंख्यया । पङ्क्तौ पङ्क्तौ सप्तमे तु, वृत्ता अष्टादश स्मृताः ॥ ५२ ॥
एकोनविंशतिस्त्र्यस्राश्चतुरस्राश्च तत्र च । सर्वाग्रेण विमानानां, चतुर्विंशं शतद्वयम् ॥ ५३ ॥
प्रतिपङ्क्त्यष्टमे त्र्यस्राः, प्रोक्ता एकोनविंशतिः । वृत्ताश्च चतुरस्राश्चाष्टादशाष्टादश स्फुटम् ॥ ५४ ॥
विंशं शतद्वयं सर्वसंख्ययाऽत्र भवन्ति ते । नवमे प्रतिपङ्क्त्येते, त्रिधाप्यष्टादशोदिताः ॥ ५५ ॥

अस्मिन् सर्वसंख्यया तु, द्वे शते षोडशाधिके । दशमे प्रतिपङ्क्त्यष्टादश त्रिचतुरस्रकाः ॥ ५६ ॥
वृत्ताः सप्तदशेत्येवं, विमानाः पङ्क्तिवर्त्तिनः । द्विशती द्वादशोपेता, सर्वाग्रेण भवन्त्यमी ॥ ५७ ॥
एकादशेऽथ प्रतरे, त्र्यस्रा अष्टादशोदिताः । चतुरस्राः सप्तदश, वृत्तास्तावन्त एव च ॥ ५८ ॥
द्विशत्यष्टाधिका सर्वसंख्यया द्वादशेऽथ च । षडन्तौ षड्न्तौ सप्तदशप्रमितस्त्रिविधा अपि ॥ ५९ ॥
द्विशती चतुरधिका, स्युस्तत्र सर्वसंख्यया । त्रयोदशे प्रस्तटेऽथ, वृत्ता भवन्ति षोडश ॥ ६० ॥
त्रिचतुष्कोणकाः सप्तदश सर्वे शतद्वयम् । सौधर्मेशानयोरेवं, स्वर्गयोः सर्वसंख्यया ॥ ६१ ॥
द्विपञ्चाशदधिकानि, शतानि नव वृत्तकाः । त्रिकोणानां नव शतान्यष्टाशीत्यधिकानि च ॥ ६२ ॥
चतुष्कोणा द्विसप्तत्याऽधिका नवशतीति च । सह संकलिता एते, त्रयोदशभिरिन्द्रकैः ॥ ६३ ॥
सर्वसंख्या पङ्क्तिगतविमानानां भवेदिह । द्वौ सहस्रौ नवशताधिकौ सपञ्चविंशती ॥ ६४ ॥
चतसृणां च पूर्वोक्तपङ्क्तीनामन्तरेष्विह । सर्वेष्वपि प्रस्तटेषु, प्राचीमेकां दिशं विना ॥ ६५ ॥
पुष्पावकीर्णकाः सन्ति, विमाना विलसद्रुचः । सौधर्मेशानयुगले, भवन्ति सर्वसंख्यया ॥ ६६ ॥
एकोनषष्टिर्लक्षाणि, ते सप्तनवतिस्तथा । सहस्राणि तदुपरि, केवला पञ्चसप्ततिः ॥ ६७ ॥
निर्व्यवस्थाः स्थिता एते, विकीर्णपुष्पपुञ्जवत् । इतस्ततस्ततः पुष्पावकीर्णा इति विश्रुताः ॥ ६८ ॥
प्रतिप्रतरमेतेषां, पङ्क्तिप्राप्तविमानवत् । संख्या पुष्पावकीर्णानां, न पृथक् क्वापि लभ्यते ॥ ६९ ॥
पङ्क्तिपुष्पावकीर्णाश्च, सर्वे संकलिताः पुनः । सौधर्मेशानयोः षष्टिर्लक्षाणि स्युर्विमानकाः ॥ ७० ॥
द्वात्रिंशत्तत्र लक्षाणि, सौधर्मस्य भवन्त्यमी । लक्षाण्यष्टाविंशतिश्च, स्युरीशानत्रिविष्टपे ॥ ७१ ॥
अथैतयोर्वासवयोः, संबन्धीनि पृथक् पृथक् । पाङ्क्तेयानि विमानानि, प्रोक्तान्येवं पुरातनैः ॥ ७२ ॥

तथाहुस्तपागच्छपतयः श्री रत्नशेखरसूरयः श्राद्धविधिवृत्तौ—"दक्षिणस्यां विमाना ये, सौधर्मशस्य तेऽखिलाः । उत्तरस्यां तु ते सर्वेऽपीशानेन्द्रस्य सत्तया ॥ पूर्वस्यामपरस्यां च, वृत्ताः सर्वे विमानकाः । त्रयोदशापीन्द्रकाश्च, स्युः सौधर्मसुरेशितुः ॥ पूर्वापरदिशोस्त्र्यस्राश्चतुरस्राश्च ते पुनः । सौधर्माधिपतेर्द्धा, अर्द्धा ईशानचक्रिणः" ॥ [प्रका-१. श्लो. ८ टीकायां कथानके श्लो. ७१८, ७१९, ७२०]

संग्रहणीवृत्तावपि— "जे दाहिणेण इंदा, दाहिणओ आवली भवे तेसिं । जे पुण उत्तर इंदा, उत्तरओ आवली तेसिं ॥ पुव्वेण पच्छिमेण य, सामन्ना आवली भवे तेसिं । जे पुण वट्टविमाणा, मज्झिल्ला दाहिणिल्लाणं ॥ पुव्वेण पच्छिमेण य, जे वट्टा तेऽवि दाहिणिल्लाणं । तंसचउरंसगा पुण, सामन्ना हुंति दुण्हंपि ॥ [गाथा - १०३, १०४, १०५]

प्रत्येकं त्वथ सौधर्मेशानयोर्देवलोकयोः । वृत्तादीनां पङ्क्तिगानां, संख्यैवं गदिता श्रुते ॥ ७३ ॥
सप्तविंशा सप्तशती, वृत्तानां प्रथमे भवेत् । त्रिकोणानामथ चतुर्नवत्याढ्या चतुःशती ॥ ७४ ॥
चतुष्कोणानां च चतुःशत्येव षडशीतियुक् । शतान्येवं सप्तदश, सप्तोत्तराणि पङ्क्तिगाः ॥ ७५ ॥

लक्षाण्येकत्रिंदशदष्टानवतिश्च सहस्रकाः । द्वै शते त्रिनवत्याढ्ये, इह पुष्पावकीर्णकाः ॥ ७६ ॥
एषां योगे तु पूर्वोक्ता, लक्षा द्वात्रिंशदेव ते । ईशानेऽप्यथ वृत्तानामष्टत्रिंशं शतद्वयम् ॥ ७७ ॥
त्रिचतुष्कोणसंख्या तु, सौधर्मवद्भवेदिह । अष्टादशोत्तराण्येवं, शतानि द्वादशाखिलाः ॥ ७८ ॥
पुष्पावकीर्णकानां तु, लक्षाणां सप्तविंशतिः । सहस्राण्यष्टनवतिर्द्व्यशीतिः सप्तशत्यपि ॥ ७९ ॥
लक्षाण्यष्टाविंशतिर्या, सर्वसंख्या पुरोदिता । एषां योगेन सा प्राज्ञैर्भावनीया बहुश्रुतैः ॥ ८० ॥

तत्रापि—

सौधर्मेन्द्राविमानेभ्य, ईशानस्य सुरेशितुः । विमाना उच्छ्रिताः किञ्चित्प्रमाणतो गुणैरपि ॥ ८१ ॥
यत्तु पञ्चशतोच्चत्वं, प्रासादानां द्वयोरपि । स्थूलन्यायात्तदुदितं, ततस्तत्र विरुध्यते ॥ ८२ ॥
वस्तुतः सौधर्मगतप्रासादेभ्यः समुन्नताः । ईशानदेवलोकस्य, प्रासादाः सुंदरा अपि ॥ ८३ ॥
यथा करतले कश्चिन्निम्नः कश्चित्तथोन्नतः । देशस्तथा विमानानामेनयोर्निम्नतोन्नती ॥ ८४ ॥

तथाऽऽहुः—"सक्कस्स णं भंते ! देविंदस्स देवरण्णो विमाणेहिंतो ईसाणस्स देविंदस्स देवरण्णो विमाणा ईसिं उच्चयरा ईसिं उन्नययरा" इत्यादि भगवतीशतक ३ । १ उ० वृ० ।

इदमेव मनसि विचिंत्य तत्त्वार्थभाष्यकारैरुक्तं—"सौधर्मस्य कल्पस्योपरि ऐशानः कल्पः, ऐशास्योपरि सनत्कुमारः, सनत्कुमारस्योपरि माहेन्द्र इत्येवमासर्वार्थसिद्धा" दिति । [अध्या. ४ सूत्र. २०]

वृत्ताः स्युर्वलयाकारास्त्र्यस्राः शृङ्गाटकोपमाः । भवन्त्यक्षाटकाकाराश्चतुरस्रा विमानकाः ॥ ८५ ॥
ये तु पुष्पावकीर्णाख्या, विमानका भवन्ति ते । नन्द्यावर्त्तानुकृतयः, केचिदन्येऽसिसंस्थिताः ॥ ८६ ॥
अपरे स्वस्तिकाकाराः, श्रीवत्साकृतयः परे । पद्माकाराः केचिदेवं, नानाकाराः स्थिता इति ॥ ८७ ॥
प्राकारेण परिक्षिप्ता, वृत्ताः पङ्क्तिविमानकाः । द्वारेणैकेन महता, मण्डिताः पिण्डितश्रिया ॥ ८८ ॥
त्र्यस्राणां तु विमानानां, यस्यां वृत्तविमानकाः । तस्यां दिशि वेदिका स्यात्प्राकारः शेषदिक्षु च ॥ ८९ ॥
मुण्डप्राकाररूपैव, वेदिका तु भवेदिह । द्वाराणि च त्रिकोणेषु, त्रीण्येवेति जिनैर्मतम् ॥ ९० ॥
चतुर्दिशं वेदिकाभिश्चतुरस्रास्तु चारवः । स्फारैर्द्वारैश्चतुर्भिश्च, चतुर्द्दिशमलङ्कृताः ॥ ९१ ॥
स्वरूपं किञ्चन ब्रूमः, सौधर्मेशाननाकयोः । विमानानामथो जीवाभिगमादिश्रुतोदितम् ॥ ९२ ॥
विमानानामत्र पृथ्वी, घनोदधिप्रतिष्ठिता । स्त्यानीभूतोदकरूपः, ख्यात एव घनोदधिः ॥ ९३ ॥
जगत्स्वभावादेवासौ, स्पन्दते न हि कर्हिचित् । विमान अपि तत्रस्था, न जीर्यन्ति कदाचन ॥ ९४ ॥
घनोदधिः स चाकाश, एवाधारविवर्जितः । निरालम्बः स्थितश्चित्रं, स्वभावाज्ज्योतिषादिवत् ॥ ९५ ॥
महानगरकल्पानि, विमानानि भवन्त्यथ । प्राकाराश्च तदुपरि, वनखण्डपरिष्कृताः ॥ ९६ ॥
प्राकारास्ते योजनानां, समुत्तुङ्गाः शतत्रयम् । शतं तदर्द्धं तत्पादं, मूलमध्योर्ध्वविस्तृताः ॥ ९७ ॥

चतुर्द्वारसहस्राढ्या, द्वारमेकैकमुच्छ्रितम् । योजनानां पञ्चशती, सार्द्धे द्वे च शते ततम् ॥ ९८ ॥
चक्र मृग गरुडर्क्षच्छत्र लसत्पिच्छ शकुनि सिंह वृषाः । अपि च त चतुर्हस्तगजाः आलेख्यैरभिरतिरम्याः ॥ ९९ ॥
प्रत्येकं शतमष्टाधिकमेते केतवो विराजन्ते । साशीतिसहस्रं ते, सर्वेऽप्यत्र प्रतिद्वारम् ॥ १०० ॥
शेषं द्वारवर्णनं च, श्रीसूर्याभविमानवत् । राजप्रश्नीयतो ज्ञेयं, नात्रोक्तं विस्तृतेर्भयात् ॥ १०१ ॥
विस्तृतानि योजनार्द्धमायतान्येकयोजनम् । प्राकारकपिशीर्षाणि, नानामणिमयानि च ॥ १०२ ॥
प्रासादास्तेषु देवानां, सन्ति रत्नविनिर्मिताः । तत्रैतयोस्ताविषयोर्विमानानां वसुन्धरा ॥ १०३ ॥
योजनानां शताः सप्तविंशतिः पिण्डतो भवेत् । प्रासादाश्च तदुपरि, प्रोक्ताः पञ्चशतोन्नताः ॥ १०४ ॥
इदमुच्चत्वमानं तु, मूलप्रासादगोचरम् । प्रासादपरिपाट्यस्तु, तदर्द्धार्द्धमिता मताः ॥ १०५ ॥
एवं च पृथ्वीपिण्डेन, सह द्वात्रिंशदेव हि । शतानि तुङ्गत्वमिह, प्रासादशिखरावधि ॥ १०६ ॥
एवं सर्वत्र भूपीठप्रासादौन्नत्ययोजनात् । द्वात्रिंशद्योजनशता, विमानोच्चत्वमूह्यताम् ॥ १०७ ॥
भूपीठस्य च बाहल्यं, प्रासादानां च तुङ्गता । पृथक् पृथक् यथास्थानं, सर्वस्वर्गेषु वक्ष्यते ॥ १०८ ॥
विष्कम्भायामतस्त्वत्र, विमानाः कथिता द्विधा । संख्येयैर्योजनैः केचिदसंख्येयैर्मिताः परे ॥ १०९ ॥
व्यासायामपरिक्षेपाः, संख्येयैर्योजनैर्मिताः । आद्यानामपरेषां तेऽसंख्येयैर्योजनैर्मिताः ॥ ११० ॥
स्वर्गयोरेनयोस्तत्र, प्रथमप्रतरेऽस्ति यत् । उडुनामैन्द्रकं व्यासायामतस्तत्प्रकीर्त्तितम् ॥ १११ ॥
योजनानां पञ्चचत्वारिंशल्लक्षाणि सर्वतः । परिधिस्त्वस्य मनुजक्षेत्रस्येव विभाव्यतां ॥ ११२ ॥
एवं च—सिद्धक्षेत्रमुडुनामैन्द्रकं नृक्षेत्रमेव च । सीमन्तो नरकावासश्चत्वारः सदृशा इमे ॥ ११३ ॥
व्यासायामपरिक्षेपैरुपर्युपरि संस्थिताः । दृष्टाः केवलिभिर्ज्ञानदृष्टिदृष्टत्रिविष्टपैः ॥ ११४ ॥
अन्येषां तु विमानानां, केषाञ्चिन्नाकयोरिह । व्यासायामपरिक्षेपमानमेवं निरूपितम् ॥ ११५ ॥
जम्बूद्वीपं प्रोक्तरूपं, यया गत्यैकविंशतिम् । वारान् प्रदक्षिणीकुर्यात्सुरश्चप्युटिकात्रयात् ॥ ११६ ॥
षण्मासान् यावदुत्कर्षात्, तया गत्या प्रसर्पति । कानिचित्स विमानानि, व्यतिव्रजति वा न वा ॥ ११७ ॥
अथापरप्रकारेण, विमानमानमुच्यते । सौधर्मादिषु नाकेषु, यथोक्तं पूर्वसूरिभिः ॥ ११८ ॥
कर्क संक्रान्तिघस्रे यदुदयास्तान्तरं रवेः । योजनानां सहस्राणि, चतुर्नवतिरीरितम् ॥ ११९ ॥
षड्विंशाश्च पञ्चशताः, एकस्य योजनस्य च । षष्टिभागा द्विचत्वारिंशदस्मिंस्त्रिगुणीकृते ॥ १२० ॥
लक्षद्वयं योजनानां, त्र्यशीतिश्च सहस्रकाः । साशीतयः शताः पञ्च, षष्ट्यंशाः षट् सुरक्रमः ॥ १२१ ॥
सूर्योदयास्तान्तरेऽथ, प्रागुक्ते पञ्चभिर्हते । पूर्वोदितात्क्रमात्प्रौढः, क्रमो दिव्यो भवेत्परः ॥ १२२ ॥
स चायं–
चतुर्लक्षी योजनानां, द्विसप्ततिः सहस्रकाः । षट्शती च त्रयस्त्रिंशा, षष्ट्यंशास्त्रिंशदेव च ॥ १२३ ॥

उदयास्तान्तरे भानोः, सप्तभिर्गुणिते भवेत् । दिव्यः क्रमस्तृतीयोऽयं, प्रौढः पूर्वोदितद्वयात् ॥ १२४ ॥
षट् लक्षाण्येकषष्टिश्च, सहस्राणि शतानि षट् । षडशीतिर्योजनानां, चतुःपञ्चाशदंशकाः ॥ १२५ ॥
अर्कोदयास्तान्तरेऽथ, नवभिर्गुणिते सति । एष दिव्यः क्रमस्तुर्यः, स्यान्महान् प्राक्तनत्रयात् ॥ १२६ ॥
अर्ध्यार्द्धान्यष्ट लक्षाणि, योजनानां शतानि च । सप्तैव चत्वारिंशानि, कलाश्चाष्टादशोपरि ॥ १२७ ॥
चण्डा चपला जवना, वेगा चेति यथोत्तरम् । चतस्रो दिव्यगतयः, शीघ्रशीघ्रतराः स्मृताः ॥ १२८ ॥
केचिद्वेगाभिधानां तु, तुरीयां मन्वते गतिम् । नाम्ना जवनतरिकामभिन्नां च स्वरूपतः ॥ १२९ ॥
कस्याप्यथ विमानस्य, पारं प्राप्तुमुपस्थिताः । शास्त्रस्येव प्राप्तरूपाश्चत्वारो युगपत्सुराः ॥ १३० ॥
एकस्तस्य विमानस्य, मिनोति तत्र विस्तृतिम् । आद्यक्रमेणाद्यगत्या, षण्मासान् यावदश्रमम् ॥ १३१ ॥
द्वितीयः पुनरायामं, तस्य मातुमुपस्थितः । क्रमैर्द्वितीयजातीयैर्गत्याऽपि चपलाख्यया ॥ १३२ ॥
तृतीयो मध्यपरिधिं, मिमीते मतिमान् सुरः । क्रमैस्तृतीयजातीयैर्गच्छन् गत्या तृतीयया ॥ १३३ ॥
तुर्यस्तु बाह्यपरिधिं, मिमीषुरन्तिमैः क्रमैः । विमानमभितो बंभ्रमीति गत्या तुरीयया ॥ १३४ ॥
मिन्वन्त एवं षण्मासान्, येषां पारं न ते गताः । सौधर्मादिषु सन्त्येवंविधाः केचिद्विमानकाः ॥ १३५ ॥
अथ प्रकारान्तरेण, परिमाणं निरूप्यते । सौधर्मादिविमानानामनुत्तराश्रयावधि ॥ १३६ ॥
क्रमैः प्रथमजातीयैराद्यस्वर्गचतुष्टये । विष्कंभं चण्डया गत्याऽऽयामं चपलया पुनः ॥ १३७ ॥
जवनयाऽन्तः परिधिं, बाह्यं गत्या च वेगया । मिनुयान्निर्जरः कश्चिद्विमानमतिकौतुकी ॥ १३८ ॥
अच्युतान्तेषु चाष्टासु, व्यासादीन्मिनुयात्क्रमात् । क्रमैर्द्वितीयजातीयैराद्यादिगतिभिर्युतैः ॥ १३९ ॥
ग्रैवेयकेषु नवसु, विष्कम्भादीन्मिनोति सः । क्रमैस्तृतीयजातीयैश्चतुर्गतियुतैः क्रमात् ॥ १४० ॥
विजयादिविमानेषु, चतुर्ष्वपि मिनोत्यसौ । विष्कम्भादिक्रमैस्तुर्यैश्चतुर्गतिसमन्वितैः ॥ १४१ ॥
विमानमेकमप्येष, मासै षड्भिरपि स्फुटम् । पूर्णं न गाहते सन्ति, विमानानीदृशान्यपि ॥ १४२ ॥
जीवाभिगमसूत्रे तु, भेदांश्चण्डादिकान् गतेः । व्यासादिचाविवक्षित्वा, विमानमानमीरितम् ॥ १४३ ॥
तथाहि—स्वस्तिकं स्वस्तिकावर्तं, स्वस्तिकप्रभमित्यपि । तुर्यं स्वस्तिककान्ताख्यं, परं स्वस्तिकवर्णकम् ॥ १४४ ॥
षष्ठं स्वस्तिकलेश्याख्यं, सप्तमं स्वस्तिकध्वजम् । अष्टमं स्वस्तिकसितं, स्वस्तिककूटमित्यथ ॥ १४५ ॥
ततः स्वस्तिकशिष्टाख्यं, विमानं दशमं भवेत् । एकादशं स्वस्तिकोत्तरावतंसकमीरितम् ॥ १४६ ॥
षड्भिर्मासैः क्रमैराद्यैर्मिन्वानो नावगाहते । एषां मध्ये विमानानां, किञ्चित्किञ्चित्तु गाहते ॥ १४७ ॥
अर्चि स्तथार्चिरावर्त्त मर्चिःप्रभ मथापरम् । अर्चिःकान्त मर्चिर्वर्ण मर्चिर्लेश्यं तथापरम् ॥ १४८ ॥
अर्चिर्ध्वज मर्चिःसित मर्चिःकूटं ततः परम् । अर्चिःशिष्ट मर्चिरुत्तरावतंसकमन्तिमम् ॥ १४९ ॥
किञ्चिद्विमानेष्वेतेषु, मिन्वन्नेवावगाहते । क्रमैर्द्वितीयैः षण्मास्या, किञ्चित्पुनर्विगाहते ॥ १५० ॥

कामं कामावर्त्तमेव, कामप्रभमथापरम् । कामकान्तं कामवर्णं, कामलेश्यं ततः परम् ॥ १५१ ॥
कामध्वजं कामसितं, कामकूटं भवेत्परम् । कामशिष्टं तथा कामोत्तरावतंसकाभिधम् ॥ १५२ ॥
किञ्चिदेषां विमानानां, मध्ये मिन्वन् विगाहते । क्रमैस्तृतीयैः षण्मास्या, किञ्चित्तु नावगाहते ॥ १५३ ॥
विजयं वैजयन्तं च, जयन्तमपराजितम् । विमानं किञ्चिदप्येषु, मिन्वन्नैवावगाहते ॥ १५४ ॥
षड्भिर्मासैः क्रमैस्तुर्यैः, सचातुर्यः स निर्जरः । मानमेवं विमानानामुक्तं वैमानिकार्चितैः ॥ १५५ ॥

तथा च तद्ग्रंथः—"अत्थि णं भंते ! विमाणाइं सोत्थियाइं जाव सोत्थोत्तरवडिंसयाइं ?, हंता अत्थि, ते णं भंते ! विमाणा के महालया प० ?, गो० ! जावइयं च णं सूरिए उदेइ जावइअं च णं सूरिए अत्थमेइ एवइयाइं तिन्नि ओवासंतराइं अत्थेगइयस्स देवस्स एगे विक्कमे सिया, से णं देवे ताए उक्किट्ठाए तुरियाए जाव दिव्वाए देवगतीए विईवयमाणे २ जाव एगाहं वा दुयाहं वा उक्कोसेणं छम्मासे वीईवएज्जा, अत्थेगइयं विमाणं विईवइज्जा, अत्थेगइयं विमाणं नो विईवइज्जा," इत्यादि," ।

कस्मिन्नमी देवलोके, विमानाः स्वस्तिकादयः[१] । विजयादीन् विना सम्यगेतन्न ज्ञायतेऽधुना ॥ १५६ ॥
ननु चण्डादिगतिभिः, षण्मास्या तादृशैः क्रमैः । न केषाञ्चिद्विमानानां, पारं यान्ति सुरा यदि ॥ १५७ ॥
तद् द्रुतं जिनजन्मादिकल्याणकोत्सवार्थिनः । तस्मिन्नेव क्षणे तत्तत्स्थानमायान्त्यमी कथम् ? ॥ १५८ ॥
अत्रोच्यते—गतिक्रमाविमावुक्तौ, पल्योपमादिपल्यवत् । विमानमानज्ञानाय, कल्पितौ न तु वास्तवौ[२] ॥ १५९ ॥
वास्तवी तु गतिर्दिव्या, दिव्यः क्रमश्च वास्तवः । अत्यन्तसत्वरतरौ, तथा भवस्वभावतः ॥ १६० ॥
ततश्च जिनजन्माविप्रमोदप्रचयोत्सुकाः । सुरा अचिन्त्यसामर्थ्यादत्यन्तं शीघ्रगामिनः ॥ १६१ ॥
अच्युतादिककल्पेभ्योऽभ्युपेत्य प्रौढभक्तयः । स्वं स्वं कृतार्थयंत्यर्हत्कल्याणकोत्सवादिभिः ॥ १६२ ॥
इदृशानि विमानानि, महान्त्याद्यद्वितीययोः । स्वर्गयोः पञ्चवर्णानि, विराजन्ते प्रभाभरैः ॥ १६३ ॥
जात्याञ्जनमयानीव, स्युर्मेचकानि कानिचित् । इन्द्रनीलरत्नमयानीव नीलानि कानिचित् ॥ १६४ ॥
पद्मरागमयानीव, रक्तवर्णानि कान्यपि । स्वर्णपीतरत्नमयानीव पीतानि कानिचित् ॥ १६५ ॥
कानिचिच्छुक्लवर्णानि, क्लृप्तानि स्फटिकैरिव । सर्वाणि नित्योद्योतानि, भासुराणि प्रभाभरैः ॥ १६६ ॥
यथा निरभ्रनभसि, मध्याह्नेऽनावृतस्थले । इह प्रकाशः स्यात्तेषु, ततः स्फुटतरः सदा ॥ १६७ ॥
तमःकणेन न कदाप्येषु स्थातुं प्रभूयते । संशयेनेव चेतस्सु[३], केवलज्ञानशालिनाम् ॥ १६८ ॥
अहोरात्रव्यवस्थापि, न भवेत्तेषु कर्हिचित् । दुरवस्थेव गेहेषु, जाग्रत्पुण्यौघशालिनाम् ॥ १६९ ॥

---

१ केषाञ्चित् समवायाङ्गोक्तस्थित्यनुसारेण स्यात् निर्णयः परं न यथावदित्येवमुल्लेखः ।

२ गत्यनुमानेन किंपानमानज्ञापनायैतत्, वास्तव्यदेवगतेस्तु मानस्य विमानमानवत् ज्ञेयतैव, न तु निश्चितता ।

३. चेतो ज्ञानमत्र, तेन केवलिनां नोसंज्ञिनोऽसंज्ञित्वेऽपि न विरोधः ।

व्यवहारस्त्वहोरात्रादिकोऽत्रत्यव्यपेक्षया । तत एव च तत्रत्या, गतं कालं विदन्ति न[1] ॥ १७० ॥
चन्दनागुरुचन्द्रैणमदकश्मीरजन्मनाम् । यूथिकाचम्पकादीनां, पुष्पाणां च समन्ततः ॥ १७१ ॥
यथा विकीर्यमाणानां, सौरभ्यमिव जृम्भते । घ्राणाघ्राणकरं पीयमानमुत्फुल्लनासिकैः ॥ १७२ ॥
ततोऽपीष्टतरस्तेषां, विमानानां स्वभावतः । स्वाभाविकः परिमलः, पुष्णाति परमां मुदम् ॥ १७३ ॥
रुतबूरनवनीतशिरीषकुसुमादितः । तेषामतिमृदुः स्पर्शः, स्वाभाविकः सनातनः ॥ १७४ ॥
चतुर्दिशं विमानेभ्यस्तेभ्यः पञ्चशतोत्तराः । चत्वारो वनखण्डाः स्युर्नानावृक्षालिमण्डिताः ॥ १७५ ॥
प्राच्यामशोकविपिनं, याम्यां सप्तच्छदाभिधम् । प्रतीच्यां चम्पकवनमुदगाम्रवणं तथा ॥ १७६ ॥
प्रत्येकं वनखण्डास्ते, प्राकारेण विभूषिताः । पञ्चवर्णमणितृणवरेण्यसमभूमयः ॥ १७७ ॥
सरस्यो वापिकाश्चैषु, पुष्करिण्यश्च दीर्घिकाः । रूप्यकूलास्तपनीयतलाः सौवर्णवालुकाः ॥ १७८ ॥
जात्यासवघृतक्षीरक्षोदस्वादूदकाञ्चिताः । क्रीडदप्सरसां वक्त्रैः, पुनरुक्तीकृताम्बुजाः ॥ १७९ ॥
चतुर्दिशं त्रिसोपानप्रतिरूपकराजिताः । विभान्ति तोरणैश्छत्रातिच्छत्रैश्च ध्वजैरपि ॥ १८० ॥
तासु तासु पुष्करिण्यादिषु भान्ति पदे पदे । क्रीडार्हा मण्डपाः शैला, विविधान्दोलका अपि ॥ १८१ ॥
वैमानिका यत्र देवा, देव्यश्च सुखमासते । प्रायः[2] सदा भवधारणीयाङ्गेनारमन्ति च ॥ १८२ ॥
तत्र क्रीडामण्डपादौ, हंसासनादिकान्यथ । आसनानि भान्ति तेषां, भेदा द्वादश ते त्वमी ॥ १८३ ॥
हंसे कोंचे गरुडे, ओणय पणए य दीह भद्दे य । पक्खी मयरे पउमे सीह दिसासोत्थि बारसमे ॥
वनखण्डेषु तेष्वेवं, राजन्ते जातिमण्डपाः । यूथिकामल्लिकानागवल्लीद्राक्षादिमण्डपाः ॥ १८४ ॥
आस्थानप्रेक्षणस्नानालङ्कारादिगृहाण्यपि । शोभन्ते मोहनगृहाः, सुरतार्थं सुधाभुजाम् ॥ १८५ ॥
शिलापट्टा विभान्त्येषु, मण्डपेषु गृहेषु च । हंसक्रौञ्चादिसंस्थाना, नानारत्नाविनिर्मिताः ॥ १८६ ॥
तेषु वैमानिका देवा, देव्यश्च सुखमासते । तिष्ठन्ति शेरते स्वैरं, विलसन्ति हसन्ति च ॥ १८७ ॥
सुकृतानां प्राक्कृतानां, भूयसां भुञ्जते फलम् । शमयन्त इव प्राच्यतपःसंयमजं श्रमम् ॥ १८८ ॥
मध्येवनमथैकैकः, प्रासादस्तत्र तिष्ठति । वनाधिकारी प्रत्येकं, सुरो वनसमाभिधः ॥ १८९ ॥
एवमेषां विमानानां, बहिर्भागो निरूपितः । अन्तर्भागो विमानानां, यथाऽऽम्नायमथोच्यते ॥ १९० ॥
मध्यदेशे विमानानामुपकार्या विराजते । एषा च राजप्रासादावतंसकस्य पीठिका ॥ १९१ ॥

---

१ नारकाणामपि सूर्यादेरुदयाद्यभावः, नृलोकबहिःस्थानां तिरश्चामपि, परं तेषां न गतस्य कालस्याज्ञानं, ततः सुखप्राचुर्यमेव गतकालस्याज्ञानतायाः कारणमुचितं, व्यन्तराणामपि 'तहिं देवा वंतरिये' त्यादिना तथोक्तेः ।

२. वनखण्डादिषु भवधारणीयेन देवानां स्थितिरित्येवंविधस्पष्टोल्लेखाभावात् विरुद्धलेखस्यापि चाभावात् प्राय इत्युक्तिः ।

उक्तं च— "गृहस्थानां स्मृता राज्ञामुपकार्योपकारिके"ति ।

परितस्तां पद्मवरवेदिका स्याद्धनाञ्चिता । गवाक्षजालाकृतिना, रत्नजालेन राजिता ॥ १९२ ॥
तथासौ किङ्किणीजालैर्मणिमुक्तादिजालकैः । घण्टाजालैः स्वर्णजालैः, परिक्षिप्ताऽब्जजालकैः ॥ १९३ ॥
चतुर्दिशं त्रिसोपानप्रतिरूपकमञ्जुला । ध्वजतोरणसच्छत्रातिच्छत्राढ्यानि तान्यपि ॥ १९४ ॥
मध्ये स्यादुपकार्याया, विमानस्वामिनो महान् । योजनानां शतान् पञ्चोत्तुङ्गः प्रासादशेखरः ॥ १९५ ॥
मूलप्रासादात्समन्तात्, स्युः प्रासादावतंसकाः । चत्वारो द्वे शते सार्द्धे, योजनानां समुच्छ्रिताः ॥ १९६ ॥
तेषां चतुर्णां प्रत्येकं, चत्वारो ये चतुर्दिशम् । प्रासादास्ते योजनानां, शतं सपादमुच्छ्रिताः ॥ १९७ ॥
प्रत्येकमेषां चत्वारः, प्रासादा ये चतुर्दिशम् । द्वाषष्टिं ते योजनानामद्धयर्द्धां स्युः समुच्छ्रिताः ॥ १९८ ॥
एषामपि परिवारप्रासादास्ते चतुर्दिशम् । योजनानां स्युः सपादामेकत्रिंशतमुच्छ्रिताः ॥ १९९ ॥
तेषामपि परिवारप्रासादाः स्युः समुच्छ्रिताः । योजनानि पञ्चदश, सार्द्धं क्रोशद्वयं तथा ॥ २०० ॥
सर्वेऽप्यमी स्युः प्रासादा, निजोच्चत्वार्द्धविस्तृताः । एवं च पञ्च प्रासादपरिपाट्यः प्रकीर्त्तिताः ॥ २०१ ॥
एकैकस्यां च दिश्येकचत्वारिंशं शतत्रयम् । त्रयोदश शताः पञ्चषष्ट्याढ्याः सर्वसंख्यया ॥ २०२ ॥
राजप्रश्नीयटीकाया, अभिप्रायोऽयमीरितः । तत्सूत्रे तु तिस्र एव, परीपाट्यः प्ररूपिताः ॥ २०३ ॥
पञ्चाशीतिरमी सूत्रमते तु सर्वसंख्यया । सूत्रवृत्त्योर्विसंवादे, निदानं वेद तत्त्ववित् ॥ २०४ ॥
पञ्चमाङ्गे द्वितीयस्य, शतस्योद्देशकेऽष्टमे । वृत्तौ चतस्रः प्रासादपरिपाट्यः प्ररूपिताः ॥ २०५ ॥

एवं चात्र मतत्रयं । विचारसप्ततौ तु महेन्द्रसूरिभिरेवमुक्तं— "ओआरिअलयणंमी, पहुओ पणसीइ हुंति पासाया । तिसय इगचत्त कत्थइ, कत्थइ पणसट्ठी तेससयं ॥ पणसीई इगवीसा, पणसी पुण एगचत्त तिसईए । तेरससय पणसट्ठी, तिसई इगचत्त पइककुहं" ॥ [श्लोक. ३०, ३४]

"विमानेषु प्रथमं प्राकारस्तस्य सर्वमध्ये उपरिकालयनं पीठिकेत्यर्थः, तस्यां सर्वमध्ये प्रभोः पञ्चाशीतिः प्रासादाः, कुत्रापि विमानस्योपरिकालयने एकचत्वारिंशदधिकानि त्रीणि शतानि प्रासादाः, कुत्रापि पञ्चषष्ट्यधिकानि त्रयोदश शतानि प्रासादाः, एवं भेदत्रयमेवेति" विचारसप्ततिकावचूरौ । [श्लो. ३० वृत्तौ]

एवं च–अन्यस्वर्गेष्वपि मूलप्रासादोन्नत्यपेक्षया । अर्द्धार्द्धमानः प्रासादपरिवारो विभाव्यताम् ॥ २०६ ॥
अमी समग्राः प्रासादा, वैडूर्यस्तम्भशोभिताः । उत्तुङ्गतोरणा रत्नपीठिकाबन्धबन्धुराः ॥ २०७ ॥
विमानस्वामिसंभोग्यरत्नसिंहासनाञ्चिताः । यथार्हं तत्परिवारसुरभद्रासनैरपि ॥ २०८ ॥
एवं सामानिकादीनामपि संपत्तिशालिनाम् । रम्या भवन्ति प्रासादा, स्वर्णरत्नविनिर्मिताः ॥ २०९ ॥

१ आदर्शानां वैचित्र्यात् भेदे नासंभवः, एवं भवने प्रासादपङ्क्तिविषयोऽपि भेदस्तत एव सुसंभवः अनुयोगनवमाङ्गाद्योपाङ्गादिवृत्त्यवलोककानां मात्र चित्रं । यद्वा विचारसप्ततौ कत्थइ कत्थईत्युल्लेखात् विविधेषु विमानेषु विविधा प्रासादपरिपाटी ।

पौरस्थानीयदेवानामन्येषामप्यनेकशः । स्वस्वपुण्यानुसारेण, प्रासादाः सन्ति शोभनाः ॥ २१० ॥
तत एव विमानास्ते, शृङ्गाटकैरलङ्कृताः । त्रिकैश्चतुष्कैरपि च, चत्वरैश्च चतुष्पथैः ॥ २११ ॥
चतुर्मुखैरपि महापथैः समन्ततोऽञ्चिताः । प्राकाराट्टालकवरचरिकाद्वारतोरणैः ॥ २१२ ॥
पूर्वोक्तमूलप्रासादादथैशान्यां भवेदिह । सभा सुधर्मा तिसृषु, दिक्षु द्वारैस्त्रिभिर्युताः ॥ २१३ ॥
प्राच्यां याम्यामुदीच्यां च, भान्ति द्वाराणि तान्यपि । अष्टभिर्मङ्गलैश्छत्रैर्विराजन्ते ध्वजादिभिः ॥ २१४ ॥
प्रतिद्वारमथैकैको, विभाति मुखमण्डपः । त्रिभिर्दारैर्युतः सोऽपि, सभावद्रम्यभूतलः ॥ २१५ ॥
प्रतिद्वारमथ मुखमण्डपानां पुरः स्फुरन् । प्रेक्षागृहमण्डपः स्यात्त्रिद्वारः सोऽपि पूर्ववत् ॥ २१६ ॥
प्रेक्षागृहमण्डपानां, मध्ये वज्राक्षपाटकः । सिंहासनान्विता तत्र, प्रत्येकं मणिपीठिका ॥ २१७ ॥
प्रतिद्वारं तथा प्रेक्षागृहमण्डपतः पुरः । मध्ये चैत्यस्तूपयुक्ताश्चतस्रो मणिपीठिकाः ॥ २१८ ॥
प्रतिद्वारमथैतेभ्यः, स्तूपेभ्यः स्युश्चतुर्दिशम् । एकैका पीठिका स्तूपाभिमुखप्रतिमाञ्चिता ॥ २१९ ॥
तेषां च चैत्यस्तूपानां, पुरतो मणिपीठिका । प्रतिद्वारं चैत्यवृक्षस्तत्र नानाद्रुमान्वितः ॥ २२० ॥
चैत्यवृक्षेभ्यश्च तेभ्यः, पुरतो मणिपीठिका । प्रतिद्वारं भवेत्तत्र, महेन्द्रध्वज उच्छ्रितः ॥ २२१ ॥
पञ्चवर्णह्रस्वकेतुसहस्रालङ्कृतः स च । छत्रातिच्छत्रकलितस्तुङ्गे गगनमुल्लिखन् ॥ २२२ ॥
तस्यां सौधर्म्यां सभायां, स्युर्मनोगुलिकाभिधाः । सहस्राण्यष्टचत्वारिंशद्रत्नमयपीठिकाः ॥ २२३ ॥
प्राक्प्रतीच्योः सहस्राणि, तत्र षोडश षोडश । अष्टाष्ट च सहस्राणि, दक्षिणोत्तरयोर्दिशोः ॥ २२४ ॥
स्वर्णरूप्यमयास्तासु, फलका नागदन्तकैः । माल्यदामाञ्चितैर्युक्ताः, स्युर्गोमानसिका अपि ॥ २२५ ॥
तथैव तावत्य एव, शय्यारूपास्त्विमा इह । फलका नागदन्ताढ्या, घट्यो धूपस्य तेषु च ॥ २२६ ॥
तस्याः सौधर्म्याः सभाया, मध्ये च मणिपीठिका । उपर्यस्या माणवकश्चैत्यस्तम्भो भवेन्महान् ॥ २२७ ॥
तुङ्गः षष्टिं योजनानि, विस्तृतश्चैकयोजनम् । एकं योजनमुद्विद्धः, शुद्धरत्नप्रभोद्भटः ॥ २२८ ॥
उपर्यधो योजनानि, द्वादश द्वादश ध्रुवम् । वर्जयित्वा मध्यदेशे, रौरूप्यफलकाञ्चितः ॥ २२९ ॥
फलकास्ते वज्रमयनागदन्तैरलङ्कृताः । तेषु सिक्थकविन्यस्ता, वज्रजाताः समुद्गकाः ॥ २३० ॥
एतेषु चार्हत्सक्थीनि, निक्षिपन्त्यसकृत्सुराः । प्राच्यानि च विलीयन्ते, कालस्य परिपाकतः ॥ २३१ ॥
विमानस्वामिनामेतान्यन्येषामपि नाकिनाम् । दैवतं मङ्गलं चैत्यमिव पूज्यानि भक्तितः ॥ २३२ ॥
एतत्प्रक्षालनजलाभिषेकेण क्षणादपि । क्लेशावेशादिका दोषा, विलीयन्ते सुधाभुजाम् ॥ २३३ ॥
एषामाशातनाभीताः, सभायामिह निर्जराः । न सेवन्ते निधुवनक्रीडां व्रीडां गता इव ॥ २३४ ॥
चैत्यस्तम्भादितः प्राच्यां, स्याद्रत्नपीठिकाऽत्र च । विमानस्वामिनः सिंहासनं परिच्छदान्वितम् ॥ २३५ ॥
तस्यैव चैत्यस्तम्भस्य, प्रतीच्यां मणिपीठिका । विमानस्वामिनो योग्यं, शयनीयं भवेदिह ॥ २३६ ॥

चैत्यस्तम्भपीठिकाऽत्र, षोडशाऽऽयतविस्तृता । अष्टोच्चा योजनान्यर्द्धमानास्तिस्रोऽपरास्ततः ॥ २३७ ॥
शयनीयादथैशान्यां, महती मणिपीठिका । क्षुल्लो महेन्द्रध्वजोऽस्यां, चैत्यस्तम्भोक्तमानभृत् ॥ २३८ ॥
ध्वजादेतस्मात्प्रतीच्यां, विमानस्वामिनो भवेत् । चोपालाख्यः प्रहरणकोशः शस्त्रशताञ्चितः ॥ २३९ ॥
मानमस्या वक्ष्यमाणसभाऽर्हद्चैत्यनामपि । तद्द्वारमण्डपस्तूपवृक्षादीनां च तीर्थपैः ॥ २४० ॥
नन्दीश्वरद्वीपगतचैत्यवत् सकलं स्मृतम् । पीठिकादौ विशेषस्तु, प्रोक्तोऽग्राग्रेऽपि वक्ष्यते ॥ २४१ ॥
एवं सभा सुधर्माख्या, लेशतो वर्णिता मया । वैमानिकविमानेषु, सिद्धान्तोक्तानुसारतः ॥ २४२ ॥
तस्याः सौधर्म्याः सभाया, अथैशान्यां भवेदिह । अर्हदायतनं नित्यमत्यन्तविततद्युति ॥ २४३ ॥
भवेत्सर्वं सुधर्मावदिह द्वारत्रयादिकम् । विज्ञेयं तत्स्वरूपं च, पूर्वोक्तमनुवर्त्तते ॥ २४४ ॥
यावदभ्यन्तरे भागे, स्युर्मनोगुलिकाः शुभाः । तथैव गोमानसिकास्ततश्चैतद्विशिष्यते ॥ २४५ ॥
तस्य सिद्धायतनस्य, मध्यतो मणिपीठिका । उपर्यस्या भवत्येको, देवच्छन्दक उद्भटः ॥ २४६ ॥
अष्टोत्तरशतं तत्र, प्रतिमाः शाश्वतार्हताम् । वैमानिका देवदेव्यो, भक्तितः पूजयन्ति याः ॥ २४७ ॥
घण्टाकलशभृङ्गारदर्पणाः सुप्रतिष्ठकाः । स्थाल्यो मनोगुलिकाश्च, चित्ररत्नकरण्डकाः ॥ २४८ ॥
पात्र्यो वातकरकाश्च, गजाश्वनरकण्ठकाः । महोरगकिंपुरुषवृषकिन्नरकण्ठकाः ॥ २४९ ॥
पुष्पमाल्यचूर्णगंधवस्त्राभरणपूरिताः । चङ्गेर्यः सिद्धार्थलोमहस्तकैरपि ता भृताः ॥ २५० ॥
पुष्पादीनां पटलानि, छत्रचामरकेतवः । तैलकोष्ठशतपत्रतगरैलासमुद्गकाः ॥ २५१ ॥
हंसपादहरितालमनःशिलाञ्जनैर्भृताः । समुद्गकाश्च घण्टाद्यास्तत्राष्टाढ्यं शतं समे ॥ २५२ ॥
अष्टोत्तरशतं धूपकडुच्छकाश्च रत्नजाः । भवन्ति सिद्धायतने, श्रीजिनप्रतिमाग्रतः ॥ २५३ ॥
अथैतस्माज्जिनगृहादैशान्यां महती भवेत् । उपपातसभा साऽपि, सुधर्मैव स्वरूपतः ॥ २५४ ॥
चत्वारि योजनान्यत्रोच्छ्रिताऽष्टौ च ततायता । पीठिकाऽस्यां विमानेशोपपातशयनीयकम् ॥ २५५ ॥
अथैशान्यामुपपातसभायाः स्यान्महाह्रदः । शतं दीर्घस्तदर्द्धोरुर्दशोण्डो योजनानि सः ॥ २५६ ॥
ह्रदादस्मादथैशान्यामभिषेकसभा भवेत् । त्रिद्वारा स्यात् सापि सर्वात्मना तुल्या सुधर्मया ॥ २५७ ॥
विभाति मध्यदेशेऽस्या, महती मणिपीठिका । विमानेशाभिषेकार्हं, तत्र सिंहासनं स्फुरत् ॥ २५८ ॥
सन्ति तत्परिवारार्हभूरिभद्रासनान्यपि । विमानेशाभिषेकार्थस्तत्र सर्वोऽप्युपस्करः ॥ २५९ ॥
अमुष्या अप्यथैशान्यां, सुधर्मासदृशी भवेत् । अलङ्कारसभा मध्यदेशेऽस्या मणिपीठिका ॥ २६० ॥
तस्यां च सपरिवारं, रत्नसिंहासनं भवेत् । विमानस्वामिनः सर्वोऽलङ्कारोपस्करोऽपि च ॥ २६१ ॥
अलङ्कारसभाया अप्यैशान्यां शोभना भवेत् । व्यवसायसभा सर्वात्मना तुल्या सुधर्मया ॥ २६२ ॥
तस्यां रत्नपीठिकायां, रत्नसिंहासनं भवेत् । सत्पुस्तकं चाङ्करत्नमयपत्रैरलङ्कृतम् ॥ २६३ ॥

रिष्टरत्नमये तस्य, पृष्टके शिष्टकान्तिनी । रूप्योत्पन्नदवरकप्रोता च पत्रसंततिः ॥ २६४ ॥
ग्रन्थिर्दवरकस्यादौ, नानामणिमयो भवेत् । न निर्गच्छन्ति पत्राणि, दृढं रुद्धानि येन वै ॥ २६५ ॥
मषीभाजनमेतस्य, वर्यवैडूर्यरत्नजम् । तथा मषीभाजनस्य, शृङ्खला तपनीयजा ॥ २६६ ॥
मषीपात्राच्छादनं च, वरिष्टरिष्टरत्नजम् । लेखनी स्याद्वज्रमयी, मषी रिष्टमयी भवेत् ॥ २६७ ॥
रिष्टरत्नमया वर्णाः, सुवाचाः पीनवर्त्तुलाः । धार्मिको व्यवसायश्च, लिखितस्तत्र तिष्ठति ॥ २६८ ॥
व्यवसायसभायाश्चैशान्यामत्यन्तशोभना । नन्दा पुष्करिणी फुल्लाम्भोजकिञ्जल्कपिञ्जरा ॥ २६९ ॥
उपपातसभावत् स्यात्, सभासूक्तासु पीठिकाः । पूर्वोक्तहृदवन्नन्दापुष्करिण्यपि मानतः ॥ २७० ॥
अस्या नन्दापुष्करिण्या, ऐशान्यामतिनिर्मलम् । बलीपीठं रत्नमयं, दीप्यते दीप्रतेजसा ॥ २७१ ॥
वैमानिकविमानानि, किञ्चिदेवं स्वरूपतः । वर्णितानि विशेषं तु, शेषं जानन्ति तीर्थपाः ॥ २७२ ॥
एतेषु स्वर्विमानेषु, योपपातसभोदिता । तत्रोपपातशय्या या, देवदूष्यसमावृता ॥ २७३ ॥
सूरिश्रीहीरविजयश्रीकीर्त्तिविजयादिवत् । शुद्धं धर्मं समाराध्य, साधितार्थाः समाधिना ॥ २७४ ॥
साधवः श्रावकास्तस्यां, विमानेन्द्रतया क्षणात् । उत्पद्यन्तेऽङ्गुलासंख्यभागमात्रावगाहनाः ॥ २७५ ॥
ततश्चान्तर्मुहूर्त्तेन, पञ्चपर्याप्तिशालिनः । द्वात्रिंशद्वर्षतरुणा, इव भोगप्रभूष्णवः ॥ २७६ ॥
समन्ततो जय जय, नन्द नन्देतिवादिभिः । देवाङ्गनानां निकरैः, सस्नेहमवलोकिताः ॥ २७७ ॥
स्वाम्युत्पत्तिप्रमुदितैः, सुरैः सामानिकादिभिः । अष्टाङ्गस्पृष्टभूपीठैर्नम्यन्ते भक्तिपूर्वकम् ॥ २७८ ॥
पञ्च पर्याप्तयस्तेषामुक्तास्तीर्थंकरैरिति । यद्भाषाचित्तपर्याप्त्योः, समाप्तौ स्तोकमन्तरम् ॥ २७९ ॥

तदुक्तं राजप्रश्नीयवृत्तौ—"इदं भाषामनःपर्याप्त्योः समाप्तिकालान्तरस्य प्रायः शेषपर्याप्तिसमाप्तिकालन्तरापेक्षया स्तोकत्वादेकत्वेन विवक्षणमिति 'पंचविहाए पज्जत्तीए पज्जत्तिभावं गच्छई' त्युक्तं ।"[1]

एषामुत्पन्नमात्राणां, देहा वस्त्रविवर्जिताः । स्वाभाविकस्फारूपा, अलङ्कारोज्झिता अपि ॥ २८० ॥
ततोऽनेनैव देहेनाभिषेककरणादनु । वक्ष्यमाणप्रकारेणालङ्कारान् दधति ध्रुवम् ॥ २८१ ॥
विरच्यन्ते पुनर्यै तु, सुरैरुत्तरवैक्रियाः । ते स्युः समसमुत्पन्नवस्त्रालङ्कारभासुराः ॥ २८२ ॥

तथोक्तं जीवाभिगमसूत्रे—"सोहम्मीसाणदेवा केरिसया विभूसाए प० ?, गो० ! दुविहा पण्णत्ता, तं०—वेउव्वियसरीरा य अवेउव्विसरीरा य, तत्थ णं जे ते वेउव्वियसरीरा ते हारविराइयवच्छा जाव दस दिसाओ उज्जोएमाणा" इत्यादि. 'तत्थ णं जे ते अवेउव्वियशरीरा ते णं आभरणवसणरहिया पगतित्था विभूसाए पण्णत्ता"

---

१ वैक्रिये इन्द्रियादिपर्याप्तीनां समाप्त्यन्तरस्य समयत्वाच्चिन्त्यमेतत्, अत एवाभयदेवैः हेतुविशेषो न निरदेशि । अनभिसन्धितभाषाऽभावेनैवयम् ।

ततः शय्यानिविष्टानां, तेषां चेतस्ययं भवेत् । अभिप्रायः स्फुटः सुप्तोत्थितानामिव धीमताम् ॥ २८३ ॥
कर्त्तव्यं प्राक्किमस्माभिः, किं कर्त्तव्यं ततः परम् । किं वा हितं सुखं श्रेयः, पारम्पर्यशुभाप्तिकृत् ? ॥ २८४ ॥
ततः स्वस्वामिनामेवमभिप्रायं मनोगतम् । ज्ञात्वा सामानिका देवा, वदन्ति विनयानताः ॥ २८५ ॥
जिनानां प्रतिमाः स्वामिन्निह सन्ति जिनालये । अष्टोत्तरशतं चैत्यस्तम्भेऽस्थीनि तथाऽर्हताम् ॥ २८६ ॥
पूज्यानि तानि चात्र, युष्माकं चान्यनाकिनाम् । प्राक् च पश्चाच्च कार्यं च, एतन्निःश्रेयसावहम् ॥ २८७ ॥
इहलोके परलोके, हितावाप्तिर्भविष्यति । युष्माकमर्हत्प्रतिमापूजनस्तवनादिभिः ॥ २८८ ॥
वाक्यानि तेषामाकर्ण्यैत्युत्थाय शयनीयतः । निर्यान्ति पूर्वद्वारेणोपपातमन्दिरात्ततः ॥ २८९ ॥
ह्रदं पूर्वोक्तमागत्य, तत्र कृत्वा प्रदक्षिणाम् । प्रविशन्ति च पौरस्त्यतत्रिसोपानकाध्वना ॥ २९० ॥
तत्राचान्ताः शुचीभूताः, सद्योनिर्मितमज्जनाः । ह्रदान्निर्गत्याभिषेकसभामागत्य लीलया ॥ २९१ ॥
प्रदक्षिणीकृत्य पूर्वद्वारा विशन्ति तामपि । तत्र सिंहासने पूर्वाभिमुखास्ते किलासते ॥ २९२ ॥
ततः सामानिकास्तेषामाभियोगिकनिर्जरान् । आकार्याज्ञापयन्त्येवं, सावधाना भवन्तु भोः ॥ २९३ ॥
अस्य नः स्वामिनो योग्यां, गत्वाऽनर्घ्यां महीयसीम् । इन्द्राभिषेकसामग्रीमिहानयत सत्वरम् ॥ २९४ ॥
ततस्तेऽपि प्रमुदिताः, प्रतिपद्य तथा वचः । ऐशान्यामेत्य कुर्वन्ति, समुद्घातं च वैक्रियम् ॥ २९५ ॥
द्विस्तं कृत्वा च सौवर्णान्, रौप्यान् रत्नविनिर्मितान् । सुवर्णरूप्यजान् स्वर्णरत्नजान् रूप्यरत्नजान् ॥ २९६ ॥
स्वर्णरूप्यरत्नमयांस्तथा मृत्स्नामयानपि । सहस्रमष्टाभ्यधिकं, प्रत्येकं कलशानमून् ॥ २९७ ॥
भृङ्गारादर्शकस्थालपात्रिकासुप्रतिष्ठकान् । करण्डकान् रत्नमयान्, चङ्गेरीर्लोमहस्तकान् ॥ २९८ ॥
छत्राणि चामराण्येवं, तैलादीनां समुद्गकान् । सहस्रमष्टभिर्युक्तं, तथा धूपकडुच्छकान् ॥ २९९ ॥
एतत्सर्वं विकुर्व्याथ, सहजान् विकृतांश्च तान् । गृहीत्वा कलशादींस्ते, निर्गत्य स्वविमानतः ॥ ३०० ॥
गत्वा च पुष्करक्षीरांबुध्योः पद्मह्रदादिषु । गङ्गादिकास्वापगासु, तीर्थेषु मागधादिषु ॥ ३०१ ॥
तत्रत्यानि पयोमृत्स्नापुष्पमाल्याम्बुजान्यथ । सहस्रशतपत्राणि, सिद्धार्थान् सकलौषधीः ॥ ३०२ ॥
भद्रशालसौमनसादिभ्योऽपि निखिलर्त्तुजान् । फलप्रसूनसिद्धार्थान्, गोशीर्षचन्दनानि च ॥ ३०३ ॥
समादायाथ संभूय, ते सर्वेऽप्याभियोगिकाः । विमानस्वामिनामग्रे, ढौकन्ते नतिपूर्वकम् ॥ ३०४ ॥
सामानिकादयः सर्वे, ततो विमानवासिनः । देवा देव्यश्च कलशैः, स्वाभाविकैर्विकुर्वितैः ॥ ३०५ ॥
अभिषिञ्चन्ति तानिन्द्राभिषेकेण गरीयसा । पुष्पैः सर्वर्त्तुकैः सर्वौषधीभिरर्चयन्ति च ॥ ३०६ ॥
तेषामिन्द्राभिषेकेऽथ, वर्त्तमाने मुदा तदा । सुराः सुगन्धाम्बुवृष्ट्या, केचित्प्रशान्तरेणुकम् ॥ ३०७ ॥
केचित्संमृष्टोपलिप्तशुच्यध्वापणवीथिकम् । मञ्चातिमञ्चभृत्केचित्, केऽपि नानोच्छ्रितध्वजम् ॥ ३०८ ॥
आबद्धतोरणं लम्बिपुष्पदामोच्चयं परे । द्वार्न्यस्तचन्दनघटं, दत्तकुङ्कुमहस्तकम् ॥ ३०९ ॥

केचित्पञ्चवर्णपुष्पोपचारचारुभूतलम् । दग्धकृष्णागुरुधूपधूमैरन्यैः सुगन्धितम् ॥ ३१० ॥
तत्तद्विमानं कुर्वन्ति, परे नृत्यन्ति निर्जराः । हसन्ति केचिद्गायन्ति, तूर्याणि वादयन्ति च ॥ ३११ ॥
केचिद्वर्षन्ति रजतस्वर्णरत्नवराम्बरैः । वज्रैः पुष्पैर्माल्यगन्धैर्वासैश्चाभरणैः परे ॥ ३१२ ॥
केचिद्गर्जन्ति हेषन्ते, भूमिमास्फोटयन्ति च । सिंहनादं विदधते, विद्युद्वृष्ट्यादि कुर्वते ॥ ३१३ ॥
हक्कारैरथ बूत्कारैर्वल्गनोच्छलनादिभिः । स्वाम्युत्पत्तिप्रमुदिताश्चेष्टन्ते बहुधा सुराः ॥ ३१४ ॥
अभिषिच्योत्सवैरेवं, सुराः स्तुवन्ति तानिति । चिरं जीव चिरं नंद, चिरं पालय नः प्रभो ॥ ३१५ ॥
विपक्षपक्षमजितं, जय दिव्येन तेजसा । जितानां सुहृदां मध्ये, तिष्ठ कष्टविवर्जितः ॥ ३१६ ॥
सुरेन्द्र इव देवानां, ताराणामिव चन्द्रमाः । नराणां चक्रवर्त्तीव, गरुत्मानिव पक्षिणाम् ॥ ३१७ ॥
विमानस्यास्य देवानां, देवीनामपि भूरिशः । पल्योपमसागरोपमाणि पालय वैभवम् ॥ ३१८ ॥
इत्येवमभिषिक्तास्तेऽभिषेकभवनात्ततः । निर्गत्य पूर्वद्वारेण, यान्त्यलङ्कारमन्दिरम् ॥ ३१९ ॥
प्रदक्षिणीकृत्य पूर्वद्वारेण प्रविशन्ति तत् । सिंहासने निषीदन्ति, तत्र ते पूर्वदिग्मुखाः ॥ ३२० ॥
ततः सामानिका देवा, वस्त्रभूषासमुद्गकान् । शाश्वतान् ढौकयन्त्युद्यद्रत्नरश्मिकृतादभुतान् ॥ ३२१ ॥
ततस्ते प्रथमं चारुवस्त्ररूक्षितविग्रहाः । सुवर्णखचितं देवदूष्यं परिदधत्यथ ॥ ३२२ ॥
हारमेकावलिं रत्नावलीं मुक्तावलीमपि । केयूरकटकस्फाराङ्गदकुण्डलमुद्रिकाः ॥ ३२३ ॥
ततोऽलङ्कृतसर्वाङ्गा, मौलिभ्राजिष्णुमौलयः । चारुचन्दनकल्पाङ्गरागास्तिलकशालिनः ॥ ३२४ ॥
सक्लेशवस्त्राभरणैरलङ्कारैश्चतुर्विधैः । संपूर्णप्रतिकर्माण, उत्तिष्ठंत्यासनात्ततः ॥ ३२५ ॥
अलङ्कारगृहात्पूर्वद्वारा निर्गत्य पूर्ववत् । व्यवसायसभां प्राच्यद्वारेण प्रविशंत्यमी ॥ ३२६ ॥
तत्र सिंहासने स्थित्वा, सामानिकोपढौकितम् । पुस्तकं वाचयित्वाऽस्मात्, स्थितिं जानन्ति धार्मिकीम् ॥ ३२७ ॥
सिंहासनादथोत्थाय, व्यवसायनिकेतनात् । निर्गत्य प्राग्दिशा नन्दापुष्करिण्यां विशन्ति च ॥ ३२८ ॥
तत्राचान्ताः शुचीभूता, धौतहस्तक्रमाः क्रमात् । रौप्यं भृङ्गारमम्भोभिः, प्रपूर्य दधतः करे ॥ ३२९ ॥
नानापद्मान्युपादाय, पुष्करिण्या निरीय च । सिद्धायतनमायान्ति, सिद्धायतिनवोदयाः ॥ ३३० ॥
ततस्ताननुगच्छन्ति, देवाः सामानिकादयः । देवपूजार्हपुष्पादिवस्तुसंपूर्णपाणयः ॥ ३३१ ॥
अथाप्सरोगीतमिश्रातोद्यनादभृताम्बराः । महासमृद्ध्या सिद्धानां, सदने प्रविशन्ति ते ॥ ३३२ ॥
देवच्छन्दकमागत्य, श्रीजिनार्चावलोकने । प्रणमय्य शिरः सुष्ठु, नमन्त्यञ्जलिपूर्वकम् ॥ ३३३ ॥
ततो लोमहस्तकेन, प्रमार्ज्य श्रीमदर्हताम् । अर्चाः सुगन्धिभिर्नीरैः, स्नपयन्ति यथाविधि ॥ ३३४ ॥
तत्र यद्यपि कुन्थ्वादिजन्तवो न तथाप्यसौ । प्रमार्जनादियतनापूर्विकैवार्हतक्रिया ॥ ३३५ ॥

यद्वा पूर्वभवेऽभ्यस्तं, सप्रमार्जनमर्चनम् । जिनार्चानां ततोऽभ्यासादत्राप्येवं सृजन्त्यमी[1] ॥ ३३६ ॥
गोशीर्षचन्दनेनाथ, प्रत्यङ्गं पूजयन्ति ताः । प्रत्येकमासां परिधापयन्ति वस्त्रयोर्युगम्[2] ॥ ३३७ ॥
पुष्पमाल्यैर्गन्धचूर्णैर्वस्त्रैराभरणैरपि । पूजयित्वा लम्बयन्ति, पुष्पदामान्यनेकशः ॥ ३३८ ॥
ततः करतलक्षिप्तैः, पञ्चवर्णैर्मणीवकैः । चित्रोपचाररुचिरं, रचयन्ति भुवस्तलम् ॥ ३३९ ॥
पुरतोऽथ जिनार्चानामच्छै रजततण्डुलैः । लिखित्वा मङ्गलान्यष्टौ, पूजयन्ति जगद्गुरून् ॥ ३४० ॥
ततश्चान्द्रप्रभं वज्रवैडूर्यदण्डमण्डितम् । करे कृत्वा मणिस्वर्णचित्रं धूपकडुच्छकम् ॥ ३४१ ॥
दह्यमानकुन्दुरुष्ककृष्णागुरुतुरुष्ककैः । धूपं दत्त्वा जिनेन्द्राणां, प्रक्रमन्ते स्तुतिक्रियाम् ॥ ३४२ ॥
धूपं दत्त्वा जिनेन्द्राणामित्युक्तं यदिहागमे । साक्षाज्जिनप्रतिमयोस्तदभेदविवक्षया ॥ ३४३ ॥
सत्यप्येवं न मन्यन्ते, येऽर्चामर्च्यां जगत्पतेः । तान् धावतो मुद्रिताक्षानानयामः कथं पथम् ? ॥ ३४४ ॥

नमस्ते समस्तप्रशस्तर्द्धिधाम्ने, क्रमाश्लेषिनम्रेन्द्रकोटीरदाम्ने ।
भवापारपाथोधिपारप्रदाय, प्रदायाङ्गिनां संपदां निर्मदाय ॥ ३४५ ॥

इत्याद्यष्टोत्तरशतं, श्लोकानस्तोकधीधनाः । कुर्वन्त्यदोषान् प्रौढार्थकलितान् ललितान् पदैः ॥ ३४६ ॥
नमस्कारैः सुधासारसारैः स्तुत्वा जिनानिति । शक्रस्तवादिकां चैत्यवन्दनां रचयन्त्यमी ॥ ३४७ ॥
वन्दित्वाऽथ नमस्कृत्य, ततः पुनरपि प्रभून् । चैत्यस्यास्य मध्यदेशं, प्रमृज्याभ्युक्ष्य चाम्बुभिः ॥ ३४८ ॥
धृताकल्पं कल्पयन्तश्चारुचन्दनहस्तकैः । पुष्पपुञ्जोपचारेण, धूपैश्चाभ्यर्चयन्त्यमी ॥ ३४९ ॥
चैत्यस्याथ दाक्षिणात्यं, द्वारमेत्यात्र संस्थिताः । द्वारशाखापुत्रिकाश्च, व्यालरूपाणि पूर्ववत् ॥ ३५० ॥
प्रमार्जनाभ्युक्षणाभ्यां, पुष्पमाल्यविभूषणैः । स्रग्दामभिश्चार्चयन्ति, धूपधूमान् किरन्ति च ॥ ३५१ ॥
ततश्च दक्षिणद्वारस्योपत्ये मुखमण्डपम् । प्राग्वत्तस्य मध्यदेशे, कुर्वन्ति हस्तकादिकम् ॥ ३५२ ॥
ततश्चास्य मण्डपस्य, पूर्वद्वारेऽपि पूर्ववत् । द्वारशाखाद्यर्चयन्ति, स्तम्भांश्च दक्षिणोत्तरान् ॥ ३५३ ॥
शेषद्वारद्वयेऽप्येवं, ततः प्रेक्षणमण्डपे । मध्यं द्वारत्रयं सिंहासनं समणिपीठिकम् ॥ ३५४ ॥
निर्गत्य दक्षिणद्वारात्ततः प्रेक्षणमण्डपात् । दाक्षिणात्यं महाचैत्यस्तूपमभ्यर्चयन्ति ते ॥ ३५५ ॥
तस्माच्चतुर्दिशं यास्तु, प्रतिमाः श्रीमदर्हताम् । तासामालोके प्रणामं, कुर्वन्ति पश्चिमादितः ॥ ३५६ ॥
ताः पूर्ववत्प्रपूज्याष्टौ, मङ्गलानि प्रकल्प्य च । साष्टोत्तरशतश्लोकां, कुर्वंति चैत्यवन्दनाम् ॥ ३५७ ॥

---

१. बहुशस्तत्र प्रमार्जनं, विलम्ब्य चान्तरान्तरा, ततो नायं सम्यग्घेतुः सर्वेषां प्राग्भवे जिनमूर्तिपूजासंभवाभावाच्च, कल्पः स पूजाया इत्येव यथार्थम् ।

२. तत्र कच्छादिवस्त्रचिह्नाभावात् युक्तमिदं, अधुना तु प्रतिमानामेव तथाविधानात् न वस्त्रपरिधापनम् ।

दाक्षिणात्यचैत्यवृक्षमहेन्द्रध्वजपूजनम् । कृत्वा नन्दापुष्करिणीं, दाक्षिणात्यां व्रजन्ति ते ॥ ३५८ ॥
तत्तोरणत्रिसोपानप्रतिरूपकपुत्रिकाः । व्यालरूपाण्यर्चयन्ति, पुष्पधूपादिकैरथ ॥ ३५९ ॥
चैत्यं प्रदक्षिणीकृत्यौत्तराहद्वारसंस्थिताम् । नन्दापुष्करिणीमेत्य, कुर्वन्ति प्राग्वदर्चनम् ॥ ३६० ॥
उदीच्यान् केतुचैत्यद्रुस्तूपांस्तत्प्रतिमाः क्रमात् । उदक्प्रेक्षामण्डपं चार्चयन्ति मुखमण्डपम् ॥ ३६१ ॥
ततो द्वारमौत्तराहं, प्राच्यं द्वारं ततः क्रमात् । प्राच्यान्मुखमण्डपादीन्, प्रपूजयन्ति याम्यवत् ॥ ३६२ ॥
ततः सभां सुधर्मां ते, प्रविश्य पूर्वया दिशा । यत्र माणवकश्चैत्यस्तम्भस्तत्राभ्युपेत्य च ॥ ३६३ ॥
आलोके तीर्थकृत्सक्थ्नां, प्रणता लोमहस्तकैः । प्रमार्जितादाददते, तानि वज्रसमुद्गकात् ॥ ३६४ ॥
ततो लोमहस्तकेनं, प्रमृज्योदकधारया । प्रक्षाल्याभ्यर्च्य पुष्पाद्यैर्निक्षिपन्ति समुद्गके ॥ ३६५ ॥
समुद्गकं यथास्थानमवलम्ब्यार्चयन्ति च । पुष्पमाल्यगन्धवस्त्रैश्चैत्यस्तम्भं ततोऽत्र च ॥ ३६६ ॥
कृत्वा सिंहासनस्यार्चां, मणिपीठिकया सह । क्षुल्लकेन्द्रध्वजस्यार्चां, कुर्वतेऽम्भःसुमादिभिः ॥ ३६७ ॥
कोशं प्रहरणस्याथ, समेत्य संप्रमृज्य च । खड्गादीनि प्रहरणान्यभ्यर्चयन्ति पूर्ववत् ॥ ३६८ ॥
सुधर्मामध्यदेशेऽथ, प्रकल्प्य हस्तकादिकम् । देवशय्यां पूजयन्ति, मणिपीठिकया सह ॥ ३६९ ॥
ततश्चैते सुधर्मातो, निर्यान्तो याम्यया दिशा । सिद्धायतनवद् द्वारत्रयमर्चन्ति पूर्ववत् ॥ ३७० ॥
एवं हृदं सभाश्चान्याः, स्वस्वोपस्करसंयुताः । व्यवसायसभां चान्ते, पूजयित्वा सपुस्तकाम् ॥ ३७१ ॥
व्यवसायसभावर्त्तिप्राच्यपुष्करिणीतटात् । कुर्वते बलिपीठे ते, गत्वा बलिविसर्जनम् ॥ ३७२ ॥
स्वीयस्वीयविमानानां, श्रृङ्गाटकत्रिकादिषु । उद्यानादौ चार्चनिकां, कारयन्त्याभियोगिकैः ॥ ३७३ ॥
अथैवं कृतकृत्यास्ते, ऐशानकोणसंस्थिताम् । नन्दापुष्करिणीमेत्य, तस्याः कृत्वा प्रदक्षिणाम् ॥ ३७४ ॥
प्रक्षाल्य हस्तपादादि, विलसन्ति यथारुचि । सभां सुधर्मामेत्य प्राग्मुखाः सिंहासने स्थिताः ॥ ३७५ ॥
एवमत्रामुत्र लोके, हितावहं जिनार्चनम् । इति तत्रालोकमात्रात्प्रणमन्ति पुनः पुनः ॥ ३७६ ॥
न नमन्ति न वा तानि, स्तुवन्ति च मनागपि । लोकस्थित्या धर्मबुद्ध्या, कृतयोर्ह्यन्तरं महत् ॥ ३७७ ॥
स्तुवन्ति नव्यैः काव्यैश्च, तथा शक्रस्तवादिभिः । शेषाणि तु स्थितिकृते, पूजयन्ति सुमादिभिः ॥ ३७८ ॥
सत्यप्येवं स्थितिमेव, ये वदन्ति जिनार्चनम् । कथं ते लुप्तनयना, बोध्या रेताग्रयोर्भिदाम् ॥ ३७९ ॥
राजप्रश्नीयसूत्रे यत्सूर्याभस्य सुपर्वणः । विमानवर्णनं तस्योत्पत्तिरीतिश्च दर्शिता ॥ ३८० ॥
मया तदनुसारेण, वैमानिकसुपर्वणाम् । विमानवर्णनोत्पत्ती, सामान्यतो निरूपिते ॥ ३८१ ॥
विशेषमुक्तशेषं तु, जानन्त्यशेषवेदिनः । गीतार्था निहतानर्था, यद्वा तद्वाक्यपारगाः ॥ ३८२ ॥
देव्यो देवाः परेऽप्येवं, तत्तद्विमानवासिनः । जायन्ते स्वस्वशय्यायां, स्वस्वपुण्यानुसारतः ॥ ३८३ ॥

येऽयमुक्ता विमानानां, स्थितिस्तत्स्वामिनामपि । अच्युतस्वर्गपर्यन्तं, सा सर्वाऽप्यनुवर्त्तते ॥ ३८४ ॥
परतस्त्वहमिन्द्राणां, न स्वामिसेवकादिका । स्थितिः काचित्सुमनसां, कल्पातीता हि ते यतः ॥ ३८५ ॥
ते प्राग्जन्मोपात्तशस्तनामकर्मानुभावतः । न्यक्षसल्लक्षणोपेतसर्वाङ्गोपाङ्गशोभिताः ॥ ३८६ ॥
जात्यस्वर्णवर्णदेहा, आद्यसंस्थानसंस्थिताः । अत्यन्तसुन्दराकाराः, सारपुद्गलयोनयः ॥ ३८७ ॥
असृग्मांसवसामेदः, पुरीषमूत्रचर्मभिः । अन्त्रास्थिश्मश्रुनखरोमोद्गमैश्च वर्जिताः ॥ ३८८ ॥
कुन्देन्दुश्वेतदशनाः, प्रवालजित्वराधराः । घनाञ्जनश्यामकेशपाशपेशलमौलयः ॥ ३८९ ॥

तथोक्तमौपपातिके—"पंडुरससिसकलविमलनिम्मलसंखगोखीरफेणदगरयमुणालिया-धवलदंतसेढी, तथा—अंजणघणकसिणणिद्धरमणीयणिद्धकेसा" इत्यादि, संग्रहण्यां तु 'केसट्ठिमंसुनहरोमरहिया' इत्युक्तमिति ज्ञेयं । [गाथा. १८९][1]

अत्यन्तस्वच्छवपुषः, सुगन्धिमुखमारुताः । अप्रस्वेदा रजोलेपोज्झिताः जात्यसुवर्णवत् ॥ ३९० ॥
सर्वोत्कृष्टवर्णगन्धरसस्पर्शादिशोभनाः । सौभाग्यादिगुणग्रामाभिरामोद्दामविग्रहाः ॥ ३९१ ॥
मृगकासररूपादिचिह्नं, श्रीभरभूषितम् । नूतनं रत्नमुकुटं, दधते मूर्ध्नि बन्धुरम् ॥ ३९२ ॥

तथा च प्रज्ञापनासूत्रे—"ते णं मिग १ महिस २ वराह ३ सीह ४ छगल ५ दहुर ६ हय ७ गयवइ ८ भुयग ९ खग्ग १० उसभंक ११ विडिम १२ पायडियचिंधमउडा" इति, अत्र ते इति सौधर्मादयोऽच्युतान्ताः क्रमेण देवाः, खड्गो गण्डकनामा आटव्यश्चतुष्पदविशेषः, यदाह शाश्वतः—'खड्गो गण्डकशृंगासिबुद्धभेदेषु गण्डके' इति, विडिमस्तु मृगविशेषो लक्ष्यते, तथा च देशीशास्त्रं—'विडिमो सिसुमयगंडेसु'

औपपातिके त्वेवं चिह्नविभागो दृश्यते—सोहम्म १ ईसाण २ सणंकुमार ३ माहिंद ४ बंभ ५ लंतग ६ महासुक्क ७ सहस्सार ८ आणयपाणय ९ आरणअच्चुय १० वई पालय १ पुप्फय २ सोमणस ३ सिरिवच्छ ४ नंदियावत्त ५ कामगम ६ पीइगम ७ मणोरम ८ विमल ९ सव्वओभद्द १० नामधिज्जेहिं विमाणेहिं ओइन्ना वंदगा जिणंदं मिग १ महिस २ वराह ३ छगल ४ दहुर ५ हय ६ गयवई ७ भुयग ८ खग्ग ९ उसभं १० कविडिमपायडियचिंधमउडा" इति, अत्र मृगादयोऽङ्क—लाञ्छनानि विटपेषु—विस्तारेषु येषां मुकुटानां तानि तथा, तानि प्रकटित चिह्नानि रत्नादिदीप्त्या प्रकाशितमृगादिलाञ्छनानि मुकुटानि येषां ते तथा[2] इति, तत्त्वं तु सर्वविदो विदन्ति ।

---

१ औपपातिके आगतसुराणामुत्तरवैक्रियवर्णनं संग्रहण्यां तु स्वाभाविकस्थितेरिति न भिन्नता ।

२. आद्ये पक्षे चिह्नानि द्वादश अन्त्ये दशेति भेदः, परं आद्ये 'उसभंक' इत्यत्रैवांकशब्ददर्शनात् विडिमस्याङ्कार्थताऽयोग्या, न च द्वादश वैमानिकानामिन्द्रा इति 'सिंह' शब्दोऽपपाठः ।

विवक्षवस्त्वमी अर्द्धमागध्या[1] रम्यवर्णया । भाषन्ते चतुरस्वान्तचमत्कारकिरा गिरा ॥ ३९३ ॥

तथाहुः—'गो० ! देवाणं अद्धमागहाए भासाए भासंति' भगवतीपञ्चमशतकचतुर्थोद्देशके

लोके तु 'संस्कृतं स्वर्गिणां भाषेत्यादि ।'[2]

प्रत्येकमङ्गोपाङ्गेषु, रत्नाभरणभासुराः । अस्पृष्टकासश्वासादिविविधव्याधिवेदनाः ॥ ३९४ ॥
पुण्यनैपुण्यलावण्याः, सदावस्थायियौवनाः । अभङ्गकामरागार्द्रा, दिव्याङ्गनाकटाक्षिताः ॥ ३९५ ॥
दिव्याङ्गरागसुरभीकृतसर्वाङ्गशोभनाः । कामकेलिकलाभ्यासविलासहासवेदिनः ॥ ३९६ ॥
स्वभावतो निर्निमेषविशेषललितेक्षणाः । अम्लानपुष्पदामानः, स्वैरं गगनगामिनः ॥ ३९७ ॥
मनश्चिन्तितमात्रेण, सर्वाभीष्टार्थसाधकाः । वचनातिगसामर्थ्यान्निग्रहानुग्रहक्षमाः ॥ ३९८ ॥
प्रयोजनविशेषेण, प्राप्ता अपि भुवस्तलम् । तिष्ठन्ति ते व्यवहिताश्चतुर्भिरङ्गुलैर्भुवः ॥ ३९९ ॥
वायूत्तरेशानदिक्षु, सेव्याः सामानिकैः सुरैः । अग्नियाम्यानैर्ऋतीषु, पर्षद्भिस्तिसृभिर्युताः ॥ ४०० ॥
पुरोऽग्रमहिषीभिश्च, पृष्ठतोऽनीकनायकैः । सेव्याः समन्ताद्विविधायुधाढ्यैश्चात्मरक्षकैः ॥ ४०१ ॥
सुस्वरैर्दिव्यगन्धर्वैर्गीतासु पदपङ्क्तिषु । दत्तोपयोगाः सत्तालमूर्छनाग्रामचारुषु ॥ ४०२ ॥
अप्सरोभिः प्रयुक्तेषु, नाट्येषु दत्तचक्षुषः । अज्ञातानेहसः सौख्यैः, समयं गमयन्त्यमी ॥ ४०३ ॥
कामलीलाभिलाषे तु, विसृज्य देवपर्षदम् । सुधर्मायाः सभायाश्च, निर्गत्यान्तःपुरैः सह ॥ ४०४ ॥
गत्वोक्तरूपप्रासादोद्यानादिष्वास्पदेषु ते । मनोऽनुकूलाः सर्वाङ्गसुभगा दिव्यकामिनीः ॥ ४०५ ॥
रम्यालङ्करनेपथ्या, रूपयौवनशालिनीः । कटाक्षविशिखैर्नर्मोक्तिभिर्द्विगुणितस्पृहाः ॥ ४०६ ॥
भर्तृचित्तानुसारेणानेकरूपाणि कुर्वतीः । प्रतिरूपैः स्वयमपि, प्रेमतो बहुभिः कृतैः ॥ ४०७ ॥
हठात्पत्यङ्गमालिङ्ग्य, वक्त्रमुन्नम्य चुम्बनैः । ससीत्कारं सुधाधारमधुराधरखण्डनैः ॥ ४०८ ॥
निःशङ्कमङ्कमारोप्य, निर्दयं स्तनमर्दनैः । मज्जन्तो मैथुनरसे, मनुष्यमिथुनादिवत् ॥ ४०९ ॥
इत्थं सर्वाङ्गीणकायक्लेशोत्थां स्पर्शनिर्वृतिम् । आसादयन्तस्तृप्यन्ति, क्लिष्टपुंवेदवेदनाः ॥ ४१० ॥
रतामृतास्वादलोलाः, कदाचिन्मदनोन्मदाः । मुग्धावत्कम्पनैर्भीतिरुतैर्दूरापसर्पणैः ॥ ४११ ॥
कदाचिच्चारुमध्यावल्लज्जाललितचेष्टितैः । कदाचित्प्रौढमहिला, इव वैयात्यवल्गितैः ॥ ४१२ ॥
कदाचिद्रोषतोषार्द्रैः, परुषैः पुरुषायितैः । प्रत्याश्लेषप्रतिवचः, प्रतिचुम्बनवल्गनैः ॥ ४१३ ॥

---

१ अर्धमागधी भाषा अष्टादशदेश्यभाषामिश्रेति आबालगोपाङ्गनं बोद्धुं शक्या सर्वविषयवासिनां च पूर्वसंगतिकानां सुबोधा, प्रत्नदेशभाषापि शिलादिषूल्लिखिता दृश्यते, भाष्यकृद्भिरपि नानादेशीया भाषास्तथाविधा एव दर्शिताः,

२ कस्यांचिद् भाषायां संस्कारकरणात् संस्कृतत्वं, तेन नेयं मूलभाषा भावितुमर्हति प्राकृता तु स्वाभाविकी, प्रकृतिः संस्कृतं, तत्र भवं प्राकृतमिति तु संस्कृतभवतयाऽभिप्रेतायाः लक्षणाख्यानं, व्याकरणसूत्रापेक्षया वैवत्, यत आख्यायते तत्र शेषं संस्कृतवदिति ।

पारापतादिशब्दैश्च, द्विगुणामुन्मुदिष्णुताम् । जनयन्त्यश्चिरं भर्तुर्देव्योऽपि सुरतोत्सवैः ॥ ४१४ ॥
शुक्रस्य वैक्रियस्याङ्गे, संचारादखिले सुखम् । आसादयन्त्यस्तृप्यन्ति, क्लिष्टस्त्रीवेदवेदनाः ॥ ४१५ ॥
ते शुक्रपुद्गला भुज्यमानदिव्यमृगीदृशाम् । चक्षुः श्रोत्रघ्राणजिह्वात्वगिन्द्रियतयाऽसकृत् ॥ ४१६ ॥
द्रुतं परिणमन्त्येते, रूपलावण्यवैभवम् । परभागं प्रापयन्ति, सौभाग्यं यौवनं तथा ॥ ४१७ ॥

तथा च प्रज्ञापना—"अत्थि णं भंते ! तेसिं देवाणं सुक्कपुग्गला ?, हंता अत्थि, ते णं भंते ! तासिं अच्छराणं कीसत्ताए भुज्जो भुज्जो परिणमंति ? गो० ! सोइंदियत्ताए जाव फासिंदियत्ताए इट्ठत्ताए कंतत्ताए मणुन्नत्ताए मणामत्ताए सुभत्ताए सोहग्गरूवजोव्वणगुणलावण्णत्ताए एयासिं भुज्जो भुज्जो परिणमंति"

एवं केचित्सुरास्तीव्रमदनोन्मत्तचेतसः । स्वनायिकोपभोगेनातृप्ताः क्लृप्तापराशयाः ॥ ४१८ ॥
वर्यचातुर्यसौन्दर्यपुण्याः पण्याङ्गना इव । निजानुरक्ता अपरिगृहीता भुञ्जते सुरीः ॥ ४१९ ॥
तथा ह्युन्मत्तता द्वेधा, देवानामपि वर्णिता । एका यक्षावेशभवा, मोहनीयोदयात् परा ॥ ४२० ॥
अल्पर्द्धिकं तत्र देवं, रुष्टो देवो महर्द्धिकः । दुष्टपुद्गलनिक्षेपात्, कुर्यात् परवशं क्षणात् ॥ ४२१ ॥
ततश्च ग्रहिलात्माऽसौ, यथा तथा विचेष्टते । द्वितीया द्विविधा तत्र, मिथ्यात्वात्प्रथमा भवेत् ॥ ४२२ ॥
अतत्त्वं मन्यते तत्त्वं, तत्त्वं चातत्त्वमेतया । चारित्रमोहनीयोत्था, परा तयाऽपि चेष्टते ॥ ४२३ ॥
भूताविष्ट इवोत्कृष्टमन्मथादिव्यथार्दितः । यक्षावेशोत्था सुमोचा, दुर्मोचा मोहनीयजा ॥ ४२४ ॥

तथाहुः—"असुरकुमाराणं भंते ! कइविहे उम्माए प० ?, गो० दुविहे प०, एवं जहेव णेरइयाणं, णवरं देवे वा से महिड्ढियतराए असुभे पुग्गले पक्खिवेज्जा, से णं तेसिं असुभाणं पुग्गलाणं पक्खिवणत्ताए जक्खाएसं उम्मायं पाउणिज्जा, मोहणिज्जस्स वा, सेसं तं चेव, वाणमंतरजोतिसवेमाणियाणं जहा असुरकुमाराणं," भगवतीसूत्रे ।

पश्यतैवं शक्तियुक्ता, विवेकिनोऽपि नाकिनः । हन्तानेन विडम्ब्यन्ते, सत्यं सर्वङ्कषः स्मरः ॥ ४२५ ॥
योऽखर्वयच्छर्वगर्वसर्वस्वमौर्वदुर्वहः । किमपूर्वमखर्वोऽयं, निर्वपुर्यत्सुपर्वजित् ॥ ४२६ ॥
भवनव्यन्तरज्योतिष्काद्यकल्पद्वयावधि । विडम्बनैवं कामस्य, ज्ञेया नातः परं तथा ॥ ४२७ ॥
अथो यथोक्तकालेन, यद्याहारार्थिनः सुराः । तदा संकल्पमात्रेणोपस्थिताः सारपुद्गलाः ॥ ४२८ ॥
सर्वगात्रेन्द्रियाह्लादप्रदाः परिणमन्ति हि । सर्वाङ्गमाहारतया, शुभकर्मानुभावतः ॥ ४२९ ॥
प्राप्नुवन्तः परां तृप्तिमाहारेणामुना सुराः । विन्दते परमानन्दं, स्वादीयोभोजनादिव ॥ ४३० ॥
अत एवाभिधीयन्ते, ते मनोभक्षिणः सुराः । प्रज्ञापनादिसूत्रेषु, पूर्वर्षिसंप्रदायतः ॥ ४३१ ॥

तथाहुः—"मणोभक्खिणो ते देवगणा पण्णत्ता समणाउसो !" ।

आहार्यपुद्गलांस्तांश्च, विशुद्धावधिलोचनाः । अनुत्तरसुरा एव, पश्यन्ति न पुनः परे ॥ ४३२ ॥

सहस्राणि दशाब्दानां, येषामायुर्जघन्यतः । भवनेशव्यन्तरास्तेऽहोरात्रसमतिक्रमे ॥ ४३३ ॥
इच्छन्ति पुनराहारं, तथा स्तोकैश्च सप्तभिः । उच्छ्वसन्ति शेषकाले, नोच्छ्वासो न मनोऽशनम् ॥ ४३४ ॥
दशभ्योऽब्दसहस्रेभ्यो, वर्द्धमानैः क्षणादिभिः । किञ्चिदूनसागरान्तं, यावद्येषां स्थितिर्भवेत् ॥ ४३५ ॥
तेषां दिनपृथक्त्वैः स्याद्वृद्धिभाग् भोजनान्तरम् । मुहूर्त्तानां पृथक्त्वैश्च, श्वासोच्छ्वासान्तरं क्रमात् ॥ ४३६ ॥
पृथक्त्वं तु द्विप्रभृतिनवपर्यन्तमुच्यते । पूर्णाम्भोधिस्थितीनां तु, ततः सागरसंख्यया ॥ ४३७ ॥
आहारोऽब्दसहस्रैः स्यात्पक्षैरुच्छ्वास एव च । एवं च स्वर्गयोराद्यद्वितीययोः सुधाभुजः ॥ ४३८ ॥
जघन्यजीविनो घस्रपृथक्त्वेनैव भुञ्जते । मुहूर्त्तानां पृथक्त्वेन, श्वासोच्छ्वासं च कुर्वते ॥ ४३९ ॥
द्वाभ्यां वर्षसहस्राभ्यामश्नन्त्युत्कृष्टजीविनः । मासेन चोच्छ्वसन्त्येवं, भाव्या मध्यमजीविनः ॥ ४४० ॥
एवमेते कृताहाराः, पुनरप्यप्सरोजनैः । उपक्रान्ते नाटकादौ, प्रवर्त्तयन्ति मानसम् ॥ ४४१ ॥
कदाचिच्च जलक्रीडां, कदाचिन्मज्जनक्रियाम् । कदाचिच्च सुहृद्गोष्ठीसुखान्यनुभवन्त्यमी ॥ ४४२ ॥
कदाचिद्यान्ति सुहृदां, वेश्मसु प्रेमनिर्भराः । तेऽपि तानुपसर्पन्ति, कृत्वाऽभ्युत्थानमादरात् ॥ ४४३ ॥
आसनं ददते हस्ते, धृत्वोपवेशयन्ति च । योजिताञ्जलयः सत्कारयन्त्यम्बरभूषणैः ॥ ४४४ ॥
एवमागच्छतां प्रत्युद्गमनं पर्युपासनम् । स्थितानां गच्छतां चानुगमनं रचयन्त्यमी ॥ ४४५ ॥
तथोक्तं—"अत्थि णं भंते ! असुरकुमाराणं सक्कारेति वा जाव पडिसंसाहणया ?, जाव वेमाणियाणं"
ततो विनीतैस्तैर्मित्रदेवैः सह कदाचन । तेषामेव विमानेषु, क्रीडन्तः सुखमासते ॥ ४४६ ॥
एकैकस्मिन्नाट्यकामक्रीडागोष्ठ्यादिशर्मणि । यात्यविज्ञात एवाशु, कालो भूयान्निमेषवत् ॥ ४४७ ॥
तथाह छुटितगाथा—
"दो वाससहस्साइं, उड्ढं अमराण होइ विसयसुहं । पणसयपणसयहीणं, जोइसवणभवणवासीणं" ॥
एवं तत्तन्निधुवनसंगीतप्रेक्षणादिभिः । सदाप्यसंपूर्णकार्या, न तेऽत्रागन्तुमीशते ॥ ४४८ ॥
किंच–तत्तद्विमानाभरणदेवाङ्गनादिवस्तुषु । संक्रान्तनव्यप्रेमाणो, नैतेऽत्रागन्तुमीशते ॥ ४४९ ॥
कदाचिदुत्सहन्ते चेत्पूर्वजन्मोपकारिणः । मातापितृस्निग्धबन्धुगुरुशिष्यप्रियाऽङ्गजान् ॥ ४५० ॥
द्रष्टुं दर्शयितुं स्वीयदिव्यसंपत्तिवैभवम् । तदागत्यार्गलायन्तेऽनर्गलाः स्वर्गयोषितः ॥ ४५१ ॥
किमेतदाद्यकवले, मक्षिकापतनोपमम् । आरब्धं क्षणमप्येकं, त्वां विना प्राणिमः कथम् ? ॥ ४५२ ॥
अद्यापि तादृशः स्नेहस्तासु पूर्वप्रियासु चेत् । तदाऽस्मान् कृत्रिमप्रेम्णा, कदर्थयसि नाथ किम् ?॥ ४५३ ॥
अथ यास्यथ तन्नाट्यमिदमादिममङ्गलं । दृष्ट्वा यथेच्छं गच्छन्तु, किं रुध्याः करिणः करैः ? ॥ ४५४ ॥
इत्यादिप्रेमसंदर्भगर्भितैस्तद्वचोगुणैः । नियन्त्रितास्तद्दाक्षिण्यात्, तत्रैते ददते मनः ॥ ४५५ ॥
तत्ताण्डवसमाप्त्या तु, पूर्वसंबन्धिनां नृणाम् । भवा भवन्ति भूयांसः, प्रायः स्वल्पायुषामिह ॥ ४५६ ॥

किंच प्राग्भवबन्धूनां, तादृक्पुण्याद्यभावतः । नागन्तुमीशते तेऽत्राषाढाचार्याद्यशिष्यवत् ॥ ४५७ ॥

तथोक्तं स्थानाङ्गे —"तिहिं ठाणेहिं अहुणोववन्ने देवे देवलोगेसु इच्छेज्जा माणुसं लोगं हव्वमागच्छित्तए, णो चेव णं संचाएति हव्वमागच्छित्तए, अहुणोववन्ने देवे देवलोए दिव्वेसु कामभोएसु मुच्छिए गिद्धे गढिए अज्झोववण्णे, से णं माणुस्सए कामभोए नो आढाति नो परि० नो अट्ठं बंधइ नो नियाणं पक० नो ठितिपगप्पं क० १. अहुणोववन्ने देवे देवलोएसु दिव्वेसु कामभोएसु मुच्छिए गिद्धे गढिए अज्झोववन्ने तस्सणं माणुस्सए पेम्मे वोच्छन्ने भवइ, दिव्वे पेम्मे संकंते भवइ २ अहुणोववन्ने देवे देवलोएसु दिव्वेसु कामभोगेसु मुच्छिए जाव अज्झो० तस्स णं एवं भवइ इयण्हिं गच्छं, मुहुत्ता गच्छं तेणं कालेणं अप्पाउया मणुया कालधम्मुणा संजुत्ता भवंति ३," इत्यादि ।

तथाऽस्य नरलोकस्य, दुर्गन्धोऽपि प्रसर्पति । नानामृतकविण्मूत्राद्यशुचिप्रभवो महान् ॥ ४५८ ॥
तत्राप्यजितदेवादिकालेऽतिप्रचुरा नराः । तथा भवन्ति तिर्यञ्चः, क्षेत्रेषु निखिलेष्वपि ॥ ४५९ ॥
तदा मूत्रपुरीषादिबाहुल्यात्पूतिपुद्गलाः । ऊर्ध्वं यान्तो वासयन्ति, पुद्गलानपरापरान् ॥ ४६० ॥
योजनानां शतान्येवं, पञ्च यावत्परैः परैः । दूष्यन्ते पुद्गला जीवा, इवोत्सूत्रप्ररूपकैः ॥ ४६१ ॥
यदा तु नरतिर्यञ्चो, नरक्षेत्रे स्युरल्पकाः । तदा पूतिपुद्गलानामल्पत्वादूर्ध्वगामिनाम् ॥ ४६२ ॥
चतुःशतीं योजनानां, यावत्तैरपरापरैः । व्रजद्भिरूर्ध्वं भाव्यन्ते, प्रोक्तयुक्त्यैव पुद्गलाः ॥ ४६३ ॥
एवं परं योजनेभ्यो, नवभ्यो गन्धपुद्गलाः । कथं स्युर्घ्राणविषया, नैषा शङ्काऽपि संभवेत् ॥ ४६४ ॥
उक्तं च—"चत्तारि पंच जोअणसयाइं गंधो य मणुअलोअस्स । उड्ढं वच्चइ जेणं, नहु देवा तेण आवंति" ॥
[बृहत्संग्रहणी गा. १९४]

उपदेशमालाकर्णिकायां तु—

"ऊर्ध्वगत्या शतान्यष्टौ, सहस्रमपि कर्हिचित् । मर्त्यानां याति दुर्गन्धस्तेनेहायान्ति नामराः ॥

इत्युक्तमिति ज्ञेयं— तथा च—

मलमूत्रश्लेष्मपूर्णे, मक्षिकाकोटिसंकटे । समन्ततोऽतिचपलकृमिकीटशतावटे ॥ ४६५ ॥
पुरीषसदने स्थित्वा, मित्रकल्पेन केनचित् । एहि मित्र ! क्षणं तिष्ठ, किञ्चिद्वच्मीत्यनेकशः ॥ ४६६ ॥
आहूयेत जनः कश्चित्, सद्यःस्नातः कृताशनः । कृतचन्दनकर्पूरकस्तूर्यादिविलेपनः ॥ ४६७ ॥
जानन्नपि स तत्रेष्टं, यथा गन्तुं न शक्नुयात् । तद्दुर्गन्धपराभूतिसंकोचितविकूणिकः ॥ ४६८ ॥
तथा भूयः स्मरन्तोऽपि, नृक्षेत्रे पूर्वबान्धवान् । दुर्गन्धाभिभवादत्र, न तेऽभ्यागन्तुमीशते ॥ ४६९ ॥
सत्यप्येवमतिप्रौढपुण्यप्राग्भारशालिनाम् । श्रीमतामर्हतां तेषु, कल्याणकेषु पञ्चसु ॥ ४७० ॥

मरुताश्वत्थपर्णेभकर्णकम्प्रनिजासनाः । स्वश्रद्धातिशयात्केचिद्देवेन्द्रशासनात्परे ॥ ४७१ ॥
मित्रानुवर्त्तनात्केचित्पत्नीप्रेरणया परे । स्थितिहेतोः परे देवदेवीसंपातकौतुकात् ॥ ४७२ ॥
क्षणादेवातिदुर्गन्धमपि लोकं नृणामिमम् । अर्हत्पुण्यगुणाकृष्टा, इवायान्त्युत्सुकाः स्वयम् ॥ ४७३ ॥
महात्मनां महर्षीणां, यद्वोत्कृष्टतपस्विनाम् । माहात्म्यमुद्भावयितुमिहायान्ति सुधाभुजः ॥ ४७४ ॥
अश्रद्दधाना यदि वा, साधुश्राद्धादिसद्गुणान् । सम्यग्दृग्वर्णितांस्तेऽत्रायान्ति तांस्तान् परीक्षितुम् ॥ ४७५ ॥
यद्वा तादृकपुण्यशालिशालिभद्रादिवद्भृशम् । पुत्रादीनां प्रेमधाम्नां, स्नेहोद्रेकैर्वशीकृताः ॥ ४७६ ॥
गोभद्रादिवदागत्य, नित्यं नवनवैरिह । दिव्यभोगसंविभागैः, स्नेहं सफलयन्ति ते ॥ ४७७ ॥
यद्वा प्रागुक्तवचनस्मरणाद्विस्मृतादराः । स्वान् बोधयितुमायान्त्याषाढाचार्यान्त्यशिष्यवत् ॥ ४७८ ॥
एवं पूर्वभवस्नेहकार्मणेन वशीकृताः । नरकेष्वपि गच्छन्ति, केचिद्वैमानिकामराः ॥ ४७९ ॥
तथाहि द्वारकाद्रङ्गभङ्गे जराङ्गजेषुणा । मृत्वाऽन्तिमो वासुदेवस्तृतीयं नरकं गतः ॥ ४८० ॥
रामोऽथ मोहात् षण्मासान्, व्यूढभ्रातृकलेवरः । शिलातलाम्भोजवापादिभिर्देवेन बोधितः ॥ ४८१ ॥
भ्रातुर्देहस्य संस्कारं, कृत्वा संवेगमागतः । प्रव्रज्य नेमिप्रहितचारणश्रमणान्तिके ॥ ४८२ ॥
पारणाय व्रजन् क्वापि, स्वरूपव्यग्रया स्त्रिया । दृष्ट्वा घटभ्रमात्कूपे, क्षिप्यमाणं निजाङ्गजम् ॥ ४८३ ॥
वन एव मया स्थेयमित्यभिग्रहवान्मुनिः । तुङ्गिकाद्रौ तपः कुर्वन्, वन्यसत्त्वान्निबोधयन् ॥ ४८४ ॥
दत्ताहारो रथकृता, हरिणेनानुमोदितः । तरुशाखाहतस्ताभ्यां, सह ब्रह्मसुरोऽभवत् ॥ ४८५ ॥
बलदेवसुरः सोऽथ, प्रयुक्तावधिलोचनः । भ्रातरं नरके दृष्ट्वोत्सुकस्तत्र द्रुतं गतः ॥ ४८६ ॥
तमुद्दिधीर्षुर्नरकादवोचत् केशवः सुरम् । भ्रातरेवं भृशं पीड्ये, सूतपातं पतत्तनुः ॥ ४८७ ॥
मया कृतानि कर्माणि, भोक्तव्यानि मयैव हि । वचः किमन्यथा तत्स्याद्यन्नेमिस्वामिनोदितम् ॥ ४८८ ॥
गच्छ बन्धो ! ततस्तुभ्यं, भद्रं स्तात्कर्हिचित्स्मरेः । प्रथयेर्महिमानं नो, दुर्यशो यन्निवर्त्तते ॥ ४८९ ॥
ततः स बान्धवप्रेम्णा, विमाने श्रीधरं हरिम् । पीताम्बरं चक्रपाणिं, विकृत्य हलभृद्युतम् ॥ ४९० ॥
द्वारिकेयमनेनैव, कृताऽनेनैव संहृता । कर्त्तुं हर्त्तुं हरिरेव, क्षमोऽसौ जगदीश्वरः ॥ ४९१ ॥
तस्माद्भुक्तिं च मुक्तिं च, प्रेप्सुभिः सेव्यतामयम् । आगत्य भरतक्षेत्रे, सर्वत्रेत्युदघोषयत् ॥ ४९२ ॥
एवं सर्वत्र विस्तार्य, महिमानं महीतले । यथास्थानं सुरोऽयासीद्भ्रातृदुःखेन दुःखितः ॥ ४९३ ॥
इत्थमेव च सीताया, जीवोऽच्युतसुरेश्वरः । गत्वाऽऽशु देवरप्रेम्णा, चतुर्थीं नरकावनीम् ॥ ४९४ ॥
युद्ध्यमानौ मिथः पूर्ववैराल्लक्ष्मणरावणौ । युद्धान्न्यवर्त्तयद्धर्मवचनैः प्रतिबोधयन् ॥ ४९५ ॥
पञ्चमाङ्गेऽपि सप्तम्या, अधस्ताद्देवकर्तृकम् । ऊचेऽब्दवर्षणादिनि, तत्राप्येषां गतिः स्मृता ॥ ४९६ ॥

तथाहुः—"अत्थि णं भंते ! इमीसे रयणप्पहाए अहे उराला बलाहया संसेयंति संमुच्छंति वासं वासंति, ? हंता अत्थि, तिन्निवि पकरेंति देवोऽवि असुरोऽवि नागोऽवि, एवं दोच्चाए पुढवीए भाणियव्वं, एवं तच्चाए पुढवीए भा०, नवरं देवोऽवि प०, असुरोवि प०, नो नागो, एवं चउत्थीएवि, नवरं देवो एक्को प०, नो असु० नो नाओ, एवं हेट्ठिल्लासु सव्वासु देवो एक्को प०, नो नाओत्ति, नागकुमारस्य तृतीयायाःपृथिव्या अधोगमनं नास्तीत्यत एवानुमीयते 'नो असुरो नो नाओ'त्ति इहाप्यत एव वचनाच्चतुर्थ्यादीनामधोऽसुरकुमारनागकुमारयोर्गमनं नास्तीत्यनुमीयते" भगवतीसूत्रवृत्तौ षष्ठशतकअष्टमोद्देशके, तत्त्वार्थवृत्तौ तु "येषां द्वे सागरोपमे जघन्या स्थितिस्ते किल देवाः सप्तमधरां प्रयान्ति, ते च सनत्कुमारकल्पात्प्रभृति लभ्यन्ते, शक्तिमात्रं चैतद्वर्ण्यते, न पुनः कदाचिदप्यगमन्, तिर्यगसंख्येयानि योजनकोटीनां कोटिसहस्राणि, 'ततः परमि'त्यादि, सागरोपमद्वयादधो जघन्या स्थितिर्येषां न्यूना न्यूनतमा चेति ते चैकैकहीनां भुवमनुप्राप्नुवन्तियावत्तृतीया पृथिवी, तां च तृतीयां पूर्वसंगतिकाद्यर्थं गता गमिष्यन्ति, परतस्तु सत्यामपि शक्तौ न गतपूर्वा नापि गमिष्यन्ति औदासीन्यात्—माध्यस्थ्याद्, उपर्युपरि न गतिरतयो देवा जिनाभिवन्दनादीन् मुक्त्वे"ति, पञ्चसंग्रहे तु—"सहसारंतिअदेवा नारयनेहेण जंति तइयभुवं । निज्जंति अच्चुअं जा अच्चुअदेवेण इयरसुरा ॥ १ ॥ एतट्टीकायामपि श्रीमलयगिरिविरचितायां—आनतादयो देवाः पुनरल्पस्नेहादिभावात् स्नेहादिप्रयोजनेनापि नरकं न गच्छंतीति सहस्रारांतग्रहण" मिति ।

एवं मित्रादिसाहाय्यादिनोर्ध्वं यावदच्युतम् । यान्त्यायान्ति च कल्पस्थाः, परतस्तु न जातुचित् ॥ ४९७ ॥
केचित्त्वल्पर्द्धिका देवा, यावच्चत्वारि पञ्च वा । देवावासानतिक्रम्य, स्वशक्त्या परतस्ततः ॥ ४९८ ॥
गन्तुं न शक्नुवन्त्यन्यसाहाय्यात् शक्नुवन्त्यपि । महर्द्धिकानां मध्येऽपि, नैवामी गन्तुमीशते ॥ ४९९ ॥
अल्पर्द्धिकानां मध्ये तु, सुखं यान्ति महर्द्धिकाः । समर्द्धिकानां मध्ये चेद्ययासन्ति समर्द्धिकाः ॥ ५०० ॥
तदा विमोह्य महिकाद्यन्धकारविकुर्वणात् । अपश्यत इमान् देवानतिक्रामन्ति नान्यथा ॥ ५०१ ॥

तथोक्तं—"आतिड्ढीएणं भंते ! देवे जाव चत्तारि पंच देवावासंतराइं विइक्कंते, तेण परं परिड्ढीएणं," इत्यादि, भगवतीदशमशतकतृतीयोद्देशके ।

सौधर्मेशानयोर्देवलोकयोरथ नाकिनः । उत्कृष्टस्थितयः शक्रशक्रसामानिकादयः ॥ ५०२ ॥
रत्नप्रभायाः सर्वाधोभागं यावदधो दिशि । स्वयोग्यं मूर्त्तिमद्द्रव्यं, पश्यन्त्यवधिचक्षुषा ॥ ५०३ ॥
तिर्यग्दिशि त्वसंख्येयान्, पश्यन्ति द्वीपवारिधीन् । ऊर्ध्वं स्वस्वविमानानां, चूलिकाग्रध्वजावधि ॥ ५०४ ॥
अनुत्तरान्ताः सर्वेऽप्यसंख्येयान् द्वीपवारिधीन् । तिर्यक् प्रपश्यन्त्यधिकाधिकान् किंतु यथोत्तरम् ॥ ५०५ ॥
वैमानिकानां यदधोऽवधिर्भूम्ना विजृम्भते । भवनेशव्यन्तराणामूर्ध्वं भूम्ना प्रसर्पति ॥ ५०६ ॥
ज्योतिषां नारकाणां तु, तिर्यग् भृशं प्रसर्पति । नृतिरश्चामनियतदिक्को नानाविधोऽवधिः ॥ ५०७ ॥
स्वयंभूरमणाम्भोधौ, यथा मत्स्या जगद्गतैः । भवन्ति सर्वैराकारैर्नृतिर्यगवधिस्तथा ॥ ५०८ ॥

मत्स्यास्तु वलयाकारा न भवेयुरयं पुनः । संभवेद्वलयाकारोऽप्यसौ नानाकृतिस्ततः ॥ ५०९ ॥

तथोक्तं संग्रहणीवृत्तौ—

"नाणागारो तिरिए, मणुए मच्छा संयभूरमणेव । तत्थ वलयं निसिद्धं, तस्स पुण तयंपि होज्जाहि" ॥

वैमानिकानां सर्वेषां, जघन्योऽवधिगोचरः । अङ्गुलासंख्येयभागमानो ज्ञेयो मनस्विभिः ॥ ५१० ॥

ननु सर्वजघन्योऽसौ, नृतिर्यक्ष्वेव संभवेत् । सर्वोत्कृष्टो नरेष्वेव, राद्धान्तोऽयं व्यवस्थितः ॥ ५११ ॥

तथोक्तं—"उक्कोसो मणुएसुं मणुस्सतेरिच्छिएसु अ जहन्नो"त्ति, [विशेषावश्यक श्लो. ७०६]

कथं वैमानिकानां तत्, प्रोक्तः सर्वजघन्यकः । अङ्गुलासंख्येयभागमात्रोऽथात्र निरूप्यते ॥ ५१२ ॥

केषाञ्चिदिह देवानामुत्पत्तौ तादृशोऽवधिः । भवेत्प्राग्भवसंबन्धी, स जघन्योऽत्र दर्शितः ॥ ५१३ ॥

आगमे तु नैष पारभविकत्वाद्विवक्षितः । तथा च भगवानाह, क्षमाश्रमणपुङ्गवः ॥ ५१४ ॥

वेमाणियाणमंगुलभागमसंखं जहन्नओ होइ । उववाए परभविओ, तब्भवजो होइ तो पच्छा" ॥

[विशेषावश्यक श्लो. ७०५]

मृदङ्गाकृतिरित्येवं, वैमानिकावधिर्भवेत् । ऊर्ध्वायतो मृदङ्गे हि, विस्तीर्णोऽधः कृशो मुखे ॥ ५१५ ॥

स्थितिमानमथ द्वैधं, जघन्योत्कृष्टभेदतः । सौधर्मेशानदेवानां, प्रतिप्रतरमुच्यते ॥ ५१६ ॥

एकस्य सागरस्यांशाः, प्रकल्प्यन्ते त्रयोदश । प्रथमप्रतरे भागौ, तादृशौ द्वौ परा स्थितिः ॥ ५१७ ॥

द्वितीयप्रतरे भागाश्चत्वारस्तादृशाः स्थितिः । तृतीये षट् चतुर्थेऽष्टौ, पञ्चमे च लवा दश ॥ ५१८ ॥

षष्ठे द्वादश भागास्ते, सप्तमे सागरोपमम् । एकं त्रयोदशेनैकभागेनाभ्यधिका स्थितिः ॥ ५१९ ॥

त्रिभिस्त्रयोदशैर्भागैरधिकं सागरोपमम् । अष्टमे प्रतरे ज्ञेयं, नवमे पञ्चभिश्च तैः ॥ ५२० ॥

दशमे सप्तभिर्भागैरधिकं सागरोपमम् । एकादशे च नवभिर्द्वादशे प्रतरे पुनः ॥ ५२१ ॥

एकादशभिरंशैस्तैः, साधिकं सागरोपमम् । त्रयोदशे च प्रतरे, पूर्णे द्वे सागरोपमे ॥ ५२२ ॥

त्रयोदशस्वपि तथा, प्रतरेषु जघन्यतः । स्थितिः पल्योपममेकं, नास्माद्धीना भवेदिह ॥ ५२३ ॥

कल्पेषु शेषेष्वप्येवं, या या यत्र जघन्यतः । एकरूपैव सा सर्वप्रतरेषु भवस्थितिः ॥ ५२४ ॥

न त्वाद्यप्रतरोत्कृष्टा, प्रतरे ह्युत्तरोत्तरे । जघन्यतः स्थितिश्चिन्त्या, नरकप्रस्तटादिवत् ॥ ५२५ ॥

एवमीशानेऽपि भाव्या, स्थितिः सौधर्मवद्बुधैः । वाच्या किन्त्वधिका किञ्चिज्जघन्या परमापि च ॥ ५२६ ॥

अधिकत्वं तु सामान्यान्निरूपितमपि श्रुते । पल्योपमस्यासंख्येयभागेनाहुर्महर्षयः ॥ ५२७ ॥

संग्रहणीवृत्त्यभिप्रायोऽसौ ॥

सप्तहस्तमितं देहमिह स्वाभाविकं भवेत् । अङ्गुलासंख्येयभागमानमेतज्जघन्यतः ॥ ५२८ ॥

कृत्रिमं वैक्रियं तत्तु, लक्षयोजनसंमितम् । इदमङ्गुलसंख्येयभागमात्रं जघन्यतः ॥ ५२९ ॥

जघन्यं द्वैधमप्येतत्प्रारम्भसमये भवेत् । कृत्रिमं वैक्रियं त्वेतत्तुल्यमेवाच्युतावधि ॥ ५३० ॥

ग्रैवेयकानुत्तरेषु, विमानेषु तु नाकिनाम् । तादृक्प्रयोजनाभावान्नास्त्येवोत्तरवैक्रियम् ॥ ५३१ ॥
लेश्याऽत्र तेजोलेश्यैव, भवेद्भवस्वभावतः । द्रव्यतो भावतस्त्वेषां, विवर्त्तन्ते षडप्यमूः ॥ ५३२ ॥
गर्भजा नरतिर्यञ्च, एवोत्पद्यन्त एतयोः । स्वर्गयोर्नापरेऽत्रत्या, देवा गच्छन्ति पञ्चसु ॥ ५३३ ॥
गर्भजेषु नृतिर्यक्षु, संख्यातायुष्कशालिषु । पर्याप्तबादरक्ष्मोणी, पाथो वनस्पतिष्वपि ॥ ५३४ ॥
द्वेधा भवन्ति देव्योऽत्र, काश्चित्कुलाङ्गना इव । सभर्तृकास्तदन्यास्तु, स्वतन्त्रा गणिका इव ॥ ५३५ ॥
आद्ये परिगृहीतानां, स्थितिरुत्कर्षतो भवेत् । पल्योपमानि सप्तैव, पल्योपमं जघन्यतः ॥ ५३६ ॥
तासामीशाननाके तु, नवपल्योपमात्मिका । गरीयसी लघुः पल्योपमं समधिकं स्थितिः ॥ ५३७ ॥
साधारणीनां सौधर्मे, विमानाः सुरयोषिताम् । षड् लक्षाणि द्वितीये तु, लक्षाश्चतस्र एव ते ॥ ५३८ ॥
साधारणसुरस्त्रीणां, सौधर्मे स्याद्गुरुः स्थितिः । पल्योपमानि पञ्चाशत्, पल्योपमं जघन्यतः ॥ ५३९ ॥
आसामीशाने तु पञ्चपञ्चाशत्परमा स्थितिः । पल्योपमानि हीना तु, पल्यं किञ्चन साधिकम् ॥ ५४० ॥
यासां सौधर्मेऽथ साधारणदिव्यमृगीदृशाम् । स्थितिः पल्योपमेकं, ताः स्तोकद्युतिवैभवाः ॥ ५४१ ॥
सौधर्मनाकिनामेव, तादृक्पण्याङ्गनादिवत् । भोग्या न तूपरितनस्वर्गिणां प्रायशः खलु ॥ ५४२ ॥
यासां त्वेकादिसमयाधिकपल्योपमादिका । स्थितिः क्रमाद्वर्द्धमाना, दशपल्योपमावधि ॥ ५४३ ॥
सनत्कुमारदेवानां, भोग्यास्ता नोर्ध्ववर्त्तिनाम् । दशभ्यश्च परं पल्योपमेभ्यः समयादिभिः ॥ ५४४ ॥
स्थितिः समधिका यावत्पल्योपमानि विंशतिः । यासां ता ब्रह्मदेवानां, भोग्या नोपरिवर्त्तिनाम् ॥ ५४५ ॥
समयाद्यधिका पल्योपमेभ्यो विंशतेः परम् । यासां स्थितिः स्याद्देवीनां, त्रिंशत्पल्योपमावधिः ॥ ५४६ ॥
शुक्रदेवोपभोग्यास्तास्त्रिंशत्पल्योपमोपरि । समयाद्यधिका चत्वारिंशत्पल्योपमावधिः ॥ ५४७ ॥
यासां स्थितिस्ता भोग्याः स्युरानतस्वर्गवासिनाम् । पल्योपमेभ्यश्चत्वारिंशतश्च समयादिभिः ॥ ५४८ ॥
वर्द्धमाना क्रमात्पञ्चाशत्पल्यावधिका स्थितिः । यासां ताः परिभोग्याः स्युरारणस्वर्गवर्त्तिनाम् ॥ ५४९ ॥
ईशानेऽप्येवमधिकपल्योपमस्थितिस्पृशः । देव्यस्तद्वासिनामेव, देवानां यान्ति भोग्यताम् ॥ ५५० ॥
ततः समधिकात्पल्योपमाच्च समयादिभिः । वर्धमाना स्थितिः पञ्चदशपल्योपमावधिः ॥ ५५१ ॥
यासां माहेन्द्रदेवानां, भोग्यास्ताः सुरयोषितः । पल्योपमेभ्योऽथ पञ्चदशभ्यः समनन्तरम् ॥ ५५२ ॥
समयाद्यधिका पल्योपमानि पञ्चविंशतिम् । यावद्यासां स्थितिर्भोग्यास्ता लान्तकसुधाभुजाम् ॥ ५५३ ॥
पल्योपमेभ्योऽथ पञ्चविंशतिः समनन्तरम् । समयाद्यधिका पञ्चत्रिंशत्पल्योपमावधिः ॥ ५५४ ॥
यासां स्थितिः सहस्रारदेवभोग्या भवन्ति ताः । ततः परं पञ्चचत्वारिंशत्पल्योपमावधिः ॥ ५५५ ॥
स्थितिर्यासां तास्तु भोग्याः, प्राणतस्वर्गसद्मनाम् । ततोऽग्रे पञ्चपञ्चाशत्पल्योपमावधिः स्थितिः ॥ ५५६ ॥
यासां ता अच्युतस्वर्गदेवानां यान्ति भोग्यताम् । नाधस्तनानां निःस्वानां, समृद्धा गणिका इव ॥ ५५७ ॥

विमानसंख्यानियमो, विशेषश्च स्थितेरपि । प्रतिप्रतरमासां नो, जानीमोऽसंप्रदायतः ॥ ५५८ ॥
किंतु संभाव्यत एवमधिकाधिकजीविताः । ऊर्ध्वोर्ध्वप्रतरे यावच्चरमे परमायुषः ॥ ५५९ ॥
आहारोच्छ्वाससमयदेहमानादिकं किल । अशेषमुक्त शेषं च, भाव्यमासां सुपर्ववत् ॥ ५६० ॥
तथा– भवनव्यन्तरज्योतिष्कादिदेवव्यपेक्षया । वैमानिकानां सौख्यानि, बहून्युग्रशुभोदयात् ॥ ५६१ ॥
तच्चैवं– चतुर्विधानां देवानां, स्यु पुण्यकर्मपुद्गलाः । उत्कृष्टोत्कृष्टतरकोत्कृष्टतमानुभागकाः ॥ ५६२ ॥
आयुः कर्मसहचरा, अनन्तानन्तका अथ । तन्मध्याद्यावता कर्मविभागान् व्यन्तरामराः ॥ ५६३ ॥
अनन्तानपि तुच्छानुभागानब्दशतेन वै । जरयन्ति मितस्नेहभोज्यवत् क्षुधिता जनाः ॥ ५६४ ॥
कर्मांशांस्तावत एव, जरयन्त्यसुरान् विना । नव नागादयो वर्षशताभ्यां स्निग्धभोज्यवत् ॥ ५६५ ॥
असुरास्तावतः कर्माणून् वत्सरशतैस्त्रिभिः । वत्सराणां चतुःशत्या, ग्रहनक्षत्रतारकाः ॥ ५६६ ॥
पञ्चभिश्च वर्षशतैर्निशाकरदिवाकराः । एकेनाब्दसहस्रेण, सौधर्मेशाननाकिनः ॥ ५६७ ॥
द्वाभ्यां वर्षसहस्राभ्यां, तृतीयतुर्यनाकगाः । त्रिभिः सहस्रैर्वर्षाणां, ब्रह्मलान्तकवासिनः ॥ ५६८ ॥
चतुःसहस्र्याऽब्दैः शुक्रसहस्रारभवाः सुराः । वर्षपञ्चसहस्र्या चानतादिस्वश्चतुष्कगाः ॥ ५६९ ॥
अधोग्रैवेयका वर्षलक्षेण मध्यमास्तु ते । द्वाभ्यां वत्सरलक्षाभ्यां, लक्षैस्त्रिभिस्तदूर्ध्वगाः ॥ ५७० ॥
चतुर्भिश्च वर्षलक्षैर्विजयादिविमानगाः । पञ्चभिर्वर्षलक्षैश्च, सर्वार्थसिद्धनाकिनः ॥ ५७१ ॥
तुल्यप्रदेशा अप्येवं, क्रमोत्कृष्टानुभागतः । कर्मांशाः स्युश्चिरक्षेप्याः, स्निग्धचक्र्यादिभोज्यवत् ॥ ५७२ ॥

तथा च सूत्रं—"अत्थि णं भंते ! देवाण अणंते कम्मंसे जे जहण्णेणं एक्केण वा दोहिं तिहिं वा उक्कोसेणं पंचहिं वाससएहिं खवयंति, ? हंता अत्थि" इत्यादि भगवती अष्टादशशतकसप्तमोद्देशके ॥

ततोऽमीषां शुभोत्कृष्टानुभागकर्मयोगतः । चिरस्थायीनि सौख्यानि, पुष्टान्यच्छिदुराणि च ॥ ५७३ ॥
एवं स्वस्वस्थित्यवधिं, देवा देव्यो यथाकृतम् । प्रायः सुखं कदाचित्तु, दुःखमप्युपभुञ्जते ॥ ५७४ ॥

उक्तं च– "भवणवइवाणमंतरजोइसियवेमाणिया एगंतसायं वेदणं वेदिंति, आहच्च अस्सायं" भगवतीसूत्रे षष्ठशतकदशमोद्देशके ॥ तत्त्वार्थचतुर्थाध्यायटीकायामप्युक्तं– "यदा नाम केनचिन्निमित्तेनाशुभवेदना देवानां प्रादुरस्ति तदाऽन्तर्मुहूर्त्तमेव स्यात्, ततः परं नानुबध्नाति. सद्वेदनापि सततं षाण्मासिकी भवति, ततः परं विच्छिद्यतेऽन्तर्मुहूर्त्तं ततः पुनरनुवर्त्तते" इति ।

तथा हि तुल्यस्थितिषु, निर्जरेषु परस्परम् । प्रागुत्पन्नाः सुराः पश्चादुत्पन्नेभ्योऽल्पतेजसः ॥ ५७५ ॥
पश्चादुत्पन्नाश्च पूर्वोत्पन्नेभ्योऽधिकतेजसः । इत्थं कथञ्चित्स्यात्तेषां, जरा कान्त्यादिहानितः ॥ ५७६ ॥
ततस्तेजस्विनो वीक्ष्य, नवोत्पन्नान् परान् सुरान् । वृद्धा यून इवोद्वीक्ष्य, ते खिद्यन्तेऽपि केचन ॥ ५७७ ॥
युद्धादिषु मिथस्तेषां, प्रतिपक्षादिनिर्मिता । शस्त्रादिघातजा जातु, देहपीडाऽपि संभवेत् ॥ ५७८ ॥

तथा प्रियादीष्टवस्तुविनाशविप्रयोगजः । शोको मनःखेदरूपो, मरुतामपि संभवेत् ॥ ५७९ ॥

यदाहुः– "जे णं जीवा सारीरं वेदणं वेदेंति तेसि णं जीवाणं जरा, जे णं जीवा माणसं वेदणं वेदेंति तेसि णं जीवाणं सोगे, से तेणट्ठेणं जाव सोगेऽवि, एवं जाव वेमाणियाणं", भगवतीषोडशशतकद्वितीयोद्देशके ।

तथा प्राक् प्रौढपुण्याप्तां, केऽपि दृष्ट्वा परश्रियम् । मत्सरेणाभिभूयन्ते, निष्पुण्याः सुखलिप्सवः ॥ ५८० ॥

उक्तं च– "ईसाविसाय०" ।

किंच माल्यम्लानिकल्पवृक्षप्रकम्पनादिभिः । चिह्नैर्जानन्ति तेऽमीभिः, षण्मासान्तर्गतां मृतिम् ॥ ५८१ ॥

तथाहि– "माल्यम्लानिः कल्पवृक्षप्रकम्पः, श्रीहीनाशो वाससां चोपरागः । दैन्यं तन्द्रा कामरागाङ्गभङ्गौ, दृष्टेर्भ्रंशो वेपथुश्चारतिश्च ॥

स्थानाङ्गसूत्रेऽप्युक्तं– "तिहिं ठाणेहिं देवे चविस्सामित्ति जाणइ, विमाणाइं णिप्पभाइं पासित्ता १ कप्परुक्खगं मिलायमाणं पासित्ता २ अप्पणो तेयलेस्सं परिहायमाणिं जाणित्ता ३" इत्यादि ॥

तां समृद्धिं विमानाद्यामासन्नं च्यवनं ततः । गर्भोत्पत्त्यादिदुःखं च, तत्राहारादिवैशसम् ॥ ५८२ ॥

चित्ते चिन्तयतां तेषां, यदुःखमुपजायते । तज्जानन्ति जिना एव, तन्मनो वा परे तु न ॥ ५८३ ॥

उक्तं च— "तं सुरविमाणविभवं, चिंतिय चवणं च देवलोयाओ । अइबलियं चिय जं नवि, फुट्टइ सयसक्करं हिययं" ॥

तथा–विपाकोदयरूपा च, चक्षुर्निमीलनादिभिः । व्यक्तैश्चिह्नैर्भवेद्व्यक्ता, तेषां निद्रा न यद्यपि ॥ ५८४ ॥

प्रदेशोदयतस्त्वेषां, स्यात्तथाप्यन्यथा कथम् । दर्शनावरणीयस्य, सतोऽप्यनुदयो भवेत् ? ॥ ५८५ ॥

क्षयश्चोपशमश्चास्य, देवानां क्वापि नोदितः । श्रुतेऽप्येषां कर्मबन्धहेतुत्वेनेयमीरिता ॥ ५८६ ॥

तथाहुः— "जीवे णं भंते ! निद्दायमाणे वा पयलायमाणे वा कति कम्मपगडीओ बंधइ ?, गो० ! सत्तविहबंधए वा, अट्ठविहबंधए वा, एवं जाव वेमाणिए, एवं जीवे णं भंते ! हसमाणे वा उस्सुयायमाणे वा कति क० बं० ?, गो० ! सत्तविहबं० वा, अट्ठविहबं० वा, एवं जाव वेमाणिए" भगवतीसूत्रे पञ्चमशतकचतुर्थोद्देशके, इह च पृथिव्यादीनां हासः प्राग्भविक-तत्परिणामादवसेय" मित्येतद्वृत्तौ ।

एवं स्वभावतो निद्रासद्भावेऽपि सुधाभुजाम् । येयं तन्द्रा मृतेश्चिह्नं, सा तु भिन्नैव भाव्यते ॥ ५८७ ॥

किंच–षड्जीवकायारम्भेषु, रता मिथ्यात्वमोहिताः । यागादिभिर्जीवहिंसोपहारैर्मुदिताशयाः ॥ ५८८ ॥

शरीरासनशय्यादिभाण्डोपकरणेष्वपि । विमानदेवदेवीषु, हर्म्यक्रीडावनादिषु ॥ ५८९ ॥

पूर्वप्रेम्णा स्वीकृतेषु नृतिर्यक्ष्वपि मूर्च्छिताः । सचित्ताचित्तमिश्रेषु, मग्नाः परिग्रहेष्विति ॥ ५९० ॥

तथाहुः– "असुरकुमारा पुढविकायं समारभंति जाव तसकायं समारभंति, सरीरा परिग्गहिया भवंति, कम्मा प० भ०, भवणा प० भ०, देवा देवीओ मणूसीओ तिरिक्खजोणिआ

तिरिक्खजोणिणीओ प० भ०, आसणसयणभंडमत्तोवगरणा परि० भ० सचित्ताचित्तमीसयाइं दव्वाइं प० भ०, वाणमंतरा जोतिसवेमाणिया जहा भवणवासी तहा णेयव्वा" ।

एवं मिथ्यादृशो यान्ति, सारम्भाः सपरिग्रहाः । च्युत्वोपार्जितपाप्मान, एकेन्द्रियादिदुर्गतिम् ॥ ५९१ ॥
सम्यग्दृशः पुनस्तत्त्वत्रितये कृतनिश्चयाः । जिनादिसेवया यद्वा, पूर्वाधीतश्रुतस्मृतेः ॥ ५९२ ॥
विचारयन्तस्तत्त्वानि, सिद्धान्तोक्तानि चेतसा । शुद्धोपदेशैः सम्यक्त्वं, प्रापयन्तः परानपि ॥ ५९३ ॥
उत्सवेषु महोत्साहा, अर्हत्कल्याणकादिषु । जिनोपदेशान् शृण्वन्तः, सेवमाना जिनेश्वरान् ॥ ५९४ ॥
महर्षीणां नृणां सम्यग्दृशामथ तपस्विनाम् । हितकामाः कृच्छ्रमग्नसंघसाहाय्यकारिणः ॥ ५९५ ॥
दृष्ट्वर्षिं भावितात्मानं, कुर्वन्तो वन्दनादिकम् । तन्मध्येन न गच्छन्ति, स्तब्धमिथ्यात्विदेववत् ॥ ५९६ ॥

तथाहुः—"तत्थ जे अमायिसम्मदिट्ठिउववण्णए देवे से णं अणगारं भावियप्पाणं पासति, पासित्तां णं वंदति णमंसति जाव पज्जुवासति, से णं अणगारस्स भावियप्पणो मज्झंमज्झेणं णो वितीवएज्जा" भगवतीसूत्रे श. १४ उ. ३ ।

एवमर्जितपुण्यास्ते, महर्द्धिभरशालिषु । प्रत्यायान्ति कुलेषूच्चेष्वासन्नभवसिद्धिकाः ॥ ५९७ ॥
तत्रापि सुभगाः सर्वोत्कृष्टरूपा जनप्रियाः । भोगान् भुक्त्वाऽऽत्तचारित्राः, क्रमाद्यान्ति परां गतिम् ॥ ५९८ ॥
नन्वेवमुदिताः सूत्रे, अधर्मे संस्थिताः सुराः । कथं तदेष भावार्थो, न तेन विघटिष्यते ? ॥ ५९९ ॥

तथाहि—"जीवा णं भंते ! किं धम्मे ठिया अधम्मे ठिया धम्माधम्मे ठिया ?, गो० ! जीवा धम्मेवि ठिया, अधम्मे०, धम्माधम्मे०, णेरइया णं पुच्छा, गो०, ! णेरइया नो धम्मे०, नो धम्माधम्मे०, अधम्मे ठिया, मणु० जहा जीवा, वाणमंतर० जोइ० वेमा० जहा णेरइया", भगवतीसूत्रे सप्तदशशतकद्वितीयोद्देशके १७–२ ।

अत्रोच्यते–एषामुक्तमिदं देशसर्वविरत्यभावतः । तथैवात्रोद्देशकादौ, सूत्रेऽपि प्रकटीकृतम् ॥ ६०० ॥

"से णूणं संजयविरयपडिहयपच्चक्खायपावकम्मे धम्मे ठिए अस्संजय० अधम्मे ठिए संजयासंजए धम्माधम्मे ठिए"

सर्वथा संवराभावापेक्षं नत्वेतदीरितम् । संवरद्वाररूपस्य, सम्यक्त्वस्यैषु संभवात् ॥ ६०१ ॥
सम्यक्त्वमपि मिथ्यात्वनिरोधात्संवरः स्फुटः । संवरेष्वत एवेदं, श्रुते पञ्चसु पठ्यते ॥ ६०२ ॥

तथाहुः स्थानाङ्गे समवायाङ्गे भगवत्यां च–पंच संवरदारा प०, तं०–सम्मत्तं विरती अपमादो अकसाइत्तं अजोगित्तं" ।

एको द्वित्रादिसंख्येया, असंख्या अपि कर्हिचित् । उत्पद्यन्ते च्यवन्तेऽमी, एकस्मिन् समये सह ॥ ६०३ ॥
उत्पत्तेश्च्यवनस्यापि, विरहो यदि भाव्यते । सौधर्मेशानयोर्देवलोकयोरमृताशिनाम् ॥ ६०४ ॥
स चतुर्विंशतिं यावन्मुहूर्त्तान् परमो भवेत् । जघन्यतस्तु समयं, यावदुक्तो जिनेश्वरैः ॥ ६०५ ॥

इन्द्रयोरथ सौधर्मेशानस्वर्गाधिकारिणोः । स्वरूपमुच्यते किञ्चिन्मत्वा गुरूपदेशतः ॥ ६०६ ॥
तत्रादिमे देवलोके, प्रतरे च त्रयोदशे । मेरोर्दक्षिणतः पञ्च, स्युर्विमानावतंसकाः ॥ ६०७ ॥
प्रथमं दिशि पूर्वस्यां, तत्राशोकावतंसकम् । दक्षिणस्यां सप्तपर्णावतंसकमिति स्मृतम् ॥ ६०८ ॥
पश्चिमायां चम्पकावतंसकाख्यं निरूपितम् । उत्तरस्यां तथा चूतावतंसकमुदीरितम् ॥ ६०९ ॥
तेषां चतुर्णां मध्येऽथ, स्यात्सौधर्मावतंसकम् । महाविमानं यत्राऽऽस्ते, स्वयं शक्रः सुरेश्वरः ॥ ६१० ॥
एतद्योजनलक्षाणि, सार्द्धानि द्वादशायतम् । विस्तीर्णं च परिक्षेपो, योजनानां भवेदिह ॥ ६११ ॥
लक्षाण्येकोनचत्वारिंशद् द्विपञ्चाशदेव च । सहस्राण्यष्टशत्यष्टाचत्वारिंशत्समन्विता ॥ ६१२ ॥
समन्ततोऽस्य प्राकारो, वनखण्डाश्चतुर्दिशम् । प्रासादशेखरो मध्ये, प्रासादपङ्क्तिवेष्टितः ॥ ६१३ ॥
प्रासादात्तत ऐशान्यामुपपातादिकाः सभाः । एवं प्रागुक्तमास्थेयं, सर्वं विमानवर्णनम् ॥ ६१४ ॥
अत्रोपपातसदने, शय्यायां सुकृताञ्चिताः । उत्पद्यन्ते शक्रतया, क्रमोऽत्र प्राक् प्रपञ्चितः ॥ ६१५ ॥
यथा हि साम्प्रतीनोऽसौ, सौधर्मनाकनायकः । प्रागासीत्कार्त्तिकः श्रेष्ठी, पृथिवीभूषणे पुरे ॥ ६१६ ॥
तेन श्राद्धप्रतिमानां, शतं तत्रानुशीलितम् । ततः शतक्रतुरिति, लोके प्रसिद्धिमीयिवान् ॥ ६१७ ॥
स चैकदा गैरिकेन, मासोपवासभोजिना । दृढार्हतत्वरुष्टेन, नुन्नस्य क्ष्मापतेर्गिरा ॥ ६१८ ॥
गैरिकं भोजयामास, पारणायां नृपालये । ततः स दुष्टो धृष्टोऽसीत्यङ्गुल्या नासिकां स्पृशन् ॥ ६१९ ॥
जहास श्रेष्ठिनं सोऽपि, गृहे गत्वा विरक्तधीः । जग्राहाष्टसहस्रेण, वणिकपुत्रैः समं व्रतम् ॥ ६२० ॥
अधीतद्वादशाङ्गीको, द्वादशाब्दानि संयमम् । पालयित्वाऽनशनेन, मृत्वा देवेश्वरोऽभवत् ॥ ६२१ ॥
गैरिकस्तापसः सोऽपि, कृत्वा बालतपो मृतः । अभूदैरावणसुरः, सौधर्मेन्द्रस्य वाहनम् ॥ ६२२ ॥
अयं तावत्कल्पवृत्त्याद्यभिप्रायः । भगवतीसूत्राभिप्रायस्त्वयं—
हस्तिनागपुरे श्रेष्ठी, कार्त्तिकोऽभून्महर्द्धिकः । सहस्राम्रवने तत्रागतोऽर्हन्मुनिसुव्रतः ॥ ६२३ ॥
कार्त्तिकाद्यास्तत्र पौरा, जिनं वन्दितुमैयरुः । प्रबुद्धः कार्त्तिकः श्रुत्वा, जिनोपदेशमञ्जसा ॥ ६२४ ॥
गृहे गत्वा ज्ञातिमित्रस्वजनान् भोजनादिभिः । संतोष्य ज्येष्ठतनये, कुटुम्बभारमक्षिपत् ॥ ६२५ ॥
स्वस्वज्येष्ठसुते न्यस्तगृहभारैः समन्ततः । अष्टाधिकसहस्रेणानुगतो नैगमोत्तमैः ॥ ६२६ ॥
सहस्रपुरुषोद्वाह्यामारुह्य शिबिकां महैः । मुनिसुव्रतपादान्ते, स प्रव्रज्यामुपाददे ॥ ६२७ ॥
अधीत्य द्वादशाङ्गानि, द्वादशाब्दानि संयमम् । धृत्वा मासमुपोष्यान्ते, सौधर्मनायकोऽभवत् ॥ ६२८ ॥

तथा च सूत्रं– 'इहेव जंबुद्दीवे भारहे वासे हत्थिणाउरे नामं नयरे होत्था' इत्यादि"
भगवतीसूत्रे श० १८ उ० २ ।

एवमुत्पन्नः स शक्रः, प्राग्वत्कृत्वा जिनार्चनम् । सुखमास्ते सुधर्मायां, पूर्वामुखो महासने ॥ ६२९ ॥

तिस्रोऽस्य पर्षदस्तत्राभ्यन्तरा समिताभिधा । तस्यां देवसहस्राणि, द्वादशेति जिना जगुः ॥ ६३० ॥
देवीशतानि सप्तास्यां, मध्या चण्डाभिधा सभा । चतुर्दश सहस्राणि, देवानामिह पर्षदि ॥ ६३१ ॥
षट् शतानि च देवीनां, बाह्या जाताभिधा सभा । स्युः षोडश सहस्राणि, पर्षदीह सुधाभुजाम् ॥ ६३२ ॥
शतानि पञ्च देवीनां, यथाक्रममथोच्यते । आयुः प्रमाणमेतासां, तिसृणामपि पर्षदाम् ॥ ६३३ ॥
अन्तःपर्षदि देवानां, पञ्चपल्योपमात्मिका । स्थितिस्तथात्र देवीनां, पल्योपमत्रयं भवेत् ॥ ६३४ ॥
पल्योपमानि चत्वारि, मध्यपर्षदि नाकिनाम् । स्थितिर्देवीनां तु पल्योपमद्वयं भवेदिह ॥ ६३५ ॥
बाह्यपर्षदि देवानां, पल्योपमत्रयं स्थितिः । एकं पल्योपमं चात्र, देवीनां कथिता स्थितिः ॥ ६३६ ॥
अस्यैवं सामानिकानां, त्रायस्त्रिंशकनाकिनाम् । लोकपालानां तथाग्रमहिषीणामपि ध्रुवम् ॥ ६३७ ॥
भवन्ति पर्षदस्तिस्रः समिताद्या यथाक्रमम् । अच्युतान्तेन्द्रसामानिकादीनामेवमेव ताः ॥ ६३८ ॥

इति स्थानाङ्गसूत्रे ॥

सहस्राण्यस्य चतुरशीतिः सामानिकाः सुराः । ते चेन्द्रत्वं विना शेषैः, कान्त्यायुर्वैभवादिभिः ॥ ६३९ ॥
समानाः सुरनाथेन, सामानिकास्ततः श्रुताः । अमात्यपितृगुर्वादिवत्संमान्या बिडौजसः ॥ ६४० ॥
स्वामित्वेन प्रतिपन्ना, एतेऽपि सुरनायकम् । भवन्ति वत्सलाः सर्वकार्येषु बान्धवा इव ॥ ६४१ ॥
त्रायस्त्रिंशास्त्रयस्त्रिंशद्देवाः स्युर्मन्त्रिसन्निभाः । सदा राज्यभारचिन्ताकर्त्तारः शक्रसंमताः ॥ ६४२ ॥
पुरोहिता इव हिताः, शान्तिकपौष्टिकादिकम् । कुर्वन्तोऽवसरे शक्रं, प्रीणयन्ति महाधियः ॥ ६४३ ॥
दोगुन्दकापराह्वाना, महासौख्याञ्चिता अमी । निदर्शनतयोच्यन्ते, श्रुतेऽतिसुखशालिनाम् ॥ ६४४ ॥

तथोक्तं उत्तराध्ययने मृगापुत्रीयाध्ययने—"नंदणे सो उ पासाए, कीलए सह इत्थिए । देवो दोगुंदगो चेव, निच्चं मुइयमाणसो [अध्य. २१ श्लो. ३] ॥ त्रायस्त्रिंशा देवा भोगपरायणा दोगुंदका इति भण्यन्ते" इत्युत्तराध्ययनावचूर्णौ ।

साम्प्रतीनास्त्वमी जम्बूद्वीपेऽस्मिन्नेव भास्ते । पालकसन्निवेशस्थास्त्रयस्त्रिंशन्महर्द्धिकाः ॥ ६४५ ॥
अभूवन् गृहपतयः, सहायास्ते परस्परम् । उग्राचारक्रियासाराः संसारभयभीरवः ॥ ६४६ ॥
प्रपाल्याब्दानि भूयांसि, श्रावकाचारमुत्तमम् । आलोचितप्रतिकान्तातिचाराश्चतुराशयाः ॥ ६४७ ॥
मासमेकमनशनं, कृत्वा मृत्वा समाधिना । त्रायस्त्रिंशाः समभवन्मान्या वृन्दारकेशितुः ॥ ६४८ ॥
न चैवमेतेभ्य एव, त्रायस्त्रिंशा इति प्रथा । नामधेयं नित्यमेतदव्युच्छित्तिनयाश्रयात् ॥ ६४९ ॥
शतानि मन्त्रिणः पञ्च, सन्त्यन्येऽपीन्द्रसंमताः । येषामक्षिसहस्रेण, सहस्राक्षः स गीयते ॥ ६५० ॥

तथोक्तं कल्पसूत्रवृत्तौ– "सहस्सक्खे'त्ति मन्त्रिपञ्चशत्या लोचनानि इन्द्रसंबन्धीन्येवेति सहस्राक्षः"

तथा सहस्राणि चतुरशीतिरात्मरक्षकाः । अमी चात्मानमिन्द्रस्य, रक्षन्तीत्यात्मरक्षकाः ॥ ६५१ ॥

एते त्वपायाभावेऽपि, प्रीत्युत्पत्त्यै सुरेशितुः । तथास्थितेश्च निचितकवचाः परितः स्थिताः ॥ ६५२ ॥
धनुरादिप्रहरणग्रहणव्यग्रपाणयः । तूणीरखड्गफलककुन्तादिभिरलङ्कृताः ॥ ६५३ ॥
एकाग्रचेतसः स्वामिवदनन्यस्तदृष्टयः । श्रेणीभूताः शक्रसेवां, कुर्वते किङ्करा इव ॥ ६५४ ॥
तथा सप्तास्य सैन्यानि, तत्र तादृक् प्रयोजनात् । नृत्यज्जात्योत्तुङ्गचङ्गतुरङ्गकारधारिणाम् ॥ ६५५ ॥
शूराणां युद्धसन्नद्धशस्त्रावरणशालिनाम् । निर्जराणां निकुरम्बं, हयसैन्यमिति स्मृतम् ॥ ६५६ ॥
एवं गजानां कटकं, स्थानामपि भास्वताम् । विविधायुधपर्णानामश्वरूपमरुद्युजाम् ॥ ६५७ ॥
तथा वृषभदेवानां, सैन्यमुच्छृङ्गिणां युधे । उद्भटानां पदातीनां, सैन्यमुग्रभुजोष्मणाम् ॥ ६५८ ॥
एतानि पञ्च सैन्यानि, गतदैन्यानि वज्रिणम् । सेवन्ते युद्धसज्जानि, नियोगेच्छूनि सन्निधौ ॥ ६५९ ॥
शुद्धाङ्गनृत्यवैदग्ध्यशालिनां गुणमालिनाम् । नटानां देवदेवीनां, षष्ठं सैन्यं भजत्यमुम् ॥ ६६० ॥
स्वरमाधुर्यवर्याणां, सैन्यमातोद्यभारिणाम् । गन्धर्वदेवदेवीनां, सप्तमं सेवते हरिम् ॥ ६६१ ॥
एतत्सैन्यद्वयं चातिचतुरं गीततण्डवे । अविश्रमं प्रयुञ्जानमुपभोगाय वज्रिणः ॥ ६६२ ॥
सप्तानामप्यथैतेषां, सैन्यानां सप्त नायकाः । सदा सन्निहिताः शक्रं, विनयात् पर्युपासते ॥ ६६३ ॥
ते चैवं नामतो वायुरैरावणश्च माठरः । स्याद्दामर्द्धिर्हरिनैगमेषी श्वेतश्च तुम्बरुः ॥ ६६४ ॥
सप्तापि सेनापतयः स्युरेतैरेव नामभिः । तृतीयस्य पञ्चमस्य, सप्तमस्य सुरेशितुः ॥ ६६५ ॥
अङ्गीकृत्य द्वादशेन्द्रानानतारणयोरपि । एतन्नामान एवामी, स्थानाङ्गे कथिता जिनैः ॥ ६६६ ॥
पादात्येशस्तत्र हरिनैगमेषीति विश्रुतः । शक्रदूतोऽतिचतुरो, नियुक्तः सर्वकर्मसु ॥ ६६७ ॥
योऽसौ कार्यविशेषेण, देवराजानुशासनात् । कृत्वा मङ्क्षु त्वचश्छेदं, रोमरन्ध्रैर्नखाङ्कुरैः ॥ ६६८ ॥
संहर्त्तुमीष्टे स्त्रीगर्भं न च तासां मनागपि । पीडा भवेन्न गर्भस्याप्यसुखं किंचिदुद्भवेत् ॥ ६६९ ॥
तत्र गर्भाशयाद्गर्भाशये योनौ च योनितः । योनेर्गर्भाशये गर्भाशयाद्योनाविति क्रमात् ॥ ६७० ॥
आकर्षणामोचनाभ्यां, चतुर्भङ्ग्यत्र संभवेत् । तृतीयेनैव भङ्गेन, गर्भं हरति नापरैः ॥ ६७१ ॥
इदं चार्थतः पञ्चमाङ्गे ॥
पत्तिसैन्यपतेरस्य, कच्छाः सप्त प्रकीर्त्तिताः । कच्छाशब्देन च स्वाज्ञावशवर्त्तिसुरव्रजः ॥ ६७२ ॥
ईशानाद्यच्युतान्तानामेवं सर्वविडौजसाम् । पत्तिसैन्यपतेः कच्छाः सप्त सप्त भवन्ति हि ॥ ६७३ ॥
देवास्तत्राद्यकच्छायां, स्वेन्द्रसामानिकैः समाः । द्वितीयाद्याः षडन्याश्च, द्विघ्ना द्विघ्ना यथोत्तरम् ॥ ६७४ ॥
यथा सौधर्मेन्द्रहरिनैगमेषितचमूपतेः । स्यादाद्यकच्छा चतुरशीतिदेवसहस्रिका ॥ ६७५ ॥
तथा यानविमानाधिकारी पालकनिर्जरः । सदा शक्रनियोगेच्छुरास्ते विरचिताञ्जलिः ॥ ६७६ ॥
यदेन्द्रो जिनजन्माद्युत्सवेषु गन्तुमिच्छति । तदा वादयते घण्टां, सुघोषां नैगमेषिणा ॥ ६७७ ॥

वादीतायाममुष्यां च, घण्टाः सर्वविमानगाः । शब्दायन्ते समं यन्त्रप्रयोगप्रेरिता इव ॥ ६७८ ॥
ततः पालकदेवेन, रचिते पालकाभिधे । समासीनो महायानविमाने सपरिच्छदः ॥ ६७९ ॥
औत्तराहेण निर्याणमार्गेणावतरत्यधः । एत्य नन्दीश्वरद्वीप, आग्नेयकोणसंस्थिते ॥ ६८० ॥
शैले रतिकराभिख्ये, विमानं संक्षिपेत्ततः । कृतकार्यः स्वर्गमेति, विहिताष्टाहिकोत्सवः ॥ ६८१ ॥

तथोक्तं– "तत्र दक्षिणो निर्याणमार्ग उक्तः, इह तु उत्तरो वाच्यः, तथा तत्र नन्दीश्वरद्वीपे उत्तरपूर्वो रतिकरपर्वत ईशानेन्द्रस्यावतारायोक्तः, इह तु दक्षिणपूर्वोऽसौ वाच्य" इति भगवतीसूत्रवृत्तौ शतक १६ द्वितीयोद्देशके, तत्रेति ईशानेन्द्राधिकारे, इहेति सौधर्मेन्द्राधिकारे ॥

स्वर्गेषु विषमेष्वेषा, स्थितिः स्याद्दशमेऽपि च । घण्टापत्तीशनामादिः, समेष्वीशाननाकवत् ॥ ६८२ ॥
तथा देवा महामेघाः, सन्त्यस्य वशवर्त्तिनः । येषां स्वामितया शक्रो, मघवानिति गीयते ॥ ६८३ ॥

तथोचुः– 'मघवं'ति मघा-महामेघा वशे सन्त्यस्य मघवान्, कल्पसूत्रवृत्तौ,

तथा हि मेघा द्विविधा, एके वर्षर्त्तुभाविनः । स्वाभाविकास्तदपरे, स्युर्दैवतानुभावजाः ॥ ६८४ ॥
तत्र शक्रो यदा वृष्टिं, कर्त्तुमिच्छेन्निजेच्छया । आज्ञापयति गीर्वाणांस्तदाऽभ्यन्तरपार्षदान् ॥ ६८५ ॥
ते मध्यपार्षदांस्तेऽपि, बाह्यांस्ते बाह्यबाह्यकान् । तेऽप्याभियोगिकांस्तेऽपि, ब्रुवते वृष्टिकायिकान् ॥ ६८६ ॥
ततस्ते कुर्वते वृष्टिं, हृष्टाः शक्रानुशिष्टितः । एवमन्येऽपि कुर्वन्ति, सुराश्चतुर्विधा अपि ॥ ६८७ ॥
जन्मदीक्षाज्ञानमुक्तिमहेषु श्रीमदर्हताम् । भक्त्युद्रेकादतिशयोद्भावनाय प्रमोदतः ॥ ६८८ ॥

तथोक्तम्— 'जाहे णं भंते ! सक्के देविंदे देवराए वुट्ठिकायं काउकामे भवइ से कहमिदाणिं पकरेइ ?' इत्यादि भगवतीसूत्रे १४–२ ।

छित्त्वा भित्त्वा कुट्टयित्वा, चूर्णयित्वाऽथवा स्वयम् । कमण्डल्वां शिरः पुंसः, कस्याप्येष यदि क्षिपेत् ॥ ६८९ ॥
तथापि किञ्चिदप्यस्य, बाधा न स्यात्तथाविधा । भगवत्यां शक्रशक्तिरुक्ता चतुर्दशे शते ॥ ६९० ॥
सदा सन्निहितस्तस्यैरावणो वाहनं सुरः । व्यक्तो नानाशक्तियुक्तो, भक्त्युद्युक्तः सुरेशितुः ॥ ६९१ ॥
दशार्णनृपबोधाय, यियासोरिव वज्रिणः । आज्ञां प्राप्यानेकरूपसमृद्धिं कर्त्तुमीश्वरः ॥ ६९२ ॥
यदा यदा स चेन्द्रस्य, क्वचिज्जिगमिषा भवेत् । तदा तदा हस्तिरूपं, कृत्वेशमुपतिष्ठते ॥ ६९३ ॥
दधात्यसौ करे वज्रममोघशक्तिशालि यत् । निरीक्ष्यैव विपक्षाणां, क्षणात्क्षुभ्यति मानसम् ॥ ६९४ ॥
प्रयुक्तं द्विषतो हन्तुमिन्द्रेण कुपितेन यत् । ज्वालास्फुलिङ्गनभितो, विकिरद्भीषणाकृतिः ॥ ६९५ ॥
कुर्वद् दृष्टिप्रतीघातमुत्फुल्लकिंशुकोपमम् । निहन्त्येवानुगम्यैनं, गतं दूरेऽपि साध्वसात् ॥ ६९६ ॥
यथाऽनेनैव शक्रेण, तन्मुक्तं चमरोपरि । ततो नंष्ट्वा गतस्यास्य, श्रीमद्वीरपदान्तरे ॥ ६९७ ॥
पृष्ठे पतद्गृहीतं च, जिनावज्ञाभियाऽमुना । चतुर्भिरङ्गुलैर्वीरपादाद्धृत्वावहितं ययात् ॥ ६९८ ॥

नन्वध्यन्येव वज्रेण, कथमेष न ताडितः ? । वज्रवच्चमरेन्द्रोऽपि, नाग्राहि वज्रिणा कथम् ? ॥ ६९९ ॥
नरादिभिस्त्वधः क्षिप्तं, वस्त्वादातुं न शक्यते । सुरैः किं शक्यते येन, वज्रमग्राहि वज्रिणा ? ॥ ७०० ॥
अत्रोच्यते–
अधोनिपतने शीघ्रगतयोऽसुरनाकिनः । ऊर्ध्वमुत्पतने मन्दगतयश्च स्वभावतः ॥ ७०१ ॥
वैमानिकाः पुनरधःपतने मन्दगामिनः । ऊर्ध्वमुत्पतने शीघ्रगतयश्च स्वभावतः ॥ ७०२ ॥
वज्रमप्यूर्ध्वगमने, शीघ्रं मन्दमधोगमे । असुरेन्द्राद्वज्रिणस्तु, मन्दगामि द्विधाप्यदः ॥ ७०३ ॥
यावत्क्षेत्रं शक्र एकसमयेनोर्ध्वमुत्पतेत् । वज्रं द्वाभ्यां तावदेव, चमरः समयैस्त्रिभिः ॥ ७०४ ॥
अधः पुनर्यावदेकसमयेनासुरेश्वरः । तावद् द्वाभ्यां हरिर्वज्रं, त्रिभिर्निपतति क्षणैः ॥ ७०५ ॥
निग्रहीतुं ततो मार्गे, नाशक्यतासुरप्रभुः । वज्रेणाधो निपतता, स्वतस्त्रिगुणशीघ्रगः ॥ ७०६ ॥
नाग्राही शक्रेणाप्येष, स्वतो द्विगुणवेगवान् । व्रजं स्वतो मन्दगति, धृतं पृष्ठानुधाविना ॥ ७०७ ॥
सुराः सुखेन गृह्णीरन्नधः क्षिप्तं हि पुद्गलम् । यदसौ सत्वरः पूर्वं, पश्चान्मन्दगतिर्भवेत् ॥ ७०८ ॥
पूर्वं पश्चादपि सुरो, महर्द्धिकस्तु सत्वरः । नरादयस्तु तदनु, नाधः पतितुमीशते ॥ ७०९ ॥
एवं च–अन्येषामपि देवानां, यदा विमानवासिनाम् । युद्धं स्यादसुरैः सार्द्धं, भवप्रत्ययवैरतः ॥ ७१० ॥
तदा वैमानिका देवाः, काष्ठपर्णतृणादिकम् । शर्कराकणमप्येकमामृशन्ति करेण यत् ॥ ७११ ॥
अचिन्त्यपुण्यात्तत्तेषां, प्राप्य प्रहरणात्मताम् । सुभूमचक्रिणः स्थालमिव प्रहरति द्विषः ॥ ७१२ ॥
तदेतेषां प्रहरणेष्वसत्स्वपि न हि क्षतिः । असुराणां तु नैतादृक्, शक्तिः पुण्यापकर्षतः ॥ ७१३ ॥
नित्यान्येते ततोऽस्त्राणि, वैक्रियाणि च बिभ्रति । सस्मयाः सुभटंमन्यास्तथाविधनरादिवत् ॥ ७१४ ॥

तथाहुः—'देवासुराणं भंते ! संगामे किं णं तेसिं देवाणं पहरणत्ताए परिणमति ?, गो० ! जं णं देवा तणं वा कट्ठं वे" त्यादि भगवतीसूत्रे १८–७ ।

विकुर्वणाशक्तिरपि, वर्त्ततेऽस्य गरीयसी । जम्बूद्वीपद्वयं पूर्णं, यदसौ स्वविकुर्वितैः ॥ ७१५ ॥
वैमानिकैर्देवदेवीवृन्दैः सांकीर्ण्यतोऽभितः । ईष्टे पूरयितुं तिर्यगसंख्यान् द्वीपवारिधीन् ॥ ७१६ ॥

तथाहुः— "सक्के णं देविंदे देवराया जाव केवतियं च णं पभू विउव्वित्तए ?, एवं जहेव चमरस्स, नवरं दो केवलकल्पे जंबुद्दीवे दीवे, अवसेसं तं चेव" भगवतीसूत्रे । अयं भावः—

जम्बूद्वीपावधिक्षेत्रं, यावच्छक्रविमानतः । तावद् द्विगुणितं भर्त्तुमीष्टे रूपैर्विकुर्वितैः ॥ ७१७ ॥

तथा च देवेन्द्रस्तवे [श्लोक - ५२] चमरेन्द्रमाश्रित्य—जाव य जंबुद्दीवो जाव य चमरस्स चमरचंचाओ । असुरेहिं असुरकन्नाहिं अत्थि विसओ भरेउं जे ॥ न पञ्चमाङ्गवृत्तौ तु, सूत्रमेतत्स्फुटीकृतम् । तिर्यक्क्षेत्रस्यात्र पृथगुक्तत्वाद्भाव्यते त्विति ॥ तदत्र तत्त्वं बहुश्रुता विदन्ति ।

सामानिकानामेतस्य, त्रायस्त्रिंशकनाकिनाम् । कर्त्तुं वैक्रियरूपाणि, शक्तिरेवं प्ररूपिता ॥ ७१८ ॥
लोकपालाग्रपत्नीनामपि वैक्रियगोचरा । तुल्यैव शक्तिस्तिर्यक् तु, संख्येया द्वीपवार्द्धयः ॥ ७१९ ॥
शक्तेर्विषय एवायं, न त्वेवं कोऽपि कर्हिचित् । चक्रे विकुर्वणां नो वा, करोति न करिष्यति ॥ ७२० ॥
शक्रस्याग्रमहिष्यस्तु, भवन्त्यष्टौ गुणोत्तमाः । रूपलावण्यशालिन्यः, प्रोक्तास्ता नामतस्त्विमाः ॥ ७२१ ॥
पद्मा शिवा शच्यथाञ्जूरमलाख्या तथाऽप्सराः । ततो नवमिका रोहिण्यभिधा स्यादिहाष्टमी ॥ ७२२ ॥
साम्प्रतीनामासां पूर्वभवस्त्वेवं—
द्वे श्रावस्तीनिवासिन्यौ, हस्तिनागपुरालये । द्वे द्वे काम्पिल्यपुरगे, द्वे साकेतपुरालये ॥ ७२३ ॥
एताः पद्माख्यपितृका, विजयाभिधमातृकाः । बृहत्कुमार्योऽष्टाप्यात्तप्रव्रज्याः पार्श्वसन्निधौ ॥ ७२४ ॥
पुष्पचूलार्यिकाशिष्याः, पक्षं संलिख्य सुव्रताः । मृत्वोत्पन्ना विमानेषु, पद्मावतंसकादिषु ॥ ७२५ ॥
जाताः शक्रमहिष्योऽष्टौ, सप्तपल्योपमायुषः । सिंहासनेषु क्रीडन्ति, पद्माख्यादिषु सोत्सवम् ॥ ७२६ ॥
एकैकस्यास्तथैतस्याः, परिवारे सुराङ्गनाः । स्वतुल्यरूपालङ्काराः, सहस्राण्येव षोडश ॥ ७२७ ॥
षोडशैताः सहस्राणि, विकुर्वन्ति नवा अपि । एवं च सपरीवाराः, पत्न्यो भवन्ति वज्रिणः ॥ ७२८ ॥
अष्टाविंशत्या सहस्रैरधिकं लक्षमेव ताः । भुङ्क्ते तावन्ति रूपाणि, कृत्वेन्द्रोऽप्येकहेलया ॥ ७२९ ॥

तथाहुः— 'सक्कस्स णं भंते ! देविंदस्स पुच्छा. अज्जो ! अट्ठ अग्गमहिसीओ प०' इत्यादि भगवतीसूत्रे १०–५ ।

यदा शक्रः सहैताभिः, कामक्रीडां चिकीर्षति । चारुचक्राकारमेकं, तदा स्थानं विकुर्वयेत् ॥ ७३० ॥
पञ्चवर्णतृणमणिरमणीयमहीतलम् । व्यासायामपरिक्षेपैर्जम्बूद्वीपोपमं च तत् ॥ ७३१ ॥
मध्यदेशेऽस्य रचयत्येकं प्रासादशेखरम् । योजनानां पञ्च शतान्युच्चं तदर्द्धविस्तृतम् ॥ ७३२ ॥
तस्य प्रासादस्य नानामणिरत्नमयी मही । ऊर्ध्वभागोऽप्यस्य पद्मलतादिभक्तिशोभितः ॥ ७३३ ॥
तस्य प्रासादस्य मध्ये, रचयेन्मणिपीठिकाम् । योजनान्यष्ट विस्तीर्णायतां चत्वारि मेदुराम् ॥ ७३४ ॥
तस्या मणीपीठिकाया, उपर्येकां मनोहराम् । विकुर्वयेद्दिव्यशय्यां, कोमलास्तरणास्तृताम् ॥ ७३५ ॥
रत्नश्रेणिनिर्मितोरुप्रतिपादकृतोन्नतिम् । गाथामिवोद्यत्सुवर्णचतुष्पादां सुखावहाम् ॥ ७३६ ॥
ततः सपरिवाराभिः, प्राणप्रियाभिरष्टभिः । गन्धर्वनाट्यनीकाभ्यां, चानुयातः सुरेश्वरः ॥ ७३७ ॥
तत्रोपेत्यानेकरूपो, गाढमालिङ्ग्य ताः प्रियाः । दिव्यान् पञ्चविधान् कामभोगान् भुङ्क्ते यथासुखम् ॥ ७३८ ॥

तथाच सूत्रं–'जाहे णं भंते ! सक्के देविंदे देवराया दिव्वाइं भोगभोगाइं भुंजिउकामे भवइ से कहमिदाणिं पकरेइ ? गो० ! ताहे चेव णं से सक्के दे० एगं महं नेमिपडिरूवगं विउव्वती'त्यादि' भगवतीसूत्रे १४–६ ॥

चत्वारोऽस्य लोकपालाश्चतुर्दिगधिकारिणः । तेषामपि विमानादिस्वरूपं किञ्चिदुच्यते ॥ ७३९ ॥
विमानं तत्र शक्रस्य, यत्सौधर्मावतंसकम् । तस्मात् प्राच्यामसंख्येययोजनानामतिक्रमे ॥ ७४० ॥
तत्र सोममहाराजविमानमतिनिर्मलम् । संध्याप्रभाख्यं देवेन्द्रविमानाभं समन्ततः ॥ ७४१ ॥
तत्रोपपातशय्यायामुपपातसभान्तरे । उत्पद्यते सोमराजः, शेषं सर्वं तु पूर्ववत् ॥ ७४२ ॥
अधोभागे विमानस्य, सोमराजस्य राजते । जम्बूद्वीपसमा तिर्यग्लोके सोमाभिधा पुरी ॥ ७४३ ॥
प्रासादपरिपाट्योऽत्र, चतस्रः शेषमुक्तवत् । वैमानिकविमानार्द्धमानमत्रोच्चतादिकम् ॥ ७४४ ॥
शेषाणां लोकपालानामप्येवं स्वस्वसंज्ञया । तिर्यग्लोके राजधान्यः, स्वविमानतले मताः ॥ ७४५ ॥
सुधर्माद्याः सभास्त्वत्र, न सन्तीति जिना जगुः । नैषां विमानोत्पन्नानामिहैताभिः प्रयोजनम् ॥ ७४६ ॥
रोहिणी मदना चित्रा, सोमा चेत्यभिधानतः । चतस्रोऽग्रमहिष्योऽस्य, स्युः सहस्रपरिच्छदाः ॥ ७४७ ॥
देवीसहस्रं प्रत्येकं, विकुर्वितुमपि क्षमाः । पत्नीसहस्राश्चत्वारस्तदेवं सोमभूभृतः ॥ ७४८ ॥
त्यक्त्वा सुधर्मामन्यत्रार्हत्सक्थ्याशातनाभयात् । सहैताभिः पञ्चविधान्, कामभोगान् भुनक्त्यसौ ॥ ७४९ ॥
शेषाणां लोकपालानामप्येतैरेव नामभिः । चतस्रोऽग्रमहिष्यः स्युरियत्परिच्छदान्विताः ॥ ७५० ॥
सामानिकादयो येऽस्य, ये चैषामपि सेवकाः । तथा विद्युत्कुमाराग्निकुमाराख्याः सयोषितः ॥ ७५१ ॥
मरुत्कुमाराः सूर्येन्दुग्रहनक्षत्रतारकाः । सोमाज्ञावर्त्तिनः सर्वे, ये चान्येऽपि तथाविधाः ॥ ७५२ ॥
ग्रहाणां दण्डमुसलशृङ्गाटकादिसंस्थितिः । गर्जितं ग्रहसंचारे, गन्धर्वनगराणि खे ॥ ७५३ ॥
उल्कापाताभ्रवृक्षा दिग्दाहा रजांसि धूम्रिकाः । सुरेन्द्रधनुरर्केन्दूपरागपरिवेषकाः ॥ ७५४ ॥
प्राचीनादिमहावाता, ग्रामादिदहनादिकाः । जम्बूद्वीपदक्षिणार्द्धे, ये चोत्पातास्तथाविधाः ॥ ७५५ ॥
जनप्राणधनादीनां, क्षयास्ते सोमभूभृताम् । तत्सेविनां वा देवानां, नाविज्ञाता न चाश्रुताः ॥ ७५६ ॥
विकालकोऽङ्गारकश्च, लोहिताक्षः शनैश्चरः । चन्द्रसूर्यशुक्रबुधबृहस्पतिविधुन्तुदाः ॥ ७५७ ॥
भवन्त्यपत्यस्थानीयाः, सोमस्यैते दशापि हि । विकालकादयः सर्वे, ग्रहा एव पुरोदिताः ॥ ७५८ ॥
पल्योपमतृतीयांशयुक्तपल्योपमस्थितिः । सोमराजः सुखं भुङ्क्ते, दिव्यनाट्यादिलालितः ॥ ७५९ ॥
दक्षिणस्यां च सौधर्मावतंसकविमानतः । विमानं वरशिष्टाख्यमस्ति पूर्वोक्तमानयुक् ॥ ७६० ॥
यमस्तत्र महाराजो, राजते राजतेजसा । धर्मराज इति ख्यातो, निग्रहानुग्रहक्षमः ॥ ७६१ ॥
सामानिकादयो येऽस्य, तेषामपि च सेवकाः । ये प्रेतव्यन्तरा ये च, तेषामप्यनुजीविनः ॥ ७६२ ॥
तथाऽसुरकुमाराश्च, सर्वे नरकपालकाः । कान्दर्पिकाद्यास्ते सर्वे, यमाज्ञावशवर्त्तिनः ॥ ७६३ ॥
जम्बूद्वीपदक्षिणार्द्धे, डमराः कलहाश्च ये । अत्यन्तोद्दामसंग्रामा, महापुरुषमृत्यवः ॥ ७६४ ॥
देशद्रङ्गग्रामकुलरोगाः शीर्षादिवेदनाः । यक्षभूतोपद्रवाश्च, ज्वरा एकाहिकादयः ॥ ७६५ ॥

कासश्वासाजीर्णपाण्डुशूलार्श:प्रमुखा रुजः । देशग्रामवंशमारिगोत्रप्राणिधनक्षयाः ॥ ७६६ ॥
इत्यादयो महोत्पाता, येऽनार्याः कष्टकारिणः । यमस्य तत्सेविनां वा, नाविज्ञाता भवन्ति ते ॥ ७६७ ॥
अम्बादयो ये पूर्वोक्ताः, परमाधार्मिकाः सुराः । भवन्त्यपत्यस्थानीयाः यमराजस्य ते प्रियाः ॥ ७६८ ॥
अत एव मृतः प्राणी, यमदूतैर्यमान्तिकम् । नीयते क्लृप्तमित्यादि, लोकैस्तत्त्वानपेक्षिभिः ॥ ७६९ ॥

तथाहुः— "महिषो वाहनं तस्य, दक्षिणा दिग् रविः पिता । दण्डः प्रहरणं तस्य, धूमोर्णातस्य वल्लभा ॥पुरी पुनः संयमिनी, प्रतीहारस्तु वैध्यतः । दासौ चण्डमहाचण्डौ, चित्रगुप्तस्तु लेखकः ॥ इत्यादि ।

तृतीयभागाभ्यधिकपल्योपमस्थितिर्यमः । महाराजः सुखं भुङ्क्ते, दिव्यस्त्रीवर्गसंगतः ॥ ७७० ॥
प्रतीच्यामथ सौधर्मावतंसकविमानतः । स्वयंज्वलाभिधं स्फूर्जद्विमानमुत्तमानवत् ॥ ७७१ ॥
वरुणस्तत्र तरुणप्रतापार्को विराजते । सामानिकादयो येऽस्य, येऽप्येषामनुजीविनः ॥ ७७२ ॥
स्तनितोदधिनागाख्याः, कुमारास्तत्स्त्रियोऽपि च । अन्येऽपि तादृशाः सर्वे, वरुणाज्ञानुसारिणः ॥ ७७३ ॥
जम्बूद्वीपदक्षिणार्द्धे, सन्मन्दाल्पातिवृष्टयः । तटाकादिजलभरा, जलोद्भेदा जलोद्वहाः ॥ ७७४ ॥
देशग्रामादिवाहाश्च, जलोद्भूता जनक्षयाः । नाज्ञाता वरुणस्यैते, सर्वे तत्सेविनामपि ॥ ७७५ ॥
अयं पाथःपतिरिति, विख्यातः स्थूलदर्शिनाम् । पश्चिमाशापतिः पाशपाणिर्जलधिमन्दिरः ॥ ७७६ ॥
कर्कोटकः कर्दमकोऽञ्जनश्च शङ्खपालकः । पुण्ड्रः पलाशमोदश्च, जयो दधिमुखस्तथा ॥ ७७७ ॥
अयंपुलः काकरिकः, सर्वेऽप्येते सुधाभुजः । वरुणस्याधीश्वरस्य, भवन्त्यपत्यवत्प्रियाः ॥ ७७८ ॥
अनुवेलन्धरं नागावासः कर्कोटकाचलः । ऐशान्यां लवणाब्धौ तत्स्वामी कर्कोटकः सुरः ॥ ७७९ ॥
विद्युत्प्रभाद्रिराग्नेय्यां, तस्य कर्दमकः पतिः । अञ्जनस्तु लोकपालो, वेलंबस्य सुरेशितुः ॥ ७८० ॥
धरणेन्द्रलोकपालस्तुर्योऽत्र शङ्खपालकः । पुंड्राद्यास्तु सुराः शेषा, न प्रतीता विशेषतः ॥ ७८१ ॥
देशोनपल्यद्वितयस्थितिरेष मनोरमान् । वरुणाख्यो महाराजो, भुङ्क्ते भोगाननेकधा ॥ ७८२ ॥
उदीच्यामथ सौधर्मावतंसकादतिक्रमे । असंख्येययोजनानां, विमानं वल्गुनामकम् ॥ ७८३ ॥
देवस्तत्र वैश्रमणो, विभाति सपरिच्छदः । यः सौधर्मसुरेन्द्रस्य, कोशाध्यक्ष इति श्रुतः ॥ ७८४ ॥
अस्य सामानिकाद्या ये, तेषां भृत्याश्च ये सुराः । सुपर्णद्वीपदिग्नागकुमारा व्यन्तरा अपि ॥ ७८५ ॥
सर्वेऽप्येते सदेवीका, ये चान्येऽपि तथाविधाः । भवन्ति ते वैश्रमणानुशासनवशीकृताः ॥ ७८६ ॥
सीसकायस्त्रपुताम्ररैरत्नरजताकराः । वज्राकरा वसुधाराः, स्वर्णरत्नादिवृष्टयः ॥ ७८७ ॥
पत्रपुष्पबीजफलमाल्यचूर्णादिवृष्टयः । वस्त्राभरणसद्गन्धभाजनक्षीरवृष्टयः ॥ ७८८ ॥
तथा सुकालदुष्कालौ, वस्त्वल्पार्घमहार्घताः । सुभिक्षदुर्भिक्षगुडघृतधान्यादिसंग्रहाः ॥ ७८९॥

क्रयाश्च विक्रयाश्चैव, चिरंतनरत्नसंचयाः । प्रहीणस्वामिकादीनि, निधानानि च भूतले ॥ ७९० ॥
नेत्याद्यविदितं जम्बूद्वीपयाम्यार्द्धगोचरम् । धनदस्य विभोर्यद्वा, नाकिनां तन्निषेविणाम् ॥ ७९१ ॥
पूर्णमाणिशालिभद्राः, सुमनोभद्र इत्यपि । चक्ररक्षः पुण्यरक्षः, शर्वाणश्च ततः परम् ॥ ७९२ ॥
सर्वयशाः सर्वकामः, समृद्धोऽमोघ इत्यपि । असङ्ख्यापत्यसमा, एते वैश्रमणेशितुः ॥ ७९३ ॥
असौ कृत्वोत्तुङ्गगेहां, स्वर्णप्राकारशोभिताम् । प्रददावादिदेवाय, विनीतां स्वःपतेर्गिरा ॥ ७९४ ॥
कृष्णाय द्वारिकामेवं, कृत्वा शक्राज्ञया ददौ । जिनजन्मादिषु स्वर्णै, रत्नौघैश्चाभिवर्षति ॥ ७९५ ॥
समृद्धश्च वदान्यश्च, लोकेऽनेनोपमीयते । सिद्धान्तेऽपि दानशूरतया गणधरैः स्मृतः ॥ ७९६ ॥
तथाहुः—"खमासूरा अरिहंता, तवसूरा अणगारा । दाणसूरा वेसमणा, जुद्धसूरा वासुदेवाः" ॥
एष वैश्रमणः पूर्णपल्योपमद्वयस्थितिः । सुखान्यनुभवत्युग्रपुण्यप्राग्भारभासुरः ॥ ७९७ ॥
तथोक्तं—"सोमजमाणं सतिभाग, पलिय वरुणस्स दुन्नि देसूणा । वेसमणे दो पलिआ, एस ठिई लोगपालाणं" ॥
[बृहत्संग्रहणी गा. १८]
चतुर्णामप्यमीषां येऽपत्यप्रायाः सुधाभुजः । ते पल्यजीविनः सर्वे, विना शशिदिवाकरौ ॥ ७९८ ॥
एवं सामानिकैस्त्रायस्त्रिंशपार्षदमन्त्रिभिः । पत्नीभिर्लोकपालैश्च, सैन्यैः सेनाधिपैः सुरैः ॥ ७९९ ॥
अन्यैरपि घनैर्देवीदेवैः सौधर्मवासिभिः । सेवितो दक्षिणार्द्धस्य, लोकस्य परमेश्वरः ॥ ८०० ॥
यथास्थानं परिहितमौलिमालाद्यलङ्कृतिः । शरत्काल इव स्वच्छाम्बरोर्केन्द्वच्छकुण्डलः ॥ ८०१ ॥
पूर्णसागरयुग्मायुरास्ते स्वैरं सुखाम्बुधौ । मग्नो भग्नश्रमः स्वःस्त्रीनाट्यनादप्रमोदितः ॥ ८०२ ॥
आश्चर्यमीदृगैश्वर्यव्यासक्तोऽप्यन्तरान्तरा । जम्बूद्वीपमवधिना निरीक्षते महामनाः ॥ ८०३ ॥
संघे चतुर्विधे तादृग्गुणवन्तं प्रशंसति । सुराणां पर्षदि चमत्कारचञ्चलकुण्डलः ॥ ८०४ ॥
दर्शं दर्शं जिनांश्चायमुत्सृष्टासनपादुकः । पञ्चाङ्गस्पृष्टभूपीठः, स्तौति शक्रस्तवादिभिः ॥ ८०५ ॥
छाद्मस्थ्ये वर्द्धमानं यः, प्रौढभक्तिर्व्यजिज्ञपत् । द्वादशाब्दीं तव स्वामिन् !, वैयावृत्त्यं करोम्यहम् ॥ ८०६ ॥
प्रत्युक्तश्च भगवता, नेदमिन्द्र ! भवेत् क्वचित् । यदर्हन्निन्द्रसाहाय्यात्, कोऽपि कैवल्यमाप्नुयात् ॥ ८०७ ॥
यो दशार्णशबोधाय, ऋद्धिं विकृत्य तादृशीम् । नत्वाऽर्हन्तं नृपमपि, क्षमयामास संयतम् ॥ ८०८ ॥
ब्राह्मणीभूय यः कल्किनृपं हत्वा तदङ्गजम् । दत्तं राज्येऽभिषिच्यार्हच्छासनं भासयिष्यति ॥ ८०९ ॥
जिनोपसर्गे यः सङ्गमकामरकृते स्वयम् । निषिद्ध्य नाटकाद्युग्रं, षण्मासान् शोकमन्वभूत् ॥ ८१० ॥
भ्रष्टप्रतिज्ञं तं निर्वासयामास त्रिविष्टपात् । क्षणं मुमोच योऽर्हन्तं, न चित्तात्परमार्हतः ॥ ८११ ॥
यः पालकविमानाधिरुढो राजगृहे पुरे । श्रीवीरं समवसृतं, वन्दित्वेति व्यजिज्ञपत् ॥ ८१२ ॥
अवग्रहाः कति विभो !, भगवानाह पञ्च ते । स्वामिना स्वीक्रियते यस्सोऽवग्रह इति स्मृतः ॥ ८१३ ॥
देवेन्द्रावग्रहस्तत्र, प्रथमः स्यात्स चेन्द्रयोः । सौधर्मेशानयोर्लोकदक्षिणार्द्धोत्तरार्द्धयोः ॥ ८१४ ॥

द्वितीयश्चक्रिणः क्षेत्रेऽखिलेऽपि भरतादिके । तृतीयो मण्डलेशस्य, स च तन्मण्डलावधिः ॥ ८१५ ॥
तुरीयस्तु गृहपतेः, स च तद्गृहलक्षणः । पञ्चमः साधर्मिकस्य, पञ्चक्रोशावधिः स च ॥ ८१६ ॥

तथोक्तं भगवतीवृत्तौ १६ शतक २ उद्देशके–"साहम्मिउग्गहे'त्ति समानेन धर्मेण चरन्तीति साधर्मिकाः– साध्वपेक्षया साधवः एतेषामवग्रहः–तदाभाव्यं पञ्चक्रोशपरिमाणं क्षेत्रं, ऋतुबद्धे मासमेकं, वर्षासु चतुरो मासान् यावदिति साधर्मिकावग्रहः ।"

आस्पदस्वामिनामेषां, पञ्चानामप्यवग्रहम् । याचन्ते साधवस्तेषामपि पुण्यमनुज्ञया ॥ ८१७ ॥
श्रुत्वेति मुदितस्वान्तः, शचीकान्तः प्रभुं नमन् । ऊचे येऽस्मिन्मम क्षेत्रे, विहरन्ति मुनीश्वराः ॥ ८१८ ॥
तेषामवग्रहमहमनुजानामि भावतः । इत्युक्त्वाऽस्मिन् गते स्वर्गं, प्रभुं पप्रच्छ गौतमः ॥ ८१९ ॥
सत्यवादी सत्यमाह, शक्रोऽयमथवाऽन्यथा । जिनेनापि तदा सत्यवादीत्येष प्रशंसितः ॥ ८२० ॥
एवं योऽनेकधा धर्ममाराध्येतः स्थितिक्षये । विदेहेषूत्पद्य चैकावतारो मुक्तिमाप्स्यति ॥ ८२१ ॥
अस्मिंश्च्युते च स्थानेऽस्य, पुनरुत्पत्स्यतेऽपरः । एवमन्येऽपि शक्राद्या, यथास्थानं सुरासुराः ॥ ८२२ ॥
ईशानदेवलोकस्य, प्रतरेऽथ त्रयोदशे । मेरोरुत्तरतः पञ्च, स्युर्विमानावतंसकाः ॥ ८२३ ॥
अङ्कावतंसकं प्राच्यां, विमानमस्ति शस्तभम् । दक्षिणस्यां स्फटिकावतंसकाख्यं निरूपितम् ॥ ८२४ ॥
अपरस्यां तथा रत्नावतंसकमिति स्मृतम् । उत्तरस्यां जातरूपावतंसकाभिधं भवेत् ॥ ८२५ ॥
मध्ये चैषामथेशानावतंसकाभिधं महत् । विमानं मानतः सौधर्मावतंसकसन्निभम् ॥ ८२६ ॥
तत्रोपपातशय्यायामुपपातसभास्पृशि । ईशानेन्द्रतया प्रौढपुण्य उत्पद्यतेऽसुमान् ॥ ८२७ ॥
साम्प्रतीनस्त्वसौ जम्बूद्वीपे क्षेत्रे च भारते । ताम्रलिप्त्यां पुरि मौर्यपुत्रोऽभूत्तामलिर्धनी ॥ ८२८ ॥
स चैकदा रात्रिशेषे, जाग्रच्चित्ते व्यचिन्तयत् । नन्वियं यन्मया लब्धा, समृद्धिः सर्वतोमुखी ॥ ८२९ ॥
तत्प्राच्यप्राज्यपुण्यानां, फलमत्र न संशयः । प्रागेव संचितं भुञ्जे, हन्त नूत्नमनर्जयम् ॥ ८३० ॥
क्षीणेऽस्मिन् किं करिष्ये, तद्भवान्तरसुखावहम् । किञ्चित्पुण्यमर्जयामि, गार्हस्थ्ये तु भवेन्न तत् ॥ ८३१ ॥
विचिन्त्येति विचारज्ञः, प्रातः प्रीत्या कुटुम्बकम् । आकार्य ज्ञातिमित्रादीनुपचर्याशनादिभिः ॥ ८३२ ॥
कुटुम्बभारमारोप्य, ज्येष्ठपुत्रे विरक्तहृत् । तानापृच्छय दारुमयं, गृहीत्वैकं पतद्ग्रहम् ॥ ८३३ ॥
प्राणामया प्रवव्राज, प्रव्रज्ययाऽथ तत्र सः । यत्र यं प्राणिनं पश्येदाकाकमासुरेश्वरम् ॥ ८३४ ॥
तत्र तं प्रणमन् षष्ठतपा आतापनामपि । कुर्वाणो भान्वभिमुखः, षष्ठस्य पारणादिने ॥ ८३५ ॥
आतापनाभुवः प्रत्युत्तीर्य पुर्यां कुलान्यटन् । उच्चनीचमध्यमानि, भिक्षार्थमपराह्णके ॥ ८३६ ॥
नादत्ते सूपशाकादि, किंतु केवलमोदनैः । पूर्णे पतद्ग्रहे भिक्षाचर्यायाः स निवर्त्तते ॥ ८३७ ॥
एकविंशतिकृत्वस्तं, प्रक्षाल्यौदनमम्बुभिः । तादृग्नीरसमाहार्य, षष्ठं करोत्यनन्तरम् ॥ ८३८ ॥

एवं वर्षसहस्राणि, षष्टिं तपोऽतिदुष्करम् । कुर्वन् क्रशीयान्निर्मांसो, व्यक्तस्नायुशिरोऽभवत् ॥ ८३९ ॥
ततश्चिन्तयति स्मैष, यावदस्ति तनौ मम । शक्तिस्तावदनशनं, कृत्वा स्वार्थं समर्थये ॥ ८४० ॥
ध्यायन्नेवं ताम्रलिप्त्यां, गार्हस्थ्यव्रतसंगतान् । आपृच्छय लोकानेकान्ते, त्यक्त्वा पतद्ग्रहादिकम् ॥ ८४१ ॥
ऐशान्यां मण्डलं पुर्या, आलिख्यानशनं दधौ । पादपोपगमं मृत्युमनाकांक्षंश्च तिष्ठति ॥ ८४२ ॥
तदा च बलिचञ्चाऽऽसीद्राजधानीन्द्रवर्जिता । तत्रत्याश्चासुरा देवदेव्यो निरीक्ष्य तामलिम् ॥ ८४३ ॥
इन्द्रार्थिनः समुदितास्तत्रैत्येति व्यजिज्ञपन् । क्लिश्यामहे वयं स्वामिन्निर्नाथा विधवा इव ॥ ८४४ ॥
इन्द्राधीना स्थितिः सर्वा, सीदत्यस्माकमित्यतः । कृत्वा निदानमधिपा, यूयमेव भवन्तु नः ॥ ८४५ ॥
इत्यादि निगदन्तस्ते, स्थित्वा तामलिसंमुखम् । नानानाट्यादिदिव्यर्द्धि, दर्शयन्ति मुहूर्मुहुः ॥ ८४६ ॥
देवाङ्गना अपि प्राणप्रिय प्रेमदृशैकशः । त्यक्त्वा कठिनतां कान्त ! निभालय निभालय ॥ ८४७ ॥
मनाग् मनोऽस्मासु कुर्यास्तपस्विन्नधुना यदि । भवेम तव किंकर्यस्तपःक्रीत्यो भवावधि ॥ ८४८ ॥
तामलिस्तु तद्वचोभिर्मरुद्भिरिव भूधरः । निश्चलस्तस्थिवांस्तूष्णीं, ततस्तेऽगुर्यथास्पदम् ॥ ८४९ ॥
ईशानेऽपि तदा देवाश्च्युतनाथास्तदर्थिनः । इन्द्रोपपातशय्यायामसकृद्ददते दृशम् ॥ ८५० ॥
षष्टिं वर्षसहस्राणि, कृत्वा बालतपोऽद्भुतम् । मासयुग्ममनशनं, धृत्वा मृत्वा समाधिना ॥ ८५१ ॥
तत्रोपपातशय्यायां, तस्मिन् काले स तामलिः । ईशानेन्द्रतयोत्पन्नो, यावत्पर्याप्तिभागभूत् ॥ ८५२ ॥
बलिचञ्चासुरास्तावद्, ज्ञात्वैतत्कुपिता भृशम् । तामलेर्यत्र मृतकं, तत्रागत्यातिरोषतः ॥ ८५३ ॥
शुम्बेन बद्ध्वा वामांहिं, निष्ठीवन्तो मुखेऽसकृत् । ताम्रलिप्त्यां भ्रमयन्तो, मृतकं तत्त्रिकादिषु ॥ ८५४ ॥
एवमुद्घोषयामासुस्तामलिस्तापसाधमः । धूर्त्तो मूर्त्तो दम्भ इव, पश्यतैवं विडम्ब्यते ॥ ८५५ ॥
ईशानेन्द्रतयोत्पन्नोऽप्यसौ नः किं करिष्यति ? । पुरतोऽस्माकमीशानः, किमसौ तापसब्रुवः ? ॥ ८५६ ॥
असुरैः क्रियमाणां स्वस्वामिदेहकदर्थनाम् । दृष्ट्वेशानसुरा रुष्टाः, स्वामिने तदजिज्ञपन् ॥ ८५७ ॥
ईशानेन्द्रोऽप्युपपातशय्यावस्थित एव ताम् । बलिचञ्चाराजधानीं, दृशाऽपश्यत्सरोषया ॥ ८५८ ॥
तस्य दिव्यप्रभावेण, बलिचञ्चाभितोऽभवत् । कीर्णाङ्गारेव तप्तायःशिलामयीव दुस्सहा ॥ ८५९ ॥
असुरास्तेऽथ दवथुव्यथार्त्ताः स्थातुमक्षमाः । मीना इव स्थले दीनाः, कृच्छ्रात्कण्ठगतासवः ॥ ८६० ॥
इतस्ततः प्रधावन्तः, कान्दिशीकाः सुरेश्वरम् । संभूय क्षमयामासुरुष्टाङ्गस्पृष्टभूतलाः ॥ ८६१ ॥
स्वामिन्नज्ञानतोस्माभिरपराद्धोऽसि दुर्दृशैः । नैवं पुनः करिष्यामः, क्षमस्व स्मस्तवानुगाः ॥ ८६२ ॥
पुनः पुनर्विलपतो, दृष्ट्वैतान् करुणस्वरम् । तां शक्तिं संजहारेन्द्रो, दयार्द्रस्तेऽप्यधुः सुखम् ॥ ८६३ ॥
एवं तामलिना बालतपसेन्द्रत्वमर्जितम् । सम्यक्त्वैकावतारत्वे, प्राप्य तीर्णो भवार्णवः ॥ ८६४ ॥

जैनक्रियापेक्षयेदं, यद्यप्यल्पतरं फलम् । सम्यग्दृष्टिर्हि तपसा, लभेत मुक्तिमीदृशा ॥ ८६५ ॥

तथाहुः–"सट्ठिं वाससहस्सा, तिसत्तखुत्तो दएण धोएण । अणुचिन्नं तामलिणा, अण्णाणतवत्ति अप्पफलो" ॥

[उपदेशमाला गाथा-८१]

जनप्रवादोऽपि - "तामलितणइ तवेण, जिणमइ सिज्झइ सत्त जण । अन्नाणह दोसेण, तामिल ईसाइणइं गयो" ॥

तथाप्यस्य निष्फलत्वं, वक्तुंशक्यं न सर्वथा । सज्ञानाज्ञानतपसोः, फले कुतोऽन्यथाऽन्यथाऽन्तरम् ? ॥ ८६६ ॥

उक्तं – "जं अन्नाणी कम्मं खवेइ, बहुयाहिं वासकोडीहिं । तं नाणी तिहिं गुत्तो, खवेइ ऊसासमित्तेणं" ॥ [संबोधरिक्तरी गा. १००]

सति मिथ्यादृशामेवं, सर्वथा निष्फलां क्रियाम् । असत्फलां वा मन्वानास्तन्वते बालचेष्टितम् ॥ ८६७ ॥

ततश्चेशाननाथोऽयं, प्राग्वज्जिनार्चनादिकम् । कृत्वा सुधर्मासदसि, सिंहासनमशिश्रियत् ॥ ८६८ ॥

त्रायस्त्रिंशास्त्वस्य चम्पावास्तव्याः सुहृदः प्रियाः । त्रयस्त्रिंशन्मिथो यावज्जीवमुग्रार्हतक्रियाः ॥ ८६९ ॥

आराध्यानेकवर्षाणि, धर्ममन्ते प्रपद्य च । द्वौ मासौ प्रायमीशाने, त्रायस्त्रिंशकतां दधुः ॥ ८७० ॥

सहस्राणि भवन्त्यस्याशीतिः सामानिकाः सुराः । दिशां चतुष्के प्रत्येकं, तावन्त आत्मरक्षकाः ॥ ८७१ ॥

दश देवसहस्राणि, स्युरभ्यन्तरपर्षदि । शतानि नव देवीनामिहोक्तानि जिनेश्वरैः ॥ ८७२ ॥

मध्यमायां सहस्राणि, स्युर्द्वादश सुधाभुजाम् । उदितानि शतान्यष्टौ, देवीनामिह पर्षदि ॥ ८७३ ॥

चतुर्दश सहस्राणि, सुराणां बाह्यसंसदि । शतानि सप्त देवीनामथायुरुच्यते क्रमात् ॥ ८७४ ॥

सप्तपल्योपमान्यायुरन्तः पर्षदि नाकिनाम् । पल्योपमानि [1]पञ्चाशद्देवीनां कथिता स्थितिः ॥ ८७५ ॥

मध्यायां देवदेवीनां, षट् चत्वारि क्रमात् स्थितिः । पञ्च त्रीणि च बाह्यायां, पल्योपमान्यनुक्रमात् ॥ ८७६ ॥

कृष्णा च कृष्णराजी च, रामा च रामरक्षिता । वसुश्च वसुगुप्ता च, वसुमित्रा वसुन्धरा ॥ ८७७ ॥

सांप्रतीनानामासां प्राग्भवस्त्वेवं—

पूर्वं कासीनिवासिन्यौ, द्वे द्वे राजगृहालये । द्वे श्रावस्तिनिवासिन्यौ, द्वे कौशाम्ब्यां कृतस्थिती ॥ ८७८ ॥

रामाख्यपितृका वृद्धकन्या धर्माख्यमातृकाः । श्रीपार्श्वपुष्पचूलान्तेवासिन्योऽष्टापि सुव्रताः ॥ ८७९ ॥

अन्ते च पक्षं संलिख्य, कृष्णावतंसकादिषु । समुत्पन्ना विमानेषु, नवपल्योपमायुषः ॥ ८८० ॥

षट्पञ्चाशत इत्येवमिन्द्राणां सर्वसंख्यया । इन्द्राण्यो द्वे शते सप्तत्यधिके सन्ति ताः समाः ॥ ८८१ ॥

पुष्पचूलार्यिकाशिष्याः, श्रीपार्श्वार्पितसंयमाः । कृतार्द्धमासानशना, दिव्यां श्रियमशिश्रियन् ॥ ८८२ ॥

इत्यर्थतो ज्ञात० द्वितीयश्रुत० ।

अष्टाप्यग्रमहिष्योऽस्य, सौधर्मेन्द्राङ्गना इव । वसुनेत्रसहस्राढ्यं, लक्षं स्युः सपरिच्छदाः ॥ ८८३ ॥

सौधर्मेन्द्रवदेषोऽपि, स्थानं चक्राकृति स्फुरत् । विकुर्व्य भोगानेताभिः, सह भुङ्क्ते यथासुखम् ॥ ८८४ ॥

---

१ पञ्चात्रदेवीनां

सैन्यानि पूर्ववत्सप्त, सप्तास्य सैन्यनायकाः । महावायुः १ पुष्पदन्तो २, महामाठर ३, एव च ॥ ८८५ ॥
महादामर्द्धिनामा ४ च, तथा लघुपराक्रमः ५ । महाश्वेतो ६ नारदश्च ७, नामतस्ते यथाक्रमम् ॥ ८८६ ॥
तुर्यस्येन्द्रस्य षष्ठस्याष्टमस्य दशमस्य च । द्वादशस्यापि सेनान्यः, स्युरेतैरेव नामभिः ॥ ८८७ ॥
पादात्याधिपतिर्योऽस्य, नाम्ना लघुपराक्रमः । स पूर्वोक्तहरिनैगमेषिजैत्रपराक्रमः ॥ ८८८ ॥
अनेन नन्दिघोषाया, घण्टायास्ताडने कृते । युगपन्मुखरायन्ते, घण्टाः सर्वविमानगाः ॥ ८८९ ॥
अस्य यानविमानं च, प्रज्ञप्तं पुष्पकाभिधम् । पुष्पकाख्यः सुरश्चास्य, नियुक्तस्तद्विकुर्वणे ॥ ८९० ॥

तथोक्तं स्थानाङ्गेऽष्टमे स्थानके— "एतेसु णं अट्ठसु कप्पेसु अट्ठ इंदा प०, तं० सक्के जाव सहस्सारे, एतेसि णं अट्ठण्हमिंदाणं अट्ठ परियाणिया विमाणा प०, तं०—पालए १ पुप्फए २ सोमणसे ३ सिरिवच्छे ४ णंदियावत्ते ५ कामकमे ६ पीतीमणे ७ विमले ८" इति ।

दाक्षिणात्येन निर्याणमार्गेणावतरत्यधः । अयं नन्दीश्वरद्वीपैशान्यां रतिकराचले ॥ ८९१ ॥
प्रागुक्तवज्राभ्यधिकशक्तिवैभवशोभनम् । शूलमस्य करे साक्षाच्छूलं प्रतीपचेतसाम् ॥ ८९२ ॥
ऐरावणाधिकस्फातिर्वृषोऽस्य वाहनं सुरः । स च प्रभौ जिगमिषौ, वृषीभूयोपतिष्ठते ॥ ८९३ ॥
तमस्कायाभिधा देवाः, सन्त्यस्य वशवर्त्तिनः । द्विविधं हि तमः स्वाभाविकं दिव्यानुभावजम् ॥ ८९४ ॥
तत्रेशानस्वर्गपतिश्चिकीर्षुस्तमसां भरम् । पर्षदादिक्रमात्प्राग्वद्, ज्ञापयत्याभियोगिकान् ॥ ८९५ ॥
तमस्कायिकदेवांस्तेऽप्यादिशन्त्याभियोगिकाः । तमस्कायं ततश्चाविष्कुर्वन्त्येतेऽधिपाज्ञया ॥ ८९६ ॥
चतुर्विधाः परेऽप्येवं, विकुर्वन्ति सुरास्तमः । क्रीडारतिद्विषन्मोहगोप्यगुप्त्यादिहेतुभिः ॥ ८९७ ॥
विकुर्वणाशक्तिरपि, स्यादस्य वज्रपाणिवत् । सर्वत्र सातिरेकत्वं, किंतु भाव्यं विवेकिभिः ॥ ८९८ ॥
चत्वारोऽस्य लोकपालास्तत्रेशानावतंसकात् । असंख्येयसहस्राणां, योजनानामतिक्रमे ॥ ८९९ ॥
प्राच्यां विमानं सुमनोऽभिधानं सोमदिक्पतेः । विमानं सर्वतोभद्रं, याम्यां यमहस्त्यतेः ॥ ९०० ॥
अपरस्यां च वरुणविमानं वल्गुनामकम् । विमानं वैश्रमणस्योत्तरस्यां स्यात्सुवल्गुकम् ॥ ९०१ ॥
सौधर्मेशानवच्चैवं, स्वर्गेषु निखिलेष्वपि । स्वेन्द्रावतंसकाल्लोकपालावासाश्चतुर्दिशम् ॥ ९०२ ॥

उक्तं च— "कप्पस्स अंतपयरे, नियकप्पवडिंसया विमाणाओ । इंदनिवासा तेसिं, चउद्दिसिं लोगपालाणं" ॥ [बृहत्संग्रहणी गा. १७]

अग्रेतनानामप्योजयुजामेवं बिडौजसाम् । तृतीयतुर्ययोर्वाच्यो, व्यत्ययो लोकपालयोः ॥ ९०३ ॥
यथा तृतीयेन्द्रस्यैते, क्रमात्सौधर्मराजवत् । चतुर्थेन्द्रस्य चेशानसुरेन्द्रस्येव ते क्रमात् ॥ ९०४ ॥
विमानानां चतुर्णामप्येषामधो विवर्त्तिनि । तिर्यग्लोके राजधान्यश्चतस्रः प्राग्वदाहिताः ॥ ९०५ ॥
सौधर्मेशानेन्द्रलोकपालानां यास्तु वर्णिताः । नगर्यः कुण्डलद्वीपे, द्वात्रिंशत्तास्त्वितः पराः ॥ ९०६ ॥

स्थितिश्च सोमयमयोः, पल्योपमद्वयं भवेत् । पल्योपमस्य चैकेन, तृतीयांशेन वर्जितम् ॥ ९०७ ॥
पूर्णं वैश्रमणस्याथ, स्थितिः पल्योपमद्वयम् । तृतीयांशाधिकं पल्यद्वयं च वरुणस्य सा ॥ ९०८ ॥
पृथ्वीराजी च रयणी, विद्युच्चेत्यभिधानतः । चतुर्णामप्यमीषां स्युश्चतस्रः प्राणवल्लभाः ॥ ९०९ ॥
एषामपत्यस्थानीयदेववक्तव्यतादिकम् । सर्वमप्यनुसंधेयं, सुधिया पूर्ववर्णितम् ॥ ९१० ॥
किंत्वमीषामौत्तराहा, वश्याः स्युरसुरादयः । उदीच्यामेव निखिलोऽधिकारः पूर्ववर्णितः ॥ ९११ ॥

तथाहुः—चउसु विमाणेसु चत्तारि उद्देसा अपरिसेसा, नवरं ठितीए णाणत्तं—

आदिदुगि तिभागूणा पलिया धणयस्स होंति दो चेव । दो सतिभागा वरुणे पलियमहावच्चदेवाणं ॥ भग०"

तथा—स्थितेरल्पत्वेऽप्यमीषामाज्ञैश्वर्यं भवेन्महत् । लोकेऽल्पविभवत्वेऽपि, नृपाधिकारिणामिव ॥ ९१२ ॥
उक्ता दशाधिपतयः, सौधर्मेशानयोर्यतः । सूत्रे तत्र सुरेन्द्रौ द्वौ, लोकपालास्तथाऽष्ट च ॥ ९१३ ॥

तथाहुः— "सोहम्मीसाणेसु णं भंते ! कप्पेसु कइ देवा आहेवच्चं जाव विहरंति ?, गो० !
दस देवा जाव विहरंति" इत्यादि [भगवतीसूत्रे श. ३. उ. २]

एवमीशानदेवेन्द्रः, सामानिकादिभिर्वृतः । विमानावासलक्षाणामिहाष्टाविंशतेः प्रभुः ॥ ९१४ ॥
उत्तरार्द्धलोकनेता, कान्त्या विद्योतयन् दिशः । असंख्यदेवीदेवानामीशानस्वर्गवासिनाम् ॥ ९१५ ॥
आधिपत्यमनुभवत्युदात्तपुण्यवैभवः । प्रतापनिस्तुलः शूलपाणिर्वृषभवाहनः ॥ ९१६ ॥
अहो माहात्म्यमस्योच्चैर्यत्सौधर्मेशोऽपि हि । आदृतः पार्श्वमभ्येतुं, क्षमते न त्वनादृतः ॥ ९१७ ॥
एवमालापसंलापौ, कर्तुं संमुखमीक्षितुम् । अनेन सह सौधर्माधीशोऽनीशो ह्यनादृतः ॥ ९१८ ॥
ईशानेन्द्रस्तु सौधर्माधिपतेरन्तिकं सुखम् । यातीक्षते जल्पति च, नास्यानुज्ञामपेक्षते ॥ ९१९ ॥
एवमुत्पन्नेषु नानाकार्येषु च परस्परम् । संभूय गोष्ठीमप्येतौ, कुर्वाते प्रश्रयाश्रयौ ॥ ९२० ॥
गच्छेत्कदाचिदीशाननाथोऽपि प्रथमान्तिकम् । सौधर्मेन्द्रोऽप्यनुज्ञाप्य, यायादेतस्य सन्निधौ ॥ ९२१ ॥
भो दक्षिणार्द्धलोकेन्द्र! सौधर्मेन्द्र ! हितावहम् । कार्यमेतदिति गिरा, वदेदीशाननायकः ॥ ९२२ ॥
उत्तरार्द्धलोकनेतर्भो ईशानसुरेश्वर ! । सत्यमित्यादिकृत्यौघानुभौ विमृशतो मिथः ॥ ९२३ ॥

तथाहुः—'प्रभू णं भंते ! सक्के देविंदे देवराया ईसाणस्स देविंदस्स देवरण्णो अंतिअं
पाउब्भवित्तए ?, हंता पभू !' इत्यादि भगवतीसूत्रे श. ३, उ. १ ।

साधारणविमानादिहेतोर्जात्वेनयोर्द्वयोः । उत्पद्यते विवादोऽपि, मिथो निर्जरराजयोः ॥ ९२४ ॥
आध्मातताम्रवत्क्रोधात्ताम्राननविलोचनौ । कल्पान्तवह्नितपनाविवाशक्यनिरीक्षणौ ॥ ९२५ ॥
चण्डरूपौ तदा चैतौ, कोऽन्यो वक्तुमपीश्वरः ? । योऽत्र युक्तमयुक्तं वा, निर्णीय शमयेत्कलिम् ॥ ९२६ ॥
ततः क्षणान्तरादीषच्छान्तौ विचिन्त्य चेतसा । सनत्कुमारं देवेन्द्रं, स्मरतस्तावुभावपि ॥ ९२७ ॥

सोऽपि ताभ्यां स्मर्यमाणो, विज्ञायावधिना द्रुतम् । तत्रागत्य न्याय्यकार्यमाज्ञाप्य शमयेत्कलिम् ॥ ९२८ ॥
ततः सनत्कुमारेन्द्रबोधितौ त्यक्तविग्रहौ । तदाज्ञां बिभ्रतो मौलौ, तौ मिथः प्रीतमानसौ ॥ ९२९ ॥

तथाहुः—'अत्थिणं भंते ! सक्कीसाणाणं देविंदाणं देवराईणं विवादा समुप्पज्जंति, ? हंता अत्थीत्यादि' भगवतीसूत्रे श. ३, उ. १ ।

कदाचिच्च तथा क्रुद्धौ, युद्धसज्जौ परस्परम् । सामानिकादयो देवा, उभयोरपि संमताः ॥ ९३० ॥
अर्हद्दंष्ट्राक्षालनाम्बुसेकात्तौ गतमत्सरौ । निर्माय निर्मायतया, बोधयन्ति नयस्थितिम् ॥ ९३१ ॥
पश्यतातितमां रागद्वेषयोर्दुर्विलङ्घताम् । यदेताभ्यां विडम्ब्येते, तादृशावप्यधीश्वरौ ॥ ९३२ ॥
एवमीशानदेवेन्द्रोऽनुभवन्नपि वैभवम् । अर्हन्तमर्हद्धर्मं च, चित्तान्न त्यजति क्षणम् ॥ ९३३ ॥
उत्तरार्द्धजिनेन्द्राणां, कल्याणकेषु पञ्चसु । करोत्यग्रेसरीभूय, सहोत्साहं महोत्सवान् ॥ ९३४ ॥
जिनेन्द्रपादान् भजते, भरतैरवतादिषु । नन्दीश्वरे च प्रत्यब्दं, करोत्यष्टाहिकोत्सवान् ॥ ९३५ ॥
असकृच्चार्हतां भावपूजामपि करोति सः । अष्टोत्तरं नटनटीशतं विकृत्य नर्त्तयन् ॥ ९३६ ॥
देवपर्षत्समक्षं च, चमत्कारातिरेकतः । प्रशंसति नरस्यापि, धर्मदार्ढ्यादिकं गुणम् ॥ ९३७ ॥
आराध्यानेकधा धर्मं, सम्यक्त्वाद्येवमुत्तमम् । समाप्यायुः सातिरेकं सागरोपमयोर्द्वयम् ॥ ९३८ ॥
इतश्च्युत्वेशानराजो, महाविदेहभूमिषु । उत्पद्य प्राप्तचारित्रो, भावी मुक्तिवधूधवः ॥ ९३९ ॥

इत्थं मया पृथुसुखौ प्रथमद्वितीयौ, स्वर्गावनर्गलशुभाचरणाधिगम्यौ ।
साधीश्वरौ श्रुतवतां वचनानुसाराव्यावर्णितौ विभवशालिसुरालिपूर्णौ । ॥ ९४० ॥
विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिष-द्वाजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे, । षड्विंशो मधुरः समाप्तिमगमत्सर्गो निसर्गोज्ज्वलः ॥ ९४१ ॥

इति श्रीलोकप्रकाशे षड्विंशः सर्गः समाप्तः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

॥ अथ सप्तविंशतितमः सर्गः ॥

सौधर्मेशाननामानावुक्तौ स्वर्गौ सभर्तृकौ । स्वरूपमुच्यते किञ्चित्तृतीयतुर्ययोरथ ॥ १ ॥
सौधर्मेशाननाकाभ्यां, दूरमूर्ध्वं व्यवस्थितौ । योजनानामसंख्येयकोटाकोटिव्यतिक्रमे ॥ २ ॥
सनत्कुमारमाहेन्द्रौ, स्वर्गौ निसर्गसुन्दरौ । सौधर्मेशानवदिमावप्येकवलयस्थितौ ॥ ३ ॥

संस्थानमर्द्धचन्द्राभं, प्रत्येकमनयोर्भवेत् । उभौ पुनः समुदितौ, पूर्णचन्द्राकृती मतौ ॥ ४ ॥
तत्रापि सौधर्मस्योर्ध्वं, समपक्षं समानदिक् । सनत्कुमार ईशानस्योर्ध्वं माहेन्द्र एव च ॥ ५ ॥
प्रतरा द्वादश प्राग्वद्, द्वयोः संगतयोरिह । प्रतिप्रतरमेकैकं, भवेद्विमानमिन्द्रकम् ॥ ६ ॥
वैडूर्यं रुचकं चैव, रुचिकं च ततः परम् । अङ्कं च स्फटिकं चैव, तपनीयाख्यमेव च ॥ ७ ॥
मेघ मर्घ्यं च हारिद्रं नलिनं लोहिताक्षकम् । वज्रं चेति प्रतरेषु, द्वादशस्विन्द्रकाः क्रमात् ॥ ८ ॥
चतस्रः पङ्क्तयो दिक्षु, प्रतिप्रतरमिन्द्रकात् । अन्तरेषु विना प्राचीं, प्राग्वत्पुष्पावकीर्णकाः ॥ ९ ॥
एकोनपञ्चाशदष्टसप्तषट्पञ्चकाधिका । चतुस्त्रिद्व्येकाधिका च, चत्वारिंशत्ततः परं ॥ १० ॥
चत्वारिंशदथैकोनचत्वारिंशद्विमानकाः । अष्टात्रिंशत्प्रतिपङ्क्ति, प्रतरेषु क्रमादिह ॥ ११ ॥
प्रथमप्रतरे सप्तदश त्र्यस्रा विमानकाः । प्रतिपङ्क्ति चतुष्कोणा, वृत्ताः षोडश षोडश ॥ १२ ॥
सर्वे पङ्क्तिविमानाश्च, षण्णवत्यधिकं शतम् । द्वितीयप्रतरे त्रैधा, अपि षोडश षोडश ॥ १३ ॥
सर्वे च ते संकलिता, द्विनवत्यधिकं शतम् । तार्तीयीके प्रतिपङ्क्ति, वृत्ताः पञ्चदशोदिताः ॥ १४ ॥
षोडश त्रिचतुष्कोणाः, सर्वेऽष्टाशीतियुक् शतम् । तुर्ये त्र्यस्रा षोडशान्ये, द्वैधाः पञ्चदशाखिलाः ॥ १५ ॥
शतं चतुरशीत्याढ्यं, पञ्चमे प्रतरे पुनः । त्रैधा अपि पञ्चदश, सर्वेऽशीत्यधिकं शतम् ॥ १६ ॥
पञ्चदश पञ्चदश, षष्ठे त्रिचतुरस्रकाः । वृत्ताश्चतुर्दशैवं च, षट्सप्ततियुतं शतम् ॥ १७ ॥
सप्तमे प्रतरे त्र्यस्राः, प्रोक्ताः पञ्चदशोत्तमैः । वृत्ताश्च चतुरस्राश्च, चतुर्दश चतुर्दश ॥ १८ ॥
द्विसप्तत्या समधिकं, शतं सर्वेऽष्टमे पुनः । चतुर्दशैव त्रेधापि, सर्वेऽष्टषष्ठियुक् शतम् ॥ १९ ॥
नवमे त्रिचतुष्कोणांश्चतुर्दश चतुर्दश । वृत्तास्त्रयोदशैवं च, चतुःषष्टियुतं शतम् ॥ २० ॥
त्र्यस्राश्चतुर्दशान्ये च, द्वैधा अपि त्रयोदश । षष्ट्याधिकं शतं सर्वे, दशमे प्रतरे पुनः ॥ २१ ॥
एकादशे त्रिधाप्येते, त्रयोदश त्रयोदश । सर्वे पुनः संकलिताः, षट्पञ्चाशद्युतं शतम् ॥ २२ ॥
द्वादशे त्रिचतुष्कोणास्त्रयोदश त्रयोदश । वृत्ताश्च द्वादशैवं च, द्विपञ्चाशं शतं समे ॥ २३ ॥
एवं च पङ्क्ति वृत्तानां, साशीतिरिह षट्शती । पङ्क्तित्र्यस्राणां च सप्त, शतानि द्वादशोपरि ॥ २४ ॥
स्यात्पङ्क्तिचतुरस्राणां, सषण्णवतिषट्शति । द्वादशानामिन्द्रकाणां, क्षेपेऽत्र सर्वसंख्यया ॥ २५ ॥
पाङ्क्तेयानि विमानानि, स्युः शतान्येकविंशतिः । भवन्त्यन्यानि पुष्पावकीर्णानि तानि संख्यया ॥ २६ ॥
सहस्राः सप्तनवतिर्लक्षाण्येकोनविंशतिः । शतानि नव सर्वाग्राद्विमानलक्षविंशतिः ॥ २७ ॥
तत्र द्वादश लक्षाणि, सनत्कुमारचक्रिणः । लक्षाण्यष्ट विमानानां, माहेन्द्राधीश्वरस्य च ॥ २८ ॥
सनत्कुमारमाहेन्द्रसुरेन्द्रयोः पृथक् पृथक् । सौधर्मेशानवद्वृत्तादिषु स्वामित्वमुह्यताम् ॥ २९ ॥
संख्या सनत्कुमारेऽथ, वृत्तानां पङ्क्तिवर्त्तिनाम् । द्वाविंशत्यधिका पञ्चशती प्राच्यैर्निरूपिता ॥ ३० ॥

त्रिकोणानां सर्वसंख्या, षट्पञ्चाशं शतत्रयम् । चतुष्कोणानां तथाष्टचत्वारिंशं शतत्रयम् ॥ ३१ ॥
षड्विंशा द्वादशशती, पाङ्क्तेयानां भवेदिह । लक्षाण्येकादशैवाष्टनवतिश्च सहस्रकाः ॥ ३२ ॥
सचतुःसप्ततिः सप्तशती पुष्पावकीर्णकाः । एवं द्वादश लक्षाणि, तृतीयस्य सुरेशितुः ॥ ३३ ॥
तुर्ये वृत्तविमानानां, सप्तत्याऽभ्यधिकं शतम् । षट्पञ्चाशत्समधिकं, त्रिकोणानां शतत्रयम् ॥ ३४ ॥
चतुष्कोणानां तथाष्टचत्वारिंशं शतत्रयम् । शतान्यष्ट चतुःसप्तत्याढ्यानि सर्वसंख्यया ॥ ३५ ॥
सप्त लक्षाण्यथ नवनवतिश्च सहस्रकाः । षड्विंशं च शतं पुष्पावकीर्णा इह निश्चिताः ॥ ३६ ॥
एषां योगेऽष्टलक्षाणि, माहेन्द्रस्य सुरेशितुः । विमानानीशितव्यानि, भाव्यानि भव्यधीधनैः ॥ ३७ ॥
अमी विमानाः सर्वेऽपि, घनवातप्रतिष्ठिताः । श्यामं विना चतुर्वर्णा, मणिरत्नविनिर्मिताः ॥ ३८ ॥
घनवातोऽतिनिचितो, निश्चलो वातसंचयः । जगत्स्वाभाव्यतस्तत्र, विमानाः शश्वदास्थिताः ॥ ३९ ॥
षड्विंशतिः शतान्येषु, पृथ्वीपिण्डो निरूपितः । शतानि षड् योजनानां, प्रासादाः स्युरिहोच्छ्रिताः ॥ ४० ॥
सौधर्मेशाननिष्ठानां, विमानानामपेक्षया । अत्युत्कृष्टवर्णगन्धरसस्पर्शा अमी मताः ॥ ४१ ॥
सौधर्मेशानवच्छेषं, स्वरूपं भाव्यतामिह । विष्कम्भायामपरिधिमानं तु प्राक् प्रदर्शितम् ॥ ४२ ॥
अथैतेषु विमानेषु, पूर्वपुण्यानुसारतः । उत्पद्यन्ते सुरास्तत्र, रीतिस्तु प्राक् प्रपञ्चिता ॥ ४३ ॥
पद्मकेसरवद्गौरास्तेऽथ सर्वाङ्गभूषणाः । वराहचिह्नमुकुटाः, सनत्कुमारनाकिनः ॥ ४४ ॥
सिंहचिह्नधारिचारुकिरीटरम्यमौलयः । देवा विशिष्टद्युतयो, माहेन्द्रस्वर्गवासिनः ॥ ४५ ॥
जघन्यतोऽपि पाथोधिद्वितयस्थितयः सुराः । सनत्कुमारेऽथोत्कर्षात्, सप्तसागरजीविनः ॥ ४६ ॥
माहेन्द्रे तु जघन्येन, साधिकाब्धिद्वयायुषः । उत्कर्षतः पुनः सातिरेकसप्तार्णवायुषः ॥ ४७ ॥
एकस्य सागरस्यांशाः, कल्प्यन्ते द्वादशेदृशाः । स्वर्गयोरेतयोर्भागा, ज्ञेयाः स्थितिनिरूपणे ॥ ४८ ॥
प्रथमप्रतरे तत्रोत्कृष्टा जलनिधिद्वयम् । स्थितिः पञ्चलवोपेतं, द्वितीयप्रतरे पुनः ॥ ४९ ॥
दशभागाधिकं वार्द्धिद्वयं स्थितिर्गरीयसी । त्रिभिर्भागैः समधिकास्तृतीये सागरास्त्रयः ॥ ५० ॥
चतुर्थे प्रतरे साष्टभागं वारांनिधित्रयम् । पञ्चमे सैकभागं च, वारांनिधिचतुष्टयम् ॥ ५१ ॥
षड्भागाभ्यधिकं षष्ठे, तदेव सप्तमे पुनः । न्यूनमेकेन भागेन, सागरोपमपञ्चकम् ॥ ५२ ॥
एतदेव चतुर्भागाभ्यधिकं प्रतरेऽष्टमे । नवमे नवभागाढ्यमेतत्पयोधिपञ्चकम् ॥ ५३ ॥
साधिका दशमे द्वाभ्यां, भागाभ्यां षट् पयोधयः । एकादशेऽप्येत एव, साधिकाः सप्तभिर्लवैः ॥ ५४ ॥
प्रतरे द्वादशे चात्र, देवानां परमा स्थितिः । अर्णवाः सप्त सर्वत्र, जघन्या त्वम्बुधिद्वयम् ॥ ५५ ॥

सनत्कुमारे निर्दिष्टा, येयं ज्येष्ठेतरा स्थितिः । माहेन्द्रेऽपि सैव किंतु, ज्ञेया सर्वत्र साधिका ॥ ५६ ॥
अत्रापि सातिरेकत्वं, सामान्योक्तमपि श्रुते । पल्योपमस्यासंख्येयभागेनेति विभाव्यताम् ॥ ५७ ॥
देहोच्चत्वं सुराणां स्यादिह स्थित्यनुसारतः । द्विसागरायुषस्तत्र, सप्तहस्तोच्चभूधनाः ॥ ५८ ॥
त्रिपाथोधिजीविनां तु, कराः षट् तनुतुङ्गता । एकादशविभक्तस्य, चत्वारोऽंशाः करस्य च ॥ ५९ ॥
त्रयो भागाः कराः षट् च, चतुर्जलधिजीविनाम् । द्वौ भागौ षट् करास्तुङ्गे, देहः पञ्चार्णवायुषाम् ॥ ६० ॥
एको भागः षट् कराश्च, षट्सागरोपमायुषाम् । सप्ताब्धिस्थितयः पूर्णषट्करोत्तुङ्गविग्रहाः ॥ ६१ ॥
ते चोच्छ्वसन्ति मासेनार्णवद्वयायुषस्ततः । स्यात्पक्षवृद्धिरुच्छ्वासान्तरे सप्तार्णवावधि ॥ ६२ ॥
द्वाभ्यां त्रिभिश्चतुःपञ्चषट्सप्तभिः सहस्रकैः । स्थितेरपेक्षयाऽब्दानामाहारयन्ति पूर्ववत् ॥ ६३ ॥
यथोक्तसागरेभ्यश्च, हीनाधिकायुषां पुनः । आहारोच्छ्वासदेहादिमानं हीनाधिकं भवेत् ॥ ६४ ॥
कामभोगाभिलाषे तु, सौधर्मस्वर्गवासिनीः । पल्योपमाधिकदशपल्योपमान्तजीविनीः ॥ ६५ ॥
प्राच्यपुण्यानुसारेण, लब्धाधिकाधिकस्थितीः । स्मरन्ति चेतसा देवीः, स्वार्हाः कामानलैधसा ॥ ६६ ॥
ततस्ता अपि जानन्ति, सद्योऽङ्गस्फुरणादिभिः । स्वकामुकरिरंसां द्रागत्यन्तचतुराशयाः ॥ ६७ ॥
ततश्चाद्भुतशृङ्गारनेपथ्यसुषमाञ्चिताः । उपायान्ति तदभ्यर्णं, भर्तुर्गृहमिवाङ्गनाः ॥ ६८ ॥
ततस्ता विनिवेश्यैते, क्रोडसिंहासनादिषु । भुजोपपीडमालिङ्ग्य, पीडयन्तः स्तनौ मुहुः ॥ ६९ ॥
चुम्बन्तोऽधरबिम्बादौ, स्पृशन्तो जघनादिषु । एवं संस्पर्शमात्रेण, तृप्यन्ति सुरतैरिव ॥ ७० ॥
देव्योऽपि ताः स्पर्शभोगैस्तथा दिव्यप्रभावतः । शरीरान्तः परिणतैस्तृप्यन्ति शुक्रपुद्गलैः ॥ ७१ ॥
एवं पञ्चाक्षविषयास्वादाह्लादैर्निरन्तरम् । जानन्त्येते गतमपि, कालं नैकनिमेषवत् ॥ ७२ ॥
ज्ञानेनावधिना त्वेते, द्वितीयां शर्कराप्रभाम् । पश्यन्त्यधस्तलं यावत्पद्मलेश्याः स्वभावतः ॥ ७३ ॥
गर्भजौ नरतिर्यञ्चौ, संख्येयस्थितिशालिनौ । उत्पद्येते इहैतेऽपि, च्युत्वा यान्त्येतयोर्द्वयोः ॥ ७४ ॥
एकसामयिकी प्राग्वत्संख्योत्पत्तिविनाशयोः । एकसामयिकं ज्ञेयं, जघन्यं ग्रान्तरं तयोः ॥ ७५ ॥
युक्ता मुहूर्त्तैर्विंशत्या, दशभिश्च दिनाः क्रमात् । नव द्वादश च ज्येष्ठान्तरं स्यादनयोर्दिवोः ॥ ७६ ॥
सनत्कुमारमाहेन्द्रस्वर्गयोरमृताशिनाम् । उक्तं स्वरूपमनयोः, स्वामिनोस्तदथोच्यते ॥ ७७ ॥
प्रतरे द्वादशे तत्र, सनत्कुमारताविषे । सौधर्मवदशोकाद्याः, प्राच्यादिष्ववतंसकाः ॥ ७८ ॥
मध्ये सनत्कुमारावतंसकः पर्ववद्भवेत् । तत्रोपपातशय्यायामुपपातसभास्पृशि ॥ ७९ ॥
उत्पद्यते खलु सनत्कुमारेन्द्रतया कृती । कृतपुण्यः करोत्युक्तरीत्याऽर्हदर्चनादिकम् ॥ ८० ॥
ततः सिंहासनासीनश्चारुशृङ्गारभासुरः । सामानिकैर्द्विसप्तत्या, सहस्रैः परितो वृतः ॥ ८१ ॥
पञ्चपल्योपमाढ्यार्द्धपञ्चमाम्भोधिजीविभिः । अन्तःपर्षद्वृतैर्देवसहस्रैरष्टभिर्वृतः ॥ ८२ ॥

चतुःपल्याधिकसार्द्धचतुःसागरजीविभिः । मध्यपर्षद्गतैर्देवसहस्रैर्दशभिर्वृतः ॥ ८३ ॥
त्रिपल्याभ्यधिकाध्यर्द्धचतुर्णवजीविभिः । सहस्रैश्च द्वादशभिर्जुष्टो बाह्यसभासदाम् ॥ ८४ ॥
त्रायस्त्रिंशैर्मन्त्रिभिश्च, लोकपालैश्च पूर्ववत् । आश्रितः सप्तभिः सैन्यैः, सैन्याधिपैश्च सप्तभिः ॥ ८५ ॥
द्विसप्तत्या सहस्रैश्च, पृथक् पृथक् चतुर्दिशम् । सेवितः सज्जकवचैः, शस्त्रोग्रैरात्मरक्षकैः ॥ ८६ ॥
विमानावासलक्षाणां, द्वादशानामधीश्वरः । तद्वासिनां च देवानामसंख्यानां महौजसाम् ॥ ८७ ॥
सदैश्वर्यमनुभवत्युदात्तपुण्यवैभवः । दिव्यशक्तिसंप्रयुक्तपटुनाटकदत्तदृक् ॥ ८८ ॥
अस्य यानविमानं च, भवेत्सौमनसाभिधम् । देवः सौमनसाख्यश्च, नियुक्तस्तद्विकुर्वणे ॥ ८९ ॥
निजवैक्रियलब्ध्या तु, देवरूपैर्विकुर्वितैः । जम्बूद्वीपांश्चतुरोऽयं, पूर्णान् पूरयितुं क्षमः ॥ ९० ॥
तिर्यक् पुनरसंख्येयान्, भर्तुं द्वीपाम्बुधीन् क्षमः । सौधर्मेशानाधिराजापेक्षया किल भूयसः ॥ ९१ ॥
भोगेच्छुस्तु सुधर्मायां, जिनास्थ्याशातनाभिया । जम्बूद्वीपसमं स्थानं, चक्राकृति विकुर्वयेत् ॥ ९२ ॥
मध्ये रत्नपीठिकाढ्यं, प्रासादं रचयत्ययम् । षड्योजनशतोत्तुङ्गं, रत्नचन्द्रोदयाञ्चितम् ॥ ९३ ॥
तत्र सिंहासनं रत्नपीठिकायां सृजत्यसौ । न शक्रेशानवच्छय्यां, संभोगाभावतस्तथा ॥ ९४ ॥
सामानिकादिकाशेषपरिवारसमन्वितः । लज्जनीयरताभावात्तत्रोपैत्यथ वासवः ॥ ९५ ॥
सौधर्मस्वर्गवासिन्यस्तद्योग्यास्त्रिदशाङ्गनाः । तत्रायान्ति सहैताभिर्भुङ्क्ते वैषयिकं सुखम् ॥ ९६ ॥
माहेन्द्रेन्द्रादयोऽप्येवं, देवेन्द्रा अच्युतावधि । चक्राकृतिस्थानकादि, विकृत्य भुञ्जते सुखम् ॥ ९७ ॥
तत्र चक्राकृतिस्थाने, प्रासादांस्तु सृजन्त्यमी । स्वस्वविमानप्रासादोत्तुङ्गान् सिंहासनाञ्चितान् ॥ ९८ ॥
एवमैश्वर्ययुक्तोऽपि, विरक्त इव धार्मिकः । महोपकारिणं प्राज्ञ, इव धर्ममविस्मरन् ॥ ९९ ॥
बहूनां साधुसाध्वीनां, जिनधर्मदृढात्मनाम् । श्रावकाणां श्राविकाणां, सम्यक्त्वादिव्रतस्पृशाम् ॥ १०० ॥
हितकामः सुखकामो, निःश्रेयसाभिलाषुकः । गुणग्राही गुणवतां, गुणवान् गुणिपूजकः ॥ १०१ ॥
सनत्कुमाराधिपतिर्भव्यः सुलभबोधिकः । महाविदेहेषूत्पद्य, भवे भाविनी सेत्स्यति ॥ १०२ ॥
माहेन्द्रदेवलोकेऽपि, प्रतरे द्वादशे स्थिताः । पञ्चावतंसका अङ्गादय ईशाननाकवत् ॥ १०३ ॥
मध्यस्थितेऽथ माहेन्द्रावतंसकविमानके । उत्पद्योत्पादशय्यायां, प्राग्वत्कृतजिनार्चनः ॥ १०४ ॥
सिंहासनसमासीनः, पीनश्रीर्भाग्यभासुरः । सामानिकानां सप्तत्या, सहस्रैः परितो वृतः ॥ १०५ ॥
सप्तषट्पञ्चपल्याढ्यां, सार्द्धार्णवचतुष्टयीम् । यथाक्रमं विक्रमाढ्यैर्दधद्भिः स्थितिमायुषः ॥ १०६ ॥
षड्भिरान्तरपार्षद्यैरष्टाभिर्मध्यपार्षदैः । दशभिः बाह्यपार्षद्यैः, सेव्यः सुरसहस्रकैः ॥ १०७ ॥
चतुर्भिश्च लोकपालैः, सप्तभिः सैन्यनायकैः । सैन्यैश्च सप्तभिः सेवाचतुरैरनुशीलितः ॥ १०८ ॥
प्राच्यादिदिक्षु प्रत्येकमुद्दण्डायुधपाणिभिः । जुष्टः सहस्रैः सप्तत्या, निर्जरैरात्मरक्षकैः ॥ १०९ ॥

जम्बूद्वीपान् सातिरेकान्, चतुरश्च विकुर्वितैः । रूपैर्भर्त्तुं क्षमस्तिर्यगसंख्यद्वीपवारिधीन् ॥ ११० ॥
विमानावासलक्षाणामिहाष्टानामधीश्वरः । देवानां भूयसामेवं, माहेन्द्रस्वर्गवासिनाम् ॥ १११ ॥
ईशानोऽसौ विजयते, दिव्यनाटकदत्तहृत् । माहेन्द्रेन्द्रः सातिरेकसप्तसागरजीवितः ॥ ११२ ॥
अस्य यानविमानं च, श्रीवत्साख्यं प्रकीर्तितम् । श्रीवत्सनामा देवश्च, नियुक्तस्तद्विकुर्वणे ॥ ११३ ॥
सनत्कुमारमाहेन्द्रस्वर्गाभ्यामूर्ध्वमुल्लसन् । असंख्यकोटाकोटीनां, योजनानामतिक्रमे ॥ ११४ ॥
सनत्कुमारमाहेन्द्रोपरिस्थितः समानदिक् । ब्रह्मलोकाभिधः स्वर्गो, भाति पूर्णेन्दुसंस्थितः ॥ ११५ ॥
षडत्र प्रतराः प्राग्वत्प्रतिप्रतरमिन्द्रकम् । अञ्जनं वरमालं च, रिष्टं च देवसंज्ञकम् ॥ ११६ ॥
सोमं च मङ्गलं चैव, क्रमादेभ्यश्चतुर्दिशम् । विमानपङ्क्तयः प्राग्वत्तत्र पुष्पावकीर्णकाः ॥ ११७ ॥
सप्तषट्पञ्चयुक्त्रिंशत्, चतुस्त्रिद्व्यधिका च सा । प्रतिपङ्क्ति विमानाः स्युः, प्रतरेषु क्रमादिह ॥ ११८ ॥
प्रथमप्रतरे तत्र, प्रतिपङ्क्ति विमानकाः । त्रयोदश त्रिकोणाः स्युर्द्वादश द्वादशापरे ॥ ११९ ॥
अष्टचत्वारिंशमेवं, पाङ्क्तेयानां शतं मतम् । त्रैधा अपि द्वितीयेऽस्मिन्, द्वादश द्वादशोदिताः ॥ १२० ॥
सर्वे शतं चतुश्चत्वारिंशं चाथ तृतीयके । वृत्ता एकादश द्वैधा, द्वादश द्वादशापरे ॥ १२१ ॥
चत्वारिंशं शतं सर्वे, प्रतरेऽथ तुरीयके । वृत्ता द्वादश किञ्चैकादश त्रिचतुरस्रकाः ॥ १२२ ॥
सर्वे शतं च षट्त्रिंशं, पञ्चमे प्रतरे पुनः । एकादशमितास्त्रैधा, द्वात्रिंशं च शतं समे ॥ १२३ ॥
षष्ठेऽथ प्रतरे वृत्ताः, प्रतिपङ्क्ते दशापरे । द्विधाप्येकादश पृथगष्टाविंशं शतं समे ॥ १२४ ॥
चतुःसप्ततियुक्ते द्वे, शते च पङ्क्तिवृत्तकाः । भवन्त्येवमिन्द्रकाणां, षण्णां संयोजनादिह ॥ १२५ ॥
पङ्क्तित्र्यस्राश्च चतुरशीतियुक्तं शतद्वयम् । द्वे शते पङ्क्तिचतुरस्रकाः षट्सप्ततिस्पृशी ॥ १२६ ॥
चतुस्त्रिंशाष्टशत्येवं, पाङ्क्तेयाः सर्वसंख्यया । निर्दिष्टाः पञ्चमस्वर्गे, पञ्चमज्ञानचारुभिः ॥ १२७ ॥
लक्षास्तिस्रः सदस्राणां, नवतिश्च नवाधिका । शतमेकं सषट्षष्टिरत्र पुष्पावकीर्णकाः ॥ १२८ ॥
विमानानां च लक्षाणि, चत्वारि सर्वसंख्यया । निर्दिष्टा ब्रह्मलोकेऽमी, घनवाते प्रतिष्ठिताः ॥ १२९ ॥
प्रासादानामुच्चतैषु, शतानि सप्त निश्चितम् । पृथ्वीपिण्डो योजनानां, शतानि पञ्चविंशतिः ॥ १३० ॥
भवन्ति वर्णतश्चामी, शुक्लपीतारुणप्रभाः । ज्ञेयं शेषमशेषं तु, स्वरूपमुक्तया दिशा ॥ १३१ ॥
उत्पद्यन्तेऽमीषु देवतया सुकृतशालिनः । कृतार्हदर्चनाः प्राग्वद्दिव्यसौख्यानि भुञ्जते ॥ १३२ ॥
मधुकपुष्पवर्णाङ्गाः, प्रभाप्राग्भारभासुराः । छागचिह्नाढ्यमुकुटाः, पद्मलेश्याञ्चिताशयाः ॥ १३३ ॥

तथाह जीवाभिगमः— 'बंभलोगलंतगा देवा अल्लमहूयपुप्फवन्नाभा' यत्तु संग्रहण्यां—एते पद्मकेसरगौरा उक्ताः "तत्पक्वमधुकपुष्पपद्मकेसरयोर्वर्णे न विशेष" इति तद्वृत्ताविति ध्येयं ।

जघन्यतोऽप्यमी सप्तसागरस्थितयः सुराः । उत्कर्षतः पुनः पूर्णदशाम्भोनिधिजीविनः ॥ १३४ ॥

प्रथमप्रतरे त्वत्र, नाकिनां परमा स्थितिः । सार्द्धा सप्तार्णवास्ते च, द्वितीयेऽष्टौ प्रकीर्त्तिताः ॥ १३५ ॥
तृतीयेऽष्टाब्धयः सार्द्धाश्चतुर्थे च नवैव ते । पञ्चमे नव सार्द्धाश्च, षष्ठे पूर्णा दशाब्धयः ॥ १३६ ॥
सर्वत्रापि जघन्या तु, सप्तैव जलराशयः । तथा सप्तार्णवायुष्का, येऽत्र ते षट्करोच्छ्रिताः ॥ १३७ ॥
अष्टाकूपारायुषां तु, देहमानं भवेदिह । कराः पञ्चैकादशांशैः, षड्भिरभ्यधिका अथ ॥ १३८ ॥
नवाब्धिजीविनां पञ्च, कराः पञ्चलवाधिकाः । दशार्णवायुषां पञ्च, कराश्चतुर्लवाधिकाः ॥ १३९ ॥
स्यादेतेषां निजनिजस्थितिसागरसंमितैः । भुक्तिर्वर्षाणां सहस्रैः, पक्षैरुच्छ्वास ईरितः ॥ १४० ॥
एषां कामाभिलाषे तु, देव्योऽभ्यायान्ति चिन्तिताः । सौधर्मस्वर्गवास्तव्यास्तद्योग्याः कान्तिभासुराः ॥ १४१ ॥
तद्राजधानीस्थानीयं, मनोभवमहीपतेः । दिव्यमुन्मादजनकं, स्वरूपं स्वर्गयोषिताम् ॥ १४२ ॥
विलोकयन्तस्तेऽक्षामकामाभिरामया दृशा । प्रतीच्छन्तः कटाक्षांश्च, तासामाकूतकोमलान् ॥ १४३ ॥
एवं पश्यन्त एवामी, तृप्यन्ति सुरतैरिव । प्रागुक्तापेक्षया स्वल्पकामोद्रेकाः सुधाभुजः ॥ १४४ ॥
देव्योऽपि ताः परिणतैस्तादृग्दिव्यानुभावतः । दूरादपि निजाङ्गेषु, तृप्यन्ति शुक्रपुद्गलैः ॥ १४५ ॥
सेवार्त्तेन विना ये स्युः, पञ्चसंहननाञ्चिताः । गर्भजास्ते नृतिर्यञ्च, उत्पद्यन्तेऽत्र ताविषे ॥ १४६ ॥
नृतिरश्चोरेव गर्भजयोश्च्युत्वोद्भवन्त्यमी । च्यवमानोत्पद्यमानसंख्या त्वत्रापि पूर्ववत् ॥ १४७ ॥
अत्रोत्पत्तिच्यवनयोरन्तरं परमं यदि । द्वाविंशतिर्दिनान्यर्द्धाधिकान्येव भवेत्तदा ॥ १४८ ॥
वसुमत्यास्तृतीयायाः, पश्यन्त्यधस्तलावधि । इहत्या निर्जराः स्वच्छतमेनावधिचक्षुषा ॥ १४९ ॥
अत्रापि प्रतरे षष्टे, ब्रह्मलोकावतंसकः । अशोकाद्यवतंसानां, मध्ये सौधर्मवद्भवेत् ॥ १५० ॥
तत्र च ब्रह्मलोकेन्द्रो, देवराजो विराजते । सामानिकसुरैः षष्ट्या, सहस्रैः सेवितोऽभितः ॥ १५१ ॥
पञ्चपल्योपमोपेतसार्द्धाष्टसागरायुषाम् । चतुःसहस्र्या देवानामन्तःपर्षदि सेवितः ॥ १५२ ॥
षड्भिर्देवसहस्रैश्च, मध्यपर्षदि सेवितः । चतुःपल्योपमोपेतसार्द्धाष्टाम्भोधिजीविभिः ॥ १५३ ॥
बाह्यपर्षदि देवानां, सहस्रैरष्टभिर्वृतः । पल्योपमत्रयोपेतसार्द्धाष्टवार्द्धिजीविभिः ॥ १५४ ॥
त्रायस्त्रिंशैर्लोकपालैर्मित्रमन्त्रिपुरोहितैः । प्राग्वद्यानविमानाद्यधिकारिवाहनादिभिः ॥ १५५ ॥
एकैकस्यां दिशि षष्ट्या, सहस्रैरात्मरक्षकैः । अनीकैः सप्तभिः सप्तभिः सेव्योऽनीकनायकैः ॥ १५६ ॥
अन्येषामप्यनेकेषां, देवानां ब्रह्मवासिनाम् । विमानावासलक्षाणां, चाष्टानामप्यधीश्वरः ॥ १५७ ॥
जम्बूद्वीपानष्ट पूर्णान्, रूपैर्नव्यैर्विकुर्वितैः । क्षमः पूरयितुं तिर्यगसंख्यद्वीपवारिधीन् ॥ १५८ ॥
कृतार्हदर्चनः प्राग्वद्धर्मस्थितिविशारदः । साम्राज्यं शास्ति संपूर्णदशसागरजीवितः ॥ १५९ ॥
अस्य यानविमानं च, नन्द्यावर्त्तमिति स्मृतम् । नन्द्यावर्त्ताभिधो देवो, नियुक्तस्तद्विकुर्वणे ॥ १६० ॥
अथास्य ब्रह्मलोकस्य, वरिष्ठे रिष्टनामनि । तृतीयप्रतरे सन्ति, लोकान्तिकाः सुरोत्तमाः ॥ १६१ ॥

तथाह्यतिक्रम्य तिर्यग्, जम्बूद्वीपादितः परम् । द्वीपाम्बुधीनसंख्येयान्, द्वीपोऽरुणवरः स्थितः ॥ १६२ ॥
स्थानद्विगुणविस्तीर्णतया सोऽसंख्यविस्तृतः । द्विगुणेनायमरुणवरेण वेष्टितोऽब्धिना ॥ १६३ ॥
अथ द्वीपस्यास्य बाह्यवेदिकान्तप्रदेशतः । अवगाह्यारुणवरनामधेयं पयोनिधिम् ॥ १६४ ॥
योजनानां सहस्रान् द्वाचत्वारिंशतमत्र च । जलोपरितलादूर्ध्वमप्कायविकृतीर्महान् ॥ १६५ ॥
तमस्कायो महाघोरान्धकाररूप उद्गतः । परितोऽब्धिमिमं रुन्धन्, वलयाकृतिनाऽऽत्मना ॥ १६६ ॥
स्थिरार्केन्दुकरक्लिष्टैः, संभूय तिमिरैरिव । रचितः स्वनिवासाय, भीमदुर्गो महाम्भसि ॥ १६७ ॥
योजनानां सप्तदश, शतान्यथैकविंशतिम् । यावदूर्ध्वं समभित्त्याकार एवायमुद्गतः ॥ १६८ ॥
ततश्च विस्तरंस्तिर्यक्क्रमादसंख्यविस्तृतिः । निक्षिप्य कुक्षौ चतुरः, सौधर्मादीस्त्रिविष्टपान् ॥ १६९ ॥
ततोऽप्यूर्ध्वं ब्रह्मलोके, तृतीयप्रस्तटावधि । उद्गत्य निष्ठितः श्रान्त, इवाविश्रममुत्पतन् ॥ १७० ॥
अधश्चायं समभित्त्याकारत्वाद्वलयाकृतिः । शरावबुध्नं तुलयत्यूर्ध्वं कुर्कुटपञ्जरम् ॥ १७१ ॥
आदेरारभ्योर्ध्वमयं, संख्येययोजनावधिं । संख्येयानि योजनानि, विस्तारतः प्रकीर्त्तितः ॥ १७२ ॥
ततः परमसंख्येययोजनान्येष विस्तृतः । परिक्षेपेण सर्वत्राप्येषोऽसंख्येययोजनः ॥ १७३ ॥
यद्यप्यधस्तमस्कायः, संख्येयविस्तृतिः स्वयम् । तथाप्यस्य कुक्षिगतासंख्यद्वीपपयोनिधेः ॥ १७४ ॥
परिक्षेपस्त्वसंख्येययोजनात्मैव संभवेत् । क्षेत्रस्यासंख्यमानस्य, परिक्षेपो ह्यसंख्यकः ॥ १७५ ॥
अन्तर्बाह्यपरिक्षेपविशेषस्त्विह नोदितः । उभयोरपि तुल्यरूपतयाऽसंख्येयमाततः ॥ १७६ ॥
इत्थमस्य महीयस्तामाहुः सिद्धान्तपारगाः । महर्द्धिकः कोऽपि देवो, यो जम्बूद्वीपमञ्जसा ॥ १७७ ॥
तिसृणां चप्पुटिकानां, मध्य एवैकविंशतिम् । वारान् प्रदक्षिणीकृत्यागच्छेद्गत्या ययाऽथ सः ॥ १७८ ॥
तयैव गत्या क्वाचित्कं, तमस्कायं व्यतिव्रजेत् । मासैः षड्भिरपि क्वाचित्कं तु नैव व्यतिव्रजेत् ॥ १७९ ॥
तत्र संख्येयविस्तारं, व्यतिव्रजेन्न चापरम् । एवं महीयसि तमस्कायेऽथाब्दाः सविद्युतः ॥ १८० ॥
प्रादुर्भवन्ति वर्षन्ति, गर्जन्ति विद्युतोऽपि च । द्योतन्ते विलसद्देवासुरनागविनिर्मिताः ॥ १८१ ॥

तथाहुः—"अत्थि णं भंते ! तमुक्काए उराला बलाहया संसेयंति संमुच्छंति वासं वासंति वा ? हंता अत्थि इत्यादि भगवतीसूत्रे ६-५ ।"

यद्यप्यत्र नरक्षेत्राद्बहिर्नाङ्गीकृतं श्रुते । घनगर्जितवृष्ट्यादि, तथापि स्यात्सुरोद्भवम् ॥ १८२ ॥
यथा नराः स्वभावेन, लङ्घितुं मानुषोत्तरम् । नेशा विद्यालब्धिदेवानुभावाल्लङ्घयन्त्यपि ॥ १८३ ॥
अत्रोक्ता विद्युतो याश्च, भास्वरास्तेऽपि पुद्गलाः । दिव्यानुभावजा ज्ञेया, बादराग्नेरभावतः ॥ १८४ ॥

तथाहुः—"इह न बादरास्तेजस्कायिका मन्तव्याः, इहैव तेषां निषेत्स्यमानत्वात्, किंतु देवप्रभावजनिता भास्वराः पुद्गला" इति भगवतीवृत्तौ ।

तथा नात्र तमस्काये, देशग्रामपुरादिकम् । नाप्यत्र चन्द्रचण्डांशुग्रहनक्षत्रतारकाः ॥ १८५ ॥
येऽप्यत्रासन्नचन्द्रार्ककिरणास्तेऽपि तामसैः । मलीमसा असत्प्राया, दुर्जने सद्गुणा इव ॥ १८६ ॥
अत एवातिकृष्णोऽयमगाधश्च भयङ्करः । रौद्रातिरेकात्पुलकोद्भेदमालोकितः सृजेत् ॥ १८७ ॥
आस्तामन्यः सुरोऽप्येनं, पश्यन्नादौ प्रकम्पते । ततः स्वस्थीभूय शीघ्रगतिरेनमतिव्रजेत् ॥ १८८ ॥
तम श्चैव तमस्कायोऽन्धकारः स महादिकः । लोकान्धकारः स्याल्लोकतमिस्रं देवपूर्वकाः ॥ १८९ ॥
अन्धकारस्तमिस्रं चारण्यं च व्यूह एव च । परिघश्च ११*प्रतिक्षोभो १२ ऽरुणोदो वारिधिस्तथा १३ ॥ १९० ॥
त्रयोदशास्य नामानि, कथितानि जिनैः श्रुते । तत्र लोकेऽद्वितीयत्वाल्लोकान्धकार उच्यते ॥ १९१ ॥
न हि प्रकाशो देवानामप्यत्र प्रथते मनाक् । देवान्धकारोऽयं देवतमिस्रं च तदुच्यते ॥ १९२ ॥
बलवद्देवभयतो, नश्यतां नाकिनामपि । अरण्यवच्छरण्योऽयं, देवारण्यं तदुच्यते ॥ १९३ ॥
दुर्भेदत्वाद्व्यूह इव, प्रतिक्षोभो भयावहः । गतिं रुन्धन् परिघवत्, देवव्यूहादिरुच्यते ॥ १९४ ॥
अरुणोदाम्भोधिजलविकारत्वात्तथाभिधः । एवमन्वर्थता नाम्नामन्येषामपि भाव्यताम् ॥ १९५ ॥
यत्र रिष्टप्रस्तटेऽयं, तमस्कायश्च निष्ठितः । तस्येन्द्रकविमानस्य, रिष्टाख्यस्य चतुर्दिशम् ॥ १९६ ॥
जीवपुद्गलसत्पृथ्वीपरिणामस्वरूपिके । द्वे द्वे च कृष्णराज्यौ स्तो, जात्याञ्जनघनद्युती ॥ १९७ ॥
तथाहि दिशि पूर्वस्यां, द्वे दक्षिणोत्तरायते । पूर्वपश्चिमविस्तीर्णे, कृष्णराज्यौ प्रकीर्त्तिते ॥ १९८ ॥
स्यातामपाच्यामप्येवं, ते द्वे पूर्वापरायते । दक्षिणोत्तरविस्तीर्णे, कृष्णराज्यौ यथोदिते ॥ १९९ ॥
प्रतीच्यामपि पूर्वावत्ते दक्षिणोत्तरायते । उदीच्यां च दक्षिणावत्ते द्वे पूर्वापरायते ॥ २०० ॥
प्राच्यां प्रतीच्यां या बाह्या, षट्कोणा सा भवेत्किल । दक्षिणस्यामुदीच्यां च, बाह्या या सा त्रिकोणिका ॥ २०१ ॥
अभ्यन्तरश्चतुःकोणाः, सर्वा अप्येवमासु च । द्वे षट्कोणे द्वे त्रिकोणे, चतस्रश्चतुरस्रिकाः ॥ २०२ ॥
पौरस्त्याभ्यन्तस तत्र, कृष्णराजी स्पृशत्यसौ । निजान्तेन कृष्णराजीं, दाक्षिणात्यां बहिःस्थिताम् ॥ २०३ ॥
दक्षिणाभ्यन्तरा चैवं, बाह्यां पश्चिमदिग्गताम् । एवं बाह्यामौत्तराहां, पश्चिमाभ्यन्तरा स्पृशेत् ॥ २०४ ॥
उदीच्याभ्यन्तरा बाह्यां, प्राचीनिष्ठां स्पृशत्यतः । अष्टापि कृष्णराज्यः स्युरक्षपाटकसंस्थिताः ॥ २०५ ॥
स्यादासनविशेषो यः, प्रेक्षास्थाने निषेदुषाम् । स चाक्षपाटकस्तद्वदासां संस्थानमीरितम् ॥ २०६ ॥
एता विष्कम्भतोऽष्टापि, संख्येययोजनात्मिकाः । परिक्षेपायामतश्चासंख्येययोजनात्मिकाः ॥ २०७ ॥
तमस्कायमानयोग्यः, सुरो यः प्राग् निरूपितः । स एव च तया गत्या, मासार्द्धेन व्यतिव्रजेत् ॥ २०८ ॥
काश्चिदत्र कृष्णराजीं, काश्चिन्नैव व्यतिव्रजेत् । महत्त्वामासामित्येवं, वर्णयन्ति बहुश्रुताः ॥ २०९ ॥
तमस्कायवदत्रापि, गृहग्रामाद्यसंभवः । नाप्यत्र चन्द्रसूर्याद्या, न तेषां किरणा अपि ॥ २१० ॥

अत्राम्भोदवृष्टिविद्युद्गर्जितादि च पूर्ववत् । परं तद्देवजनितं, न नागासुरकर्त्तृकम् ॥ २११ ॥
असुरनागकुमाराणां तत्र गमनासंभवादिति भगवतीवृत्तौ ॥
कृष्णराजी मेघराजी, मघा माघवतीति च । स्याद्वातपरिघो वातप्रतिक्षोभस्तथैव च ॥ २१२ ॥
स्याद्देवपरिघो देवप्रतिक्षोभोऽपि नामतः । आसां नामान्यष्ट तेषामन्वर्थोऽथ विभाव्यते ॥ २१३ ॥
कृष्णपुद्गलराजीति, कृष्णराजीयमुच्यते । कृष्णाब्दरेखातुल्यत्वान्मेघराजीति च स्मृता ॥ २१४ ॥
मघाया माघवत्याश्च, सवर्णत्याख्यया तथा । वातोऽत्र वात्या तद्वद्या, तमिस्रा भीषणापि च ॥ २१५ ॥
ततोऽसौ वातपरिघस्तत्प्रतिक्षोभ इत्यपि । स्याद्देवपरिघो देवप्रतिक्षोभश्च पूर्ववत् ॥ २१६ ॥
अथासां कृष्णराजीनामन्तरेषु किलाष्टसु । लोकान्तिकविमानानि, निर्दिष्टान्यष्ट पारगैः ॥ २१७ ॥
तत्राभ्यन्तरयोः प्राच्योदीच्ययोरन्तरे तयोः । विमानमर्च्चिः प्रथमं, चकास्ति प्रचुरप्रभम् ॥ २१८ ॥
अन्तरे प्राच्ययोरेव, बाह्याभ्यन्तरयोरथ । द्वितीयमर्चिर्मालीति, विमानं परिकीर्त्तितम् ॥ २१९ ॥
तृतीयमभ्यन्तरयोरन्तरे प्राच्ययाम्ययोः । वैरोचनाभिधं प्रोक्तं, विमानं मानवोत्तमैः ॥ २२० ॥
बाह्याभ्यन्तरयोरेवान्तरेऽथ दाक्षिणात्ययोः । प्रभङ्कराभिधं तुर्यं, विमानमुदितं जिनैः ॥ २२१ ॥
अभ्यन्तरदाक्षिणात्यप्रतीच्ययोरथान्तरे । विमानमुक्तं चन्द्राभं, पञ्चमं परमेष्ठिभिः ॥ २२२ ॥
स्यात्प्रतीचीनयोरेवं, बाह्याभ्यन्तरयोस्तयोः । विमानमन्तरे षष्ठं, सूर्याभमिति नामतः ॥ २२३ ॥
पश्चिमोदीच्ययोरभ्यन्तरयोरन्तरेऽथ च । विमानमुक्तं शुक्राभं, सप्तमं जिनसत्तमैः ॥ २२४ ॥
बाह्याभ्यन्तरयोरौत्तराहयोरन्तरेऽथ च । विमानं सुप्रतिष्ठाभमष्टमं परिकीर्त्तितम् ॥ २२५ ॥
सर्वासां कृष्णराजीनां, मध्यभागे तु तीर्थपैः । विमानं नवमं रिष्टाभिधानमिह वर्णितम् ॥ २२६ ॥
ब्रह्मलोकान्तभावित्वाल्लोकांतिकान्यमून्यथ । लोकान्तिकानां देवानां, संबन्धीनि ततस्तथा ॥ २२७ ॥
नवाप्येते विमानाः स्युर्घनवायुप्रतिष्ठिताः । वर्णादिभिश्च पूर्वोक्तब्रह्मलोकविमानवत् ॥ २२८ ॥
संस्थानं नैकधाऽमीषामपाङ्क्तेयतया खलु । एभ्यो लोकान्तः सहस्रैर्योजनानामसंख्यकैः ॥ २२९ ॥
एतेष्वथ विमानेषु, निवसन्ति यथाक्रमम् । सारस्वतास्तथाऽऽदित्या, वह्नयो वरुणा अपि ॥ २३० ॥
गर्दतोयाश्च तुषिता, अव्याबाधास्तथाऽपरे । आग्नेया अथ रिष्टाश्च, लोकान्तिकसुधाभुजः ॥ २३१ ॥
अत्राग्नेयाः संज्ञान्तरतो मरुतोऽप्यभिधीयन्ते ।
स्वत एवावबुद्धानामनुत्तरचिदात्मनाम् । विज्ञाय दीक्षावसरं, दित्सूनां दानमाब्दिकम् ॥ २३२ ॥
प्रव्रज्यासमयादर्वाक्, संवत्सरेण तत्क्षणम् । श्रीमतामर्हतां पादान्तिकमेत्य तथास्थितेः ॥ २३३ ॥
विमानयानादुत्तीर्य, सोत्साहाः सपरिच्छदाः । सारस्वतप्रभृतयः, सर्वे लोकान्तिकाः सुराः ॥ २३४ ॥

विज्ञा विज्ञपयन्त्येवं, जय नन्द जगद्गुरो ! । त्रैलोक्यबंधो ! भगवन् !, धर्मतीर्थं प्रवर्त्तय ॥ २३५ ॥
यदेतत्सर्वलोकानां, सर्वलोके भविष्यति । मुक्तिराजपथीभूतं, निःश्रेयसकरं परम् ॥ २३६ ॥
इह सारस्वतादित्यद्वये समुदितेऽपि हि । सप्त देवाः सप्त देवशतानि स्यात्परिच्छदः ॥ २३७ ॥
एवं वह्निवरुणयोः, परिवारश्चतुर्दश । देवास्तथाऽन्यानि देवसहस्राणि चतुर्दश ॥ २३८ ॥
गर्दतोयतुषितयोर्द्वयोः संगतयोरपि । सप्त देवाः सप्त देवसहस्राणि परिच्छदः ॥ २३९ ॥
अव्याबाधाग्नेयरिष्टदेवानां च सुरा नव । शतानि नव देवानां, परिवारः प्रकीर्त्तितः ॥ २४० ॥
अव्याबाधाश्चैषु देवाः, पुरुषस्याक्षिपक्ष्मणि । दिव्यं द्वात्रिंशत्प्रकारं, प्रादुष्कुर्वन्ति ताण्डवम् ॥ २४१ ॥
तथापि पुरुषस्यास्य, बाधा काऽपि न जायते । एवंरूपा शक्तिरेषां, पञ्चमाङ्गे प्रकीर्त्तिता ॥ २४२ ॥

भ० १४, ८ ।

लोकान्तिकविमानेषु, देवानामष्ट वार्द्धयः । स्थितिरुक्ता जिनैरेते, पुण्यात्मानः शुभाशयाः ॥ २४३ ॥
एकावताराः सिद्ध्यन्ति, भवे भाविनि निश्चितम् । अष्टावतारा अप्येते, निरूपिता मतान्तरे ॥ २४४ ॥

तन्मतद्वयं चैवं – लोकान्ते – लोकाग्रलक्षणे सिद्धिस्थाने भवा लौकान्तिकाः, भाविनि भूतवदुपचारन्यायेन एवं व्यपदेशः, अन्यथा ते कृष्णराजीमध्यवर्त्तिनः, लोकान्ते भावित्वं तेषामनन्तरभवे एव सिद्धिगमना" दिति स्थानाङ्गवृत्तौ ९ स्थानके ।

"श्रीब्रह्मलोके प्रतरे तृतीये, लोकान्तिकास्तत्र वसन्ति देवाः ।
एकावताराः परमायुरष्टौ, भवन्ति तेषामपि सागराणि इति श्रेणिकचरित्रे ।"

"अट्ठेव सागराइं परमाउं होइ सव्वदेवाणं । एगावयारिणो खलु देवा लोगंतिया नेया इति प्रवचनसारोद्धारे,
तत्त्वार्थटीकायामपि–लोकान्ते भवा लोकान्तिकाः अत्र प्रस्तुतत्वाद्ब्रह्मलोक एव परिगृह्यते,
तदन्तनिवासिनो लोकान्तिकाः, सर्वब्रह्मलोकदेवानां लोकान्तिकप्रसङ्ग इति चेन्न, लोकान्तोपश्लेषात्,
जरामरणादिज्वालाकीर्णो वा लोकस्तदन्तवर्त्तित्वाल्लोकान्तिकाः कर्मक्षयाभ्यासीभावाच्चेति,

लब्धिस्तोत्रे तु– सव्वट्ठचुआ चउक्कयआहारगुवसमजिणगणहराई । निअमेण तब्भवसिवा सत्तट्ठभवेहिं लोगंती" ॥
अथोर्ध्वं ब्रह्मलोकस्य, समपक्षं समानदिक् । योजनानामसंख्येयकोटाकोटिव्यतिक्रमे ॥ २४५ ॥
विभाति लान्तकः स्वर्गः, पञ्चप्रतरशोभितः । प्रतिप्रतरमेकैकेनेन्द्रकेण विराजितः ॥ २४६ ॥
प्रथमप्रतरे तत्र, बलभद्राख्यमिन्द्रकम् । चक्रं गदा स्वस्तिकं च, नन्द्यावर्त्तमिति क्रमात् ॥ २४७ ॥
प्रतिप्रतरमेतेभ्यः, पङ्क्तयोऽपि चतुर्दिशम् । प्राग्वदत्र विना प्राचीं, प्रोक्ताः पुष्पावकीर्णकाः ॥ २४८ ॥
एकत्रिंशदथ त्रिंशदेकोनत्रिंशदेव च । तथाऽष्टाविंशतिः सप्तविंशतिश्च यथाक्रमम् ॥ २४९ ॥
पञ्चस्वेषु प्रतरेषु, प्रतिपङ्क्ति विमानकाः । एकैकस्यामथो पङ्क्तौ, प्रथमप्रतरे स्मृताः ॥ २५० ॥

त्र्यस्रा एकादशान्ये च, द्वैधा दश दशेति च । चतुर्विंशं शतं सर्वे, पङ्क्तिस्थायि विमानका: ॥ २५१ ॥
वृत्तास्त्र्यस्राश्चतुरस्रा, द्वितीयप्रतरे दश । प्रतिपङ्क्त्यत्र सर्वे च, विंशं शतमुदीरिता: ॥ २५२ ॥
तृतीये त्रिचतु:कोणा, दश वृत्ता नवेति च । सर्वे विमाना: पाङ्क्तेया, भवन्ति षोडशं शतम् ॥ २५३ ॥
वृत्ताश्च चतुरस्राश्च, तुर्ये नव नव स्मृता: । दश त्रिकोणा: सर्वे च, पाङ्क्तेया द्वादशं शतम् ॥ २५४ ॥
पञ्चमे च नव नव, त्रिचतु:कोणवृत्तका: । अष्टोत्तरं शतं सर्वे, चात्र पङ्क्तिविमानका: ॥ २५५ ॥
एवं पञ्चेन्द्रकक्षेपे, सर्वेऽत्र पङ्क्तिवृत्तका: । विमानास्त्रिनवत्याढ्यं, शतं लान्तकताविषे ॥ २५६ ॥
पङ्क्तित्र्यस्राणां शते द्वे, द्विनवत्यधिकं शतम् । स्यात्पङ्क्तिचतुरस्राणामेवं च सर्वसंख्यया ॥ २५७ ॥
पञ्चाशीत्याभ्यधिकानि, शतानि पञ्चपङ्क्तिगा: । सहस्राण्येकोनपञ्चाशच्चत्वारि शतानि च ॥ २५८ ॥
युक्तानि पञ्चदशभिरिह पुष्पावकीर्णका: । विमानानां सहस्राणि, पञ्चाशत्सर्वसंख्यया ॥ २५९ ॥
विहायसि निरालम्बे, प्रतिष्ठितो घनोदधि: । घनवातोऽस्मिन्निहामी, स्युर्विमाना: प्रतिष्ठिता: ॥ २६० ॥
वर्णोच्चत्वादिमानं च, स्यादेषां ब्रह्मलोकवत् । देवास्त्वत्र शुक्लवर्णा:, शुक्ललेश्या महर्द्धिका: ॥ २६१ ॥
इत:प्रभृति देवा: स्यु:, सर्वेऽप्यनुत्तरावधि । शुक्ललेश्या शुक्लवर्णा:, किंतूत्कृष्टा यथोत्तरम् ॥ २६२ ॥
प्रथमप्रतरे तत्र, स्थितिर्ज्येष्ठा सुधाभुजाम् । पञ्चभागीकृतस्याब्धेश्चत्वारोऽंशा दशाब्धय: ॥ २६३ ॥
द्वितीयप्रतरे भागास्त्रय एकादशाब्धय: । द्वाभ्यां भागाभ्यां समेतास्तृतीये द्वादशाब्धय: ॥ २६४ ॥
चतुर्थे त्वेकभागाढ्यस्त्रयोदश पयोधय: । पञ्चमे प्रतरे पूर्णाश्चतुर्दशैव वार्द्धय: ॥ २६५ ॥
जघन्येन तु सर्वत्र, दशैव मकराकरा: । स्वस्वस्थित्यनुसारेण, देहमानमथ ब्रुवे ॥ २६६ ॥
एकादशोद्भवैर्भागैश्चतुर्भिरधिका: करा: । पञ्चदेहमानमत्र, दशरत्नाकरायुषाम् ॥ २६७ ॥
त्रिभागाढ्या: करा: पञ्चैकादशार्णवजीविनाम् । हस्ता: पञ्च लवौ द्वौ च, द्वादशाम्भोधिजीविनाम् ॥ २६८ ॥
सैकभागा: करा: पञ्च, त्रयोदशार्णवायुषाम् । चतुर्दशाब्धिस्थितीनां, पूर्णा: पञ्च करास्तनु: ॥ २६९ ॥
ईशानस्वर्वासिनीभिर्देवीभिर्विषयेच्छव: । चिन्तामात्रोपस्थिताभी, रमन्ते ब्रह्मदेववत् ॥ २७० ॥
च्यवमानोत्पद्यमानसंख्या गत्यागती अपि । अवधिज्ञानविषय:, स्यादत्र ब्रह्मलोकवत् ॥ २७१ ॥
अत्रोत्पत्तिच्यवनयोरन्तरं परमं भवेत् । दिनानि पञ्चचत्वारिंशत् क्षणश्च जघन्यत: ॥ २७२ ॥
पञ्चमे प्रतरे चात्र, स्याल्लान्तकावतंसक: । अङ्कावतंसकादीनां, मध्ये ईशाननाकवत् ॥ २७३ ॥
लान्तकस्तत्र देवेन्द्र:, पुण्यसारो विराजते । सामानिकामरै: पञ्चाशता सेव्य: सहस्रकै: ॥ २७४ ॥
द्वाभ्यां देवसहस्राभ्यां, सेव्योऽभ्यन्तरपर्षदि । मध्यमायां चतुर्भिस्तै:, षड्भिश्च बाह्यपर्षदि ॥ २७५ ॥
सप्तषट्पञ्चभि: पल्योपमै: समधिका स्थिति: । द्वादशैवाम्बुनिधयस्तिसृणां पर्षदां क्रमात् ॥ २७६ ॥

आत्मरक्षकदेवानां, पञ्चाशता सहस्रकैः । एकैकस्यां दिशि सेव्यो, दण्डाद्यायुधपाणिभिः ॥ २७७ ॥
प्राग्वदन्यैरपि मन्त्रित्रायस्त्रिंशकवाहनैः । सैन्यैः सैन्याधिपैर्लोकपालैः पालितशासनः ॥ २७८ ॥
जिनार्चनादिकं धर्मं, कुर्वाणः परमार्हतः । दिव्यनाट्यदत्तचेताश्चतुर्दशाब्धिजीवितः ॥ २७९ ॥
सातिरेकानष्ट जम्बूद्वीपान् पूरयितुं क्षमः । रूपैर्विकुर्वितैस्तिर्यगसंख्यद्वीपतोयधीन् ॥ २८० ॥
स विमानसहस्राणां, पञ्चाशतोऽप्यधीश्वरः । साम्राज्यं शास्ति देवानां, लान्तकस्वर्गवासिनाम् ॥ २८१ ॥
अस्य यानविमानं च, भवेत्कामगमाभिधम् । देवः कामगमाभिख्यो, नियुक्तस्तद्विकुर्वणे ॥ २८२ ॥
वैमानिकाः किल्विषिकास्त्रिधा भवन्ति तद्यथा । त्रयोदशाब्धित्र्यम्भोधित्रिपल्योपमजीविनः ॥ २८३ ॥
तत्र च—
वसन्ति लान्तकस्याधस्त्रयोदशाब्धिजीविनः । अधः सनत्कुमारस्य, त्र्यम्भोधिजीविनः पुनः ॥ २८४ ॥
त्रिपल्यस्थितयस्ते च, सौधर्मेशानयोरधः । स्थानमेवं किल्विषिकसुराणां त्रिविधं स्मृतम् ॥ २८५ ॥

नन्वत्राधःशब्देन किमभिधीयते ? अधस्तनप्रस्तटं, तस्मादप्यधोदेशो वा ? अन्यच्च द्वात्रिंशल्लक्षविमानमध्ये साधारणदेवीनामिवैतेषां कतिचिद्विमानानि सन्ति ? विमानैकदेशे वा विमानाद्बहिर्वा तिष्ठन्ति ते ? इति,

अत्रोच्यते— अत्राधःशब्दस्तत्स्थानवाचको ज्ञेयो, यतोऽत्राधःशब्दः प्रथमप्रस्तटार्थो न घटते तृतीयषष्ठकल्पसत्ककिल्विषिकामराणां, तत्प्रथमप्रस्तटयोस्त्रिसागरोपमत्रयोदश-सागरोपम-स्थित्योरसंभवात्, तथा तद्विमानानां संख्या शास्त्रे नोपलभ्यते, तथा देवलोकगत-द्वात्रिंशल्लक्षविमानसंख्यामध्ये तद्विमानगणनं न संभाव्यते इति, तत्त्वं सर्वविद्वेद्यमिति वृद्धाः ॥

अमी च चण्डालप्राया, निन्द्यकर्माधिकारिणः । अस्पृश्यत्वादन्यदेवैर्धिक्कृतास्तर्जनादिभिः ॥ २८६ ॥
देवलोके विमानेषु, सुधाभुक्पर्षदादिषु । कौतुकादिसंगतेषु, देवानां निकरेषु च ॥ २८७ ॥
अष्टाह्निकाद्युत्सवेषु, जिनजन्मोत्सवादिषु । अप्राप्नुवन्तः स्थानं ते, स्वं शोचन्ति विषादिनः ॥ २८८ ॥
आचार्योपाध्यायगच्छसंघप्रतीपवर्तिनः । येऽवर्णवादिनस्तेषामयशःकारिणोऽपि च ॥ २८९ ॥
असद्भावोद्भावनाभिर्मिथ्यात्वाभिनिवेशकैः । व्युद्ग्राहयन्तः स्वात्मानं, परं तदुभयं तथा ॥ २९० ॥
प्रतिपाल्यापि चारित्रपर्यायं वत्सरान् बहून् । तेऽनालोच्याप्रतिक्रम्य, तत्कर्माशर्मकारणम् ॥ २९१ ॥
त्रयाणां किल्विषिकाणां, मध्ये भवन्ति कुत्रचित् । तादृशव्रतपर्यायापेक्षया स्थितिशालिनः ॥ २९२ ॥
एभ्यश्च्युत्वा देवनरतिर्यग्नारकजन्मसु । चतुरः पञ्च वा वारान्, भ्रान्त्वा सिद्ध्यन्ति केचन ॥ २९३ ॥
केचित्पुनरर्हदादिनिबिडाशातनाकृतः । कृतानन्तभवा भीमं, भ्राम्यन्ति भवसागरम् ॥ २९४ ॥

तथाहुः—"देवकिब्बिसिया णं भंते ! ताओ देवलोगाओ" इत्यादि ।

जामेयोऽपि च जामाता, यथा वीरजगद्गुरोः । जमालिः किल्विषिकेषूत्पन्नो लान्तकवासिषु ॥ २९५ ॥
स हि क्षत्रियकुण्डस्थः, क्षत्रियस्ताण्डवादिषु । मग्नः श्रुत्वा महावीरमागतं वन्दितुं गतः ॥ २९६ ॥
श्रुत्वोपदेशं संविग्नोऽनुज्ञाप्य पितरौ व्रतम् । जग्राह पञ्चभिः पुंसां, शतैः सह महामहैः ॥ २९७ ॥
अधीतैकादशाङ्गीकस्तयैवार्हदनुज्ञया । सेव्यः साधुपञ्चशत्या, चकारानेकधा तपः ॥ २९८ ॥
पप्रच्छ चैकदाऽर्हन्तं, विजिहीर्षुः पृथग् जिनात् । तूष्णीं तस्थौ प्रभुरपि, जानंस्तद्भाविवैशसम् ॥ २९९ ॥
अननुज्ञात एवैष, उपेक्ष्य जगदीश्वरम् । विहरन् सहितः शिष्यैः, श्रावस्तीं नगरीं ययौ ॥ ३०० ॥
तत्र तस्यान्यदा प्रान्ताद्यशनेन ज्वरोऽभवत् । शिष्यान् शिशयिषुः संस्तारकक्लृप्त्यै समादिशत् ॥ ३०१ ॥
तमास्तरन्ति ते यावत्तावदेषोऽतिपीडितः । ऊचे संस्तारको हन्त, कृतोऽथ क्रियतेऽथवा ? ॥ ३०२ ॥
द्रागेष क्रियते स्वामिन् !, श्रुत्वेति शिष्यभाषितम् । मिथ्याविपर्यस्तमतिरिति चेतस्यचिन्तयत् ॥ ३०३ ॥
प्रत्यक्षं क्रियमाणोऽयमकृतो यन्न भुज्यते । क्रियमाणं कृतमिति, तत्किमाहान्तिमो जिनः ? ॥ ३०४ ॥
ध्यात्वेति सर्वानाहूय, शिष्यानेषोऽब्रवीदिति । कृतमेव कृतं वस्तु, क्रियमाणं न तत्तथा ॥ ३०५ ॥
क्रियमाणं कृतं किञ्चिन्न चेदाद्यक्षणादिषु । सर्वमन्त्यक्षणे तर्हि, तत्कर्तुं शक्यते कथम् ? ॥ ३०६ ॥
देशतः कृतमेवेति, क्रियमाणं क्षणे क्षणे । जीर्यमाणं जीर्णमेवं, चलच्चलितमेव च ॥ ३०७ ॥
इत्यादियुक्तिभिः शिष्यैर्बोधितोऽपि कदाग्रही । कैश्चिद्धर्मार्थिभिस्त्यक्तः, कैश्चित्स एव चादृतः ॥ ३०८ ॥
यैस्त्यक्तस्ते महावीरं, चम्पायां पुरि संस्थितम् । अभ्युपेत्य गुरुकृत्योद्युक्ताः स्वार्थमसाधयन् ॥ ३०९ ॥
क्रमाद्विमुक्तो रोगेण, द्रव्यतो न तु भावतः । जमालिरपि चम्पायामुपवीरमुपागतः ॥ ३१० ॥
कदाग्रहग्रहग्रस्तप्रशस्तधिषणाबलः । इत्याललाप भगवन् !, भवच्छिष्याः परे यथा ॥ ३११ ॥
छद्मस्था न तथैवाहं, किंतु जातोऽस्मि केवली । इतिब्रुवाणं भगवानिन्द्रभूतिस्तमब्रवीत् ॥ ३१२ ॥
ज्ञानं केवलिनः शक्यं, नावरीतुं पटादिभिः । यदि त्वं केवली तर्हि, प्रश्नयोर्मे कुरूत्तरम् ॥ ३१३ ॥
जमाले ! नन्वसौ लोकः, शाश्वतोऽशाश्वतोऽथवा ? । जीवोऽप्यशाश्वतः किं वा, शाश्वतस्तद्वद द्रुतम् ॥ ३१४ ॥
जगद्गुरुप्रत्यनीकतया प्रश्नमपीदृशम् । सोऽक्षमः प्रत्यवस्थातुं, बभूव मलिनाननः ॥ ३१५ ॥
ततः स वीरनाथेन, प्रोक्तः किं मुह्यसीह भोः ? । शाश्वताशाश्वतौ ह्येतौ, द्रव्यपर्यायभेदतः ॥ ३१६ ॥
छद्मस्थाः सन्ति मे शिष्या, ईदृक्प्रश्नोत्तरे क्षमाः । अनेके न तु ते त्वद्वदसत्सार्वज्ञ्यशंसिनः ॥ ३१७ ॥
अश्रद्दधत्तज्जिनोक्तं, स्वैरं पुनरपि भ्रमन् । व्युद्ग्राहयंश्च स्वपरं, कुर्वंस्तपांस्यनेकधा ॥ ३१८ ॥
अन्तेऽर्द्धमासिकं कृत्वाऽनशनं तच्च पातकम् । अनालोच्याप्रतिक्रम्य, मृत्वा किल्विषिकोऽभवत् ॥ ३१९ ॥
ततश्च्युत्वा च विबुधतिर्यग्मनुजजन्मसु । उत्पद्य पञ्चशः पञ्चदशे जन्मनि सेत्स्यति ॥ ३२० ॥

तथाहुः—"गो० ! चत्तारि पञ्च तिरिक्खजोणियमणुस्सदेवभवग्गहणाइं संसारं अणुपरियट्टित्ता ततो पच्छा सिज्झिहिति जाव अंतं काहिति" भगवतीसूत्रे श० ९ उ० ३३ ॥

ग्रन्थान्तरे च यद्यस्यानन्ता अपि भवाः श्रुताः। तदा तदनुसारेण, तथा ज्ञेया विवेकिभिः ॥ ३२१ ॥
जिनं विनाऽन्यः कस्तत्त्वं, निश्चेतुं क्षमतेऽपरः । ततः प्रमाणमुभयं, श्रीवीराज्ञाऽनुसारिणाम् ॥ ३२२ ॥
सत्यप्येवं पञ्चमाङ्गवचो विलुप्य ये जडाः । एकान्तेन भवानस्यानन्तान्निश्चिन्वतेऽधुना ॥ ३२३ ॥
कदाग्रहतमश्छन्ननयनास्ते मुधा स्वयम् । भवैरनन्तैर्युज्यन्ते, परानन्तभवाग्रहात् ॥ ३२४ ॥
एवं च—
"अनन्तासंख्यसंख्येयानुत्सूत्रभाषिणोऽपिहि । परिणामविशेषेण, भवान् भ्राम्यन्ति संसृतौ" ॥ ३२५ ॥

तथोक्तं महानिशीथद्वितीयाध्ययने—"जे णं तित्थगरादीणं महतीं आसायणं कुज्जा से णं अज्झवसायं पडुच्च जावणं अणंतसंसारियत्तणं लभेज्जा," यावच्छब्दमर्यादया चात्र संख्याता असंख्याता अपि भवा लभ्यन्त इति ध्येयं ।

उत्सूत्रभाषिणां ये चानन्तानेव कदाग्रहात् । भवानूचुरुपेक्ष्यं तत्तेषां वातूलचेष्टितम् ॥ ३२६ ॥
अतः परं किल्बिषिकजातीयानामसंभवः । यथाऽऽभियोगिकादीनामच्युतस्वर्गतः परम् ॥ ३२७ ॥
अथोर्ध्वं लान्तकस्वर्गात्समपक्षं समानदिक् । योजनानामसंख्येयकोटाकोटिव्यतिक्रमे ॥ ३२८ ॥
अस्ति स्वर्गो महाशुक्रः. संपूर्णचन्द्रसंस्थितः । चत्वारः प्रतरास्तत्र, प्रतिप्रतरमिन्द्रकम् ॥ ३२९ ॥
आभङ्करं गृद्धिसंज्ञं, केतुश्च गरुलाभिधम् । चतस्रः पङ्क्तयस्त्वेभ्यः, प्राग्वत्पुष्पावकीर्णकाः ॥ ३३० ॥
षड्विंशतिः पञ्चचतुस्त्र्यधिका विंशतिः क्रमात् । प्रतरेषु चतुर्ष्वेषु, प्रतिपङ्क्ति विमानकाः ॥ ३३१ ॥
तत्राद्यप्रतरे पङ्क्तौ, पङ्क्तावष्टैव वृत्तकाः । नव च त्रिचतुःकोणाः, सर्वे चतुर्युतं शतम् ॥ ३३२ ॥
द्वितीयप्रतरे त्र्यस्रा, नवाष्टाष्टापरे द्विधा । सर्वे शतं तृतीये च, प्रतरेऽष्टाष्ट ते त्रिधा ॥ ३३३ ॥
सर्वे च ते षण्णवतिश्चतुर्थप्रतरे पुनः । अष्टौ त्र्यस्राश्चतुरस्रा, वृत्ताः सप्त विमानकाः ॥ ३३४ ॥
सर्वे चात्र द्विनवतिः, पाङ्क्तेयाः परिकीर्त्तिताः । चतुरिन्द्रकयोगेऽत्र, सर्वे स्युः पङ्क्तिवृत्तकाः ॥ ३३५ ॥
अष्टाविंशं शतं पङ्क्तित्र्यस्राः षट्त्रिंशकं शतम् । द्वात्रिंशं च शतं पङ्क्तिचतुरस्राः प्रकीर्तिताः ॥ ३३६ ॥
एवं पङ्क्तिविमानानां, महाशुक्रे शतत्रयम् । षण्णवत्या समधिकं, शेषाः पुष्पावकीर्णकाः ॥ ३३७ ॥
सहस्राण्येकोनचत्वारिंशदेव च षट्शती । चतुर्युतैव सर्वे च, चत्वारिंशत्सहस्रकाः ॥ ३३८ ॥
आधारतो लान्तकवद्, द्विधाऽमी वर्णतः पुनः । शुक्लाः पीताश्च पूर्वेभ्यो, वर्णाद्युत्कर्षशालिनः ॥ ३३९ ॥
पृथ्वीपिण्डः शतानीह, चतुर्विंशतिरीरितः । योजनानां शतान्यष्टौ, प्रासादाः स्युः समुच्छ्रिताः ॥ ३४० ॥
प्रथमप्रतरे चात्र, देवानां परमा स्थितिः । पादोनानि पञ्चदश, स्युः सागरोपमाण्यथ ॥ ३४१ ॥

द्वितीयप्रतरे पञ्चदश सार्द्धानि तास्ताः । तृतीये च सपादानि, षोडशैतानि निश्चितम् ॥ ३४२ ॥
चतुर्थे च सप्तदश, वार्द्धयः परमा स्थितिः । सर्वेष्वपि जघन्या तु, चतुर्दश पयोधयः ॥ ३४३ ॥
कराः पञ्च देहमत्र, चतुर्दशाब्धिजीविनाम् । कराश्चत्वारस्त्रयोऽंशाः, पञ्चदशार्णवायुषाम् ॥ ३४४ ॥
षोडशाब्ध्यायुषां हस्ताश्चत्वारोऽंशद्वयान्विताः । एकांशाढ्यास्ते तु सप्तदशसागरजीविनाम् ॥ ३४५ ॥
एकादशविभक्तैककरस्यांशा अमी इह । आहारोच्छ्वासकालस्तु, प्राग्वत्सागरसंख्यया ॥ ३४६ ॥
कामभोगाभिलाषे तु, तेषां संकेतिता इव । सौधर्मस्वर्गदेव्योऽत्रायान्ति स्वार्हा विचिन्तिताः ॥ ३४७ ॥
अथासां दिव्यसुदृशां, शृङ्गाररससकोमलम् । गीतं स्फीतं च साकूतं, स्मितं ललितकूर्जितम् ॥ ३४८ ॥
विविधान्योक्तिवक्रोक्तिव्यङ्ग्यवल्गुवचोभरम् । हृद्यगद्यपद्यनव्यभव्यकाव्यादिपद्धतिम् ॥ ३४९ ॥
कङ्कणानां रणत्कारं, हारकाञ्चीकलध्वनिम् । मणिमञ्जीरझंकारं, किङ्किणीनिष्क्वणोल्वणम् ॥ ३५० ॥
कामग्रहार्त्तिशमनमन्त्राक्षरमिवाद्भुतम् । शब्दं श्रृण्वन्त एवामी, तृप्यन्ति सुरतादिव ॥ ३५१ ॥
देव्योऽपि ता दूरतोऽपि, वैक्रियैः शुक्रपुद्गलैः । तृप्यन्त्यङ्गे परिणतैस्तादृग्दिव्यप्रभावतः ॥ ३५२ ॥
अर्द्धनाराचावसानचतुःसंहननाञ्चिताः । गर्भजा नरतिर्यञ्चो, लभन्तेऽत्रामृताशिताम् ॥ ३५३ ॥
अस्माच्च्युत्वा नृतिरश्चोरेव यान्ति सुधाभुजः । च्यवमानोत्पद्यमानसंख्या त्वत्रापि पूर्ववत् ॥ ३५४ ॥
अत्रोत्पत्तिच्यवनयोर्विरहः परमो भवेत् । अशीतिं दिवसानेकं, समयं च जघन्यतः ॥ ३५५ ॥
पश्यन्ति देवा अत्रत्या, अवधिज्ञानचक्षुषा । पङ्कप्रभायास्तुर्यायाः, पृथ्व्या अधस्तलावधि ॥ ३५६ ॥
अत्रत्यानां च देवानां, दिव्यां देहद्युतिं ननु । सोढुं शक्नोति सौधर्माधिपोऽपि न सुरेश्वरः ॥ ३५७ ॥
श्रूयते हि पुरा गङ्गदत्तमत्रत्यनिर्जरम् । आगच्छन्तं परिज्ञाय, नन्तुं वीरजिनेश्वरम् ॥ ३५८ ॥
पूर्वागतो वज्रपाणिस्तत्तेजः क्षन्तुमक्षमः । प्रश्नानापृच्छ्य संक्षेपात् संभ्रान्तः प्रणमन् ययौ ॥ ३५९ ॥
एतच्चार्थतो भगवतीसूत्रे षोडशशतकपञ्चमोद्देशके ॥
चतुर्थे प्रतरेऽत्रापि, महाशुक्रावतंसकः । सौधर्मवदशोकाद्यवतंसकचतुष्कयुक् ॥ ३६० ॥
उत्पद्यते चात्र महाशुक्रनामा सुरेश्वरः । प्राग्वत्कृत्वाऽर्हदाद्यर्चामलंकुर्यान्महासनम् ॥ ३६१ ॥
एकदेवसहस्रेण, सेव्योऽभ्यन्तरपर्षदाम् । पञ्चपल्याधिकापार्द्धषोडशाम्भोधिजीविनाम् ॥ ३६२ ॥
सहस्रद्वितयेनैष, सेवितो मध्यपर्षदाम् । चतुःपल्याधिकसार्द्धपञ्चदशार्णवायुषाम् ॥ ३६३ ॥
चतुःसहस्र्या देवानां, सेवितो बाह्यपर्षदाम् । त्रिपल्योपमयुक्सार्द्धपञ्चदशार्णवायुषाम् ॥ ३६४ ॥
सामानिकानां चत्वारिंशता सेव्यः सहस्रकैः । चतुर्दिशं च प्रत्येकं, तावद्भिरङ्गरक्षकैः ॥ ३६५ ॥
त्रायस्त्रिंशैर्लोकपालैरनीकानीकनायकैः । अन्यैरपि महाशुक्रवासिभिः सेवितः सुरैः ॥ ३६६ ॥
जम्बूद्वीपान् पूरयितुं, क्षमः षोडश सर्वतः । रूपैर्विकुर्वितैस्तिर्यगसंख्यद्वीपतोयधीन् ॥ ३६७ ॥

सद्विमानसहस्राणां, चत्वारिंशत ईश्वरः । महाशुक्रं शास्ति सप्तदशपाथोनिधिस्थितिः ॥ ३६८ ॥
अस्य यानविमानं च, भवेत्प्रीतिमनोऽभिधम् । देवः प्रीतिमनाः ख्यातो, नियुक्तस्तद्विकुर्वणे ॥ ३६९ ॥
महाशुक्रादथास्त्यूर्ध्वं, सहस्रारः सुरालयः । योजनानामसंख्येयकोटाकोटीव्यतिक्रमे ॥ ३७० ॥
चत्वारः प्रतरास्तत्र, प्रत्येकमिन्द्रकाञ्चिताः । ब्रह्म ब्रह्महितं ब्रह्मोत्तरं च लान्तकं क्रमात् ॥ ३७१ ॥
चतस्रः पङ्क्तयश्चैभ्यः, प्राग्वत्पुष्पावकीर्णकाः । द्वाविंशतिस्तथा चैकविंशतिर्विंशतिः क्रमात् ॥ ३७२ ॥
एकोनविंशतिश्चेति, प्रतरेषु चतुर्ष्वपि । एकैकपङ्क्तौ संख्यैवं, विमानानां भवेदिह ॥ ३७३ ॥
तत्राद्यप्रतरे त्र्यस्रा, अष्टान्ये सप्त सप्त च । प्रतिपङ्क्त्यथ सर्वेऽत्राष्टाशीतिः पङ्क्तिवर्त्तिनः ॥ ३७४ ॥
द्वितीयप्रतरे सप्त सप्तैते त्रिविधा अपि । सर्वे चतुरशीतिश्च, तृतीयप्रतरे पुनः ॥ ३७५ ॥
वृत्ताः षट् सप्त सप्तान्येऽशीतिश्च सर्वसंख्यया । तुर्ये त्र्यस्राः सप्त षट् षट्, परे षट्सप्ततिः समे ॥ ३७६ ॥
चतुर्णामिन्द्रकाणां च, योगेऽत्र पङ्क्तिवृत्तकाः । अष्टोत्तरशतं पङ्क्तित्र्यस्राश्च षोडशं शतम् ॥ ३७७ ॥
अष्टोत्तरं शतं पङ्क्तिचतुरस्रास्ततोऽत्र च । द्वात्रिंशदधिकं पङ्क्तिविमानानां शतत्रयम् ॥ ३७८ ॥
षट्शताभ्यधिकाः पञ्च, सहस्राः साष्टषष्टयः । पुष्पावकीर्णका अत्र, सर्वे ते षट्सहस्रकाः ॥ ३७९ ॥
आधारवर्णोच्चत्वादि, स्यादेषां शुक्रनाकवत् । उत्पद्यन्त एषु देवतया प्राग्वन्महाशयाः ॥ ३८० ॥
सपादा वार्द्धयः सप्तदशाऽऽद्ये प्रतरे स्थितिः । द्वितीये त्वब्धयः सप्तदश सार्द्धाः परा स्थितिः ॥ ३८१ ॥
अष्टादश च पादोनास्तृतीये परमा स्थितिः । तुर्येऽष्टादश संपूर्णाः, सागराः स्यात्परा स्थितिः ॥ ३८२ ॥
सर्वत्रापि जघन्या तु, भवेत्सप्तदशाब्धयः । अथ स्थित्यनुसारेण, देहमानं निरूप्यते ॥ ३८३ ॥
चत्वारोऽत्र करा देह, उत्कृष्टस्थितिशालिनाम् । त एवैकादशैकांशयुजो जघन्यजीविनाम् ॥ २८४ ॥
अष्टादशभिरब्दानां, सहस्रैः परमायुषः । जघन्यस्थितयः सप्तदशभिर्भोजनार्थिनः ॥ ३८५ ॥
उच्छ्वसन्तीह नवभिर्मासैः परमजीविनः । हीनायुषोऽष्टभिः सार्द्धैः, परे तदनुसारतः ॥ ३८६ ॥
भोगो गत्यागती संख्योत्पादच्यवनगोचरा । अवधिज्ञानविषयः, सर्वमत्रापि शुक्रवत् ॥ ३८७ ॥
अत्रोत्पादच्यवनयोर्गरीयान् विरहो भवेत् । शतं दिनानामल्पीयान्, स पुनः समयो मतः ॥ ३८८ ॥
चतुर्थप्रतरेऽत्रापि, सहस्रारावतंसकः । अङ्कावतंसकादीनां, चतुर्णां मध्यतः स्थितिः ॥ ३८९ ॥
सहस्रारस्तत्र देवराजो राजेव राजते । प्राग्वत्कृतजिनाद्यर्चो, महासिंहासने स्थितः ॥ ३९० ॥
पञ्चभिर्निर्जरशतैः, सेव्योऽभ्यन्तरपर्षदि । सप्तपल्याधिकापार्द्धाष्टादशाम्भोधिजीविभिः ॥ ३९१ ॥
एकदेवसहस्रेण, सेवितो मध्यपर्षदि । सषट्पल्यसार्द्धसप्तदशतोयधिजीविना ॥ ३९२ ॥
द्विसहस्र्या च देवानां, सेवितो बाह्यपर्षदाम् । पञ्चपल्ययुतापार्द्धाष्टादशार्णवजीविनाम् ॥ ३९३ ॥

सामानिकामरैः सेव्यः, सहस्रैस्त्रिंशता सदा । सहस्रैस्त्रिंशतैकैकदिश्यात्मरक्षकैः सुरैः ॥ ३९४ ॥
प्राग्वत्त्रायस्त्रिंशलोकपालसैन्यतदीश्वरैः । देवैरन्यैरप्युपास्यः, सहस्रारनिवासिभिः ॥ ३९५ ॥
सातिरेकान् षोडशैष, जम्बूद्वीपान् विकुर्वितैः । रूपैर्भर्तुं क्षमस्तिर्यगसंख्यान् द्वीपवारिधीन् ॥ ३९६ ॥
स विमानसहस्राणां, षण्णामैश्वर्यमन्वहम् । भुङ्क्ते भाग्यौजसां भूमिरष्टादशाब्धिजीवितः ॥ ३९७ ॥
अस्य यानविमानं च, विदितं विमलाभिधम् । देवश्च विमलाभिख्यो, नियुक्तस्तद्विकुर्वणे ॥ ३९८ ॥
ऊर्ध्वं चाथ सहस्रारादसंख्ययोजनोत्तरौ । आनतप्राणतौ स्वर्गौ, दक्षिणोत्तरयोः स्थितौ ॥ ३९९ ॥
अनयोरेकवलयस्थयोरर्द्धार्द्धचन्द्रवत् । चत्वारः प्रतरास्तत्र, प्रतिप्रतरमिन्द्रकम् ॥ ४०० ॥
महाशुक्रसहस्रारमानतं प्राणतं क्रमात् । एभ्यश्च पङ्क्तयः प्राग्वत्पुष्पावकीर्णकास्तथा ॥ ४०१ ॥
अष्टादश सप्तदश, षट्पञ्चाभ्यधिका दश । विमानान्येकैकपङ्क्तौ, प्रतरेषु चतुर्ष्विह ॥ ४०२ ॥
प्रथमप्रतरे तत्र, प्रतिपङ्क्ति विमानकाः । वृत्तत्र्यस्रचतुरस्राः, षट् षट् द्वासप्ततिः समे ॥ ४०३ ॥
द्वितीयप्रतरे वृत्ताः, पञ्च षट् षट् परे द्विधा । सर्वेऽष्टषष्टिः पाङ्क्तेयास्तृतीयप्रतरे पुनः ॥ ४०४ ॥
त्र्यस्राः षट् पञ्च पञ्चान्ये, चतुःषष्टिः समेऽप्यमी । तुर्ये त्रैधाः पञ्च पञ्च, षष्टिश्च सर्वसंख्यया ॥ ४०५ ॥
चतुर्भिरिन्द्रकैर्युक्ताः, सर्वेऽत्र पङ्क्तिवृत्तकाः । अष्टाशीतिर्द्विनवतिः, पङ्क्तित्र्यस्रा इहोदिताः ॥ ४०६ ॥
अष्टाशीतिः पङ्क्तिचतुरस्राः सर्वे च पङ्क्तिगाः । द्वे शते अष्टषष्टिश्च, शेषाः पुष्पावकीर्णकाः ॥ ४०७ ॥
शतं द्वात्रिंशदधिकं, विमानाः सर्वसंख्यया । स्वर्गद्वये समुदिते, स्युश्चत्वारि शतानि ते ॥ ४०८ ॥
आभाव्यत्वविभागस्तु, विमानानामिहास्ति न । यतोऽनयोरेक एव, द्वयोरपि सुरेश्वरः ॥ ४०९ ॥
विहायसि निरालम्बा, निराधाराः स्थिता अमी । जगत्स्वभावतः शुक्लवर्णाश्च रुचिरप्रभाः ॥ ४१० ॥
योजनानां नव शतान्येषु प्रासादतुङ्गता । पृथ्वीपिण्डः शतान्यत्र, त्रयोविंशतिरीरितः ॥ ४११ ॥
एषां पूर्वोदितानां च, विमानानां शिरोऽग्रगः । ध्वजस्तत्तद्वर्ण एव, स्यान्मरुच्चञ्चलाञ्चलः ॥ ४१२ ॥
अथ सर्वे शुक्लवर्णा, एवैतेऽनुत्तरावधि । किन्तूत्तरोत्तरोत्कृष्टवर्णा नभःप्रतिष्ठिताः ॥ ४१३ ॥
उत्पन्नाः प्राग्वदेतेषु, देवाः सेवाकृतोऽर्हताम् । सुखानि भुञ्जते प्राज्यपुण्यप्राग्भारभारिणः ॥ ४१४ ॥
तत्र दक्षिणदिग्वर्त्तिन्यानतस्वर्गसंगते । प्रथमप्रतरेऽमीषां, स्थितिरुत्कर्षतो भवेत् ॥ ४१५ ॥
अष्टादश सपादा वै, द्वितीयप्रतरेऽब्धयः । सार्द्धा अष्टादश पादन्यूना एकोनविंशतिः ॥ ४१६ ॥
तृतीयप्रतरे ते स्युस्तुर्ये चैकोनविंशतिः । सर्वत्रापि जघन्या तु, स्युरष्टादश वार्द्धयः ॥ ४१७ ॥
प्राणतस्वर्गसंबन्धिन्यथोत्तरदिशि स्थिते । प्रथमप्रतरे ज्येष्ठा, स्थितिर्भवति नाकिनाम् ॥ ४१८ ॥
एकोनविंशतिस्तोयधयस्तुर्यलवाधिकाः । एकोनविंशतिः सार्द्धा, द्वितीयप्रतरेऽब्धयः ॥ ४१९ ॥
तृतीयप्रतरेऽब्धीनां, पादोना विंशतिः स्थितिः । तुर्ये च प्रतरे ज्येष्ठा, स्थितिर्विंशतिरब्धयः ॥ ४२० ॥

सर्वत्रापि जघन्या तु, स्थितिरेकोनविंशतिः । पयोधयो देहमानमथ स्थित्यनुसारतः ॥ ४२१ ॥
कराश्चत्वार एवाङ्गमष्टादशाब्धिजीविनाम् । ते त्रयोऽशास्त्रयश्चैकोनविंशत्यब्धिजीविनाम् ॥ ४२२ ॥
विंशत्यब्धिस्थितीनां तु, देहमानं करास्त्रयः । द्विभागाढ्या मध्यमीयायुषां तदनुसारतः ॥ ४२३ ॥
अष्टादशभिरेकोनविंशत्याऽब्दसहस्रकैः । विंशत्या च यथायोगममी आहारकाङ्क्षिणः ॥ ४२४ ॥
नवभिः सार्द्धनवभिर्मासैदशभिरेव च । उच्छ्वसन्ति यथायोगं, स्वस्वस्थित्यनुसारतः ॥ ४२५ ॥
रिरंसवस्त्वमी देवाः, सौधर्मस्वर्गवासिनीः । विचिन्तयन्ति चित्तेनानतस्वर्गनिवासिनः ॥ ४२६ ॥
प्राणतस्वर्गदेवास्तु, विचिन्तयन्ति चेतसा । रिरंसया स्वभोगार्हा, ईशानस्वर्गवासिनीः ॥ ४२७ ॥
देव्योऽपि ताः कृतस्फारशृङ्गारा मदनोद्धुराः । विदेशस्थाः स्त्रिय इव, कान्तमभ्येतुमक्षमाः ॥ ४२८ ॥
स्वस्थानस्था एव चेतांस्युच्चावचानि बिभ्रति । देवा अपि तथावस्थास्ताः संकल्प्य स्वचेतसा ॥ ४२९ ॥
उच्चावचानि चेतांसि, कुर्वन्तो दूरतोऽपि हि । सुरतादिव तृप्यन्ति, मन्दपुंवेदवेदनाः ॥ ४३० ॥
देव्योऽपि तास्तथा दूरादपि दिव्यानुभावतः । सर्वाङ्गेषु परिणतैस्तुष्यन्ति शुक्रपुद्गलैः ॥ ४३१ ॥
यत ऊर्ध्वं सहस्रारान्न देवीनां गतागते । तत्रस्था एव तेनैते, भजन्ते भोगवैभवम् ॥ ४३२ ॥
यश्च तासां सान्तराणामसंख्यैरपि योजनैः । शुक्रसंचारोऽनुभावात्, स ह्यचिन्त्यः सुधाभुजाम् ॥ ४३३ ॥

तथा च मूलसंग्रहणीटीकायां हरिभद्रसूरिः—"देव्यः खल्वपरिगृहीताः सहस्रारं यावद्गच्छन्ति," तथा च भगवानार्यश्यामोऽपि प्रज्ञापनायामाह—"तत्थ णं जे ते मणपरियारगा देवा तेसिं इच्छामणे समुप्पज्जइ, इच्छामो णं अच्छराहिं सद्धिं मणपरियारणं करेत्तए, तओ णं तेहिं देवेहिं एवं मणसीकए समाणे खिप्पामेव ताओ अच्छराओ तत्थ गयाओ चेव समाणीओ अणुत्तराइं उच्चावयाइं मणाइं पहारेमाणीओ चिट्ठंति, तओ णं ते देवा ताहिं अच्छराहिं सद्धिं मणपरियारणं करेंति, 'आरेण अच्चुयाओ गमणागमणं तु देवदेवीण' मित्यादिपूर्वसंग्रहणीगतप्रक्षेपगाथायास्तु संवादो न दृश्यते," इति लघुसंग्रहणीवृत्तौ ॥

प्रज्ञप्ताः सर्वतः स्तोका, देवा अप्रविचारकाः । स्युः संख्येयगुणास्तेभ्यश्चेतःसुरतसेविनः ॥ ४३४ ॥
तेभ्यः क्रमाच्छब्दरूपस्पर्शसंभोगसेविनः । यथोत्तरमसंख्येयगुणा उक्ता जिनेश्वरैः ॥ ४३५ ॥
आद्यैस्त्रिभिः संहननैरुपेता गर्भजा नराः । उत्पद्यन्त एष्वमीभ्यश्च्युत्वाऽप्यनन्तरे भवे ॥ ४३६ ॥
गर्भजेषु नरेष्वेवोत्पद्यन्ते नापरेष्वथ । अनुत्तरान्तदेवानामेवं ज्ञेये गतागती ॥ ४३७ ॥
एकेन समयेनामी, च्यवन्त उद्भवन्ति च । संख्येया एव नासंख्याः संख्येयत्वान्नृणामिह ॥ ४३८ ॥
अत्रोत्पत्तिच्यवनयोर्विरहः परमो भवेत् । वर्षादर्वागेव मासाः, संख्येयाः प्राणतेऽपि ते ॥ ४३९ ॥
अब्दादर्वागेव किंत्वानतव्यपेक्षयाधिकाः । अग्रेऽप्येवं भावनीयं, बुधैर्वर्षशतादिषु ॥ ४४० ॥
संपूर्णमभविष्यच्चेद्वर्षवर्षशतादिकम् । तत्तद्देवाकथयिष्यन्, सिद्धान्ते गणधारिणः ॥ ४४१ ॥

संख्येयानेव मासादीन् वर्षादेरविवक्षया । केचिन्मन्यन्तेऽविशेषाद्वर्षादेरधिकानपि ॥ ४४२ ॥

तथाहुः संग्रहणीवृत्तौ—"विशेषव्याख्या चैषा हारिभद्रमूलटीकानुसारतः, केचित्तु सामान्येन व्याचक्षते"

पञ्चमीं पृथिवीं यावत्पश्यन्त्यवधिचक्षुषा । आनताः प्राणताश्चैनामेवानल्पाच्छपर्यवाम् ॥ ४४३ ॥
आरणाच्युतदेवा अप्येनामेवातिनिर्मलाम् । बहुपर्यायां च तत्राप्यारणेभ्यः परेऽधिकाम् ॥ ४४४ ॥
अथात्र प्रतरे तुर्ये, स्यात्प्राणतावतंसकः । सौधर्मवदशोकाद्यवतंसकचतुष्कयुक् ॥ ४४५ ॥
प्राणतः स्वः पतिस्तत्रोत्पन्नोऽत्यन्तपराक्रमः । कृत्वाऽर्हत्प्रतिमाद्यर्चां, सिंहासने निषीदति ॥ ४४६ ॥
शतैरर्द्धतृतीयैः स, सेव्योऽभ्यन्तरपर्षदाम् । पञ्चपल्याधिकैकोनविंशत्यम्भोधिजीविनाम् ॥ ४४७ ॥
पञ्चभिश्च देवशतैर्जुष्टो मध्यमपर्षदाम् । चतुःपल्याधिकैकोनविंशत्यर्णवजीविभिः ॥ ४४८ ॥
एकदेवसहस्रेण, सेवितो बाह्यपर्षदि । स त्रिपल्योपमैकोनविंशत्यर्णवजीविना ॥ ४४९ ॥
सामानिकानां विंशत्या, सहस्रैः परितो वृतः । एकैकस्यां दिशि वृतस्तावद्भिरङ्गरक्षकैः ॥ ४५० ॥
त्रायस्त्रिंशैर्लोकपालैः, सैन्यैः सैन्याधिकारिभिः । आनतप्राणतस्वर्गवासिभिश्चापरैरपि ॥ ४५१ ॥
अनेकैर्देवनिकरैः, समाराधितशासनः । द्वयोस्ताविषयोरीष्टे, स विंशत्यब्धिजीवितः ॥ ४५२ ॥
अस्य यानविमानं च, वरनाम्ना प्रकीर्त्तितम् । वराभिधानो देवश्च, नियुक्तस्तद्विकुर्वणे ॥ ४५३ ॥
द्वात्रिंशदेष संपूर्णान्, जम्बूद्वीपान् विकुर्वितैः । रूपैर्भर्त्तुं क्षमस्तिर्यगसंख्यान् द्वीपवारिधीन् ॥ ४५४ ॥
अथानतप्राणतयोरूर्ध्वं दूरमतिक्रमे । असंख्येययोजनानामुभौ स्वर्गौ प्रतिष्ठितौ ॥ ४५५ ॥
आरणाच्युतनामानौ, सधामानौ मणीमयैः । विमानैर्योगविद् ध्यानैरिवानन्दमहोमयैः ॥ ४५६ ॥
चत्वारः प्रतराः प्राग्वद्, द्वयोः साधारणा इह । प्रतिप्रतरमेकैकं, मध्यभागे तथेन्द्रकम् ॥ ४५७ ॥
पुष्पसंज्ञमलङ्कारं, चारणं चाच्युतं क्रमात् । एभ्यश्चतुर्दिशं प्राग्वत्पङ्क्तयश्च प्रकीर्णकाः ॥ ४५८ ॥
चतुस्त्रिद्व्येकसंयुक्ता, दशैतेषु क्रमादिह । प्रतिपङ्क्ति विमानानि, प्रतरेषु चतुर्ष्वपि ॥ ४५९ ॥
अथाद्यप्रतरे पङ्क्तौ, पङ्क्तौ वृत्ता विमानकाः । चत्वारोऽन्ये पञ्च पञ्च, षट्पञ्चाशत्समेऽप्यमी ॥ ४६० ॥
द्वितीयप्रतरे त्र्यस्राः, पञ्चान्ये द्विविधा अपि । चत्वारश्चत्वार एव, द्विपञ्चाशत्समेऽप्यमी ॥ ४६१ ॥
चत्वारश्चत्वार एव, तृतीये त्रिविधा अपि । अष्टचत्वारिंशदेवं, पाङ्क्तेयाः सर्वसंख्यया ॥ ४६२ ॥
चतुर्थप्रतरे वृत्तास्त्रयोऽन्ये द्विविधा अपि । चत्वारः स्युश्चतुश्चत्वारिंशच्च सर्वसंख्यया ॥ ४६३ ॥
सर्वेऽत्र पङ्क्तिवृत्ताश्च, चतुर्भिरिन्द्रकैः सह । चतुःषष्टिस्तथा पङ्क्तित्रिकोणाश्च द्विसप्ततिः ॥ ४६४ ॥
अष्टषष्टिः पङ्क्तिचतुःकोणाः सर्वे शतद्वयम् । चतुर्युतं षण्णवतिश्चेह पुष्पावकीर्णकाः ॥ ४६५ ॥
एवं शतानि त्रीण्यत्र, विमानाः सर्वसंख्यया । एष्वानतप्राणतवद्वर्णाधारोच्चतादिकम् ॥ ४६६ ॥

अत्र दक्षिणदिग्भागे, आरणस्वर्गवर्त्तिषु । नाकिनां स्थितिरुत्कर्षात् प्रतरेषु चतुर्ष्वपि ॥ ४६७ ॥
सपादविंशतिः सार्द्धविंशतिश्च यथाक्रमम् । पादोनैकविंशतिश्च, वार्द्धीनां चैकविंशतिः ॥ ४६८ ॥
अथाच्युतस्वर्गसंबन्धिषूदग्भागवर्त्तिषु । प्रतरेषु चतुर्ष्वेषूत्कृष्टा सुधाभुजां स्थितिः ॥ ४६९ ॥
सपादैकविंशतिश्च, सार्द्धैकविंशतिः क्रमात् । पादोनद्वाविंशतिश्च, द्वाविंशतिश्च वार्द्धयः ॥ ४७० ॥
सर्वत्राप्यारणे वारांनिधयो विंशतिर्लघुः । अच्युते सागरा एकविंशतिः सा निरूपिता ॥ ४७१ ॥
द्वाभ्यामेकादशांशाभ्यां, युक्ता इह करास्त्रयः । देहप्रमाणं देवानां, विंशत्यब्धोधिजीविनाम् ॥ ४७२ ॥
त एव सैकांशा एकविंशत्युदधिजीविनाम् । त्रयः कराश्च संपूर्णा, द्वाविंशत्यर्णवायुषाम् ॥ ४७३ ॥
विंशत्या चैकविंशत्या, द्वाविंशत्या सहस्रकैः । स्वस्वस्थित्यनुसारेण, वर्षैराहारकाङ्क्षिणः ॥ ४७४ ॥
दशभिः सार्द्धदशभिरेकादशभिरेव च । मासैरमी उच्छ्वसन्ति, स्थितिसागरसंख्यया ॥ ४७५ ॥
च्युतावुत्पत्तौ च संख्या, भोगो गत्यागती इह । अवधिज्ञानसीमा च, सर्वं प्राणतनाकवत् ॥ ४७६ ॥
किंत्वाद्याभ्यामेव संहननाभ्यां सत्त्वशालिनः । आराधितार्हताचारा, उत्पद्यन्तेऽत्र सद्गुणाः ॥ ४७७ ॥
च्युत्युत्पत्तिवियोगोऽत्र, संख्येया वत्सरा गुरुः । आरणेऽब्दशतादर्वाक्, त एव चाच्युतेऽधिकाः ॥ ४७८ ॥
अत्रापि प्रतरे तुर्येऽच्युतेऽच्युतावतंसकः । ईशानवद्भवेदंकाद्यवतंसकमध्यगः ॥ ४७९ ॥
तत्राच्युतस्वर्गपतिर्वरीवर्त्ति महामतिः । योऽसौ दाशरथेरासीत्प्रेयसी पूर्वजन्मनि ॥ ४८० ॥
शुद्धाऽशुद्धेति को वेद, स्थिता रावणमन्दिरे । किमादृताऽपरीक्ष्येति, लोकापवादभीरुणा ॥ ४८१ ॥
रामेण सा सुशीलापि, सगर्भा तत्यजे वने । सतां लोकापवादो हि, मरणादपि दुस्सहः ॥ ४८२ ॥
चिन्तयन्ती सती साऽथ, विपाकं पूर्वकर्मणाम् । भयोद्भ्रान्ता परिश्रान्ता, बभ्रामेतस्ततो वने ॥ ४८३ ॥
पुण्डरीकपुराधीशः, पुण्डरीकोल्लसद्यशाः । गजवाहनराजस्य, बंधूदेव्याश्च नन्दनः ॥ ४८४ ॥
महार्हतो महासत्त्वः, परनारीसहोदरः । धार्मिको नृपतिर्वज्रजङ्घस्तत्र समागतः ॥ ४८५ ॥
स्वीकृत्य भगिनीत्वेन, तां निनाय स्वमन्दिरम् । तत्र भ्रातुर्गृह इव, वसति स्म निराकुला ॥ ४८६ ॥
क्रमात्तन्नारदात् श्रुत्वा, भामण्डलमहीपतिः । पुण्डरीकपुरे सीतां, समुपेयाय सत्वरः ॥ ४८७ ॥
ततश्च जानकी तत्र, सुषुवे दोष्मिणौ सुतौ । नामतोऽनङ्गलवणं, मदनाङ्कुशमप्यथ ॥ ४८८ ॥
पितुः स्वरूपमप्राष्टां, मातरं तौ महाशयौ । जातपूर्वं व्यतिकरमवोचत् साऽपि साश्रुदृक् ॥ ४८९ ॥
ततो निरागसो मातुस्त्यागात्पितरि सक्रुधौ । युद्धाय धीरौ पितरमभ्यषेणयतां द्रुतम् ॥ ४९० ॥
उत्पन्नः कोऽपि वैरीति, विषण्णौ रामलक्ष्मणौ । चतुरङ्गचमूचक्रैः, सन्नह्येते स्म सायुधौ ॥ ४९१ ॥
ततस्तौ बलिनौ तीक्ष्णैर्निर्जित्य रणकर्मभिः । नारदावेदितौ तातं, पितृव्यं च प्रणेमतुः ॥ ४९२ ॥

पुत्रौ तावप्युपालक्ष्य, तुष्टौ पुष्टौजसावुभौ । भुजोपपीडमालिङ्ग्य, भेजाते परमां मुदम् ॥ ४९३ ॥
भवतोर्जननी क्वेति, पृष्टौ ताभ्यां च दर्शिता । गृहायाहूयमाना च, सती दिव्यमयाचत ॥ ४९४ ॥
ततः स खातिकां रामोऽङ्गारपूर्णामरीरचत् । पुरुषद्वयदघ्नीं चायतां हस्तशतत्रयीम् ॥ ४९५ ॥
पश्यत्सु सर्वलोकेषु. सुरासुरनरादिषु । चमत्कारात्पुलकितेष्वित्यूचे सा कृताञ्जलिः ॥ ४९६ ॥
हंहो भ्रातर्बृहद्भानो !, जागरूको भवान् भुवि । पाणिग्रहणकालेऽपि, त्वमेव प्रतिभूरभूः ॥ ४९७ ॥
जाग्रत्या वा स्वपत्या वा, मनोवाक्कायगोचरः । कदापि पतिभावो मे, राघवादपरे यदि ॥ ४९८ ॥
तदा देहमिदं दुष्टं, दह निर्वह कौशलम् । न पाप्मने ते स्त्रीहत्या, दुष्टनिग्रहकारिणः ॥ ४९९ ॥
त्रिधा च यदि शुद्धाऽहं, तर्हि दर्शय कौतुकम् । लोकानेतान् जलीभूय, भूयस्तरङ्गरङ्गितैः ॥ ५०० ॥
अत्रान्तरे च वैताढ्यस्योत्तरश्रेणिवर्त्तिनः । हरिविक्रमभूभर्त्तुर्नन्दनो जयभूषणः ॥ ५०१ ॥
ऊढाष्टशतभार्यः स्वकान्तां किरणमण्डलाम् । सुप्तां हेमशिखाख्येन, समं मातुलसूनुना ॥ ५०२ ॥
दृष्ट्वा निर्वासयामास, दीक्षां च स्वयमाददे । विपद्य समभूत् सापि, विद्युद्दंष्ट्रेति राक्षसी ॥ ५०३ ॥
जयभूषणसाधोश्च, तदाऽयोध्यापुराद्बहिः । तया कृतोपसर्गस्योत्पेदे केवलमुज्ज्वलम् ॥ ५०४ ॥
आजग्मुस्तत्र शक्राद्यास्तदुत्सवविधित्सया । आयान्तो ददृशुस्तं च, सीताव्यतिकरं पथि ॥ ५०५ ॥
ततस्तस्या महासत्याः, साहाय्यायादिशद्धरिः । पदात्यनीकेशं साधोः, समीपे च स्वयं ययौ ॥ ५०६ ॥
ततस्तस्यां खातिकायां, सा सीता निर्भयाऽविशत् । अभूच्च सुरसाहाय्यात्क्षणादप्युदकैर्भृता ॥ ५०७ ॥
तदुच्छलज्जलं तस्या, उद्वेलस्येव तोयधेः । उत्प्लावयामास मज्ज्वांस्तुङ्गान् द्रष्टृजनाश्रितान् ॥ ५०८ ॥
उत्पतन्त्यम्बरे विद्याधरा भीतास्ततो जलात् । चुक्रुशुर्भूचराश्चैवं, पाहि सीते ! महासति ॥ ५०९ ॥
स्वस्थं चक्रे तदुदकं, ततः संस्पृश्य पाणिना । अचिन्त्याच्छीलमाहात्म्याल्लोके किं किं न जायते ?॥ ५१० ॥
तदाऽस्याः शीललीलाभिरनलं सलिलीकृतम् । निरीक्ष्य देवा ननृतुर्ववृषुः कुसुमादि च ॥ ५११ ॥
जह्रषुः स्वजनाः सर्वे, पौरा जयजयारवैः । तुष्टुवुस्तां सतीं दिव्यो, नव्योऽजनि महोत्सवः ॥ ५१२ ॥
इत्युन्मृष्टकलङ्कां तां, कान्तां नीत्वाऽऽत्मना सह । जगाम सपरीवारो, रामः केवलिनोऽन्तिके ॥ ५१३ ॥
पप्रच्छ देशनान्ते च, रामः पूर्वभवान्निजान् । तांश्चाचख्यौ यथाभूतान्, केवली जयभूषणः ॥ ५१४ ॥
सीताऽपि प्राप्तवैराग्या, संसारासारतेक्षिणी । दीक्षां पार्श्वे मुनेरस्य, जग्राहोत्साहतो रयात् ॥ ५१५ ॥
षष्टिं वर्षाणि चारित्रमाराध्य विमलाशयात् । त्रयस्त्रिंशदहोरात्रीं, विहितानशना ततः ॥ ५१६ ॥
मृत्वा समाधिना स्वर्गेऽच्युते लेभेऽच्युतेन्द्रताम् । सोऽथ प्राग्वज्जिनाद्यर्चां, कृत्वा सदसि तिष्ठति ॥ ५१७ ॥
शतेन पञ्चविंशेन, सेव्योऽभ्यन्तरपर्षदि । एकविंशत्यब्धिसप्तपल्यस्थितिकनाकिनाम् ॥ ५१८ ॥
सार्द्धद्विशत्या देवानां, मध्यपर्षदि सेवितः । षट्पल्योपमयुक्तैकविंशत्युदधिजीविनाम् ॥ ५१९ ॥

सेव्यः पर्षदि बाह्यायां, पञ्चभिर्नाकिनां शतैः । एकविंशत्यब्धिपञ्चपल्योपममितायुषाम् ॥ ५२० ॥
सामानिकानां दशभिः, सहस्रैः सेवितक्रमः । एकैकदिशि तावद्भिस्तावद्भिश्चात्मरक्षकैः ॥ ५२१ ॥
सैन्यैः सैन्याधिपैस्त्रायस्त्रिंशकै र्लोकपालकैः । सेव्यः परैरपि सुरैरारणाच्युतवासिभिः ॥ ५२२ ॥
द्वात्रिंशत्साधिकान् शक्तो, जम्बूद्वीपान् विकुर्वितैः । रूपैः पूरयितुं तिर्यक्, चासंख्यद्वीपवारिधीन् ॥ ५२३ ॥
भुङ्क्ते साम्राज्यमुभयोरारणाच्युतनाकयोः । विमानत्रिशतीनेता, द्वाविंशत्युदधिस्थितिः ॥ ५२४ ॥
अस्य यानविमानं स्यात्सर्वतोभद्रसंज्ञकम् । सर्वतोभद्रदेवश्च, नियुक्तस्तद्विकुर्वणे ॥ ५२५ ॥

स्थानाङ्गपञ्चमस्थाने तु आनतप्राणतयोरारणाच्युतयोश्च प्रत्येकमिन्द्रा विवक्षिता दृश्यन्ते, तथा च तत्सूत्रं—"जहा सक्कस्स तहा सव्वेसिं दाहिणिल्लाणं जाव आरणस्स, जहा ईसाणस्स तहा सव्वेसिं उत्तरिल्लाणं जाव अच्चुयस्स" एतद्वृत्तावपि देवेन्द्रस्तवाभिधानप्रकीर्णक इव द्वादशानामिंद्राणां विवक्षणादारणस्येत्याद्युक्तमिति संभाव्यते, अन्यथा चतुर्षु द्वावेवेन्द्रावत आरणस्येत्याद्यनुपपन्नं स्यादिति, प्रज्ञापना-जीवाभिगमसूत्रादौ तु दशैव वैमानिकेन्द्रा उक्ता इति प्रतीतमेव ॥

अच्युतस्वर्गपर्यन्तमेषु वैमानिकेष्विति । यथासंभवमिन्द्राद्या, भवन्ति दशधा सुराः ॥ ५२६ ॥
तथाहि–
इन्द्राः सामानिकास्त्रायस्त्रिंशास्त्रिविधपार्षदाः । आत्मरक्षा लोकपाला, आनीकाश्च प्रकीर्णकाः ॥ ५२७ ॥
आभियोग्याः किल्बिषिका, एवं व्यवस्थयाऽन्विताः । अत एव च कल्पोपपन्ना वैमानिका अमी ॥ ५२८ ॥
एवं च भवनाधीशेष्वप्येते दशधा सुराः । भवन्त्यष्टविधा एव, ज्योतिष्कव्यन्तरेषु तु ॥ ५२९ ॥
जगत्स्वाभाव्यतस्तत्र, द्वौ भेदौ भवतो न यत् । त्रायस्त्रिंशा लोकपाला, अच्युतात्परत पुनः ॥ ५३० ॥
ग्रैवेयकानुत्तरेषु, स्युः सर्वेऽप्यहमिन्द्रकाः । देवा एकविधा एव, कल्पातीता अमी ततः ॥ ५३१ ॥
आरणाच्युतनाकाभ्यां, दूरमूर्ध्वं व्यतिक्रमे । नवग्रैवेयकाभिख्याः, प्रतरा दधति श्रियम् ॥ ५३२ ॥
अधस्तनं मध्यमं च, तथोपरितनं त्रिकम् । त्रिधाऽमी रत्नरुग्रम्याः, संपूर्णचन्द्रसंस्थिताः ॥ ५३३ ॥
अनुत्तरमुखस्यास्य, लोकस्य पुरुषाकृतेः । दधते कण्ठपीठेऽमी, मणिग्रैवेयकश्रियम् ॥ ५३४ ॥
प्रतरेषु नवस्वेषु, क्रमादेकैकमिन्द्रकम् । सुदर्शनं सुप्रबुद्धं, मनोरमं ततः परम् ॥ ५३५ ॥
विमानं सर्वतोभद्रं, विशालं सुमनोऽभिधम् । ततः सौमनसं प्रीतिकरमादित्यसंज्ञकम् ॥ ५३६ ॥
एभ्यश्च पङ्क्तयो दिक्षु, विमानानां विनिर्गताः । पङ्क्तौ पङ्क्तौ दश नव, विमानान्यष्ट सप्त षट् ॥ ५३७ ॥
पञ्च चत्वारि च त्रीणि, द्वे चैतेषु यथाक्रमम् । आद्यग्रैवेयके तत्र, प्रतिपङ्क्ति विमानकाः ॥ ५३८ ॥
त्र्यश्राश्चत्वारो द्विधाऽन्ये, त्रयस्त्रयः समे त्वमी । चत्वारिंशत्पङ्क्तिगता, द्वितीयप्रतरे पुनः ॥ ५३९ ॥

त्रयस्त्रयस्त्रिधाऽप्येते, षट्त्रिंशत्पङ्क्तिगाः समे । तृतीयप्रतरे वृत्तौ, द्वौ द्विधाऽन्ये त्रयस्त्रयः ॥ ५४० ॥
द्वात्रिंशत्पङ्क्तिगाः सर्वे, चतुर्थप्रतरे पुनः । त्र्यस्रास्त्रयः परौ द्वौ द्वौ, सर्वेऽष्टाविंशतिर्मताः ॥ ५४१ ॥
ग्रैवेयके पञ्चमे च, त्रेधाप्येते द्वयं द्वयम् । सर्वे चतुर्विंशतिश्च, षष्ठे ग्रैवेयके ततः ॥ ५४२ ॥
द्वौ द्वौ स्तस्त्रिचतुःकोणावेको वृत्तः समे पुनः । विंशतिः पङ्क्तिगा ग्रैवेयके ततश्च सप्तमे ॥ ५४३ ॥
एको वृत्तश्चतुःकोण, एकोऽथ त्र्यस्रयोर्द्वयम् । षोडशैवमष्टमे च, त्रिधाप्येकैक इष्यते ॥ ५४४ ॥
सर्वे द्वादश नवमग्रैवेयके च पङ्क्तिषु । केवलं त्रिचतुःकोणावेकैकावष्ट तेऽखिलाः ॥ ५४५ ॥
अधस्तनत्रिके चैवं, संयुक्तास्त्रिभिरिन्द्रकैः । पञ्चत्रिंशत्पङ्क्तिवृत्ता, विमाना वर्णिता जिनैः ॥ ५४६ ॥
चत्वारिंशच्च षट्त्रिंशत्पङ्क्तित्रिचतुरस्रकाः । एवं पाङ्क्तेयाश्च सर्वे, शतमेकादशोत्तरम् ॥ ५४७ ॥
तत्रापि—एकचत्वारिंशदाद्ये, सप्तत्रिंशद् द्वितीयके । ग्रैवेयके तृतीये च, त्रयस्त्रिंशत् समे स्मृताः ॥ ५४८ ॥
पुष्पावकीर्णकाभावादाद्यग्रैवेयकत्रिके । सर्वसंख्यापि पाङ्क्तेयसंख्याया नातिरिच्यते ॥ ५४९ ॥
स्युस्त्रयोविंशतिर्वृत्ताः, सेन्द्रका मध्यमत्रिके । त्र्यस्रा अष्टाविंशतिश्च, चतुरस्रा जिनैर्मिताः ॥ ५५० ॥
द्वात्रिंशत्पुष्पावकीर्णाः, सप्तोत्तरं शतं समे । तृतीये च त्रिके वृत्ता, एकादश सहेन्द्रकाः ॥ ५५१ ॥
त्र्यस्राश्च चतुरस्राश्च, षोडश द्वादश क्रमात् । पुष्पावकीर्णका एकषष्टिः शतं च मीलिताः ॥ ५५२ ॥
ग्रैवेयकेषु नवसु, विमानाः सर्वसंख्यया । अष्टादशाढ्या त्रिशती, वृत्ताश्चैकोनसप्ततिः ॥ ५५३ ॥
त्र्यस्राश्चतुरशीतिश्च, चतुरस्रा द्विसप्ततिः । सर्वाग्रेण त्रिनवतिश्चैषु पुष्पावकीर्णकाः ॥ ५५४ ॥
द्वाविंशतिर्योजनानां, शतानि पीठपुष्टता । प्रासादाश्च दश शतान्यत्रोच्चाः कम्रकेतवः ॥ ५५५ ॥
एषु देवतयोत्पन्ना, जीवाः सुकृतशालिनः । सुखानि भुञ्जते मञ्जुतेजसः सततोत्सवाः ॥ ५५६ ॥
सर्वेऽहमिन्द्रा अप्रेष्या, अनीशा अपुरोहिताः । तुल्यानुभावास्तुल्याभाबलरूपयशः सुखाः ॥ ५५७ ॥
स्वाभाविकाङ्गा एवामी, अकृतोत्तरवैक्रियाः । वस्त्रालङ्काररहिताः, प्रकृतिस्था विभूषया ॥ ५५८ ॥

तथाहुः—"गेवेज्जगदेवाणं भंते ! सरीरा केरिसा विभूसाए पण्णत्ता ?, गो० ! गेविज्जगदेवाणं एगे भवधारणिज्जे सरीरे, ते णं आभरणवसणरहिया पगतित्था विभूसाए पण्णत्ता." इति जीवाभिगमे ।

यथाजाता अपि सदा, दर्शनीया मनोरमाः । प्रसृत्वरैर्धुतिभरैर्द्योतयन्तो दिशो दश ॥ ५५९ ॥
यास्तु सन्ति तत्र चैत्ये, प्रतिमाः श्रीमदर्हताम् । भावतस्ताः पूजयन्ति, साधुवद् द्रव्यतस्तु न ॥ ५६० ॥
गीतवादित्रनाट्यादिविनोदो नात्र कर्हिचित् । गमनागमनं कल्याणकादिष्वपि न क्वचित् ॥ ५६१ ॥

तथोक्तं तत्त्वार्थवृत्तौ—"ग्रैवेयकादयस्तु यथावस्थिता एव कायवाङ्मनोभिरभ्युत्थानाञ्जलि-प्रणिपात-तथागुणवचनैकाग्र्यभावनाभिर्भगवतोऽर्हतो नमस्यन्ती" ति ।

सुरते तु कदाप्येषां, मनोऽपि न भवेन्मनाक् । निर्मोहानामिवर्षीणां, सदाप्यविकृतात्मनाम् ॥ ५६२ ॥
न चैवं गीतसंगीतसुरतास्वादवर्जितम् । किमेतेषां सुखं नाम, स्पृहणीयं यदङ्गिनाम् ? ॥ ५६३ ॥
अत्रोच्यतेऽत्यन्तमन्दपुंवेदोदयिनो ह्यमी । तत्प्राक्तनेभ्यः सर्वेभ्योऽनन्तघ्नसुखशालिनः ॥ ५६४ ॥
तथाहि कायसेविभ्योऽनन्तघ्नसुखशालिनः । स्युः स्पर्शसेविनस्तेभ्यस्तथैव रूपसेविनः ॥ ५६५ ॥
शब्दोपभोगिनस्तेभ्यस्तेभ्यश्चित्तोपभोगिनः । तेभ्योऽनन्तगुणसुखा, स्तेच्छावर्जिताः सुराः ॥ ५६६ ॥
यच्चैषां तनुमोहानां, सुखं संतुष्टचेतसाम् । वीतरागाणामिवोच्चैस्तदन्येषां कुतो भवेत् ? ॥ ५६७ ॥
मोहानुदयजं सौख्यं, स्वाभाविकमतिस्थिरम् । सोपाधिकं वैषयिकं, वस्तुतो दुःखमेव तत् ॥ ५६८ ॥
भोज्याङ्गनादयो येऽत्र गीयन्ते सुखहेतवः । रोचन्ते न त एव क्षुत्कामाद्यर्त्तिं विनाऽङ्गिनाम् ॥ ५६९ ॥
ततो दुःखप्रतीकाररूपा एते मतिभ्रमात् । सुखत्वेन मता लोकैर्हन्त मोहविडम्बितैः ॥ ५७० ॥

उक्तं च—"तृषा शुष्यत्यास्ये पिबति सलिलं स्वादु सुरभि, क्षुधार्त्तः सन् शालीन् कवलयति मांस्पाकवलितान् ।
प्रदीप्ते कामाग्नौ दहति तनुमाश्लिष्यति वधूं, प्रतीकारो व्याधेः सुखमिति विपर्यस्यति जनः" ॥
नन्वेवं यदि निर्वाणमदनज्वलनाः स्वतः । कथं ब्रह्मव्रतं नैते, स्वीकुर्वन्ति महाधियः ॥ ५७१ ॥
अत्रोच्यते देवभवस्वभावेन कदापि हि । एषां विरत्यभिप्रायो, नाल्पीयानपि संभवेत् ॥ ५७२ ॥
भवस्वभाववैचित्र्यं, चाचिन्त्यं पशवोऽपि यत् । भवन्ति देशविरतास्त्रिज्ञाना अप्यमी तु न ॥ ५७३ ॥
आद्यग्रैवेयकेऽमीषां, स्थितिरुत्कर्षतोऽब्धयः । स्युस्त्रयोविंशतिर्लघ्वी, द्वाविंशतिः पयोधयः ॥ ५७४ ॥
कनिष्ठायाः समधिकमारभ्य समयादिकम् । यावज्ज्येष्ठां समयोनां, सर्वत्र मध्यमा स्थितिः ॥ ५७५ ॥
द्वौ करावष्टभिर्भागैर्युक्तावेकादशोद्भवैः । देहो ज्येष्ठायुषां हीनस्थितीनां तु करास्त्रयः ॥ ५७६ ॥
ग्रैवेयके द्वितीये तु चतुर्विंशतिरब्धयः । ज्येष्ठा स्थितिः कनिष्ठा तु, त्रयोविंशतिरब्धयः ॥ ५७७ ॥
द्वौ करौ सप्तभिर्भागैर्युक्तावेकादशोत्थितैः । वपुर्ज्येष्ठायुषां ह्रस्वायुषामष्टलवाधिकौ ॥ ५७८ ॥
ग्रैवेयके तृतीये च, वार्द्धयः पञ्चविंशतिः । गुर्वी स्थितिर्जघन्या तु, चतुर्विंशतिरेव ते ॥ ५७९ ॥
ज्येष्ठस्थितीनामत्राङ्गं, द्वौ करौ षड्लवाधिकौ । तत्कनिष्ठस्थितीनां तु, सप्तांशाढ्यं करद्वयम् ॥ ५८० ॥
ग्रैवेयके तुरीये च, षड्विंशतिः पयोधयः । आयुर्ज्येष्ठं कनिष्ठं तु, पञ्चविंशतिरब्धयः ॥ ५८१ ॥
ज्येष्ठस्थितीनां द्वौ हस्तौ, देहः पञ्चलवाधिकौ । षड्भागाभ्यधिकौ तौ च, तनुर्जघन्यजीविनाम् ॥ ५८२ ॥
ग्रैवेयके पञ्चमेऽथ, वार्द्धयः सप्तविंशतिः । स्थितिर्ज्येष्ठा कनिष्ठा तु, षड्विंशतिपयोधयः ॥ ५८३ ॥
चतुर्लवाधिकौ हस्तौ, द्वावत्राङ्गं परायुषाम् । तौ जघन्यायुषां पञ्चभागयुक्तौ प्रकीर्त्तितौ ॥ ५८४ ॥
अष्टाविंशतिरुत्कृष्टा, षष्टे ग्रैवेयकेऽब्धयः । स्थितिरत्र जघन्या तु, सप्तविंशतिरब्धयः ॥ ५८५ ॥
ज्येष्ठस्थितीनामत्राङ्गं, द्वौ करौ त्रिलवाधिकौ । तौ कनिष्ठस्थितीनां तु, भागैश्चतुर्भिरन्वितौ ॥ ५८६ ॥

ग्रैवेयके सप्तमे स्युरेकोनत्रिंशदर्णवाः । स्थितिर्गरिष्ठा लघ्वी तु, साष्टाविंशतिरब्धयः ॥ ५८७ ॥
द्वौ द्विभागाधिकौ हस्तौ, वपुर्ज्येष्ठायुषामिह । लघ्वायुषां तु तावेव, त्रिभागाभ्यधिकौ तनुः ॥ ५८८ ॥
त्रिंशदम्भोधयो ज्येष्ठा, ग्रैवेयकेऽष्टमे स्थितिः । एकोनत्रिंशदेते च, स्थितिरत्र लघीयसी ॥ ५८९ ॥
द्वौ करावेकभागाढ्यौ, देहो ज्येष्ठायुषामिह । तावेव द्वौ सद्विभागौ, स्याज्जघन्यायुषां तनुः ॥ ५९० ॥
ग्रैवेयकेऽथ नवमे, एकत्रिंशत्पयोधयः । स्थितिर्गुर्वी लघिष्ठा तु, त्रिंशदम्भोधिसंमिता ॥ ५९१ ॥
हस्तौ द्वावेव संपूर्णौ, वपुरुत्कृष्टजीविनाम् । द्वौ करावेकभागाढ्यौ, तनुर्जघन्यजीविनाम् ॥ ५९२ ॥
स्वस्वस्थित्यम्भोनिधीनां, संख्ययाऽब्दसहस्रकैः । आहारकाङ्क्षिणः पक्षैस्तावद्भिरुच्छ्वसन्ति च ॥ ५९३ ॥
आद्यसंहननाः साधुक्रियानुष्ठानशालिनः । आयान्त्येषु नरा एव, यान्ति च्युत्वाऽपि नृष्वमी ॥ ५९४ ॥
मिथ्यात्विनो येऽप्यभव्या, उत्पद्यन्तेऽत्र देहिनः । जैनसाधुक्रियां तेऽपि, समाराध्यैव नान्यथा ॥ ५९५ ॥
समये च्यवनोत्पत्तिसंख्या चात्र यथाऽच्युते । च्यवनोत्पत्तिविरहः, परमस्तु भवेदिह ॥ ५९६ ॥
संख्येया वत्सरशता, आद्यग्रैवेयकत्रिके । अर्वाग्वर्षसहस्रान्ते, मध्यमीयत्रिके पुनः ॥ ५९७ ॥
लक्षादर्वाग्वत्सराणां, स्युः संख्येयाः सहस्रकाः । कोटेरर्वाग्वर्षलक्षाः, संख्येयाश्चरमत्रिके ॥ ५९८ ॥
आद्यषड्ग्रैवेयकस्थाः पश्यन्त्यवधिचक्षुषा । षष्ठ्यास्तमोऽभिधानायाः, पृथ्व्या अधस्तलावधि ॥ ५९९ ॥
अधस्तनापेक्षया च, पश्यन्त्यूर्ध्वोर्ध्वगाः सुराः । विशिष्टबहुपर्यायोपेतामेतां यथोत्तरम् ॥ ६०० ॥
तृतीयत्रिकगाः पश्यन्त्यधो माघवतिक्षितेः । अवधिज्ञानमेतेषां, पुष्पचङ्गेरिकाकृति ॥ ६०१ ॥
अथोर्ध्वनवमग्रैवेयकाद्दूरमतिक्रमे । स्याद्योजनैरसंख्येयैः, प्रतरोऽनुत्तराभिधः ॥ ६०२ ॥
नास्त्यस्मादुत्तरः कोऽपि, प्रधानमथवाऽधिकः । ततोऽयमद्वितीयत्वाद्विख्यातोऽनुत्तराख्यया ॥ ६०३ ॥
सिद्धिसिंहासनस्यैष, बिभर्त्ति पादपीठताम् । चतुर्विमानमध्यस्थरुचिरैकविमानकः ॥ ६०४ ॥
सर्वोत्कृष्टास्तत्र पञ्च, विमानाः स्युरनुत्तराः । तेष्वेकमिन्द्रकं मध्ये, चत्वारश्च चतुर्दिशम् ॥ ६०५ ॥
प्राच्यां तत्रास्ति विजयं, विमानवरमुत्तमम् । दक्षिणस्यां वैजयन्तं, प्रतीच्यां च जयन्तकम् ॥ ६०६ ॥
उत्तरस्यां दिशि भवेद्विमानमपराजितम् । सर्वार्थसिद्धिकृन्मध्ये, सर्वार्थसिद्धिनामकम् ॥ ६०७ ॥
प्रथमप्रतरे प्रोक्ताः, पङ्क्तयो याश्चतुर्दिशम् । द्वाषष्टिकास्ता एकैकहान्याऽत्रैकावशेषिकाः ॥ ६०८ ॥
मध्ये वृत्तं त्रिकोणानि, दिक्ष्वत्र प्रतरे ततः । पङ्क्तित्रिकोणाश्चत्वारः, पञ्च ते सर्वसंख्यया ॥ ६०९ ॥
सर्वेऽप्येवमूर्ध्वलोके, पङ्क्तिवृत्तविमानकाः । द्व्यशीत्याऽभ्यधिकानि स्युः, शतानि पञ्चविंशतिः ॥ ६१० ॥
शतानि साष्टाशीतीनि, षड्विंशतिस्त्रिकोणकाः । षड्विंशतिः शताः पङ्क्तिचतुरस्राश्चतुर्युताः ॥ ६११ ॥
चतुःसप्तत्यभ्यधिकैः, शतैरष्टभिरन्विताः । सहस्राः सप्तोर्ध्वलोके, सर्वे पङ्क्तिविमानकाः ॥ ६१२ ॥
लक्षाश्चतुरशीतिः स्युरेकोननवतिस्तथा । सहस्राण्येकोनपञ्चाशं शतं च प्रकीर्णकाः ॥ ६१३ ॥

सर्वे विमानाश्चतुरशीतिर्लक्षा इहोपरि । सहस्राः सप्तनवतिस्त्रयोविंशतिसंयुताः ॥ ६१४ ॥
व्यासायामपरिक्षेपैर्जम्बूद्वीपेन संमितम् । विमानं सर्वार्थसिद्धमसंख्येयात्मकाः परे ॥ ६१५ ॥
ग्रैवेयकवदत्रापि, देवाः सर्वेऽहमिन्द्रकाः । सर्वे मिथः समैश्वर्यरूपकान्तिसुखश्रियः ॥ ६१६ ॥
येष्वाकाशप्रदेशेषु, शय्यायां प्रथमक्षणे । यथोत्पन्नास्तथोत्तानशया एव भवावधि ॥ ६१७ ॥
सर्वसंसारिजीवेभ्यः, सर्वोत्कृष्टसुखाश्रयाः । लीलयैवामितं कालं, गमयन्ति निमेषवत् ॥ ६१८ ॥

तथाहुर्विशेषावश्यके— "विजयाईसूववाए जत्थोगाढो भवक्खओ जाव । खेत्तेऽवचिट्ठइ तहिं दव्वेसु य देहसयणेसुं" ॥ [श्लो. ७२३]

एकत्रिंशद्वारिधयश्चतुर्षु विजयादिषु । स्थितिर्जघन्योत्कृष्टा तु, त्रयस्त्रिंशत्पयोधयः ॥ ६१९ ॥

इति प्रज्ञापनाभिप्रायः, समवायाङ्गे तु—"विजयवेजयंतजयंतअपराजियाणां भंते ! देवाणं केवइयं कालं ठिई प० ?, गो० ! जह० बत्तीसं साग० उक्को० तेत्तीसं साग०" ।

स्थितिः सर्वार्थसिद्धे तु, स्यादुत्कृष्टैव नाकिनाम् । त्रयस्त्रिंशदम्बुधयो, जघन्या त्वत्र नास्ति सा ॥ ६२० ॥
प्रतिशय्यं विमानेऽस्मिन्नस्ति चन्द्रोदयो महान् । मुक्ताफलमय स्फूर्जत शरच्चंद्रातपोज्जवलः ॥ ६२१ ॥
तत्र मध्ये चतुःषष्टिमणप्रमाणमौक्तिकम् । द्वात्रिंशन्मणमानानि, चत्वारि परितस्त्वदः ॥ ६२२ ॥
अष्टौ तत्परितो मुक्ताः, स्युः षोडशमणैर्मिताः । स्युः षोडशैताः परितो, मुक्ता अष्टमणोन्मिताः ॥ ६२३ ॥
द्वात्रिंशदेताः परितस्ताश्चतुर्मणसंमिताः । ततः परं चतुःषष्टिर्मणद्वयमितास्ततः ॥ ६२४ ॥
अष्टाविंशं शतं मुक्ता, एकैकमणसंमिताः । यथोत्तरमथावेष्ट्य, स्थिताः पङ्क्त्या मनोज्ञया ॥ ६२५ ॥
मौक्तिकानामथैतेषां, मरुत्तरङ्गरङ्गिभैः । परस्परेणास्फलतां, जायते मधुरध्वनिः ॥ ६२६ ॥
सर्वातिशायिमाधुर्यं, तं च श्रोत्रमनोरमम् । चक्रिदेवेन्द्रगन्धर्वादप्यनन्तगुणाधिकम् ॥ ३२७ ॥
ध्वनितं शृण्वतां तेषां, देवानां लीनचेतसाम् । अप्यब्धयस्त्रयस्त्रिंशदतियान्ति निमेषवत् ॥ ६२८ ॥
विजयादिविमानेषु, चतुर्षु नाकिनां वपुः । एकत्रिंशदम्बुनिधिस्थितिकानां करद्वयम् ॥ ६२९ ॥
वपुर्द्वात्रिंशदम्भोधिस्थितीनां तु भवेदिह । एकेनैकादशांशेन, कर एकः समन्वितः ॥ ६३० ॥
एकः करस्त्रयस्त्रिंशदम्भोधिजीविनां तनुः । देवाः सर्वार्थसिद्धे तु, सर्वेऽप्येककरोच्छ्रिताः ॥ ६३१ ॥
विजयादिविमानस्थाः स्वस्थित्यम्बुधिसंख्यया । पक्षैः सहस्रैश्चाब्दानामुच्छ्वसन्त्याहरन्ति च ॥ ६३२ ॥
सर्वार्थे तु त्रयस्त्रिंशन्मितैर्वर्षसहस्रकैः । प्सान्ति सार्द्धषोडशभिर्मासैरेवोच्छ्वसन्ति च ॥ ६३३ ॥
पशुक्रियाभिलाषस्तु, नैतेषां तत्त्वदर्शिनाम् । प्राग्भवाभ्यस्तनवमरसार्द्रीकृतचेतसाम् ॥ ६३४ ॥
अतिप्रतनुकर्माणो, महाभागाः सुरा अमी । इहोत्पन्नाः षष्टभक्तक्षेप्यकर्मावशेषतः ॥ ६३५ ॥

यदाहुः पञ्चमाङ्गे— "अणुत्तरोववाइया णं देवा णं भंते ! केवइएणं कम्मावसेसेणं अणुत्तरोववाइयत्तेणं उववण्णा ?, गो० ! जावतियन्नं छट्ठभत्तिए समणे निग्गंथे कम्मं निज्जरेइ एवतिएणं कम्मावसेसेणं अणुत्तरोववाइयत्ताए उववण्णा" इति ।

शाल्यादिकवलिकानां सप्तानां छेदने भवति यावान् । कालस्तावति मनुजायुष्केऽपर्याप्तवति मृत्वा ॥ ६३६ ॥
मोक्षार्हाध्यवसाया अपि ये कर्मावशेषतो जाताः । लवसप्तमदेवास्ते जयन्ति सर्वार्थसिद्धस्थाः ॥ ६३७ ॥

इति भगवतीशतक १४ उ० ७ ।

आद्यसंहननानाञ्चैषु, स्वाराद्धोज्ज्वलसंयमाः । भव्याः स्वल्पभवा एवायान्ति यान्ति च नृष्वमी ॥ ६३८ ॥
कर्मभूमिसमुत्पन्ना, मानुष्योऽपि शुभाशयाः । सम्यग्दृशः शुक्ललेश्या, जायन्तेऽनुत्तरेष्विह ॥ ६३९ ॥

तथाहुः—'केरिसिया णं भंते ! मणुस्सी उक्कोसकालठिइयं आउयकम्मं बंधति, ? गो० कम्मभूमीया वा' इत्यादि प्रज्ञापना त्रयोविंशतितमे पदे । मानुषी सप्तमनरकयोग्यमायुर्न बध्नाति, अनुत्तरसुरायुस्तु बध्नातीत्येतद्वृत्तौ ।

जीवाः सर्वार्थसिद्धे तूद्भवन्त्येकभवोद्भवाः । च्युत्वा ते भाविनि भवे, सिद्ध्यन्ति नियमादितः ॥ ६४० ॥

उक्तं च—"सव्वट्ठाओ नियमा एगंमि भवंमि सिज्झए जीवो । विजयाइविमाणेहि य संखिज्जभवा उ बोद्धव्वा ॥ चतुर्विंशतिं भवान्नातिक्रामन्तीति तु वृद्धवादः,

तथा—चतुर्ष्वेषु विमानेषु, द्विरुत्पन्ना हि जन्तवः । अनन्तरभवेऽवश्यं, प्रयान्ति परमं पदम् ॥ ६४१ ॥

तथोक्तं जीवाभिगमवृत्तौ—"विजयादिचतुर्षु वारद्वयं सर्वार्थसिद्धमहाविमान एकवारं गमनसंभवः, तत ऊर्द्धं मनुष्यभवासादनेन मुक्तिप्राप्ते" रिति । योगशास्त्रवृत्तौ तु विजयादिषु चतुर्ष्वनुत्तरविमानेषु 'द्विचरमा' इत्युक्तमिति ज्ञेयं, तत्त्वार्थभाष्येऽपि विजयादिष्वनुत्तरेषु विमानेषु देवा द्विचरमा भवन्ति, द्विचरमा इति ततश्च्युताः परं द्विर्जनित्वा सिद्ध्यन्तीति, [अध्याय ४. सूत्र. २७]

एतट्टीकापि—द्विचरमत्वं स्पष्टयति—ततो विजयादिभ्यश्च्युताः परमुत्कर्षेण द्विर्जनित्वा मनुष्येषु सिद्धिमधिगच्छन्ति, विजयादिविमानाच्च्युतो मनुष्यः पुनरपि विजयादिषु देवस्ततश्च्युतो मनुष्यः स सिद्ध्यतीति ।

पञ्चमकर्मग्रन्थे—'तिरिनरयतिजोआणं नरभवजुअस्स चउपल्लतेसट्ठं ॥' [गा. ५६] एतद्गाथासूत्रवृत्त्यनुसारेण तु विजयादिविमानेषु द्विर्गतोऽपि संसारे कतिचिन्भवान् भ्रमति[१] नरकतिर्यग्गतियोग्यमपि कर्म बध्नातीति दृश्यते, तदत्र तत्त्वं केवलिगम्यं ।

सर्वार्थदेवाः संख्येया, असंख्येयाश्चतुर्षु ते । एतेष्वेकक्षणोत्पत्तिच्युतिसंख्याऽच्युतादिवत् ॥ ६४२ ॥
पल्योपमस्यासंख्येयो, भागः परममन्तरम् । सुरोत्पत्तिच्यवनयोर्विजयादिचतुष्टये ॥ ६४३ ॥

१ वारद्वयमिति द्विचरम इति चैकार्थावेव, आनन्तर्येण चेद्विर्जनिर्न स्यात् तदा चतुर्विंशतिं भवान् यावत् संसारः न पस्त इति तदप्यविरुद्धं, कर्मग्रन्थोक्तं तु उद्योतादीनां बन्धान्तरालस्योत्कर्षस्य संभवमपेक्ष्य, न तु तावता विरोधः ।

पल्योपमस्यासंख्येयो, भागः परममन्तरम् । सुरोत्पत्तिच्यवनयोर्विजयादिचतुष्टये ॥ ६४३ ॥
पल्योपमस्यासंख्येयो, भागः परममन्तरम् । सर्वार्थसिद्धे सर्वत्र, जघन्यं समयोऽन्तरम् ॥ ६४४ ॥
जवनालकापराख्यं, कन्याचोलकमुच्छ्रितम् । आकारेणानुकुरुते, एतेषामवधिर्यतः ॥ ६४५ ॥
किञ्चिदूनां लोकनाडीं, पश्यन्त्यवधिचक्षुषा । ऊनत्वं तु स्वविमानध्वजादूर्ध्वमदर्शनात् ॥ ६४६ ॥

ऊक्तं च तत्त्वार्थवृत्तौ—"अनुत्तरविमानपञ्चकवासिनस्तु समस्तां लोकनाडीं पश्यन्ति लोकमध्यवर्त्तिनीं, न पुनर्लोक" मिति ।

अत एवावधिज्ञानाधारपर्यायवत्तया । क्षेत्रस्यावस्थानमुक्तं, त्रयस्त्रिंशतमम्बुधीन् ॥ ६४७ ॥
यदेषामुत्पत्तिदेशावगाढानां भवावधि । अवधेरप्यवगाढक्षेत्रावस्थितिनिश्चयः ॥ ६४८ ॥
तथोक्तं विशेषावश्यके— "खेत्तस्स अवट्ठाणं तेत्तीसं सागरा उ कालेणं । दव्वे भिन्नमुहुत्तो पज्जवलंभे य सत्तट्ठ" ॥ [गाथा - ७१७]

सर्वार्थसिद्धशृङ्गाग्रादूर्गत्वा द्वादशयोजनीम् । जात्यार्जुनस्वर्णमयी, भाति सिद्धिशिलाऽमला ॥ ६४९ ॥
पञ्चचत्वारिंशता सा, मिता योजनलक्षकैः । विष्कम्भादायामतश्च, परितः परिधिः पुनः ॥ ६५० ॥
एका कोटि योजनानां, सहस्रैस्त्रिंशताऽन्विता । द्विचत्वारिंशता लक्षैर्योजनानां द्विशत्यपि ॥ ६५१ ॥
तथा पञ्चाशदेकोना, योजनानां च साधिका । बाहल्यं मध्यभागेऽस्या, योजनान्यष्ट कीर्तितम् ॥ ६५२ ॥
स मध्यभागो विष्कम्भायामाभ्यामष्टयोजनः । ततोऽङ्गुलपृथक्त्वं च, योजने योजने गते ॥ ६५३ ॥
बाहल्यं हीयते तेन, पर्यन्तेष्वखिलेष्वपि । अङ्गुलासंख्यभागाङ्गी, मक्षिकापत्रतस्तनुः ॥ ६५४ ॥
तुषारहारगोक्षीरधाराधवलरोचिषः । नामान्यस्याः प्रशस्याया, द्वादशाहुर्जिनेश्वराः ॥ ६५५ ॥
ईषत्तथेषत्प्राग्भारा तन्वी च तनुतन्विका । सिद्धिः सिद्धालयो मुक्ति र्मुक्तालयोऽपि कथ्यते ॥ ६५६ ॥
लोकाग्रं तत्स्तूपिका च लोकाग्रप्रतिवाहिनि । तथा सर्वप्राणभूतजीवसत्त्वसुखावहा ॥ ६५७ ॥
उत्तानच्छत्रसंकाशा, घृतपूर्णां करोटिकाम् । तादृशां तुलयत्यस्या, लोकान्तो योजने गते ॥ ६५८ ॥
ऊचुर्द्वादशयोजन्याः, केचित्सर्वार्थसिद्धितः । लोकान्तस्तत्र तत्त्वं तु, ज्ञेयं केवलशालिभिः ॥ ६५९ ॥
योजनं चैतदुत्सेधाङ्गुलमानेन निश्चितम् । सिद्धावगाहना यस्मादुत्सेधाङ्गुलसंमिता ॥ ६६० ॥

तथोक्तं—"यच्चेषत्प्राग्भारायाः पृथिव्या लोकान्तस्य चान्तरं तदुत्सेधाङ्गुलनिष्पन्नमित्यनुमीयते, यतस्तस्योपरितनक्रोशस्य षड्भागे सिद्धावगाहना धनुस्त्रिभागयुक्तत्रयस्त्रिंशदधिकशतत्रय-मानाऽभिहिता, सा चोच्छ्रयाश्रयणत एव युज्यत इति भगवतीवृत्तौ ।"

तद्योजनोपरितनक्रोशषष्ठांशगोचरम् । धनुषां सतृतीयांशं, त्रयस्त्रिंशं शतत्रयम् ॥ ६६१ ॥
अभिव्याप्य स्थिताः सिद्धा, अवेदा वेदनोज्झिताः । चिदानन्दमयाः कर्मघर्माभावेन निर्वृताः ॥ ६६२ ॥
शेषं सिद्धस्वरूपं तु, द्रव्यलोके निरूपितम् । तत एव ततो ज्ञेयं, ज्ञप्तिस्त्रीसंगमोत्सुकैः ॥ ६६३ ॥

देशादमुष्मात्परतोऽस्त्यलोकः, स्वकुक्षिकोणाकलितत्रिलोकः ।
मुक्तैकमुक्ताकणकुम्भगर्भोपमः समन्तादपि रिक्त एव ॥ ६६४ ॥
धर्माधर्माद्भिन्नजीवान्यगत्यागत्याद्यैस्तैस्तैः स्वभावैर्विमुक्ते ।
स्याच्चेदस्मिन् ज्ञानचातुर्यमेकं, तद्धत्तेऽसौ शुद्धसिद्धात्मसाम्यम् ॥ ६६५ ॥
विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्ति–षद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे, संपूर्णः खलु सप्तविंशतितमः सर्गो निसर्गोज्ज्वलः ॥ ६६६ ॥

॥ इति महोपाध्यायश्रीविनयविजयगणिविरचिते श्रीलोकप्रकाशे ॥

॥ सप्तविंशतितमः सर्गः समाप्तः ॥

॥ तत्समाप्तौ च समाप्तोऽयं क्षेत्रलोकः ॥ ग्रं. ७२१५ ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

॥ ॐ ह्रीँ अर्हं नमः ॥

॥ ऐं नमः ॥

महामहोपाध्यायश्रीमद्विनयविजयगणिवरविरचितः

श्री लोकप्रकाशः

काललोकः

अथ अष्टाविंशतितमः सर्गः

केवलालोकवत्त्रैकालिकीमुल्लासयन् धियं । श्रीमान् शंखेश्वरः पार्श्वो, वितनोतु सतां श्रियम् ॥ १ ॥
स्वरूपं दिष्टलोकस्य, जिनोद्दिष्टमथ ब्रुवे । गुरुश्रीकीर्त्तिविजयक्रमसेवाप्तधीधनः ॥ २ ॥
लोकानुभावतो ज्योतिश्चक्रं भ्रमति सर्वदा । नृक्षेत्रे तद्गतिभवः, कालो नानाविधः स्मृतः ॥ ३ ॥
तथोक्तं ज्योतिष्करंडके— [श्लोक - ६]
लोगाणुभावजणिअं जोइसचक्कं भणंति अरिहंता । सव्वे कालविसेसा जस्स गइविसेसनिप्फन्ना ॥
अत्राहुः केऽपि जीवादिपर्याया वर्त्तनादयः । काल इत्युच्यते तज्ज्ञैः, पृथग् द्रव्यं तु नास्त्यसौ ॥ ४ ॥
तथाहि—
जीवादीनां वर्त्तना च, परिणामोऽप्यनेकधा । क्रिया परापरत्वं च, स्यात्कालव्यपदेशभाक् ॥ ५ ॥
तत्र च—
द्रव्याणां सादिसान्तादिभेदैः स्थित्यां चतुर्भिदि । यत्केनचित्प्रकारेण, वर्त्तनं वर्त्तना हि सा ॥ ६ ॥
द्रव्याणां या परिणतिः, प्रयोगविस्रसादिजा । नवत्वजीर्णताद्या च, परिणामः स कीर्त्तितः ॥ ७ ॥
भूतत्ववर्त्तमानत्व–भविष्यत्वविशेषणा । यानस्थानादिकाऽर्थानां, या चेष्टा सा क्रियोदिता ॥ ८ ॥
पूर्वभावि परं पश्चाद्भावि चापरमिष्यते । द्रव्यं यदाश्रयादुक्ते, ते परत्वापरत्वके ॥ ९ ॥
एवं च द्रव्यपर्याया, एवामी वर्त्तनादयः । संपन्नाः कालशब्देन, व्यपदेश्या भवन्ति ये ॥ १० ॥
पर्यायाश्च कथंचित्स्युर्द्रव्याभिन्नास्ततश्च ते । द्रव्यनाम्नाऽपि कथ्यन्ते, जातु प्रोक्तं यदागमे ॥ ११ ॥
तद्यथा—'किमिदं भंते ! कालेत्ति पवुच्चति ? गो० ! जीवा चेव अजीवा चेव त्ति'
अत्र द्रव्याभेदवर्त्तिवर्त्तनादिविवक्षया । कालोऽपि वर्त्तनाद्यात्मा, जीवाजीवतयोदितः ॥ १२ ॥
वर्त्तनाद्याश्च पर्याया, एवेति प्राग् विनिश्चितम् । तद्वर्त्तनादिसंपन्नः, कालो द्रव्यं भवेत्कथम् ? ॥ १३ ॥

पर्यायाणां हि द्रव्यत्वेऽनवस्थाऽपि प्रसज्यते । पर्यायरूपस्तत्कालः, पृथग् द्रव्यं न संभवेत् ॥ १४ ॥
इत्थं चैतदुरीकार्यं, वर्त्तनाद्यात्मकोऽन्यथा । कालास्तिकायः स्वीकार्यो, भवेद्द्व्योमेव सर्वगः ॥ १५ ॥
न चार्हदिष्टादिष्टं तत्, सिद्धांते यत्पुनः पुनः । पञ्चास्तिकाया एवोक्ताः, कालो द्रव्यं पृथग् न तत् ॥ १६ ॥
परे त्वाहुः समद्रव्यप्रवर्त्ती वर्त्तनादिकः । पर्यायः कालनामा मा, पृथग् द्रव्यं भवत्वहो ॥ १७ ॥
किंतु योऽर्कादिचाराभिव्यङ्ग्यो नृक्षेत्रमध्यगः । कालो न स्यात्कथं कार्यानुमेयः परमाणुवत् ? ॥ १८ ॥
यच्छुद्धपदवाच्यं तत्, सदित्यनुमितेरपि । षष्ठं द्रव्यं दधत् सिद्धिं, कालाख्यं को निवारयेत् ? ॥ १९ ॥
कालद्रव्ये चासति तद्विशेषाः समयादयः । कथं न स्युर्विशेषा हि, सामान्यानुचराः खलु ॥ २० ॥
समयाद्याश्च कालस्य, विशेषाः सर्वसंमताः । जगत्प्रसिद्धाः संसिद्धाः, सिद्धांतादिप्रमाणतः ॥ २१ ॥
किञ्च—सहैव स्यात्किसलयकलिकाफलसंभवः । एषां नियामके कालरूपे द्रव्येऽसति क्षितौ ॥ २२ ॥
बालो मृदुतनुर्दीप्रदेहश्च तरुणः पुमान् । जीर्णाङ्गः स्थविरश्चेति, विना कालं दशाः कथम् ? ॥ २३ ॥
ऋतूनामपि षण्णां यः, परिणामोऽस्त्यनेकधा । न संभवेत्सोऽपि कालं, विनाऽतिविदितः क्षितौ ॥ २४ ॥
तथाहि—
हिमातिपाताद्धेमन्ते, प्रत्यग्नि शलभा इव । कम्प्रकाया रणद्दन्ताः, पतन्ति मुदिता जनाः ॥ २५ ॥
जनयन्ति जने जाड्यं, तुषाराश्लेषिणोऽनिलाः । परिष्वजन्ति नीरन्ध्रं, युवानः कामिनीर्निशि ॥ २६ ॥
महासरांसि स्त्यायन्ति, दह्यतेऽम्भोजिनीवनम् । उज्जृम्भते नवोद्भिन्नयवादिषु च यौवनम् ॥ २७ ॥
अबहिश्चारिणां रात्रौ, शिशिरेऽसंवृतात्मनाम् । असंयम इवर्षीणां, जनानां स्यादप्रियः शशी ॥ २८ ॥
पूर्णोत्सङ्गाः फलैः पक्वैर्वृत्ताः शिशुकदम्बकैः । बदर्यो मातर इव, दधति द्युतिमद्भुताम् ॥ २९ ॥
कुन्दवल्लयः शुभ्रदीप्रप्रसूनदशनश्रियः । हसन्तीव हिमम्लाननं कमलकाननम् ॥ ३० ॥
उत्फुल्लनानाकुसुमासवपानमदोद्धुराः । भ्राम्यन्ति भ्रमरा भूरिरजोधूसरभूघनाः ॥ ३१ ॥
दत्ताश्रया दत्तभोज्या, माकन्दैरुपकारिभिः । अभ्यस्यन्तीव कामोपनिषदं कोकिलद्विजाः ॥ ३२ ॥
ग्रीष्मे दिनकरः क्रूरैः, करैः शोषयति क्षितिम् । कलौ नृप इवोदेति, तृष्णा लोकेऽधिकाधिका ॥ ३३ ॥
भाग्याढ्यानां धनमिव, वर्द्धतेऽनुदिनं दिनम् । निरुद्यमानां विद्येव, क्षीयते चानिशं निशा ॥ ३४ ॥
चन्द्रचंदननिर्यासवासिताङ्गा विलासिनः । नयन्त्यहान्युपवनेष्वम्बुक्रीडापरायणाः ॥ ३५ ॥
वर्षासु जलमुग्धाराधोरणीधौतधूलयः । कृतस्नाना धराधीशा, इवाभान्ति धराधराः ॥ ३६ ॥
मही भाति महीयोभिः, सर्वतो हरिताङ्कुरैः । रोमाञ्चितेवाम्बुवाहप्राणप्रियसमागमात् ॥ ३७ ॥
रुन्धन्ति सरितो लोकं, मार्गगं कुलटा इव । प्रिया इव प्रियान् गाढमालिङ्गन्ति लतास्तरून् ॥ ३८ ॥
द्योतन्ते विद्युतो मेघा, वर्षन्त्यूर्जितगर्जिताः । उच्चैर्नदन्तो माद्यन्ति, शिखिचातकदर्दुराः ॥ ३९ ॥

उपैति वृद्धिं शरदि, प्रतापः पुष्पदन्तयोः । नृपान्तिकेऽन्यायिवक्त्रमिव शुष्यति कर्हमः ॥ ४० ॥
शालिप्रभृतयो धान्यश्रेणयो नम्रमौलयः । फलोद्रेकेऽपि विनयाद्धत्रयन्ति सतां स्थितिम् ॥ ४१ ॥
क्रीडन्ति फुल्लाम्भोजेषु, सरस्सु स्वच्छवारिषु । राजहंसा राजहंसा, इव दर्पणवेश्मसु ॥ ४२ ॥
शनैः शनैः सञ्चरन्ति, शालिक्षेत्रान्तभूमिषु । प्रसरद्गोपिकागीतदत्तकर्णाः प्रवासिनः ॥ ४३ ॥
उच्चैरुपदिशन्तीव, मञ्चस्थाः क्षेत्ररक्षकाः । परोपकारं धान्येषु, धुतमौलिषु विस्मयात् ॥ ४४ ॥
रक्षितेष्वपि जाग्रद्भिर्दृषद्धत्रयग्रकरैर्नरैः । परक्षेत्रेष्वापतन्ति, पक्षिणः कामुका इव ॥ ४५ ॥
एवं नानाविधो लोके ऋतुभेदोऽपि विश्रुतः । निर्हेतुको भवन् कालं, स्वमाक्षिपति कारणम् ॥ ४६ ॥

तथाहि—

चूताद्याः शेषहेतूनां, सत्त्वेऽपि फलवञ्चिताः । कालद्रव्यमपेक्षन्ते, नानाशक्तिसमन्वितम् ॥ ४७ ॥

किञ्च—

वर्त्तमानातीतभाविव्यपदेशोऽपि दुर्घटः । विना कालं मिथोऽर्थानां, सांकीर्य्यं चापि संभवेत् ॥ ४८ ॥

तथाहि—

वर्त्तमानव्यपदेशमतीतोऽनागतोऽपि वा । भजेन्नियामकाभावे, तत्कालोऽस्ति नियामकः ॥ ४९ ॥
तत्रातीतो द्विधाऽभावविषयप्रतिभेदतः । विनष्टो घट इत्याद्योऽद्राक्षं तमिति चापरः ॥ ५० ॥
भाव्यप्येवं द्विधा तत्रादिम उत्पत्स्यमानकः । घटाद्यर्थो द्वितीयस्तु, गमिष्यन्नक्षगोचरम् ॥ ५१ ॥
किंच–क्षिप्रं चिरं च युगपन्मासवर्षयुगादयः । परुत्परार्यैषमोद्यह्यःश्वःकदाचिदादयः ॥ ५२ ॥
लोके ख्याताः सन्ति शब्दाः, कालद्रव्याभिधायिनः । तेऽपि शुद्धपदत्वात्स्वाभिधेयमनुमान्ति वै ॥ ५३ ॥
कालः षष्ठं पृथग् द्रव्यमागमेऽपि निरूपितम् । कालाभावे च तानि स्युः, सिद्धांतोक्तानि षट् कथम् ?॥ ५४ ॥

तथा चागमः–'कइ णं भंते ! दव्वाए ? गो० ! छ दव्वा पं०, तं०-धम्मत्थिकाए, अधम्मत्थिकाए, आगासत्थिकाए, पुग्गलत्थिकाए, जीवत्थिकाए, अद्धासमए य'

एवं कालः पृथग्द्रव्यं, सिद्धो युक्त्यागमेन च । उपकाराश्च तस्य स्युः, पूर्वोक्ता वर्त्तनादयः ॥ ५५ ॥
वर्त्तनादिस्वरूपं च, सामान्येनोदितं पुरा । अथ किञ्चिद्विशेषेणोच्यते शास्त्रानुसारतः ॥ ५६ ॥

तत्र च—

द्रव्यस्य परमाण्वादेर्या तद्रूपतया स्थितिः । नवजीर्णतया वा सा, वर्त्तना परिकीर्त्तिता ॥ ५७ ॥

इतिमहाभाष्यवृत्त्यभिप्रायः, तथाच तत्पाठः–"अत्रैव तत्परमाण्वादिरूपेण (द्व्यणुकत्र्यणुकादिरूपेण) परमाण्वादिद्रव्याणां (वर्तनं) वर्त्तना इति ४३५ (१८९) तमपत्रे, तथा तत्र "विवक्षितेन नवपुराणादिना तेन तेन रूपेण यत्पदार्थानां वर्त्तनं शश्वद्भवनं सा वर्त्तना"

इत्याद्यपि तत्रैव ८३६ (२७८) पत्रे. तथा तैस्तैर्भावैः स्वतो ह्यर्था वर्त्तन्ते, तत्प्रयोजिका वृत्तिः—कालाश्रया या सा वर्त्तनेत्यभिधीयते इति तत्वार्थवृत्त्याशयः, तथा च तद्वचः—वर्त्तना कालाश्रया वृत्तिरिति, वर्त्तन्तेऽर्थाः स्वयमेव तेषां वर्त्तमानानां (प्रयोजिका) कालाश्रया वृत्तिर्वर्त्त्यते यया सा वर्त्तना इति २४५ (१६८) तमपत्रे. धर्मसंग्रहणीवृत्तेरप्ययमेवाशयः । इति वर्तना ॥

नानाविधा परिणतिर्द्रव्यस्य सत एव या । परिणामः स कुम्भादिर्मृद्द्रव्यादेरिवोदितः ॥ ५८ ॥
यथाङ्कुराद्यवस्थस्य, परिणामो वनस्पतेः । मूलकाण्डादिभावेन, स्वजात्यपरिहारतः ॥ ५९ ॥
यथा वयःपरीणामो, देहद्रव्यस्य चाङ्गिनां । दध्यादिपरिणामो वा द्रव्यस्य पयसो यथा ॥ ६० ॥
हेम्नो वा मौलिमुद्रादिभावैः परिणतिर्यथा । परिणामो विफणत्वोत्फणत्वादिरहेर्यथा ॥ ६१ ॥
द्विधा सादिरनादिश्च, स चाद्योऽभ्रादिगोचरः । धर्माधर्मास्तिकायादिगोचरः स्यात्ततोऽपरः ॥ ६२ ॥
त्रिधा यद्वा परिणामस्तत्राद्यः स्यात्प्रयोगजः । द्वितीयस्तु वैस्रसिकस्तृतीयो मिश्रकः स्मृतः ॥ ६३ ॥
तत्र जीवप्रयत्नोत्थः, परिणामः प्रयोगजः । शरीराहारसंस्थानवर्णगंधरसादिकः ॥ ६४ ॥
केवलोऽजीवद्रव्यस्य, यः स वैस्रसिको भवेत् । परमाण्वभ्रेन्द्रधनुःपरिवेषादिरूपकः ॥ ६५ ॥
प्रयोगसहचरिताचेतनद्रव्यगोचरः । परिणामः स्तम्भकुम्भादिकः स मिश्रको भवेत् ॥ ६६ ॥
अशक्ताः स्वयमुत्पत्तुं, परिणामेन तादृशाः । कुम्भादयः कुलालादिसाचिव्येन भवन्ति हि ॥ ६७ ॥
इति परिणामः ॥

क्रिया देशांतरप्राप्तिरूपातीतादिका तथा । प्रोक्ता भाष्यस्य टीकायां, तत्त्वार्थविवृतौ पुनः ॥ ६८ ॥
करणं स्यात्क्रिया द्रव्यपरिणामात्मिका च सा । कालोऽनुग्राहकस्तस्याः, प्रयोगादेस्त्रिधा च सा ॥ ६९ ॥
तत्र च—

प्रयोगजात्मयोगोत्था, विस्रसाजा त्वजीवजा । मिश्रा पुनस्तदुभयसंयोगजनिता मता ॥ ७० ॥
इति क्रिया ॥

प्रशंसाक्षेत्रकालाख्यभेदतस्त्रिविधं मतं । परत्वमपरत्वं च, तत्राद्यं गुणसंभवम् ॥ ७१ ॥
परः सर्वोत्तमत्वेन, जैनो धर्मः परोऽपरः । क्षेत्रजं तत्तु दूरस्थः, परोऽभ्यर्णगतोऽपरः ॥ ७२ ॥
तथा—अभ्यर्णदेशसंस्थोऽपि, पर एव वयोऽधिकः । वयोलघुर्विप्रकृष्टदेशस्थोऽप्युच्यतेऽपरः ॥ ७३ ॥
दिशः परापरत्वाभ्यां, वैपरीत्यात् स्फुटे तु ये । इमे परापरत्वे स्तः, कालोऽनुग्राहकस्तयोः ॥ ७४ ॥
वर्त्तनाद्यास्त्रयः पूर्वोदितास्त्रिषु तथाऽन्तिमम् । परापरत्वं कालस्य, चत्वारोऽनुग्रहा अमी ॥ ७५ ॥

तथोक्तं तत्त्वार्थभाष्ये—"अथ कालस्योपकारः क इत्यत्रोच्यते-वर्त्तना परिणामः क्रिया परापरत्वे च कालस्येति" । [अध्याय. ५. सूत्र. २२.]

सार्द्धं द्वीपद्वयं वार्द्धियुगं च व्याप्य स स्थितः । त्रिःपञ्चदशभिर्लक्षैर्योजनानां मतस्ततः ॥ ७६ ॥
नन्वेवं वर्त्तनादीनां, लिङ्गनां भावतो यथा । नृक्षेत्रमध्ये कालोऽङ्गीक्रियते श्रुतकोविदैः ॥ ७७ ॥
नृक्षेत्रात्परतोऽप्येष, ऊर्द्ध्वाधोलोकयोरपि । वर्त्तनादिलिङ्गसत्वात्कुतो नाभ्युपगम्यते ? ॥ ७८ ॥
वर्त्तना किल भावानां, वृत्तिः सा तत्र वर्त्तते । आयुः प्राणापानमानं, परापरस्थिती अपि ॥ ७९ ॥
अत्रोच्यते—
वर्त्तते तत्र भावानां, वृत्तिः सा किंतु नेष्यते । काललिङ्गं तदीयाया, अपेक्षाया अभावतः ॥ ८० ॥
उत्पद्यन्ते विलीयन्ते, तिष्ठन्ति स्वयमेव हि । सन्तः पदार्थास्तेषां, चास्तित्वं नान्यव्यपेक्षया ॥ ८१ ॥
प्राणादयोऽपि जायन्ते, तत्र नाद्धाव्यपेक्षया । सजातीयेषु सर्वेषु, युगपत्तदनुद्भवात् ॥ ८२ ॥
कालापेक्षाः पदार्था हि, युगपत्तुल्यजातिषु । संभवन्तीह माकंदादिषु मञ्जरिकादिवत् ॥ ८३ ॥
भवन्ति युगपन्नैव, ताः प्राणादिप्रवृत्तयः । तत्रत्यानां तदेताः स्युः, कालापेक्षा न कर्हिचित् ॥ ८४ ॥
परापरत्वे ये तत्र, कालापेक्षे न ते अपि । स्थित्यपेक्षे किंतु षष्ठिवर्षाद्धर्षशतः परः ॥ ८५ ॥
जातवर्षशताच्चापि, षष्टिवर्षो नरोऽपरः । वत्सराणां शतं षष्टिरित्येषा च स्थितिः खलु ॥ ८६ ॥
स्थितिश्च सर्वभावानां, भवेत्सत्त्वव्यपेक्षया । सत्त्वं चास्तित्वमेव स्यात्तच्च नान्यमपेक्षते ॥ ८७ ॥
एवं च कालापेक्षाया, अभावादेव नोच्यते । तत्रत्यवर्त्तनादीनां, काललिङ्गत्वमुत्तमैः ॥ ८८ ॥
अत्रेदं तत्त्वं प्रतिभासते—
भूपसत्त्वाद्यथेह स्यात्सौस्थ्यादि तदपेक्षितम् । भूपाभावात्सदपि तत्तदपेक्षं न युग्मिषु ॥ ८९ ॥
तथेह कालसत्त्वात्तत्सापेक्षं वर्त्तनादिकम् । कालाभावात्तदपेक्षं, नरक्षेत्राद्बहिर्न तत् ॥ ९० ॥
तद्वर्षादिऋतुद्रुमसुमादिनैयत्यकारणं कालः । तपनादिगतिव्यङ्ग्यः समयादिर्ननु नृलोक एव स्यात् ॥ ९१ ॥
कालशब्दस्य निक्षेपाश्चैकादश निरूपिताः । तन्नाम[१] स्थापना[२] कालौ, द्रव्या[३] द्धा[४] संज्ञकौ च तौ ॥ ९२ ॥
यथायुष्कोपक्रमाख्यौ[५], देश[६] काला[७] भिधौ[८] च तौ । प्रमाण[९] वर्ण[१०] नामानौ, भाव[११] कालश्च ते स्मृताः ॥ ९३ ॥
सचेतनाचेतनयोर्द्रव्ययोर्यद्विधीयते । कालेत्याख्या स्थापना वा, तौ नामस्थापनाभिधौ ॥ ९४ ॥
द्रव्यमेव द्रव्यकालः, सचेतनमचेतनम् । कालोत्थानां वर्त्तनादिपर्यायाणामभेदतः ॥ ९५ ॥
सचित्ताचित्तद्रव्याणां, सादिसान्तादिभेदजा । स्थितिश्चतुर्विधा यद्वा, द्रव्यकालः प्रकीर्त्यते ॥ ९६ ॥
सचेतनस्य द्रव्यस्य, सादिः सान्ता स्थितिर्भवेत् । सुरनारकमर्त्यादिपर्यायाणामपेक्षया ॥ ९७ ॥
सिद्धाः सिद्धत्वमाश्रित्य, साद्यनन्तां स्थितिं श्रिताः । भव्या भव्यत्वमाश्रित्यानादिसान्तां गताः स्थितिम्॥ ९८ ॥
जीवो मोक्षस्य योग्यो हि, भव्य इत्युच्यते श्रुते । मोक्षं प्राप्तस्तु नो भव्यो, नाप्यभव्य इतीर्यते ॥ ९९ ॥

यदुक्तं– 'सिद्धे नो भव्वे नो अभव्वे' इति.

अभव्याश्चाभव्यतयाऽनाद्यननन्तस्थितौ स्थिताः । द्रव्यस्येति सचित्तस्य, स्थितिरुक्ता चतुर्विधा ॥ १०० ॥
द्विप्रदेशादयः स्कन्धाः, स्युः सान्ताः सादयोऽपि च । उत्कर्षतोऽप्यसंख्येयकालस्थितिजुषो हि ते ॥ १०१ ॥
साद्यनन्ताऽनागताद्धातीता सान्ता निरादिका । अनाद्यनन्ताश्चाकाशधर्माधर्मादयो मताः ॥ १०२ ॥
अचेतनस्य द्रव्यस्य, चतुर्द्धेति स्मृता स्थितिः । एवमुक्त्वा द्रव्यकालमद्धाकालमथ ब्रुवे ॥ १०३ ॥
सूर्यादिक्रियया व्यक्तीकृतो नृक्षेत्रगोचरः । गोदोहादिक्रियानिर्व्यपेक्षोऽद्धाकाल उच्यते ॥ १०४ ॥
तथाहि–यावत्क्षेत्रं स्वकिरणैश्चरन्नुद्योतयेद्रविः । दिवसस्तावति क्षेत्रे, परतो रजनी भवेत् ॥ १०५ ॥
एवं सदा प्रवृत्तोऽद्धाकालोऽर्कादिगतिस्फुटः । गोहोहान्नपाचनाद्यामन्यां नापेक्षते क्रियां ॥ १०६ ॥
अद्धाकालस्यैव भेदाः, समयावलिकादयः । अथो यथायुष्ककालस्वरूपं किञ्चिदुच्यते ॥ १०७ ॥
यश्चाद्धाकाल एवासुमतामायुर्विशेषितः । वर्त्तनादिमयः ख्यातः, स यथायुष्कसंज्ञया ॥ १०८ ॥
अयं भावः–
यद्येन तिर्यग्मनुजादिकजीवितमर्जितम् । तस्यानुभवकालो यः, स यथायुष्क उच्यते ॥ १०९ ॥
येनोपक्रम्यते दूरस्थं वस्त्वानीयतेऽन्तिकम् । तैस्तैः क्रियाविशेषैः स, उपक्रम इति स्मृतः ॥ ११० ॥
उपक्रमणमभ्यर्णानयनं वा दवीयसः । उपक्रमस्तत्कालोऽपि, ह्युपचारादुपक्रमः ॥ १११ ॥
सामाचारीयथायुष्कभेदाच्चोपक्रमो द्विधा । सामाचारी तत्र साधुजनाचीर्णा शुभक्रिया ॥ ११२ ॥
तस्या आनयनं प्रौढशास्त्रादुद्धृत्य यत्क्वचित् । आसन्नतायै लघुनि, शास्त्रे स स्यादुपक्रमः ॥ ११३ ॥
अयं भावः–
ज्ञानस्यास्याः प्रौढशास्त्राध्ययनाच्चिरभाविनः । अल्पग्रन्थादाशुकारी, स्यात्सामाचार्युपक्रमः ॥ ११४ ॥
ओघः पदविभागश्च, दशधा चेति स त्रिधा । सामाचारीत्रिधात्वेनोपक्रमोऽप्युदितो बुधैः ॥ ११५ ॥
तत्र च—
ओघात्सामान्यतः साधुसामाचार्या यदीरणम् । ओघसामाचार्यसौ स्यादोघनिर्युक्तिरूपिका ॥ ११६ ॥
भवेत्पदविभागाख्या, सामाचारी महात्मनाम् । छेदग्रन्थसूत्ररूपा, दशधेच्छादिका त्वियम् ॥ ११७ ॥
इच्छामिच्छातहक्कारो, आवस्सिया य निसीहिया । आपुच्छणा य पडिपुच्छा, छंदणा य निमंतणा ॥
उवसंपया य काले सामायारी भवे दसहा । [प्रवचनसारोद्धार श्लो. ७६०, ७६१]
इच्छया कुर्विदमिति, सल्लिकाद्या दिशन्ति यत् । इच्छाकारेण तत्कुर्यादितीच्छाकार उच्यते ॥ ११८ ॥
अनाभोगाज्जिनाद्याज्ञाविरुद्धे कथिते कृते । मिथ्याकारं यदाहुर्ज्ञाः, स मिथ्याकार उच्यते ॥ ११९ ॥
गुर्वाद्युक्तेषु सूत्रार्थादिषु कार्येषु वा बुधाः । तथैवमिति यद्ब्रूयुस्तथाकारः स उच्यते ॥ १२० ॥

योगैरवश्यकर्तव्यैर्निष्पन्नावश्यकी भवेत् । वसत्यादेर्निर्गमे सा, मुनिधुर्यैः प्रयुज्यते ॥ १२१ ॥
अप्रस्तुतनिषेधेन, वृत्ता नैषेधिकीति ताम् । कृतकार्या वसत्यादौ, प्रविशन्तः प्रयुञ्जते ॥ १२२ ॥
आपृच्छनं स्यादापृच्छा, गुरोः कार्ये चिकीर्षिते । प्रतिपृच्छा कार्यकाले, भूयो यत्पृच्छनं गुरोः ॥ १२३ ॥
स्वयं पूर्वं गृहीतेन, गुर्वादेरशनादिना । याऽभ्यर्थना छन्दनाख्या, सामाचारी स्मृताऽऽगमे ॥ १२४ ॥
आनयामि युष्मदर्थमशनाद्यादिशन्तु माम् । गुर्वादीनां तदादानात्प्राग् विज्ञप्तिर्निमंत्रणा ॥ १२५ ॥
उपसंपत् पुनर्गच्छान्तराचार्याद्युपासनम् । ज्ञानाद्यर्थं कियत्कालं, सामाचार्यां दशेत्यमूः ॥ १२६ ॥
तृतीयं नवमे पूर्वे यद्वस्त्वाचारनामकम् । तस्य यद्विंशतितममोघाख्यं प्राभृतं महत् ॥ १२७ ॥
तत उद्धृत्य कारुण्यधनैः स्थविरधीधनैः । ओघनिर्युक्तिरूपाल्पग्रन्थन्यस्ता महार्थभृत् ॥ १२८ ॥
पूर्वादिपाठानर्हाणां, हीनबुद्धिबलायुषाम् । ऐदंयुगीनजीवानामुपकाराय सत्वरम् ॥ १२९ ॥
तदर्थज्ञानतत्सम्यगनुष्ठानार्थमुत्तमैः । आसन्नीकृत्य दत्तौघसामाचारी भवत्यसौ ॥ १३० ॥
एवं पदविभागाख्याप्यात्ता नवमपूर्वतः । उत्तराध्ययनादन्त्या, षड्विंशाच्च समुद्धृता ॥ १३१ ॥
ज्ञानमासां हि पूर्वादिपाठसाध्यं चिराद्भवेत् । तदुद्धारात्तु तूर्णं स्यादित्यसौ तदुपक्रमः ॥ १३२ ॥
अनल्पकालवेद्यस्यायुषः संवर्त्तनेन यत् । अल्पकालोपभोग्यत्वं, भवेत्सोपक्रमायुषाम् ॥ १३३ ॥
यथायुष्कोपक्रमाख्यः, स कालः परिकीर्त्तितः । दूरस्थस्यायुरन्तस्य, समीपानयनात्मकः ॥ १३४ ॥
उपक्रमो भवत्येवं, सर्वेषामपि कर्मणाम् । स्थित्यादिखण्डनद्वारा, प्राप्तानामनिकाचनाम् ॥ १३५ ॥
प्रायोऽनिकाचितानां यत्, किल्विषेतरकर्मणाम् । शुभाशुभपरिणामवशात्स्यादपवर्त्तना ॥ १३६ ॥
निकाचितानामप्येवं, तीव्रेण तपसा भवेत् । स्फूर्जत्शुभपरिणामात्कर्मणामपवर्त्तना ॥ १३७ ॥

तथाहुर्महाभाष्ये– [गाथा - २०४६]

सव्वपगईणमेवं, परिणामवसा उवक्कमो होज्जा । पायमनिकाइयाणं, तवसाओ निकाइयाणंपि ॥

नन्वप्राप्तकालमपि, यद्येवं कर्म भुज्यते । प्रसज्यते तदा नूनं, कृतनाशाकृतागमौ ॥ १३८ ॥
यत्प्रागनल्पस्थितिकं, बद्धं भुक्तं न कर्म तत् । यच्चाल्पस्थितिकं भुक्तं, तद्धद्धं तेन नात्मना ॥ १३९ ॥

अत्रोच्यते–

नोपक्रमेण क्रियते, दीर्घस्थितिककर्मणः । नाशः किंत्वध्यवसायविशेषाद्भुज्यते द्रुतम् ॥ १४० ॥
यथा भूयःकालभोग्यान्, प्रभूतान् धान्यमूढकान् । रुग्णा भस्मकवातेन, नचिरादेव भुञ्जते ॥ १४१ ॥
न चात्र वर्त्तमानानां, धान्यानां विगमो भवेत् । तद्भोगः स्यात्किन्तु तूर्णं, न्यायोऽयं कर्मणामपि ॥ १४२ ॥
चिरेण दह्यते रज्जुर्वह्निना विततता यथा । सैव संक्षिप्य निक्षिप्ता, क्षिप्रं भवति भस्मसात् ॥ १४३ ॥
चिरेण पच्यते वृक्षस्थितमाम्रादिकं फलम् । गर्त्ताक्षेपपलालादियुक्त्या तु क्षिप्रमप्यहो ॥ १४४ ॥

विपाकः कर्मणोऽप्येवं, द्विधा प्रोक्तो जिनागमे । यथास्थित्योपक्रमाद्वा, बद्धं कर्मेह भुज्यते ॥ १४५ ॥
नन्वेवं कर्म यद्बद्धं, तत्सर्वं वेद्यमेव चेत् । उपक्रमेणाल्पकालाद्यथास्थित्यथवा चिरात् ॥ १४६ ॥
तदा प्रसन्नचंद्रादेर्भोगो बद्धस्य कर्मणः । सप्तमावनियोग्यस्य, प्राप्तो दुःखविपाकिनः ॥ १४७ ॥
न चास्य श्रूयते दुःखविपाकः सप्तमक्षितेः । अचिरादेव कैवल्यं, प्राप्तस्य शुभभावतः ॥ १४८ ॥
अत्रोच्यते–यद्बद्धं कर्म तत्सर्वं, प्रदेशपरिभोगतः । अवश्यं भुज्यते जीवै, रसानुभवतः पुनः ॥ १४९ ॥
कर्मानुभूयते किञ्चित्, किञ्चित्तु नानुभूयते । तथाविधपरिणामात्तद्रसस्यापवर्त्तनात् ॥ १५० ॥
ततः प्रसन्नचन्द्राद्यैः, सप्तमावनिकर्मणाम् । प्रदेशा नीरसा भुक्ता, नानुभागस्तदुद्भवः ॥ १५१ ॥
ननु प्रसन्नचन्द्राद्यैर्बद्धं कर्म रसान्वितम् । यद्भुक्तं तन्नीरसं तत्कृतनाशाकृतागमौ ॥ १५२ ॥
अत्रोच्यते–परिणामविशेषेण, यद्येषां क्षीयते रसः । किमनिष्टं तदा कौ वा, कृतनाशाकृतागमौ ? ॥ १५३ ॥
तीव्रातपोपतप्तस्य, यदीक्षोः क्षीयते रसः । अपूर्वस्यागमः कोऽत्र, जायते वद सन्मते ! ॥ १५४ ॥
रसनाशात्कृतनाशो, यः स्यात्स त्विष्ट एव च । तदर्थमेव यतयो, यतन्ते यत्तपोविधौ ॥ १५५ ॥
अवश्यं भुज्यते कर्म, यथा बद्धं तथैव चेत् । तदा तपोविधिः सर्वो, व्यर्थः स्याद्दुरितात्क्षयात् ॥ १५६ ॥
मोक्षप्राप्तिश्च कस्यापि, न स्यादेव यतोऽङ्गिनाम् । ध्रुवं तद्भवसिद्धीनामपि कर्मावशिष्यते ॥ १५७ ॥
सत्तायामन्तरम्भोधिकोटाकोटिस्थिति स्फुटम् । प्रदेशैर्वेद्यते तच्च, ततस्तन्नीरसं मतम् ॥ १५८ ॥
किञ्चासंख्यभवोपात्तं, नानागतिनिबन्धनम् । स्यादेव कर्म सत्तायां, तद्भवेऽप्यङ्ग सिद्धयतः ॥ १५९ ॥
विपाकरूपेणैवास्य, भवत्यनुभवो यदि । तदा तत्र भवे नानाभावानुभवसंभवः ॥ १६० ॥
भवांस्तांस्तान् विपाकेनानुभवेद्यद्यनुक्रमात् । तदा पुनः पुनः कर्म, तत्र तत्रार्जयत्यसौ ॥ १६१ ॥
एवं च कर्मसंतानाविच्छेदान्न भवेच्छिवम् । ततः प्रदेशानुभवः, कर्मणोऽस्तीति युक्तिमत् ॥ १६२ ॥
आह–चेत्कृत्वोपक्रमैरल्पस्थितिकं कर्म वेद्यते । भवान्तरकृतस्यासौ, न भोगस्तर्हि कर्मणः ॥ १६३ ॥
यद्बद्धं बन्धसमये, भोग्यं वर्षशतादिभिः । भुक्तं त्वन्तर्मुहूर्त्तेन, तदेवैतत्कथं नु तत् ॥ १६४ ॥
किंच–अस्तु सोपक्रमं सर्वं, सर्वं वा निरुपक्रमम् । भेदः कुतः कथं नो वा, परावर्त्तोऽनयोर्मिथः ?॥ १६५ ॥
अत्रोच्यते–
बद्धं यद्बन्धसमये, परिणामेन तादृशा । तत्स्यादुपक्रमैः साध्यं, साध्यो रोग इवौषधैः ॥ १६६ ॥
असाध्यरोगवद्यत्तु, परिणामेन तादृशा । बद्धं तदुचितात्कालविपाकादेव नश्यति ॥ १६७ ॥
रोगे ह्यसाध्ये शक्तिर्नौषधादेर्विद्यते यथा । कर्मण्युपक्रमाभावस्तथा स्यान्निरुपक्रमे ॥ १६८ ॥
विचित्राणि कर्मबंधाध्यवसायास्पदानि यत् । वर्त्तन्तेऽसंख्यलोकाभ्रप्रदेशप्रमितानि वै ॥ १६९ ॥
तेषु सोपक्रमकर्मजनकान्येव कानिचित् । कानिचिद्बंधजनकान्यनुपक्रमकर्मणाम् ॥ १७० ॥

यादृशाध्यवसायेन, बद्धं यत्कर्म यादृशम् । तद्भोक्तव्यं तथा नैवं, कृतनाशाकृतागमौ ॥ १७१ ॥
क्षेत्रे तुल्येऽपि गन्तव्ये, बहूनां योजनादिके । गतिपाटवभेदेन, कालभेदो यथेक्ष्यते ॥ १७२ ॥
तुल्येऽपि शास्त्रेऽध्येतव्ये, बहूनां ग्रन्थमानतः । बुद्धिपाटवभेदेन, कालभेदो यथेक्ष्यते ॥ १७३ ॥
तुल्येऽपि रोगे भैषज्यपथ्यादितारतम्यतः । निवृत्तिकालो रोगस्य, बहूनां बहुधा यथा ॥ १७४ ॥
समानस्थितिकेऽनेकैर्बद्धे कर्मणि देहिभिः । परिणामविशेषेण, भोगकालस्तथा पृथक् ॥ १७५ ॥
पिण्डीभूतः पटः क्लिन्नश्चिरकालेन शुष्यति । प्रसारितः स एवाशु, तथा कर्माप्युपक्रमैः ॥ १७६ ॥
विनाऽपवर्त्तनां लक्षादिको राशिर्विभज्यते । चिरेणापवर्त्तितस्तु, क्षिप्रं कर्मापि तत्तथा ॥ १७७ ॥
द्वेधोपक्रमकालोऽयं, सप्रसङ्गः प्ररूपितः । देशकालाभिधं कालमथ ब्रूमो यथागमम् ॥ १७८ ॥
कार्यस्यार्थस्य वान्यस्य, यो यस्यावसरः स्फुटः । स तस्य देशकालः स्याद्, द्विधाप्येष निरूप्यते ॥ १७९ ॥
अन्नपाकक्रियोद्भूतधूमानां प्रशमं पुरे । पानीयहारिणीशून्यं, दृष्ट्वा वाप्यवटादिकम् ॥ १८० ॥
काकांश्चापततो दृष्ट्वा, गृहेषु गृहमेधिनाम् । साधुना लक्ष्यते भिक्षावसरोऽतिसमीपगः ॥ १८१ ॥
तथाहुर्भाष्यकाराः– [विशेषावश्यक श्लो. ७२७]
निद्धूमगं च गामं, महिलासुन्नं च सुणयं (कूवयं) दट्ठुं । नियं च काया ओलेति जाया भिक्खस्स हरहरा ॥
आमोदिमोदकाकीर्णं, शून्यं कान्दविकापणम् । मत्तां गृहाङ्गणे सुप्तां, तथा प्रोषितभर्तृकाम् ॥ १८२ ॥
निर्मक्षिकं मधु स्वच्छं, पश्यतां प्रकटं निधिम् । तत्तत्पदार्थग्रहण, देशकालस्तदर्थिनाम् ॥ १८३ ॥
एवं शुभाशुभे कार्ये, यः प्रस्तावस्तदर्थिनाम् । स सर्वो देशकालः स्याद्वक्तुं शक्यः स्फुटं कियान् ॥ १८४ ॥
यो यस्य मृत्युकालः स्यात्, कालकालः स तस्य यत् । कालं गतो मृत इति, गम्यते लोकरूढितः ॥ १८५ ॥
कृष्णवर्णे च मरणे, स्यात्कालग्रहणेऽपि च । कालशब्दो देशकालः, प्रस्तावे परिभाषितः ॥ १८६ ॥
तथोक्तं–कालेण कओ कालो, अम्हं सज्झायदेसकालंमि । तो तेण हओ कालो, अकालिकाले करंतेणं ॥
[आवश्यकनिर्युक्ति श्लो. ७२९]
अद्धाकालस्यैव भेदः, प्रमाणकाल उच्यते । अहोरात्रादिको वक्ष्यमाणविस्तारवैभवः ॥ १८७ ॥
पञ्चानामथ वर्णानां, मध्ये यः श्यामलद्युतिः । स वर्णकालो विज्ञेयः, सचित्ताचित्तरूपकः ॥ १८८ ॥
भवत्यौदयिकादीनां, या भावानामवस्थितिः । सादिसान्तादिभिर्भङ्गैर्भावकालः स उच्यते ॥ १८९ ॥
अत्र प्रमाणकालोऽस्ति, प्रकृतः स प्रतन्यते । अतीतोऽनागतो वर्त्तमानश्चेति त्रिधा स च ॥ १९० ॥
अवधीकृत्य समयं, वर्त्तमानं विवक्षितम् । भूतः समयराशिर्यः, कालोऽतीतः स उच्यते ॥ १९१ ॥
अवधीकृत्य समयं, वर्त्तमानं विवक्षितं । भावी समयराशिर्यः, कालः स स्यादनागतः ॥ १९२ ॥
वर्त्तमानः पुनर्वर्त्तमानैकसमयात्मकः । असौ नैश्चयिकः सर्वोऽप्यन्यस्तु व्यावहारिकः ॥ १९३ ॥

इति जंबूद्वीपप्रज्ञप्तिवृत्त्याद्यभिप्रायः । योगशास्त्राद्यप्रकाशवृत्तौ तु— लोकाकाशप्रदेशस्था[१], भिन्नाः कालाणवस्तु ये । भावानां परिवर्त्ताय, मुख्यः कालः स उच्यते ॥ ज्योतिःशास्त्रे यस्य मानमुच्यते समयादिकं । स व्यावहारिकः कालः कालवेदिभिरामतः ॥ इत्युक्तमिति ज्ञेयं ।

एतदनुसारेण च समयक्षेत्रबहिरपि कालस्वीकारो मुख्यतया संपन्नः, तत्त्वं पुनः सर्वज्ञवेद्यमिति ।

संख्येयश्चाप्यसंख्येयोऽनन्तश्चेत्यथवा त्रिधा । शीर्षप्रहेलिकान्तः स्यात्तत्राद्यः समयादिकः ॥ १९४ ॥
असंख्येयः पुनः कालः, ख्यातः पल्योपमादिकः । अनन्तः पुद्गलपरावर्त्तादिः परिकीर्त्तितः ॥ १९५ ॥
तत्र कालविशेषो यः, सूक्ष्मत्वाद्योगिनापि नो । विभक्तुं शक्यते सैष, समयः समये श्रुतः ॥ १९६ ॥
जीर्णे पटे भिद्यमाने, तरुणेन बलीयसा । कालेन यावता तन्तुस्त्रुट्यत्येको जरातुरः ॥ १९७ ॥
असंख्येयतमो भागो, यः स्यात्कालस्य तावतः । समये समयः सैष, कथितस्तत्त्ववेदिभिः ॥ १९८ ॥
तस्मिंस्तन्तौ यदेकस्मिन्, पक्ष्माणि स्युरनेकशः । प्रतिपक्ष्म च संघाताः, क्षणाच्छेद्या असंख्यशः ॥ १९९ ॥
तेषां क्रमाच्छेदनेषु, भवन्ति समयाः पृथक् । असंख्यैः समयैस्तत्स्यात्तन्तोरेकस्य भेदनम् ॥ २०० ॥
एवं पत्रशतोद्भेदे, चक्षुरुन्मेष एव च । भाव्याश्चप्पुट्टिकायां चासंख्येयाः समया बुधैः ॥ २०१ ॥
तं स्वरूपेण जानन्तोऽप्यर्हन्तोऽत्यन्तसौक्ष्म्यतः । शृङ्गग्राहिकयान्येभ्यो, निर्देष्टुं शक्नुवन्ति न ॥ २०२ ॥
निर्देशो हि भवेत्तत्तद्वचोव्यापारपूर्वकः । व्यापारो वचसां चैषोऽसंख्येयैः समयैर्भवेत् ॥ २०३ ॥
यावत्समय इत्येषोच्चार्यतेऽक्षरसंततिः । असंख्याः समयास्तावदतिक्रामन्त्यनेकशः ॥ २०४ ॥
जघन्ययुक्तासंख्यातमितैः स्यादावली क्षणैः । संख्येयाभिश्चावलीभिः, प्राणो भवति निश्चितम् ॥ २०५ ॥
नीरोगस्यानुपहतकरणस्य बलीयसः । प्रशस्ते यौवने वर्त्तमानस्याऽव्याकुलस्य च ॥ २०६ ॥
अप्राप्तस्याध्वनः खेदमाश्रितस्य सुखासनम् । स्याद्यदुच्छ्वासनिःश्वासमानं प्राणः स कीर्त्तितः ॥ २०७ ॥
तत्र च—उच्छ्वास ऊर्द्ध्वगमनस्वभावः परिकीर्त्तितः । अधोगमनशीलश्च, निःश्वास इति कीर्त्तितः ॥ २०८ ॥
संख्येयावलिकामानौ, प्रत्येकं तावुभावपि । द्वाभ्यां समुदिताभ्यां स्यात्कालः प्राण इति श्रुतः ॥ २०९ ॥
रोगार्त्तादेश्च निःश्वासोच्छ्वासावनियताविति । उक्तं पुंसोऽरोगतादिविशेषणकदम्बकम् ॥ २१० ॥
भवन्ति क्षुल्लकभवा, एकप्राणे यथोदिते । सातिरेकाः सप्तदश, श्रूयतां तत्र भावना ॥ २११ ॥
मुहूर्त्ते क्षुल्लकभवा, एकस्मिन् परिकीर्त्तिताः । पञ्चषष्टिः सहस्राणि, षट्त्रिंशा पञ्चशत्यपि ॥ २१२ ॥
अत्र कः प्रत्यय इति, यदि शुश्रूषति भवान् । तदा तदपि निश्चित्य, श्रूयतां प्रतिपाद्यते ॥ २१३ ॥
एका कोटी सप्तषष्टिर्लक्षाण्यथ सहस्रकाः । स्युः सप्तसप्ततिर्युक्ता, द्विशत्या षोडशाढ्यया ॥ २१४ ॥

---

१ दिगम्बरानुवादोऽयं, यद्वा अणवः अंशाः, समयश्चांशरुप एव, तेन च प्रतिपर्यायं वर्त्तनभेदेन समयभेदः, लोकशब्देन वा नृलोकोऽत्र ग्राह्यः, तेन समग्रनृलोकव्यापिता तस्योक्ता स्यात् ।

एता मुहूर्त्त एकस्मिन्नुक्ता आवलिका जिनैः । एकक्षुल्लभवे चैताः, षट्पञ्चाशा शतद्वयी ॥ २१५ ॥
क्षुल्लभवावलिकाभिर्मुहूर्त्तावलिका यदि । विभज्यन्ते तदा लभ्या, मौहूर्त्ताः क्षुल्लका भवाः ॥ २१६ ॥
अथ प्रकृतं–
प्राणाश्चैकमुहूर्त्ते स्युः, सप्तत्रिंशच्छतानि वै । त्रिसप्तत्या संयुतानि, राशिरेष विभाजकः ॥ २१७ ॥
मौहूर्त्तक्षुल्लकभवराशिरेतेन भज्यते । तदाप्यन्ते सप्तदश, प्राणस्य क्षुल्लका भवाः ॥ २१८ ॥
त्रयोदशशताः पञ्चनवत्या च समन्विताः । अंशा उपरि शिष्यन्ते, भवस्याष्टादशस्य वै ॥ २१९ ॥
अष्टसप्ततिसंयुक्ताश्चेत्त्रयोविंशतिः शताः । क्षिप्यन्तेऽशा एषु पूर्णाः, स्यात्तदाष्टादशो भवः ॥ २२० ॥
अथो कियत्य आवल्यः, स्युस्त्रयोदशभिः शतैः । भागैः पञ्चनवत्याढ्यैः, शेषैस्तदपि कथ्यते ॥ २२१ ॥
शतास्त्रयोदशांशानां, ये पञ्चनवतिस्पृशः । षट्पञ्चाशद् द्विशत्या ते, हन्तव्याः कर्त्तुमावलीः ॥ २२२ ॥
शेषाङ्काः क्षुल्लकभवसत्का एते हि सन्त्यतः । क्षुल्लभवावलिकाभिर्भवन्त्यावलयो हताः ॥ २२३ ॥
जाताश्चावलिकास्तेषां, घाते लक्षत्रयं तथा । सप्तपञ्चाशत्सहस्राः, शतं विंशतिसंयुतम् ॥ २२४ ॥
त्रिसप्ततिसमायुक्तसप्तत्रिंशच्छतात्मना । प्रागुक्तभाजकेनास्य, राशेर्विभजने सति ॥ २२५ ॥
चतुर्नवतिरावल्यो, लभ्यतेऽशाः पुनः स्थिताः । चतुर्विंशतिरेवाष्टपञ्चाशदधिकाः शताः ॥ २२६ ॥
एवं च क्षुल्लकभवाः, प्राणे सप्तदशैकके । चतुर्नवतिरावल्य, आवल्या अंशकाः पुनः ॥ २२७ ॥
त्रिसप्तत्या युतैः सप्तत्रिंशता विकलैः शतैः । छिन्नाया अष्टपञ्चाशाः, स्युश्चतुर्विंशतिः शताः ॥ २२८ ॥
इति क्षुल्लकभवप्रकरणम् । क्षुल्लकभवप्रयोजनं चैवं—
आयुःक्षुल्लभवमितमौदारिकवपुर्भृताम् । जघन्यतो विनिर्दिष्टं, पञ्चमाङ्गे जिनेश्वरैः ॥ २२९ ॥

कर्मप्रकृत्यादिष्वपि औदारिकशरीराणां तिर्यग्मनुष्याणामायुषो जघन्यस्थितिः क्षुल्लकभवग्रहणरूपा प्रतिपादिता, यत्पुनरावश्यकटीकायां क्षुल्लकभवग्रहणं वनस्पतिष्वेव प्राप्यते इत्युक्तं तन्मतान्तरमित्यवसीयते, इति कर्मग्रन्थवृत्तौ[१] ।

एकप्राणे चावलीनां, षट्चत्वारिंशदन्विताः । शताः प्रोक्ताश्चतुश्चत्वारिंशदंशाश्च पूर्ववत् ॥ २३० ॥
तच्चैवं—
एकक्षुल्लभवसत्कावलीभिः परिताडयेत् । प्राणक्षुल्लभवांस्तेषु, शेषा आवलिकाः क्षिपेत् ॥ २३१ ॥
एवं चासंख्यसमयैरावली ताभिस्त्र यत् । संख्येयाभिः प्राण उक्तस्तत्सर्वं विशदीकृतम् ॥ २३२ ॥
नन्वावलिकादीनां यदसंख्यक्षणरूपता । प्रोक्ता तत्प्रोच्छलद्भेकैर्गोकलिञ्जस्य पूरणम् ॥ २३३ ॥
यतः पूर्वस्य सद्भावेनोद्भवेदुत्तरः क्षणः । नश्यत्यवश्यमाद्यश्च, द्वितीये जनिमीयुषि ॥ २३४ ॥

१ आवश्यके कर्मणामुत्कृष्टमध्यमजघन्यस्थितिषु संबन्धे विचार्यमाणे तत्रैतन्नियमादेतदुक्तं, यद्वा तस्यापि लघुतमो भेदस्तत्रैव स्यादिति । उपलक्षणं वा तत् ।

समुच्चयादिको धर्मः, पुद्गलानां[२] हि संभवेत् । विमात्रस्निग्धरूक्षाणां, कालस्य तु न जातुचित् ॥ २३५ ॥
अत्रोच्यते–प्ररूपयितुकामेन, कालमावलिकादिकं । प्रज्ञापकेन यावन्तः, क्षणा धीगोचरीकृताः ॥ २३६ ॥
विनष्टा अपि तावन्तः, समुच्चिततयाखिलाः । उपचर्यन्त इत्येवमावल्यादिनिरुपणा ॥ २३७ ॥
अत एवोपचरितः, सर्वोऽप्यावलिकादिकः । कालो न वास्तवः किंतु, समयः खलु वास्तवः ॥ २३८ ॥
प्राणैः स्यात्सप्तभिः स्तोकः, स्तोकैश्च सप्तभिर्लवः । सार्द्धैरष्टात्रिंशता च, लवैर्भवति नालिका ॥ २३९ ॥
भङ्ग्यन्तरेणाथ मानं, नाडिकाया निरूप्यते । श्रूयतां तत्सावधानैरुक्तं ज्योतिष्करण्डके ॥ २४० ॥
नालिका नाम घटिका, कार्या लोहमयी च सा । दाडिमीकुसुमाकारा, सत्तला वर्त्तुलाकृतिः ॥ २४१ ॥
केशास्त्रिवर्षजातायाः, करिण्याः पुच्छमूलजाः । ऋजुकृताः षण्णवतिर्मीलिताश्च परस्परम् ॥ २४२ ॥
विशन्ति यादृशे छिद्रे, तिष्ठन्ति च निरन्तराः । छिद्रं कार्यं तादृगस्या, नालिकाया अधस्तले ॥ २४३ ॥
यद्वा द्विवर्षजातायाः, करिण्याः पुच्छमूलजाः । वालाः षण्णवतिः प्राप्ता, द्वैगुण्यं मान्ति यादृशे ॥ २४४ ॥
यद्वा–चतुःस्वर्णमाषजाता, शलाका चतुरङ्गुला । यादृशे विशति छिद्रे, कर्त्तव्यं तादृशं तकत् ॥ २४५ ॥
अथैतस्यां जलं धार्यं, तौल्यमेयप्रमाणतः । ततः प्रसङ्गतो ब्रूमः, स्वरूपं तौल्यमेययोः ॥ २४६ ॥
तृणस्य मधुराख्यस्य, चतुर्भिस्तण्डुलैर्भवेत् । तौल्यतः सर्षपः श्वेतस्तैश्च षोडशभिः समम् ॥ २४७ ॥
धान्यमाषफलं ताभ्यां, द्वाभ्यां गुञ्जाफलं भवेत् । द्वाभ्यां गुञ्जाभ्यां च, कर्षमाषः षोडशभिश्च तैः ॥ २४८ ॥
धरणापरपर्यायं, मानं गद्याणकाभिधम् । गद्याणकाभ्यां सार्द्धाभ्यां, कर्षः सुवर्णसंज्ञकः ॥ २४९ ॥
चतुःकर्षं पलं सार्द्धैः, प्रस्थो द्वादशभिश्च तैः । तुला पलशतेनासां, विंशत्या भार ईरितः ॥ २५० ॥

इति ज्योतिष्करण्डवृत्त्यभिप्रायः, लोके तु–तुल्या यवाभ्यां कथितात्र गुञ्जा, वल्लस्त्रिगुञ्जो धरणं च तेऽष्टौ । गद्याणकस्तद्द्वयमिंद्रतुल्यैर्वल्लैस्तथैको घटकः प्रदिष्टः । दशार्द्धगुञ्जं प्रवदन्ति माषं, माषाद्वयैः षोडशभिश्च कर्षम् । कर्षैश्चतुर्भिश्च पलं तुलाज्ञाः, कर्षं सुवर्णस्य सुवर्णसंज्ञम् । पादोनगद्याणकतुल्यटङ्कै–र्द्विसप्तसंख्यैः कथितोऽत्रसेरः । मणाभिधानः खयुगैश्च सेरैर्धान्यादितौल्येषु तुरुष्कसंज्ञा ॥ इति लीलावत्यां ॥ [श्लोक - ३ - ४]

तौल्यप्रमाणमित्युक्तं, पूर्वाचार्यप्रदर्शितम् । अथ स्वरूपं मानं च, तुलायाः किञ्चिदुच्यते ॥ २५१ ॥
पञ्चत्रिंशल्लोहपलमयी वृत्ता घना भृशम् । द्वासप्ततिं चाङ्गुलानि, दीर्घा लोहतुला भवेत् ॥ २५२ ॥
तस्याः पञ्चपलमितं, धरणं रचयेद्बुधः । येन धृत्वा तौल्यते तद्धरणं परिकीर्त्तितम् ॥ २५३ ॥
तस्यां चाथ धरणके, योजिते सति सा तुला । ध्रियमाणा यत्र देशे, समा स्यात्पार्श्वयोर्द्वयोः ॥ २५४ ॥
तत्र प्रदेशे समताज्ञानाय परिकल्पयेत् । रेखामेकां ततश्चान्यां, रेखाणां पञ्चविंशतिं ॥ २५५ ॥

---

२ उपलक्षणं, तेन जीवप्रदेशादीनां समुच्चयेऽपि न क्षतिः । तत्त्वतस्तु एककालवर्त्तित्वे सति परस्परं संबंधभाक्त्वं, तच्च न काले ।

तत्र स्यात्प्रथमा रेखा, कर्षार्द्धस्यैव सूचिका । द्वितीयैकस्य कर्षस्य, तृतीया कर्षयोर्द्वयोः ॥ २५६ ॥
त्रिकर्षसूचिका तुर्या, स्याच्चतुःकर्षसूचिका । पञ्चम्यथ नव रेखाः, स्युरेकैकपलाधिकाः ॥ २५७ ॥
यथा तत्र भवेद्रेखा, षष्ठी द्विपलसूचिका । एवं यावद्दशपलसूचिका स्याच्चतुर्दशी ॥ २५८ ॥
ततश्च द्वादशपलसूचिका पञ्चदश्यसौ । षोडशी च पञ्चदशपलाभिव्यञ्जिका स्मृता ॥ २५९ ॥
ततः सप्तदशी रेखा, पलविंशतिसूचिका । अत ऊर्द्ध्वं च दशकवृद्धा अष्टाप्यमूः स्मृताः ॥ २६० ॥
अष्टादशी यथा रेखा, स्यात्त्रिंशत्पलसूचिका । क्रमादेवं शतपलसूचिका कीर्त्तितान्तिमा ॥ २६१ ॥
पञ्चपञ्चदशत्रिंशत्पञ्चाशत्पलसूचिका । नवमी षोडशी चाष्टादशी च पञ्चविंशिका ॥ २६२ ॥
एताश्चतस्रो रेखाः स्युः, फुल्लफुल्लडिकायुताः । स्युः शेषा ऋजवः सर्वा, एकविंशतिसंमिताः ॥ २६३ ॥
तुलास्वरूपमित्येवं, यथागममुदीरितम् । प्रमाणमथ मेयस्य, यथागममुदीर्यते ॥ २६४ ॥
देशेषु मगधाख्येषु प्रसिद्धं कुडवाभिधम् । मानं स्यात्तौल्यचिंतायां सकर्षार्द्धं पलत्रयम् ॥ २६५ ॥
चतुर्भिः कुडवैरेकः, प्रस्थो मागधिको भवेत् । सार्द्धानि द्वादश पलान्येष तौल्यप्रमाणतः ॥ २६६ ॥
प्रस्थैश्चतुर्भिरेकः स्यादाढकः प्रथितो जने । पञ्चाशत्पलमानोऽयं, ज्ञेयस्तौल्यविवक्षया ॥ २६७ ॥
चतुर्भिराढकैर्द्रोणो, जने सोऽप्यतिविश्रुतः । पलानां द्वे शते ख्यातः, स च तौल्यप्रमाणतः ॥ २६८ ॥
खारी षोडशभिर्द्रोणैः सा स्यात्तौल्यप्रमाणतः । द्वात्रिंशता पलशतैः, संमिता लोकसंमता ॥ २६९ ॥
वाहः स्याद्विंशतिः खार्यः, स भवेत्तौल्यमानतः । चतुःषष्टिः सहस्राणि, पलानां तुलया धृतः ॥ २७० ॥
अथ प्रकृतं–
कालेन यावता तस्यां, नालिकायां विशेज्जलम् । आढकौ द्वौ सुरन्ध्रेण, तावान् कालो हि नालिका ॥ २७१ ॥
भवेत्पलशतं चैतत्तुलया तुलितं जलं । तच्च स्वभावतः स्वच्छःमेष्टव्यं शारदादिकम् ॥ २७२ ॥
देवः श्रीसर्वज्ञो विश्वश्रीशः सिद्धिस्त्रीकान्तः, कामद्रुद्रोहाग्निर्मायादोषाभास्वान्नीरागः ।
चन्द्रश्वेतश्लोकः स्याद्वादारामोदो लोकार्च्यो, वान्तापायः शान्तो लोकेभ्योऽसंख्यं सौख्यं देयात् ॥ २७३ ॥
अद्भुतमन्थरमध्यमगत्या पठनेऽस्य भवति वृत्तस्य । कामक्रीडाछन्दसि षष्टया गुर्वक्षरैः पलं लोके ॥ २७४ ॥

सूक्ष्मेक्षिकार्थिनां चैवं वाच्यं—संगीतशास्त्रप्रसिद्धस्य पञ्चमात्रिकतालस्याविच्छेदेन चतुर्विंशतिवारान् हस्तमुखाभ्यामुद्घट्टने सर्वथाप्यविसंवादि जलपलमेकं स्यादिति लौकिकज्योतिः शास्त्रानुसारेण पलमानं, एभिश्च षष्ट्या पलैर्घटिकापरपर्याया नाडिकेति ।

नाडिकाभ्यां भवेद् द्वाभ्यां, मुहूर्त्तस्तौल्यतः स च । पलानां द्वे शते मानाच्चत्वारो नूनमाढकाः ॥ २७५ ॥
अहोरात्रो मुहूर्त्तैः स्यात्त्रिंशता षष्टिनालिकः । स तौल्यतस्त्रयो भाराः, षट्सहस्राः पलानि वा ॥ २७६ ॥
मेयप्रमाणचिंतायां, सविंशं शतमाढकाः । पक्षः पुनरहोरात्रैः, स्यात्पञ्चदशभिर्ध्रुवं ॥ २७७ ॥

स तौल्यतः पञ्चचत्वारिंशद्भारात्मको भवेत् । आढकानां शतान्यष्टादश मेयप्रमाणतः ॥ २७८ ॥
तौल्यतो नवतिर्भारा, मासः पक्षद्वयात्मकः । षट्त्रिंशदाढकशतान्येष मेयप्रमाणतः ॥ २७९ ॥
मासैर्द्वादशभिश्चैकः, कर्मसंवत्सरो भवेत् । शतानि त्रीणि षष्ट्याढ्यान्यत्र रात्रिन्दिवानि च ॥ २८० ॥
तौल्ये सहस्रं साशीतिर्भाराणां स्यात्स मानतः । त्रिचत्वारिंशत्सहस्राण्याढकानां द्विशत्यपि ॥ २८१ ॥
ऋतुसंवत्सरोऽप्येष, ऋतुषट्कात्मको भवेत् । ऋतवो हि वसंताद्याः, पृथग्मासद्वयात्मकाः ॥ २८२ ॥
किञ्च संवत्सराः पञ्चविधाः प्रोक्ता जिनेश्वरैः । सूर्यर्त्तुचन्द्रनक्षत्राह्वयास्तथाऽभिवर्द्धितः ॥ २८३ ॥
तत्र च–द्विमण्डलालीचारेण, मार्त्तण्डेनायनद्वये । परिपूर्णे कृते पूर्णः, सूर्यसंवत्सरो भवेत् ॥ २८४ ॥
सत्र्यशीतौ मण्डलानां, शते चारो भवेद्रवेः । एकस्मिन्नयने तस्मात्सत्र्यशीतिशतं दिनाः ॥ २८५ ॥
षट्षष्ट्याऽभ्यधिका चैवमहोरात्रशतत्रयी । सूर्यसंवत्सरे दृष्टा, विशिष्टज्ञानदर्शनैः ॥ २८६ ॥
सर्वे कालविशेषा ये, ख्याता वर्षशतादयः । पूर्वाङ्गपूर्वप्रमुखाः, पल्यवाल्द्धर्यादयोऽपि च ॥ २८७ ॥
कर्मणां स्थितयः सर्वा, आयूंष्यखिलदेहिनाम् । सूर्यवर्षप्रमाणेन, ज्ञेयान्येतानि धीधनैः ॥ २८८ ॥
नन्वत्र वक्ष्यते वर्षैर्युगं चन्द्राभिवर्द्धितैः । युगाधीनं चान्यकालमानं वर्षशतादिकम् ॥ २८९ ॥
कथं तदिह निर्दिष्टाः, सर्वे वर्षशतादयः । कालाः सूर्याब्दमानेन, तत्राकर्णयतोत्तरम् ॥ २९० ॥
युगं यदुच्यते तत्स्याच्चांद्रैस्संवत्सरैस्त्रिभिः । द्वाभ्यां चाभिवर्द्धिताभ्यामिति तत्पञ्चवार्षिकम् ॥ २९१ ॥
सूर्यवर्षप्रमाणेन, तदेव यदि चिन्त्यते । तदापि तुल्यमेव स्यात्पञ्चवर्षात्मकं युगम् ॥ २९२ ॥
तथाहि–सूर्याब्दस्य सषट्षष्टिरहोरात्रशतत्रयी । पञ्चघ्नाष्टादशशतास्त्रिंशाः स्युर्युगवासराः ॥ २९३ ॥
इयन्त एव द्वाषष्टिचन्द्रमासात्मके युगे । वासराः स्युस्ततो नार्थभेदः कोऽप्यत्र वास्तवः ॥ २९४ ॥
ततो युगैर्मीयते यत्संवत्सरशतादिकम् । तत्सूर्यवर्षमानेनेत्यादि युक्तं यथोदितम् ॥ २९५ ॥
स्यात्पूर्णिमापरावर्त्तैरब्दं द्वादशभिर्विधोः । चतुःपञ्चाशदधिकमहोरात्रशतत्रयम् ॥ २९६ ॥
अहोरात्रस्य चैकस्य, द्वादशांशा द्विषष्टिजाः । चन्द्रसंवत्सरे मानमित्युक्तं सर्वदर्शिभिः ॥ २९७ ॥
नक्षत्रैः सप्तविंशत्या, यः साकल्येन शीतगोः । योगः स द्वादशगुण, ऋक्षोब्दं मानमस्य च ॥ २९८ ॥
सप्तविंशतिसंयुक्तमहोरात्रशतत्रयम् । अहोरात्रस्यैकपञ्चाशच्चांशाः सप्तषष्टिजाः ॥ २९९ ॥
अभिवर्द्धितमब्द च, त्रयोदशभिरैन्दवैः । मासैर्भवेदस्य मानमेवमुक्तं महर्षिभिः ॥ ३०० ॥
युक्तं त्र्यशीत्याहोरात्रैरहोरात्रशतत्रयम् । चतुश्चत्वारिंशदहोरात्रांशाश्च द्विषष्टिजाः ॥ ३०१ ॥
अथ क्रमेण पञ्चानां, मासानां मानमुच्यते । सूर्यर्त्तुचन्द्रनक्षत्राभिवर्द्धितक संज्ञिनाम् ॥ ३०२ ॥
स्वस्वसंवत्सराणां हि, भागे द्वादशभिर्हृते । स्वीयस्वीयमासमानं, जायते तदिदं यथा ॥ ३०३ ॥
साद्धस्त्रिंशदहोरात्रा, मासमानं भवेद्रवेः । ऋतुमासः पुनस्त्रिंशदहोरात्रात्मकः स्फुटः ॥ ३०४ ॥

एकोनत्रिंशता चाहोरात्रैर्मासोऽमृतद्युतेः । द्विषष्टिजैरहोरात्रभागैर्द्वात्रिंशताऽधिकैः ॥ ३०५ ॥
नक्षत्रमासोऽहोरात्राः, सप्तविंशतिरन्विताः । अहोरात्रलवैरेकविंशत्या सप्तषष्टिजैः ॥ ३०६ ॥
एकत्रिंशदहोरात्राश्चैकविंशं शतं लवाः । चतुर्विंशतिविच्छिन्नाहोरात्रस्याभिवर्द्धिते ॥ ३०७ ॥
एषामुपपत्तिस्त्वेवं--
भरणीशततारार्द्राश्लेषास्वातिमहेन्द्रभम् । एतान्यपार्द्धक्षेत्राणि, नक्षत्राणि जगुर्जिनाः ॥ ३०८ ॥
पुनर्वसू विशाखा च, रोहिणी चोत्तरात्रयम् । सार्द्धक्षेत्राण्यमून्याहुर्नक्षत्राणि जिनेश्वराः ॥ ३०९ ॥
भानि पञ्चदशान्यानि, तुल्यक्षेत्राण्यथाभिजित् । एभ्यो विसदृशं भागास्त्रिंशदाढ्यास्य षट्शती ॥ ३१० ॥
अर्द्धक्षेत्राणां च भानां, क्षेत्रविष्कम्भ ईरितः । अंशाः सहस्रं पञ्चाढ्यं, प्रत्येकं तत्त्ववेदिभिः ॥ ३११ ॥
सार्द्धक्षेत्राणां सहस्रास्त्रयः पञ्चदशाधिकाः । तुल्यक्षेत्राणां च भागा, द्वे सहस्रे दशाधिके ॥ ३१२ ॥
क्षेत्रविष्कम्भ इत्येषां, भानां संकलितोऽखिलः । चतुष्पञ्चाशदंशानां, सहस्राश्च शता नव ॥ ३१३ ॥
सप्तषष्टिं चैषु भागान्, मुहूर्त्तेन शशी व्रजेत् । अहोरात्रेण चैकेन, द्वे सहस्रे दशाधिके ॥ ३१४ ॥
सप्तषष्ट्या ततः स्वस्वभागराशौ हृते भवेत् । मुहूर्त्तमानमृक्षाणां, तच्चैवं स्पष्टमुच्यते ॥ ३१५ ॥
चन्द्रस्याभिजिता योगे, मुहूर्त्ता नव कीर्त्तिताः । सप्तषष्टिभुर्वोऽशाश्च, मौहूर्त्ताः सप्तविंशतिः ॥ ३१६ ॥
तुल्यक्षेत्रेषु च त्रिंशन्मुहूर्त्ता भेषु कीर्त्तिताः । पञ्चचत्वारिंशदेते, सार्धक्षेत्रेषु भेषु च ॥ ३१७ ॥
एकाहोरात्रभोक्तव्यऋक्षक्षेत्रांशराशिना । सर्वर्क्षांशराशिभागे, मासः पूर्यत शीतगोः ॥ ३१८ ॥
तथाहि--
चतुःपञ्चाशत्सहस्राः, शतैर्नवभिरन्विताः । भागहारेण भक्तव्या, द्विसहस्र्या दशाढ्यया ॥ ३१९ ॥
सप्तविंशतिराप्यंतेऽहोरात्रास्त्रिंशता पुनः । शेषभाज्यभाजकयो, राश्योः कार्याऽपवर्त्तना ॥ ३२० ॥
सप्तषष्टिभवा भागास्ततोऽमी एकविंशतिः । अहोरात्रस्य संपन्नास्तेऽधिकाः सप्तविंशतौ ॥ ३२१ ॥
एवं नक्षत्रमासस्योपपत्तिरिह वर्णिता । चन्द्रमासस्योपपत्तिमथ वक्ष्ये यथागमम् ॥ ३२२ ॥
त्रिंशता तिथिभिः प्रोक्तश्चन्द्रमासो जिनेश्वरैः । भवंति तिथयश्चेन्दोः, कलावृद्धिक्षयोद्भवाः ॥ ३२३ ॥
कलाः कुर्यात् षोडशेदोस्तत्र चैका कला भवेत् । द्वाषष्टिभागीकृतेन्दुविभागद्वितयात्मिका ॥ ३२४ ॥
अन्याः पुनस्ता द्वाषष्टिभागीकृतसितत्विषः । भागचतुष्टयरूपाः, स्युः पञ्चदशसंमिताः ॥ ३२५ ॥
तत्राद्यांशद्वयरूपा, सदैव स्यादनावृता । आव्रियन्ते च मुच्यन्ते, राहुणान्याः कला मुहुः ॥ ३२६ ॥
कालश्चैककलायाः स्यात्पिधाने वा प्रकाशने । एकषष्टिरहोरात्रस्यांशा द्वाषष्टिकल्पिताः ॥ ३२७ ॥
पिधीयमानचंद्रांशास्तिथयः कृष्णपक्षजाः । प्रकाशमानचंद्रांशास्तिथयः शुक्लपक्षजाः ॥ ३२८ ॥
यथोक्तस्तिथिकालोऽसौ, त्रिंशता गुणितो भवेत् । अष्टादशशतास्त्रिंशा, द्वाषष्टिप्रभवा लवाः ॥ ३२९ ॥

द्वाषष्ट्यैषां हृते भागे, विधुमासो यथोदितः । एकन्यूनत्रिंशदहोरात्रा द्वात्रिंशदंशकाः ॥ ३३० ॥
कृष्णपक्षप्रतिपदः, प्रारभ्य पूर्णिमावधि । ऋतुमासो भवेत्त्रिंशदहोरात्रात्मकः स्फुटम् ॥ ३३१ ॥
सूर्यमासस्योपपत्तिरथ किञ्चिन्निगद्यते । भान्यष्टाविंशतिर्मेषादयोद्वादश राशयः ॥ ३३२ ॥
चतुष्पञ्चाशत्सहस्रान्, शतैर्नवभिरन्वितान् । प्राग्निरूपितनक्षत्रभागान् द्वादशभिर्भजेत् ॥ ३३३ ॥
सपञ्चसप्ततिपञ्चचत्वारिंशच्छती ततः । प्राप्ता नक्षत्रभागानां, राशिमानं तदेव हि ॥ ३३४ ॥
सार्द्धत्रिंशदहोरात्रभोग्योऽयं राशिरिष्यते । अयमेवार्कमासः, स्याद्यः संक्रांतिरितीर्यते ॥ ३३५ ॥
पञ्च पञ्चैव ऋक्षांशान्, मुहूर्त्तेन पुरोदितान् । अहोरात्रेण चाध्यर्द्धं, शतं भुङ्क्ते दिनेश्वरः ॥ ३३६ ॥
एवं च त्रिंशता सार्द्धैरहोरात्रैर्भुनक्त्यसौ । पञ्चचत्वारिंशदंशशतान् सपञ्चसप्ततीन् ॥ ३३७ ॥
प्रत्ययश्चात्र–एकाहोरात्रभोग्येन, सार्द्धेनांशशतेन चेत् । पञ्चसप्ततियुक्पञ्चचत्वारिंशच्छतात्मकः ॥ ३३८ ॥
राशिर्विभज्यते त्रिंशदहोरात्री तदाप्यते । पञ्चसप्तत्याथ भाज्यभाजकावपवर्त्तयेत् ॥ ३३९ ॥
ततो लब्धमहोरात्रस्यार्द्धमेवं च दर्शिता । भावना सूर्यमासे सा, प्रोच्यतेऽथाधिमासके ॥ ३४० ॥
यस्मिन्नेदे विधोर्मासास्त्रयोदश भवन्ति तत् । अभिवर्द्धितवर्षं स्यात्तस्मिन् द्वादशभिर्हते ॥ ३४१ ॥
एकत्रिंशदहोरात्रा, लभ्या मासेऽभिवर्द्धिते । चतुर्विंशशतच्छिन्नाश्चैकविंशं शतं लवाः ॥ ३४२ ॥
तथाहि—
त्रयोदशसु शीतांशुमासेष्वह्नां शतत्रयं । त्र्यशीतियुक्चतुश्चत्वारिंशच्चांशा द्विषष्टिजाः ॥ ३४३ ॥
वैसादृश्यादहोरात्राङ्केष्वंशाङ्को न संमिलेत् । अंशच्छेदेन तदहोरात्रान् हत्वा सवर्णयेत् ॥ ३४४ ॥
ततश्च–द्वाषष्ट्यहोरात्रराशावंशच्छेदेन ताडिते । चतुश्चत्वारिंशदंशयुक्ते चांशा भवन्त्यमी ॥ ३४५ ॥
त्रयोविंशतिरंशानां, सहस्राः सप्तशत्यपि । नवतिश्चाहोरात्रस्य, द्विषष्टिच्छेदशालिनः ॥ ३४६ ॥
एषां द्वादशभिर्भागे, मासः स्यादभिवर्धितः । विधिर्भिन्नभागहारे, लीलावत्यामिति श्रुतः ॥ ३४७ ॥

छेदं लवं च परिवर्त्त्य हरस्य शेषः, कार्योऽथ भागहरणे गुणनाविधिश्च । भाज्यभाजकस्थापना
२३७९० + ६२ - १२ × १ छेदं लवं च परिवर्त्त्य स्थापना २३७९० × ६२ - १ × १२
भिन्नगुणनविधिश्चायं–अंशाहतिश्छेदवधेन भक्ता, लब्धं विभिन्ने गुणने फलं स्यात् ॥ इत्यादि ॥

द्वाषष्टिर्द्वादशघ्नाः स्युरेवं सप्तशतास्तथा । चतुश्चत्वारिंशदाढ्या, अथैतौ भाज्यभाजकौ ॥ ३४८ ॥
षड्भिरेवापवर्त्यन्ते, पञ्चषष्टियुतास्ततः । शता एकोनचत्वारिंशदंशानां भवन्ति वै ॥ ३४९ ॥
चतुश्चत्वारिंशदाढ्यसप्तशत्यात्मकस्तथा । छेदोऽपवर्त्तितः षड्भिश्चतुर्विंशं शतं भवेत् ॥ ३५० ॥
अपवर्त्तितभाज्यभाजकस्थापना ३९६५ × १२४.
राशौ विभक्तेऽस्मिन् छेदेनामुना स्याद्यथोदितः । मासोऽभिवर्द्धिताब्दस्य, द्वादशांशात्मकः खलु ॥ ३५१ ॥

वर्षे द्वादश मासाः स्युरित्यस्येयं मितिर्मता । वर्द्धते तु विधोर्मास, एव वर्षेऽभिवर्द्धिते ॥ ३५२ ॥
एतन्निष्पत्तिश्चैवं–
परस्परं यो विश्लेषो, भवेत्सूर्येन्दुमासयोः । स त्रिंशद्गुणितः ख्यातोऽधिमासस्तत्त्ववेदिभिः ॥ ३५३ ॥
सार्द्धत्रिंशदहोरात्रा, भवेन्मासो विवस्वतः । एकोनत्रिंशदिंदोस्ते, द्वाषष्ट्यंशा रदैर्मिताः ॥ ३५४ ॥
विश्लेषश्चानयोरेकोऽहोरात्रः परिकीर्त्तितः । द्वाषष्टिभागेनैकेन, न्यूनस्तत्रेति भावना ॥ ३५५ ॥

इह चंद्रमासे दिनराशेरुपरि ये द्वात्रिंशद्द्वाषष्टिभागाः सन्ति, तत्र एकत्रिंशता द्वाषष्टिभागैर्दिनार्धं जातं, तेन च सूर्यमासे यद्दिनराशेरुपरितनं दिनार्धं तच्छुद्धं, अथैको द्वाषष्टिभाग एकोनत्रिंशच्च दिनानि सूर्यमाससंबंधिभ्यस्त्रिंशतो दिनेभ्यः शोध्यन्ते, तदा एकद्वाषष्टिभागन्यून एकोऽहोरात्रः स्थित इत्येष विश्लेषो ज्ञेयः,

त्रिंशद्भवन्त्यहोरात्रा, एकस्मिंस्त्रिंशता हते । द्वाषष्टिभागश्चैकोऽस्मात्त्रिंशद्गुणोऽपसार्यते ॥ ३५६ ॥
एकोनत्रिंशदित्येवं, दिनान्यंशा रदैर्मिताः । मासोऽधिकोऽयं स्यात्त्रिंशत्सूर्यमासव्यतिक्रमे ॥ ३५७ ॥
युगस्य मध्ये पौषोऽयमन्ते त्वाषाढ एव च । तृतीयपञ्चमे वर्षे, तत एवाभिवर्धते ॥ ३५८ ॥
एते पञ्चापि मासानां, भेदा द्वादशभिर्हताः । भवन्ति स्वस्ववर्षाणि, तन्मानं प्राग्निरूपितं ॥ ३५९ ॥

एतेषां पञ्चानां मासानां प्रयोजनं त्वेवं–जीवे सिंहस्थे धन्वमीनस्थितेऽर्के । विष्णौ निद्राणे चाधिमासे न लग्नं । इत्यादि सूर्यमासाधिमासयोः प्रयोजनं, ऋतुमासश्च पूर्णत्रिंशदहोरात्रात्मक इति निरंशतया लोकव्यवहारकारक इति, शेषास्तु सूर्यादयो मासाः सांशतया प्रायो न व्यवहारपथमवतरन्तीति । अत एवायमृतुमासः कर्ममास इत्यपि शास्त्रान्तरेऽभिधीयत इति ऋतुमासप्रयोजनम् ।

वैशाखे श्रावणे मार्गे, पौषे फाल्गुन एव च । कुर्वीत वास्तुप्रारंभं, न तु शेषेषु सप्तसु ॥ ३६० ॥

इति चन्द्रमासप्रयोजनं । नक्षत्रमासप्रयोजनं तु संप्रदायगम्यं, इत्याद्यर्थतो जंबूद्वीपप्रज्ञप्तिवृत्तौ ।

सषट्षष्टित्र्यहोरात्रशतात्मकमुदीरितम् । यदर्काब्दं तत्र काचिदुपपत्तिर्निरूप्यते ॥ ३६१ ॥
नक्षत्रक्षेत्रभागा ये, प्रागत्र प्रतिपादिताः । तेषां सार्द्धं शतं भानुरहोरात्रेण गच्छति ॥ ३६२ ॥
ततः शतेन सार्द्धेन, भागहारे कृते सति । नक्षत्रक्षेत्रभागानां, सूर्यभोगाहनिर्णयः ॥ ३६३ ॥
दिनपञ्चमभागाढ्यमहोरात्रचतुष्टयम् । मुहूर्त्तस्य च षष्ठोऽंशोऽभिजिद्भोगो विवस्वतः ॥ ३६४ ॥
अपार्द्धक्षेत्रभानां च, भोगमानं पृथक् पृथक् । अहोरात्राः षट् दशांशा, अहोरात्रस्य सप्त च ॥ ३६५ ॥
समक्षेत्राणां च भानामहोरात्रास्त्रयोदश । भक्तस्य पञ्चभिरहोरात्रस्यांशद्वयं तथा ॥ ३६६ ॥
सार्द्धक्षेत्राणां च भानां, भोगः प्रत्येकमुष्णगोः । स्याद्विंशतिरहोरात्रास्तद्दशांशस्तथैकक: ॥ ३६७ ॥
अहोरात्रात्मको भागात्मकश्च निखिलोऽप्ययम् । कालः संकलितो भानोर्हायनं स्याद्यथोदितम् ॥ ३६८ ॥

सहस्राणि दश नव, शताः साशीतयः किल । एतन्मुहूर्त्तगणितं, सूर्यवर्षे जिनैः स्मृतम् ॥ ३६९ ॥
शतैरष्टाभिराढ्यानि, सहस्राणि दश स्फुटम् । एतन्मुहूर्त्तगणितं, कर्मसंवत्सरे भवेत् ॥ ३७० ॥
सहस्रा दश षट्शत्या, पञ्चविंशत्युपेतया । युक्ताः पञ्चाशदंशाश्च, मुहूर्त्तस्य द्विषष्टिजाः ॥ ३७१ ॥
एतन्मुहूर्त्तगणितं, चन्द्रसंवत्सरे मतम् । अथ नक्षत्रवर्षस्य, मुहूर्त्तमानमुच्यते ॥ ३७२ ॥
सहस्रनवसंयुक्ता, द्वात्रिंशैरष्टभिः शतैः । षट्पञ्चाशन्मुहूर्त्तस्य, भागाश्च सप्तषष्टिजाः ॥ ३७३ ॥
एकादश सहस्राणि, पञ्च चैकादशाः शताः । अष्टादशमुहूर्त्तस्य, भागा द्वाषष्टिनिर्मिताः ॥ ३७४ ॥
मुहूर्त्तसंख्येत्युद्दिष्टा, बुधैर्वर्षेऽभिवर्द्धिते । त्रिंशद्गुणे स्वस्ववर्षे, त्वेषां स्यादुपपादनम् ॥ ३७५ ॥
सूर्यसंवत्सरस्तौल्यरूपेण यदि चिन्त्यते । तदा सहस्रं भाराणामष्टानवतिसंयुतम् ॥ ३७६ ॥
आढकानां त्रिचत्वारिंशत्सहस्राः शता नव । विंशत्युपेताः सूर्याब्दं, मेयरूपतया मतम् ॥ ३७७ ॥
द्वाषष्ट्याऽभ्यधिकं भारसहस्रं चन्द्रवत्सरे । द्वाषष्टिभागा भारस्य, षट्त्रिंशत्तौल्यमानतः ॥ ३७८ ॥
द्विचत्वारिंशत्सहस्राः, पञ्च च त्र्युत्तराः शताः । आढकानामाढकस्य, द्विषष्ट्यंशाश्चतुर्दश ॥ ३७९ ॥
एतन्मेयतया मानं, चन्द्रसंवत्सरे भवेत् । ब्रूमो नक्षत्रवर्षस्य, तौल्यमाने यथाक्रमम् ॥ ३८० ॥
शतानि नव भाराणां, त्र्यशीत्याऽभ्यधिकानि च । एकोनविंशतिर्भागा, भारस्य सप्तषष्टिजाः ॥ ३८१ ॥
इति नक्षत्रवर्षे तौल्यमानं ।
त्रयोदशसहस्रास्त्रिरेकत्रिंशं शतत्रयम् । त्रयोविंशतिरंशाश्चाढकानां सप्तषष्टिजाः ॥ ३८२ ॥
इति नक्षत्रवर्षे मेयमानं ।
एकपञ्चाशानि भारशतान्येकादशाष्ट च । द्वाषष्टिभागा भारस्य, तौल्यं वर्षेऽभिवर्द्धिते ॥ ३८३ ॥
पञ्चचत्वारिंशदाढ्या, आढकानां सहस्रकाः । षट्चत्वारिंशदंशाश्च, मानं द्वाषष्टिजा दश ॥ ३८४ ॥
पञ्चलक्षणभेदेनाप्युक्ताः संवत्सरा युगे । नक्षत्रचन्द्रकर्मोष्णकराभिवर्द्धिताह्वयाः ॥ ३८५ ॥
तथाहि—
नक्षत्राणि यथायोगं, स्वस्वमासानुसारतः । भवन्ति यत्र राकायां, कार्त्तिके कृत्तिका यथा ॥ ३८६ ॥
तथोक्तं—'जेट्ठो वच्चइ मूलेण, सावणो धणिट्ठाहिं । अहासु अ मग्गसिरो, सेसा नक्खत्तनामिया मासा' ॥
ऋतवोऽपि यथायोगं, प्रवर्त्तन्ते महीतले । स्थितिं बध्नाति हेमन्तः, कार्त्तिक्याः परतो यथा ॥ ३८७ ॥
भवेत्संवत्सरो यश्च, नात्युष्णो नातिशीतलः । बहूदकश्च नक्षत्रसंवत्सरमुशन्ति तम् ॥ ३८८ ॥
माससदृशनामानि, यत्र ऋक्षाणि पूर्णिमाः । समापयन्ति यः शीतातपरोगादिदारुणः ॥ ३८९ ॥
बहूदकश्च तं प्राहुश्चन्द्रसंवत्सरं बुधाः । कर्मसंवत्सरस्येदं, विज्ञेयमथ लक्षणम् ॥ ३९० ॥
दधत्यकाले तरवस्तत्र पुष्पफलादिकम् । सम्यग् यच्छति नाम्भोदो, मितम्पच इवोदकम् ॥ ३९१ ॥

यत्राल्पेनापि वर्षेण, धान्यं सम्यक् प्रजायते । सूर्यसंवत्सरं प्राहुस्तमतिप्रौढबुद्धयः ॥ ३९२ ॥
यत्रार्कतेजः संतप्ता, भवन्ति दिवसर्त्तवः । स्थलं निम्नाद्यम्बुपूर्णं, तमाहुरभिवर्द्धितम् ॥ ३९३ ॥
इत्यर्थतो जंबूद्वीपप्रज्ञप्तिवृत्त्यादिषु ।
पञ्चभिः खलु वर्षैश्च, युगं भवति तत्र च । आद्यं चन्द्राभिधं वर्षं, द्वितीयमपि तादृशम् ॥ ३९४ ॥
अभिवर्द्धितसंज्ञं च, तृतीयं वर्षमीरितम् । चतुर्थं चन्द्रसंज्ञं च, पञ्चमं चाभिवर्द्धितम् ॥ ३९५ ॥
स्युर्मासाश्चन्द्रवर्षेषु, द्वादश द्वादश त्रिषु । अभिवर्द्धितवर्षे च, द्वे त्रयोदशमासके ॥ ३९६ ॥
द्वितीयस्येन्दुवर्षस्य, प्रथमः समयो हि यः । तदनन्तरपाश्चात्यः, स्यादाद्यस्य क्षणोऽन्तिमः ॥ ३९७ ॥
आषाढाभिरुत्तराभिस्तदा योगो हिमद्युतेः । तासां तदानीं स्युर्भोग्याः, षड्विंशतिर्मुहूर्त्तकाः ॥ ३९८ ॥
षड्विंशतिर्मुहूर्त्तस्य, भागा द्वाषष्टिजास्तथा । द्वाषष्ट्यंशस्य चैकस्य, सप्तषष्ट्यंशशालिनः ॥ ३९९ ॥
चतुष्पञ्चाशद्विभागा, इह द्वाषष्टिजो लवः । सप्तषष्टिप्रविभक्तभूर्णिकाभाग उच्यते ॥ ४०० ॥
पुनर्वसुभ्यां साकं च, तदा योगो रवेर्भवेत् । मुहूर्त्ताः षोडश तदा, तयोर्भोग्या भवन्ति हि ॥ ४०१ ॥
अष्टौ द्वाषष्टिजा भागा, मुहूर्त्तस्य तथोपरि । एकस्य द्वाषष्ट्यंशस्य, विंशतिर्भूर्णिका लवाः ॥ ४०२ ॥

तथोक्तं सूर्यप्रज्ञप्तौ–'जो णं दोच्चस्स संवच्छरस्स आई से णं पढमस्स चंदसंवच्छरस्स पज्जवसाणे अणंतरपच्छाकडे समए, तं समयं च णं चंदे केणं नक्खत्तेणं जोएइ ? ता उत्तराहिं आसाढाहिं, उत्तराणं आसाढाणं छव्वीसं मुहुत्ता छव्वीसं च बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं च सत्तट्ठिहा छेत्ता चउपण्णं चुण्णिया भागा सेसा । तं समयं च णं सूरे केणं णक्खत्तेणं जोएइ ? ता पुणव्वसुणा, पुणव्वसुस्स सोलस मुहुत्ता अट्ठ य बावट्ठि भागा मुहूत्तस्स, बावट्ठिभागं च सत्तट्ठिहा छेत्ता वीसं चुण्णिया भागा सेसा" इति, एवं शेषेष्वपि सूत्रेषु सूत्रालापकपद्धतिर्बोद्धव्या' ।

योऽभिवर्द्धितवर्षस्य, तृतीयस्यादिमः क्षणः । तदनन्तरपाश्चात्यो, द्वितीयस्यान्तिमः क्षणः ॥ ४०३ ॥
तदा च पूर्वाषाढाभिस्सह योगो हिमद्युतेः । मुहूर्त्ताः सप्त भागाश्च, त्रिपञ्चाशद् द्विषष्टिजाः ॥ ४०४ ॥
द्वाषष्ट्यंशस्य चैकस्य, विभागाः सप्तषष्टिजाः । एकोनचत्वारिंशत्स्युस्तासां भोग्याः सितत्विषः ॥ ४०५ ॥
पुनर्वसुभ्यां संयोगस्तदा स्यादुष्णरोचिषः । तन्मुहूर्त्तांशप्रत्यंशान्, भानुभोग्यानथ ब्रुवे ॥ ४०६ ॥
द्विचत्वारिंशन्मुहूर्त्ताः, पुनर्वस्वोस्तदा रवेः । पञ्चत्रिंशद्द्विषष्ट्यंशा, भोग्याः सप्त च चूर्णिकाः ॥ ४०७ ॥
तुर्यस्य चन्द्रवर्षस्य, य इह प्रथमः क्षणः । क्षणस्तृतीयस्यान्त्यः स्यात्तदनन्तरपश्चिमः ॥ ४०८ ॥
आषाढाभिश्चोत्तराभिस्तदा योगो हिमद्युतेः । भुक्तशेषास्तदानीं स्युस्तन्मुहूर्त्तास्त्रयोदश ॥ ४०९ ॥
एकस्य च मुहूर्त्तस्य, द्वाषष्ट्यंशास्त्रयोदश । अंशस्य तादृशः सप्तविंशतिर्भूर्णिका लवाः ॥ ४१० ॥
पुनर्वसुभ्यां सूर्यस्य, तदा योगो निरूपितः । मुहूर्त्तौ द्वौ च तद्भुक्तशेषौ भागास्तथोपरि ॥ ४११ ॥
षट्पञ्चाशद् द्विषष्ट्युत्था, भागस्यैकस्य तस्य च । सप्तषष्टिविभक्तस्य, षष्टिर्भागाः प्रकीर्त्तिताः ॥ ४१२ ॥

अभिवर्द्धितवर्षस्य, पञ्चमस्यादिमक्षणात् । स्याद्योऽनन्तरपाश्चात्यः, स तुर्यस्यान्तिमः क्षणः ॥ ४१३ ॥
आषाढाभिरुत्तराभिस्तदा योगोऽमृतद्युतेः । तद्भुक्तशेषा एकोनचत्वारिंशन्मुहूर्त्तकाः ॥ ४१४ ॥
द्वाषष्टिभागाश्चत्वारिंशदेकस्याथ तस्य च । सप्तषष्टिभवाः सप्तचत्वारिंशत्किलांशकाः ॥ ४१५ ॥
पुनर्वसुभ्यां सूर्यस्य, तदा योगः प्रकीर्त्तितः । तद्भुक्तशेषा एकोनत्रिंशदेव मुहूर्त्तकाः ॥ ४१६ ॥
एकविंशतिरंशाश्च, मुहूर्त्तस्य द्विषष्टिजाः । तस्यैकस्य सप्तचत्वारिंशच्च चूर्णिकांशकाः ॥ ४१७ ॥
युगस्यान्यस्यादिमस्य, चन्द्राब्दस्यादिमक्षणात् । अनन्तरो यः पाश्चात्यः, पञ्चमाब्दस्य सोऽन्तिमः ॥ ४१८ ॥
आषाढाभिरुत्तराभिस्तदा योगः सितद्युतेः । चरमे समये तासां, वर्त्तमानो भवेत्स हि ॥ ४१९ ॥
सूर्यस्य च तदा योगः, पुष्येण परिकीर्त्तितः । भुक्तशेषास्तदा तस्य, मुहूर्त्ता एकविंशतिः ॥ ४२० ॥
द्वाषष्टिजास्त्रयश्चत्वारिंशदंशास्तथोपरि । तस्यांशस्य त्रयस्त्रिंशद्विभागाः सप्तषष्टिजाः ॥ ४२१ ॥
अत्र येऽर्कस्य नक्षत्रयोगे प्रोक्ता मुहूर्त्तकाः । ते भानुसत्का बोद्धव्या, विधोस्तु व्यावहारिकाः ॥ ४२२ ॥
आह च–
अहोरात्रस्य हि त्रिंशत्तमोंशो व्यावहारिकः । मुहूर्त्त इति जानीमः, किंरुपोऽसौ रवेः पुनः ? ॥ ४२३ ॥
अत्रोच्यते–
यत्संपूर्णमहोरात्रं, युज्यते भं हिमांशुना । तस्य योगोऽभवद्यावत्कालमुष्णांशुना सह ॥ ४२४ ॥
तस्य त्रिंशत्तमो भागो, यावान् जायेत निश्चितः । तावन्मानो मुहूर्त्तोऽत्र, ज्ञेयो विज्ञैर्विवस्वतः ॥ ४२५ ॥
स चायं–त्रयोदशमुहूर्त्तानि, मुहूर्त्तस्यैककस्य च । कृतद्वाषष्टिभागस्य, चतुर्विंशतिरंशकाः ॥ ४२६ ॥
द्वाषष्ट्यंशस्य चैकस्य, छिन्नस्य सप्तषष्टिधा । किञ्चित्समधिकाः सार्द्धास्त्रिपञ्चाशद्विभागकाः ॥ ४२७ ॥
तथाहि–स्युर्द्वादशमुहूर्त्ताढ्या, अहोरात्रास्त्रयोदश । समक्षेत्राणामुडूनां, योगकालो विवस्वतः ॥ ४२८ ॥
त्रयोदशाहोरात्रा ये, मुहूर्त्तकरणाय ते । त्रिंशद्गुणीकृता जाता, नवत्याढ्या शतत्रयी ॥ ४२९ ॥
द्वादशानां मुहूर्त्तानां, शेषाणामत्र योजने । चतुःशती द्व्युत्तरा स्यात्त्रिंशता सा विभज्यते ॥ ४३० ॥
पूर्णास्त्रयोदश प्राप्ताः, शिष्यन्ते द्वादशाथ ते । द्वाषष्टिघ्नाश्चतुश्चत्वारिंशा सप्तशती भवेत् ॥ ४३१ ॥
एतस्यास्त्रिंशता भागे, चतुर्विंशतिराप्यते । शेषा चतुर्विंशतिः सा, सप्तषष्ट्या हता भवेत् ॥ ४३२ ॥
अष्टाढ्या षोडशशती, त्रिंशताऽसौ विभज्यते । प्राप्ताः सार्द्धास्त्रिपञ्चाशत्किञ्चित्समधिका इति ॥ ४३३ ॥
इति सूर्यमुहूर्त्तप्रमाणानयनोपायः ।
तुल्यार्द्धसार्द्धक्षेत्रोडुषूक्तमाना मुहूर्त्तकाः । त्रिंशत्पञ्चदश पञ्चचत्वारिंशत्स्युरुष्णगाः ॥ ४३४ ॥
तैश्च त्रयोदश दिनाः, सद्वादशमुहूर्त्तकाः । तथा स्युः षडहोरात्रा, मुहूर्त्ताश्चैकविंशतिः ॥ ४३५ ॥
अहोरात्रा विंशतिश्च, मुहूर्त्तत्रितयाधिकाः । क्रमात्त्रैधेषु भेष्वर्कभोगः स्याद्व्यावहारिकः ॥ ४३६ ॥

अष्टादश शतास्त्रिंशा, अहोरात्रा युगे स्मृताः । पञ्चानामपि वर्षाणां, तत्तत्संख्यासमुच्चयात् ॥ ४३७ ॥

तथाहि–

संवत्सरास्त्रयश्चान्द्रा, युगे द्वौ चाभिवर्द्धितौ । तत्र चन्द्राब्दस्य मानमित्येतत्प्राग्निरूपितम् ॥ ४३८ ॥
चतुःपञ्चाशदधिकमहोरात्रशतत्रयम् । द्वादश द्वाषष्टिभागा, अहोरात्रस्य चोपरि ॥ ४३९ ॥
अस्मिंस्त्रिगुणिते जातमहोरात्रसहस्रकम् । द्वाषष्ट्याऽभ्यधिकं षट्त्रिंशच्च द्वाषष्टिजा लवाः ॥ ४४० ॥
अभिवर्द्धितमानं चाहोरात्राणां शतत्रयम् । सत्र्यशीति चतुश्चत्वारिंशद् द्वाषष्टिजा लवाः ॥ ४४१ ॥
अस्मिन् द्विगुणिते सप्त, शताः षट्षष्टिसंयुताः । अहोरात्राः स्युस्तथाष्टाशीतिर्द्वाषष्टिजा लवाः ॥ ४४२ ॥
अष्टाशीतिरमी भागाः, प्राच्यषट्त्रिंशता युताः । जाताश्चतुर्विंशमेव, शतं द्वाषष्टिजा लवाः ॥ ४४३ ॥
अहोरात्रद्वयं लब्धं, द्वाषष्ट्याऽस्मिन् हृते सति । अष्टादशशतास्त्रिंशाः, सर्वे संकलितास्ततः ॥ ४४४ ॥
सप्तषष्टिर्ऋक्षमासा, द्वाषष्टिस्ते तथैन्दवाः । ऋतुमासाश्चैकषष्टिः, षष्टिर्मासा विवस्वतः ॥ ४४५ ॥
अभिवर्द्धितमासाश्च, सप्तपञ्चाशदाहिताः । शिष्येत सप्ताहोरात्री, सैकादशमुहूर्त्तिका ॥ ४४६ ॥
त्रयोविंशतिरंशाश्च, मुहूर्त्तस्य द्विषष्टिजाः । मासानां मानमित्येवं, युगे प्रोक्तं पृथक् पृथक् ॥ ४४७ ॥
युगाहोरात्रवृन्दस्य, हृते भागे यथोदितैः । स्वीयस्वीयमासमानैर्युगे मासास्तथाऽत्र च ॥ ४४८ ॥
अयनानि दश प्राहुर्ऋतवस्त्रिंशदाहिताः । षष्टिर्मासाः शतं विंशं, पक्षाः सौरप्रमाणतः ॥ ४४९ ॥
चतुष्पञ्चाशत्सहस्राः, शतैर्नवभिरन्विताः । युगे मुहूर्त्ता निर्दिष्टः, शिष्टैर्विष्टपपूजितैः ॥ ४५० ॥
एकोनविंशतिसहस्राधिकं लक्षयोर्द्वयम् । आढकानां षट्शतानि, तौल्यमानं युगे जगुः ॥ ४५१ ॥
चतुष्पञ्चाशच्छतानि, भाराणां नवतिस्तथा । मेयरूपतया मानं, युगस्याहुर्मनीषिणः ॥ ४५२ ॥
चान्द्रं वर्षं युगस्यादिस्तस्यादिर्मास इष्यते । मासादिरसितः पक्षस्तस्यादिर्दिवसो भवेत् ॥ ४५३ ॥
तत्रापि भरतक्षेत्रे, क्षेत्रे चैरवताभिधे । युगस्यादिर्दिनस्यादौ विदेहेषु निशामुखे ॥ ४५४ ॥
यदाषाढपौर्णमासीरजन्याः समनन्तरम् । प्रवर्त्तते युगस्यादिर्भरतैरवताख्ययोः ॥ ४५५ ॥
पूर्वापरविदेहेषु, तदा च रजनीमुखम् । ततो निशामुखादेव, युगादिस्तत्र कीर्त्तितः ॥ ४५६ ॥
किंच–रुद्रादयो मुहूर्त्ताः स्युरहोरात्रा दिनादयः । उक्ता जिनेन्द्रैर्भरतैरावताह्वयवर्षयोः ॥ ४५७ ॥
महाविदेहेषु पुनरहोरात्रा निशादयः । यतस्तत्र युगस्यादिर्निशारंभात्प्रवर्त्तते ॥ ४५८ ॥

तथोक्तं जंबूद्वीपप्रज्ञप्तिसूत्रे[१]–'किमाइया णं भंते ! संवच्छरा ?, किमाइया अयणा, ? किमाइया उऊ ?, किमाइया मासा ?, किमाइया पक्खा ?, किमाइया अहोरत्ता ?, किमाइया मुहूत्ता ?, किमाइया करणा ?, किमाइया नक्खत्ता ? गोअमा ! चंदाइया संवच्छरा, दक्खिणाइया

१ सूत्रमेतत् जम्बूद्वीपगतयोर्भरतैरावतयोः सूर्यचारं युगादि भाविनं तिथ्यादिं चापेक्ष्य ज्ञेयम्, अन्ययुगस्य मध्ये वर्षप्रभृतेरादीनां वैचित्र्येऽनिष्टापत्तेः ।

अयणा, पाउसाइया उऊ, सावणाइया मासा, बहुलाइया पक्खा, दिवसाइया अहोरत्ता, रुधाइया मुहूत्ता, बालवाइया करणा, अभिइयाइया-नक्खत्ता पन्नत्ता समणाउसो !'

श्रावणाऽसितपक्षस्य, तिथेः प्रतिपदोऽपि च । बालवस्य करणस्य, ऋक्षस्याभिजितस्तथा ॥ ४५९ ॥
प्रथमे समये प्रोक्तो, युगारम्भश्चिदुत्तरैः । भरतैरावतमहाविदेहेषु समं जिनैः ॥ ४६० ॥

तथोक्तं ज्योतिष्करण्डे— सावणोहुलपडिवए, बालवकरणे अभीइनक्खत्ते । सव्वत्थ पढमसमए, जुगस्स आइं वियाणाहि ॥ [श्लोक. ५५]

इदं तु वाल्लभ्यवाचनानुगतं ज्ञेयं, ज्योतिष्करण्डकर्त्तुर्वालभ्यत्वात्, माथुरवाचनानुगत-भगवत्यादिसूत्रेषु तु यस्मिन् समये मेरोर्दक्षिणोत्तरयोर्युगस्य प्रतिपत्तिस्ततोऽनंतरे द्वितीये समये मेरोः पूर्वापरयोर्युगस्य प्रतिपत्तिरित्यभिप्रायो दृश्यते, तथा च तद्ग्रंथः— जया णं भंते ! जंबूद्दीवे दीवे दाहिणड्ढे वासाणं पढमे समए पडिवज्जइ, तया णं उत्तरड्ढे वि वासाणं पढमे समए पडिवज्जइ ? जया णं उत्तरड्ढे वासाणं पढमे समए पडिवज्जइ तया णं जंबूद्दीवे दीवे मंदरस्स पव्वयस्स पुरच्छिमपच्चत्थिमेणं अणंतरपुरेक्खडसमयंसि वासाणं पढमे समए पडिवज्जइ ? हंता गोयमा ! जया णं जंबूद्दीवे दीवे दाहिणड्ढे वासाणं पढमे समए पडिवज्जइ तह चेव जाव पडिवज्जइ", एवं चावलिकादिसूत्रगर्भितं ऋतुत्रयसूत्रमयनसूत्रं चाधीत्य 'जहा अयणेणं अभिलावो तहा संवच्छरेण वि' भाणिअव्वो जुएण वि वाससएण वि इत्यादि भूयान् सूत्रसंदर्भो भगवतीसूत्रादर्शाद्बोध्यः ।

जंबूद्वीपप्रज्ञप्तिसूत्रेऽपि इदमेव सूत्रं "जहा पञ्चमसए पढमुद्देसए" इत्यतिदेशेन संगृहीतं बोद्धव्यं, अत्र च जंबूद्वीपप्रज्ञप्तिवृत्तौ उ० श्रीशांतिचंद्रगणिभिरेवमुक्तं, "युक्त्यानुकूल्यं तु युगपत्प्रतिपत्तिसमये संभावयामः", तथाहि—'सव्वे कालविसेसा, सूरपमाणेण हुंति नायव्वा' इति वचनाद्यदि सूर्यचारविशेषेण कालविशेषप्रतिपत्तिर्दक्षिणोत्तरयोराद्यसमये प्रागपरयोरुत्तरसमये तर्हि दक्षिणोत्तरप्रतिपत्तिसमये पूर्वापरयोः पूर्वकालस्यापर्यवसानं वाच्यं, पूर्वापरविदेहापेक्षयास्त्येव तदिति चेत्सूर्ययोश्चीर्णचरणं अपरं वा सूर्यद्वयं वाच्यं, ययोश्चारविशेषाद्दक्षिणोत्तरप्रति-पत्तिसमयापेक्षयोत्तरसमये पूर्वापरयोः कालविशेषप्रतिपत्तिरित्यादिको भूयान् परवचनावकाश इत्यलं प्रसङ्गेनेति ।

वक्ष्यन्ते ये च कालांशाः, सुषमसुषमादयः । आरम्भं प्रतिपद्यन्ते, सर्वे तेऽपि युगादितः ॥ ४६१ ॥
युगपर्यवसाने च, ते यान्ति परिपूर्णताम् । तस्मात्कालविशेषेषु, युगं प्रागुदितं जिनैः ॥ ४६२ ॥

तदुक्तं ज्योतिष्करण्डके— "एए कालविभागा, पडिवज्जंते जुगंमि खलु सव्वे । पत्तेयं पत्तेयं, जुगस्स अंते समप्पिंति" ॥ [श्लोक. ९०]

ज्योतिष्करण्डटीकाकाराः पादलिप्तसूरयोऽप्याहुः—"एए उ सुसमसुसमादयो अद्धाविसेसा जुगाइणा सह पवत्तंते जुगंतेण सह समप्पिंति" ।

---

१ सव्वत्थेत्यस्य सर्वेषां भरतानां सर्वेषामैरावतानां ग्रहणे न मतभेदोऽत्र ।

अथ वक्ष्ये प्रतियुगमयनानि यथागमम् । आवृत्तीः सूर्यशशिनोस्तत्तिथीनुडुभिस्सह ॥ ४६३ ॥
स्वरूपमृतुमासानां, तिथीनां चावमस्य च । नक्षत्राणि यथायोगमेतेषां करणान्यपि ॥ ४६४ ॥
युगे युगेऽयनानि स्युर्भानोर्दश दश ध्रुवम् । तदेकैकमहोरात्रसत्र्यशीतिशतात्मकम् ॥ ४६५ ॥
प्रत्ययः क इहात्रेति, यदि शुश्रूष्यते त्वया । त्रैराशिकं तदात्रेदं, श्रूयतां मित्र ! दर्श्यते ॥ ४६६ ॥
अष्टादशशतास्त्रिंशा, अयनैर्दशभिर्यदि । अहोरात्रास्तदैकेनायनेन किं लभामहे ? ॥ ४६७ ॥
अत्रांत्येनैकरूपेण, राशिना गुणितः स्थितः । तथैव मध्यमो राशिरेकेन गुणितं हि तत् ॥ ४६८ ॥
ततो दशकरूपेण, हृतेऽस्मिन्नाद्यराशिना । अहोरात्रशतं लब्धं, सत्र्यशीति यथोदितम् ॥ ४६९ ॥
मण्डलानामपि शतं, सत्र्यशीति चरेद्रविः । एकैकं प्रत्यहोरात्रं, पूरयन्नयनेऽयने ॥ ४७० ॥
सर्वान्तरानन्तरे यन्मण्डले दक्षिणायनम् । आरभ्यते पूर्यते तत्सर्वबाह्ये च मण्डले ॥ ६७१ ॥
सर्वबाह्यानन्तरे च मण्डलेऽथोत्तरायणम् । आरभ्यते पूर्यते तत्सर्वाभ्यन्तरमण्डले ॥ ४७२ ॥
अथ सूर्यायनज्ञानविषये करणं ब्रुवे । यतोऽतीतवर्त्तमानायनज्ञानं सुखं भवेत् ॥ ४७३ ॥
राकामावास्यारूपाणि, प्राग्विवक्षितवासरात् । तानि पञ्चदशघ्नानि, कर्त्तव्यानि ततोऽत्र च ॥ ४७४ ॥
अतीतास्तिथयः क्षेप्या, वर्त्तमानस्य पर्वणः । पात्यन्तेऽवमरात्राश्च, युगादारभ्य ये गताः ॥ ४७५ ॥
राशौ तस्मिंस्ततो भक्तेसत्र्यशीतिशतेन यत् । लब्धमेकद्वयादिरूपं, तत्संस्थाप्य विचिन्त्यते ॥ ४७६ ॥
लब्धः समोऽङ्के यदि तद्द्वयतीतमुत्तरायणम् । विषमोऽङ्कोऽथ लब्धश्चेत्तद्गतं दक्षिणायनम् ॥ ४७७ ॥
अंशास्तु ये पूर्वराशौ, भागशेषा अवस्थिताः । ते तत्कालप्रवृत्तस्यायनस्य दिवसाः किल ॥ ४७८ ॥
युगमध्ये यथा कश्चिन्नवमासव्यतिक्रमे । जनः पृच्छति पञ्चम्यां, किमद्यायनमस्ति ? भोः ! ॥ ४७९ ॥
अनन्तरं च कतरद्व्यतीतमिति तत्र च । पूर्वोक्तविधिना प्राज्ञो, दद्यादित्येवमुत्तरम् ॥ ४८० ॥
नवानां ननु मासानां, पर्वाण्यष्टादशागमन् । तानि पञ्चदशघ्नानि, द्वौ शतौ स्तः ससप्तती ॥ ४८१ ॥
पञ्चम्यां पृष्टमिति च, क्षिप्यते तत्र पञ्चकम् । पञ्चसप्ततिसंयुक्ते, संजाते द्वे शते ततः ॥ ४८२ ॥
नवमास्यां च चत्वारोऽवमरात्रा भवन्ति ये । ते त्यज्यन्ते ततो जातौ, द्वौ शतौ सैकसप्तती ॥ ४८३ ॥
अस्य राशेः सत्र्यशीतिशतेन भजने सति । लब्धमेकं रूपमष्टाशीतिः शेषावतिष्ठते ॥ ४८४ ॥
ततश्चातीतमयनमेकं तदपि दक्षिणम् । सांप्रतं वर्त्तमानं च, गण्यतामुत्तरायणम् ॥ ४८५ ॥
तस्याप्यष्टाशीतितमं, साम्प्रतं वर्त्तते दिनम् । द्वितियोऽप्यत्र दृष्टान्तो, दर्श्यते गुरुदर्शितः ॥ ४८६ ॥
पञ्चविंशतिमासातिक्रमे केनापि पृच्छ्यते । दशम्यामयनं किं भो, वर्त्ततेऽद्य गतं च किम् ? ॥ ४८७ ॥
पञ्चाशद्यानि पर्वाणि, मासेषु पञ्चविंशतौ । तानि पञ्चदशघ्नानि, पञ्चाशा सप्तशत्यभूत् ॥ ४८८ ॥
दशम्यां पृष्टमिति च, क्षिप्यन्ते दश तेन च । शतानि सप्त जातानि, षष्ट्याढ्यानि ततः परम् ॥ ४८९ ॥

द्वादशावमरात्राः स्युर्मासेषु पञ्चविंशतौ । तेषु त्यक्तेष्वष्टचत्वारिंशा सप्तशती भवेत् ॥ ४९० ॥
सत्र्यशीतिशतेनास्य, राशेर्विभजने सति । चत्वार एव लभ्यन्ते, शेषास्तिष्ठन्ति षोडश ॥ ४९१ ॥
गतानि चत्वार्ययनान्यतीतं यदनन्तरम् । तदुत्तरायणं दक्षिणायनं त्वस्ति सांप्रतम् ॥ ४९२ ॥
षोडशो दिवसस्तस्याप्यधुना खलु वर्त्तते । एवमन्यत्रापि भाव्यं, करणं ज्ञैर्यथोचितम् ॥ ४९३ ॥
युगे युगे चतुस्त्रिंशमयनानां शतं विधोः । तच्चैकैकं भचक्रार्द्धभोगमानमिहोदितम् ॥ ४९४ ॥
सर्वर्क्षभोगकालो हि, विधोः संकलितो भवेत् । सप्तविंशतिरेवाहोरात्राः पूर्णास्तथोपरि ॥ ४९५ ॥
सप्तषष्टिविभक्ताहोरात्रांशाश्चैकविंशतिः । भमासोऽप्ययमेवंदोरुदग्याम्यायनात्मकः ॥ ४९६ ॥
सप्तषष्टिविभक्ताहोरात्रांशानां भवेदिह । भमासस्त्रिंशदधिकैरष्टादशमितैः शतैः ॥ ४९७ ॥
ईदृशाश्च भमासाः स्युः, सप्तषष्टिर्युगे युगे । एकैकस्मिन् भमासे च, स्यादिन्दोरयनद्वयम् ॥ ४९८ ॥
युक्तं ततश्चतुस्त्रिंशमयनानां शतं युगे । एकैकस्यायनस्याथ, मानं व्यक्त्या निशम्यताम् ॥ ४९९ ॥
चरेत्प्रत्ययनं चन्द्रो, मण्डलानि त्रयोदश । चतुश्चत्वारिंशदंशांश्चैकस्य सप्तषष्टिजान् ॥ ५०० ॥
ततश्च–त्रयोदशैवाहोरात्रा, भागाश्च सप्तषष्टिजाः । चतुश्चत्वारिंशदहोरात्रस्यायनमैन्दवम् ॥ ५०१ ॥
यद्वा–सप्तषष्टिभवैः पञ्चदशाढ्यैर्नवभिः शतैः । अहोरात्रस्य भागैः स्याद्भमासार्द्धं सुनिश्चितम् ॥ ५०२ ॥
चन्द्रस्यैकैकमयनमेतन्मानं निरूपितम् । त्रैराशिकबलेनात्र, प्रत्ययोऽपि निरूप्यते ॥ ५०३ ॥
चतुस्त्रिंशेनायनानां, शतेन तुहिनद्युतेः । प्राप्तान्यष्टादश त्रिंशान्यहोरात्रशतानि चेत् ॥ ५०४ ॥
तदैकेनायनेनेन्दोर्लभ्यते किमिति त्रिषु । अन्त्येनैकेन गुणितो, मध्यराशिस्तथा स्थितः ॥ ५०५ ॥
आद्येन च चतुस्त्रिंशशतरूपेण राशिना । मध्यराशौ हृते लब्धा, अहोरात्रास्त्रयोदश ॥ ५०६ ॥
अष्टाशीतिः शिष्यते सा, सप्तषष्ट्या निहन्यते । अष्टापञ्चाशच्छतानि स्युः, षण्णवतिमन्त्यथ ॥ ५०७ ॥
चतुस्त्रिंशशतेनैषां, हृते भागे यथोदिताः । चतुश्चत्वारिंशदंशाः, संप्राप्ताः सप्तषष्टिजाः ॥ ५०८ ॥

अत्र चन्द्रायणज्ञानविषये करणादिनिरूपणं तु क्षेत्रलोके विंशतितमे सर्गे कृतमस्तीति ततो ज्ञेयं ।

अयनानि दशार्कस्य, चतुस्त्रिंशं शतं विधोः । युगे युगे स्युर्यत्तत्र, त्रैराशिकमथोच्यते ॥ ५०९ ॥
सत्र्यशीतिशतेनाहोरात्राणामयनं रवेः । स्याद्यद्येकं तदा त्रिंशैः, किमष्टादशभिः शतैः ? ॥ ५१० ॥
त्रैराशिक स्थापना १८३-१-१८३० ।
अन्त्येन राशिना राशावेकरूपेऽत्र मध्यमे । गुणिते स्युः शतान्यष्टादश त्रिंशद्युतान्यथ ॥ ५११ ॥
आद्येन राशिना भागे सत्र्यशीतिशतात्मना । लब्धा दशैतावन्त्येवायनानि स्युर्युगे रवेः ॥ ५१२ ॥
सप्तषष्ट्युद्भवचतुश्चत्वारिंशल्लवाधिकैः । त्रयोदशभिरेकं चेदहोरात्रैः किलायनम् ॥ ५२३ ॥
त्रिंशैस्तदाष्टादशभिरहोरात्रशतैर्विधोः । अयनानि कियन्ति स्युरिति राशित्रयं लिखेत् ॥ ५१४ ॥

राशित्रयस्थापना–१३४४/६७–१–१८३० ।

सावर्ण्यार्थमाद्यराशावहोरात्रास्त्रयोदश सप्तषष्ट्या । निहत्यांशाः, क्षिप्यन्ते सन्ति येऽधिकाः ॥ ५१५ ॥
जाता नवशती पञ्चदशोपेताथ सन्ति ये । अष्टादश शतास्त्रिंशाः, सप्तषष्ट्यैव तेऽपि च ॥ ५१६ ॥
सवर्णनार्थं ताड्यन्ते, लक्षमेकं भवेत्ततः । द्वाविंशतिः सहस्राणि, षट्शती च दशोत्तरा ॥ ५१७ ॥
अन्त्येन राशिनाथैवंरूपेण मध्यमो हतः । नूनमेकात्मको राशिर्गुणकेन समोऽभवत् ॥ ५१८ ॥
ततोऽस्मिन्नवभिः पञ्चदशोपेतैः शतैर्हृते । चतुस्त्रिंशं शतं लब्धमयनानां युगे विधोः ॥ ५१९ ॥
अथायनारम्भरूपा, भवन्त्यावृत्तयो दश । तत्र स्युः श्रावणे पञ्च, पञ्च माघे विवस्वतः ॥ ५२० ॥
याम्यायनारंभरूपाः, पञ्च ताः श्रावणे स्मृताः । तथोत्तरायणारम्भरूपा माघे च पञ्च ताः ॥ ५२१ ॥
आद्यावृत्तिः श्रावणाद्यप्रतिपद्यभिजिद्युता । माघस्य श्यामसप्तम्यां, द्वितीया हस्तसंयुता ॥ ५२२ ॥
तृतीयास्यन्नभःकृष्णत्रयोदश्यां मृगान्विता । चतुर्थी शुक्लतुर्यायां, माघे शतभिषग्युता ॥ ५२३ ॥
विशाखायुग्नभःश्वेतदशम्यां पञ्चमी भवेत् । षष्ठी माघे प्रतिपादि, श्यामायां पुष्यशालिनी ॥ ५२४ ॥
सप्तमी कृष्णसप्तभ्यां, श्रावणे रेवतीयुता । माघे कृष्णत्रयोदश्यामष्टमी मूलसंयुता ॥ ५२५ ॥
नभश्चतुर्थ्यां शुक्लायां, नवमी योनिदेवयुग् । माघकृष्णत्रयोदश्यां, दशमी कृत्तिकाञ्चिता ॥ ५२६ ॥

अथात्र करणं–

विशिष्टतिथियुक्ता या, ह्यावृत्तिर्ज्ञातुमिष्यते । गुण्यते तत्सङ्ख्ययैकोनया त्र्यशीतियुक् शतम् ॥ ५२७ ॥
अङ्कस्थानेन गुणितं, येन त्र्यशीतियुक् शतम् । त्रिघ्नं रूपेणाधिकं तद्राशौ जाते नियोजयेत् ॥ ५२८ ॥
ततश्च पञ्चदशभिर्हृते भागे यदाप्यते । गतेष्वेतावत्सु पर्वस्वावृत्तिः सा विवक्षिता ॥ ५२९ ॥
पश्चादुद्धरिता येऽङ्कास्तावत्सु दिवसेष्वथ । चरमे दिवसे विंद्यादावृत्तिं तां विवक्षिताम् ॥ ५३० ॥
आद्यावृत्तिर्युगे कस्यां, तिथावित्यूह्यते यदि । तत्प्रस्तुतेयं प्रथमावृत्तिरित्येकको धृतः ॥ ५३१ ॥
अस्मिंश्चैकोनिते शेषः, कश्चिदङ्को न तिष्ठति । तत्पाश्चात्ययुगावृत्तिर्दशमी म्रियतेऽन्तिमा ॥ ५३२ ॥
ततस्त्र्यशीत्याभ्यधिकं, दशभिर्गुण्यते शतम् । त्रिंशान्येवं शतान्यष्टादश जातान्यतः परम् ॥ ५३३ ॥
दशभिर्गुणितं यस्मात्सत्र्यशीतिशतं ततः । दश त्रिघ्नाः सैकरूपाश्चैकत्रिंशद्भवन्ति ये ॥ ५३४ ॥
ते पूर्वराशौ क्षिप्यन्ते, एकषष्ट्यधिका ततः । अष्टादशशती जाता, तां पञ्चदशभिर्भजेत् ॥ ५३५ ॥
चतुर्विंशं शतं लब्धमेकं रूपं च शिष्यते । जिज्ञासिताया आवृत्तेस्ततोऽभूदिति निर्णयः ॥ ५३६ ॥
चतुर्विंशपर्वशतात्मके प्राच्ययुगे गते । प्रवर्त्तमानेऽभिनवे, युगेऽस्य प्रथमे तिथौ ॥ ५३७ ॥
आद्याऽऽवृत्तिः प्रतिपदि, भवतीत्यथ कथ्यते । द्वितीयोऽप्यत्र दृष्टान्तो, बोधदार्ढ्याय धीमताम् ॥ ५३८ ॥
कस्यां तिथौ द्वितीया, स्यादावृत्तिर्माघभाविनी ? । इति प्रश्ने कृते धार्य, आवृत्यङ्को द्विकस्तदा ॥ ५३९ ॥

अस्मिन्नङ्के चैककोने, एक एवावशिष्यते । सत्र्यशीतिशतं तेन, गुण्यते स्यात्तथा स्थितं ॥ ५४० ॥
एकोऽत्र गुणकस्त्रिघ्नः, सैको जातश्चतुष्टयम् । एतद्युक्तोऽभवद्राशिः, सप्ताशीतियुतं शतम् ॥ ५४१ ॥
भागेऽस्य पञ्चदशभिर्लभ्यन्ते द्वादशोपरि । शिष्यन्ते सप्त तेनैष, पूर्वोक्तप्रश्ननिर्णयः ॥ ५४२ ॥
स्याद् द्वितीया द्वादशानां, विगमे युगपर्वणाम् । माघस्य श्यामसप्तम्यामावृत्तिस्तिग्मरोचिषः ॥ ५४३ ॥
कस्यां तिथौ स्यादावृत्तिस्तृतीयेतीष्यते यदि । तदा धृतस्त्रिको रूपोनितेऽस्मिन् शिष्यते द्विकः॥ ५४४ ॥
सत्र्यशीतिशतं तेन, गुणितं जायते किल । शतत्रयं सषट्षष्टि, द्विकेऽथ त्रिगुणीकृते ॥ ५४५ ॥
सैके जाताः सप्त ते च, पूर्वराशौ नियोजिताः । त्रिसप्तत्या समधिकमेवं जातं शतत्रयम् ॥ ५४६ ॥
हृतेऽस्मिन् पञ्चदशभिश्चुतर्विंशतिराप्यते । त्रयोदशावशिष्यन्ते, तदेष प्रश्ननिर्णयः ॥ ५४७ ॥
चतुर्विंशतिपक्षातिक्रमे तीर्थेश्वरैर्युगे । नभः कृष्णत्रयोदश्यां, तृतीयावृत्तिरीरिता ॥ ५४८ ॥

एवमन्यास्वपि तिथिषु करणभावना कार्या । आवृत्तिनक्षत्रज्ञानमुद्दिश्य करणं त्वतिविस्तरमिति नात्र प्रपञ्चितं, तज्ज्योतिष्करण्डवृत्त्यादिभ्योऽवसेयं ।

अत्र भावना चैवं–

आवृत्तिघस्रादेकस्मादावृत्तिरपरा भवेत् । दिने चतुरशीत्याढ्यशततमे यथाक्रमम् ॥ ५४९ ॥
सत्र्यशीति दिनशतमानमेकं यतोऽयनम् । समाप्यारभ्यते नव्यायनं घस्रे ततोऽग्रिमे ॥ ५५० ॥
नभः कृष्णप्रतिपदो, माघस्य श्यामसप्तमी । भवेच्चतुरशीत्याढ्यशततम्येव तद्यथा ॥ ५५१ ॥
षण्णां मासामहोरात्राः, स्युरशीतियुतं शतम् । माघस्य सप्ताहानीति, सप्ताशीतियुतं शतम् ॥ ५५२ ॥
एभ्यस्त्रयोऽवमरात्राः, पात्यन्ते मासषट्कजाः । ततश्चतुरशीत्याढ्यं, शतमेव व्यवस्थितम् ॥ ५५३ ॥

तत्र च–

सत्र्यशीतिदिनशतमानमेकं किलायनम् । षष्ट्यां पूर्णं पुनश्चान्यत्सप्तम्यां प्रत्यपद्यत ॥ ५५४ ॥

एवं च–

माघस्य श्यामसप्तम्या, द्वादशी नभसोऽसिता । सत्र्यशीतिशततमी, पूर्णं तत्र ततोऽयनम् ॥ ५५५ ॥
त्रयोदश्यां च संप्राप्तं, भूयोऽपि दक्षिणायनम् । एवमावृत्तितिथिषु, कार्यान्यास्वपि भावना ॥ ५५६ ॥
इन्दुभोग्योडुसंयोगः, प्रागुक्तस्तिथिभिस्सह । वक्ष्येऽर्कभोग्यनक्षत्राण्यावृत्तिषु दशस्वथ ॥ ५५७ ॥
आवृत्तिः श्रावणे पञ्चाप्यादित्यः कुरुते युगे । पुष्ययुक्तो बहिर्गच्छन्, सर्वाभ्यंतरमण्डलात् ॥ ५५८ ॥
अष्टादशमुहूर्त्ताढ्यमहोरात्रचतुष्टयम् । पुष्यस्य भुक्त्वार्कः सर्वा, आवृत्तिः श्रावणे सृजेत् ॥ ५५९ ॥
अभ्यंतरं विशन् बाह्यमण्डलात् कुरुते रविः । पञ्चापि माघस्यावृत्तिरभिजित्प्रथमक्षणे ॥ ५६० ॥

तथोक्तं ज्योतिष्करण्डके– अब्भिंतराहि निंतो, आइच्चो पुस्सजोगमुवगम्म । सव्वा आउट्टीओ, करेइ सो सावणे मासे ॥ बाहिरओ पविसंतो, आइच्चो अभिइजोगमुवगम्म । सव्वा आउट्टीओ, करेइ सो माघमासंमि ॥ [श्लोक - २४८, २४९]

एवं च मकरे राशौ, यद्भानोरुत्तरायणम् । कर्के याम्यायनं लोके, ख्यातं तदपि संगतम् ॥ ५६१ ॥

अथ विषुवत्प्रकरणं निरूप्यते–

पञ्चदशमुहूर्त्तात्मा, रजनी दिवसोऽपि च । यत्र तुल्यावुभौ स्यातां, स कालो विषुवं स्मृतम् ॥ ५६२ ॥

तथोक्तभिधानचिंतामणौ–"तुल्यनक्तंदिने काले, विषुवद् विषुवं च तत् ।" [श्लोक - १४६]

तच्च श्यामादिवसयोः, पञ्चदशमुहूर्त्तयोः । प्रदोषकाले विज्ञेयं, निश्चयापेक्षया बुधैः ॥ ५६३ ॥

यतः–सार्द्धैकनवतौ बाह्यादाभ्यन्तराच्च मण्डलात् । समाक्रांतेषु सूर्येण, मण्डलेषु भवेदिदम् ॥ ५६४ ॥

तत्प्रत्ययनमेकैकं, ततस्तानि युगे दश । याम्यायनस्य पञ्चौजान्येषु स्युर्मासि कार्त्तिके ॥ ५६५ ॥

समानि माधवे मासि, पञ्च सौम्यायनस्य च । तिथिचन्द्रार्कनक्षत्रयोगोऽथैषां निरूप्यते ॥ ५६६ ॥

तृतीयायां तिथौ षट्सु, व्यतिक्रान्तेषु पर्वसु । रोहिणीचन्द्रनक्षत्रे, विषुवं प्रथमं भवेत् ॥ ५६७ ॥

पर्वाण्यष्टादशातीत्य, नवम्यां वासवोडुनि । द्वितीयं विषुवं प्रोक्तं, युगे तीर्थंकरादिभिः ॥ ५६८ ॥

त्रिंशत्पर्वातिक्रमे च, पञ्चदश्यां तृतीयकम् । प्रज्ञप्तं स्वातिनक्षत्रे, विषुवं पुरुषोत्तमैः ॥ ५६९ ॥

त्रिचत्वारिंशतं पर्वाण्यतिक्रम्य युगादितः । स्यात्पुनर्वसुनक्षत्रे, तुर्यं षष्ठीतिथौ ध्रुवम् ॥ ५७० ॥

पञ्चपञ्चाशतं पर्वाण्यतिक्रम्य च पञ्चमम् । उत्तरासु भद्रपदास्वाख्यातं द्वादशीतिथौ ॥ ५७१ ॥

अष्टषष्टिमतिक्रम्य, पर्वाणि विषुवं भवेत् । षष्ठं तिथौ तृतीयायां, मैत्रनक्षत्र एव च ॥ ५७२ ॥

पर्वाण्यशीतिमुल्लङ्घ्य, नवम्यां सप्तमं पुनः । मघासु मघवत्पूज्यैर्विषुवं कथितं जिनैः ॥ ५७३ ॥

अतिक्रम्य द्विनवतिं, पर्वाण्यष्टममीरितम् । अश्विनीनाम्नि नक्षत्रे, पञ्चदश्यां तथा तिथौ ॥ ५७४ ॥

पञ्चाधिकं पर्वशतं, व्यतीत्य नवमं जिनैः । स्यादाषाढासूत्तरासु, तिथौ षष्ठ्यामितीरितम् ॥ ५७५ ॥

अतिक्रम्य तथा पर्वशतं सप्तदशाधिकम् । उत्तरासु फाल्गुनीषु, द्वादश्यां दशमं भवेत् ॥ ५७६ ॥

अत्रेयं भावना–

विषुवं स्यात्तृतीयायां षट्पर्वातिक्रमेऽग्रिमम् । ततो यथोत्तरं योज्याः, षट् तिथ्यङ्के विचक्षणैः ॥ ५७७ ॥

द्वितीयादिविषुवतामित्येवं लभ्यते तिथिः । षट्सु क्षिप्तेषु चेत्संख्या, भवेत्पञ्चदशाधिका ॥ ५७८ ॥

तदैकं पर्व पर्वाङ्के, क्षिप्त्वा पञ्चदशात्मकम् । शेषाङ्कप्रमिता विज्ञैर्विज्ञेया विषुवत्तिथिः ॥ ५७९ ॥

अथात्र करणं निरूप्यते–

द्विगुणेष्टविषुवसंख्या रूपोना षड्गुणा च पर्वमितिम् । वक्ति तथा पर्वाङ्के दलीकृतस्त्वाह विषुवतिथिम् ॥ ५८० ॥

पर्वाङ्कार्द्धं पञ्चदशाधिकं तु तिथिभिर्भवेत् । पर्वाङ्केष्वागतं दद्याच्छेषाङ्कान्निर्णयेत्तिथिम् ॥ ५८१ ॥

तथाहि–

युगे विषुवमाद्यं स्यात्कतिपर्वव्यतिक्रमे । कस्यां तिथाविति प्रश्ने, करणं भावयेदिति ॥ ५८२ ॥

आद्यं विषुवदित्येको, द्विघ्नो रूपोनितः पुनः । एकः स षड्गुणः षट्कः, पर्वाङ्कः सोऽर्द्धितस्तिथिः॥ ५८३ ॥

एवं च–षट्सु पर्वस्वतीतेषु, युगे विषुवमादिमम् । तृतीयायां तिथावेवं, चतुर्थमथ भाव्यते ॥ ५८४ ॥

तद्यथा–

द्विघ्नश्चतुष्को रूपोनः, सप्त स्युस्ते च षड्गुणाः । द्वाचत्वारिंशद्भवन्ति, तेऽर्द्धितास्त्वेकविंशतिः ॥ ५८५ ॥

अधिका पञ्चदशाङ्कादियं तद्भज्यतेऽथ तैः । पर्वस्वेकं क्षिपेल्लब्धं, शेषाः षट् तिथिसूचकाः ॥ ५८६ ॥

ततश्च–

स्यात्पर्वसु त्रिचत्वारिंशत्यतीतेष्वथो युगे । षष्ठ्यां तिथौ तद्विषुवमेवं सर्वत्र भाव्यताम् ॥ ५८७ ॥

पञ्चापि विषुवन्त्यर्कः कुर्याद्याम्यायनस्थितः । स्वातेर्नक्षत्रस्य भुक्त्वा, त्रयोविंशतिमंशकान् ॥ ५८८ ॥

अंशाश्चात्र चतुस्त्रिंशदधिकशतच्छिन्नरूपस्य ज्ञेयाः ।

पञ्चापि विषुवन्त्यर्कः, कुर्यात्सौम्यायनस्थितः । एकोनसप्ततिं भागानश्विन्या अवगाह्य च ॥ ५८९ ॥

इति विषुवत्प्रकरणं ।

अयनानां चतुस्त्रिंशं, शतं शीतद्युतेर्युगे । तत्रोत्तरायणानि स्युः, सप्तषष्टिर्युगे युगे ॥ ५९० ॥

सप्तषष्टिरेव याम्यायनान्येकान्तराण्यथ । प्रागुत्तरायणं पश्चाद्याम्यायनमिति क्रमः ॥ ५९१ ॥

ततश्च–

या नक्षत्रार्द्धमासेनैवोत्तराभिमुखा विधोः । आवृत्तयस्ताः सर्वाः स्युरभिजित्प्रथमक्षणे ॥ ५९२ ॥

भमासार्द्धेनाथ पुनर्दक्षिणाभिमुखा विधुः । आवृत्तिः कुरुते पुष्ययोगं प्राप्याखिला अपि ॥ ५९३ ॥

तत्रापि–

मुहूर्त्तदशकं भुक्त्वा, विधुर्भागांश्च विंशतिम् । पुष्यस्य सप्तषष्ट्युत्थान्, याम्यावृत्तिः प्रपद्यते ॥ ५९४ ॥

इत्ययनप्रकरणम् ।

ब्रूमः षण्णामथर्त्तूनां, स्वरूपं किञ्चिदागमात् । सूर्यसंबंधिनस्ते स्युश्चन्द्रसंबंधिनोऽपि च ॥ ५९५ ॥

सार्द्धास्त्रिंशदहोरात्रा, एको मासो विवस्वतः । ताभ्यां द्वाभ्यामहोरात्रा, एकषष्टिऋतू रवेः ॥ ५९६ ॥

ऋतुः प्रावृड् भवेदाद्यो, वर्षारात्रो द्वितीयकः । शरदाख्यस्तृतीयः स्यात्तुर्यो हेमन्तसंज्ञकः ॥ ५९७ ॥

वसन्तः पञ्चमः ख्यातः, षष्ठो ग्रीष्मः प्रकीर्त्तितः । षडेते ऋतवः ख्याता, युगे त्रिंशद्भवन्ति ते ॥ ५९८ ॥

उक्तं च ज्योतिष्करण्डके—पाउस वासारत्तो सरओ, हेमंत वसंत गिम्हा य । एए खलु छप्पि उऊ, जिणवरदिट्ठा मए सिट्ठा ॥ [श्लोक. २६५]

प्रथमाषाढराकायाः, प्रारभ्यैषामुपक्रमः । भवन्ति त्रिंशतैभिश्च, यथोक्ता युगवासराः ॥ ५९९ ॥
द्वावाषाढौ युगान्ते स्तस्तत्राद्यस्य सितत्विषि । चतुर्दश्यां प्राग्युगर्त्तुः, पूर्णस्त्रिंशत्तमो भवेत् ॥ ६०० ॥
ततस्तस्यैव राकायां, युगस्याभिनवस्य तु । ऋतुराद्यो लगेद्भाद्रस्याद्येऽसौ पूर्यते तिथौ ॥ ६०१ ॥
आद्याषाढस्यैकदिनं, त्रिंशत्त्रिंशद्दिनात्मकौ । द्वितीयाषाढनभसौ, भाद्रस्यैकं दिनं ततः ॥ ६०२ ॥
स्युर्द्वाषष्टिरेभ्य एकोऽवमरात्रो निपात्यते । एकषष्टिदिनात्मेति, सूर्यर्त्तुः प्रथमो युगे ॥ ६०३ ॥
एकषष्टिस्त्रिंशता च, गुण्या सर्वर्त्तुसंख्यया । अष्टादशशतास्त्रिंशा, एवं स्युर्युगवासराः ॥ ६०४ ॥
एवमन्यत्रापि भाव्यं, यन्त्रकं वा विलोकनीयं ।

सूर्यर्त्तुज्ञानविषये, करणं प्रतिपाद्यते । येन विज्ञातमात्रेण, सुखेन ऋतुरुह्यते ॥ ६०५ ॥
युगेऽतीतपर्वसंख्या, कार्या पञ्चदशाहता । पर्वणो वर्त्तमानस्य, विवक्षितदिनावधि ॥ ६०६ ॥
क्षिप्यन्ते तत्र तिथयः, पात्यन्तेऽवमरात्रकाः । ततस्ता द्विगुणीकृत्य, सैकषष्टिर्विधीयते ॥ ६०७ ॥
द्वाविंशेन शतेनास्या, हृते भागे यदाप्यते । तस्मिन् षड्भिर्हते शेषमतिक्रान्त ऋतुर्भवेत् ॥ ६०८ ॥
द्वाविंशशतभक्तस्य, राशेर्यच्छेषमास्थितम् । तस्मिन् द्वाभ्यां हृते लभ्या, वर्त्तमानर्त्तुवासराः ॥ ६०९ ॥
युगे प्रथमदीपाल्यां, यदि कश्चन पृच्छति । सूर्यर्त्तुः कतमोऽतीतः, कतमो वर्त्ततेऽधुना ? ॥ ६१० ॥
सप्त पर्वाण्यतीतानि, तदा तत्र युगादितः । तानि पञ्चदशघ्नानि, स्युः पञ्चाभ्यधिकं शतम् ॥ ६११ ॥
द्वाभ्यामवमरात्राभ्यां, हीनं तत् त्र्युत्तर शतम् । तद् द्वाभ्यां गुण्यते जाते, द्वे शते षड्भिरुत्तरे ॥ ६१२ ॥
तत्रैकषष्टिक्षेपे द्वे, शते ससप्तषष्टिके । एतयोर्ह्रियते भागो, द्वाविंशेन शतेन च ॥ ६१३ ॥
द्वौ लभ्येते न तौ भागं, सहेते षड्भिरित्यतः । स्थितौ द्वावेव शेषा ये, त्रयोविंशतिरंशकाः ॥ ६१४ ॥
तेषामर्द्धे कृते सार्द्धा, एकादश स्थिता इति । आगतं द्वावृतू यातौ, तृतीयो वर्त्ततेऽधुना ॥ ६१५ ॥
वर्त्तमानस्य तस्यैकादश जग्मुर्दिना इति । द्वादशोऽस्त्यधुना घस्र, इति प्रश्नस्य निर्णयः ॥ ६१६ ॥
यद्वाक्षयतृतीयायामाद्यायां यदि पृच्छति । तदा पञ्चदशघ्नानि, पर्वाण्येकोनविंशतिः ॥ ६१७ ॥
पञ्चाशीत्या समधिकं, ततो जातं शतद्वयम् । तृतीयायां पृष्टमिति, क्षिप्यन्ते तिथयस्त्रयः ॥ ६१८ ॥
साष्टाशीति शतद्वन्द्वं, जज्ञेऽथावमरात्रकैः । पञ्चभिस्त्यक्तमेतत् स्यात्, सत्र्यशीतिशतद्वयम् ॥ ६१९ ॥
अस्मिन् द्विगुणिते पञ्चशती षट्षष्टियुग्भवेत् । सैकषष्टिरियं सप्तविंशा भवति षट्शती ॥ ६२० ॥
द्वाविंशेन शतेनास्या, भागे पञ्चकमाप्यते । उद्धरन्ति सप्तदश स्युः, सार्द्धा अष्ट तेऽर्द्धिताः ॥ ६२१ ॥
पञ्चर्त्तवस्ततोऽतीताः, षष्ठोऽसौ वर्त्ततेऽधुना । अष्टौ जग्मुर्दिनान्यस्याधुना नवममस्ति च ॥ ६२२ ॥

त्रिंशतोऽपि युगर्त्तूनां, पूर्त्तेर्मासांस्तिथीनपि । पक्षांश्च कृष्णशुक्लाख्यान्, ब्रूमोऽथ समयोदितान् ॥ ६२३ ॥
आद्यो भाद्रपदश्यामप्रतिपद्यन्तमश्नुते । कार्त्तिकस्य तृतीयायां, कृष्णपक्षे द्वितीयकः ॥ ६२४ ॥
पौषस्य कृष्णपञ्चम्यां, तृतीयः पूर्त्तिमश्नुते । फाल्गुनश्यामसप्तम्यां, पूर्यते च तुरीयकः ॥ ६२५ ॥
राधश्यामनवम्यां च, पञ्चमः परिपूर्यते । शुचेरशुभ्रैकादश्यां, षष्ठः पूर्णो भवेदृतुः ॥ ६२६ ॥
पूर्णो भाद्रपदश्यामत्रयोदश्यां च सप्तमः । अमावास्यां कार्त्तिकस्य, पूर्णो भवति चाष्टमः ॥ ६२७ ॥
एते यथोक्तमासेषु, कृष्णपक्षेऽन्तमाप्नुयुः । ऋतवोऽष्टापि तीर्थेशैरित्युक्तं सर्वदर्शिभिः ॥ ६२८ ॥
पौषशुक्लद्वितीयायां, नवमर्त्तुः समाप्यते । फाल्गुन श्वेततुर्यायां, दशमोऽन्तं प्रपद्यते ॥ ६२९ ॥
एकादशोऽन्तं वैशाखशुक्लषष्ठयां बिभर्त्त्यथ । आषाढशुक्लाष्टम्यां च, द्वादशः परिपूर्यते ॥ ६३० ॥
त्रयोदशो भाद्रपददशम्यां विशदत्विषि । चतुर्दशः कार्त्तिकीकद्वादश्यां धवलद्युतौ ॥ ६३१ ॥
पौषश्वेतचतुर्दश्यां, पूर्त्ति पञ्चदशोऽश्नुते । वलक्षपक्षप्राप्तान्ताः, सप्तामी ऋतवः स्मृताः ॥ ६३२ ॥
ऋतवोऽमी पञ्चदश, युगपूर्वार्द्धभाविनः । इतः पञ्चदशोच्यन्ते, युगपश्चार्द्धभाविनः ॥ ६३३ ॥
फाल्गुनस्य प्रतिपदि, श्यामायामथ षोडश । राधकृष्णतृतीयायामन्तं सप्तदशोच्चति ॥ ६३४ ॥
आषाढासितपञ्चम्यामन्तमष्टादशो भजेत् । भाद्रानुज्ज्वलसप्तम्यां, पूर्यतेऽष्टादशाग्रिमः ॥ ६३५ ॥
कार्त्तिके विंशतितमो, नवम्यां मेचकद्युतौ । पौषस्य कृष्णैकादश्यामेकविंशतिसंख्यकः ॥ ६३६ ॥
फाल्गुनस्य त्रयोदश्यां, द्वाविंशः श्यामलत्विषि । स त्रयोविंशतितमो, राधाऽमायां प्रपूर्यते ॥ ६३७ ॥
अष्टाप्यमी कृष्णपक्षप्राप्तान्ताः पूर्यतेऽथ च । शुचिशुक्लद्वितीयायां, चतुर्विंशतिपूरणः ॥ ६३८ ॥
भाद्रस्य श्वेततुर्यायां, पञ्चविंशस्तु पूर्यते । षड्विंशतितमः षष्ठ्यां, शुभ्रायां कार्त्तिकस्य तु ॥ ६३९ ॥
स सप्तविंशतितमः, पौषाष्टम्यां सितद्युतौ । दशम्यां फाल्गुने श्वेतत्विष्यष्टाविंशतिप्रमः ॥ ६४० ॥
द्वादश्यां राध एकोनत्रिंशत्तमः सितत्विषौ । शुचिशुक्लचतुर्दश्यां, पूर्त्ति त्रिंशत्तमोऽश्नुते ॥ ६४१ ॥
त्रिंशदप्येवमृतवः, प्रोक्ताः प्राप्तसमाप्तयः । एकांतरेषु मासेषु, तिथिष्वेकान्तरास्विति ॥ ६४२ ॥
किञ्च—कर्ममासात्सूर्यमासेऽहोरात्रार्द्धं यदेधते । ऋतौ द्विभानुमासोत्थेऽहोरात्रो वर्द्धते ततः ॥ ६४३ ॥
ततश्च—कर्ममासद्वये षष्टिरहोरात्रा भवन्ति वै । सूर्यमासद्वयात्मर्त्तुस्त्वेकषष्टिदिनात्मकः ॥ ६४४ ॥
द्विकर्ममासापेक्षस्तद्भवेदृतुमृतुं प्रति । अहोरात्रः समधिकश्चतुर्मास्यां तु तद्द्वयम् ॥ ६४५ ॥
वर्षाशीतोष्णकालेषु, चतुर्मासमितेषु यत् । अधिरात्रं भवेत्पर्व, तृतीयमथ सप्तमम् ॥ ६४६ ॥

तथोक्तं ज्योतिष्करण्डे— तइयंमि य कायव्वं, अइत्तं सत्तमे य पव्वंमि । वासहिमगिम्हकाले,
चउचउमासे विहीयंते ॥ [श्लोक. २६७]

श्रावणो मार्गशीर्षश्च, चैत्रश्चेति यथाक्रमम् । वर्षाशीतोष्णकालानामादिमासाः प्रकीर्त्तिताः ॥ ६४७ ॥

सूर्यर्त्तुपूर्त्तिसमये, कर्ममासव्यपेक्षया । अहोरात्रः समधिकः, स्यादेकैक इति स्फुटम् ॥ ६४८ ॥
आषाढे च भाद्रपदे, कार्त्तिके पौष एव च । फाल्गुने माधवे चातिरात्रं नान्येषु कर्हिचित् ॥ ६४९ ॥
ऋतुप्रारम्भका मासा, अप्येत एव कीर्त्तिताः । ज्योतिष्करण्डप्रज्ञप्तिवृत्त्यादेर्मतमेतकत् ॥ ६५० ॥

भगवतीवृत्तौ तु—प्रावृट् श्रावणादिः, वर्षारात्रोऽश्वयुजादिः, शरन्मार्गशीर्षादिः, हेमन्तो माघादिः, वसन्तश्चैत्रादिः, ग्रीष्मो ज्येष्ठादिरिति—पक्षान्तरं दृश्यते ।

इदं च पक्षान्तरं जंबूद्वीपप्रज्ञप्तिसूत्रेऽपि उत्सर्पिणीनिरूपणे 'चउद्दस पढमसमए' इत्यस्मिन् सूत्रे संगृहीतमस्ति, यतस्तत्र श्रावणे मासि उत्सर्पिणी लगति, तत्प्रथमसमय एव चतुर्दश काला युगपल्लगन्ति, तन्मध्ये ऋतुरप्यस्ति, तत ऋतोरप्यारम्भः श्रावणे मासि भवतीति पक्षान्तरमिति ज्ञेयम् ।

किञ्च दक्षिणायनारंभकोऽपि श्रावण एव, चातुर्मासकारम्भकोऽप्ययमेव, तेन ऋत्वारम्भकोऽप्यसाविति पक्षोऽपि युज्यत एवेति ।

यदि वा सूर्यवर्षमाश्रित्य युगे ऋतवः प्रथमाषाढपूर्णिमादयः स्युः, कर्मवर्षस्य तु ऋतवः श्रावणासितप्रतिपदाद्याः स्युरित्यतो वा पक्षान्तरमिदं भावीति संभाव्यते, तत्त्वं त्विह तद्विद्वेद्यमिति ।

ऋतूनामित्यमी मासा, यथाशास्त्रं निरूपिताः । अथर्त्तूपूरकतिथिज्ञानाय करणं ब्रुवे ॥ ६५१ ॥
जिज्ञासितर्त्तार्या संख्या, द्विगुणा सा विधीयते । रूपोना क्रियते द्वाभ्यां, गुण्यते च ततः पुनः ॥ ६५२ ॥
द्विः स्थाप्यतेऽथ चैकस्याः, कृतेऽर्द्धे ज्ञायते सुखम् । युगातीतपर्वयुक्ताभीष्टर्त्तोरन्तिमा तिथिः ॥ ६५३ ॥
यथा युगे तिथौ कस्यां, प्रथमर्त्तुः समाप्यते । इति प्रश्ने ऋतुसंख्यैकः स द्विगुणीकृतः ॥ ६५४ ॥
द्वौ स्यातां तौ च रूपोनावेकः स द्विगुणः पुनः । द्वावेव तौ द्विः स्थाप्येते, एकत्रार्द्धे कृते पुनः ॥ ६५५ ॥
एकोऽवशिष्ट एवं च, द्विपर्वातिक्रमे युगे । ऋतुराद्यः प्रतिपदि, संपूर्णः प्रथमे तिथौ ॥ ६५६ ॥
जिज्ञासिते द्वितीयर्त्तौ, द्वावेव द्विगुणीकृतौ । जाताश्चत्वार एकोनास्त्रयस्ते द्विगुणीकृताः ॥ ६५७ ॥
जाताः षट् ते स्थापिता, द्विरेकत्र चार्द्धितास्त्रयः । अन्यत्र तु षडेव स्युस्तदेवं प्रश्ननिर्णयः ॥ ६५८ ॥
युगादितः षट् पर्वाणि, व्यतीत्यर्त्तुर्द्वितीयकः । तृतीयायां तिथौ पूर्ण, एवं सर्वत्र भावना ॥ ६५९ ॥
त्रिंशत्तमे ऋतौ जिज्ञासिते त्रिंशद् द्विताडिता । षष्टिः स्यादथ सैकोनषष्टी रूपोज्झिता भवेत् ॥ ६६० ॥
भूयः सा द्विगुणा जातमष्टादशोत्तरं शतं । द्विः संस्थाप्य च तस्यार्द्धे, कृत एकत्र शिष्यते ॥ ६६१ ॥
एकोनषष्टिरित्येवं, विवक्षितविनिश्चयः । अष्टादशोत्तरे पर्वशतेऽतीते युगादितः ॥ ६६२ ॥
एकोनषष्टितमायां, तिथौ संपूर्णतां दधौ । ऋतुस्त्रिंशत्तम इति, ज्ञेयं तत्त्वमिदं त्विह ॥ ६६३ ॥
नैकोनषष्टिस्तिथयः, स्युरित्येकोनषष्टिका । ह्रियते पञ्चदशभिः, स्याच्छेषार्द्धसमा तिथिः ॥ ६६४ ॥

ततश्च–

युगस्य पञ्चमे वर्षे, आषाढे प्रथमेऽह्न च । पूर्णः शुक्लचतुर्दश्यामृतुस्त्रिंशत्तमाऽन्तिमः ॥ ६६५ ॥

अथ चन्द्रर्त्तुस्वरूपमुच्यते—

सर्वर्क्षभोगो नक्षत्रपर्याय इति कथ्यते । ते च भानोर्युगे पञ्च, सप्तषष्टिर्निशापतेः ॥ ६६६ ॥

एकैकस्मिंश्च नक्षत्रपर्याये ऋतवो हि षट् । ततोऽर्कस्य युगे त्रिंशत्, द्व्युत्तरेन्दोश्चतुःशती ॥ ६६७ ॥

एकैकश्च मृगाङ्कर्त्तुरहोरात्रचतुष्टयी । सप्तत्रिंशदहोरात्रभागाश्च सप्तषष्टिजाः ॥ ६६८ ॥

विधोर्यदेकनक्षत्रपर्याये सप्तविंशतिः । अहोरात्राः सप्तषष्टिभागास्तथैकविंशतिः ॥ ६६९ ॥

तेषां भागे हृते षड्भिर्लब्धा दिनचतुष्टयी । शेषं दिनत्रयं तच्च, सप्तषष्ट्या हतं भवेत् ॥ ६७० ॥

द्विशत्येकोत्तराऽत्रैकविंशत्यंशविमिश्रणे । द्वाविंशे द्वे शते सप्तषष्ट्यंशानामिमे पुनः ॥ ६७१ ॥

षड्भक्ते सप्तषष्ट्यंशाः, सप्तत्रिंशद्यथोदिताः । इदं चन्द्रर्त्तुमानं च, चन्द्रसर्वर्त्तुसंख्यया ॥ ६७२ ॥

चतुःशत्या द्व्युत्तरया, गुण्यते चेद्भवन्ति तत् । अष्टादश शतास्त्रिंशा, यथोक्ता युगवासराः ॥ ६७३ ॥

अथ चन्द्रर्त्तुज्ञानाय करणमुच्यते—

युगातीतपर्वसंख्या, कार्या पञ्चदशाहता । विवक्षितदिनात्प्राच्या, वर्त्तमानस्य पर्वणः ॥ ६७४ ॥

तिथयस्तत्र योज्यन्तेऽवमरात्रोज्झिताथ सा । चतुस्त्रिंशशतहता, पञ्चाढ्यत्रिंशताञ्चिता ॥ ६७५ ॥

शतैर्दशोत्तरैः षड्भि–र्विभाज्यैवं कृते सति । लभ्यन्तेऽतीतऋतवः, शेषांशाश्चोद्धरन्ति ये ॥ ६७६ ॥

तेषां भागे चतुस्त्रिंशशतेनात्र यदाप्यते । ते दिना वर्त्तमानर्त्तोः, शेषा अंशा दिनस्य च ॥ ६७७ ॥

द्वितीयपर्वैकादश्यां, चन्द्रर्त्तुः कतमो युगे । इति प्रश्नेऽतीतमेकं पर्व पञ्चदशाहतम् ॥ ६७८ ॥

जाता पञ्चदशैतेषु, क्षिप्यन्ते दश वासराः । एकादश्याः प्रागतीता, जातैवं पञ्चविंशतिः ॥ ६७९ ॥

अवमरात्रस्य त्वत्र संभवो नास्तीति ज्ञेयम् ।

चतुस्त्रिंशशतघ्नाऽसौ, त्रयस्त्रिंशच्छती भवेत् । पञ्चाशदधिकास्यां च, पञ्चाढ्यां त्रिंशतीं क्षिपेत् ॥ ६८० ॥

शतानि पञ्चपञ्चाशान्येवं षट्त्रिंशदेषु च । शतैर्दशोत्तरैः षड्भि–र्भक्तेष्वाप्येत पञ्चकम् ॥ ६८१ ॥

अंशाश्च शेषास्तिष्ठन्ति पञ्चाढ्यानि शतानि षट् । चतुस्त्रिंशशतेनैषां, भागे लब्धं चतुष्टयम् ॥ ६८२ ॥

एकोनसप्ततिश्चांशाः, शेषास्ते द्व्यपवर्त्तिताः । लब्धाः सार्द्धाश्चतुस्त्रिंशत्सप्तषष्टिलवा इति ॥ ६८३ ॥

अतीताः पञ्च ऋतवः, षष्ठर्त्तोश्च गता दिनाः । चत्वारः पञ्चमस्याह्नः, सप्तषष्टिभवा लवाः ॥ ६८४ ॥

गताः सार्द्धाश्चतुस्त्रिंशत्, सार्द्धौ द्वौ सप्तषष्टिजौ । चन्द्रर्तौ स्तस्तदा षष्ठे, भागौ न्यूनतयाञ्चितौ ॥ ६८५ ॥

एवमन्यत्रापि भाव्यं ।

अथ चन्द्रर्त्तुसंपूर्त्तितिथेः करणमुच्यते । तत्र बोध्यो ध्रुवराशिः, पञ्चोपेतं शतत्रयम् ॥ ६८६ ॥

चतुस्त्रिंशशतच्छिन्नाहोरात्रस्य लवा अमी । ज्ञेया ज्ञेयो ध्रुवराशिर्नक्षत्रकरणेऽप्यसौ ॥ ६८७ ॥
अयं द्व्युत्तरवृद्धेन, ध्रुवराशिर्निहन्यते । राशिनैकादिना द्व्याढ्यचतुःशततमावधि ॥ ६८८ ॥
एकेनाद्ये मृगाङ्कर्त्तौ, ध्रुवराशिर्निहन्यते । जिज्ञासिते द्वितीये तु, ध्रुवाङ्कस्ताड्यते त्रिभिः ॥ ६८९ ॥
एवं च–द्व्याढ्यचतुःशततमजिज्ञासायां तु ताड्यते । ध्रुवराशिस्त्र्युत्तराष्टशतमानेन राशिना ॥ ६९० ॥
राशिर्द्व्युत्तरया वृद्ध्या, वर्द्धमानो हि जायते । रूपोनो द्विगुणः स्वस्वाभीष्टचन्द्रर्त्तुमानतः ॥ ६९१ ॥
यथा तृतीये चन्द्रर्त्तौ, वृद्धया द्व्युत्तरया भवेत् । गुणकः पञ्चमः सोऽस्माद्रूपोनो द्विघ्न एव हि ॥ ६९२ ॥
ततस्तथा ताडितोऽसौ, ध्रुवराशिर्विभज्यते । चतुस्त्रिंशशतेनायं, तिथिश्चन्द्रर्त्तुपूर्त्तिभाग् ॥ ६९३ ॥
यथा द्वितीयचन्द्रर्त्तुपृच्छायां त्रिगुणीकृता । पञ्चाढ्य त्रिशती पञ्चदशाढ्याः स्युः शता नव ॥ ६९४ ॥
चतुस्त्रिंशशतेनैषां, भागे षट् करमागताः । शेषमेकादशशतं, तद्द्विकेनापवर्त्यते ॥ ६९५ ॥
अध्यर्द्धाः पञ्चपञ्चाशत्, लवाः स्युः सप्तषष्टिजाः । तदेवमिष्टचन्द्रर्त्तुनिश्चयोऽयमुपस्थितः ॥ ६९६ ॥
युगादेः षट्स्वतीतेषु, दिनेषु सप्तमस्य च । अध्यर्द्धैः पञ्चपञ्चाशतांशकैः सप्तषष्टिजैः ॥ ६९७ ॥
व्यतीतैः स्यान्मृगाङ्कर्त्तुर्द्वितीयः पूर्णतां गतः । कार्या विचक्षणैरेवं, सर्वत्रान्यत्र भावना ॥ ६९८ ॥
अथ सूर्यर्त्तुसंपूर्त्तौ, भोग्यमिन्दोस्तथा रवेः । यन्नक्षत्रं भवेत्तस्य, ज्ञानाय करणं ब्रुवे ॥ ६९९ ॥
ध्रुवाङ्कराशिर्ज्ञेयोऽत्र, पञ्चोपेतं शतत्रयम् । चतुस्त्रिंशशतच्छिन्नाहोरात्रांशात्मकोऽस्त्ययम् ॥ ७०० ॥
एकादिद्व्युत्तरेणामुं, त्रिंशदन्तेन राशिना । हत्वा शोधनकान्यस्माद्वक्ष्यमाणानि शोधयेत् ॥ ७०१ ॥
तेषु यच्छोध्यमानेषु, सर्वाग्रेण न शुध्यति । सूर्यर्त्तुपूर्त्तौ नक्षत्रं, स्याच्चन्द्रस्य रवेरपि ॥ ७०२ ॥
राशेर्द्व्युत्तरवृद्धस्य, ज्ञेया प्राग्वत्प्ररूपणा । बौध्या शोधनकानां तु, प्राज्ञैः प्रज्ञापनाऽसकौ ॥ ७०३ ॥
अर्द्धक्षेत्रे सप्तषष्टिर्ऋक्षे शोधनकं स्मृतम् । समक्षेत्रे चतुस्त्रिंशं, शतं शोधनकं भवेत् ॥ ७०४ ॥
सार्द्धक्षेत्रे च नक्षत्रे, स्यादेकाढ्यं शतद्वयम् । इन्दोरभिजितो भानि, शोध्यान्यर्कस्य पुष्यतः ॥ ७०५ ॥
ऋक्षस्याभिजितः पूर्वं, द्विचत्वारिंशदंशकान् । राशेर्विशोधयेत्तस्माच्चन्द्रयुक्तर्क्षचिन्तने ॥ ७०६ ॥
सूर्यर्क्षयोगचिन्तायां, चादौ पुष्यस्य शोधयेत् । अष्टाशीतिं ततः शोध्यान्युडूनि प्रोक्तवत्क्रमात् ॥ ७०७ ॥
यथा प्रथमसूर्यर्त्तुः, कस्मिन्नुडुपशालिनी । नक्षत्रे पूर्णतामेति, युगे तत्रेदमादिशेत् ॥ ७०८ ॥
प्रागुक्तो ध्रुवराशिर्यः, पञ्चोपेतं शतत्रयम् । एकेन गुणितः सोऽयं, तावानेव व्यवस्थितः ॥ ७०९ ॥
तस्मादभिजितः शुद्धा, द्वाचत्वारिंशदादितः । सत्रिषष्टि शतद्वन्द्वं, शेषं तस्माच्च शोध्यते ॥ ७१० ॥
श्रुतेः शतं चतुस्त्रिंशमथ शेषं शतं स्थितम् । एकोनत्रिंशमस्माच्च, धनिष्ठा तु न शुध्यति ॥ ७११ ॥
ततश्च–एतावत्सु धनिष्ठाया, भुक्तेष्वंशेष्विहेन्दुना । सूर्यर्त्तुः प्रथमः पूर्ण, इति पूर्वोक्तनिर्णयः ॥ ७१२ ॥
अथ प्रथमसूर्यर्त्तुपूर्त्तौ सूर्यर्क्षमुच्यताम् । ध्रुवाङ्कोऽत्रापि पूर्वोक्तः, पञ्चोपेतं शतत्रयम् ॥ ७१३ ॥

एतच्चैकेन गुणितं, तादृगेव व्यवस्थितम् । अष्टाशीतिः शोध्यतेऽस्मात्, पुष्यस्य प्रथमं ततः ॥ ७१४ ॥
शेषे च द्वे शते सप्तदशाढ्ये शोध्यते ततः । अश्लेषायाः सप्तषष्टिः, शेषं सार्द्धं शतं स्थितम् ॥ ७१५ ॥
शतमस्माच्चतुस्त्रिंशं, मघासंबन्धि शोध्यते । षोडशावस्थिताः शेषास्तदेष प्रश्ननिर्णयः ॥ ७१६ ॥
सूर्येण पूर्वफाल्गुन्या, भागेषु षोडशस्विह । भुक्तेषु प्रथमोऽर्कर्तुः, संपूर्ण इति बुध्यताम् ॥ ७१७ ॥
लोके तु–
मासौ मार्गादिकौ द्वौ द्वावृतुर्हेमन्त एव च । शिशिरश्च वसन्तश्च, ग्रीष्मो वर्षास्तथा शरत् ॥ ७१८ ॥
ऋतुभिश्चायने भानोः, शिशिराद्यैस्त्रिभिस्त्रिभिः । उदग्दक्षिणाभिधे ताभ्यां, द्वाभ्यामर्कस्य वत्सरः ॥ ७१९ ॥
इति श्रूयते ॥ इति ऋतुप्रकरणं ॥
ऋतौ ऋतौ द्वौ द्वौ मासावित्यब्दे द्वादशैव ते । नामान्येषां द्विधा लौकिकानि लोकोत्तराणि च ॥ ७२० ॥
तत्र लौकिकान्येवं—
स्याच्छ्रावणो भाद्रपद, आश्विनः कार्त्तिकोऽपि च । मार्गशीर्षश्च पौषश्च, माघः फाल्गुन एव च ॥ ७२१ ॥
चैत्रस्तथा च वैशाखो, ज्येष्ठाऽऽषाढाविति क्रमात् । लोकोत्तराण्यथोच्यन्ते, नामान्येषां यथाक्रमम् ॥ ७२२ ॥
अभिनन्दित इत्याद्यो, द्वितीयः स्यात्प्रतिष्ठितः । तृतीयो विजयाख्यः स्याच्चतुर्थः प्रीतिवर्द्धनः ॥ ७२३ ॥
पञ्चमो भवति श्रेयान्, षष्ठः शिव इति स्मृतः । सप्तमः शिशिरः ख्यातो, हिमवानिति चाष्टमः ॥ ७२४ ॥
वसंतमासो नवमस्ततः कुसुमसंभवः । एकादशो निदाघो द्वादशो वनविरोहकः ॥ ७२५ ॥

अत्र सूर्यप्रज्ञप्तिवृत्तौ अभिनन्दितस्थानेऽभिनन्दन इति, वनविरोहस्थाने वनविरोधीति दृश्यते ।

प्रतिमासं च पक्षौ द्वौ, बहुलः शुक्ल एव च । आद्यः पिधीयमानेन्दुर्मुच्यमानविधुः परः ॥ ७२६ ॥
प्रतिपक्षं पञ्चदश, दिवसा रात्रयोऽपि च । प्रतिपद्दिवसो यावदन्ते पञ्चदशीदिनः ॥ ७२७ ॥
पूर्वांगनामा प्रथमः, परः सिद्धमनोरमः । मनोहरस्तृतीयः स्याद्यशोभद्रस्तुरीयकः ॥ ७२८ ॥
परो यशोधरः षष्ठः, सर्वकामसमृद्धकः । सप्तमस्त्विन्द्रमूर्द्धाभिषिक्तः सौमनसोऽष्टमः ॥ ७२९ ॥
धनञ्जयस्तु नवमोऽर्थसिद्धो दशमः स्मृतः । एकादशश्चाभिजातो, द्वादशोऽत्यशनाभिधः ॥ ७३० ॥
शतञ्जयस्तदग्र्यः स्यादग्निवेश्मा चतुर्दशः । पञ्चदशस्तूपशमसंज्ञको दिवसो मतः ॥ ७३१ ॥
अह्नां पञ्चदशानामप्येताः संज्ञाः श्रुते स्मृताः । अथाह्नयक्रमः पञ्चदशानामुच्यते निशाम् ॥ ७३२ ॥
उत्तमा १ च सुनक्षत्रा, २ एलापत्या ३ यशोधरा ४ । सौमनसा ५ श्रीसम्भूता ६ विजया ७ वैजयन्त्यपि ८ ॥ ७३३ ॥
जयन्ती ९ नवमी ज्ञेया, दशमी चापराजिता १० । इच्छा ११ तथा समाहारा, १२ भवेत्तेजा १३ स्त्रयोदशी ॥ ७३४ ॥
अतितेजा १४ स्ततो देवानंदा १५ पञ्चदशी भवेत् । नामान्तरं भवत्यस्या, नूनं निरतिरित्यपि ॥ ७३५ ॥

इत्यहोरात्राणां दिनरात्रिनामानि ।

तिथयोऽपि स्मृताः पञ्चदश द्वेधा भवन्ति ताः । दिनरात्रिविभेदेन तासां नामान्यथ ब्रुवे ॥ ७३६ ॥
नन्दा १ भद्रा २ जया ३ तुच्छा, ४ पूर्णे ५ त्यावर्त्यते त्रिशः । पञ्चैवं त्रिगुणाः पञ्चदशोक्तास्तिथयो जिनैः ॥ ७३७ ॥
नन्दाख्या प्रतिपत् षष्ठी, भवेदेकादशी तथा । द्वितीया सप्तमी द्वादश्येता भद्राभिधा मताः ॥ ७३८ ॥
जयास्तृतीयाष्टम्यौ च, त्रयोदशी च कीर्त्तिताः । चतुर्थी नवमी भूतेष्टा च तुच्छाह्वयाः स्मृताः ॥ ७३९ ॥
पञ्चमी दशमी पञ्चदशी पूर्णाभिधा इमाः । अहस्तिथीनां नामानि, ज्ञेयान्येवं यथाक्रमम् ॥ ७४० ॥
उग्रवती भोगवती, तृतीया च यशोमती । सर्वसिद्धा शुभनामा, पञ्चैतास्तिथयस्त्रिशः ॥ ७४१ ॥

अयं भावः—

उग्रवत्यभिधानेन, नन्दातिथि निशातिथिः । भद्रातिथीनां रजनीतिथिर्भोगवतीति च ॥ ७४२ ॥
यशोमतीति च ज्ञेया, जयानां यामिनीतिथिः । तुच्छा रात्रितिथिर्ज्ञेया सर्वसिद्धेति नामतः ॥ ७४३ ॥
शुभनामा भवेत्पूर्णा, तिथि रात्रितिथिः स्फुटम् । एवं पञ्चदश ज्ञेया, रजनीतिथयो बुधैः ॥ ७४४ ॥

एषां पञ्चदशानां तिथीनां स्वामिनश्चैवं लौकिकशास्त्रेषु निरूपिताः—

तिथिपाश्चतुर्मुख १ विधातृ २ विष्णवो ३ यम ४, शीतदीधिति ५ विशाख ६ वज्रिणः ७ ।
वसु ८ नाग ९ धर्म १० शिव ११ तिग्मरश्मयो १२, मदनः १३ कलि १४ स्तदनु विश्व १५ इत्यपि ॥ ७४५ ॥
तिथौ हि दर्शसंज्ञके, पितॄनुशन्त्यधीश्वरान् । त्रयोदशीतृतीययोः, स्मृतस्तु वित्तपोऽपरैः ॥ ७४६ ॥
मतांतरे च—वह्नि १ र्विरञ्चो २ गिरिजा ३ गणेशः ४, फणी ५ विशाखो ६ दिनकृत् ७ महेशः ८ ॥
दुर्गा ९ न्तको १० विश्व ११ हरि १२, स्मराश्च १३ शर्वः १४ शशी १५ चेति पुराणदृष्टाः ॥ ७४७ ॥

एषां देवानां प्रतिष्ठादौ च तत्तत्तिथीनामुपयोगः, जिनस्य तु प्रतिष्ठादौ सर्वेऽपि तिथिनक्षत्रकरणक्षणानाम् शुद्धत्वे सत्युपयोगिन एव, तस्य सर्वदेवाधिदेवत्वादित्याद्यारम्भसिद्धिवार्त्तिके ।

अहोरात्रतिथीनां च, विशेषोऽयमुदीरितः । भानूत्पन्ना अहोरात्रास्तिथयः पुनरिन्दुजाः ॥ ७४८ ॥

उक्तं च—"सूरस्स गमणमंडलविभागनिप्फाइया अहोत्ता । चंदस्स हाणिवुड्ढीकएण निप्फज्जए उ तिही" ॥

[ज्योतिष्करंडक श्लोक ९६]

किं च—अहोरात्रो भवेदर्कोदयादर्कोदयावधि । द्वाषष्टितमभागोनाहोरात्रप्रमिता तिथिः ॥ ७४९ ॥
इत्यादिभिर्विशेषैः, स्यादहोरात्रात्पृथक् तिथिः । द्विधात्वं च भवेत्तस्या, दिनरात्र्यंशकल्पनात् ॥ ७५० ॥
यद्वदेकोऽप्यहोरात्रः, सूर्यजातो द्विधाकृतः । दिनरात्रिविभेदेन, संज्ञाभेदप्ररूपणात् ॥ ७५१ ॥
तथैव तिथिरेकापि, शशिजाता द्विधा कृता । दिनरात्रिविभेदेन, संज्ञाभेद प्ररूपणात् ॥ ७५२ ॥
एकैकस्यास्तिथेः कालमानमेवं प्रकीर्त्तितम् । मुहूर्त्तानां त्रिंशदेकन्यूभागास्तथोपरि ॥ ७५३ ॥

स्युर्द्वात्रिंशन्मुहूर्त्तस्यैकस्य द्वाषष्टिकल्पिताः । अस्योत्पत्तिः कथमिति ?, श्रद्धा चेत् श्रूयतां तदा ॥ ७५४ ॥
अहोरात्रस्य भागा द्वाषष्टिभागीकृतस्य हि । एकषष्टिस्तिथेर्मानमेकैकस्य यदीरितम् ॥ ७५५ ॥
द्वाषष्टिजांशरूपैकषष्टिस्तत्त्रिंशता हता । अहोरात्रमुहूर्त्तैः स्यात्त्रिंशाष्टादशशत्यहो ॥ ७५६ ॥
एते चांशा द्वाषष्ट्यंशीकृतसकलतिथिमुहूर्त्तानाम् । सन्तीति द्वाषष्ट्या मुहूर्त्तकरणाय भजनीयाः ॥ ७५७ ॥
ततो मुहूर्त्ता एकोनत्रिंशद्द्वात्रिंशदंशकाः । द्वाषष्टिजा मुहूर्त्तस्यागतास्तैश्च तिथेर्मितिः ॥ ७५८ ॥
कालेन चेयता पञ्चदशांशश्चतुरंशकः । द्वाषष्ट्यंशीकृतस्येन्दोर्हीयते वर्द्धते यथा ॥ ७५९ ॥
ततश्च—यत्तिथिश्चन्द्रजेत्युक्तं, तदप्येवं विनिश्चितम् । इन्दोः पञ्चदशांशस्य, हानिवृद्ध्यनुवर्त्तनात् ॥ ७६० ॥
इति तिथिमाननिरूपणं ।

सांप्रतं चेप्सितदिने, कियन्मानेप्सिता तिथिः । इति ज्ञानाय करणं, यथाशास्त्रं निरूप्यते ॥ ७६१ ॥
अभीष्टतिथिपर्यन्तस्तिथिराशिर्युगादितः । द्वाषष्ट्या हियते लब्धं, त्याज्यं शेषं तु यत्स्थितम् ॥ ७६२ ॥
तदेकषष्ट्या गुणितं, द्वाषष्ट्या प्रविभज्यते । लब्धमत्रापि च त्याज्यं, शेषास्तिष्ठन्ति ये लवाः ॥ ७६३ ॥
तावन्मानाऽभीष्टतिथिर्विवक्षितदिने भवेत् । उदाहरणमस्याथ, करणस्य निशम्यताम् ॥ ७६४ ॥
युगस्य प्रथमे चन्द्रवर्षे मासे तथाऽऽश्विने । कियन्माना भवेच्छुक्लपञ्चमीत्यत्र कथ्यते ॥ ७६५ ॥
तिथिराशिर्भवत्येतत्पञ्चम्यन्तो युगादितः । अशीतिसंख्यो द्वाषष्ट्या, भक्तेऽस्मिन्नेक आप्यते ॥ ७६६ ॥
स च त्याज्यः शेषमष्टादश तान् परिताडेयत् । एकषष्ट्या स्यात्ततोऽष्टानवत्याढ्यं सहस्रकम् ॥ ७६७ ॥
द्वाषष्ट्याऽस्मिन् हृते लब्धं, त्यक्तं शेषमिह स्थितम् । द्वाषष्ट्यंशाश्चतुश्चत्वारिंशदित्येष निर्णयः ॥ ७६८ ॥
युगस्याद्ये चन्द्रवर्षे, धवलाश्विनपञ्चमी । चतुश्चत्वारिंशदंशमानाऽस्तीत्यत्र भावना ॥ ७६९ ॥

अत्र चेयं वासना—द्वाषष्ट्या हि तिथिभिः परिपूर्णा एकषष्टिरहोरात्रा भवन्ति, ततः परिपूर्णाहोरात्रपातनार्थं द्वाषष्ट्या ईप्सिततिथिराशेर्विभागः क्रियते, विभागे, च कृते यच्छेषमुपलभ्यते, तद्यदेकषष्टिगुणं क्रियते तदेकैकस्यास्तिथेर्द्वाषष्टिभागीकृताहोरात्रसत्कैकषष्ठिभागप्रमाणत्वादिति ज्ञेयम् ।

युगेऽथावमरात्राणां, स्वरूपं किञ्चिदुच्यते । भवन्ति ते च षड् वर्षे, तथा त्रिंशद्युगेऽखिले ॥ ७७० ॥
एकैकस्मिन्नहोरात्रे, एको द्वाषष्टिकल्पितः । लभ्यतेऽवमरात्रांश, एकवृद्ध्या यथोत्तरम् ॥ ७७१ ॥
कर्ममासे ततः पूर्णा, त्रिंशद् द्वाषष्टिजा लवाः । लभ्यन्तेऽवमरात्रस्य, तत एवोच्यते बुधैः ॥ ७७२ ॥
विश्लेषे विहिते येऽशाः, शेषाः कर्मेन्दुमासयोः । त्रिंशद् द्वाषष्टिजाः कर्ममासस्यैतेऽवमांशकाः ॥ ७७३ ॥
उक्तं च—"चंदउडुमासाणं, अंसा जे दिस्सए विसेसंमि । ते ओमरत्तभागा, भवंति मासस्स नायव्वा" ॥
[ज्योतिष्करंडक श्लोक. १०९]
कर्ममासद्वये पूर्णे, ततः षष्टिदिनात्मके । संपूर्णोऽवमरात्रः स्यादेकषष्टितमेदिने ॥ ७७४ ॥

अयं भावः—

द्वाषष्टिरंशाः कल्प्यन्तेऽहोरात्रस्यादिमेऽथ च । तत्रैकषष्टिभागात्मा, संपूर्णा प्रथमा तिथिः ॥ ७७५ ॥
एको द्वाषष्टिभागो योऽहोरात्रस्यावशिष्यते । एकांशेन द्वितीयापि, तिथिस्तत्र समाविशत् ॥ ७७६ ॥
एको द्वाषष्टिभागोऽस्या, अतीतः प्रथमे दिने । ततः षष्ट्यंशात्मिकेयमहोरात्रे द्वितीयके ॥ ७७७ ॥
द्वाषष्ट्यंशद्वये तस्य, शेषेऽसौ पूर्णतां गता । द्वाभ्यां भागाभ्यां प्रविष्टा, तृतीयाऽस्मिंस्ततस्तिथिः ॥ ७७८ ॥
अहोरात्रे तृतीयेऽथ, भागास्तुर्यतिथेस्त्रयः । प्रविशन्त्यथ पञ्चम्याश्चत्वारोंऽशास्तुरीयके ॥ ७७९ ॥
एवमेकैकभागेन, हीयते प्राक्तनी तिथिः । वर्द्धते प्रत्यहोरात्रं, तिथिरागामिनी पुनः ॥ ७८० ॥
एकत्रिंशत्तमतिथेरेवं त्रिंशत्तमे दिने । त्रिंशदंशाः प्रविष्टाः स्युस्ततस्तस्मिन् दिने खलु ॥ ७८१ ॥
द्वात्रिंशदंशप्रमिता, तिथिस्त्रिंशत्तमी भवेत् । त्रिंशद्द्वाषष्ट्यंशमाना, चैकत्रिंशत्तमी तिथिः ॥ ७८२ ॥
क्रमाच्च—द्वावंशौ स्तः षष्टितमतिथेः षष्टितमे दिने । एकषष्टितमतिथेस्तत्र षष्टिः स्युरंशकाः ॥ ७८३ ॥
एकषष्टितमतिथेश्चैकषष्टितमे दिने । एकोंऽशः स्यात्ततो द्वाषष्टितमी चाखिला तिथिः ॥ ७८४ ॥
एवं च द्वाषष्टितमी, प्रविष्टा निखिला तिथिः । एकषष्टिभागरूपाऽत्रैकषष्टितमे दिने ॥ ७८५ ॥
एकषष्टितमदिनस्याद्यो द्वाषष्टिजो लवः । एकषष्टितमतिथेश्चरमोऽसौ विभाव्यताम् ॥ ७८६ ॥
ततश्च द्वाषष्टितमोऽप्यत्रैवान्ते गतस्तिथिः । एवमस्मिन्नहोरात्रे, द्वे तिथी पूर्णतां गते ॥ ७८७ ॥
द्वाषष्टितमघस्रस्य, ततः सूर्योदयक्षणे । उपस्थिता पूर्वरीत्या, द्राक् त्रिषष्टितमी तिथिः ॥ ७८८ ॥
एवं च द्वाषष्टितमी, नाप्ता सूर्योदयं तिथिः । पतितेति ततो लोके, शुभकार्येष्वनादृता ॥ ७८९ ॥

तथाहुः—"एक्कंमि अहोरत्ते, दोऽवि तिही जत्थ निहणमेज्जासु । सोऽत्थ तिही परिहायइ सुहुमेण हविज्ज सो चरिमो" ॥ [ज्योतिष्करंडक श्लो. १११]

'सुहुमेणत्ति' सूक्ष्मेण—अतिश्लक्ष्णेन द्वाषष्टितमरूपतया एकैकेन भागेन हीनेन परिहीयमानाया द्वाषष्टितमायास्तिथेः स एकषष्टितमो दिवसश्चरम इति,

तथाहि—युगस्याद्यप्रतिपदश्चतुष्पर्वव्यतिक्रमे । लभतेऽवमरात्रत्वमेकषष्टितमा तिथिः ॥ ७९० ॥
आश्विनप्रतिपत् कृष्णा, सा ज्ञेयाऽस्यां यतोऽविशत् । तिथिर्द्वितीया सर्वांशैरेकषष्टिलवात्मिका ॥ ७९१ ॥

ज्योतिष्करण्डके तु— "तइयंमि ओमरत्तं, कायव्वं सत्तमंमि पक्खंमि । वासहिमगिम्हाकाले, चउचउमासे विधीयंते" ॥ [श्लोक ११२]

इत्युक्तं. एतदनुसारेण च आषाढप्रतिपद आरभ्य यथोत्तरमेकषष्टितमासु भाद्रपद-कृष्णप्रतिपदादिष्ववमरात्राः स्युः, परं ज्योतिष्करण्डकटीकायां श्रीमलयगिरिपादैरेवमुक्तं—इहाषाढाद्या लोके ऋतवः प्रसिद्धिमैयरुस्ततो लौकिकव्यवहारमपेक्ष्याषाढादारभ्य प्रतिदिवसमेकैकद्वाषष्टिभागहान्या वर्षाकालादिगतेषु तृतीयादिपर्वसु यथोक्ता अवमरात्राः प्रतिपाद्यन्ते, परमार्थतः पुनः श्रावणबहुलप्रतिपल्लक्षणाद्युगादित आरभ्य चतुश्चतुःपर्वातिक्रमे वेदितव्या इति ज्ञेयं ।

आश्विनस्य तृतीयाया, असिताया: प्रभृत्यथ । कृष्णा तृतीया मार्गस्यावमस्तुर्यान्विता भवेत् ॥ ७९२ ॥
प्रभृत्यस्याश्च पञ्चम्या, कृष्णा माघस्य पञ्चमी । युक्ता पतितया षष्ठ्या, प्राप्नोत्यवमरात्रताम् ॥ ७९३ ॥
एवं च–
आश्विनो मार्गशीर्षश्च, माघश्चैत्रस्तथा पर: । ज्येष्ठस्तत: श्रावणश्च, पुनरप्येत एव षट् ॥ ७९४ ॥
पुनरप्याश्विनो मार्गो, द्वितीय: पौष एव च । युगाद्यर्द्धे पञ्चदश, मासा: सावमरात्रका: ॥ ७९५ ॥
आश्विनाद्येषु मार्गान्तेष्वष्टास्वाद्येष्वनुक्रमात् । विषमा: प्रतिपन्मुख्या:, स्यु: कृष्णास्तिथयोऽवमा: ॥ ७९६ ॥
माघादिषु स्युर्द्वितीयपौषान्तेषु च सप्तसु । समसंख्या द्वितीयाद्या, उज्ज्वलास्तिथयोऽवमा: ॥ ७९७ ॥
विषमेभ्योऽवमेभ्यश्चानन्तरास्तिथय: समा: । पतिता: स्युर्द्वितीयाद्यास्तेऽष्ट प्रतिपदन्विता: ॥ ७९८ ॥
अवमेभ्य: समेभ्यस्तु, विषमास्तिथय: खलु । भवन्ति पतिता: सप्त, तृतीयाद्या यथोदिता: ॥ ७९९ ॥
चैत्रो ज्येष्ठ: श्रावणोऽश्वयुग्मार्गो माघ एव च । पुन: षडेते चैत्रोऽथ, ज्येष्ठोऽन्त्याषाढ एव च ॥ ८०० ॥
युगान्त्यार्द्धे पञ्चदश, मासा: सावमरात्रका: । तिथयस्त्ववमा: कृष्णशुक्ला: पूर्वार्द्धवत्स्मृता: ॥ ८०१ ॥
सुखावबोधाय चात्र यन्त्रकम् ॥
प्रतिपद्यवमरात्रीभूतायां कुत्र पर्वणि । द्वितीयान्त: समाविश्य, जायते पतिता तिथि: ? ॥ ८०२ ॥
अवमत्वं द्वितीयायां, प्राप्तायां क्व च पर्वणि । तृतीया पततीत्येवं, पृच्छेत्कोऽप्यखिला: क्रमात् ? ॥ ८०३ ॥
ततोऽत्र करणाम्नाय:, कश्चित्तादृग्निरूप्यते । यस्माद्यथोक्तपृच्छासु, कुर्यात्प्रतिविधीन् सुखम् ॥ ८०४ ॥
पृच्छास्वेतासु विषमास्तिथयोऽत्र भवन्ति या: । रूपाधिकासु द्विघ्नासु, तासु स्यात्पर्वनिर्णय: ॥ ८०५ ॥
समास्तु तिथयो रूपाभ्यधिका द्विगुणीकृता: । एकत्रिंशद्युता: सत्योऽतीतपर्वप्रकाशिका: ॥ ८०६ ॥
पर्वसंख्या सा च पञ्चदशघ्ना स पतत्तिथि: । विभज्यमाना द्वाषष्ट्यावमसंख्यां प्रकाशयेत् ॥ ८०७ ॥
आद्ये प्रश्ने यथोद्दिष्टा, प्रतिपत्तिथिरित्यत: । एकको विषम: सैको, द्विघ्नो जातं चतुष्टयम् ॥ ८०८ ॥
युगादितो व्यतिक्रान्ते, तत: पर्वचतुष्टये । अवमायां प्रतिपदि, द्वितीया न्यपतत्तिथि: ॥ ८०९ ॥
चतूरूपा पर्वसंख्या, षष्टि: पञ्चदशाहता । पतत्तिथिर्द्वितीयेति, द्वाभ्यां युक्ता विधीयते ॥ ८१० ॥
जाता द्वाषष्टिरेषा च, द्वाषष्ट्या प्रविभज्यते । लब्ध एकस्ततो जातोऽवमरात्रोऽयमादिम: ॥ ८११ ॥
कदा पुनर्द्वितीयायां, तृतीया पततीति च । प्रश्ने द्वितीयोद्दिष्टेति, द्विको रूपाधिकस्त्रय: ॥ ८१२ ॥
ते च द्विगुणिता: षट् स्युर्द्वितीया यत्समा तिथि: । एकत्रिंशद्युता: षट् ते, सप्तत्रिंशद्भवन्ति तत् ॥ ८१३ ॥
ततश्च–सप्तत्रिंशत्तमे पर्वण्यतिक्रान्ते युगादित: । द्वितीयायां निपतिता, तृतीयेत्येष निर्णय: ॥ ८१४ ॥
पर्वसंख्या चात्र सप्तत्रिंशत्पञ्चदशाहता । पञ्चपञ्चाशदधिका, शता: पञ्च भवन्त्यत: ॥ ८१५ ॥
पतत्तिथिस्तृतीयेति, त्रीणि तेषु विनिक्षिपेत् । अष्टपञ्चाशदधिका, जाता पञ्चशती तत: ॥ ८१६ ॥

विभज्यतेऽसौ द्वाषष्ट्या, नव प्राप्नास्ततः खलु । नवमोऽवमरात्रोऽयं, जात इत्येष निर्णयः ॥ ८१७ ॥
सर्वास्वपि तिथिष्वेवं, कार्या करणभावना । पर्वनिर्देशमात्रं तु, क्रियते नाममात्रतः ॥ ८१८ ॥
तृतीयायां पतेत्तुर्या, गते पर्वण्यथाष्टमे । चतुर्थ्यां पञ्चमी चैकचत्वारिंशत्तमे गते ॥ ८१९ ॥
षष्ठी पतति पञ्चम्यां, पर्वणि द्वादशे गते । षष्ठ्यां च सप्तमी पञ्चचत्वारिंशत्तमे गते ॥ ८२० ॥
सप्तम्यामष्टमी यायाद्याते पर्वणि षोडशे । अष्टम्यां नवमी चैकोनपञ्चाशत्तमे गते ॥ ८२१ ॥
नवम्यां माति दशमी, द्वात्रिंशतितमे गते । एकादशी दशम्यां च, त्रिपञ्चाशत्तमे गते ॥ ८२२ ॥
एकादश्यां द्वादशी च, चतुर्विंशतिसंख्यके । तस्यां त्रयोदशी सप्तपञ्चाशत्संख्यके गते ॥ ८२३ ॥
गतेऽष्टाविंशतितमे, त्रयोदश्यां चतुर्दशी । चतुर्दश्यां विशेद्राका, चैकषष्टितमे गते ॥ ८२४ ॥
गते द्वात्रिंशत्तमेऽमावास्यायां प्रतिपद्विशेत् । एता युगस्य पूर्वार्द्धे, परार्द्धेऽप्येवमेव ताः ॥ ८२५ ॥
राकायां च प्रतिपदो, भूतेष्टायाममातिथेः । संपातसंभवो नास्तीत्येतद् ज्ञेयं मनस्विभिः ॥ ८२६ ॥
एतस्य यन्त्रके दृष्टे, भवतां प्रत्ययो दृढः । भविष्यतीति तत्सम्यग्, वीक्षणीयं विचक्षणाः ॥ ८२७ ॥
ननु कालः सदाऽनादिप्रवाहः परिवर्त्तते । जगत्स्वभावान्नियतस्वरूपेण दिवानिशम् ॥ ८२८ ॥
न हानिः कापि कालस्य, न च वृद्धिः स्वरूपतः । ततोऽत्रावमरात्राधिमासादीनां कथा वृथा ॥ ८२९ ॥
सत्यं किंत्विह मासानां, विरूपाणां परस्परम् । अंशादिभिर्विशेषो यो, वर्त्तते तदपेक्षया ॥ ८३० ॥
विवक्ष्येते हानिवृद्धी, कालस्य न तु वास्तवी । वस्तुतस्त्वेष नियतस्वरूपः परिवर्त्तते ॥ ८३१ ॥
तथाहि–चन्द्रमासविवक्षायां, कर्ममासव्यपेक्षया । कालस्य हानिर्वृद्धिश्च, सूर्यमासविवक्षणे ॥ ८३२ ॥
पृथग् पृथग् विवर्त्तन्ते, वस्तुतस्तु त्रयोऽप्यमी । मासा अनादिनियतस्वरूपेण सदा भुवि ॥ ८३३ ॥
अथ नष्टतिथिं ज्ञातुं, करणं प्रतिपाद्यते । विज्ञायते सुखं येनानुक्तापि पर्वयुक् तिथिः ॥ ८३४ ॥
समुद्गच्छति मार्त्तण्डे, यद्येकाभिजितः कला । भुक्ता चन्द्रमसा तर्हि, कतमत्पर्व का तिथिः ? ॥ ८३५ ॥
अत्र करणं–
अभिजित्प्रमुखर्क्षाणामतीतानां यथाक्रमम् । इष्टभेष्टकलां यावत्, कला एकत्र मेलयेत् ॥ ८३६ ॥
कला चात्राहोरात्रस्य सप्तषष्टितमो भागो बोद्धव्यः ।
इष्टभेष्टकलां ताभ्योऽपनीयेत स्थितं च यत् । त्रिनवत्यधिकैस्ताड्यं, तत्त्रयोदशभिः शतैः ॥ ८३७ ॥
विभज्यते च तत्त्रिंशैस्ततोऽष्टादशभिः शतैः । लब्धं संत्यज्यते शेषं, यत्स्यात्तत्स्थाप्यते द्विशः ॥ ८३८ ॥
एकत्रास्मिन्नेकषष्ट्या, विभक्ते यदवाप्यते । अन्यराशौ क्षिप्यते तत्, सोऽङ्कराशिः पुनस्ततः ॥ ८३९ ॥
ह्रियते पञ्चदशभिर्हृते च यदवाप्यते । तानि पर्वाणि शेषांशास्तिथिसंख्या भवेदिह ॥ ८४० ॥
किंच–भमत्राभिजिदेवाद्यं, तत्कलाऽप्यादिमोदिता । तदेककात्तत्कलाकान्न किञ्चिदपनीयते ॥ ८४१ ॥

यदस्मादेककादेककलापनयने भवेत् । शून्यं शेषं ततो न स्याद्गुणनाद्या क्रियोत्तरा ॥ ८४२ ॥
यथा पूर्वोक्तपृच्छायामेका याऽभिजितः कला । गुण्यते त्रिनवत्याढ्यैः, सा त्रयोदशभिः शतैः ॥ ८४३ ॥
तावद्भङ्गा भवेत्त्रिंशैर्नैषाऽष्टादशभिः शतैः । विभक्तुं शक्यते तेन, विधिः शेषो विधीयते ॥ ८४४ ॥
त्रयोदशशती सत्रिनवतिर्द्विर्निधीयते । एको राशिश्चैकषष्ट्या, ह्रियते तत्र चाप्यते ॥ ८४५ ॥
द्वाविंशतिः क्षिप्यते सा, परराशौ ततो भवेत् । चतुर्दशशती पञ्चदशभिस्सहिताऽथ सा ॥ ८४६ ॥
ह्रियते पञ्चदशभिश्चतुर्नवतिराप्यते । शेषास्तिष्ठन्ति पञ्चांशास्ततः पूर्वोक्तनिर्णयः ॥ ८४७ ॥
चतुर्नवतिसङ्ख्यस्य, पर्वणः पञ्चमीतिथौ । सूर्योदये चन्द्रमसा, भुक्तैकाभिजितः कला ॥ ८४८ ॥
करणानि निरूप्यन्ते, तिथ्यर्द्धप्रमितान्यथ । भवन्ति तानि द्वैधानि, चराणि च स्थिराणि च ॥ ८४९ ॥
बवं च बालवं चैव, कौलवं स्त्रीविलोचनम् । गरादि वणिजं विष्टिः, सप्तैतानि चराणि यत् ॥ ८५० ॥

अन्यत्र स्त्रीविलोचनस्थाने तैतिलमिति, गरादिस्थाने च गरमिति संज्ञा श्रूयते इति ज्ञेयं ।

तिथिष्वनियतास्वेतान्यावर्त्तन्ते यथाक्रमम् । शुक्लपक्षे प्रतिपदः, पश्चिमार्द्धे बवं भवेत् ॥ ८५१ ॥
द्वितीयायाश्चादिमेऽर्द्धे, बालवं कौलवं परे । तृतीयायाश्चादिमेऽर्द्धे, भवति स्त्रीविलोचनम् ॥ ८५२ ॥
अपरार्द्धे तृतीयाया, गरादिकरणं भवेत् । चतुर्थ्याः प्रथमेऽर्द्धे स्याद्वणिजं विष्टिरन्तिमे ॥ ८५३ ॥
पुनर्बवं बालवं च, पञ्चम्या अर्द्धयोर्द्वयोः । क्रमादर्द्धद्वये षष्ठ्याः, कौलवस्त्रीविलोचने ॥ ८५४ ॥
अर्द्धद्वये च सप्तम्या, गरादिवणिजे स्मृते । अष्टम्याः प्रथमेऽर्द्धे, स्याद्विष्टिरन्त्ये पुनर्बवम् ॥ ८५५ ॥
बालवं कौलवं चेति, नवम्या अर्द्धयोर्द्वयोः । अर्द्धद्वये दशम्याः स्त्रीविलोचनगराभिधे ॥ ८५६ ॥
एकादश्याः प्राक्तनेऽर्द्धे, वणिजं विष्टिरन्तिमे । पुनर्बवं बालवं च, द्वादश्या अर्द्धयोर्द्वयोः ॥ ८५७ ॥
अर्द्धद्वये त्रयोदश्याः, कौलवस्त्रीविलोचने । अर्द्धद्वये चतुर्दश्या, गरादिवणिजे क्रमात् ॥ ८५८ ॥
पूर्णिमायाः प्राक्तनेऽर्द्धे, विष्टिरन्त्ये पुनर्बवम् । कृष्णपक्षे प्रतिपदः, पूर्वार्द्धे बालवं स्मृतम् ॥ ८५९ ॥
अत एव युगस्यादिर्बालवकरणे पूर्वं निरूपितेति ज्ञेयं ।
अन्तिमेऽर्द्धे प्रतिपदः, कौलवं करणं भवेत् । द्वितीयाहर्निशोश्च स्त्रीविलोचनगरादिके ॥ ८६० ॥
तृतीयायां च वणिजविष्टी स्यातामहर्निशोः । चतुर्थ्याश्चाह्नि रात्रौ च, क्रमेण बवबालवे ॥ ८६१ ॥
दिने रात्रौ च पञ्चम्याः, कौलवस्त्रीविलोचने । गरादिवणिजे षष्ठ्याः, सप्तम्या विष्टिसद्बवे ॥ ८६२ ॥
अष्टम्यास्त्वह्नि रात्रौ च, क्रमाद्बालवकौलवे । अर्द्धद्वये नवम्याः स्त्रीविलोचनगरादिके ॥ ८६३ ॥
दशम्यां वणिजं विष्टिः, क्रमादर्द्धद्वये भवेत् । एकादश्यां दिवारात्रौ, क्रमेण बवबालवे ॥ ८६४ ॥
द्वादश्याश्च दिने रात्रौ, कौलवस्त्रीविलोचने । गरादिवणिजे ज्ञेये, त्रयोदश्यामहर्निशोः ॥ ८६५ ॥
चतुर्दश्यां दिवा विष्टिरष्टावावृत्तयः स्मृताः । चराणामिति सप्तानां, मासे मासे पुनः पुनः ॥ ८६६ ॥

तथाहुः–"मासेऽष्टशश्वराणि स्युरुज्ज्वलप्रतिपदन्त्यार्द्धात्."

रात्रौ कृष्णचतुर्दश्याः, शकुनिः करणं भवेत् । चतुष्पदं च नागं चामावास्यामर्द्धयोर्द्धयोः ॥ ८६७ ॥
किंस्तुघ्नं स्यात्प्रतिपदः, शुक्लायाः प्रथमेऽर्द्धके । एतानि स्युस्तिथिष्वेतेष्वेव प्राहुः स्थिराण्यतः ॥ ८६८ ॥

अत्र सर्वत्र दिनरात्रिशब्देनापि तिथीनां पूर्वार्द्धापरार्द्धे एव लक्षणीये करणानां तिथ्यर्द्धप्रमितत्वादिति । एतेषां स्वामिनः प्रयोजनं चैवं लौकिकशास्त्रेषु–इन्द्रो १ विधि २ मित्रा ३ र्यम ४ भू ५ श्री ६ शमना ७ श्लेषु करणेषु । कलि १ वृष २ फणि ३ मरुतः ४ पुन– रीशाः क्रमशः स्थिरेषु स्युः ॥ अत्र शमनो यमः स भद्रायाः स्वामी. दशामूनि विविष्टीनि, दिष्टान्यखिलकर्मसु । रात्र्यहर्व्यत्ययाद्भद्राप्यदुष्टैवेति तद्विदः ॥ विविष्टीनीति कोऽर्थः ? एकादशसु करणेषु भद्रा दुष्टेति. शेषकरणप्रयोजनं त्वेवं–शकुनिचतुष्पदनागे किंस्तुघ्ने कौलवे च वणिजे च । ऊर्ध्वं संक्रमणं गरतैतिलविष्टिषु पुनः सुप्तम् ॥ बवबालवे निविष्टं, सुभिक्षं चोर्द्ध्वसंक्रमे । उपविष्टो रोगकरः, सुप्तो दुर्भिक्षकारकः ॥

तथा शीतोष्णवर्षर्तुषु सूर्यसंक्रमाः क्रमेण सुप्तोर्ध्वनिवेशिनः शुभाः तथा "पूर्वोत्तरकरणद्वयसंधिगा संक्रान्तिस्तु सुप्तोत्थितेत्याख्या सर्वदाऽप्यशुभेति पूर्णभद्र" इत्याद्यारम्भसिद्धिवार्त्तिके. इति करणप्रकरणम् ।

मुहूर्त्ताः परिवर्त्तन्ते, ये त्रिंशत्प्रतिवासरम् । तेषां नामक्रमं वक्ष्ये, सर्वज्ञागमदर्शितम् ॥ ८६९ ॥
आद्यो रुद्रो दिनस्यादौ, श्रेयानिति द्वितीयकः । मित्रवायुसुपीताख्यास्तृतीयतुर्यपञ्चमाः ॥ ८७० ॥
षष्ठोऽभिचन्द्रो माहेन्द्रः, सप्तमः स्यादथाष्टमः । बलवान्नवमः पक्ष्मौ, दशमो बहुसत्यकः ॥ ८७१ ॥
एकादशः स्यादैशानो, द्वादशस्तस्थसंज्ञकः । भावितात्मवैश्रवणौ, त्रयोदशचतुर्दशौ ॥ ८७२ ॥
वारुणः स्यात्पञ्चदश, आनन्दः षोडशः स्मृतः । विजयः स्यात्सप्तदशोऽष्टादशो विश्वसेनकः ॥ ८७३ ॥
एकोनविंशतितमः, प्राजापत्याह्वयो भवेत् । मुहूर्त्तो विंशतितमो, भवत्युपशमाभिधः ॥ ८७४ ॥
स्यादेकविंशतितमो, गन्धर्वोऽथाग्निवैश्यकः । द्वाविंशः स्यात्त्रयोविंशः, शतादिवृषभाभिधः ॥ ८७५ ॥
चतुर्विंशस्त्वातपवान्, पञ्चविंशोऽममो भवेत् । षड्विंशोऽरुणवान् सप्तविंशो भौमाभिधः स्मृतः ॥ ८७६ ॥
अष्टाविंशस्तु ऋषभः, सर्वार्थः स्यात्ततः परः । त्रिंशत्तमो राक्षसाख्यो, मुहूर्त्तो यो निशोऽन्तिमः ॥ ८७७ ॥
इति मुहूर्त्तप्रकरणम् ।

नक्षत्राणां परावर्त्तं, चन्द्रसंबन्धिनामथ । ब्रूमहे प्रत्यहोरात्रं, सूर्यसंबन्धिनामपि ॥ ८७८ ॥
भवत्यभिजिदारम्भो, युगस्य प्रथमक्षणे । अस्य पूर्वोक्तशीतांशुभोगकालादनन्तरम् ॥ ८७९ ॥
श्रवणं स्यात्तस्य चेन्दुभोगकालव्यतिक्रमे । धनिष्ठेत्येवमादीनि, ज्ञेयानि निखिलान्यपि ॥ ८८० ॥
अथेन्दुना भुज्यमानमहोरात्रे विवक्षिते । इष्टे तिथौ च नक्षत्रं, ज्ञातुं करणमुच्यते ॥ ८८१ ॥

यस्मिन् दिने चन्द्रयुक्तं, नक्षत्रं ज्ञातुमिष्यते । तस्माद्दिनात्प्रागतीतपर्वसंख्या युगादितः ॥ ८८२ ॥
गुण्यते पञ्चदशभिस्ततः प्रागीप्सितात्तिथेः । तिथीनतीतान् सत्पर्वसत्कांस्तत्र नियोजयेत् ॥ ८८३ ॥
अतीतावमरात्रोना, द्व्यशीत्या ह्रियतेऽथ सा । लब्धमंशाश्च ये शेषास्तानूर्द्ध्वाधो न्यसेत्क्रमात् ॥ ८८४ ॥
लब्धमूर्द्ध्वं स्थापितं यत्तद्राशिरिति कथ्यते । अंशा अधःस्थिताः शेषराशिरित्यभिधीयते ॥ ८८५ ॥
राशिं चतुर्गुणीकृत्य, शोधयेदेकविंशतिम् । शेषराशेरधःस्थाच्च, शोधयेत्सप्तविंशतिम् ॥ ८८६ ॥
आसंभवं लब्धराशेः, शेषराशेश्च शोधयेत् । तामेकविंशतिं सप्तविंशतिं च क्रमान्मुहुः ॥ ८८७ ॥
अथोपरितनो राशिरेकविंशतिशोधनम् । यद्यल्पत्वान्न क्षमेत, तदा राशेरधस्तनात् ॥ ८८८ ॥
एकं रूपं समादाय, सप्तषष्ट्या निहत्य च । राशौ क्षिप्त्वोर्द्ध्वगे कुर्यादेकविंशतिशोधनम् ॥ ८८९ ॥
याऽत्रैकविंशती राशेः, शोध्यतेऽभिजितो हि सा । भावनैवं शेषराशेः, सप्तविंशतिशोधने ॥ ८९० ॥
आरभ्य श्रवणादत्रोत्तराषाढावसानकम् । सप्तविंशतिसंख्याकमवधार्यं भमण्डलम् ॥ ८९१ ॥
शेषराशेस्ततः सप्तविंशतिर्यदि शुध्यति । शुद्धं तदाऽखिलमपि ज्ञेयमस्माद्भमण्डलम् ॥ ८९२ ॥
नाल्पत्वाच्चेदितः सप्तविंशतिः शोद्धुमर्हति । तदा द्वाविंशतिः शोध्या, शुद्धचेन्नैषापि चेत्तदा ॥ ८९३ ॥
शोध्या अष्टादशामीषां, शोधनासंभवे सति । त्रयोदशदशैषां चासंभवे पञ्च शोधयेत् ॥ ८९४ ॥
द्वाविंशतौ विशुद्धायामत्र शुद्धानि भावयेत् । सर्वाणि श्रवणादीनि, विशाखांतानि भान्यथ ॥ ८९५ ॥
अष्टादशसु शुद्धेषु, शुद्धानीह विचिन्तयेत् । श्रुत्यादीन्युत्तराफाल्गुन्यन्तान्यष्टादशाप्यथ ॥ ८९६ ॥
त्रयोदशसु शुद्धेषु, शुद्धानि परिभावयेत् । श्रुत्यादीनि पुनर्वस्वन्तानि भानि त्रयोदश ॥ ८९७ ॥
एवं दशसु शुद्धेषु, रोहिण्यन्तानि चिन्तयेत् । उदग्भद्रपदान्तानि, तथा शुद्धेषु पञ्चसु ॥ ८९८ ॥
पर्यन्तसूचकान्यत्र, यानि प्रोक्तानि भानि षट् । सार्द्धक्षेत्राण्येव तानि, ज्ञेयानि निखिलान्यपि ॥ ८९९ ॥
तथाहि—श्रवणात्पञ्चमी सार्द्धक्षेत्रा भाद्रपदोत्तरा । दशमं ब्राह्ममादित्यं, त्रयोदशं च तादृशम् ॥ ९०० ॥
उत्तराफाल्गुनी चाष्टादशी भवति तादृशी । सार्द्धक्षेत्रं विशाखाख्यं, द्वाविंशतितमं श्रुतेः ॥ ९०१ ॥
स्यात्सप्तविंशा तत्राथोत्तराषाढापि तादृशी । एतानि स्युः पञ्चचत्वारिंशन्मुहूर्त्तकानि यत् ॥ ९०२ ॥
तथाहुः—"पञ्च १ दस २ तेरस ३ ट्ठारसेव ४ बावीस ५ सत्तवीसा य ६ । सोज्झा दिवड्ढखित्तंत भद्दवाई असाढंता" ॥
[ज्योतिष्करंडक श्लोक १५९]

एवं चाधस्तने शेषराशौ संशोधिते सति । एकादिचतुरन्तं यच्छेषं तच्चन्द्रभं गतम् ॥ ९०३ ॥

अत्र च एकादिचतुरन्तं यच्छेषं तत्त्रिंशद्गुणनेन मुहूर्त्तीकृत्य तस्मात्क्रमप्राप्तं यन्नक्षत्रं तद्यदि समक्षेत्रं तदा त्रिंशच्छोध्यते, अर्द्धक्षेत्रं चेत्पञ्चदश शोध्यन्ते, एवं शोधने यच्छेषं तच्चंद्राक्रान्तस्य नक्षत्रस्यातीतं मुहूर्त्तादिकं भवतीति ज्ञेयं ।

यच्चोपरितने राशावेकविंशतिशोधने । शेषं तत्त्रिंशताऽऽहत्य, सप्तषष्ट्या विभज्यते ॥ ९०४ ॥

लब्धा मुहूर्त्ता ज्ञातव्या, यत्तु तत्रापि शिष्यते । ते विज्ञेया मुहूर्त्तस्य, विभागाः सप्तषष्टिजाः ॥ ९०५ ॥
यथा युगस्य प्रथमे, वर्षे दशसु पर्वसु । अतिक्रान्तेषु पञ्चम्यां, किं नक्षत्रं निशापतेः ? ॥ ९०६ ॥
याऽत्रातीतपर्वसंख्या, वर्त्तते दशलक्षणा । तस्यां पञ्चदशघ्नायां, पञ्चाशं जायते शतम् ॥ ९०७ ॥
पञ्चम्यां पृष्टमिति च, चत्वारस्तिथयो गताः । ततश्चतुष्टयं तत्र, योजनीयं मनस्विभिः ॥ ९०८ ॥
चतुःपञ्चाशदधिकं, शतं स्याद्राशिरेष च । हीनो द्वाभ्यामवमाभ्यां, द्विपञ्चाशं भवेच्छतम् ॥ ९०९ ॥
तस्य द्व्यशीत्या भागे यद्रूपमेकमवाप्यते । तदूर्द्ध्वं न्यस्यते शेषां, सप्ततिं च न्यसेदधः ॥ ९१० ॥
कृतश्चतुर्गुणो लब्धराशिस्त्रैकलक्षणः । चत्वारः सप्ततिश्चोर्द्ध्वाधोभावेन स्थिता इह ॥ ९११ ॥
अथोपरितनाद्राशेः, स्तोकत्वादेकविंशतिः । शोद्धुं न शक्यते तेनाधःस्थात्सप्ततिलक्षणात् ॥ ९१२ ॥
एकं रूपं समादाय, सप्तषष्टिगुणीकृतम् । निक्षिपेदूर्द्ध्वगे राशौ, तज्जाता सैकसप्ततिः ॥ ९१३ ॥
एकोनसप्ततिश्चाधस्तिष्ठेद्राशेरथोर्द्ध्वगात् । शोधितायामभिजितः, सत्कायामेकविंशतौ ॥ ९१४ ॥
पञ्चाशच्छिष्यतेऽधःस्था–द्राशेश्च सप्तविंशतौ । शोधितायां भचक्रस्य, द्विचत्वारिंशदास्थिता ॥ ९१५ ॥
शोध्यते चोर्द्ध्वगाद्राशेः, पुनरप्येकविंशतिः । राशेरधस्तनात्सप्तविंशतिर्भगणस्य च ॥ ९१६ ॥
एकोनत्रिंशदूर्द्ध्वं स्यादधः पञ्चदश स्थिताः । एकविंशतिरूर्द्ध्वस्थाद्राशेर्भूयोऽपि शोध्यते ॥ ९१७ ॥
अष्टौ ततोऽवशिष्यन्ते, राशावूर्द्ध्वं व्यवस्थिते । तेषां च पुरतो वक्ष्येऽवशिष्टां परिकर्मणाम् ॥ ९१८ ॥
राशेरधस्ताच्छक्यन्ते, शोद्धुं पञ्चदशात्मकात् । न सप्तविंशतिर्द्वाविंशतिर्नाष्टादशापि न ॥ ९१९ ॥
त्रयोदश तु शक्यन्ते, शोद्धुं तेषां च शोधने । श्रुत्याद्यादित्यान्तभानि, शुद्धानि स्युस्त्रयोदश ॥ ९२० ॥
शेषाच्च द्वितयात्त्रिंशद्गुणात्पुष्यो विशोध्यते । मुहूर्त्तैस्त्रिंशता पञ्चदशभिस्सार्द्धमेव च ॥ ९२१ ॥
ये पञ्चदश शिष्यन्ते, मघानां ते मुहूर्त्तकाः । अथोर्द्ध्वराशौ सन्त्यष्टौ तेषु त्रिंशद्गुणेषु च ॥ ९२२ ॥
चत्वारिंशा द्विशतीस्यात्, सप्तषष्ट्या हरेच्च ताम् । लब्धास्त्रयो मुहूर्त्तास्तान्, क्षिपेद्राशावधस्तने ॥ ९२३ ॥
अष्टादश मुहूर्त्ताः स्युस्तद्भागाः सप्तषष्टिजाः । एकोनचत्वारिंशच्च, तदेष प्रश्ननिर्णयः ॥ ९२४ ॥
अष्टादशसु भुक्तेषु, मुहूर्त्तेष्वमृतांशुना । मघानामधिकैकोनचत्वारिंशल्लवेष्विह ॥ ९२५ ॥
युगस्य प्रथमे वर्षे, दशपर्वव्यतिक्रमे । उदेति सूर्यः पञ्चम्यामहोरात्रेऽपि तावति ॥ ९२६ ॥
अहोरात्रे युगस्याद्ये, प्रतिपत्संज्ञके तिथौ । चन्द्रसंबन्धि नक्षत्रं, किमत्र ? प्रतिपाद्यते ॥ ९२७ ॥
चतुर्विंशं शतं संख्या, पाश्चात्ययुगपर्वणाम् । अष्टादशशती षष्टियुक् स्यात्पञ्चदशाहता ॥ ९२८ ॥
त्रिंशतोऽवमरात्राणामेतस्याः पातने भवेत् । अष्टादशशती त्रिंशा, सा द्व्यशीत्या विभज्यते ॥ ९२९ ॥
लब्धां द्वाविंशतिं न्यस्योपरि कुर्याच्चतुर्गुणाम् । अष्टाशीतिर्भवेच्छेषामधः षड्विंशतिं न्यसेत् ॥ ९३० ॥
राशेरष्टाशीतिरूपादेकविंशतिशोधने । संजाताऽभिजितः शुद्धिः, सप्तषष्टिस्तु शिष्यते ॥ ९३१ ॥

कल्पितैतावदंशत्वात्तया चैकं भवेदुडु । तस्मिंश्च भेऽधस्त्यराशौ, क्षिप्ते स्यात्सप्तविंशतिः ॥ ९३२ ॥
स्यात्सप्तविंशतेर्भानां, शुद्धिरङ्कादतस्ततः । श्रुत्यादीन्युत्तराषाढान्तानि शुद्धानि भान्यतः ॥ ९३३ ॥
पूर्वोक्तनिर्णयोऽयं तद्यद्युगस्यादिमे दिने । सूर्योदये शशी योगं, प्राप्नोत्यभिजिता सह ॥ ९३४ ॥
युगस्याह्नि द्वितीयस्मिन्, द्वितीयायां तिथावथ । चन्द्रेण युक्तं नक्षत्रं, किं स्यादित्यत्र कथ्यते ॥ ९३५ ॥
प्रतिपल्लक्षणैकैवातिक्रान्ता तिथिरत्र या । द्व्यशीत्या भजनं सा न, क्षमते यत्तनीयसी ॥ ९३६ ॥
तदेतस्याः सप्तषष्टेः, कर्त्तव्याः शकलास्ततः । ऋक्षस्याभिजितः प्राज्ञैः, शोधनीयैकविंशतिः ॥ ९३७ ॥
शेषा तिष्ठति षट्चत्वारिंशत्सा त्रिंशता हता । कर्त्तुं मुहूर्त्तान् साशीतिस्त्रयोदशशती भवेत् ॥ ९३८ ॥
सप्तषष्ट्या विभागेऽस्या, लब्धा मुहूर्त्तविंशतिः । चत्वारिंशन्मुहूर्त्तांशाः, शिष्यन्ते सप्तषष्टिजाः ॥ ९३९ ॥
ततश्च—सचत्वारिंशदंशायां, श्रुतेर्मुहूर्त्तविंशतौ । भुक्तायामिन्दुनोदेति, द्वितीयेऽह्नि युगे रविः ॥ ९४० ॥
एवं सर्वत्राप्यन्यत्र करणभावना कार्या. इति चन्द्रनक्षत्रप्रकरणम् ॥

अष्टादशमुहूर्त्ताढ्यमहोरात्रचतुष्टयम् । भुक्त्वा पुष्यस्य पञ्चापि, स्वाब्दान्यारभते रविः ॥ ९४१ ॥
चतुर्विंशत्या मुहूर्त्तैरधिका भुक्तशेषकाः । भवन्त्यष्टाहोरात्रास्तदा पुष्यस्य भास्वतः ॥ ९४२ ॥
ततश्च—स्युर्द्वादशमुहूर्त्ताढ्या, अहोरात्रास्त्रयोदश । तथा स्युः षडहोरात्रा, मुहूर्ताश्चैकविंशतिः ॥ ९४३ ॥
अहोरात्रा विंशतिश्च, मुहूर्त्तत्रितयाधिकाः । समार्द्धसार्द्धक्षेत्राणां, भानां भोगः क्रमाद्रवेः ॥ ९४४ ॥
एवं भैः सप्तविंशत्यैकषष्टियुक्शतत्रये । अह्नामतीतेऽर्काब्दं स्यादेकषष्टितमे दिने ॥ ९४५ ॥
द्वादशानां मुहूर्त्तानां, पूर्त्तौ पूर्णौ पुनर्वसू । पुष्यस्याष्टादश ततो, मुहूर्त्तास्तद्दिने गताः ॥ ९४६ ॥
ततः परं च पुष्यस्यातीते दिनचतुष्टये । पूर्णार्काब्दस्य षट्षष्टियुक्ता दिनशतत्रयी ॥ ९४७ ॥
सुखावबोधाय चात्र यन्त्रकम्—

यथार्कोडुव्यवस्थैवमेकस्याब्दस्य दर्शिता । पञ्चानामपि वर्षाणां, तथा ज्ञेया युगे बुधैः ॥ ९४८ ॥
ज्ञातुं सूर्यस्य नक्षत्रं, विवक्षिततिथावथ । करणं प्रोच्यते पूर्वाचार्यदर्शितया दिशा ॥ ९४९ ॥
युगेऽतीतपर्वसंख्या, प्राग्वत्पञ्चदशाहता । विवक्षितदिनात्पूर्वमतीतैस्तिथिभिर्युता ॥ ९५० ॥
गतैरवमरात्रैश्च, वर्जिताऽथ त्रिभिः शतैः । विभज्यते सा षट्षष्ट्याधिकैर्लब्धं च वत्सरः ॥ ९५१ ॥
शेषं भवति यत्तस्माद्यथार्हं वक्ष्यमाणकम् । संशोध्यते शोधनकं, गतनक्षत्रसूचकम् ॥ ९५२ ॥
सषट्षष्ट्या त्रिंशत्याऽल्पा, भागं चेन्न क्षमेत सा । तदा शोध्यं शोधनकमादावेवात्र संभवेत् ॥ ९५३ ॥
चतुर्विंशत्या मुहूर्त्तैरधिकं दिवसाष्टकम् । पुष्यस्य स्याच्छोधनकमथान्येषां तदुच्यते ॥ ९५४ ॥
रात्रिन्दिवानि द्वाषष्टिर्मुहूर्त्ता द्वादशोपरि । उडूनामुत्तराफल्गुन्यन्तानां शोधनं भवेत् ॥ ९५५ ॥
भानां विशाखान्तानां च, षोडशाभ्यधिकं शतम् । भानां तथोत्तराषाढान्तानां त्र्यशीतियुक् शतम् ॥ ९५६ ॥

चतु:पञ्चाशदधिकमहोरात्रशतद्वयम् । षण्मुहूर्त्तादिकं प्रौष्ठपदान्तानां विशोधनम् ॥ ९५७ ॥
एकविंशतिसंयुक्तमहोरात्रशतत्रयम् । षण्मुहूर्त्तयुतं रोहिण्यन्तानां शोधनं मतम् ॥ ९५८ ॥
एकषष्ट्यासमधिकमहोरात्रशतत्रयम् । स्याद् द्वादशमुहूर्त्ताढ्यं, पुनर्वस्वन्तशोधनम् ॥ ९५९ ॥
विना पुष्यं शोधनकान्यमूनि निखिलान्यपि । अध्यर्द्धक्षेत्रनक्षत्रावधिकानि भवन्ति वै ॥ ९६० ॥
यथार्हं च शोधनके, शोधिते शिष्यतेऽत्र यत् । एकादीनि ततो भानि, शोध्यानि स्वस्वमानत: ॥ ९६१ ॥
स्वस्वमानं चार्द्धक्षेत्रादीनां नक्षत्राणां प्रागुक्तमेव ।
एवं क्रमाच्छोध्यमानं, यन्नक्षत्रं न शुध्यति । तद्वर्त्तमानं नक्षत्रं, ज्ञेयं तस्यां तिथौ खे: ॥ ९६२ ॥
उदाहरणं चात्र—युगस्य प्रथमे वर्षे, दशपर्वव्यतिक्रमे । पञ्चम्यां सूर्यनक्षत्रं, किमित्यत्र निरूप्यते ॥ ९६३ ॥
अतीतपर्वणां संख्या, याऽस्त्यत्र दशलक्षणा । सा पञ्चदशनिघ्ना स्यात्पञ्चाशदधिकं शतम् ॥ ९६४ ॥
चतु:पञ्चाशं शतं स्यात्तद्गतैस्तिथिभिर्युतम् । शतं च स्याद् द्विपञ्चाशमवमद्वितयोज्झितम् ॥ ९६५ ॥
सषट्षष्ट्या त्रिंशत्या, तद्भागं न सहते कृशम् । तत आदित एवात्र, शोधनोपक्रमोऽर्हति ॥ ९६६ ॥
संभवेच्छोधनं चात्र, षोडशाभ्यधिकं शतम् । विशाखान्तानि शुद्धानि, भानि ज्ञेयानि तेन च ॥ ९६७ ॥
शेषं तिष्ठति षट्त्रिंशत्, तत: शुद्ध्यति राधिका । या द्वादशमुहूर्त्ताढ्यत्रयोदशदिनात्मिका ॥ ९६८ ॥
द्वाविंशतिर्दिना: शेषा:, साऽष्टादशमुहूर्त्तका: । षड्दिन्याऽथैकविंशत्या, मुहूर्त्तै: शुद्ध्मिन्द्रभम् ॥ ९६९ ॥
शेषा दिना: पञ्चदश, मुहूर्त्ता सप्तविंशति: । तेभ्य: शुद्धं मूलभं तन्मानतो राधिकोपमम् ॥ ९७० ॥
शेषौ द्वौ पञ्चदशभिर्मुहूर्त्तैरधिकौ दिनौ । एतौ च पूर्वाषाढायास्तदा भुक्तौ विवस्वता ॥ ९७१ ॥
युगेऽर्कोडुनिर्णयोऽयं, दशपर्वव्यतिक्रमे । ज्ञेयस्तिथौ च पञ्चम्यामेवं सर्वत्र भावना ॥ ९७२ ॥
युगेऽथ पौरुषीमानं, ज्ञातुं करणमुच्यते । वर्द्धमानं हीयमानं, याम्ये सौम्येऽयने क्रमात् ॥ ९७३ ॥
शङ्कु: पुरुषशब्देन, स्याद्देह: पुरुषस्य वा । निष्पन्ना पुरुषात्तस्मात्पौरुषीत्यपि सिद्ध्यति ॥ ९७४ ॥
तथोक्तं नन्दीचूर्णौ—'पुरिसोत्ति संकू पुरिससरीरं वा, तत्र पुरिसाओ निप्फन्ना पोरिसी इति' अयं भाव:—
स्वप्रमाणा भवेच्छाया, यदा सर्वस्य वस्तुन: । तदा स्यात्पौरुषी याम्यायनस्य प्रथमे दिने ॥ ९७५ ॥
ततश्च तस्य पौरुष्यां, तथा छाया विवर्द्धते । यथा सौम्यायनस्यादौ, स्वमानाद् द्विगुणा भवेत् ॥ ९७६ ॥
तत: पुनस्तथा छाया, हीयते सर्ववस्तुन: । यथा याम्यायनादौ सा, स्वस्ववस्तुमिता भवेत् ॥ ९७७ ॥
सत्र्यशीतिशततम:, स्वस्वमानस्य योऽशक: । प्रत्यहं तावती वृद्धिर्याम्ये सौम्येऽयने क्षय: ॥ ९७८ ॥
तथाहि—चतुर्विंशत्यङ्गुलस्य, शङ्कोर्भवति तावती । छाया याम्यायनस्यादौ वर्द्धते प्रत्यहं तत: ॥ ९७९ ॥
एकषष्टिविभक्तस्याङ्गुलस्याष्टौ लवा अयम् । भाग: शङ्कोर्यथोक्तस्य, सत्र्यशीतिशतोद्भव: ॥ ९८० ॥
तथाहि—एकैकमङ्गुलं कर्त्तुमेकषष्टिलवात्मकम् । संख्या शङ्कोरङ्गुलानामेकषष्ट्या निहन्यते ॥ ९८१ ॥

चतुर्दशशतानि स्युश्चतुष्षष्टियुतान्यथ । सत्र्यशीतिशतेनैषां, विभागेऽष्टकमाप्यते ॥ ९८२ ॥
प्राप्यं त्रैराशिकादप्येकषष्टिजलवाष्टकम् । वृद्धिहान्योरङ्गुलस्य, तदपि श्रूयतामिह ॥ ९८३ ॥
सत्र्यशीतिशतेनाह्नां, चतुर्विंशतिराप्यते । यद्यङ्गुलानामेकेन, किमह्ना लभ्यते तदा ? ॥ ९८४ ॥
त्रैराशिकस्थापना–१८३-२४-१.
एकेनान्त्येन गुणितश्चतुर्विंशतिलक्षणः । मध्यराशिस्तथैवास्थादेकेन गुणितं हि तत् ॥ ९८५ ॥
सत्र्यशीतिशतेनैष, न भक्तुं शक्यते ततः । छेद्यछेदकयो राश्योस्त्रिभिः कार्याऽपवर्त्तना ॥ ९८६ ॥
राशिश्छेद्योऽष्टात्मकोऽभूदेकषष्ट्यात्मकः परः । एवं त्रैराशिकाल्लब्धमेकषष्टिलवाष्टकम् ॥ ९८७ ॥
सार्द्धत्रिंशदहोरात्रात्मके मासे विवस्वतः । चतुश्चत्वारिंशमेव, स्यादंशानां शतद्वयम् ॥ ९८८ ॥
यतस्त्रिंशद्गुणा अष्टौ, चत्वारिंशं शतद्वयम् । अहोरात्रार्द्धस्य चांशचतुष्कमत्र मील्यते ॥ ९८९ ॥
चतुश्चत्वारिंशमेतद्यत्किलांशशतद्वयम् । एकषष्ट्याऽस्य भागे स्यादङ्गुलानां चतुष्टयम् ॥ ९९० ॥

तथा चाहुः–'वड्ढए हायए वावि मासेणं चउरङ्गुलं ।' 'मासेणं ति' सूर्यमासेनेत्यर्थः ।

त्रिभिर्मासैरङ्गुलानि, वर्द्धन्ते द्वादश क्रमात् । षड्भिर्मासैश्च वर्द्धन्ते, चतुर्विंशतिरङ्गुलाः ॥ ९९१ ॥
चतुर्विंशत्यङ्गुलस्य, शङ्कोश्छाया भवेदिति । दिने सौम्यायनस्याद्येऽष्टचत्वारिंशदङ्गुलाः ॥ ९९२ ॥
चतुर्विंशत्यङ्गुलस्य, शङ्कोश्छाया यथोदिता । चतुर्विंशत्यङ्गुलस्य, जानोरपि तथा भवेत् ॥ ९९३ ॥
अत एव च–
दिने याम्यायनस्याद्ये, द्विपदा पौरुषी भवेत् । जानुच्छायाप्रमाणा सा, मीयमाना स्वजानुना ॥ ९९४ ॥
पादद्वितयमानश्च, जानुः स्यात्पादमूलतः । द्वादशाङ्गुलमानोऽत्र, पादो न तु षडङ्गुलः ॥ ९९५ ॥
वितस्तिमाना स्याच्छाया, मीयमाना वितस्तिना । याम्यायनादौ पौरुष्यां, पादोऽत्र स्यात् षडङ्गुलः ॥ ९९६ ॥
ततश्च जानुच्छायायामङ्गुलं वर्द्धते यदा । तदा वितस्तिच्छायायामङ्गुलार्द्धं विवर्द्धते ॥ ९९७ ॥
लघीयसो वस्तुनोऽपि, स्वस्वमानानुसारतः । एवं छायावृद्धिहानी, भावनीये स्वयं बुधैः ॥ ९९८ ॥
अयने दक्षिणे वृद्धौ, ध्रुवकः स्यात्पदद्वयम् । हानौ च ध्रुवकः सौम्यायने पदचतुष्टयम् ॥ ९९९ ॥
नभःकृष्णप्रतिपदि, द्विपादा पौरुषी भवेत् । युगस्य प्रथमेऽर्काब्दे, वर्द्धते च ततः क्रमात् ॥ १००० ॥
एवं च–माघस्य कृष्णसप्तम्यां, पौरुषी स्याच्चतुष्पदा । प्रागुक्तरीत्या क्रमतस्तत आरभ्य च क्षयः॥ १००१ ॥
द्वितीयेऽब्दे नभःकृष्णत्रयोदश्याः प्रभृत्यथ । वृद्धिर्माघश्चेततुर्यां, चादिं कृत्वा भवेत्क्षयः ॥ १००२ ॥
तृतीयेऽब्दे नभःशुक्लदशम्यां वृद्ध्युपक्रमः । माघकृष्णप्रतिपदि, क्षयस्यादिः प्रकीर्तितः ॥ १००३ ॥
वृद्ध्यारम्भश्चतुर्थेऽब्दे, सप्तम्यां नभसः शितौ । माघकृष्णत्रयोदश्या, आरभ्य च ततः क्षयः ॥ १००४ ॥
नभःशुक्लचतुर्थ्यां च, वृद्ध्यादिः पञ्चमेऽब्दके । माघशुभ्रदशम्याश्च, प्रारभ्य भवति क्षयः ॥ १००५ ॥

वृद्धौ क्षये च सततमङ्गुलस्यैकषष्टिजाः । अष्टांशाः पञ्चभागोनमङ्गुलं सप्तभिर्दिनैः ॥ १००६ ॥
सविंशतिशतं भागाः, स्युः पञ्चदशभिर्दिनैः । एकषष्ट्यंशयुग्मोनं, तैश्च स्यादङ्गुलद्वयम् ॥ १००७ ॥

यत्तु–'अङ्गुलं सत्तस्तेण पक्खेणं तु दुअङ्गुलं ।' इत्युच्यते तद्व्यवहारत इति ज्ञेयं. श्रीउत्तराध्ययन–सूत्रवृत्तौ च 'अङ्गुलं सत्तस्तेणं' इत्यस्य व्याख्याने अङ्गुलं सप्तरात्रेण सार्द्धेनेति शेषो दृष्टव्यः इत्युक्तमस्ति, तथा चाङ्गुलमेकैकषष्ट्यंशन्यूनमेव स्यादिति ध्येयं,

त्रिंशता च दिनैश्चत्वारिंशमंशशतद्वयम् । चतुर्भिरेकषष्ट्यंशैस्तेनोना चतुरङ्गुली ॥ १००८ ॥
अहोरात्रार्द्धस्य भागचतुष्कस्यात्र योजने । सार्द्धया त्रिंशताऽह्नां स्यात्पूर्णाङ्गुलचतुष्टयी ॥ १००९ ॥
एकः पादस्त्रिभिर्मासैर्वृद्धिहान्योर्भवेदिति । अयनेन च पूर्णेन, भवत्येवं पदद्वयम् ॥ १०१० ॥
इदमर्थलेशतो नन्दीवृत्त्यादौ ॥

यत्तु ज्योतिष्करण्डादौ, वृद्धिहान्योर्निरूपिताः । चत्वारोऽत्राङ्गुलस्यांशा, एकत्रिंशत्समुद्भवाः ॥ १०११ ॥
तात्पर्यभेदस्तत्रापि, न कश्चिदिति भाव्यताम् । यतस्तिथीन् पुरस्कृत्य, तत्रेयं पद्धतिः कृता ॥ १०१२ ॥
अहोरात्रान् पुरस्कृत्य, पूर्वमुक्ता च पद्धतिः । हानिवृद्धिफलं त्वत्र, न किञ्चिदपि भिद्यते ॥ १०१३ ॥
तथा ह्येकत्रिंशता स्युस्तिथिभिः परिपूर्णकाः । सार्द्धास्त्रिंशदहोरात्रास्तच्च प्राक् सुष्ठु भावितम् ॥ १०१४ ॥
तत्सार्द्धत्रिंशताऽह्नां स्याद्यथाङ्गुलचतुष्टयम् । तथैकत्रिंशताऽपि स्यात्तिथिभिस्तच्चतुष्टयम् ॥ १०१५ ॥
तथाहि–
चत्वार एकत्रिंशदघ्नाश्चतुर्विंशं शतं भवेत् । एकत्रिंशद्विभक्तेऽस्मिन्, स्यादङ्गुलचतुष्टयम् ॥ १०१६ ॥
मासे मासे खवेरेवं, तिथ्यर्द्धाधिक्यमूह्यताम् । अहोरात्रैकषष्टौ स्युर्द्वाषष्टिस्तिथयो यथा ॥ १०१७ ॥
त्र्यशीत्याढ्यमहोरात्रशतं यदयनेऽयने । भवेत्तत्र तिथीनां तत्षडशीत्यधिकं शतं ॥ १०१८ ॥
एकत्रिंशद्विभक्तस्याङ्गुलस्यांशचतुष्टयम् । वृद्धिहान्योर्यदुक्तं तल्लभ्यं त्रैराशिकादपि ॥ १०१९ ॥
षडशीत्याऽतिरिक्तेन, तिथीनां शतकेन चेत् । हानिवृद्ध्योरङ्गुलानां, चतुर्विंशतिराप्यते ॥ १०२० ॥
तदैकतिथ्या किं प्राप्यं, राशित्रयमिदं लिखेत् । अन्त्येनैकेन मध्यस्थो, राशिस्त्र निहन्यते ॥ १०२१ ॥
चतुर्विंशतिरेव स्यादेकेन गुणितं हि तत् । षडशीतिशतेनाल्पो, भक्तुं नार्हत्ययं ततः ॥ १०२२ ॥
छेद्यछेदकयो राश्योः, षड्भिः कार्याऽपवर्त्तना । छेद्यश्चतुष्कात्माऽन्यस्तु, स्यादेकत्रिंशदात्मकः ॥ १०२३ ॥
इत्येकत्रिंशदुद्भूतमङ्गुलांशचतुष्टयम् । त्रैराशिकबलेनापि, वृद्धिहान्योः समर्थितम् ॥ १०२४ ॥
अथात्र करणं–
यत्पर्वणोऽभीष्टतिथौ, पौरुषी ज्ञातुमिष्यते । ततः पूर्वमतीतानि, पर्वाणीह युगादितः ॥ १०२५ ॥
स्युर्यानि पञ्चदशभिर्गुणयेत्तानि तत्र च । अभीष्टतिथिपर्यन्तान्, पर्वणोऽस्य तिथीन् क्षिपेत् ॥ १०२६ ॥

ह्रियते षडशीत्याढ्यशतेन राशिरेष च । लब्धेऽङ्के विषमे ज्ञेयमतीतं दक्षिणायनम् ॥ १०२७ ॥
ज्ञेयं लब्धे समो चाङ्केऽतिक्रान्तमुत्तरायणम् । एवं चात्रायनज्ञानोपाय एष प्रदर्शितः ॥ १०२८ ॥
षडशीतिशतेनाथ, तिथिराशौ हृतेऽत्र यत् । शेषं स्यादथवा भागालाभे यत्स्याद्यथास्थितम् ॥ १०२९ ॥
तच्चतुर्घ्नं विधायैकत्रिंशता प्रविभज्यते । यल्लब्धं तान्यङ्गुलानि, यच्छेषं तेऽङ्गुलांशकाः ॥ १०३० ॥
याम्यायने ध्रुवाङ्केऽस्ति, यः पादद्वयलक्षणः । स्यात्तत्रैतावतो वृद्धौ, पौरुष्यह्नि विवक्षिते ॥ १०३१ ॥
सौम्यायने ध्रुवाङ्केऽस्ति, यश्चतुष्पादलक्षणः । ततश्चैतावतो हानौ पौरुष्यह्नि विवक्षिते ॥ १०३२ ॥
युगस्य पर्वणि प्राज्ञ !, पञ्चाशीतितमे ननु । पञ्चम्यां स्यात्कतिपदा, पौरुषीति वद द्रुतम् ॥ १०३३ ॥
अतीतानामिह चतुरशीतिर्याऽस्ति पर्वणाम् । षष्ट्याढ्या द्वादशशती, सा स्यात्पञ्चदशाहता ॥ १०३४ ॥
पञ्चम्यां पृष्टमिति च, क्षिप्यते तत्र पञ्चकम् । पञ्चषष्टियुतानीति, शतानि द्वादशाभवन् ॥ १०३५ ॥
षडशीतिशतेनैषां, भागे लब्धाश्च षट् ततः । षड् गतान्ययनान्यस्ति, साम्प्रतं दक्षिणायनम् ॥ १०३६ ॥
शेषमेकोनपञ्चाशदधिकं शतमस्ति यत् । तस्मिंश्चतुर्गुणे पञ्च, शताः षण्णवतिस्पृशः ॥ १०३७ ॥
हताश्चैकत्रिंशताऽमी, प्राप्ता चैकोनविंशतिः । शेषाः सप्ताङ्गुलास्ते च, स्युर्यवा अष्टभिर्हताः ॥ १०३८ ॥
षट्पञ्चाशद्यवा जातास्ते चैकत्रिंशता हृताः । लब्ध एको यवः शेषाः, पञ्चविंशतिरंशकाः ॥ १०३९ ॥
पाद एकोनविंशत्याङ्गुलैः सप्ताङ्गुलाधिकः । याम्यायनत्वादेतच्च, वर्द्धनीयं पदद्वये ॥ १०४० ॥
ततः पादत्रयं सप्ताङ्गुलान्येकस्तथा यवः । एकत्रिंशद्भवाः पञ्चविंशतिश्च यवांशकाः ॥ १०४१ ॥
पञ्चाशीतितमे पर्वण्येतन्माना युगे भवेत् । पञ्चम्यां पौरुषीत्येवं, कार्याऽन्यत्रापि भावना ॥ १०४२ ॥
युगे वा सप्तनवतेः, पर्वणां समतिक्रमे । पञ्चम्यां स्यात्कतिपदा, पौरुषीत्यत्र कथ्यते ॥ १०४३ ॥
अत्र षण्णवतिः पञ्चदशघ्ना गतपर्वणाम् । पञ्चाढ्य स्याच्छताः पञ्चचत्वारिंशाश्चतुर्दश ॥ १०४४ ॥
षडशीतिशतेनैषां, भागे सप्त करं गताः । सप्तायनी गता तस्मात्संप्रत्यस्त्युत्तरायणम् ॥ १०४५ ॥
त्रिचत्वारिंशदधिकं, शेषं यद्धर्द्धते शतम् । तस्मिंश्चतुर्गुणे पञ्चशती स्यात्सद्विसप्ततिः ॥ १०४६ ॥
विभक्तैकत्रिंशतेयं, प्राप्ता चाष्टादशाङ्गुली । तया चैकं पदं लब्धमधिकान्यङ्गुलानि षट् ॥ १०४७ ॥
शेषाश्चतुर्दशांशा ये, स्युर्यवास्तेऽष्टताडिताः । शतमेकं भवत्येवं, यवानां द्वादशोत्तरम् ॥ १०४८ ॥
तस्यैकत्रिंशता भागे, हृते लब्धास्त्रयो यवाः । शेषाश्चैकत्रिंशदंशा, यवस्यैकोनविंशतिः ॥ १०४९ ॥
सौम्यायनत्वादेतच्च, शोध्यं पदचतुष्टयात् । ततः स्यात्पौरुषी मानमेवं पूर्वोदिते दिने ॥ १०५० ॥
पञ्चाङ्गुलानि द्वौ पादौ, तथा यवचतुष्टयम् । एकत्रिंशद्विभक्तस्य, यवस्य द्वादशांशकाः ॥ १०५१ ॥
किञ्च–अतीततिथिविज्ञानं, पौरुषीमानतोऽयने । यत्स्यात्त्रैराशिकायत्तं, तदप्यत्र निशम्यताम् ॥ १०५२ ॥
चतुर्भिरङ्गुस्यैकत्रिंशद्भागैर्यदाऽऽप्यते । एका तिथिस्तत्तिथयश्चतुर्भिरङ्गुलैः कति ? ॥ १०५३ ॥

अङ्गुलात्मान्तिमो राशिः, सावर्ण्यायाद्यराशिना । भवेच्छतं चतुर्विंशमेकत्रिंशद्गुणीकृतः ॥ १०५४ ॥
एतेन गुणितो मध्यराशिर्जात इयन्मितः । आद्येन राशिना भागे, चैकत्रिंशदवाप्यते ॥ १०५५ ॥
चतुरङ्गुलवृद्धायां, पौरुष्यां ध्रुवकोपरि । गता याम्यायनस्यैकत्रिंशत्तिथय एव तत् ॥ १०५६ ॥
ध्रुवाच्चतुष्पादरूपादथ क्षीणेष्विहाष्टसु । अङ्गुलेषु कियत्सौम्यायनस्य गतमुच्यताम् ॥ १०५७ ॥
अत्रोच्यते–
चतुर्भिरङ्गुलस्यैकत्रिंशद्भागैः क्षयं गतैः । तिथिरेकाऽऽप्यते चेत्तत्ताः कत्यष्टभिरङ्गुलैः ॥ १०५८ ॥
सावर्ण्यायान्तिमो राशिरेकत्रिंशद्गुणीकृतः । जायेते द्वे शते अष्टचत्वारिंशत्समन्विते ॥ १०५९ ॥
अन्त्येन राशिनाऽनेन, राशिर्मध्यो हतोऽभवत् । इयन्मानोऽथायमाद्यराशिना प्रविभज्यते ॥ १०६० ॥
द्वाषष्टिराप्यते तस्मात्, द्वाषष्टिस्तिथयो गताः । ज्ञेया सौम्यायनस्येदृक्पौरुषी मानदर्शनात् ॥ १०६१ ॥
इति पौरुषीप्रकरणं ।
पादोनपौरुषीरूपा, या पात्रप्रतिलेखना । प्रातः स्यात्साङ्गुलैः षड्भिर्ज्येष्ठाषाढनभस्त्रिके ॥ १०६२ ॥
भाद्रादित्रितयेऽष्टाभिर्मार्गादित्रितये पुनः । अङ्गुलैर्दशभिः शेषत्रये त्वष्टाभिरङ्गुलैः ॥ १०६३ ॥
अत्रेदं तत्त्वं–
यत्र यत्र हि मासादौ, या योक्ता पौरुषीमितिः । तत्र तत्रोक्ताङ्गुलानां, क्षेपे पादोनपौरुषी ॥ १०६४ ॥
इति पादोनपौरुषी ।
पौषमासे तनुच्छाया, नवपादमिता यदि । तदा स्यात्पौरुषी सार्द्धा, मासे मासे ततः क्रमात् ॥ १०६५ ॥
एकैको हीयते पादस्तदाऽऽषाढे पदत्रयम् । यथा हानिस्ततोवृद्धिस्ततः पौषे यथोदितम् ॥ १०६६ ॥
इति सार्द्धपौरुषी ।
पौषे वितस्तिच्छायाऽथ, यदि स्याद् द्वादशाङ्गुला । तदा दिनस्य पूर्वार्द्धं, मासे मासे ततः पुनः ॥ १०६७ ॥
द्वयोर्द्वयोरङ्गुलयोर्हानिर्भाव्या ततः शुचौ । मध्याह्ने स्यान्न तच्छाया, खलमैत्रीव मूलतः ॥ १०६८ ॥
यद्वा—
पौषे दिनार्द्धेऽङ्गुच्छाया, षट्पादा हीयते ततः । एकैकोऽहिर्मासि मासि, चाषाढे निष्ठिताऽखिला ॥ १०६९ ॥
एतत्पादोनपौरुष्यादिकं मानं यदीरितम् । तत्सर्वं स्वस्वराकायां, विज्ञेयं व्यवहारतः ॥ १०७० ॥
इति पूर्वार्द्धं ।

इत्थं युगस्याभिहितं स्वरुपं, मयाऽऽप्रवाक्यानुगमेन किञ्चित् ।
विशेषबोधस्पृहयालुभिस्तु, ज्योतिष्करण्डाद्यवलोकनीयम् ॥ १०७१ ॥

विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रांतिषद्राजश्रीतनयोऽतनिष्ठ विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्वप्रदीपोपमेऽष्टाविंशः परिपूर्णतामकलयत्सर्गो निसर्गोज्ज्वलः ॥ १०७२ ॥

॥ इति श्रीलोकप्रकाशेऽष्टाविंशतितमः सर्गः समाप्तः ॥

"आषाढस्य प्रथमदिवसे मेगमाश्लिष्टसानुम्" । श्लोक २.

"प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी" । श्लोक ४.

"शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ । मासानन्यान् गमय चतुरो लोचने मीलयित्वा" ॥ ११५ ॥
* [पा. शेषान्मासान्]

१. "कालः शीतोष्णवर्षात्मा, तस्य रात्रिरहः पक्षो मास ऋतुरयनं संवत्सरो युगमिति विशेषा : ।... हैमनं च मुष्टिमुपहन्तुं मार्गशीर्षी यात्रां यायात् ।...वासन्तिकं च मुष्टिमुपहन्तुं चैत्रीं यात्रां यायात् ।"

२. "त्रिंशतं चतुःपञ्चाशच्चाहोरात्राणां कर्मसंवत्सरः । तमाषाढीपर्यवसानमूनं पूर्णं वा दद्यात् । करणाधिष्ठितमधिमासकं कुर्यात्" ।

३. "राजवर्षं मासः पक्षो दिवसश्च व्युष्टं, वर्षाहेमन्तग्रीष्माणां तृतीयसप्तमा दिवसोनाः पक्षाः शेषाः पूर्णाः पृथगधिमासक इति कालः ।"

४. 'अधि' २ अध्याय २०, प्रक० ३८ "देशकालमानम्" ।

चतुर्दशाङ्गुलं शमः शलः परिरयः पदं च । द्विवितस्तिरत्निः प्राजापत्यो हस्तः । सधनुर्ग्रहः पौतवविवीतमानम् । सधनुर्मुष्टिः किष्कुः कंसो वा । द्विचत्वारिंशदङ्गुलस्तक्ष्णः क्राकचिककिष्कुः स्कन्धावारदुर्गराजपरिग्रहमानम् । चतुः पञ्चाशदङ्गुलः कुप्यवनहस्तः । चतुरशीत्यङ्गुलो व्यामो रज्जुमानं ख्रातपौरुषं च । चतुररत्निदण्डो धनुर्नालिकापौरुषं च । गार्हपत्यमष्टशताङ्गुलं धनुः पथिप्राकारमानं पौरुषं च अग्निचित्यानाम् । षट्कंसो दण्डो ब्रह्मदेयातिथ्यमानम् । दशदण्डो रज्जुः । एकतो द्विदण्डाधिको बाहुः । त्रुटो लवो निमेषः काष्ठा कला नालिका मुहूर्तः पूर्वापरभागो दिवसो रात्रिः पक्षो मासो ऋतुरयनं संवत्सरो युगमिति कालाः । पञ्चदशमुहूर्तौ दिवसो रात्रिश्च चैत्रे मास्याश्वयुजे च मासि भवतः । ततः परं त्रिभिर्मुहूर्तैरन्यतरच्चण्मासं वर्धते ह्रासते चेति । छायायामष्टपौरुष्यामष्टादशभागश्छेदः, षट्पौरुष्यां चतुर्दशभागः, चतुष्पौरुष्यामष्टभागः, द्विपौरुष्यां षड्भागः, पौरुष्यां चतुर्भागः, अष्टाङ्गुलायां त्रयोदश भागाः, अच्छायो मध्याह्न इति । परावृत्ते दिवसे शेषमेवं विद्यात् । आषाढे मासि नष्टच्छायो मध्याह्नो भवति । अतः परं श्रावणादीनां षण्मासानां द्व्यङ्गुलोत्तरा माघादीनां द्व्यङ्गुलावरा छाया इति । सोमाप्यायनः शुक्लः । सोमावच्छेदनो बहुलः । द्विपक्षो मासः । त्रिंशदहोरात्रः प्रकर्ममासः । सार्धः सौरः । अर्धन्यूनश्चान्द्रमासः । सप्तविंशतिर्नक्षत्रमासः । द्वात्रिंशत् मलमासः । पञ्चत्रिंशदश्ववाहायाः । चत्वारिंशद्धस्तिवाहायाः । द्वौ मासावृतुः । श्रावणः प्रोष्ठपदश्च वर्षाः । आश्वयुजः कार्तिकश्च शरद् । मार्गशीर्षः पौषश्च हेमन्तः । माघ फाल्गुनश्च शिशिरः । चैत्रो वैशाखश्च वसन्तः । ज्येष्ठामूलीय आषाढश्च ग्रीष्मः । शिशिरायुत्तरायणम् । वर्षादि दक्षिणायनम् । द्वयनः संवत्सरः । पञ्चसंवत्सरो युगमिति ।

दिवसस्य हरत्यर्क : षष्टिभागमृतौ ततः । करोत्येकमहश्छेदं तथैवैकं च चन्द्रमाः ॥ १ ॥
एवमर्धतृतीयानामब्दानामधिमासकम् । ग्रीष्मे जनयतः पूर्वं पञ्चाब्दान्ते च पश्चिमम् ॥ २ ॥
"इत्यध्यक्षप्रचारे द्वितीयेऽधिकरणे देशकालमानं विंशोऽध्यायः ॥ आदित एकचत्वारिंशः" ॥
"पञ्चसंवत्सरमययुगाध्यक्षं प्रजापतिम् । दिनर्त्वयनमासाङ्गं, प्रणम्य शिरसा शुचिः" ॥ १ ॥
"मासोऽधिकोऽयं स्यात्त्रिंशत्सूर्यमासव्यतिक्रमे ॥ ६४ ॥
युगस्य मध्ये पौषोऽयमन्ते त्वाषाढ एव च ।"
"वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्व्या विहिताश्च यज्ञाः । तस्मादिदं कालविज्ञानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञम्" ॥ ३ ॥
माघशुक्लप्रपन्नस्य, पौषकृष्णसमापिनः । युगस्य पञ्चवर्षस्य, कालज्ञानं प्रचक्षते ॥ ५ ॥
स्वराक्रमेते सोमार्कौ, यदा साकं सवासवौ । स्यात्तदादि युगं माघस्तपः शुक्लोऽयनं ह्युदक् ॥ ६ ॥
प्रपद्येते श्रविष्ठादौ, सूर्याचन्द्रमसावुदक् । सार्पार्धे दक्षिणार्कस्तु माघश्रावणयोः सदा ॥ ७ ॥
धर्मवृद्धिरपां प्रस्थः, क्षपाह्रास उदग्गतौ । दक्षिणे तौ विपर्यासः, षण्मुहूर्त्ययनेन तु" ॥ ८ ॥
"त्रिंशत्यहां सषट्षष्टिरब्दे षट् चर्तवोऽयने । मासा द्वादश सूर्याः, स्युरेतत्पञ्चगुणं युगम्" ॥ २८ ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

॥ अथैकोनत्रिंशत्तमः सर्गः ॥

युगैरित्युक्तरूपैः स्याच्चतुर्भिर्वर्षविंशतिः । पञ्चविंशतयोऽब्दानां, वर्षाणां शतमीरितम् ॥ १ ॥
दशवर्षशतान्यब्दसहस्रं परिकीर्त्तितम् । शतं वर्षसहस्राणां, वर्षलक्षं भवेदिह ॥ २ ॥
अतः परं च सर्वोऽङ्कः, शीर्षप्रहेलिकावधिः । भाव्यः क्रमेण चतुरशीतिलक्षगुणो बुधैः ॥ ३ ॥
तथाहि–वर्षलक्षाणि चतुरशीतिः पूर्वाङ्गमुच्यते । पूर्वाङ्गलक्षैश्चतुरशीत्या पूर्वं प्रकीर्त्तितम् ॥ ४ ॥
पूर्वे च वर्षकोटीनां, लक्षाणि किल सप्ततिः । षट्पञ्चाशत्सहस्राणि, निर्दिष्टानि जिनेश्वरैः ॥ ५ ॥
पूर्वलक्षाणि चतुरशीतिश्च त्रुटिताङ्गकम् । आयुर्मानं भवत्येतन्नाभेयस्य जिनेशितुः ॥ ६ ॥
त्रुटिताङ्गैश्च चतुरशीतिलक्षमितैर्मतम् । त्रुटितं स्यात्क्रमादेवमडडाङ्गं ततः परम् ॥ ७ ॥
अडडं चाववाङ्गं चाववं हुहुकाङ्गकम् । हुहुकं चोत्पलाङ्गं चोत्पलं पद्माङ्गमेव च ॥ ८ ॥
पद्मं च नलिनाङ्गं च, नलिनं स्यात्ततः परम् । भवत्यर्थनिपूराङ्गं, ततश्चार्थनिपूरकम् ॥ ९ ॥
अयुताङ्गं चायुतं च, नयुताङ्गं भवेत्ततः । नयुतं प्रयुताङ्गं च, प्रयुतं चूलिकाङ्गकम् ॥ १० ॥

चूलिका स्यात्ततश्चाग्रे, शीर्षप्रहेलिकाङ्गकम् । शीर्षप्रहेलिका चेति, पूर्णो गणितगोचरः ॥ ११ ॥
शीर्षप्रहेलिकाङ्काः स्युश्चतुर्णवतियुक्शतम् । अङ्कस्थानाभिधाश्चेमाः, श्रित्वा माथुरवाचनाम् ॥ १२ ॥

भगवतीसूत्रानुयोगद्वारसूत्रजम्बूद्वीपप्रज्ञप्त्यादिष्वयमङ्क्रमो ज्ञेय इति भावः । वालभ्यवाचना चेयं–

संख्याह्वयाश्च सन्त्यङ्कस्थानराशेरितोऽन्यथा । स्यादङ्केऽत्रापि चतुरशीतिलक्षगुणो मुहुः ॥ १३ ॥

तथाहि—

स्यात्पूर्वलक्षैश्चतुरशीत्याऽत्रैकं लताङ्गकम् । लताङ्गनां च चतुरशीत्या लक्षैर्भवेल्लता ॥ १४ ॥
लताभिस्तावतीभिश्च, भवेन्महालताङ्गकम् । महालता तैस्तावद्भिरित्याशीर्षप्रहेलिकाम् ॥ १५ ॥
नलिनाङ्गं च नलिनं, स्यान्महानलिनाङ्गकम् । महानलिनमेवं स्यात्पद्माङ्गं पद्ममेव च ॥ १६ ॥
महापद्माङ्गं च महापद्मं स्यात्कमलाङ्गकम् । कमलं महाकमलाङ्गं महाकमलं तथा ॥ १७ ॥
कुमुदाङ्गं च कुमुदं, स्यान्महाकुमुदाङ्गकम् । महाकुमुदमेवं स्यात्, त्रुटिताङ्गं ततः परम् ॥ १८ ॥
त्रुटितं महात्रुटिताङ्गं महात्रुटितं तथा । अडडाङ्गं चाडडं च, महाडडाङ्गमेव च ॥ १९ ॥
महाडडमथोहाङ्गमूहं प्रोक्तं ततः परम् । महोहाङ्गं महोहं च, शीर्षप्रहेलिकाङ्गकम् ॥ २० ॥
शीर्षप्रहेलिका च स्यात्संख्या पर्यन्तवर्त्तिनी । अस्यां पञ्चाशदधिकं, स्यादङ्कानां शतद्वयम् ॥ २१ ॥

१८७९५५१७९५५०११२५९५४१९००९६९९८१३४३०७७०७९७४६५४९४२६१९७७७४७६५७२५७३४५७१८६८१६

इति सप्रतिरंकाः, अग्रे चाशीत्यधिकं बिंदुशतं.

अत्र ज्योतिष्करण्डवृत्तौ श्री मलयगिरिपूज्या इति स्माहुः–"इह स्कन्दिलाचार्य प्रवृत्तौ (प्रतिपत्तौ) दुःषमानुभावतो दुर्भिक्षप्रवृत्त्या साधूनां पठनगुणनादिकं सर्वमप्यनेशत्, ततो दुर्भिक्षातिक्रमे सुभिक्षप्रवृत्तौ द्वयोः स्थानयोः सङ्घमेलकोऽभवत्तद्यथा–एको वलभ्यामेको मथुरायां, तत्र च सूत्रार्थसंघटने परस्परं वाचनाभेदो जातो, विस्मृतयोर्हि सूत्रार्थयोः स्मृत्वा संघटने भवत्यवश्यं वाचनाभेद इति न काचिदनुपपत्तिः, तत्रानुयोगद्वारादिकमिदानीं वर्त्तमानं माथुरवाचनानुगतं, ज्योतिष्करण्डसूत्रकर्त्ता चाचार्यो वालभ्यस्तत इदं संख्यानप्रतिपादनं वालभ्यवाचनानुगतमिति नास्यानुयोगद्वारादिप्रतिपादित सङ्ख्यास्थानैः सह विसदृशत्वमुपलभ्य विचिकित्सितव्यमिति" ।

[श्लोक ७१ नी टीका]

आरभ्य समयादेवं, शीर्षप्रहेलिकावधि । कालस्य गणितं ज्ञेयमुपमेयं ततः परम् ॥ २२ ॥

तथोक्तं भगवत्यनुयोगद्वारजम्बूद्वीपप्रज्ञप्त्यादिसूत्रेषु–'एतावतावगणिए एतावतावगणियस्स विसए, तेण परं उवमिए'

अनेन कालमानेन, घर्मायां नारकाङ्गिनाम् । यथासंभवमायूंषि, मीयन्ते तत्त्ववेदिभिः ॥ २३ ॥
भवनेशव्यंतराणां, केषाञ्चिन्नाकिनामपि । केषाञ्चिन्नृतिरश्चां च, तृतीयारकवर्त्तिनाम् ॥ २४ ॥
यद्यप्यस्मात्परोऽप्यस्ति, सङ्ख्याया विषयो महान् । पूर्वोदितचतुःपल्यप्ररूपणनिरूपितः ॥ २५ ॥

किंत्वसाङ्ख्यव्यवहार्योऽसौ, भवति स्थूलदर्शिनाम् । ततः संव्यवहार्येऽस्मिन्, सङ्ख्यानेन निरूपितः ॥ २६ ॥

तथोक्तं जम्बूद्वीपप्रज्ञप्तिवृत्तौ–"एतस्माच्च परतोऽपि सर्षपचतुष्पल्यप्ररूपणागम्यः । संख्येयः कालोऽस्ति, किन्त्वनतिशायिनामसंव्यवहार्यत्वान्नेहोक्त इति स्थित्यधिकारे तु सर्वत्रापि सिद्धान्ते पूर्वकोटेः परतोऽधिकां स्थितिं बिभ्राणौ नरतिर्यञ्चौ संख्येयायुष्कतया न व्यवहियेते, तथोक्तं-श्री भगवती चतुर्विंशे शते द्वितीयोद्देशकवृत्तौ—"इहासङ्ख्यातवर्षायुर्जघन्यस्थितिकः प्रक्रान्तः, स च सातिरेकपूर्वकोट्यायुर्भवति, तथैवागमे व्यवहृतत्वात्" इति अत एव पूर्वकोट्यधिकायुषश्चास्त्रिप्राप्तिमुक्तिगमनादिकमपि निषिध्यत इति ज्ञेयम् ।

अथ द्विधोपमेयं स्यात्पल्यसागरभेदतः । तत्स्वरूपं चात्रशास्त्रे, संज्ञासर्गे निरूपितम् ॥ २७ ॥
पल्योपमानां सूक्ष्माद्धाह्वयानां कोटिकोटिभिः । दशभिर्जायतेऽत्रैकं, सूक्ष्माद्धासागरोपमम् ॥ २८ ॥
एतेषां सागराणां च, चतस्रः कोटिकोटयः । आद्यः कालोऽवसर्पिण्यां, सुषमसुषमाभिधः ॥ २९ ॥
तिस्रोऽब्धिकोटिकोट्योऽथ, द्वितीयः सुषमाभिधः । तृतीयोऽब्धिकोटिकोटिद्वयं सुषमदुःषमा ॥ ३० ॥
न्यूनः कालो द्विचत्वारिंशता वर्षसहस्रकैः । तुर्योऽब्धिकोटाकोट्येका, दुःषमसुषमाभिधः ॥ ३१ ॥
पञ्चमोऽब्दसहस्राणि, स्याद्दुःषमैकविंशतिः । तावन्त्यब्दसहस्राणि, षष्ठो दुःषमदुःषमा ॥ ३२ ॥
एवं दशभिरब्धीनां, कोटाकोटिभिरीरिता । एकाऽवसर्पिणी कालचक्रार्द्धं षडरात्मिका ॥ ३३ ॥
विपरीता व्यवस्थेयमुत्सर्पिण्यां प्रकीर्तिता । तथाहि तत्र प्रथमः, कालो दुःषमदुःषमा ॥ ३४ ॥
प्राग्वन्मानं त्वस्य वर्षसहस्राण्येकविंशतिः । द्वितीयो दुःषमाप्यब्दसहस्राण्येकविंशतिः ॥ ३५ ॥
तृतीयोऽब्धिकोटिकोटी, दुःषमसुषमाभिधः । न्यूना सा च द्विचत्वारिंशता वर्षसहस्रकैः ॥ ३६ ॥
वार्द्धिकोटाकोटियुग्मं, तुर्यः सुषमदुःषमा । पञ्चमः सुषमाकालस्तिस्रोऽब्धिकोटिकोटयः ॥ ३७ ॥
चतस्रोऽब्धिकोटिकोट्यः, सुषमासुषमाऽन्तिमः । उत्सर्पिणीति वार्द्धीनां, दशभि कोटिकोटिभिः ॥ ३८ ॥
एवं द्वादशकालाऽवसर्पिण्युत्सर्पिणी भवेत् । पुनः कालविभागास्ते, सुषमसुषमादयः ॥ ३९ ॥
सदा विवर्तमानत्वसाधर्म्यादेतदुच्यते । कालचक्रं कालभागाः, पूर्वोक्तास्त्वरका इह ॥ ४० ॥
चक्रस्य भ्रमतो यद्धत्पूर्वार्द्धे योन्तिमोऽरकः । परार्द्धे प्रथमः स स्याद्यस्तत्राद्योऽत्र सोऽन्तिमः ॥ ४१ ॥
एवमत्राप्युक्तनीत्या, कालचक्रेर्द्धयोर्द्धयोः । वैपरीत्याद्विवर्त्तन्ते, द्वादशाप्यारकाः क्रमात् ॥ ४२ ॥
भरतैरावताख्येषु, क्षेत्रेषु स्याद्दशस्वयम् । कालः परावर्त्तमानः, सदा शेषेष्ववस्थितः ॥ ४३ ॥
यस्यां सर्वे शुभा भावाः, क्षीयन्तेऽनुक्षणं क्रमात् । अशुभाश्च प्रवर्द्धन्ते, सा भवत्यवसर्पिणी ॥ ४४ ॥

इति ज्योतिष्करण्डवृत्त्यभिप्रायः । जम्बूद्वीपप्रज्ञप्तिसूत्रे तु–'अणंतेहिं वण्णपज्जवेहिं गंधपज्जवेहिं यावत्परिहायमाणेहिं २ ओसप्पिणी पडिवज्जइ' इत्येवं दृश्यते इति ज्ञेयं.

शुभा भावा विवर्द्धन्ते, क्रमाद्यस्यां प्रतिक्षणम् । हीयन्ते चाशुभा भावा, भवत्युत्सर्पिणीति सा ॥ ४५ ॥

तथाहि–प्राप्तप्रकर्षे सुषमसुषमाख्येऽऽरके भवेत् । भरतैरवताख्येषु, मही करतलोपमा ॥ ४६ ॥
सा पञ्चवर्णैर्मणिभिः, स्याद्रम्या तादृशैस्तृणैः । तत्रासते शेरते च, रमन्ते च जनाः सुखम् ॥ ४७ ॥
भान्त्यत्रोद्दालकोद्दालादयो वृक्षाः पदे पदे । स्थूलमूलाश्चारुशाखा, दलपुष्पफलाञ्चिताः ॥ ४८ ॥
ते चामी–उद्दालाः कोद्दाला मोद्दाला नृत्तमालकृत्तमालाः । स्युर्दन्तशृङ्गशङ्खश्वेतान्मालास्तरुविशेषाः ॥ ४९ ॥
भेरुसेरुहेरुतालाः, सालः सरल एव च । सप्तपर्णनागपूगाः, खर्जूरी नालिकेरिका ॥ ५० ॥
एषां वनानि भूयांसि, विराजन्ते पदे पदे । मल्लिका यूथिका जातिबाणमुद्गरबीअकाः ॥ ५१ ॥
सिन्दुवारमनोवेद्यसेरिकानवमालिकाः । बन्धुजीवककोरिण्टवासन्तीकुन्दचम्पकाः ॥ ५२ ॥
एषां गुल्मा मृदुमरुत्कम्पिताः कुर्वते तदा । सुगन्धिभिः पञ्चवर्णैः, कुसुमैरास्तृतां महीम् ॥ ५३ ॥
वनराज्यस्तदा हंसैः, सारसैश्च कपिञ्जलैः । जीवञ्जीवैः कोकिलाद्यैर्भान्ति कान्ताञ्चितैः खगैः ॥ ५४ ॥
मत्ताङ्गाख्यास्तदा कल्पद्रुमाः स्युर्भासुरश्रियः । मत्तं मदस्तस्य चाङ्गं, कारणं येषु ते तथा ॥ ५५ ॥
चन्द्रप्रभाद्याः स्युर्मद्यविशेषा यादृशा इह । उत्कृष्टद्रव्यनिष्पन्ना, वर्णगन्धरसोत्तराः ॥ ५६ ॥
आरोग्यपुष्टिसौभाग्यमदतुष्ट्यादिकारकान् । तेषां फलानि पुष्पाणि, स्रवन्ति तादृशान् रसान् ॥ ५७ ॥
भृताङ्गाख्यास्तथा कल्पतरवो बिभ्रति श्रियम् । फलादि येषां रत्नादिनानापात्रत्वमियति ॥ ५८ ॥
तुर्याङ्गाख्यास्तदा कल्पतरवः सुखयन्ति च । चतुर्विधानां वाद्यानां, ततादीनां वरास्वैः ॥ ५९ ॥
अयं भावः–पत्रपुष्पफलादीनां, भवेत्तेषां मरुज्जुषाम् । दक्षशिल्पिप्रयुक्तानामातोद्यानामिव ध्वनिः ॥ ६० ॥
आतोद्यचातुर्विध्यं चैवं—
ततं वीणाप्रभृतिकं, तालप्रभृतिकं घनम् । वंशादिकं तु शुषिरमानद्धं मुरजादिकम् ॥ ६१ ॥
तदा दीपशिखा नाम, कल्पवृक्षाः स्फुरद्रुचः । दीपा इव स्नेहसिक्ता, दीप्यन्ते तिमिरच्छिदः ॥ ६२ ॥
अयं भावः–यथा दीपशिखा रात्रौ, गृहान्तर्द्योतते भृशम् । दिवसे वा गृहाद्यन्तस्तद्वदेते द्रुमा अपि ॥ ६३ ॥
एवं च–वक्ष्यमाणकल्पद्रुमेभ्य एषां विशेषो भावितो भवतीति ज्ञेयं.
अथ ज्योतिषिका नाम, शोभन्ते कल्पपादपाः । ज्योतिर्वह्निर्दिनेशो वा, तत्तुल्यत्वात्तथाभिधाः ॥ ६४ ॥
'ज्योतिर्वह्निदिनेशयोरिति वचनात् ।'
अयं भावः–तेषां स्वभावात्स्यात्कान्तिरचिरोद्गतसूर्यवत् । विद्युदुल्कावलयवन्निर्धूमानलपुञ्जवत् ॥ ६५ ॥
अत एव प्रभा तेषां, द्रष्टृणां सुखदायिनी । दुःखदाऽक्षिप्रातिकूल्यान्न तु मध्यन्दिनार्कवत् ॥ ६६ ॥
नरक्षेत्राद्बहिर्वर्त्तिचन्द्रसूर्यग्रहादिवत् । परस्परावगाढाभिर्लेश्याभिर्भान्ति ते स्थिराः ॥ ६७ ॥
चित्राङ्गा नाम ये कल्पवृक्षास्ते माल्यदायिनः । चित्रं विवक्षया माल्यं, तद्धेतुत्वात्तथाभिधाः ॥ ६८ ॥
यथा प्रेक्षागृहं नानाचित्रोपेतं मनोरमम् । सर्वतो लम्बमानाभिः, पुष्पस्रग्भिरलंङ्कृतम् ॥ ६९ ॥

ग्रथितैर्वेष्टिमैः संघातिमैश्च पूरिमैरिति । माल्यैः पूर्णं द्वारदेशोल्लसद्वन्दनमालिकम् ॥ ७० ॥
पञ्चवर्णपुष्पपुञ्जोपचारश्चारुभूतलम् । सुखदायि भवेल्लोके, तथा ते स्वर्द्रुमा अपि ॥ ७१ ॥
भोज्यसंपादकाः कल्पवृक्षाश्चित्ररसाह्वयाः । चित्रो नानाश्चर्यदो वा, रसो ह्येषां ततस्तथा ॥ ७२ ॥
सुगन्धिस्वच्छकलमशालितन्दुलगर्भितम् । तादृग्गोदुग्धसंराद्धं, परमान्नं सुसंस्कृतम् ॥ ७३ ॥
सद्यस्कशारदघृतशर्कराक्षोदमिश्रितम् । तुष्टिपुष्ट्यादिजनकमतिस्वादु भवेद्यथा ॥ ७४ ॥
संस्कृतो वा सूपकारैरोदनश्चक्रवर्त्तिनः । चतुष्कल्पसेकसिक्तोऽखण्डः कलमशालिजः ॥ ७५ ॥
सुपक्वो बाष्पमुन्मुञ्चन्मृदुस्तुषमलोज्झितः । विविक्तसिक्थो विविधशाकशाली भवेद्यथा ॥ ७६ ॥
चतुष्कल्पसेकसिक्त इति ।
विज्ञा रसवतीशास्त्रे, कोमलं कर्त्तुमोदनम् । कुर्वन्ति चतुरः कल्पांस्ते सेकविषयानिह ॥ ७७ ॥
वस्त्रपूतस्वग्निपक्वप्राज्याज्यसमितोद्भवः । यथा वा मोदको भूरिशर्कराक्षोदमेदुरः ॥ ७८ ॥
द्राक्षाचारुकुलीनालिकेरखण्डादिबन्धुरः । कर्पूरैलालवङ्गादिराजद्रव्यपरिष्कृतः ॥ ७९ ॥
सुरभिः कोमलः स्वच्छो, बलपुष्ट्यादिकृद्भवेत् । क्षुत्पिपासाप्रशमनः, सर्वाङ्गीणप्रमोदकृत् ॥ ८० ॥
तथा नानारसोपेतसद्भोज्यविधिशालिभिः । फलपुष्पैर्विराजन्ते, वृक्षाश्चित्ररसा अपि ॥ ८१ ॥
मण्यङ्ग नाम ये कल्पद्रुमास्ते भूषणप्रदाः । मणीर्मणिमयीभूषास्तद्दायित्वाच्च ते तथा ॥ ८२ ॥
हारोऽर्द्धहारो मुकुटः, कुण्डलं कर्णवालिका । कर्णवेष्टनकं ग्रैवेयकं कङ्कणमुद्रिका ॥ ८३ ॥
हेमजालं रत्नजालं, कटकं वलयाङ्गदे । बाहुबन्धो बाहुरक्षा, पुष्पकं तिलकोऽपि च ॥ ८४ ॥
दीनारमालिका चन्द्रमालिका सूर्यमालिका । शिरोमणिर्झुम्बनकं, काञ्ची च कटिसूत्रकम् ॥ ८५ ॥
नूपुरः पादकटको, घर्घरी क्षुद्रघण्टिका । भूषाभिदो या इत्याद्याः, स्वर्णमुक्तामणीभवाः ॥ ८६ ॥
स्वभावतस्तथारूपैः, फलपुष्पैरलङ्कृताः । तदर्थिनां द्रुमास्ते द्राक्, पूरयन्ति मनोरथान् ॥ ८७ ॥
गेहाकाराः कल्पवृक्षा, नानागेहाकृतिस्पृशः । निवाससौख्यं विपुलं, वितरन्ति तदर्थिनाम् ॥ ८८ ॥
कपिशीर्षस्फुरद्धप्रचरिकाट्टालकाञ्चिताः । मनोज्ञमण्डपास्तुङ्गतोरणाञ्चितगोपुराः ॥ ८९ ॥
एकद्वित्रिचतुःपञ्चषट्सप्ताद्युरुभूमयः । गवाक्षालीपरिक्षिप्ताः, सन्निर्यूहविटङ्किकाः ॥ ९० ॥
अभ्रंलिहशिरश्चन्द्रशालाशालितमौलयः । सद्द्वारपट्टवलभीस्तम्भसंबन्धबन्धुराः ॥ ९१ ॥
वृत्तास्त्र्यस्राश्चतुःकोणा, आदर्शोपमकुट्टिमाः । चञ्चच्चन्द्रोदयाश्चारुचित्रचित्रितभित्तयः ॥ ९२ ॥
एकद्वित्रिचतुरादिशाला गर्भगृहाञ्चिताः । श्रीवत्ससर्वतोभद्रनन्दावर्त्तादिसंज्ञिनः ॥ ९३ ॥
शैलार्द्धशैलसंस्थाना, गिरिकूटाकृतिस्पृशः । आस्थानप्रेक्षणगृहचित्रशालाद्यलङ्कृताः ॥ ९४ ॥
मज्जनादर्शशृङ्गारमोहनागारमण्डिताः । आपणाद्यैर्विशेषैश्च, विविधैरुपलक्षिताः ॥ ९५ ॥

सर्वर्त्तुसुखदा रम्या, लसत्सोपानदर्दराः । सुखारोहावताराश्च, सुखप्रवेशनिर्गमाः ॥ ९६ ॥
लिप्ता गुप्ता घृष्टमृष्टा, मार्जिताः सुधयोज्ज्वलाः । प्रासादाः स्युर्यथा लोके, स्वभावात्ते तथा द्रुमाः ॥ ९७ ॥
अनग्नाख्याः कल्पवृक्षाः, स्युर्नानावस्त्रदायिनः । जना अनग्नास्तेभ्यः स्युस्ततस्ते तादृशाभिधाः ॥ ९८ ॥
चीनांशुकं दुकूलं च, कौशेयमतसीमयम् । कार्पासिकं चाजिनकं, तार्णाख्लकम्बलाः ॥ ९९ ॥
इत्यादयोवस्त्रभेदा, देशे देशे भवन्ति ये । नानावर्णा मृदीयांसो, मनश्चक्षुर्वपुः सुखाः ॥ १०० ॥
द्रुमास्ते तादृशैर्वस्त्रैः, कम्रैः स्त्रीपुरुषोचितैः । स्वभावतः समुद्भूतैः, प्रीणयन्ति तदर्थिनः ॥ १०१ ॥
एवमेते दशविधाः, कल्पवृक्षाः, स्वभावतः । यथोक्तरूपा जायन्ते, तादृक्कालानुभावतः ॥ १०२ ॥

तथोक्तं जीवाभिगमसूत्रे—'तहेव ते मत्तंगावि दुमगणा अणेगबहुवीससापरिणयाए मज्जविहीए उववेया फलेहिं पुण्णा वीसंदंतीत्यादि'

एतन्नामसंग्रहश्चैवं—

मत्त १ भृत २ त्रुटिताङ्ग ३, दीपशिखा ४ ज्योतिरङ्ग ५ चित्राङ्गाः ।
चित्ररसा ७ मण्यङ्ग ८ गेहाकारा ९ अनग्नाश्च १० ॥ १०३ ॥

एते च वनस्पतय इति ज्ञायन्ते, तथोक्तं जम्बूद्वीपप्रज्ञप्तिवृत्तौ—"अथात्र वृक्षाधिकारात्कल्पद्रुमस्वरूपमाहे" ति । आचाराङ्गलोकसाराध्ययननिर्युक्तिवृत्तावप्युक्तं—"सचित्तो द्विपदश्चतुष्पदोऽपदश्चेति, द्विपदेषु जिनः, चतुष्पदेषु सिंहादिः, अपदेषु कल्पवृक्ष इति" ।

तस्मिन्नवसरे च स्युर्मनुष्या युग्मधर्मिणः । सुरूपाः सुभगा दक्षा, न्यक्षलक्षणलक्षिताः ॥ १०४ ॥
स्वर्णकच्छपसंस्थानमृदुरक्ततलक्रमाः । पुराद्रिमकराब्धीन्दुमुख्यरेखाङ्कितांघ्रयः ॥ १०५ ॥
संहतर्जुक्रमवृद्धचरणाङ्गुलिमञ्जुलाः । ताम्रोन्नततनुस्निग्धसन्नखा गुप्तगुल्फकाः ॥ १०६ ॥
मृदुवृत्तक्रमस्थूलजङ्घा निगूढजानवः । हस्तिहस्तोरवो जात्यतुरङ्गगुप्तगुह्यकाः ॥ १०७ ॥
जात्याश्ववद्बहिर्मूत्राद्युपलेपविवर्जिताः । कण्ठीरवकटीराः सद्वज्रमध्या झषोदराः ॥ १०८ ॥
स्फुरत्तरङ्गसुभगत्रिवलीललितोदराः । निम्नप्रदक्षिणावर्त्तगङ्गावर्त्ताभनाभयः ॥ १०९ ॥
मृदुस्निग्धतनुश्यामरोमराजीविराजिताः । मञ्जुमानोपेतपार्श्वा, अनालक्ष्यकरण्डकाः ॥ ११० ॥
पृथुस्वर्णशिलाकल्पश्रीवत्साङ्कितवक्षसः । पुष्टप्रकोष्ठकद्रङ्गपरिघोपमबाहवः ॥ १११ ॥
रक्ताब्जमञ्जुलतलमणिबन्धाढ्यपाणयः । स्वस्तिकार्केन्दुचक्रादिरेखाराजिकराम्बुजाः ॥ ११२ ॥
वृषस्कन्धोन्नतस्कन्धा, दधानाः कण्ठकंदलम् । त्रिरेखं कम्बुसदृशं, चतुरङ्गुलमात्रकम् ॥ ११३ ॥
व्याघ्रविस्तीर्णहनवोऽवस्थितश्मश्रुराजयः । पक्वबिम्बाभाधरौष्ठास्तद्विश्रान्तसितस्मिताः ॥ ११४ ॥
कुन्दपुष्पोपमाखण्डस्थिराच्छिद्रदालयः । सुरक्तरसनाः कोकनदकोमलतालवः ॥ ११५ ॥
शुक्वच्चूपमोत्तुङ्गसरलायतनासिकाः । स्मेराब्जत्रस्तहरिणनेत्रजैत्रोरुलोचनाः ॥ ११६ ॥

आरोपितधनुर्वक्रसलीलश्यामलभ्रुवः । प्रमाणोपेतसुभगाव्याहतश्रवणेन्द्रियाः ॥ ११७ ॥
पीनादर्शतलाकारकपोललललितानना: । चन्द्रार्द्धमाला निर्लक्ष्मकार्तिकीन्दुसमानना: ॥ ११८ ॥
उष्णीषशिखरोदारसच्छत्राकारमौलयः । दाडिमीपुष्परक्ताच्छ मृदुकेशान्तभूमयः ॥ ११९ ॥
स्निग्धश्यामसुगन्धीषद्वक्रस्यावर्त्तमूर्द्धजाः । मत्तद्विपेन्द्रगतयो, द्वात्रिंशल्लक्षणान्विताः ॥ १२० ॥

तानि चैवं–यूप १ स्तूप २ ध्वज ३ च्छत्र ४–कमण्डलु ५ यवां ६ कुशाः ७ ।
पताका ८ कूर्म ९ मकर १० मयूर ११ सुप्रतिष्ठकाः १२ ॥ १२१ ॥
मेदिनी १३ तोरणां १४ म्भोधि १५-मन्दिरा १६ दर्श १७ पर्वताः १८ ।
गजो १९ क्ष २० सिंह २१ कलश २२ रथ २३ मत्स्य २४ शुका १५ स्तथा ॥ १२२ ॥
वरस्थाला २६ ष्टापद २७ श्रीदामा २८ भिषेक २९ चामराः ३० ।
वापी ३१ सौवस्तिक ३२ श्चेति द्वात्रिंशत्पुण्यशालिनाम् ॥ १२३ ॥

तदा सर्वाङ्गसुन्दर्यः, प्रशस्तस्त्रीगुणाञ्चिताः । पुण्यनैपुण्यलावण्या, भवन्ति महिला अपि ॥ १२४ ॥
सुवर्णकूर्मसंस्थानमृदुरक्ततलांहयः । सुश्लिष्टवृत्तसरलक्रमदीर्घाङ्गुलिव्रजाः ॥ १२५ ॥
तलिनानुन्नतान् रक्तान्, दधत्यः पादयोर्नखान् । दशदिक्पतिदेवीनामात्तान् मौलिमणीनिव ॥ १२६ ॥
यासां वृत्तक्रमस्थूलमृदुजङ्घापराजिताः । वसन्ति विपिनेऽद्यापि, हरिण्यो लज्जिता इव ॥ १२७ ॥
जिता वृत्ताऽरोमपीनमृदुगौरैर्यदूरुभिः । कदल्योऽन्तर्दधुः शून्यभावं व्रीडातुर इव ॥ १२८ ॥
समुद्र संपुट इव, श्लिष्टसन्धिर्न दृश्यते । यासां जानुर्भृशं गूढः, कृपणस्येव सेवधिः ॥ १२९ ॥
नितम्बबिम्बं पृथु या, दधते पीनवर्त्तुलम् । जङ्गमं त्रिजगज्जिष्णोः, स्मरस्येव सुदर्शनम् ॥ १३० ॥
वदनद्विगुणायामं, मृदुलं मांसलं घनम् । विभाति जघनं यासां, स्वःसरित्पुलिनोपमम् ॥ १३१ ॥
यतो लक्षणोपेतस्त्रीणां जघनं मुखायामाद् द्विगुणविस्तारं भवतीति ।
कटी पटीयसी यासां, कण्ठीरवविजित्वरी । नाभिः सौन्दर्यसर्वस्वभूमभूमिगृहोपमा ॥ १३२ ॥
प्रक्षीणमुदरं यासां, न स्पष्टमुलक्ष्यते । किन्तु त्रिवल्याद्याधेयानुपपत्त्या प्रतीयते ॥ १३३ ॥
यासामतिकृशो मध्यदेशो भङ्गभयादिव । त्रिवलीदम्भतः स्वर्णसूत्रत्रयदृढीकृतः ॥ १३४ ॥
यद्वा–पुरो रोमावली चारुर्यासां पश्चात्तु वेणियुक् । शङ्के भङ्गभिया मध्यो, दत्तायःपट्टिकाद्वयः ॥ १३५ ॥
रोमावली कुण्डलिनी, यासां नाभिबिलोद्गता । रागोरुगरलग्रस्तं, न केषां कुरुते मनः ? ॥ १३६ ॥
तनुस्निग्धश्यामरोमतरङ्गोच्चैः प्रसर्पति । यासां नाभिहृदोद्भूता, रोमराजीतरङ्गिणी ॥ १३७ ॥
यासामुरोजौ राजेते, पीनवृत्तदृढोन्नतौ । मनःस्थयो रत्यनङ्गवेश्मनोः कलशाविव ॥ १३८ ॥
कुचौ सचूचुकौ यासां, नीलाब्जपिहिताननौ । मनःस्मरगृहद्वारमाङ्गल्यकलशाविव ॥ १३९ ॥

स्थातुं यत्कुचयोरन्तरक्षमा चारुवृत्तयोः । गुणान्वितापि सच्छिद्रा, मुक्तास्रग् लम्बते बहिः ॥ १४० ॥
मृणालिकामृदू बाहू, करौ यासां कजोपमौ । मृदुरक्ततलौ सूर्यचन्द्रचक्रादिचिह्नितौ ॥ १४१ ॥
सरलाभिः सुवृत्ताभिः, स्निग्धारुणनखांशुभिः । अङ्गुलीभिः करौ यासां, राजतः स्मरतूणवत् ॥ १४२ ॥
त्रिलोकोत्तरसौभाग्यव्यञ्जिरेखात्रयाङ्कितः । कण्ठो यासां विभाति स्म, चतुरङ्गुलसंमितः ॥ १४३ ॥
यासां हनुरनूनश्रीः, शोभते भासुरद्युतिः । स्वैरं विलसतो रत्यनङ्गयोरिव दर्पणः ॥ १४४ ॥
अधरौष्ठपुटं यासां, क्लृप्तं रागरसैरिव । विरक्तानपि यद्रक्तान्, कुरुते चिन्तनादपि ॥ १४५ ॥
ईषद्रक्तं सुरक्तेन, नीरसं सरसेन च । स्याद्यदोष्ठेन सस्पर्द्धं, प्रवालं सार्थकाभिधम् ॥ १४६ ॥
रक्तत्वं नीरसे रत्ने, माधुर्यं पाण्डुरेऽमृते । स्थाने द्वयोस्तयोर्योगाद्यदोष्ठस्तद्द्वयाधिकः ॥ १४७ ॥
अन्तर्मुखं दन्तपङ्क्तिर्यासामविरला समा । माणिक्यसंपुटन्यस्ता, मुक्तालिरिव राजते ॥ १४८ ॥
यासां रक्तोऽधरो रागं, जनयत्युचितं हि तत् । रागं मुक्तोपमा दन्तावली सूते तदद्भुतम् ॥ १४९ ॥
शोभते रसना यासां, कमलच्छदकोमला । सुखशय्येव भारत्या, जाग्रत्या मुखमन्दिरे ॥ १५० ॥
दीर्घोन्नताऽतिसरला, यासां नासा विराजते । कलिका दीपकस्येव, श्रियां क्रीडागृहे मुखे ॥ १५१ ॥
तीक्ष्णाग्रे विपुले श्यामतारके च यदीक्षणे । अन्तर्निविष्टभ्रमरे, भातः पद्मे इव स्मिते ॥ १५२ ॥
अक्षिभिः सुभगैर्यासां, हतसौंदर्यसंपदः । उद्धाटपक्ष्मारस्तस्थुः स्वःसुदृशां दृशः ॥ १५३ ॥
विलासचटुले यासां, कर्णोपान्तप्रसर्पिणी । नेत्रे साञ्जनलक्ष्मीके, भातः प्रास्ताञ्जने अपि ॥ १५४ ॥
यासु कामास्त्रशालासु, लम्बिते धनुषी इव । भ्रुवौ सदा सहस्थायिचक्षुर्बाणे विराजतः ॥ १५५ ॥
चक्षुः कासारयोर्यासां, शृङ्गाररससपूर्णयोः । कटाक्षा वीचय इवाभान्ति कामानिलोत्थिताः ॥ १५६ ॥
भूषणालङ्कृते यासां, श्रवणे दीर्घवर्त्तुले । दोलाविलासं बिभृतः, क्रीडतो रत्यनङ्गयोः ॥ १५७ ॥
सुवर्णशालिनोर्मुक्तामययोश्चारुवृत्तयोः । तुल्ययोः शोभते सङ्गे, यत्कुण्डलकपोलयोः ॥ १५८ ॥
यद्भौरगल्लयोर्भान्ति, कुटिलालकवल्लयः । प्रसूनेषोरिव जयप्रशस्त्यक्षरपङ्क्तयः ॥ १५९ ॥
मलिनांशव्यपोहाय, योऽयमर्द्धीकृतो विधुः । यासां भालस्थलं तेन, निर्मलेनेव निर्मितम् ॥ १६० ॥
यदास्यसुषमाकाङ्क्षी, ममज्जाम्भोनिधौ विधुः । तथापि योनिजातस्य, तस्य तातस्य सा कुतः ? ॥ १६१ ॥
किञ्चिदाकुञ्चिताः स्निग्धा, मृदुलाः श्यामलांशवः । यासामत्यन्ततनवः, केशा लेशा इव श्रियाम् ॥ १६२ ॥
मानवा मौलितो वर्ण्या, यद्यप्यंहेस्तु नाकिनः । तथाप्येतेऽतिपुण्यत्वाद्देवत्वेन विवक्षिताः ॥ १६३ ॥
सिद्धान्तेऽप्यत एवैषामनेनैव क्रमेण हि । आदिष्टं वर्णनं पूज्यैरियं तद्दिक् प्रदर्शिता ॥ १६४ ॥
एवं च ताः सुवदनाः, सुकेश्यः स्युः सुलोचनाः । चारुवक्षोजजघनाः, सदाऽवस्थितयौवनाः ॥ १६५ ॥
सद्राजहंसगतयः, कलकण्ठीकलस्वराः । स्वर्णचम्पकचार्वङ्ग्यो, द्वात्रिंशल्लक्षणाञ्चिताः ॥ १६६ ॥

द्वात्रिंशल्लक्षणानि च ज्योतिष्करण्डवृत्तौ श्रीमलयगिरिभिर्दर्शितानि पूर्वोक्तान्येव, किन्त्वत्र जम्बूद्वीपप्रज्ञप्तिसूत्रवृत्तौ मकरस्थाने मकरध्वज इति दृश्यते, तथा च तद्ग्रन्थः—"मकरध्वजः कामदेवस्तत्संसूचकं सूचनीये सूचकोपचाराल्लक्षणमिति", तच्च सर्वकालमविधवत्वादिसूचकमिति ।

स्वभर्तुः किञ्चिदूनोच्चा, भाग्यसौभाग्यभूमयः । सर्वेषामप्यनुमता, दक्षालापाः प्रियंवदाः ॥ १६७ ॥
सुस्था भाविकशृङ्गाराः, सीमन्ताद्युज्झिता अपि । मदमन्थरगामिन्यो, निर्विकाराशया अपि ॥ १६८ ॥
स्वाभाविकैरलङ्कारै—र्दशभिः स्त्रीजनोचितैः । सुशिक्षिता इव सदा, लीलादिभिरलङ्कृताः ॥ १६९ ॥

ते चामी—लीला १ विलासो २ विच्छित्ति ३ र्बिब्बोकः ४ किलकिञ्चितम् ५ । मोट्टायितं ६ कुट्टमितं ७, ललितं ८ विहृतं ९ तथा ॥ विभ्रम १० श्चेत्यलङ्काराः स्त्रीणां स्वाभाविका दश ॥

एतल्लक्षणानि चैवं काव्यानुशासनसूत्रे—वाग्वेषचेष्टितैः प्रियस्यानुकृतिर्लीला १ स्थानादीनां वैशिष्ट्यं विलासः २ ग्रन्थान्तरेऽप्युक्तं—स्थानासनगमनानां, हस्तभ्रूनेत्रकर्मणां चैव । उत्पद्यते विशेषो यः, श्लिष्टः स तु विलासः स्यात् ॥

गर्वादल्पाकल्पन्यासः शोभाकृद्विच्छित्तिः ३ इष्टेऽवज्ञा बिब्बोकः ४ वागङ्गभूषणानां व्यत्यासो विभ्रमः ५ स्मितहसितरुदितभयरोषगर्वदुःखश्रमाभिलाषसंकरः किलकिञ्चितं ६ प्रियकथादौ तद्भावभावनोत्था चेष्टा मोट्टायितं ७ अधरादिग्रहादुःखेऽपि हर्षः कुट्टमितं ८ मसृणोऽङ्गन्यासो ललितं ९ व्याजादेः प्राप्तकालस्याप्यवचनं विहृतं १० ।

एतेषां दशानां सूत्राणां सोदाहरणा वृत्तयस्तु काव्यानुशासनटीकाया अलङ्कारचूडामणेरवसेयाः, एतच्च जम्बूद्वीपप्रज्ञप्तिसूत्रेऽपि सूचितं. तथाहि—"संगयगयहसिअभाणिअचिट्ठिअविलाससंलावणिउणजुत्तोवयारकुसला" इति ।

न तूद्दिश्यान्यमर्त्यास्ता, विकारं बिभ्रते मनाक् । कालस्वभावादेवाल्पविकारा न्यायमार्गगाः ॥ १७० ॥
अनभ्यस्तनीतिकामशास्त्रा अपि स्वभावतः । युक्तकामोपचारेषु, चतुराश्चतुराशयाः ॥ १७१ ॥
नयनोत्सवकारिण्यश्चित्रकृत्प्रियदर्शनाः । साक्षादप्सरसः स्वर्गादवतीर्णा इव क्षितिम् ॥ १७२ ॥
तत्पतिप्राग्भवाचीर्णदानादिसुकृतोद्भवैः । पचेलिमैरिव फलैर्जातेदृग्रूपसंपदः ॥ १७३ ॥
तास्तादृश्यस्तदानीं स्युः, स्त्रियः कालस्वभावतः । युग्मिन्यः परिभोगार्हा, युग्मिनां पुण्यशालिनाम् ॥ १७४ ॥
सर्वेऽपि पुंस्त्रीरूपास्ते, मनुष्याः शुभलक्षणाः । नान्दीसिंहक्रौञ्चहंसगम्भीरमधुरस्वराः ॥ १७५ ॥
आद्यसंहनना आद्यसंस्थानाः कान्तिशालिनः । दर्द्रुकुष्ठकिलासादित्वग्दोषरहिताङ्गकाः ॥ १७६ ॥
कपोतवत्परिणताहाराः कङ्कवयोगुदाः । अलग्नमलमूत्रादिलेपापानास्तुरङ्गवत् ॥ १७७ ॥
पृष्ठकरण्डकवाच्यानि पृष्ठवंशोन्नतास्थिशकलानि । षट्पञ्चाशां द्विशतीं, दधतः क्रोशत्रयोन्नतयः ॥ १७८ ॥
पद्मोत्पलादिवच्चारुगन्धश्वासमुखाम्बुजाः । तनुक्रोधमानमायालोभदोषाः स्वभावतः ॥ १७९ ॥
विनीता भद्रकास्त्यक्तभक्ष्यभोज्यादिसंचयाः । संतोषिणो निरौत्सुक्या, मार्द्दवार्जवशालिनः ॥ १८० ॥

सत्यपि स्वर्णरत्नादौ, ममत्वावेशवर्जिताः । परस्परं त्यक्तवैरकलहद्रोहमत्सराः ॥ १८१ ॥
अश्वमातङ्गकरभवृषभादिषु सत्स्वपि । तद्भोगविमुखाः पादविहाराः स्वैरचारिणः ॥ १८२ ॥
गोमहिष्योडकाजासु, सुव्रतासु सतीष्वपि । तदङ्गीकारतद्दोहतद्दुग्धास्वादवर्जिताः ॥ १८३ ॥
यक्षभूतापिशाचादिग्रहमारिविवर्जिताः । कासश्वासज्वरार्तिव्याधिव्यसनवञ्चिताः ॥ १८४ ॥
कृषिसेवावणिज्यादिवृत्तिक्लेशपरिच्युताः । वाञ्छामात्रप्राप्तकामा, निश्चिन्ताः सुखमासते ॥ १८५ ॥
भूपालयुवराजेभ्यश्रेष्ठिसैन्याधिपादिभिः । नायकै रहितास्तुल्याः, स्युः सर्वेऽप्यहमिन्द्रकाः ॥ १८६ ॥
तदा न कोऽपि कस्यापि, दासः प्रेष्यश्च कर्मकृत् । भागिको भृतकः शिष्य, आभियोग्योज्झिता हि ते ॥ १८७ ॥
प्रसूपितृस्वसृभ्रातृभार्यापुत्रस्नुषादिषु । स्वजनेष्वपि ते मर्त्या, न तीव्रप्रेमबन्धनाः ॥ १८८ ॥
तदा गोधूमशाल्याद्या, भवन्त्यौषधयः स्वयम् । सरसत्वाद्भुवो भूम्ना, सांप्रतीनतृणादिवत् ॥ १८९ ॥
आहारायोपयुज्यन्ते, न तास्तेषां नृणां परम् । पृथ्वीकल्पद्रुमफलपुष्पाहारा हि ते जनाः ॥ १९० ॥
शर्करामोदकादिभ्योऽप्यनन्तगुणमाधुरी । भूमिर्भवेत्तदा स्निग्धा, परिणामे हितावहा ॥ १९१ ॥
नीरोगाणां सुजातीनां, पालितानां प्रयत्नतः । पुण्ड्रेक्षुचारिणीनां च, गवां लक्षस्य यत्पयः ॥ १९२ ॥
एकगव्यां संक्रमितमर्द्धार्द्धादिव्यवस्थया । निष्पादितं तेन लक्षद्रव्यव्ययसमुद्भवम् ॥ १९३ ॥
दीपनीयं बृंहणीयं, सर्वाङ्गीणप्रमोदकृत् । सुरभि स्वादु कल्याणभोज्यं यच्चक्रवर्तिनः ॥ १९४ ॥
ततोऽप्यधिकमाधुर्यस्तुष्टिपुष्ट्यादिकृद्रसः । कल्पद्रुमाणां तेषां स्यात्पुष्पेषु च फलेषु च ॥ १९५ ॥
तुवरीकणमात्रेण, तेनाहारेण ते जनाः । अहोरात्रत्रयं यावत्सुहिताः सुखमासते ॥ १९६ ॥
अथाहृत्य तमाहारं, प्रासादाकारशालिषु । प्रागुक्तकल्पवृक्षेषु, ते रमन्ते यथासुखम् ॥ १९७ ॥
यदा चतुर्विधाऽऽतोद्यहृद्यनादरसार्थिनः । तदा ते त्रुटिताङ्गाख्यानुपयान्ति सुरद्रुमान् ॥ १९८ ॥
एवं च–
वस्त्रमाल्यविभूषाद्यैर्यदा यैर्यैः प्रयोजनम् । उपसर्पन्ति ते लोकास्तदा तांस्तान् सुरद्रुमान् ॥ १९९ ॥
तदास्ति न पुरग्रामदुर्गापणगृहादिकम् । ततस्ते स्युर्जना वृक्षवासिनः स्वैरचारिणः ॥ २०० ॥
विवाहयजनप्रेतकार्यादीनामभावतः । न तेषां कार्यवैयग्र्यं, तेऽव्यग्रमनसः सदा ॥ २०१ ॥
तदा प्रमार्जनी नास्ति, न च कश्चित्प्रमार्जकः । स्वभावाद्भूः कचवरपत्रस्थाणुतृणोज्झिता ॥ २०२ ॥
भवन्ति दंशमशकयूकाचञ्चटमत्कुणाः । मक्षिकाद्याश्च न तदा, जन्तवो देहिदुःखदाः ॥ २०३ ॥
ये सिंहचित्रकव्याघ्रभुजगाजगरादयः । कालस्वभावतस्तेऽपि, न रौद्रा नापि हिंसकाः ॥ २०४ ॥
एवं मृगा वृकाः श्वानः, पक्षिमार्जारमूषकाः । मिथो वैरोज्झिताः सर्वे, भद्रकाः स्युरहिंसकाः ॥ २०५ ॥
न खड्गादीनि शस्त्राणि, नागबाणादयोऽपि न । न तत्प्रयोगी संग्रामः, कोऽपि कस्यापि नाशकृत् ॥ २०६ ॥

नागबाणादयश्चैवं—

नागबाणस्तमोबाणो, वह्निबाणो मरुच्छरः । एवमन्येऽपि ते स्वस्वनामकार्यप्रसाधकाः ॥ २०७ ॥
नेतयः सप्त नो मार्स्ज्वरा नैकान्तरादयः । तदा नाकालमरणं, न दुर्भिक्षं न विड्वरः ॥ २०८ ॥
एवं च ते निरातङ्का, निर्बाधा निरुपद्रवाः । सुखानि भुञ्जन्ते यावज्जीवं प्राचीनपुण्यतः ॥ २०९ ॥
ते च षोढा पद्मगन्धा १, मृगगन्धा २ स्तथाऽममाः ३ । सहाश्च ४ तेजस्तलिनः ५, शनैश्चारिण ६ इत्यपि ॥ २१० ॥

इमे जातिवाचकाः शब्दाः संज्ञाशब्दत्वेन रूढाः यथा पूर्वमेकाकारापि मनुष्यजातिस्तृतीयारकप्रान्ते श्रीऋषभदेवेन उग्रभोगराजन्यक्षत्रियभेदैश्चतुर्धा कृता, तथाऽत्राप्येवं षड्विधा सा स्वभावत एवास्तीति जीवाभिगमवृत्तौ जम्बूप्र० वृ० च. पञ्चमाङ्गषष्ठशतकसप्तमोद्देशके तु पद्मसमगंधयः, मृगमदमंन्धयः ममकाररहिताः, तेजश्च तलं च रूपं येषामस्तीति तेजस्तलिनः, सहिष्णवः समर्थाः, शनैर्मन्दमुत्सुकत्वा-भावाच्चरन्तीत्येवंशीला इत्यन्वर्थता व्याख्याताऽस्तीति ।

आयुषः शेषषण्मास्यां, बद्धाग्रिमभवायुषः । ते युग्ममेकं स्त्रीपुंसरूपं प्रसुवते जनाः ॥ २११ ॥
अहोरात्रांस्तदेकोनपञ्चाशतममी जनाः । रक्षन्ति तावता तौ च, स्यातां संप्राप्तयौवनौ ॥ २१२ ॥
एषामेकोनपञ्चाशद्दिनावधि च पालने । केचिदेवं पूर्वशास्त्रे, व्यवस्थां कोविदा विदुः ॥ २१३ ॥
तथाहि—
सुप्तोत्तानशया लिहन्ति दिवसान् स्वाङ्गुष्ठमार्यास्ततः । कौ रिङ्गन्ति पदैस्ततः कलगिरो यान्ति स्खलद्भिस्ततः ।
स्थेयोभिश्च ततः कलागणभृतस्तारुण्यभोगोद्यताः । सप्ताहेन ततो भवन्ति सुदृगादानेऽपि योग्यास्ततः ॥ २१४ ॥
अयं भावः—सप्ताहे प्रथमेऽङ्गुष्ठं लिहन्त्युत्तानशायिनः । द्वितीये भुवि रिङ्गन्ति, व्यक्तवाचस्तृतीयके ॥ २१५ ॥
पदैः स्खलद्भिर्गच्छन्ति, चतुर्थे पञ्चमे पुनः । स्थिरैः पदैस्ते गच्छन्ति, षष्ठे सर्वकलाविदः ॥ २१६ ॥
सप्ताहे सप्तमे प्राप्तयौवनाः प्रभविष्णवः । स्युः स्त्रीभोगेऽपि केचिच्च, सम्यक्त्वग्रहणोचिताः ॥ २१७ ॥

तथोक्तं जम्बू० प्र० वृ० "केचिच्च सुदृगादानेऽपि सम्यक्त्वग्रहणेऽपि योग्या भवन्तीति." एवं चात्र सप्तसप्तकव्यतिक्रमे सम्यक्त्वयोग्यतोक्ता. प्रज्ञापनाविशेषपदवृत्तौ च उत्कृष्टस्थितिमनुष्यसूत्रे 'दो नाणा दो अन्नाणा' इति उत्कृष्टस्थितिका मनुष्यास्त्रिपल्योपमायुषस्तेषां तावद् अज्ञाने नियमेन, यदा पुनः षण्मासावशेषायुषो वैमानिकेषु बद्धायुषस्तदा सम्यक्त्वलाभाद् द्वे ज्ञाने लभ्येते, अवधिविभङ्गौ चासंख्येयवर्षायुषां न स्त" इति । "तत्रोत्सर्पिण्यामवसर्पिण्यां च प्रत्येकं षड्विधेऽपि कालविभागे सम्यक्त्वस्य श्रुतस्य च द्वयोरप्यनयोः प्रतिपत्तिः संभवतीति प्रतिपद्यमानकस्संभवति, स च प्रतिपद्यमानकस्सुषमदुःषमादिषु देशन्यूनपूर्वकोट्यायुरशेष एव प्रतिपद्यते, नाधिकायुश्शेष" इत्यावश्यकमलयगिरीवृत्तौ. तदत्र मतत्रये तत्त्वं सर्वविद्वेद्यमिति[1] ज्ञेयं.

---

१ आद्यं तावन्मतं न क्वचित् तथाभूते शास्त्रे, तृतीये च मते शास्त्रज्ञानपूर्वकस्य सम्यक्त्वस्याधिगमरुपस्याधिकार इति न विरोधः, योग्यतापेक्षं वाऽऽद्यं.

असंख्यायुस्तिर्यक्षु तु जन्मतोऽपि सम्यक्त्वं संभवति, तथोक्तं षष्ठकर्मग्रन्थवृत्तौ–१

"क्षायिकसम्यग्दृष्टिस्तिर्यक्षु न संख्येयवर्षायुष्केषु मध्ये समुत्पद्यते. किंत्वसंख्येयवर्षायुष्केषु ।"

सप्तावस्थाकालमानमित्यादौ प्रथमारके । ततः कालक्रमात्किञ्चित्संभवत्यधिकाधिकम् ॥ २१८ ॥

इदमर्थतो जम्बूद्वीपप्रज्ञप्तिवृत्तौ ।

ततस्ते पितरस्तेषामरोगाः पूरितायुषः । कासजृम्भादिभिर्मृत्वोद्भवन्ति त्रिदशालये ॥ २१९ ॥

एतद्भवायुषा तुल्यायुषो न्यूनायुषोऽथवा । ते देवाः स्युर्युग्मिभवायुष्कान्न त्वधिकायुषः ॥ २२० ॥

तिर्यञ्चोऽपि तदा तादृग्गुणाः कालानुभावतः । समापितायुषो यान्ति, युग्मिनस्त्रिदशालयम् ॥ २२१ ॥

तिर्यक्षु युग्मिनश्च स्युः, संज्ञिपक्षिचतुष्पदाः । तेषामेव ह्यसंख्यायुष्टया स्वर्गतिनिश्चयात् ॥ २२२ ॥

तथोक्तं–"नरतिरि असंखजीवी सव्वे नियमेण जंति देवेसु ।" इति. [बृहत्संग्रहणी गा. १५०]

अन्येषां तु न युग्मित्वं, नापि स्वर्गतिनिश्चयः । पूर्वकोटिप्रान्तमायुस्तेषामुत्कर्षतोऽपि यत् ॥ २२३ ॥

"गब्भभुअजलयरोभयगब्भोरगपुव्वकोडि उक्कोसा [बृहत्संग्रहणी गा. २८६] । तथा– संमुच्छिपणिंदिथलखयरोरगभुअग जिट्ठट्ठिइ कमसो । वाससहस्सा चुलसी बिसत्तरि तिपन्न बायाला" ॥ [बृहत्संग्रहणी गा. २८८]

इति वचनात्, पूर्वकोट्यायुष्काश्च न युग्मिनः संख्यातायुष्कत्वादिति संभावयामः, किंच– संमूर्छिम पञ्चेन्द्रियाणां नपुंसकत्वेनैव युगलित्वं दुःश्रद्धानं, नपुंसकत्वमप्येषां दुर्वारं 'गब्भनरतिरिआ संखाउआ तिवेआ' इति वचनात् । कालसप्ततिकायां तु— अवि सव्वजीवजुअला, निअसमहीणा उ सुरगई तह य । थोवकसाया नवरं सव्वारयथलयराउमिणं ॥ मणुयाउसमगयाई, चउरंसहयादजाइ अट्ठंसा । गोमहिसुट्टखराइ, पणंस साणाइ दसमंसा ॥ उरभुअग पुव्वकोडि पलियासंखंस खयरपढमारे ।" इत्युक्तं, [श्लो. ११, १२, १३] तदत्र तत्त्वं बहुश्रुतगम्यं ।

मृतानां नास्ति संस्कारो, युग्मिनामग्न्यभावतः । ततस्तेषां शरीराणि, तदासन्नवनस्थिताः ॥ २२४ ॥

भारण्डाद्याः पक्षिणो द्राग्, जगत्स्वाभाव्यतस्तथा । नीडकाष्ठवदादाय, प्रक्षिपन्त्यर्णवादिषु ॥ २२५ ॥

तदुक्तं श्रीहैमऋषभचरित्रे— "पुराहि मृतमिथुनशरीराणि महाखगाः । नीडकाष्ठमिवोत्पाट्य, सद्यश्चिक्षिपुरम्बुधौ" ॥ [त्रिषष्टि पर्व-१. सर्ग २. श्लो. ७३९] अत्राम्बुधेरुपलक्षणत्वाद्यथायोगं गङ्गाप्रभृतिनदीष्वपीति ज्ञेयं ।

ननूत्कर्षादपि धनुःपृथक्त्वाद्वैः पतत्त्रिभिः । तेषां त्रिकोशमानानां, वहनं संभवेत्कथम् ? ॥ २२६ ॥

अत्रोच्यते–

खगाङ्गमाने यत्प्रोक्तं, पृथक्त्वं धनुषां श्रुते । तत्रैकवचनं जातौ, यथा व्रीहिः सुभिक्षकृत् ॥ २२७ ॥

ततो धनुःपृथक्त्वानां, बहुत्वमपि संभवेत् । विहङ्गनां देहमानं, तादृक्कालाद्यपेक्षया ॥ २२८ ॥

---

२ सम्यक्त्वात् प्राग् येनायुर्बद्धं तस्यैवोत्पत्तेस्तिर्यक्षु तादृक्षु नात्र तदा नूतनोत्पादः सम्यक्त्वस्य.

३ द्वितीये सर्वयुग्मिणीवा इत्युक्तावपि नात्र उरोभुजगादिग्रहणं, तस्य युग्मित्वाभावात्, तत्कालीनेषु तिर्यक्षु तद्गणनं च नैवास्ति सूत्रे.

ततश्च–भूयोधनु:पृथक्त्वाङ्गैर्नरहस्त्याद्यपेक्षया । सुवहानि तदङ्गानि, खगैराद्यारकादिषु[1] ॥ २२९ ॥

एवं च सूत्रे एकवचननिर्देशेऽपि बहुवचनव्याख्यानं श्रीमलयगिरिपादैरपि श्रीबृहत्संग्रहणीवृत्तौ–

"दसवाससहस्साइं समयाई जाव सागरं ऊणं । दिवसमुहूत्तपुहुत्ता आहारुस्सास सेसाणं" ॥ [गा. १८२]

इत्यस्या गाथाया व्याख्याने कृतमस्तीति सर्वं सुस्थमित्याद्यधिकमुपाध्याय-श्रीशान्तिचन्द्रीयजम्बू० प्र० वृ०

यद्वा–भारण्डपक्षिणां लोकख्यातेभोद्वहनादिवत् । तेषां खगानां तद्युग्मिदेहोद्वहनसंभव: ॥ २३० ॥

एवं स्वरुपमुक्तं यत्प्रथमं प्रथमारके । क्रमात्ततो हीयमानमवसेयं प्रतिक्षणम् ॥ २३१ ॥

वर्णगन्धरसस्पर्शसंस्थानोच्चत्वपर्यवै: । तथा संहननायुष्कबलवीर्यादिपर्यवै: ॥ २३२ ॥

अनन्तगुणहान्याऽनुसमयं हीयमानकै: । संपूर्णा: स्यु: सागराणां, चतस्र: कोटिकोटय: ॥ २३३ ॥

गुणशब्दश्चात्र भागपर्यायस्तेन हीयते । अनन्तभागहान्यैव, वर्णादि: पर्यवव्रज: ॥ २३४ ॥

इत्थमेवानुयोगद्वारवृत्तौ एकगुणकालकविचारे स्पष्टमाख्यातं.

अनन्तगुणानां हानिरेवं तत्पुरुषोऽत्र स: । न त्वनन्तगुणा हानिरित्येवं कर्मधारय: ॥ २३५ ॥

अत्र स इति समासो वैयाकरणरूढे:, पदैकदेशे पदसमुदायोपचाराद्वेति अनन्तगुणहानिभावना चैवं–

आद्यारकाद्यसमये, वर्त्तते यो द्रुमादिषु । सर्वोत्कृष्ट: शुक्लवर्ण:, केवलिप्रज्ञयाऽस्य च ॥ २३६ ॥

छिद्यमानस्य भागा: स्युर्निर्विभागा अनन्तश: । एते सर्वजीवराशे:, स्युरनन्तगुणाधिका: ॥ २३७ ॥

तेषां मध्याद्राशिरेकोऽनन्तभागात्मकस्त्रुटेत् । द्वितीये समये चैवं, तृतीयादिक्षणेष्वपि ॥ २३८ ॥

इत्येवमवसर्पिण्या:, सर्वान्त्यसमयावधि । तत्र चायं निकृष्ट: स्यात्तादृक्कालानुभावत: ॥ २३९ ॥

उत्सर्पिण्याद्यसमये[2]ऽप्येवंरुपो भवत्ययम् । ततो द्वितीयसमये, यथाहानि विवर्द्धते ॥ २४० ॥

अनन्तगुणवृद्ध्यैवं, वर्द्धमान: क्षणे क्षणे । उत्सर्पिण्यन्त्यसमये, सर्वोत्कृष्ट: स जायते ॥ २४१ ॥

नन्वेवं शुक्लवर्णस्य, मूलोच्छेद: प्रसज्यते । प्रत्यक्षबाधितं तच्च, जात्यादौ शौक्ल्यदर्शनात् ॥ २४२ ॥

अत्रोच्यतेऽनन्तकस्यानन्तभेदा: स्मृतास्तत: । प्रक्षीयमाणपर्यायांशानामल्पमनन्तकम् ॥ २४३ ॥

मूलपर्यायांशराशेस्त्वनन्तकं महत्तमम् । ततोऽनुसमयेऽनन्तहान्याऽप्युच्छिद्यते न तत् ॥ २४४ ॥

यदि भव्येषु सिध्यत्सु, संसारेऽस्मिन् प्रतिक्षणम् । अनन्तेनापि कालेन, भव्योच्छेदो न जायते ॥ २४५ ॥

तदैषां सर्वजीवेभ्योऽनन्तज्ञानां कथं भवेत् ?। उत्कृष्टवर्णभागानामुच्छेदोऽसंख्यकालत: ॥ २४६ ॥

ननु भव्यास्तु संख्येया, एव सिद्धयन्त्यनुक्षणम् । एते त्वनन्ता हीयन्ते, तत्साम्यमनयो: कथम् ॥ २४७ ॥

---

१ यद्यपि पृथक्त्वशब्देन बहुनि पृथक्त्वानि गृह्यन्ते परं तानि गव्यूतादर्वागेव न परत:, संग्रहणीव्याख्यानेऽपि दिवसपृथक्त्वादर्वागेव मुहूर्तपृथक्त्वस्य ग्राह्यता, तत्त्वतस्तु अनेकैस्तैरुत्पाटने युग्मिनां न काप्यनुत्पत्ति:, कीटिकाभि:सर्वाकर्षणवत् ।

२ कालस्योत्सर्पिणीरुपत्वात् स्यादेव वृद्धिराद्येऽपिसमये, परं द्वयो: साम्यायेदं ।

सत्यं यद्यपि असंख्येया, भव्याः सिद्ध्यन्त्यनुक्षणम् । तथापि तत्सिद्धिकालोऽनन्तकालात्मकोभवेत् ॥ २४८ ॥
हीयन्तेऽनुक्षणम् वर्णांशास्तु यद्यप्यनन्तशः । तथापि कालोऽत्रैकावसर्पिण्यात्मक एव हि ॥ २४९ ॥
तद्दार्ष्टान्तिकदृष्टान्तवैषम्यं चिन्त्यमत्र न । एवं पीतादिवर्णेषु, गन्धादिष्वपि भावना ॥ २५० ॥

एवं च द्रव्याणामानन्त्यात्प्रतिद्रव्यमेकैकांशहानिरिति यत्केचिदनन्तगुणहानिं समर्थयन्ति तदपास्तं द्रष्टव्यं ।

ननूक्ता क्षीयमाणा ये, देहोच्चत्वस्य पर्यवाः । एकद्व्यादिखप्रतरावगाहन्यूनतात्मकाः ॥ २५१ ॥
असंख्या एव ते यस्मात्त्रिक्रोशवपुषापि हि । वगाह्यन्ते खप्रतरा, असंख्या एव नाधिकाः ॥ २५२ ॥
अनन्तगुणहानिस्तत्कथमेतेषु संभवेत् ? । अत्र ब्रूमः समाधानं, यदि शुश्रूष्यते त्वया ॥ २५३ ॥
देहस्थानां खप्रतरावगाहकारिणामिह । पुद्गलानामनन्तानां, हानिर्ज्ञेयाऽत्र धीधनैः ॥ २५४ ॥

तथोक्तं जम्बूद्वीपप्रज्ञप्तिवृत्तौ–"प्रथमारके प्रथमसमयोत्पन्नानामुत्कृष्टं शरीरोच्चत्वं भवति, ततो द्वितीयादिसमयोत्पन्नानां यावतामेकनभःप्रतरावगाहित्वलक्षणपर्यवाणां हानिस्तावत्पुद्गलानन्तकं हीयमानं द्रष्टव्यं, आधारहानावाधेयहानेरावश्यकत्वादिति, तेनोच्चत्वपर्यायाणामनन्तत्वं सिद्धं, नभःप्रतरावगाहस्य पुद्गलोपचयसाध्यत्वादिति ।"

पर्याया आयुषोऽप्येकद्व्यादिक्षणोनतात्मकाः । असंख्येया एव तेऽपि, स्युस्त्रिपल्यायुषोऽपि हि ॥ २५५ ॥
किं त्वेकादिक्षणोनेषु, स्थितिस्थानेषु तेष्विह । प्रत्येकं तद्धेतुकर्मप्रदेशाः स्युरनन्तशः ॥ २५६ ॥
तेऽप्यायुःपर्यवा एव, हेतौ कार्योपचारतः । एवं भाव्यायुषोऽनन्तगुणहानिः प्रतिक्षणम् ॥ २५७ ॥

अत एव श्रीजम्बूद्वीपप्रज्ञप्तिसूत्रेऽभिहितं–'अणंतेहिं उच्चत्तपज्जवेहिं अणंतेहि आउअपज्जवेहिं अणंतगुणपरिहाणीए परिहायमाणे २' इति.

एवं चाद्यारकस्यादौ, त्रिक्रोशप्रमितं वपुः । त्रिपल्यप्रमितं चायुर्युग्मिनां प्राग् यदीरितम् ॥ २५८ ॥
तद्धीयमानं क्रमेणाद्यारकान्ते तु युग्मिनाम् । स्याद् द्विक्रोशोच्चमङ्गं, द्विपल्यमानं च जीवितम् ॥ २५९ ॥
एवं दशस्वपि क्षेत्रेष्वारके प्रथमे गते । द्वैतीयीकोऽरकस्तेषु, सुषमाख्यः प्रवर्त्तते ॥ २६० ॥
तस्मिन् कालेऽपि मनुजाः, पूर्ववद्युग्मिनोऽथ ते । अनन्तगुणहीनाः स्युः, पूर्वेभ्यो गुणलक्षणैः ॥ २६१ ॥
पृथ्वीपुष्पफलाहारास्तेऽहोरात्रद्वयान्तरे । काङ्क्षन्ति पुनराहारं, बदरीफलमात्रकम् ॥ २६२ ॥
चतुष्षष्टिं दिनान्येते, कुर्वतेऽपत्यपालनम् । अवस्थाः प्राग्वदत्रापि, भाव्याः सप्त यथाक्रम् ॥ २६३ ॥
चतुष्षष्टिरहोरात्रा, ह्रियन्ते यदि सप्तभिः । एकैकस्या अवस्थायास्तदा कालो भवत्ययम् ॥ २६४ ॥
दिनानि नव घट्योऽष्टौ, चतुस्त्रिंशत्पलानि च । अक्षराणि सप्तदश, किञ्चित्समधिकानि च ॥ २६५ ॥
यत्पूर्वेभ्योऽधिकोऽपत्यपालने काल ईरितः । तदुत्थानबलादीनामनन्तगुणहानितः ॥ २६६ ॥

---

१ अन्तरस्याविवक्षया समयेनाष्टोत्तरशतसिद्धेश्च ।

पूर्वकालापेक्षयाऽत्र, भूयसाऽनेहसा भवेत् । बालानां व्यक्तता भाव्यमेवमग्रेऽपि धीधनैः ॥ २६७ ॥
पूर्वोक्तषट्प्रकारास्तु भवन्त्यत्र न मानवाः । तादृक्कालानुभावेन, वक्ष्यमाणा भवन्ति च ॥ २६८ ॥
एकाः १ प्रचुरजङ्घाश्च २, कुसुमाख्याऽस्तदा भुवि । तथा सुशमनाः४ एव, मनुष्याः स्युश्चतुर्विधाः ॥ २६९ ॥
रूढाः शब्दा अमी प्राग्वत्, जनानां जातिवाचकाः । अन्वर्थजिज्ञासायां तु, सोऽपि भाव्यः क्रमादिति॥ २७० ॥
एकाः श्रेष्ठाः पुष्टजङ्घतया प्रचुरजङ्घकाः । कुसुमाः पुष्पमृदवः, सम्यक् शान्तियुजोऽन्तिमाः ॥ २७१ ॥
भूमेः स्वरूपं यत्प्रोक्तं, वनवृक्षाद्यलङ्कृतम् । दशानां स्वर्द्रुमाणां च, प्रथमं प्रथमारके ॥ २७२ ॥
अविच्छिन्नं तदत्रापि, निःशेषमनुवर्त्तते । किंत्वनंतगुणन्यूनं, वर्णगंधादिपर्यवैः ॥ २७३ ॥
अनन्तगुणहानिः स्यादारभ्य प्रथमक्षणात् । वर्णायुरुच्चतादीनां, प्राग्वदत्राप्यनुक्षणम् ॥ २७४ ॥
अत्रादौ युग्मिनां देहो, भवेत्क्रोशद्वयोच्छ्रितः । पल्योपमद्वयं चायुः, प्रहीयेते च ते क्रमात् ॥ २७५ ॥
ततोऽन्ते क्रोशमानं स्याद्वपुः पल्यं च जीवितम् । एतावदेव प्रथमं, तृतीयेऽप्यरके भवेत् ॥ २७६ ॥
द्वितीयस्यारकस्यादौ, बिभ्रते भृशमुच्छ्रिताः । अष्टाविंशतियुक्पृष्ठकरण्डकशतं जनाः ॥ २७७ ॥
देहह्रासक्रमेणैषां, क्रमात् हानिर्भवेत्ततः । स्युर्यावन्त्यरकस्यादौ, पर्यन्ते स्यात्तदर्द्धकम् ॥ २७८ ॥
एवं द्वितीयेऽप्यरके, क्रमात्संपूर्णतां गते । अरस्तृतीयः सुषमदुःषमाख्यः प्रवर्त्तते ॥ २७९ ॥
अब्धिकोटाकोटियुग्मं, तस्य मानं यदीरितम् । क्रियन्तेऽङ्कास्त्रयस्तस्य, प्रथमो मध्यमोऽन्तिमः ॥ २८० ॥
एकैकस्य विभागस्य, मानमेवं भवेदिह । षट्षष्टिःकोटिलक्षाणि, तावत्कोटिसहस्रकाः ॥ २८१ ॥
षट् शतानि च कोटीनां, षट्षष्टिः कोटयोऽपि च । लक्षाः षट्षष्टिरब्धीनां, षट्षष्टिश्च सहस्रकाः ॥ २८२ ॥
षट्शती च सषट्षष्टिर्द्धौ तृतीयलवौ तथा । एकस्य वार्द्धेरित्येवं, भाव्यं गणितकोविदैः ॥ २८३ ॥
६६६६६६६६६६६६६६६६—२/३ इत्यङ्कस्थापना.
तृतीयभागयोरस्यारकस्याद्यद्वितीययोः । कल्पवृक्षादिकं सर्वं, पूर्वोक्तमनुवर्त्तते ॥ २८४ ॥
एकक्रोशोच्छ्रिता आदावेक पल्योपमायुषः । जनाश्चतुःषष्टिपृष्ठकरण्डकयुताङ्गकाः ॥ २८५ ॥
अहोरात्रानिहैकोनाशीतिं रक्षन्ति तेऽङ्गजान् । अवस्थाः प्राग्वदत्रापि, सप्त तन्मानमुच्यते ॥ २८६ ॥
एकादश दिनाः सप्तदश घट्यः पलाष्टकम् । चतुस्त्रिंशदक्षराणि, किंचित्समधिकानि च ॥ २८७ ॥
आद्यसंहननाः प्राग्वदाद्यसंस्थानशालिनः । कासजृंभादिभिर्मृत्वैतेऽपि यान्ति ध्रुवं दिवम् ॥ २८८ ॥
तृतीयेऽस्य त्रिभागे तु, समतिक्रामति क्रमात् । षोढा संहननानि स्युः, संस्थानान्यपि देहिनाम् ॥ २८९ ॥
धनुःशतानि भूयांसि, प्रथमं तूच्छ्रिताः जनाः । असंख्याब्दसहस्रायुर्भृतः स्वर्गतिगामिनः ॥ २९० ॥
कालक्रमेण पर्यन्ते, हीयमानोच्छ्रयायुषः । अल्पान्तराशनाः प्रेमरागद्वेषस्मयाधिकाः ॥ २९१ ॥
प्राक्तनापेक्षया भूरिकालपालितबालकाः । यथार्हं यान्ति गतिषु, चतुसृष्वपि ते मृताः ॥ २९२ ॥

संख्येयाब्दसहस्राणि, जघन्यं चायुरङ्गिनाम् । उत्कृष्टमत्रासंख्याब्दसहस्रप्रमितं मतम् ॥ २९३ ॥
आयुर्देहोच्छ्रयाहारान्तस्य प्राग् यथाऽभवत् । नियता हानिरत्रांशे, त्वेषा न नियता तथा ॥ २९४ ॥
यथात्रारकयोराद्यद्वितीययोः क्रमात् ह्रसेत् । क्रोशो दिनं च पल्यं चोच्छ्रयाहारान्तरायुषाम् ॥ २९५ ॥
द्वयोस्त्रिभागयोस्तद्धीयते तच्छनैः शनैः । तृतीये तु त्रिभागेऽस्मिन्न नैयत्येन हीयते ॥ २९६ ॥
इदमेवारकस्यास्य, त्र्यंशकल्पौ प्रयोजनम् । पूर्वैः संभावितं भागश्चायमस्य पृथक् ततः ॥ २९७ ॥
कल्पवृक्षा अपि तदा, स्युः क्रमाद् दृढमुष्टयः । लोभार्त्ता इव मूर्खाणां, वार्त्तैव विरसा क्षितिः ॥ २९८ ॥
ततस्ते सततं वृक्षफलौषध्यादिभोजिनः । तत्संग्रहममत्वाभिनिविष्टा विविदन्त्यपि ॥ २९९ ॥
पल्याष्टमांशे शेषे स्युरस्मिन् कुलकरा वराः । प्रकाशांशा इवासन्नोदयाद्यजिनभास्वतः ॥ ३०० ॥
रागद्वेषाभिवृद्ध्यात्र, नीतिमार्गातिपातिनाम् । शिक्षणाय कुलकरकृताः स्युर्दण्डनीतयः ॥ ३०१ ॥
सैकोननवतिपक्षे, शेषेऽस्य त्रुटिताङ्गके । उदेत्यादिमतीर्थेशो, जगच्चक्षुरिवोत्तमः ॥ ३०२ ॥
लोकानामुपकाराय, व्यवहारं दिशत्यसौ । अज्ञानतिमिरच्छेदी, सदसन्मार्गदर्शकः ॥ ३०३ ॥
क्रमाच्च मध्यमरसत्वेन कालस्य भूरुहां । मिथः संघर्षणादग्निः, प्रादुर्भवति भूतले ॥ ३०४ ॥
तदा मन्दोदराग्नीनां, नैरस्याद्भूरिभोजिनाम् । रुजत्यजीर्णं जठरमामौषध्यादिभोजने ॥ ३०५ ॥
तेषामनुग्रहायार्हन्, मृदमत्राणि शिक्षयेत् । अन्नपाकजलाधानाद्युचितानि यथायथम् ॥ ३०६ ॥
शिक्षितं प्रथमं येषां, शिल्पमेतद्युगादिना । तेषां वंशः कुम्भकार, इति नाम्ना प्रवर्त्तते ॥ ३०७ ॥
एवं वक्ष्यमाणशिल्पकर्मणामनुसारतः । ते ते वंशाः प्रवर्त्तेरंश्चित्रकृन्नापितादयः ॥ ३०८ ॥
अधुनापि वदन्त्येवं, कुम्भकारादयो जनाः । वयमस्मिन्नियुक्ताः स्मो, जगदीशेन कर्मणि ॥ ३०९ ॥
लोहशिल्पं विना वेश्मवाहनास्त्राद्यसंभवः । ततः प्रभुर्लोहकारशिल्पं लोके प्रवर्त्तयेत् ॥ ३१० ॥
विना चित्रं न शोभेत, वेश्मशय्यासनादिकम् । ततः प्रभुश्चित्रकारशिल्पं लोके प्रदर्शयेत् ॥ ३११ ॥
कल्पद्रुदत्तवस्त्राणामभावेन गताम्बराः । जनाः स्युर्दुःखिनस्तन्तुवायशिल्पं ततो दिशेत् ॥ ३१२ ॥
असंस्कृतश्मश्रुनखाः, स्युर्भीष्माकृतयो जनाः । ततो नापितशिल्पं तत्कृपया दर्शयेत्प्रभुः ॥ ३१३ ॥
पञ्चैवं मूलशिल्पानि, शंसति त्रिजगत्प्रभुः । एकैकस्य ततो भेदाः, प्रवर्त्तन्ते च विंशतिः ॥ ३१४ ॥
एवं प्रवर्त्तते शिल्पशतं गुरूपदेशजम् । कर्माणि तु प्रवर्त्तन्ते, कृष्यादीनि स्वयं ततः ॥ ३१५ ॥
एवं च–
द्वासप्ततिं कलाः पुंसां, चतुष्षष्टिं च योषिताम् । तथा शिल्पशतं लोकहितायार्हन् समादिशेत् ॥ ३१६ ॥
शस्त्रे शास्त्रे वणिज्यायां, जनानां भोजनादिषु । चातुर्यं दर्शयत्येष, पितेव तनुजन्मनाम् ॥ ३१७ ॥
तादृक्कालानुभावाच्च, क्रमेण त्वधिकाधिकम् । कलाशिल्पेषु लोकानां, चातुर्यं परिवर्द्धते ॥ ३१८ ॥

ततो भगवतस्तस्य, पाणिग्रहमहोत्सवम् । कुर्याद्राज्याभिषेकं च, स्वयमागत्य वासवः ॥ ३१९ ॥
नवयोजनविस्तीर्णां, द्वादशयोजनायताम् । शक्रः सुवर्णप्राकारां, माणिक्यकपिशीर्षकाम् ॥ ३२० ॥
धनधान्यसमाकीर्णोत्तुङ्गप्रासादबन्धुराम् । निर्माय राजधानीं द्राक्, जगन्नाथाय ढौकयेत् ॥ ३२१ ॥
ततोऽसौ प्रथमो राजा, राजनीतिं समर्थयेत् । तथा वर्णविभागांश्च, चतुरश्चतुराशयः ॥ ३२२ ॥
गोतुरङ्गगजादीनां, ग्रहं दमनशिक्षणे । युद्धशस्त्रप्रयोगादीन्, नीतिः सामादिका अपि ॥ ३२३ ॥
काश्चित्पुनः समुत्पन्ने, प्रथमे चक्रवर्त्तिनि । निषेर्माणवकाद्दण्डनीतयः स्युः परिस्फुटाः ॥ ३२४ ॥
भगिनीपरिभोगादीन्, व्यवहारांश्च युग्मिनाम् । निवर्त्तयन्सोऽन्यगोत्रजातोद्वाहादि दर्शयेत् ॥ ३२५ ॥
दशानामपि वर्षाणां, याम्यस्यार्द्धस्य मध्यमे । खण्डे प्रथमतीर्थेशो, व्यवस्थामिति दर्शयेत् ॥ ३२६ ॥
पञ्चस्वन्येषु खण्डेषु, तां जातिस्मरणादिभाक् । क्षेत्राधिष्ठाता देवो वा, लोकनीतिं प्रवर्त्तयेत् ॥ ३२७ ॥
काश्चित्तु कालमाहात्म्यात्प्रवर्त्तन्ते स्वयं ततः । संप्रत्यपि युवा वेत्ति, यथा बह्वप्यशिक्षितम् ॥ ३२८ ॥

तथाहुरस्मद्गुरुपादसमुच्चिते श्रीहीरप्रश्नोत्तरे श्रीजगद्गुरवः– "अत्रोत्तरभरतार्द्धेऽपि जातिस्मरणादिभाक् क्षेत्राधिष्ठायकेदेवो वा कश्चित्तत्र नीतिप्रणेता, कालानुभावतः स्वतो वा कियन्नैपुण्यं जायते" इति । [३ - ७३ - १७७]

जायतेऽस्मिन्नवसरे, प्रथमश्चक्रवर्त्त्यपि । न्यायमार्गं दृढीकुर्यात्स च षट्खण्डसाधकः ॥ ३२९ ॥
एवं कृत्वा स भगवान्, व्यवस्थासुस्थितं जगत् । वितीर्य वार्षिकं दानं, चारित्रं प्रतिपद्यते ॥ ३३० ॥
स प्राप्य केवलज्ञानं, देवमानवपर्षदि । दिशति द्विविधं धर्मं, यतिश्राद्धजनोचितम् ॥ ३३१ ॥
ततो गणधरान् गच्छांस्तथा सङ्घचतुर्विधम् । संस्थाप्य द्वादशाङ्गीं चार्थाप्य तीर्थं प्रवर्त्तयेत् ॥ ३३२ ॥
एवं कृत्वा मोक्षमार्गं, वहमानं स सिद्ध्यति । एकोननवतिपक्षावशेषेऽरे तृतीयके ॥ ३४३ ॥
एकोननवतिपक्षैः, समाप्तेऽरे तृतीयके । दुष्षमसुषमाभिख्योऽरकस्तुर्यः प्रवर्त्तते ॥ ३३४ ॥
एतस्मिंश्चारके भूमिर्नानावृक्षाद्यलङ्कृता । स्यात्कृत्रिमतृणाढ्यापि, कृष्यादीनां प्रवृत्तितः ॥ ३३५ ॥
कल्पवृक्षादिरहितं, स्वरूपं पूर्ववर्णितम् । अत्रापि स्यादनन्तघ्नहीनवर्णादिपर्यवम् ॥ ३३६ ॥
अत्र चादौ मनुष्याः स्युर्धनुःपञ्चशतोच्छ्रिताः । पूर्वकोट्यन्तर्मुहूर्त्तोत्कृष्टाल्पिष्टायुषस्तथा ॥ ३३७ ॥
अग्निसंपक्वनानान्नघृतदुग्धादिभोजिनः । नित्यमाहारार्थिनः स्युरेकत्राप्यह्नि चासकृत् ॥ ३३८ ॥
पुत्रपौत्रदुहित्रादिपरिवारा महर्द्धयः । प्रमदापत्यमित्रादिस्नेहाक्ता जितशत्रवः ॥ ३३९ ॥
स्तन्यपानादिभिर्भूयःकालपालितबालकाः । वर्षक्रमाद्व्यक्तवाक्यगतिचातुर्ययौवनाः ॥ ३४० ॥
राजानो मन्त्रिसामन्तश्रेष्ठिसेनापतीश्वराः । केचित्केचिच्चात्यधनाः, प्रेष्याः कर्मकृतोऽपि च ॥ ३४१ ॥
एवं प्राक्कृतकर्मानुसारेण प्राप्तवैभवाः । केचिन्मिथ्यादृशः केचिद्भद्रका मिश्रदृष्टयः ॥ ३४२ ॥

केचित्प्रपन्नसम्यक्त्वा, देशचारित्रिणः परे । केचिच्चारित्रिणो यान्ति, पञ्चस्वपि गतिष्वमी ॥ ३४३ ॥
मेघाश्चतुर्विधास्ते च, पुष्करावर्त्तसंज्ञकाः । तथा प्रद्युम्नजीमूतौ, झिमिकाख्यस्तुरीयकः ॥ ३४४ ॥
तत्राद्यस्यैकया वृष्ट्या, सुस्निग्धा रसभाविता । भवत्यब्दायुतं भूमिर्धान्याद्युत्पादनक्षमा ॥ ३४५ ॥
द्वितीयस्यैकवृष्ट्या भूर्भाव्यतेऽब्दसहस्रकम् । वृष्टेः स्नेहस्तृतीयस्य, दशाब्दानि भवेद्भुवि ॥ ३४६ ॥
निरन्तरं प्रवृत्ताभिस्तुरीयस्य च वृष्टिभिः । भूयसीभिर्वर्षमेकं, स्नेहस्तिष्ठति वा न वा ॥ ३४७ ॥
तत्र तुर्यारकेऽम्भोदा, उत्तमाः कालवर्षिणः । स्युः स्निग्धा सरसा भूमिस्ततो भूरिफलप्रदा ॥ ३४८ ॥
प्रायो विड्वरदुर्भिक्षेतयो न न च तस्कराः । रोगशोकवियोगाधिदुःखदौःस्थ्यादि चाल्पकम् ॥ ३४९ ॥
न्यायाऽनुल्लङ्घिनो लोकाः, पुरुषायुषजीविनः । राजानः श्रावकाः प्रायो, धार्मिका न्यायतत्पराः ॥ ३५० ॥
तस्मिन् कालेऽनुक्रमेण, स्युस्त्रयोविंशतिर्जिनाः । एकादश चक्रभृतः, शार्ङ्गिणः सीरिणो नव ॥ ३५१ ॥
एवं च–
एकस्यामवसर्पिण्यां, स्युश्चतुर्विंशतिर्जिनाः । चक्रभृतो (चक्रिणो) द्वादश नव, केशवा नव सीरिणः॥ ३५२ ॥
चतुष्पञ्चाशदित्येवं, भवन्ति पुरुषोत्तमाः । स्युस्त्रिषष्टिरमी युक्ता, नवभिः प्रतिविष्णुभिः ॥ ३५३ ॥
नवभिर्नारदैर्युक्तास्ते, भवन्ति द्विसप्ततिः । तथैकादशरुद्राढ्याः, स्युस्त्र्यशीतिः समुच्चिताः ॥ ३५४ ॥

चतुर्धेति वा पञ्चधा वाऽथ षोढाऽथवा सप्तधा विश्रुताः स्युः पुमांसः ।
जिनाश्चक्रिणः केशवाः सीरिणस्तद्विपक्षास्तथा नारदाः किंच रुद्राः ॥ ३५५ ॥

विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्वाद्भुते त्रिंशतैकोनेन प्रमितः समाप्तिमगमत्सर्गो निसर्गोज्ज्वलः ॥ ३५६ ॥

॥ इति श्रीलोकप्रकाशे एकोनत्रिंशत्तमः सर्गः समाप्तः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

॥ अथ त्रिंशत्तमः सर्गः ॥

तत्र तीर्थङ्करास्तु स्युरितस्तृतीयजन्मनि । विंशत्या सेवितैः स्थानैस्तीर्थकृन्नामहेतुभिः ॥ १ ॥
तानि चैवं–अर्हत् १ सिद्ध २ प्रवचन ३ गुरवः ४ स्थविरा ५ स्तथा । बहुश्रुत ६ स्तपस्वी ७ च
वात्सल्यान्येषु सप्तसु ॥ २ ॥
अर्हंश्चतुर्धा नामादिः १, सिद्धाः कर्ममलोज्झिताः २ । श्रुतं प्रवचनं सङ्घस्तदाधारतयाऽथवा ३ ॥ ३ ॥
गुरुर्धर्मस्योपदेष्टा ४, स्थविरो वृद्ध उच्यते । वयश्चारित्रपर्यायश्रुतैरेष त्रिधा भवेत् ॥ ४ ॥

षष्टिं वर्षाण्यतिक्रान्तो, वयः स्थविर उच्यते । पर्यायस्थविरो जातविंशत्यब्दव्रतस्थितिः ॥ ५ ॥
सूत्रार्थज्ञश्चतुर्थाङ्गं, यावद्योऽसौ श्रुतेन च । स्थविरः स्याद्यदुत्सर्गापवादादीनि वेत्त्यसौ ५ ॥ ६ ॥
तत्कालापेक्षया भूरिश्रुतोऽत्र स्याद्बहुश्रुतः ६ । तपस्वी चानशनादिविचित्रोग्रतपः स्थितः ७ ॥ ७ ॥
भक्तिरागो यथाभूतगुणप्रख्यापनं जने । यथोचितोपचारश्च, तेषां वात्सल्यमीरितम् ॥ ८ ॥
सदा ज्ञानोपयोगश्च, भवति स्थानमष्टमम् ८ । सम्यक्त्वे ९ विनये १० चावश्यके ११ ऽतीचारवर्जनम् ॥ ९ ॥
एतानि नवमदशमैकादशानि स्थानानीति शेषः ।
शीलव्रतेषु निरतीचारत्वं द्वादशं पदम् । व्रतान्यत्रोत्तरगुणाः, शीलं मूलगुणाः स्मृताः १२ ॥ १० ॥
त्रयोदशं क्षणलवाभिधानं स्थानमीरितम् । तच्च प्रतिक्षणलवं, सदा वैराग्यभावनम् १३ ॥ ११ ॥
तपश्चतुर्दशं स्थानं, नानाविधतपःक्रिया १४ । त्यागः पञ्चदशं साध्वाद्यर्हान्नादिसमर्पणम् १५ ॥ १२ ॥
बालादिवैयावृत्यं स्यात्षोडशं स्थानकं च तत् । शुद्धोपध्यन्नादिदानमङ्गसंवाहनादि च ॥ १३ ॥

तथोक्तं प्रश्नव्याकरणाङ्गे—"केरिसए पुण आराहए वयमिणं ? जे से उवहिभत्तपाणसंगहदाणकुसले, अच्चंतबालदुब्बलवुड्ढखवगपवत्तिआयरियउवज्झायसाहम्मियतवस्सीकुलगणसंघचेइयट्ठे य निज्जरट्ठी वेयावच्चं अणिस्सियं दसविहं बहुविहं करेइ." अत्र श्रीजिनप्रतिमाया अन्योपधिदानाङ्गसंवाहनाद्यसंभवाच्चैत्यस्य किं वैयावृत्त्यमिति यत्किञ्चिच्चैत्यापलापी गुरुकर्मा शङ्कते तत्र जक्खा हु वेयावडियं करेंति, तम्हा उ एए निहया कुमारा' इत्युत्तराध्ययनोक्तहरिकेशिमहर्षिवचनात् अवज्ञानिवारणादेरपि वैयावृत्त्यत्वमित्यादि युक्त्या समाधेयं १६ ॥

समाधिः स्यात्सप्तदशं, स्थानं दुर्ध्यानवर्जनम् । चित्तस्वास्थ्योत्पादनं वा, गुर्वादेर्विनयादिभिः ॥ १४ ॥
अत्राद्यः पक्ष आवश्यकवृत्तौ, द्वितीयस्तु ज्ञाताधर्मकथाङ्गमल्ल्यध्ययनवृत्तौ १७.
अष्टादशमपूर्वस्य, ज्ञानस्य ग्रहणादरः १८ । एकोनविंशतितमं, श्रुतस्य बहुमाननम् १९ ॥ १५ ॥
स्थानमन्त्यं प्रवचनप्रभावनमिहोदितम् । तत्कुर्यात् श्रुतवान् धर्मकथादिगुणवांस्तथा २० ॥ १६ ॥

तथाहुः—"सम्मद्दंसणजुत्तो सह सामत्थे पभावगो होइ । सो पुण इत्थ विसिट्ठो निद्दिट्ठो अट्ठहा सुत्ते ॥ पावयणी १ धम्मकही २ वाई ३ नेमित्तिओ ४ तवस्सी य ५ । विज्जा ६ सिद्धो ७ य कई ८ अट्ठेव पभावगा भणिया ॥

एषु द्वित्रादिभिः स्थानैः, सर्वैर्वा सेवितैर्भृशम् । जिननामार्जयेन्मर्त्यः, पुमान् स्त्री वा नपुंसकम् ॥ १७ ॥

तथाहुः श्रीभद्रबाहुस्वामिपादाः—"नियमा मणुयगईए इत्थीपुरिसेयरो व सुहलेसो । आसेवियबहुलेहिं वीसाए अन्नयरएहिम्" ॥

नियमान्मनुष्यगतौ बद्ध्यते, कस्तस्यां बध्नातीत्याशङ्क्याह—स्त्री पुरुष इतरो वेति- नपुंसकम् इत्यावश्यकहारिभद्र्यां.

तृतीयकर्मग्रंथे तु बंधस्वामित्वनिरुपणे प्रथमनरकत्रयनारको वैमानिकदेवो गर्भजमनुष्यश्च सम्यक्त्वादिगुणस्थानवर्त्तिनस्तीर्थकृन्नामकर्म बध्नन्तीत्युक्तमिति ज्ञेयं ।

अत्र चैवमुपपत्तिः—बद्धतीर्थकरनामा मनुष्यो मृत्वा नरकदेवगत्योरुत्पन्नस्तत्रापि तीर्थकरनामकर्म बध्नाति, जिननामकर्मणः सततबन्धकालस्योत्कृष्टतस्त्रयस्त्रिंशत्सागरोपममानस्यानुत्तरसुरानाश्रित्य शतके प्रोक्तत्वात्, इति कार्मग्रन्थिकैर्गतित्रये जिननामबन्ध उक्तः,

प्रथमतस्तु मनुष्य एव तद्बन्धमारभत इत्यावश्यके 'नियमा मणुअगईए' इति निरुपितमिति ।

यद्वा नरकस्वर्गत्योः सामान्येन जिननाम्नो बन्धः स्यात्, निकाचितबन्धस्तु तस्य मनुजगतावेवेत्यावश्यके[1] 'नियमा मणुए' इत्याद्युक्तं भावीति संभाव्यते ।

एतत्संग्रहश्चैवमावश्यकषष्ठाङ्गादिषु— अरिहंत १ सिद्ध २ पवयण ३ गुरु ४ थेर ५ बहुस्सुए ६ तवस्सीसु ७ । वच्छल्लया य तेसिं अभिक्खनाणोवओगे य ८ ॥ दंसण ९ विणए १० आवस्सए ११ य सीलव्वए १२ निरइयारो । खणलव १३ तव १४ च्चियाए १५ वेयावच्चे १६ समाहीय १७ ॥ अपुव्वनाणगहणे १८ सुअभत्ती १९ पवयणे पभावणया २० । एएहिं कारणेहिं तित्थयरत्तं लहई जीवो ॥ [प्रवचनसारोद्धार द्वार १० श्लोक ३१०, ३११, ३१२]

एतत्तपोविधिसंप्रदायश्चैवं—

चेत्करोत्युपवासेण, विंशतिस्थानकं तपः । तदा विंशत्युपवासैरेका पङ्क्तिः समाप्यते ॥ १८ ॥
निरन्तरं कृत्यऽशक्तौ, सान्तरां तां करोति चेत् । पङ्क्तिरेका पूरणीया, तत्षण्मासान्तरे ध्रुवम् ॥ १९ ॥
विंशत्या पङ्क्तिभिश्चैतत्तपो भवति पूरितम् । उपवासानां चत्वारि, शतानीह भवन्ति तत् ॥ २० ॥
एवं शक्त्यनुसारेण, प्राज्ञैः षष्ठाष्टमादिभिः । मासक्षपणपर्यन्तैस्तप एतद्विधीयते ॥ २१ ॥
पञ्चशक्रस्तवपाठोत्कृष्टा या चैत्यवन्दना । साऽवश्यं विधिना कार्या, तपस्यत्रोपवैणवम् ॥ २२ ॥
एकैकस्यामत्र पङ्क्तावेकैकेन दिनेन च । क्रमेणाराधयेद्भक्त्या, स्थानकानीति विंशतिम् ॥ २३ ॥
आद्ये नमोऽर्हद्भ्य इति, द्विसहस्रीं जपेद्दिने । अर्हद्भक्तिं विशेषेण, कुर्वीत स्तवनादिभिः ॥ २४ ॥
अन्येष्वपि दिनेष्वेवमाराध्यास्ते पुरोदिताः । ज्ञानक्रियाद्यास्तु शुद्धपाठाभ्यासादरादिभिः ॥ २५ ॥
रागद्वेषादयो दोषा, वर्जनीया विशेषतः । तपोदिने जपेन्मौनी, वक्ष्यमाणपदानि च ॥ २६ ॥

साम्प्रतीनानि जापपदानि चैवं— अरिहंत १ सिद्ध २ पवयण ३ आयरिया ४ थेर ५ वायगा ६ साहू ७ । नाणं ८ दंसण ९ विणया १० चास्तिं ११ बंभवयधारी १२ ॥ किरियाणं च १३ नमो तह तवस्स १४ सिरिगोयमस्स १५ य जिणाणं १६ । चास्तिं १७ नाण १८ सुआ १९ तित्थं २० इअ वीस जावपया ॥ अत्र सर्वत्रापि नमो अरिहंताणं, नमो सिद्धाणं, नमो पवयणस्स, इत्यादिपाठक्रमो ज्ञेयः ।

---

१ तहयभवोसक्कइत्ताणमिति वचनात् युक्तं निकाचनापेक्षं, तद्बन्धं नृगतावारभ्यान्यगत्योर्वजति इति यद्यपि युक्तमेव, तयोरपर्याप्तावस्थायामपि जिननामबन्धोदितेः, नैवं नरगताविति, परं न तदपेक्षा आवश्यके ।

केचिच्चैकैकया पङ्क्त्या, स्थानमेकैकमेव हि । आराधयन्ति विंशत्या, पङ्क्तिस्तानि विंशतिम् ॥ २७ ॥

उद्यापनादिविधिस्तु संप्रदायादवसेयः ।

तपोऽशक्तः पुनः स्थानमेकं द्वे सकलानि वा । यथाशक्ति स्फुरद्भक्तिः, सेवेत श्रेणिकादिवत् ॥ २८ ॥

एवं साधुः श्रावको वा साध्वी वा, श्राविकापि वा । अमून्याराधयन् स्थानान्याप्नोति जिनसंपदम् ॥ २९ ॥

तीर्थकृन्नामकर्मैतद्वेद्यते जिनपुङ्गवैः । विश्वोपकारैरग्लान्या, धर्मार्थकथनादिभिः ॥ ३० ॥

तथाहुरावश्यकनिर्युक्तिकृतः—"तं च कहं वेइज्जइ ? अगिलाए धम्मदेसणाईहिं । बज्झइ तं तु भयवओ तइयभवोसक्कइत्ताणं" ॥

अथार्जितार्हत्पदाः स्युस्ते वैमानिकनाकिनः । प्राग्निबद्धायुषश्चाधः, शैलावध्येव नारकाः ॥ ३१ ॥

तथोक्तं संग्रहण्यां—"सुन्नेरइएहिं चिअ हवंति हरिअरिहचक्किबलदेवा । चउविहसुरचक्किबला वेमाणिअ हुंति हरिअरिहा" ॥ [गा. २६३]

वसुदेवचरिते तु नागकुमारेभ्योऽप्युद्धृतोऽनन्तरमैरवतक्षेत्रेऽस्यामवसर्पिण्यां जिन उक्त इति ज्ञेयं ।

तेजोऽभिवर्द्धते तेषां, देवानां च्यवनावधि । न प्रादुष्यन्ति चिह्नानि, च्यवनस्यान्यदेववत् ॥ ३२ ॥

अन्येषामपि विज्ञेयमेतदन्त्यशरीरिणाम् । तेऽन्यव्यपेक्षया स्वल्पपीडाः स्युर्नारका अपि ॥ ३३ ॥

ततश्च्युत्वा कर्मभूमौ, सज्जातिकुलशालिनः । क्षत्रियस्योच्चगोत्रस्य, प्राज्यराज्यर्द्धिराजिनः ॥ ३४ ॥

उत्कृष्टभागधेयस्य, गुणाढ्यस्य महीपतेः । पत्न्याः कुक्षौ सुशीलाया, गर्भत्वेनोद्भवन्ति ते ॥ ३५ ॥

स्वर्गाद्धा नरकाद्धा ये, यस्मादायान्ति तीर्थपाः । ज्ञानत्रयं ते तत्रत्यं, बिभ्रते गर्भगा अपि ॥ ३६ ॥

जानन्त्येष्यदतीतं च, च्यवनं तत्क्षणे तु न । गर्भोत्पत्तिक्षणेऽप्येषां, स्यादेवं महिमोदयः ॥ ३७ ॥

अशिवोपद्रवादीनां, भवत्युपशमः क्षितौ । नारका अपि मोदन्ते, क्षणं प्राप्तसुखोदयाः ॥ ३८ ॥

उदयाभिमुखस्तीर्थङ्करार्कः समभूदिति । ज्ञात्वाऽऽसनप्रकम्पेन, मुदिता नाकिनायकाः ॥ ३९ ॥

सिंहासनात्समुत्थाय, विनयात्त्यक्तपादुकाः । पदान्यागत्य सप्ताष्टौ, श्रीजिनाभिमुखं स्यात् ॥ ४० ॥

पञ्चाङ्गप्रणिपातेन, प्रणम्य जगदीश्वरान् । घटिताञ्जलयः कुर्युः, स्तुतिं शक्रस्तवेन ते ॥ ४१ ॥

अत्र "सक्कस्स य आसणं चलिअं, सिग्धं आगमणं भणइ, यावत् तव पुत्तो पढमधम्मचक्कवट्टी भविस्सति, केइ भणंति-बत्तीसंपि इंदा आगंतूण वागरिंति", इत्यावश्यकहारिभद्रां श्रीऋषभगर्भावताराधिकारे, "सक्कस्स य आसणकंपो यावत् वाणारसीमागंतूण भयवतो जणणिं अहिनंदइ", इति केशीगौतमीयोत्तराध्ययनप्राकृतवृत्तौ ।

"इदं हि घटते यस्माद्गर्भवासदिने मुदा । वन्दितोऽयं समागत्य, सहाऽऽवाभ्यां सुरेश्वरैः" ॥

इति श्रीशान्तिचरित्रे श्रीशान्तिनाथमातापितृवचनमित्यादि दृश्यते, ततो विस्तरतः प्रथमकल्याणकोत्सवपद्धतिर्बहुश्रुतेभ्योऽवसेया ।

तस्मिन्नवसरे वासभवने स्वर्गृहोपमे । स्वःशय्योपमशय्यायां, शयिता सा मृगेक्षणा ॥ ४२ ॥
समधातुः सुप्रसन्नचित्ता स्वप्नांश्चतुर्दश । निशीथे गर्भमायाति, जिने साक्षादिवेक्षते ॥ ४३ ॥
गजं तत्र चतुर्दन्तं, शुभ्रमैरावणोपमम् । शुभ्रं दान्तं दीप्रदन्तं, वृषं पिण्डमिव त्विषाम् ॥ ४४ ॥
तीक्ष्णदंष्ट्रं लोलनेत्रं, हर्यक्षं शूरमुज्ज्वलम् । देव्याः श्रियोऽभिषेकं च, क्रियमाणं दिशां गजैः ॥ ४५ ॥
सौरभाकृष्टमधुपां, नानापुष्पमयीं स्रजम् । पूर्णं चंद्रं नवनीतमिवोन्नीतं सुधाम्बुधेः ॥ ४६ ॥
सहस्रकिरणं लोकलोचनालोकनौषधम् । शुभ्रमभ्रंलिहं कम्प्रं, हर्यक्षाङ्कं महाध्वजम् ॥ ४७ ॥
कलशं जलसंपूर्णं, रौप्यं पद्मप्रतिष्ठितम् । पूर्णं पद्मसरः पद्मप्रकरालङ्कृतोदकम् ॥ ४८ ॥
वियच्चुम्बिचलल्लोलकल्लोलं क्षीरसागरम् । दीप्यमानं विमानं च, दिव्यतूर्यत्रिकाञ्चितम् ॥ ४९ ॥
अनर्घ्यनानारत्नानां, निकरं मंदरोच्छ्रितम् । निर्द्धूममुज्ज्वलज्वालं, घृतसिक्तं महानलम् ॥ ५० ॥
श्रेयस्करान् महास्वप्नान्, सुखदान् कीर्त्तनादपि । निरीक्ष्यैतान् मृगाक्षी सा, भृशं प्रमुदिताऽभवत् ॥ ५१ ॥
निर्गत्य नरकाद्यस्याः, कुक्षावेति जगत्पतिः । स्वभावात्सा विमानस्य, स्थाने भवनमीक्षते ॥ ५२ ॥
सार्वभौमस्य मातापि, स्वप्नानेतान्निरीक्षते । किंतु किञ्चिन्न्यूनकान्तिनर्हन्मातुरपेक्षया ॥ ५३ ॥

तथा चोक्तं–चतुर्दशाप्यमून् स्वप्नान्, या पश्येत् किञ्चिदस्फुटान् । सा प्रभो ! प्रमदा सूते, नंदनं चक्रवर्त्तिनम् ॥ इयं पुनर्जया देवी, स्फुटानेतानलोकत । तन्नाथ ! त्रिजगन्नाथं, जिनं सा जनयिष्यति ॥ इति श्रीवासुपूज्यचरित्रे ।

यस्याः पुत्रो भवेत्सार्वभौमोऽर्हंश्चेह जन्मनि । सा द्विः स्वप्नानिमान् पश्येत्तथोक्तं पूर्वसूरिभिः ॥ ५४ ॥

अचिरा नाम तत्पत्नी, शीललीलासमुज्ज्वला । सा द्विश्चतुर्दश स्वप्नान्निशाशेषे व्यलोकयत् ॥
इति वृद्धशत्रुञ्जयमाहात्म्ये ।

एषामन्यतरान् स्वप्नान्लोकयेद्वासुदेवसूः । चतुरो बलदेवाम्बाऽथैकं माण्डलिकप्रसूः ॥ ५५ ॥
प्रतिकेशवमाता तु, त्रीन् स्वप्नानवलोकयेत् । मातैकं पश्यति स्वप्नं, मुनेरपि महात्मनः ॥ ५६ ॥

तथाचोक्तं सप्ततिशतस्थानके— [श्लो. ७३]

"जिणचक्कीण य जणणी नियंति चउदस गयाइ वरसुविणे । सग चउ तिण्णि इगाई हरिबलपडिहरिमंडलियमाया" ॥

श्रीहीरप्रश्नोत्तरेऽप्युक्तं–"प्रतिवासुदेवे गर्भेऽवतीर्णे तन्माता कियतः स्वप्नान् पश्यतीत्यत्र त्रीन् स्वप्नान् पश्यतीति ज्ञायते सप्ततिशतस्थानकशान्तिचरित्राद्यनुसारेणेति"।

श्रीहैमरामचरित्रे तु रावणप्रतिवासुदेवे गर्भेऽवतीर्णे तन्मात्रा कैकस्या एक एव स्वप्नो दृष्ट इत्युक्तमस्ति[१] तथा च तद्ग्रन्थः—"अन्यदा कैकसी स्वप्ने, विशन्तं स्वमुखे निशि । कुम्भिकुभस्थलीभेदप्रसक्तं सिंहमैक्षत" ॥ मुनिमातुरेकस्वप्ननिरीक्षणं च मेघकुमारादिमातृवत् ।

---

१ नियमाभावः एकस्य त्रयाणां वा स्वप्नानां दर्शने इति न विरोधः, अत एव पर्युषणाकल्पज्ञातादौ न प्रतिकेशवगर्भावतरणस्वप्नाधिकारः, मुनेर्गर्भावतारेऽपि एवमेव, न हि नियतं सर्वमुनिजननीनां तद्गर्भोद्भवे स्वप्नदर्शन ।

सोपेत्य कान्तं विनयात्प्रबोध्यैतान्निवेदयेत् । सोऽपि स्वप्नफलं ब्रूते, विश्वोत्कृष्टाङ्गजोद्भवम् ॥ ५७ ॥
आकार्य स्वप्नशास्त्रज्ञान् प्रातरन्तःसभं ततः । नृपः स्वप्नफलं पृच्छेत्तेऽपि शास्त्रानुसारतः ॥ ५८ ॥
वदन्त्येवं महाराज ! सुतो भावी भवत्कुले । तीर्थंकरो वा चक्री वा, महास्वप्नानुभावतः ॥ ५९ ॥
स्वप्नशास्त्रे यतः प्रोक्ताः, सर्वे स्वप्ना द्विसप्ततिः । तत्र त्रिंशन्महास्वप्नास्तेषु चैते चतुर्दश ॥ ६० ॥
इत्याकर्ण्य प्रमुदिता, पुत्रजन्ममनोरथान् । दधाना विविधान् राज्ञी, सा कुर्याद्गर्भपोषणम् ॥ ६१ ॥
गर्भानुभावोत्पन्नानां, दोहदानां शुभात्मनाम् । सा सेवनात्प्रपूर्णेच्छा, सश्रीका शोभतेऽधिकम् ॥ ६२ ॥
अथानुकूले मरुति, प्रसर्पति सुखावहे । भूमौ निष्पन्नशस्यायां, फलपूर्णेषु च द्रुषु ॥ ६३ ॥
ग्रहेषु सर्वेषूच्चेषु, निमित्तेषु शुभेषु च । छत्रादिजन्मयोगेषु, शुभे लग्ननवांशके ॥ ६४ ॥
जने प्रमुदिते श्रेष्ठे, निमित्ते शकुनादिके । अर्द्धरात्रे प्रसूते सा, जिनं निधिमिव क्षितिः ॥ ६५ ॥

उच्चग्रहास्त्वेवं–

अर्काद्युच्चान्यजवृषमृगकन्याकर्कमीनवणिजोंशैः । दिग्दहनाष्टाविंशतितिथीषु नक्षत्रविंशतिभिः ॥६६॥

छत्रादियोगास्त्वेवं–

द्वितीये द्वादशे मूर्त्तौ, सप्तमे भवने ग्रहाः । छत्रयोगस्तदा ज्ञेयः, पुत्रो जातो नृपो भवेत् ॥ ६७ ॥
धने व्यये रिपुस्थाने, मृत्युस्थाने यदा ग्रहः । योगः सिंहासनो नाम, देवानामपि दुर्लभः ॥ ६८ ॥
तृतीये पञ्चमे स्थाने, नवमैकादशे ग्रहाः । बलयोगस्तदा ख्यातः, सर्वसौख्यकरस्सदा ॥ ६९ ॥
चंद्रात्सप्तमगो जीवोऽथवा स्याच्चन्द्रसंयुतः । जीवयोगं तमित्याहुश्चिरायुः सुखावान् भवेत् ॥ ७० ॥
केन्द्रस्थानेषु सर्वेषु, यदि सौम्यग्रहस्तदा । चतुःसागरयोगोऽयं, देवानामपि दुर्लभः ॥ ७१ ॥" इत्यादि ।
तदा दिशः प्रसीदन्ति, सर्वाः प्रमुदिता इव । भवेन्नित्यान्धकारेषु, प्रकाशो नरकेष्वपि ॥ ७२ ॥

तथोक्तं स्थानाङ्गेऽर्थतः—

चतुर्भिः स्थानकैरेभिर्लोकोद्योतः प्रसर्पति । अर्हज्जन्मज्ञानदीक्षास्तेषां मोक्षोत्सवेऽपि च ॥ ७३ ॥
तत्रायान्ति तदा द्राक् षट्पञ्चाशद्दिक्कुमारिकाः । कम्पासनाः प्रभोर्जन्म, विज्ञायावधिचक्षुषा ॥ ७४ ॥
तथाहि–भोगङ्करा १ भोगवती २ सुभोगा ३ भोगमालिनी ४ । तोयधारा ५ विचित्रा च ६ पुष्पमाला ७ त्वनन्दिता ॥ ७५ ॥
अष्टाधोलोकवासिन्यः, किलैता दिक्कुमारिकाः । वदन्त्यन्योऽन्यमाकार्य, जातो भो जगदीश्वरः ॥ ७६ ॥
जीतं नो दिक्कुमारीणामित्यधोलोकवेश्मनाम् । त्रैकालिकीनां यज्जन्मोत्सवः कार्यो जिनेशितुः ॥ ७७ ॥
यामस्ततो वयमपि, कृत्वा श्रीजगदीशितुः । सूतिकर्मादिकां सेवां, कुर्महे सफलं जनुः ॥ ७८ ॥
निश्चित्यान्योऽन्यमित्येताः, प्रत्येकं स्वाभियोगिकान् । आज्ञापयन्ति निर्मातुं, विमानं गमनोत्सुकाः ॥ ७९ ॥

तेऽपि योजनविस्तीर्णं, स्तम्भशताञ्चितम् । विचित्रचित्रं निर्माय, ढौकयन्ति तदद्भुतम् ॥ ८० ॥
सामानिकानां देवानां, ताश्चतुर्भिः सहस्रकैः । महत्तराचतुष्केण, प्रत्येकं समुपासिताः ॥ ८१ ॥
अनीकैः सप्तभिः सेनाधिपैर्देवैश्च सप्तभिः । सहस्रैश्च षोडशभिर्देवानामात्मरक्षिणाम् ॥ ८२ ॥
देवदेवीसमुदायैरन्यैरप्यमितैर्वृताः । प्रवृत्तदिव्यवादित्रगीतनाट्या महर्द्धिकाः ॥ ८३ ॥
तद्विमानं समारुह्य, गत्या सत्वरया स्यात् । आगत्यार्हज्जन्मवेश्मन्युत्तरन्ति विमानतः ॥ ८४ ॥
तिस्रः प्रदक्षिणाः कृत्वा, जिनं च जिनमातरम् । स्तुवन्ति मधुरैर्वाक्यैर्विनयावनता इति ॥ ८५ ॥
नमोऽस्तु ते कुक्षिरत्नधारिके ! विश्वदीपिके ! ॥ लोकनाथस्य जननि !, स्वयंबुद्धस्य भास्वतः ॥ ८६ ॥
अधोलोकनिवासिन्यो, वयं स्मो दिक्कुमारिकाः । अर्हज्जन्मोत्सवं कुर्मो, भेतव्यं न त्वया ततः ॥ ८७ ॥
इत्युदीर्य समुद्घातं, कृत्वा वैक्रियमञ्जसा । संवर्त्तकं विकुर्वन्ति, वायुं भूमिविशोधकम् ॥ ८८ ॥
चतुर्दिशं ततो जन्मगेहाद्योजनमात्रकम् । क्षेत्रम् तेन प्रसरता, मारुतेन सुगन्धिना ॥ ८९ ॥
रजःकाष्ठतृणादीनां, दुष्टानां दूरमुज्झनात् । क्रियते निर्मलं राज्ञो, भृत्येनेव गृहाङ्गणम् ॥ ९० ॥
प्रशमय्याथ तं वायुं, समागत्य जिनान्तिके । कृतस्वकार्या गायन्त्यस्तिष्ठन्ति मधुरस्वरम् ॥ ९१ ॥
अन्यासां दिक्कुमारीणामप्यागमनपद्धतिः । इयमेव विशेषस्तु, कर्त्तव्यः सोऽत्र वक्ष्यते ॥ ९२ ॥
मेघङ्करा १ मेघवती २, सुमेघा ३ मेघमालिनी ४ । सुवत्सा ५ वत्समित्रा च ६, वारिषेणा ७ बलाहका ८॥ ९३ ॥
अष्टोर्ध्वलोकवासिन्य, इत्येता दिक्कुमारिकाः । विकृत्य गगने मेघान्, सुगन्धिजलवर्षणैः ॥ ९४ ॥
पूर्वं प्रमार्जितं क्षेत्रं, भृत्या इव नृपाङ्गणम् । अपङ्किलं रजोमुक्तं, कुर्युः सुरभि शीतलम् ॥ ९५ ॥
ततो विसृज्य तान् मेघान्, पुष्पमेघान् विकृत्य च । तद्योजनमितं क्षेत्रं, शक्रस्येव सभाङ्गणम् ॥ ९६ ॥
पञ्चवर्णप्रसूनानां, प्रकरेण सुगन्धिना । जानुमात्रोच्चेन वृन्तऽस्थायिना परिमण्डितम् ॥ ९७ ॥
कृष्णागुरुतुरुष्कादिसुगन्धिद्रव्यजन्मना । धूपेन धूपितं कुर्युः, क्रीडार्हं द्युसदामपि ॥ ९८ ॥
नन्दोत्तरा १ तथा नन्दा २, आनन्दा ३ नन्दिवर्द्धना ४ । विजया ५ वैजयन्ती ६ च, जयन्ती ७ चापराजिता ८ ॥ ९९ ॥
पूर्वरुचकवास्तव्या, इत्येता दिक्कुमारिकाः । एत्य नत्वा जिनं साम्बं, गायन्त्यादर्शपाणयः ॥ १०० ॥
समाहारा १ सुप्रदत्ता २, सुप्रबुद्धा ३ यशोधरा ४ । लक्ष्मीवती ५ शेषवती ६, चित्रगुप्ता ७ वसुन्धरा ८ ॥ १०१ ॥
याम्यदिग्रुचकादेता, एत्याष्टौ दिक्कुमारिकाः । गायन्ति पूर्णकलशकरा दक्षिणतः प्रभोः ॥ १०२ ॥
इलादेवी १ सुरादेवी २, पृथ्वी ३ पद्मावतीति ४ च । एकनासा ५ नवमिका ६, भद्रा ७ शीतेति ८ नामतः ॥ १०३ ॥
पाश्चात्यरुचकादेताः, समेता दिक्कुमारिकाः । गायन्त्याततालवृन्ताः, प्रभोःपश्चिमतः स्थिताः ॥ १०४ ॥

अलम्बुसा १ मिश्रकेशी २, पुण्डरीका ३ च वारुणी ४ । हासा ५ सर्वप्रभा ६ श्री ७ ह्री ८, स्त्यष्टौ दिक्कुमारिका: ॥ १०५ ॥

उदीच्यरुचकादेत्य, प्रभोरुत्तरत: स्थिता: । वीजयन्त्यश्चामराणि, मुदा गायन्ति तद्गुणान् ॥ १०६ ॥

चित्रा १ च चित्रकनका २, शतेरा ३ च तत: परा । सौदामिनी ४ चतस्रोऽमूर्विदिग्रुचकमन्दिरा: ॥ १०७ ॥

दिक्कुमार्योऽभ्येत्य नत्वा, विदिक्षु चतसृष्वपि । सुष्ठु तिष्ठन्ति गायन्त्यो, दीपिकाव्यग्रपाणय: ॥ १०८ ॥

रूपा १ रूपासिका २ चापि, सुरूपा ३ रूपकावती ४ । एता मध्यमरुचकवासिन्यो दिक्कुमारिका: ॥ १०९ ॥

वर्द्धयित्वा प्रभोर्नालं, चतुरङ्गुलवर्जितम् । भूमौ निधाय सद्रत्नैस्तत्खातं पूरयन्ति च ॥ ११० ॥

पीठं बध्ध्वा तदुपरि, दूर्वाङ्कुरान् वपन्ति च । अर्हदङ्गप्रतीकस्य, मा भूदाशातनेति ता: ॥ १११ ॥

दिक्त्रये पश्चिमावर्जे, कुर्वन्ति कदलीगृहान् । तेष्वेकैकं चतु:शालं, वेश्म सिंहासनान्वितम् ॥ ११२ ॥

ततो गृहीत्वा तास्तीर्थंकरं स्वकरसंपुटे । दत्तालम्बां जिनाम्बां च, पुरस्कृत्येश्वरीमिव ॥ ११३ ॥

स्वामिनीत इत इति, नीत्वा दक्षिणदिग्गृहे । सिंहासने चोपवेश्य, मृदुविज्ञप्तिपूर्वकम् ॥ ११४ ॥

शतपाकादिभिस्तैलैरभ्यञ्जन्ति सुगन्धिभि: । उद्वर्त्तयन्ति सुरभिद्रव्योद्वर्त्तनकैस्तत: ॥ ११५ ॥

तत: प्राग्वत्समानीय, पौरस्त्यकदलीगृहे । सिंहासने स्थापयन्ति, स प्रभुं प्रभुमातरम् ॥ ११६ ॥

गन्धोदकैस्तथा पुष्पोदकै: शुद्धोदकैरपि । मज्जयित्वा प्रकुर्वन्ति, सर्वालङ्कारभूषिताम् ॥ ११७ ॥

समानीय तत: प्राग्वदुदीच्यकदलीगृहे । अध्यासयन्ति तां सिंहासनेऽङ्कन्यस्तनंदनाम् ॥ ११८ ॥

गोशीर्षचन्दनैर्धांस्यानाययन्त्याभियोगिकै: । शरकारणिमाथेनोत्पादयन्त्यनलं नवम् ॥ ११९ ॥

संधुक्ष्योद्दीपयन्त्यग्निं, शकलैश्चान्दनै: कृशै: । चन्दनानि ततो हुत्वा, रक्षां कुर्वन्ति पावनाम् ॥ १२० ॥

प्रभोश्च प्रभुमातुश्च, रक्षापोट्टलिकां तया । बध्नन्ति ता दुष्टशाकिन्यादिदृग्दोषघातिनीम् ॥ १२१ ॥

आस्फाल्य रत्नरचनाचित्रौ वृत्ताश्मगोलकौ । भूया: शैलायुरित्याशीर्गिरं संगिरते प्रभो: ॥ १२२ ॥

प्रभुं करतले धृत्वा, गृहीत्वाम्बां च बाहयो: । जन्मवेश्मनि शय्यायां, नीत्वा गायन्ति भक्तित: ॥ १२३ ॥

एवं च दिक्कुमारीभि:, कृते जन्मोत्सवे प्रभो: । सिंहासनं सुरेन्द्रस्य, कम्पते युधि भीरुवत् ॥ १२४ ॥

सोऽप्यर्हज्जन्म विज्ञाय, प्रयुक्तावधिचक्षुषा । उत्थाय विनयं प्राग्वत्कुर्याच्छक्रस्तवावधि ॥ १२५ ॥

तत: पूर्वामुख: शक्र:, शक्रसिंहासने स्थित: । चतुरश्चिन्तयत्येवं, जातोऽयं जगदीश्वर: ॥ १२६ ॥

तज्जीतमेतदस्माकं, त्रैकालिकमरुत्वताम् । कार्यो यदर्हता स्फीतो, जन्मकल्याणकोत्सव: ॥ १२७ ॥

इति निश्चित्य पादात्यनायकं नैगमेषिणम् । आकार्य ज्ञापयत्येवं, स्व:पतिर्विनयानतम् ॥ १२८ ॥

स्वर्गेऽस्मिन् सर्वदेवानां, घण्टावादनपूर्वकम् । प्रस्थानं ज्ञापयास्माकं, जिनजन्मोत्सवाय भो: ॥ १२९ ॥

शिरस्यारोप्य तामाज्ञां, स सुधर्मसभागताम् । घण्टां सुघोषां त्रिर्धीरो, वादयत्यन्विताभिधाम् ॥ १३० ॥

एतस्यां वादितायां द्राग्, घण्टाः सर्वविमानगाः । युगपन्मुखरायन्ते, तादृग्दिव्यानुभावतः ॥ १३१ ॥
शब्दाद्वैतमयः सर्वः, स्वर्गः स्यान्नाकिनोऽपि च । त्यक्तान्यकृत्याः शक्राज्ञां, शुश्रूषन्त्यखिला अपि ॥ १३२ ॥
ततः शान्ते ध्वनौ तासामयमुद्घोषयत्यदः । देवाः शृण्वन्तु शक्राज्ञामत्रामुत्र हितप्रदाम् ॥ १३३ ॥
जिनजन्मोत्सवायेन्द्रो, मर्त्यलोके प्रतिष्ठते । ततस्तत्र भन्वतोऽपि, सज्जीभवत सत्वरम् ॥ १३४ ॥
मोदन्ते च तदाकर्ण्य, जिनभक्त्युत्सुकाः सुराः । इष्टं वैद्योपदिष्टं च, न स्यात्कस्य मनःप्रियम् ?॥ १३५ ॥
ततो यानविमानाधिकारिणं पालकामरम् । सज्जीकर्तुं विमानं, द्रागाज्ञापयति वासवः ॥ १३६ ॥
जम्बूद्वीपसमायामव्यासं पञ्चशतोच्छ्रितम् । पालकाख्यं विमानं द्राक्, सोऽपि निर्माय ढौकयेत् ॥ १३७ ॥
तत्रैकैकं त्रिसोपानं, प्रागुदग्याम्यदिक्त्रये । रत्नस्तम्भशतो मध्ये, स्यात्प्रेक्षागृहमण्डपः ॥ १३८ ॥
तस्मिन् रत्नपीठिकायां, मध्ये सिंहासनं हरेः । सन्मौक्तिकेन विजयदूष्येणालङ्कृतं भवेत् ॥ १३९ ॥
वायुश्रीदेशदिक्षु स्युस्तस्माद्भद्रासनानि च । सामानिकानां चतुरशीतिः सहस्रका इह ॥ १४० ॥
पूर्वस्यां मुख्यपत्नीनामष्टौ भद्रासनानि च । आग्नेय्यां द्वादश सहस्राण्यभ्यन्तरपर्षदाम् ॥ १४१ ॥
चतुर्दश सहस्राणि, याम्यां मध्यमपर्षदाम् । नैर्ऋत्यां षोडश सहस्राणि स्युर्बाह्यपर्षदाम् ॥ १४२ ॥
वारुण्यां सप्त सप्तानां, सैन्येशानां सुधाभुजाम् । द्वितीये च परिक्षेपे, आत्मरक्षकनाकिनाम् ॥ १४३ ॥
स्युः सहस्राणि चतुरशीतिः प्रत्याशमासनाः । सर्वे त्वेषां सषट्त्रिंशत्सहस्रं लक्षकत्रयम् ॥ १४४ ॥
एषामात्मरक्षकाणामिति ।
ततस्तुष्टमनाः शक्रो, रूपमुत्तरवैक्रियम् । अर्हत्सेवार्हमुत्कृष्टं, कृत्वा सर्वाङ्गभूषितम् ॥ १४५ ॥
गन्धर्वनाट्यानीकाभ्यां, गीतसंगीतमोदितः । शच्यादिभिः प्रेयसीभिरष्टाभिः परिषेवितः ॥ १४६ ॥
प्रदक्षिणीकृत्य पूर्वदिक्त्रिसोपानकाध्वना । प्रविश्य पूर्वाभिमुखो, निषीदति महासने ॥ १४७ ॥
उदीच्येन त्रिसोपानाध्वना सामानिकाः सुराः । प्रविश्यान्ये च याम्येन यथास्थानकमासते ॥ १४८ ॥
जङ्गमस्वर्गवत्तस्मिन्, विमाने प्रस्थिते पुरः । चलन्ति मङ्गलान्यष्टौ, संपूर्णः कलशस्ततः ॥ १४९ ॥
छत्रं पताकाश्चमरा, महेन्द्राख्यो ध्वजस्ततः । सहस्रयोजनोत्तुङ्गो, लघुध्वजसहस्रयुक् ॥ १५० ॥
ततः सेना पञ्च सेनापतयोऽथाभियोगिकाः । यथाशक्तिप्रकटितवपुर्वस्त्रविभूषणाः ॥ १५१ ॥
पश्चात्केचित्पुरः केचित्केचिच्चोभयपार्श्वतः । परिवृत्य विमानं तत्प्रतिष्ठन्ते सुधाभुजः ॥ १५२ ॥
देवेन्द्रशासनात्केचित्केचिन्मित्रानुवृत्तितः । पत्नीप्रेरणया केचित्केचिच्छ्रीजिनभक्तितः ॥ १५३ ॥
केचिद्धर्मधिया केचिज्जीतबुद्धया सुराः परे । कुतूहलार्थिनो नानाभूषणाम्बरवाहनाः ॥ १५४ ॥
प्राच्यपुण्यानुसारेण, संप्राप्तैश्वर्यशालिनः । देवेन्द्रमनुगच्छन्ति, सर्वे सौधर्मवासिनः ॥ १५५ ॥
सौधर्मं स्वर्गमध्येन, समृद्ध्यैवं सुरेश्वरः । वीक्षितो देवदेवीभिराश्चर्यस्मेरदृष्टिभिः ॥ १५६ ॥

पञ्चानीकपरिक्षिप्तमहेन्द्रध्वजभाक् पुरः । उद्दण्डशुण्डद्विपवद्, द्विषां चेतांसि कम्पयन् ॥ १५७ ॥
दिव्यदुन्दुभिनि:स्वानध्वानव्याप्तनभोऽन्तरः । औत्तराहेण निर्याणमार्गेणोत्तरति द्रुतम् ॥ १५८ ॥
यथा[1] वरयिता लोके, राजमार्गेण गच्छति । स्वसमृद्धिं दर्शयितुं, जनानां स्वं प्रशंसताम् ॥ १५९ ॥
तथेन्द्रोऽपि पथाऽनेन, जिनजन्मोत्सवादिषु । निर्याति भूयसां बोधिलब्धये तत्प्रशंसिनाम् ॥ १६० ॥
अथासंख्यद्वीपवार्द्धिमध्येन द्रुतमापतन् । नन्दीश्वरे रतिकरपर्वतेऽग्निविदिग्गते ॥ १६१ ॥
कृत्वा विमानसंक्षेपं, जिनजन्मपवित्रिते । नगरे शीघ्रमागत्य, मन्दिरं जिनजन्मनः ॥ १६२ ॥
द्राक् त्रिप्रदक्षिणीकृत्य, विमानेन सुरेश्वरः । विमुञ्चति तदैशान्यां, चतुर्भिरङ्गुलैर्भुवः ॥ १६३ ॥
विशेत्ततो गृहं स्वाम्यालोकने घटिताञ्जलिः । पुलकैर्जलदासिक्तकदम्बकुसुमायितः ॥ १६४ ॥
जिनं समातृकं नत्वा, दत्त्वा च त्रि:प्रदक्षिणाम् । सुरेश्वरो वदत्येवं, जगत्पूज्ये ! नमोऽस्तु ते ॥ १६५ ॥
धन्याऽसि कृतपुण्याऽसि, सफलं तव जीवितम् । जगच्चिन्तामणिर्यत्ते, कुक्षौ जातो जिनेश्वरः ॥ १६६ ॥
विभासि मातस्त्वं विश्वचक्षुषा शिशुनाऽमुना । लोकम्पृणेन शुचिना, प्रात:संध्येव भानुना ॥ १६७ ॥
जनयन्त्या जगन्नाथं, मुक्तिमार्गोपदेशकम् । सर्वेषामप्युपकृतं, जनानां जननि ! त्वया ॥ १६८ ॥
विमोहतिमिरोद्रेकलुप्तविज्ञानचक्षुषाम् । प्रददत्याऽमुमगदं, किं नो नोपकृतं त्वया ? ॥ १६९ ॥
अहं शक्रोऽस्मि देवेन्द्रः, सौधर्मस्वर्गनायकः । त्वन्नन्दनगुणाकृष्ट, इहायातोऽस्मि पावने ! ॥ १७० ॥
मातस्ततोऽनुजानीहि, न भेतव्यं मनागपि । त्वत्सुतस्य करिष्यामो, जन्मकल्याणकोत्सवम् ॥ १७१ ॥
इत्युदित्वा प्रभोर्मातुर्दत्तेऽवस्वापिनीं हरिः । पार्श्वे च स्थापयत्यस्याः, कृत्वा प्रतिकृतिं प्रभोः ॥ १७२ ॥
केनचिद्दुष्टदेवेन, हतनिद्रेह मा स्म भूत् । इयं पुत्रमनालोक्य, पिञ्जुलेत्ययमुद्यमः ॥ १७३ ॥
यद्वा परिजनस्तस्या, जातमात्रं तदङ्गजम् । अनालोक्य विषादं मा, यासीदित्ययमुद्यमः ॥ १७४ ॥
ततश्चार्हन्तमादत्ते, पञ्चमूर्तिः सुरेश्वरः । मूर्त्यैकया धौतपूतधूपिते करसंपुटे ॥ १७५ ॥
एकया छत्रमाधत्ते, धत्ते द्वाभ्यां च चामरौ । पञ्चम्या वज्रमादाय, पुरो गच्छति भृत्यवत् ॥ १७६ ॥
तत्पालकविमानं च, रिक्तमेवानुगच्छति । स्वामिनः पादचारित्वान्नृपानुगगजादिवत् ॥ १७७ ॥
तुष्टैः परिवृतो देवैः, सानन्दः स पुरन्दरः । ययौ मन्दरमौलिस्थे, कानने पाण्डुकाह्वये ॥ १७८ ॥
एवं च--
ज्ञातार्हज्जन्मनेशानस्वामिना शूलपाणिना । आदिष्टः पूर्ववत्पत्तिप्रष्ठोऽलघुपराक्रमः ॥ १७९ ॥
सोऽपि घण्टां महाघोषां, वादयत्यन्विताह्वयाम् । उद्घोषणां च कुरुते, जिनजन्मोत्सवोचिताम् ॥ १८० ॥

---

१ घटनामात्रमेतत्, निर्याणमार्गेण देवानां तिर्च्छालोकागमाय देवलोकात् निर्गमात्, हरिणैगमेषिणो गर्भपरावर्तनेऽपि तेनैव पथा निर्गमात् ।

विमानं पुष्पकं नाम, पुष्पकामरसज्जितम् । आरुह्योत्तरलोकार्द्धपतिर्गच्छति शक्रवत् ॥ १८१ ॥
दाक्षिणात्येन निर्याणमार्गेणोत्तीर्य सत्वरं । नन्दीश्वरे रतिकरगिरावीशानदिग्गते ॥ १८२ ॥
संक्षिप्य पुष्पकं स्वर्णमहीधरमुपागतः । शक्रवत्प्रणिपत्यानुशीलति त्रिजगद्गुरुम् ॥ १८३ ॥
एवं शेषा अपि समे, देवराजा जिनेश्वरम् । सभक्ति मन्दरमुपागम्य सम्यगुपासते ॥ १८४ ॥
दश वैमानिका इन्द्रा, भवनेशाश्च विंशतिः । द्वात्रिंशद्व्यन्तरेन्द्रा द्वौ, सूर्याचन्द्रामसाविति ॥ १८५ ॥
सङ्ख्यातीताः समायान्ति, यद्यप्यर्कहिमांशवः । विवक्ष्येते तथापि द्वावत्र जातिव्यपेक्षया ॥ १८६ ॥
तथोक्तं श्रीमुनिदेवसूरिकृते श्रीशान्तिचरित्रे—
"ज्योतिष्कनायकौ पुष्पदन्ते संख्यातिगाविति । हेमाद्रिमाद्रियन्ते स्म, चतुःषष्टिः सुरेश्वराः" ॥ १८७ ॥

उत्तराध्ययनप्राकृतवृत्तौ केशिगौतमीयाध्ययने, आवश्यकहारिभद्रचां च श्रीऋषभदेवजन्मोत्सवाधिकारे, श्रीसमवायाङ्गे द्वात्रिंशे समवाये च व्यन्तराणामिन्द्रत्वाविवक्षया द्वात्रिंशदेवेन्द्रा उक्ताः सन्तीति[१] ।

सर्वेऽप्यागच्छन्ति मेरुपर्वतं सपरिच्छदाः । विशेषो योऽत्र घण्टादिनाम्नां सोऽथ निरूप्यते ॥ १८८ ॥
तृतीये पञ्चमे स्वर्गे, सप्तमे दशमेऽपि च । घण्टा सुघोषाऽथ हरिनैगमेषी पदातिराट् ॥ १८९ ॥
निर्याणमार्गश्चोदीच्यो, गिरी रतिकरोऽपि च । भवेद्विमानसंक्षेपस्थानं सौधर्मराजवत् ॥ १९० ॥
तुर्ये षष्ठेऽष्टमेऽथ, द्वादशे स्वर्गे बिडौजसाम् । घण्टापत्तीशनामादि, पूर्वोक्तं शूलपाणिवत् ॥ १९१ ॥
पालकः १ पुष्पकः २ सौमनसः ३ श्रीवत्ससंज्ञकः ४ । नन्द्यावर्त्तः ५ कामगम ६ स्तथा प्रीतिगमोऽपि ७ च ॥ १९२ ॥
मनोरमश्च ८ विमलः ९ सर्वतोभद्र १० इत्यमी । क्रमाद्दशानामिन्द्राणां, प्रोक्ता यानविमानकाः ॥ १९३ ॥
तत्तन्नाम्ना तदध्यक्षाः, प्रोक्ता देवा अपि श्रुते । सामानिकादयस्त्वेषां, विज्ञेयाः क्षेत्रलोकतः ॥ १९४ ॥
भवत्योघस्वरा घण्टा, द्रुमः पादात्यनायकः । विमानं चरमेन्द्रस्य, पालकार्द्धप्रमाणयुक् ॥ १९५ ॥
योजनानां शतान् पञ्चोत्तुङ्ग इन्द्रध्वजोऽस्य च । शेषमुक्तस्वरूपं तु, शक्रवत्परिभाव्यताम् ॥ १९६ ॥
बलीन्द्रस्यापि विज्ञेयं, सर्वं चमरवत्परम् । घण्टा महौघस्वरा स्यात्, पादात्येशो महाद्रुमः ॥ १९७ ॥
न स्युर्यानविमानोपकल्पिनोऽधिकृताः सुराः । भवनव्यन्तरज्योतिष्काणां किन्त्वाभियोगिकाः ॥ १९८ ॥
शेषाणां दाक्षिणात्यानां, भद्रसेनः पदातिराट् । उदीच्यानां च विज्ञेयः, पत्तीशो दक्षसंज्ञकः ॥ १९९ ॥
विमानं चार्द्धमानं स्याच्चमरेन्द्रविमानतः । इन्द्रध्वजश्च सर्वेषां, तद्ध्वजार्द्धमितो मतः ॥ २०० ॥
तथा मेघस्वरा १ हंसस्वरा २ क्रौञ्चस्वराऽपि ३ च । मञ्जुस्वरा ४ मञ्जुघोषा ५, सुस्वरा ६ मधुरस्वरा ७ ॥ २०१ ॥

१ षोडशानां व्यन्तरेन्द्राणां तावतामेव च वानमन्तराणां चेन्द्राणामल्पर्धिकत्वादितोऽविवक्षा तत्र, सार्धद्विशत्या अभिषेकाणामन्यथा क्षतेः ।

नन्दिस्वरा ८ नन्दिघोषा ९, घण्टासंज्ञाः क्रमादिमाः । नागादिषु निकायेषु, देवेन्द्राणां निरूपिताः ॥ २०२ ॥
याम्यानां व्यंतरेन्द्राणां, घण्टा मञ्जुस्वराभिधा । उदीच्यानां च सर्वेषां, मञ्जुघोषाभिधा भवेत् ॥ २०३ ॥
सहस्रयोजनव्यासायामं यानविमानकम् । तेषां शतं सपादं च, योजनान्युच्छ्रितो ध्वजः ॥ २०४ ॥
ज्योतिष्केषु च चन्द्राणां, घण्टा स्यात्सुस्वराभिधा । तथा सुस्वरनिर्घोषा, भास्वतां शेषमुक्तवत् ॥ २०५ ॥
घण्टावादनमेतेषां, प्राग्वदुद्घोषणादि च । प्राप्तानुशिष्टयस्तुष्टा, विदधत्याभियोगिकाः ॥ २०६ ॥
वज्रपाणिः परिवृतो, देवैरेवं चतुर्विधैः । मन्दराचलमौलिस्थे, कानने पाण्डकाह्वये ॥ २०७ ॥
अभिषेकशिलायां च, तस्मिन् सिंहासनोत्तमे । निधायार्हन्तमुत्सङ्गे, तुष्टचित्तो निषीदति ॥ २०८ ॥
ततश्चाच्युतदेवेन्द्रो, वदति स्वाभियोगिकान् । अर्हज्जन्माभिषेकार्हां, सामग्रीं सज्जयन्तु भोः ॥ २०९ ॥
सौवर्णान् राजतान् रात्नान्, स्वर्णरत्नमयानपि । रूप्यरत्नमयान् रूप्यसुवर्णान् सुरूप्यरत्नजान् ॥ २१० ॥
मृत्स्नामयांश्च प्रत्येकं, सहस्रमष्टकाधिकम् । एवं चङ्गेर्यात्मदर्शस्थालपात्रीकरण्डकान् ॥ २११ ॥
सिंहासनच्छत्रतालवृन्ततैलसमुद्गकान् । चामरादीन् विकुर्वन्ति, तेऽष्टाधिकसहस्रकान् ॥ २१२ ॥
कृत्रिमाकृत्रिमान् कुम्भादीनादायाभियोगिकाः । क्षीरोदादिपयोधीनां, गङ्गादिसरितामपि ॥ २१३ ॥
तीर्थानां मागधादीनां, ह्रदानामपि भूयसाम् । पवित्रमुदकं मृत्स्नां, विविधान्यम्बुजानि च ॥ २१४ ॥
तथा हिमवदादिभ्यो, गिरिभ्यः सकलर्तुजान् । नन्दनादिवनेभ्यश्च, पुष्पौघान् विविधान् शुभान् ॥ २१५ ॥
गोशीर्षचन्दनागुर्वादिकान् गन्धाननेकशः । कषायांश्चामलकादीन्, सिद्धार्थान् विविधौषधीः ॥ २१६ ॥
गृहीत्वाऽऽगत्य संभूय, ढौकयन्त्यखिलं च तत् । स्वस्वामिनेऽच्युतेन्द्राय, विनयेन प्रणम्य ते ॥ २१७ ॥
ततोऽच्युतसुरेन्द्रस्तैः, कलशैश्चन्दनार्चितैः । पुष्पस्रक्शोभितगलैः, पद्मोत्पलपिधानकैः ॥ २१८ ॥
सर्वाग्रेण चतुःषष्ट्याधिकैः किल सहस्रकैः । अष्टभिर्भवपाथोधिपाराय स्वीकृतैरिव ॥ २१९ ॥
सामानिकादिनिःशेषपरिवारसमन्वितः । प्रागुक्तोदकपुष्पाद्यैरर्हन्तमभिषिञ्चति ॥ २२० ॥
अच्युतेंद्राभिषेकेऽस्मिन्नीशानेन्द्रादयः परे । ऊर्ध्वंदमा निषेवन्ते, विविधायुधपाणयः ॥ २२१ ॥
चामरांश्चालयंत्येके, केचिच्छत्राणि बिभ्रति । केचिद्धूपानुत्क्षिपन्ति, परे नृत्यानि कुर्वते ॥ २२२ ॥
वादयन्तेऽथ वाद्यानि, केचिद्गायन्ति केचन । केचिद्गर्जन्ति वर्षन्ति केचित्तन्वन्ति विद्युतः ॥ २२३ ॥
पुष्पाभरणवस्त्राणां, वृष्टिं कुर्वन्ति केचन । बालविस्मयदाश्चेष्टाः, केचित्कुर्युः प्रभोः पुरः ॥ २२४ ॥
अभिषिच्यैवमर्हन्तं, नत्वा कृतजयध्वनिः । गन्धकाषायिकेणाङ्गं, रूक्षयत्यच्युतेश्वरः ॥ २२५ ॥
ततोऽलङ्कारसंभारभासुरं स्वर्द्रुमोपमम् । प्रभुं विधाय पुरतो, दर्शयेन्नृत्यकौशलम् ॥ २२६ ॥
आलिख्य मङ्गलान्यष्टौ, ढौकयेत्पुरतः प्रभोः । वितत्य पुष्पप्रकरमुत्क्षिपेद्धूपमुत्तमम् ॥ २२७ ॥
ततो वृत्तशतेनाष्टाधिकेनार्थगुणस्पृशा । स्तुत्वा कृताञ्जलिर्भूते, भूयः स्तुतिपदावलीम् ॥ २२८ ॥

सा चैवं श्री जम्बूद्वीपप्रज्ञप्तिसूत्रे–"णमोऽत्थु ते सिद्ध बुद्ध दोस णीरय समण समाहिअ समत्त समजोगि सल्लगत्तण णिब्भय णीरागदोस णिम्मम णिस्संग णीसल्ल माणमूरण गुणरयण सीलसागरमणंतमप्पमेय भवियधम्मवरचाउरंतचक्कवट्टी णमोऽत्थु ते' इत्यादि ।

एवं समापिताशेषजन्मस्नात्रविधिः प्रभोः । नातिदूरान्तिकस्थोऽसौ, विनयेन निषेवते ॥ २२९ ॥
त्रिषष्टिरपि देवेन्द्राः, सौधर्मेन्द्रविवर्जिताः । अभिषिञ्चन्त्यनेनैव, विधिनाऽनुक्रमेण च ॥ २३० ॥
ततश्चेशानदेवेन्द्रः, पञ्च मूर्त्तीर्विकुर्वति । जिनं धृत्वैकयोत्सङ्गे, शक्रस्थाने निषीदति ॥ २३१ ॥
एकया छत्रमाधत्ते, धत्ते द्वाभ्यां च चामरौ । एकया पुरतः शूलं, धृत्वा तिष्ठति भृत्यवत् ॥ २३२ ॥
अथ सौधर्मराजोऽपि, सामग्रीमखिलामपि । प्राग्वद्विधाय कुरुते, विशेषं चैकमद्भुतम् ॥ २३३ ॥
कृत्वा चत्वारि शुक्लोक्षस्वरूपाणि चतुर्दिशम् । तेषां शृङ्गाष्टकान्नीरधाराभिर्गगनावधि ॥ २३४ ॥
ऊर्ध्वमुत्पत्य संभूय, पतन्तीभिः प्रभूपरि । छत्राकारं बिभ्रतीभिर्जिनं शक्रोऽभिषिञ्चति ॥ २३५ ॥
स एवं विहिताशेषजन्मस्नात्रविधिस्ततः । प्राग्वदर्हन्तमादाय, पञ्चमूर्त्तिर्निवर्त्तते ॥ २३६ ॥
युक्तश्चतुर्विधैर्देवैः, कृतप्रौढमहोत्सवैः । जिनं जन्मगृहे नीत्वा, स्थापयेन्मातुरन्तिके ॥ २३७ ॥
हृत्वाऽवस्वापिनीं मातुः, प्रतिबिम्बं प्रभोश्च तत् । न्यस्यत्युच्छीर्षके क्षौमयुग्मं कुण्डलयुग्मयुक् ॥ २३८ ॥
विचित्ररत्नमालाभिः, कृतं श्रीदामगण्डकम् । लम्बयत्यर्हन्दुल्लोचे, स्फुरज्ज्ञुम्बनकाकृति ॥ २३९ ॥
उत्तानशायिनस्तच्च, पश्यन्तः परमेश्वराः । रमन्ते विकसन्नेत्रा, अनुत्तरसुरा इव ॥ २४० ॥
स्वाम्यङ्गुष्ठे क्षुधः शान्त्यै, स्थापयत्यमृतं हरिः । मुखे यत्क्षेपतोऽर्हन्तस्तृप्यन्त्यस्तन्यपा अपि ॥ २४१ ॥
ततः शक्राज्ञया श्रीदाज्ञापिता जृम्भकामराः । कोटीर्द्वात्रिंशतं स्वर्णहिरण्यानां जिनालये ॥ २४२ ॥
निदधत्यन्यदप्येवं, भूरिभद्रासनादिकम् । उद्घोषणां ततः शक्रः, कारयत्याभियोगिकैः ॥ २४३ ॥
कुर्वन्ति भगवज्जन्मनगर्यां तेऽपि हर्षिताः । विष्वक्त्रिकचतुष्कादौ, बाढमुद्घोषणामिति ॥ २४४ ॥
भो भोश्चतुर्विधा देवाः, शृण्वन्तु वचनं हरेः । यः प्रभोः प्रभुमातुर्वा, विरूपं चिन्तयिष्यति ॥ २४५ ॥
आर्यकस्य मञ्जरीवत्, मूर्द्धा तस्य स्फुटिष्यति । आराध्येन विरोधो हि, नचिरादेव नाशयेत् ॥ २४६ ॥
ततश्चतुर्विधा देवा, इन्द्राः शक्रादयोऽखिलाः । गत्वा नन्दीश्वरद्वीपे, कुर्युरष्टाह्निकोत्सवम् ॥ २४७ ॥
यदा च युगपज्जन्म, यावतामर्हतां भवेत् । तदा तावन्ति रूपाणि, कृत्वोक्तं सकलं विधिम् ॥ २४८ ॥
कुर्वन्ति दिक्कुमार्याद्याः, सर्वेऽर्हद्भक्तिनिर्भराः । मनः संकल्पसिद्धीनां, किमशक्यं हि नाकिनां? ॥ २४९ ॥
विज्ञातसुतजन्मार्हत्पिताऽथ नगरं निजम् । कारयेद्बहिरन्तश्च, दूरिताशेषकश्मलम् ॥ २५० ॥
सुगन्धिजलसंसिक्तापणवीथ्यादिभूमिकम् । तथा त्रिकचतुष्कादौ, लिप्तं पुष्पाद्यलङ्कृतम् ॥ २५१ ॥
स्थाने स्थाने दह्यमानकाकतुण्डादिधूपितम् । अलङ्कृताशेषगेहं, तोरणस्वस्तिकादिभिः ॥ २५२ ॥
ध्वजैर्नानाविधैर्वस्त्रैर्विराजन्निखिलापणम् । पदे पदे भवद्गीतनटनर्त्तककौतुकम् ॥ २५३ ॥

क्वचिद्भवन्मल्लयुद्धं, क्वचिदारब्धरासकम् । क्वचिद्विदूषकव्यासकलाविस्मितमानवम् ॥ २५४ ॥
वस्त्राक्रीडिभिः कीर्णं, व्याप्तं वंशाग्रखेलकैः । कथकैश्च कथावीथीव्याक्षिप्तमनुजव्रजम् ॥ २५५ ॥
निरन्तरं वाद्यमानभम्भाभेरीमृदङ्गकम् । झल्लरीवेणुवीणादिवाद्यैः शब्दमयीकृतम् ॥ २५६ ॥
रिक्तकारागृहं मुक्तैस्तस्करद्विड्नृपादिभिः । ऋणानि दत्त्वा लोकानां, निःशेषमनृणीकृतम् ॥ २५७ ॥
विवृद्धमानोन्मानादिसानन्दनिखिलप्रजम् । उद्गीयमानधवलमङ्गलं प्रतिमन्दिरम् ॥ २५८ ॥
प्रतीष्टेष्टानीयमानरत्नाद्युत्सवढौकनम् । नानासत्कारसंतुष्टज्ञातिस्वजनबान्धवम् ॥ २५९ ॥
अनेकैः स्वर्णरजतरत्नाम्बरविभूषणैः । अनर्गलं दीयमानैः, पूरितार्थिमनोरथम् ॥ २६० ॥
अतुच्छोत्सवसच्छायेष्वहस्स्वेकादशस्विति । अतिक्रान्तेष्वथामन्त्र्य, स्वजनान् भोजनादिभिः ॥ २६१ ॥
सन्तोष्याथो तत्समक्षं, गुणस्वप्नाद्यपेक्षया । अर्हतां स्थापयेन्नाम, पिता भद्रङ्करक्षरम् ॥ २६२ ॥
पाल्यमानाश्च वर्द्धन्ते, धात्रीभिस्तेऽथ पञ्चभिः । अङ्कादङ्कं संचरन्तः, सह पित्रोर्मनोरथैः ॥ २६३ ॥
कलाहेतोरनारब्धकलाचार्यान्तिका अपि । स्वत एवात्तसकलकलाः संपूर्णचन्द्रवत् ॥ २६४ ॥
विद्यानां पारदृश्वानो, विनाऽभ्यासं वचस्विनः । बाल्येऽपि दक्षस्थविरा, इव प्रोद्बुद्धबुद्धयः ॥ २६५ ॥
प्राच्याद्भवादनुगतैः, स्नेहवश्यैरिवोत्तमैः । मतिश्रुतावधिज्ञानैरमात्यैरिव सेविताः ॥ २६६ ॥
क्रीडापराङ्मुखाः प्रायो, बालचेष्टाविवर्जिताः । जगदुत्कृष्टसौन्दर्यभाग्यसौभाग्यशोभनाः ॥ २६७ ॥
स्वजनानां जनानां च, नयनानन्ददायिनः । प्रियङ्कराः प्रियालापाः, प्रियाश्च द्विषतामपि ॥ २६८ ॥
जितेन्द्रियाः स्थिरात्मानो, यौवनोद्योतिता अपि । अचला अचला एव, महावाताहता अपि ॥ २६९ ॥
स्त्रीपरिग्रहजय्यानि, चेत्प्राक्कर्माणि जानते । तदा विवाहमप्यङ्गीकुर्वते ते यथाविधि ॥ २७० ॥
सत पाणिगृहीतीभिर्विषयानपि भुञ्जते । क्षेप्तुं कर्माणि यत्नीचोपायेनापि रिपुं जयेत् ॥ २७१ ॥
बही रागं दर्शयन्तोऽप्यन्तः शुद्धाः प्रवालवत् । प्राप्तेऽपि चक्रभृद्राज्ये, न व्यासक्ता भवन्ति ते ॥ २७२ ॥
प्रव्रज्यावसरं स्वस्य, ते ज्ञानेन विदन्त्यथ । तस्मिंश्च समयेऽभ्येत्य, देवा लोकान्तिका अपि ॥ २७३ ॥
नत्वा विज्ञपयन्त्येवं, जय नंद जगद्गुरो ! । त्रैलोक्यस्योपकाराय, धर्मतीर्थं प्रवर्त्तय ॥ २७४ ॥
लोकान्तिकस्वरूपं तु क्षेत्रलोकतो ज्ञेयं ।

अत्र कल्पसूत्रे श्रीवीरजिनाधिकारे प्रथमं लोकान्तिकदेवागमनं, ततो वार्षिकदानमिति क्रमो दृश्यते, षष्ठाङ्गे तु श्रीमल्लिजिनाधिकारे पूर्वं सांवत्सरिकदानं, ततो लोकान्तिकदेवागमनमिति क्रमो दृश्यते, श्रीआवश्यके तु श्रीऋषभजिनाधिकारे कल्पसूत्रवत्, श्रीमहावीराधिकारे तु षष्ठाङ्गवत्तथा चोक्तं श्रीज्ञानसागरसूरिभिः स्वकृतावचूर्णौ, "आह–ऋषभाधिकारे संबोधनोत्तरकालं परित्यागद्वारमुक्तमिह तु कस्माद्विपर्ययः ? उच्यते – न सर्वार्हतामयं नियमः, यदुत संबोधनोत्तरकालभाविनी महादानप्रवृत्तिरिति" ।

ततो दीक्षादिनादर्वाग्, वर्षे शेषे जिनेश्वराः । दानस्य धर्मेष्वग्र्यत्वाद्दानं ददति वार्षिकम् ॥ २७५ ॥
कोटिमेकां सुवर्णानां, लक्षैरष्टभिरन्विताम् । आप्रातराशसमयान्नित्यं ददति तीर्थपाः ॥ २७६ ॥
पुरे त्रिकचतुष्कादौ, कारयेद्घोषणामिति । ईप्सितं यस्य यद्वस्त्रविभूषावाहनादिकम् ॥ २७७ ॥
तद्यथेच्छमिहागत्य, स गृह्णात्वविशङ्कितः । सर्वाशाः पूरयत्येवं, दानैः कीर्त्या च तीर्थकृत् ॥ २७८ ॥
धर्मप्रभावनाबुद्ध्या, लोकानां चानुकम्पया । जिना ददति तद्दानं, न तु कीर्त्यादिकाङ्क्षिणः ॥ २७९ ॥
दानं यथा यथा दद्युः, स्वापतेयं तथा तथा । शक्रवैश्रमणादिष्टा, देवाः पिपर्ति जृम्भकाः ॥ २८० ॥
त्रीणि कोटिशतान्यष्टाशीतिश्चोपरि कोटयः । लक्षाण्यशीतिः स्वर्णानां, दद्युर्वर्षेण तीर्थपाः ॥ २८१ ॥
एतावद्वार्षिके दाने, जृम्भकामरढौकितम् । जिनेश्वराणां सर्वेषां, नियतं परिकीर्तितम् ॥ २८२ ॥
तच्चैवं–दातुं यदाऽऽब्दिकं दानमध्यवस्यन्ति तीर्थपाः । तदाऽऽसनप्रकम्पेन, जानात्यवधिना हरिः ॥ २८३ ॥
जीतमेवेदमस्माकं, त्रिकालोद्भववज्रिणाम् । यद्वार्षिकाय दानाय, प्रव्रज्यावसरेऽर्हताम् ॥ २८४ ॥
ढौकनीयं स्वापतेयं, स्वर्णकोटिशतास्त्रयः । अष्टाशीतिःकोटयश्चाशीतिलक्षसमन्विताः ॥ २८५ ॥
एवं निश्चित्य धनदमाज्ञापयति वज्रभृत् । स जृम्भकामरांस्ते स्वं, निक्षिपन्ति गृहेऽर्हताम् ॥ २८६ ॥
अन्यदप्यश्वहस्त्यादिभूषावस्त्रादि मन्दिरात् । यच्छन्त्यभीष्टं लोकानां, दानवीरा जिनेश्वराः ॥ २८७ ॥
महानसान्यनेकानि, कारयित्वा स्वसेवकैः । दापयन्त्यन्नपानादि, दीनादीनामनर्गलम् ॥ २८८ ॥

तथोक्तं षष्ठाङ्गे 'तए णं कुंभए मिहिलाए रायहाणीए तत्थ तत्थ तहिं तहिं देसे बहुईओ महाणससालाओ कारेइ' इत्यादि मल्ल्यध्ययने ।

पित्रादेः स्वजनस्याथ, प्राप्यानुज्ञां कथञ्चन । यस्मिन् दिने यतन्ते ते, चारित्राय महाशयाः ॥ २८९ ॥
तस्मिन् दिने तन्नगरं, ध्वजश्रेण्याद्यलङ्कृतम् । स्वजनाः कारयन्त्येषां, विष्वक् पूर्वोक्तया दिशा ॥ २९० ॥
तस्मिन्नवसरे प्राग्वन्नुतुःषष्टिः सुरेश्वराः । आयान्त्यासनकम्पेन, ज्ञात्वा दीक्षाक्षणं प्रभोः ॥ २९१ ॥
देवानां समुदायेनागच्छता त्रिदिवात्तदा । द्यावाभूम्योर्मध्यमुद्यत्कोट्यर्कमिव दीप्यते ॥ २९२ ॥
कलशांस्तेऽष्टजातीयान्, पूजोपकरणानि च । पृथक् सहस्रमष्टानां, कारयन्त्याभियोगिकैः ॥ २९३ ॥
इन्द्रवत्कलशानष्टप्रकारान् स्वजना अपि । शिल्पिभिः कारयन्त्यन्यान्यर्चोपकरणान्यपि ॥ २९४ ॥
कलशास्ते मनुष्याणां, दिव्येषु कलशेष्वथ । अनुप्रविष्टेषु भृशं, शोभन्ते दिव्यशक्तितः ॥ २९५ ॥
ततः सुराहृतैस्तीर्थनीरौषधिमृदादिभिः । वासवाः स्वजनाश्चाग्रमभिषिञ्चन्ति सोत्सवम् ॥ २९६ ॥
तदा दर्पणभृङ्गाराद्यलङ्कृतकराः सुराः । इन्द्राद्याः परिषेवन्ते प्रोच्चारितजयारवाः ॥ २९७ ॥
ततश्च गन्धकाषाय्या, रूक्षिताङ्गो जगत्प्रभुः । यथास्थानं परिहितसर्वालङ्कारभासुरः ॥ २९८ ॥
कल्पद्रुमप्रसूनस्रग्विराजिगलकन्दलः । लक्षार्घं सदृशं श्वेतं, परिधत्तेऽम्बरं वरं ॥ २९९ ॥
स्वजनाः कारयन्त्येकां, शिबिकां शिल्पिपुङ्गवैः । विचित्ररचनां भूरिरत्नस्तम्भशताञ्चिताम् ॥ ३०० ॥
तादृश्या स्वर्गिकृतया, मिश्रा शिबिकया च सा । भृशं विभाति मेधेव, संगता शास्त्रसंविदा ॥ ३०१ ॥
षष्ठादिना विशिष्टेन, तपसाऽलङ्कृतस्ततः । उत्तरोत्तरमुत्कृष्टवर्द्धमानशुभाशयः ॥ ३०२ ॥

तत्र सिंहासने पूर्वामुखः स्वामी निषीदति । प्रभोर्दक्षिणतश्चोपविशेत्कुलमहत्तरा ॥ ३०३ ॥
पटशाटकमेकं सा, बिभृते हंसलक्षणम् । अम्बर्धात्री वामतश्च, चारुवेषा निषीदति ॥ ३०४ ॥
पृष्ठेऽवतिष्ठते चैका, तरुणी चारुभूषणा । प्रभूपरि सितच्छत्रं, दधाना स्वर्वधूपमा ॥ ३०५ ॥
एका च कृतशृङ्गारा, चकोराक्षी निषीदति । ऐशान्यां दधती हस्ते, कलशं जलसंभृतम् ॥ ३०६ ॥
एका निषीदत्याग्नेय्यां, रम्यालङ्कारबन्धुरा । हस्ते धृत्वा मणिमयं, तालवृन्तं मृगेक्षणा ॥ ३०७ ॥
ततश्च स्वजनादिष्टाः, सहस्रं पुरुषर्षभाः । समोच्छ्रायोत्साहरूपवेषभूषणशालिनः ॥ ३०८ ॥
वहन्ति शिबिकां यावत्तावत्सौधर्मनायकः । तस्य बाहां दाक्षिणात्यामूर्ध्वगां वहति स्वयम् ॥ ३०९ ॥
उदीच्यामूर्ध्वगां बाहां, वहतीशाननायकः । अधस्तनां दाक्षिणात्यां, चमरेन्द्रः स्वयं वहेत् ॥ ३१० ॥
अधस्तनीमौत्तराहां, बलीन्द्रस्तामुदस्यति । चत्वार उद्वहन्त्येवमिन्द्रा बाहाचतुष्टयम् ॥ ३११ ॥
शेषाः सुराः सुरेन्द्राश्च, चलत्कुण्डलभूषणाः । प्रौढप्रेमप्रकटितपुलकाङ्कुरदन्तुराः ॥ ३१२ ॥
पञ्चवर्णानि पुष्पाणि, वर्षन्तो देवदुन्दुभीन् । वादयन्तः स्वमात्मानं, धन्यंमन्याः स्फुरन्मुदः ॥ ३१३ ॥
अहंपूर्वमहंपूर्वमिति सत्वरचेतसः । शेषेष्वशेषदेशेषु, वहन्ति शिबिकां प्रभोः ॥ ३१४ ॥

तथाहुः श्रीभद्रबाहुस्वामिनः— पुव्वं उक्खित्ता माणुसेहिं सा हट्ठ रोमकूवेहिं । पच्छा वहंति सीअं असुरिंदसुरिंदनागिंदा ॥

ईदृग्नियमश्चात्रैवं चतुर्थाङ्गे— पुरतो[1] वहंति देवा नागा पुण दाहिणंमि पासंमि । पच्चच्छिमेण असुरा गरुला पुण उत्तरे पासे ॥

शक्रेशानौ ततस्तां तां, त्यक्त्वा बाहां सुरेश्वरौ । चामराणि वीजयन्तः, प्रभोरुभयतः स्थितौ ॥ ३१५ ॥
तदा नभोऽङ्गणं देवैः, स्फुरद्वसनभूषणैः । भूमण्डलं च मनुजैर्भवेद्विष्वगलङ्कृतम् ॥ ३१६ ॥
निरन्तरं वाद्यमानैरातोद्यैर्विविधैस्तदा । जयारवैश्च लोकानां, भवेच्छब्दमयं जगत् ॥ ३१७ ॥
नागराणां नागरीणां, समुदायैः पदे पदे । वीक्ष्यमाणः स्तूयमानः, प्रार्थ्यमानो मनोरथैः ॥ ३१८ ॥
भवनाट्टसहस्राणि, व्यतिक्रामन् जगद्गुरुः । जनाञ्जलिसहस्राणि, गृह्णन् शृण्वंश्च तत्स्तुतीः ॥ ३१९ ॥
वनाय पुर्या निर्याति, राजमार्गेण मार्गवित् । सौधर्मेन्द्र इव स्वर्गात्पूर्वोक्ताभिः समृद्धिभिः ॥ ३२० ॥
प्रथमं मङ्गलान्यष्टौ, संपूर्णः कलशस्ततः । भृङ्गारचामरच्छत्रवैजयन्त्यस्ततः क्रमात् ॥ ३२१ ॥
पादपीठान्वितं रत्नस्वर्णसिंहासनं ततः । ततः पृथक् साष्टशतमनारोहेभवाजिनाम् ॥ ३२२ ॥
स्थानामस्त्रपूर्णानां, ध्वजघण्टावलीस्पृशाम् । प्रधानपुरुषाणां च, प्रत्येकं शतमष्टयुक् ॥ ३२३ ॥

---

१ पुरओ सुरा वहंति असुरा पुण दाहिणमि पासंमि । अवरे वहंति गरुला नागापुण उत्तरे पासे । ॥ १ ॥ (८-१२४) इति वचनादनियमोऽयं । अयं वीरमहोत्सवे क्रमः, पूर्वोक्तस्तु नाभेयजिनदीक्षोत्सवे ।

गजाश्वरथपादात्यसैन्यानि च ततस्ततः । सहस्रयोजनोत्तुङ्गे, ध्वजो ध्वजसहस्रयुक् ॥ ३२४ ॥
खड्गग्राहाः कुन्तपीठफलकग्राहिणस्ततः । हास्यादिकारकाः कान्दर्पिकाश्च सजयारवाः ॥ ३२५ ॥
उग्रा भोगाश्च राजन्याः, क्षत्रियाद्यास्ततः क्रमात् । संचरन्ति ततो देवा, देव्यश्च स्वामिनः पुरः ॥ ३२६ ॥
वदन्ति सर्वे तत्रैवं, जय जीव जगद्गुरो ! । ज्ञानाद्यैर्निरतीचारैर्जहि कर्मरिपून् द्रुतम् ॥ ३२७ ॥
जयाजितानीन्द्रियाणि, जितं धर्मं च पालय । विघ्नान् जित्वा त्रिभुवनैश्वर्यमासादय द्रुतम् ॥ ३२८ ॥
रागद्वेषमहामल्लौ, हत्वा मल्ल इवोद्भटः । आराधनापताकां द्राग्, जगद्रङ्गे समाहर ॥ ३२९ ॥
विशुद्धं केवलज्ञानं, प्रभो ! शीघ्रमवाप्नुहि । सन्मार्गं दर्शयास्माकं, धर्मे निर्विघ्नमस्तु ते ॥ ३३० ॥
एवं महैः प्राप्य वनमशोकादितरोस्तले । संस्थाप्य शिबिकां तस्याः, समुत्तरति तीर्थकृत् ॥ ३३१ ॥
यथोचितं भूषणानि, विमुञ्चति ततः प्रभुः । तान्यादाय हितं शास्तीत्येवं कुलमहत्तरा ॥ ३३२ ॥
उच्चोच्चगोत्रस्त्वं वत्स ! त्वमसि क्षत्रियोत्तमः । प्रसिद्धमातापितृको, व्याप्तकीर्तिर्जगत्त्रये ॥ ३३३ ॥
दुराराधं दुश्चरं च, व्रतमङ्गीकृतं त्वया । यद्वालुकानां कवल, इवास्वादलवोज्झितम् ॥ ३३४ ॥
दुर्वहं मेरुवत्खड्गधाराग्रमिव दुश्चरम् । दुस्तरं वार्द्धिवद्भीष्मं, क्लीबानां श्रवणादपि ॥ ३३५ ॥
ततः प्रमादं मा कार्षीर्वत्सोऽसि त्वं सुखोचितः । तथा यतेथास्त्वं धर्मे, यथा सिद्ध्येत्तवेप्सितम् ॥ ३३६ ॥
इत्युदित्वा नमस्कृत्य, शाटकं हंसलक्षणम् । आदाय भूषणैः पूर्णमेकतः साऽपसर्पति ॥ ३३७ ॥
ततो मुष्ट्यैकया कूर्चं, तच्चतुष्केण मुर्द्धजान् । उद्धरन् कुरुते लोचं, भगवान् पञ्चमौष्टिकम् ॥ ३३८ ॥
तदा च प्राप्तवैराग्यैर्जिनाः केचिन्नृपादिभिः । प्रव्रजन्ति परिवृताः, केचिदेकाकिनोऽपि च ॥ ३३९ ॥
केशांस्त्वादाय शक्रस्तान्, सुरभीन् श्यामलान्मृदून् । अनुज्ञाप्य जगन्नाथमुत्सृजेत्क्षीरनीधौ ॥ ३४० ॥
वस्त्रं च स्थापयत्येकं, प्रभोः स्कन्धे हरिस्तदा । देवदूष्याभिधं स्वर्णलक्षमूल्यमनुत्तरम् ॥ ३४१ ॥
देवमानवशब्दौघो, नानातूर्यरवोऽपि च । क्षिप्रमेवेन्द्रवाक्येन, निखिलोऽप्युपशाम्यति ॥ ३४२ ॥
नमो सिद्धाणमित्युक्त्वा, स्वामी सामायिकं ततः । निषिद्धसर्वसावद्ययोगं संप्रतिपद्यते ॥ ३४३ ॥

अत्र सामायिकपाठे भंते इति जिना न कथयन्तीति कल्पसूत्रवृत्त्यादिषु करोमि भदन्त सामायिकं । सर्वान्सावद्ययोगान् प्रत्याचक्षे । न चास्यान्यो भदन्तोऽन्यत्र सिद्धेभ्यः आचार्यं त्वनेन सिद्धान् वा प्रत्युक्तमिति तु तत्त्वार्थवृत्तौ ॥

ततस्तस्य च चारित्रप्रतिपत्त्युत्तरक्षणे । उत्पद्यते महाज्ञानं, मनःपर्यायसंज्ञकम् ॥ ३४४ ॥
एवं गृहीतचारित्रास्तेऽर्हन्तः परमेश्वराः । आपृच्छय स्वजनांस्तस्मिन्नेवाह्नि विहरन्त्यपि ॥ ३४५ ॥
वसन्त्येकमहोरात्रं, ग्रामे द्रङ्गे च पञ्च तान् । चन्दनाभ्यर्चने वास्या, तक्षणे च समाशयाः ॥ ३४६ ॥
मणौ मृदि रिपौ मित्रे समाश्च स्तुतिनिन्दयोः । द्रव्यक्षेत्रकालभावप्रतिबन्धविवर्जिताः ॥ ३४७ ॥

तत्र द्रव्यं सचित्तादि, क्षेत्रं ग्रामगृहादिकम् । कालः स्यान्मासवर्षादिर्भावो रागादिरुच्यते ॥ ३४८ ॥
एकान्ते च सभायां च पुरेऽरण्ये समक्रियाः । समाहिताः समितिभिर्गुप्तिभिश्च निराश्रवाः ॥ ३४९ ॥
व्योमवत्ते निरालम्बा, आत्मेवास्खलितस्सदा । सौम्याः शीतांशुवद्दीप्राः, सहस्रकरबिम्बवत् ॥ ३५० ॥
वायुवच्चाप्रतिबंधाः, शरदम्भोऽमलाशयाः । पाथोनिधिवदक्षोभ्या, अप्रकम्प्याश्च मेरुवत् ॥ ३५१ ॥
अप्रमत्ताश्च भारण्डखगवद्गजराजवत् । शौण्डीराः सिंहवच्छूरात्मानो भुवि चरन्ति ते ॥ ३५२ ॥
शङ्खो विविधरागेण, कांस्यपात्रं यथाऽम्भसा । रज्यते लिप्यते नैव, तथा तेऽपि जिनेश्वराः ॥ ३५३ ॥
तपसः पारणां ते च, कुर्वते यस्य वेश्मनि । तद्गृहे पञ्च दिव्यानि, स्युर्देवैर्विहितानि वै ॥ ३५४ ॥
सुगन्धिजलवृष्टिः स्यात् १, पुष्पवृष्टिस्तथा भवेत् २ । स्यात् स्वर्णवृष्टि ३ र्ध्वनति, गगने दिव्यदुन्दुभिः ४॥ ३५५ ॥
अहो दानमहो दानमित्युद्घोषणपूर्वकम् । नृत्यन्ति मुदिता देवा, नरजन्मानुमोदिनः ॥ ३५६ ॥
स्वर्णवृष्टौ गरिष्ठायां, सार्द्धा द्वादश कोटयः । कनिष्ठायां तु तस्यां स्युर्लक्षास्तावत्य एव च ॥ ३५७ ॥
त्रैलोक्यस्थामविक्षोभप्रभविष्णुभुजा अपि । परीषहोपसर्गास्ते, सहन्ते निर्जरार्थिनः ॥ ३५८ ॥
क्षुत् पिपासा च शीतोष्णे, दंशा चेला ऽरति स्त्रियः । चर्या नैषेधिकी शय्या ऽऽक्रोशश्च वध याचने ॥ ३५९ ॥
रोगाऽलाभ तृणस्पर्शाः, सत्कारो मलिनाङ्गता । प्रज्ञाऽज्ञानं च सम्यक्त्वं, द्वाविंशतिः परिषहाः ॥ ३६० ॥
अरत्याख्यान्मोहनीयादरतिः स्यात्परीषहः । जुगुप्सामोहनीयाच्चाचेलत्वं स्यात्त्रपावहम् ॥ ३६१ ॥
पुंवेदमोहनीयाच्च, स्यात्पुसां स्त्रीषरीषहः । स्त्रीवेदमोहनीयाच्च, स्त्रीणां स्यात्पुंपरीषहः ॥ ३६२ ॥
भयमोहाद्भवेद्भीष्मो, नैषेधिक्याः परीषहः । याञ्चापरीषहो मानभङ्गकृन्मानमोहतः ॥ ३६३ ॥
क्रोधहेतुः क्रोधमोहभूराक्रोशपरीषहः । मानहेतुर्मानमोहभूः सत्कारपरीषहः ॥ ३६४ ॥
चारित्रमोहमाश्रित्य, स्युः सप्तामी परीषहाः । प्रज्ञाऽज्ञानद्वयं ज्ञानावरणीयसमाश्रितम् ॥ ३६५ ॥
सम्यक्त्वं दर्शनमोहमलाभो विघ्नकर्म च । आश्रित्य वेदनीयं तु, भवन्त्येकादशापरे ॥ ३६६ ॥
तत्राद्याः क्रमतः पञ्च, चर्या शय्या वधो रुजा । तृणस्पर्शश्च मालिन्यमित्येते वेदनीयजाः ॥ ३६७ ॥
एवं च ज्ञानावरणे, मोहनीयान्तराययोः । वेदनीये चेति कर्मचतुष्केऽन्तर्भवन्त्यमी ॥ ३६८ ॥
स्युर्द्वाविंशतिरप्येते, सप्ताष्टकर्मबन्धिनाम् । युगपद्विंशतिं चामून्, वेदयन्त्यपि जातु ते ॥ ३६९ ॥
चर्यानैषेधिकीयुग्मं, युग्मं शीतोष्णयोरपि । न भवेद्युगपत्तेनानुभवो विंशतेः स्मृतः ॥ ३७० ॥
ननु चात्यन्तिके शीते, पतति ज्वलितेऽनले । मध्यस्थस्यैकतः शीतं, तुदत्येवोष्णमन्यतः ॥ ३७१ ॥
अत्रोच्यते–
शीतोष्णकालोत्थे शीतोष्णे एवात्र विवक्षिते । व्यभिचारो न तत्पूर्वोक्तेः शीतज्वरिभिस्तथा ॥ ३७२ ॥

एवंविधो व्यतिकरो, न भवेद्वा तपस्विनाम् । तस्माच्छीतोष्णयोर्नैककाले संभव इष्यते[1] ॥ ३७३ ॥
ननु शय्या च चर्या च, न स्यातां युगपत्ततः । एकोनविंशतेरेव कथं नोक्तः सहोद्भवः ॥ ३७४ ॥
अत्रोच्यते—कश्चिद्ग्रामं समुद्दिश्य गच्छन्नुत्सुकमानसः । मार्गे यदीत्वरां शय्यां, तादृशीं प्रतिपद्यते ॥ ३७५ ॥
गमनेच्छानिवृत्तत्वात्तदा चर्यापरीषहः । कश्चित्कालं च शय्यापि, यौगपद्यं द्वयोरिति[2] ॥ ३७६ ॥
मोहायुर्वर्जषट्कर्मबन्धिनां तु चतुर्दश । छद्मस्थानां स्युरष्टाभिर्वर्जिता मोहनीयजैः ॥ ३७७ ॥
चर्याशय्ये वोष्णशीते, स्यातामेषां समं न यत् । द्वादशानुभवन्त्येते, सूक्ष्ममोहास्ततः समम् ॥ ३७८ ॥
ननु पूर्वोक्तया युक्त्या, न शय्याचर्ययोः कथम् । सहोद्भवो भवत्येषामिति चेत् श्रूयतामिह ॥ ३७९ ॥
तद्धेतुमोहानुदयान्नैषामौत्सुक्यसंभवः । ततो नेत्वरशय्यायामेषां चर्यापरीषहः ॥ ३८० ॥
छद्मस्थवीतरागाणामथैकं कर्म बध्नताम् । सयोगानां केवलिनां, भवस्थायोगिनामपि ॥ ३८१ ॥
एकादशोपसर्गाः स्युर्वेदयन्ति समं नव । न चर्याशय्ययोः शीतोष्णयोर्यत्सममुद्भवः ॥ ३८२ ॥
मोहकर्मोदयाभावादेषामौत्सुक्यसंभवः । न जातु स्यात्ततश्चर्याशय्ययोर्न सहोद्भवः ॥ ३८३ ॥
अमी च सम्यक् सह्यन्ते, दक्षैर्मोक्षाभिकाङ्क्षिभिः । रागद्वेषाकरणतस्तस्मादुक्ताः परिषहाः ॥ ३८४ ॥
प्रज्ञाप्रकर्षे नोत्कर्षं, न चाल्पज्ञपराभवम् । विदधीतेति सोढव्यो, बुधैः प्रज्ञापरिषहः ॥ ३८५ ॥
सत्कारेऽपि कृते भक्तैर्भोज्यवस्त्रोत्सवादिभिः । न माद्यतीति सोढः स्यात्सत्काराख्यः परीषहः ॥ ३८६ ॥
अभ्यासेऽपिश्रुतानाप्तौ, ज्ञानद्विष्टो विषण्णधीः । न स्यात्सोढव्य इत्येवमज्ञानाख्यः परीषहः ॥ ३८७ ॥
तपश्चास्त्रिकष्टानां, सोढनामिह जन्मनि । फलासंदेहतः सह्याः, सम्यक्त्वाख्यः परीषहः ॥ ३८८ ॥
शीतोष्णप्रभृतीनां तु, वपुश्चेतस्तुदां स्वयम् । परीषहत्वं विज्ञेयं, स्पष्टत्वान्नेह वर्णितम् ॥ ३८९ ॥
स्त्रीप्रज्ञालोकसत्कारा, अनुकूला अमी त्रयः । प्रतिकूलाश्च विज्ञेयाः, शेषा एकोनविंशतिः ॥ ३९० ॥
अत्रानुकूलशीतलयोर्विशेषोऽन्वेषणीय इति ।
परीषहौ स्त्रीसत्कारौ, द्वौ स्यातां भावशीतलौ । उष्णाश्च भावतः शेषा, विंशतिः स्युः परीषहाः ॥ ३९१ ॥

तथाहुः—'इत्थीसक्कारपरीसहो य दो भावसीअला एए' (आच०–२०२ नि०) इत्यादि.
अत्रानुकूलशीतलयोर्विशेषोबहुश्रुतेभ्योऽन्वेषणीय इति परीषहाः ।

उपसृज्यत एभिर्यत्, धर्मात्प्रच्याव्यतेऽसुमान् । बाधाविशेषास्ते प्रोक्ता, उपसर्गा इति श्रुते ॥ ३९२ ॥
दिव्य १ मानुष २ तैरश्चाः ३, स्वसंवेद्या ४ स्तथैव च । एकैकश्च चतुर्भेद, इति ते षोडश स्मृताः ॥ ३९३ ॥

---

१ यद्यपि वेदनापेक्षया समाधातुं शक्यमेव, परं तथा समादाने विंशतेरपि युगपद्भावो दुश्शकः, तत्त्वतस्तु अग्निसेवाद्यानाभिलाषजनकयोः शीतोष्णयोः स्वीकारे परीषहत्वेन नैककालभावितोभययोः ।

२ शय्याप्रतिबन्धेनाविहारे विहारभीत्या शय्याप्रतिबन्धे च सति द्वयोर्भावो यद्वा मार्गास्तेः शय्योद्वेगस्य चापि युगपद्भावात् ।

हास्यात्प्रद्वेषतो वापि, तृतीयः स्यात्परीक्षणात् । तुर्यः पृथग्विमात्राख्यो, हास्यद्वेषादिसंकरात् ॥ ३९४ ॥
स च हास्यात्समारब्धो, द्वेषे यद्वा परीक्षणे । निष्ठां यायात्क्रुधारब्धोऽप्येवं हास्यपरिक्षयोः ॥ ३९५ ॥
यद्वारब्धः परीक्षायै, निष्ठां हास्यक्रुधोर्व्रजेत् । एतेषां त्रिकसंयोगोऽप्येवं भाव्यो मनीषिभिः ॥ ३९६ ॥
मानुषा अप्येत एव, भवन्त्याद्यास्त्रयस्ततः । कुशीलप्रतिसेवाख्यस्तुर्यो भोगार्थनादिजः ॥ ३९७ ॥
भयाद् द्वेषाद्भक्ष्यहेतोरपत्यपालनाय च । इति तिर्यक्कृता ज्ञेया, उपसर्गाश्चतुर्विधाः ॥ ३९८ ॥
प्रद्वेषात्क्रुद्धसर्पाद्यास्तुदन्ति श्वादयो भयात् । आहारहेतोर्व्याघ्राद्या, धेन्वाद्यास्त्रातुमात्मजान् ॥ ३९९ ॥
घट्टनाच्च प्रपतनात्, स्तम्भनात् श्लेषणादिति । आत्मसंवेदनीयाः स्युरुपसर्गाश्चतुर्विधाः ॥ ४०० ॥
यथाऽक्ष्णि पतिते रेणौ, तस्मिन् हस्तेन मर्द्दिते । मांसाङ्कुरैर्वा कण्ठादौ, कष्टं स्याद्घट्टनोद्भवम् ॥ ४०१ ॥
गमनादावयत्नेन, दुःखं स्यात्पतनोद्भवम् । सुप्तस्य चोपविष्टस्य, पादादौ प्रसृते चिरम् ॥ ४०२ ॥
स्थिते स्तब्धे स्तम्भनोत्थमेवं संकुचिते चिरम् । स्थिते तस्मिन् विलग्ने च, दुःखं स्यात् श्लेषणोद्भवम् ॥ ४०३ ॥
इदमर्थतः स्थानाङ्गसूत्रवृत्त्यादौ ।
एतांश्च सहमानानां, क्षीयते कर्मसंततिः । तेषामनुत्तरज्ञानतपःक्षान्त्यादिशालिनाम् ॥ ४०४ ॥
त्यक्तार्त्तरौद्रध्यानास्ते, धर्मध्यानसमाहिताः । ध्यानं ध्यातुं प्रवर्त्तन्ते, शुक्लं कर्मेन्धनानलम् ॥ ४०५ ॥
ध्यानं नाम मनःस्थैर्यं, यावदन्तर्मुहूर्त्तकम् । आर्त्तं रौद्रं तथा धर्म्यं, शुक्लं चेति चतुर्विधम् ॥ ४०६ ॥

तथोक्तं स्थानाङ्गवृत्तौ— "अंतोमुहुत्तमेत्तं चित्तावत्थाणमेगवत्थुंमि । छउमत्थाणं झाणं जोगनिरोहो जिणाणं तु" ॥ [ध्यानशतक श्लोक ३]

योगास्तत्रौदारिकादिदेहसंयोगसंभवाः । आत्मवीर्यपरीणामविशेषाः कथितास्त्रिधा ॥ ४०७ ॥
इत्यावश्यकहारिभद्रां ध्यानशतकवृत्तौ,
मुहूर्त्ताद्यत्परं चित्तावस्थानमेकवस्तुनि । सा चिन्तेत्युच्यते प्राज्ञैर्यद्वा ध्यानान्तरं भवेत् ॥ ४०८ ॥

तथोक्तं– अंतोमुहुत्तपरओ चिंता झाणंतरं व होज्जाहि । सुचिरंपि होज्ज बहुवत्थुसंकमे त्राणसंताणो ॥ [ध्यानशतक श्लो. ४]

तत्रेह न ध्यानादन्यद्ध्यानान्तरं गृह्यते, किं तर्हि ? भावानुप्रेक्षात्मकं चेत इति । बहूनि च तानि वस्तूनि च बहुवस्तूनि आत्मगतपरगतानि मनःप्रभृतीनि, तेषु संक्रमः संचरणमिति हारिभद्रां । [श्लो. ४ टीका]

गाढमालम्बने लग्नं, चित्तं ध्यानं निरेजनम् । यत्तु चित्तं चलं मूढमव्यक्तं तन्मनो मतम् ॥ ४०९ ॥
अव्यक्तानां मूर्छितानां, मत्तानां स्वापमीयुषाम् । सद्योजातार्भकाणां चाऽव्यक्तं मूढं भवेन्मनः ॥ ४१० ॥
एवं ध्यानं ध्रुवं चित्तं, चित्तं ध्यानं न निश्चयात् । खदिरो वृक्ष एव स्यात्, स चान्यो वा तरुः पुनः॥ ४११ ॥
यन्मानसः परिणामः, केवलो ध्यानमिष्यते । तन्मिथ्या यज्जिनैस्त्रैधेष्वपि योगेषु तत्स्मृतम् ॥ ४१२ ॥

नन्वङ्गमनसोः स्थैर्यापादनात्संभवेद् द्विधा । ध्यानं कथं तृतीयं तु, वाचिकं संभवेदिह ? ॥ ४१३ ॥

अत्रोच्यते–

यथा मानसिकं ध्यानमेकाग्रं निश्चलं मनः । यथा च कायिकं ध्यानं, स्थिरः कायो निरेजनः ॥ ४१४ ॥

तथा यतनया भाषां, भाषमाणस्य शोभनाम् । दुष्टां वर्जयतो ध्यानं, वाचिकं कथितं जिनैः ॥ ४१५ ॥

तथाहुः– "एवंविहा गिरा मे वत्तव्वा एरिसा न वत्तव्वा । इय वेयालिअवक्कस भासओ वाइगं झाणं" ॥

मनोवचःकाययोगान्नयन्नेकाग्रतां मुनिः । वर्त्तते त्रिविधे ध्याने, गणयन् भङ्गिकश्रुतम् ॥ ४१६ ॥

त्रैधेष्वपीति योगेषु, ध्यानत्वे किल निश्चिते । मुख्येनैकतमेनैव, व्यपदेशः स्फुटो भवेत्[1] ॥ ४१७ ॥

यथा सत्स्वपि दोषेषु, वातपित्तकफात्मसु । यदा भवेदुत्कटो यः, कुपितः स तदोच्यते ॥ ४१८ ॥

यथा गच्छन् राजमार्गे, नृपतिस्सपरिच्छदः । गच्छत्ययं नृप इति, मुख्यत्वाद्व्यपदिश्यते ॥ ४१९ ॥

तथा चित्तस्य मुख्यत्वाद्ध्यानं चित्तोत्थमुच्यते । वाक्कायययोस्त्वमुख्यत्वात्तद्ध्यानं नोच्यते पृथक् ॥ ४२० ॥

ज्ञातविश्वस्वभावस्य, निस्सङ्गस्य महात्मनः । निर्ममस्य विरक्तस्य, भवेद्ध्याने स्थिरं मनः ॥ ४२१ ॥

नित्यं यतीनां युवतीपशुक्लीबादिवर्जितं । विजनं शस्यते स्थानं, ध्यानकाले विशेषतः ॥ ४२२ ॥

महात्मनां हि शमिनां, ध्याननिश्चलचेतसाम् । न विशेषो जनाकीर्णे, पुरे वा निर्जने वने ॥ ४२३ ॥

ततो वाक्कायमनसां, समाधिर्यत्र जायते । भूतोपघातहीनोऽसौ, देशः स्याद् ध्यायतो मुनेः ॥ ४२४ ॥

यत्र योगसमाधानमुत्तमं लभते मुनिः । स ध्यानकालो दिवसनिशादिनियमस्तु न ॥ ४२५ ॥

ध्यानस्थैर्यं प्रजायेतासनाद्यवस्थया यया । स्थितो निषण्णः सुप्तो वा, ध्यायेत्तस्यामवस्थितः ॥ ४२६ ॥

यद्देशकालचेष्टास्ववस्थासु निखिलासु च । मुनीश्वराः शिवं प्राप्ताः, क्षपिताशेषकल्मषाः ॥ ४२७ ॥

तद्देशकालचेष्टानां, ध्याने कोऽपि न निश्चयः । यथा योगसमाधिः स्याद्यतितव्यं तथा बुधैः ॥ ४२८ ॥

अत्रार्त्तरौद्रे दुर्ध्याने, स्मृते दुर्गतिदायिनी । शुभध्याने पुनर्धर्म्यशुक्ले स्वः शिवदायिनी ॥ ४२९ ॥

एषां स्वरूपं यथा–

तत्रार्त्तस्य पीडितस्य, रोगाकिञ्चनतादिभिः । लोभादिभिर्वा यद्ध्यानं, तदार्त्तं स्याच्चतुर्विधम् ॥ ४३० ॥

शब्दादीनामनिष्टानां, संबन्धे सति देहिनः । ध्यानं यत्तद्वियोगस्य, तदार्त्तं प्रथमं भवेत् ॥ ४३१ ॥

अभीष्टानां च लब्धानां, शब्दादीनां निरन्तरम् । अविच्छेदस्य या चिन्ता, तद् द्वितीयं प्रकीर्त्तितम् ॥ ४३२ ॥

आतङ्के सति तस्योपशान्तेश्चिन्तातृतीयकम् । भुक्तानां कामभोगानां, स्मरणे[2] स्यात्तुरीयकम् ॥ ४३३ ॥

अन्ये त्वाहुश्चक्रिविष्णुसुरशक्रादिसंपदाम् । आशंसया निदानस्य, चिन्तने तत्तुरीयकम् ॥ ४३४ ॥

---

१ ठाणेणं मोणेणं झाणेणमित्यत्र वाक्कायव्यापारनिषेधाय पदद्वयं पृथगुक्त्वा केवलमनोव्यापाराय ध्यानशब्दस्य प्रयोगात्.

२ भुक्तान् स्मृत्वा तल्लाभमिच्छुः भवान्तरेऽपि तत्राशां बध्नीयादिति ।

तथाहुः–"देविंदचक्कवट्टित्तणाइं गुणरिद्धिपत्थणामइयं । अहमं नियाणचिंत्तण-
मत्राणाणुगयमच्चंत्तं" ति ॥ [ध्यानशतक श्लो. ९]

क्रन्दनं शोचनं चाश्रुमोचनं परिदेवनम् । आर्त्तध्यानस्य चत्वारि, लक्षणान्याहुरार्हताः ॥ ४३५ ॥
तत्र–क्रन्दनं स्याद्विवरणं, शोचनं दीनता मता । स्पष्टं तृतीयं तत्क्लिष्टवाक्याढ्यं परिदेवनम् ॥ ४३६ ॥
आत्मवर्त्तित्वादलक्ष्यमप्येभिर्लक्षणैरदः । लक्ष्यते इत्यमून्याहुर्लक्षणान्यस्य धीधनाः ॥ ४३७ ॥
हिंसामृषाद्यतिक्रूराध्यवसायात्मकं भवेत् । परप्रद्वेषजं रौद्रध्यानं तच्च चतुर्विधम् ॥ ४३८ ॥
हिंसा १ मृषा २ स्तैन्य ३ संरक्षणा ४ नुबंधिभेदतः । तत्राद्यं प्राणीनां दाहवधबन्धादिचिन्तनम् ॥ ४३९ ॥
पैशून्यासभ्यवितथवचसां परिचिन्तनम् । अन्येषां द्रोहबुद्ध्या यन्मृषावादानुबन्धि तत् ॥ ४४० ॥

तथाहुः— "पिसुणासब्भासब्भूअभूयघायाइवयणपणिहाणं । मायाविणोऽभिसंधणपरस्स
पच्छन्नपावस्स" ॥ [ध्यानशतक श्लो. २०]

परद्रव्यापहरणचिन्तनं तीव्ररोषतः । तन्नायकोपघाताद्यैर्भवेत्स्तैन्यानुबन्धि तत् ॥ ४४१ ॥
स्वीयस्वरक्षणार्थं यच्छङ्कमानस्य सर्वतः । परोपघाताभिप्रायः, संरक्षणानुबन्धि तत् ॥ ४४२ ॥

तथोक्तं– "सद्दाइविसयसाहणधणसंरक्खणपरायणमणिट्ठं । सव्वाभिसंकणपरोव-
घायकलुसाउलं चित्तं" ॥ [ध्यानशतक श्लो. २२]

हिंसादिषु चतुर्ष्वेषु, यदेकासेवनं मुहुः । रौद्रध्यानस्य तद् ज्ञेयं, प्रथमं लक्षणं बुधैः ॥ ४४३ ॥
चतुर्ष्वेषु प्रवृत्तिस्तु, द्वितीयं तस्य लक्षणम् । तथा कुशास्त्रसंस्कारात्मकादज्ञानदोषतः ॥ ४४४ ॥
हिंसादिकेष्वधर्मेषु, धर्मबुद्ध्या प्रवर्त्तनम् । तृतीयं लक्षणं ज्ञेयं, चतुर्थं तु भवेदिदम् ॥ ४४५ ॥
मरणांतेऽपि संप्राप्ते, हिंसादेरनिवर्तनम् । महासंक्लिष्टमनसः, कालशौकरिकादिवत् ॥ ४४६ ॥
श्रुतचारित्रधर्माभ्यामनपेतं तु यद्भवेत् । तद्धर्म्यं ध्यानमुक्तं तच्चतुर्भेदं जिनोत्तमैः ॥ ४४७ ॥
आज्ञाविचयसंज्ञं स्यात्, श्रुतार्थचिन्तनात्मकम् । अपायविचयं त्वाश्रवादिभ्योऽपायचिंन्तनम् ॥ ४४८ ॥
पुण्यपापफलचिन्ताविपाकविचयाभिधम् । संस्थानविचयं तु स्याल्लोकाकृत्यादिचिन्तनम् ॥ ४४९ ॥

तथाहुः–"आप्तवचनं हि प्रवचनमाज्ञाविचयस्तदर्थनिर्णयनम् । आश्रवविकथागौरव-
परीषहाद्यैरपायस्तु ॥ अशुभशुभकर्मविपाकानुचिन्तनार्थो विपाकविचयः स्यात् । द्रव्यक्षेत्राकृत्यनुगमनं
संस्थानविचयस्तु ॥ [प्रशमरति श्लोक २४७, २४८]

रुची आज्ञानिसर्गाभ्यां, सूत्रविस्तारयो रुची । चतुर्द्धा रुचयो धर्मध्यानंचिह्नचतुष्टयम् ॥ ४५० ॥
सूत्रव्याख्यानमाज्ञा स्यान्निर्युक्त्यादीह तत्र या । रुचिः श्रद्धानमेषाऽऽज्ञारुचिरुक्ता महर्षिभिः ॥ ४५१ ॥
विनोपदेशं या तत्त्वश्रद्धा सा स्यान्निसर्गजा । सूत्रे श्रद्धा सूत्ररुचिस्तद्विस्तारेऽन्तिमा रुचिः ॥ ४५२ ॥

तथोक्तं— "आगमउवएसाणं निसग्गओ जं जिणप्पणीयाणं । भावाणं सद्दहणं धम्मझाणस्स तं लिंगं " ॥ [ध्यानशतक श्लोक ६७]

धर्मध्यानस्य चत्वारि, भवन्त्यालम्बनान्यथ । सौधाद्यारोहणे रज्ज्वादिवद्यानि जिना जगुः ॥ ४५३ ॥
वाचना च पृच्छना च, तथैव परिवर्त्तना । अनुप्रेक्षा चेत्यमूषां, स्वरूपमपि कीर्त्यते ॥ ४५४ ॥
निर्जरार्थं विनेयानां, सूत्रदानादिवाचना । सूत्रादौ शङ्किते प्रश्नो, गुरूणां पृच्छना मता ॥ ४५५ ॥
पूर्वाधीतस्य सूत्रादेरविस्मरणहेतवे । निर्जरार्थं च योऽभ्यासः, स भवेत्परिवर्त्तना ॥ ४५६ ॥
सूत्रार्थानुस्मरणं चानुप्रेक्षेत्यभिधीयते । धर्मध्याने चतस्रोऽनुप्रेक्षाः प्रोक्ता इमाः पराः ॥ ४५७ ॥
अन्विति ध्यानतः पश्चात्, प्रेक्षा त्वालोचनं हृदि । अनुप्रेक्षा स्यादसौ चाश्रयभेदात् चतुर्विधा ॥ ४५८ ॥
एकत्वानित्यत्वाशरणत्वानां भवस्वरूपस्य । चिन्ता धर्मध्यानानुप्रेक्षाः स्युः क्रमादेताः ॥ ४५९ ॥
एकोहं नास्ति मे कश्चिन्नाहमन्यस्य कस्यचित् । न तं पश्यामि यस्याहं, नासौ भवति यो मम ॥ ४६० ॥
इत्येकत्वानुप्रेक्षा ।
कायः सन्निहितापायः, संपदः पदमापदाम् । समागमाः स्वप्नसमाः, सर्वमुत्पादिभङ्गुरम् ॥ ४६१ ॥
इत्यनित्यत्वानुप्रेक्षा ।

जन्मजरामरणभयैरभिद्रुते व्याधिवेदनाग्रस्ते । जिनवरवचनादन्यन्न चास्ति शरणं क्वचिल्लोके ॥
इत्यशरणानुप्रेक्षा । [प्रशमरतिप्रकरणं - श्लोकः १५२] माता भूत्वा दुहिता भगिनी भार्या च भवति संसारे । व्रजति सुतः पितृतां भ्रातृतां पुनः शत्रुतां चैव ॥ [प्रशमरतिप्रकरणं श्लोक १५६]

गर्भोत्पत्तौ महादुःखं, महादुःखं च जन्मनि । मरणे च महादुःखमिति दुःखमयो भवः ॥ ४६२ ॥
इति संसारानुप्रेक्षा ।
शोधयत्यष्टधा कर्ममलं शुक्लमिति स्मृतम् । शुचं वा क्लमयतीति, शुक्लं तच्च चतुर्विधम् ॥ ४६३ ॥
सविचारं स्यात्पृथक्त्ववितर्काख्यमिहादिमम् । तथैकत्ववितर्काख्यमविचारं द्वितीयकम् ॥ ४६४ ॥
सूक्ष्मक्रियं चानिवृत्ति, शुक्लध्यानं तृतीयकम् । समुच्छिन्नक्रियं चैवाप्रतिपाति चतुर्थकम् ॥ ४६५ ॥
उत्पादादिपर्यवाणामेकद्रव्यविवर्तिनाम् । विस्तारेण पृथग्भेदैर्वितर्को यद्विकल्पनम् ॥ ४६६ ॥
नाना नयानुसरणात्मकात्पूर्वगतश्रुतात् । यत्र ध्याने तत्पृथक्त्ववितर्कमिति वर्णितम् ॥ ४६७ ॥
अत्र च व्यञ्जनादर्थे, तथाऽर्थाद्व्यञ्जनेऽसकृत् । विचारोऽस्ति विचरणं, सविचारं तदीरितम् ॥ ४६८ ॥
मनःप्रभृतियोगानामेकस्मादपरत्र च । विचारोऽस्ति विचरणं, सविचारं ततोऽप्यदः ॥ ४६९ ॥
एवं च–
यत्पृथक्त्ववितर्काढ्यं, सविचारं भवेदिह । तत्स्यादुभयधर्माढ्यं, शुक्लध्यानं किलादिमम् ॥ ४७० ॥

उक्तं च–"उप्पायठिइभंगाइं पज्जयाणं जमेगदव्वंमि । नाणानयाणुसरणं पुव्वगयसुयाणुसारेण ॥ सवियारमत्थवंजणजोगंतरओ तयं पढमसुक्कं । होइ पुहत्तवियक्कं सवियारमरागभावस्स" ॥ [ध्यानशतक श्लोक ७७, ७८]

अनेकेषां पर्यवाणामेकद्रव्यावलम्बिनाम् । एकस्यैव वितर्को यः, पूर्वगतश्रुताश्रयः ॥ ४७१ ॥
स च व्यञ्जनरूपोऽर्थरूपो वैकतमो भवेत् । यत्रैकत्ववितर्काख्यं, तद्ध्यानमिह वर्णितम् ॥ ४७२ ॥
न च स्याद्व्यञ्जनादर्थे, तथाऽर्थाद्व्यञ्जनेऽपि च । विचारोऽत्र तदेकत्ववितर्कमविचारि च ॥ ४७३ ॥
मनःप्रभृतियोगानामप्येकस्मात्परत्र नो । विचारोऽत्र तदेकत्ववितर्कमविचारि च ॥ ४७४ ॥
इदं ह्येकत्र पर्याये, योगचाञ्चल्यवर्जितम् । चिरमुज्जम्भते दीप्रं, निर्वातगृहदीपवत् ॥ ४७५ ॥

तथाहुः–"जं पुण सुनिप्पकंपं निवायसरणप्पईवमिव चित्तं । उप्पायठिईभंगाइयाणमेगंमि पज्जाए ॥ अवियारमत्थवंजणजोगंतरओ तयं बिइयसुक्कं । पुव्वगयसुयालंबणमेगत्तवियारमवियक्कं" ॥ [ध्यानशतक श्लोक. ७९, ८०]

क्रियोच्छ्वासादिका सूक्ष्मा, ध्याने यत्रास्ति कायिकी । निवर्त्तते न यत्सूक्ष्मक्रियं चैवानिवर्त्ति तत् ॥ ४७६ ॥
स्याद्वर्द्धमान एवात्र, परिणामः क्षणे क्षणे । न हीयमानस्तदिदमनिवर्त्ति प्रकीर्त्तितम् ॥ ४७७ ॥
तच्च निर्वाणगमनकाले केवलिनो भवेत् । रुद्धवाक्चित्तयोगस्य वपुर्योगार्द्धरोधिनः ॥ ४७८ ॥

उक्तं च– "निव्वाणगमणकाले केवलिणोदरनिरुद्धजोगस्स । सुहुमकिरियाऽनियट्टी तइयं तणुकायकिरियस्स" ॥ [ध्यानशतक श्लोक. ८१]

समुच्छिन्नाः क्रियाः कायिक्याद्या योगनिरोधतः । यस्मिन् यच्चाप्रतिपाति, तच्छुक्लध्यानमन्तिमम् ॥ ४७९ ॥
इदं त्ववस्थां शैलेशीं, प्राप्तस्याखिलवेदिनः । निरुद्धाशेषयोगस्य, शुक्लं[1] परममीरितम् ॥ ४८० ॥
सिद्धत्वेऽपि हि संप्राप्ते, भवत्येतदवस्थितम् । न तु न्यूनाधिकं तेनाप्रतिपातीदमुच्यते ॥ ४८१ ॥
इयं हि परमा कोटिः, शुक्लध्यानस्य निश्चिता । अतः परं तन्नास्तीति, परमं शुक्लमुच्यते ॥ ४८२ ॥

तथोक्तं– "तस्सेव य सेलेसीं गयस्स सेलव्व निप्पकंपस्स । वोच्छिन्नकिरियमप्पडिवाइ झाणं परमसुक्कं" ॥ योगनिरोधपद्धतिस्तु द्रव्यलोकतो ज्ञेयेति । [ध्यानशतक श्लो. ८२]

अव्यथं चाप्यसंमोहो, विवेकः स्यात्तथा परः । व्युत्सर्गश्च भवेच्छुक्लध्यानचिह्नचतुष्टयम् ॥ ४८३ ॥
यद्देवाद्युपसर्गेभ्यो, भयं तत्कथ्यते व्यथा । तदभावोऽव्यथं शुक्लध्यानलक्षणमादिमम् ॥ ४८४ ॥
देवादिमायाकृप्तस्य, सूक्ष्मार्थजनितस्य वा । संमोहस्येह मौढ्यस्याऽभावोऽसंमोह इष्यते ॥ ४८५ ॥
जीवस्य देहात्सर्वेभ्यः, संयोगेभ्यश्च शुद्धया । भिन्नत्वभावनं बुद्ध्या, स विवेको विवेचनात् ॥ ४८६ ॥
यन्निःसङ्गतयाऽङ्गस्य, परित्यागस्तथोपधेः । स व्युत्सर्गश्चतुर्थं स्याच्छुक्लध्यानस्य लक्षणम् ॥ ४८७ ॥

१ आभवक्षयान्न प्रतिपततीत्येवार्थः अप्रतिपातिनः न च सिद्धत्वे ध्यानं, कर्मक्षयाकरणात् चास्त्राभावात् अयोगित्वान्ते श्रेण्यन्ताच्च ।

यदाहुः— "चालिज्जइ बीहेइ व धीरो न परीसहोवसग्गेहिं । सुहुमेसु न संमुज्झइ भावेसु न देवमायासु ॥ देहविवित्तं पिच्छइ अप्पाणं तह य सव्वसंजोगा । देहोवहिवुस्सग्गं निस्संगो सव्वहा कुणइ" ॥ [ध्यानशतक श्लोक. ९१, ९२]

चत्वार्यालम्बनानि स्युः, शुक्लध्यानस्य च क्रमात् । कषायाणां क्षयात् क्षान्तिमार्दवार्जवमुक्तयः ॥ ४८८ ॥
आत्मनोऽनन्तवर्तित्वानुप्रेक्षा प्रथमा भवेत् । तथा विपरिणामानुप्रेक्षा प्रोक्ता द्वितीयिका ॥ ४८९ ॥
अनुप्रेक्षाऽशुभत्वस्यापायानां चेति नामतः । शुक्लध्याने चतस्रोऽनुप्रेक्षाः प्रेक्षाश्रयैः स्मृताः ॥ ४९० ॥
अनंतकालं भ्रमतो, जीवस्य भवसागरे । भावनाऽनन्तवर्त्तित्वानुप्रेक्षा परिकीर्त्तिता ॥ ४९१ ॥

सा चैवं– "एसो अणाइनिहणे संसारे सागरुव्व दुत्तारे । नास्यतिस्त्रिअनरामरभवेसु परिहिंडए जीवो" ॥

विविधा ये परिणामा, वस्तूनां तद्विभावना । भवेद्विपरिणामानुप्रेक्षा प्रेक्षावतां प्रिया ॥ ४९२ ॥

तथाहि– "सव्वट्ठाणाइं असासयाइं इह चेव देवलोगे य । सुरअसुरनराईणं रिद्धिविसेसा सुहाइं च" ॥

क्षणभङ्गुरसंपत्तेर्विरूपस्य भवस्य यत् । विभावनाऽशुभत्वानुप्रेक्षा सा परिकीर्त्तिता ॥ ४९३ ॥

तथाहि- "धि द्धी संसारो जंमि जुआणो परमरूवगव्वियओ । मरिऊण जायइ किमी तत्थेव कलेवरे नियए" ॥

कषायेभ्योऽथाश्रवेभ्यः, प्रमादविषयादितः । अपायभावनाऽपायानुप्रेक्षा सा प्रकीर्त्तिता ॥ ४९४ ॥

यथा-"कोहो य माणो य अणिग्गहीया माया य लोहो य पवड्ढमाणा । चत्तारि एए कसिणा कसाया, सिंचंति मूलाइं पुणब्भवस्स" ॥ इत्यादि, इदं चार्थतः प्रायस्तृतीयाङ्गगतं । [दशवै. अ. ८ गा. ४०]

आद्येऽथ शुक्लध्यानस्य, ध्याते भेदद्वयेऽर्हताम् । घातिकर्मक्षयादाविर्भवेत्केवलमुज्ज्वलम् ॥ ४९५ ॥
ततो जानन्त्यनन्तानि, द्रव्याणि विविधानि ते । त्रैकालिकांश्च पर्यायान्, प्रतिद्रव्यमनन्तकान् ॥ ४९६ ॥
सर्वेषामपि जानन्ति, जीवानामागतिं गतिम् । स्थितिं चेतश्चिन्तितं च, कृतं भुक्तं निषेवितम् ॥ ४९७ ॥
न जानन्ति न पश्यन्ति, यत्तन्नास्ति जगत्त्रये । भवन्त्यतस्तेऽरहसोऽर्हन्तश्च जगदर्चिताः ॥ ४९८ ॥
यत्तृतीयभवे बद्धं, तीर्थकृन्नामकर्म तत् । प्राप्तोदयं विपाकेन, जिनानां जायते तदा ॥ ४९९ ॥
तस्मिन्नेव क्षणे देवेश्वरा आसनकम्पतः । केवलज्ञानमुत्पन्नं, सर्वे जानीयुरर्हताम् ॥ ५०० ॥
ततः पूर्वोक्तया रीत्या, चतुष्षष्टिः सुरेश्वराः । आगच्छन्ति प्रमुदिता, ज्ञानोत्पादास्पदेऽर्हताम् ॥ ५०१ ॥
तत्र वायुकुमारा द्राग्, योजनप्रमितां महीम् । शोधयेयुः कचवरतृणाद्युत्सृज्य दूरतः ॥ ५०२ ॥
ततो मेघकुमारास्तां, सिञ्चन्त्यद्भिः सुगन्धिभिः । पञ्चवर्णैः पूजयन्ति, पुष्पैर्ऋत्वधिदेवताः ॥ ५०३ ॥
रचयन्ति ततः पीठं, व्यन्तरास्तत्र भूतले । भूमेः सपादक्रोशोच्चं, स्वर्णरत्नमणीमयम् ॥ ५०४ ॥
तत्र रूप्यमयं वप्रं, कुर्वते भवनाधिपाः । सहस्रैर्दशभिः प्राप्यं, सोपानानां भुवस्तलात् ॥ ५०५ ॥

तच्च सोपानमेकैकमेकहस्तपृथूच्छ्रितम् । भूमेर्द्धनुःसहस्रे द्वे, सार्द्धे तेषां समुच्छ्रयः ॥ ५०६ ॥
तस्य वप्रस्य भित्तिः स्यात्पञ्चचापशतोच्छ्रिता । द्वात्रिंशदङ्गुलोपेतत्रयस्त्रिंशद्धनुः पृथुः ॥ ५०७ ॥
शोभन्ते कपिशीर्षाणि, तस्या भित्तेरुपर्यथ । निर्धौतस्वर्णसारेण, रचितानि स्फुरद्रुचा ॥ ५०८ ॥
तस्मिन् वप्रे च चत्वारि, द्वाराणि रचयन्ति ते । नानारत्नमयान्युच्चैर्द्वारशाखादिमन्ति च ॥ ५०९ ॥
प्रतिद्वारं तोरणानां, त्रयं मणिमयं सुराः । पाञ्चालिकामणिच्छत्रमकरध्वजमञ्जुलम् ॥ ५१० ॥
ध्वजांश्च मङ्गलान्यष्टौ, पुष्पदाम्नां तथाऽऽवलीः । रचयन्ति प्रतिद्वारं, कलशान् वेदिकां तथा ॥ ५११ ॥
कृष्णागुरुतुरुष्कादिधूपान् दिव्यान् समन्ततः । वितन्वतीर्धूपघटीस्तन्वते निर्जरा बहूः ॥ ५१२ ॥
कोणे कोणे च वप्रस्य, तस्य स्वादूदकाञ्चिता । एकैका क्रियते वापी, मणिसोपानभृत्सुरैः ॥ ५१३ ॥
प्राच्ये द्वारे द्वारपालः, सुरः स्यात्तस्य तुम्बरुः । दाक्षिणात्ये च खट्वाङ्गी, स्यात्कपाली च पश्चिमे ॥ ५१४ ॥
जटामुकुटधारी स्यादुदीच्यद्वारपालकः । तुम्बुरुर्नाम देवश्च, प्रतीहारोऽर्हतां भवेत् ॥ ५१५ ॥
अथ तस्याद्यवप्रस्य, भवेन्मध्ये समन्ततः । प्रतरः समभूम्यात्मा, पञ्चाशच्चापविस्तृतः ॥ ५१६ ॥
तिष्ठन्त्यत्र च यानानि, देवतिर्यग्नरा अपि । स्युः प्रत्येकं विमिश्रास्ते, प्रवेशनिर्गमोन्मुखाः ॥ ५१७ ॥
ततः प्रतरसंपूर्त्तौ, सोपानानामुपक्रमः । भवेद् द्वितीयवप्रस्य, हस्तोच्चत्वायतिस्पृशाम् ॥ ५१८ ॥
पञ्चानामिति सोपानसहस्राणामतिक्रमे । प्राकारः सुन्दराकारो, द्वितीयः प्राप्यते जनैः ॥ ५१९ ॥
जात्यस्वर्णमयं तं च, कुर्युर्ज्योतिष्कनाकिनः । नानारत्नमयैर्दीप्रैः, कपिशीर्षैरलङ्कृतम् ॥ ५२० ॥
भित्त्युच्चत्वपृथुत्वादि, ज्ञेयमस्याद्यवप्रवत् । ज्ञेया चतुर्णां द्वाराणां, रचनाऽप्यखिला तथा ॥ ५२१ ॥
जयाभिधाने देव्यौ द्वे, पूर्वस्यां द्वारपालिके । श्वेतवर्णे अभयया, राजमानकराम्बुजे ॥ ५२२ ॥
मा भैषीरिति हस्तेन, प्रसृतेन प्रदर्शनम् । अभया नाम मुद्रेयं, श्रुता वृद्धानुवादतः ॥ ५२३ ॥
याम्यद्वारे विजयाख्यौ, देव्यौ स्फुरत्तनुद्युती । हस्तन्यस्ताङ्कुशे शोभां, बिभृतो द्वारपालिके ॥ ५२४ ॥
अजिते पश्चिमायां च, पीते पाशोल्लसत्करे । मकराढ्यकरे नीले, उदीच्यामपराजिते ॥ ५२५ ॥

तथोक्तं समवसरणस्तोत्रे—"जयविजयाऽजियअवराजियत्ति सिअअरुणपीअनीलाभा । बीए देवीजुअला अभयंकुसपासमगरकया"॥ [श्लोक. २०]

पञ्चाशतं धनूंषि स्यात्प्रतरोऽत्रापि पूर्ववत् । तिष्ठन्त्यत्र च तिर्यञ्चः, सिंहव्याघ्रमृगादयः ॥ ५२६ ॥
ऐशान्यां च भवत्यत्र, देवच्छन्दो मनोरमः । क्षणोत्तरक्षणेऽध्यास्ते, प्रभुर्यं सुरसेवितः ॥ ५२७ ॥
अथोर्द्ध्वं पञ्चसोपानसहस्रातिक्रमे ततः । तृतीयः प्राप्यते वप्रो, जनैर्भाविमहोदयैः ॥ ५२८ ॥
एनं रत्नमयं वप्रं, कुर्युर्वैमानिकाः सुराः । नानामणिमयैर्दीप्रैः, शालितं कपिशीर्षकैः ॥ ५२९ ॥
भित्त्युच्चत्वपृथुत्वादि, द्वाराणां रचनापि च । अत्रापि पूर्ववद् ज्ञेया, विशेषस्त्वेष कथ्यते ॥ ५३० ॥

पूर्वस्यां द्वारपालोऽत्र, सोमो वैमानिकः सुरः । जात्यचामीकरज्योतिर्दधानः पाणिना धनुः ॥ ५३१ ॥
दण्डपाणिर्यमो याम्यां, गौराङ्गो व्यन्तरामरः । प्रतीच्यां पाशभृद्रक्तो ज्योतिष्को वरुणः सुरः ॥ ५३२ ॥
उत्तरस्यां च धनदो, भवनाधिपनिर्जरः । गदाहस्तः श्यामकान्तिर्भवति द्वारपालकः ॥ ५३३ ॥

तथोक्तं—"पीअसिअरत्तसामा सुरवणजोइभवणा रयणवप्पे । धणुदंडपासगयहत्थ
सोमजमवरुणधणयक्खा" ॥ ५६३ ॥ [समवसरण स्तोत्र श्लो. १९]

तस्य वप्रस्य मध्ये च, पीठं स्यात्समभूतलम् । धनुःशतानि षट् क्रोशमेकं च विस्तृतायतम् ॥ ५३४ ॥
एतावदेव विस्तारमानमाद्यद्वितीययोः । वप्रयोरन्तरे किन्तु, तत्पार्श्वद्वयमीलनात् ॥ ५३५ ॥
तथाहि—स्याद्रूप्यवप्रात्पञ्चाशद्धनूंषि प्रतरोऽग्रतः । शताश्च द्वादशाध्यर्द्धाः सोपानधनुषां ततः ॥ ५३६ ॥
त्रयोदशशतान्येवं, धनुषामेकतोऽन्तरम् । रूप्यस्वर्णवप्रयोः स्यात्, परतोऽपि तथैव च ॥ ५३७ ॥
पार्श्वयोरुभयोश्चैवं, स्याद्विस्तारे समुच्चिते । एकः क्रोशः षट् च चापशतमानं यथोदितम् ॥ ५३८ ॥
मानमेवं स्वर्णरत्नवप्रान्तरेऽपि विस्तृतेः । एकः क्रोशः षट् शतानि, धनुषां भाव्यतां स्वयम् ॥ ५३९ ॥
एवं त्रयाणां वप्राणां, व्यासमाने समुच्चिते । क्रोशत्रयं स्याद्धनुषामष्टादश शतानि च ॥ ५४० ॥
षट् वप्रभित्तयोऽत्र स्युरेकैकस्याश्च विस्तृतौ । स्युर्धनूंषि त्रयस्त्रिंशद्, द्वात्रिंशदङ्गुलानि च ॥ ५४१ ॥
धनूंषि षड्गुणानि स्युरष्टानवतियुक् शतम् । अङ्गुलान्यपि षड्घ्नानि, स्युर्द्वानवतियुक् शतम् ॥ ५४२ ॥
एषा चापद्वये तस्मिंश्चापराशौ नियोजिते । स्याच्चापद्विशती प्राच्यचापौघे सा नियोज्यते ॥ ५४३ ॥
जातः क्रोशोऽस्मिंश्च पूर्वादितैः क्रोशैस्त्रिभिर्युते । वृत्तं समवसरणं, जातं योजनसंमितम् ॥ ५४४ ॥
अस्मिंश्च वृत्तसमवसरणे ये चतुर्दिशम् । सोपानानां सहस्राः स्युर्दश ते योजनाद्बहिः ॥ ५४५ ॥

अयं भावः—

अर्हत्सिंहासनाधःस्थभूभागादेकतो भुवि । क्रोशद्वयेन स्याद्बाह्यवप्रपर्यन्तभूतलम् ॥ ५४६ ॥
चतसृष्वपि दिक्ष्वेवं, योगे च पार्श्वयोर्द्वयोः । आयामतो व्यासतश्च, पूर्णं स्यादेकयोजनम् ॥ ५४७ ॥
बाह्यसोपानपर्यन्तभूतलं तु भवेत्ततः । पादाधिकैस्त्रिभिः क्रोशैर्जिनाधःस्थमहीतलात् ॥ ५४८ ॥
सोपानानां सहस्रैर्यद्दशभिर्जायते किल । क्रोशः सपादस्तद्योगे, भवेन्मानं यथोदितम् ॥ ५२९ ॥
भूमावलग्नं समवसरणं च भवेदिदम् । तथोद्ध्वमूर्द्ध्वं सोपानरचनाभिस्समन्ततः ॥ ५५० ॥
रत्नवप्रस्य परिधिरेकं योजनमीरितम् । न्यूनत्रयस्त्रिंशदाढ्या, चापानां च चतुःशती ॥ ५५१ ॥
द्वे योजने पञ्चषष्टियुक् चापाष्टशती तथा । द्विहस्ती त्र्यङ्गुलोना रैवप्रस्य परिधिर्भवेत् ॥ ५५२ ॥
त्रियोजनी चापशतास्त्रयस्त्रिंशास्त्रयोदश । हस्त एकोऽङ्गुलान्यष्टौ, परिधी रौप्यवप्रगः ॥ ५५३ ॥
चतुरस्रेऽथ समवसरणे विस्तृतिर्भवेत् । सर्वासां वप्रभित्तीनामेकं चापशतं किल ॥ ५५४ ॥
कोदण्डानां शताः पञ्चदशात्रान्तरमीरितम् । रूप्यस्वर्णवप्रभित्त्योः, प्रत्येकं पार्श्वयोर्द्वयोः ॥ ५५५ ॥

अत्र पूर्वोक्तसोपानरुद्धक्षेत्रे पृथक्कृते । धनुःशतद्वयी सार्द्धा, शेषा प्रतर उह्यते ॥ ५५६ ॥

एवं च–

स्यात्सार्द्धक्रोशविस्तारान्तरो वप्रोऽत्र राजतः । विस्तारमीलने प्राग्वदुभयोरपि पार्श्वयोः ॥ ५५७ ॥

स्वर्णवप्रान्तरव्यास, एकक्रोशमितो मतः । यतः क्रोशार्द्धमेकैकपार्श्वे व्यासो भवेदिह ॥ ५५८ ॥

यदुक्तं समवसरणस्तोत्रे— "चउरंसे इगधणुसयपिहु वप्पा सड्ढकोसअंतरया । पढमबिया बिअतइआ कोसंतरपुव्वमिव सेसं" ॥ ५८९ ॥ [श्लोक. ६]

यद्यप्यस्यावचूर्णावित्युक्तं दृश्यते–अत्र चान्तरं पूर्ववत्प्रतरसोपानापेक्षया न गण्यते, किंतु आद्याद् द्वितीयस्यैकतः १५०० धनूंषि, परतोऽप्येवं, द्वितीयात्तृतीयस्यैकतः १००० धनूंषि, द्वितीयपार्श्वेऽप्येवं सन्तीत्येवमेव ज्ञेयं, एवमेव पूर्वाचार्याम्नायादिति ।

तथाप्यत्र सुवर्णवप्रे एकस्मिन् पार्श्वे एकधनुःसहस्रान्तरे सार्द्धद्वादशधनुःशतक्षेत्र संमातव्यानि एकैकहस्तपृथुलानां सोपानानां पञ्चसहस्राणि कथं संमान्तीति बहुश्रुतेभ्यो भावनीयमिति[1] ।

रत्नप्राकारविस्तारो, भवत्यत्रापि पूर्ववत् । क्रोशेनैकेन धनुषां, शतैः षड्भिश्च संमितः ॥ ५५९ ॥

वप्रत्रयान्तरव्यासे, पूर्वोक्त इति मीलिते । सार्द्धं क्रोशत्रयं स्यात् षट्शती च धनुषामिह ॥ ५६० ॥

सुवर्णरत्नप्राकारभित्तीनां च चतसृणाम् । चतुर्धनुःशतव्यासयोगे भवति योजनम् ॥ ५६१ ॥

रूप्यवप्रस्य भित्तेस्तु, विस्तृतिर्या धनुःशतम् । सा न गण्या योजनेऽस्मिन्, बाह्यसोपानकान्यपि ॥ ५६२ ॥

त्रयाणामपि वप्राणां, परिधिस्तु स्वयं बुधैः । चतुरस्रतया भाव्यो, व्यासमानाच्चतुर्गुणः ॥ ५६३ ॥

कोणे कोणे च भवतो, द्वे द्वे वाप्याविहोत्तमे । उक्तं च वक्ष्यमाणं च, शेषमत्रापि वृत्तवत् ॥ ५६४ ॥

अथो तृतीयवप्रे यत्, प्रागुक्तं समभूतलम् । तस्य मध्ये पीठमेकं, मणिरत्नमयं भवेत् ॥ ५६५ ॥

तत्स्याज्जिनतनूच्छ्रायपरिमाणसमोच्छ्रयम् । चतुर्द्वारं त्रिसोपानरमणीयं चतुर्दिशम् ॥ ५६६ ॥

विष्कम्भायामतस्तच्च, कोदण्डानां शतद्वयम् । क्रोशद्वयेन सार्द्धेन, भवत्युच्चैर्महीतलात् ॥ ५६७ ॥

यदेकहस्तोत्तुङ्गानां, सोपानानां सहस्रकैः । विंशत्या क्रोशयोर्युग्मं, सार्द्धमेवोच्छ्रयो भवेत् ॥ ५६८ ॥

तच्च सिंहासनाधःस्थधरायाः पीठिकावधि । उच्छ्रयस्य भवेन्मानं, समश्रेणिविवक्षया ॥ ५६९ ॥

कर्णभूमिस्तु भगवत्सिंहासनस्य मूलतः । बाह्यसोपानमूलान्तं, रज्जुर्विस्तार्यते यदि ॥ ५७० ॥

अष्टौ चापसहस्राणि, द्विशताभ्यधिकानि तत् । भवन्त्येकस्तथा हस्तोऽङ्गुलानि च दशोपरि ॥ ५७१ ॥

जिनासनाद्बाह्यवप्रशीर्षावधि तु कर्णभूः । धनुषां षट् सहस्राणि, त्र्यधिका च चतुःशती ॥ ५७२ ॥

एकादशाङ्गुलान्येवं, सर्वतोऽपि विभाव्यताम् । लीलावत्युक्तरीत्या च, कार्या गणितभावना ॥ ५७३ ॥

---

१ सोपानानामूर्ध्वा पट्टिका स्यात् चेत् न विरोधः, यद्वोपर्यारुह्य किंचिदुत्तरणीयं स्यात् ।

मध्यदेशेऽस्य पीठस्य, स्यादशोकस्तरूत्तमः । विस्तीर्णशाखो नीरन्ध्रच्छायो योजनविस्तृतः ॥ ५७४ ॥

तत्तज्जिनवपुर्मानात्, स द्वादशगुणोन्नतः । शश्वत्पुष्पच्छत्रकेतुपताकातोरणादियुक् ॥ ५७५ ॥

अत्र समवसरणस्तोत्रावचूर्णिः– [श्लो. १०] "अस्य च जिनतनुद्वादशगुणोच्चस्य वप्रभित्तितो बहिर्निर्गमाभावेन योजनपृथुत्वं दुर्घटं, परमेतदुपरिस्थायितुङ्गतरसालवृक्षेण कृत्वाऽस्य योजनपृथुत्वं संभाव्यते ।

उक्तं च समवायाङ्गे–"चउवीसाए तित्थयराणं चउवीसं चेइयरुक्खा होत्था, तं जहा–निग्गोह १ सत्तवण्णे २ साले ३ पिअए ४ पिअंगु ५ छत्ताहे ६ । सरिसे ७ अ नागरुक्खे ८ माली य ९ पिलक्खुरुक्खे १० य ॥ तिंदुग ११ पाडल १२ जंबू १३ आसोत्थे १४ खलु तहेव दहिवन्ने १५ । नंदीरुक्खे १६ तिलए य १७ अंबरुक्खे १८ असोगे १९ य ॥ चंपय २० बउले य २१ तहा वेडसरुक्खे २२ तहेव धवरुक्खे २३ । साले य २४ वद्धमाणस्स चेइयरुक्खा जिणवराणं ॥

बत्तीसं धणुयाइं चेइयरुक्खो य वद्धमाणस्स । निच्चोउगो असोओ उच्छन्नो सालरुक्खेण ॥

तिन्नेव गाउआइं चेइयरुक्खो जिणस्स उसभस्स । सेसाण जिणाणं पुण सरीरओ बारसगुणोउ ॥

सच्छत्ता सपडागा सवेइया तोरणेहिं उववेया । असुरसुरगरुलमहिया चेइयरुक्खा जिणवराणं ॥

'चेइअरुक्खत्ति' चैत्यवृक्षा ज्ञानोत्पत्तिवृक्षाः, चतुर्थगाथायां 'बत्तीसं धणुआइंति' असोगवरपायवं जिणउच्चत्ताओ बारसगुणं विउव्वइ' इत्यावश्यकचूर्णिवचनात्सप्तहस्तमानाद्वीरस्वामिदेहाद् द्वादशगुणीकृतः सन् २१ धनूंषि भवत्यशोकः, तदुपरि ११ धनुर्मानः सालवृक्षश्च स्यात्, उभयोर्मीलने ३२ धनूंषि चैत्यद्रुमो वीरस्येति संप्रदायः,

तथा 'निच्चोउगो' नित्यं ऋतुरेव पुष्पादिकालोऽस्येति नित्यर्तुक इति समवसरणस्तवावचूर्णौ ।

अत्र श्रीवीरचैत्यवृक्षाशोकवृक्षयोः समुदितयोर्द्वात्रिंशद्धनुर्मानत्वमुक्तं । शेषाणामप्यर्हतां स्वस्वशरीरमानाद् द्वादशगुणत्वं चैत्यतरूणामूचे । तथापि पूर्वोक्तानुपपत्तिस्तदवस्थैव[1] । पञ्चधनुःशतोच्चाया वप्रभित्तेरुपरि भूत्वा तच्छाखानां बहिः प्रसरणस्य दुरुपपादत्वात् ।

जिनाङ्गानि हि उत्सेधाङ्गुलेन पञ्चधनुःशतादिमानानि स्युः, वप्रभित्तिस्तु वर्तमान जिनात्माङ्गुलेन पञ्चधनुःशतमानेत्यादि सम्यक् चिन्तनीयं, तेन यदि दिव्यानुभावाद्वप्रभित्तिमध्यभागेनाशोक-चैत्यवृक्षाणां शाखाः प्रथमवप्राद्बहिः प्रसर्पयुस्तदा किमनुपपन्नं स्यादित्यवधार्यं ।

अन्यथा वा यथाऽऽगमं परिभावनीयमिदमिति,

न्यग्रोधाद्या अमी ज्ञानोत्पत्तिवृक्षा यथायथम् । सर्वेषामर्हतां भाव्या, अशोकोपरिवर्तिनः ॥ ५७६ ॥

तस्याशोकस्य मूले च, देवच्छंदोऽर्हतां भवेत् । सिंहासनानि चत्वारि, तत्र च स्युश्चतुर्दिशं ॥ ५७७ ॥

---

१. शाखानिर्गमो न भवति यावत् तावत एवात्र विवक्षतत्वं, तेन योजनप्रमाणत्वे वप्रभित्तिबहिर्गमने न स्याद् घटना ।

तानि स्वर्णमयान्युच्चरत्नालीखचितानि च । जिनं द्रष्टुं क्लृप्तलक्षाक्षाणीवानेकहीरकैः ॥ ५७८ ॥
पुरश्चैकैकमुद्योतिरत्नज्योतिर्भरैर्लसत् । पादपीठं धृतोल्लासमिवार्हत्पदसंगमे ॥ ५७९ ॥
प्रतिसिंहासनं प्रौढच्छत्राणां स्यात्त्रयं त्रयम् । उपर्युपरिसंस्थायिमौक्तिकश्रेण्यलङ्कृतम् ॥ ५८० ॥

तथाहुः—"तवोर्ध्वमूर्ध्वं पुण्यर्द्धिक्रमसब्रह्मचारिणी । छत्रत्रयी त्रिभुवनप्रभुत्वप्रौढिशंसिनी ॥
[वीतरागस्तोत्र प्र. ५. श्लो. ८]

प्रतिसिंहासनं चन्द्रचारुचामरधारिणौ । सुरौ द्वौ द्वावुभयतः, सर्वालङ्कारभासुरौ ॥ ५८१ ॥
सिंहासनस्य पुरतः, सुवर्णकमलस्थितम् । चतुर्दिशं धर्मचक्रमेकैकं भानुजित्वरम् ॥ ५८२ ॥
तच्चार्हतां त्रिभुवनधर्मचक्रित्वसूचकम् । स्फुरज्ज्योतिः स्मृतमपि, प्रतिपक्षमदापहम् ॥ ५८३ ॥
सिंहासनं धर्मचक्रं, ध्वजश्छत्रं च चामराः । चरन्त्याकाशमार्गेण, क्षितौ विहरति प्रभौ ॥ ५८४ ॥

तथाहुः—"आगासगएणं चक्केणं, आगासगएणं छत्तेणं, आगासगएणं सपायपीढेणं सिंहासणेणं आगासगयाहिं सेअवरचामराहिं" इत्यादि ।

चतुर्दिशं च चत्वारः, सहस्रयोजनोच्छ्रिताः । घण्टालघुपताकादिमण्डिताः स्युर्महाध्वजाः ॥ ५८५ ॥
तत्र धर्मध्वजः प्राच्यां, याम्यां मानध्वजो भवेत् । गजध्वजः पश्चिमायामुदक् सिंहध्वजो महान् ॥ ५८६ ॥
यदत्र चापक्रोशादि, मानमुक्तं यथाऽऽस्पदम् । भवेत्तदत्राधिकृतजिनात्माङ्गुलमानतः ॥ ५८७ ॥

तदुक्तं—'सव्वं माणमिणं नियनियकरेणेति' । [समवसरण स्तव. श्लो. १३]

पीठं च चैत्यवृक्षं चासनं च छत्रचामरान् । सहैवच्छन्दकादीनि, कुर्वन्ति व्यन्तरामराः ॥ ५८८ ॥
साधारणेऽयं समवसरणे कथितो विधिः । सर्वमेकोऽप्यदः कुर्यात्कश्चिद्भक्त्या सुरो महान् ॥ ५८९ ॥
हर्षोत्कर्षात्सिंहनादं, तत्र कुर्वन्ति नाकिनः । समापतन्तः स्वर्गेभ्यो, वादयन्ति च दुन्दुभिम् ॥ ५९० ॥
तत्र सूर्योदये स्वामी, द्वयोः कनकपद्मयोः । क्रमेण स्थापयन्पादौ, सुरसंचार्यमाणयोः ॥ ५९१ ॥
अन्वीयमानः शेषैश्च, सप्तभिः स्वर्णपङ्कजैः । एवं निजपदन्यासकृतार्थितनवाम्बुजः ॥ ५९२ ॥
पूर्वद्वारेण समवसरणे प्रविशत्यथ । प्रदक्षिणीकृत्य पूर्वसिंहासने निषीदति ॥ ५९३ ॥
पादपीठन्यस्तपादः, कृततीर्थनमस्कृतिः । विधत्ते देशनां स्वामी, गम्भीरमधुरध्वनिः ॥ ५९४ ॥
तीर्थं नाम श्रुतज्ञानं, यद्वा सङ्घश्चतुर्विधः । आद्यो वा गणभृत्तेन, तीर्यते यद्भवाम्बुधिः ॥ ५९५ ॥

तथोक्तं—"तित्थं भंते ! तित्थं तित्थयरे, तित्थं ? गो० ! अरहा ताव नियमा तित्थयरे, तित्थं पुण चाउव्वण्णो संघो पढमगणहरो वेति" भगवतीसूत्रे ।

अर्हत्तैतत्पूर्विका यत्तथा पूजितपूजकः । लोकोऽप्यर्हत्पूजितत्वात्पूजयेत्तीर्थमादरात् ॥ ५९६ ॥
ततस्तीर्थं नमत्यर्हन्, कृतकृत्योऽपि वा यथा । धर्मं कथयति स्वामी, तथा तीर्थं नमस्यति ॥ ५९७ ॥

तथाहुः श्रीभद्रबाहुस्वामिपादाः—"तप्पुव्विया अरहया पूइयपूआ य विणयकम्मं च । कयकिच्चोवि जह कहं कहए णमए तहा तित्थं ॥" अस्य वृत्तौ—"तीर्थं श्रुतज्ञानं तत्पूर्विकाऽर्हत्ता, तदभ्यासप्राप्तेरिति ।" [आवश्यकनिर्युक्ति श्लो. ५६७]

वक्ष्यमाणैर्गुणैः पञ्चत्रिंशताऽलङ्कृता सदा । व्याप्नोत्यायोजनं वाणी, सर्वभाषानुगा प्रभोः ॥ ५९८ ॥

तथाहुः श्रीहेमसूरयः काव्यानुशासने— "अकृत्रिमस्वादुपदां, परमार्थाभिधायिनीम् । सर्वभाषापरिणतां, जैनीं वाचमुपास्महे" ॥ तथा—"देवा देवीं नरा नारीं, शबराश्चापि शाबरीम् । तिर्यञ्चोऽपि च तैरश्चीं, मेनिरे भगवद्गिरम् ॥ [श्लोक - १]

यथा जलधरस्याम्भ, आश्रयाणां विशेषतः । नानारसं भवत्येवं, वाणी भगवतामपि ॥ ५९९ ॥
स्यात्प्रभोर्मूलभाषा च, स्वभावादर्द्धमागधी । स्यातां द्वे लक्षणे ह्यस्यां, मागध्याः प्राकृतस्य च ॥ ६०० ॥
येनैकेनैव वचसा, भूयसामपि संशयाः । छिद्यन्ते वक्ति तत्सार्वो, ज्ञाताशेषवचोविधिः ॥ ६०१ ॥
क्रमच्छेदे संशयानामसंख्यत्वाद्वपुष्मताम् । असंख्येनापि कालेन, भवेत्कथमनुग्रहः ? ॥ ६०२ ॥
शब्दशक्तेर्विचित्रत्वात्संतीदृंशि वचांसि च । प्रयुक्तैरुत्तरं यत्स्याद्युगपद्भूयसामपि ॥ ६०३ ॥
सरःशस्वरार्थेन, भिल्लेन युगपद्यथा । सरो नत्थि त्ति वाक्येन, प्रियास्तिस्रोऽपि बोधिताः ॥ ६०४ ॥

तथोक्तं—"भिल्लस्स तिन्नि भज्जा एगा मग्गेइ पाणियं पाहि । बीया मग्गइ हरिणं तइया गवरावए गीयं" ॥

प्रष्टुमाकाङ्क्षितो योऽर्थः, प्राक् संदिग्धश्च यो भवेत् । येन वा यस्य वैराग्यं, यो वा यस्यावबोधकृत् ॥ ६०५ ॥
सर्वोऽपि लोकः प्रत्येकं, तमर्थमवबुध्यते । अर्हदुच्चारितादेकवाक्यादप्यतिशायिनः ॥ ६०६ ॥
अविच्छेदेन भगवान्, विधत्ते देशनां यदि । तदा नोद्विजते श्रोता, यावज्जीवमहर्निशम् ॥ ६०७ ॥
न क्षुत्तृष्णा न च व्याधिः, काचिदाधिश्च न स्पृशेत् । शृण्वतो भगवद्वाणीं, सकलानपि देहिनः ॥ ६०८ ॥
माधुर्यं भगवद्वाण्या, वाचां यद्यप्यगोचरम् । तथापि सौख्यवन्मुक्तेरौपम्येन निरूप्यते ॥ ६०९ ॥
यथाऽऽसीद्वणिजः कोऽपि, मितंपचशिरोमणिः । आतृप्तिं नात्मनाऽप्याद, योऽन्नं लोभ इवाङ्गभृत् ॥ ६१० ॥
अन्नं नाजीर्यदन्येषां, यस्मिन् पश्यति भक्षितम् । यः सिक्थाशङ्कया पश्यन्, स्थालीक्षालनवार्यपि ॥ ६११ ॥
लिहति स्व स्वयं स्थालीं, योऽसकृत्पाणिना भृशम् । काका वराकाः श्वानो वा, किं लिहेयुस्तदङ्गणे ? ॥ ६१२ ॥
जना नोच्चारयन्ति स्मावश्यकेऽपि प्रयोजने । यन्नाम जातूक्ते त्विष्टदेवान् श्रेयोऽर्थमस्मरन् ॥ ६१३ ॥
भार्या तस्यानुरूपाऽऽसीद्या शुनीव वनीपकम् । दूरादपि क्षोभयति, दुर्वाक् तृष्णेव जङ्गमा ॥ ६१४ ॥
आसीद्दासी च तस्यैका, जरती गरतीव्ररुक् । क्षुज्जराजर्जरा दीना, कृशा मूर्तेव दुर्दशा ॥ ६१५ ॥
प्रातः स्माह वणिक्पत्नी, तां रण्डे ! याहि काननम् । एधांस्याहर भूयांसि, न दास्याम्यन्यथाऽशनम् ॥ ६१६ ॥
प्रतिपद्य वचस्तस्याः, क्षीणोपायाश्रयाऽगमत् । वनं शनैः शनैर्यष्टिमवष्टभ्य सुतामिव ॥ ६१७ ॥

तत्रान्यच्छिन्नकाष्टानां, शिलोञ्छं छेदनाक्षमा । संगृह्य श्रेष्ठिनीतुष्ट्यै, सामर्थ्याधिकवीवधम् ॥ ६१८ ॥
कृत्वा शिरसि तृट्तापक्षुत्खेदस्वेदविह्वला । पुरस्तस्या ढौकयित्वा, दैन्यादन्नं ययाच ताम् ॥ ६१९ ॥
निस्त्रिंशा निस्त्रपा सैवं, तामभाषिष्ट दुष्टधीः । अल्पीयांसि किमेधांसि, रे रे रण्डे त्वमाहरः ? ॥ ६२० ॥
काष्टैः प्रज्वाल्यते क्षुद्रैर्नैतावद्भिर्भवत्यपि । गृहं मे भक्षितं सर्वं, रेऽकिञ्चित्करया त्वया ॥ ६२१ ॥
जरत्युवाच हे मातर्दीनायां मयि मा कुपः । भक्ष्यमुद्धरितं किञ्चिद्यच्छ क्षुत्पीडिताऽस्म्यहम् ॥ ६२२ ॥
पुनरप्याहरिष्यामि, स्वस्थीभूय क्षणान्तरे । शरणं निःशरण्यायास्त्वमेवासि ममाम्बिके ! ॥ ६२३ ॥
सा प्रोचे जनकास्थीनि, खाद प्रश्रवणं पिब । मृत्वा स्वस्था भवाद्यापि, म्रियसे किं न दुर्भरे ? ॥ ६२४ ॥
आनीतेभ्यश्चतुर्ष्वेषु, पुनरप्याहृतेषु रे । काष्ठेषु तुभ्यं दास्यामि, भक्ष्यं तद्गच्छ सत्वरम् ॥ ६२५ ॥
तथैव गत्वा साऽरण्ये, काष्ठभारं चतुर्गुणम् । कष्टेन महतोच्चित्य, निदधौ मूर्ध्नि दुर्वहम् ॥ ६२६ ॥
प्रस्फुटद्धृदया श्वासैरारोहंतीव भूधरम् । उत्फुल्लगल्लप्रसरत्फूत्कारा भुजगीव च ॥ ६२७ ॥
स्नातेव क्लिन्नसर्वाङ्गचीवरा स्वेदनिर्झरैः । पीतमद्येव निश्चेष्टा, प्रपतन्ती पदे पदे ॥ ६२८ ॥
पतन्तमप्यादधती, भारं मूर्ध्नि पुनः पुनः । रुष्टाऽभीष्टमिवानिष्टमपि वेश्येव गर्द्धना ॥ ६२९ ॥
प्राप्तपाताऽप्यवष्टब्धा, यष्ट्या जीर्णकुटीव सा । प्रकम्पमानसर्वाङ्गोत्पन्नशीतज्वरेव च ॥ ६३० ॥
विविक्षुरिव भूम्यन्तर्न्यग्भूता भूरिभारतः । मृत्युं संभाषमाणेव, हृदि न्यस्तकरा मुहुः ॥ ६३१ ॥
क्षुत्क्षीणजठरस्थित्वक्शेषाऽशेषाऽसुखाश्रिता । समन्ताद्विश्लथा शुष्कशमीवाऽऽततकोटरा ॥ ६३२ ॥
असकृद्रसनालीढसृक्का शुष्कगलाधरा । दन्तशून्याऽऽस्यविगलल्लालाक्षिक्षरदश्रुका ॥ ६३३ ॥
क्षणे क्षणे स्मरन्ती तं, वणिक्पत्न्याः पराभवम् । भक्ष्यं दास्यति सा नो वेत्येवं चिन्ताऽग्निचुम्बिता ॥ ६३४ ॥
अनन्यगतिकत्वेनागच्छन्ती मन्दिरं प्रति । यावत्साऽऽयाति समवसरणस्यान्तिके प्रभोः ॥ ६३५ ॥
तावत्कण्टकमुद्धर्त्तुं सोच्चिक्षेप निजं क्रमम् । न्यास्थत् पाणिं च तत्र स्वं, तदा तत्कर्णकोटरे ॥ ६३६ ॥
प्रविवेशार्हतां वाणी, पीयूषद्रवपेशला । शुश्राव सैकचित्ता तां, विस्मृताखिलवेदना ॥ ६३७ ॥
दिशत्यब्दसहस्राणि, भगवान् देशनां यदि । तस्याश्च तावदायुश्चेत्तर्हि साऽवस्थिता तथा ॥ ६३८ ॥
शृणोत्येवोदूढभारा, पादं न्यस्यति न क्षितौ । न स्मरेत्क्षुत्तृडाद्यर्त्तिं नाप्युद्धरति कण्टकम् ॥ ६३९ ॥
ईदृग्रसाया भगवद्वाण्याः स्वाभाविकानिह । पञ्चत्रिंशतमित्याहुर्गुणान् श्रीहेमसूरयः ॥ ६४० ॥

"संस्कारवत्त्व १ मौदात्त्व २ मुपचारपरीतता ३ । मेघगम्भीरघोषत्वं ४ प्रतिनादविधायिता ५ ॥
दक्षिणत्व ६ मुपनीतरागत्वं च ७ महार्थता ८ । अव्याहतत्वं ९ शिष्टत्वं १० संशयानामसंभवः ११॥
निराकृतान्योत्तरत्वं १२ हृदयङ्गमताऽपि च १३ । मिथः साकाङ्क्षता १४ प्रस्तावौचित्यं १५
तत्त्वनिष्ठता १६ ॥ अप्रकीर्णप्रसृतत्व १७ मस्वश्लाघान्यनिन्दिता १८ । आभिजात्य १९

मतिस्निग्धमधुरत्वं २० प्रशस्यता २१ ॥ अमर्मवेधितौ २२ दार्यं २३ धर्मार्थप्रतिबद्धता २४ । कारकाद्यविपर्यासो २५ विभ्रमादिवियुक्तता ॥ २६ ॥ चित्रकृत्त्व २७ मद्भुतत्वं २८ तथानतिविलम्बिता २९ । अनेकजातिवैचित्र्य ३० भारोपितविशेषता ३१ ॥ सत्वप्रधानता ३२ वर्णपदवाक्यविविक्तता ३३ । अव्युच्छित्ति ३४ रखेदित्वं ३५ पञ्चत्रिंशच्च वाग्गुणाः ॥

[अभिधान चिन्तामणिः श्लोक ६५ थी ७१]

अथार्हन्नीदृशा वाण्या, धर्मं पञ्चमहाव्रतम् । साधूनां श्रावकाणां च, दिशति द्वादशव्रतम् ॥ ६४१ ॥
अहिंसासुनृतास्तेयब्रह्मचर्यापरिग्रहाः । महाव्रतानि पञ्चेति, निग्रन्थानां महात्मनाम् ॥ ६४२ ॥
केचित्कालविशेषेण, चत्वार्येवादिशन्ति च । महाव्रतानि स्त्रीत्यागसंग्रहो ह्यपरिग्रहे ॥ ६४३ ॥
अणुव्रतानि पञ्चादौ, त्रीणि गुणव्रतानि च । शिक्षाव्रतानि चत्वारि, व्रतानि गृहिणामिति ॥ ६४४ ॥
संकल्प्य त्रसजीवानां, निरपेक्षान्निरागसाम् । प्राणघातान्निवृत्तिर्या, प्रथमं तदणुव्रतम् ॥ ६४५ ॥
कन्यागोभूम्यलीकेभ्यो, न्यासापहरणाच्च या । निवृत्तिः कूटसाक्ष्याच्च, द्वितीयं तदणुव्रतम् ॥ ६४६ ॥
सन्धिग्रन्थ्यादिभेदाद्यै, राजनिग्रहकारि यत् । चौर्यं तस्मान्निवृत्तिर्या, तृतीयं तदणुव्रतम् ॥ ६४७ ॥
स्वदारैरेव संतुष्टिः, स्वीकृतैर्जनसाक्षिकम् । निवृत्तिर्वाऽन्यदारेभ्यश्चतुर्थं तदणुव्रतम् ॥ ६४८ ॥
परिग्रहस्य सत्तेच्छापरिमाणान्नियन्त्रणा । परिग्रहपरिमाणं, पञ्चमं तदणुव्रतम् ॥ ६४९ ॥
सीमा नोल्लङ्घ्यते यत्र, कृता दिक्षु दशस्वपि । ख्यातं दिक्परिमाणाख्यं, प्रथमं तद्गुणव्रतम् ॥ ६५० ॥
भोगोपभोगद्रव्याणां, मानमाजन्म चान्वहम् । क्रियते यत्र तद्भोगोपभोगविरतिर्व्रतम् ॥ ६५१ ॥

तत्र च–

सकृदेव भुज्यते यः, स भोगोऽन्नस्रगादिकः । पुनः पुनः पुनर्भोग्य, उपभोगोऽङ्गनादिकः ॥

[योगशास्त्र प्र. ३. श्लो. ५]

द्वाविंशतेरभक्ष्याणामनन्तकायिनामपि । यावज्जीवं परीहारः, कीर्त्यतेऽस्मिन् व्रते जिनैः ॥ ६५२ ॥

तथाहुः–"पञ्चुंबरि चउविगई हिम विस करगा य सव्वमट्टीय । रयणीभोयणगं चिय बहुबीअं अणंत संघाणं ॥ घोलवडां वायंगण अमुणियनामाणि फुल्लफलयाणि । तुच्छफलं चलिअरसं वज्जेह अभक्ख बावीसं" ॥ [प्रवचनसारोद्धार द्वार ४. श्लोक २४५, २४६]

उदुम्बरवटप्लक्षकाकोदुम्बरशाखिनाम् । पिप्पलस्य चेत्यभक्ष्यमार्याणां फलपञ्चकम् ॥ ६५३ ॥
मद्यं १ मांसं २ नवीनतं क्षौद्रं चेति ४ चतुष्टयम् । विकृतीनामभक्ष्यं स्याच्छ्रद्धालूनां शुभात्मनाम् ॥ ६५४ ॥
द्विदलान्नं पर्युषितं, शाकपूपादिकं च यत् । दध्यहर्द्वितयातीतं, क्वथितान्नफलादिकम् ॥ ६५५ ॥
वर्षासु पक्षात्परतः, शीततौ मासतः परम् । पक्वान्नं विंशतिदिनातिक्रमे ग्रीष्म एव च ॥ ६५६ ॥
इत्याद्यभक्ष्यं चलितरसमुक्तं जिनेश्वरैः । द्वीन्द्रियत्रसजीवानां, यदुत्पत्तिर्भवेदिह ॥ ६५७ ॥

शेषाण्यभक्ष्याणि प्रतीतानि, अनन्तकायनामानि प्रागुक्तान्येव.

पापोपदेशो विविधः १, पापोपकरणार्पणम् २ । आर्त्तरौद्राभिधे ध्याने ३, प्रमादाचरणं ४ तथा ॥ ६५८ ॥

चतुर्भेदादित्यनर्थदण्डाद्यद्विनिवर्त्तनम् । श्रावकाणां तदाख्यातं, तार्त्तीयीकं गुणव्रतम् ॥ ६५९ ॥
विषयाश्च कषायाश्च, निद्रा च विकथापि च । मद्यं चेति परित्याज्याः, प्रमादाः पञ्च सात्त्विकैः ॥ ६६० ॥
राज्ञां स्त्रीणां च देशानां, भक्तानां विविधाः कथाः । संग्रामरूपसद्धस्तुस्वादाद्या विकथाः स्मृताः ॥ ६६१ ॥
मुहूर्त्तावधि सावद्यव्यापारपरिवर्जनम् । आद्यं शिक्षाव्रतं सामायिकं स्यात्समताजुषाम् ॥ ६६२ ॥
देशावकाशिकं नाम, दिक्संक्षेपो दिनं प्रति । चतुर्दशानां संक्षेपो, नियमानामुतान्वहम् ॥ ६६३ ॥

ते चामी–"सचित्त दव्व विगई वाणह तंबोल वत्थ कुसुमेसु । वाहण सयण विलेवण –बंभ दिसि न्हाण भत्तेसु" ॥ [श्रावकातिचार सप्तमस्थूल]

पोषं धर्मस्य धत्ते यत्तद्भवेत्पौषधव्रतम् । आहार १ देहसत्कारा २–ब्रह्म ३ व्यापार ४ वर्जनम् ॥ ६६४ ॥
चतुर्विधः स्यादाहारोऽशनं तत्रौदनादिकम् । पानं सुराऽखिलं चाम्बु, सौवीरप्रभृतीन्यपि ॥ ६६५ ॥
खादिमं भृष्टधान्यानि, द्राक्षादीनि फलान्यपि । स्वादिमं तु लवङ्गैलापूगजातीफलादिकम् ॥ ६६६ ॥
कृते चतुर्विधाहारत्याग आहारपौषधः । सर्वतः स्यान्निर्विकृत्या चाचाम्लादौ तु देशतः ॥ ७६७ ॥
एवमन्येऽपि त्रयः स्युर्देशसर्वत्वयोर्द्विधा । आद्य एव हि भेदे तद्व्यवहारस्तु साम्प्रतम् ॥ ६६८ ॥
सदा क्वचिद्वा दिवसे, साधूनां दानपूर्वकम् । भुज्यते यत्तदतिथिसंविभागाभिधं व्रतम् ॥ ६६९ ॥
महाव्रतापेक्षयाद्यपञ्चव्रत्यां मताऽणुता । तद्गुणाधायकत्वेन, गुणता चोत्तरत्रये ॥ ६७० ॥
मुहुर्मुर्वादिशिक्षावन्निषेव्याणि यथोचितम् । शिक्षावत्वमन्त्येषु, चतुर्ष्विति मतं जिनैः ॥ ६७१ ॥

अन्यत्र तु अन्त्यानि सप्तापि शिक्षाव्रतान्युच्यन्ते ।

तथोक्तं–'पञ्चाणुव्वइयं सत्तसिक्खावइयं दुवालसविहं' इत्यादि विपाकसूत्रे सुबाहुधिकारे ।

तथा–तत्वानि सप्त नव वा, धर्माद्यर्थांश्च षड् ध्रुवान् । दानादिकं चतुर्द्धा च, धर्ममादिशति प्रभुः ॥ ६७२ ॥

तथोक्तं–दानशीलतपोभावभेदाद्धर्मं चतुर्विधम् । मन्ये युगपदाख्यातुं, चतुर्वक्त्रोऽभवद्भवान् ॥

[वितरागस्तोत्र प्र. ४. श्लो. ४]

यथाऽसुमन्तो बुद्ध्यन्ते मुच्यन्तेऽपि च कर्मभिः । यथा च यान्ति निर्वाणं, स्वामी सर्वं तथाऽऽदिशेत् ॥ ६७३ ॥
यथाऽऽदिशति पूर्णस्य, तुच्छस्यापि तथैव सः । निःस्पृहः समचित्तश्च, चक्रवर्त्तिदरिद्रयोः ॥ ६७४ ॥

पूर्णतुच्छस्वरूपं चैवमाचाराङ्गवृत्तौ—ज्ञानैश्वर्यधनोपेतो, जात्यन्वयबलान्वितः । तेजस्वी मतिमान् ख्यातः, पूर्णस्तुच्छो विपर्ययात् ॥ स्वयं कृतार्थोऽप्यन्येषां, हितार्थं धर्ममादिशन् । लोकेषु षड्विधेष्वेष, उत्तमोत्तम उच्यते ॥

तथाहुः श्रीउमास्वातिवाचकपादाः— "कर्माहितमिह चामुत्र चाधमतमो नरः समारभते । इह फलमेव त्वधमो विमध्यमस्तूभयफलार्थम् ॥ परलोकहितायैव प्रवर्त्तते मध्यमः क्रियासु सदा । मोक्षायैव तु घटते विशिष्टमतिरुत्तमः पुरुषः ॥ यस्तु कृतार्थोऽप्युत्तममवाप्य धर्मं परेभ्य उपदिशति । नित्यं स उत्तमेभ्योऽप्युत्तम इति पूज्यतम एव ॥ तस्मादर्हति पूजामर्हन्नेवोत्तमोत्तमो लोके ।

देवर्षिनरेन्द्रभ्यः पूज्येभ्योऽप्यन्यसत्वानाम् ॥ [तत्त्वार्थभाष्यगतकारिका. श्लो. ४, ५, ६, ७] कदापि
निष्फला नैषां, देशना जायतेऽर्हताम् । लाभाभावेऽमूढलक्ष्याः प्रवर्त्तेरन्न ते यतः" ॥

सामायिकं स्यात्सम्यक्त्वं, श्रुतसामायिकं तथा । सामायिके द्वे विरती, देशतः सर्वतोऽपि ये ॥ ६७५ ॥

सामायिकस्वरूपं चैवमाहुः— "सावज्जजोगविरओ, तिगुत्तो छसु संजओ । उवउत्तो जयमाणो,
आया सामाइयं होइ ॥ तथा जो समो सव्वभूएसु, तसेसु थावरेसु य । तस्स सामाइयं होइ,
इह केवलिभासिअं" ॥ [आवश्यकनिर्युक्ति श्लो. ७९० नी टीकान्तर्गत श्लो. (मू.भा. १४९)]

सामायिकानि चत्वारि, त्रीणि द्वे एवमेव वा । निश्चयात्प्रतिपद्यन्ते, नरतिर्यक्सुधाशिषु ॥ ६७६ ॥
चत्वारि प्रतिपद्यन्ते, नरा एवादितस्त्रयम् । तिर्यञ्चस्त्वमराश्च द्वे, अन्तिमासम्भवात्क्रमात् ॥ ६७७ ॥
पूर्वं प्रपन्नसम्यक्त्वो, देशतः सर्वतोऽथवा । विरतिं चेल्लभेत स्यात्तदा ह्येकाप्तिसंभवः ॥ ६७८ ॥
सामायिकस्य कस्यापि, प्रतिपत्ता भवेन्न चेत् । नृषु तिर्यक्षु वा कश्चित्तदाऽवश्यं सुधाशिषु ॥ ६७९ ॥
कश्चित्प्रक्षीणमिथ्यात्वः, सम्यक्त्वं प्रतिपद्यते । अर्हद्गिरामन्वध्यत्वादसंख्यत्वाच्च नाकिनाम् ॥ ६८० ॥
तत्र ये सर्वविरतिं, प्रपद्यन्ते नराः स्त्रियः । प्रव्राजयति तान्नाथः, शिक्षयन् सकलां विधिम् ॥ ६८१ ॥
गन्तव्यमेवं स्थातव्यं, भोक्तव्यं विधिनाऽमुना । वक्तव्यं भाषयैवं च, यथा धर्मो न सीदति ॥ ६८२ ॥
याश्च चारित्रपुत्रस्य, मातरोऽष्टौ भवन्त्यमूः । सम्यगाराधनीयास्ता, मोक्षाकाङ्क्षिमुमुक्षुभिः ॥ ६८३ ॥
युगमात्रावलोकिन्या, दृष्ट्या सूर्यांशुभासितम् । विलोक्य मार्गं गन्तव्यमितीर्यासमितिर्भवेत् ॥ ६८४ ॥
हितं यत्सर्वजीवानां, निरवद्यं मितं वचः । तद्धर्महेतोर्वक्तव्यं, भाषासमितिरित्यसौ ॥ ६८५ ॥

तदुक्तं—"सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् । प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः" ॥

सप्तचत्वारिंशता यद्दोषैरशनमुज्झितम् । भोक्तव्यं धर्मयात्रायै, सैषणासमितिर्भवेत् ॥ ६८६ ॥
ग्राह्यं मोच्यं च धर्मोपकरणं प्रत्युपेक्ष्य यत् । प्रमार्ज्य चेयमादाननिक्षेपसमितिः स्मृता ॥ ६८७ ॥
निर्जीवेऽशुषिरे देशे, प्रत्युप्रेक्ष्य प्रमार्ज्य च । यत्त्यागो मलमूत्रादेः, सोत्सर्गसमितिः स्मृता ॥ ६८८ ॥
कल्पनाजालनिर्मुक्तं, समभावेन पावनम् । मुनीनां यन्मनःस्थैर्यं, मनोगुप्तिर्भवत्यसौ ॥ ६८९ ॥
मौनावलम्बनं साधोः, संज्ञादिपरिहारतः । वाग्वृत्तेर्वा निरोधो यः, सा वाग्गुप्तिरिहोदिता ॥ ६९० ॥
स्थितस्य कायोत्सर्गादावुपसर्गजुषोऽपि यत् । स्थैर्यं धैर्येण कायस्य, कायगुप्तिरियं मता ॥ ६९१ ॥
शय्यासनोर्ध्वस्थानादौ, कायचेष्टा नियम्यते । साधुभिर्धर्मबुद्ध्या यत्कायगुप्तिस्तु साऽपरा ॥ ६९२ ॥
एता एव द्वादशाङ्ग्याः, सारो धर्मस्य साधनम् । ततो युष्माभिरेतासु, यत्नः कार्यो मुहुर्मुहुः ॥ ६९३ ॥
आदिश्यैवं साधुसाध्वीश्रावकश्राविका इति । प्रभुश्चतुर्विधं सङ्घं, स्थापयेत्तीर्थमद्भुतम् ॥ ६९४ ॥
तत्र च—साधवः स्युः पात्रगुच्छरजोहरणधारिणः । येऽष्टादशसहस्राणि, शीलाङ्गानां च बिभ्रते ॥ ६९५ ॥

तानि चैवमाहुः– "जे नो करिंति मणसा निज्जिअआहारसन्नसोइंदी । पुढविक्कायारंभं खंतिजुआ ते मुणी वंदे" ॥

पृथ्व्यम्बुवह्निमरुतामारम्भाः स्युर्वनस्पतेः । द्वित्रिचतुःपञ्चखानामजीवस्येत्यमी दश ॥ ६९६ ॥
क्षमाऽऽर्जवं मार्दवं च, मुक्तिस्तपश्च संयमः । साधोर्धर्मा दश ब्रह्मसत्यशौचापरिग्रहाः ॥ ६९७ ॥
भवन्ति दश शीलाङ्गान्यधःस्थैर्दशभिः पदैः । क्षमादिभिः साधुधर्मवाचिभिः परिवर्त्तितैः ॥ ६९८ ॥
शतं दशभिरारम्भपदैः स्युः परिवर्त्तितैः । प्रत्येकमारम्भपदे, पूर्वोक्तदशकान्वयात् ॥ ६९९ ॥
शतं शतानि पञ्च स्युः पदैरिन्द्रियवाचिभिः । सहस्रद्वितीय तेषां, चतुःसंज्ञापदान्वयात् ॥ ७०० ॥
मनोवाक्कायगोगेन, षट् सहस्रा भवन्ति ते । अष्टादश सहस्रश्च, करणादित्रयान्विताः ॥ ७०१ ॥
नष्टोद्दिष्टविधिं चात्र, वक्ष्ये येनाप्यते द्रुतम् । अङ्कद्विवक्षितं रूपं, रूपाच्चांको विवक्षितः ॥ ७०२ ॥
त्रिकं त्रिकं चतुष्कं च, पञ्चकं द्विर्दश न्यसेत् । भाजकानां ध्रुवाङ्कानामियं भवति पद्धतिः ॥ ७०३ ॥
अङ्करार्शिं परिपृष्टं, प्रथमं दशभिर्भजेत् । लब्धं भूयोऽपि दशभिर्लब्धं तत्रापि पञ्चभिः ॥ ७०४ ॥
चतुस्त्रित्रिभिरेवं च, लब्धं लब्धं विभज्यते । सर्वत्र भागशेषं स्वभाजकस्य लिखेदधः ॥ ७०५ ॥
भाजकेन हृते राशौ, यदि किञ्चिन्न शिष्यते । तदा तद्भाजकस्याधः, शून्यं स्थाप्यमिति स्थितिः ॥ ७०६ ॥
किंच–यदा राशौ भज्यमाने, किञ्चिदप्यवशिष्यते । सैकं कार्यं तदा लब्धं, निःशेषे तु न तत्तथा ॥ ७०७ ॥
यथा–मितं चतुर्भिर्नवकै, रूपं भवति कीदृशम् । शीलाङ्गनां ? तत्र राशिं, यथोक्तं दशभिर्भजेत् ॥ ७०८ ॥
लब्धा नवनवत्याढ्याः, शता नव नवोपरि । शिष्यन्ते ते च सर्वान्त्यदशकस्य लिखेदधः ॥ ७०९ ॥
भागशेषतया राशेर्लब्धं सैकं विधीयते । सहस्रं जायते तच्च, दशभिः प्रविभज्यते ॥ ७१० ॥
लब्धं शतं भागशेषाभावाच्छून्यं निवेश्यते । उपान्त्यदशकस्याधः, सर्वत्रैवं विधीयताम् ॥ ७११ ॥
शते च पञ्चभिर्भक्ते, विंशतिः प्राप्यतेऽथ सा । चतुर्भिर्भज्यते लब्धाः, पञ्च तांश्च त्रिभिर्भजेत् ॥ ७१२ ॥
लब्ध एको द्वयं शिष्टं, लिख्यतेऽधस्त्रिकस्य तत् । लब्ध एकोऽपि सैकस्तल्लेख्य आद्यत्रिकादधः ॥ ७१३ ॥
३/२ ३/२ ४/० ५/० १०/० १०/९
आदौ द्विकद्वयं शून्यत्रयं नवक एव च । शीलाङ्गरूपमित्यूह्यं, चतुर्भिर्नवकैर्मितम् ॥ ७१४ ॥
पदसंख्योह्यतामङ्कैर्यथास्थानं पदानि च । स्वस्वपङ्क्तेः पदं सर्वान्तिमं शून्यैश्च भाव्यताम् ॥ ७१५ ॥

तद्रूपं चैवं– "जे कारिंति न वयसा निज्जिअपरिग्गहसन्नसोइंदी । अजिआणं आरंभं अकिंचणा ते मुणी वंदे" ॥

अथ द्विकद्वयं शून्यत्रयं नवक एव च । कथितं रूपमित्येवं, पृष्टे विधिरिहोच्यते ॥ ७१६ ॥
पूर्वोक्तभाजकाङ्कानामधःपृष्टाङ्कपङ्क्तिका । क्रमेण लिख्यते सा च, स्थापना प्राक् प्रदर्शिता ॥ ७१७ ॥

द्वितीयोऽङ्कोऽथोर्ध्वपङ्क्तेरधःस्थपङ्क्तिवर्त्तिना । गुण्यते प्रथमाङ्केन, जातं यत्तदधो लिखेत् ॥ ७१८ ॥
ऊर्ध्वपङ्क्तिगताङ्कस्य, गुणितस्यास्य चेदधः । भवत्यङ्कः कोऽपि तर्हि, राशिमेनं निरेकयेत् ॥ ७१९ ॥
अधःपङ्क्तौ च शून्यं चेत्तस्याङ्कस्य भवेदधः । राशिस्तदा तथावस्थः, स्थाप्य इत्यग्रतोऽपि च ॥ ७२० ॥
यथा पूर्वस्थापनायामूर्द्ध्वस्थपङ्क्तिगस्त्रिकः । आद्यं मुक्त्वा द्वितीयो यः, स चाधःपङ्क्तिवर्त्तिना ॥ ७२१ ॥
द्विकेनाद्येन गुणितो, जाताः षट् ते निरेककाः । पञ्च जाताश्चतुर्ज्ञास्ते, विंशतिस्ते च पञ्चभिः ॥ ७२२ ॥
ताडिताः स्युः शतं ते च, सहस्रं दशभिर्हताः । दशघ्नास्तेऽप्येकहीनाश्चत्वारो नवकाः स्थिताः ॥ ७२३ ॥
ततश्चायं भावः—
सहस्राणि नव नवत्यधिकाश्च शता नव । एषां शीलाङ्गरूपाणामन्त्यं रूपं यथोदितम् ॥ ७२४ ॥
आभिश्च पङ्क्तिभिः षड्भिः, स्थापिताभिरधः क्रमात् । स्याद्रथस्याकृतिस्तस्माच्छीलाङ्गस्थ उच्यते ॥ ७२५ ॥
अन्येऽपि संति भूयांसः, सामाचार्यादयो रथाः । ज्ञेयास्तेऽप्यनया रीत्या, नात्रोक्ता विस्तृतेर्भयात् ॥ ७२६ ॥

मणगुत्तो सन्नाणी पसमिअकोहो अ इरिअसमिओ अ । पुढविजीए रक्खंतो इच्छाकारी नमो तस्स ॥ इच्छा मिच्छा तहक्कारो आवसिआ अ निसीहिआ । आपुच्छा पडिपुच्छा छंदनिमंतोवसंपया ॥ इति दिक् ।

गुणैरनेकैरित्याद्यैः, प्रथिताः पृथुबुद्धयः । साधुसाध्व्यो भवेत्तेषां, जिनेन्द्राणां परिच्छदः ॥ ७२७ ॥
श्रावकाणां तु भेदौ द्वावष्टौ द्वात्रिंशदेव च । सप्तत्रिंशाः शताः सप्त, स्थूलभेदविवक्षया ॥ ७२८ ॥
सम्यक्त्वं बिभ्रते केचित्तुद्युक्तां विरतिं परे । द्विधा श्राद्धा अविरता, विरताविरता इति ॥ ७२९ ॥
अणुव्रतानि पञ्चापि षड्भिरुच्चारभङ्गकैः । पृथक् पृथक् स्वीकृतानि, यैस्तेषां षड् भिदोऽभवन् ॥ ७३० ॥
प्रतिपन्नोत्तरगुणव्रतः केवलदर्शनः । इति द्वयान्विता एते, षडित्यष्टौ भिदोऽभवन् ॥ ७३१ ॥
एवं सर्वत्राप्यग्रे भाव्यं ।
द्विविधत्रिविधं प्रोक्तं १ द्विविधद्विविधं २ तथा । द्विविधैकविधं ३ चैकविधत्रिविधमेव च ४ ॥ ७३२ ॥
एकविधद्विविधं ५ चैकविधैकविधं ६ तथा । श्राद्धानां षडमी प्रोक्ता, व्रतोच्चारणभङ्गकाः ॥ ७३३ ॥
न करोमि स्वयं नान्यैः, कारयामि च पातकम् । स्थूलहिंसादि मनसा, वाचाङ्गेनाद्यभङ्गके ॥ ७३४ ॥
एवमन्येऽपि भङ्गका भाव्याः
षट्स्वप्येतेष्वनुमतिर्गृहस्थैर्न निषिध्यते । एषामनुमतिप्राप्तेः, स्त्रीपुत्रादिकृतेष्वपि ॥ ७३५ ॥
अन्यथा हि सर्वदेशविरत्योर्न भिदा भवेत् । त्रिविधं त्रिविधेनेति, भङ्गको गृहिणां न तत् ॥ ७३६ ॥
एषामुत्तरभङ्गास्तु, जायन्त एकविंशतिः । ते चैवमस्याः षड्भङ्ग्याः, प्रतिभेदावबोधकाः ॥ ७३७ ॥
स्थाप्या अधस्तादेष्वङ्काः, क्रमात्कोष्टेषु षट्स्वपि । एकको द्वौ त्रिकावेको, द्विकः षट्कद्वयं ततः ॥ ७३८ ॥

अयं भावः—

भङ्गे यथोक्त एवाद्ये, कोष्ठे नात्रान्यसंभवः । द्वितीये तु मनोवाचौ, मनोऽङ्गे वाक्तनू त्रयम् ॥ ७३९ ॥

भङ्गनामिति शेषः,

मनोवाक्तनुभिर्व्यस्तैः, स्यात्तृतीयेऽपि तत्त्रयम् । करणेन कारणेन, तुर्ये कोष्ठे च भिद्द्वयम् ॥ ७४० ॥

त्रयो द्वितीयकोष्ठोक्ता, योगभङ्गा विशेषिताः । करणेन कारणेन, षड्भङ्गा इति पञ्चमे ॥ ७४१ ॥

व्यस्ता मनोवचःकायाः, षड्विधाः स्युर्विशेषिताः । करणेन कारणेन, षष्ठे षड् भङ्गका इति ॥ ७४२ ॥

आवश्यकाभिप्रायोऽयं, प्रज्ञप्त्यादौ तु कीर्त्तितः । त्रिविधं त्रिविधेनेति, भेदोऽपि गृहमेधिनाम् ॥ ७४३ ॥

तथाहि—स्वयंभूरमणाम्भोधिमत्स्यमांसाशनादिकम् । त्रिविधं त्रिविधेनापि, प्रत्याख्यात्येव कोऽपि यत् ॥ ७४४ ॥

अस्याल्पविषयत्वेन, कादाचित्कतयाऽपि च । नैवावश्यकनिर्युक्तौ, भङ्गकोऽयं विवक्षितः ॥ ७४५ ॥

षोढा पूर्वोक्तषड्भङ्ग्या, स्यादेकैकमणुव्रतम् । त्रिंशद्भिदोऽथ द्वात्रिंशत्ससम्यक्त्वोत्तरव्रताः ॥ ७४६ ॥

तथा—त्रिका द्विका एकका ये, प्रत्येकं ते त्रयस्त्रयः । स्थाप्यन्ते किल षड्क्त्योर्ध्वं करणादित्रयाङ्काः॥ ७४७ ॥

एषां नवानामङ्कानामधः षड्क्त्या क्रमाल्लिखेत् । मनोवाक्कायसूचायै, त्रिशस्त्रिकद्विकैककान् ॥ ७४८ ॥

आद्यो भङ्गोऽत्र सावद्यं, न कुर्वे कारयामि न । नानुजानामि मनसा, वचसा वपुषापि च ॥ ७४९ ॥

एवमन्येऽपि भङ्गका भाव्याः,

प्रज्ञप्त्याद्युदिता मूलभङ्गा नव भवन्त्यमी । एषामेकोनपञ्चाशद्भवन्त्युत्तरभङ्गकाः ॥ ७५० ॥

तथाहि—

त्रिभिर्मनोवचः २ कायैस्त्रयो भेदा भवन्त्यथ । मनोवाग्भ्यां भवेत्तुर्यो, मनोऽङ्गाभ्यां च पञ्चमः ॥ ७५१ ॥

वाक्कायाभ्यां भवेत् षष्ठस्त्रिभिरेभिश्च सप्तमः ७ । एते सप्तापि योज्यन्ते, सप्तभिः करणादिभिः ॥ ७५२ ॥

ते चैवं-करणं १ कारणं २ चानुमति ३ श्चेति भिदां त्रयम् । भेदश्चतुर्थः करणकारणाभ्यां प्रकीर्त्तितः ॥ ७५३ ॥

करणानुमतिभ्यां च, भेदो भवति पञ्चमः । कारणानुमतिभ्यां च, षष्ठस्तैः सप्तमस्त्रिभिः ॥ ७५४ ॥

प्रत्येकमेषु भङ्गेषु, पूर्वोक्तसप्तकान्वयात् । उक्ता एकोनपञ्चाशद्व्रतोच्चारणभङ्गकाः ॥ ७५५ ॥

प्रत्येकं भङ्गकेष्वेषु, कालत्रितययोजनात् । सप्तचत्वारिंशदाढ्यं, जायन्ते भङ्गकाः शतम् ॥ ७५६ ॥

त्रिकालविषयत्वं च, स्यादतीतस्य निन्दया । संवरेणाधुनिकस्य, प्रत्याख्यानाद्भविष्यतः ॥ ७५७ ॥

तथाहु—अईयं निंदामि, पडुप्पन्नं संवरेमि, अणागयं पच्चरक्खामि, [पक्खिसूत्र] तथा च—

मण १ वयण २ काय ३ मणवय ४ मणतणु ५ वयतणु ६ तिजोगि ७ सगसत्त । कर १ कार २ णुमइ ३ दुतिजुइ तिकालि सीआलभङ्गसयम् ॥ [पच्चक्खाणभाष्य गा. ४३]

सम्यग् य एतान् जानाति, प्रत्याख्यानस्य भङ्गकान् । स एव कथितःशास्त्रे, प्रत्याख्यानविचक्षणः ॥ ७५८ ॥

अणुव्रतैः पञ्चभिश्च, गुणिता भङ्गका अमी । पञ्चत्रिंशाः शताः सप्त, तेषु केवलदर्शनैः ॥ ७५९ ॥
युक्तेषु चोत्तरगुणाढ्यैस्ते स्युः श्रावका इह । सप्तत्रिंशाः सप्तशता, व्रतानां मूलभेदतः ॥ ७६० ॥
व्रतानां द्व्यादिसंयोगोद्भवा भेदा भवन्ति ये । षड्भङ्ग्यादिव्रतोच्चारप्रकाराणां च या भिदः ॥ ७६१ ॥
परस्परं तद्गुणने, व्रतानां भूरयो भिदः । भवन्ति ताभिस्तावन्तः, श्रावका इह तद्यथा ॥ ७६२ ॥
अणुव्रतानां पञ्चानां, भङ्गाः पञ्चैकयोगजाः । दश च स्युर्द्वियोगोत्थास्त्रियोगोत्था दशैव च ॥ ७६३ ॥
तुर्ययोगोद्भवाः पञ्च, स्यादेकः पञ्चयोगजः । अथैतद्भङ्गकोत्पत्तौ, करणं प्रतिपाद्यते ॥ ७६४ ॥
क्रमोत्क्रमाभ्यां द्वे पङ्क्त्यौ, संस्थाप्येते उपर्यधः । विवक्षितव्रताङ्कानामथाधःपङ्क्तिवर्तिना ॥ ७६५ ॥
उपान्त्याङ्केनोर्ध्वपङ्क्तिगतोऽन्त्योऽङ्को विभज्यते । लब्धेन तस्योपान्त्यस्यो–परिस्थोऽङ्को निहन्यते ॥ ७६६ ॥
यज्जातं ते द्विसंयोगा, भङ्गकास्ते च पूर्ववत् । उपान्त्यपाश्चात्याङ्केन, भज्यन्ते लभ्यते च यत् ॥ ७६७ ॥
तेन तस्योपरितनो, गुण्यतेऽङ्को भवेच्च यत् । ते त्रिसंयोगजा भङ्गाः, स्याच्छेषेष्वप्ययं विधिः ॥ ७६८ ॥
भङ्गेषु नैकयोगेषु, करणस्य प्रयोजनम् । विवक्षितव्रतमिता, भङ्गका ह्येकयोगजाः ॥ ७६९ ॥
अत्रोदाहरणं—
क्रमोत्क्रमाभ्यां पञ्चान्ता, लिख्यन्तेऽङ्का द्विकेन च । भक्तेऽधःपङ्क्त्युपान्त्येनोपरिस्थे पञ्चकेऽन्तिमे ॥ ७७० ॥
लब्धौ द्वौ सार्द्धकौ ताभ्यामुपान्त्यस्योपरि स्थितः । चतुष्को गुण्यते जाता, दश तेऽत्र द्वियोगजाः ॥ ७७१ ॥
त्रिकोऽथोपान्त्यपाश्चात्यो, भज्यन्ते तेन ते दश । लब्धास्त्रयः सत्रिभागाः, सांशैस्तैश्च निहन्यते ॥ ७७२ ॥
त्रिकस्तस्योपरिगतो, दश स्युस्ते त्रियोगजाः । तत्पाश्चात्यचतुष्केण, तेषु भक्तेषु लभ्यते ॥ ७७३ ॥
सार्द्धं द्वयं तेन तस्योपरिस्थो गुण्यते द्विकः । जाताः पञ्च चतुर्योगा, भज्यन्ते पञ्चकेन ते ॥ ७७४ ॥
आद्येनाधःपङ्क्तिगेन, प्राप्त एकोऽथ गुण्यते । अनेनैकस्तदूर्ध्वस्थ, इत्येकः पञ्चयोगजः ॥ ७७५ ॥
यद्वा–जिज्ञासिताः स्युः संयोगा, यावतां तावतोऽङ्कान् । एकाद्येकोत्तरानूर्ध्वदमश्रेण्या क्रमान्न्यसेत् ॥ ७७६ ॥
यथास्वमन्त्यं मुक्त्वा तानुपर्युपरि निक्षिपेत् । एवमेकादियोगोत्थभङ्गसंख्यामितिर्भवेत् ॥ ७७७ ॥
तत्र च–सर्वोपरितनाङ्केन, लभ्यन्त एकयोगजाः । शेषैरधोऽधःस्थैरङ्कैर्लभ्यन्ते द्व्यादियोगजाः ॥ ७७८ ॥
अत्रैकको द्विके क्षिप्तो, द्विकस्थाने त्रिकोऽभवत् । त्रिकः स चोपरितनत्रिके षट्कं भवेत्तदा ॥ ७७९ ॥
षट्केऽस्मिंश्चोपरितने, चतुष्के योजिते दश । पुनरेकस्त्रिके क्षिप्तश्चतुष्कः स्यात्स चोर्ध्वगे ॥ ७८० ॥
षट्के क्षिप्तो दशाभूवन्, पुनरेकश्चतुष्कके । क्षिप्तः पञ्चाभवन्नेकस्ततोऽधः स्यात्तथा स्थितः ॥ ७८१ ॥
अथवा–लभ्यन्ते द्व्यादिसंयोगा, अङ्कचारणया मिथः । चार्यते पूर्वपूर्वोऽङ्कोऽनुक्रमादुत्तरोत्तरैः ॥ ७८२ ॥

सा चैवं–१–२ । १–३ । १–४ । १–५ एवं चत्वार एकचारणया. २–३ । २–४ । २–५ ।
एवं त्रयो द्वितीयचारणया. ३–४ । ३–५ एवं द्वौ तृतीयचारणया. ४–५ एकश्चतुर्थचारणया. एवं

दश द्विकसंयोगजा लब्धाः, एवं त्रिकसंयोगजा अपि दश यथा–१–२–३ । १–२–४ । १–२–५ । १–३–४ । १–३–५ । १–४–५ । एवमेकचारणया षट् २–३–४ । २–३–५ । २–४–५ । इति द्वितीयचारणया त्रयः । ३–४–५ एवं तृतीयचारणया त्वेकः, इति.

व्रतानां च द्वादशानामेवं विज्ञैर्यथारुचि । भङ्गानां भावना कार्या, द्व्यादिसंयोगजन्मनाम् ॥ ७८३ ॥
व्रतोच्चारप्रकाराणामप्येवं गुणने मिथः । भवन्ति भूरयो भेदाः, षड्भङ्ग्यां तानथ ब्रुवे ॥ ७८४ ॥
एकव्रते षड्भङ्गा ये, द्विविधत्रिविधादिकाः । ते षट्त्रिंशद्भवन्त्येवं, संयोगे व्रतयोर्द्वयोः ॥ ७८५ ॥
आदावाद्यव्रतस्याद्यो, भङ्गकोऽवस्थितोऽश्नुते । द्वितीयव्रतसत्कान् षट्, भङ्गकाननवस्थितान् ॥ ७८६ ॥
एवं भङ्गे द्वितीयोऽपि, षट् प्रत्येकं षडप्यमी । लभन्ते इति षट्त्रिंशज्जाता उच्चारभङ्गकाः ॥ ७८७ ॥
व्रतानां त्रिकयोगे तु, द्विशती षोडशोत्तरा । शतानि द्वादश चतुर्योगे षण्णवतिस्तथा ॥ ७८८ ॥
सहस्राः सप्त सप्तैव, शताः षट्सप्ततिस्तथा । योगे व्रतानां पञ्चानां, भवन्त्युच्चारभङ्गकाः ॥ ७८९ ॥
उच्चारभङ्गका एते, व्रतानां प्राक् प्रदर्शितैः । हता एकद्व्यादियोगैः, स्युः सर्वाग्रेण भङ्गकाः ॥ ७९० ॥
यथा व्रतानां पञ्चानामेकयोगैर्हि पञ्चभिः । हता उच्चारभङ्गाः षट्, स्युस्त्रिंशदेकयोगजाः ॥ ७९१ ॥
दशभिर्द्विकयोगे षट्त्रिंशदुच्चारभङ्गकाः । हताः स्युस्त्रिंशती षष्ट्याऽभ्यधिका सर्वसंख्यया ॥ ७९२ ॥
द्विशती षोडशाढ्या च, त्रियोगैर्दशभिर्हताः । षष्ट्याढ्यानि त्रियोगानां, स्युः शतान्येकविंशतिः ॥ ७९३ ॥
चतुर्योगैः पञ्चभिश्च, हता उच्चारभङ्गकाः । शता द्वादश पूर्वोक्ताः, षण्णवत्यधिकाश्च ये ॥ ७९४ ॥
स्युः शतानि चतुःषष्टिरशीत्यऽभ्यधिकानि ते । चतुर्योगजभङ्गानां, सर्वसंख्या भवेदियम् ॥ ७९५ ॥
सहस्राः सप्त सप्तैव, षट्सप्तत्यधिकाः शताः । एकेन पञ्चयोगेन, हतास्तावन्त एव ते ॥ ७९६ ॥
इयं च स्थापना प्राज्ञैस्तादृगाकारसंभवात् । शास्त्रेषु देवकुलिकाकारेति व्यपदिश्यते ॥ ७९७ ॥
पञ्चस्वणुव्रतेष्वेवं, निर्दिष्टानां यथाक्रमम् । संयोगजानां भङ्गानां, भवेत् संकलना त्वियम् ॥ ७९८ ॥
सहस्राः षोडशाष्टौ च, शताः षडधिका अथ । उत्तरव्रतभृत्सम्यग्दृग्योगेऽष्टाधिका अपि ॥ ७९९ ॥
द्वादशानां व्रतानां च भङ्गसंकलना भवेत् । विविच्यमाना षड्भङ्ग्या, कोटीशतास्त्रयोदश ॥ ८०० ॥
कोट्यश्चतुरशीतिश्च, लक्षाणि द्वादशोपरि । सप्ताशीतिः सहस्राणि, द्वाभ्यां युक्तं शतद्वयम् ॥ ८०१ ॥

अत्र शतोपरितनं यद्द्वयं तदुत्तरगुणधारिकेवलसम्यक्त्वधारिरूपं भेदद्वयं ज्ञेयम् । अत्रोत्तरगुणाश्च विविधतपोऽभिग्रहरूपा इति ध्येयम् ।

अत्रायमाम्नायः—

षड्भङ्गा व्रत एकस्मिन्, ये निर्दिष्टा जिनैः श्रुते । द्वितीयव्रतयोगे ते, हन्यन्ते सप्तभिः किल ॥ ८०२ ॥
षट् क्षिप्यन्तेऽत्र चैवं स्युर्भङ्गका व्रतयोर्द्वयोः । अष्टचत्वारिंशदेव, जातास्ते विधिनाऽमुना ॥ ८०३ ॥

अत्र चैवं प्रकारान्तरेण वासनाद्वयोर्व्रतयोरुर्ध्वपङ्क्तिस्थापना. अत्र च "यथा स्वमन्त्यं मुक्त्वा तानुपर्युपरि निक्षिपेत्," इति पूर्वोक्तवचनात् अङ्कक्षेपसंभवो नास्तीति तथैव स्थिता, तथा च एकयोगे द्वौ भङ्गौ, द्विकयोगश्चैकः, तत्र द्वयोरेकयोगयोः प्रत्येकं षट् भङ्गा इति द्वादश द्विकयोगस्य षट्त्रिंशदिति अष्टचत्वारिंशदिति ।

विवक्षितव्रताङ्केभ्य, एक न्यूनाङ्कसंख्यया । एवं मुहुः कृते शेषभङ्गसंकलनाऽऽप्यते ॥ ८०४ ॥
व्रतेषु च द्वादशसु, वारानेकादशे तकि । कृते पूर्वोदिता सर्वभङ्गसंकलना स्फुटा ॥ ८०५ ॥
त्रिकाल्या गुणने त्वेषां, भङ्गकानां भवन्त्यमी । कोटीशतान्येकचत्वारिंशच्चोपरि कोटयः ॥ ८०६ ॥
द्विपञ्चाशत्तथालक्षणाण्यष्टात्रिंशदधोपरि । एकषष्टिः सहस्राणि, षड्भिर्युक्ता च षट्शती ॥ ८०७ ॥

एवं च वक्ष्यमाणैकविंशतिभङ्गीनवभङ्ग्यैकोनपञ्चाशद्भङ्गीभङ्गकानामपि त्रिकाल्या गुणनं न्याय्यमेव प्रतीमः, सप्तचत्वारिंशशतभङ्ग्यामेव त्रिकाल्याः प्रविष्टत्वादिति ज्ञेयं ।

एते व्रतानां भङ्गास्तु, षड्भङ्ग्यैव प्रदर्शिताः । एकविंशत्यादिभिस्तु, भङ्गैः स्युरतिभूरयः ॥ ८०८ ॥
तथाहि–
एकविंशतिरेकस्मिन्, ये भङ्गास्तान् व्रतद्वये । द्वाविंशतिगुणान् कृत्वा, क्षिप्यतेऽत्रैकविंशतिः ॥ ८०९ ॥
वारानेकादशैवं च, कृते द्रुतमवाप्यते । सर्वसंख्या भङ्गकानां, व्रतेषु द्वादशस्वपि ॥ ८१० ॥
सा चेयं–१२८५५००२६३१०४९२१५ अंकाः सप्तदश.
एकव्रतस्य ये भङ्गा, नव ते दशभिर्हताः । नवान्विताश्च सर्वाग्रं, वार एकादशे भवेत् ॥ ८११ ॥
तच्चैदं–९९९९९९९९९९९ अंकाः द्वादश.
एकव्रतस्याथैकोनपञ्चाशद्भङ्गका हि ये । ते पञ्चाशद्गुणा एकोनपञ्चाशद्युता मुहुः ॥ ८१२ ॥
एकादशे वारे सर्वाग्रं चैवं—२४४१४०६२४९९९९९९९९९९९ अङ्का एकविंशतिः.
सप्तचत्वारिंशदाढ्यं, शतमेकव्रतस्य ये । भङ्गकास्तेऽष्टचत्वारिंशदाढ्यशतताडिताः ॥ ८१३ ॥
सप्तचत्वारिंशदाढ्यशतोपेताः कृता मुहुः । भवन्त्येकादशे वारे, सर्वेऽपि व्रतभङ्गकाः ॥ ८१४ ॥

ते चैवं–११०४४३६०७७१९६११५३३३५६९५७६९५ अङ्काः सप्तविंशतिः ।

एतेषु षड्भङ्ग्यादिषु स्थानेषु यथाक्रममागता द्वादशापि राशय उपर्यधोभावेन व्यवस्थाप्यमाना अर्द्धदेवकुलिकाकारां भूमिमास्तृणन्तीति. एताः पञ्चापि खण्डदेवकुलिका इति व्यपदिश्यन्त इति ज्ञेयं ।

तत्र षड्भङ्ग्याख्यखण्डदेवकुलिकस्थापना ।

श्रावकपदनिरुक्तं चैवं — अवाप्तदृष्टयादिविशुद्धिसंपत्– परं समाचारमनुप्रभातम् । श्रृणोति यः साधुजनादतन्द्रस्तं श्रावकं प्राहुरमी जिनेन्द्राः॥ श्रद्धालुतां याति पदार्थचिन्तनाद्धनानि पात्रेषु

वपत्यनारतम् । किरत्यपुण्यानि सुसाधुसेवनादतोऽपि तं श्रावकमाहुरुत्तमाः ॥

श्राति पचति तत्त्वार्थश्रद्धानं निष्ठां नयतीति, 'श्रां पाके' इत्यस्य रूपं, इति स्थानाङ्गवृत्तौ ।

एवं च विविधैर्भङ्गैः, स्वीकृतव्रतपालकाः । श्रावकाः श्राविकाश्चैषामर्हतां स्यात्परिच्छदः ॥ ८१५ ॥
साधुष्वथो गणधरपदयोग्या भवन्ति ये । उत्पत्तिनाशध्रौव्यार्थां, त्रिपदीं शिक्षयंति तान् ॥ ८१६ ॥
अधीत्य त्रिपदीं तेऽपि, मुहुर्त्तादबीजबुद्धयः । रचयंति द्वादशाङ्गीं, विचित्ररचनाञ्चिताम् ॥ ८१७ ॥
ततः सौगन्धिकरत्नचूर्णस्थालं करे धृतम् । शक्रः पुरो ढौकयति, पदस्थापनहेतवे ॥ ८१८ ॥
तिष्ठन्ति चार्द्धावनताः, पदयोग्याः पुरोऽर्हताम् । गन्धवासांस्तच्छिरस्सु, क्षिपन्ते मुष्टिभिर्जिनाः ॥ ८१९ ॥
ददते सूरिमन्त्रं च, तेभ्यस्तीर्थप्रवर्त्तकाः । द्रव्यक्षेत्रकालभावैस्तीर्थानुज्ञां च कुर्वते ॥ ८२० ॥
कुर्वन्ति सर्वे शक्राद्या, देवाः पदमहोत्सवम् । वर्यैस्तूर्यत्रिकैर्हर्षप्रकर्षोल्लसदाशयाः ॥ ८२१ ॥
सूत्रं गणधरा एव, ग्रथ्नन्त्येते महाधियः । दिशन्ति केवलानेव, प्रायोऽर्थांस्तीर्थपाः पुनः ॥ ८२२ ॥
यथोच्चैः सहकारादितरुमारूढवान्नरः । स्वजनानामधःस्थानामुपकाराय शालिनाम् ॥ ८२३ ॥
फलानां कुरुते वृष्टिं, द्वित्राः केचन तेषु च । पतन्ति तानि गृह्णन्ति, पटेन प्रभविष्णवः ॥ ८२४ ॥
अथ ते तान्युपादाय, संस्कृत्य च यथाविधि । उपयोज्य प्रीणयन्ति स्वजनानात्मनोऽपि च ॥ ८२५ ॥
तथा तीर्थङ्करा ज्ञानकल्पद्रुमशिरःस्थिताः । भव्यानामुपकाराय, वर्षन्त्यर्थाननुत्तरान् ॥ ८२६ ॥
गृह्णन्ति तान् गणधरा, वितत्य धिषणापटम् । आत्मानं रचितैस्तैश्चानुगृह्णन्त्यपरानपि ॥ ८२७ ॥
यथा फलानि व्यस्तानि, न सर्वानुपकुर्वते । कृतार्था न तथैवार्थाः, स्युः सूत्ररचनां विना ॥ ८२८ ॥
मुक्ताफलानि व्यस्तानि, शतानि कुसुमानि वा । नासूत्राण्युपयुज्यन्ते, तथाऽर्था अपि देहिनाम् ॥ ८२९ ॥
यादृक्स्वरूपाः सार्वेन्द्राः, प्राच्यां सिंहासनस्थिताः । तन्वते देशनां दीप्यमाना लोकोत्तरश्रिया ॥ ८३० ॥
तथैव शेषदिक्ष्वर्हत्प्रतिमाः सुरनिर्मिताः । विदध्युर्देशनां मूलस्वरूपादविशेषिताः ॥ ८३१ ॥
जनः कोऽपि न जानाति, स्वरूपेषु चतुर्ष्विति । मूलस्वरूपं कतमत्कतमद्वाऽत्र कृत्रिमम् ॥ ८३२ ॥

तथाहुः— "जे ते देवेहिं कया तिदिसिं पडिरूवगा जिणवरस्स । तेसिं पि तप्पभावा तयाणुरूवं हवइ रूवं" ॥ [आवश्यकनिर्युक्ति श्लो. ५५७]

प्रतिरूपेषु यत्तेषु, नाकिभिर्विहितेष्वपि । रूपं स्याद्भगवत्तुल्यं, तन्महिम्नैव तद्ध्रुवम् ॥ ८३३ ॥
अन्यथा तु सुराः सर्वे, यदि संभूय कुर्वते । अङ्गुष्ठप्रमितं रूपं, सर्वशक्तिप्रयत्नतः ॥ ८३४ ॥
तज्जगज्जैत्ररूपार्हत्पादाङ्गुष्ठस्य सन्निधौ । निर्वाणाङ्गारविच्छायं, भवेद्दुर्वादिवृन्दवत् ॥ ८३५ ॥

आहुश्च—"यैः शांतरागरुचिभिः परमाणुभिस्त्वं, निर्मापितस्त्रिभुवनैकललामभूत ! । तावन्त एव खलु तेऽप्यणवः पृथिव्यां, यत्ते समानमपरं न हि रूपमस्ति" ॥ [भक्तामरस्तोत्र गा. १२]

तादृशाच्चार्हतां रूपाज्जगद्वाचामगोचरात् । अनन्तगुणहीनाः स्यू, रूपतो गणधारिणः ॥ ८३६ ॥
तेभ्यश्चाहारका देहा, अनन्तगुणहीनकाः । तेभ्योऽप्यनुत्तरा देवास्ततोऽधोऽधः क्रमात्सुराः ॥ ८३७ ॥
यावद्ध्यन्तरगीर्वाणास्तेभ्यश्च चक्रवर्त्तिनः[1] । वासुदेवा बलदेवा, महामाण्डलिकाः क्रमात् ॥ ८३८ ॥
अनन्तगुणाहीनाः स्युस्तच्छेषास्तु नृपादयः । लोकाः सर्वेऽपि षट्स्थानपतिता रूपतो मिथः ॥ ८३९ ॥
अनन्ता १ सङ्ख्य २ संख्येय ३ भागहीनाः परस्परम् । संख्येया ४ संख्येया ५ नन्त ६ गुणहीनाः स्वरूपतः॥ ८४० ॥
तादृग्रूपाश्च तेऽर्हन्तो, मनोनयनसौख्यदाः । जनानामभिगम्याः स्युरुपादेयगिरोऽपि च ॥ ८४१ ॥
तथा तादृक् प्रभो रूपं, निरूप्यानुत्तरं जनाः । त्यक्तरूपाभिमानाः स्युर्न नीचैर्गोत्रबन्धिनः ॥ ८४२ ॥
धर्मादेवाप्यते रूपमीदृगैश्वर्यबन्धुरम् । इति धर्मे प्रवर्तन्ते, तेऽर्हद्रूपनिरूपणात् ॥ ८४३ ॥
यदीदृग्रूपभाजोऽपि, राजवंश्या जिनेश्वराः । यतन्ते संयमे तर्हि, वयं किं न यतामहे ? ॥ ८४४ ॥
इत्यालोच्याल्पकर्माणो, यतन्ते केऽपि संयमे । बहुधेत्यर्हतां रूपं, भवेल्लोकोपकारकृत् ॥ ८४५ ॥
यथा रूपं तथा संहननं संस्थानमेव च । वर्णो गतिः स्वरस्सत्त्वं, स्यादुच्छ्वासाद्यनुत्तरम् ॥ ८४६ ॥
अन्यासामपि सर्वासां, प्रकृतीनामनुत्तराः । प्रशस्ताः स्युः परीपाकास्तादृक्षान्नामकर्मतः ॥ ८४७ ॥
असातवेदनीयाद्या, दुष्टाः प्रकृतयोऽपि याः । दुग्धाब्धौ निम्बनिर्यासबिन्दुवत्ता न दुःखदाः ॥ ८४८ ॥
अर्हतां पादमूले च, सदा सन्निहितो भवेत् । प्रायो गणधरो ज्येष्ठः, कदाचिदपरोऽपि वा ॥ ८४९ ॥
परं न स्वामिपादाब्जमेकेन गणधारिणा । भवेत्कदापि रहितं, त्रिदशेनेव नन्दनम् ॥ ८५० ॥
ज्येष्ठो गणी सोऽपरो वा, प्रणम्य परमेश्वरान् । पार्श्वे निषीदत्याग्नेय्यामन्येऽप्येवं गणाधिपाः ॥ ८५१ ॥
मुनयः केवलज्ञानशालिनोऽथ जिनेश्वरान् । त्रिश्च प्रदक्षिणीकृत्य, कृत्वा तीर्थनमस्कृतिम् ॥ ८५२ ॥
यथाक्रमनिविष्टानां, पृष्ठतो गणधारिणाम् । निषीदन्ति पदस्थानां, रक्षन्तो गौरवं स्थितेः ॥ ८५३ ॥
कृतकृत्यतया तादृक्कल्पत्वाच्च जिनेश्वरान् । न नमस्यन्ति तीर्थं तु, नमन्त्यर्हन्नमस्कृतम्[2] ॥ ८५४ ॥

उक्तं च धनपालेन महात्मना—"होही मोहुच्छेओ, तुह सेवाए धुव त्ति नंदामि । जं पुण न वंदिअव्वो, तत्थ तुमं तेण जिज्झामि" ॥

मनःपर्यायज्ञान्याद्यास्ततोऽतिशायिसाधवः । नत्वार्हत्तीर्थगणिनः, सर्वज्ञांश्चासते ततः ॥ ८५५ ॥
तेषां च पृष्ठतः शेषसंयता अर्हदादिकान् । प्रणिपत्य निषीदन्ति, विनयेन यथाक्रमम् ॥ ८५६ ॥
तेषां च पृष्ठतो वैमानिकदेव्योऽर्हदादिकान् । प्रणिपत्यासते तासां, पृष्ठे साध्व्यस्तथैव च ॥ ८५७ ॥

---

१. सामान्यो विधिरयं, तेन सनत्कुमारादे रूपाधिक्येऽपि न क्षतिः, यद्वा नरेष्वसंभावनीयं तद्रूपमिति शक्रेन्द्रेण तद्दर्शनं सुरागमनं च ।

२. जिनानां नमस्यता प्रदक्षिणात्रयकरणेन, गणधराणां नमस्यता च नमस्तीर्थायेति भणनात्, तीर्थं नत्वा तीर्थस्य पृष्ठत उपविशन्तीत्यावश्यकोक्तेः, आवर्तैर्वन्दनं नेति वन्दनवध्यताविषया धनपालोक्तिरप्यवितथैव ।

इत्येताः पर्षदस्तिस्रो, निषीदन्त्यग्निकोणके । प्रविश्य पूर्वद्वारेण, कृत्वा चार्हत्प्रदक्षिणाम् ॥ ८५८ ॥
देव्योऽथ भवनज्योतिर्व्यन्तराणामिति त्रयम् । याम्यद्वारा प्रविश्याऽऽस्ते, नैर्ऋत्यां दिशि पर्षदाम् ॥ ८५९ ॥
सुरास्त्रयोऽमी पूर्वोक्ताः, पुनस्तिष्ठन्त्यनुक्रमात् । प्रविश्या पश्चिमद्वारा, वायव्यां विनयानताः ॥ ८६० ॥
वैमानिकाः सुरास्सेन्द्रा, मनुजा मनुजस्त्रियः । प्रविशन्त्युत्तरद्वारा, तिष्ठन्त्यैशानकोणके ॥ ८६१ ॥
पर्षदो द्वादशाप्येवं, निषीदन्त्युक्तदिक्ष्विमाः । प्रदक्षिणीकृत्य नत्वाऽर्हतो गण्यादिकांस्तथा ॥ ८६२ ॥
आयाति यो यज्जातीयः, स तत्पर्षदि तिष्ठति । न तत्र मानो द्वेषो वा, न भयं न नियन्त्रणा ॥ ८६३ ॥
महर्द्धिकं समायान्तं नमन्त्यल्पर्द्धिकाः स्थिताः । व्रजन्तोऽपि नमन्तोऽमी, यान्ति प्रौढर्द्धिकं स्थितम् ॥ ८६४ ॥
यो यो यस्य परीवारो, यो वा यन्निश्रयाऽऽगतः । त्रिदशो वा मनुष्यो वा, स तत्पार्श्वे निषीदति ॥ ८६५ ॥
देव्यश्चतुर्द्धा साध्व्यश्च, शृण्वन्त्यूर्ध्वदमाः क्षणं । देवाः सर्वे नरा नार्यो, निविष्टाः श्रमणास्तथा ॥ ८६६ ॥
वृत्तावावश्यकस्येदं, चूर्णौ चोत्कटिकासनाः । शृण्वन्ति साधवोऽथोर्ध्वाः, साध्व्यो वैमानिकाङ्गनाः ॥ ८६७ ॥
उपविश्यैव शृण्वन्ति, देशनामाप्तभास्वताम् । पर्षदोऽन्या न वेत्युक्तं, वेत्ति तत्त्वं तु तत्त्ववित्[1] ॥ ८६८ ॥
अपूर्वं यत्र समवसरणं नेक्षितं च यैः । अपि द्वादशयोजन्यास्ते तत्रायान्ति साधवः ॥ ८६९ ॥
अथ चेत्साधवस्तत्र, ते नायांति श्लथादराः । तत्प्रायश्चित्तमर्हन्ति चतुर्गुरुकसंज्ञकम् ॥ ८७० ॥
आगच्छतां च बालानां, ग्लानानां जरतामपि । न कोऽप्युपद्रवो नार्तिर्न त्रास स्यान्न वा श्रमः ॥ ८७१ ॥
तावदुत्तुङ्गसोपानसहस्रारोहणे भवेत् । न कस्यापि श्रमश्वासव्यथाः शम्भुप्रभावतः ॥ ८७२ ॥
स्त्रीक्षेत्रवित्ताद्युत्थानि, पितृघातोदितान्यपि । तत्रागतानां शाम्यन्ति, द्रुतं वैराणि पापवत् ॥ ८७३ ॥
युद्ध्यमाना मिथः क्रूराः, क्रोधरक्तेक्षणाननाः । कम्पमाना उदस्तास्त्रा, उच्छुण्डाः कुञ्जरा इव ॥ ८७४ ॥
भवन्ति ये तेऽपि तत्रागता विस्मृतविग्रहाः । प्रशान्तचित्ताः शृण्वन्ति, धर्मं स्वामिप्रभावतः ॥ ८७५ ॥
न कोऽपि विकथां कुर्याद्व्याक्षेपं कोऽपि नापरम् । तदेकचित्ताः शृण्वन्ति, जिनानां देशनां जनाः ॥ ८७६ ॥
शृण्वन्ति येऽपि तिर्यञ्चः, स्थिता वप्रे द्वितीयके । तेऽपि विस्मृतजात्यादिवैराः स्युस्तत्प्रभावतः ॥ ८७७ ॥
पार्श्वस्थं सिंहमातङ्गं, शार्दूलहरिणं तथा । श्येनपारापतं व्याघ्रच्छागं मार्जारमूषकम् ॥ ८७८ ॥
महिषाश्वं च नकुलसर्पं शूकरकुर्कुरम् । एकाग्रचित्ताः शृण्वन्ति, प्रभोरत्यमृतं क्षणम् ॥ ८७९ ॥
बिभेति तत्र नो बाध्यो, बाधकस्तं न बाधते । स्युः सार्वातिशयाच्छान्तरससतृप्ताः समेऽपि ते ॥ ८८० ॥
प्रथमां पौरुषीं यावद्धर्ममाख्यान्ति पारगाः । अत्रान्तरे च यस्तत्र, चक्रवर्त्यादिको नृपः ॥ ८८१ ॥

---

१. ध्यानकोष्ठोपगतत्वावस्थायामुत्कटिकासनं साधूनां, तत्र श्रीजिनदेशनाश्रवणार्थं च स्थानं यद्वा औपग्रहिकमासनमिति तद्भावाभावकृतो भेदः, भवनपत्यादिदेवीनां श्राविकाणां च तथा सामान्येन ठंतिशब्देन कथनेऽपि यथायोगमेव स्यादिति न विरुद्धता ।

श्राद्धोऽमात्यादिको वा यस्तदभावे च पूर्जनः । जनो जानपदो वापि, सज्जयत्यद्भुतं बलिम् ॥ ८८२ ॥
तण्डुलास्तत्र कलमशालीनां स्युः सितत्विषः । उद्दामसौरभाः स्निग्धास्तनवः कोमला भृशम् ॥ ८८३ ॥
दुर्बलाकण्डिताः पूता, बलवत्याऽतिनिस्तुषाः । अखण्डाग्राश्चतुःप्रस्थप्रमिताऽऽढकसंमिताः ॥ ८८४ ॥
अर्पिताः स्वजनानां ये, तुषभग्नादिशुद्धये । पुनस्तेभ्यः समुच्चित्य, शोधिताः शुद्धवारिणा ॥ ८८५ ॥
अर्द्धस्विन्नानिमान् रत्नस्थाले निक्षिप्य निर्मले । सज्जिताखिलशृङ्गारा, मौलौ धत्ते सुवासिनी ॥ ८८६ ॥
गन्धद्रव्याणि दिव्यानि, निक्षिपन्त्यत्र नाकिनः । तेनासौ भूरिसौरभ्यसुभगो जायते बलिः ॥ ८८७ ॥
नीयते गीतवाद्यादिमहोत्सवपुरस्सरम् । श्राद्धेनासौ प्रभोरग्रे, श्लाघ्यमानेन धार्मिकैः ॥ ८८८ ॥
पूर्वद्वारा प्रविशति, बलिरेवं महामहैः । तस्मिन्नागतमात्रे च, विरमन्ति क्षणाज्जिनाः ॥ ८८९ ॥
ततः स चक्रवर्त्यादिः, श्रावको बलिना सह । तिस्रः प्रदक्षिणाः कृत्वा, प्राच्यां प्रभुपदान्तिके ॥ ८९० ॥
किरत्याशासु सर्वासु, तं बलिं प्रौढमुष्टिभिः । तस्य प्रागेव भूपातादर्द्धं गृह्णन्ति नाकिनः ॥ ८९१ ॥
अर्द्धं च शेषस्यार्द्धस्य, गृह्णात्येतद्विधायकः । अवशिष्टं यथालाभं, गृह्णन्त्यन्येऽखिला जनाः ॥ ८९२ ॥
मूर्ध्नि न्यस्तेन तस्यैककणेनाप्तेन भाग्यतः । रोगाः सर्वेऽपि शाम्यन्ति, पर्जन्येनेव वह्नयः ॥ ८९३ ॥
प्रादुर्भवति षण्मासावधि रोगो न नूतनः । तस्मान्मौलिस्थिताद्रत्नदीपादिव तमोऽङ्कुरः ॥ ८९४ ॥
इत्थं बलिविधौ पूर्णे, जिनाः प्रथमवप्रतः । अवतीर्य द्वितीयस्य, वप्रस्यैशानकोणके ॥ ८९५ ॥
देवच्छन्दकमागत्य, सुखं तिष्ठन्ति नाकिभिः । अप्यल्पैः कोटिसंख्याकैः, सेविता भृतकैरिव ॥ ८९६ ॥
ततो द्वितीयपौरुष्यामाद्योऽन्यो वा गणाधिपः । सिंहासने नृपानीते, पादपीठेऽथवाऽर्हताम् ॥ ८९७ ॥
उपविश्यादिशेद्धर्मोपदेशमतिपेशलम् । स छद्मस्थोऽपि भव्यानां, पृच्छतां सर्ववेदिवत् ॥ ८९८ ॥
व्याकुर्वन् विविधान् भावान्, संख्यातीतभवादिकान् । छद्मस्थोऽयं जिनो वेति, न छद्मस्थैः प्रतीयते ॥ ८९९ ॥

तथाहुः श्रीभद्रबाहुस्वामिपादाः— "राओवणीअसीहासणे निविट्ठो व पायपीढंमि । जेट्ठो अण्णयरो वा गणहारि कहेइ बीयाए ॥ संखाईए वि भवे साहइ जं वा परो उ पुच्छिज्जा । न य णं अणाइसेसी विआणइ एस छउमत्थो" ॥ [आवश्यकनिर्युक्ति श्लो. ५८९, ५९०]

पुनः पाश्चात्यपौरुष्यां, स्थित्वा सिंहासने जिनाः । कुर्वते देशनां सर्वा, व्यवस्थाऽत्रापि पूर्ववत् ॥ ९०० ॥
प्राङ्नादापि न जातं स्याद्यत्र तत्र चतुर्विधाः । कुर्वन्ति देवाः समवसरणं विधिनाऽमुना ॥ ९०१ ॥
जातेऽप्यस्मिन्मुहुर्यत्र, देवः कश्चिन्महर्द्धिकः । नन्तुमेति स तत्रैकः, कुरुते भक्तिमानिदम् ॥ ९०२ ॥
यदापि न स्यात्समवसरणं स्यात्तदापि हि । वक्ष्यमाणं प्रातिहार्याष्टकं नियतमर्हताम् ॥ ९०३ ॥
अशोकवृक्षः सश्रीको, भवेद्योजनविस्तृतः । चलत्किसलयो भव्यान्, करागैराह्वयन्निव ॥ ९०४ ॥
अधोवृन्तानि पुष्पाणि, पञ्चवर्णानि नाकिनः । तन्वते जानुदघ्नानि, जिनानां देशनावनौ ॥ ९०५ ॥

मालवकैशिकीमुख्यग्रामरागाञ्चितोऽर्हताम् । आयोजनं ध्वनिर्दिव्यध्वनिमिश्रः प्रसर्पति ॥ ९०६ ॥
चामराश्चंद्ररुचिरा नमनोन्नमनैर्मुहुः । उच्चैः प्रभुनमस्काराच्छंसंतीव गतिं सताम् ॥ ९०७ ॥
स्वर्णसिंहासनं पादपीठयुग्मणिमण्डितम् । अध्यासते जिनास्तच्च, मार्गे व्योम्नि पुरश्चरेत् ॥ ९०८ ॥
छत्रत्रयं तथैवाग्रे, चरत्युज्ज्वलमौक्तिकम् । जगद्धन्योपरिस्थित्या, मुदेवोद्धुरकन्धरम् ॥ ९०९ ॥
भामण्डलं सार्वपृष्ठे, भात्यर्कस्येव मण्डलम् । प्रपन्नं शरणायेव, नियतास्तकदर्थितम् ॥ ९१० ॥
सति प्रभौ कुतः कर्मकृत्यं सासह्यतेऽङ्गिभिः । वक्तीतीवाङ्गिनां गर्जंस्तत्पुरो देवदुन्दुभिः ॥ ९११ ॥
एवं च–
अशोकद्रुः पुष्पराशिः, सद्ध्वनिश्चामरासने । छत्रं भामण्डलं भेरी, प्रातिहार्याष्टकं ह्यदः ॥ ९१२ ॥
तथा चतुस्त्रिंशता तेऽतिशयैः सहिता जगत् । दीपयन्ति प्रकृत्योपकारिणो भास्करादिवत् ॥ ९१३ ॥

अतिशयांश्चैवमाहुः—"तेषां च देहोऽद्भुतरूपगन्धो, निरामयः स्वेदमलोज्झितश्च १ । श्वासोऽब्जगन्धो २ रुधिरामिषं च, गोक्षीरधाराधवलं ह्यविस्रम् ३ ॥ आहारनीहारविधिस्त्वदृश्य ४ श्चत्वारएतेऽतिशयाः सहोत्थाः । क्षेत्रे स्थितिर्योजनमात्रकेऽपि, नृदेवतिर्यग्जनकोटिकोटेः १ ॥ वाणी नृतिर्यक्सुरलोकभाषासंवादिनी योजनगामिनी च २ । भामण्डलं चारु च मौलिपृष्ठे, विडम्बिताहर्पतिमण्डलश्रि ३ ॥ साग्रे च गव्यूतिशतद्वये रुजा ४, वैरे ५ तयो ६ मार्य ७ तिवृष्ट्य ८ वृष्ट्यः ९ । दुर्भिक्ष १० मन्यस्वकचक्रतो भयं ११ स्युर्नैत एकादश कर्मघातजाः ॥ खे धर्मचक्रं १ चमराः २ सपादपीठं मृगेन्द्रासन ३ मुज्ज्वलं च । छत्रत्रयं ४ रत्नमयध्वजोङ् ५ हिन्यासे च चामीकरपङ्कजानि ६ ॥ वप्रत्रयं ७ चारुचतुर्मुखाङ्कता ८, चैत्यद्रुमो ९ ऽधोवदनाश्च कण्टकाः १० । द्रुमानति ११ र्दुन्दुभिनाद १२ उच्चकैर्वातोऽनुकूलः १३ शकुनाः प्रदक्षिणाः १४ ॥ गन्धाम्बुवर्षं १५ बहुवर्णपुष्पवृष्टिः १६ कचश्मश्रुनखाप्रवृद्धिः १७ । चतुर्विधामर्त्यनिकायकोटिर्जघन्यभावादपि पार्श्वदेशे १८ ॥ [अभिधान चिन्तामणिः श्लो. ५७ थी ६३]

ऋतूनामिन्द्रियार्थानामनुकूलत्व १९ मित्यमी । एकोनविंशतिर्दैव्याश्चतुस्त्रिंशच्च मीलिताः ॥ ९१४ ॥

यत्तु श्रीसमवायाङ्गसूत्रे एतेषु केचिदतिशया अन्यथा दृश्यन्ते तन्मतान्तरं बोद्धव्यं ।

चत्वारोऽतिशयाश्चान्ये, तेषां विश्वोपकारिणाम् । पूजा ज्ञान वचोऽपायापगमाख्या महाद्भुताः ॥ ९१५ ॥
अष्टकं प्रातिहार्याणां, चत्वारोऽतिशया इमे । इत्येवं द्वादश गुणा, अर्हतां परिकीर्त्तिताः ॥ ९१६ ॥
गुणैस्ते सकलैः पूर्णा, निर्विपक्षस्थितेरिव । नानास्थानाप्तिगर्वेण, त्यक्ता दोषैश्च दूरतः ॥ ९१७ ॥

तथाहुः–"को विस्मयोऽत्र यदि नाम गुणैरशेषैस्त्वं संश्रितो निरवकाशतया ? मुनीश ! ।
दोषैरुपात्तविविधाश्रयजातगर्वैः, स्वप्नान्तरेऽपि न कदाचिदपीक्षितोऽसि" ॥ [भक्तामर गा. २७]

दोषास्तीर्थकृतां यद्यप्यनन्ता विलयं गताः । तथाप्यग्रेसरास्तेषाममी ह्यष्टादशोदिताः ॥ ९१८ ॥
अंतराया दान लाभवीर्य भोगोपभोगगाः । हासो रत्यरती भीतिर्जुगुप्सा शोक एव च ॥ ९१९ ॥
कामो मिथ्यात्वमज्ञानं, निद्रा चाविरति स्तथा । रागो द्वेषश्च नो दोषास्तेषामष्टादशाप्यमी ॥ ९२० ॥

हिंसाऽलीकमदत्तं च, क्रीडा हास्यारती रतिः । शोको भयं क्रोध मान, माया लोभास्तथा मदः ॥ ९२१ ॥
स्युः प्रेम मत्सरा ज्ञान, निद्रा अष्टादशेत्यमी । द्वेधापि सप्ततिशतस्थानके प्रतिपादिताः ॥ ९२२ ॥
जिनाश्च विहरन्त्येते, भूमौ विश्वोपकारिणः । भाविभद्रेषु देशेषु, भाग्यवल्लोकशालिषु ॥ ९२३ ॥
श्राद्धाश्च चक्रवर्त्याद्यास्तेषां विहरतां सुखम् । उदन्तशंसिनां नृणां, वृत्तिं यच्छन्ति वार्षिकीम् ॥ ९२४ ॥
अर्हत्सुखविहारादि, प्रत्यहं ते परापराः । आचक्षते स्वनाथेभ्योऽधिकृतास्तत्र कर्मणि ॥ ९२५ ॥
लक्षाणि स्वर्णटङ्कानामर्द्धचर्द्धानि त्रयोदश । वृतिदानं नियुक्तानां, ददते चक्रवर्त्तिनः ॥ ९२६ ॥
वासुदेवास्तु रौप्याणां, लक्षाः सार्द्धास्त्रयोदश । दद्युर्माण्डलिकाः सार्द्धास्त्रयोदश सहस्रकान् ॥ ९२७ ॥
अर्हदागमनोदन्तं, यदा यः कोऽपि शंसति । प्रीतिदानं तदा तस्मै, ददते चक्रवर्तिनः ॥ ९२८ ॥
कोटीस्त्रयोदशार्द्धचर्द्धाः, सौवर्णानां प्रमोदतः । वासुदेवास्तु रौप्याणां, कोटीः सार्द्धास्त्रयोदश ॥ ९२९ ॥
दद्युर्माण्डलिका रौप्यलक्षाः सार्द्धास्त्रयोदश । परेऽपि ददते लोकाः, शक्तिभक्त्युनुसारतः ॥ ९३० ॥
एवं विहृत्य भूपीठं, भव्यजीवान् विबोध्य च । निजायुः प्रान्तसमयेऽनशनं कुर्वते जिनाः ॥ ९३१ ॥
तदा केचिद्गणधराः, केचनान्येऽपि साधवः । कुर्वन्त्यनशनं सार्द्धं, स्युः प्राप्तावसरा यदि ॥ ९३२ ॥
ततोऽधिरुह्य शैलेशीं, सर्वकर्मक्षयक्षणे । संप्राप्य शाश्वतं स्थानं, निर्बाधाः सुखमासते ॥ ९३३ ॥
क्षणं तदान्धकारः स्याद्यतो लोके भवेत्तमः । विच्छेदे जिनतद्धर्मपूर्वश्रुतहविर्भुजाम् ॥ ९३४ ॥
तत्रैव समये सर्वे, देवेन्द्राश्चलितासनाः । ज्ञात्वाऽर्हन्निर्वृतिं ज्ञानाद्वदन्त्येवं विषादिनः ॥ ९३५ ॥
हा ! निर्वृता जगन्नाथा, जगद्दीपनभास्कराः । तदस्माभिर्द्रुतं कार्यस्तन्निर्वाणमहोत्सवः ॥ ९३६ ॥
इत्युक्त्वा पादुके त्यक्त्वा, पूर्ववद्विधिपूर्वकम् । तत्रस्था एव वन्दन्ते, भावतो जिनभूघनान् ॥ ९३७ ॥
निर्जीवान्यपि वन्दन्ते, वपूंषीन्द्रा यदर्हताम् । तदर्हद्द्रव्यनिक्षेपो, वन्द्यः सम्यग्दृशामिति ॥ ९३८ ॥
सामानिकादिनिःशेष, परिच्छदसमन्विताः । ततस्ते दिव्यया गत्या, निर्वाणस्थानमर्हताम् ॥ ९३९ ॥
उपेत्याश्रुविमिश्राक्षा, विषादविधुराननाः । निरानन्दा निरुत्साहाः, शोचन्तश्च मुहुर्मुहुः ॥ ९४० ॥
तिस्रः प्रदक्षिणाः कृत्वा, नत्वा च भगवत्तनूः । नात्यासन्ना नातिदूरदेशस्थाः पर्युपासते ॥ ९४१ ॥
धर्मभृत्यान् कुतो नास्मानीक्षसे नाथ ! पूर्ववत् । अकाण्डेऽयं किमारब्धस्त्यागोऽस्माकं निरागसाम् ? ॥ ९४२ ॥
किमात्मंभरिता युक्ता, विश्वेशानां भवादृशाम् ? अनन्तसुखसाम्राज्यं, भुज्यतेऽस्मान् विहाय यत् ॥ ९४३ ॥
वयं क्वयामः ? किं कुर्मो ? व्याकुलाश्चिन्तयाऽनया । त्यजतैकपदे स्वामिन् !, निरालम्बाः कृतास्त्वया ॥ ९४४ ॥
अद्यारभ्यमिदं नाथ !, जातं क्षेत्रं त्वया विना । निश्यस्तदीपगृहवद्, गतादित्यान्तरिक्षवत् ॥ ९४५ ॥
स्वामिन् ! भवन्तं समवसरणस्थं महाश्रियम् । स्मारं स्मारं मुहुर्वक्षो, दीर्यते शतधाऽद्य नः ॥ ९४६ ॥
भवान् यद्यपि हे स्वामिन्ननन्तसुखभागभूत् । विशोचामस्तथाप्येवं, वयं स्वार्थाय केवलम् ॥ ९४७ ॥

शक्रोऽथ विलपन्नेवं, निर्जरैराभियोगिकैः । गोशीर्षचंदनैर्धांसि, बहून्याहरयेद्व्रयात् ॥ ९४८ ॥
ततस्तैर्नन्दनानीतैश्चन्दनौघैश्चितात्रयम् । अर्हतां च गणीनां च, कारयेद्यतिनामपि ॥ ९४९ ॥
तत्र प्राच्यां भगवतां, चिता भवति वर्त्तुला । याम्यां गणभृतां त्र्यस्रा, प्रतीच्यां यतीनां पुनः ॥ ९५० ॥
चतुरस्रा भवेच्चित्या भेदः संस्थानदिग्भवः । श्रीआवश्यकवृत्त्यादौ, चितीनामिति दर्शितः ॥ ९५१ ॥
ततः क्षीरार्णवानीतैः, क्षीरैर्भगवतां तनूः । स्नपयित्वाऽथ गोशीर्षचन्दनेनानुलिप्य च ॥ ९५२ ॥
परिधाप्योत्तमं हंसलक्षणं पटशाटकम् । वज्रभृत्कुरुते भक्त्या, सर्वालङ्कारभूषिता ॥ ९५३ ॥
अन्ये च देवा गणभृद्वपूंषि विधिनाऽमुना । परे मुनिशरीराणि, स्नपयन्त्यर्चयन्ति च ॥ ९५४ ॥
अथेन्द्रवचनात्तिस्रः, शिबिकाः कुर्वते सुराः । तत्रैकस्यां जिनाङ्गानि, शक्रः स्थापयति स्वयम् ॥ ९५५ ॥
गणीनां च मुनीनां च, परस्मिन् शिबिकाद्वये । स्थापयन्ति परे देवास्ततः शक्रसुरा अपि ॥ ९५६ ॥
भक्त्या स्वस्कन्धमारोप्य, शिबिकाः समहोत्सवम् । स्थापयन्त्यर्हदादीनां, देहांश्चित्यात्रये क्रमात् ॥ ९५७ ॥
ततः शक्राज्ञया वह्निकुमाराः साश्रुलोचनाः । विमनस्काः क्षिपन्त्यग्निं, चित्यासु तिसृषु क्रमात् ॥ ९५८ ॥
तथैव च ततो वायुकुमाराः स्वःपतेर्गिरा । द्रुतमुज्ज्वालयन्त्यग्निं, पवमानैर्विकुर्वितैः ॥ ९५९ ॥
ततश्चतुर्विधा देवा, आज्ञप्ता वज्रपाणिना । तुरुष्ककाकतुण्डादिभारान् सारान् सहस्रशः ॥ ९६० ॥
कुम्भान् मधुघृतानां च, जुहुयुर्वह्निदीप्तये । ततोऽङ्गेष्वस्थिशेषेषु, संस्कृतेषु हविर्भुजा ॥ ९६१ ॥
निर्वापयन्ति जीमूतकुमारा वासवाज्ञया । क्षीरोदादाहृतैः क्षीरकल्पनीरैश्चिताश्च ताः ॥ ९६२ ॥
ततश्च—याम्यामूर्ध्वस्थां जिनानां, दाढां गृह्णाति वज्रभृत् । चमरेन्द्रोऽधस्तनीं तां, तत्तद्दिश्याधिपत्यतः ॥ ९६३ ॥
वामामुपरिगां दाढामिन्द्रो गृह्णाति शूलभृत् । बलीन्द्रश्चाधस्तनीं तां, शेषाः सर्वे सुरासुराः ॥ ९६४ ॥
अस्थीन्यथाङ्गेषाङ्गानां, सर्वाण्याददते मुदा । अर्हद्भक्त्यनुरागेण, केचित्केचिच्च जीतयः ॥ ९६५ ॥
पूर्वं माहात्म्यमेतेषां, क्षेत्रलोके निरूपितम् । ग्रन्थान्तरे प्रसिद्धोऽयमपि हेतुर्निशम्यताम् ॥ ९६६ ॥
"पूअंति सुरा ताओ अहं कोइ पराभवं जइ करेज्जा । तो पक्खालिअ ताओ सलिलेण करंति निअरक्खं" ॥
आस्तां त्रिजगदर्च्यानामस्थिग्रहणमर्हताम् । सुरा आददतेऽस्थीनि, योगभृच्चक्रिणामपि ॥ ९६७ ॥
इत्यर्थतो जंबूद्विपप्रज्ञप्तिवृत्तौ ।
चिताभस्मापि गृह्णन्ति, शेषं विद्याधरादयः । सर्वोपद्रवनिर्नाशविधौ परममौषधम् ॥ ९६८ ॥
रजस्यपि गृहीतेऽस्मादहंपूर्विकया नरैः । गर्त्ता भवत्यख्यातैव, चितास्थाने ततोऽर्हताम् ॥ ९६९ ॥
मा भूदपरलोकांहिस्पर्शादाशातनेत्यथ । सातत्येन च तीर्थस्य, प्रवृत्तिर्भवतादिति ॥ ९७० ॥
रत्नैरापूर्य तां गर्त्तां, खचितं रत्नकाञ्चनैः । कारयत्यर्हतां चैत्यस्तूपं शक्रः सुरासुरैः ॥ ९७१ ॥
गणिनां च मुनीनां च, चित्यास्थानकयोरपि । शक्रः स्तूपौ कारयति, रत्नस्वर्णमणीमयौ ॥ ९७२ ॥

एवं चतुर्विधा देवा, निर्वाणस्य महोत्सवम् । यथोचितं विदधते, भक्तिनिर्भरचेतसः ॥ ९७३ ॥
ततो नन्दीश्वरे गत्वा, विधायाष्टाहिकोत्सवम् । यान्ति स्वस्वविमानेषु, यथास्वं भवनेषु च ॥ ९७४ ॥
सुधर्माख्यसभावर्त्तिचैत्यस्तम्भावलम्बिषु । समुद्गकेषु यान्यासन्नस्थीनि प्राक्तनार्हताम् ॥ ९७५ ॥
तान्यर्चयन्ति संस्थाप्य, सिंहासने समुद्गकान् । समुद्गकेषु तेष्वेव, सद्यस्कानि क्षिपन्ति च ॥ ९७६ ॥
ततोऽभ्यर्च्य पुनः स्तम्भे, लम्बयन्ति समुद्गकान् । चैत्यदैवतवत्तानि, नित्यमाराधयन्ति च ॥ ९७७ ॥
इदमर्थतः षष्ठाङ्गसूत्रवृत्तौ मल्लिनिर्वाणाधिकारे
सभायां च सुधर्मायां, तेषामाशातनाभिया । कामक्रीडां न कुर्वन्ति, जिनभक्ताः सुराधिपाः ॥ ९७८ ॥
कालेन कियता चैते, गतशोकाः सुरेश्वराः । गीतानाट्यादिसौख्यानि, भुञ्जानाः सुखमासते ॥ ९७९ ॥

इत्यनन्तगुणरत्नशालिनामर्हतामुदितमागमोदधेः ।
वर्णनं तदुरुवर्णवर्णिकाकर्णिकारविपिनप्रसूनवत् ॥ ९८० ॥

विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र वर्णितजगत्तत्त्वेऽद्भुतास्त्रिंशता, संख्यातः परिपूर्णभावमभजत्सर्गो निसर्गोज्ज्वलः॥ ९८१ ॥

॥ इति श्रीलोकप्रकाशे त्रिंशत्तमः सर्गः समाप्तः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

॥ अथैकत्रिंशत्तमः सर्गः ॥

स्वरूपमर्हतामेवमुक्तं शास्त्रानुसारतः । अथोच्यते यथाशास्त्रं, स्वरूपं चक्रवर्त्तिनाम् ॥ १ ॥
शृङ्खलाग्राहिकया कर्म, चक्रवर्त्तित्वसाधनम् । पृथग् यद्यपि न प्रोक्तं, तीर्थकृन्नामकर्मवत् ॥ २ ॥
तथापि—तीव्रानुभागं यत्सातवेदनीयं घनाणुकम् । उच्चैर्गोत्रं तथोत्कृष्टं, नामकर्मापि तादृशम् ॥ ३ ॥
लाभभोगादिविघ्नानां, क्षयोपशमपाटवम् । इत्यादिभिस्समुदितैर्जायते चक्रवर्त्तिता ॥ ४ ॥
पूर्वोक्तविंशतिस्थानान्तर्गतैरेव कैश्चन । साधुवैयावृत्यदानसत्तपःसंयमादिभिः ॥ ५ ॥
विशिष्टाध्यवसायेन, सातवेद्यादिकर्मणाम् । तादृशः स्यात्परीणामः, प्राग्जन्मन्यार्षभेरिव ॥ ६ ॥

तथोक्तमावश्यकनिर्युक्तौ "बिइओ वेयावच्चं किइकम्मं तइयओ कासि । भोगफलं बाहुबलं" ॥ इति.

तीर्थकृन्नामहेतूनां, स्थानानां ननु विंशतेः । कथं चक्रित्वहेतुत्वं, पटहेतुत्ववन्मृदः ? ॥ ७ ॥
अत्रोच्यते—
यथैकस्माद्रसादिक्षोर्नानाखण्डगुडादयः । स्युः सामग्रीभिदाऽत्रापि, तथा सम्यग्विभाव्यताम् ॥ ८ ॥

स्युर्यथा वैकजातीयतन्तुभ्यो विविधाः पटाः । तेषामेव वस्त्रा स्यात्सामग्र्यन्तरभेदतः ॥ ९ ॥
एवं बलत्वविष्णुत्वनृपत्वादिपदेष्वपि । भाव्यः कर्मपरिणामोऽध्यवसायविशेषतः ॥ १० ॥
उद्धृत्य सर्वदेवेभ्यो, धर्माया एव च क्षितेः । उत्पद्यतेऽङ्गिनश्चक्रितया नान्यगतेः पुनः ॥ ११ ॥

तथोक्तं–"सुरनेरइएहिं चि य हवंति हरिअरिहचक्किबलदेवा । चउविहसुरचक्किबला वेमाणिअ हुंति हरिअरिहा" ॥ [बृहत्संग्रहणी गा. २६३]

इति संग्रहण्याद्यभिप्रायः । श्री आवश्यकनिर्युक्तौ तु–मनुष्यगतेरागतस्यापि श्रीवीरस्य प्राग्भवे चक्रित्वमुक्तं, तथाहि–"चुलसीइमप्पइट्ठे सीहो नरएसु तिरियमणुएसु । पिअमित्तचक्कवट्टी मूअविदेहाइचुलसीए[1]" ॥ इति ज्ञेयं. [श्लो. ४४८]

तीर्थंकरवदेतेऽपि जातिगोत्रोन्नतिस्पृशाम् । वंशेषु भूभृतामेवोत्पद्यन्ते न त्वनीदृशाम् ॥ १२ ॥
तद्धच्चतुर्दशस्वप्नसूचितोत्पत्तयः क्रमात् । जायन्ते जनकोन्नीतप्रौढजन्ममहोत्सवाः ॥ १३ ॥
अर्हद्धन्नाकनरकागतयोश्चक्रिणोः प्रसूः । पश्यति द्वादशे स्वप्ने, विमानभवने क्रमात् ॥ १४ ॥
धात्र्येकाऽधिकृता स्तन्ये, द्वे मज्जनविभूषयोः । अन्योत्सङ्गार्पणे नित्यं, परा च क्रीडनादिषु ॥ १५ ॥
एवं च–धात्रीभिः पञ्चभिः पाल्यमानाः कृतोचिताह्वयाः । ते सुखेनैव वर्द्धन्ते, नन्दनस्वर्द्रुमा इव ॥ १६ ॥
साक्षीकृत्य कलाचार्यमधीताखिलवाङ्मयाः । प्राप्तशेषकलाश्च स्युः, शस्त्रशास्त्रविशारदाः ॥ १७ ॥
आद्यसंहनना आद्यसंस्थानाः प्राप्तयौवनाः । लक्षणानां सहस्रेणाष्टोत्तरेण विराजिताः ॥ १८ ॥
लोमभिर्दक्षिणावर्त्तैः, रचितेनाधिकश्रिया । महापुरुषचिह्नेन, श्रीवत्सेनाप्तवक्षसः ॥ १९ ॥

तथोक्तं श्रीजम्बूद्वीपप्रज्ञप्तिसूत्रे भरतचक्रिवर्णने–'पसत्थलोमविरइयसिरिवच्छलंछणविउलवच्छदेसे ।' इति.

षट्त्रिंशता नृपगुणैस्ते प्रशस्तैरलङ्कृताः । राज्यं क्रमाद्धर्द्धमानं, पालयन्ति क्रमागतम् ॥ २० ॥

षट्त्रिंशतं नृपगुणांश्चैवमाहुः—

अव्यङ्गे १ लक्षणैः पूर्णो २, रूपसंपत्तिभृत्तनुः ३ । अमदो ४ जगदोजस्वी ५, यशस्वी च ६ कृपालुहृत् ७ ॥
कलासु कृतकर्मा च ८, शुभ्रराजकुलोद्भवः ९ । वृद्धानुग १० स्त्रिशक्तिश्च ११, प्रजारागी १२ प्रजागुरुः१३ ॥
समर्थनः पुमर्थानां, त्रयाणां सममात्रया १४ । कोशवान् १५ सत्यसन्धश्च १६, चरदृग् १७ दूरमन्त्रदृग् १८ ॥
आसिद्धि कर्मायोगी च १९, प्रवीणः शस्त्र २० शास्त्रयोः २१ । निग्रहा २२ नुग्रहपरो २३, निर्लंचं दुष्टशिष्टयोः ॥
उपायार्जितराज्यश्री २४–र्दानशौण्डो २५ ध्रुवंजयी २६ । न्यायप्रियो २७ न्यायवेत्ता २८, व्यसनानां व्यपासकः २९ ॥

---

१. तिरियमणुएसु इति भवभ्रमणोपलक्षणं, तेन मध्ये सुरनारकभवत्वेऽपि न क्षतिः, सप्तविंशतेर्भवेभ्योऽधिकत्वं तूभयथापि, न हि चरितानुवादो विधेर्निलोठकतया वक्तुं युक्तः ।

अवार्यवीर्या ३० गाम्भीर्या ३१–दार्य ३२ चातुर्य ३३ भूषितः । प्रणामावधिकक्रोधः ३४, तात्त्विकः ३५ सात्त्विको ३६ नृपः ॥

तथा च सूत्रं–'छत्तीसाहि च पत्थिवगुणेहिं संजुत्ते' इति.

एवं गच्छति कालेऽस्य, प्रादुर्भवति कर्हिचित् । चक्रमायुधशालायां, प्राच्यं पुण्यमिवाङ्गभृत् ॥ २१ ॥
इदं प्रायोऽस्त्रशालायां, स्यादन्यत्रापि कस्यचित् । यथाऽभवत्सुभूमस्य, स्थालमेव तदात्मकम् ॥ २२ ॥
ततश्चायुधशालाया, अध्यक्षो मुदिताशयः । चक्ररत्नं नमस्कृत्य, निवेदयति भूपतेः ॥ २३ ॥
तदाकर्ण्य प्रमुदितस्तदाशाऽभिमुखं नृपः । पदान्युपेत्य सप्ताष्टौ, चक्ररत्नं नमस्यति ॥ २४ ॥
प्रीतिदाने मौलिवर्जं, दत्ते सर्वाङ्गभूषणम् । वित्तं चास्मै जीविकार्हं, सत्कारार्हांशुकादि च ॥ २५ ॥
ततः स्नात्वाऽऽत्तसर्वार्चार्हद्रव्यः सपरिच्छदः । उपेत्यायुधशालायां, विधिना चक्रमर्चति ॥ २६ ॥
ततः सोऽष्टादश श्रेणीराहूयेत्यादिशेत्पुरे । महिम्ने चक्ररत्नस्य, कुरुताष्टाहिकोत्सवम् ॥ २७ ॥
अर्हत्पितृकृतो योऽर्हज्जन्मन्युक्तो महोत्सवः । यथार्हं सोऽनुसंधेय, इहाप्यष्टाहिकोत्सवे ॥ २८ ॥

अष्टादश श्रेणीश्चैवमाहुः—

कुंभार १ पट्टइल्ला २ सुवण्णकारा य ३ सूवकारा य ४ । गन्धव्वा ५ कासवगा ६ मालाकारा य ७ कच्छकरा ॥
तंबोलिया य ९ एए नवप्पयारा य नारुआ भणिया । अह णं णवप्पयारे कारुअवण्णे पवक्खामि ॥
चम्मयर १ जंतपीलगा २ गंछिय ३ छिंपयग ४ कंसकारा य । सीवग ६ गुआर ७ भिल्ला ८ धीवर ९ वण्णाइं अट्ठदस ॥

चित्रकारादयस्त्वेष्वेवान्तर्भवन्ति.

मुदा पौरजनैः कृप्ते, समाप्तेऽष्टाहिकोत्सवे । निर्गत्यायुधशालायाश्चक्ररत्नं महोज्ज्वलम् ॥ २९ ॥
व्योम्ना संचरते दिव्यवाद्यवाचालिताम्बरम् । अधिष्ठितं सहस्रेण, यक्षाणां वीक्षितं जनैः ॥ ३० ॥
नगर्यास्तच्च निर्गत्य, प्रतिपक्षभयङ्करम् । प्रतिष्ठते मागधाख्यतीर्थाभिमुखमुद्धतम् ॥ ३१ ॥
ततश्चक्र्यपि सन्नह्य, चतुरङ्गचमूवृतः । अनुगच्छति तच्चक्रं, भेरिमुखरिताम्बरः ॥ ३२ ॥
प्रमाणाङ्गुलजातैकयोजनप्रमितां भुवम् । अतिक्रम्य स्थितं तच्च, प्रयाणस्यादिमेऽहनि ॥ ३३ ॥
क्षेत्रमेतावदेवातिक्रामति प्रतिवासरम् । सुखिनो हि तथैव स्युर्बहुसैन्यचमूचराः ॥ ३४ ॥
चक्रिणां भरतादीनां, महादेहा नरादयः । सुखेन क्षेत्रमेतावन्निर्वहन्ति स्वशक्तितः ॥ ३५ ॥
चक्रिणामितरेषां तु, हीयमानाङ्गशक्तयः । इयत्क्षेत्रं निर्वहन्ति, नित्यं दैवतशक्तितः ॥ ३६ ॥
अनुगङ्गासरित्कूलं, गच्छन् दक्षिणपार्श्वतः । तत्रत्यान् सेवकीकुर्वन्, देशग्रामपुराधिपान् ॥ ३७ ॥
प्रतीच्छन् प्राभृतान्येषामनुयातश्च तैर्नृपैः । आरान्मागधतीर्थस्य, स्कन्धावारं निवेशयेत् ॥ ३८ ॥
नवयोजनविस्तीर्णो, द्वादशयोजनायतः । स्कन्धावारो भवत्यस्य, राजधानीसमस्थितिः ॥ ३९ ॥
अथ वार्द्धकिरत्नं स, समाहूयेति शंसति । कुरु पौषधशालां न, आवासं च महाद्भुतम् ॥ ४० ॥

ततः पौषधशालायां, सोत्तीर्य जयकुञ्जरात् । प्रविश्य संस्तरे दार्भे, निषीदति कृताष्टमः ॥ ४१ ॥
ब्रह्मचारी विमुक्तान्यव्यापारस्त्यक्तभूषणः । मागधेशं स्मरत्येकचित्तोऽस्मिन् पौषधत्रये ॥ ४२ ॥
यस्तु चक्री जिनस्तस्य, नाष्टमेन प्रयोजनम् । स्मृतिमात्रादसौ कम्प्रासनस्तमुपतिष्ठते ॥ ४३ ॥

यदाहुः श्रीहेमसूरयः श्रीशान्तिचरित्रे– "ततो मागधतीर्थाभिमुखं सिंहासनोत्तमे । जिगीषुरप्यनाबद्धविकारो न्यषदत्प्रभुः ॥ ततो द्वादशयोजन्या, तस्थुषो मागधेशितुः । सिंहासनं तदा सद्यः, खड्गपादमिवाचलत् ॥ " इत्यादि. [त्रिषष्ठिशलाका. पर्व. ५, सर्ग. ५. श्लो. १३३, १३४]

अथ प्रकृतं–ततश्चतुर्विधाहारे, संपूर्णे पौषधत्रये । प्रातस्ततः परिहितचारुनेपथ्यभूषणः ॥ ४४ ॥
रथं सांग्रामिकं सज्जायुधमध्यास्य चक्रभृत् । दीप्रोऽग्रे चक्ररत्नेन, चमूचक्रैश्च पृष्ठतः ॥ ४५ ॥
शब्दाद्वैतं जगत्कुर्वन्, प्रवाह इव वारिधेः । तीर्थेन मागधेनान्तःपयोधि प्रविशत्यथ ॥ ४६ ॥
रथाङ्गनाभिद्वयसे, गत्वा जलनिधेर्जले । रथं संस्थाप्य कोदण्डमादत्तेऽरिमदापहम् ॥ ४७ ॥
सट्टङ्कस्थमारोप्य, प्रत्यञ्चां तत्र योजयेत् । निजनामाङ्कितं बाणं, रिपुघ्नं देवताश्रितम् ॥ ४८ ॥
वैशाखमाश्रयेत्स्थानं, वेध्यवेधनकोविदः । स्थानानामिह पञ्चानामिदमेव यदर्हति ॥ ४९ ॥

पञ्चस्थानानि चैवं–स्थानान्यालीढ १ वैशाख २–प्रत्यालीढानि ३ मण्डलं ४ । समपादं ५ चेति.

वैशाखस्थानलक्षणं चैवमाहुः— "पादौ कार्यौ सविस्तारौ, समहस्तप्रमाणतः । वैशाखस्थानके वत्स !, कूटलक्ष्यस्य वेधने" ॥

अन्तस्थांश्च बहिःस्थांश्च, बाणाधिष्ठायकान् सुरान् । प्रणमाम्यद्य ते सन्तु, सहाया मे द्विषज्जये ॥ ५० ॥
बाणाधिष्ठातृदेवानां, वश्यानामपि या नतिः । उचिता साऽधुना शस्त्रभृतां शस्त्रार्चनादिवत् ॥ ५१ ॥
इत्युक्त्वाऽऽकर्णमाकृष्य, मुक्तस्तेन शरो द्रुतम् । शक्रमुक्तः पविरिव, याति द्वादशयोजनीम् ॥ ५२ ॥
तत्र मागधदेवस्य, गत्वा पतति पर्षदि । भुञ्जानस्य सुखं स्वैरं, दिव्यनाट्यानि पश्यतः ॥ ५३ ॥
सौत्पातिकं तमालोक्य, धूमकेतुमिवोदितम् । भ्रकुटीभीषणो वक्ति, क्रोधाहंकारदुर्द्धरः ॥ ५४ ॥
मुमूर्षुरेष को मूर्खो, यमातिथ्यमपेक्षते । भुजङ्गास्ये करमिव, योऽक्षिक्षेप शरं मयि ? ॥ ५५ ॥
आसनाद्द्रुतमुत्थाय, रोषावेशवशंवदः । यावद्बाणं तमादाय, पश्यति क्रूरया दृशा ॥ ५६ ॥
तावच्चक्रभृतो नामवर्णाली तस्य पश्यतः । शाम्यति क्रुध् विषमहेः, शृण्वतो जाङ्गुलीमिव ॥ ५७ ॥
विमृशत्येवमुत्पन्नः, क्षेत्रेऽस्मिंश्चक्रवर्त्यसौ । तज्जीतमेतदस्माभिर्मान्यमस्यानुशासनम् ॥ ५८ ॥
अविमृश्योनपुण्येन, कोपोऽकारि वृथा मया । इदं नियतमेवामी, स्वामिनः सेवका वयम् ॥ ५९ ॥
विलम्ब्य तदलं स्वामी, पूज्योऽयमतिथिर्मम । निश्चित्येत्युपदां हारकोटीरकटकादिकाम् ॥ ६० ॥
चिरसंचितरत्नादि, सद्वस्तून्यपराण्यपि । उपादाय शरं तं च, तीर्थस्यास्य च मृज्जले ॥ ६१ ॥

उत्पतन् दिव्यया गत्या, द्रागुपागत्य चक्रिणम् । तत्सर्वं प्राभृतीकृत्य, नत्वा विज्ञपयत्यदः ॥ ६२ ॥
स्वामिन् ! मागधतीर्थान्तमिदं क्षेत्रं त्वया जितम् । अहं त्वत्किङ्करोऽस्मीह, प्रदेशस्यास्य रक्षकः ॥ ६३ ॥
अथ चक्री तदादाय, प्राभृतं प्रीतमानसः । सत्कृत्य बहुमानेन, मागधेशं विसर्जयेत् ॥ ६४ ॥
सर्वेषामपि तीर्थानां, ये चाधिष्ठायकाः सुराः । जात्या नागकुमारास्ते, चक्रिवश्या महर्द्धिकाः ॥ ६५ ॥

तथोक्तं जंबू० प्र० सूत्रवृत्तौ–"कुमारपदवाच्यत्वं चास्य नागकुमारजातीयत्वादिति" ।

ततो रथं परावर्त्त्य, स्वमावासमुपेत्यसौ । वाद्यमानजयातोद्यस्त्रिजगत्प्रसरद्यशाः ॥ ६६ ॥
ततः स्नात्वा जिनार्चाश्चार्चयित्वा कृतपारणः । प्रकृतीः प्राग्वदाहूयादिशत्यष्टाहिकोत्सवम् ॥ ६७ ॥
ततो मागधदेवस्य, संपूर्णेऽष्टाहिकोत्सवम् । जाग्रज्ज्योतिर्जगज्जैत्रं, चक्ररत्नं प्रतिष्ठते ॥ ६८ ॥
वरदामाभिधं तीर्थं, शुद्धदक्षिणदिक्स्थितम् । याति साधयितुं चक्रं, पथा नैर्ऋतगामिना ॥ ६९ ॥

तथोक्तं–"आउहघरसालाओ पडिनिक्खमित्ता दाहिणपच्चत्थिमं दिसिं वरदामतित्थाभिमुहे पयाए यावि होत्थत्ति ।"

ततश्चमूपरिवृतश्चक्रवर्त्त्यपि पूर्ववत् । अनुगच्छति तच्चक्रमिवाङ्गी कर्मणां फलम् ॥ ७० ॥
वर्द्धमानचमूर्भूपैर्विजित्य स्वीकृतैः पथि । दुर्वारप्रसरः प्रौढप्रवाह इव सैन्धवः ॥ ७१ ॥
प्रयाणकानि कतिचिद्गत्वा नैर्ऋतसंमुखम् । ततोऽपाचीमनुसरन्, वरदामं प्रयाति सः ॥ ७२ ॥
वरदामान्तिके प्राग्वत्, स्कन्धावारं निवेश्य सः । साधयेद्वरदामेशं, देवं मागधदेववत् ॥ ७३ ॥
वरदामाधिपस्याथ, संपूर्णेऽष्टाहिकोत्सवे । जेतुं प्रभासतीर्थेशं, चक्रं चरति पूर्ववत् ॥ ७४ ॥
स्थितं शुद्धप्रतीच्यां तद्वायव्यविदिगध्वना । चक्रं प्रवर्त्तते गन्तुं, प्रत्यक् च वलते पुरः ॥ ७५ ॥
वशीकृत्य प्रभासेशं, पूर्वोक्तविधिना ततः । तत्सिन्धुदेवीभवनाभिमुखं परिसर्पति ॥ ७६ ॥
सिन्धोर्दक्षिणकूलेन, पूर्वदिग्गामिनाऽध्वना । गत्वाऽभ्यर्णं सिन्धुदेवीभवनस्याशु तिष्ठति ॥ ७७ ॥
ननु च–सिन्धुदेव्यास्तु भवनं, भरतस्योत्तरार्द्धके । सिन्धुकुण्डेऽस्ति तद्द्वीपे, कथं तस्यात्र संभवः ? ॥ ७८ ॥
अत्रोच्यते–महर्द्धिकानां वेश्मानि, स्थाने स्थाने भवन्ति हि । इन्द्राणीनां राजधान्यो, यथा नन्दीश्वरादिषु ॥ ७९ ॥
ततः सिन्धुद्वीपवर्त्तिभवनादपरं खलु । इदं भवनमभ्यूह्यं, सिन्धुदेव्या महाश्रियः ॥ ८० ॥
निवेश्य चक्रभृत्तत्र, स्कन्धावारं यथाविधि । कृताष्टमतपाः सिन्धुदेवीं मनसि चिन्तयेत् ॥ ८१ ॥
साथ कम्प्रासना दत्तोपयोगा चक्रवर्त्तिनम् । ज्ञात्वोत्पन्नमुपादायोपदां तमुपतिष्ठते ॥ ८२ ॥
एवं च सिन्धुदेवीवद्वैताढ्यादिसुरा अपि । शरमोक्षं विनैव स्युरनुकूलाश्चलासनाः ॥ ८३ ॥
कुम्भानां रत्नचित्राणामष्टोत्तरसहस्रकम् । नानामणिस्वर्णरत्नचित्रं भद्रासनद्वयम् ॥ ८४ ॥
कटकत्रुटीतादीनि, भूषणान्यपराण्यपि । चक्रीत्यादिकमादत्ते, सिन्धुदेव्योपदीकृतम् ॥ ८५ ॥

अहं त्वद्देशवास्तव्या, तवास्म्याज्ञप्तिकिङ्करी । इत्युक्त्वा प्रणिपत्यास्यां, गतायां सोऽत्ति पूर्ववत् ॥ ८६ ॥
अष्टाहिकोत्सवान्तेऽस्या, ऐशानीगामिनाऽध्वना । वैताढ्यकटकाभ्यर्णमेति चक्रानुगोऽथ सः ॥ ८७ ॥
सिन्धुदेवीभवनतो, जेतुं वैताढ्यनिर्जरम् । वैताढ्यकूटगमने, ऋजुर्मार्गोऽयमेव हि ॥ ८८ ॥
कटके दाक्षिणात्येऽस्य, कटके स्थापितेऽमुना । अष्टमे च कृते सिंहासनं चलति तद्विभोः ॥ ८९ ॥
दत्तोपयोगो वैताढ्यकुमाराख्यः सुरोऽथ सः । गृहीत्वा प्राभृतं तादृगभिगच्छति चक्रिणम् ॥ ९० ॥
आज्ञां स्वीकृत्य नत्वाऽथ, सुरेऽस्मिन् गतवत्यथ । अष्टाहिकोत्सवान्तेऽस्य, चक्री चक्रानुगस्ततः ॥ ९१ ॥
गुहां तमिस्रामभ्येति, प्रतीचीगामिनाऽध्वना । वैताढ्यकूटोपान्ताद्धि, प्रतीच्यामेव सा गुहा ॥ ९२ ॥
गुहायाश्च तमिस्रायाः, स्थापयित्वाऽन्तिके चमूम् । नाकिनं चिन्तयत्येष, कृतमालं कृताष्टमः ॥ ९३ ॥
जिगीषुं सोऽपि विज्ञाय, चक्रिणं चलदासनः । ढौकयत्येत्य विनमन्नलङ्कारांश्चतुर्दश ॥ ९४ ॥

ते चैवं–"हार द्धहार इग कणय – रयण मुत्तावली उ केउरे । कडए तुडिए मुद्दा कुंडल उरसुत्त चूलमणि तिलयं" ॥

अलङ्कारानुपादाय, स्त्रीरत्नस्योचितानिमान् । विसर्जयति सत्कृत्य, कृतमालं नरेश्वरः ॥ ९५ ॥
अथोत्सवे समाप्तेऽस्य, सार्वभौमः समादिशेत् । सेनानीरत्नमाहूय, सिन्धुनिष्कुटसाधनम् ॥ ९६ ॥
सिन्धुः स्यात्तस्य खण्डस्य, पूर्वदक्षिणयोर्दिशोः । उत्तरस्यां च वैताढ्यः, प्रतीच्यां लवणोदधिः ॥ ९७ ॥
यद्यप्येभिस्त्रिभिः कॢप्तं, मध्यखण्डात्तथाप्यदः । सिन्ध्वा पृथक्कृतं तस्मात्सिन्धुनिष्कुटमुच्यते ॥ ९८ ॥
स चर्मरत्नमादाय, चतुरङ्गचमूवृतः । प्रस्थानं कुरुते तत्र, द्वितीय इव चक्रभृत् ॥ ९९ ॥
गर्जद्भूर्जितनिःस्वानध्वानध्वस्तेतरध्वनिः । अनूदितजयारावः, क्षुण्णैर्द्विविधभूधरैः ॥ १०० ॥
जयकुञ्जरमारूढः, सच्छत्रश्चलचामरः । कवचच्छन्नसर्वाङ्गो, मेघैर्वृत इवोडुपः ॥ १०१ ॥
चर्मरत्नेन सद्यानपात्रीभूतेन तेन सः । सिन्धुमुत्तीर्य शैलोच्चवीचीवलयदुस्तराम् ॥ १०२ ॥
तत्रत्यानां प्रतीपानां, चिकित्सक इवाद्भुतः । विरेकरुधिरस्रावव्रह्मिकर्मादिकोविदः ॥ १०३ ॥
दशाङ्गुल्यौषधीवर्गरसपानोपदेशकः । हरत्यस्त्रैः प्रतापोष्णैरौद्धत्यं सान्निपातिकम् ॥ १०४ ॥
एवं च–सिंहले यवनद्वीपे, नानाम्लेच्छाश्रयेष्विति । रोमाखालसण्डादिदेशेषु विविधेषु सः ॥ १०५ ॥
म्लेच्छाननेकजातीयान्, विजित्य रणकर्मठः । आज्ञामखण्डां सर्वत्र, प्रवर्त्तयति चक्रिणः ॥ १०६ ॥
चक्रवर्त्युचितान्येषां, प्राभृतानि सहस्रशः । जितकाशी समादाय, सिन्धुमुत्तीर्य पूर्ववत् ॥ १०७ ॥
भूरिभिः किङ्करीभूतैः, सेवितो म्लेच्छपार्थिवैः । वाचालजयवादित्रः, स्तूयमानोऽसकृज्जनैः ॥ १०८ ॥
उपेत्य चक्रिणं नत्वा, ढौकयित्वोपदाश्च ताः । विज्ञो विज्ञपयत्येवं, विनयेन कृताञ्जलिः ॥ १०९ ॥
स्वामिन् ! भवत्प्रसादेन, सिन्धुखण्डो जितो मया । भूपाः सर्वेऽपि तत्रत्या, मया त्वत्किङ्करीकृताः ॥ ११० ॥

एते नमन्ति ते केचिदिदं तेषां च ढौकनम् । प्रह्वीभूतेषु चैतेषु, कार्यः स्वामिन्ननुग्रहः ॥ १११ ॥
तदाकर्ण्य प्रमुदितश्चक्रवर्त्ती चमूपतिम् । सत्कृत्य वस्त्रालङ्कारैरनुजानाति वेश्मने ॥ ११२ ॥
ततः स्वावासमागत्य, स भुङ्क्ते कृतमज्जनः । ततश्च रमते स्वैरं, गीतसंगीतकादिभिः ॥ ११३ ॥
अथान्यदा कदाचित्तं, चक्रीत्याकार्य शंसति । वत्स ! गच्छ तमिस्राया, उद्घाटय कपाटकौ ॥ ११४ ॥
प्रमाणमाज्ञेत्यानम्य, स्वमन्दिरमुपेत्य च । कुर्यात्पौषधशालायां, साष्टमं पौषधत्रयम् ॥ ११५ ॥
आराध्य विधिनैवं च, कृतमालं गुहाधिपम् । दिने तुर्ये परिहितशुद्धनेपथ्यभूषणः ॥ ११६ ॥
आत्तपूजोपकरणोऽन्वीयमानो नृपादिभिः । दासीदासैश्च विविधपूजोपस्करपाणिभिः ॥ ११७ ॥
एत्य दर्यास्तमिस्रायाः, कपाटौ याम्यदिग्गतौ । प्रमृज्य लोमहस्तेनाभ्युक्षति प्रवरोदकैः ॥ ११८ ॥
चन्दनैश्चारुकर्पूरकस्तूर्यादिविमिश्रितैः । पूजयत्यम्बरैर्नानाविधैश्च सुमदामभिः ॥ ११९ ॥
धूपाधानमुपादाय, धूपमुत्क्षिपति स्वयम् । पञ्चवर्णप्रसूनानां, निकरं रचयेत्पुरः ॥ १२० ॥
मङ्गलान्यालिखत्यष्टौ, पुरो रजततण्डुलैः । पश्चाङ्गस्पृष्टभूपीठस्तौ कपाटौ नमत्यसौ ॥ १२१ ॥
प्रयुज्योपायभित्याद्यं, प्रयुयुक्षुरिवान्तिमम् । उदस्यति करेणोच्चैर्दण्डरत्नं चमूपतिः ॥ १२२ ॥
केवलं मार्दवोपेतो, मृद्यतेऽङ्गी मृदादिवत् । काठिन्यवांश्च दूरेण, त्यज्यते दृषदादिवत् ॥ १२३ ॥
मृदुत्वकठिनत्वाभ्यां, संगताभ्यां तु संगतः । गौरवं लभते लोके, जनो हीराङ्कुरादिवत् ॥ १२४ ॥
सामादिषु ततः श्रेष्ठावुपायावादिमान्तिमौ । न मध्यमौ तु कातर्यादित्यादि विमृशन्निव ॥ १२५ ॥
दृढघाताय सप्ताष्टावपसृत्य पदानि सः । त्रिस्ताडयति दण्डेन, बाढशब्दमथाररीम् ॥ १२६ ॥
कृताक्रन्दाविव क्रौञ्चारवदम्भेन तावथ । विघट्य पृथुवेगेन, तस्थतुः स्वस्वतोऽङ्के ॥ १२७ ॥
द्वयोः संहतयोः सिद्धिर्न स्यात्कार्यविरोधिनोः । इतीव भेदनीतिज्ञः, स कपाटौ व्ययोजयत् ॥ १२८ ॥

यश्चात्र द्वादशयोजनानि तुरगारूढः सेनापतिः शीघ्रमपसरतीत्यादिप्रवादः सोऽनागमिक इव लक्ष्यते.[1] इत्यावश्यकटिप्पनके ।

सोत्साहः कृतकार्योऽथ, चक्रभृच्चरणान्तिके। एत्य विज्ञपयत्येवं, सेनानी रचिताञ्जलिः ॥ १२९ ॥
वच्मि स्वामिन्नभीष्टं ते, तमस्रोद्घाटिता गुहा । उदीच्यभरतार्द्धस्य, मार्गोऽयं सुखदोऽस्तु वः ॥ १३० ॥
श्रुत्वेति मुदितश्चक्री, सत्कृत्य पृतनापतिम् । प्रस्थानं कुरुते सद्यः, सन्नद्धाशेषसैनिकः ॥ १३१ ॥
कुञ्जरं पर्वतप्रौढमारूढो मघवानिव । वज्रोपमां दधद्धेमसृणिं दिक्प्रसरघृणिम् ॥ १३२ ॥
याम्येभकुम्भन्यस्तेन, मणिरत्नेन शोभितः । गुहां विशति चक्रीशः, शशी घनघटामिव ॥ १३३ ॥

---

१. अनगामिकमेतदिति तात्पर्यं, तेन गृहोद्घटनेन तत्रत्यवातजनितोपद्रवरक्षणायापसरणेऽपि न क्षतिः निषेधस्तु तदुद्घटनशब्दभीत्यानापरणमिति ज्ञापनाय ।

मणिरत्नं च तद्भाति, कुम्भिकुम्भस्थले स्थितम् । खेर्बिम्बमिव ध्वान्तध्वंसि पूर्वाद्रिमूर्द्धनि ॥ १३४ ॥
तेन प्रकाशिताध्वासौ, द्वादशयोजनावधि । कुर्याद्भित्त्योर्मण्डलानि, काकिण्या रत्नमुख्यया ॥ १३५ ॥
अवस्थितप्रकाशानि, स्थिरमार्त्तण्डपङ्क्तिवत् । पान्थानां संचरिष्णूनामुपकुर्वन्ति तानि च ॥ १३६ ॥

मण्डलानां स्थितिसंख्यादिस्वरुपं च क्षेत्रलोके वैताढ्याधिकारे प्रोक्तमस्तीति ततो ज्ञेयम् ।

एकोनपञ्चाशन्मानैर्मण्डलैस्तैर्मतान्तरे । अष्टानवत्या स्यान्नित्यमध्याह्नं तद्गुहोदरम् ॥ १३७ ॥
अथ वार्द्धकिरत्नेन, सद्यः सञ्जितपद्यया । नद्यावृत्तीर्य निर्मग्नजलोन्मग्नजलाभिधे ॥ १३८ ॥
यावद्दर्या औत्तराहं, द्वारं गच्छति चक्रभृत् । तावत्कपाटौ तत्रत्यौ, स्वयमेवापसर्पतः ॥ १३९ ॥
हयहेषारवाकीर्णं, गजगर्जारवोर्जितम् । स्फुरद्रथघटत्कारैरुद्धतैर्धूतभूतलम् ॥ १४० ॥
छन्नाशेषनभोमार्गं, पताकाकेतुकोटिभिः । रणवादित्रनिर्घोषाटोपकम्पितकातरम् ॥ १४१ ॥
करालकवचास्त्रालिभीषणं भटकोटिभिः । दर्शनीयं च भूपालैः, सुरैरिव महर्द्धिकैः ॥ १४२ ॥
अगण्यं चक्रिणः सैन्यं, निर्गच्छत्कन्दरोदरात् । जानन्ति म्लेच्छभूपाला, नष्टैः पर्यन्तवासिभिः ॥ १४३ ॥
ततः सन्नह्य ते सर्वे, संभूय रणकर्मठाः । युध्यन्ते चक्रिसैन्येन, दत्तदैन्येन विद्विषाम् ॥ १४४ ॥
खड्गाग्रच्छिन्नमत्तेभगलद्रुधिरपिच्छिलम् । शिरोभिः स्यान्मिथश्छिन्नैः, स्थपुटं तत्र भूतलम् ॥ १४५ ॥
तत्र शत्रुराश्लेषपरावृत्ताः शरा निजम् । यान्त्याश्रयं सजातीयातिथ्यं कर्तुमिवोद्यताः ॥ १४६ ॥
भटाः केचिच्छरशतैर्भान्त्यापिच्छं वपुर्गतैः । उत्पन्नपक्षाः स्वर्गन्तुमिव संख्यमुखे हताः ॥ १४७ ॥
केचिन्निष्पिष्टरदनच्छदा हस्ताग्रवर्त्तिभिः । भटाः खड्गैर्विराजन्ते, मूर्त्ता वीररसा इव ॥ १४८ ॥
केचिद्घातशतोद्भिन्नैरन्त्रकैः कण्ठवर्त्तिभिः । विभान्ति वरणस्रग्भिरिव युद्धे जयश्रियाः ॥ १४९ ॥
कुट्टयन्ति द्विषां केचिन्मौलीन् कुट्टाकपाणयः । निरङ्कुशाः काननस्थसहकारानिवाध्वगाः ॥ १५० ॥
केचिच्च कन्दुकक्रीडोत्कटा इव महाभटाः । निर्लोठयन्ति भूपीठे, खड्गाग्रैर्वैरिमस्तकान् ॥ १५१ ॥
अन्ये च रिपुकुम्भीन्द्रानारोहन्ति हतद्विषः । सोपानीकृततद्दन्तमुशलाः कुशलाशयाः ॥ १५२ ॥
घनामपि द्विषत्सेनां, भिन्दन्ते केचिदायुधैः । शृङ्गैः शण्ढा मदोन्मत्ता, निम्नगायास्तटीमिव ॥ १५३ ॥
महिषा इव गाहन्ते, केचित्संग्रामपल्वलम् । आहत्य द्विण्मुखाब्जानि, पृथ्वीं पङ्किलयन्ति च ॥ १५४ ॥
जातायां तत्र रुधिरापगायां भटमौलयः । पद्मायन्ते तटायन्ते, मृतमत्तेभपङ्क्तयः ॥ १५५ ॥
चलन्मत्स्यकुलायन्ते, तरन्तः पतिताः शराः । खगायन्ते नभःस्थाश्च, भटमुक्ताः शरोत्कराः ॥ १५६ ॥
दन्तादन्तिप्रवृत्तेभयुद्धोद्यद्धुतभुक्कणाः । द्योतन्त इव खद्योतास्तत्र रेणुतमोघने ॥ १५७ ॥
घोरान्धकारे तत्राश्वखुरक्षुण्णरजोभरैः । विध्यन्ति रिपुमर्माणि, वीराः शब्दानुगैः शरैः ॥ १५८ ॥
कबन्धास्तत्र धावन्तः, पथि घ्नन्ति तरूनपि । प्रतिपक्षधिया खड्गैः, स्फूर्जद्धीररसोद्भटाः ॥ १५९ ॥

तत्र तूर्यारवोत्फुल्लपुलकोत्साहसाहसाः । वीरास्तृणाय मन्यन्ते, जीवितेन समं जगत् ॥ १६० ॥
यद्येवंविधसंग्रामे, परिभूयेत कर्हिचित् । अतुच्छविक्रमैर्म्लेच्छचक्रगैश्चक्रिणश्चमूः ॥ १६१ ॥
तदा सन्नह्य सेनानीर्योद्धुं प्रक्रमते दृढम् । तुरङ्गरत्नमारूढः, खड्गरत्नं करे दधन् ॥ १६२ ॥
एतस्मिन् युध्यमाने च, भज्यन्ते नाकिनो यदि । तदा के नाम ते म्लेच्छा, गजद्विषि वृका इव ?॥ १६३ ॥
अथासौ भटकोटीरस्तीव्रशस्त्रज्वराङ्कुशैः । कुक्षिक्षिप्तैः शमयति, प्रतिपक्षमदज्वरम् ॥ १६४ ॥
तदा च केचिन्नश्यन्ति, केचित्क्रन्दन्ति चार्दिताः । लुठन्ति केचिद्भूपीठे, तिष्ठन्त्यन्ये मृता इव ॥ १६५ ॥
केचित्त्यजन्ति शस्त्राणि, वस्त्राणीवास्तचेतनाः । क्षिपन्ति वदने केचिद्दीनवाचो दशाङ्गुलीः ॥ १६६ ॥
तृणान्याधाय दन्तेषु, याचन्ते जीवितं परे । लज्जाविलक्षाः शोचन्ति, चेति केचिदधोमुखाः ॥ १६७ ॥
हा गतं राज्यमस्माकं, हा गता स्वैरचारिता । ते धन्याः प्राप्विपन्ना ये, धिगस्मान् दुःखदर्शिनः ॥ १६८ ॥
अश्लाघामहि ये शौर्यमात्मीयं योषितां पुरः । ते कथं कातरास्तासां, मुखं दर्शयितास्महे ? ॥ १६९ ॥
वृथाभूद्दोर्मदोऽस्माकं, वृथाभूच्छस्त्रकौशलम् । भग्नैः कथमथ स्थेयमस्माभिर्भटपर्षदि ॥ १७० ॥
विषण्णा इति ते स्वेष्टदेवाननुस्मरन्ति चेत् । तदा ते बोधयन्त्येवं, खिद्यध्वे किं जडा मुधा ? ॥ १७१ ॥
एष षट्खण्डभूपालैः, सेव्यते युद्धनिर्जितैः । युष्माकमत्र का लज्जा ? न दुःखं पञ्चभिः सह ॥ १७२ ॥
पराजयोऽपि शोभायै, महता विद्विषा युधि । भवेज्जयोऽपि लज्जायै, हीनानां युधि भूभृताम् ॥ १७३ ॥
या विधिप्रापितौन्नत्यैः, स्पर्द्धा स्वस्यैव साऽहिता । निर्दन्ताः स्युर्गजा एव, खनन्तः स्पर्द्धया गिरीन् ॥ १७४ ॥
अथैषामुपरोधेन, तद्गृह्या नाकिनोऽपि चेत् । कुर्वन्त्युपद्रवं चक्रिसैन्येऽकालाम्बुदादिकम् ॥ १७५ ॥
तदा विज्ञाय तान् शीघ्रं, चक्रभृत्सेवकाः सुराः । मृगानिव त्रासयन्ति, तत्कृतोपद्रवैः सह ॥ १७६ ॥
अनन्यगतयस्तेऽथ, मध्ये कृत्वाऽऽप्तपूरुषान् । नताश्चमूपतिं तेन, नीयन्ते चक्रिणोन्तिके ॥ १७७ ॥
ढौकयित्वा प्राभृतानि, नत्वा विज्ञपयन्त्यदः । प्रभो ! दृष्टोऽनुभावस्ते, वयं स्मः सेवकास्तव ॥ १७८ ॥
अज्ञानात्प्रातिकूल्यं च, यदस्माभिः कृतं त्वया । कृपामाधाय सह्यं तच्छरणागतवत्सल ! ॥ १७९ ॥
चक्रवर्त्त्यपि सत्कृत्य, स्निग्धगीः सान्त्वयत्यमून् । सुखं वसन्तु निर्भीका, मदाज्ञावशवर्त्तिनः ॥ १८० ॥
सेनापतिमथाहूय, चक्रभृद्विनयानतम् । आदिशत्युत्तरार्द्धस्थसिन्धुनिष्कुटसाधनम् ॥ १८१ ॥
अस्य प्राच्यां नदी सिन्धुरुदीच्यां हिमवान् गिरिः । दक्षिणस्यां च वैताढ्यः, प्रतीच्यां लवणाम्बुधिः ॥ १८२ ॥
अथ निर्जित्य तान् म्लेच्छानादाय प्राभृतानि च । सार्वभौमं नमत्याशु, पूर्ववत्पृतनापतिः ॥ १८३ ॥
अथान्यदा चक्ररत्नं, ततश्चरति सोत्सवम् । कनिष्ठहिमवच्छैलाभिमुखं चक्रिणाऽन्वितम् ॥ १८४ ॥
प्रथमं च प्रयातीदमैशानीगामिनाऽध्वना । यियासोर्हिमवन्मध्यमृजुरध्वाऽयमेव यत् ॥ १८५ ॥
अन्तर्गतान् वशीकुर्वन्, देशग्रामपुराधिपान् । प्रयाणैर्योजनान्तैः स, प्राप्नोत्युपहिमाचलम् ॥ १८६ ॥

निवेश्य कटकं तत्र, पूर्ववद्विहिताष्टमः । प्रातस्तुर्येऽह्नि सन्नह्यारूढः सांग्रामिकं रथम् ॥ १८७ ॥
अनुयातो नृपैः सर्वैर्वज्रभृत्त्रिदशैरिव । प्रेरयंस्तुरगान् रथ्यान्, रंहसा वायुजित्वरान् ॥ १८८ ॥
हिमवद्भूभृतो भित्तिं, रथाग्रेणातिरंहसा । त्रिस्ताडयित्वा तुरगान्निगृह्णाति स कोविदः ॥ १८९ ॥
प्राग्वन्नामाङ्कितं बाणं, धनुष्यारोप्य निर्भरम् । मुञ्चत्याकर्णमाकृष्योन्नतदृष्टिर्विहायसि ॥ १९० ॥
उत्पत्य योजनानि द्वासप्ततिं स शरः स्फुरन् । हिमवद्गिरिदेवस्य, पुरः पतति दूतवत् ॥ १९१ ॥
तं दृष्ट्वा सोऽपि रुष्टः प्राक्, पश्यन्नामाथ चक्रिणः । प्रीत्या प्राभृतमादाय, राजेन्द्रमुपतिष्ठते ॥ १९२ ॥
वक्त्येवं सकलं क्षेत्रं, त्वयेदं तरसा जितम् । त्वत्सेवकोऽस्म्यहं देवोदीच्यपर्यन्तरक्षकः ॥ १९३ ॥
सर्वौषधीस्तथा कल्पद्रुमपुष्पस्रजोऽद्भुताः । हिमवद्गिरिकुञ्जोत्थं, चन्दनं तद्ह्रदाम्बु च ॥ १९४ ॥
उपादायोपदां तस्येत्यादिकां भूपभूपतिः । तं सत्कृत्य विसृज्याथ, व्यावर्त्तयति वाजिनः ॥ १९५ ॥
अशेषदिक्तटव्याप्तजयतूर्यव्रजध्वनिः । उपैत्यृषभकूटाद्रिं, चक्री शक्र इवर्द्धिमान् ॥ १९६ ॥
त्रिः स्पृष्ट्वा तं रथाग्रेण, पौरस्त्ये कटकेऽस्य च । रत्नेन काकिणीनाम्ना, निजं नाम लिखत्ययम् ॥ १९७ ॥

तच्चैवं– "ओसप्पिणी इमीसे तइयाएँ समाएँ पच्छिमे भाए । अहमंसि चक्कवट्टी भरहो इअ नामधिज्जेणं ॥ अहमंसि पढमराया अहं य भरहाहिवो णरवरिंदो । णत्थि महं पडिसत्तू जिअं मए भारहं वासं" ॥

रीत्याऽनया यथाक्षेत्रं, यथाकालं यथाऽऽह्वयम् । नामलेखनमाभाव्यं, सर्वेषामपि चक्रिणाम् ॥ १९८ ॥
ततो निवृत्य कटकमुपेत्य कृतपारणः । हिमवद्गिरिदेवस्य, विधत्तेऽष्टाहिकोत्सवम् ॥ १९९ ॥
महोत्सवे समाप्तेऽस्मिन्, व्याधुट्येतः प्रवर्त्तते । वैताढ्याभिमुखं चक्रं, याम्यदिग्गामिनाऽध्वना ॥ २०० ॥
वैताढ्यस्योदग्निकम्बे, निवेशितचमूस्ततः । जेतुं विद्याधराधीशान्, पूर्ववत्कुरुतेऽष्टमम् ॥ २०१ ॥
एतेऽनुकम्प्यमनुजमात्रत्वात्तत्र नोचितम् । शरमोक्षणमित्येष, नैनमाद्रियते विधिम् ॥ २०२ ॥

इति श्रीजम्बूद्वीपप्रज्ञप्तिसूत्रे, यत्तु श्रीहैमऋषभचरित्रे भरतस्यात्र शरमोक्षणमुक्तं तन्मतान्तरमवसेयं[1] ।

अथ विद्याधरास्तेऽपि, जानन्ति चक्रंवर्त्त्यसौ । स्मरत्यस्मान् वयं चास्य, सेवकाः शाश्वतस्थितेः ॥ २०३ ॥
यदमी अवधिज्ञानद्यभावेऽपि विदन्ति वै । चक्रिणश्चिन्तितं तच्चाचिंत्यदिव्यानुभावतः ॥ २०४ ॥

---

१ अत्रमेदवधेयं यदुत त्रिषष्ट्यादिचरित्रे चक्रिणोऽधिकारः सर्वचक्रिसाधारणः षट्खण्डजये, न तेन तथाऽन्यचक्रिणां साधनमदर्शीति, जम्बूद्वीपप्रज्ञप्तिभरतक्षेत्रान्वर्थतायां भरतचक्री वक्तुमुपक्रान्तः, स चावसर्पिण्यामादौ भवेत्, तदा च युग्मित्वासत्तेः स्याद् भद्रकता, विनाऽपीषुक्षेपं स्यादेव साधनं, परं न तथा सर्वेषामिति शरक्षेपवर्णनं, तथा च स्वयमनागमे शरमोक्षणं कर्तव्यमिति तत्त्वं, दिव्यानुभावो हि युग्मित्वकालप्रत्यासत्तौ न्याय्य एव, भद्रकत्वादेव च कदाचिद् युद्धमपि ।

सौधर्मेशानगा देव्यो, ग्रथोर्ध्वस्वर्गवासिनाम् । कामुकानामभिप्रायं, जानन्ति दिव्यशक्तितः ॥ २०५ ॥
तेऽथ प्राभृतमादाय, स्त्रीरत्नादिकमद्भुतम् । नमन्ति चक्रिणं स्वामिन् !, वयं स्मः सेवका इति ॥ २०६ ॥
युयुत्सवः कदाचित्ते, चेद्भवन्ति धृतायुधाः । साधितानेकविद्यास्त्रा, भटंमन्या महाभुजाः ॥ २०७ ॥
तदा रणरसं तेषामापूर्य विविधाहवैः । वशीकरोति तांश्चक्री, निषादी कुञ्जरानिव ॥ २०८ ॥

अत एव जम्बूद्वीपप्रज्ञप्तिचूर्णौ भरतचक्रयधिकारे 'अण्णे भणंति' त्युक्त्वा द्वादशवर्षावधि नमिविनमिभ्यां सह युद्धमुक्तमिति ज्ञेयं.

स्वीकृत्य प्राभृतं तेषां, सोऽथ सत्कृत्य तानपि । विसृज्य मुदितस्तेषां, कुरुतेऽष्टाहिकोत्सवम् ॥ २०९ ॥
वैताढ्यात्तत ऐशान्यां, गङ्गादेवीगृहं प्रति । प्रतिष्ठते चक्ररत्नं, गङ्गाखण्डजयोत्सुकम् ॥ २१० ॥

अत्र जम्बूद्वीपप्रज्ञप्तिवृत्तिः—यच्चक्री ऋषभकूटतः प्रत्यावृत्तो न गङ्गां साधयामास तद्वैताढ्यवर्त्तिविद्याधराणामनात्मसात्करणेन परिपूर्णोत्तरखण्डस्यासाधितत्वात्कथं गङ्गानिष्कुटसाधनायोपक्रमत इत्यवसेयं ।

निवेश्य कटकं गङ्गादेव्याश्च भवनान्तिके । सिन्धुवत्साधयत्येष, तां नतां निहितोपदाम् ॥ २११ ॥

यच्चात्र भरतचक्रिणो गङ्गादेवीभोगेन वर्षसहस्रातिवाहनं श्रूयते, तज्जम्बूद्वीपप्रज्ञप्ति सूत्रे चूर्णौ चानुक्तमपि श्रीऋषभचरित्रे प्रोक्तमस्तीति[1] ज्ञेयं ।

तस्या अप्युत्सवे पूर्णे, चक्ररत्नं ततः पुनः । गङ्गापश्चिमकूलेन, दक्षिणस्यां प्रतिष्ठते ॥ २१२ ॥
क्रमात्खण्डप्रपातायां, गुहाया द्वारसन्निधौ । उपेत्य चक्रभृत्तत्र, स्कन्धावारं निवेशयेत् ॥ २१३ ॥
कृताष्टमतपाश्चित्ते, नक्तमालं गुहाधिपम् । चिन्तयेत्सोऽप्युपैत्येनं, सोपदः कृतमालवत् ॥ २१४ ॥
ततस्तस्योत्सवे पूर्णे, जिगीषुश्चक्रवर्त्यथ । समादिशति सेनान्ये, गङ्गानिष्कुटसाधनम् ॥ २१५ ॥
गङ्गा प्रत्यग् वहत्यस्य, प्राच्यां लवणतोयधिः । वैताढ्यहिमवन्तौ च, दक्षिणोत्तरयोर्दिशोः ॥ २१६ ॥
चतुर्भिः कृतसीमापि, गङ्गया मध्यखण्डतः । पृथक्कृतं विभज्येति, गङ्गानिष्कुटमुच्यते ॥ २१७ ॥
सोऽपि गङ्गामथोत्तीर्य, चर्मरत्नेन सिन्धुवत् । म्लेच्छान्निर्जित्य तत्राज्ञां, प्रवर्त्तयति चक्रिणः ॥ २१८ ॥
चरितार्थो गृहीत्वा तत्प्राभृतान्यर्यमद्युतिः । नत्वा चक्रिक्रमौ वक्ति, तज्जयं निहितोपदः ॥ २१९ ॥
विसृष्टश्चक्रिणाप्येष, भूरिसत्कारपूर्वकम् । स्वावासे विहितस्नानभोजनो रमते सुखम् ॥ २२० ॥
चक्री वक्त्यन्यदाऽऽकार्य, द्वारं भो पृतनापते ! । दर्याः खण्डप्रपातायाः, औत्तराहं प्रकाशय ॥ २२१ ॥
तमिस्रायाम्यदिग्द्वारोद्घाटने यो विधिः कृतः । तेनैव विधिना द्वारमुद्घाटयति सोऽप्यदः ॥ २२२ ॥
तेनैव विधिना चक्री, विशत्यस्यां चमूवृतः । आत्मा कर्मावृतो मातुः, कुक्षाविव शिवाप्तये ॥ २२३ ॥

---

१ सर्वचक्रिणां सर्वभरतानां च तथानियमाभावः, सूत्रेऽनुक्तमपि आवश्यकवृत्त्यादावुक्तमिति भरतचरित्रे तथोक्तमिति ।

मण्डलान्यालिखन् भित्त्योर्नद्यावुत्तीर्य ते उभे । निर्याति याम्यद्वारेणोद्घाटितारिणा स्वयं ॥ २२४ ॥
ननु च–तमिस्रया प्रविशति, विनिर्गच्छति चक्रभृत् । खण्डप्रपातया तत्र, किं कारणमिहोच्यते ॥ २२५ ॥
एवं दिग्विजयः सृष्ट्या, कृतः स्याद्यच्च शोभनम् । कार्यं तत्क्रियते सृष्ट्या, सूदर्कं स्यात्तथा च तत्॥ २२६ ॥
तत्पूर्वोक्तक्रमेणैवोपक्रमन्ते जयाय ते । प्रवर्त्तयेत्तानेवं हि, चक्रं तन्मार्गदेशकम् ॥ २२७ ॥
स्कन्धावारं निवेश्याथ, गङ्गायाः पश्चिमे तटे । अष्टमं कुरुते चक्री, निधानानि नव स्मरन् ॥ २२८ ॥
अथाष्टमपरीपाके, निधीनामधिदेवताः । प्रत्यक्षीभूय शंसन्ति, नत्वैवं चक्रवर्तिनम् ॥ २२९ ॥
भवता भूरिभाग्येन, वयं स्वामिन् ! वशीकृताः । भृत्यानस्मान्निधींश्चैतान्नवापि स्वीकुरु प्रभो ! ॥ २३० ॥
यथेच्छमुपयुंक्ष्वामूंस्त्वदायत्तानथ प्रभो ! । स्वैरं नियोजयास्मांश्च, किङ्करान्निधिरक्षकान् ॥ २३१ ॥
वशीकृतनिधिश्चक्री, ततः पूर्णीकृताष्टमः । स्नातभुक्तो निधानानां, विधत्तेऽष्टाहिकोत्सवम् ॥ २३२ ॥
कदाचिदथ सेनान्यमाहूयाज्ञपयत्यसौ । अपाच्यभरतार्धस्थगङ्गानिष्कुटसाधनम् ॥ २३३ ॥
प्राच्यपाच्योः समुद्राभ्यां, प्रतीच्यामथ गङ्गया । वैताढ्यनोत्तरस्यां तन्निष्कुटं विहितावधि ॥ २३४ ॥
सोऽप्युत्तीर्य तथा गङ्गां, म्लेच्छान्निर्जित्य पूर्ववत् । उपात्तप्राभृतः सर्वं, निवेदयति चक्रिणः ॥ २३५ ॥
एवं साधितषट्खण्डे, कृतकार्येऽथ चक्रिणि । स्वराजधान्यभिमुखं, वलते चक्रमुत्सवैः ॥ २३६ ॥
ततश्चक्री गजारूढश्चामरच्छत्रशोभितः । निनदन्मङ्गलातोद्यः, साश्चर्यं वीक्षितो जनैः ॥ २३७ ॥
स्वराज्यधान्या अभ्यर्णे, स्कन्धावारं निवेशयेत् । कृताष्टमतपास्तत्र, कुरुते पौषधत्रयम् ॥ २३८ ॥
स्वराजधान्यधिष्ठातुर्देवस्यानेन साधनम् । कुरुते तच्च निर्विघ्नवासस्थैर्यार्थमात्मनः ॥ २३९ ॥
अथाष्टमपरीपाके, आरुह्य जयकुञ्जरम् । नदत्सु भूरिवाद्येषु, विविधर्द्धिसमन्वितः ॥ २४० ॥
साश्चर्यं वीक्षितो लोकैः, पूर्वपुण्यप्रशंसिभिः । राजधानीं प्रविशति, यदा चक्री महोत्सवैः ॥ २४१ ॥
तदाऽऽभियोगिका देवा, बहिरन्तःप्रमार्जिताम् । सुगन्धिनीरैः सिक्तां तां, कुर्युर्नानाध्वजाञ्चिताम् ॥ २४२ ॥
केचिच्च मुदिता देवाः, पुरीं विशति चक्रिणि । वृष्टिमाभरणस्वर्णरत्नवज्रैर्वितन्वते ॥ २४३ ॥
तदा तं बहवः कामभोगद्रव्यार्थिनो जनाः । प्रशंसंतः स्तुवन्तश्चोच्चारयन्त्याशिषां शतान् ॥ २४४ ॥
बहुभिर्वासरैर्दृष्टामपूर्वामिव तां पुरीम् । निरीक्षमाणः सानन्दमतिक्रामन् गृहावलीः ॥ २४५ ॥
नरनारीसहस्राणां, नमस्काराञ्जलीन्मुदा । आददानः क्रमादेति, स्वप्रासादावतंसकम् ॥ २४६ ॥
अथावरुह्य नागेन्द्रात्, सेवकान्नाकिनो नृपान् । सेनापत्यादिरत्नानि, सर्वं चान्यपरिच्छदम् ॥ २४७ ॥
सत्कृत्य विसृजत्याशु, गमनाय निजाश्रयान् । स्त्रीभिर्नाटयैः परिवृतो, विशत्यन्तर्गृहं स्वयम् ॥ २४८ ॥
तत्र स्वजनवर्गं स्वं, मित्राणि ज्ञातिजानपि । संबन्धिनश्च भृत्यांश्चालापयेत्क्षेमपृच्छया ॥ २४९ ॥
कृतस्नानस्ततो भुङ्क्ते, जिनार्चार्चनपूर्वकम् । ततोऽद्भुतैर्गीतनाट्यादिभिर्भुङ्क्ते सुखानि सः ॥ २५० ॥

अथ षोडश देवानां, सहस्राः पार्थिवास्तथा । सेनापत्यादिरत्नानि, परिवारस्तथाऽखिलः ॥ २५१ ॥
एत्य विज्ञपयन्त्येवं, प्रणताश्चक्रवर्तिनम् । जिग्ये क्षेत्रमिदं स्वामिन्, चतुरन्तावधि त्वया ॥ २५२ ॥
तत्कुर्मश्चक्रवर्त्तित्वाभिषेकं समहोत्सवम् । यथा वो रुचिरित्येवं, चक्री तदनुमन्यते ॥ २५३ ॥
अथ राज्याभिषेकार्थमष्टमं कुरुते तपः । अभिषेकास्पदं सज्जीकारयत्याभियोगिकैः ॥ २५४ ॥
राजधान्यास्ततस्तेऽस्या, ऐशान्यां विमलीकृते । भूतले रचयन्त्युच्चमभिषेकाय मण्डपम् ॥ २५५ ॥
रत्नबद्धक्षितेस्तस्य, रत्नस्तम्भशतस्पृशः । विकुर्वन्त्यभिषेकार्थं, मध्ये पीठं मणीमयम् ॥ २५६ ॥
चतुर्दिशं त्रिसोपानप्रतिरूपकशालिनः । मध्येऽस्य रचयन्त्येकं, रत्नसिंहासनं महत् ॥ २५७ ॥
इत्यादि विरचय्यैते, नत्वा शंसन्ति चक्रिणम् । प्रभो ! सज्जीकृतोऽस्माभिरभिषेकाय मण्डपः ॥ २५८ ॥
ततश्चक्री गजारूढः, सोत्सवं सपरिच्छदः । उपेत्य मण्डपे तस्मिन्, कृत्वा पीठप्रदक्षिणाम् ॥ २५९ ॥
तत्र प्राच्यत्रिसोपानपथेनारुह्य सोत्सवम् । सिंहासनमलङ्कृत्य, तिष्ठति प्राङ्मुखः सुखम् ॥ २६० ॥
अथोत्तरप्रोष्ठपदाप्रमुखे विहितोडुनि । विजयादौ मुहूर्त्ते च, तेऽभिषिञ्चन्ति चक्रिणम् ॥ २६१ ॥

तथा चोक्तं– "अभिषिक्तो महीपालः श्रुतिज्येष्ठालघुध्रुवैः । मृगानुराधापौष्णैश्च चिरं शास्ति वसुन्धराम्" ॥

विजयमुहूर्त्तश्चैवं–

द्वौ यामौ घटिकाहिनौ, द्वौ यामौ घटिकाधिकौ । विजयो नाम योगोऽयं, सर्वकार्यप्रसाधकः ॥ २६२ ॥
प्राग्वर्णितोऽभिषेको यः, क्षेत्रलोके सविस्तरः । वैमानिकानामुत्पत्तौ, सर्वोऽप्यत्रानुवर्त्यताम् ॥ २६३ ॥
तथाभिषिक्तं तं गन्धकाषाय्या रूक्षिताङ्गकम् । सर्वाङ्गलङ्कृतं कुर्युर्भूषणैर्मुकुटादिभिः ॥ २६४ ॥
जय चक्रिन् ! जय स्वामिन् !, जयातुलपराक्रम ! । राजराज ! जय प्रौढपुण्य ! भद्रं सदास्तु ते ॥ २६५ ॥
त्वया जितमिदं क्षेत्रं, चतुरन्तं महौजसा । तत्पालयासंख्यवर्षकोटीर्निर्विघ्नमस्तु ते ॥ २६६ ॥
एवं देवाश्च भूपाश्च, पौराश्च सपरिच्छदाः । वदन्तो मङ्गलालापानभिषिच्य नमन्ति तम् ॥ २६७ ॥
ततः कृताभिषेकोऽसौ, भृत्यानाहूय शंसति । पुर्यामस्यां गजारूढा, विश्वगुद्घोषयन्त्विति ॥ २६८ ॥
सर्वे महोत्सवं पौराः, कुर्वन्तु द्वादशाब्दिकम् । अष्टाहिकोत्सवस्येव, ज्ञेया सर्वाऽत्र पद्धतिः ॥ २६९ ॥
ततो याम्यत्रिसोपानमार्गणोत्तीर्य पीठतः । पट्टहस्तिनमारुह्य, चक्री सर्वसमृद्धिभिः ॥ २७० ॥
प्रासादं निजमागत्य, स्नात्वा कृतजिनार्चनः । स्वर्णस्थाले सुखासीनः, कुरुतेऽष्टमपारणा ॥ २७१ ॥
वारांस्त्रयोदशैवं च, कुर्याद्दिग्विजयेऽष्टमान् । वारांश्च चतुरश्चक्री, कुरुते शरमोक्षणम् ॥ २७२ ॥
तीर्थत्रये सिन्धुगङ्गादेव्योर्वैताढ्यनाकिनः । गुहेशयोः कृतमालनक्तमालकसंज्ञयोः ॥ २७३ ॥
हिमवद्गिरिदेवस्य, विद्याधरमहीभृताम् । निधीनां राजधान्याश्चाभिषेकावसरेऽपि च ॥ २७४ ॥

त्रयोदशाष्टमा एवं, निर्दिष्टाश्चक्रवर्त्तिनाम् । तीर्थत्रये हिमवति, चतुर्षु शरमोक्षणम् ॥ २७५ ॥
अतुच्छैरुत्सवैरेवं, प्रजाभिस्सह चक्रिणः । अब्देषु द्वादशस्वाशु, संपूर्णेषु निमेषवत् ॥ २७६ ॥
ततो यक्षान्नृपांश्चापि, रत्नान्यपि च नागरान् । चक्री यथार्हं सत्कृत्य, भुङ्क्ते राज्यमकण्टकम् ॥ २७७ ॥
षट्खण्डराज्ये संजाते, निःशल्य इति चक्रिणः । प्रविशत्यस्त्रशालायां, चक्ररत्नं महामहैः ॥ २७८ ॥
चक्रं दण्ड स्तथा खड्गं, छत्रं चर्म तथा मणिः । स्युः काकिणीति रत्नानि, सप्तैकाक्षाणि चक्रिणाम् ॥ २७९ ॥
सेनापतिर्गृहपतिर्वार्द्धकिश्च पुरोहितः । गजोऽश्वः स्त्रीति रत्नानि, सप्त पञ्चेन्द्रियाण्यपि ॥ २८० ॥
चक्ररत्नं भवेत्तत्र, मुख्यं विजयसाधनम् । वज्रतुम्बं लोहिताक्षारकं जाम्बूनदप्रधि ॥ २८१ ॥
मणिमौक्तिकजालेनालङ्कृतं किङ्किणीयुतम् । नानारत्नमणिस्वर्णघण्टिकाजालवेष्टितम् ॥ २८२ ॥
सर्वर्त्तुजप्रसूनस्रक्पूजितं रविबिम्बवत् । दीप्रं द्वादशभम्भादितूर्यध्वनिनिषेवितम् ॥ २८३ ॥
अनेकदिव्यवादित्रनिर्घोषैः पूरिताम्बरम् । सदा नभःस्थितं यक्षसहस्रपरिवारितम् ॥ २८४ ॥
अमोघशक्तिकं तच्च, खेचरक्ष्माचरादिषु । विना स्वगोत्रं सर्वेषु, वैरिषु प्रोत्कटेष्वपि ॥ २८५ ॥
पाताले वा पयोधौ वा, वज्रकोष्ठे स्थितस्य वा । रिपोः शीर्षं छिनत्त्येतच्चक्रिमुक्तं चिरादपि ॥ २८६ ॥
अकृत्वा तच्छिरश्छेदं, न कदापि निवर्त्तते । मासैर्बहुभिरब्दैर्वा, तं हत्वैवैति चक्रिणम् ॥ २८७ ॥
नाप्नोत्यवसरं यावत्तावत्तदनुशात्रवम् । इव श्येनोऽनुशकुनि, बम्भ्रमीति दिवानिशम् ॥ २८८ ॥

इति चक्ररत्नं ।

स्याद्दण्डरत्नं सर्वत्राऽव्याहतं वज्रनिर्मितम् । स्फुरद्रत्नमयैर्दीप्रं, पञ्चभिः पर्वभिः शुभैः ॥ २८९ ॥
पथि संचरतश्चक्रिसैन्यस्य सुखहेतवे । क्षुद्रादिगर्त्तापाषाणविषमक्ष्मोपमर्दकम् ॥ २९० ॥
प्रयोजनविशेषेण, प्रयुक्तं स्वामिना च तत् । सहस्रयोजनोद्विद्धं, कुर्यात्खातं भुवि द्रुतम् ॥ २९१ ॥
परिखाऽष्टापदस्याद्रेर्यथा सगरनन्दनैः । सहस्रयोजनोद्विद्धा, दण्डरत्नेन निर्मिता ॥ २९२ ॥
भेदकं शत्रुसैन्यानां, कुलीशं भृभृतामिव । नृदेवतिर्यगुत्पन्नाशेषोपद्रवजिच्च तत् ॥ २९३ ॥[1]
ज्वलनप्रभनागेन्द्रात्सगरस्याङ्गजन्मनाम् । योऽभूदुपद्रवः सत्यप्यस्मिन् स त्वनुपक्रमः ॥ २९४ ॥
ध्वंसः सोपक्रमस्यैवोपद्रवस्य भवेदितः । इतरस्तु भवत्येव, वीरान्तेवासिदाहवत् ॥ २९५ ॥
तथेदं चक्रिणां सर्वं, मनश्चिंतितसाधकम् । महाप्रभावं स्याद्यक्षसहस्रसमधिष्ठितम् ॥ २९६ ॥

इति दण्डरत्नं ।

खड्गरत्नं भवेत्तीक्ष्णधारं नीलाब्जमेचकम् । नानारत्नलताचित्रविचित्रं च सुगन्धि च ॥ २९७ ॥

---

१ आदौ तावत् सुताश्चक्रिणस्तथापि दण्डेन खातकरणं तत्सामर्थ्येन, उपद्रवस्याशान्तिस्तु न सन्निधौ चक्री न च तेन तदर्थं तत् प्रयुक्तं च ।

रत्नस्वर्णादिरचनाविचित्रोत्कृष्टमुष्टिकम् । सद्य शाणोत्तीर्णमिव, शश्वत्तेजोभराद्भुतम् ॥ २९८ ॥
गिरिवज्रादिदुर्भेदभेदकं शत्रुसैन्यभित् । चराचराणां सर्वेषां, छेदनेऽमोघशक्तिकम् ॥ २९९ ॥
पञ्चाशदङ्गुलायामं, षोडशाङ्गुलविस्तृतम् । स्यार्द्धाङ्गुलबाहल्यमेतद्यक्षसहस्रयुक् ॥ ३०० ॥

तथोक्तं जम्बूद्वीपप्रज्ञप्तिसूत्रे— "पण्णासंगुलदीहो सोलसअंगुलाइं विच्छिण्णो । अद्धंगुलसोणीको जेट्ठपमाणो असी भणिओ" यत्तु संग्रहण्यां 'बत्तीसंगुलखग्गो' इति श्रूयते तन्मध्यममानापेक्षया, यदाह वराहः— अङ्गुलशतार्द्धमुत्तम ऊनः स्यात्पञ्चविंशतिं खड्गः । अनयोश्च संख्ययोर्यो, मध्ये स तु मध्यमो ज्ञेयः इति खड्गरत्नं ।

छत्ररत्नं भवेत्पूर्णशरच्छीतांशुमण्डलम् । नवनवत्या सहस्रै, रैशलाकाभिरङ्कितम् ॥ ३०१ ॥
दर्शनादेव दस्यूनां, भुजशस्त्रादिशक्तिहृत् । पुष्टप्रौढस्वर्णदण्डनानाचित्रैश्च चित्रकृत् ॥ ३०२ ॥
स्थाने च दण्डारोपस्य पञ्जराकारराजितम् । परितो मौक्तिकालीभिर्मणिरत्नैश्च मण्डितम् ॥ ३०३ ॥
वृष्ट्यातपमरुच्छीताद्युपद्रवनिवारकम् । विषादिनानादोषघ्नच्छायं प्राप्यं तपोगुणैः ॥ ३०४ ॥
शीतकाले विशालोष्णच्छायं ग्रीष्मे च शीतलम् । सर्वर्तुसुखदच्छायं, विमानमिव जङ्गमम् ॥ ३०५ ॥
ऐश्वर्यशौर्यधैर्यादिप्रदलक्षणलक्षितम् । चक्रिभाग्यमिवाध्यक्षं, राजचिह्नं महोज्ज्वलम् ॥ ३०६ ॥
व्यामप्रमाणमप्येतद्विस्ताराध्यवसायिना । व्याप्नोति चक्रिणा स्पृष्टं, साग्रां द्वादशयोजनीम् ॥ ३०७ ॥

साधिकत्वं चात्र परिपूर्णचर्मरत्नपिधायकत्वेनेति जम्बू प्र० वृ० । इति छत्ररत्नं ।

चर्मरत्नं भवेच्चारु, श्रीवत्साकारबन्धुरम् । मुक्तातारार्द्धचन्द्रादिचित्रैश्चित्रं समन्ततः ॥ ३०८ ॥
समग्रचक्रभृत्सैन्योद्वहनेऽपि मनागपि । न न्यञ्चति द्विषच्छस्त्रैर्दुर्भेदं वज्रचर्मवत् ॥ ३०९ ॥
महानद्यम्भोधिपारप्रापकं यानपात्रवत् । तत्कालं गृहपत्युप्तशाकधान्यादिसिद्धिकृत् ॥ ३१० ॥
तादृक्प्रयोजने ह्यस्मिन्, धान्याद्युप्तमहर्मुखे । लुनाति सायं निष्पन्नं, रत्नं कौटुम्बिकाग्रणीः ॥ ३११ ॥
द्विहस्तमानमप्येतत्, स्पृष्टं विस्तारकाङ्क्षिणा । व्याप्नोति योजनानि द्वादशेषदधिकानि वा ॥ ३१२ ॥
ननु—चक्रिसैन्यावकाशाय, व्यासो द्वादशयोजनः । अस्य स्यादुचितो यच्चाधिक्यं तत्तु निरर्थकम् ॥ ३१३ ॥
अत्रोच्यते—
सत्येव किञ्चिदाधिक्ये, सुखं तिष्ठति सा चमूः । स्याच्चैवं छत्रयोगेऽस्य, संपुटत्वं निरन्तरम् ॥ ३१४ ॥

तथोक्तं—चर्मच्छत्रयोरन्तरालपूरणायोपयुज्यते साधिकविस्तार इति जम्बू प्र० वृ०

श्रीवत्साकारमप्येतन्नानाकारं यथाक्षणम् । स्यात्ततश्छत्रयोगेऽस्य, संपुटत्वं न दुर्घटम् ॥ ३१५ ॥
श्रुयते भरतक्षेत्रार्द्धस्योदीच्यस्य साधने । तत्रत्यम्लेच्छपक्षीयैर्नागैर्मेघमुखाभिधैः ॥ ३१६ ॥
मुशलस्थूलधाराभिः, सप्ताहानि निरन्तरम् । वृष्टौ कृतायां भरतचक्रिसैन्यमहार्त्तये ॥ ३१७ ॥

स चक्री छत्रचर्मभ्यां, कृत्वा संपुटमद्भुतम् । सैन्यमस्थापयत्तत्र, वेश्मनीवानुपद्रवम् ॥ ३१८ ॥
पार्थिवत्वेऽपि तत्साम्याच्चर्मेति व्यपदिश्यते । अन्यथास्य श्रुतख्यातमेकाक्षत्वं विरुध्यते ॥ ३१९ ॥
दण्डोऽप्येवं पार्थिवस्तत्साम्यात्तद्व्यपदेशभाक् । भाव्यमेवं पार्थिवत्वं, सप्तानामपि धीधनैः ॥ ३२० ॥

इति चर्मरत्नं ।

मणिरत्नं भवेद्विश्वाद्भुतं निरुपमद्युति । वर्यवैडूर्यजातीयं, श्रेष्ठं सर्वमणिष्विह ॥ ३२१ ॥
सर्वेषामपि भूतानां, प्रियं न्यस्तं च मूर्द्धनि । सर्वदुःखहरं क्षेमतुष्ट्यारोग्यादिकृत्सदा ॥ ३२२ ॥
सुरासुरनृतिर्यग्जाशेषोपद्रवनाशकम् । जयप्रदं च संग्रामे, शस्त्राघातनिवारकम् ॥ ३२३ ॥
सदावस्थिततारुण्यमवर्द्धिष्णुनखालकम् । विप्रमुक्तं भयैः सर्वैरिदं कुर्वीत धारकम् ॥ ३२४ ॥
सान्धकारे तमिस्रादावुद्योतं कुरुतेऽर्कवत् । अचिन्त्यावाच्यमूल्यं तद्देवानामपि दुर्लभम् ॥ ३२५ ॥
इदं हि प्रागुरुच्छत्रचर्मसंपुटसंस्थिते । सवितेवाकृतोद्योतं, सैन्ये भरतचक्रिणः ॥ ३२६ ॥
गुहाद्वये प्रविशतश्चेदमेव हि चक्रिणः । कुम्भिकुम्भस्थितं ध्वान्तव्रातघाताय कल्पते ॥ ३२७ ॥
चतुरङ्गुलदीर्घं स्यादङ्गुलद्वयविस्तृतम् । मध्ये वृत्तोन्नतं तच्च, षड्भिः कोणैरलङ्कृतं ॥ ३२८ ॥

इति मणिरत्नं ।

भवेच्च काकिणीरत्नं, षट्तलं द्वादशास्रकम् । तथाऽष्टकर्णिकं तौल्ये, सुवर्णैरष्टभिर्मितम् ॥ ३२९ ॥
स्वर्णकारोपकरणं, ख्याताऽधिकरणिर्जने । तामाकृत्याऽनुकुरुते, चतुरस्रत्वसाम्यतः ॥ ३३० ॥
चतुर्दिशमधोऽथोर्ध्वं, तत्रैवं स्युस्तलानि षट् । न्यस्तं भूमाववैषम्यात्तिष्ठेद्येनेह तत्तलम् ॥ ३३१ ॥
प्रत्येकमध ऊर्ध्वं च, चतसृष्वपि दिक्षु च । तच्चतुःकोटिसद्भावाद्, द्वादशास्त्रं प्रकीर्त्तितम् ॥ ३३२ ॥
मिलत्यस्त्रित्रयं यत्र, स कोणः कर्णिकोच्यते । उपर्यधश्चतसृणां, तासां युक्त्याऽष्टकर्णिकम् ॥ ३३३ ॥
सुवर्णः स्यात्कर्ममाषैस्तौल्ये षोडशभिः समः । कर्ममाषप्रमाणं च, प्रागत्रास्ति निरूपितम् ॥ ३३४ ॥
सुवर्णैरष्टभिस्तुल्यं, काकिणीरत्नमीरितम् । एतदार्षभिकालीयं, मानं ज्ञेयं विचक्षणैः ॥ ३३५ ॥
अन्यथा कालभेदेन, मानवैषम्यसंभवे । न भवेत्काकिणीरत्नं, सर्वेषां चक्रिणां समम् ॥ ३३६ ॥
इष्यते तुल्यमेवेदं, सर्वेषामपि चक्रिणाम् । पुरातनेषु शास्त्रेषु, तथैव प्रतिपादनात् ॥ ३३७ ॥
किंच—केचिदात्माङ्गुलैराहुः, काकिणीमणिरत्नयोः । मानमौत्सेधिकैः केचित्तत्प्रमाणाङ्गुलैः परे ॥ ३३८ ॥

तथो चोक्तं जम्बूद्वीपप्रज्ञप्तिवृत्तौ—"अत्र चाधिकारे एतानि च मधुरतृणफलादीनि भरतचक्रवर्तिकालसंभवीन्येव गृह्यन्ते, अन्यथा कालभेदेन तद्वैषम्यसंभवे काकिणीरत्नं सर्वचक्रिणां तुल्यं न स्यात्, तुल्यं चेष्यते तदित्येतस्मादनुयोगद्वारवृत्तिवचनादेतद्देशीयादेव स्थानाङ्गवृत्तिवचनात्—

"चतुरंगुलो मणी पुण तस्सद्धं चेव होइ विच्छिण्णो । चउरंगुलप्पमाणा सुवण्णवरकागणी नेया ॥"

इहाङ्गुलं प्रमाणाङ्गुलमवगन्तव्यं, सर्वचक्रवर्त्तिनामपि काकिण्यादिरत्नानां तुल्यप्रमाणत्वादिति मलयगिरिकृतबृहत्संग्रहणी, बृहद्वृत्तिवचनाच्च केचनास्य प्रमाणाङ्गुलनिष्पन्नत्वं, केचिच्च "एगमेगस्स णं रण्णो चाउरंतचक्कवट्टिस्स अट्ठसोवण्णिए कागणिरयणे छत्तले दुवालसंसिए अट्ठकण्णिए अहिगरणिसंठाणसंठिए पण्णत्ते, तस्स णं एगमेगा कोडी उस्सेहंगुलविक्खंभा तं समणस्स भगवओ महावीरस्स अद्धंगुलं, इत्यनुयोगद्वारसूत्रबलादुत्सेधाङ्गुलनिष्पन्नत्वं, केऽपि चैतानि सप्तैकेन्द्रियरत्नानि सर्वचक्रवर्त्तिनामात्माङ्गुलेन ज्ञेयानि, शेषाणि तु सप्त पञ्चेन्द्रियरत्नानि तत्कालीनपुरुषोचितमानानीति । प्रवचनसारोद्धारवृत्तिबलादात्माङ्गुलनिष्पन्नत्वमाहुः,"

अत्र च पक्षत्रये निर्णयः सर्वविद्वेद्यः, अत्र तु बहु वक्तव्यं, तत्तु ग्रन्थगौरवभयान्नोच्यते इति ज्ञेयं.[1]

अस्रयो द्वादशाप्यस्य चतुर्भिरङ्गुलैर्मिताः । स्युः प्रत्येकं समचतुरस्रत्वात्सर्वतः समाः ॥ ३३९ ॥

अयं भावः—

विष्कम्भायामयोर्नात्र, विशेषः कोऽपि विद्यते । षण्णामपि तलानां तच्चतुरङ्गुलमानता ॥ ३४० ॥

तथोक्तं जम्बूद्वीपप्रज्ञप्तिसूत्रे—'तं चउरंगुलप्पमाणमित्तमित्यादि', अनुयोगद्वारसूत्रे तु यदस्य काकिणीरत्नस्यैकैका कोटिरुत्सेधाङ्गुलप्रमितोक्ता । तन्मतान्तरं, तत्सूत्रं प्राग् लिखितमिति ज्ञेयं.

जङ्गमादिबहुविधविषापहरणक्षमम् । तादृग्जातीयगाङ्गेयनिष्पन्नत्वाद्भवेदिदम् ॥ ३४१ ॥
तदानीं सर्वमानानां, तत्प्रामाण्यप्रवर्त्तकम् । अनेनैवाङ्कितानि स्युस्तानि प्रत्यायकानि यत् ॥ ३४२ ॥
यथाऽधुनाऽप्याप्तकल्पनिर्णयाङ्कं प्रतीतिकृत् । कुडवादि भवेन्मानं, व्यवहारप्रवर्त्तकम् ॥ ३४३ ॥
खटीखण्डादिवच्चैतद्वित्त्यादौ मण्डलादिकृत् । स्थिरोद्योतं करोत्येतन्मण्डलैर्गुहयोस्तयोः ॥ ३४४ ॥
इति काकिणीरत्नं. इति सप्तैकेन्द्रियरत्नानि.

अथ सेनापतिरत्नं, भवेत्प्रौढपराक्रमः । हस्त्यादिचक्रिसैन्यानां, स्वातन्त्र्येण प्रवर्त्तकः ॥ ३४५ ॥
समग्रभरतव्याप्तयशोराशिर्महाबलः । स्वभावतः सदोदात्तस्तेजस्वी सात्त्विकः शुचिः ॥ ३४६ ॥
यवनादिलिपौ दक्षो, म्लेच्छभाषाविशारदः । ततो म्लेच्छप्रभृतिषु, सामदानाद्युपायकृत् ॥ ३४७ ॥
विचारपूर्वकाभाषी, यथावसरवाक्यवित् । गम्भीरमधुरालापो, नीतिशास्त्रार्थकोविदः ॥ ३४८ ॥
जागरूको दीर्घदर्शी, सर्वशस्त्रकृतश्रमः । ज्ञातयुद्धविधिश्चक्रव्यूहाद्यूहविशेषवित् ॥ ३४९ ॥
रिपुमित्रगणस्यापि, दम्भादम्भादिभाववित् । प्रत्युत्पन्नमतिर्धीरोऽमूढः कार्यशतेष्वपि ॥ ३५० ॥

---

१ सर्वासामवसर्पिणीनामादौ भाविनां चक्रिणां तुल्यतेति प्रमाणाङ्गुलपक्षः, अन्त्यचक्रयपेक्षया च अनुयोगद्वारवाक्यं स्यात्, तथा च सर्वेषामेव स्वस्वमानेन तुल्यं च स्यात् ।

स्वामिभक्तः प्रजाप्रेष्ठः, प्रसन्ननयनाननः । दुर्दर्शनो द्विषां वीररसावेशे भयङ्करः ॥ ३५१ ॥
लज्जादिलोभानाकृष्टः, स्वामिकार्यैकसाधकः । सल्लक्षणः कृतज्ञश्च, दयालुर्विनयी नयी ॥ ३५२ ॥
जेतव्यवर्षे निम्नोच्चजलशैलादिदुर्गवित् । नानाविषमदुर्गाणां, भङ्गदानादिमर्मवित् ॥ ३५३ ॥
सन्धाने प्रतिभिन्नानां, संहतानां च भेदने । उपायज्ञोऽप्रयासेन, द्विषतैव द्विषं जयन् ॥ ३५४ ॥
तदुक्तं नीतिशास्त्रे—भङ्गोऽस्तु कस्याप्येकस्य, योधने द्विषतो द्विषा । भवत्युभयथा लाभो, मिथो मोदकयोरिव ॥

इति सेनापतिरत्नं ।

कोष्ठागाराद्यधिकृतो, रत्नं गृहपतिर्भवेत् । सर्वेषां चक्रिसैन्यानां, भोज्यवस्त्रादिचिन्तकः ॥ ३५५ ॥
सुलक्षणः सुरूपश्च, दानशौण्डो विशेषवित् । स्वामिभक्तः कृतज्ञश्च, विवेकी चतुरः शुचिः ॥ ३५६ ॥
शाल्यादिनानाधान्यानां, शाकानां चातिभूयसाम् । सिद्धिकृत्प्रातरुप्तानां, सायं तादृक्प्रयोजने ॥ ३५७ ॥
एतस्यैवानुभावेन, सैन्यं भरतचक्रिणः । चर्मच्छत्रसमुद्गस्थं, सप्ताहान्याप भोजनम् ॥ ३५८ ॥

तथोक्तं ऋषभचरित्रे—चर्मरत्ने च सुक्षेत्र, इवोप्तानि दिवामुखे । सायं धान्यान्यजायन्त, गृहिरत्नप्रभावतः ॥ [त्रिषष्ठिशलाका पर्व. १. सर्ग. ४ श्लो. ४३४]

इति गृहपतिरत्नं ॥

अथ स्याद्वार्द्धकीरत्नं, दक्षधीस्तक्षकाग्रणीः । स्कन्धावारपुरग्रामनिवेशेऽधिकृतः शुचिः ॥ ३५९ ॥
स चाधीति व्याकरणे, वास्तुशास्त्रार्थतत्त्ववित् । शब्दव्युत्पत्तिशून्यो हि, शास्त्रं किमपि नार्हति ॥ ३६० ॥

तथाह सिद्धान्तशिरोमणौ भास्कराचार्यः—"यो वेद वेदवदनं सदनं हि सम्यग् । ब्राह्म्याः स वेदमपि वेद किमन्यशास्त्रम्" । यस्मादतः प्रथममेतदधीत्य धीमान् । शास्त्रान्तरस्य भवति श्रवणेऽधिकारी ॥

पत्तनग्रामनगरप्रासादापणवेश्मनाम् । निवेशने यथौचित्यं, दिक्स्थानादिविचक्षणः ॥ ३६१ ॥
गृहाणां बहवो भेदा, वास्तुशास्त्रोदिताश्च ये । तत्र सर्वत्र दक्षोऽसौ, शिल्पवित् प्रतिभापटुः ॥ ३६२ ॥
तथाहि–ध्रुवं धन्यं जयं नन्दं, खरं कान्तं मनोहरम् । सुमुखं दुर्मुखं क्रूरं, विपक्षं धनदं क्षयं ॥ ३६३ ॥
आक्रन्दं विपुलं चैव, विजयं चेति षोडश । संप्रत्यमीषां पस्त्यानां, प्रस्तारः प्रतिपाद्यते ॥ ३६४ ॥
लघुर्भवेत्सरलया, वक्रया रेखया गुरुः । प्रस्तारस्चनार्थिभिः, कर्तव्या वृत्तजातिवत् ॥ ३६५ ॥
तत्रायमाम्नायः—
गुरोरधो लघुं न्यस्तेत्, पृष्टे त्वस्य पुनर्गुरून् । अग्रतस्तूर्ध्ववद्द्याद्यावत्सर्वलघुर्भवेत् ॥ ३६६ ॥
चत्वारो गुरवः स्थाप्या, आद्यपङ्क्तौ ततः परम् । शेषासु पङ्क्तिषु स्थाप्यो, लघुराद्यगुरोरधः ॥ ३६७ ॥

अग्रे तूर्ध्वपङ्क्तिसमं, रिक्ते स्थाने तु दीयते । गुरुरेवं कृते भङ्गेऽन्तिमः सर्वलघुर्भवेत् ॥ ३६८ ॥

अथ प्रकृतं–

प्रतिशालाद्यलिन्दाढ्या, दिक् स्याल्लधूपलक्षिता । गुरुद्विष्टाऽनावृता स्यात्ताश्चतस्रो यथाक्रमम् ॥ ३६९ ॥

तत्र स्यात्प्रथमे भङ्गे, चतुर्भिर्गुरुभिर्गृहम् । एकोऽपवरकोऽलिन्दवर्जितः स चतुर्दिशम् ॥ ३७० ॥

ध्रुवसंज्ञं गृहं तत्स्याद्धन्यं प्राच्यामलिन्दयुक् । यस्यां दिशि गृहद्वारं, सा च प्राची भवेदिह ॥ ३७१ ॥

तथोक्तं विवेकविलासे–"पूर्वादिर्दिग्विनिर्देश्या, गृहद्वाराख्यपेक्षया । भास्करोदयदिक् पूर्वा, न विज्ञेया यथा क्षुते" ॥

दक्षिणस्यामलिन्दः स्याद्यत्र तज्जयसंज्ञकम् । एवं स्युः षोडशे भङ्गे, चतुर्द्विशमलिन्दकाः ॥ ३७२ ॥

वास्तुशास्त्रे फलं चैषामेवमाहुः— स्थैर्यं धनं जयः पुत्राः दारिद्र्यं सर्वसंपदः । मनोह्लादः श्रियो युद्धं वैषम्यं बान्धवा धनम् ॥ क्षयश्च मृत्युरारोग्यं सर्वसंपदिति क्रमात् । ध्रुवादीनां फलं ज्ञेयं, सान्वर्थाख्यान्यमून्यतः" ॥

इयं षोडशभङ्गीह, दिग्मात्रार्थं प्रदर्शिता । एकापवरकादीनां, भेदास्त्वेषामनेकशः ॥ ३७३ ॥

उक्तं च रत्नमालाभाष्ये—"वेश्मनामेकशालानां, शतं स्याच्चतुरुत्तरम् । द्विपञ्चाशद् द्विशालानां, त्रिशालानां द्विसप्ततिः" ॥

नन्द्यावर्त्तं वर्द्धमानं, स्वस्तिकं च तथा परम् । सर्वतोभद्रमित्याद्याः, स्युर्भेदा वेश्मनां शुभाः ॥ ३७४ ॥

तथाह वराहः— नन्द्यावर्त्तमलिन्दैः शालाकुड्यात्प्रदक्षिणान्तगतैः । द्वारं पश्चिममस्मिन् विहाय शेषाणि कार्याणि ॥ द्वारोऽलिन्दान्तगतः प्रदक्षिणोन्यः शुभस्ततश्चान्यः । तस्मिंश्च वर्द्धमाने द्वारं तु न दक्षिणं कार्यम् ॥ अपरान्तगतोऽलिन्दः प्रागन्तगतौ तदुत्थितौ चान्यौ । तदवधिविधृतश्चान्यः प्राग्द्वारं स्वस्तिकं शुभदं ॥ अप्रतिषिद्धालिन्दं समन्ततो वास्तु सर्वतोभद्रम् । नृपविबुधसमूहानां, कार्यं द्वारैश्चतुर्भिरपि ॥

तथा–वास्तुक्षेत्रोद्भवैर्वल्लीवृक्षैर्भूखातपूरितैः । वेश्माभ्युदयिकं दुःखकृद्वा वेत्ति विचक्षणः ॥ ३७५ ॥

आसन्नफलदा वास्तुप्ररूढा गर्भिणी लता । अनासन्नफला कन्या, वन्ध्या भवति निष्फला ॥ ३७६ ॥

वृक्षाः प्लक्षवटाश्वत्थोदुम्बराद्याः शुभाः स्मृताः । अप्रशस्ताः कण्टकिनो, रिपुचौरादिभीतिदाः ॥ ३७७ ॥

तथाऽऽह वराहः–"शस्तौषधिद्रुमलतामधुरा सुगन्धा, स्निग्धाऽसमानशुषिरा च मही नराणां । अप्यध्वनि श्रमविनोदमुपागतानां, धत्ते श्रियं किमुत शाश्वतमंदिरेषु" ? ॥

विज्ञो वास्तुष्वथायर्क्षव्ययांशादीन् विचारयेत् । अमीभिरनुकूलैर्यत्, स्यादभ्युदयकृद्गृहम् ॥ ३७८ ॥

विविक्षिते गृहक्षेत्रे, विस्तारो योऽङ्गुलात्मकः । दैर्घ्येणाङ्गुलरूपेण, गुण्यते जायतेऽथ यत् ॥ ३७९ ॥

तत्स्यात्क्षेत्रफलं तस्मिन्नष्टभक्तेऽधिकं च यत् । तद्ध्वजमानस्तत्रायस्तेषां नामक्रमस्त्वयम् ॥ ३८० ॥

ध्वजो धूमो हरिः श्वा गौः, खरो हस्ती द्विकः क्रमात् । पूर्वादिबलिनोऽष्टाया, विषमास्तेषु शोभनाः ॥ ३८१ ॥
ईशानान्तासु दिक्ष्वेते, पूर्वादिक्रमतः स्थिताः । सान्वर्थनामधेयत्वात्समाः क्वापि न शोभनाः ॥ ३८२ ॥

एषां स्थापनव्यवस्था चैवं विवेकविलासे— वृषं १ सिंहं २ गजं ३ चैव खेटकर्बटकोट्टयोः ।
द्विपः पुनः प्रयोक्तव्यो, वापीकूपसरस्सु च ॥ मृगेन्द्रमासने दद्याच्छयनेषु गजं पुनः । वृषं
भोजनपात्रेषु, छत्रादिषु पुनर्ध्वजम् ॥ अग्निवेश्मसु सर्वेषु, गृहे वह्न्युपजीविनाम् । धूमं
नियोजयेत्किञ्च, श्वानं म्लेच्छादिजातिषु ॥ खरो वेश्यागृहे शस्तो, ध्वाङ्क्षः शेषकुटीषु च । वृषः
सिंहो गजश्चापि, प्रासादपुरवेश्मसु ॥

इत्याया वास्तुनः प्रोक्ता, नक्षत्रमथ कथ्यते । तत्र सामान्यतो वास्तुजन्मभं कृत्तिका भवेत् ॥ ३८३ ॥

यदुक्तं व्यवहारप्रकाशे– भाद्रपददतृतीयायां शनिदिवसे कृत्तिकाप्रथमपादे । व्यतिपाते रात्र्यादौ
विष्ट्यां वास्तोः समुत्पत्तिः ॥

अथेष्टवास्तुनः क्षेत्रफलाङ्केऽष्टगुणीकृते । विभक्ते सप्तविंशत्या, शेषं भवति जन्मभम् ॥ ३८४ ॥
अस्मादेव च नक्षत्राद्गृहाणां स्वामिना सह । राशेर्बलं प्रीतिषडष्टमकादि विचिन्तयेत् ॥ ३८५ ॥
सप्त सप्ताग्निभादीनि, न्यस्येत्परिघचक्रवत् । पूर्वादिषु चतसृषु, दिक्षुभानि यथाक्रमम् ॥ ३८६ ॥
इष्टस्य वास्तुनो जन्मधिष्ण्यमेवं समेति चेत् । द्वारदिश्यस्य गेहस्य, तदोह्योऽभिमुखः शशी ॥ ३८७ ॥
पाश्चात्यभित्तिदिक्प्राप्ते, जन्मभेऽभीष्टवास्तुनः । चन्द्रो भवति पृष्ठस्थोऽनिष्टौ चैतावुभावपि ॥ ३८८ ॥

तथाहुः–"प्रारब्धं संमुखे चन्द्रे, न वस्तुं वास्तु कल्पते । पृष्ठस्थे घातपाताय, द्वयोस्तेन
त्यजेद्गृही" ॥

गृह एव निषिद्धोऽयं, चन्द्रमाः सन्मुखस्थितः । प्रासादनृपसौधश्रीगृहेषु त्वग्रगः शुभः ॥ ३८९ ॥
गुरुशिष्यादिवत्तारा, वर्ज्याऽत्रापि विवेकिभिः । तृतीया पञ्चमी चापि, सप्तमी चापराः शुभाः ॥ ३९० ॥

तथोक्तं–गणयेत्स्वामिनक्षत्राद्यावद्धिष्ण्यं गृहस्य च । नवभिस्तु हरेद्भागं, शेषं तारा प्रकीर्तिता ॥
शान्ता मनोरमा क्रूरा, विजया कलहोद्भवा । पद्मिनी राक्षसी वीरा, आनंदा चेति तारकाः॥

॥ इति नक्षत्रं ॥

नक्षत्राङ्केऽष्टभिर्भक्ते, शेषाङ्केन व्ययो भवेत् । भागाप्राप्तावथाष्टाभिर्भाङ्क एव व्ययो भवेत् ॥ ४९१ ॥
स्यात्त्रिधाऽसौ च पैशाचो, राक्षसो यक्ष एव च । आयेन तुल्योऽभ्यधिको, न्यूनश्चाद्यथाक्रमम् ॥ ४९२ ॥

तथाहुः–"पैशाचस्तु समायः स्याद्राक्षसश्चाधिके व्यये । आयात्तूनतरो यक्षो, व्ययः श्रेष्ठोऽष्टधा त्वयम् ॥
शान्तः क्रूरः प्रद्योतश्च, श्रेयानथ मनोरमः । श्रीवत्सो विभवश्चैव, चिन्तात्मको व्ययोऽष्टमः" ॥

अत्र च–एकशेषे व्ययः शान्तो, द्विशेषे क्रूर इष्यते । एवं यावत् शून्यशेषे, भवेच्चिन्तात्मको व्ययः ॥ ४९३ ॥

इति व्ययः ॥

व्ययाङ्केनाभीष्टवेश्मनाम्नश्चाक्षरसंख्यया । युक्तेक्षेत्रफले भक्ते, त्रिभिः शेषमिहांशकः ॥ ३९४ ॥
इन्द्रांशः स्यादेकशेषे, द्विशेषे च यमांशकः । शून्यशेषे च राजांशोऽधमस्तत्र यमांशकः ॥ ३९५ ॥
इत्यंशकः ॥

तथा–वैशाखे श्रावणे मार्गे, पौषे फाल्गुन एव च । कुर्वीत वास्तुप्रारम्भं, न तु शेषेषु सप्तसु ॥ ३९६ ॥
एते तूक्ताश्चन्द्रमासाः, शुक्लप्रतिपदादिकः । सौरमासांश्चैवमाहुः, सूर्यसंक्रान्तिचिह्नितान् ॥ ३९७ ॥

धामारभेतोत्तरद्दक्षिणास्यं, तुलालिमेषर्षभभाजि भानौ ।
प्राक्पश्चिमास्यं मृगकर्ककुम्भसिंहस्थिते द्व्यङ्गगते न किञ्चित् ॥ ३९८ ॥

तुलालीत्याद्युक्तेऽपि पूर्वोक्तचन्द्रमासपञ्चक एव, न शेषमासेष्विति स्वयं ज्ञेयं ।

संक्रान्ते द्विस्वभावेषु, राशिष्वर्के न कल्पते । एकस्या अप्यभिमुखं, सदनं दिक्चतुष्टये ॥ ३९९ ॥
अथ दक्षिणपार्श्वोपपीडं सुप्तस्य वास्तुनः । नागस्य स्याच्छिरः १ पृष्टं २, पुच्छं ३ कुक्षिर्यथाक्रमम् ॥ ४०० ॥
भाद्रादिमासत्रितये, दिक्षु पूर्वादिषु क्रमात् । मार्गादिमासत्रितये, दिक्षु स्युर्दक्षिणादिषु ॥ ४०१ ॥
फाल्गुनादित्रये तु स्युर्दिक्षु ते पश्चिमादिषु । ज्येष्ठादिषु त्रिषूदीच्यादीनां चतुष्टये दिशाम् ॥ ४०२ ॥
कर्त्तव्यो वास्तुनः कुक्षौ, प्रथमं खननोद्यमः । यथा स्यात्सुखसंपत्तिर्वैपरीत्ये विपर्ययः ॥ ४०३ ॥

तथोक्तं–"शिरः खनेन्मातृपितृन्निहन्यात्, खनेच्च पृष्ठे भयरोगपीडाः । पुच्छं खनेत् स्त्रीशुभगोत्रहानिः, स्त्रीपुत्ररत्नान्नवसूनि कुक्षौ ॥

इति वास्तुनो दिग्नियमः ॥

विदिग्नियमं त्वेवमाहुः– "ईशानादिषु कोणेषु, वृषादीनां त्रिके त्रिके । शेषाहेराननं त्याज्यं, विलोमेन प्रसर्पतः ॥ यदा च मुखमैशान्यां, नाभिराग्नेयगा तदा । पुच्छं भवति नैर्ऋत्यां, वायव्यां मुत्कलं शुभम् ॥

एवं च–वृषादौ मुखमैशान्यां, सिंहादौ वायुकोणके । वृश्चिकादौ च नैर्ऋत्यां, कुम्भादौ हुतभुग्दिशि ॥ ४०४ ॥
वृषादौ वायवी श्रेष्ठा, सिंहादौ नैर्ऋति त्रिके । वृश्चिकादौ शुभाऽऽग्नेयी, तथैशानी घटादिषु ॥ ४०५ ॥

इति खातारम्भः ॥

अथ वास्तुनि भागाः स्युर्देवतानां पृथक् पृथक् । भागानां स्वामिनः पञ्चचत्वारिंशत्सुराः स्मृताः ॥ ४०६ ॥
तत्र भागाश्चतुःषष्टिः, पुरे नृपगृहेषु च । एकाशीतिः शेषगृहे, शतं प्रासादमण्डपे ॥ ४०७ ॥

तथोक्तं सूत्रधारमण्डनकृतवास्तुसारे—"चतुःषष्ट्या पदैर्वास्तुपुरे राजगृहेऽर्चयेत् । एकाशीत्या गृहे भागशतं प्रासादमण्डपे ॥ ईशः १ पर्जन्यो २ जये ३ न्द्रौ ४, सूर्यः ५ सत्यो ६ भृशो ७ नभः ८ । अग्निः ९ पूषा १० ऽथ वितथो ११, गृहक्षत १२ यमौ १३ ततः ॥ गन्धर्वो १४ भृङ्गराजश्च १५ मृगः १६ पितृगणस्तथा १७ । दौवारिको १८ ऽथ सुग्रीवः १९ पुष्पदन्तौ २० जलाधिपः

२१ ॥ असुरः २२ शोष २३ यक्ष्माणौ २४, रोगो २५ ऽहि २६ र्मुख्य २७ एव च । भल्लाट २८ सोम २९ गिरय ३० स्तथा बाह्योऽदिति ३१ र्दितिः ३२ ॥ आपा ३३ पवत्सा ३४ वीशाने, सावित्रः ३५ सविता ३६ ग्निगौ । इन्द्र ३७ इन्द्रजयो ३८ ऽन्यस्मिन्, वायौ रुद्रश्च ३९ रुद्रराट् ४० ॥ मध्ये ब्रह्मास्य ४१ चत्वारो, देवाः प्राच्यादिदिग्गताः । अर्यमाख्यो ४२ विवस्वांश्च ४३, मैत्रः ४४ पृथ्वीधरः ४५ क्रमात् ॥

ईशकोणादितो बाह्ये, चरकी १ च विदारिका २ । पूतना ३ पापा ४ राक्षस्यो, हेतुकाद्याश्च निष्पदाः ॥ चतुष्षष्टिपदे वास्तु, मध्ये ब्रह्मा चतुष्पदः । अर्यमाद्याश्चतुर्भागा, द्विद्व्यंशा मध्यकोणगाः ॥ बहिःकोणेष्वर्द्धभागाः, शेषा एकपदाः सुराः । एकाशीतिपदे ब्रह्मा, नवार्याद्यास्तु षट्पदाः ॥ द्विपदा मध्यकोणेऽष्टौ, बाह्ये द्वात्रिंशदेकशः । शते ब्रह्माष्टसंख्यांशो, बाह्यकोणेषु सार्द्धकौ ॥ अर्यमाद्यास्तु वास्त्वंशाः, शेषाः स्युः पूर्ववास्तुवत् । हेमरत्नाक्षताद्यैस्तु, वास्तुक्षेत्राकृतिं लिखेत् ॥ अभ्यर्च्च्य पुष्पगन्धाद्यैर्बलिं दद्याज्यमोदनम् । दद्यात्सुरेभ्यः सोंकारैर्नमोऽन्तैर्नामभिः पृथक् ॥ वास्त्वारम्भे प्रवेशे च, श्रेयसे वास्तुपूजनम् । अकृते स्वामिनाशः स्यात्तस्मात्पूज्यो हितार्थिभिः ॥

इत्यादि कियद्वास्तुशास्त्रं श्रीजम्बूद्वीपप्रज्ञप्तिसूत्रेऽपि संगृहीतं बोद्धव्यं तथा च सूत्रं– "एगासीतिपदेसु सव्वेसु चेव वत्थूसु णेगगुणजाणए, पंडिए विहिण्णू पणयालीसाए देवयाणमित्यादि" वार्द्धकिरत्नस्वरूपनिरूपणे ।

ऐशान्यां देवगृहं महानसं चापि कार्यमाग्नेय्याम् । नैर्ऋत्यां भाण्डोपस्कारोऽर्थधान्यानि मारुत्याम् ॥ ४०८ ॥
दण्डः प्रकाशे प्रासादे, प्रासादकरसंख्यया । सान्धकारे पुनः कार्यो, मध्यप्रासादमानतः ॥ ४०९ ॥
इत्यादिवास्तुशास्त्रज्ञश्चक्रिरत्नं स वार्द्धकिः । मुहूर्त्तमात्राद्रचयेत्, स्कन्धावारपुरादिकम् ॥ ४१० ॥

इति वार्द्धकिरत्नं ।

भवेत्पुरोहितो रत्नं, कुर्वन् शान्तिकपौष्टिकम् । चतुर्दशानां विद्यानां, पारदृश्वा सदा शुचिः ॥ ४११ ॥
अनेकगुणसंपूर्णः, कलावान् कुशलः कविः । विज्ञः शब्दादिशास्त्राणां, मन्त्रयन्त्रादिमर्मवित् ॥ ४१२ ॥

इति पुरोहितरत्नं ।

भवत्यथ गजो रत्नं, सप्ताङ्ग्या भूप्रतिष्ठितः । उत्तुङ्गो भद्रजातीय, ऐरावत इवापरः ॥ ४१३ ॥
बलीयान्मांसलः शूरः, पटुर्वप्रादिभेदने । दृष्टमात्रोऽपि शत्रूणां, सैन्यशस्त्रादिदर्पहृत् ॥ ४१४ ॥
शास्त्रोक्तैर्लक्षणैर्न्यक्षैः, प्रशस्तैर्लक्षितः शुचिः । लक्ष्मीलीलागृहं रूपशाली सर्वसमृद्धिकृत् ॥ ४१५ ॥

इति गजरत्नं ।

अश्वो रत्नं भवेच्चारुप्रकृतिर्विनयान्वितः । द्वात्रिंशदङ्गुलोत्तुङ्गमूर्द्धाऽवस्थितयौवनः ॥ ४१६ ॥
चतुरङ्गुलदीर्घाच्चैः, स्तब्धकर्णश्च यौवनात् । पततो हि जरस्यश्वकर्णौ नारीकुचाविव ॥ ४१७ ॥

विंशतिं चाङ्गुलान्यस्य, बाहा भवति दैर्घ्यतः । बाहा त्वधः शिरोभागाज्जानुनोरुपरि स्थिता ॥ ४१८ ॥
षोडशाङ्गुलजङ्घोऽयं, चतुरङ्गुलजानुकः । तावदुच्चखुरोऽशीतिमङ्गुलान्येवमुच्छ्रितः ॥ ४१९ ॥
एकन्यूनाङ्गुलशतपरिणाहो भवत्यसौ । अष्टोत्तराङ्गुलशतदीर्घश्च परिकीर्त्तितः ॥ ४२० ॥
तुङ्गत्वं स्यात्तुरङ्गाणामाखुरात् श्रवणावधि । पृष्ठोदरस्य परिधिः, परिणाहो भवेदिह ॥ ४२१ ॥
आपुच्छमूलमायामो, मुखादारभ्य कीर्त्तितः । भवत्यत्राङ्गुलं मानविशेषस्तज्ज्ञदर्शितः ॥ ४२२ ॥
इत्यश्वरत्नमाश्रित्य, निर्दिष्टं मानमागमे । लोके त्वन्योत्तमहयापेक्षयेदं तदीरितम् ॥ ४२३ ॥
जघन्यमध्यश्रेष्ठानामश्वानामायतिर्भवेत् । अङ्गुलानां शतं हीनं, विंशत्या दशभिस्त्रिभिः ॥ ४२४ ॥
परिणाहोऽङ्गुलानि स्यात्सप्ततिः सप्तसप्ततिः । एकाशीतिः समासेन, त्रिविधोऽयं यथाक्रमम् ॥ ४२५ ॥
तथा षष्टिश्चतुःषष्टिरष्टषष्टिः समुच्छ्रयः । द्विपञ्चसप्तकयुता, विंशतिः स्यान्मुखायतिः ॥ ४२६ ॥

इत्यादि ।

पृष्ठं तस्य भवेदीषन्नतं मृदुलमांसलम् । सल्लक्षणं कशावेत्रलताद्याघातवर्जितम् ॥ ४२७ ॥
अश्वोचितानेकरत्नस्वर्णालङ्कारभासुरः । भवत्यसौ च निर्दोषारौद्रपक्ष्मललोचनः ॥ ४२८ ॥
उदात्तगतिवेगेन, मनःपवनतार्क्ष्यजित् । मृणालाम्भोनिश्रयाऽपि, लाघवेन समुत्पतन् ॥ ४२९ ॥
सुकुलोत्थः सुजातिश्च, शुचिः शास्त्रोक्तलक्षणः । तनुस्निग्धोल्लसद्रोमा, मेधावी भद्रकोऽल्परुट् ॥ ४३० ॥
अम्भःपङ्कग्निपाषाणवालुकोल्लङ्घने पटुः । अद्रिगर्त्तादिविषमपथे जितपरिश्रमः ॥ ४३१ ॥
लत्ताघातास्यदंशादिदुष्टचेष्टाविवर्जितः । रिपुष्वतर्कितापातीस्यात्सुशिष्यवदाश्रयः ॥ ४३२ ॥
कालहेषी रक्ततालुजिह्वो जितपरीषहः । निद्रालुः सर्वदा जागरूकश्च समराङ्गणे ॥ ४३३ ॥

तथोक्तं–"सदैव निद्रावशगा, निद्राछेदश्च वाजिनाम् । जायते संगरे प्राप्ते, कर्कस्य च भक्षणे" ॥

तथाऽऽरोहकसर्वाङ्गसुखावहवपुर्गतिः । प्रशस्तद्वादशावर्त्तोऽनश्रुपाती श्रमेऽपि हि ॥ ४३४ ॥

द्वादशावर्त्ताश्चेमे वराहोक्ताः— "ये प्रपाणगलकर्णसंस्थिताः, पृष्ठमद्यनयनोपरिस्थिताः । ओष्ठसक्थिभुजकुक्षिपार्श्वगास्ते ललाटसहिताः सुशोभनाः" ॥

अत्र प्रपाणमुत्तरोष्ठतलं, सक्थिनी पाश्चात्यपादर्योजानू परिभागाः, कुक्षिरत्र वामो, दक्षिणकुक्ष्यावर्त्तस्य गर्हितत्वात्, अत्र कर्णनयनादिस्थानानां द्विसंख्याकत्वेऽपि जात्यपेक्षया द्वादशैव स्थानानि, स्थानभेदानुसारेण स्थानिभेदा अपि द्वादशैवेति.

तत्र कण्ठे स्थितोऽश्वानां, स्याद्देवमणिसंज्ञकः । महालक्षणमावर्त्तः, केषांचित्पुण्यशालिनाम् ॥ ४३५ ॥

इत्यश्वरत्नं ॥

स्त्रीरत्नं च भवेत्सर्वनारीवर्गशिरोमणिः । रूपलक्षणसंयुक्ता, मानोन्मानप्रमाणयुक् ॥ ४३६ ॥
अवर्द्धिष्णुरोमनखा, सदा संस्थितयौवना । आशु स्पर्शमहिम्ना च, सर्वरोगोपशान्तिकृत् ॥ ४३७ ॥
बलवृद्धिकरी भोक्तुः, सर्वर्तुषु सुखावहा । शीतकाले भवत्युष्णा, ग्रीष्मकाले च शीतला ॥ ४३८ ॥
फुल्लाब्जाक्षी शशिमुखी, पीनस्तब्धोन्नतस्तनी । प्रशस्तजघना चारुचरणा गजगामिनी ॥ ४३९ ॥
सुस्मिता मधुरालापा, सुस्वरा प्रियदर्शना । हावभावविलासादिचतुरा स्वर्वधूपमा ॥ ४४० ॥
इति स्त्रीरत्नं ॥

चतुर्दशैवं रत्नानि, चक्रिणां प्राज्यपुण्यतः । स्युः सहस्रेण यक्षाणां, सेवितानि पृथक् पृथक् ॥ ४४१ ॥
द्वौ सहस्रौ च यक्षाणां, चक्रभृद्देहरक्षकौ । चतुर्दश च रत्नानां, सहस्राः षोडशेत्यमी ॥ ४४२ ॥
अथैवं सार्वभौमानां, भवन्ति निधयो नव । नैसर्प्पः पाण्डुकश्चैव, पिङ्गलः सर्वरत्नकः ॥ ४४३ ॥
महापद्मश्च कालश्च, महाकालस्तथापरः । तथा माणवकः शङ्खः, शाश्वता अक्षया अमी ॥ ४४४ ॥
पुस्तकानीह नित्यानि, सन्ति दिव्यानि तेषु च । आख्याताऽस्त्यखिला विश्वस्थितिरेकमिदं मतम् ॥ ४४५ ॥
मतान्तरे तु तत्कल्पपुस्तकप्रतिपादिताः । साक्षात्प्रादुर्भवन्त्यर्थास्तेषु तेषु निधिष्विह ॥ ४४६ ॥
आकरग्रामनगरपत्तनानां निवेशनम् । मडम्बानां द्रोणमुखस्कन्धावाराट्टवेश्मनाम् ॥ ४४७ ॥
स्थापनाविधयः सर्वे, वास्तुशास्त्रेऽधुनापि ये । दृश्यन्ते तत्पुस्तकानि, सन्ति नैसर्पके निधौ ॥ ४४८ ॥
तत्र वृत्यावृतो ग्रामो, लोहाद्युद्भव आकरः । नगरं राजधानी स्याद्रत्नयोनिश्च पत्तनम् ॥ ४४९ ॥
जलस्थलथोपेतमिह द्रोणमुखं भवेत् । अर्द्धतृतीयक्रोशान्तर्ग्रामशून्यं मडम्बकम् ॥ ४५० ॥
इति प्रथमो निधिः ॥

दीनारनालिकेरादेः संख्येयस्य धनस्य यः । पारिच्छेद्यस्य मुक्तादेः, प्रकारश्च समुद्भवे ॥ ४५१ ॥
प्रस्थादिमेयं यद्धान्यं, तोल्यं यच्च गुडादिकम् । तयोः सर्वं प्रमाणं च, मानोन्मानं च तादृशम् ॥ ४५२ ॥
शाल्यादिधान्यबीजानां, वापार्हाणामनेकधा । उत्पत्तिपद्धतिः सर्वा, दर्शिता पाण्डुके निधौ ॥ ४५३ ॥
इति द्वितीयः ।

विधा आभरणानां या, नानास्त्रीपुरुषोचिताः । तुरङ्गाणां गजानां च, ख्याताः पिङ्गलके निधौ ॥ ४५४ ॥
इति तृतीयः ।

चक्रिणां यानि रत्नानि, चक्रादीनि चतुर्दश । व्यावर्णिता तदुत्पत्तिः, सर्वरत्ने महानिधौ ॥ ४५५ ॥
स्फातिमन्ति भवन्त्येतन्निधानस्य प्रभावतः । चतुर्दशापि रत्नानीत्येवमाहुश्च केचन ॥ ४५६ ॥
इति चतुर्थः ॥

उत्पत्तिः सर्ववस्त्राणां, रङ्गाद्यारचनाऽपि च । ख्याता निधौ महापद्मे, विधिश्च क्षालनादिकः ॥ ४५७ ॥

इति पञ्चमः ॥

कालज्ञानं निधौ काले, ज्योतिःशास्त्रानुबन्धि यत् । तथा वंशास्त्रयो येऽर्हच्चक्रभृत्सीरिशार्ङ्गिणाम् ॥ ४५८ ॥
तेषु वंशेषु यद्भूतं, वर्त्तमानं च भावि यत् । शुभाशुभं तद्विज्ञेयं, सर्वमस्मान्महानिधेः ॥ ४५९ ॥
कर्मणां कृषिवाणिज्यादीनां शिल्पशतस्य च । निरूपिता स्थितिःसर्वाप्यस्मिन्नेव महानिधौ ॥ ४६० ॥

इति षष्ठः ॥

नानाविधस्य लोहस्य, स्वर्णस्य रजतस्य च । मणीनां चन्द्रकान्तार्ककान्तादीनां महात्विषाम् ॥ ४६१ ॥
मुक्तानां स्फटिकानां च, प्रवालानां य आकराः । तेषामुत्पत्तिराख्याता, महाकाले महानिधौ ॥ ४६२ ॥

इति सप्तमः ॥

खड्गकुन्तादिशस्त्राणां, नानाऽऽवरणवर्मणाम् । उत्पत्तिर्युद्धनीतिश्च, सद्व्यूहरचनादिका ॥ ४६३ ॥
सामदानादिका दण्डनीतयो विविधाश्च याः । हाकाराद्याश्च ताः सर्वाः, प्रोक्ता माणवके निधौ ॥ ४६४ ॥
ताः स्युर्हाकारमाकारधिक्काराः परिभाषणम् । मण्डले बन्धनं काराक्षेपणं चाङ्गखण्डनम् ॥ ४६५ ॥
परिभाषणमाक्षेपान्मा गा इत्यादि शंसनम् । संरोध इङ्गिते क्षेत्रे, मण्डले बन्ध उच्यते ॥ ४६६ ॥

तथोक्तं स्थानाङ्गे – 'सत्तविहा दंडनीई पण्णत्ता, तं० हक्कारे १ मक्कारे २ धिक्कारे ३ परिभासे ४ मंडलिबंधे ५ चारते ६ छविच्छेदे ७ ॥ इत्यष्टमः ॥'

सर्वोऽपि नाट्यकरणप्रकारो नाटकस्य च । अभिनेयप्रबन्धस्य, प्रकारा येऽप्यनेकशः ॥ ४६७ ॥
चतुर्विधस्य काव्यस्य, तूर्याङ्गानां च भूयसाम् । नानाविधानामुत्पत्तिः, ख्याता शङ्खे महानिधौ ॥ ४६८ ॥

काव्यचातुर्विध्यं चैवं त्रेधा—

धर्मार्थकाममोक्षाख्यं, पुरुषार्थचतुष्टयम् । काव्यं तत्प्रतिबद्धत्वाद्बुधैरुक्तं चतुर्विधम् ॥ ४६९ ॥
संस्कृतं प्राकृतं चापभ्रंशं संकीर्णकेति च । भाषाश्चतस्रस्तद्बद्धं भवेत्काव्यं चतुर्विधं ॥ ४७० ॥

तत्र संस्कृतप्राकृते प्रतीते,

अपभ्रंशो भवेत्तत्तद्देशेषु शुद्धभाषितम् । संकीर्णा सौरसेन्यादिर्भाषा प्रोक्ता विचक्षणैः ॥ ४७१ ॥
गद्यं पद्यं च गेयं च, चौर्णं चेत्यथवा भिदः । तत्र स्याद्गद्यमच्छंदोबद्धं बद्धं च तैः परम् ॥ ४७२ ॥
गान्धर्वरीत्या यद्बद्धं, गेयं गानोचितं हि तत् । चौर्णं भूरि बाहुलकगमाव्ययनिपातयुक् ॥ ४७३ ॥

इति नवमः ॥

नवयोजनविस्तीर्णा, द्वादशयोजनायताः । उच्छ्रिता योजनान्यष्टावष्टचक्रप्रतिष्ठिताः ॥ ४७४ ॥
सौवर्णा विविधै रत्नैः, पूर्णा वैडूर्यरत्नजैः । कपाटैश्चारुरचनारमणीयैरलङ्कृताः ॥ ४७५ ॥

निधिनामसमाख्यानां, पल्यायुष्कसुधाभुजाम् । आवासास्ते महर्द्धीनां, सदा स्युर्जाह्नवीमुखे ॥ ४७६ ॥
चक्रवर्तिनि चोत्पन्ने, तद्भाग्येन वशीकृताः । वर्षं जित्वा वलमानं, गृहान् प्रत्यनुयान्ति तम् ॥ ४७७ ॥

तथोक्तमजितचरिते—"इत्यूचुस्ते वयं गङ्गामुखमागधवासिनः । आगतास्त्वां महाभाग !, त्वद्भाग्येन वशीकृताः ॥ [त्रिषष्ठिशलाका पर्व. २. सर्ग. ४. श्लो. २८०]

पातालमार्गणायान्ति, तिष्ठन्ति च पुराद्बहिः । तेषां नगरतुल्यानां, पुर्यामनवकाशतः ॥ ४७८ ॥
एवं सेनाश्चतस्रोऽपि, पत्त्यश्वेभरथात्मिकाः । पुर्यां न प्रविशन्त्यन्तरवकाशविवर्जिताः ॥ ४७९ ॥

तथोक्तं जम्बूद्वीपप्रज्ञप्तिसूत्रे– 'णवरि णव महाणिहीओ चत्तारि सेणाओ ण पविसंतीत्यादि'

लोके तु–महापद्मश्च पद्मश्च शंखो मकर कच्छपौ । मुकुन्द कुन्दौ नीलश्च चर्चश्च निधयो नव ॥

चतुर्दश सहस्राणि, यक्षा रत्नाधिदेवताः । द्वे सहस्रे चाङ्गरक्षाः सहस्राः षोडशेति ते ॥ ४८० ॥
एकातपत्रं षट्खण्डराज्यं नगरनीवृताम् । मौलिभृद्भूपतीनां च, स्युर्द्वात्रिंशत्सहस्रकाः ॥ ४८१ ॥
गजानां च स्थानां च, निःस्वानानां च वाजिनाम् । स्युः प्रत्येकेन चतुरशीतिः शतसहस्रकाः ॥ ४८२ ॥
ऋतुकल्याणिकानां स्युः, पुरन्ध्रीणां सहस्रकाः । द्वात्रिंशताश्च सुस्पर्शाः, सर्वर्त्तुषु सुखावहाः ॥ ४८३ ॥
देशाधिपानां कन्या या, उद्वूढाश्चक्रवर्त्तिना । तासामपि सहस्राणि, द्वात्रिंशत्स्ववर्वधूश्रियाम् ॥ ४८४ ॥
पुरन्ध्रीणां भवन्त्येवं, चतुष्षष्टिः सहस्रकाः । भवन्ति द्विगुणास्ताभ्यः, सुरूपा वारयोषितः ॥ ४८५ ॥
एकं लक्षं द्विनवतिसहस्राभ्यधिकं ततः । अन्तःपुरिणां निर्दिष्टं, भोगार्थं चक्रवर्त्तिनः ॥ ४८६ ॥
द्वात्रिंशत्पात्रबद्धानां, नाटकानां सहस्रकाः । द्वात्रिंशद् द्वौकितानां स्वकन्योद्वाहेऽखिलैर्नृपैः ॥ ४८७ ॥
ग्रामाणां च पदातीनां, कोट्यः षण्णवतिः स्मृताः । रत्नस्वर्णाद्याकराणां, विंशतिः स्युः सहस्रकाः ॥ ४८८ ॥

स्तोत्रे तु षोडश सहस्रा रत्नाकराणामुक्ताः सन्तीति ।

द्वासप्ततिः पुरवरसहस्राणि भवन्त्यथ । सहस्रा नवनवतिः, श्रुता द्रोणमुखा अपि ॥ ४८९ ॥
अष्टचत्वारिंशदेवं, पत्तनानां सहस्रकाः । कर्बटानां मडम्बानां, सहस्रा जिनसंमिताः ॥ ४९० ॥
द्वीपान्तराणां खेटानां, स्युः षोडश सहस्रकाः । भवन्ति कोटयस्तिस्रो, हलानामथ गंत्रिणाम् ॥ ४९१ ॥
संवाहानां सहस्राणि, चतुर्दश भवन्त्यथ । वेलाकुलसहस्राश्च षट्पञ्चाशत्प्रकीर्त्तिताः ॥ ४९२ ॥
कोटयोऽष्टादशाश्वानां, महतां परिकीर्त्तिताः । अभ्रंलिहानेकवर्णध्वजानां दश कोटयः ॥ ४९३ ॥
महाबन्दिबन्दिनां च, चतुःषष्टिः सहस्रकाः । तथा गोकुलकोट्येका, भोज्यं कल्याणनामकम् ॥ ४९४ ॥
अङ्गमर्दकसंवाहिसूदभूषणधारिणाम् । षटत्रिंशत्कोटयस्तिस्रो, लक्षा भोजनवेश्मनाम् ॥ ४९५ ॥
आतोद्यधारिणां तिस्रो, लक्षा दीपकधारिणाम् । पञ्चलक्षीत्यादि नाना, संपत्स्याच्चक्रवर्त्तिनाम् ॥ ४९६ ॥

इयं च चक्रवर्त्तिनां समृद्धिः कियती श्री जम्बूद्वीपप्रज्ञप्तिसूत्रानुसारेण, शेषा च चक्रिसमृद्धिगर्भितश्रीशान्तिनाथस्तोत्रानुसारेणेति ज्ञेयं,

हारो मुक्तामणिमयः, स्याच्चतुःषष्टियष्टिकः । महार्घोऽत्यनन्तरुचिरः, सर्वेषामपि चक्रिणाम् ॥ ४९७ ॥
यथाऽऽगममिति प्रोक्तं, स्वरूपं चक्रवर्त्तिनाम् । अथ तद्वासुदेवानां, प्रोच्यते सीरिणामपि ॥ ४९८ ॥
एतेऽपि प्राग्भवाचीर्णतपःसंयमसंवरैः । अर्जितोत्तमकर्माण, उत्पद्यन्ते सुधाशिषु ॥ ४९९ ॥
तेभ्यश्च्युत्वोच्चगोत्रेषु, महर्द्धिकमहीभृताम् । कुलेषु ते प्रजायन्ते, न तु नीचाल्पसंपदाम् ॥ ५०० ॥
वैमानिकेभ्य एवात्र, वासुदेवा भवन्ति ते । अवश्यं तत्पदप्राप्त्यै, प्राक्कल्पितनिदानकाः ॥ ५०१ ॥
अत एवातिगाद्धर्येन, भुक्त्वा भोगाननुत्तरान् । प्रयान्ति नरकेष्वेव, ते व्रताऽप्रभविष्णवः ॥ ५०२ ॥
बलदेवास्तु देवेभ्यः, सर्वेभ्योऽपि भवन्ति ते । प्राग्भवे निर्निदानत्वादन्ते स्वीकृत्य संयमम् ॥ ५०३ ॥
स्वर्गं यान्त्यथवा मुक्तिमेषां वैराग्यवासना । खिन्नानां जायते विष्णौ, विपन्ने प्रेष्ठबान्धवे ॥ ५०४ ॥

यत्तु श्रीमहानिशीथे पञ्चमाध्ययने कुवलयाचार्यप्रबन्धे कुवलयप्रभाचार्यो मृत्वा व्यन्तरो बभूव १, ततः सूनाधिपो २, मृत्वा सप्तमपृथिव्यां ३, ततो मृगजातिः ४, ततो महिष ५, स्ततो मनुष्य ६, स्ततो वासुदेव इति मनुष्यभवादनन्तरमागतस्य वासुदेवत्वमुक्तं तन्मतान्तरमिति[1] ज्ञेयं ।

एतौ च द्वौ विमात्रेयौ, भवतो भ्रातरौ मिथः । जगत्यनुत्तरस्नेहौ, हली ज्येष्ठो हरिर्लघुः ॥ ५०५ ॥
एते जितत्रिखण्डाः स्युश्चक्रितोऽर्द्धसमृद्धयः । महीभृतां सहस्रैश्च, सेव्याः षोडशभिस्सदा ॥ ५०६ ॥
त्यक्तनिष्कारणक्रोधाः, सानुक्रोशा अमत्सराः । प्रकृत्यैव परगुणग्राहिणो गतचापलाः ॥ ५०७ ॥
गम्भीरमधुरस्वल्पालापाः सदुचितस्मिताः । सत्यसंपूर्णवचनाः, शरणागतवत्सलाः ॥ ५०८ ॥
लक्षणानां शतेनाष्टाधिकेनाञ्चितभूधनाः । उत्कृष्टसत्त्वाः सङ्गमशूराः प्राप्तजयाः सदा ॥ ५०९ ॥
प्रचण्डाज्ञा अनलसाः, प्रतिपक्षाऽसहिष्णवः । सितच्छत्रेण सततं, चामराभ्यां च शोभिताः ॥ ५१० ॥
श्रीवत्सलाञ्छनाः पद्मनयनाः प्रियदर्शनाः । यशःकीर्तिसुधापूर्णत्रैलोक्या गजगामिनः ॥ ५११ ॥
श्यामलद्युतयस्तत्र, वासुदेवा महौजसः । पीतकौशेयवसना, नरसिंहाः स्फुरद्रुचः ॥ ५१२ ॥
रत्नेन कौस्तुभाख्येन, सदाऽलङ्कृतवक्षसः । उदात्तसत्त्वाः संग्रामसोत्साहा गरुडध्वजाः ॥ ५१३ ॥
तथोक्तं– 'जुद्धसूरा वासुदेवा'
पाञ्चजन्याभिधः शङ्खः, स्याच्चक्रं च सुदर्शनम् । गदा कौमोदिकी चापं, शार्ङ्गं खड्गस्तु नन्दकः ॥ ५१४ ॥
मणिश्च वनमाला च, सप्तरत्नी भवेदियम् । उत्कृष्टा वासुदेवानां, सदा देवैरधिष्ठिता ॥ ५१५ ॥

---

१. कादाचित्कं तदिति न विवक्षितं स्याद्, यद्वा न तत्रानन्तर्यनियमः, श्रीवीरविभु भवानामिव स्थूलगणनाया अपि संभवात्, एवं च न बाधा विधिवाक्यस्य ।

तत्राशक्यो वादयितुं, शार्ङ्गोऽन्येन हरिं विना । श्रुत्वैवास्य ध्वनिं दृप्तं, वैरिसैन्यं पलायते ॥ ५१६ ॥
दण्डरत्नवदुत्कृष्टप्रभावाढ्या परेण च । दुर्वहा स्याद्गदा दृप्यद्वैरिदोर्मदखण्डिनी ॥ ५१७ ॥
दुराकर्षं धनुः शार्ङ्गमन्येनाद्भुतशक्तिकम् । पलायते शत्रुसैन्यं, यस्य टङ्कारवादपि ॥ ५१८ ॥
श्रूयते धातकीखण्डं, गते चरमशार्ङ्गिणि । द्रौपदीहारिणः सैन्ये, पद्मोत्तरमहीपतेः ॥ ५१९ ॥
पाञ्चजन्यस्य शब्देन, तृतीयोऽंशः पलायितः । शेषो नष्टस्तृतीयोऽंशो, धनुष्टङ्कारवेण च ॥ ५२० ॥
वनमालाभिधा च स्रक्, सदा हृदयवर्त्तिनी । अम्लाना सततं सर्वर्त्तुकपुष्पाऽतिसौरभा ॥ ५२१ ॥
चक्रादीनां च रत्नानां, वर्णनं प्राग् निरूपितम् । यथासंभवमत्रापि, योजनीयं मनीषिभिः ॥ ५२२ ॥

प्रश्नव्याकरणसूत्रे तु वासुदेववर्णने शक्तिः शस्त्रं दृश्यते, मणिश्चात्र न दृश्यते तथा च तद्ग्रंथः 'संखचक्कगयसत्तिणंदगधरा इति' शक्तिश्च त्रिशूलविशेष इति तद्वृत्तौ ।

भवन्ति बलदेवास्तु, गौराङ्गा नीलवाससः । योषिद्दृक्कार्मणी भूतरूपास्तालध्वजान्विताः ॥ ५२३ ॥
एषां स्युस्त्रीणि रत्नानि, सेवितानि सुरैः सदा । धनुः परैरनाकर्ष्यं, मुशलं च हलं वरम् ॥ ५२४ ॥
त्रीण्यप्यमूनि द्विषतां, पटूनि मदभेदने । दुर्लभानि सुराणामप्यमोघानि च सर्वदा ॥ ५२५ ॥

उक्तानि चैतानि रामचरित्रेऽनङ्गलवणमदनाङ्कुशसंग्रामे पद्मस्य बलदेवस्य ।

तथाहि—पद्मनाभोऽप्यभाषिष्ट, ममापि शिथिलायते । धनुःश्वभ्रे स्थितमिव, वज्रावर्त्तं न कार्यकृत् ॥ अभून्मुशलरत्नं च, धीरसेनैर्दलं क्षमम् । कणखण्डनमात्रार्हमेवैतदपि संप्रति ॥ अनङ्कुशोऽङ्कुशीभूतं, यद्दुष्टनृपदन्तिनाम् । हलरत्नं तदप्येतदभूद्भूपाटनोचितम् ॥ सदा यक्षै रक्षितानां, विपक्षक्षयकारिणाम् । तेषामेव ममास्त्राणामवस्था केयमागता ॥ इत्यादि.

स्युः षोडश सहस्राणि, विष्णूनां प्राणवल्लभाः । जगदुत्तरसौभाग्यशालिन्यः स्वर्वधूसमाः ॥ ५२६ ॥

तथोक्तं दशमाङ्गे— 'सोलसदेवीसहस्सवरनयणहिययदइया' इति,

अन्तकृत्सूत्रस्याप्यादौ कृष्णवर्णने 'रुप्पिणीपामोक्खाणं सोलसण्हं देवीसहस्साणं इति' केचिद्वासुदेवानामर्द्धचक्रित्वेन द्वात्रिंशत्सहस्राणि प्रेयसीनामाहुः ।

तथोक्तं षष्ठाङ्गे पञ्चमाध्ययने 'रुप्पिणीपामोक्खाणं बत्तीसाए महिलासाहस्सीणं' इति[1] ज्ञेयं ।

सीरिणां तु प्रियासङ्ख्यानैयत्यं नोपलभ्यते । ज्ञेयो दिग्विजयोऽमीषां, कथञ्चिच्चक्रवर्त्तिवत् ॥ ५२७ ॥
षोडशाशेषसैन्याढ्याः, पार्थिवानां सहस्रकाः । आकर्षन्त्यन्धुकण्ठस्थं, बद्धं शृङ्खलया हरिम् ॥ ५२८ ॥
नौष्ठोपपीडं स्वं स्थाम, प्रयुञ्जाना अपीशते । पदाच्चालयितुं ते तं, महीधरमिव द्विपाः ॥ ५२९ ॥
स तु तान् शृङ्खलाप्रान्तविलग्नान् कीटकानिव । ताम्बूलभक्षणव्याजादाकर्षत्येकहेलया ॥ ५३० ॥

१. मुख्यानां राज्ञां षोडश सहस्राः कन्याः अन्याश्च षोडश इति न द्वयोर्विरोधः यतः अन्तकृति सूत्रे देवीसहस्साणमिति षष्ठाङ्गे च महिलासहस्साणमिति स्पष्टो विभागः ।

बलमेवंविधं कोटिशिलोत्क्षेपक्षमं भवेत् । विष्णूनां द्विगुणं तेभ्यो, बलं स्याच्चक्रवर्त्तिनाम् ॥ ५३१ ॥
अगोचरं जगद्धाचामनन्तं बलमर्हताम् । प्रकम्प्य मेरुं बाल्येऽपि, महावीरेण दर्शितम् ॥ ५३२ ॥
घनश्यामस्निग्धवर्णाधिष्ठिता देवतागणैः । शिला कोटिशिला याम्यभरतार्द्धे भवेदिह ॥ ५३३ ॥
चन्दनैः कुङ्कुमोपेतैरर्चिता कुसुमोत्करैः । सा शिला भाति देवीव, भूषणैर्भूषिताऽभितः ॥ ५३४ ॥
सिन्धुदेशे दशार्णाद्रिसमीपे वा मतान्तरे । योजनायामविष्कम्भोच्छ्राया सास्ति निरत्यया ॥ ५३५ ॥
आद्यं मतं पद्मचरित्रे, द्वितीयं विचारसप्रतौ.[1]
विजित्य भरतस्यार्द्धमत्र सर्वेऽपि केशवाः । निजं बलं परीक्षन्ते, समुदस्य शिलामिमाम्[2] ॥ ५३६ ॥
इमां वामभुजस्याग्रे, नयत्यादिमकेशवः । द्वैतीयीकश्च शिरसि कण्ठपीठे तृतीयकः ॥ ५३७ ॥
वक्षःस्थले तुरीयश्च, पञ्चमो जठरोपरि । षष्ठः कटितटेऽथोरुप्रदेशे सप्तमो हरिः ॥ ५३८ ॥
आजानु चाष्टमोऽन्त्यश्च कथञ्चिज्जानुसंनिधौ । क्रमोऽयमवसर्पिण्यामुत्सर्पिण्यां विपर्ययः ॥ ५३९ ॥
गणभृच्छान्तिनाथस्यामुष्यां चक्रायुधाभिधः । आदौ सिद्धिं गतोऽनेकैः, कलितः साधुसिन्धुरैः ॥ ५४० ॥
ततस्तयैव गणभृत्पुङ्गवस्य क्रमादिह । द्वात्रिंशता युगैः सिद्धाः, सङ्ख्येया मुनिकोटयः ॥ ५४१ ॥
ततः श्रीकुंथुनाथस्याष्टाविंशत्या युगैः सह । सिद्धाः शिलायामेतस्यां संख्येया मुनिकोटयः ॥ ५४२ ॥
अरस्य चतुर्विंशत्या, युगैर्द्वादशकोटयः । श्रीमल्लेर्युगविंशत्या, मुनीनां कोटयश्च षट् ॥ ५४३ ॥
तिस्रः कोट्यः सुव्रतस्य, तीर्थे कोटिर्नमिप्रभोः । सिद्धा मुनीनामित्येषा, नाम्ना सिद्धिशिलाऽप्यहो ॥ ५४४ ॥
स्वरूपं प्रतिविष्णूनामप्यूह्यं वासुदेववत् । पर्यन्ते त्वायुषोऽमीषां, विष्णुर्जगति जृम्भते ॥ ५४५ ॥
मिथश्चोपस्थिते युद्धे, मुक्तं विष्णुजिघांसया । जायते विष्णुसाच्चक्रं, लज्जयेव वशीकृतम् ॥ ५४६ ॥
तेनैवाथ स्वशस्त्रेण, चक्रेणामोघशक्तिना । प्रयान्ति नरकं मृत्वा, हरिणा छिन्नमस्तकाः ॥ ५४७ ॥
नवानां वासुदेवानां, काले स्युर्नारदा नव । तेषां मनःप्रिया नानादेशवार्त्तादिशंसिनः ॥ ५४८ ॥

तथोक्तं रामचरित्रे तत्कालीननारदस्वरूपं— "मरुत्तो रावणं नत्वोवाच कोऽयं कृपानिधिः । पापादमुष्माद्यो ह्यस्मांस्त्वया स्वामिन्यवारयत् ? ॥ आचख्यौ रावणोऽप्यासीन्नाम्ना ब्रह्मरुचिर्द्विजः । तापसस्याभवत्तस्य, भार्या कूर्मीति गुर्व्यभूत् ॥ तत्रैयुः साधवोऽन्येद्युस्तेष्वेकः साधुरब्रवीत् । भवभीत्या गृहवासस्त्यक्तो यत्साधु साधु तत् ॥ भूयः सदारसङ्गस्य, विषयैर्लुब्धचेतसः । गृहवासाद्धनवासः, कथं नाम विशिष्यते ? ॥ श्रुत्वा ब्रह्मरुचिस्तत्तु, प्रपन्नजिनशासनः । तदैव प्राव्रजत्सा च, कूर्म्यभूच्छ्राविका परा ॥ मिथ्यात्ववर्जिता तत्र, सा वसन्त्याश्रमे सुतम् । सुषुवे नारदं नाम, रोदनादिविवर्जितम् ॥ गतायाश्चान्यतस्तस्यास्तं जहुर्जृम्भिकामराः ।

---

१ कालभेदेनाधिपतिभेदेन वा देशसीमाया वैचित्र्यमपेक्ष्य नात्र विरोधः स्याद् ।

२ अनियमोऽयं ततो लक्ष्मणेन सीताहरणे प्रत्ययायोत्पाटिता प्राक् सेत्यत्रापि न विरोध : ।

पुत्रशोकादिन्दुमालाऽऽर्यान्तिके प्राव्रजच्च सा: ॥ तेऽमरा: पालयामासु, शास्त्राण्यध्यापयंश्च तम् । आकाशगामिनीं विद्यां, ददुस्तस्मै क्रमेण च ॥ अणुव्रतधरः प्राप, यौवनं च मनोहरम् । स शिखाधारणान्नित्यं, न गृहस्थो न संयतः ॥ कलहप्रेक्षणाकाङ्क्षी, गीतनृत्यकृतूहली । सदा कन्दर्पकौकुच्यमौखर्यात्यन्तवत्सलः ॥ वीराणां कामुकानां च, संधिविग्रहकारकः । छन्निकाख्यो वृषीपाणिरारूढः पादुकासु च ॥ देवैः स वर्द्धितत्वाच्च, देवर्षिः प्रथितो भुवि । प्रायेण ब्रह्मचारी च, स्वेच्छाचार्येष नारदः ॥ [त्रिषष्ठि पर्व - ७. श्लोक ४०३ थी ४१४]

इत्येतदनुसारेण, परेषामपि भाव्यताम् । स्वरूपं नारदर्षीणां, यथासंभवमागमात् ॥ ५४९ ॥

एवं चासौ रामचरित्राद्यनुसारेण सम्यग्दृष्टिरणुव्रतधारी च प्रतीयते.० षष्ठांगे तु तत्कालीनस्य नारदस्य स्वरूपमेवमुक्तमर्थतः—

कच्छुल्लो नारदो नाम, दर्शनेनातिभद्रकः । विनीतश्चेष्टयुद्धत्वादन्तःकलुषिताशयः ॥ ५५० ॥
व्रतित्वाद्धृतमाध्यस्थः, श्रितानां प्रियदर्शनः । सुरूपो वल्कवसनो, मुकुटभ्राजिमस्तकः ॥ ५५१ ॥
वक्षःकूर्प्रोत्तरासङ्गः, श्यामेन मृगचर्मणा । यज्ञोपवीतयुक् दण्डी, कमण्डलुं करे दधत् ॥ ५५२ ॥
मौञ्जेन कटिसूत्रेण, रुद्राक्षजपमालया । विज्ञः कच्छपिकापाणिर्गीतगान्धर्वकौतुकी ॥ ५५३ ॥
आकाशगामी सकलभूतलाटनलम्पटः । विविधानां स विद्यानां, निधानं केशवप्रियः ॥ ५५४ ॥
युद्धप्रियस्तदन्वेषी, जनानामसमाधिकृत् । पार्थिवान्तःपुरादावप्यनिरुद्धगतिस्सदा ॥ ५५५ ॥
स चाप्रत्याख्यातपापकर्मा विरतिवञ्चितः । पैशुन्यभीरुभिर्भूपैर्मिथ्यादृगपि पूज्यते ॥ ५५६ ॥

तथोक्तं षष्ठाङ्गवृत्तौ—"न प्रतिहतानि सागरोपमकोटीकोट्यन्तःप्रवेशनेन सम्यक्त्वलाभतः, न च प्रत्याख्यातानि सागरोपमकोटीकोट्याः संख्यातसागरोपमैर्न्यूनताकरणेन सर्वविरतिलाभतः पापकर्माणि ज्ञानावरणीयादीनि येन स तथा." प्रश्नव्याकरणवृत्तावप्युक्तं—"नारदमुनिर्गगनादवततार, अभ्युत्थितश्च सपरिवारेण पाण्डुना, द्रोपद्या तु श्रमणोपासिकात्वेन मिथ्यादृष्टिमुनिरयमिति कृत्वा नाभ्युत्थित[१] इति ।

रुद्रा अपि भवन्त्येवमेकादश महोद्धताः । वशीकृतानेकविद्योर्जिताः सम्यक्त्वशालिनः ॥ ५५७ ॥
जघन्यमध्यमोत्कृष्टास्त्रिधा ये पुरुषा भुवि । तेषूत्कृष्टा अमी प्रोक्तास्त्रिधा धर्मादिभेदतः ॥ ५५८ ॥
अर्हन्तो धर्मपुरुषाश्चक्रिणो भोगपुरुषाः । वासुदेवाः पुनः कर्मपुरुषा इति कीर्त्तिताः ॥ ५५९ ॥
एते यथोक्ताः पुरुषा, विदेहेषु निरन्तरम् । भवन्त्यन्येषु दशसु, भरतैरावतेषु तु ॥ ५६० ॥
स्युः क्रमादवसर्पिण्यामुत्सर्पिण्यां तथोत्क्रमात् । आयुर्देहादिभिस्तुल्या, जगतामुपकारिणः ॥ ५६१ ॥
इति गदितया रीत्या विश्वे भवन्ति हि चक्रिणो, भुजबलजितस्वस्वक्षेत्राः क्षताखिलशत्रवः ।

---

१ तेषां सम्यग्दृक्त्वे मिथ्यादृक्त्वे वा न नियमः, श्रूयते चावश्यके श्रीकृष्णकृतो धर्मचर्चायां नारदस्य पृष्टविहरज्जिनस्यापि न्यक्कारः योगसंग्रहे ।

हरिहलभृदादीनामप्यूह्यतां दिगियं बुधाः । श्रुतजलनिधेरेषां शेषं विदन्तु विशेषतः ॥ ५६२ ॥
विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपे किलैकत्रिंशत्तम एष पूर्त्तिमभजत्सर्गो निसर्गोज्ज्वलः ॥ ५६३ ॥

॥ इति लोकप्रकाशे एकत्रिंशत्तमः सर्गः समाप्तः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

॥ अथ द्वात्रिंशत्तमः सर्गः ॥

अथास्यामवसर्पिण्यां, क्षेत्रेऽत्रारे तृतीयके । अन्तिमस्यैव पल्यस्याष्टमे भागे किलान्तिमे ॥ १ ॥
सप्ताभूवन् कुलकरा, आद्यो विमलवाहनः । चक्षुष्मांश्च यशस्वी चाभिचन्द्रश्च प्रसेनजित् ॥ २ ॥
मरुदेवश्च नाभिश्च, क्रमादेषामिमाः प्रियाः । चन्द्रयशाश्चन्द्रकान्ता, सुरूपा प्रतिरूपिका ॥ ३ ॥
चक्षुःकान्ता च श्रीकान्ता, मरुदेवा स्वभर्त्तृवत् । एतासामायुरुच्चत्वादिकं तदिह वक्ष्यते ॥ ४ ॥
स्त्रियः सप्तापि चक्षुष्मान्, यशस्वी च प्रसेनजित् । प्रियङ्गुवर्णा गौरोऽभिचन्द्रोऽन्ये काञ्चनत्विषः ॥ ५ ॥
आद्यसंहननाः सर्वे, आद्यसंस्थानशालिनः । याम्यस्य भरतार्द्धस्य, मध्ये खण्डेऽभवन्नमी ॥ ६ ॥
पल्यस्य दशमो भाग, आयुराद्यस्य कीर्त्तितम् । ततः पूर्वाण्यसंख्यानि, न्यूनन्यूनान्यनुक्रमात् ॥ ७ ॥
आयुर्भवति पञ्चानां, स्यान्नाभेः सप्तमस्य तत् । संख्येयान्येव पूर्वाणि, तत्पत्न्या अपि तादृशम् ॥ ८ ॥
असंख्यपूर्वायुष्कत्वे, त्वस्य पत्न्याः कथं भवेत् ? । निर्वृतिर्मरुदेवाया, निजभर्तुसमायुषः ॥ ९ ॥
अयं भावः—
पल्योपमस्य कल्प्यन्ते, चत्वारिंशल्लवा यदि । तदा तदष्टमोंऽशः स्याद्यावान् पञ्चलवात्मकः ॥ १० ॥
तावानभूत्कुलकरकालः सर्वात्मनाऽपि हि । तत्र पल्यस्य दशमो, भाग आद्यस्य जीवितम् ॥ ११ ॥
पल्यस्य दशमांशेन, चत्वारिंशद्विभाजिताः । पूर्वोदिताः स्युश्चत्वारो, भागाः कुलकृदायुषि ॥ १२ ॥
आद्ये कुलकरे पूर्णायुषि पल्योपमस्य तत् । अंशश्चत्वारिंशदेकः, शिष्यतेऽस्मिन् परेऽखिलाः ॥ १३ ॥
विदेहे पश्चिमेऽभूतां, सुहृदौ वणिजावुभौ । एकोऽभूत्तत्र मायावी, द्वितीयः सरलाशयः ॥ १४ ॥
तयोर्मृत्वाऽथ मायावी, क्षेत्रेऽस्मिन् कुञ्जरोऽभवत् । उज्ज्वलो भद्रजातीयो, युग्मी कुलकरः परः ॥ १५ ॥
गजोऽसौ प्राग्भवस्नेहाद्, दृष्ट्वा तं युग्मिपुङ्गवम् । स्कंधमारोपयामास, सुरेन्द्रं हस्तिमल्लवत् ॥ १६ ॥
ततश्चैतस्य विमलवाहनेत्यभिधाऽभवत् । परेषु युग्मिषु प्राप, गौरवं तेन सोऽधिकम् ॥ १७ ॥
प्रागभूवन् दशविधाः, कल्पवृक्षास्ततः पुनः । तेऽवाशिष्यन्त विमलवाहने सति सप्तधा ॥ १८ ॥

तथोक्तं स्थानाङ्गे सप्तमे स्थाने–विमलवाहणे णं कुलगरे सत्तविहा रुक्खा उवभोगत्ताए हव्वमागच्छिंसु, तं०— मत्तंगया य १ भिंगा २ चित्तंगा ३ चेव होंति चित्तरसा ४ । मणियंगा ५ य अणियणा ६ सत्तमगा कप्परुक्खा ७ य ॥'कप्परुक्खत्ति' उक्तव्यतिरिक्त-सामान्यकल्पितफलदायित्वेन कल्पना कल्पस्तत्प्रधाना वृक्षाः कल्पवृक्षाः.

कालेन हीयमानेन, कल्पद्रुपरिहाणितः । युग्मिनां कलहे लोभादन्योऽन्यं नीतिविप्लवे ॥ १९ ॥
हाकाराख्यां दण्डनीतिं, चक्रे विमलवाहनः । कशयेव तुतोदाश्वं, तया नीत्याऽपमार्गगम् ॥ २० ॥
सलज्जास्तेऽपि तेनैव, दण्डेन ह्रीवशंवदाः । कदापि न पुनर्नीतिमतिक्रामन्ति भद्रकाः ॥ २१ ॥
द्वयोः कुलकृतोरेषा, कालेनास्या व्यतिक्रमे । माकाराख्या बभूवान्या, सा तृतीयचतुर्थयोः ॥ २२ ॥
आद्या स्वल्पापराधानां, द्वितीया प्रचुरागसाम् । पञ्चमादित्रये त्वन्या, धिक्काराह्वा बभूव सा ॥ २३ ॥
अल्पागसां भवत्याद्या, द्वितीया मध्यमागसाम् । अत्युत्कृष्टापराधानां, दंडनीतिस्तृतीयिका ॥ २४ ॥
नवाष्टौ सप्त सार्द्धाः षट्, षट् सार्द्धाः पञ्च पञ्च च । पञ्चविंशाः क्रमादेषां, देहमाने धनुःशताः ॥ २५ ॥
दशभागीकृतस्यैषामायुषः प्रथमोऽंशकः । कुमारत्वेऽन्तिमश्चांशो, वार्द्धके परिकीर्त्तितः ॥ २६ ॥
अष्टासु मध्यमांशेषु, कुलकृत्पदगौरवः । सप्तानामप्यमीषां स्युरेकैको वाहनं गजः ॥ २७ ॥
हस्तिनां च भवत्यासुर्निजैः कुलकरैः समं । द्वौ सुवर्णकुमारेषूत्पन्नौ कुलकरौ क्रमात् ॥ २८ ॥
अथोदधिद्वीपकुमारेषु द्वौ द्वौ यथाक्रमम् । नाभिर्नागकुमारेषु, तथा षण्णां प्रिया अपि ॥ २९ ॥
निर्वृता मरुदेवा तु, सप्तापि करिणोऽभवन् । नागदेवा मतेऽन्येषां, केषाञ्चित्त्वाद्य एव सः ॥ ३० ॥

तथोक्तं श्रीज्ञानसागरसूरिकृतावश्यकावचूर्णौ–"हस्तिनः सप्तापि षट् च स्त्रियो नागकुमारेषु भवन्त्युत्पन्नाः, अन्ये व्याचक्षते हस्ती एक एव, षट् स्त्रियो नागेषु शेषैर्नाधिकार इति" ।

आवश्यकाभिप्रायोऽयं, षष्ठोपाङ्गे तु तात्त्विकैः । उक्ताः कुलकराः पञ्चदश तेऽमी यथाक्रमम् ॥ ३१ ॥
सुमतिश्च प्रतिश्रुतिर्भवेत्सीमङ्करः परः । सीमन्धरः क्षेमङ्करः, क्षेमन्धरस्ततः परम् ॥ ३२ ॥
विमलवाहनश्चक्षुष्मान्, यशस्व्यभिचन्द्रकः । चन्द्राभः प्रसेनजिच्च, मरुदेवस्तथाऽपरः ॥ ३३ ॥
नाभिः श्रीऋषभस्वामी, प्रभोस्तत्त्वाविवक्षया । उक्ताः कुलकराः पद्मचरित्रे तु चतुर्दश ॥ ३४ ॥
पल्योपमाष्टमांशस्य, पञ्चभागीकृतस्य ये । चत्वारोऽशास्तावदायुर्मतेऽस्मिन् सुमतेः स्मृतम् ॥ ३५ ॥
सर्वेऽप्यन्ये[1] पञ्चमेऽंशे, द्वादशानां च जीवितम् । असंख्येयानि पूर्वाणि, नाभेः संख्येयकानि च ॥ ३६ ॥
पञ्चानां प्रथमा नीतिः, प्रथमानां प्रकीर्त्तिता । द्वितीयानां द्वितीया स्यात्तृतीयानां तृतीयिका ॥ ३७ ॥
नाभेः कुलकरस्याथ, मरुदेवामृगीदृशः । भूमौ भाविविनीतायां, पुत्रत्वेनादिमो जिनः ॥ ३८ ॥

---

१ पञ्चदशानां विशेषकालापेक्षया कुलकरत्वं, एतदवसर्पिण्यपेक्षया सप्तानामित्यपि नासुन्दरम् ।

वर्त्तमानावसर्पिण्याः, संबन्धिनि तृतीयके । अरे नवाशीतिपक्षत्रुटिताङ्गावशेषके ॥ ३९ ॥
शुचिश्यामलतुर्यायामागात्सर्वार्थसिद्धितः । स्थितिं समाप्य तत्रत्यां, त्रयस्त्रिंशत्पयोधिकाम् ॥ ४० ॥
त्रयोदशे भवे सोऽस्मात्सार्थवाहो धनाभिधः । आसीत्ससार्थः सोऽचालीद्वसन्तपुरमन्यदा ॥ ४१ ॥
वर्षाकाले पथि प्राप्ते, कान्तारे तस्थिवानसौ । सहागतान्मुनींस्तत्र, सस्मार शरदागमे ॥ ४२ ॥
अन्ये जीवन्ति कन्दाद्यैर्मुनयस्तु कथं हहा ! । ततः प्रगे तानाकार्य, स घृतैः प्रत्यलम्भयत् ॥ ४३ ॥
तत्र च प्राप सम्यक्त्वं, मृत्वा कालान्तरेऽथ सः । बभूवोत्तरकुरुषु, युग्मी मृत्वा ततोऽपि च ॥ ४४ ॥
सौधर्मे त्रिदशोऽथाभूद्विदेहेषु महाबलः । ईशाने ललिताङ्गोऽथ, वज्रजङ्घो महीपतिः ॥ ४५ ॥
विदेहेष्वभवत्सोऽथ, युग्म्युत्तरकुरुष्वथ । सौधर्मे त्रिदशोऽथाभूद्विदेहेषु चिकित्सकः ॥ ४६ ॥
श्रेष्ठिभूपामात्यसार्थवाहपुत्रैः सुहृद्वरैः । संयुक्तः स पटूचक्रे, कृमिकुष्ठार्दितं मुनिम् ॥ ४७ ॥
लक्षपाकं ददौ तत्र, तैलं वैद्यसुतः स्वयम् । गोशीर्षचन्दनं लक्षमूल्यं च रत्नकम्बलम् ॥ ४८ ॥
वणिग् ददौ विना मूल्यं, साधुभक्त्या महाशयः । प्रतिपद्य स चारित्रं, संविग्नः प्रययौ शिवम् ॥ ४९ ॥
चतुर्भिस्सह मित्रैः स, यतीभूय चिकित्सकः । देवोऽभूदच्युते तस्माच्च्युत्वा पञ्चापि ते सुराः ॥ ५० ॥
विजये पुष्कलावत्यां, पुरी या पुण्डरीकिणी । तत्रार्हद्वज्रसेनस्य, समजायन्त नन्दनाः ॥ ५१ ॥
तत्र वैद्यस्य जीवोऽभूद्वज्रनाभाभिधोऽग्रजः । बाहुः सुबाहुः पीठश्च, महापीठ इतीतरे ॥ ५२ ॥
उत्सृज्य सार्वभौमर्द्धिं, वज्रनाभोऽनुजैः सह । उपादत्त परिव्रज्यामर्हतः पितुरन्तिके ॥ ५३ ॥
अध्यगीष्ट स पूर्वाणि, चतुर्दश परे पुनः । अङ्गान्येकादशाऽऽद्योऽत्र तीर्थकृत्कर्मभागभूत् ॥ ५४ ॥
द्वितीयश्चान्नपानाद्यैर्भक्तिं कुर्वन्महात्मनाम् । चक्रिभोगफलं कर्मार्जयदार्जवपावनः ॥ ५५ ॥
तार्त्तीयीकश्च साधूनामङ्गसंवाहनादिभिः । लोकोत्तरं बाहुबलफलं कर्म किलार्जयत् ॥ ५६ ॥
ज्येष्ठप्रशंसामात्सर्योदयाच्चारित्रिणावपि । वेदमर्जयतः पीठमहापीठौ च योषिताम् ॥ ५७ ॥
ततः पञ्चापि सर्वार्थसिद्धेऽभुवन् सुधाभुजः । च्युत्वाऽऽदौ च ततो वज्रनाभजीवोऽभवज्जिनः ॥ ५८ ॥
मासान् गर्भे नव स्थित्वा, चतुर्भिरधिकान् दिनैः । चैत्रस्य श्यामलाष्टम्यामजनिष्ट जिनेश्वरः ॥ ५९ ॥
गर्भे जन्मनि राज्याप्तौ, दीक्षाया केवलोद्भवे । भं प्रभोरुत्तराषाढा, राशिः स्याद्धनुराह्वयः ॥ ६० ॥
व्रतोद्वहनधुर्यत्वादादौ वृषभवीक्षणात् । स्वप्नेषु मात्रा वृषभाङ्कत्वाच्च वृषभाभिधा ॥ ६१ ॥
वृषभः प्रथमो राजाऽऽदिमो भिक्षाचरोऽपि च । आद्योऽर्हन् केवली चेत्यभुवन् पञ्चाभिधाःप्रभोः ॥ ६२ ॥
देशोनवर्षवयसि, प्रभौ हरिरुपागमत् । जीतमाद्यार्हतो वंशस्थापनं ज्ञानतो विदन् ॥ ६३ ॥
इक्षुं शक्रकरे वीक्ष्य, प्रसारितकरे प्रभौ । वंशमिक्ष्वाकुनामानं, स्थापयामास वासवः ॥ ६४ ॥
आकुशब्दो भक्षणार्थे, इक्षोस्तद्भक्षणेच्छया । इक्ष्वाकुर्भगवानेतद्वंश्याश्चैक्ष्वाकवः स्मृताः ॥ ६५ ॥

एवं च–इक्ष्वाकुवंशजा ज्ञेया, जिना द्वाविंशतिर्बुधैः । हरिवंशसमुद्भूतौ, श्रीनेमिमुनिसुव्रतौ ॥ ६६ ॥
तदा च दम्पती कौचिद्विमुच्य सुतनन्दने । तालस्याधः प्राविशतां, क्रीडायै कदलीगृहम् ॥ ६७ ॥
तालतः पतता पक्वफलेन तनयो मृतः । अकालमृत्युराद्योऽत्रावसर्पिण्यामभूदयम् ॥ ६८ ॥
अवशिष्टां ततः पुत्रीं, प्रतिपाल्य दिवं[1] गतौ । युग्मिनौ दम्पती स्वल्पकषायौ तौ शुभाशयौ ॥ ६९ ॥
अथात्यन्तोत्कृष्टरूपां, कन्यामेकाकिनीमिमाम् । दृष्ट्वा न्यवेदयन् युग्ममनुजा नाभयेऽन्यदा ॥ ७० ॥
भविष्यति सुनन्देयं, ऋषभस्य परिग्रहः । इति प्रज्ञाप्य तान् सर्वान्, नाभिरादृतवानिमाम् ॥ ७१ ॥
अथ भोगसमर्थं तं, विज्ञाय जगदीश्वरम् । अकार्षीद्धरिरागत्य, तत्पाणिग्रहणोत्सवम् ॥ ७२ ॥
विधिं वरोचितं सर्वमकार्षीत्तत्र वासवः । कन्योचितं द्वयोः कन्योः, शच्योऽकार्षुः प्रमोदतः ॥ ७३ ॥
ताभ्यां च सह भुञ्जाने, विविधान् विषयान् विभौ । षट्स्वतीतेषु लक्षेषु, पूर्वाणां जन्मकालतः ॥ ७४ ॥
पञ्चमानुत्तराच्च्युत्वा, पीठो बाहुश्च युग्मजौ । जातौ सुमङ्गलादेव्यां, ब्राह्मीभरतसंज्ञकौ ॥ ७५ ॥
महापीठः सुबाहुश्च, सुनंदाकुक्षिसंभवौ । सुंदरीबाहुबल्याख्यावभूतां च सुतासुतौ ॥ ७६ ॥
ततः सुमङ्गलैकोनपञ्चाशतमसूत च । पुनर्युग्मानि पुत्राणां, फलानीव द्युसल्लता ॥ ७७ ॥
शतमेवं च पुत्राणा–मभूत्पुत्रीद्वयं प्रभोः । नमिश्च विनमिश्चेति, परौ क्रोडीकृतौ सुतौ ॥ ७८ ॥
युग्मिनां कलहे जातु रीत्या पूर्वोक्तयोत्थिते । निवेदयन्ति तत्सर्वं, ज्ञात्वा ज्ञानाधिकं प्रभुम् ॥ ७९ ॥
प्रभुरप्याह राजैव, निवारयति दुर्नयात् । स चाभिषिक्तः सर्वेषामैश्वर्यादुरतिक्रमः ॥ ८० ॥
स राजाऽस्माकमप्यस्तु, तैरित्युक्तेऽवदत्प्रभुः । नत्वा नाभिं कुलकरं, याचध्वं भूपमीप्सितम् ॥ ८१ ॥
तैर्विज्ञप्तोऽवदन्नाभिर्भूयाद्वृषभ एव वः । राजेति तेऽभिषेकार्थं, यावद्गच्छन्ति वारिणे ॥ ८२ ॥
तावत्कम्प्रासनः शक्रोऽभ्यषिञ्चद् द्रुतमागतः । राज्येऽर्हन्तं धृतच्छत्रं, रत्नसिंहासनस्थितम् ॥ ८३ ॥
अथाम्भः पूर्णनलिनीपत्रभाजनपाणयः । आगस्तास्ते प्रभुं दृष्ट्वा, सर्वालङ्करभासुरम् ॥ ८४ ॥
विस्मिता मुदिताश्चान्तरुत्कण्ठासंभृता अपि । उद्यद्विवेकास्तैर्नीरैः, प्रभोरस्नपयन् पदौ ॥ ८५ ॥

तथाऽऽह धनपालः परमार्हतः—धन्ना सविम्हयं जेहिं झत्ति कयरज्जमज्जणो हरिणा ।
चिरधरियनलिणिपत्ताभिसेअसलिलेहिं दिट्ठो सि" ॥

विनयेन ततस्तेषां, संतुष्टो वासवो भृशम् । विनीतां नगरीमेषां, निवासार्थमरीरचत् ॥ ८६ ॥
अस्याः स्वरूपं चैवमाहुः—
श्रीविभो राज्यसमये, शक्रादेशान्नवां पुरीम् । धनदः स्थापयामास, रत्नचामीकरोत्करैः ॥ ८७ ॥

---

१ यद्यप्यत्र मातापित्रोर्जीवतोस्तनयस्य स्वर्गम इति कथनं, अन्यत्र तथा व्यक्तेरभावेऽपि मातापितरयोरुपरतयोः तथात्वसूचनं अन्ययौगलिकैर्निवेदनात्, उभयथापि मातापितरयोर्मृत्योरनन्तरं निवेदने न विरोधः ।

द्वादशयोजनायामा, नवयोजनविस्तृता । अष्टद्वारा महाशाला, साऽऽभवत्तोरणोज्ज्वला ॥ ८८ ॥
धनुषां द्वादश शतान्युच्चैस्त्वेऽष्टशतं तले । व्यायामे शतमेकं स, व्यधाद्धप्रं सखातिकम् ॥ ८९ ॥
सौवर्णस्य च तस्योर्ध्वं, कपिशीर्षावलिर्बभौ । मणिजाऽमरशैलस्थनक्षत्रालिरिवोद्गता ॥ ९० ॥
चतुरस्राश्च त्र्यस्राश्च, वृत्ताश्च स्वस्तिकास्तथा । मन्दाराः सर्वतोभद्रा, एकभूमा द्विभूमकाः ॥ ९१ ॥
त्रिभूमाद्यां सप्तभूमं, यावत्सामान्यभूभुजाम् । प्रासादाः कोटिशस्तत्राभूवन् रत्नसुवर्णजाः ॥ ९२ ॥
दिश्यैशान्यां सप्तभूमं चतुरस्रं हिरण्मयम् । सवप्रख्यातिकं चक्रे, प्रासादं नाभिभूपतेः ॥ ९३ ॥
दिश्यैंद्र्यां सर्वतोभद्रं, सप्तभूमं महोन्नतम् । वर्त्तुलं भरतेशस्य, प्रासादं धनदोऽकरोत् ॥ ९४ ॥
आग्नेय्यां भरतस्येव, सौधं बाहुबलेरभूत् । शेषाणां च कुमाराणामन्तरा ह्यभवंस्तयोः ॥ ९५ ॥
तस्यान्तराऽऽदिदेवस्य, चैकविंशतिभूमिकम् । त्रैलोक्यविभ्रमाह्वानं, प्रासादं रत्नराजिभिः ॥ ९६ ॥
सवप्रख्यातिकं रम्यं, सुवर्णकलशावृतम् । चञ्चद्ध्वजपटव्याजान्नृत्यन्तं निर्ममे हरिः ॥ ९७ ॥
अष्टोत्तरसहस्रेण, मणिजालैरसौ बभौ । तावत्संख्यैर्मुखैर्भूरि, ब्रुवाण इव तद्यशः ॥ ९८ ॥
कल्पद्रुमैर्वृताः सर्वेऽभूवन् सेभहयौकसः । सप्राकारा बृहद्दासःपताकामालभारिणः ॥ ९९ ॥
सुधर्मसदृशी चारुरत्नमय्यभवत्पुरः । युगादिदेवप्रासादात्, सभा सर्वप्रभाभिधा ॥ १०० ॥
चतुर्दिक्षु व्यराजन्त, मणितोरणमालिकाः । पञ्चवर्णप्रभाङ्कूरपूरडम्बरिताम्बराः ॥ १०१ ॥
अष्टौत्तर सहस्रेण, मणिबिम्बैर्विभूषितम् । गव्यूतिद्वयमुत्तुङ्गं, मणिरत्नहिरण्मयम् ॥ १०२ ॥
नानाभूमिगवाक्षाढ्यं, विचित्रमणिवेदिकम् । प्रासादं जगदीशस्य, व्यधाच्छ्रीदः पुरान्तरा ॥ २०३ ॥
सामन्तमण्डलीकानां, नन्द्यावर्त्तादयः शुभाः । प्रासादा निर्मितास्तत्र, विचित्रा विश्वकर्मणा ॥ १०४ ॥
अष्टोत्तरसहस्रं तु, जिनानां भवनान्यभुः । उच्चैर्ध्वजाग्रसंक्षुब्धतीक्ष्णांशुतुरगाण्यधः ॥ १०५ ॥
चतुष्पथप्रतिबद्धाश्चतुरशीतिरुच्चकैः । प्रासादाश्चार्हतां रम्या, हिरण्यकलशैर्बभुः ॥ १०६ ॥
सौधानि हिरण्यरत्नमयान्युच्चैः सुमेरुवत् । कौबेर्यां सपताकानि, चक्रे स व्यवहारिणाम् ॥ १०७ ॥
दक्षिणस्यां क्षत्रियाणां, सौधानि विविधानि च । अभूवन् शस्त्रागाराणि, तेजांसीव निवासिनां ॥ १०८ ॥
तद्बहिश्चतुर्दिक्षु, पौराणां सौधकोटयः । व्यराजन्त द्युसद्मानसमानविशदश्रियः ॥ १०९ ॥
सामान्यकारुकाणां च, बहिः प्राकारतोऽभवन् । कोटिसंख्याश्चतुर्दिक्षु, गृहाः सर्वधनाश्रयाः ॥ ११० ॥
अपाच्यां च प्रतीच्यां च, कारुकाणां बभुर्गृहाः । एकभूममुखास्त्र्यस्रास्त्रिभूमिं यावदुच्छ्रिताः ॥ १११ ॥
अहोरात्रेण निर्माय, तां पुरीं धनदोऽकिरत् । हिरण्यरत्नधान्यानि, वासांस्याभरणानि च ॥ ११२ ॥
सरांसि वापिकूपादीन्, दीर्घिकादेवतालयान् । अन्यच्च सर्वं तत्राहोरात्रेण धनदोऽकरोत् ॥ ११३ ॥
विपिनानि चतुर्दिक्षु, सिद्धार्थश्रीनिवासके । पुष्पाकरं नन्दनं चाभवन् भूयांसि चान्यतः ॥ ११४ ॥

प्रत्येकं हेमचैत्यानि, जिनानां तत्र रेजिरे । पवनाहृतपुष्पाणि, पूजितानि द्रुमैरपि ॥ ११५ ॥
प्राच्यामष्टापदोऽपाच्यां, हेमशैलो महोन्नतः । प्रतीच्यां सुरशैलस्तु, कौबेर्यामुदयाचलः ॥ ११६ ॥
तत्रैवमभवन् शैलाः, कल्पवृक्षाऽऽलिमालिताः । मणिरत्नाकराः प्रौच्चैर्जिनावासपवित्रिताः ॥ ११७ ॥
शक्राज्ञया रत्नमयीमयोध्यां परनामतः । विनीतां सुरराजस्य, पुरीमिव स निर्ममे ॥ ११८ ॥
यद्वास्तव्यजना देवे, गुरौ धर्मे च सादराः । स्थैर्यादिभिर्गुणैर्युक्ताः, सत्यशौचदयान्विताः ॥ ११९ ॥
कलाकलापकुशलाः, सत्सङ्गतिरताः सदा । विशदाः शान्तसद्भावा, अहमिन्द्रा महोदयाः ॥ १२० ॥
तत्पुर्यामृषभः स्वामी, सुरासुरनरार्चितः । जगत्सृष्टिकरो राज्यं, पाति विश्वस्य रक्षनात् ॥ १२१ ॥
अन्वयोध्यमिह क्षेत्रपुराण्यासन् समन्ततः । विश्वसृष्ट्वाशिल्पिवृन्दघटितानि तदुक्तिभिः ॥ १२२ ॥
विंशतौ पूर्वलक्षेषु, गतेषु जनिकालतः । तत्रैवं हरिणा राज्येऽभिषिक्तो वृषभः प्रभुः ॥ १२३ ॥
कुर्वन्नश्वगजादीनां, संग्रहं सुस्थितां स्थितिम् । राजस्य सकलां चक्रे, न्यायाध्वनि पूरस्सरः ॥ १२४ ॥
प्रभुणा दर्शितेष्वेवं, मूलशिल्पेषु पञ्चसु । प्रावर्त्तन्त शिल्पशतं–कर्माण्यपि ततः परम् ॥ १२५ ॥
तद्व्यक्तिस्तु प्राग्दर्शिता ।
प्रावर्त्ततान्नपाकादिराहारविषयो विधिः । शिल्पं घटादि कृष्यादिकर्माणि वचसा प्रभोः ॥ १२६ ॥
नानारत्नाद्यलङ्कारैः, प्रभोर्देहविभूषणाम् । दृष्ट्वा देवैः कृतां लोके, प्रावर्त्तत विभूषणा ॥ १२७ ॥
ब्राह्म्या दक्षिणहस्तेन, दर्शिता लिपयोऽखिलाः । एकद्व्यादि च संख्यानं, सुंदर्या वामपाणिना ॥ १२८ ॥
काष्टपुस्तादिकर्मैवं, भरतस्योपदर्शितम् । दर्शितं बाहुबलिने, स्त्रीनराश्वादिलक्षणम् ॥ १२९ ॥
वस्तूनां मानमुन्मानमुपमानं तथाऽपरम् । प्रमाणं गणितं चेति, पञ्चकं व्यवहारकृत् ॥ १३० ॥
मानं द्विधा धान्यमानं, रसमानं तथाऽपरम् । धान्यमानं सेतिकादि, कर्षादि च रसस्य तत् ॥ १३१ ॥
पूगीफलादेर्गण्यस्योन्मानं संख्यानुमानतः । सहस्रं नालिकेराणां, पुञ्जेऽस्मिन्निति कल्पना ॥ १३२ ॥
उपमानं च तौल्येन, पलादिपरिभावनम् । हस्तदण्डादिना भूमिवस्त्रादेर्वा मितिः स्फुटा ॥ १३३ ॥
इयद्वर्णमिदं स्वर्णमियत्पानीयकं त्विदं । रत्नमित्यादि प्रमाणं, गणितं प्राग्निरूपितम् ॥ १३४ ॥
प्रोतं दवरके मण्यादीनां सम्यग् निवेशनम् । समुद्रादौ च बोहित्थवाहनं पोतमूचिरे ॥ १३५ ॥
व्यवहारो विसंवादे, गत्वा राजकुलादिषु । न्यायस्य निश्चयो यद्वा, वस्तूनां क्रयविक्रयौ ॥ १३६ ॥
नीतिः सामादिका युद्धं, बाहुयुद्धाद्यनेकधा । इषुशास्त्रं धुनुर्वेदो, राजादीनां च सेवना ॥ १३७ ॥
वैद्यशास्त्रं नीतिशास्त्रं, बन्धनं निगडादिभिः । मारणं नागपूजाद्या, यज्ञा ऐन्द्रादयो महाः ॥ १३८ ॥
मेलको गोष्ठिकादीनां, पूर्ग्रामादिपरिग्रहः । प्रयोजनविशेषेण, ग्रामादिजनसंगमः ॥ १३९ ॥
एषु किञ्चिज्जिने राज्यं, भुञ्जानेऽजायत क्रमात् । किञ्चिच्च भरते किञ्चित्, प्रावर्त्तत तदन्वपि ॥ १४० ॥

स्वयं त्वदर्शयत्सर्वाः, कलाः शिल्पानि च प्रभुः । तेषामनेकभेदत्वं, ततस्तेने जनः क्रमात् ॥ १४१ ॥
स्वस्तिकादिमङ्गलानि, रक्षादिकौतुकानि च । प्रभोः कृतानि देवैः प्राक्, प्रावर्त्तन्त ततो जने ॥ १४२ ॥
केशवस्त्राद्यलंकारैर्दृष्ट्वा देवैरलङ्कृतम् । जगदीशं परेऽप्येवं, कुर्वन्ति स्म जना भुवि ॥ १४३ ॥
चूलाकर्मादि बालानां, तिथिधिष्ण्यादिसौष्ठवे । लेखशालोपनयनं, प्रावर्त्तत विभोर्गिरा ॥ १४४ ॥
प्रभोरिन्द्रकृतं दृष्ट्वा, विवाहस्य महोत्सवम् । लोका अपि तथा चक्रुः, पाणिग्रहणमङ्गलम् ॥ १४५ ॥
युग्मिधर्मनिषेधाय, भरताय ददौ प्रभुः । सोदर्यां बाहुबलिनः, सुदर्शां गुणसुंदरीम् ॥ १४६ ॥
भरतस्य च सोदर्यां, ददौ ब्राह्मीं जगत्प्रभुः । भूपाय बाहुबलिने, तदादि जनताऽप्यथ ॥ १४७ ॥
भिन्नगोत्रादिकां कन्यां, दत्तां पित्रादिभिर्मुदा । विधिनोपायत प्रायः, प्रावर्त्तत तथा ततः ॥ १४८ ॥
एवं च पालयामास, तद्राज्यं वृषभो नृपः । त्रिषष्टिं पूर्वलक्षाणि, प्रीणितप्राणिमण्डलः ॥ १४९ ॥
त्र्यशीतौ पूर्वलक्षेषु, गतेष्वेवं च जन्मतः । व्यतरद्वार्षिकं दानं, जिघृक्षुः संयमं प्रभुः ॥ १५० ॥
ददतं वार्षिकं दानं, दृष्ट्वा च जगदीश्वरम् । प्रावर्त्तत जनोऽप्येवं, दानं दातुं यथाविधि ॥ १५१ ॥
एवं च धनरत्नादिदानं प्रावर्त्तत क्षितौ । अद्यापि तत एवेदमविच्छिन्नं प्रवर्त्तते ॥ १५२ ॥
विभज्यादाज्जिनो राज्यशतं पुत्रशताय च । ततः पिता स्वपुत्रेभ्यो, दद्यादित्यभवत् स्थितिः ॥ १५३ ॥
प्रवर्द्धमानवैराग्यः, संप्राप्तः पश्चिमं वयः । सुदर्शनाख्यां शिबिकामारूढः ससुरासुरः ॥ १५४ ॥
कृतषष्ठतपा उग्रभोगादीनां सहस्रकैः । चतुर्भिः सार्द्धमागत्य, विनीतायाः पुरो बहिः ॥ १५५ ॥
स सिद्धार्थवनोद्याने, तलेऽशोकमहातरोः । चक्रे लोचं चतुर्मुष्टिमपराह्णे जगत्प्रभुः ॥ १५६ ॥
स्वर्णवर्णां स शृङ्गस्थां, केशमुष्टिं च पञ्चमीम् । रक्ष शक्रविज्ञप्त्या, दक्षो दाक्षिण्यसेवधिः ॥ १५७ ॥
अनुप्रव्रजितास्तेऽपि, स्वामिमार्गानुगामिनः । अरक्षन् पञ्चमीं केशमुष्टिं स्कंधोपरिस्थिताम् ॥ १५८ ॥
चैत्रस्य श्यामलाष्टम्यामेवमात्तव्रतः प्रभुः । विजहार क्षितावङ्गीकृतमौनाद्यभिग्रहः ॥ १५९ ॥
तदानीं च न जानाति, लोको भिक्षा नु कीदृशी ? । कीदृशाः खलु भिक्षाकाः ?, दीयते सा कथं कदा ? ॥ १६० ॥
अनुप्रव्रजितास्तेऽथ, कच्छाद्याः क्षुत्तृडर्दिताः । पृच्छन्ति भोजनोपायं, प्रभुं प्रणतमौलयः ॥ १६१ ॥
अजल्पति प्रभौ नित्यं, क्षुद्व्यथामसहिष्णवः । गंतुं गृहेऽनुचितमित्यभूवंस्तापसा वने ॥ १६२ ॥
अगृह्णन्नबुधैर्लोकैर्दीयमानं धनादिकम् । हस्तिनागपुरं प्रापा–ब्देन क्ष्मां विहरन् विभुः ॥ १६३ ॥
स्वामी किञ्चिन्न लातीति, श्रुत्वा जनमहारवम् । दृष्ट्वा च प्रभुनेपथ्यं, श्रेयांसाख्यो नृपात्मजः ॥ १६४ ॥
जातजातिस्मृतिश्चत्ते, चिन्तयामासिवानिति । अहो प्रभुर्यतीभूतः, किं कुर्वीत धनादिभिः ? ॥ १६५ ॥
भवादहं तृतीयेऽस्मात्स्वामिनश्चक्रवर्त्तिनः । सारथिः सार्द्धमेतेनाभूवं पालितसंयमः ॥ १६६ ॥
नवकोटिविशुद्धं तद्भोज्यमस्योपयुज्यते । कर्मक्षयसहायस्य, साधोर्देहस्य धारकम् ॥ १६७ ॥

घटमिक्षुरसस्यैकं, केनचित्प्राभृतीकृतम् । तदा भगवते सोऽदान्निर्दोषं विशदाशयः ॥ १६८ ॥

अत्र चावश्यकचूर्णावेक इक्षुरसघट उक्तः,

पद्मानन्दकाव्यहैमऋषभचरित्रयोस्तु (भक्तामरवृत्तावपि) ते बहव उक्ताः सन्तीति ज्ञेयं[1] ।

पाणिभ्यां च गृहीत्वा तं, प्रभुः पाणिपतद्ग्रहः । वार्षिकीं पारणां चक्रे, बिन्दुमप्यकिरन् भुवि ॥ १६९ ॥

यतः—"माइज्ज घडसहस्सा, अहवा माइज्ज सागरा सव्वे । जस्से आरिसलद्धी, सो पाणिपडिग्गही होइ" ॥

पञ्चदिव्यान्यजायन्त, प्रससार यशो भुवि । श्रेयांसोपक्रमं पात्रदानं प्रावर्त्तते क्षितौ ॥ १७० ॥

तथोक्तमावश्यकनिर्युक्तौ— [श्लोक ३१९] "संवच्छरेण लद्धा भिक्खा उसहेण लोगनाहेण ।
सेसेहिं बीअदिवसे लद्धाउ पढमभिक्खाउ" ॥ अत्र यद्यपि— राधशुक्लतृतीयायां, दानमासीद्यदक्षयम् ।
पर्वाक्षयतृतीयेति, तदद्यापि प्रवर्त्तते ॥

इति शत्रुञ्जयमाहात्म्यवचनात्, चैत्रकृष्णाष्टम्या अक्षयतृतीयायां साधिकमासाधिकं वर्षं[2] स्यात्तथापि किञ्चिदाधिक्यस्याविवक्षया वर्षमुक्तमिति संभाव्यते, अत एव भक्तामरवृत्तावुक्तं—
"साधिकवर्षं चतुसृषु दिक्षु बहल्यादिमण्डलानि विभुः । व्यहरद् मुक्ताहारो मुनिभिक्षा-
मूर्खमनुजवशात्" ॥

सहस्रमेकं वर्षाणां, विजहार क्षितावितिं । प्रमादकालस्तत्राहोरात्रं संकलितोऽभवत् ॥ १७१ ॥

शाखापुरे विनीतायाः, पुरिमतालसंज्ञके । उद्याने शकटमुखे, न्यग्रोधस्य तरोस्तले ॥ १७२ ॥

विहिताष्टमभक्तस्योत्पेदे केवलमुज्ज्वलम् । फाल्गुने श्यामैकादश्यां, पूर्वाह्णे ध्यानशुद्धितः ॥ १७३ ॥

तदा च मरुदेवाम्बा, साकं भरतचक्रिणा । गजारूढा प्रभुं नन्तुमागच्छन्ती शिवं ययौ ॥ १७४ ॥

एतस्यामवसर्पिण्यां, सिद्धोऽयं प्रथमोऽभवत् । अन्तर्मुहूर्त्तमात्रेण, प्रभोः केवललाभतः ॥ १७५ ॥

मरुदेवाशरीरं च, देवैः सत्कृत्य संस्कृतम् । प्रावर्त्तन्त ततो लोके, शबसत्कृतिसंस्क्रियाः ॥ १७६ ॥

एवं च—

आदितस्तद्भवेऽष्टानां, निर्वृता मातरोऽर्हताम् । अष्टाष्टौ स्वर्गताः शेषास्तृतीयतुर्ययोः क्रमात् ॥ १७७ ॥

नाभिर्नागकुमारेऽगात्सप्ताष्टाष्टौ ततः क्रमात् । द्वितीयादिषु नाकेषु, त्रिष्वगुः पितरोऽर्हताम् ॥ १७८ ॥

इति प्रवचनसारोद्धाराद्यभिप्रायः, जितशत्रुसुमित्रविजयौ दीक्षितौ सिद्धौ इति तूत्तराध्ययनदीपिकायां. 'जितुशत्रुर्ययौ मुक्तिं सुमित्रस्त्रिदिवं गतः' इति योगशास्त्रवृत्तौ, 'तृप्तो न पुत्रैः सगर' इति श्लोकवृत्तौ. श्रीवीरमातापित्रोस्तु श्रीआचाराङ्गे[3] द्वादशदेवलोकेऽपि गतिरुक्तेति ज्ञेयं.

---

१ यद्यपि जात्यपेक्षया स्वादेकत्वं परमुपयोग एकस्यैव, तावदाहारस्यौचित्यात्, बहुघटोक्तिस्तु निमन्त्रणापेक्षया ।

२ अभिवार्धितेऽप्याधिक्यात् ।

३ सामान्यतया सर्वकालमपेक्ष्य प्रवचनसारोद्धारोक्तं, आचारांगोक्तं योगशास्त्रोक्तं च विशेषेण, यद्वा भाव्युपचारेण योगार्थेन च समाधानं ।

शतानि पञ्च पुत्राणां, सप्त नप्तृशतानि च । भरतस्याद्यसमवसरणे प्राव्रजन् प्रभोः ॥ १७९ ॥
अष्टापदाद्रौ समवसृते च श्रीजिनेऽन्यदा । भरतोऽढौकयद्भोज्यमनसां पञ्चभिः शतैः ॥ १८० ॥
राजपिण्डोऽभ्याहृतश्च, न यतिग्रहणोचितः । इत्युक्ते स्वामिना खिन्नो, भरतोऽथ हरिस्तदा ॥ १८१ ॥
पप्रच्छावग्रहं प्रोचे, भगवांस्तं च पञ्चधा । इंद्रस्य चक्रिणो राज्ञो, गृहेशस्य सधर्मणः ॥ १८२ ॥
बाध्यते पूर्वपूर्वोऽयमग्र्याग्र्येण यथोत्तरम् । यथेन्द्रावग्रहश्चक्र्यवग्रहेणेह बाध्यते ॥ १८३ ॥
अथ शक्रो विहरतां, श्रमणानामवग्रहम् । अनुजज्ञे ततस्तुष्टो, भरतोऽपि तथाऽकरोत् ॥ १८४ ॥
पप्रच्छ भरतोऽथेन्द्रं, रूपं कीदृगकृत्रिमम् । भवतां ? वर्णिकायै चाङ्गुलीमेषोऽप्यदीदृशत् ॥ १८५ ॥
अष्टाहिकोत्सवं चक्रे, मुदितो भरतस्ततः । ध्वजोत्सवः प्रववृते, स एवेन्द्रमहोत्सवः ॥ १८६ ॥
आहारेणोपनीतेनामुनाऽथ विदधामि किम् । अवादीद्भरतेनेति, पृष्टः स्पष्टं सुरेश्वरः ॥ १८७ ॥
गुणाधिकेभ्यः श्राद्धेभ्यः, श्रद्धया दीयतामिति । भरतः श्रावकान् भक्त्याहूतेत्यूचे कृताञ्जलिः ॥ १८८ ॥
अतः परं भवद्भिर्मे, गृहे भोक्तव्यमिच्छया । कार्यं न कार्यं कृष्यादि, भोज्योपार्जनहेतवे ॥ १८९ ॥
आसितव्यं सदा स्वस्थैः, शास्त्रस्वाध्यायतत्परैः । मह्यं वाच्यश्चोपदेशः, समक्षं सङ्गतावितिं ॥ १९० ॥
जितो भवान् वर्द्धते च, भयं मा हन तन्नृप ! । ततस्तेऽपि तथा चक्रुर्निश्चिन्ताः सद्व्रतस्पृशः ॥ १९१ ॥
सुखसागरमग्नत्वात्प्रमत्तो भरतोऽप्यथ । वचांसि तेषामाकर्ण्य, चेतस्येवं व्यचिन्तयत् ॥ १९२ ॥
एते वदन्ति किं ? हन्त, जितोऽहं कैर्भयं च किम् ? । आः कषायैर्निर्जितोऽहमेभ्य एवैधते भयम् ॥ १९३ ॥
एवं विबोध्यमानस्तैर्भरतेशोंतराऽन्तरा । संवेगं याति कर्माणि, श्लथानि कुरुते ततः ॥ १९४ ॥
यथेच्छमप्रयासेन, भोक्तव्यमिति भूरिशः । ख्यापयन्तः श्रावकं स्वमभूवन् भोजनार्थिनः ॥ १९५ ॥
ततश्च तावतां भोज्यमुपस्कर्तुमनीश्वराः । व्यजिज्ञपन्नरेंद्राय, सूदास्ते विनयानताः ॥ १९६ ॥
न विद्मो जनबाहुल्यात्कः श्राद्धोऽत्र ? परश्च कः ? । ततश्चेत्यादिशद्राजा, भोज्यास्ते प्रश्नपूर्वकम् ॥ १९७ ॥
अप्राक्षुस्तेऽथ चेद्यूयं, श्रावकास्तर्हि कथ्यताम् । कः श्राद्धधर्मः ? किं तत्त्वत्रयं ? रत्नत्रयं च किम् ? ॥ १९८ ॥
अजानतो निराकृत्य, जानतस्तांश्च चक्रभृत् । रत्नेन काकिणीनाम्ना, चक्रे रेखात्रयाङ्कितान् ॥ १९९ ॥
षष्ठे षष्ठे च मास्येवं, तत्परीक्षां नृपोऽकरोत् । ततस्ते माहना जाताः, पर्यन्तात्तमहाव्रताः ॥ २०० ॥
स्वसुतांस्ते च साधुभ्यो, दत्तवन्तो महाशयाः । अभूवन् श्रावकोत्तंसाः, संयमाप्रभविष्णवः ॥ २०१ ॥
तीर्थङ्कस्तुतिप्रायान्, श्राद्धधर्मनिरूपकान् । कृत्वाऽऽर्यान् भरतो वेदान्, तेभ्योऽदात्पाठहेतवे ॥ २०२ ॥
अथैतांश्चक्रिमान्यत्वात्मन्यते स्म जनोऽखिलः । दानं च पात्रबुद्ध्याऽदाद्, द्रव्यवस्त्रगृहादिकम् ॥ २०३ ॥
देवप्रतिष्ठोद्वाहादि, यद्धर्म्यं यच्च लौकिकम् । तत्तदेतान् पुरस्कृत्य, गृहिकार्यं जनोऽकरोत् ॥ २०४ ॥
इत्यष्टौ पुरुषान् यावदादित्ययशआदिकान् । अभवन्मान्यता तेषां, भोजनं च नृपालये ॥ २०५ ॥

तत्रादित्ययशाः कुर्वन्, षष्ठे मासि परीक्षणम् । चकार काकिणीरत्नाभावाच्चिह्नं सुवर्णजम् ॥ २०६ ॥
महायशः प्रभृतयः, केचिद्रूप्यमयं ततः । पट्टसूत्रमयं केचित्ततः सूत्रमयं परे ॥ २०७ ॥
यज्ञोपवीतमेतेषां, तदद्यापि प्रवर्त्तते । त्रितन्तुकं पूर्वरुढ्या, तत्त्वशून्यात्मनामपि ॥ २०८ ॥
साधुमार्गव्यवच्छेदादथ कालेन गच्छता । द्विजा मिथ्यात्विनोऽभूवन्, केऽप्यासन् श्रावका अपि ॥ २०९ ॥
क्रमात् पर्वतसुलसपिप्पलादादिभिः कृताः । वेदा अनार्यास्ते यज्ञजीवहिंसादिदूषिताः ॥ २१० ॥
प्रभोरभूवंश्चतुरशीतिर्गणधरोत्तमाः । पुण्डरीकप्रभृतयो, गणास्तावन्त एव च ॥ २११ ॥

कल्पसूत्रे च प्रथमगणधर ऋषभसेन इत्यभिधीयते, पुण्डरीकस्यैव नामान्तरमिदमित्यन्ये.

स्वदीक्षिताश्च चतुरशीतिः साधुसहस्रकाः । ब्राह्मीसुन्दर्यादिसाध्वी, लक्षास्तिस्रः प्रकीर्त्तिताः ॥ २१२ ॥
श्रेयांसादिश्राद्धलक्षत्रयी पञ्चसहस्रयुक् । सुभद्रादिश्राविकाणां पञ्च लक्षास्तथोपरि ॥ २१३ ॥
चतुष्पञ्चाशत्सहस्राः, केवलज्ञानिनां पुनः । स्युर्विंशतिः सहस्राणि, लोकालोकावलोकिनाम् ॥ २१४ ॥
सकलाक्षरसंयोगविच्चतुर्दशपूर्विणाम् । चतुःसहस्री संयुक्ता, पञ्चाशैः सप्तभिः शतैः ॥ २१५ ॥
अवधिज्ञानभाजां तु, सहस्राणि नवाभवन् । शता वैक्रियलब्धीनां, षट् सहस्राश्च विंशतिः ॥ २१६ ॥
मनःपर्यायभाजां च, सहस्रा द्वादशोपरि । पञ्चाशाः षट्शता ज्ञेयाः, पञ्चाशाः सप्त वा शताः ॥ २१७ ॥
वादिनां च सहस्रा द्वादशाऽध्यर्द्धाश्च षट्शताः । निर्ग्रंथानां सहस्राणि, मुक्तिं प्राप्तानि विंशतिः ॥ २१८ ॥
मुक्तिं प्राप्ताश्च साध्वीनां, चत्वारिंशत्सहस्रकाः । स्वदीक्षितापेक्षयैषा, सङ्ख्या सर्वा भवेदिह ॥ २१९ ॥
द्वाविंशतिः सहस्राणि, शतानि च नवोपरि । अनुत्तरविमानेषूत्पन्नान्यन्तिषदां प्रभोः ॥ २२० ॥
पञ्चचापशतोत्तुङ्गः, स्वर्णरुक् वृषलाञ्छनः । व्यहार्षीत्पूर्वलक्षं स, सहस्राब्दोनितं भुवि ॥ २२१ ॥
सच्छ्रीरोमकृताकारमर्हतां लाञ्छनं भवेत् । व्यक्त्योपलक्ष्यावयवं, वृषेभतुरगादिकम् ॥ २२२ ॥
वरदं चाक्षमालां चापसव्यकरयोर्दधत् । मातुलिङ्गं पाशकं च, बिभ्रद्वामकरद्वये ॥ २२३ ॥
यक्षः श्रीगोमुखः स्वर्णवर्णाङ्गो गजवाहनः । चतुर्भुजो जयत्यादिदेवसेवकवत्सलः ॥ २२४ ॥
वामे धनुर्वज्रचक्राङ्कुशान् पाणिचतुष्टये । दक्षिणे वरदं बाणं, चक्रं पाशं च बिभ्रती ॥ २२५ ॥
देवी चक्रेश्वरी नाम्नाऽप्रतिचक्रा मतांतरे । जयत्यष्टभुजा तार्क्ष्यवाहना कनकद्युतिः ॥ २२६ ॥
पूर्वाणां लक्षमित्येकं, श्रामण्यं परिपाल्य सः । अष्टापदं महाशैलं, जगाम विहरन् विभुः ॥ २२७ ॥
तत्रोत्तमानगाराणां सहस्रैर्दशभिः सह । विधायानशनं षड्भिरुपवासैरपानकैः ॥ २२८ ॥
माघासितत्रयोदश्यां, धिष्ण्ये चाभिजिदाह्वये । पूर्वाह्णे प्राप पर्यङ्कासनस्थः परमं पदम् ॥ २२९ ॥
ततः पूर्वोक्तविधिना, शक्राद्यैः समहोत्सवम् । प्रभोः कृतेऽङ्गसंस्कारे, गृहीतेषु च सक्थिषु ॥ २३० ॥
चक्रिरे भस्मना तेन, तिलकानि नृपादयः । ततः शेषा यथालाभं, भस्ममिश्रमृदादिभिः ॥ २३१ ॥

अत्र चितादिस्वरूपमेवमावश्यकवृत्तौ हारिभद्र्यां—पूर्वेण भगवतश्चिता वृत्ता, दक्षिणेनेक्ष्वाकूणां चिता त्र्यस्रा, अपरेण शेषसाधुचिता चतुरस्रा, ततोऽग्निकुमारा वदनैः खल्वग्निं प्रक्षिप्तवंतस्ततो लोकेऽग्निमुखा देवा इति प्रसिद्धमित्यादि । [श्लो. ४३५ टीका]

प्रभोश्चिताग्निमसकृद्याचिता माहनैः सुराः । आहुस्तान् याचकांस्ते च, तथैव प्रथिता भुवि ॥ २३२ ॥
सदाऽनिर्वाणमग्निं तं, धृत्वा कुण्डेषु वेश्मसु । त्रिसंध्यं पूजयन्तस्ते, संजाता आहिताग्नयः ॥ २३३ ॥
अर्हदैक्ष्वाकान्यसाधुचितात्रयसमुद्भवः । त्रिविधोऽग्निः कष्टपापहरोऽभूदग्निहोत्रिणाम् ॥ २३४ ॥
अथ वार्द्धकिरत्नेन, भरतस्तत्र पर्वते । अचीकरज्जिनगृहं, गव्यूतत्रितयोच्छ्रितम् ॥ २३५ ॥
योजनायामतदर्द्धविष्कम्भं तच्चतुर्मुखम् । चतुर्विंशत्यर्हदर्चा, मानवर्णान्विता दधौ ॥ २३६ ॥
तस्मिन् सिंहनिषद्याख्ये, प्रासादे भरतेश्वरः । अकारयज्जिनार्चानां, प्रतिष्ठां मुनिपुङ्गवैः ॥ २३७ ॥
भ्रातॄणां नवनवतेः, प्रतिमामात्मनोऽपि च । तथा स्तूपशतं तत्र, चितास्थानेष्वरीरचत् ॥ २३८ ॥
नवनवतेर्भ्रातॄणामेकं स्तूपं जगद्गुरोः । मा कार्षीत्कश्चिदाक्रामन्नेतदाशातनामिति ॥ २३९ ॥
संतक्ष्य दण्डरत्नेन, परितोऽष्टापदं गिरिम् । अष्टौ योजनमानास्तन्मेखलाः स व्यरीरचत् ॥ २४० ॥
चक्रे लोहमयान् यन्त्रपुरुषान् द्वारपालकान् । ततः क्रमेण सगरात्मजैर्वंश्यानुरागतः ॥ २४१ ॥
कृताऽत्र दण्डरत्नेन, परिखा दिव्यशक्तिना । भगीरथेन सा गङ्गाजलौघैः पूरिता ततः ॥ २४२ ॥
अथ प्रकृतं—पुत्रपौत्रादिका शिष्यप्रशिष्याद्येति च द्विधा । नाभेयस्य भगवतोऽभवत्पट्टपरम्परा ॥ २४३ ॥
तत्र शिष्यप्रशिष्यादिपारम्पर्यव्यपेक्षया । पट्टाधिपाः प्रभोः संख्यातीताः प्रापुः परं पदम् ॥ २४४ ॥
आदित्ययशआदीनां, या तु निर्वाणपद्धतिः । सर्वार्थसिद्धांतरिता, नन्दिसूत्रादिषूदिता ॥ २४५ ॥
साऽपेक्ष्य पुत्रपौत्रादीन्, पट्टेशान् कोशलापतीन् । प्रतिलोमानुलोमादिस्तत्रैवं सिद्धदण्डिका ॥ २४६ ॥
पट्टे वृषभदेवस्य, प्रथमं भरतेश्वरः । आदर्शगृहसंप्राप्तकेवलो निर्वृतिं ययौ ॥ २४७ ॥
ततो राजाऽऽदित्ययशास्ततो राजा महायशाः । ततश्चातिबलो राजा, ततो राजा महाबलः ॥ २४८ ॥
तेजोवीर्यः कीर्तिवीर्यो, दण्डवीर्यो महीपतिः । जलवीर्यश्चेति भूपाः, ख्याता वृषभवंशजाः ॥ २४९ ॥

अयं स्थानाङ्गाभिप्रायेण नामक्रमः, आवश्यके तु—"राया आइच्चजसे महाजसे अतिबले य बलभद्दे । बलविरिय कित्तिविरिए जलविरिए दंडविरिए य" ॥

इह चान्यथात्वमेकस्यापि नामांतरभावाद्गाथानुलोम्याच्च संभाव्यत इति स्थानाङ्गवृत्तौ ।

एभिरेवाष्टभिर्मौलावधारि मुकुटः प्रभोः । वोढुं नाशक्यतान्यैस्तु, क्रमाद्धीनवपुर्बलैः ॥ २५० ॥
भुक्त्वैते भरतार्द्धस्य, राज्यमादर्शसद्मनि । केवलं प्राप्य प्रपन्नमुनिवेषाः शिवं ययुः ॥ २५१ ॥
एवं निरन्तरं सिद्धिं, ययुर्लक्षाश्चतुर्दश । ततः सर्वार्थसिद्धेऽगादेकस्तस्यान्वये नृपः ॥ २५२ ॥

पुनर्निरन्तरं जग्मुः, सिद्धिं लक्षाश्चतुर्दश । एकसर्वार्थसिद्धिऽगात् पुनरेवमिति क्रमः ॥ २५३ ॥
तावद्यावदसंख्याः स्युर्नृपाः सर्वार्थसिद्धिगाः । चतुर्दशचतुर्दशलक्षव्यवहिता अपि ॥ २५४ ॥
ततः पुनर्ययुर्मुक्तिं नृपलक्षाश्चतुर्दश । द्वौ च सर्वार्थसिद्धेऽथ, मुक्तिं लक्षाश्चतुर्दश ॥ २५५ ॥
भूयः सर्वार्थसिद्धे द्वौ, मुक्तौ लक्षाश्चतुर्दश । यावच्च द्विकसंख्याका, असंख्येया भवन्ति ते ॥ २५६ ॥
एवमन्तरिता लक्षैश्चतुर्दशभिरन्तरा । निरन्तरं नृपवरैर्गच्छद्भिः पदमव्ययम् ॥ २५७ ॥
स्युः प्रत्येकमसंख्येया, एवं त्रिचतुरादयः । पञ्चाशदन्ताः सर्वार्थसिद्धिं प्राप्ता महाशयाः ॥ २५८ ॥

उक्तं च–"चउदसलक्खा सिद्धा, निवईणेक्को य होइ सव्वट्ठे । एवं एक्कट्ठाणे पुरिसजुगा होंतऽसंखेज्जा ॥पुणरवि चोद्दसलक्खा, सिद्धा निवईण दोवि सव्वट्ठे । दुगठाणेवि असंखा पुरिसजुगा होंति नायव्वा ॥जाव य लक्खा चोद्दस सिद्धा पन्नास होंति सव्वट्ठे । पन्नासट्ठाणे वि हु पुरिसजुगा होंतऽसंखेज्जा" ॥ [सिद्धिदण्डिकास्तवस्य संग्रह गाथा १, २, ३]

अनुलोमा भवेत्सिद्धदण्डिकेयमितोऽन्यथा । रीत्याऽनयैव भवति, विलोमा सिद्धदण्डिका ॥ २५९ ॥
तथाहि–सर्वार्थसिद्धे प्रथमं, ययुर्लक्षाश्चतुर्दश । तत एकोऽगमत्सिद्धिं, पुनर्लक्षाश्चतुर्दश ॥ २६० ॥
सर्वार्थं जग्मुरेवं च, स्युरेकैकेऽप्यसंख्यकाः । मुक्ताश्चतुर्दश चतुर्दशलक्षकृतान्तराः ॥ २६१ ॥
एवं पञ्चाशदन्तानां, विमुक्तानां निरंतरम् । स्यात्प्रत्येकमसङ्ख्यानां, विलोमा सिद्धदण्डिका ॥ २६२ ॥

उक्तं च–"विवरीयं सव्वट्ठे चउदसलक्खाउ निक्खुओ एगो । सच्चेव य परिवाडी पन्नासा जाव सिद्धीए" ॥

मुक्तौ सर्वार्थसिद्धे च, द्वे द्वे लक्षे निरन्तरम् । ययुस्ते समसङ्ख्याका, एवं त्रिचतुरादयः ॥ २६३ ॥
यावल्लक्षा असङ्ख्येयाः, स्युस्तुल्या उभयोरपि । समसङ्ख्या भवेत्सिद्धदण्डिकेयं तृतीयिका ॥ २६४ ॥

उक्तं च–"तेण परं दुदुलक्खाइ दो दो ठाणाइ समग वच्चंति । सिवगइसव्वट्ठेहिं इणमो तेंसि विहा होई ॥ दो लक्खा सिद्धीए दो लक्खा नत्थईण सव्वट्ठे । एवं तिलक्ख चउ पञ्च जाव लक्खा असंखिज्जा" ॥ [सिद्धिदण्डिकायाः संग्रहगाथा ४]

ततश्चित्रान्तराः ख्याताश्चतस्रः सिद्धदण्डिकाः । एकादिरेकाभ्यधिका, तत्राद्या सिद्धदण्डिका ॥ २६५ ॥
एकादिद्व्युत्तराऽन्या स्यादेकादिस्त्र्युत्तरा परा । स्यात्सिद्धदण्डिका तुर्या, द्वित्र्यादिविषमोत्तरा ॥ २६६ ॥
आदावेको ययौ मुक्तिं, द्वौ सर्वार्थेषु जग्मतुः । ततस्त्रयो ययुर्मुक्तिं, सर्वार्थेऽथ चतुष्टयम् ॥ २६७ ॥
इत्येकोत्तरया वृद्ध्या, मुक्तिसर्वार्थसिद्धयोः । तावद्राच्या असङ्ख्येयाः, स्युर्यावत्ते द्वयोरपि ॥ २६८ ॥
इयमेकोत्तरैकादिः स्याच्चित्रान्तरदण्डिका । द्वितीया द्व्युत्तरैकादिः, साऽप्येवं परिभाव्यते ॥ २६९ ॥
आदावेको ययौ मुक्तिं, सर्वार्थे च ततस्त्रयः । ततो मुक्तौ ययुः पञ्च, सर्वार्थे सप्त ते ययुः ॥ २७० ॥
एवं द्व्युत्तरया वृद्ध्या, मुक्तिसर्वार्थसिद्धयोः । यावद्भवन्त्यसङ्ख्येयास्तावद्राच्या द्वयोरपि ॥ २७१ ॥

एकस्ततः परं मुक्तौ, सर्वार्थे च चतुष्टयम् । मुक्तौ जग्मुस्ततः सप्त, सर्वार्थे च ततो दश ॥ २७२ ॥
एवं त्र्युत्तरया वृद्ध्याऽसङ्ख्येयाः स्युर्द्वयोरपि । तृतीया त्र्युत्तरैकादिः, स्याच्चित्रान्तरदण्डिका ॥ २७३ ॥
चतुर्थी च विचित्रा स्यात्तस्याः पूर्वमहर्षिभिः । उपायोऽयं वक्ष्यमाणः, परिज्ञानाय दर्शितः ॥ २७४ ॥
एक ऊर्द्ध्वमधश्चैकः, पुनरूर्द्ध्वमधः पुनः । ऊर्द्ध्वाधः परिपाट्यैवमेकोनत्रिंशतं त्रिकान् ॥ २७५ ॥
स्थापयेत्प्रथमे चात्र, प्रक्षिपेन्नैव किञ्चन । प्रक्षेपाः स्युः क्रमादेते, द्वितीयादित्रिकेषु तु ॥ २७६ ॥

"दुग पण नवगं तेरस, सत्तरस दुवीस छच्च अट्ठेव । बारस चउदस तह अट्ठवीस छव्वीस पणवीसा ॥ एक्कारस तेवीसा सीयाला सत्तरि सत्तहत्तरिया । इग दुग सत्तासीई इगहत्तरि मेव बावट्ठी ॥ अउणत्तरि चउवीसा छायाल सयं तहेव छव्वीसा । एए किर पक्खेवा बीअतिगाईसु अणुक्कमसो "॥ [सिद्धिदण्डिकास्तव गाथा ९, १०, ११]

क्षेपेष्वमीषु क्षिप्तेषु, यद्रूपाः स्युस्त्रिका इमे । क्रमात्तावन्तस्तावन्तः, सिद्धिसर्वार्थसिद्धयोः ॥ २७७ ॥
त्रयो मुक्तौ ततः पञ्च, सर्वार्थेऽष्टौ ततः शिवे । ततो द्वादश सर्वार्थे, ततः षोडश निर्वृतौ ॥ २७८ ॥
इत्येवमेकोनत्रिंशत्तमे, स्थाने ययुः शिवम् । एकोनत्रिंशदेषाऽऽद्या, विषमोत्तरदण्डिका ॥ २७९ ॥

उक्तं च–"सिवगइसव्वट्ठेहिं दो दो ठाणा विसमुत्तरा नेया । जाव उणतीसठाणे गुणतीसं पुण छवीसाए" ॥ अत्र जावेत्यादि यावदेकोनत्रिंशत्तमे स्थाने त्रिकरूपे षड्विंशतौ प्रक्षिप्तायामेकोनत्रिंशद्भवन्ति ।

ततो भवेद् द्वितीयेह, विषमोत्तरदण्डिका । पूर्वाचार्योदिताम्नायात्, श्रूयतां सा विभाव्यते ॥ २८० ॥
प्रथमाया दण्डिकाया, अङ्कस्थानं यदन्तिमम् । एकोनत्रिंशतं वारान्, तल्लिखित्वा यथाक्रमम् ॥ २८१ ॥
प्राग्वदाद्यं परित्यज्य, द्वितीयादिपदेषु च । प्रागुक्तक्षेपकक्षेपे, सङ्ख्या भवति यावती ॥ २८२ ॥
तावन्तः सर्वार्थसिद्धसिद्ध्योर्ज्ञेया यथाक्रमम् । एवं भवन्त्यसंख्येया, विषमोत्तरदण्डिकाः ॥ २८३ ॥
आद्यायामादिमं स्थानं, निर्वाणगतसूचकम् । द्वितीयायां दण्डिकायां, सर्वार्थगतसूचकम् ॥ २८४ ॥
तृतीयायां दण्डिकायां, पुनर्मुक्तिनिरूपकम् । चतुर्थ्यां चादिमं स्थानं, पुनः सर्वार्थसूचकम् ॥ २८५ ॥
द्वितीयायां यथैकोनत्रिंशद्रूपेऽङ्के क्रमात् । एकोनत्रिंशत वारान्, लिखिते क्षेपकेषु च ॥ २८६ ॥
पूर्वोक्तेषु योजितेषु, सर्वार्थसिद्धमोक्षयोः । गतानां जायते संख्या, सा चैवं भाव्यते क्रमात् ॥ २८७ ॥
एकोनत्रिंशदत्रादौ, सर्वार्थे प्रययुस्ततः । एकत्रिंशद्ययुः सिद्धिं, द्विकक्षेपकयोगतः ॥ २८८ ॥
सर्वार्थे च चतुस्त्रिंशदष्टात्रिंशत्ततः शिवे । पर्यन्ते पञ्चपञ्चाशत्, सर्वार्थेऽत्र ययुर्नृपाः ॥ २८९ ॥
एकोनत्रिंशतं वारान्, पञ्चपञ्चाशतं न्यसेत् । पूर्वोक्तक्षेपकक्षेपाद्भाव्या तृतीयदण्डिका ॥ २९० ॥

क्षेपकास्तु सर्वास्वपि दण्डिकासु 'दुगपणनवगं' इत्यादयः पूर्वोक्ता एव ज्ञेयाः ।

भाव्या एवमसङ्ख्येया, विषमोत्तरदण्डिकाः । तावद्यावत्समुत्पन्नः, पिता श्रीअजितार्हतः ॥ २९१ ॥

उक्तं च– "विसमुत्तराए पढमा, एवमसङ्ख्या विसमुत्तरा नेया । सव्वत्थवि अंतिल्लं अन्नाए आइमं ठाणं ॥ अउणत्तीसं वारा ठावेउं नत्थि पढमि उक्खेवो । सेसे अडवीसाए सव्वत्थ दुगाइओ खेवो ॥ सिवगइपढमादीए बीयाए तह य होइ सव्वट्ठे । इय एगंतरियाए सिवगइसव्वट्ठठाणाइं ॥ एवमसंखिज्जाओ चित्तंतरगंडिया मुणेयव्वा । जाव जिअसत्तुराया अजिअजिणपिआ समुप्पन्नो" ॥

एवं–सर्वार्थसिद्धनिर्वाणे, विहायान्यगतिष्विति । ययौ न पट्टभृत्कोऽपि, वंशे श्रीवृषभप्रभोः ॥ २९२ ॥
सर्वार्थसिद्धशब्दोऽत्र, रूढोऽनुत्तरपञ्चके । अवकाशो भवत्यत्रैतावतामन्यथा कथम् ॥ २९३ ॥

उक्तं च–"सर्वार्थशब्देन पञ्चानुत्तरविमानानि लभ्यन्त इति सिद्धदण्डिकास्तोत्रावचूर्णौ" । एवं च–

अनुलोमा १ विलोमा २ च, समसङ्ख्या ३ ततः परा । एकद्वित्र्युत्तरा ६ एकादिकाः स्युर्विषमोत्तराः ॥ २९४ ॥
एताश्च सप्तधा सिद्धदण्डिकाः पूर्वमुक्तवान् । चक्रिणः सगराख्यस्य, सुबुद्धिः सचिवाग्रणीः ॥ २९५ ॥
अष्टापदाद्रियात्रार्थं, गतैः सगरनन्दनैः । गतिं वृषभवंश्यानां, पृष्ट ऐतिह्यकोविदः ॥ २९६ ॥
एवं च– स नवाशीतिपक्षेषु, पञ्चाशल्लक्षकोटिषु । द्वासप्ततिपूर्वलक्षन्यूनेषु जलधिष्विह ॥ २९७ ॥
अतिक्रान्तेषु वृषभप्रभोर्निर्वाणकालतः । अजायत जिनः श्रीमानजितो जितकल्मषः ॥ २९८ ॥
अजायन्तारके तुर्ये, निर्वृते त्वजितप्रभौ । परिपूर्णाः पयोधीनां, पञ्चाशल्लक्षकोटयः ॥ २९९ ॥
जम्बूद्वीपे पुराऽत्रैव, प्राग्विदेहविभूषणे । वत्साख्ये विजये शीतानद्या याम्यतटस्थिते ॥ ३०० ॥
सुसीमायामभूत्पुर्यां, राजा विमलवाहनः । प्रवव्राजारिदमनगुरोः पार्श्वे स शुद्धधीः ॥ ३०१ ॥
मृत्वोत्पन्नश्च विजयविमानेऽमृतभुक्तया । त्रयस्त्रिंशत्सागरायुर्भुक्त्वाऽभूदजितो जिनः ॥ ३०२ ॥
पूरयोध्या कोशलेषु, जितशत्रुः प्रभोः पिता । विजया जननी शशिर्वृषो हस्ती च लाञ्छनम् ॥ ३०३ ॥
राधशुक्लत्रयोदश्यां, माघेऽष्टम्यां सितत्विषि । माघे नवम्यां पौषे चैकादश्यां विमलद्युतौ ॥ ३०४ ॥
चैत्रस्य शुक्लपञ्चम्यां, पञ्च कल्याणकान्यथ । चतुर्षु रोहिणी भं स्यान्मृगशीर्षं च पञ्चमे ॥ ३०५ ॥
सर्वेषां च्यवनं स्वर्गाज्जायते जन्म चार्हताम् । अर्द्धरात्र एव वेलानैयत्यं न व्रतादिषु ॥ ३०६ ॥
अहोभिः पञ्चभिर्न्यूना, मासा गर्भस्थितौ नव । ततः कृतजनानन्दं जन्माभूदजितप्रभोः ॥ ३०७ ॥
द्वासप्तत्या पूर्वलक्षैरधिके तेजसाऽधिकः । शेषे तुर्यारकस्यार्द्धे, जातोऽसौ जगदीश्वरः ॥ ३०८ ॥

अत्र तुर्यारकस्यार्द्धे द्वाचत्वारिंशद्वर्षसहस्रोनपञ्चाशल्लक्षकोटिसागरोपममानमवसेयं ।

रागाद्यैर्न जितो यस्माद्गर्भस्थे वा प्रभौ प्रसूः । द्यूते यन्न जिता पत्या, ततोऽभूदजिताभिधः ॥ ३०९ ॥
अष्टादश पूर्वलक्षाः, कौमार्यमभवत्प्रभोः । त्रिपञ्चाशत्पूर्वलक्षाः, सपूर्वाङ्गा नरेन्द्रता ॥ ३१० ॥
धनुःशतानि सार्द्धानि, चत्वारि वपुरुच्छ्रयः । सुप्रभाख्या च शिबिका, व्रतकालेऽभवत्प्रभोः ॥ ३११ ॥
ब्रह्मदत्तगृहेऽयोध्यापुरे प्रथमपारणा । छाद्मस्थ्यं द्वादशाब्दानि, ज्ञानं सप्तच्छदे तरौ ॥ ३१२ ॥

सपूर्वाङ्गः पूर्वलक्षा, गृहे स्थित्वैकसप्ततिम् । पूर्वाङ्गोनं पूर्वलक्षमेकं संयमितां दधौ ॥ ३१३ ॥
द्वासप्ततिं पूर्वलक्षाण्यायुः सर्वमपालयत् । अभूवन् पञ्चनवतिः, प्रभोर्गणधरोत्तमाः ॥ ३१४ ॥
स्वदीक्षितानां साधूनां, लक्षमेकमभूत्प्रभोः । तिस्रो लक्षाश्च साध्वीनां, सहस्रैस्त्रिंशताऽधिकाः ॥ ३१५ ॥
त्रिलक्षी द्विसहस्रोना, श्राद्धानां श्राविकाः पुनः । पञ्च लक्षाः पञ्चचत्वारिंशत्सहस्रकाधिकाः ॥ ३१६ ॥
विंशतिश्च सहस्राणि, केवलज्ञानिनां प्रभोः । द्वाविंशतिः सहस्राणि, ते निर्दिष्टा मतान्तरे ॥ ३१७ ॥
मनोविदां सहस्रा द्वादशाऽऽढ्याः पञ्चभिः शतैः । सार्द्धैर्वाऽवधिभाजां तु, स्युश्चतुर्नवतिः शताः ॥ ३१८ ॥
सप्तत्रिंशच्छता विंशाः, स्युश्चतुर्दशपूर्विणाम् । विंशतिर्वैक्रियवतां, सहस्राः सचतुःशताः ॥ ३१९ ॥
सहस्रा द्वादश चतुःशताढ्य वादिनां मताः । प्रत्येकबुद्धा विज्ञेयाः, स्वशिष्यसमसंख्यकाः ॥ ३२० ॥
एवं सर्वेषामपि ज्ञेयं ।
सिंहसेनाभिधः श्रीमान्, गणभृत्प्रथमः प्रभोः । तथा प्रवर्त्तनी फल्गुः, सगरो भक्तभूपतिः ॥ ३२१ ॥
वरदं मुद्गरं चाक्षसूत्रं पाशं च दक्षिणे । दोष्णां चतुष्टये बिभ्रद्, वामे करचतुष्टये ॥ ३२२ ॥
बीजपूरं चाभयं चाङ्कुशं शक्तिं समुद्वहन् । महायक्षाभिधो यक्षः, श्यामवर्णश्चतुर्मुखः ॥ ३२३ ॥
करीन्द्रवाहनोऽष्टाभिर्भुजैः पात्यष्ट दिग्गजान् । द्वितीयस्याऽद्वितीयस्य, प्रभोश्चरणसेवकान् ॥ ३२४ ॥
दधाना दक्षिणे पाणिद्वये वरदपाशकौ । बीजपूराङ्कुशौ वामे, गौरवर्णा चतुर्भुजा ॥ ३२५ ॥
लोहासनाधिरूढा च, नाम्नाऽजितबला सुरी । अजितप्रभुभक्तानां, कम्रा दिशति संपदः ॥ ३२६ ॥
इति श्रीअजितः ।
जम्बूद्वीपे प्राग्विदेहे, विजये रमणीयके । पुर्यां शुभायां विपुलबलोऽभूद्भूपतिः पुरा ॥ ३२७ ॥
ग्रैवेयके सप्तमेऽभूत्संभ्रान्तगुरुदीक्षितः । सैकोनत्रिंशदब्ध्यायुस्त्रिदशोऽथ च्युतस्ततः ॥ ३२८ ॥
कुणालदेशे श्रावस्त्यां, जितारिनृपतेः सुतः । अभूत्सेनाकुक्षिरत्नं, तृतीयः सम्भवो जिनः ॥ ३२९ ॥
फाल्गुनस्याष्टमी शुक्ला, शुक्ला सहचतुर्दशी । मार्गशीर्षस्य राका च, कार्तिकासितपञ्चमी ॥ ३३० ॥
चैत्रस्य पञ्चमी शुक्ला, कल्याणतिथयः प्रभोः । चतुर्षु मृगशीर्षं भद्रार्द्रा भवति पञ्चमे ॥ ३३१ ॥
मासा नवदिनैः षड्भिरधिका गरभस्थितिः । तुरगो लाञ्छनं राशिः, प्रभोर्मिथुनसंज्ञकः ॥ ३३२ ॥
ऊनैः षष्ट्या पूर्वलक्षैस्त्रिंशता लक्षकोटिभिः । वार्द्धीनां श्रीमदजितनिर्वाणाच्छम्भवोऽभवत् ॥ ३३३ ॥
युक्ताः षष्ट्या पूर्वलक्षैर्विंशतिर्लक्षकोटयः । तुर्यारकस्याशिष्यन्त, वार्द्धीनां प्रभुजन्मनि ॥ ३३४ ॥
सर्वेषामर्हतां जन्मन्युक्तस्तुर्यारकस्य यः । शेषः स स्वायुषा हीनः, शेषो भवति निर्वृतौ ॥ ३३५ ॥
स्वाम्यभूत्संभवो नाम्ना, शुभातिशयसम्भवात् । उत्पन्ने वा प्रभौ भूमौ, भूरिशस्यसमुद्भवात् ॥ ३३६ ॥
पूर्वलक्षाः पञ्चदश, कुमारत्वेऽवसत्प्रभुः । राज्ये चतुश्चत्वारिंशच्चतुः पूर्वाङ्गसाधिकाः ॥ ३३७ ॥

धनुःशतानि चत्वारि, स्युः प्रभोर्वपुरुच्छ्रये । सिद्धार्था शिबिकाऽब्दानि, छाद्मस्थ्येऽस्य चतुर्दश ॥ ३३८ ॥
सुरेन्द्रदत्तः श्रावस्त्यां, दाता प्रथमपारणे । तले सालतरोर्ज्ञानं, प्रादुरासास्य पञ्चमम् ॥ ३३९ ॥
चतुःपूर्वाङ्गोनमेकं पूर्वलक्षं च साधुता । षष्टिश्च पूर्वलक्षाणि, सर्वमायुः प्रकीर्त्तितम् ॥ ३४० ॥
द्व्याढ्यं शतं गणभृतो, द्वे लक्षे साधवः स्मृताः । लक्षत्रयं च साध्वीनां, सषट्त्रिंशत्सहस्रकम् ॥ ३४१ ॥
लक्षद्वयं त्रिनवतिः, सहस्राः श्रावकाः प्रभोः । षड् लक्षाणि सहस्राश्च, षट्त्रिंशत् श्राविकाः स्मृताः ॥ ३४२ ॥
सहस्राणि पञ्चदश, केवलज्ञानशालिनाम् । सहस्रा द्वादश शतं, सार्द्धं मानसवेदिनाम् ॥ ३४३ ॥
नवावधिज्ञानभाजां, सहस्राः षट्शताधिकाः । द्वे सहस्रे शतं सार्द्धं, स्युश्चतुर्दश पूर्विणः ॥ ३४४ ॥
वादिनां द्वादश सहस्रास्तथा वैक्रियस्पृशाम् । एकोनविंशतिः साष्टशताः स्युः सत्सहस्रकाः ॥ ३४५ ॥
चारुर्गणभृन्मुख्यः, प्रभोः श्यामा प्रवर्तिनी । सदा भक्तो महीपालोऽमितसेनः प्रकीर्त्तितः ॥ ३४६ ॥
दक्षिणे नकुलं दामाभयं बिभ्रत्करत्रये । मातुलिङ्गं नागमक्षसूत्रं वामे करत्रये ॥ ३४७ ॥
त्रिनेत्रस्त्रिमुखः श्यामवर्णो बर्हिणवाहनः । षड्भुजस्त्रिमुखो जीयात्त्रिमुखो नाम यक्षराट् ॥ ३४८ ॥
वरदं चाक्षसूत्रं च, दक्षिणे करयामले । वामे फलं चाभयं च, दधानेति चतुर्भुजा ॥ ३४९ ॥
दुरितारिर्गौरवर्णा, कल्याणं मेषवाहना । सदा ददाति भव्यानां, संभवप्रभुसेविनाम् ॥ ३५० ॥

इति श्रीसंभवः ।

जम्बूद्वीपे प्राग्विदेहे, विजयो मङ्गलावती । तत्र रत्नसञ्चयायां, पुर्यां राजा महाबलः ॥ ३५१ ॥
स चादाय परिव्रज्यां, गुरोर्विमलवाहनात् । जयन्तेऽभूत्त्रयस्त्रिंसत्पयोधिस्थितिकः सुरः ॥ ३५२ ॥
ततोऽयोध्यामहापुर्यां, देशे कोशलनामनि । सिद्धार्थासंवरक्ष्माभृत्सुतोऽभूदभिनन्दनः ॥ ३५३ ॥
शुक्ल चतुर्थी वैशाखे, माघे शुक्ला द्वितीयिका । शुक्लैव द्वादशी माघे, पौषे शुक्ला चतुर्दशी ॥ ३५४ ॥
शुक्लाष्टमी च वैशाखे, कल्याणतिथयः प्रभोः । चतुर्षु धिष्ण्यमादित्यं, पञ्चमे पुष्यमेव च ॥ ३५५ ॥

आवश्यके तु– [श्लो. २४२] 'पोसेऽसुद्धचउद्दसि अभीइमभिनंदणजिणस्स त्ति' ज्ञानकल्याणकदिनं दृश्यते, न चेयं शुद्ध चतुर्दश्येव भाविनीति वाच्यं, तस्या अभीचियोगासंभवात्पौषशुद्धचतुर्दश्यां हि पुनर्वस्वोरेव प्रायो योगः संभवेदिति[1] ।

अष्टौ मासा दिनान्यष्टाविंशतिर्गरभस्थितिः । वानरो लाञ्छनं राशिर्मिथुनाख्योऽभवत्प्रभोः ॥ ३५६ ॥
पञ्चाशत्पूर्वलक्षोनैर्दशभिर्लक्षकोटिभिः । सागरैर्भगवांस्तुर्योऽभवत्संभवमोक्षतः ॥ ३५७ ॥
सपञ्चाशत्पूर्वलक्षा, दशाब्धिलक्षकोटयः । अशिष्यन्त प्रभोर्जन्मकाले तुर्यारकस्य च ॥ ३५८ ॥
यतोऽभिनन्द्यते शक्रैः, स्तूयते गर्भगोऽप्यतः । अभिनन्दननामाभूद्यद्वा विश्वप्रमोदकृत् ॥ ३५९ ॥

---

१ युगमध्ये पौषमासस्य वृद्धिभावात् द्वितीयपौषशुद्धचतुर्दश्यामभिजित् स्यात् न वेति ज्योतिर्विदः प्रमाणं ।

लक्षा द्वादश पूर्वाणां, सार्द्धाः कौमार्यमष्ट च । पूर्वाङ्गन्यथ षट्त्रिंशल्लक्षाः सार्द्धाश्च राजता ॥ ३६० ॥
पूर्वाङ्गैरष्टभिर्न्यूनं, पूर्वलक्षं च साधुता । पञ्चाशत्पूर्वलक्षाणि, सर्वमायुः प्रकीर्त्तितम् ॥ ३६१ ॥
धनुःशतत्रयं सार्द्धं, प्रज्ञप्तो वपुरुच्छ्रयः । अभिनन्दनदेवस्याभिनन्दितशिवश्रियः ॥ ३६२ ॥
व्रतेऽर्थसिद्धा शिबिका, प्रथमं पारणं प्रभोः । अयोध्यायामिन्द्रदत्तमन्दिरे समजायत ॥ ३६३ ॥
छद्मस्थकालो विज्ञेयो, वर्षाण्यष्टादश प्रभोः । ज्ञानद्रुमः प्रियालः स्यात्, षोडशं गणिनां शतम् ॥ ३६४ ॥
लक्षास्तिस्रो भगवतः, संयतानां महात्मनाम् । षड्लक्षाः संयतीनां च, सहस्रैस्त्रिंशताऽधिकाः ॥ ३६५ ॥
अष्टाशीतिः सहस्राणि, श्राद्धा लक्षद्वयं तथा । श्राविकाणां पञ्चलक्षाः, सहस्राः सप्तविंशतिः ॥ ३६६ ॥
चतुर्दश सहस्राणि, केवलज्ञानशालिनाम् । एकादश सहस्राः षट्, शताः सार्द्धा मनोविदाम् ॥ ३६७ ॥
अवधिज्ञानिनामष्टानवतिः स्युः शतानि च । शतानि पञ्चदश च, स्युश्चतुर्दशपूर्विणाम् ॥ ३६८ ॥
सवैक्रियाणामेकोनविंशतिः स्युः सहस्रकाः । एकादश सहस्राणि, वादिनामभवन् विभोः ॥ ३६९ ॥
वज्रनाभो गणधरः, प्रथमः प्रथितः प्रभोः । प्रवर्त्तिन्यजिता मित्रवीर्या भक्तनृपोऽभवत् ॥ ३७० ॥
मातुलिङ्गाक्षसूत्राढ्यापसव्यकरयामलः । नकुलाङ्कुशयुग्वामकरयुग्मश्चतुर्भुजः ॥ ३७१ ॥
ईश्वराख्यो यक्षराजः, श्यामाङ्गो गजवाहनः । अभिनन्दनभक्तानां, करोति कुशलं सदा ॥ ३७२ ॥
बिभ्रती वरदं पाशमपसव्ये करद्वये । वामे नागाङ्कुशौश्यामकायकान्तिश्चतुर्भुजा ॥ ३७३ ॥
पद्मासना सुरी काली, नाम्ना धाम्नाऽतिभासुरा । वितनोति श्रियां नन्दिमभिनन्दनसेविनाम् ॥ ६७४ ॥

इति श्रीअभिनन्दनः ।

विजये पुष्कलावत्यां, घातकीखण्डमण्डने । प्राग्विदेहेषु विदिता, नगरी पुण्डरीकिणी ॥ ३७५ ॥
एवं श्रीवासुपूज्यान्ता, जिना अष्टौ विचक्षणैः । उत्पन्नाः प्राग्विदेहेषु, ज्ञेयाः प्राक्तनजन्मनि ॥ ३७६ ॥
अभूदतिबलस्तत्र, राजा स्वीकृत्य स व्रतम् । सीमन्धरगुरोः पार्श्वे, जयन्ते निर्जरोऽभवत् ॥ ३७७ ॥
स्थितिं तत्र त्रयस्त्रिंशत्सागरामनुभूय च । देशेषु कोशलाख्येषु, पुरे साकेतनामनि ॥ ३७८ ॥
मेघभूपालतनयो, मङ्गलाकुक्षिसंभवः । पञ्चमः सुमतिर्नाम्ना, जिनोऽभूत्क्रौञ्चलाञ्छनः ॥ ३७९ ॥
शुक्ला द्वितीया नभसो, वैशाखस्य सिताष्टमी । तस्यैव नवमी शुक्ला, चैत्रस्यैकादशी सिता ॥ ३८० ॥
चैत्रस्य नवमी शुक्ला, कल्याणकदिनाः क्रमात् । स्याच्च्यतुर्षु मघा धिष्ण्यं, पञ्चमे च पुनर्वसुः ॥ ३८१ ॥
प्रभोर्गर्भस्थितिर्मासा, नव षड्वासराधिकाः । धनुःशतत्रयं देहोच्छ्रयो राशिर्मृगाधिपः ॥ ३८२ ॥
अभिनन्दननिर्वाणान्नवभिः कोटिलक्षकैः । चत्वारिंशत्पूर्वलक्षन्यूनैः पाथोधिभिः किल ॥ ३८३ ॥
सुमतेरभवज्जन्म, शेषे तुर्यारकस्य च । चत्वारिंशत्पूर्वलक्षाधिकेऽब्धिकोटिलक्षके ॥ ३८४ ॥
हेतोरेकस्य पुत्रस्य, सपत्न्योरुभयोरभूत् । विवाद एकदा भूयान्, मृते पत्यौ धनाशया ॥ ३८५ ॥

साक्षी न कोऽपि तत्रासीत्, पुत्रोऽपि न विवेद सः । विमातरं मातरं वा, ताभ्यां साम्येन लालितः ॥ ३८६ ॥
कुण्ठेषु निर्णये तस्मिन्नरेन्द्रसचिवादिषु । अवादीन्मङ्गला राज्ञी, तदात्वोत्पन्नया धिया ॥ ३८७ ॥
गृहसर्वस्ववत्पुत्रोऽप्येष द्वेधा विभज्यताम् । अनुमेने विमाता तन्माता प्रोचे च साश्रुदृक् ॥ ३८८ ॥
अस्या एवास्तु पुत्रोऽयं, गृहद्रव्यादिभिः सह । अस्मिंश्चिरायुषि प्राप्तं, सर्वस्वमखिलं मया ॥ ३८९ ॥
अदापयत्ततस्तस्यै, सुतं निश्चित्य मङ्गला । गर्भस्थस्य प्रभोरेवमनुभावादभून्मतिः ॥ ३९० ॥
स्वयं च शोभनमतिस्तस्मात्सुमतिसंज्ञकः । कौमारं बिभरामास, पूर्वलक्षाण्यसौ दश ॥ ३९१ ॥
एकोनत्रिंशतं स्वामी, पूर्वलक्षाण्यपालयत् । सातिरेकाणि पूर्वाङ्गै, राज्यं द्वादशभिर्भुवि ॥ ३९२ ॥
व्रतं द्वादशपूर्वाङ्गन्यूनं च पूर्वलक्षकम् । चत्वारिंशत्पूर्वलक्षाण्यायुश्छाद्म्येऽब्दविंशतिः ॥ ३९३ ॥
ज्ञानद्रुमः प्रियङ्गुः स्याद्व्रतार्थमभयङ्करा । शिबिका पारणं चाद्यं, पद्मोऽदाद्विजये पुरे ॥ ३९४ ॥
प्रभोः शतं गणभृतां, सविंशतिसहस्रकम् । लक्षत्रयं स्युर्मुनयो, गुणमाणिक्यभूभृतः ॥ ३९५ ॥
पञ्च लक्षाः संयतीनां, सहस्रैस्त्रिंशताऽधिकाः । लक्षद्वयं श्रावकाणां, सैकाशीतिसहस्रकम् ॥ ३९६ ॥
पञ्च लक्षाः श्राविकाणां, सषोडशसहस्रकाः । त्रयोदश सहस्राणि, प्रभो केवलशालिनाम् ॥ ३९७ ॥
शतैश्चतुर्भिरूद्धृयर्द्धैः, सहस्रा दश साधिकाः । मनोविदां सहस्राश्चैकादशावधिवेदिनाम् ॥ ३९८ ॥
शताश्चतुर्विंशतिश्च, स्युश्चतुर्दशपूर्विणाम् । अष्टादश वैक्रियाढ्यसहस्राः सचतुःशताः ॥ ३९९ ॥
सार्द्धैः षड्भिः शतैर्युक्ताः, सहस्रा दश वादिनाम् । चमरो गणभृन्मुख्यः, काश्यपी च प्रवर्त्तिनी ॥ ४०० ॥
मतान्तरे च निर्दिष्टाः, सहस्रा दश वादिनाम् । शतैश्चतुर्भिरूद्धृयर्द्धैरधिकाः श्रुतकोविदैः ॥ ४०१ ॥
सत्यवीर्यो नृपो भक्तो, यक्षः स्यात्तुम्बुरुः स च । चतुर्भुजः श्वेतवर्णः, श्रीमान् गरुडवाहनः ॥ ४०२ ॥
दधानो वरदं शक्तिमपसव्यकरद्वये । गदां च नागपाशं च, वामहस्तद्वयेऽदधत् ॥ ४०३ ॥
देवी भवेन्महाकाली, स्वर्णवर्णाम्बुजासना । चतुर्भुजा सवरदपाशयाम्यकरद्वया ॥ ४०४ ॥
मातुलिङ्गाङ्कुशोपेतवामहस्तद्वयाऽनिशम् । सुमतिप्रभुभक्तानां, पूरयन्ती मनोरथान् ॥ ४०५ ॥

इति श्रीसुमतिः ।

प्रागभूद्धातकीखण्डे, विजये वत्सनामनि । सुसीमायां महापुर्यां, नृपो नाम्नाऽपराजितः ॥ ४०६ ॥
सोऽभूत्प्रपद्य चारित्रं, सुगुरोः पिहिताश्रवात् । एकत्रिंशत्सागरायुर्देवो ग्रैवेयकेऽन्तिमे ॥ ४०७ ॥
वत्सदेशेषु कौशाम्ब्यां, नगर्यां धरभूपतेः । अभूत्सुतः सुसीमायां, राज्ञ्यां पद्मप्रभस्ततः ॥ ४०८ ॥
माघस्य षष्ठी कृष्णाऽथ, द्वादशी च त्रयोदशी । कार्त्तिकस्यासिता चैत्रपौर्णीमासी ततः पुनः ॥ ४०९ ॥
कृष्णा मार्गैकादशी च, कल्याणकदिनाः क्रमात् । धिष्ण्यं च पञ्चस्वप्येषु, चित्रासंज्ञकमीरितम् ॥ ४१० ॥
षड्वासराधिका मासा, नव गर्भस्थितिः प्रभोः । कन्याराशिश्च विज्ञेयो, लाञ्छनं च सरोरुहम् ॥ ४११ ॥

त्रिंशत्पूर्वलक्षहीनैर्नवत्याऽभूत्सहस्रकैः । पद्मप्रभोऽब्धिकोटीनामर्हत्सुमतिनिर्वृतेः ॥ ४१२ ॥
सहस्रा अब्धिकोटीनां, दश तुर्यारकस्य च । प्रभुजन्मन्यशिष्यन्त, सत्रिंशत्पूर्वलक्षकाः ॥ ४१३ ॥
पद्मवन्निर्मलो यस्मान्मातुर्गर्भस्थिते प्रभौ । पद्मप्रभाङ्कशय्यायां, दोहदात्तादृशाह्वयः ॥ ४१४ ॥
धनुःशतद्वयं सार्द्धं, स्वामिनो वपुरुच्छ्रयः । सार्द्धानि पूर्वलक्षाणि, सप्त ज्ञेया कुमारता ॥ ४१५ ॥
राज्यैश्वर्यं पूर्वलक्षाण्येकोनद्वयसार्द्धान्येकविंशतिम् । सातिरेकाणि पूर्वाङ्गैः, पूर्णैः षोडशभिर्दधौ ॥ ४१६ ॥
पूर्वलक्षं च पूर्वाङ्गैरूनं षोडशभिर्व्रतम् । त्रिंशत्पूर्वलक्षजीवी, मासांश्च षडकेवली ॥ ४१७ ॥
शिबिका निर्वृतिकरा, प्रथमां पारणां ददौ । ब्रह्मस्थले सोमदेवश्छद्मौघो ज्ञानपादपः ॥ ४१८ ॥
सप्तोत्तरं गणभृतां, शतं संयमिनां प्रभोः । तिस्रो लक्षाः सहस्राश्च, त्रिंशद्विमलचेतसाम् ॥ ४१९ ॥
लक्षाश्चतस्रः साध्वीनां, सहस्राणि च विंशतिः । षट्सप्ततिः सहस्राणि, द्वे लक्षे श्रावकोत्तमाः ॥ ४२० ॥
लक्षाः पञ्च सहस्राश्च, पञ्च स्युः श्राविकाः प्रभोः । सहस्रा द्वादशाभूवन्, केवलज्ञानशालिनाम् ॥ ४२१ ॥
सहस्राणि दश प्राहुस्तथा त्रीणि शतानि च । मनोविदामथ दश, सहस्राण्यवधिस्पृशाम् ॥ ४२२ ॥
शतास्त्रयोविंशतिश्च, स्युश्चतुर्दशपूर्विणाम् । सहस्राश्च नव प्रोक्ता, वादिनां षट्शताधिकाः ॥ ४२३ ॥
सहस्राः षोडश शतं, चाष्टाढ्यं वैक्रियस्पृशः । सूर्याख्यो गणभृन्मुख्यो, रतिसंज्ञा प्रवर्त्तिनी ॥ ४२४ ॥
नृपश्चाजितसेनाख्यः, प्रभुभक्तिपरायणः । यक्षश्च कुसुमो नीलवर्णो हरिणवाहनः ॥ ४२५ ॥
अभयं च फलं चायमपसव्ये करद्वये । नकुलं चाक्षसूत्रं च, धत्ते वामे चतुर्भुजः ॥ ४२६ ॥
देवी भवेदच्युताख्या, श्यामाख्येयं मतान्तरे । चतुर्भुजा श्यामवर्णा, भास्वरा नरवाहना ॥ ४२७ ॥
युक्तं वरदबाणाभ्यां, स्याद्दक्षिणकरद्वयम् । कार्मुकाभययुक्तं च, वाममस्याः करद्वयम् ॥ ४२८ ॥

इति पद्मप्रभः ।

विजये रमणीयाख्ये, धातकीखण्डमण्डने । प्राग्विदेहेषु च शुभापुर्यां नन्दनरेश्वरः ॥ ४२९ ॥
संयमं प्रतिपद्याभूत्, स चारिदमनाद्गुरोः । षष्ठे ग्रैवेयके देवोऽष्टाविंशत्यब्धिजीवितः ॥ ४३० ॥
काशीदेशे वाराणस्यां, प्रतिष्ठनृपतेस्ततः । राज्ञ्यां पृथिव्यां तनयः, श्रीसुपार्श्वजिनोऽभवत् ॥ ४३१ ॥
भाद्रमासेऽष्टमी कृष्णा, ज्येष्ठे च द्वादशी सिता । ज्येष्ठे त्रयोदशी शुक्ला, कृष्णा षष्ठी च फाल्गुने ॥ ४३२ ॥
श्यामा च सप्तमी भाद्रे, कल्याणतिथयः क्रमात् । चतुर्षु भं विशाख्या स्यादनुराधा च पञ्चमे ॥ ४३३ ॥
सैकोनविंशतिदिना, मासा गर्भस्थितिर्नव । तुलाराशिश्च विज्ञेयो, लाञ्छनं स्वस्तिकं प्रभोः ॥ ४३४ ॥
अभूत्सुपार्श्वो नवभिर्वार्द्धिकोटिसहस्रकैः । विंशतिपूर्वलक्षोनैः, श्रीपद्मप्रभमोक्षतः ॥ ४३५ ॥
सहस्रमब्धिकोटीनां, विंशत्या पूर्वलक्षकैः । अशिष्यताधिकं तुर्यारकस्य प्रभुजन्मनि ॥ ४३६ ॥
शुभपार्श्वः सुपार्श्वः स्यान्मातुर्गर्भस्थिते प्रभौ । सुपार्श्वताऽभवद्देहे, ततोऽयं तादृशाह्वयः ॥ ४३७ ॥

मातुरेवं फणशय्यास्वप्नात्प्रोक्ता: फणा: प्रभो: । एको१ वा पञ्च५ नव९ वा, संप्रदायविशारदै: ॥ ४३८ ॥

तथोक्तं सुपार्श्वचरित्रे पद्मानन्देन—फणिन्येकफणे पञ्चफणे नवफणेऽपि च । सुप्तं स्वप्ने प्रभौ गर्भस्थिते माता स्वमैक्षत ॥ पृथ्व्या स्वप्नेक्षितं तादृक् सर्पं शीर्षोपरि स्थितम् । शक्रो विचक्रे समवसरणेषु सदा विभो: ॥

पूर्वाणां पञ्च लक्षाणि, कौमार्येऽथ नरेन्द्रता । पूर्वाङ्गविंशतियुता:, पूर्वलक्षाश्चतुर्दश ॥ ४३९ ॥
एकं विंशतिपूर्वाङ्गन्यूनं च पूर्वलक्षकम् । श्रामण्यं तत्र छाद्मस्थ्यं, मासा नव विभो: स्मृता: ॥ ४४० ॥
विंशति: पूर्वलक्षाणि, सर्वमायुरभूद्विभो: । अभूच्च वपुरौन्नत्यं, विभोश्चापशतद्वयम् ॥ ४४१ ॥
मनोहरा स्याच्छिबिका, ददौ प्रथमपारणम् । महेन्द्र: पाडलीखण्डे, शिरीषो ज्ञानपादप: ॥ ४४२ ॥
गणेन्द्रा: पञ्चनवतिर्लक्षाणि त्रीणि साधव: । लक्षाश्चतस्र: साध्वीनां, सहस्रैस्त्रिंशताधिका: ॥ ४४३ ॥
सहस्रा: सप्तपञ्चाशल्लक्षे द्वे श्रावकोत्तमा: । सहस्राणि त्रिनवति:, श्राद्ध्यो लक्षचतुष्टयम् ॥ ४४४ ॥
एकादश सहस्राणि, केवलज्ञानशालिनाम् । पञ्चाशानि शतान्येकनवतिश्च मनोविदाम् ॥ ४४५ ॥
अवधिज्ञानभाजां च, सहस्रा नव कीर्त्तिता: । स्वगोचरानुसारेण, मूर्त्तद्रव्याणि पश्यताम् ॥ ४४६ ॥
सहस्रौ त्रिंशदधिकौ, द्वौ चतुर्दशपूर्विणाम् । वैक्रियाणां पञ्चदश, सहस्रास्त्रिंशताऽधिका: ॥ ४४७ ॥
स्यु: प्रभोर्वादिनामष्टौ, सहस्रा: सचतु:शता: । विदर्भा मुख्यगणभृत्प्रभो: सोमा प्रवर्त्तिनी ॥ ४४८ ॥
दानवीर्यो नृपो भक्तो, यक्षो मातङ्गसंज्ञक: । चतुर्भुजो नीलवर्ण:, श्रीमान् कुञ्जरवाहन: ॥ ४४९ ॥
स राजते बिल्वपाशयुग्दक्षिणकरद्वय: । नकुलाङ्कुशसंयुक्तवामहस्तद्वयोऽपि च ॥ ४५० ॥
जात्यचामीकरज्योतिर्गजासीना चतुर्भुजा । धत्तेऽक्षसूत्रं वरदमपसव्ये करद्वये ॥ ४५१ ॥
दधाति शूलमभयं, या च वामकरद्वये । सुपार्श्वसेविनां शान्तिं, देवी शान्ता करोतु सा ॥ ४५२ ॥

इति सुपार्श्व: ॥

श्रीवर्माख्यो नृप: पूर्वं, सौधर्मेऽभूत्सुरस्तत: । ततश्चाजितसेनाख्यो, विख्यातश्चक्रवर्त्त्यभूत् ॥ ४५३ ॥
इन्द्रस्ततोऽच्युतेऽथायं, धातकीखण्डमण्डने । विजये मङ्गलावत्यां, प्राग्विदेहविभूषणे ॥ ४५४ ॥
श्रीरत्नसंचयापुर्यां, पद्मनामा नृपोऽभवत् । युगन्धरगुरो: पार्श्वे, स प्रव्रज्यामुपाददे ॥ ४५५ ॥
वैजयन्ते विमानेऽभूत्ततो देवो महर्द्धिक: । त्रयस्त्रिंशत्सागरायुस्ततश्च्युत्वा स्थितिक्षये ॥ ४५६ ॥
पूर्वदेशे चंद्रपुर्यां महसेनमहीपते: । चन्द्रप्रभोऽभूद्भगवान्, लक्ष्मणाकुक्षिसंभव: ॥ ४५७ ॥

अत्र चंद्रप्रभजन्मपुर्या नाम 'चंदाणण त्ति' आवश्यके ।

चैत्रस्य पञ्चमी कृष्णा, पौषस्य द्वादशी शिति: । पौषफाल्गुनयो: कृष्णा, त्रयोदशी च सप्तमी ॥ ४५८ ॥
भाद्रस्य सप्तमी श्यामा, कल्याणकदिना विभो: । अनुराधा चतुर्षु स्याद्धिष्ण्यं ज्येष्ठा च पञ्चमे ॥ ४५९ ॥

प्रभोर्गर्भस्थितिर्मासा, नव सप्तदिनाधिकाः । शशभृल्लाञ्छनं राशिर्वृश्चिकाख्योऽभवत्प्रभोः ॥ ४६० ॥
वार्द्धीनां नवभिः कोटिशतैः सुपार्श्वनिर्वृतेः । अभूत्प्रभोर्जन्म दशपूर्वलक्षोनकैः किल ॥ ४६१ ॥
अधिकं दशभिः पूर्वलक्षैस्तुर्यारके तदा । शतमम्भोधिकोटीनां, शिष्यते स्मेशजन्मनि ॥ ४६२ ॥
प्रभौ गर्भगते मातुश्चन्द्रपानमनोरथात् । यद्चेन्दुसौम्यलेश्यत्वात्स्वामी चन्द्रप्रभाभिधः ॥ ४६३ ॥
पूर्वलक्षद्वयं सार्द्धं, सार्द्धाः षट् पूर्वलक्षकाः । चतुर्विंशतिपूर्वाङ्गाधिकाः कौमार्यराज्ययोः ॥ ४६४ ॥
चतुर्विंशतिपूर्वाङ्गन्यूनं च पूर्वलक्षकम् । श्रामण्यं तत्र मासानां, त्रयं छद्मस्थतास्थितिः ॥ ४६५ ॥
पूर्वाणां दश लक्षाणि, सर्वमायुरभूत्प्रभोः । धनुषां च शतं सार्द्धं, भगवद्वपुरुच्छ्रयः ॥ ४६६ ॥
मनोरमाऽऽख्या शिबिका, प्रथमां पारणां ददौ । पद्मखण्डे सोमदत्तो, नागाख्यो ज्ञानभूरुहः ॥ ४६७ ॥
गणेशाश्च त्रिनवतिरध्यर्द्धं लक्षयोर्द्वयम् । संयतानां संयतीनां, लक्षास्तिस्रस्तथोपरि ॥ ४६८ ॥
स्युरशीतिः सहस्राणि, श्राद्धा मुनिमिता मताः । पञ्चलक्षी नवसहस्रोनाश्चोपासिका मताः ॥ ४६९ ॥
सर्वज्ञानां सहस्राणि, दशाष्टौ च मनोविदाम् । अष्टावधिस्पृशां वैक्रियाढ्यानां च चतुर्दश ॥ ४७० ॥
सहस्रे द्वे भगवतः स्याच्चतुर्दशपूर्विणाम् । अभूवन् वादिनां सप्त, सहस्राः षट्शताधिकाः ॥ ४७१ ॥
दिन्नो गणधरो मुख्यः, सुमनाश्च प्रवर्त्तिनी । भक्तश्च मघवा भूमान्, यक्षः स्याद्विजयाभिधः ॥ ४७२ ॥
स च त्रिनेत्रो हरितवर्णाङ्गो हंसवाहनः । चक्रयुग्दक्षिणकरो, वामपाणौ समुद्गरः ॥ ४७३ ॥
प्रभोर्ज्वालाऽभिधा देवी, भृकुटिश्च मतान्तरे । चतुर्भुजा पीतवर्णा, वरालकाख्यवाहना ॥ ४७४ ॥
वरालको जीवविशेषः ।
सा खड्गमुद्गरौ धत्ते, हस्तयोरपसव्ययोः । फलकं परशुं चैव, सव्ययोः करपद्मयोः ॥ ४७५ ॥

इति चन्द्रप्रभः ॥

विजये पुष्कलावत्यां, प्राग्विदेहेषु पुष्करे । नगर्यां पुण्डरीकिण्यां, महापद्मोऽभवन्नृपः ॥ ४७६ ॥
स सर्वजगदानन्दगुरुपार्श्वे धृतव्रतः । एकोनविंशत्यब्ध्यायुरानते त्रिदशोऽभवत् ॥ ४७७ ॥
शून्यदेशेऽथ काकन्द्यां, पुर्यां सुग्रीवभूपतेः । रामाराज्ञीकुक्षिभवः, पुत्रोऽभूत्सुविधिर्जिनः ॥ ४७८ ॥
फाल्गुने नवमी श्यामा, कृष्णा मार्गस्य पञ्चमी । श्यामा षष्ठी च तस्यैव, तृतीया कार्तिकेऽसिता ॥ ४७९ ॥
भाद्रस्य नवमी शुक्ला, कल्याणतिथयः प्रभोः । पञ्चस्वप्येषु नक्षत्रं, मूलं राशिर्धनुर्भवेत् ॥ ४८० ॥
अष्टौ मासाः स्थितिर्गर्भे, षड्विंशतिदिनाधिकाः । मकरो लाञ्छनं देहोच्छ्रयश्च धनुषां शतम् ॥ ४८१ ॥
नवत्याम्भोधिकोटीनां, पूर्वलक्षद्वयोनया । श्रीचन्द्रप्रभनिर्वाणाज्जातः श्रीसुविधिर्जिनः ॥ ४८२ ॥
दश कोट्यः सागराणां, पूर्वलक्षद्वयाधिकाः । तुर्यारके स्म शिष्यन्ते, श्रीमत्सुविधिजन्मनि ॥ ४८३ ॥
शुभक्रियापरत्वेन, विख्यातः सुविधिः प्रभुः । माता वा गर्भकालेऽभूत्सुविधिर्यत्ततस्तथा ॥ ४८४ ॥

पञ्चाशदेव पूर्वाणां, कुमारत्वे सहस्रकाः । अष्टाविंशतिपूर्वाङ्गाधिकास्ते राज्यसंस्थितौ ॥ ४८५ ॥
अष्टाविंशतिपूर्वाङ्गन्यूनं च पूर्वलक्षकम् । व्रते छद्मस्थता तत्र, प्रभोर्मासचतुष्टयम् ॥ ४८६ ॥
पूर्वलक्षद्वयं सर्वमायुरासीज्जगत्पतेः । सूरप्रभाख्या शिबिका, मल्लिः स्याद् ज्ञानभूरुहः ॥ ४८७ ॥
पूष्याभिख्यः श्वेतपुरे, पारणां प्रथमां ददौ । अष्टाशीतिर्गणभृतो, द्वे लक्षे मुनिसत्तमाः ॥ ४८८ ॥
लक्षमेकं च साध्वीनां, सहस्राणि च विंशतिः । एकोनत्रिंशत्सहस्रा, द्वे लक्षे श्रावकोत्तमाः ॥ ४८९ ॥
श्राविकाणां चतुर्लक्षी, सहस्राण्येकसप्ततिः । केवलज्ञानभाजां स्युः, शतानि पञ्चसप्ततिः ॥ ४९० ॥
शताः पञ्चसप्ततिश्च, मनःपर्यायशालिनाम् । अवधिज्ञानिनामष्टौ, सहस्राः सचतुःशताः ॥ ४९१ ॥
शताः पञ्चदशाभूवन्, सच्चतुर्दशपूर्विणाम् । लसद्वैक्रियलब्धीनां, सहस्राणि त्रयोदश ॥ ४९२ ॥
वादिनां षट्सहस्राणि, गणी ज्येष्ठो वराहकः । प्रवर्त्तिनी वारुणीति, युद्धवीर्यो नृपोऽर्चकः ॥ ४९३ ॥
अजिताख्यो यक्षराजः, श्वेतश्रीः कूर्मवाहनः । मातुलिङ्गाक्षसूत्राढ्यवामेतरकरद्वयः ॥ ४९४ ॥
तथा च कुन्तनकुलशालिवामकरद्वयः । एवं चतुर्भुजः प्रीतिं, धत्ते सुविधिसेविनाम् ॥ ४९५ ॥
देवी सुतारा गौराङ्गी, धत्ते वृषभवाहना । अक्षसूत्रं च वरदमपसव्यकरद्वये ॥ ४९६ ॥
दधती कलशं चैवाङ्कुशं वामकरद्वये । सुविधिप्रभुभक्तानां, पिपर्त्ति द्रुतमीप्सितम् ॥ ४९७ ॥

इति सुविधिः ॥

पुष्करस्थप्राग्विदेहे, विजये वत्सनामनि । अभूत्पुर्यां सुसीमायां, पद्मनामा महीपतिः ॥ ४९८ ॥
सार्थवाहगुरोः पार्श्वे, स च स्वीकृत्य संयमम् । देवोऽभूत्प्राणतस्वर्गे, विंशत्यर्णवजीवितः ॥ ४९९ ॥
ततो मलयदेशेऽभूत्पुरे भद्दिलनामनि । श्रीशीतलो दृढरथोर्वीशनन्दात्मजो जिनः ॥ ५०० ॥
वैशाखषष्ठ्यां श्यामायां, च्युतः स्वर्गाज्जिनेश्वरः । माघस्य कृष्णद्वादश्यां, जातो दीक्षामवाप च ॥ ५०१ ॥
पौषश्यामचतुर्दश्यां, लेभे केवलमुज्ज्वलम् । राधकृष्णद्वितीयायां, प्रभुः प्रापापुनर्भवम् ॥ ५०२ ॥
पूर्वाषाढा च नक्षत्रं, कल्याणेष्वेषु पञ्चसु । नव मासा दिनैः षड्भिर्युक्ता गर्भस्थितिः प्रभोः ॥ ५०३ ॥
न्यूनाभिः पूर्वलक्षेण, नवभिर्वार्द्धिकोटिभिः । सुविधिप्रभुनिर्वाणाज्जातः श्रीशीतलो जिनः ॥ ५०४ ॥
एका कोटी सागराणां, पूर्वलक्षाधिका किल । अशिष्यतारके तुर्ये, शीतलप्रभुजन्मनि ॥ ५०५ ॥
शेषस्तुर्यारकस्योक्तो, नवानां जन्मनीह यः । स द्विचत्वारिंशदब्दसहस्रन्यून ऊह्यताम् ॥ ५०६ ॥
इतः परेषामष्टानां, यश्च जन्मनि वक्ष्यते । शेषस्तुर्यस्यारकस्य, सातिरेकः स ऊह्यताम् ॥ ५०७ ॥
सचतुरशीतिसहस्रैः, शरदां लक्षैश्च पञ्चषष्टिमितैः । अरनाथावधि विज्ञेयमन्तरमेतदेवं धियां निधिभिः ॥ ५०८॥
प्रशशाम पितुर्दाहो, गर्भस्थेशानुभावतः । नन्दाराज्ञीकरस्पर्शात्, शीतलः प्रथितस्ततः ॥ ५०९ ॥
जगत्तापहरत्वेन, भगवान् शीतलोऽथवा । अभूद्राशिर्धनुर्नामा, श्रीवत्सो लाञ्छनं प्रभोः ॥ ५१० ॥

कुमारत्वे सहस्राणि, पूर्वाणां पञ्चविंशतिः । पञ्चाशच्च सहस्राणि, पूर्वाणां राज्यवैभवम् ॥ ५११ ॥
व्रते पूर्वसहस्राणि, पूर्णानि पञ्चविंशतिः । सर्वमायुः पूर्वलक्षं, छाद्मस्थ्यं च त्रिमासिकम् ॥ ५१२ ॥
शुक्लप्रभाख्या शिबिका, प्रथमां पारणां ददौ । पुनर्वसू रिष्टपुरे, प्लक्षो ज्ञानद्रुमः प्रभोः ॥ ५१३ ॥
एकाशीतिर्गणधरा, लक्षमेकं च साधवः । आर्याः षट्काधिकं लक्षमेकं साध्व्योऽभवन् विभोः ॥ ५१४ ॥
लक्षद्वयं श्रावकाणां, नवाशीतिसहस्रयुक् । सहस्राण्यष्टपञ्चाशच्चतुर्लक्षी तथाऽऽस्तिकाः ॥ ५१५ ॥
सर्वज्ञानां सहस्राणि, सप्त चेतोविदां पुनः । सहस्राः सप्त कथिता, अधिकाः पञ्चभिः शतैः ॥ ५१६ ॥
द्विसप्ततिः शतान्यासन्नवधिज्ञानशालिनाम् । चतुर्दशपूर्वभृतां, चतुर्दश शतानि च ॥ ५१७ ॥
लसद्वैक्रियलब्धीनां, द्वादशैव सहस्रकाः । सहस्राः पञ्चसंयुक्ता, वादिनामष्टभिः शतैः ॥ ५१८ ॥
धनूंषि नवतिर्देहो, नन्दो मुख्यो गणाधिपः । प्रवर्त्तिनी च सुयशा, भक्तः सीमन्धरो नृपः ॥ ५१९ ॥
ब्रह्मा यक्षश्चतुर्वक्त्रः, श्वेतवर्णस्त्रिलोचनः । पद्मासनो दिशोऽष्टापि, पालयन्नष्टभिर्भुजैः ॥ ५२० ॥
मुद्गरं मातुलिङ्गं च, पाशकं चाभयं तथा । अपसव्ये दधात्येष, स्पष्टं पाणिचतुष्टये ॥ ५२१ ॥
नकुलं च गदामेवमङ्कुशं चाक्षसूत्रकम् । दधाति धीरधुर्योऽयं, वामे पाणिचतुष्टये ॥ ५२२ ॥
देव्यशोका नीलवर्णा, पद्मासीना चतुर्भुजा । दधाना वरदं पाशमपसव्यकरद्वये ॥ ५२३ ॥
वामपाणिद्वये चैषा, दधती फलमङ्कुशम् । शीतलप्रभुभक्तानां, वितनोति समीहितम् ॥ ५२४ ॥

इति श्रीशीतलः ॥

बभूव पुष्करद्वीपे, विजये रमणीयके । प्राग्विदेहे शुभापुर्यां, नलिनीगुल्मभूपतिः ॥ ५२५ ॥
वज्रदत्तगुरोः पार्श्वे, स स्वीकृत्य व्रतं सुधीः । देवोऽभूदच्युतस्वर्गे, द्वाविंशत्यर्णवस्थितिः ॥ ५२६ ॥
शून्यदेशे सिंहपुर्यां, प्रेयस्यां विष्णुभूपतेः । विष्णुनाम्न्यां सुतो जज्ञे, श्रेयांस इति विश्रुतः ॥ ५२७ ॥
ज्येष्ठस्य श्यामला षष्ठी, द्वादशी च त्रयोदशी । फाल्गुनस्यासिते माघमासस्य च कुहूः किल ॥ ५२८ ॥
तृतीया श्रावणे कृष्णा, कल्याणकदिनाः प्रभोः । चतुर्षु श्रवणं धिष्ण्यं, धनिष्ठा पञ्चमे पुनः ॥ ५२९ ॥
गर्भे स्थितिः प्रभोर्मासा, नव षड्वासराधिकाः । खड्गी जीवः प्रभोर्लक्ष्म, राशिर्मकरसंज्ञकः ॥ ५३० ॥
चतुरशीत्याब्दलक्षैः, पूर्वोक्ताब्दैः शतेन च । अब्धीनामूनया वार्द्धिकोट्या शीतलनिर्वृतेः ॥ ५३१ ॥
श्रेयांसस्याभवज्जन्म, तदा तुर्यारकस्य च । शिष्यते स्मार्णवशतं, स्वायुःपूर्वोक्तवर्षयुक् ॥ ५३२ ॥
शय्यामाक्रामत्सुराधिष्ठितां गर्भस्थिते प्रभौ । निर्विघ्नमम्बेत्यथवा, श्रेयस्कृतत्वात् तथाह्वयः ॥ ५३३ ॥
कुमारत्वेऽब्दलक्षाणि, निर्दिष्टान्येकविंशतिः । द्विचत्वारिंशदब्दानां, लक्षाणि राज्यवैभवे ॥ ५३४ ॥
लक्षाणि व्रतपर्याये, वर्षाणामेकविंशतिः । एवं लक्षाणि चतुरशीतिः सर्वायुराहितम् ॥ ५३५ ॥
छाद्मस्थ्यं मासयोर्युग्मं, शिबिका विमलप्रभा । सिद्धार्थाख्यपुरे नन्दः, पारणां प्रथमां ददौ ॥ ५३६ ॥

तिन्दुको ज्ञानवृक्षः स्यादशीतिधनुरुच्छ्रितम् । वपुः षट्सप्ततिश्चोक्ताः प्रभोर्गणभृतः श्रुते ॥ ५३७ ॥
प्रभोश्चतुरशीतिश्च, सहस्राणि मुमुक्षवः । लक्षमेकं च साध्वीनां, सहस्रत्रितयाधिकम् ॥ ५३८ ॥
श्राद्धा लक्षद्वयमथैकोनाशीतिः सहस्रकाः । चतुर्लक्ष्यष्टचत्वारिंशत्सहस्राण्युपासिकाः ॥ ५३९ ॥
शतानि पञ्चषष्टिश्चाभूवन्निःशेषवेदिनाम् । षट् सहस्राणि शमिनां मनःपर्यायवेदिनाम् ॥ ५४० ॥
स्फुरद्वैक्रियलब्धीनामेकादश सहस्रकाः । सहस्रा वादिनां पञ्चावधिज्ञानभृतां च षट् ॥ ५४१ ॥
सच्चतुर्दशपूर्वाणां, शतान्यासंस्त्रयोदश । कौस्तुभो मुख्यगणभृद्धारिणी च प्रवर्त्तिनी ॥ ५४२ ॥
त्रिपृष्ठवासुदेवोऽभूत्प्रभुर्भक्तनृपः प्रभोः । यक्षश्च मनुजाभिख्य, ईश्वराख्यो मतान्तरे ॥ ५४३ ॥
स त्रिनेत्रः श्वेतवर्णो, वृषारूढश्चतुर्भुजः । मातुलिङ्गगदायुक्त, सदक्षिणकरद्वयः ॥ ५४४ ॥
नकुलं चाक्षसूत्रं च, दधद्वामकरद्वये । श्रियं श्रेयांसभक्तानां, वितनोति समीहिताम् ॥ ५४५ ॥
श्रीवत्साख्या प्रभोर्देवी, मानवी वा मतान्तरे । सिंहासीना गौरवर्णा, सा निर्दिष्टा चतुर्भुजा ॥ ५४६ ॥
धत्ते दक्षिणयोः पाण्योर्वरदं मुद्गरं च सा । धत्ते च वामयोः पाण्योः, क्रमात्कलशमङ्कुशम् ॥ ५४७ ॥

इति श्रीश्रेयासः ॥

विजये मङ्गलावत्यां, पुष्करप्राग्विदेहगे । सद्रत्नसंचयापुर्यां, राजा पद्मोत्तरोऽभवत् ॥ ५४८ ॥
गुरोः श्रीवज्रनाभस्य, पार्श्वे स प्राप्य संयमम् । सुरोऽभूत्प्राणतस्वर्गे, विंशत्यर्णवजीवितः ॥ ५४९ ॥
चंपापुर्यामङ्गदेशे, वसुपूज्यमहीपतेः । राज्ञ्या जयायास्तनुजो, वासुपूज्यस्ततोऽभवत् ॥ ५५० ॥
उज्ज्वला नवमी ज्येष्ठे, भूतेष्टा फाल्गुनेऽशितिः । फाल्गुनेऽमावसी माघे, द्वितीया च समुज्ज्वला ॥ ५५१ ॥
शुक्लाऽऽषाढस्य भूतेष्टा, कल्याणकदिनाः प्रभोः । आहिर्बुध्नं पञ्चमे भं, चतुर्षु शततारिका ॥ ५५२ ॥
दिनानि विंशतिर्मासाश्चाष्टौ गर्भस्थितिः प्रभोः । राशिः कुम्भो लाञ्छनं च, महिषः किल कीर्त्तितः ॥ ५५३ ॥
पूज्यते वसुभिः शक्रैर्वासुपूज्यः स्मृतस्ततः । वसुपूज्यनृपापत्यमिति वा तादृशाह्वयः ॥ ५५४ ॥
द्विसप्तत्यब्दलक्षोनैश्चतुष्पञ्चाशताऽब्धिभिः । जन्माभूद्वासुपूज्यस्य, श्रीमच्छ्रेयांसनिर्वृतेः ॥ ५५५ ॥
षट्चत्वारिंशदब्धीनां, शेषस्तुर्यारके तदा । वेदनाग (८४) सहस्राढ्यबाणर्त्तु (६५) लक्षवर्षयुक् ॥ ५५६ ॥
अष्टादशाब्दलक्षाणि, कुमारत्वेऽवसद्विभुः । ततः प्रपेदे चारित्रं, पृथिवीशिबिकां श्रितः ॥ ५५७ ॥
चतुष्पञ्चाशदब्दानां, लक्षाणि व्रतमादधौ । द्विसप्तत्यब्दलक्षायुर्धनुस्सप्ततिमुच्छ्रितः ॥ ५५८ ॥
महापुरे सुनन्दाख्यः, प्रथमां पारणां ददौ । छाद्मस्थ्यमेको मासोऽभूद्, ज्ञानद्रुः पाटलाभिधः ॥ ५५९ ॥
जगत्प्रभोर्गणभृतः, षट्षष्टिः साधवः पुनः । द्विसप्ततिसहस्राणि, साध्वीनां लक्षमेव च ॥ ५६० ॥
सहस्राः पञ्चदश च, द्वे लक्षे श्रावकोत्तमाः । चतुर्लक्षी श्राविकाणां, षट्त्रिंशच्च सहस्रकाः ॥ ५६१ ॥
सर्वज्ञानां सहस्राः षट्, मनोज्ञानवतामपि । अवधिज्ञानिनां पञ्च, सहस्राः सचतुःशताः ॥ ५६२ ॥

चतुर्दशपूर्वभृतां, सहस्रं द्विशतोत्तरम् । स्फुरद्वैक्रियलब्धीनां, सहस्राणि दशाभवन् ॥ ५६३ ॥
वादिनां सप्त चत्वारिंशच्छतानि मतान्तरे । द्विचत्वारिंशच्छतानि, तत्त्वं जानाति केवली ॥ ५६४ ॥
सुभूमो गणभृन्मुख्यो, धरणी च प्रवर्त्तिनी । द्विपृष्ठवासुदेवश्च, नृपश्चरणसेवकः ॥ ५६५ ॥
यक्षः कुमारः श्वेताङ्गः, श्वेतयानश्चतुर्भुजः । मातुलिङ्गबाणशालिसद्दक्षिणकरद्वयः ॥ ५६६ ॥
कोदण्डनकुलाभ्यां च, शोभितो वामहस्तयोः । पिपर्त्ति श्रीवासुपूज्यजिनसेविसमीहितम् ॥ ५६७ ॥
प्रवराख्या प्रभोर्देवी, चण्डाख्या च मतान्तरे । चतुर्भुजा श्यामवर्णा, सत्तुरङ्गमवाहना ॥ ५६८ ॥
दधाति वरदं शक्तिं, भुजयोरपसव्ययोः । दधाति सव्ययोः पुष्पं, गदां चैषा महाशया ॥ ५६९ ॥

इति श्रीवासुपूज्यः ॥

धातकीखण्डभरते, महापुर्यां नृपोऽभवत् । पद्मसेनाह्वयः सर्वगुप्तर्षेः सोऽग्रहीद्व्रतम् ॥ ५७० ॥
ततः सुरः सहस्रारेऽष्टादशार्णवजीवितः । भूत्वा पाञ्चालदेशेऽभूत्पुरे काम्पील्यनामनि ॥ ५७१ ॥
श्यामाराज्ञीकुक्षिरत्नं, कृतवर्ममहीपतेः । पुत्रः पवित्रचारित्रविमलो विमलाह्वयः ॥ ५७२ ॥
वैशाखद्वादशी शुक्ला, माघे शुक्ला तृतीयिका । माघे चतुर्थी शुक्ला च, पौषे षष्ठी तथोज्ज्वला ॥ ५७३ ॥
आषाढे सप्तमी कृष्णा, कल्याणकदिनाः प्रभोः । आहिर्बुध्नं चतुर्षु स्याद्धिष्ण्यं पौष्णं च पञ्चमे ॥ ५७४ ॥
मासा अष्टौ दिनान्येकविंशतिर्गरभस्थितिः । राशिर्मीनाह्वयो लक्ष्म, शूकरः कीर्त्तितः प्रभोः ॥ ५७५ ॥
गर्भस्थेऽस्मिन्मातुरास्तां, मत्यङ्गे विमले इति । अन्तर्बहिश्च विमलतया वा विश्ववर्यया ॥ ५७६ ॥
विमलो नामधेयेनादेयनामा स कीर्त्तितः । षष्टिचापोन्नतः षष्टिलक्षाब्दायुर्जगद्विभुः ॥ ५७७ ॥
श्रीवासुपूज्यनिर्वाणात्त्रिंशता सागरोपमैः । षष्टिलक्षशरन्न्यूनैर्जन्माभूद्विमलप्रभोः ॥ ५७८ ॥
तुर्यारकेऽब्धयः शेषाः, षोडश प्रभुजन्मनि । पूर्वोदितैर्वर्षलक्षैस्तत्सहस्रैश्च साधिकाः ॥ ५७९ ॥
तुर्यारकस्य शेषो यो, जिनजन्मनि वक्ष्यते । इतः प्रभृति स स्वस्वायुषाऽभ्यधिक ऊह्यताम् ॥ ५८० ॥
लक्षाः पञ्चदशाब्दानां, कुमारत्वेऽवसद्विभुः । लक्षाणि त्रिंशतं राज्ये, लक्षाः पञ्चदश व्रते ॥ ५८१ ॥
तत्र द्विमासी छाद्मस्थ्यं, शिबिका च व्रतक्षणे । देवदिन्ना जयो धान्यकटे प्रथमदायकः ॥ ५८२ ॥
जम्बूतरुतले स्वामी, पञ्चमज्ञानमाप सः । निर्दिष्टाः सप्तपञ्चाशद्विभोर्गणधरोत्तमाः ॥ ५८३ ॥

अयमावश्यकाभिप्रायः, समवायाङ्गे तु षट्[१]पञ्चाशद्गणधरा उक्ता इति ज्ञेयं ।

अष्टषष्टिः सहस्राणि, साधूनां शीलशालिनाम् । लक्षमेकं च साध्वीनां, शतैः साधिकमष्टभिः ॥ ५८४ ॥
लक्षद्वयं च श्राद्धानां, सहस्रैरष्टभिर्युतम् । चतुर्लक्षी श्राविकाणां, सहस्रा जिनसंमिताः ॥ ५८५ ॥
शतानि पञ्चपञ्चाशत्केवलज्ञानशालिनाम् । मनःपर्यायचिद्राजां, तावन्त्येव शतानि च ॥ ५८६ ॥

१ तीर्थंकरवत् गणभृतामायुषो नियमाभावात् अल्पायुष्यादिकारणान्नैको विवक्षितःस्यात् ।

अष्टचत्वारिंशदेव, शतान्यवधिशालिनाम् । एकादशशतान्यस्य, सच्चतुर्दशपूर्विणाम् ॥ ५८७ ॥
लसद्वैक्रियलब्धीनां, सहस्राणि नवाभवन् । वादिनां च सहस्राणि, त्रिणि षट् च शताः किल ॥ ५८८ ॥
मन्दरो मुख्यगणभृद्धराख्या च प्रवर्त्तिनी । स्वयम्भूर्वासुदेवश्चाभवद्भक्तनृपः प्रभोः ॥ ५८९ ॥
यक्षश्च षण्मुखः श्वेतवर्णाङ्गः शिखिवाहनः । स द्वादशभुजस्तीर्थाधिष्ठाता विमलप्रभोः ॥ ५९० ॥
फलं चक्रं च बाणं च, खड्गं पाशाक्षसूत्रके । स भुजेष्वपसव्येषु, षट्सु धत्ते महाबलः ॥ ५९१ ॥
नकुलं चक्रमिष्वासं, फलकं चाङ्कुशाभये । भुजेषु षट्सु वामेषु, धत्ते मत्तेभविक्रमः ॥ ५९२ ॥
देव्यभूद्विजयाभिख्या, विदिता च मतान्तरे । वर्णतो हरितालाभा, पद्मासीना चतुर्भुजा ॥ ५९३ ॥
तनोति शं बाणपाशयुग्दक्षिणकरद्वया । धार्मिकाणां धनुर्नागशालिवामकरद्वया ॥ ५९४ ॥

इति श्रीविमलः ॥

नृप ऐरावतक्षेत्रे, धातकीखण्डवर्तिनि । रिष्टपुर्यामभूत्पद्मरथश्चित्ररथान्मुनेः ॥ ५९५ ॥
संप्राप्य संयमं विंशत्यब्ध्यायुः प्राणतेऽभवत् । सुरः स पुर्ययोध्यायां देशे कोशलनामनि ॥ ५९६ ॥
सिंहसेनस्य नृपतेः, सुयशाकुक्षिसंभवः । तनयोऽनन्तजिन्नाम्ना, जिनेन्द्रोऽभूच्चतुर्दशः ॥ ५९७ ॥
श्रावणे सप्तमी कृष्णा, वैशाखस्य त्रयोदशी । भूतेष्टा चासिते पक्षे, वैशाखस्य चतुर्दशी ॥ ५९८ ॥
चैत्रस्य पञ्चमी शुभ्रा, कल्याणकदिनाः प्रभोः । पञ्चस्वप्येषु नक्षत्रं, रेवती परिकीर्त्तितम् ॥ ५९९ ॥
नव गर्भस्थितिर्मासाः, प्रभोः षड्दिवसाधिकाः । अङ्कः श्येनो मीनराशिर्धनुः पञ्चाशदुच्छ्रयः ॥ ६०० ॥
ज्ञानादीनामनन्तत्वादनन्त इति कीर्त्यते । अनन्तमणिदाम्नां वा, मात्रा स्वप्ने निरीक्षणात् ॥ ६०१ ॥
विमलस्वामिनिर्वाणान्नवभिः सागरोपमैः । त्रिंशल्लक्षशरन्न्यूनैरनन्तोऽजायत प्रभुः ॥ ६०२ ॥
शिष्यन्ते स्म तदा तुर्यारके सप्त पयोधयः । लक्षैः सहस्रैर्वर्षाणां, पूर्वोक्तैरधिकाः किल ॥ ६०३ ॥
सप्त सार्द्धा वर्षलक्षाः, कुमारत्वेऽवसद्विभुः । भूपालत्वं पञ्चदशवर्षलक्षाण्यपालयत् ॥ ६०४ ॥
सार्द्धानि सप्त वर्षाणां, लक्षाणि व्रतमादधौ । लक्षाणि त्रिंशदब्दानां, सर्वमायुरभूत्प्रभोः ॥ ६०५ ॥
व्रते सागरदत्ताख्या, शिबिका विजयाभिधः । वर्द्धमानग्रामवासी, प्रभोः प्रथमदायकः ॥ ६०६ ॥
मासत्रयं च छाद्मस्थ्येऽश्वत्थश्च ज्ञानभूरुहः । प्रभोर्गणभृतः श्रेष्ठाः, पञ्चाशत्परिकीर्त्तिताः ॥ ६०७ ॥

इत्यावश्यकाभिप्रायः, समवायाङ्गे तु चतुष्पञ्चाशद्गणधरा उक्ता इति ज्ञेयं ।

षट्षष्टिश्च सहस्राणि, साधूनां सत्त्वशालिनाम् । द्वाषष्टिः संयतीनां च, सहस्राण्यभवन् विभोः ॥ ६०८ ॥
लक्षद्वयं च श्राद्धानां, षट्सहस्राधिकं प्रभोः । श्राविकाणां चतुर्लक्षी, सहस्राश्च चतुर्दश ॥ ६०९ ॥
तथा पञ्चसहस्राणि, केवलज्ञानशालिनाम् । तावन्त्येव सहस्राणि, मनोज्ञानवतामपि ॥ ६१० ॥
चत्वारोऽवधिभाजां च, सहस्रास्त्रिशताधिकाः । सहस्रमेकं पूर्णं च, सच्चतुर्दशपूर्विणाम् ॥ ६११ ॥

लसद्वैक्रियलब्धीनां, सहस्राण्यष्ट जज्ञिरे । द्वाभ्यां शताभ्यामधिका, त्रिसहस्री च वादिनाम् ॥ ६१२ ॥
यशोनामाद्यगणभृत्पद्माख्या च प्रवर्त्तिनी । पुरुषोत्तमो विष्णुश्च, सदा चरणसेवकः ॥ ६१३ ॥
दधत्पद्मखड्गपाशानपसव्ये करत्रये । नकुलं फलकं चाक्षसूत्रं वामकरत्रये ॥ ६१४ ॥
पातालयक्षस्त्रिमुखो, रक्तो मकरवाहनः । षड्भुजः कुरुते प्रीतिमनन्तप्रभुसेविनाम् ॥ ६१५ ॥
आदधाना खड्गपाशौ, वामेतरकरद्वये । वामे करद्वये शश्वद्दधाना फलकाङ्कुशौ ॥ ६१६ ॥
पद्मासना गौरवर्णा, देव्यङ्कुशा चतुर्भुजा । अनन्तप्रभुभक्तानां, दत्तेऽनन्तां सुखश्रियम् ॥ ६१७ ॥

इत्यनंतजित् ॥

भारते भद्दिलपुरे, धातकीखण्डमण्डने । नृपो दृढरथोऽसौ च, गुरोर्विमलवाहनात् ॥ ६१८ ॥
आदाय संयमं जज्ञे, विजयेऽनुत्तरे सुरः । द्वात्रिंशदर्णवायुष्कस्ततः शून्याख्यनीर्वृति ॥ ६१९ ॥
पुरे रत्नपुरे भानोर्नृपस्य तनयोऽभवत् । सुव्रतायाः कुक्षिरत्नं, धर्मनाथो जिनेश्वरः ॥ ६२० ॥
वैशाखे सप्तमी शुक्ला, तृतीया माघजोज्ज्वला । माघे त्रयोदशी शुक्ला, तथा पौषस्य पूर्णिमा ॥ ६२१ ॥
ज्येष्ठस्य पञ्चमी शुक्ला, कल्याणकदिनाः प्रभोः । पुष्यं च पञ्चस्वप्येषु, भं राशिः कर्क एव च ॥ ६२२ ॥
अनन्तस्वामिनिर्वाणाच्चतुर्भिः सागरोपमैः । जातो दशाब्दलक्षोनैः, श्रीधर्मो जगदीश्वरः ॥ ६२३ ॥
शिष्यन्ते स्म तदा तुर्यारकस्याम्भोधयस्त्रयः । पञ्चषष्टिश्चाब्दलक्षा, वेदनागसहस्रकाः ॥ ६२४ ॥
स्वयं धर्मस्वभावत्वाद्गर्भस्थे वा भवद्विभौ । माताऽतिधार्मिकी तस्माद्धर्मनाथ इति स्मृतः ॥ ६२५ ॥
देहोच्छ्रयः पञ्चचत्वारिंशच्चापमितः स्मृतः । वज्रं च लाञ्छनं वर्षलक्षाणि दश जीवितम् ॥ ६२६ ॥
वर्षलक्षद्वयं सार्द्धं, कुमारत्वे व्रतेऽपि च । राज्ये पुनः प्रभुः पञ्चवर्षलक्षाण्यपूरयत् ॥ ६२७ ॥
शिबिका नागदत्ताख्या, छाद्मस्थ्यं मासयोर्द्वयम् । धर्मसिंहः सौमनसग्रामेऽदादाद्यपारणाम् ॥ ६२८ ॥
ज्ञानावृक्षश्च निर्दिष्टो, दधिपर्ण इति प्रभोः । द्विचत्वारिंशदादिष्टाः, श्रीजिनस्य गणाधिपाः ॥ ६२९ ॥
चतुःषष्टिः सहस्राणि, संयतानां जिनेशितुः । तथा सहस्रा द्वाषष्टिः, साध्वीनां सचतुःशताः ॥ ६३० ॥
चतुस्सहस्राभ्यधिके, द्वे लक्षे श्राद्धपुङ्गवाः । चतुर्लक्षी श्राविकाणां, सहस्रश्च त्रयोदश ॥ ६३१ ॥
शतानि पञ्चचत्वारिंशत्केवलजुषां विभोः । तावन्त्येव शतान्येवं, मनःपर्यायिणामपि ॥ ६३२ ॥
त्रयोऽवधिज्ञानभाजां, सहस्राः षट्शताधिकाः । वर्यवैक्रियलब्धीनां, सहस्राः सप्त कीर्त्तिताः ॥ ६३३ ॥
शतानि नव चोक्तानि, सच्चतुर्दशपूर्विणाम् । वादिनां च सहस्रे द्वे, शतैरष्टभिरन्विते ॥ ६३४ ॥
अरिष्टो मुख्यगणभृत्, शिवार्या च प्रवर्तिनी । विष्णुः पुरुषसिंहश्च, नृपश्चरणसेवकः ॥ ६३५ ॥
बीजपूराभयगदास्त्रिषु दक्षिणपाणिषु । गदापद्माक्षनकुलान्, दधद्वामेषु च त्रिषु ॥ ६३६ ॥
त्रिमुखः किन्नरो यक्षो, रक्ताङ्गः कूर्मवाहनः । षड्भुजोऽभीष्टमाधत्ते, श्रीधर्मप्रभुसेविनाम् ॥ ६३७ ॥

देवी च पन्नगाभिख्या, सा कंदर्पा मतान्तरे । चतुर्भुजा गौरवर्णा, राजते मत्स्यवाहना ॥ ६३८ ॥
उत्पलाङ्कुशसंयुक्तसद्दक्षिणकरद्वया । पद्माभयाञ्चिता वामपाण्योर्धत्ते सुखं सताम् ॥ ६३९ ॥

इति श्रीधर्मनाथः ॥

श्रीषेणभूपतिः पूर्वं, तद्राज्ञी चाभिनन्दिता । उभौ युगलिनौ जातौ, ततो जातौ सुधाभुजौ ॥ ६४० ॥
ततश्चामिततेजः श्रीविजयाख्यौ महर्द्धिकौ । ततश्च प्राणतस्वर्गे, सुपर्वाणौ बभूवतुः ॥ ६४१ ॥
बलदेववासुदेवौ, ततो जातौ महाभुजौ । बलोऽभूदच्युताधीशो, हरिस्त्वाद्यां भुवं ययौ ॥ ६४२ ॥
उद्धृतस्तु ततोऽवाप्य, खेचराधीशतां हरिः । परिव्रज्याच्युतस्वामिसामानिक सुरोऽभवत् ॥ ६४३ ॥
ततश्च्युत्वाऽऽदिमो वज्रायुधाह्वश्चक्रवर्त्त्यभूत् । तदङ्गजोऽपरस्त्वासीत्, सहस्रायुधसंज्ञकः ॥ ६४४ ॥
ग्रैवेयके तृतीये तौ, जग्मतुर्जनकाङ्गजौ । मतान्तरे च नवमे, गतौ ग्रैवेयकेऽथ तौ ॥ ६४५ ॥
विजये पुष्कलावत्यां, जम्बूद्वीपे ततश्च्युतौ । नगर्यां पुण्डरीकिण्यामभूतां सोदरावुभौ ॥ ६४६ ॥
मेघरथदृढरथौ, श्रीमेघरथमेकदा । प्रशशंस मुदेशानसुरेन्द्रः सुरपर्षदि ॥ ६४७ ॥
अहो मेघरथस्यान्तः, स्फुरन् जीवदयारसः । न शक्यते शोषयितुं, कृतयत्नैः सुरैरपि ॥ ६४८ ॥
अश्रद्दधानस्तत्कश्चिद्देवः शूलभृतो वचः । परीक्षितुं नृपं दक्षंमन्यो भूलोकमाययौ ॥ ६४९ ॥
पूर्ववैराद्युद्ध्यमानौ, श्येनपारापतावथ । अधिष्ठाय सदम्भेनाजगाम नृपसन्निधौ ॥ ६५० ॥
ऊचे पारापतस्तत्र, रक्ष रक्ष कृपानिधे ! । श्येनो हिनस्ति मां पीनो, दीनं निःशरणं हहा ॥ ६५१ ॥
ऊचे वीक्ष्य भयार्त्तं तं, समुत्पन्नकृपो नृपः । यमादपि प्रकुपितान्मा भैषीर्नाथ ते भयम् ॥ ६५२ ॥
कम्पमाने खगे तस्मिन्नृपोत्सङ्गमुपाश्रिते । श्येनोऽपि सहसाऽऽगत्य, क्षुधाक्षामोऽब्रवीदिति ॥ ६५३ ॥
रक्ष रक्ष क्षुधा मार्यमाणं मां दक्षपुङ्गव ! । देहि देहि चिरात्प्राप्तं, भक्ष्यं पारापतं मम ॥ ६५४ ॥
एकस्योपेक्षसे प्राणांस्तानन्यस्य च रक्षसि । तुल्येऽपि कोऽयं जीवत्वे, पङ्क्तिभेदः किलावयोः ? ॥ ६५५ ॥
श्येनमूचे नृपः पक्षिन् !, दीनोऽयं मुच्यतां खगः । गृहाण नानापक्वान्नं, दयाधर्मोऽस्तु ते महान् ॥ ६५६ ॥
श्येनः प्रोचे च भूपाल !, धर्माधर्मविचारणा । भवादृशां स्यात्तृप्तानां, क्षुधार्त्तानां तु सा कुतः ? ॥ ६५७ ॥
विना सद्यस्कमांसं च, नाहारोऽस्मादृशां परः । तद् द्रुतं दीयतामेष, हत्या वा गृह्यतां मम ॥ ६५८ ॥
नृपोऽथाचिन्तयत्पारापतोऽयं सर्वथा मया । रक्षणीयोऽयमप्यङ्गी, तर्पणीयो बुभुक्षितः ॥ ६५९ ॥
श्येनं तत्तर्पयाम्येनं, निजैर्मांसैर्यथोभयोः । दया स्यान्ननु देहेऽस्मिन्, कः स्नेहः क्षणभङ्गुरे ? ॥ ६६० ॥
ततस्तुलायामारोप्य, मायापारापतं नृपः । उत्कृत्य स्वोरुमांसानि, तोलयामास सात्त्विकः ॥ ६६१ ॥
यथा यथा स्वमांसानि, तुलायां भूधवो न्यधात् । तथा तथा प्रववृधे, कपोतो वीवधेनं सः ॥ ६६२ ॥
दीनानने पुरजने, क्रन्दत्यन्तःपुरेऽखिले । तुलामारुह्य सोत्साहं, रसेनः श्येनमित्यवक् ॥ ६६३ ॥

गृहाण श्येन ! देहं मे, कृतार्थं जीवरक्षणात् । तृप्तिस्तवाभयं चास्य, भूयान्मम च निर्जरा ॥ ६६४ ॥
तं देहेऽपि गतस्नेहं, निस्संदेहं जिनागमे । नृपं वीक्ष्य दयावीरं, तुष्टस्तुष्टाव निर्जरः ॥ ६६५ ॥
साधु साधु महाधीर !, वीरकोटीर ! साम्प्रतम् । ईशानेशोऽनिशं स्तौति, सत्त्वं ते देवपर्षदि ॥ ६६६ ॥
शंसितोऽसि दयावीर !, यादृशः शूलपाणिना । ततः शतगुणोत्साहो, वीक्षितोऽसि परीक्षणे ॥ ६६७ ॥
खेदितोऽसि वृथा राजन्नपराधं क्षमस्व मे । इति ब्रुवाणः पुष्पाणां, वृष्टिं हृष्टस्ततान सः ॥ ६६८ ॥
प्रादुष्कृत्य स्वरूपं स्वं, सज्जीकृत्य च भूपतिम् । चमत्कारचलन्मौलिः, सुरः स्वर्गं जगाम सः ॥ ६६९ ॥

करुणावज्रायुधनाटके उत्तराध्ययनलघुवृत्तौ च वज्रायुधचक्रवर्त्तिभवेऽयं देवपरीक्षणादिर्व्यतिकर उक्तोऽस्तीति ध्येयं, तथा करुणावज्रायुधे परीक्षकौ द्वौ देवायुक्तौ इति ज्ञेयं ।

गुरोर्धनरथात्प्राप्य, दीक्षां मेघरथो नृपः । मृत्वा सर्वार्थसिद्धेऽभूत्परमस्थितिकः सुरः ॥ ६७० ॥
जीवो दृढरथस्यापि, भविष्यन् गणभृद्विभोः । मृत्वा तत्रैव देवोऽभूच्च्युत्वा मेघरथोऽथ च ॥ ६७१ ॥
कुरुदेशशिरोरत्ने, पुरे श्रीहस्तिनापुरे । विश्वसेनस्य भूभर्त्तुः, पुत्रोऽभूदचिराङ्गजः ॥ ६७२ ॥
प्रभौ गर्भे समुत्पन्ने, शशामोपद्रवोऽखिले । देशे जनानां मार्यादिस्ततः शान्तिरिति स्मृतः ॥ ६७३ ॥
अथवा—शान्तिः स्यात्क्रोधविजयः, शान्तिर्वोपद्रवक्षयः । शान्तिः शान्तस्सो वा तत्प्रधानत्वात्तथाभिधः ॥ ६७४ ॥
भाद्रस्य सप्तमी श्यामा, ज्येष्ठे कृष्णत्रयोदशी । ज्येष्ठे चतुर्दशी कृष्णा, पौषे च नवमी सिता ॥ ६७५ ॥
ज्येष्ठे त्रयोदशी कृष्णा, कल्याणकदिनाः प्रभोः । धिष्ण्यं च पञ्चस्वप्येषु, कीर्त्तितम् यमदैवतम् ॥ ६७६ ॥
नव मासाः स्थितिर्गर्भे, स्वामिनः षड्दिनाधिकाः । चत्वारिंशत्कार्मुकानि, प्रज्ञप्तो वपुरुच्छ्रयः ॥ ६७७ ॥
पादत्रयेण पल्यस्य, वर्षलक्षेण चोनितैः । त्रिभिः पयोधिभिः शान्तिर्धर्मनिर्वाणतोऽभवत् ॥ ६७८ ॥
पल्यपादत्रयी शेषा, तदा तुर्यारकेऽभवत् । पूर्वोक्तैः शरदां लक्षैः, सहस्रैश्च समन्विता ॥ ६७९ ॥
राशिर्मेषो मृगो लक्ष्म, वर्षलक्षं च जीवितम् । तुल्यैश्चतुर्भिर्भागैस्तत्पूरयामास विश्वजित् ॥ ६८० ॥
पञ्चविंशतिमब्दानां, सहस्राणि कुमारताम् । तावत्कालं च बुभुजे, मण्डलाधीशतामपि ॥ ६८१ ॥
पञ्चविंशतिमेवाब्दसहस्रान् सार्वभौमताम् । कालं तावन्तमेवायं, व्रतपर्यायमाश्रयत् ॥ ६८२ ॥
सर्वार्था शिबिका वर्षमेकं छद्मस्थता मता । सुमित्रो मन्दिरपुरे, पारणां प्रथमां ददौ ॥ ६८३ ॥

अत्रवर्षमेकं छद्मस्थता मता इत्यावश्यकापेक्षया,

सप्ततिशतस्थानकापेक्षया च पाठः,—ननु ज्येष्ठासितचतुर्दश्याः पौषसितनवमी यावद्गणने साधिकाः सप्त मासाः स्युः, यदि चाधिकमासः संभवेत्तदापि साधिका अष्ट मासा एव स्युः, तत्कथं वर्षं संभवति छाद्मस्थ्यकालमानमिति चेत्सत्यं ।

परमर्द्धाधिक्ये रूपं (पूर्णं) देयमिति गणितज्ञवचनानुवृत्त्येदमप्युक्तं भावीति संभाव्यते, ग्रन्थान्तरे तु तदनपेक्षणादधिकमासापेक्षणाच्च साधिकमासाष्टकसंभवे नव मासा अप्युक्ता दृश्यन्ते इति ध्येयं ।

नन्दीनामा ज्ञानवृक्षः, प्रज्ञप्तोऽस्य जिनेशितुः । षट्त्रिंशदेव गणभृद्वरा भगवतः स्मृताः ॥ ६८४ ॥

इदं गणधरमानमावश्यकानुसारेण, समवायाङ्गे तु श्रीशान्तेर्नवतिर्गणधरा इति दृश्यते.

द्वाषष्टिश्च सहस्राणि, साधवः शुद्धसंयमाः । संयतीनां चैकषष्टिः, सहस्राः षट्शताधिकाः ॥ ६८५ ॥
श्रावकाणां सनवतिसहस्रं लक्षयोर्द्वयम् । श्राविकाणां त्रिलक्ष्याढ्या, त्रिनवत्या सहस्रकैः ॥ ६८६ ॥
सर्वज्ञानां सहस्राश्च, चत्वारस्त्रिशताधिकाः । शतानि चत्वारिंशच्च, मनःपर्यायशालिनाम् ॥ ६८७ ॥
सहस्राणि त्रीण्यभूवन्नवधिज्ञानधारिणाम् । अष्टौ शतानि प्रोक्तानि, सच्चतुर्दशपूर्विणाम् ॥ ६८८ ॥
बिभ्रतां वैक्रियां लब्धिं, सहस्राः षण्महात्मनाम् । वादिनां च सहस्रे द्वे, निर्दिष्टे सचतुःशते ॥ ६८९ ॥
जीवो दृढरथस्याथ, च्युत्वा सर्वार्थसिद्धितः । प्रथमः प्रथमानश्रीः, श्रीशान्तेर्योऽङ्गजोऽभवत् ॥ ६९० ॥
गणाधिपाग्रणीः सोऽभूच्चक्रायुध इति प्रभोः । प्रवर्तिनी च सुमतिर्भक्तः कोणाचलो नृपः ॥ ६९१ ॥
वराहवाहनः क्रोडवदनः श्यामलद्युतिः । बीजपूरकसत्पद्मयुग्दक्षिणकरद्वयः ॥ ६९२ ॥
नकुलं चाक्षसूत्रं च, दधद्वामकरद्वये । यक्षो विजयते दक्षो, गरुडाख्यश्चतुर्भुजः ॥ ६९३ ॥
पुस्तकोत्पलसंयुक्तसद्दक्षिणकरद्वया । कमण्डलुं च कमलं, दधत्यन्यकरद्वये ॥ ६९४ ॥
पद्मासना चतुःपाणिर्निर्वाणी कनकच्छविः । श्रीशान्तिनाथभक्तानां, कुरुते मङ्गलावलीम् ॥ ६९५ ॥

इति श्रीशान्तिः ॥

आवर्त्तनाम्नि विजये, जम्बूद्वीपस्य मण्डने । प्राग्विदेहे खड्गिपुर्यां, नृपः सिंहाह्वयोऽभवत् ॥ ६९६ ॥
स संवरगुरोः पार्श्वे, प्रतिपद्य शुभव्रतम् । त्रयस्त्रिंशत्सागरायुः, सर्वार्थे त्रिदशोऽभवत् ॥ ६९७ ॥
कुरुदेशे गजपुरे, ततः सूरमहीपतेः । सुतोऽभूत्कुन्थुनामाऽर्हन्, श्रीदेवीकुक्षिमौक्तिकम् ॥ ६९८ ॥
श्रावणे नवमी कृष्णा, राधे कृष्णा चतुर्दशी । चैत्रे च पञ्चमी कृष्णा, तृतीया च मघोः सिता ॥ ६९९ ॥
वैशाखकृष्णप्रतिपत्, कल्याणकदिनाः प्रभोः । नक्षत्रं कृत्तिकासंज्ञं, पञ्चस्वप्येषु कीर्त्तितम् ॥ ७०० ॥
नव गर्भस्थितिर्मासाः, प्रभोः पञ्चदिनाधिकाः । पञ्चत्रिंशत्कार्मुकाणि, ख्यातो देहोच्छ्रयः प्रभोः ॥ ७०१ ॥
मेषो लक्ष्म वृषो राशिः, स्तूपो यद्रत्नजो भुवि । मात्रा निरीक्षितः स्वप्ने, ततः कुन्थुरिति श्रुतः ॥ ७०२ ॥
श्रीशान्तिनाथनिर्वाणात्पल्यार्द्धेनाभवत्प्रभुः । श्रीकुन्थुः पञ्चनवतिसहस्राब्दोनताजुषा ॥ ७०३ ॥
पादः पल्योपमस्यैकः, शेषस्तुर्यारके तदा । पञ्चषष्ट्या वर्षलक्षैः, सहस्रैश्चोदितैर्युतः ॥ ७०४ ॥
त्रयोविंशतिमब्दानां, सहस्रान् पर्यपूरयत् । चतुर्ष्वंशेषु प्रत्येकं, सार्द्धसप्तशताधिकान् ॥ ७०५ ॥
कौमार्ये मण्डलेशत्वे, चक्रित्वे संयमे च सः । सर्वायुः पञ्चनवतिः, सहस्राः शरदां प्रभोः ॥ ७०६ ॥
विजया शिबिकाऽब्दानि, छाद्मस्थ्ये षोडश प्रभोः । प्रथमां पारणां व्याघ्रसिंहश्चक्रपुरे ददौ ॥ ७०७ ॥
ज्ञानवृक्षश्च तिलकाभिधानः कीर्त्तितः प्रभोः । पञ्चत्रिंशद्गणभृतः, श्रीकुन्थुस्वामिनः स्मृताः ॥ ७०८ ॥

षष्टिः सहस्राः साधूनां, साध्वीनां षट्शताधिकाः । श्रावकाणां लक्षमेकोनाशीतिश्च सहस्रकाः ॥ ७०९ ॥
लक्षास्तिस्रः श्राविकाणां, सैकाशीतिसहस्रकाः । द्वात्रिंशद् द्वाविंशतिर्वा, केवलज्ञानिनां शताः ॥ ७१० ॥
त्रयस्त्रिंशच्छताश्चत्वारिंशा मानसवेदिनाम् । अवधिज्ञानभाजां च, शतानि पञ्चविंशतिः ॥ ७११ ॥
सच्चतुर्दशपूर्वाणां, शताः षट् सप्ततिस्पृशः । शतान्यथैकपञ्चाशत्सद्वैक्रियजुषामिह ॥ ७१२ ॥
वादिनां च सहस्रे द्वे, शम्बो गणधरोऽग्रिमः । प्रवर्त्तिनी दामिनी च, कुबेरो भक्तभूपतिः ॥ ७१३ ॥
गंधर्वयक्षः श्यामाङ्गे, हंसगामी चतुर्भुजः । अपसव्ये करद्वन्द्वे, दधद्वरदपाशकौ ॥ ७१४ ॥
मातुलिङ्गाङ्कुशौ वामे, दधानः पाणियामले । श्रीकुंथुनाथभक्तानां, समर्थयति वाञ्छितम् ॥ ७१५ ॥
बीजपूरकशूलाढ्यसद्दक्षिणकरद्वया । मुसण्ढिपद्मसंशोभिवाहमस्ताम्बुजद्वया ॥ ७१६ ॥
चतुर्भुजाऽच्युता देवी, बलाख्या च मतान्तरे । मयूरवाहना स्वर्णद्युतिः शं कुरुते सताम् ॥ ७१७ ॥

इति श्रीकुंथुनाथः ॥

जम्बूद्वीपे प्राग्विदेहे, वत्साख्ये विजये नृपः । सुसीमायां धनपतिः, प्रव्रज्य संवराद्गुरोः ॥ ७१८ ॥
त्रयस्त्रिंशत्सागरायुः, सर्वार्थे निर्जरोऽभवत् । ततः कुरुषु देशेषु, नगरे हस्तिनापुरे ॥ ७१९ ॥
सुदर्शनस्य नृपतेर्देवीकुक्षिसमुद्भवः । अरनामाऽभवन्नन्द्यावर्ताङ्कोऽष्टादशो जिनः ॥ ७२० ॥
द्वितीया फाल्गुने शुक्ला, मार्गे च दशमी सिता । उज्ज्वलैकादशी मार्गे, द्वादशी कार्त्तिके सिता ॥ ७२१ ॥
मार्गे च दशमी शुक्ला, कल्याणकदिना इमे । एषु पञ्चसु नक्षत्रं, रेवती परिकीर्त्तितम् ॥ ७२२ ॥
अष्टघस्राधिका मासा, नव गर्भस्थितिर्विभोः । राशिर्मीनस्तथा त्रिंशच्चापानि वपुरुच्छ्रयः ॥ ७२३ ॥
वंशादिवृद्धिकरणादरो नाम्ना जिनोऽभवत् । महारत्नाकरस्वप्नानुसाराद्वा तथाऽभिधः ॥ ७२४ ॥
पल्योपमस्य पादेन, न्यूनेन शरदामिह । एककोटिसहस्रेण, वेदनाग सहस्रकैः ॥ ७२५ ॥
श्रीकुंथुस्वामिनिर्वाणाज्जन्माभवदरप्रभोः । तदा तुर्यारेऽब्दकोटिसहस्रमवशिष्यते ॥ ७२६ ॥
पूर्वोक्तैः शरदां लक्षैः, सहस्रैश्च समन्वितम् । युक्तं चामुष्ककालेन, श्रीमदष्टादशार्हतः ॥ ७२७ ॥
अपूरयत्कुमारत्वे, सहस्राण्येकविंशतिम् । वर्षाणां मण्डलेशत्वे, चक्रित्वे संयमेऽपि च ॥ ७२८ ॥
शरत्सहस्रांश्चतुरशीतिमेवमपालयत् । आयुः सर्वं तत्र वर्षत्रयं छद्मस्थता विभोः ॥ ७२९ ॥
शिबिका वैजयन्त्याद्यभिक्षां राजुपरे ददौ । नाम्नाऽपराजितश्चूताख्यस्तु ज्ञानतरुः प्रभोः ॥ ७३० ॥
त्रयस्त्रिंशद्गणभृतः, पञ्चाशत्संयतात्मनाम् । सहस्राः संयतीनां च, निर्दिष्टाः षष्टिरागमे ॥ ७३१ ॥
एकं लक्षं सहस्राश्चतुरशीतिरुपासकाः । लक्षत्रयं श्राविकाणां, द्वासप्ततिसहस्रयुक् ॥ ७३२ ॥
शतान्यष्टाविंशतिश्च, केवलज्ञानशालिनाम् । द्वे सहस्रे शताः पञ्चैकपञ्चाशा मनोविदाम् ॥ ७३३ ॥
अवधिज्ञानिनां द्वे च, सहस्रे षट्शताधिके । शतानि षट् दशाढ्यानि, सच्चतुर्दशपूर्विणाम् ॥ ७३४ ॥

शतास्त्रिसप्ततिश्चोक्ता, बिभ्रतां वैक्रियश्रियम् । वादिनां षोडश शता:, शिष्टैर्व्यक्तीकृता: श्रुते ॥ ७३५ ॥
कुम्भो गणभृतां मुख्यो, रक्षिताख्या प्रवर्त्तिनी । सुभूमनामा नृपति:, सदा चरणसेवक: ॥ ७३६ ॥
बीजपूरं शरं खड्गं, मुद्गरं पाशकं तथा । अभयं च क्रमाद्बिभ्रत्, षट्सु दक्षिणपाणिषु ॥ ७३७ ॥
दधानो नकुलं चापं, फलकं शूलमङ्कुशम् । अक्षसूत्रं च वामेषु, करेषु षट्स्वपि क्रमात् ॥ ७३८ ॥
त्रिलोचन: श्यामवर्ण:, षडास्य: शङ्खवाहन: । स द्वादशभुजो यक्षेन्द्राख्यो यक्षो ह्यरप्रभो: ॥ ७३९ ॥
मातुलिङ्गोत्पलोपेतसद्दक्षिणकरद्वया । पद्माक्षसूत्रसंयुक्तावामवामकरद्वया ॥ ७४० ॥
देवी श्रीधारणी नीलवर्णा पद्मावरासना । चतुर्भुजा क्षिणोत्यारमस्स्वाम्यंह्रिसेविनाम् ॥ ७४१ ॥

इति श्रीअर: ॥

विजये सलिलावत्यां, जम्बूद्वीपस्य मण्डने । प्रत्यग्विदेहे पूर्वीतशोका तत्राभवन्नृप: ॥ ७४२ ॥
नाम्ना महाबल: षड्भिर्मित्रैर्युक्ता: स संयमम् । वरधर्मर्षित: प्राप्य, मनस्येवमचिन्तयत् ॥ ७४३ ॥

इति षष्टाङ्गभिप्राय:, सप्ततिशतस्थानके तु मल्ले: प्राग्भवे वैश्रमण इति नाम श्रूयते । [श्लो. ४६]

प्रव्रज्याऽवसरे स्नेहातिरेकादनुयायिभि: । तुल्यं कार्यं तपोऽस्माभिरिति संधाविधायिभि: ॥ ७४४ ॥
मित्रैरमीभि: सदृशं, करिष्यामि तपो यदि । तुल्य एव भविष्यामि, तदाऽमीभिर्भवान्तरे ॥ ७४५ ॥
तत: केनाप्युपायेन, करोम्येभ्यस्तपोऽधिकम् । ज्येष्ठो येन भवाम्यत्रामुत्राप्येभ्यस्तपोबलात् ॥ ७४६ ॥
ततो वृथा व्यथाशंसी, मायया वर्द्धयंस्तप: । मुधा बबन्ध स्त्रीवेदं, धिड्मायां स्वोपघातिनीम् ॥ ७४७ ॥
अर्जितार्हत्पद: स्थानैर्विंशत्याऽऽराधितैस्तत: । मित्रैस्सह जयन्तेऽभूत्परमस्थितिक: सुर: ॥ ७४८ ॥
मिथिलायां विदेहेषु, तत: कुम्भमहीपते: । कुक्षौ राज्ञ्या: प्रभावत्या:, पुत्रीत्वेनोदपद्यत ॥ ७४९ ॥
जेत्री मोहादिमल्लानां, ततो मल्लिरिति श्रुता । मातुर्वा माल्यशय्यायां, दोहदात्तादृशाह्वया ॥ ७५० ॥
चतुर्थी फाल्गुने शुक्ला, मार्गे चैकादशी सिता । मार्ग एकादशी शुभ्रा, मार्गे चैकादशी सिता ॥ ७५१ ॥
फाल्गुने द्वादशी शुभ्रा, कल्याणकदिना अमी । चतुर्ष्वश्विनी धिष्ण्यं, भरणी पञ्चमे पुन: ॥ ७५२ ॥
प्रभोर्गर्भस्थितिर्मासा, नव सप्तदिनाधिका: । राशिर्मेषो भगवत्या:, कुम्भो लक्ष्म प्रकीर्तितम् ॥ ७५३ ॥
पञ्चपञ्चाशता वर्षसहस्रैरूनके गते । सहस्रे वर्षकोटीनां, निर्वाणात् श्रीअरप्रभो: ॥ ७५४ ॥
जन्म मल्लिजिनस्याभूच्छेषं तुर्यारके तदा । जिनायु: शरदां लक्षा:, सहस्राश्च पुरोदिता: ॥ ७५५ ॥
शरच्छतं कुमारत्वे, व्रते नवशताधिका: । चतुष्पञ्चाशत्सहस्रा, अहोरात्रमकेवली ॥ ७५६ ॥
सहस्रा: पञ्चपञ्चाशच्छरदां सर्वजीवितम् । समुच्छ्राय: शरीरस्य, धनुषां पञ्चविंशति: ॥ ७५७ ॥
अयोध्यानगरीनेता, चम्पावाराणसीनृपौ । श्रावस्तीहस्तिनागेशौ, काम्पील्यपुरनायक: ॥ ७५८ ॥
एतान् प्राग्जन्मसुहृदो, विज्ञातस्वामिनीगुणान् । चित्रकृत्प्रमुखोदन्तैर्भूरिस्नेहवशीकृतान् ॥ ७५९ ॥

समेतान् युगपत्पाणिग्रहाय प्रतिबोध्य च । स्वर्णस्वप्रतिमोपायात्सार्द्धं प्राव्राजयत्प्रभुः ॥ ७६० ॥
जयन्ती शिबिका विश्वसेनोऽदादाद्यपारणाम् । मिथिलानगरीवासी, अशोको ज्ञानपादपः ॥ ७६१ ॥
अष्टाविंशतिरादिष्टाः, स्वामिन्या गणधारिणः । चत्वारिंशत्सहस्राणि, साधूनां विंशदात्मनाम् ॥ ७६२ ॥
साध्वीनां पञ्चपञ्चाशत्सहस्राः कीर्त्तिताः श्रुते । श्रावकाणां लक्षमेकं, सत्र्यशीतिसहस्रकम् ॥ ७६३ ॥
त्रिलक्षी श्राविकाणां च, ससप्ततिसहस्रकाः । एवं चतुर्विधः संघः, सद्गुणाढ्यः प्रभोरभूत् ॥ ७६४ ॥
सर्वज्ञानां सहस्रे द्वे, श्रीमल्लेर्द्विंशताधिके । मनोविदां सहस्रं च, सार्द्धसप्तशताधिकम् ॥ ७६५ ॥
द्वाविंशतिं शतान्याहुरवधिज्ञानशालिनाम् । शतानि साष्टषष्टीनि, षट् चतुर्दशपूर्विणाम् ॥ ७६६ ॥

अत्रेयं मनोज्ञानिनामवधिज्ञानिनां संख्या सप्ततिशतस्थानकाभिप्रायेण, षष्ठाङ्गे त्वष्टशतानि मनोविदां, द्वे सहस्रे चावधिज्ञानिनां, तुर्याङ्गे तु सप्तपञ्चाशच्छतानि मनोविदामेकोनषष्टिश्च शतान्यवधिज्ञानिनामुक्तानीति ज्ञेयं ।

सवैक्रियाणामेकोनत्रिंशतं प्रोचिरे शतान् । शतैश्चतुर्भिः सहितं, सहस्रं वादिनां मतम् ॥ ७६७ ॥
भिषग्ज्येष्ठो गणी बंधुमती चाभूत्प्रवर्त्तिनी । अजिताख्यो महीपालोऽभवद्भक्तो जगत्प्रभोः ॥ ७६८ ॥
वरदं परशुं शूलमभयं दक्षिणे दधत् । दोष्णां चतुष्टये वामे, पुनः पाणिचतुष्टये ॥ ७६९ ॥
बीजपूरं तथा शक्तिं, मुद्गरं चाक्षसूत्रकम् । दधानोऽष्टभुजो हस्तिवाहनश्चतुराननः ॥ ७७० ॥
इन्द्रायुधद्युतिर्यक्षः, कूबरः कुरुते श्रियम् । श्रीमल्लिनाथभक्तानां, कुबेरोऽसौ मतांतरे ॥ ७७१ ॥
वरदं चाक्षसूत्रं च, या दक्षिणकरद्वये । बीजपूरं तथा शक्तिं, दत्ते वामकरद्वये ॥ ७७२ ॥
पद्मासना श्यामवर्णा, सा वैरोट्या चतुर्भुजा । पिपर्त्ति प्रार्थितं प्रीता, श्रीमल्लिजिनसेवनात् ॥ ७७३ ॥

इति श्रीमल्लिः ॥

शिवकेतुरभूत्पूर्वं, सौधर्मे त्रिदशस्ततः । ततः कुबेरदत्तोऽथ, सुरः स्वर्गे तृतीयके ॥ ७७४ ॥
वज्रकुण्डलनामाथ, ब्रह्मस्वर्गे सुरस्ततः । ततोऽस्मिन् भरतक्षेत्रे, चंपापुर्यां रमाजुषि ॥ ७७५ ॥
नृपः श्रीवर्म (ब्रह्म) नामाऽसौ, सुनंदगुरुसन्निधौ । प्रव्रज्य परमायुष्को, देवोऽभूदपराजिते ॥ ७७६ ॥
ततो मगधदेशेऽभूत्पुरे राजगृहे जिनः । पद्मावतीकुक्षिजन्मा, सुमित्रनृपतेः सुतः ॥ ७७७ ॥
पौर्णमासी श्रावणस्य, कृष्णा ज्येष्ठस्य चाष्टमी । फाल्गुने द्वादशी शुक्ला, द्वादशी फाल्गुनेऽसिता ॥ ७७८ ॥
कृष्णा च ज्येष्ठनवमी, कल्याणकदिना अमी । एषु सर्वेषु नक्षत्रं, निर्दिष्टं श्रवणाह्वयम् ॥ ७७९ ॥
नव गर्भस्थितिर्मासाः, प्रभोरष्टदिनाधिकाः । कूर्मोऽङ्के मकरो राशिर्धनुर्विंशतिरुच्छ्रयः ॥ ७८० ॥
प्रभौ गर्भस्थिते माता, मुनिवत् सुव्रताऽभवत् । स्वयं च सुव्रतस्तस्मान्नाम्नाऽर्हन्मुनिसुव्रतः ॥ ७८१ ॥
चतुष्पञ्चाशता वर्षलक्षैः श्रीमल्लिनिर्वृतेः । त्रिंशद्वर्षसहस्रोनैर्जन्माभूत्सुव्रतप्रभोः ॥ ७८२ ॥

लक्षाण्येकादशाब्दानां, वेदनागसहस्रकाः । तुर्यारके स्म शिष्यन्ते, युताः श्रीसुव्रतायुषा ॥ ७८३ ॥
कौमार्येऽब्दसहस्राणि, सप्त सार्द्धान्यथोषितः । राज्ये पञ्चदशाब्दानां, सहस्राणि ततः पुनः ॥ ७८४ ॥
सार्द्धान्यब्दसहस्राणि, सप्त व्रतमपालयत् । त्रिंशदब्दसहस्राणि, सर्वमायुरपालयत् ॥ ७८५ ॥
मोहापराजितस्यास्य, शिबिका त्वपराजिता । पुरे राजगृहे ब्रह्मदत्तोऽदादाद्यपारणाम् ॥ ७८६ ॥
मासा एकादश छद्मस्थताऽमुष्य विभोर्मता । ज्ञानवृक्षश्चम्पकोऽभूदष्टादश गणाधिपाः ॥ ७८७ ॥
त्रिंशत्सहस्राः साधूनां, साध्वीनां खशरैर्मिताः । श्राद्धानां लक्षमेकं च, द्वासप्ततिसहस्रयुक् ॥ ७८८ ॥
सार्द्धास्त्रिलक्षाश्चार्हत्यः, सर्वज्ञानां तथा शताः । अष्टादश पञ्चदश, मनःपर्यायवेदिनाम् ॥ ७८९ ॥
अवधिज्ञानभाजामप्यष्टादश शताः स्मृताः । शतानि पञ्च दधतां, पूर्वाणि च चतुर्दश ॥ ७९० ॥
सवैक्रियाः सहस्रे द्वे, वादिनां द्विशताधिकम् । सहस्रमेकं गणभृन्मुख्यो मल्लिरिति श्रुतः ॥ ७९१ ॥
प्रवर्त्तिनी पुष्पवती, सदाभक्तनृपः प्रभोः । विजिताख्योऽभवद्यक्षो, वरुणश्चतुराननः ॥ ७९२ ॥
बीजपूरं गदां बाणं, शक्तिं करचतुष्टये । दक्षिणे नकुलं पद्मं, धनुः पर्शुं च वामके ॥ ७९३ ॥
दधानोऽष्टभुजः सौख्यं, कुर्याद् वृषभवाहनः । त्रिलोचनः श्वेतवर्णो, जटामुकुटभूषितः ॥ ७९४ ॥
वरदं चाक्षसूत्रं च, या दक्षिणकरद्वये । धत्ते तथा बीजपूरं, शक्तिं वामकरद्वये ॥ ७९५ ॥
सा भद्रासनमारूढा, स्वर्णवर्णा चतुर्भुजा । तस्याच्छुप्ता बभौ देवी, नरदत्ता मतान्तरे ॥ ७९६ ॥

इति श्रीमुनिसुव्रतः ॥

जंबूद्वीपस्य भरते, कौशाम्ब्यां पुरि भूपतिः । सिद्धार्थो नन्दगुर्वन्ते, परिव्रज्यामुपाददे ॥ ७९७ ॥
ततोऽभूत्प्राणतस्वर्गे, विंशत्यर्णवजीवितः । उदात्तवैभवो देवस्ततश्च्युत्वा स्थितिक्षये ॥ ७९८ ॥
विदेहदेशे मिथिलापुर्यां विजयभूपतेः । वप्पाराज्ञीकुक्षिरत्नं, नमिनामा जिनोऽभवत् ॥ ७९९ ॥
आश्विनस्य पौर्णमासी, श्रावणस्यासिताऽष्टमी । नवम्याषाढस्य कृष्णा, मार्गस्यैकादशी सिता ॥ ८०० ॥
राधस्य दशमी कृष्णा, कल्याणकदिना इति । सर्वेष्वप्यश्विनी धिष्ण्यं, राशिर्मेषः स्मृतः प्रभोः ॥ ८०१ ॥
अष्टघस्राधिका मासा, नवाभूद्गरभस्थितिः । नीलाब्जं लक्ष्म चापानि, देहः पञ्चदशोच्छ्रितः ॥ ८०२ ॥
गर्भस्थिते प्रभौ द्रङ्गरोधिनो रिपवो नताः । तस्मान्नाम्ना नमी रागाद्यरीणां नमनेन वा ॥ ८०३ ॥
षड्भिश्च शरदां लक्षैर्मुनिसुव्रतनिर्वृतेः । दशवर्षसहस्रोनैरजायत नमिप्रभुः ॥ ८०४ ॥
लक्षाणि पञ्च वर्षाणां, सहस्रा वार्द्धिदिग्मिताः । जिनायुश्चावशिष्यन्ते, तदा तुर्यारके ध्रुवम् ॥ ८०५ ॥
सार्द्धे वर्षसहस्रे द्वे, कुमारत्वेऽवसद्विभुः । पञ्च वर्षसहस्राणि, प्राज्यं राज्यमपालयत् ॥ ८०६ ॥
पुनः सार्द्धे सहस्रे द्वे, पालयामास संयमम् । दशाब्दानां सहस्राणि, सर्वमायुरपुपूरत् ॥ ८०७ ॥
शिबिका देवकुर्वाख्या, श्रीनमिस्वामिनो व्रते । आद्यां वीरपुरे भक्त्या, दिन्नो दत्ते स्म पारणाम् ॥ ८०८ ॥

मासा नवैव छाद्मस्थ्यं, बकुलो ज्ञानभूरुहः । प्रभोर्गणभृतः सप्तदश पेशलसंयमाः ॥ ८०९ ॥
महर्षीणां सहस्राणि, विंशतिः कीर्त्तितान्यथ । साध्वीनामेकचत्वारिंशदेव च सहस्रकाः ॥ ८१० ॥
लक्षं सहस्रैः सप्तत्या, समन्वितमुपासकाः । लक्षास्तिस्रोऽष्टचत्वारिंशत्सहस्राण्युपासिकाः ॥ ८११ ॥
केवलज्ञानिनामेकं, सहस्रं षट्शताधिकम् । शता द्वादश पञ्चाशाः, षष्ट्याढ्या वा मनोविदाम् ॥ ८१२ ॥
अवधिज्ञानिनां षड्भिः, सहस्रमधिकं शतैः । चतुर्दशपूर्वभृतामध्यर्द्धा च चतुःशती ॥ ८१३ ॥
सहस्रं वादिनां पञ्चसहस्रा वैक्रियस्पृशाम् । शुभाख्योगणभृन्मुख्योऽनिलाख्या च प्रवर्त्तिनी ॥ ८१४ ॥
प्रभोर्भक्तनृपश्चक्री, हरिषेणाभिधोऽभवत् । यक्षश्च भृकुटिर्जीयाच्चतुर्वक्त्रस्त्रिलोचनः ॥ ८१५ ॥
सुवर्णवर्णो वृषभवाहनो दक्षिणैर्भुजैः । बीजपूरं तथा शक्तिं, मुद्गरं चाभयं दधत् ॥ ८१६ ॥
वामैश्च नकुलं पर्शुं, वज्रमेवाक्षसूत्रकम् । दधानोऽष्टभुजः सम्यग्दृष्टिः प्रीणाति धार्मिकान् ॥ ८१७ ॥
दधाना वरदं खड्गमपसव्ये करद्वये । बीजपूरककुन्ताभ्यां, व्यग्रवामकरद्वया ॥ ८१८ ॥
चतुर्भुजा श्वेतवर्णा, गान्धारी हंसवाहना । देवी दिशति कल्याणं, श्रीनमिस्वामिसेविनाम् ॥ ८१९ ॥

इति श्रीनमिः ॥

अभूद्राजा धनस्तस्य, नाम्ना धनवती प्रिया । दम्पती तावभूतां द्वौ, सुरौ सौधर्मताविषे ॥ ८२० ॥
खेटश्चित्रगतिस्तस्य, प्रिया रत्नवतीति तौ । भवे तृतीये जज्ञाते, सौधर्मस्वर्गतश्च्युतौ ॥ ८२१ ॥
ततो माहेन्द्रनाके तौ, देवौ जातौ प्रियौ मिथः । ततो धनस्य जीवोऽभूद्राजा नाम्नाऽपराजितः ॥ ८२२ ॥
धनवत्याश्च जीवोऽभूदपराजितभूपतेः । राज्ञी प्रीतिमती जातौ, ततो द्वावारणे सुरौ ॥ ८२३ ॥
ततोऽपराजितस्यात्मा, सुप्रतिष्ठाभिधो नृपः । मतान्तरेऽभूच्छङ्खाख्यो, जम्बूद्वीपस्य भारते ॥ ८२४ ॥
पुरे राजगृहेऽथास्य, प्रियैवाभूद्यशोमती । जीवश्च्युत्वा प्रीतिमत्याः, स्वर्गादारणसंज्ञकात् ॥ ८२५ ॥
गुरोरतियशःपार्श्वात्तावुरीकृत्य संयमम् । ज्येष्ठायुष्कौ सुहृद्देवौ, जातौ द्वावपराजिते ॥ ८२६ ॥
जीवोऽथ यो यशोमत्याः, स च च्युत्वाऽपराजितात् । अजायतोग्रसेनस्य, नाम्ना राजीमती सुता ॥ ८२७ ॥
सुप्रतिष्ठस्य जीवोऽथ, ततश्च्युत्वाऽपराजितात् । समुत्पेदे कुशार्त्ताख्ये, देशे शौर्यपुरे पुरे ॥ ८२८ ॥
समुद्रविजयाख्यस्य, दशार्हस्य महीपतेः । सुतोऽभवच्छिवादेवीकुक्षिजन्मा जिनेश्वरः ॥ ८२९ ॥
कार्त्तिके द्वादशी कृष्णा, श्रावणे पञ्चमी सिता । षष्ठी च श्रावणे शुक्लामावास्याऽऽश्विनमासि च ॥ ८३० ॥
आषाढस्याष्टमी शुक्ला, कल्याणकदिनाः प्रभो । चित्रानक्षत्रमेतेषु, राशिः कन्याऽऽह्वयः स्मृतः ॥ ८३१ ॥
दिनैरष्टाभिरधिका, मासा गर्भस्थितिर्नव । शङ्खो लक्ष्म दशेष्वासप्रमितो वपुरुच्छ्रयः ॥ ८३२ ॥
रिष्टरत्नमयीं चक्रधारामैक्षत यत्प्रसूः । प्रभौ गर्भस्थिते रिष्टनेमिरित्याख्यया ततः ॥ ८३३ ॥
अमङ्गलव्यपोहायाऽकारोऽत्र परिभाव्यताम् । पापवक्षे चक्रधारातुल्यो वा तत्तथाऽऽह्वयः ॥ ८३४ ॥

एकवर्षसहस्रोनैः, पञ्चभिः शरदां गतैः । लक्षैः श्रीनमिनिर्वाणात्, श्रीनेमिरुदपद्यत ॥ ८३५ ॥
श्रीनेमिगर्भावसरे, पञ्चाशीतिः सहस्रकाः । शेषास्तुर्यारकेऽब्दानां, जिनायुर्युक्ता चाभवन् ॥ ८३६ ॥
कदाचित्कौतुकान्नेमिर्वयस्यप्रेरितो ययौ । हरेरायुधशालायां, तत्रास्त्राण्यखिलान्यपि ॥ ८३७ ॥
लीलया कलयामास, पाञ्चजन्ये च वादिते । त्रस्तातुराश्वेभनरा, सा पुरी चुक्षुभेऽखिला ॥ ८३८ ॥
कृष्णोऽपि द्रुतमागत्य, परीक्ष्य च विभोर्बलम् । विषसादेति राज्यं मे, सुखेनैष ग्रहीष्यति ॥ ८३९ ॥
तत आकाशवागेवमभून्नेमिरयं जिनः । प्रव्रजिष्यति कौमार्य, इत्युक्तं नमिनाऽर्हता ॥ ८४० ॥
अभ्यर्थितो विवाहाय, जलक्रीडामिषात्ततः । सान्तःपुरेण कृष्णेन, नर्ममर्मचटूक्तिभिः ॥ ८४१ ॥
कृते मौने भगवता, सर्वैरुद्घोषितं ततः । विवाहः स्वीकृत इति, न निषिद्धं हि संमतं ॥ ८४२ ॥
ततः साडम्बरं राजीमत्याः कर्तुं करग्रहम् । ययौ मुक्त्याप्तिसंकेतमिव कर्तुं प्रियस्त्रियाः ॥ ८४३ ॥
ततो जन्यजनातिथ्यं, कर्तुमार्त्तान्नियन्त्रितान् । पशून् वीक्ष्य परावृत्तः, स प्राव्राजीद्दयामयः ॥ ८४४ ॥
शतानि शरदां त्रीणि, कुमारत्वेऽथ संयमे । शतानि सप्त सर्वायुः, सहस्रं शरदां प्रभोः ॥ ८४५ ॥
चतुष्पञ्चाशदहिनानि, छाद्मस्थ्यमभवद्विभोः । वरदत्तो द्वारिकायामाद्यभिक्षां प्रभोर्ददौ ॥ ८४६ ॥
शिबिका द्वारवत्याख्या, वेतसो ज्ञानभूरुहः । अष्टादश गणाधीशा, एकादश मतान्तरे ॥ ८४७ ॥
अष्टादश सहस्राः स्युः, साधूनां गुणशालिनाम् । चत्वारिंशत्सहस्राश्च, साध्वीनां विमलात्मनाम् ॥ ८४८ ॥
श्रावकाणां लक्षमेकोनसप्ततिसहस्रयुक् । लक्षास्तिस्रः सहस्राः षट्, त्रिंशच्चोपासिका मताः ॥ ८४९ ॥
सातिरेकं पञ्चशत्या, सहस्रं सर्ववेदिनाम् । सहस्रमेकं संपूर्णं, मनःपर्यायवेदिनाम् ॥ ८५० ॥
सहस्रमवधिज्ञानभाजां पञ्चशताऽधिकम् । शतानि तस्य चत्वारि, सच्चतुर्दशपूर्विणाम् ॥ ८५१ ॥
लसद्वैक्रियलब्धीनां, शताः पञ्चदशोदिताः । वादिनां स्युः शतान्यष्टावजय्यानां सुरैरपि ॥ ८५२ ॥
वरदत्तो गणी मुख्यो, यक्षदिन्ना प्रवर्त्तिनी । पितृव्यपुत्रः कृष्णाख्यो, वासुदेवश्च सेवकः ॥ ८५३ ॥
मातुलिङ्गं च परशुं, बिभ्रच्चक्रं च दक्षिणे । करत्रयेऽथ नकुलं, शूलं शक्तिं च वामके ॥ ८५४ ॥
गोमेधयक्षस्त्रिमुखः, श्यामः पुरुषवाहनः । षड्भुजो नेमिभक्तानां, वितनोति समीहितम् ॥ ८५५ ॥
आम्रलुम्बिपाशयुक्तापसव्यकरयामला । पुत्राङ्कुशव्यग्रवामकरयुग्माऽधिकद्युतिः ॥ ८५६ ॥
मृगेन्द्रवाहना जात्यस्वर्णज्योतिश्चतुर्भुजा । श्रीनेमिभक्तान् पात्यम्बादेव्यम्बेव हितावहा ॥ ८५७ ॥

इति श्रीनेमिः ॥

कमठो मरुभूतिश्च, द्वावभूतां सहोदरौ । ब्राह्मणौ कमठस्तत्र, भ्रातुर्जायामरीरमत् ॥ ८५८ ॥
ज्ञातः कुर्वंस्तमन्यायं, कदाचिन्मरुभूतिना । भूपाय ज्ञापितस्तेनाप्यन्यायीति विडम्बितः ॥ ८५९ ॥
अनात्मज्ञस्ततश्चासौ, भ्रातरि द्वेषमुद्वहन् । तापसोऽभूत्सोदरेण, क्षम्यमाणश्च तं न्यहन् ॥ ८६० ॥

मरुभूतिरभून्मृत्वा, श्वेतेभः कमठः पुनः । महाविषः कुर्कुटाहिर्दष्टस्तेनाहिना मृतः ॥ ८६१ ॥
गजः सुरः सहस्रारे, स सर्पोऽभूच्च नारकः । नारकोऽभूत्पुनः सर्पः, स देवोऽभूच्च खेचरः ॥ ८६२ ॥
खेचरोऽथाच्युतस्वर्गे, सर्पश्च नरके ययौ । ततोऽच्युतसुरः पृथ्वीनाथोऽभूच्छबरः परः ॥ ८६३ ॥
राजा ग्रैवेयके देवः, शबरोऽभूच्च नारकः । नारकोऽसौ मृगेन्द्रोऽभूद्, ग्रैवेयकः सुरः पुनः ॥ ८६४ ॥
अयोध्यायां महापुर्यां, जम्बूद्वीपस्य भारते । आनन्दनामा भूपोऽभूद्दामोदरगुरोः स च ॥ ८६५ ॥

पार्श्वचरित्रे तु महाविदेहे सुवर्णबाहुनामा चक्री अष्टमभवे भगवानासीदिति दृश्यते.

चारित्रं प्राप्य सिंहेन, तेन क्षुण्णोऽपि स क्षमः । देवोऽभूत्प्राणतस्वर्गे, विंशत्यम्भोनिधिस्थितिः ॥ ८६६ ॥
सिंहश्च मृत्वा नरके, ययावेवं च पञ्चसु । भवेषु मरुभूत्यात्मा, मारितः कमठात्मना ॥ ८६७ ॥
ततः कमठजीवोऽसावृध्धृत्य नरकात्ततः । कठो दरिद्रविप्रोऽभूत्क्रमाद्दुःखेन तापसः ॥ ८६८ ॥
मरुभूतेस्थो जीवश्च्युत्वा प्राणततोविषात् । काशीदेशे वाराणस्यां, पुर्यामाश्चर्यकृच्छ्रियाम् ॥ ८६९ ॥
अश्वसेनस्य भूभर्तुः, सुतोऽद्भुतगुणोत्तरः । वामाराज्ञीकुक्षिशुक्तिमुक्ताफलमभूज्जिनः ॥ ८७० ॥
कृष्णा चतुर्थी चैत्रस्य, पौषस्य दशमी सितिः । पौषस्यैकादशी कृष्णा, चतुर्थी चासिता मघौ ॥ ८७१ ॥
श्रावणस्याष्टमी शुक्ला, कल्याणानां दिना इमे । विशाखाधिष्ण्यमेतेषु, राशिश्च स्वामिनस्तुला ॥ ८७२ ॥
प्रभोर्गर्भस्थितिर्मासा, नव षड्भिर्दिनैर्युताः । भुजङ्गे लाञ्छनं हस्ता, नवैव वपुरुच्छ्रयः ॥ ८७३ ॥
रात्रौ यान्तमहिं पार्श्वेऽपश्यद्गर्भक्षणे प्रसूः । ततः पार्श्वाभिधः स्वामी, त्रैलोक्यं पश्यतीति वा ॥ ८७४ ॥
श्रीनेमिनाथनिर्वाणात्, त्र्यशीत्याब्दसहस्रकैः । अध्यर्द्धषट्शतोपेतैः, श्रीपार्श्वोऽजायत प्रभुः ॥ ८७५ ॥
वामेयगर्भकालेऽस्य, चतुर्थस्यारकस्य च । सार्द्धाः शतास्त्रयोऽब्दानामवशिष्टतया स्थिताः ॥ ८७६ ॥
त्रिंशदब्दानि कौमार्ये, व्रते वर्षाणि सप्ततिः । दिनानि तत्र चतुरशीतिश्छाद्मस्थ्यमीरितम् ॥ ८७७ ॥
सर्वायुः शतमब्दानां, विशाला शिबिका व्रते । धन्यः कोपकटग्रामे, पारणां प्रथमां ददौ ॥ ८७८ ॥
पञ्चाग्नीन् साधयन् कष्टं, सासहिः कठतापसः । प्रभुणा दर्शिते सर्पे, प्रज्ज्वलत्काष्ठकोटरात् ॥ ८७९ ॥
लज्जितस्तपसा तेन, मेघमाली सुरोऽभवत् । ववर्षातितरां रोषाद्युपद्रोतुं जिनेश्वरम् ॥ ८८० ॥
धरणेंद्रत्वमासाद्य, स सर्पो विचलासनः । भक्त्याऽऽच्छाद्य फणैरेनमुपसर्गं न्यवर्त्तयत् ॥ ८८१ ॥
ततस्त्रयोऽथवा सप्त, फणा एकादशापि च । भवन्ति पार्श्वनाथस्येत्युक्तं पूर्वमहर्षिभिः ॥ ८८२ ॥
धातकी ज्ञानवृक्षः स्यात्, श्रीपार्श्वस्य जगत्प्रभोः । प्रभोरष्टौ गणभृतो, नामतः कीर्त्तयामि तान् ॥ ८८३ ॥
शुभस्तथाऽऽर्यघोषश्च, वशिष्ठो ब्रह्मचार्यपि । सोमश्च श्रीधरश्चैव, वीरभद्रो यशोऽभिधः ॥ ८८४ ॥

अयं श्रीकल्पसूत्रस्याभिप्रायः, आवश्यकसप्ततिशतस्थानकादिषु च दश गणभृत उक्ताः सन्ति[1], किञ्च श्रीकल्पसूत्रपार्श्वचरित्रादौ श्रीपार्श्वस्य धातकी ज्ञानवृक्ष उक्तः, श्रीउत्तराध्ययनबृहद्वृत्तौ तु अशोक उक्त इति[2] ज्ञेयं ।

षोडशैव सहस्राणि, साधूनां भावितात्मनाम् । अष्टात्रिंशत्सहस्राणि, साध्वीनां च शुभात्मनाम् ॥ ८८५ ॥
श्राद्धानां सचतुःषष्टिसहस्रं लक्षमीरितम् । अग्रेसरः श्रावकश्च, प्रभोः सूर्य इति स्मृतः ॥ ८८६ ॥
लक्षास्तिस्रस्तथैकोनचत्वारिंशत्सहस्रकाः । श्राविकाणां तासु मुख्या, सुनन्दा नामतः स्मृता ॥ ८८७ ॥
सर्वज्ञानां सहस्रं च, मनःपर्यायवेदिनाम् । पञ्चाशदधिकाः सप्त, शताः प्रोक्ता मनीषिभिः ॥ ८८८ ॥
अवधिज्ञानभाजां च, चतुर्दश शताः प्रभोः । सच्चतुर्दशपूर्वाणामध्यर्द्धा त्रिशती मता ॥ ८८९ ॥
विकुर्वणासमर्थानां, शतान्येकादशाथ च । सुरासुरैरजय्यानां, षट्शती वादिनामभूत् ॥ ८९० ॥
शुभाभिधो गणी मुख्य, आर्यदिन्नो मतान्तरे । प्रवर्त्तिनी पुष्पचूला, भक्तभूपः प्रसेनजित् ॥ ८९१ ॥
बीजपूरोरगोपेतापसव्यकरयामलः । नकुलं च भुजङ्गं च, दधद्वामकरद्वये ॥ ८९२ ॥
श्यामवर्णः फणिफणाचक्रमण्डितमस्तकः । चतुर्भुजश्चतुर्वक्त्रो, गजास्यः कूर्मवाहनः ॥ ८९३ ॥
नाम्ना श्रीवामनो यक्षः, पार्श्वाख्यश्च मतान्तरे । श्रीपार्श्वनाथभक्तानां, सान्निध्यं कुरुते सदा ॥ ८९४ ॥
आबिभ्रती पद्मपाशावपसव्ये करद्वये । सव्ये करद्वये कम्रौ, दधती च फलाङ्कुशौ ॥ ८९५ ॥
चतुर्भुजा हेमवर्णा, कुर्कुटोरगवाहना । श्रीपार्श्वस्मरतां दत्ते, देवी पद्मावती श्रियम् ॥ ८९६ ॥

इति श्रीपार्श्वः ॥

पश्चिमेषु विदेहेषु, नयसाराभिधोऽभवत् । ग्रामनाथः स काष्टार्थं, वनेऽगात् स्वाम्यनुज्ञया ॥ ८९७ ॥
भोजनावसरे वाञ्छन्नतिथीनां[3] समागमम् । सार्थभ्रष्टान् ददर्शर्षीन्, क्षुधार्त्तान्मार्गविच्युतान् ॥ ८९८ ॥
ततस्तान् परमप्रीत्या, प्रणम्य परिचर्य च । शुद्धाशनादिभिः पश्चात्स्वयं मार्गमदर्शयत् ॥ ८९९ ॥
प्रापितस्तत्र सम्यक्त्वं, योग्योऽयमिति साधुभिः । ततो भवे द्वितीयेऽसौ, सौधर्मे त्रिदशोऽभवत् ॥ ९०० ॥
ततो मरीचिनामाऽभूत्पुत्रो भरतचक्रिणः । स प्रवव्राज वैराग्यात्समीपे वृषभप्रभोः ॥ ९०१ ॥
अधीतैकादशाङ्गोऽपि, सोऽथ तापादिपीडया । पीडितो भृशमुद्विग्नश्चेतस्येवं व्यचिन्तयत् ॥ ९०२ ॥
मया न शक्यते वोढुं, दुर्वहः संयमो न च । गृहेऽपि शक्यते गन्तुं, गर्हितेनावकीर्णिना ॥ ९०३ ॥
ततस्त्रिदण्डिनामेष, नव्यं वेषमकल्पयत् । विजहारार्हता सार्द्धं, शुद्धं धर्मं प्ररूपयन् ॥ ९०४ ॥

---

१ आवश्यकटीप्पणादौ समाहितमेतत् अल्पायुष्टादिहेतोः, स्थानाङ्गवृत्तावपि ।

२ अशोकस्योपरि ज्ञानवृक्षस्य भावादशोकोक्तिर्न विरोधावहा ।

३ यद्यपि न तस्य सम्यक्त्वं, न चेदृश्याकाङ्क्षा सूत्रोक्ता, तथापि भोजनकालेऽतिथीनां स्मरणं सद्गृहस्थलक्षणमित्युक्तं ।

अनेकान् राजपुत्रादीन्, प्रतिबोध्येति शास्त्यसौ । जैनधर्मं प्रपद्यध्वं, गत्वा श्रीजिनसन्निधौ ॥ ९०५ ॥
कदाचित्समवासार्षीदयोध्यायां जिनेश्वरः । तत्रागतो नमस्यार्थं, पप्रच्छ भरतः प्रभुम् ॥ ९०६ ॥
एतस्यामवसर्पिण्यामस्मिंश्च भरते प्रभो ! । भविष्यति जिनः कोऽपि, जनोऽस्यां पर्षदि स्थितः ? ॥ ९०७ ॥
तदोचे भगवानेष, मरीचिस्तनयस्तव । चतुर्विंशोऽत्र भाव्यर्हन्, महावीराह्वयो नृप ! ॥ ९०८ ॥
चक्री च प्रियमित्राख्यो, विदेहेषु भविष्यति । प्रथमो वासुदेवोऽपि, भरतेऽत्रैष एव च ॥ ९०९ ॥
भरतोऽपि ततो गत्वेत्यूचे नत्वा कृताञ्जलिः । जिनश्चक्री हरिर्भावी, मरीचे ! भाग्यवानसि ॥ ९१० ॥
पारिव्राज्यं न ते वन्दे, न च ते चक्रिशार्ङ्गिताम् । भविष्यसि जिनो हि त्वं, प्रणमामि ततो मुदा ॥ ९११ ॥
एवमुक्त्वा विनीतान्तर्विनीते नृपतौ गते । मरीचिर्मानसाविष्टोऽमानमानोऽब्रवीदिति ॥ ९१२ ॥
आद्योऽहं वासुदेवानां, पिता मे चक्रवर्त्तिनाम् । पितामहो जिनेन्द्राणां, ममाहो उत्तमं कुलम् ॥ ९१३ ॥
प्रथमो वासुदेवोऽहं, मूकायां चक्रवर्त्त्यहम् । चरमस्तीर्थराजोऽहं, पर्याप्तमियतैव मे ॥ ९१४ ॥
कुर्वन्नेवमहङ्कारं, नीचैर्गोत्रं बबन्ध सः । जातिलाभकुलादीनामहङ्कारो हि पातयेत् ॥ ९१५ ॥
कदाचित्कपिलं राजकुमारं प्रत्यबूबुधत् । प्रैरयच्चापि चारित्रं, ग्रहीतुं साधुसन्निधौ ॥ ९१६ ॥
ततो बहुलकर्माऽयं, मरीचिमवदद्धिभो ! । किं सर्वथा न धर्मोऽस्ति, भवदीयेऽत्र दर्शने ? ॥ ९१७ ॥
ततो मरीचिरूचे तं, भावितावद्भवस्थितिः । मार्गे ममापि धर्मोऽस्ति, मार्गे जैनेऽपि विद्यते ॥ ९१८ ॥
उत्सूत्रवचसाऽनेन, मरीचिः समुपार्जयत् । संसारमेकपाथोधिकोटाकोटिमितं तदा ॥ ९१९ ॥
ततस्तुर्ये भवे ब्रह्मलोकस्वर्गेऽभवत्सुरः । कोल्लाकसन्निवेशेऽथ, विप्रोऽभूत्पञ्चमे भवे ॥ ९२० ॥
ततश्च मृत्वा भूयांसं, कालं संसारमाटिटत् । भवास्ते च न गण्यन्ते, भवानां सप्तविंशतौ ॥ ९२१ ॥
षष्ठे भवे च स्थूणायां, नगर्यां ब्राह्मणोऽभवत् । सौधर्मकल्पे देवोऽभूद्भवे मृत्वा च सप्तमे ॥ ९२२ ॥
भवेऽष्टमे ततश्चैत्यसन्निवेशेऽभवद् द्विजः । ईशानदेवलोकेऽथ, निर्जरो नवमे भवे ॥ ९२३ ॥
मन्दराख्ये सन्निवेशे, ब्राह्मणो दशमे भवे । एकादशे भवे देवोऽभवत्स्वर्गे तृतीयके ॥ ९२४ ॥
भवे च द्वादशे पुर्यां, श्वेताम्ब्यां ब्राह्मणोऽभवत् । त्रयोदशे च माहेन्द्रे, कल्पेऽभूत्त्रिदशो भवे ॥ ९२५ ॥
ततः कियन्तं कालं च, भ्रान्तोऽसौ भवसागरे । चतुर्दशे ततो राजगृहेऽभूद्ब्राह्मणो भवे ॥ ९२६ ॥
भवे पञ्चदशे ब्रह्मलोकस्वर्गे सुरोऽभवत् । मरीच्यादिनृभवानां, षट्के सोऽभूत्त्रिदण्डिकः ॥ ९२७ ॥
षोडशे च भवे विश्वभूत्याख्यो युवराजसूः । संभूतिमुनिपादान्ते, पप्रेदे संयमं स च ॥ ९२८ ॥
अन्यदा मासतपसः, पारणायां स जग्मिवान् । मुनिर्गोचरचर्यायां, तत्र धेनुहतोऽपतत् ॥ ९२९ ॥
दृष्टः पितृव्यपुत्रेण, हसितः कुपितो भृशम् । गां शृङ्गयोर्गृहीत्वा द्राग्, नभस्यभ्रमयद्रुषा ॥ ९३० ॥
निदानं कृतवांश्चैवं, भूयासं तपसाऽमुना । भूयिष्ठवीर्यो मृत्वा च, महाशुक्रेऽभवत्सुरः ॥ ९३१ ॥

वासुदेवस्त्रिपृष्ठाख्योऽजायताष्टादशे भवे । बाल्येऽप्यदारयत्सिंहं, यः स्थाम्ना जीर्णवस्त्रवत् ॥ ९३२ ॥
नरके सप्तमेऽथैकोनविंशतितमे भवे । सिंहोऽभूद्विंशतितमे, चतुर्थे नरके गतः ॥ ९३३ ॥
निर्गत्य नरकात्तुर्यात्, स बभ्राम भवान् बहून् । द्वाविंशेऽथ भवे नृत्वं, प्राप्य पुण्यान्युपार्जयत् ॥ ९३४ ॥
भवे ततस्त्रयोविंशे, प्रियमित्राभिधोऽभवत् । चक्रभृत्स च चारित्रं, धृत्वा शुक्रेऽभवत्सुरः ॥ ९३५ ॥
ततश्च्युत्वेह भरतक्षेत्रेऽहिच्छत्रिकापुरे । जितशत्रुमहीपालभद्रादेव्योः सुतोऽभवत् ॥ ९३६ ॥
पञ्चविंशतिलक्षाब्दजीवितो नन्दनाह्वयः । दीक्षां लक्षाब्दशेषायुराददे पोट्टिलाद्गुरोः ॥ ९३७ ॥

अयमावश्यकाभिप्रायः, समवायाङ्गसूत्रवृत्त्योस्तु भगवान् पोट्टिलाभिधानो राजपुत्रो बभूव,
तत्र वर्षकोटिं प्रव्रज्यां पालितवान्, ततो नन्दनाभिधानो राजसूरित्युक्तमस्तीति ज्ञेयं ।

यावज्जीवं ततो मासक्षपणानि निरन्तरम् । कुर्वन् स विंशतिस्थानान्याराध्यार्हन्त्यमार्जयत् ॥ ९३८ ॥
सुरोऽभूत्प्राणतस्वर्गे, षड्विंशतितमे भवे । विंशत्यब्ध्यायुर्विमाने, पुष्पोत्तरावतंसके ॥ ९३९ ॥
भवे ततः सप्तविंशे, ग्रामे ब्राह्मणकुण्डके । विप्रस्यर्षभदत्तस्य, देवानन्दाह्वयस्त्रियाम् ॥ ९४० ॥
मरीचिभवबद्धेन, स नीचैर्गोत्रकर्मणा । कुक्षौ प्रभुक्तशेषेण, विश्वेशोऽप्युदपद्यत ॥ ९४१ ॥
अर्हंतश्चक्रिणश्चैव, सीरिणः शार्ङ्गिणोऽपि च । तुच्छान्वयेषूत्पद्यन्ते, कदाचित्कर्मदोषतः ॥ ९४२ ॥
जायन्ते तु कदाप्येते, तादृग्वंशेषु नोत्तमाः । इति दत्तोपयोगस्य, सुरेन्द्रस्यानुशासनात् ॥ ९४३ ॥
पुरे क्षत्रियकुण्डाख्ये, सिद्धार्थस्य महीपतेः । त्रिशलाया महाराज्ञ्याः, कुक्षावक्षीणसंपदः ॥ ९४४ ॥
मुक्तो द्वयशीत्यहोरात्रातिक्रमे नैगमेषिणा । अजायत सुतत्वेन, चतुर्विंशो जिनेश्वरः ॥ ९४५ ॥

एवं च–"उसह ससि संति सुव्वय । नेमीसर पास वीर सेसाणं ॥ तेर सग बार नव नव ।
दस सगवीसा य तिन्नि भवा ॥

इति समर्थितं ॥

श्रीसमवायाङ्गे कोटिसमवाये 'तित्थकरभवग्गहणातो छट्ठे पोट्टिल्लभवग्गहणे' इति सूत्रे श्रीवीरस्य
देवानन्दागर्भस्थितिस्त्रिशलाकुक्ष्यागतिश्चेति भवद्वयं विवक्षितमस्तीति ज्ञेयं ।

आषाढे धवला षष्ठी, चैत्रे शुक्ला त्रयोदशी । मार्गस्य दशमी कृष्णा, वैशाखे दशमी सिता ॥ ९४६ ॥
कार्तिकस्यामावसीति, कल्याणकदिनाः प्रभोः । अभूद्गर्भापहारे तु, त्रयोदश्याश्विने सितिः ॥ ९४७ ॥
फाल्गुन्य उत्तरा धिष्ण्यं, कल्याणकचतुष्टये । तथा गर्भापहारेऽपि, निर्वाणे स्वातिरिष्यते ॥ ९४८ ॥
द्वयोर्महिलयोर्गर्भे, स्थितिः सङ्कुलिता विभोः । नव मासाः सातिरेकाः, सप्तभिः किल वासरैः ॥ ९४९ ॥
श्रीपार्श्वनाथनिर्वाणादभूज्जन्मान्तिमार्हतः । साधिकेनाष्टसप्तत्या, शतेन शरदामिह ॥ ९५० ॥
श्रीवीरगर्भकाले च, वर्षाणां पञ्चसप्ततिः । तुर्यारकेऽवशिष्टाऽऽसीत्, साद्धमासाष्टकाधिका ॥ ९५१ ॥

राशिरासीद्विभोः कन्या, लाञ्छनं च मृगाधिपः । देहोच्छ्रयः सप्त हस्ताः, प्रशस्ताङ्गद्युतिश्रियः ॥ ९५२ ॥
गुणागतानि नामानि, त्रीण्यभूवन् जगद्विभोः । वर्द्धमानः श्रमणश्च, महावीर इति स्फुटम् ॥ ९५३ ॥
अवतीर्णे प्रभौ ग्रामराष्ट्रादि यदवर्द्धत । ततः पितृभ्यां विहितमादिमं नाम सार्थकम् ॥ ९५४ ॥
तपस्यति श्राम्यतीति, नाम श्रमण इत्यभूत् । तृतीयं नाम शक्रेण, विहितं तन्निशम्यताम् ॥ ९५५ ॥
प्रशंशसान्यदा शक्रः, स्वामिधैर्यं स्वपर्षदि । अश्रद्दधानस्तत्कश्चिद्देवो भूलोकमीयिवान् ॥ ९५६ ॥
क्रीडति स्वामिनि क्रूरसर्परूपमदीदृशत् । निक्षिप्ते स्वामिना दूरं, तस्मिन्निर्भीकचेतसा ॥ ९५७ ॥
कुमाररूपमाधाय, चिक्रीड प्रभुणा सह । छलेन स्कंधमारोप्य, प्रभुं स ववृधे भृशम् ॥ ९५८ ॥
तथाप्यभीतो भगवान्, शनैर्मुष्ट्या जघान तम् । ततः शक्रो व्यधात्तुष्टो, महावीराभिधं विभुम् ॥ ९५९ ॥

तथोक्तं—बालत्तणे वि सूरो पयइए, गुरुपक्कमो भयवं । वीरत्ति कयं नामं सक्केणं तुट्ठचित्तेणं ॥
श्रीयोगशास्त्रगच्छाचारवृत्त्यादौ तु यदा प्रभुणा जन्मोत्सवे मेरुः कम्पितस्तदा शक्रेणैतन्नाम कृतमित्यस्तीति ज्ञेयं ।

पूर्ववैरिसङ्गमसुरोपहितकालचक्रापध्वंसत्वादिन्द्रादयो वीरनामानमुच्चैरुच्चैरुरिति तत्त्वार्थवृ[1]० ।

स्वामी कनकवर्णाङ्गस्तथा पद्मदशापरे । पद्मप्रभवासुपूज्यौ, पद्मरागारुणद्युती ॥ ९६० ॥
नीलवर्णौ मल्लिपार्श्वावुज्ज्वलौ नवमाष्टमौ । सजलाम्भोधरश्यामौ, श्रीनेमिमुनिसुव्रतौ ॥ ९६१ ॥
अनङ्गीकृतसाम्राज्यो, गृहवासेऽवसद्विभुः । त्रिंशद्वर्षाणि चारित्रं, ततश्च प्रत्यपद्यत ॥ ९६२ ॥
षड्भिर्मासैः किलाध्यर्द्धैः, शरदो द्वादशाधिकाः । छद्मस्थता प्रभोस्तत्र, यत्तपोऽभूत्तदुच्यते ॥ ९६३ ॥
द्वे षण्मासक्षपणके, तत्रैकं पञ्चभिर्दिनैः । न्यूनं नव चतुर्मासक्षपणान्यकरोद्विभुः ॥ ९६४ ॥
सार्द्धद्विमासक्षपणे, त्रिमासक्षपणे अपि । द्वे द्वे द्विमासक्षपणान्यकार्षीत् षड् जिनेश्वरः ॥ ९६५ ॥
सार्द्धैकमासक्षपणे, द्वे मासक्षपणानि च । द्वादश द्वासप्ततिश्च, पक्षक्षपणकान्यथ ॥ ९६६ ॥
द्विघसा भद्रप्रतिमा, महाभद्रा चतुर्दिना । प्रतिमा सर्वतोभद्रा, दशभिर्दिवसैर्मिता ॥ ९६७ ॥
एकोनत्रिंशदधिकं, षष्ठभक्तशतद्वयम् । त्रिंशत्येकोनपञ्चाशा, पारणानां समुच्चिता ॥ ९६८ ॥
अष्टमानि द्वादशैकं, प्रव्रज्यादिनमित्यसौ[2] । सर्वसंकलने छद्मस्थताद्धा स्यात्पुरोदिता ॥ ९६९ ॥
सर्वं चतुर्विधाहारं, स्वामिनेदं तपः कृतम् । द्वित्राण्यपि दिनानीह, न च भुक्तं निरन्तरम् ॥ ९७० ॥
नाप्रीतिमद्गृहे वासः, स्थेयं प्रतिमया सदा । न गेहिविनयः कार्यो, मौनं पाणौ च भोजनम् ॥ ९७१ ॥
अभिग्रहानिमान्पञ्चाभिगृह्य परमेश्वरः । आर्यानार्येषु देशेषु, विजहार क्षमानिधिः ॥ ९७२ ॥

---

१ अत्र मेरुकम्पसुरताडनकालचक्रोपसर्गेषु मेरुकम्पे कृतं महावीरेति नाम शेषयोर्द्वयोरनुदितं स्यात् तदा न काचिद्धानिः ।
२ यद्यपि श्रीवीरेण चतुर्थभक्तं न कृतं तथापि दीक्षायां षष्ठभक्तस्य प्रथमो दिवसो गार्हस्थ्ये ज्ञेयः ।

एवं विजहुर्वृषभनेमिपार्श्वजिनेश्वराः । आर्यानार्येषु शेषास्तु, सदार्येष्वेव विंशतिः ॥ ९७३ ॥
एकोनत्रिंशतं वर्षाण्यध्यर्द्धान्यन्तिमो जिनः । पक्षोनानि च सर्वज्ञपर्यायं पर्यपूरयत् ॥ ९७४ ॥
बभार व्रतपर्यायं, द्विचत्वारिंशदब्दकम् । एवं द्विसप्ततिर्वर्षाण्यायुः सर्वमभूद्विभोः ॥ ९७५ ॥

अयं कल्पसूत्राद्यभिप्रायः, समवायाङ्गे[1] तु साधिकानि द्विचत्वारिंशद्वर्षाणि व्रतपर्यायः, साधिकानि द्विसप्ततिवर्षाणि सर्वायुरित्युक्तमिति ज्ञेयं ।

तपो वृषभतीर्थेऽभूदुत्कृष्टं वार्षिकं तथा । षाण्मासिकं वीरतीर्थे, शेषेषु चाष्टमासिकम् ॥ ९७६ ॥
प्रमादकालोऽहोरात्रप्रमितो वृषभेशितुः । अन्तर्मुहूर्त्तं वीरस्य, शेषाणां स न विद्यते ॥ ९७७ ॥
श्रीवीरनेतुर्भूयांसः, श्रीपार्श्वस्य च तेऽल्पकाः । द्वाविंशतेश्च शेषाणामुपसर्गा न जज्ञिरे ॥ ९७८ ॥
शक्रन्यस्तं देवदूष्यं, स्कन्धे वृषभवीरयोः । संवत्सरं सातिरेकं, शेषाणां सर्वदा स्थितम् ॥ ९७९ ॥

अत्र श्रीजम्बूद्वीपप्रज्ञप्तिसूत्रे श्रीवृषभदेवस्य श्रीकल्पसूत्रे श्रीमहावीरस्य साधिकं वर्षं देवदूष्यस्थितिरुक्ता, श्रीसप्ततिशतस्थानकग्रन्थे [श्लो. १५८] च—"सक्को य लक्खमुल्लं सुरदूसं ठवइ सव्वजिणखंधे । वीरस्स वरिसमहिअं सयावि सेसाण तस्स ठिई" ॥ इत्युक्तमिति ज्ञेयं ॥

चन्द्रप्रभाख्या शिबिका, बहुलो भैक्ष्यमादिमम् । कोल्लाकसन्निवेशेऽदात्, सालो ज्ञानतरुः प्रभोः ॥ ९८० ॥
अष्टाद्यास्तद्भवे सिद्धा, अर्हत्प्रथमभैक्ष्यदाः । शेषास्तृतीये सेत्स्यन्ति, सिद्धाः केऽपि च तद्भवे ॥ ९८१ ॥
वासुपूज्यमल्लिनेमिपार्श्ववीरजिनेश्वराः । प्रवव्रजुर्वयस्याद्येऽनुपात्तराज्यसंपदः ॥ ९८२ ॥
प्रवव्रजुर्भुक्तराज्याः, शेषा वयसि पश्चिमे । मण्डलेशाः परे तेषु, चक्रिणः शान्तिकुंथ्वराः ॥ ९८३ ॥
अभोगफलकर्माणौ, मल्लिनेमिजिनेश्वरौ । निरीयतुरनुद्वाहौ, कृतोद्वाहाः परे जिनाः ॥ ९८४ ॥
सार्वभौमोऽभवत्पूर्वं, श्रीनाभेयजिनेश्वरः । इतो भवे तृतीयेऽन्ये, जिनाः सर्वेऽपि पार्थिवाः ॥ ९८५ ॥

श्रीपार्श्वोऽपि तच्चरित्रानुसारेण चक्रयासीदिति दृश्यते.

सुमतिर्नित्यभक्तेन, मल्लिपार्श्वौ कृताष्टमौ । चतुर्थेन द्वादशान्ये, कृतषष्ठाः प्रवव्रजुः ॥ ९८६ ॥
वासुपूज्यः शतैः षड्भिर्मल्लिपार्श्वौ त्रिभिः शतैः । एको वीरः सहस्रैश्च, चतुर्भिर्वृषभो नृणाम् ॥ ९८७ ॥
व्रतं भेजुः सहस्रेण, सह शेषा वृषध्वजः । विनीतायां द्वारिकायां, नेमिर्जन्मपुरेऽपरे ॥ ९८८ ॥
सिद्धार्थवन उद्याने, प्राव्राजीद्वृषभः प्रभुः । वने विहारगेहाख्ये, वासुपूज्यो जिनेश्वरः ॥ ९८९ ॥
श्रीधर्मो वप्रकाभिख्ये, विंशो नीलगुहाह्वये । श्रीपार्श्व आश्रमपदे, ज्ञातखण्डेऽन्तिमो जिनः ॥ ९९० ॥

---

१ तुर्याङ्गे विवक्षितं सर्वं, अन्यत्र तु अल्पस्याविवक्षेति ।

सहस्राम्रवणे शेषाश्चतुर्भिर्मुष्टिभिस्तथा । नाभेयः कृतवान् लोचं, मुष्टिभिः पञ्चभिः परे ॥ ९९१ ॥
मल्लिश्रेयांससुमतिनेमिपार्श्वजिनेश्वराः । पूर्वाह्णे जगृहुर्दीक्षां, पश्चिमाह्णे परे जिनाः ॥ ९९२ ॥
आद्येनाद्यपारणायां, लब्धोऽब्देनैक्षवो रसः । परमान्नं द्वितीयेऽह्नि, लेभे सर्वैः परैर्जिनैः ॥ ९९३ ॥
बाल्ये सुधाभुजः सर्वे, शुद्धाहाराशिनो व्रते । आद्यः कल्पद्रुफलभुग्गार्हस्थ्येऽन्येऽन्नभोजिनः ॥ ९९४ ॥
विनीतायाः पुरः शाखापुरे पुरिमतालके । उद्याने शकटमुखे, वृषभः प्राप केवलम् ॥ ९९५ ॥
बहिः श्रीजृम्भिकाग्रामादुपर्जुवालिकातटम् । केवलं प्राप वीरोऽन्ये, स्वस्वदीक्षावनेषु च ॥ ९९६ ॥
श्रीपार्श्वनेमिनाभेयमल्लीनामष्टमस्पृशाम् । केवलं वासुपूज्यस्य, चतुर्थभक्तशालिनः ॥ ९९७ ॥
शेषाणां कृतषष्ठानामुत्पन्नं सन्नकल्मषम् । सर्वेषामपि पूर्वाह्णे, पश्चिमाह्णेऽन्तिमप्रभोः ॥ ९९८ ॥
आद्ये समवसरणे, सर्वेषामर्हतामिह । उत्पन्नं तीर्थमन्त्यस्य, जिनेन्द्रस्य द्वितीयके ॥ ९९९ ॥
यावदुत्पद्यते तीर्थमग्रिमस्य जिनेशितुः । तावत्पूर्वस्य पूर्वस्य, भवेत्तीर्थमखण्डितम् ॥ १००० ॥
अस्यामवसर्पिण्यां तु—
आद्यात्सुविधिपर्यन्तं शान्तेश्चान्त्यजिनावधि । अष्टस्वष्टस्वन्तरेषु, तीर्थमासीन्निरन्तरम् ॥ १००१ ॥
मध्ये सप्तस्वन्तरेषु, नवमात्षोडशावधि । यावत्कालमभूत्तीर्थविच्छेदः स निरूप्यते ॥ १००२ ॥
पुष्पदन्तशीतलयोः, शीतलश्रेयसोरपि । एकैकः पल्यतुर्यांशस्तीर्थमत्रुट्यदन्तरे ॥ १००३ ॥
त्रयः पल्यचतुर्थांशाः, श्रेयांसवासुपूज्ययोः । वासुपूज्यविमलयोस्तुर्यः पल्योपमांशकः ॥ १००४ ॥
त्रयः पल्यस्य तुर्यांशा, विमलानन्तयोरपि । एकः पल्यचतुर्थांशो, मध्ये चानन्तधर्मयोः ॥ १००५ ॥
एकः पल्यस्य तुर्यांशो, धर्मशान्त्योः किलान्तरे । केचित्पल्योपमान्याहुः, पल्यतुर्यांशकास्पदे ॥ १००६ ॥

तथाहुः सप्ततिशतस्थानके—इगइगतिगेगतिगइग इगं सइइगारपलिअचउभागे । बिंतऽन्ने इअ पलिए सुविहाइसु सत्ततित्थन्ते ॥ [श्लो. २१३]

दुष्षमारकपर्यन्तं, तीर्थं वीरजिनेशितुः । प्रवर्त्ततेऽव्यवच्छिन्नं, छिन्नजन्मजरामयम् ॥ १००७ ॥
द्वाविंशतिसहस्राब्दन्यूनैकपूर्वलक्षयुक् । तीर्थं वीरस्याब्धिकोटाकोटी नाभेयतीर्थतः ॥ १००८ ॥
कालमानमिदं चादिजिनतीर्थप्रवृत्तितः । श्रीवीरतीर्थपर्यन्तं, यावद् ज्ञेयं विचक्षणैः ॥ १००९ ॥
उपसर्गास्तथा गर्भापहारोऽभाविता सभा । चमरोत्पतनं चन्द्रसूर्यावतरणं तथा ॥ १०१० ॥
हरेरमरकङ्कायां, गमनं स्त्रीजिनेश्वरः । हरिवंशकुलोत्पत्तिरर्चा चासंयतात्मनाम् ॥ १०११ ॥
साष्टकशतस्य सिद्धिर्ज्येष्ठावगाहनावताम् । अनंतकालभावीनि, दशाश्चर्याण्यमून्यहो ॥ १०१२ ॥
आद्यानि पञ्चाश्चर्याणि, तीर्थेऽन्त्यस्यापराणि तु । नेमिमल्लिशीतलश्रीसुविधिप्रथमार्हताम् ॥ १०१३ ॥
नाभेयोऽष्टापदे वीरोऽपापायां पुरि निर्वृतः । वासुपूज्यश्च चम्पाया, नेमी रैवतकाचले ॥ १०१४ ॥

अन्ये सम्मेतशिखरे, पर्यङ्कासनसंस्थिताः । श्रीनेमिवीरवृषभाः, कायोत्सर्गासनाः परे ॥ १०१५ ॥
आद्यः षड्भिरुपवासैर्द्वाभ्यां वीरः शिवं गतः । शेषा मासक्षपणेन, तपसा निर्वृतिं ययुः ॥ १०१६ ॥
आद्यः सहस्रैर्दशभिः, षड्भिस्तैर्विमलो जिनः । अनन्तजित्सप्तभिस्तैः, श्रीशान्तिर्नवभिः शतैः ॥ १०१७ ॥
सप्तमैकोनविंशौ च, पञ्चभिः पञ्चभिः शतैः । सिद्धः पद्मप्रभः सार्द्धं, त्रिभिरष्टोत्तरैः शतैः ॥ १०१८ ॥
नेमिः षट्त्रिंशदधिकैः, साधूनां पञ्चभिः शतैः । षड्भिः शतैर्वासुपूज्यो, धर्मः साष्टशतेन च ॥ १०१९ ॥
त्रयस्त्रिंशत्साधुयुक्तः, पार्श्वनाथः शिवं ययौ । एकाकी चरमः स्वामी, सहस्रेणान्विताः परे ॥ १०२० ॥
अष्टात्रिंशत्सहस्राणि, पञ्चाशीतिसमन्विता । चतुःशती जिनैः सार्द्धं, निर्वृताः सर्वसंख्यया ॥ १०२१ ॥
तृतीयषष्ठनवमद्वादशा अपराह्णके । शेषाः श्रेयांसपर्यंताः, पूर्वाह्णे वृषभादयः ॥ १०२२ ॥
धर्मारनमिवीराश्चापररात्रे शिवं गताः । शेषास्तु पूर्वरात्रेऽष्टौ, सिद्धाः श्रीविमलादयः ॥ १०२३ ॥
इंद्रभूतिरग्निभूतिर्वायुभूतिरमी त्रयः । सहोदरास्तथा व्यक्तसुधर्माणौ द्विजोत्तमौ ॥ १०२४ ॥
षष्ठो मण्डितपुत्राख्यो, मौर्यपुत्रश्च सप्तमः । अकम्पितोऽचलभ्राता, मेतार्यश्च प्रभासकः ॥ १०२५ ॥
अमी गणधरा एकादश श्रीचरमप्रभोः । अथैषां परिवारादिस्वरूपं किञ्चिदुच्यते ॥ १०२६ ॥
वसुभूतिसुताः पृथ्वीकुक्षिजाः प्रथमे त्रयः । पञ्चशिष्यशतोपेता, गौबरग्रामवासिनः ॥ १०२७ ॥
कोल्लाकाख्यसन्निवेशवास्तव्यौ तुर्यपञ्चमौ । वारुणीमातृकस्तत्र, तुरीयो धनमित्रभूः ॥ १०२८ ॥
पञ्चमो भद्दिलाकुक्षिरत्नं धम्मिलनन्दनः । उपास्यमानौ द्वावेतौ, शिष्याणां पञ्चभिः शतैः ॥ १०२९ ॥
तथा मौर्यसन्निवेशवासिनौ षष्ठसप्तमौ । धनदेवसुतः षष्ठः, सप्तमो मौर्यनन्दनः ॥ १०३० ॥
विजयातनुजौ सार्द्धशतत्रयपरिच्छदौ । देशाचारादविरुद्धा, पृथक्पितृकता तयोः ॥ १०३१ ॥
तत्र देशे कुले ह्यस्मिन्, मृते भर्त्तरि योषिताम् । आचीर्णत्वादविरुद्धो, धवान्तरपरिग्रहः ॥ १०३२ ॥
जयन्तीतनुजो देवनन्दनोऽकम्पिताह्वयः । मिथिलापुरवास्तव्यः, शतत्रयपरिच्छदः ॥ १०३३ ॥
नवमो कोशलावासी, नन्दाभूर्वसुवप्तृकः । तुङ्गिकाख्यसन्निवेशवास्तव्यो दशमो गणी ॥ १०३४ ॥
स दत्तपुत्रो वरुणदेवागर्भसमुद्भवः । एकादशो राजगृहवासी द्विजकुलध्वजः ॥ १०३५ ॥
सोऽतिभद्राकुक्षिरत्नं, सर्वेऽपि नवमादयः । उपासिता व्यक्तभक्तिसक्तैः शिष्यशतैस्त्रिभिः ॥ १०३६ ॥
ज्येष्ठा च कृत्तिका स्वातिः श्रुति र्यमदैवतम् । मघा ब्राह्म्युत्तराषाढा मार्गाश्विन्यौ च पुष्यभम् ॥ १९३७ ॥
एकादशानां जन्मर्क्षाण्येतानि गणधारिणाम् । गृहस्थत्वादिपर्यायपरिमाणमथ ब्रुवे ॥ १०३८ ॥
गार्हस्थ्येऽब्दानि पञ्चाशत्, छाद्मस्थ्ये त्रिंशदेव च । सर्वज्ञत्वे द्वादश द्वानवतिश्चायुरादिमे ॥ १०३९ ॥
अग्निभूतौ च षट्चत्वारिंशद् द्वादश षोडश । गार्हस्थ्यादिषु सर्वायुः, स्युश्चतुःसप्ततिः समाः ॥ १०४० ॥
वायुभूतौ द्विचत्वारिंशद्दशाष्टादशापि च । गृहस्थत्वादिभावेषु, सर्वायुः सप्ततिः समाः ॥ १०४१ ॥

व्यक्तस्वामिनि पञ्चाशद्, द्वादशाष्टादशापि च । त्रिषु भावेषु सर्वायुरशीतिः शरदः स्मृताः ॥ १०४२ ॥
पञ्चाशच्च द्विचत्वारिंशदष्टौ शरदः क्रमात् । सुधर्मस्वामिनो गार्हस्थ्यादिष्वायुश्च तच्छतम् ॥ १०४३ ॥
संवत्सरास्त्रिपञ्चाशच्चतुर्दश च षोडश । गार्हस्थ्यादिषु षष्ठस्य, त्र्यशीतिरखिलं जनुः ॥ १०४४ ॥
मौर्यस्याब्दाः पञ्चषष्टिश्चर्तुदश च षोडश । गृहित्वादिषु भावेषु, शतं पञ्चोनमन्वितम् ॥ १०४५ ॥
अकम्पितस्याष्टचत्वारिंशन्नवैकविंशतिः । गृहित्वादिषु वर्षाणि, सर्वायुरष्टसप्ततिः ॥ १०४६ ॥
नवमस्य षट्चत्वारिंशद् द्वादश चतुर्दश । त्रिषु भावेषु वर्षाणि, सर्वमायुर्द्विसप्ततिः ॥ १०४७ ॥
मेतार्यस्य च षट्त्रिंशद्दश षोडश वत्सराः । पर्यायेषु त्रिषु प्रोक्तं, द्वाषष्टिः सर्वजीवितम् ॥ १०४८ ॥
प्रभासस्य षोडशाष्टौ, क्रमात् षोडश वत्सराः । पर्यायेषु त्रिष्वशेषं, चत्वारिंशच्च जीवितम् ॥ १०४९ ॥
सिद्धा एकादशाप्येते, गिरौ वैभारनामनि । विहितानशना मासं, पुरे राजगृहाऽभिधे ॥ १०५० ॥
नव सिद्धिं गता वीरे, नाथे जीवत्यथादिमः । सिद्धे प्रभौ द्वादशभिर्विंशत्याब्दैश्च पञ्चमः ॥ १०५१ ॥
सुधर्मस्वामिनः शिष्यः, प्रशिष्यस्त्रिशलाभुवः । चरमः केवली जम्बूस्वामी चामीकरच्छविः ॥ १०५२ ॥
स राजगृहवास्तव्य, ऋषभदत्तनन्दनः ! । धारणीकुक्षिसंभूत, आजन्म ब्रह्मचार्यभूत् ॥ १०५३ ॥
षोडशाब्दानि गार्हस्थ्यं, छद्मस्थत्वं च विंशतिम् । सर्वज्ञत्वं चतुश्चत्वारिंशतं पर्यपालयत् ॥ १०५४ ॥
वर्षाण्यशीतिं सर्वायुः, परिपूर्यान्तिमप्रभौ । शिवं गते चतुःषष्ट्या, वर्षैर्भजे शिवश्रियम् ॥ १०५५ ॥
अत्र च–अकम्पिताचलभ्रात्रोर्यन्मेतार्यप्रभासयोः । एकाऽभूद्वाचना तस्माद्वीरनेतुर्गणा नव ॥ १०५६ ॥
एकवाचनिकः साधुसमुदायो भवेद्गणः । तेऽन्येषामर्हतां ज्ञेया, गणभृत्संख्यया समाः ॥ १०५७ ॥
समुच्चिता गणाधीशाः, सर्वेषामर्हतां समे । स्युर्द्विपञ्चाशदधिकाश्चतुर्दश शता इह ॥ १०५८ ॥
श्रीवीरस्वामिनः साधुसहस्राणि चतुर्दश । षट्त्रिंशच्च सहस्राणि, संयतीनां महात्मनाम् ॥ १०५९ ॥

इदं किल चतुरशीतिसहस्रादिकंमृषभादीनां तीर्थकृतां श्रमणपरिमाणं प्रधानसूत्रविरचनसमर्थान् श्रमणानधिकृत्य वेदितव्यं, इतरथा पुनः सामान्यश्रमणाः प्रभूततरा अपि तस्मिन् तस्मिन् ऋषभादिके आसीरन् इति नन्दीवृत्तौ, गच्छाचारवृत्तौ च ।

श्राद्धानां लक्षमेकोनषष्ट्या युक्तं सहस्रकैः । लक्षत्रयं श्राविकाणामष्टादशसहस्रयुक् ॥ १०६० ॥
सर्वज्ञानां शताः सप्त, पञ्च मानसवेदिनाम् । सहस्रमेकमवधिज्ञानिनां त्रिंशतान्वितम् ॥ १०६१ ॥
वैक्रियाणां शताः सप्त, सच्चतुर्दशपूर्विणाम् । त्रयः शता वादिवरमुनीनां च चतुःशती ॥ १०६२ ॥
सर्वेऽष्टाविंशतिर्लक्षाः, सर्वेषां साधवोऽर्हताम् । अष्टाचत्वारिंशता च, सहस्रैरधिकाः स्मृताः ॥ १०६३ ॥
संयतीनां चतुश्चत्वारिंशल्लक्षाः सहस्रकाः । षट्चत्वारिंशदेवाथ, षट्संयुक्ता चतुःशती ॥ १०६४ ॥
लक्षाणि पञ्चपञ्चाशत्, श्रावकाणां गुणौकसाम् । सहस्रैरष्टचत्वारिंशतोपेतानि निश्चितम् ॥ १०६५ ॥

एका कोटी पञ्च लक्षाण्यष्टात्रिंशत्सहस्रकाः । सर्वाग्रं श्राविकाणां च, सर्वेषामर्हतामिह ॥ १०६६ ॥
षट्सप्ततिसहस्राढ्यं, लक्षमेकं शताधिकम् । सर्वेषामर्हतामुक्तं, सर्वाग्रं सर्ववेदिनाम् ॥ १०६७ ॥
लक्षमेकं तथा पञ्चचत्वारिंशत्सहस्रकाः । शताः पञ्चैकनवतियुक्ता मानसवेदिनाम् ॥ १०६८ ॥
लक्षमेकं त्रयस्त्रिंशत्सहस्राः सचतुःशताः । उक्ता जिनानां सर्वेषामवधिज्ञानशालिनः ॥ १०६९ ॥
त्रयस्त्रिंशत्सहस्राणि, शतानि नव चोपरि । अष्टानवत्युपेतानि, स्युश्चतुर्दशपूर्विणः ॥ १०७० ॥
लक्षद्वयं तथा पञ्चचत्वारिंशत्सहस्रकाः । अष्टाढ्ये द्वे शते सर्वे, लसद्वैक्रियलब्धयः ॥ १०७१ ॥
षड्विंशतिः सहस्राणि, लक्षमेकं शतद्वयं । वादिनो मुनयः सर्वे, भवन्त्येवं समुच्चिताः ॥ १०७२ ॥
उक्ता विशेषमुनयो, येऽमी गणधरादयः । तैर्वर्जिताः सर्वसाधुसंख्याः पूर्वनिरूपिताः ॥ १०७३ ॥
सामान्यमुनिसंख्याः स्युः, सर्वेषामर्हतामिह । यथायोगं भावनीयास्ताः सर्वास्तात्त्विकैः स्वयम् ॥ १०७४ ॥
एकोनविंशतिर्लक्षाः, षडशीतिः सहस्रकाः । एकपञ्चाशदधिकाः, सामान्यमुनयोऽखिलाः ॥ १०७५ ॥

तथोक्तं—"गणहर केवलि मण ओहि पुव्वि वेउव्वि वाइ मुणिसंखं मुणिसंखाए सोहिय नेया सामन्नमुणिसंखा" ॥

द्वाविंशतिः सहस्राणि, तथा नव शतानि च । वृषभस्यानुत्तरौपपातिका मुनयो मताः ॥ १०७६ ॥
श्रीनेमिपार्श्ववीराणां, षोडश द्वादशाष्ट च । क्रमाच्छतास्ते शेषाणां, न ज्ञायन्तेऽधुनाऽर्हताम् ॥ १०७७ ॥
येषां जिनानां यावन्तः, शिष्यास्तै रचितानि च । प्रकीर्णकानि तावन्ति, तेषामित्युदितं श्रुते ॥ १०७८ ॥
तावन्त एव प्रत्येकबुद्धा अपि निरूपिताः । प्रकीर्णकानां ब्रूमोऽथ, स्वरूपं किञ्चिदागमात् ॥ १०७९ ॥
अर्हदुक्तानुसारेण, श्रमणा यन्महाधियः । रचयन्तीह तत्सर्वं, शास्त्रं ज्ञेयं प्रकीर्णकम् ॥ १०८० ॥
उत्कालिकमङ्गबाह्यं, दशवैकालिकादिकम् । अंगबाह्यं कालिकं यच्चोत्तराध्ययनादिकम् ॥ १०८१ ॥
प्रकीर्णकानि सर्वाणि, तानि ज्ञेयानि धीधनैः । प्रत्येकबुद्धैरन्यैर्वा, रचितानि महात्मभिः ॥ १०८२ ॥

अत्र च मतत्रयं—श्रीऋषभादिजिनानां चतुरशीतिसहस्रादिप्रमाणैः स्वस्वशिष्यै रचितानि तावत्संख्याकान्येवप्रकीर्णकानीति केचित् । ऋषभादिजिनानां स्वस्वतीर्थभाविभिश्चतुर्विधबुद्धयुपेतैरपरिमितैः साधुभिर्विरचितानि अपरिमितान्येव प्रकीर्णकानीत्यन्ये, ऋषभादिजिनानां स्वस्वतीर्थभाविभिरपरिमितैः प्रत्येकबुद्धैर्विरचितानि अपरिमितान्येव प्रकीर्णकानीत्यपरे, इत्याद्यर्थतो नंदीसूत्रवृत्तितोऽवसेयं, गच्छाचारवृत्तिर्वा विलोकनीयेति ।

पट्टाधिपानसंख्येयान्, यावत् श्रीवृषभप्रभोः । अविच्छिन्ना गतिर्मोक्षे, प्रावर्त्तत महात्मनाम् ॥ १०८३ ॥
तानष्टौ चतुरो यावत्, क्रमात् श्रीनेमिपार्श्वयोः । त्रीन् वीरस्य परेषां तु, संख्येयान्निखिलार्हताम् ॥ १०८४ ॥
अन्तर्मुहूर्त्तेऽतिक्रान्ते, श्रीनाभेयस्य केवलात् । प्रावर्त्तत गतिर्मोक्षे, नेमेर्वर्षद्वये गते ॥ १०८५ ॥
पार्श्वस्य त्रिषु वर्षेषु, चतुर्षु चरमप्रभोः । शेषाणां पुनरेकादिदिवसातिक्रमे सति ॥ १०८६ ॥

अभूत्प्रवृत्तिः पूर्वाणामाद्यात्कुंथुजिनावधि । असंख्यकालं संख्येयकालं पार्श्वजिनावधि ॥ १०८७ ॥
एकं सहस्रं वर्षाणां, महावीरस्य साऽभवत् । एतावान् पूर्वविच्छेदकालोऽपि सकलार्हताम् ॥ १०८८ ॥
परं वर्षसहस्राणां, विंशतिश्चरमेशितुः । पार्श्वस्य नासौ सर्वेषामातीर्थमपरं श्रुतम् ॥ १०८९ ॥
श्रुतेष्वङ्गादिष्वबद्धा, ज्ञानिभिश्च प्रकाशिताः । आदेशास्ते शताः पञ्चान्त्यस्यान्येषामनेकधा ॥ १०९० ॥
कुरुटोत्कुरुटौ साधू, सप्तमं नरकं गतौ । बाल्येङ्गुष्टाग्रसम्पर्कान्मेरुर्वीरेण कम्पितः ॥ १०९१ ॥[1]
विहाय वलयाकारं, स्वयंभूरमणाम्बुधौ । सन्ति पद्मानि मत्स्याश्च, समग्राकारशालिनः ॥ १०९२ ॥
अत्यन्तं स्थावरा सिद्धा, मरुदेवा महासती । असंदृब्धाः श्रुते ज्ञेया, आदेशा एवमादयः ॥ १०९३ ॥
श्रेयांसः श्रावको मुख्यः, श्रीनाभेयजिनेशितुः । ते नन्दसूर्यशङ्खाख्यास्त्रयाणां नेमितोऽर्हताम् ॥ १०९४ ॥
सुभद्रा महासुव्रता, सुनन्दा सुलसापि च । मुख्याः स्युः श्राविका आद्यनेमिपार्श्वान्तिमार्हताम् ॥ १०९५ ॥
शेषाणां त्वप्रसिद्धा इति ।
इन्द्रभूतिर्गणी मुख्यश्चन्दना च प्रवर्त्तिनी । श्रेणिको नृपतिर्भक्तः, सम्यक्त्वं क्षायिकं दधत् ॥ १०९६ ॥
यक्षः श्रीवर्द्धमानस्य, मातङ्गो गजवाहनः । द्विभुजो नकुलोपेतापसव्यकरपङ्कजः ॥ १०९७ ॥
वामे करे च रुचिरं, दधानो बीजपूरकम् । श्यामाङ्गकांतिः पुष्णाति, श्रियं श्रीवीरसेविनाम् ॥ १०९८ ॥
देवी सिद्धायिका सिंहवाहनाढ्या चतुर्भुजा । पुस्तकाभयसंयुक्तापसव्यकरयामला ॥ १०९९ ॥
बीजपूरकवीणाढ्यवामपाणिद्वया सताम् । श्रीवीरभक्ता हस्तिवर्णा दिशतु वाञ्छितम् ॥ ११०० ॥
यथाऽस्यामवसर्पिण्यामेवं प्राप्ता महोदयम् । चतुर्विंशतिरर्हन्तस्तथा भाव्याः परास्वपि ॥ ११०१ ॥
इहैतदवसर्पिणीभरतवर्षभूयोषितोर्विशेषसुषमाकृतो जिनवराश्चतुर्विंशतिः ।
मयाऽप्रतिमया मुदा प्रतिहतामयाश्चिन्मयाः, स्तुता विगतविक्रियाः कृतधियां क्रियासुः श्रियम् ॥ ११०२ ॥
विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्वप्रदीपोपमे, सर्गोऽयं प्रथितो निसर्गसुभगो द्वात्रिंश एषोऽभवत् ॥ ११०३ ॥

॥ इति श्रीलोकप्रकाशे द्वात्रिंशत्तमः सर्गः समाप्तः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

॥ अथ त्रयस्त्रिंशत्तमः सर्गः ॥

तथाऽस्यामवसर्पिण्यां, प्रथमश्चक्रवर्त्तिषु । अभूद्भरत इत्यादिदेवस्य तनुजोऽग्रिमः ॥ १ ॥
सुमङ्गलाकुक्षिरत्नं, पञ्चचापशतोच्छ्रितः । स्वर्णरुक् चतुरशीतिपूर्वलक्षसुजीवितः ॥ २ ॥

१ महानिशीथे (३-९४) एतस्याधिकारस्य 'जह जिणवरो गिरिं चाले' इत्यादिना स्पष्टमुक्तत्वात् नाबद्धता ।

साधिताशेषषट्खण्डः, स चादर्शगृहेऽन्यदा । निरङ्गुलीयकां पश्यन्नङ्गुलीं पर्यभावयत् ॥ ३ ॥
शरीरासारतां द्राक् च, लेभे केवलमुज्ज्वलम् । प्रदत्तसाधुवेषश्च, शक्रेणागत्य वन्दितः ॥ ४ ॥
सहस्रैर्दशभी राज्ञां, सेवितः स्वीकृतव्रतैः । विहृत्य लक्षं पूर्वाणामवाप परमं पदम् ॥ ५ ॥

इति भरतः ॥

अयोध्यायां नगर्यां च, द्वितीयश्चक्रवर्त्त्यभूत् । स्वर्णवर्णः सार्द्धचतुर्धनुःशतसमुच्छ्रितः ॥ ६ ॥
द्वासप्ततिपूर्वलक्षजीवितः सगराह्वयः । सुमित्रविजयक्ष्माप्यशोमत्योस्तनूद्भवः ॥ ७ ॥
अजितस्यार्हतश्चासौ, पितृव्यतनयोऽभवत् । यतः सुमित्रविजयो जितशत्रुश्च सोदरौ ॥ ८ ॥
सोऽपि स्वपुत्रमरणप्राप्तवैराग्यवासनः । अजितस्यार्हतः पार्श्वे, परिव्रज्य शिवं ययौ ॥ ९ ॥

इति सगरः ॥

अभून्नगर्यां श्रावस्त्यां, समुद्रविजयो नृपः । भद्रा प्रियतमा तस्य, मघवा तनयस्तयोः ॥ १० ॥
द्विचत्वारिंशदध्यर्द्धा, धनुषां वपुरुच्छ्रयः । लक्षाणि पञ्चवर्षाणामायुष्कं चास्य कीर्त्तितम् ॥ ११ ॥
संसारानित्यतां ध्यायन्, जातवैराग्यवासनः । सोऽगाद्गृहीतचारित्रः, स्वर्गलोकं तृतीयकम् ॥ १२ ॥

इति मघवा ॥

कुरुजङ्गलदेशे च, हस्तिनागपुरे पुरे । कुरुवंशे महीशोऽभूदश्वसेनाह्वयो महान् ॥ १३ ॥
सहदेवी च तद्भार्या, शीलसौभाग्यशालिनी । सनत्कुमारस्तत्पुत्रश्चतुर्थश्चक्रवर्त्त्यभूत् ॥ १४ ॥
अर्द्धयर्द्धान्येकचत्वारिंशद्धनूंषि स उच्छ्रितः । तथा त्रिवर्षलक्षायुर्जगदुत्कृष्टरूपवान् ॥ १५ ॥
तस्मिन्नवसरे कोऽपि, सौधमेन्द्रस्य पर्षदि । ईशानस्वर्गवास्तव्यः, सङ्गमाख्यः सुरोऽविशत् ॥ १६ ॥
तत्तेजसा सुराः सर्वे, प्रत्यूषे तारका इव । तार्किका इव वा जैने, बभूवुर्गततेजसः ॥ १७ ॥
गते तस्मिन् सुरैः सर्वैः, पृष्टः सौधर्मनायकः । जगावयं भवे पूर्वे, भावितात्माऽभवन्मुनिः ॥ १८ ॥
आचामाम्लवर्द्धमानं, तत्राकार्षीत्तपो महत् । तेजस्तदनुभावेन, बिभर्त्त्ययमनुत्तरम् ॥ १९ ॥
स्वामिन्नन्यस्य कस्यापि, रूपमस्त्यधुनेदृशम् । इति पृष्टः सुराधीशः, शशंसैवमसंशयः ॥ २० ॥
रूपं सनत्कुमारस्य, वर्त्तते चक्रवर्त्तिनः । देवेभ्योऽप्यधिकं नास्मादृशां वचनगोचरः ॥ २१ ॥
अश्रद्दधानौ तत्कौचिद्विप्रीभूयागतौ सुरौ । रूपं दिदृक्षु चक्री च, तदासीत्स्नानवेश्मनि ॥ २२ ॥
अभ्यक्तस्यक्तशृङ्गारो, रूपमालोक्य विस्मितौ । तौ प्रत्युवाच द्रष्टव्यं, रूपं मयि सभास्थिते ॥ २३ ॥
ततः स्नाताऽलङ्कृतश्च, दृष्टः सिंहासने स्थितः । ताभ्यां विषण्णचित्ताभ्यां, तेन पृष्टे च कारणे ॥ २४ ॥
रोगोत्पत्तिं जगदतुस्ततः स्वीकृत्य संयमम् । सहते स्म गदान् सप्त, सप्तवर्षशतावधि ॥ २५ ॥

"तथोक्तं योगशास्त्रवृत्तौ—कच्छू शोषा ज्वर श्वासारुचि कुक्ष्यक्षिवेदनाः । सप्ताधिसेहे पुण्यात्मा, सप्त वर्षशतानि सः" ॥

उत्तराध्ययनवृत्तेरयमेवाभिप्रायः, ऋषिमण्डले तु—कंडू अभत्तसद्धा तिव्वा वेअणा उ अच्छि कुच्छीसु । कासं सासं च जरं अहियासइ सत्त वाससए ॥ मरणसमाधिप्रकीर्णके तु– "सोलस रोगायंका सहिया सह चक्खिणा चउत्थेण । वाससहस्सा सत्त उ सामन्नधुरं उवगएणं" ॥ सप्तवर्षसहस्राण्यष्टादश रोगानधिसहेति तु उत्तराध्ययनदीपिकायां ।[1]

शक्रप्रशंसाऽश्रद्धानात्पुनर्देवैः परीक्षितः । प्राप्तश्चिकित्सानाकांक्षी, तृतीयं स्वर्गमुत्तमः ॥ २६ ॥

इति सनत्कुमारः ॥

श्रीशान्तिः पञ्चमश्चक्री, षष्ठः कुन्थुजिनेश्वरः । अरोऽर्हन् सप्तमस्तेषां, चरितं प्राग्निरूपितम् ॥ २७ ॥
हास्तिनाख्ये पुरेऽनन्तवीर्योऽभूत्पृथिवीपतिः । रेणुकायाः स्वसा तस्य, प्रियाऽभूज्जितशत्रुजा ॥ २८ ॥
तस्मिन्नवसरे दुःस्थो, विप्रो व्युच्छिन्नवंशकः । अग्निनामा भ्रमन् प्राप, तापसाश्रममेकदा ॥ २९ ॥
सुंतत्वेनाग्रहीदग्निं, जमः कुलपतिश्च तम् । ततः स जमदग्न्याख्यस्तापसोऽभून्महातपाः ॥ ३० ॥
जैनशैवौ तदा वैश्वानरधन्वन्तरी सुरौ । विवदन्तौ नृलोकं चागतौ धर्मं परीक्षितुम् ॥ ३१ ॥
परीक्षणीयो जैनेषु, प्रथमं दृश्यतेऽत्र यः । परीक्ष्यस्तापसप्रष्ठः, शैवेष्वित्यत्र सङ्गरः ॥ ३२ ॥
तदा भावयतिः पद्मरथाख्यो मिथिलापतिः । गुरुश्रीवासुपूज्यान्ते, गच्छन् व्रतजिघृक्षया ॥ ३३ ॥
प्रातिलोम्यानुलोम्याभ्यामुपायैर्विविधैरसौ । परीक्षितो न चुक्षोभ, पवनैरिव मन्दरः ॥ ३४ ॥
अगातां तौ ततो देवौ, जमदग्निं परीक्षितुम् । चटकौ दम्पती भूत्वा, तस्य श्मश्रुण्यतिष्ठताम् ॥ ३५ ॥
अनुमन्यस्व मां कान्ते ! गत्वाऽऽयामि हिमालयम् । इत्यूचिवांसं चटकं, चटकाऽथैवमब्रवीत् ॥ ३६ ॥
द्रुतं नैति भवानन्यकान्तासक्तः स्वभावतः । लम्पटानां कुतो मोक्षः परस्त्रीनागपाशतः ? ॥ ३७ ॥
स स्माहावश्यमेष्यामि, न चेद्गोघातपातकैः । गृह्णेऽथवा विनश्यामि, पापैर्विश्वस्तघातिनाम् ॥ ३८ ॥
चटकोचे प्रियालीकैः, पर्याप्तं शपथान्तरैः । तापसस्यास्य पापेन, गृह्णेऽहमिति शप्यताम् ॥ ३९ ॥
ततः स तापसः क्रुद्धः, खगौ धृत्वा करेण तौ । उवाच मयि किं पापमीदृगाजन्मसुव्रते ? ॥ ४० ॥
ऊचतुस्तौ खगौ पापं, पापर्ष ! किमतः परम् । अनुत्पादितपुत्रेण, यत्त्वया चर्यते तपः ॥ ४१ ॥
ततो भ्रष्टमनाः सोऽभूत्स्त्रीपाणिग्रहणोत्सुकः । मिथ्यादृशां हि वैराग्यं, कुलटाचित्तचञ्चलम् ॥ ४२ ॥
अखिद्यत सुरो धन्वन्तरिस्तं वीक्ष्य तादृशम् । किमेभिस्तापसैर्मूढैरित्यभूदयमार्हतः ॥ ४३ ॥

---

१ सप्तानां तीव्राणां सप्तवर्षशती यावत् सामान्यानां षोडशानां षोडशवर्षसहस्री यावत् सहनं, रोगाणां षोऽश प्रकारा इति प्रसिद्धेः षोडश इति, तत्रापि सामान्येतरयोः कयोश्चिदधिकयोः विवक्षणात् अष्टादश रोगाः, आयुःप्रश्नस्तु प्राक् श्रीशान्तेर्भवनात् नास्त्येव ।

भूरिकन्यं ययाचेऽसौ, जितशत्रुमृषिर्नृपम् । त्वामिच्छन्तीं ददामीति, सोऽवादीच्छापभीरुकः ॥ ४४ ॥
क्षामं भिक्षाचरं वीक्ष्य, निखिलाः कृतथूत्कृतीः । कुब्जीचक्रेऽसकौ शापादेकोनं कन्यकाशतम् ॥ ४५ ॥
रेणुक्रीडापरां लघ्वीं, रेणुकानामकन्यकाम् । फलैः प्रलोभ्य मामेषा, वृणोतीत्यवदन्नृपम् ॥ ४६ ॥
नृपेण दत्तामादाय, तां प्रसन्नः परा अपि । बटुः कन्याः पटूकृत्य, वने नीत्वा पुपोष ताम् ॥ ४७ ॥
तातवत्परिपोष्यापि, सोऽथ कामवशंवदः । जरन्नरीरमद्बालां, श्लथाङ्गेऽप्यश्लथस्पृहः ॥ ४८ ॥
ऋतुकालेऽथ तेनोक्ता, सा बाला त्वत्कृते चरुम् । साधयामि यतस्ते स्यान्नन्दनो ब्राह्मणोत्तमः ॥ ४९ ॥
साऽवग् द्वौ साधय चरू, तत्र बाह्यः कृते मम । अन्यः क्षात्रोऽनन्तवीर्यप्रियाया मत्स्वसुः कृते ॥ ५० ॥
साधितौ द्वौ चरू तेन, ब्राह्मक्षत्रमहोनिधी । ततः साऽचिन्तयच्चित्ते, रेणुका दीर्घया दृशा ॥ ५१ ॥
मा भूत्सुतोऽपि मे मद्वदारण्यो हरिणादिवत् । ध्यात्वेति स्वयमादत्सा, क्षात्रतेजःकरं चरुम् ॥ ५२ ॥
द्वितीयं चापरा तेन, जातौ कुलविलक्षणौ । रामः पुत्रो रेणुकायाः, परस्याः कृतवीर्यकः ॥ ५३ ॥
कोऽपि विद्याधरो भ्रष्टनभोगतिरुपासितः । रामेण विद्या तद्दत्ता, पार्शवी साधिता क्रमात् ॥ ५४ ॥
स्वसृप्रेम्णाऽन्यदा चागाद्रेणुका हस्तिनापुरे । भुक्ता चानन्तवीर्येण, श्याली जातसुताऽप्यभूत् ॥ ५५ ॥
ससुतामपि तां निन्ये, जमदग्निर्निजं गृहम् । क्रुद्धश्च पर्शुरामस्तां, सडिम्भां मातरं न्यहन् ॥ ५६ ॥
तद्भगिन्योदितं पत्ये, क्रुद्धोऽथानन्तवीर्यराट् । क्रीडनार्थं गते रामे, द्राग्ममर्द तदाश्रमम् ॥ ५७ ॥
ततश्च पर्शुरामेणानन्तवीर्यो निपातितः । कृतवीर्यस्ततस्तस्य, पदेऽभूत्पृथिवीपतिः ॥ ५८ ॥
तेन क्रुद्धेन नीतश्च, जमदग्निर्यमालयम् । रिपोस्ताते हते स्वस्य, तातदुःखं हि शाम्यति ॥ ५९ ॥
ततश्च पर्शुरामेण, प्रज्ज्वलत्पर्शुतेजसा । कृतवीर्यः क्षयं नीतो, निखिलैः क्षत्रियैः सह ॥ ६० ॥
कृतवीर्यप्रिया तारा, ततो गुर्वी पलायिता । कृपया तापसैस्त्राता, स्वाश्रमे भूमिवेश्मनि ॥ ६१ ॥
क्रमाच्चतुर्दशस्वप्नसूचितोऽस्यां सुतोऽभवत् । चखाद भूमिमित्युक्तः, सुभूम इति तापसैः ॥ ६२ ॥
हस्तिनापुरसाम्राज्यं, रामः स्वीकृत्य भूतलम् । निःक्षत्रियं सप्तवारांश्चकार क्रोधदुर्द्धरः ॥ ६३ ॥
अन्यदा क्षत्रियान्वेषी, सुभूमालङ्कृताश्रमे । जगाम रामस्तत्रास्य, जज्वाल परशुः क्रुधा ॥ ६४ ॥
कोऽप्यत्र क्षत्रियोऽस्तीति, पुष्टः कुलपतिर्जगौ । तापसाः क्षत्रियाः सन्तीत्युक्तेऽसौ व्यरमत्क्रुधः ॥ ६५ ॥
हतानां क्षत्रियेन्द्राणां, दंष्ट्रिकाभिरबीभरत् । स्थालमेकं महद्रामः, संग्रामोद्दामदोर्मदः ॥ ६६ ॥
य एताः पायसीभूताः, भोक्ष्यते स त्वदन्तकः । इति नैमित्तिकेनोक्तो, रामस्तन्निर्णिनीषया ॥ ६७ ॥
अवास्तिं पुरे सत्रागारं निर्माय तत्र च । दंष्ट्रास्थालाङ्कितं सिंहासनमादावतिष्ठिपत् ॥ ६८ ॥
विद्याधरो मेघनादः, सुतां पद्मश्रियं ददौ । सुभूमाय निमित्तज्ञगिरा तं चक्रिणं विदन् ॥ ६९ ॥
सुभूमस्तातवृत्तान्तं, ज्ञात्वा गदितमम्बया । क्रुद्धो रामं संजिहीर्षुर्द्राग् ययौ हस्तिनापुरम् ॥ ७० ॥

गत्वा सिंहासने तस्मिन्निषण्णः सिंहशाववत् । दंष्ट्रास्ताः पायसीभूता, बुभुजे च भुजोर्जितः ॥ ७१ ॥
हतेषु मेघनादेन, तदारक्षिद्विजातिषु । रामोऽप्यागात्तत्र कालदूताहूत इव द्रुतम् ॥ ७२ ॥
मुक्तः सुभूमे रामेण, परशुः प्रज्ज्वलन्नपि । स्वयमेव शशामाशु, न्यायभाजीव दुर्जनः ॥ ७३ ॥
चक्ररत्नीभवत्स्थालं, सुभूमप्रेरितं ततः । शिरश्चिच्छेद रामस्य, पुण्यतः किं न संभवेत् ? ॥ ७४ ॥
त्रिसप्तकृत्वो निर्विप्रं, स चकार महीतलम् । वैरनिर्यातनं कुर्वंस्त्रिगुणं मत्सरोल्बणः ॥ ७५ ॥
निर्जिताशेषषट्खण्डः, स चण्डक्रोधदुर्द्धरः । विप्रघातान्निववृते, न मनागपि निर्दयः ॥ ७६ ॥
सोऽन्यदा धातकीखण्डभरतं जेतुमुत्सुकः । निवारितोऽपि मन्त्र्याद्यैर्भृशं दुःशकुनैरिव ॥ ७७ ॥
रत्नेन चर्मणाऽम्भोधिं, तरीतुमुपचक्रमे । अभूच्च बुद्धिर्देवानां, चर्मरत्नभृतां तदा ॥ ७८ ॥
बिभ्रत्येवेदमन्येऽमी, विश्राम्यामि क्षणं त्वहम् । युगपच्चिन्तयित्वेति, सर्वैस्तन्मुमुचे श्लथम् ॥ ७९ ॥
ततः स चर्मणा तेन, पापेनेव गरीयसा । ममज्ज वार्द्धौ देहेन, दुर्गतावात्मना पुनः ॥ ८० ॥

तथोक्तं—"तुर्यात्कषायात्पञ्चत्वं, प्राप्य षट्खण्डभूपतिः । सप्तमं नरकं प्रापदष्टमश्चक्रवर्त्यसौ ॥
अष्टाविंशतिकोदण्डोत्तुङ्गदेहोऽयमीरितः । षष्टिवर्षसहस्रायुश्चामीकरतनुद्युतिः ॥ ८१ ॥ इति सुभूमः ॥

आसीद्वाणारसी नाम, काशीदेशे महापुरी । तत्र पद्मोत्तरो नाम, राजा ज्वाला च तत्प्रिया ॥ ८२ ॥

अत्र—जम्म विणीय अउज्झा सावत्थी पञ्च हत्थिणपुरंमि । वाणारसि कंपिल्ले रायगिहे चेव कंपिल्ले ॥ [श्लो. ३९७] इत्यावश्यकनिर्युक्त्यभिप्रायेण नवमस्य चक्रिणो वाणारसी जन्मपुरी प्रतीयते, श्रीशान्तिसूरिकृताष्टादशोत्तराध्ययनवृत्तौ त्वस्य कुरुदेशे हस्तिनागपुरमुक्तमस्तीति ज्ञेयम् ।

विष्णुनामा तयोः पुत्रो, हर्यक्षस्वप्नसूचितः । महापद्मः परश्चक्रिसूचकस्वप्नसूचितः ॥ ८३ ॥
तदोज्जयिन्यां श्रीवर्मो, राजा तस्य पुरोहितः । नमुचिर्नाम मिथ्यादृगभूत्तस्मिन् पुरेऽन्यदा ॥ ८४ ॥
मुनिसुव्रतनाथस्य, विनेयः सुव्रताह्वयः । सूरिर्भूरिपरीवारो, विहरन् समवासरत् ॥ ८५ ॥
गच्छतस्तन्नमस्यार्थं, पूर्जनान् वीक्ष्य भूपतिः । उपाचार्यमुपेयाय, युक्तो नमुचिनामुना ॥ ८६ ॥
वदन् वितण्डावादेन, नमुचिर्गुरुभिस्सह । शिष्येण लघुनैकेन, सद्यो वादे पराजितः ॥ ८७ ॥
विलक्षीभूतवदनस्ततो द्विष्टः स दुष्टधीः । मुनीन् हन्तुं गतो रात्रौ, देवेन स्तम्भितो दृढम् ॥ ८८ ॥
प्रातर्नृपादिभिर्लोकैर्दृष्टः कष्टेन मोचितः । धिक्कृतो ह्रीविलक्षास्यः, स ययौ हस्तिनापुरम् ॥ ८९ ॥
मन्त्री जातो महापद्मयुवराजस्य तत्र सः । जग्राह सिंहं सामंतं, दुष्टं जनपदद्रुहम् ॥ ९० ॥
ततो वरं वृणीष्वेति महापद्मोऽब्रवीदमुम् । स स्माहास्तु वरः कोशे, याचिष्येऽवसरे विभो ! ॥ ९१ ॥
ततो महापद्ममात्राऽकारि जैनरथो महान् । लक्ष्मीनाम्न्या सपत्न्या च, शैव्या ब्राह्मरथोऽत्र च ॥ ९२ ॥

आदावुत्सवमाश्रित्य, विवादे प्रसृते तयोः । द्वयोः साम्याय भूपस्तौ, रथौ द्वावप्यवारयत् ॥ ९३ ॥
महापद्मस्ततोऽध्यासीद्विग्गां जातमनर्थकम् । मयि सत्यपि यन्मातुर्हतो रथमनोरथः ॥ ९४ ॥
अहो ममापि न मनाग्, पित्रा दाक्षिण्यमीक्षितम् । इति देशान्तरं द्रष्टुं, स मानी निरगात्ततः ॥ ९५ ॥
यदि राज्यमहं लप्स्ये, तदा मातुर्मनोरथम् । पूरयिष्यामि निर्माय, क्ष्मामर्हच्चैत्यमण्डिताम् ॥ ९६ ॥
ध्यायन्निति भुवि भ्राम्यन्, स लेभे विविधाः श्रियः । निधानानि नव प्राप, रत्नानि च चतुर्दश ॥ ९७ ॥
साधयित्वा च षट्खण्डराज्यं प्राज्यपराक्रमः । हस्तिनापुरमागत्य, स ननाम पितुः पदौ ॥ ९८ ॥
स्त्रीरत्नं चास्य मदनावली नागवतीभवा । जनमेजयराजस्य, सुता चम्पापतेरभूत् ॥ ९९ ॥
सुव्रतस्वामिशिष्यस्य, सुव्रतस्यान्तिके मुनेः । पद्मोत्तरश्च विष्णुश्च, वैराग्यरसवासितौ ॥ १०० ॥
व्रतं जगृहतुः पद्मोत्तरस्तत्र ययौ शिवम् । विष्णुश्चोत्पन्नविविधलब्धिर्विहृतवान् भुवि ॥ १०१ ॥
महापद्मोऽभिषिक्तोऽथ, चक्रित्वेऽशेषपार्थिवैः । मातुर्मुदे रथं जैनं, पुरेऽभ्रमयदुत्सवैः ॥ १०२ ॥
चकार भारतीं भूमिं, जिनचैत्यैरलङ्कृताम् । परःशतैः पुरग्रामदुर्गशैलवनादिषु ॥ १०३ ॥
तस्थिवत्सु चतुर्मासीं, हस्तिनाख्यपुरेऽन्यदा । सुव्रतर्षिषु दुष्टात्मा, नमुचिर्जैनसाधुषु ॥ १०४ ॥
महापद्मादयाचिष्ट, प्रभोर्न्यासीकृतं वरम् । सोऽपि तेनार्थितं राज्यं, ददौ यज्ञोत्सवावधि ॥ १०५ ॥
अथैनं पार्थिवं नव्यं, सर्वे सेवितुमैयरुः । पाखण्डिनो विना जैनमुनीन् छिद्रं तदेव च ॥ १०६ ॥
पुरस्कृत्याब्रवीत्सोऽपि, साधूनाहूय संसदि । भो यूयं लोकमर्यादामपि वित्थ न किं जडाः ? ॥ १०७ ॥
यन्नन्तुं नागता नव्यनृपं तदथ गच्छत । दूरं विहाय मद्देशं, न चेन्निग्रहमाप्स्यथ ॥ १०८ ॥
बोधितोऽप्यवदद्दुष्टः, स चेत्सप्तदिनोपरि । यः कोऽपि भवतामत्र, स्थाता हन्तव्य एव सः ॥ १०९ ॥
ततो लब्धिमतैकेन, साधुना विष्णुमाह्वयन् । सूरयो वत्सरशतान्, षष्टिं तीव्रतपोजुषम् ॥ ११० ॥
ततो विष्णुकुमारेण, बोधितोऽपि कदाग्रही । पदत्रयमितं स्थानं, याचितस्तद्ददौ क्रुधा ॥ १११ ॥
त्रिपद्याः परतस्तिष्ठन्, शीर्षच्छेद्यो भवत्विति । तेनोक्ते क्रुधितो विष्णुर्विचक्रे वैक्रियं वपुः ॥ ११२ ॥
द्वाभ्यामाक्रम्य पादाभ्यां, प्राक्प्रत्यग्वार्द्धिवेदिके । नमुचेरमुचन्मूर्ध्नि, तृतीयं चरणं ततः ॥ ११३ ॥

इत्युपदेशमालाकर्णिकाद्यभिप्रायः, त्रिषष्टीयपद्मचरित्रोत्तराध्ययनवृत्त्याद्यभिप्रायस्त्वेवं—

अपातयत्पातकिनं, नमुचिं भूतले ततः ।
एत्य ज्ञातस्वरूपेण, महापद्मेन चक्रिणा । क्षमितः शमितो देवाङ्गनाभिः शमगीतिभिः ॥ ११४ ॥
नतः स्तुतो जनैः सर्वैः, प्रशशाम महाशयः । आलोचितातिचारोऽसौ, केवलं प्राप्य निर्वृतः ॥ ११५ ॥
कालान्तरे महापद्मश्चक्रवर्त्यपि चिन्तयन् । संसारासारतां दीक्षां, कक्षीकृत्य ययौ शिवम् ॥ ११६ ॥
त्रिंशदब्दसहस्रायुस्तुङ्गश्चापानि विंशतिम् । नवमोऽनवमश्चक्री, महापद्मोऽयमीरितः ॥ ११७ ॥

इति महापद्मः ।

महाहरिरभूद्राजा, काम्पील्यपुरभूपतिः । तस्य मेराऽभिधा भार्या, हरिषेणः सुतस्तयोः ॥ ११८ ॥
साधिताशेषषट्खण्डो, दशमश्चक्रवर्त्यसौ । कदाचिच्चिन्तयामास, चतुरश्चतुरोचितम् ॥ ११९ ॥
मया समृद्धिर्लब्धेयं, प्राग्भवाचरितैः शुभैः । ततोऽमुत्र हितं कुर्व, भविष्यद्भद्रसिद्धये ॥ १२० ॥
कक्षीकृत्य ततो दीक्षां, तपः कृत्वा च दुष्करम् । अवाप्य केवलज्ञानं, स लेभे शाश्वतं सुखम् ॥ १२१ ॥
दशवर्षसहस्रायुः, स्वर्णकान्तिर्महामतिः । कोदण्डान्युच्छ्रितः पञ्चदशासौ कीर्तितः श्रुते ॥ १२२ ॥

इति हरिषेणः ॥

अश्वसेनाभिधोऽथासीद्राजा राजगृहे पुरे । वप्रा तस्य प्रिया प्रेष्ठा, जयनामा तयोः सुतः ॥ १२३ ॥
एकादशश्चक्रवर्ती, सोऽन्यदा भावयन् हृदि । भवस्वरूपं संप्राप्तवैराग्यो जगृहे व्रतम् ॥ १२४ ॥
स द्वादशधनुस्तुङ्गः, प्राप्य केवलमुज्ज्वलम् । आयुर्वर्षसहस्राणि, त्रीण्यापूर्य ययौ शिवम् ॥ १२५ ॥

इति जयः ॥

ब्रह्माह्वयोऽभवद्राजा, काम्पील्यपुरभूपतिः । चुलनी दयिता तस्य, ब्रह्मदत्तस्तयोः सुतः ॥ १२६ ॥
अस्य च ब्रह्मराजस्य, चत्वारः सुहृदोऽभवन् । कणेरदत्तः कुरुराट्, काशीशः कटको नृपः ॥ १२७ ॥
दीर्घराजः कोशलेशः, पुष्पचूलोऽङ्गभूपतिः । पञ्चापि वर्षवारेण, तेऽवसन्नेकपत्तने ॥ १२८ ॥
द्वादशाब्दं वयः प्राप्ते, ब्रह्मदत्ते पिताऽस्य च । व्यपद्यत शिरःशूलात्, शेषैर्मित्रैस्ततः क्रमात् ॥ १२९ ॥
बालस्य मित्रपुत्रस्य, पालनायानुवत्सरम् । एकैकेन स्थेयमिति, प्रतिज्ञातं हितावहैः ॥ १३० ॥
अथ तत्र स्थितो दीर्घराजो रक्तामरीरमत् । चुलनीं राज्यसर्वस्वैः, सहोदूढामिव स्त्रियम् ॥ १३१ ॥
मन्त्री च ब्रह्मराजस्य, धनुर्नामा व्यचिन्तयत् । मार्जार इव दुग्धस्य, राज्यस्यास्यैष रक्षकः ॥ १३२ ॥
मित्रपत्नीं रमयता, यशो गमयता निजम् । धिगनेन ब्रह्ममैत्रीं, शातिता लज्जया सह ॥ १३३ ॥
मैवं स्त्रीराज्यलुब्धोऽयं, ब्रह्मदत्तं वधीदिति । धनुर्वरधनुं पुत्रं, तद्रक्षायै न्ययोजयत् ॥ १३४ ॥
ब्रह्मदत्तोऽपि विज्ञाय, दीर्घराजकुचेष्टितम् । दृष्टान्तैर्विविधैः स्पष्टं, स्वाभिप्रायमदीदृशत् ॥ १३५ ॥
संयोज्य वायसं पिक्या, तौ हत्वा चैवमब्रवीत् । एताविव मया घात्यौ, नीतिविप्लवकारिणौ ॥ १३६ ॥
अहं काकस्त्वं पिकीति, बालो न्यायमदर्शयत् । जारेण चुलनीत्युक्ता, प्राह बालादिबभेषि किं ?॥ १३७ ॥
एकदा भद्रहस्तिन्या, संयोज्य मृगहस्तिनम् । ऊचाने पूर्ववद्बाले, राज्ञी दीर्घा जगाविति ॥ १३८ ॥
नावयोर्जीवितं कान्ते, जीवत्यस्मिन् सुते तव । तदस्मै यदि वा प्रेम्णे, देयोऽवश्यं जलाञ्जलिः ॥ १३९ ॥
एतादृग्दुर्वधः पुत्रस्तादृक् प्रेमापि दुस्त्यजम् । इति दोलावलम्बिन्यां, चुलन्यामयमब्रवीत् ॥ १४० ॥
नाहं न च त्वं सत्यस्मिन्, मत्सत्त्वे बहवोऽङ्गजाः । व्यापाद्योऽयमवश्यं तन्मां जीवन्तं यदीच्छसि ॥ १४१ ॥

ततः प्राणसमः पुत्रः, प्राणेशस्तु ततोऽधिकः । ध्यात्वेत्यात्मजघातं सा, तद्दाक्षिण्यादमन्यत ॥ १४२ ॥

उक्तं च–"नितम्बिन्यः पतिं पुत्रं, पितरं भ्रातरं क्षणात् । आरोपयन्त्यकार्येऽपि, दुर्वृत्ताः प्राणसंशये" ॥ [योगशास्त्र प्रका. २. श्लो. ८६]

अथ मंत्री धनुर्दीर्घराजमूचे कृताञ्जलिः । यामि तीर्थमहं जीर्णः, पुत्रस्त्वां सेविता मम ॥ १४३ ॥
धीमाननर्थं मा कार्षीत्पतितोऽयमितो बहिः । इत्यूचे मंत्रिणं दीर्घो दंभकोमलया गिरा ॥ १४४ ॥
त्वयैव त्वत्प्रभो राज्यं, सनाथं साक्षिणो वयम् । तत्तपस्व तपोऽत्रैव, स्वैरं सुरसरित्तटे ॥ १४५ ॥
ततः स्वर्गापगातीरे, सत्रागारे स तस्थिवान् । पुरान्तःपुरवार्त्तां च, विदन् सर्वां सुतोदिताम् ॥ १४६ ॥
कन्यका पुष्पचूलस्य, ब्रह्मदत्तकृतेऽर्थिता । चुलनीदीर्घराजाभ्यां, जिघांसुभ्यां छलेन तम् ॥ १४७ ॥
सुतं हन्तुं जतुगृहं, चुलनीदीर्घकारितम् । ज्ञात्वा सुरङ्गां द्विक्रोशां, धनुश्छद्मनाकारयत् ॥ १४८ ॥
तत्सर्वं पुष्पचूलस्य, धनुना ज्ञापितं रहः । ततः सोऽपि सुतास्थाने, दासीमप्रेषयद्वराम् ॥ १४९ ॥
जातेऽथ सुतविवाहे, सुतं प्रैषीत्स्नुषान्वितम् । जातुके वासभवने, चुलनी कुलनीलिका ॥ १५० ॥
बालं सुप्तं सुतं सद्यः, परिणीतं स्नुषान्वितम् । अन्त्यदेहापि चुलनी, जिघांसामास धिक् स्मरम् ॥ १५१ ॥
जाग्रत्येव ब्रह्मदत्ते, मित्रचित्रकथारसैः । जज्वाल चुलनीक्षिप्तो, ज्वलनोऽस्मिन् गृहेऽभितः ॥ १५२ ॥
ततोऽधःस्थसुरङ्गां क्ष्मां, मन्त्रिपुत्रेण दर्शिताम् । लूतापुटवद्विद्य, निरगान्मित्रयुक् ततः ॥ १५३ ॥
धनुना धारितावश्वावारुहौतावुभावपि । निशि तस्यामयासिष्टां, पञ्चाशद्योजनीं द्रुतम् ॥ १५४ ॥
अतिश्रमाद्विपन्नौ तौ, तुरङ्गौ पञ्चहायनौ । ततः पद्भ्यां प्रस्थितौ तौ, छद्मं दीर्घचमूभयात् ॥ १५५ ॥
प्राच्यपुण्यानुभावेन, ब्रह्मदत्तः पदे पदे । पर्यणैषीद्बहुतरा, भूचरीः खेचरीः कनीः ॥ १५६ ॥
क्रमात्स भूरिसंपत्तिः, पितृमित्रैस्त्रिभिर्नृपैः । ससैन्यैः कृतसाहाय्यः, काम्पील्यपुरमभ्यगात् ॥ १५७ ॥
रुद्धेऽभितः पुरे तस्मिन्, दीर्घोऽपि निरगाद्बहिः । तयोः प्रववृते युद्धं, रामरावणयोरिव ॥ १५८ ॥
अयुध्यतामथ ब्रह्मदत्तदीर्घौ परस्परम् । शस्त्रच्छलेन रोषाग्निं, क्षिपन्तौ चिरसञ्चितम् ॥ १५९ ॥
खिन्नस्य ब्रह्मदत्तस्य, दुर्जये बलवत्यरौ । अलञ्चक्रे करं चक्ररत्नं पुण्यमिवाङ्गभृत् ॥ १६० ॥
दत्तायां दीर्घनिद्रायां, तेन दीर्घस्य दृप्यतः । चक्रिन् जयजयेत्यस्मिन्, पुष्पाणि ववृषुः सुराः ॥ १६१ ॥
साधयित्वाथ षट्खण्डां, पृथिवी प्रौढशासनः । निदानोपार्जितांश्चक्री, भोगान् भुङ्क्ते स्म गृद्धिभाक् ॥ १६२ ॥
मां प्राप्तराज्यमाकर्ण्य, तूर्णं मित्रापतेरिति । दुर्दशासु सहायं यं, चक्री स्माह द्विजं पुरा ॥ १६३ ॥
स चक्रिणमुपेयाय, दीयमाने च वाञ्छिते । ऐच्छत् पत्नीधिया भोज्यं, प्रतिगेहं सदक्षिणम् ॥ १६४ ॥
आरभ्य स्वगृहाच्चक्री, ददौ तस्मै तदीहितम् । अन्यदा प्राक्संस्तुतोऽन्यस्तं विप्रः कोऽप्युपागमत् ॥ १६५ ॥
सोऽयाचिष्ट मुदा चक्रिभोज्यं कल्याणनामकम् । नेदं ते जीर्यतीत्युक्ते कृपणोऽसीत्यवक् स तम् ॥ १६६ ॥

सकुटुंबं द्विजं चक्री, स्वं भोजनमभोजयत् । ततः सर्वं स्मरोन्मत्तं तत्कुटुम्बमभून्निशि ॥ १६७ ॥
मातृपुत्रसुतावप्तृस्नुषाश्वशुरभेदमुक् । तत्कुटुम्बं निशां सर्वामप्रवर्त्तत मैथुने ॥ १६८ ॥
ततस्त्रपातुरस्त्यक्त्वा, कुटुंबं निर्ययौ बहिः । विप्रोऽजानन् निजं दोषं, चक्रिणि द्वेषमुद्वहन् ॥ १६९ ॥
कश्चित्काणीकृताश्वत्थपत्रं कर्करिकाकणैः । ऐक्षत क्वाप्यजापालं, सूक्ष्मवेधकृतश्रमम् ॥ १७० ॥
चक्रिणं शिक्षयाम्यद्य, मत्कुटुंबविडम्बिनम् । ध्यात्वेति तं वशीचक्रे, स द्रव्यैर्दक्षिणागतैः ॥ १७१ ॥
धृतच्छत्रो गजारूढो, योऽयमेति चमूवृतः । विनाशयेर्दृशौ तस्य, द्रुतं कर्कशकर्करैः ॥ १७२ ॥
स कुड्यान्तरितश्चक्रवर्त्तिपापैरिवेरितः । लघुहस्तस्तथाकार्षीत्, पार्श्वस्थेषु सुरेष्वपि ॥ १७३ ॥
जुष्टः सुरसहस्राभ्यामंसस्थाभ्यां नृनिर्जरः । पामरेणान्धलीचक्रे, क्षीणे पुण्ये वृथा बलम् ॥ १७४ ॥

तथोक्तं–"प्रतिकूलतामुपगते हि विधौ, विफलत्वमेति बहुसाधनता । अवलम्बनाय दिनभर्त्तुरभून्न पतिष्यतः करसहस्रमपि ॥

ततश्च–धृतो नश्यन्नजापालश्चक्रियोधैरुदायुधैः । अदर्शयत्ताड्यमानो, विप्रं तत्र प्रयोजकम् ॥ १७५ ॥
कुद्धेन चक्रिणाऽघाति, स विप्रः सान्वयस्तथा । पुरोहितादयोऽन्येऽपि, मूलादुन्मूलिता द्विजाः ॥ १७६ ॥
तथाप्यशान्तकोपेन, मंत्रीत्यूचेऽथ चक्रिणा । ढौकय स्थालमेकैकं, नित्यं विप्राक्षिभिर्भृतम् ॥ १७७ ॥
श्लेष्मातकफलैः पूर्णं, सोऽपि पात्रमढौकयत् । स्पृशन् विप्राक्षिबुद्ध्या तन्मुमुदेन्तर्दुराशयः ॥ १७८ ॥
अनुभूयान्धतामेवं, क्रूरः षोडशवत्सरीम् । विपद्य रौद्रध्यानेन, सप्तमं नरकं ययौ ॥ १७९ ॥
सप्तवर्षशतायुष्कः, सप्त चापानि चोच्छ्रितः । चक्रभृत्सप्तमः षष्ठात् सप्तमीमगमद्भुवम् ॥ १८० ॥

इति ब्रह्मादत्तः ॥

गोत्रतः काश्यपाः सर्वे, वर्णतः स्वर्णकान्तयः । अमी भुवनविख्याताश्चक्रिणो द्वादशोदिताः ॥ १८१ ॥
षट्खराज्यो द्वादशानां, चक्रिणां द्वादशाभवन् । स्त्रीरत्नाख्याश्चतुर्थाङ्गे, सुभद्राद्या इमाश्च ताः ॥ १८२ ॥

"पढमा होइ सुभद्दा भद्द सुणंदा जया य विजया य । कण्हसिरि सूरसिरि पउमसिरि वसुंधरा देवी लच्छिमती कुरुमती इत्थिरयणाण णामाइं ।"

तृतीयश्च चतुर्थश्च, गतौ स्वर्गं तृतीयकम् । अष्टमश्च द्वादशश्च, सप्तमीं जग्मतुर्भुवम् ॥ १८३ ॥
शेषाश्च चक्रिणो येऽष्टौ, गतास्ते परमं पदम् । प्राव्राजीद्धरतस्तत्र, नृपायुतपरिच्छदः ॥ १८४ ॥
भूपतीनां सहस्रेण, विरक्तेनान्विताः परे । प्राव्रजंश्चक्रिणः सर्वे, विनाऽत्र द्वादशाष्टमौ ॥ १८५ ॥
ऋषभाजितयोर्वारे, भरतः सगरः क्रमात् । जातौ तृतीयतुर्यौ च, धर्मशान्त्योरिहान्तरे ॥ १८६ ॥
त्रयश्च चक्रिणोऽर्हन्तः शान्त्याद्याः स्वयमेव हि । अरमल्ल्योरन्तराले, सुभूमश्चक्रवर्त्त्यभूत् ॥ १८७ ॥
नवमोऽभून्महापद्मो, मुनिसुव्रतवारके । दशमो नमिवारेऽभून्नमिनेम्यन्तरे जयः ॥ १८८ ॥

अभवद्ब्रह्मदत्तश्चान्तरे श्रीनेमिपार्श्वयोः । स्वरूपं चक्रिणामेवमुक्तं वक्ष्येऽथ शार्ङ्गिणाम् ॥ १८९ ॥
त्रिपृष्ठश्च द्विपृष्ठश्च, स्वयंभूः पुरुषोत्तमः । तथा पुरुषसिंहश्च, पुरुषः पुण्डरीकतः ॥ १९० ॥
दत्तो नारायणः कृष्णो, वासुदेवा अमी नव । अचलो विजयो भद्रः, सुप्रभश्च सुदर्शनः ॥ १९१ ॥
आनन्दो नन्दनः पद्मो, राम श्चेति यथाक्रमम् । अमी विष्णुविमात्रेया, बलदेवा स्मृता नव ॥ १९२ ॥
अश्वग्रीवस्तारकश्च, मेरको मधुकैटभः । निशुम्भ बलि प्रह्लाद रावणा मगधेश्वरः ॥ १९३ ॥
नवानां वासुदेवानां, नवामी प्रतिविष्णवः । वासुदेवकरात्तस्वचक्रेण प्राप्तमृत्यवः ॥ १९४ ॥
अथ पूर्वभवाद्येषां, वच्मि किञ्चित् श्रुतोदधेः । जीवो वीरार्हतो राजगृहे यः षोडशे भवे ॥ १९५ ॥
कोट्यब्दायुर्विश्वभूतिर्युवराजात्मजोऽभवत् । वनेऽतिनन्दने सोऽगाद्वसन्ते रन्तुमन्यदा ॥ १९६ ॥
विशाखनन्दिना नुन्नो, वने तत्र रिरंसुना । विश्वनन्दी नरेन्द्रस्तत्पितृव्यः स्वीयसूनुना ॥ १९७ ॥
सामन्तविजयव्याजाद्विश्वभूतिं ततो वनात् । निःसारयामास शूरः, सोऽप्यगात्तत्पुरं ततः ॥ १९८ ॥
विधेयं तं च वीक्ष्याशु, तस्मिन् व्रजति तद्वनम् । विशाखनन्दी प्रविष्टस्तत्रोचे सप्रियो भटैः ॥ १९९ ॥
दम्भोऽयं मत्पितृव्येण, मां निस्सारयितुं वनात् । सुतं च तत्रासयितुं, कृत इत्युच्चुकोप सः ॥ २०० ॥
समीपस्थं कपित्थुद्रुं, ततो मुष्ट्या प्रहत्य सः । तत्फलौघं प्रपात्योर्व्यां, योधांस्तानभ्यधात्क्रुधा ॥ २०१ ॥
मौलीन् वः पातयाम्येवं, भक्तिः स्याद्राज्ञि चेन्न मे । यूयं जीवत रे स्वामिसंयुता मदुपेक्षिताः ॥ २०२ ॥
इत्युक्त्वाऽनर्थमूलत्वं, भोगानां परिभावयन् । संभूतमुनिपादान्ते, संयमं प्रत्यपादि सः ॥ २०३ ॥
स दुष्करं तपः कुर्वन्नेकदा मथुरापुरे । मासक्षपणपर्यन्ते, गतो गोचरचर्यया ॥ २०४ ॥
तत्राहत्यैकया धेन्वा, कृशीयान् पातितो भुवि । तत्रोद्वाहार्थमेतेन, दृष्टो विशाखनन्दिना ॥ २०५ ॥
हसितश्च क्व ते बन्धो, कपित्थच्यावनं बलम् । ततः क्रुद्धः स तां धेनुं, शृङ्गे धृत्वाम्बरेऽक्षिपत् ॥ २०६ ॥
निदानं कृतवांश्चैवं, तीव्रेण तपसाऽमुना । भूयिष्ठवीर्यो भूयासमजय्यस्त्रिदशैरपि ॥ २०७ ॥
निदानं तदनालोच्य, ततो मृत्वा समाधिना । अभूत्स्वर्गे महाशुक्रे, उत्कृष्टस्थितिकः सुरः ॥ २०८ ॥
इतश्च पोतनपुरे, प्रजापतिरभून्नृपः । मृगावतीं स्वपुत्रीं स, वीक्ष्य कामवशोऽभवत् ॥ २०९ ॥
देशे पुरेऽन्तःपुरे च, रत्नस्य जनिमीयुषः । नृप एव प्रभुरिति, लोकसंमतिपूर्वकम् ॥ २१० ॥
तां पत्नीकृत्य बुभुजे, तादृक्कर्मानुभावतः । विश्वभूतिसुरश्च्युत्वा, तस्याः कुक्षावावातरत् ॥ २११ ॥
त्रिपृष्ठवासुदेवोऽसावशीतिधनुरुच्छ्रितः । तथा चतुरशीत्यब्दलक्षायुरचलानुजः ॥ २१२ ॥

इति त्रिपृष्ठः ॥

युद्धे सुरूपवेश्यार्थं, निर्जितो विन्ध्यशक्तिना । सुभद्रगुरुपादान्ते, दीक्षां पर्वतकोऽग्रहीत् ॥ २१३ ॥
भूयासं तपसाऽनेन, विंध्यशक्तिविनाशकः । निदानमिति सोऽकार्षीत्पुरे कनकवस्तुनि ॥ २१४ ॥

ततो मृत्वा प्राणतेऽभूद्देवश्च्युत्वा ततः पुनः । अभूत्पूरि द्वारवत्यां, ब्रह्मभूपोमयोः सुतः ॥ २१५ ॥
स च सप्रतिचापोच्चो, द्विपृष्ठ इति नामतः । द्वासप्तत्यब्दलक्षायुर्विजयाख्यबलानुजः ॥ २१६ ॥

इति द्विपृष्ठः ॥

धनदत्तनृपो द्यूते, बलिभूपेन निर्जितः । सुदर्शनगुरोः पार्श्वे, प्रव्रज्यां प्रतिपन्नवान् ॥ २१७ ॥
स च तीव्रं तपः कुर्वन्, श्रावस्त्यां विहरन् गतः । संस्मृतप्राक्तनद्वेषी, तत्र क्रोधवशंवदः ॥ २१८ ॥
बलिभूपवधाय स्यामिति कृत्वा निदानकम् । उत्पन्नो लान्तके कल्पे, ततश्च्युत्वा स्थितिक्षये ॥ २१९ ॥
रुद्रो राजा द्वारवत्यां, पृथिवी स्त्री तयोः सुतः । स्वयंभूर्वासुदेवोऽभूत्तृतीयो भूरिविक्रमः ॥ २२० ॥
स षष्टिवर्षलक्षायुः, षष्टिचापसमुच्छ्रितः । अनुजो भद्रसंज्ञस्य, बलदेवस्य कीर्त्तितः ॥ २२१ ॥

इति स्वयंभूः ॥

समुद्रदत्तः प्राव्राजीत्, हृतायां निजयोषिति । श्रेयांसगुरुपादान्ते, प्रव्रज्योग्रं तपोऽतनोत् ॥ २२२ ॥
चक्रे वधाय स्त्रीहर्त्तुः, श्रावस्त्यां स निदानकम् । मृत्वोत्पन्नः सहस्रारे, ततश्च्युत्वाऽऽयुषः क्षये ॥ २२३ ॥
द्वारवत्यां नृपः सोमः, सीता राज्ञी तयोः सुतः । पुरुषोत्तमनामाऽभूद्वासुदेवस्तुरीयकः ॥ २२४ ॥
स त्रिंशद्धर्षलक्षायुः, पञ्चाशद्धनुरुच्छ्रितः । अनुजः सुप्रभाख्यस्य, बलदेवस्य कीर्त्तितः ॥ २२५ ॥

इति पुरुषोत्तमः ।

सेवालनामा भूपालो, रणे वैरिपराजितः । कृष्णाख्यस्य गुरोः पार्श्वे, वैराग्यादग्रहीद्व्रतम् ॥ २२६ ॥
निदानं सोऽरिघाताय, पुरे राजगृहेऽकरोत् । माहेन्द्रे च समुत्पन्नः, स्वर्गे च्युत्वा ततः पुनः ॥ २२७ ॥
शिवो राजाऽम्मका राज्ञी, नगरेऽश्वपुराह्वये । ख्यातः पुरुषसिंहोऽभूत्सनयस्तनयस्तयोः ॥ २२८ ॥
अयं च पञ्चचत्वारिंशत्कोदण्डसमुच्छ्रितः । तथा दशाब्दलक्षायुः, ख्यातः सुदर्शनानुजः ॥ २२९ ॥

इति पुरुषसिंहः ।

प्रियमित्रोऽपि भार्यायां, हृतायामाददे व्रतम् । श्रीगङ्गगुरुपादान्ते, काकन्द्यां च गतोऽन्यदा ॥ २३० ॥
निदानमकरोत्तत्र, प्रियाहर्तुर्वधाय सः । मृत्वोत्पन्नो ब्रह्मलोके, ततः पूर्णस्थितिश्च्युतः ॥ २३१ ॥
लक्ष्मीवत्याः कुक्षिरत्नं, महाशिवनृपात्मजः । पुरुषपुण्डरीकाख्योऽभवच्चक्रपुरे हरिः ॥ २३२ ॥
पञ्चषष्टिसहस्राब्दजीव्यानन्दबलानुजः । एकोनत्रिंशतं तुङ्गश्चापान्ययमुदीरितः ॥ २३३ ॥

इति पुरुषपुण्डरीकः ।

राजाङ्गजोऽभूल्ललितमित्रः स क्ष्मापपर्षदि । राज्यायोग्योऽयमित्यूचे, मन्त्रिणा भूपतेः पुरः ॥ २३४ ॥
राज्ञोऽपमाने जातेऽथ, भूपभूराददे व्रतम् । सागरस्य गुरोः पार्श्वे, मिथिलायां गतोऽन्यदा ॥ २३५ ॥
वधाय मन्त्रिणस्तस्य, निदानं चकृवानथ । सौधर्मे त्रिदशः सोऽभूत्संपूर्णस्थितिकस्ततः ॥ २३६ ॥

वाराणस्यामग्निसिंहनृपशेषवतीसुतः । वासुदेवोऽभवन्नाम्ना, दत्तो मत्तपराक्रमः ॥ २३७ ॥
षट्पञ्चाशत्सहस्राब्दजीवितः सप्तमः स च । षड्विंशतिधनुस्तुङ्गे, नन्दनस्यानुजः स्मृतः ॥ २३८ ॥

इति दत्तः ।

भरतेऽत्र क्षेमपुरे, नयदत्तवणिक्सुतौ । धनदत्तवसुदत्तौ, सुनन्दाकुक्षिसंभवौ ॥ २३९ ॥
तत्र सागरदत्तोऽभूत्पुत्रो गुणधरोऽस्य च । पुत्री गुणवती पित्रा, धनदत्ताय सा ददे ॥ २४० ॥
मात्रा च रत्नप्रभया, श्रीकान्ताख्याय सा ददे: । वसुदत्तेन तज्ज्ञातं, याज्ञवल्क्यसुहृन्मुखात् ॥ २४१ ॥
वसुदत्तस्ततो भ्रातृस्नेहाद्गत्वाऽवधीन्निशि । श्रीकान्तं सोऽपि खड्गेन, वसुदत्तमुभौ ततः ॥ २४२ ॥
विन्ध्याटव्यां मृगौ जातावनूढा गुणवत्यपि । अभून्मृगी कृते तस्यास्तत्र युद्ध्वा मृतावुभौ ॥ २४३ ॥
मिथो वैरपरावेवं, भूयसश्चक्रतुर्भवान् । धनदत्तोऽप्यभूद्भ्रातृवियोगेनोन्मना भृशम् ॥ २४४ ॥
भ्रमन्निशि मुनीन् दृष्ट्वा, क्षुधितोऽयाचताशनम् । श्राद्धीकृतस्तैः प्रज्ञाप्य, धर्मं सौधर्ममासदत् ॥ २४५ ॥
महापुरे ततश्च्युत्वा, धारणीमेरुदेहभूः । अभूत्पद्मरुचिर्नाम, श्रेष्ठी श्रावकपुङ्गवः ॥ २४६ ॥
स चैकस्यासन्नमृत्योः, परमेष्ठिनमस्क्रियाम् । वृषभस्य ददौ सोऽभूच्छत्रच्छायनृपाङ्गजः ॥ २४७ ॥
दत्तायाज्ञ्याः कुक्षिजातो, नाम्ना च वृषभध्वजः । स तत्रैव पुरे भ्राम्यन्, वृषमृत्युभुवं ययौ ॥ २४८ ॥
प्राप्तश्च जातिस्मरणं, तत्र चैत्यमचीकरत् । भित्तावालेखयामास, तत्रासन्नमृतिं वृषम् ॥ २४९ ॥
परमेष्ठिनमस्कारदायिनं पुरुषं च तम् । अलीलिखत्समीपस्थसपर्याणतुरङ्गमम् ॥ २५० ॥
श्रेष्ठी पद्मरुचिस्तच्चापश्यत्तच्चैत्यमागतः । वृषभाय नमस्कारदानं स्वं वीक्ष्य विस्मितः ॥ २५१ ॥
नियुक्तैः पुरुषैस्तत्र, पृष्टश्चोचे यथास्थितम् । मया तुरगमारुह्य, गच्छता गोकुले पुरा ॥ २५२ ॥
वृषभस्य नमस्कारो, ददे तदिह चित्रितम् । केनापि दृश्यते भित्तौ, विस्मितोऽहं तदीक्षणात् ॥ २५३ ॥
ततो नियुक्तपुरुषैर्विज्ञप्तौ वृषभध्वजः । पूर्वोपकारिणं पद्मरुचिमेत्य नमोऽकरोत् ॥ २५४ ॥
राज्यं मम गृहाणेदं, त्वं मे देवो गुरुः प्रभुः । इत्युक्त्वा तेन सौहार्दमद्वैतमतनोदयम् ॥ २५५ ॥
तौ श्राद्धधर्ममाराध्योत्पन्नौ स्वर्गे द्वितीयके । ततः पद्मरुचिश्च्युत्वा, मेरोरपरतोऽभवत् ॥ २५६ ॥
नन्दावर्त्तपुरे वैताढ्यगिरौ नन्दीश्वराङ्गजः । नाम्ना च नयनानन्दः, कनकाभतनूद्भवः ॥ २५७ ॥
स राजादाय चारित्रं, तुर्ये स्वर्गेऽभवत्सुरः । ततश्च्युत्वा क्षेमापुर्यां, प्राग्विदेहेष्ववातरत् ॥ २५८ ॥
विपुलवाहनभूपपद्मावत्योः सुतो नृपः । श्रीचन्द्रनामा प्रव्रज्य, ब्रह्मलोकेन्द्रतां ययौ ॥ २५९ ॥
ततश्च्युत्वा पद्मनामा, बलदेवोऽष्टमोऽभवत् । रामोऽपराजिताकुक्षिजातो दशरथात्मजः ॥ २६० ॥
वृषभध्वजजीवस्तु, सुग्रीवोऽभूत्कपीश्वरः । पूर्वं कृतोपकारत्वादत्यन्तं पद्मवत्सलः ॥ २६१ ॥
श्रीकान्तोऽपि भवान् भ्रान्त्वा, मृणालकन्दपत्तने । शम्भुर्हेमवतीजातो, नृपोऽभूद्वज्रकम्बुभूः ॥ २६२ ॥

वसुदत्तस्य जीवो यः, श्रीकान्तमवधीत्पुरा । विजयस्य स पुत्रोऽभूच्छंभुराजपुरोधसः ॥ २६३ ॥
रत्नचूडाकुक्षिजन्मा, श्रीभूतिर्नामतः स च । क्रमेण प्राप्ततारुण्यः, पितृभ्यां परिणायितः ॥ २६४ ॥
गुणवत्यथ साऽनर्थमूलं भ्रान्त्वा भवान् बहून् । पुरोधस्तनयस्यास्य, श्रीभूतेरभवत्सुता ॥ २६५ ॥
सरस्वतीकुक्षिजाता, नाम्ना वेगवतीति सा । क्रमेण ववृधे पद्मलतिकेव सरोवरे ॥ २६६ ॥
उत्तारुण्याऽन्यदा सा च, कायोत्सर्गस्थितं मुनिम् । सुदर्शनं जनैः पूज्यमानं वीक्ष्येदमभ्यधात् ॥ २६७ ॥
अयं मुनिर्मया दृष्टः, क्रीडन्नङ्गनया समम् । हास्यात्ततोदितोऽप्येष, कलङ्क प्रथितो जने ॥ २६८ ॥
जग्राहाभिग्रहं सोऽपि, शासनन्यत्क्रियाभिया । उत्तीर्णोऽस्मिन् कलङ्केऽहं, पारयिष्यामि नान्यथा ॥ २६९ ॥
वेगवत्यथ सोत्सूनमुखा दैवतरोषतः । ज्ञातसाधुव्यतिकरैर्जनकाद्यैश्च भर्त्सिता ॥ २७० ॥
अध्यक्षं सर्वलोकानामित्यूचे रचिताञ्जलिः । निर्दोषोऽप्येष निर्ग्रन्थो, धिग्मया मन्दभाग्यया ॥ २७१ ॥
अलीकदोषारोपेण दूषितः कृतहास्यया । तत् श्रुत्वा मुदिताः सर्वे, जनास्तं मुनिमस्तुवन् ॥ २७२ ॥
दिव्यानुभावादुल्लाघा, साऽभवद्वेगवत्यपि । निशम्य जैनधर्मं च, श्राविकाऽभूत्तदादितः ॥ २७३ ॥
अथ वेगवतीरूपमोहितः शम्भुभूपतिः । ययाचे तत्पिता मिथ्यादृशे तस्मै ददौ न तु ॥ २७४ ॥
ततश्च शम्भुः श्रीभूतिं, हत्वा तां बुभुजे बलात् । भवान्तरेऽहं भूयासं, त्वद्वधायेति साऽशपत् ॥ २७५ ॥
मुक्ता सा शम्भुना दीक्षां, जग्राह चरणान्तिके । आर्याया हरिकान्ताया, ब्रह्मालोकमियाय च ॥ २७६ ॥
मिथिलायां ततश्च्युत्वा, सीता नाम महासती । जाता वेगवतीजीवो सा भामण्डलयुग्मजा ॥ २७७ ॥
रावणस्य विनाशाय, शम्भुजीवस्य साऽभवत् । मुनेर्मृषाकलङ्कस्य, दानात्तं प्राप सा स्वयम् ॥ २७८ ॥
शम्भुजीवोऽपि संसारे, भ्रामं भ्रामं द्विजोऽभवत् । पार्श्वे विजयसेनर्षेः, प्रभासाख्योऽग्रहीद्व्रतम् ॥ २७९ ॥
कनकप्रभनामानमन्यदा खेचरेश्वरम् । यान्तं सम्मेतयात्रायै, सोऽपश्यत्परमर्द्धिकम् ॥ २८० ॥
ईदृक्समृद्धिर्भूयासमनेन तपसेति सः । कृत्वा निदानमुत्पन्नः, स्वर्गलोके तृतीयके ॥ २८१ ॥
ततश्च्युत्वा हरिस्वप्नसूचितः समभूत्सुतः । कैकसीकुक्षिजो रत्नश्रवसो राक्षसेशितुः ॥ २८२ ॥
भीमेन राक्षसेन्द्रेण, मेघवाहनभूभुजे । पूर्वं प्रदत्तो यो हारो, नवमाणिक्यनिर्मितः ॥ २८३ ॥
नागानां च सहस्रेण, रक्षितो निधिराजवत् । अनीशैर्वोढुमखिलैः, पूर्वजैः पूजितः क्रमात् ॥ २८४ ॥
तं च हारं स बालोऽपि, न्यधात्कण्ठे कराहृतम् । मुखैस्तद्रत्नसंक्रान्तैः, सोऽभूद्दशमुखाह्वयः ॥ २८५ ॥
त्रैलोक्यकण्टकं चैनं, वाली निर्जित्य संगरे । वैराग्येण प्रवव्राजाकार्षीच्च विविधं तपः ॥ २८६ ॥
तं पुष्पकविमानाधिरूढो दशमुखो व्रजन् । अष्टापदाचलेऽपश्यत्प्रतिमास्थं स्खलद्गतिः ॥ २८७ ॥
दृष्ट्वा च वालिनं क्रुद्धोऽवादीदेवं दशाननः । निर्जित्य मां भयादेव, दम्भेन व्रतमग्रहीः ॥ २८८ ॥

मां बाहुमूले निक्षिप्य, यथाऽभ्राम्यस्त्वमम्बुधीन् । तथा त्वां साद्रिमुत्क्षिप्य, लवणाब्धौ क्षिपाम्यहम् ॥ २८९ ॥
इत्युदीर्य विदार्य क्ष्मामष्टापदगिरेस्तले । प्रविश्य युगपद्विद्यासहस्रं मनसि स्मरन् ॥ २९० ॥
धराधरं तमुद्दध्रे, चलयन्नचलातलम् । झलज्झालायिताम्भोधि, पतद्गिरिशिरः शतम् ॥ २९१ ॥
अद्याप्ययं मयि क्रोधादनर्थं कुरुते हहा । मा भूद्भरतचैत्यानां, भ्रंशोऽन्तरिति चिन्तयन् ॥ २९२ ॥
अवधिज्ञानवान्नानालब्धिर्वाली महामुनिः । गतस्पृहः शरीरेऽपि, चैत्यत्राणाय केवलम् ॥ २९३ ॥
अपीडयत्पदाङ्गुष्ठाग्रेणाष्टापदभूमिकाम् । तेनाक्रान्तश्च भारार्त्तकन्धरो दशकन्धरः ॥ २९४ ॥
भयार्त्तः संकुचिद्गात्रो, रावयन् सकलां महीम् । आरावीद्भृशमाक्रन्दैस्ततोऽभूद्रावणाह्वयः ॥ २९५ ॥
अभूतां सोदरावस्य, भानुकर्णबिभीषणौ । स्वसा चन्द्रणखा पट्टराज्ञी मन्दोदरीति च ॥ २९६ ॥
भानुकर्णस्य कुम्भकर्ण इति, चन्द्रणखायाः सूर्पणखेति च नामान्तरं ।
धनदत्तवसुदत्तसुहृद्यो ब्राह्मणः पुरा । आसीन्नाम्ना याज्ञवल्क्यः, क्रमात्सोऽभूद्विभीषणः ॥ २९७ ॥
निहतः शम्भुना राज्ञा, श्रीभूतिर्यः पुरोहितः । शुभध्यानात्स चोत्पेदे, स्वर्गे च्युत्वा ततोऽभवत् ॥ २९८ ॥
सुप्रतिष्ठपुरे विद्याधरो नाम्ना पुनर्वसुः । द्वासप्ततिकलाशाली, चतुरः सुभगः सुधीः ॥ २९९ ॥
स चैकदा त्रिभुवनानन्दस्य चक्रवर्त्तिनः । सुतां कामवशो जहे, नामतोऽनङ्गसुदरीम् ॥ ३०० ॥
पुण्डरीकाख्यविजयाद्गच्छन्निजपुरीं प्रति । चक्रभृत्प्रहितैर्विद्याधरैः स रुरुधे युधे ॥ ३०१ ॥
विद्यास्त्रैर्विविधैर्नागताक्ष्यांभ्योदानिलादिभिः । एतस्य युद्ध्यमानस्य, वैराग्यात्स्वविमानतः ॥ ३०२ ॥
क्वचिद्वननिकुञ्जे सा, पपातानङ्गसुंदरी । विरराम ततो युद्धाद्विरक्तात्मा पुनर्वसुः ॥ ३०३ ॥
समुद्रगुरुपादान्ते, ततः स्वीकृत्य संयमम् । काश्यां गतोऽन्यदाऽकार्षीन्निदानमिति चेतसा ॥ ३०४ ॥
अभविष्यं भवेऽस्मिंश्चेच्चक्रिणोऽर्द्धबलोऽप्यहम् । तन्मत्तश्चक्रिसैन्यार्त्त्याऽयास्यन्नानङ्गसुंदरी ॥ ३०५ ॥
भवान्तरेऽपि भूयासं, तपसानेन तादृशः । तथा प्राणप्रिया भूयात्, सैषा मेऽनङ्गसुंदरी ॥ ३०६ ॥
पुनर्वसुस्ततो जातः, सुरः स्वर्गे तृतीयके । चारित्रोपार्जितं तत्र, बुभुजे शं यथास्थिति ॥ ३०७ ॥
अतितीव्रं तपोऽकार्षीद्वनस्थानङ्गसुंदरी । विहितानशना चान्ते, जग्रसेऽजगरेण सा ॥ ३०८ ॥
ततः समाधिना मृत्वा, देवलोके तृतीयके । सुरत्वेन समुत्पेदे, बुभुजे चाद्भुतं सुखम् ॥ ३०९ ॥
इतश्च—नैमित्तिकोक्त्या स्ववधं, ज्ञात्वा दशरथात्मजात् । प्रैषीद्दशरथं हन्तुं, दशग्रीवो बिभीषणम् ॥ ३१० ॥
नारदर्षिर्दशरथभूभुजे द्राक् सधर्मणे । अजिज्ञपद्दशग्रीवसंसद्याकर्ण्य तां कथाम् ॥ ३११ ॥
श्रुत्वा दशरथोऽप्येवमयोध्याया विनिर्ययौ । समर्प्य मन्त्रिणे राज्यं, वेषान्तरतिरोहितः ॥ ३१२ ॥
मूर्त्तिं दशरथस्याथ, कृत्वा लेप्यमयीं सुधीः । वेश्मन्यस्थापयन्मन्त्री, राज्ञः प्रख्यापयन् रुजम् ॥ ३१३ ॥
बिभीषणोऽपि तत्रैत्य, संरंभात्तमसि स्थिताम् । तन्मूर्तिं लेप्यजां हत्वा, कृतकृत्यो न्यवर्त्तत ॥ ३१४ ॥

अथो दशरथो भ्राम्यन्नयासीदुत्तरापथे । स्वयंवरोत्सवोद्रङ्गे, द्रङ्गे कौतुकमङ्गले ॥ ३१५ ॥
पतिंवरां पर्यणैषीद्राज्ञः शुभमतेः सुताम् । अद्भुतां तत्र कैकेयीं, द्रोणमेघसहोदरीम् ॥ ३१६ ॥
अस्मासु सत्सूद्धहति, कन्यां कार्पटिकः कथम् । इतीर्ष्यया प्रववृते, योध्धुं शेषनृपव्रजः ॥ ३१७ ॥
कैकेय्या सारथित्वेन, कृतसाहाय्यको नृपः । प्रतिपक्षान् पराजिग्ये, कैकेय्यै च वरं ददौ ॥ ३१८ ॥
कैकेयीं परिणीयाथ बलैर्नैकैर्महाबलः । जग्राह नगरं राजगृहं निर्जित्य तत्प्रभुम् ॥ ३१९ ॥
लङ्केश्वरभयात्तत्र, तस्थुषोऽस्य महीपतेः । चतुर्दिग्जैत्रदोर्वीर्याश्चत्वारोऽथाभवन् सुताः ॥ ३२० ॥
तत्रापराजिता देवी, हर्यक्षेभेन्दुभास्करैः । तनयं सूचितं स्वप्नैर्बलं पद्ममजीजनत् ॥ ३२१ ॥
स्वर्गात्सनत्कुमाराख्याच्च्युत्वा जीवः पुनर्वसोः । समुत्पेदे सुमित्रायाः, कुक्षावक्षामभाग्यभूः ॥ ३२२ ॥
सिंहेभसूर्यचन्द्राग्निश्रीवार्द्धिस्वप्नसूचितं । नारायणाभिधं विष्णुं, सुमित्रा सुषुवे सुतम् ॥ ३२३ ॥
सुतं चासूत कैकेयी, भरतं भरतोपमम् । प्रासूत सुप्रभा पुत्रं, शत्रुघ्नं शत्रुखण्डनम् ॥ ३२४ ॥
जीवोऽथानङ्गसुंदर्याश्च्युत्वा कल्पात्तृतीयकात् । पत्न्यां प्रियंङ्गुरानाम्न्यां, द्रोणमेघस्य भूपतेः ॥ ३२५ ॥
सुताऽभवद्विशल्याख्या मातुर्व्याधिं चिरंतनम् । या जहारागता गर्भे, जाता सा निरुपद्रवा ॥ ३२६ ॥
प्राक् तप्ततपसोऽमुष्याः, स्नानाम्भोभिर्जनेऽभवत् । व्रणसंरोहणं शल्यापहारो रोगसंक्षयः ॥ ३२७ ॥
राज्याभिषेकायाहूतं, रामं दशरथोऽप्यथ । विससर्ज वनायाऽऽर्त्तः, कैकेयीवरयाञ्चया ॥ ३२८ ॥
सह लक्ष्मणसीताभ्यां, पद्मस्य वनमीयुषः । जहार रावणः सीतां, छलात्सूर्पणखोदिताम् ॥ ३२९ ॥
ज्ञातसीताव्यतिकरौ, पद्मनारायणावथ । विद्याधराधिपैर्नैकैः, सुग्रीवादिभिराश्रितौ ॥ ३३० ॥
गत्वा नभोऽध्वना लङ्कां, मानिना दशमौलिना । योद्धुं प्रववृताते तौ, शत्रुप्राणापहारिणौ ॥ ३३१ ॥
अथात्यन्तं हितोऽवादीद्दशवक्त्रं बिभीषणः । मन्त्र्यादीभिर्हितैर्नीतिशास्त्रविज्ञैः समन्वितः ॥ ३३२ ॥
कार्षीरनीतिं मा भ्रातर्द्राक् प्रत्यर्पय जानकीम् । आतिथेयीयमेवास्तु, रामस्याभ्यागतस्य नः ॥ ३३३ ॥
यम एवास्य मच्छत्रोरातिथेयीं करिष्यति । एतद्गृह्यो वदन्नेवं, त्वमप्येनमनुव्रज ॥ ३३४ ॥
इतिनिर्भर्त्सितो बाढं, भ्रात्रा दुर्नयकारिणा । रामं बिभीषणो न्याय्यं, शिश्राय प्राग्जनुःसुहृत् ॥ ३३५ ॥
जायमानेऽथ संग्रामे, दशमौलिर्बिभीषणम् । हन्तुं युद्धयन्तमक्षैप्सीच्छक्तिं सद्योऽरिघातिनीम् ॥ ३३६ ॥
सौमित्रिमवदद्रामस्तदाऽयं हन्यते हहा । बिभीषणः संश्रितोऽस्मान्, धिग् नः संश्रितघातिनः ॥ ३३७ ॥
लक्ष्मणः पुरतो गत्वा, पृष्ठे कृत्वा बिभीषणम् । आचिक्षेप दशग्रीवं, क्रुद्धः सोऽप्येवमाह तम् ॥ ३३८ ॥
नोत्क्षिप्ता शक्तिरेषा त्वत्कृते किं म्रियसे मुधा ?। अन्यस्य मृत्युना यद्धा, मार्य एव त्वमप्यसि ॥ ३३९ ॥
तया च भिन्नहृदयः, सौमित्रिर्भूतलेऽपतत् । मूर्च्छितो मृतवत्पद्मसैन्ये शोको महानभूत् ॥ ३४० ॥
पद्मं बिभीषणोऽथोचे, किमधैर्यमिदं प्रभो । शक्त्याऽनया हतो रात्रिमेकां जीवति यत्पुमान् ॥ ३४१ ॥

प्रतीकाराय तेनास्याः, सर्वथा प्रयतामहे । पद्मादयोऽपि चक्रुस्तांस्तेऽभवन् किन्तु निष्फलाः ॥ ३४२ ॥
पद्मे निराशे खिन्नेऽथ, प्रतिचन्द्राभिधो निशि । एत्य विद्याधरोऽवादीत्सौमित्रेर्जीवनौषधम् ॥ ३४३ ॥
विशल्यास्नाननीरेणाभूवं शल्योज्झितः पुरा । तत्कार्यसिद्धिर्युष्माकं, तेनावश्यं भविष्यति ॥ ३४४ ॥
अस्ति मातुलपुत्री सा, भरतस्य महीपतेः । ततो युष्मदधीनैव, द्रोणमेघनृपात्मजा ॥ ३४५ ॥
ततो भामण्डलहनूमदाद्याः खेचरेश्वराः । लब्धोपाया विमानेन, द्राग्जग्मुर्निशि कोशलाम् ॥ ३४६ ॥
भरतं च पुरस्कृत्य, पुरे कौतुकमङ्गले । गत्वा द्रोणमयाचन्त, विशल्यां कन्यकां ततः ॥ ३४७ ॥
सह कन्यासहस्रेण, ददौ सौमित्रये तदा । विशल्यां द्रोणमेघो यद्रत्नं रत्नेन योज्यते ॥ ३४८ ॥
समादाय विशल्यां ते, निशाशेषेऽथ खेचराः । पद्मं पश्यन्तमध्वानं, दीनाननममूमुदन् ॥ ३४९ ॥
विशल्यापाणिसंस्पर्शाल्लक्ष्मणस्याङ्गतो द्रुतम् । निरगात्सा महाशक्तिमन्त्राद्नागीव वेश्मतः ॥ ३५० ॥
हनूमता सा निर्यान्ती, धृता हस्तेऽब्रवीदिति । अमोघविजयाख्याऽहं, महाशक्तिर्महामते ! ॥ ३५१ ॥
धरणेन्द्रेण दत्ताऽस्मै, रावणायोग्रभक्तये । प्रज्ञप्त्या भगिनी देवस्यापि लग्ना सुदुःसहा ॥ ३५२ ॥
विशल्यया भवे पूर्वं, कृतानां तपसां महत् । तेजः सोढुमनीशाऽस्मि, द्रुतं गच्छामि मुञ्च माम् ॥ ३५३ ॥
पटूभूतोऽथ सौमित्रिः, प्रातः पद्मानुशासनात् । सह कन्यासहस्रेणोद्वहति स्म विशल्यकाम् ॥ ३५४ ॥
पुनः प्रवृत्ते संग्रामे, सौमित्रिदशकण्ठयोः । मुमोच रावणश्चक्रं, लक्ष्मणस्य जिघांसया ॥ ३५५ ॥
तत्तु प्रदक्षिणां कृत्वा, सौमित्रेर्दक्षिणं करम् । अलञ्चक्रे वशीभूतं, चिरपालितपक्षिवत् ॥ ३५६ ॥
सचक्रं चूर्णयिष्यामीत्युन्माद्यन्तं दशाननम् । चक्रे तेनैव चक्रेण, विष्णुः पाटितवक्षसम् ॥ ३५७ ॥
ततश्च ज्येष्ठबहुलैकादश्यामपराह्णके । यामे तृतीये नरकं, चतुर्थं रावणो ययौ ॥ ३५८ ॥
लङ्कराज्येऽभिषिच्याथ, पद्मराजो बिभीषणम् । सीतामादाय सौमित्रसेवितः कोशलां ययौ ॥ ३५९ ॥
तत्र त्रिखण्डभूपालैरभिषिक्तः सुरैरपि । लक्ष्मणो वासुदेवत्वे, बलत्वे पद्मभूपतिः ॥ ३६० ॥
द्वादशाब्दसहस्रायुस्तुङ्गश्चापानि षोडश । अष्टमो वासुदेवोऽयमुक्तः पद्मानुजः श्रुते ॥ ३६१ ॥

इति लक्ष्मणः ॥

गङ्गदत्तो वणिग्मातुरपमानाद्विरागवान् । द्रुमसेनर्षिपादान्ते, प्रव्रज्यां प्रतिपन्नवान् ॥ ३६२ ॥
निदानं चकृवानेवं, सोऽन्यदा हस्तिनापुरे । भूयासं तपसाऽनेन, जनानां वल्लभो भृशम् ॥ ३६३ ॥
ततः स्वर्गे महाशुक्रे, स संजातः समाधिना । वृन्दारको महासौख्यो, महाकान्तिर्महास्थितिः ॥ ३६४ ॥
इतश्च मथुरापुर्यां, हरिवंशे नृपोऽभवत् । बृहद्बलाह्वयस्तस्य, तनयो यदुसंज्ञकः ॥ ३६५ ॥
तत्सुतो भूपतिः शूरस्तस्याभूतामुभौ सुतौ । नृपौ शौरिसुवीराख्यौ, जाग्रन्नीतिपराक्रमौ ॥ ३६६ ॥
शूरः शौरिं न्यस्य राज्ये, व्रते प्रववृत्ते स्वयम् । ततः शौरिः कनिष्ठाय, मथुराराज्यमार्पयत् ॥ ३६७ ॥

स्वयं कुशार्त्तदेशेषु, चक्रे शौरिपुरं नवम् । जज्ञिरेऽन्धकवृष्ण्याद्यास्तनयाः शौरिभूपतेः ॥ ३६८ ॥
भोजवृष्ण्यादयोऽभूवन्, सुवीरनृपतेः सुताः । न्यवीविशन्नवीनं च, स सौवीराख्यपत्तनम् ॥ ३६९ ॥
भोजवृष्णिमहीनेतुर्मथुरानगरीपतेः । उग्रेसेनोऽभवत्पुत्रो, योऽसौ राजीमतीपिता ॥ ३७० ॥
नृपस्यान्धकवृष्णेश्च, सुभद्राकुक्षिसंभवाः । दशाभूवंस्तनुभुवो, दशार्हा इति ये श्रुताः ॥ ३७१ ॥
समुद्रविजयोऽक्षोभ्यस्तिमितः सागरस्तथा । हिमवानचलाभिख्यो, धरणः पूरणोऽपि च ॥ ३७२ ॥
अभिचन्द्रो वसुदेव, स्तेषु प्राच्यनिदानतः । वसुदेवोऽतिसौभाग्यात्, स्त्रीणामासीदतिप्रियः ॥ ३७३ ॥
गङ्गदत्तस्य जीवोऽयमष्टमाद्देवलोकतः । स्थितिक्षये ततश्च्युत्वा, मथुरायां महापुरि ॥ ३७४ ॥
वसुदेवस्य भूपस्य, देवकीकुक्षिजोऽङ्गजः । कृष्णाख्यो वासुदेवोऽभून्नवमोऽनवमद्युतिः ॥ ३७५ ॥
रामाख्यो बलदेवोऽभूद्रोहिणीकुक्षिसंभवः । अस्य भ्राता विमात्रेयः, परमप्रीतिभाजनम् ॥ ३७६ ॥
अयं श्रीनेमिनाथस्य, पितृव्यतनयः स्मृतः । यतः समुद्रविजयवसुदेवौ सहोदरौ ॥ ३७७ ॥
अयं वर्षसहस्रायुर्दशचापोच्छ्रितोऽभवत् । बिभ्रत्क्षायिकसम्यक्त्वं, श्राद्धो नेमिजिनेशितुः ॥ ३७८ ॥

इति कृष्णः ॥

पञ्चाशीतिर्वत्सराणां, लक्षाण्याद्यस्य जीवितम् । द्वितीयस्यायुरब्दानां, लक्षाणि पञ्चसप्ततिः ॥ ३७९ ॥
पञ्चषष्टिस्तृतीयस्य, वर्षलक्षाणि जीवितम् । तुर्यस्य पञ्चपञ्चाशद्वर्षलक्षास्तदीरितम् ॥ ३८० ॥
लक्षाण्येवं सप्तदश, पञ्चमस्यायुरद्भुतम् । षष्ठस्याब्दसहस्राणि, पञ्चाशीतिर्भवेदिदम् ॥ ३८१ ॥
पञ्चषष्टिः सहस्राणि, वर्षाणां सप्तमस्य तत् । वत्सराणां पञ्चदशसहस्राण्यष्टमस्य च ॥ ३८२ ॥
शतानि द्वादशाब्दानां, नवमस्यायुरीरितम् । नवानां बलदेवानां, क्रमः प्रोक्तोऽयमायुषाम् ॥ ३८३ ॥
बलदेवास्त्रयश्च्युत्वाऽनुत्तराख्यविमानतः। जातास्त्रयो महाशुक्राद्ब्रह्मलोकात् त्रयः क्रमात् ॥ ३८४ ॥
विश्वनन्दिः सुबुद्धिश्च, तथा सागरदत्तकः । अशोको ललित श्चैव, वराह धनसेनकौ ॥ ३८५ ॥
तथाऽपराजितो राजललित श्चेति तीर्थपाः । नामानि बलदेवानां, स्वर्गात्प्राच्यभवे जगुः ॥ ३८६ ॥
बलदेवा ययुर्मुक्तिपदमष्टौ यथाक्रमम् । दशाब्धिजीवितोन्त्यश्च, ब्रह्मलोके सुरोऽभवत् ॥ ३८७ ॥
उत्सर्पिण्यां भविष्यन्त्यां, ततश्च्युत्वाऽत्र भारते । भाविनः कृष्णजीवस्याऽर्हतस्तीर्थे स सेत्स्यति ॥ ३८८ ॥
सप्तम्यां प्रथमो विष्णुः, षष्ट्यां पञ्च गताः क्रमात् । पञ्चम्यां च चतुर्थ्यां च, तृतीयायां क्षितौ परे ॥ ३८९ ॥
विष्णवो बलदेवाश्च, सर्वे गौतमगोत्रजाः । पद्मनारायणौ तु द्वौ, ज्ञेयौ काश्यपगोत्रजौ ॥ ३९० ॥
पञ्चाभूवंस्त्रिपृष्ठाद्या, वारेषु हरयः क्रमात् । श्रेयांसस्वामिमुख्यानां, पञ्चानामर्हतामिह ॥ ३९१ ॥
अन्तराले च षष्ठोऽभूदरनाथसुभूमयोः । सप्तमोऽप्यन्तरालेऽभूत्सुभूममल्लिनाथयोः ॥ ३९२ ॥
मुनिसुव्रतनम्योश्चान्तराले रामलक्ष्मणौ । श्रीनेमिजिनवारे च, कृष्णोऽभून्नवमो हरिः ॥ ३९३ ॥

तथोक्तं–दो तित्थेस सचक्कि, अट्ठ य जिणा, तो पञ्च केसीजुआ, दो चक्काहिव, तिन्नि चक्कियजिणा, तो केसि चक्की हरि । तित्थेसो इगु तो सचक्कि य जिणो केसी सचक्की जिणो चक्की केसव संजुओ जिणवरो चक्की य तो दो जिणा ॥

चक्रिवासुदेवयोश्च क्रममेवमाहुः—"चक्किदुगं हरिपणगं पणगं चक्कीण केसवो चक्की । केसव चक्की केसव दुचक्कि केसी य चक्की य" ॥ [आवश्यकनिर्युक्ति श्लो. ४२१]

त्रयोऽर्हन्तश्चक्रिणो यद्यच्चान्त्योऽर्हत्पदद्वयम् । दधौ द्वाभ्यां शरीराभ्यां, तीर्थकृद्वासुदेवयोः ॥ ३९४ ॥
तदस्यामवसर्पिण्यां, षष्टिर्देहाः प्रकीर्त्तिताः । त्रिषष्टेः शलाकापुंसामेकोनषष्टिरङ्गिनः ॥ ३९५ ॥
भीमावलिर्जितशत्रुः रुद्रो विश्वानलोऽपि च । सुप्रतिष्ठः पञ्चमः स्याद्भवेत् षष्ठोऽचलाह्वयः ॥ ३९६ ॥
पुण्डरीको जितधरो जितनाम स्तथाऽपरः । पेढालः सत्यकिश्चेति रुद्रा एकादशोदिताः ॥ ३९७ ॥
गतौ रुद्रावादितो द्वौ, सप्तमीं नरकावनीम् । ततः क्रमात्पञ्च षष्ठीमष्टमः पञ्चमीं भुवम् ॥ ३९८ ॥
तुर्यां च नवमदशमौ, तृतीयां नरकक्षितिम् । एकादशो जगामेति, नवमे पूर्व ईस्तिम् ॥ ३९९ ॥
आद्यो वृषभवारेऽभूद्, द्वितीयोऽजितवारके । अष्टानामर्हतां तीर्थेष्वष्टौ च पुष्पदन्ततः ॥ ४०० ॥
एकादशः सत्यकिश्च, तीर्थे वीरजिनेशितुः । तीर्थव्यक्तिः प्रतिहरिबलानां वासुदेववत् ॥ ४०१ ॥

त्रिषष्टिरेते कथिताः शलाकापुमांस ऐश्वर्यगुणाभिरामाः ।
क्षेत्रे किलास्मिन् भरतेऽत्र कालेऽवसर्पिणीनामनि नाममात्रात् ॥ ४०२ ॥

विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे, संपूर्णः प्रथितो निसर्गसुभगःसर्गस्त्रयस्त्रिंशतः ॥ ४०३ ॥

॥ इति श्रीलोकप्रकाशे त्रयस्त्रिंशत्तमः सर्गः समाप्तः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

॥ अथ चतुस्त्रिंशत्तमः सर्गः ॥

इत्यस्यामवसर्पिण्यां, यथोक्ता उत्तमा नराः । वाच्यास्तथाऽवसर्पिण्युत्सर्पिणीष्वखिलासु ते ॥ १ ॥
स्यातां किन्त्ववसर्पिण्यामादिमौ जिनचक्रिणौ । तृतीयारकपर्यन्ते, परे तुर्यारकेऽखिलाः ॥ २ ॥
उत्सर्पिण्यां तु सर्वेऽमी, स्युस्तृतीयारके क्रमात् । परं तुर्यारकस्यादावन्तिमौ जिनचक्रिणौ ॥ ३ ॥
या दृश्यन्तेऽवसर्पिण्यामायुर्देहादिका स्थितिः । उत्सर्पिणीमुखे तादृग्, जिनचक्र्यादिदेहिनाम् ॥ ४ ॥
भाव्यमेवं प्रातिलोम्यं, पदार्थेष्वखिलेष्वपि । उत्सर्पिण्यवसर्पिण्योर्व्यक्त्या तु कियदुच्यते ॥ ५ ॥
अथ प्रकृतं–इत्येवमवसर्पिण्यां, दुःषमसुषमारके । पूर्णे सति प्रविशति, पञ्चमो दुःषमारकः ॥ ६ ॥

अस्मिन् कालेऽपि पूर्वोक्तं, भूमिवृक्षादिवर्णनम् । अनुसंधीयतां किंत्वनन्तघ्नन्यूनपर्यवम् ॥ ७ ॥
स्यात्संहननमत्रादौ संस्थानमपि षड्विधम् । व्यवच्छेदे क्रमादेकं, सेवार्त्तमवतिष्ठते ॥ ८ ॥
यथाऽस्यामवसर्पिण्यामरेऽस्मिन् प्रथमं गतं । दिवं गते स्थूलभद्रे, वज्रर्षौ तच्चतुष्टयम् ॥ ९ ॥
त्रिंशमब्दशतं चायुः, स्यादत्रादौ शरीरिणाम् । कालक्रमाद्धीयमानमन्ते विंशतिवार्षिकम् ॥ १० ॥
सप्तहस्तमितं देहं, स्यादत्रादौ शरीरिणाम् । एकहस्तमितं चान्ते, हीयमानं यथाक्रमम् ॥ ११ ॥
चतुर्थारकजातानामिह मोक्षोऽपि संभवेत् । एतस्मिन्नरके जातजन्मनां तु भवेन्न सः ॥ १२ ॥
जाते तु निर्वाणोच्छेदे, संहननानुसारतः । शरीरिणो यथाकर्म, स्युश्चतुर्गतिगामिनः ॥ १३ ॥
दुर्लक्षणे पुत्र इव, वर्द्धमानेऽरकेऽत्र च । क्रमादुच्छेदमायान्ति, सद्भावाः केवलादयः ॥ १४ ॥
न मनःपर्यवज्ञानं, न चात्र परमावधिः । क्षपकोपशमश्रेण्यौ, नैवमाहारकं वपुः ॥ १५ ॥
लब्धिर्नात्र पुलाकाख्या, नाप्यन्त्यं संयमत्रयम् । सामायिकं स्याच्छेदोपस्थापनीयं च कुत्रचित् ॥ १६ ॥
नात्र तादृग्लब्धिमन्तो, नार्हन्तो न च चक्रिणः । वासुदेवादयो नैव, शलाकापुरुषा इह ॥ १७ ॥
जातिस्मृत्यवधिज्ञानवैक्रियोद्भावनादयः । ये भावा अव्यवच्छिन्नास्तेऽपि कालानुभावतः ॥ १८ ॥
भवन्ति विरला एव, गुणा इव दुरात्मनि । आर्हतानामपीह स्युर्मतभेदो अनेकशः ॥ १९ ॥
जनाः प्रायेण बहुलकषाया दुर्णयप्रियाः । अधर्मरागिणो धर्मद्विष्टा मर्यादयोज्झिताः ॥ २० ॥
ग्रामाः श्मशानतुल्याः स्युर्ग्रामाभनगराणि च । कुटुम्बिनश्चेटतुल्या, राजानश्च यमोपमाः ॥ २१ ॥
वित्तं गृह्णन्ति लोभान्धा, महीपाला नियोगिनाम् । प्रजानां तेऽधमाश्चैवं, मात्स्यो न्यायः प्रवर्त्तते ॥ २२ ॥
उत्तमा मध्यमाचारा, मध्यमाश्चान्त्यचेष्टिताः । विसंस्थुलाश्च देशाः स्युर्दुर्भिक्षाद्यैरुपद्रवैः ॥ २३ ॥
मितं वर्षति पर्जन्यो, न वर्षत्यपि कर्हिचित् । वर्षत्यकाले काले च, न जनैः प्रार्थितोऽपि सः ॥ २४ ॥
अन्नं निष्पद्यतेऽनेकैरुपायैः सेचनादिभिः । निष्पन्नमपि तत्कीरशलभाद्यैर्विनश्यति ॥ २५ ॥
वदान्या धार्मिका न्यायप्रियास्ते निर्धना जनाः । अनीतिकारिणो दुष्टाः, कृपणाश्च धनैर्भृताः ॥ २६ ॥
निर्धना बह्वपत्याः स्युर्धनिनोऽपत्यवर्जिताः । आढ्य मन्दाग्नयो रुग्णा, दृढाग्न्यङ्गाश्च दुर्विधाः ॥ २७ ॥
दृढाङ्गा नीरुजो मूर्खाः, कृशाङ्गाः शास्त्रवेदिनः । विलसन्ति खलाः स्वैरं, प्रायः सीदंति साधवः ॥ २८ ॥
अतिवृष्टिरवृष्टिश्च, मूषकाः शलभाः शुकाः । स्वचक्रं परचक्रं च, स्युर्भूम्नेतीतयो भुवि ॥ २९ ॥
रात्रौ चौराः पीडयन्ति, प्रजां भूपाः करैर्दिवा । नीरसामपि शैलक्ष्मामिव दावाग्निभानवः ॥ ३० ॥
आधिकारिण एव स्युर्नृपाणामधिकारिणः । लञ्चासेवादिभिर्वश्या न्यायमार्गानपेक्षिणः ॥ ३१ ॥
नृपा मिथ्यादृशो हिंसा, मृगयादिषु तत्पराः । विप्रादयोऽपि लोभान्धा, लोकानां विप्रलम्भकाः ॥ ३२ ॥
असंयता अविरता, नानाऽनाचारसेविनः । गुरुंमन्यास्तेऽपि विप्राः, पूज्यन्ते भूरिभिर्जनैः ॥ ३३ ॥

पाखण्डिनोऽपि विविधैः, पाखण्डैर्भद्रकान् जनान् । प्रतारयन्ति दुःखाब्धेर्वयं निस्तारका इति ॥ ३४ ॥
म्लेच्छमिथ्यादृगादीनां, स्वस्वाचारे दृढास्थता । आर्हतानां च शुद्धेऽपि, धर्मे न प्रत्ययो दृढः ॥ ३५ ॥
पञ्चाग्निमाघस्नानादीन्यन्ये कष्टानि कुर्वते । आर्हतास्त्वलसायन्ते, सुकरावश्यकादिषु ॥ ३६ ॥
यत्याभासा गणं त्यक्त्वा, स्युः केचित्स्वैरचारिणः । श्राद्धा अप्यनुगच्छन्ति, तान् बाला ग्रहिलानिव ॥ ३७ ॥
गणस्थिताश्च निर्ग्रन्था, धर्मोपकरणेष्वपि । ममत्वाभिनिवेशेन, स्युः परिग्रहविप्लुताः ॥ ३८ ॥
आराधयन्ति नो शिष्या, गुरून् गुणगुरूनपि । विज्ञंमन्या गुरुभ्योऽपि, विनयं न प्रयुञ्जते ॥ ३९ ॥
तनयाश्चावजानन्ति, मातापित्रादिकानिति । जानन्ति किममी तत्त्वं, जराजर्जरबुद्धयः ॥ ४० ॥
परस्परं विरुध्यन्ते, स्वजनाः सोदरादयः । परकीयैश्च सौहार्दं, कुर्वते हार्ददर्शिनः ॥ ४१ ॥
बाल्ये प्रव्राजिताः शिष्याः, पाठिताः शिक्षिताः श्रमात् । गुरोस्तेऽपि प्रतीपाः स्युर्यं कीटाःकुञ्जरीकृताः ॥ ४२ ॥
प्रहिता ये वणिज्यायै, विश्वस्तैरन्यभूमिषु । श्रेष्ठिनां तेऽपि सर्वस्वं, मुष्णन्त्याढ्यीकृता अपि ॥ ४३ ॥
छलेनाश्वास्य जल्पाद्यैः, क्षत्रिया घ्नन्ति वैरिणः । प्रायेणाऽनीतियुद्धानि, कुर्वते मृत्युभीरवः ॥ ४४ ॥
स्नुषाः श्वशुरयोः सम्यग् विनयं न वितन्वते । प्रसादमुचितं तेऽपि, वधूटीषु न कुर्वते ॥ ४५ ॥
यैः सर्वस्वव्ययैः पोषं, पोषमुद्वाह्य वर्द्धिताः । तेभ्यः पितृभ्यो भिन्नाः स्युः, क्रोधान्धाः स्त्रीमुखाः सुताः ॥ ४६ ॥
प्रविश्य हृदयं पत्युः, खरा वक्रमुखी वधूः । पितृपुत्रौ पृथक्कुर्यात्कुञ्चिकेवासु तालकम् ॥ ४७ ॥
मातापित्रोरविश्वासः, श्वश्रूश्वशुरयोः पुनः । विश्वासः परमः पत्नीवचसा हन्ति मातरम् ॥ ४८ ॥
नापि पुष्णन्ति संपन्नाः, पितृमात्रादिपक्षजान् । पत्नीवर्ग्यांश्च पुष्णन्ति, वित्तवस्त्राशनादिभिः ॥ ४९ ॥
स्नुषासुतेषु प्रौढेषु, गृहे विषयसेविषु । सेवन्ते विषयान् वृद्धाः, पितरोऽपि गतत्रपाः ॥ ५० ॥
वलीलुलितचर्मापि, पलितश्वेतकूर्चकः । कम्प्रः श्लथोऽपि नो बालामुद्वहन् लज्जते जनः ॥ ५१ ॥
विक्रीणते सुताः केचिदुरवस्थाः सुतानपि। आसन्नमृत्यवे दद्युः, स्वपुत्रीं धनलिप्सवः ॥ ५२ ॥
राजामात्यादयो येऽपि, न्यायमार्गप्रवर्त्तकाः । ते परान् शिक्षयन्तोऽपि, स्वयं स्युर्व्यभिचारिणः ॥ ५३ ॥
साकूतोक्तिकटाक्षौघैः, स्तनदोर्मूलदर्शनैः । गणिका इव चेष्टन्ते निस्त्रपाः कुलयोषितः ॥ ५४ ॥
मातुः स्वसुः समर्थ स्युः, पुत्राद्या भाण्डवादिनः । श्वशुरादिसमक्षं च, वदन्त्येवं स्नुषा अपि ॥ ५५ ॥
वञ्चकाः स्वार्थनिष्ठाश्च, स्युर्मिथः स्वजना अपि । वृत्तिं कुर्वन्ति वणिजो, दम्भैः कूटतुलादिभिः ॥ ५६ ॥
हानिः प्रत्युत वाणिज्ये, दुष्करोऽऽजीविका नृणाम् । न च लाभेऽपि संतुष्टिस्तृष्णा स्यादधिकाधिका ॥ ५७ ॥
बहवो दुर्विधा लोकाः, खिद्यन्ते धनकांक्षया । विषयाणां तृष्णयैव, पूरयन्त्यखिलं जनुः ॥ ५८ ॥
रूपचातुर्युदारेषु, निजदारेषु सत्स्वपि । परदारेषु मन्यन्ते, रन्त्वाऽऽत्मानं गुणाधिकम् ॥ ५९ ॥
स्यादकिञ्चित्करो लोके, सरलः सत्यवाग्जनः । कुटिलो वक्रवादी च, प्रायः स्याज्जनतादृतः ॥ ६० ॥

वेश्मवीवाहसीमन्तादिषु संसारकर्मसु । ऋणं कृत्वापि वित्तानि, विलसन्ति घना जनाः ॥ ६१ ॥
चैत्योपाश्रयदेवार्चाप्रतिष्ठाद्युत्सवेषु तु । उपदेशं न शृण्वन्ति, शक्ता अप्येडमूकवत् ॥ ६२ ॥
श्रद्धाहानिर्द्रव्यहानिर्धर्महानिर्यथाक्रमम् । आयुर्हानिर्वपुहानिः सारहानिश्च वस्तुषु ॥ ६३ ॥
कौटिल्यमग्रजः स्वल्पं, वेत्त्यनल्पं ततोऽनुजः । यथाकनिष्ठमित्येवं, तद्वर्द्धेताधिकाधिकम् ॥ ६४ ॥
मणिमंत्रौषधीतंत्रास्तादृग्माहात्म्यवर्जिताः । देवा भवन्ति नाध्यक्षाः, सम्यगाराधिता अपि ॥ ६५ ॥
स्वल्पतुच्छाऽरसफलाः, सहकारादयो द्रुमाः । गोमहिष्यादयोऽप्यल्पदुग्धास्तान्यरसानि च ॥ ६६ ॥
दुर्णयो वर्द्धते कूटतुलादिर्लोभवृद्धितः । ततः स्युर्जलदास्तुच्छाः, पृथिवी नीरसा ततः ॥ ६७ ॥
औषध्यस्तेन निस्सारा, मानवानां ततः क्रमात् । आयुर्देहबलादीनां, परिहाणिः प्रवर्त्तते ॥ ६८ ॥

तथोक्तं तन्दुलवैचारिके–[गाथा ५० थी ५३]"संघयणं संठाणं उच्चतं आउयं च मणुआणं । अणुसमयं परिहायई ओसप्पिणिकालदोसेण ॥ कोहमयमायलोभा ओसन्नं वड्ढए य मणुआणं । कूडतुलकूडमाणा तेणऽणुमाणेण सव्वंपि ॥ विसमा अज्जतुलाओ विसमाणि य जणवएसु माणाणि । विसमा रायकुलाइं तेण उ विसमाइं वासाइं ॥ विसमेसु अ वासेसु हुंति असाराइं ओसहिबलाइं । ओसहिदोब्बलेण य आउं परिहायइ नराणं" ॥

बकुशाश्च कुशीलाश्च, स्युर्द्विधैवात्र साधवः । न स्युः पुलाकनिर्ग्रन्थस्नातकाः कालदोषतः ॥ ६९ ॥
यस्यातिचारपङ्केन, चारित्रं बकुशं भवेत् । बकुशः श्रमणः स स्यात्, बकुशं नाम कर्बुरम् ॥ ७० ॥
स च द्विधोपकरणदेहातिचारभेदतः । आद्यस्तत्रर्त्तुबद्धेऽपि, काले निर्णेक्ति चीवरम् ॥ ७१ ॥
परिधत्ते विभूषायै, श्लक्ष्णं सारं तदीहते । दण्डपात्रादिकं मृष्टं, कृतशोभं बिभर्त्ति च ॥ ७२ ॥
मात्राधिकं चेहते तत्, बकुशोऽयमिहादिमः । अन्यस्तु नखकेशादि, विना कार्यं विभूषयन् ॥ ७३ ॥
बकुशो द्विविधोऽप्येष स्वस्येच्छति परिच्छदम् । पाण्डित्यादियशःकाङ्क्षी, सुखशीलः क्रियालसः ॥ ७४ ॥

तथोक्तं पञ्चनिर्ग्रन्थ्यां–"तह देससव्वछेयारिहेहिं सबलेहिं संजुओ बउसो । मोहक्खयत्थमब्भुट्ठिओ य सुत्तंमि भणियं च ॥ उवगरणदेहचुक्खा रिद्धीजसगारवा सिया निच्चं । बहुसबलछेयजुत्ता निग्गंथा बाउसा भणिया" ॥ [श्लोक - १९ - २०]

शीलं यस्येह चारित्रं, कुत्सितं स कुशीलकः । प्रतीसेवाकषायाभ्यां, द्विविधः स प्रकीर्त्तितः ॥ ७५ ॥
द्वैधोऽप्ययं पञ्चविधो, ज्ञानदर्शनयोर्भवेत् । तपश्चारित्रयोश्चैव, यथासूक्ष्मे च तादृशः ॥ ७६ ॥
स ज्ञानादिकुशीलो यो, ज्ञानादीनुपजीवति । यथासूक्ष्मस्तु स स्याद्यः, प्रीयते स्वप्रशंसया ॥ ७७ ॥
ज्ञानादिषु कुशीलाः स्युः, पञ्चामी प्रतिसेवया । कषायतोऽथ ज्ञानादिकुशीलान् ब्रूमहे परान् ॥ ७८ ॥
यः कषायैः संज्वलनैस्तपो ज्ञानं च दर्शनम् । अनुयुङ्क्ते कषायेण, स ज्ञानादिकुशीलकः ॥ ७९ ॥
शापं यच्छंश्च चारित्रकुशीलः स्यात्कषायतः । यथासूक्ष्मश्च मनसा, यः क्रोधादिकषायकृत् ॥ ८० ॥

यद्वा कषायैः क्रोधाद्यैर्यो ज्ञानादिविराधकः । कषायतः स ज्ञानादिकुशील इह कीर्त्तितः ॥ ८१ ॥
पुलाकमिह निःसारं, धान्यं तादृक्चरित्रयुक् । स लब्धिप्रतिसेवाभ्यां, पुलाको द्विविधः स्मृतः ॥ ८२ ॥
यतिर्यया चक्रिसैन्यमपि चूर्णयितुं क्षमः । लब्धिः सा स्यात्पुलाकाख्या, तां सङ्घादिप्रयोजने ॥ ८३ ॥
प्रयुञ्जानो भवेल्लब्धिपुलाकोऽन्यस्तु पञ्चधा । ज्ञानदर्शनचारित्रलिङ्गसूक्ष्मविभेदतः ॥ ८४ ॥
ज्ञानं दोषैः स्खलिताद्यैः, शङ्किताद्यैश्च दर्शनम् । मूलोत्तरातिचारैश्च, चारित्रं यो विराधयेत् ॥ ८५ ॥
स ज्ञानादिपुलाकः स्यात्कुर्यान्निःकारणं च यः । वेषान्तरं भवेल्लिङ्गपुलाकः स श्रुतोदितः ॥ ८६ ॥
संयताऽकल्प्यवस्तूनां, मनसा यो निषेवकः । स निर्दिष्टो यथासूक्ष्मपुलाकः श्रुतपारगैः ॥ ८७ ॥
विनिर्गतो मोहनीयकर्माख्याद् ग्रन्थतोऽत्र यः । स निर्ग्रन्थो द्विधा क्षीणोपशान्तमोहभेदतः ॥ ८८ ॥
शुक्लध्यानजलैः स्नातो, दूरं कर्ममलोज्झितः । स स्नातकः सयोगी चायोगी चेति द्विधा भवेत् ॥ ८९ ॥
ततश्च—अरकेऽस्मिंश्च बकुशकुशीलाख्येऽपि संयमे । भवेत्क्रमेणापकर्षः, शक्तिसत्त्वादिहानितः ॥ ९० ॥
सत्यप्येवं भवेयुर्ये, मूढाः सङ्घे चतुर्विधे । धर्मे च नास्तिकाः कार्यास्ते भव्यैः सङ्घतो बहिः ॥ ९१ ॥
यथा घृतादिवस्तूनां, पूर्वकालव्यपेक्षया । स्नेहमाधुर्यादिहानिर्यद्यप्यध्यक्षमीक्ष्यते ॥ ९२ ॥
तथापि कार्यं तत्साध्यं, स्यात्तैरेव घृतादिभिः । न पुनस्तत्पदन्यस्तैः, स्वच्छैरपि जलादिभिः ॥ ९३ ॥
पूर्वर्ष्यपेक्षयैवं च, हीनहीनगुणैरपि । मोक्षमार्गाध्वगाप्तिः स्यान्निर्ग्रन्थैरेव नापरैः ॥ ९४ ॥
विषमेऽपि च कालेऽस्मिन्, भवन्त्येव महर्षयः । निर्ग्रन्थैः सदृशाः केचिच्चतुर्थारकवर्त्तिभिः ॥ ९५ ॥
यथाऽस्यामवसर्पिण्यामेतस्मिन् पञ्चमेऽरके । त्रयोविंशतिरादिष्टा, उदयाः सततोदयैः ॥ ९६ ॥
विंशतिः प्रथमे तत्र, युगप्रधानसूरयः । उदये स्युर्द्वितीयस्मिन्, त्रयोविंशतिरेव ते ॥ ९७ ॥
तृतीयेऽष्टाढ्यनवतिः, चतुर्थे चाष्टसप्ततिः । पञ्चसप्ततिरेकोननवतिः शतमेव च ॥ ९८ ॥
सप्ताशीति स्तथा पञ्चनवतिश्च ततः परम् । सप्ताशीति षट्सप्ततिरष्टसप्ततिरेव च ॥ ९९ ॥
चतुर्नवतिरेवाष्टौ त्रयः सप्त चतुष्टयम् । शतं पञ्चदशोपेतं, त्रयस्त्रिंशं शतं शतम् ॥ १०० ॥
पञ्चाधिकाऽथ नवतिर्नवतिश्च नवाधिका ॥ चत्वारिंशत् क्रमादेते, यथोक्तोदयसूरयः ॥ १०१ ॥
श्रीसुधर्मा च वज्रश्च, सूरिः प्रतिपदाभिधः । हरिस्सहो नन्दिमित्रः, शूरसेनस्तथापरः ॥ १०२ ॥
रविमित्रः श्रीप्रभश्च, सूरिर्मणिरथाभिधः । यशोमित्रो धनशिखः, सत्यमित्रो महामुनिः ॥ १०३ ॥
धम्मिल्लो विजयानन्दस्तथा सूरिः सुमङ्गलः । धर्मसिंहो जयदेवः, सुरदिन्नाभिधो गुरु : ॥ १०४ ॥
वैशाख श्चाथ कौडिण्यः, सूरिः श्रीमाथुराह्वयः । वणिक्पुत्रश्च श्रीदत्त, उदयेष्वाद्यसूरयः ॥ १०५ ॥
स्यात्पुष्पमित्रो ऽर्हन्मित्रः, सूरिर्वैशाखसंज्ञकः । सुकीर्त्तिः स्थावर स्थसुतश्च जयमङ्गलः ॥ १०६ ॥
ततः सिद्धार्थ ईशानो, रथमित्रो मुनीश्वरः । आचार्यो भरणीमित्रो, दृढमित्राह्वयोऽपि च ॥ १०७ ॥

संगतिमित्रः श्रीधरो, मागध श्चामराभिधः । रेवतीमित्र सत्कीर्त्तिमित्रौ च सुरमित्रकः ॥ १०८ ॥
फल्गुमित्रश्च कल्याण, सूरिः कल्याणकारणम् । देवमित्रो दुःष्प्रसह, उदयेष्वन्त्यसूरयः ॥ १०९ ॥
श्रीसुधर्मा च जम्बूश्च, प्रभवः सूरिशेखरः । शय्यम्भवो यशोभद्रः, संभूतिविजयाह्वयः ॥ ११० ॥
भद्रबाहुस्थूलभद्रौ, महागिरिसुहस्तिनौ । धनसुन्दरश्यामार्यौ, स्कन्दिलाचार्य इत्यपि ॥ १११ ॥
रेवतीमित्रधर्मौ च, भद्रगुप्ताभिधो गुरु : । श्रीगुप्तवज्रसंज्ञार्यरक्षितौ पुष्पमित्रकः ॥ ११२ ॥
प्रथमस्योदयस्यैते, विंशतिः सूरिसत्तमाः । त्रयोविंशतिरुच्यन्ते, द्वितीयस्याथ नामतः ॥ ११३ ॥
श्रीवज्रो नागहस्ती च, रेवतीमित्र इत्यपि । सिंहो नागार्जुनो भूतदिन्नः कालकसंज्ञकः ॥ ११४ ॥
सत्यमित्रो हारिलश्च, जिनभद्रो गणीश्वरः । उमास्वातिः पुष्पमित्रः, संभूतिः सूरिकुञ्जरः ॥ ११५ ॥
तथा माढरसंभूतो, धर्मश्रीसंज्ञको गुरु : । ज्येष्ठाङ्गः फल्गुमित्रश्च, धर्मघोषाह्वयो गुरुः ॥ ११६ ॥
सूरिर्विनयमित्राख्यः, शीलमित्रश्च रेवतिः । स्वप्नमित्रो हरिमित्रो, द्वितीयोदयसूरयः ॥ ११७ ॥
स्युस्त्रयोविंशतेरेवमुदयानां युगोत्तमाः । चतुर्युक्ते सहस्रे द्वे, मीलिताः सर्वसंख्यया ॥ ११८ ॥
एकावताराः सर्वेऽमी, सूरयो जगदुत्तमाः । श्री सुधर्मा च जम्बूश्च, ख्यातौ तद्भवसिद्धिकौ ॥ ११९ ॥
अनेकातिशयोपेता, महासत्त्वा भवन्त्यमी । घ्नन्ति सार्द्धद्वियोजन्यां, दुर्भिक्षादीनुपद्रवान् ॥ १२० ॥
एकादशसहस्राश्च, लक्षाश्च षोडशाधिकाः । युगप्रधानतुल्याः स्युः, सूरयः पञ्चमारके ॥ १२१ ॥

तथोक्तं दुष्षमारकसङ्घस्तोत्रे—"जुगपवरसरिससूरी, दूरीकयभवियमोहतमपसरं । वंदामि सोलसुत्तर इगदसलक्खे सहस्से य" ॥ [दिपालिका कल्प - श्लोक २९१]

'सन्तु श्रीवर्द्धमानस्येत्यादि' दीवालीकल्पे तु—[1]"जुगप्पहाणसमाणा एगारस लक्ख सोलस सहस्सा । सूरिओ हुंति अरए पञ्चमए जाव दुप्पसहे" ॥ [टिप्पणीगतः श्लोकः]

कोटीनां पञ्च पञ्चाशल्लक्षास्तावन्त एव च । सहस्राश्च शताः पञ्च, सर्वे स्वाचारसूरयः ॥ १२२ ॥
त्रयस्त्रिंशच्च लक्षाणि, सहस्राणां चतुष्टयी । चतुःशत्येकनवतिः, सूरयो मध्यमा गुणैः ॥ १२३ ॥
अस्मिन्नेवारकेऽभूवन्, पूर्वाचार्या महाशयाः । श्रीजगच्चन्द्रसूर्याद्यास्तपागच्छान्वयक्रमे ॥ १२४ ॥
सूरयो बप्पभट्ट्याख्या, अभयदेवसूरयः । हेमाचार्याश्च मलयगिर्याद्याश्चाभवन् परे ॥ १२५ ॥
विजयन्तेऽधुनाप्येवं, मुनयो नयकोविदाः । अत्युग्रतपसश्चारुचारित्रमहिमाद्भुताः ॥ १२६ ॥
एवं मध्यस्थयादृष्ट्या, पर्यालोच्य विवेकिभिः । न कार्यः शुद्धसाधूनां, संशयः पञ्चमेऽरके ॥ १२७ ॥
दुष्षमारकपर्यन्तावधि सङ्घश्चतुर्विधः । भविष्यत्यव्यवच्छिन्न, इत्यादिष्टं जिनैः श्रुते ॥ १२८ ॥

---

१ स्तोत्रे तु सहस्रपदस्य व्यत्ययेन योजनात् षोडशसहस्रोत्तरा एकादश लक्षा इत्यर्थः संपद्येत ।

तथोक्तं भगवत्यां–"जम्बूद्दीवे णं भंते दीवे भारहे वासे इमीसे ओसप्पिणीए देवाणुप्पियाणं केवइयं कालं तित्थे अणुसज्जिस्सति ? गो० जंबू० भारहे इमीसे ओस० ममं एक्कवीसं वाससहस्साइं तित्थे अणुसज्जिस्सति, इति" भग० श० ८ उ० ८ ।

दीवालीकल्पे तूक्तं[1]–"वासाण वीससहस्सा नवसय तिम्मास पञ्चदिणपहरा । इक्का घडिया दोपल अक्खर अडयाल जिणधम्मो ॥ [श्लोक ३०५]

पर्यन्ते त्वरकस्यास्य, सूरिर्दुःप्रसहाभिधः । रत्निद्वयोच्छ्रितो विंशत्यब्दजीवी भविष्यति ॥ १२९ ॥
स्वर्गाच्च्युत्वा समुत्पन्नो, गृहे द्वादशवत्सरीम् । स्थित्वा सामान्यसाधुत्वे, चत्वार्यब्दान्यसौ शुचिः ॥ १३० ॥
चत्वार्यब्दानि सूरित्वे, स्थित्वाऽष्टाब्दानि च व्रते । स्वर्गमेष्यति सौधर्ममन्ते कृत्वाऽष्टमं कृती ॥ १३१ ॥
दशवैकालिकं जीतकल्पमावश्यकं च सः । अनुयोगद्वारनंदीर्नतेन्द्रो धास्यति श्रुतम् ॥ १३२ ॥
साध्वी तदा च फल्गुश्रीः, श्रावको नागिलाभिधः । सत्यश्रीः श्राविका चेति, ज्ञेयः सङ्घश्चतुर्विधः ॥ १३३ ॥

यतः–"एगो साहू एगा य साहुणी सड्ढओ य सड्ढी वा । आणाजुत्तो सङ्घो सेसो पुण अट्ठिसंघाओ ॥ [संबोधसत्तरि गा. ३७]

उत्कृष्टं श्रुतमेतेषां, दशवैकालिकावधि । षाण्मासिकतपस्तुल्यं, षष्ठभक्तं भविष्यति ॥ १३४ ॥
मन्त्रीशः सुमुखाभिख्यो, राजा विमलवाहनः । भविष्यतस्तदा लोके, नीतिमार्गप्रवर्त्तकौ ॥ १३५ ॥
अयं दुःप्रसहाचार्योपदेशेन करिष्यति । चैत्यस्यान्तिममुद्धारं, राजा श्रीविमलाचले ॥ १३६ ॥
कोट्येकैकादश लक्षाः, सहस्राणि च षोडश । उत्तमानां क्षितीशानां, संख्यैषा दुष्षमारके ॥ १३७ ॥
कोटयः पञ्चपञ्चाशल्लक्षाश्चापि सहस्रकाः । तावन्तोऽथ शताः पञ्च पञ्चपञ्चाशदन्विताः ॥ १३८ ॥
इयन्तो दुःषमाकाले, निर्दिष्टाः सर्वसंख्यया । नवभिः पञ्चकैर्नामधारिणोऽधमसूरयः ॥ १३९ ॥

इत्यर्थतो दीपालिकाकल्पे–

एवं च सर्ववर्षावसर्पिणीष्वखिलास्वपि । पञ्चमानामरकाणां, यथार्हं भाव्यतां स्थितिः ॥ १४० ॥
एवमुक्तस्वरूपस्य, पञ्चमस्यारकस्य च । प्रान्ते मूलाद् ज्ञातिधर्मो, विवाहादिर्विलीयते ॥ १४१ ॥
धर्मो विलीयते शाक्याद्यन्यपाखण्डिनामपि । राजधर्मो दुष्टशिष्टनिग्रहानुग्रहादिकः ॥ १४२ ॥
धर्मोऽथ श्रुतचारित्रलक्षणोऽपि विलीयते । साध्वादिनाशे तन्नाशः, पात्रनाशे घृतादिवत् ॥ १४३ ॥
तथा चोच्छिद्यते वह्निरन्नपाकादिभिस्सह । अतिस्निग्धेऽतिरूक्षे च, काले भवति नैष यत् ॥ १४४ ॥
अनतिस्निग्धरूक्षेषु, सुषमदुष्षमादिषु । कालेषूत्पद्यते वह्निनस्तत्साध्याश्च क्रिया अपि ॥ १४५ ॥
एवं पूर्णे पञ्चमेऽरेऽनन्तैर्वर्णादिपर्यवैः । हीयमानैः प्रविशति, दुष्षमदुष्षमारकः ॥ १४६ ॥

---

१ अरसविरसाद्युदकवर्षणादिकालमपसार्य स्यादुक्तमेतत् ।

स च कालो महाभीष्मः, शून्योऽशेषजनक्षयात् । प्रवर्द्धमानदुःखार्त्तलोकहाहारवाकुलः ॥ १४७ ॥
तस्मिन् कालेऽतिकठिना, दूरोदञ्चितधूलयः । वाता वान्ति भृशं भीष्मा, असह्याः प्राणहारिणः ॥ १४८ ॥
धूमायन्ते दिशोऽभीक्ष्णं, परितोऽतिरजस्वलाः । प्रसृत्वरान्धतमसैर्निरालोका दिवानिशम् ॥ १४९ ॥
कालरौक्ष्येणाङ्गरौक्ष्यादसह्यमहितं महः । शीतं मुञ्चति शीतांशुरुष्णं चोष्णकरः खरः ॥ १५० ॥
सूर्यचन्द्रमसावेतौ, जगतामुपकारिणौ । हन्त कालपरावर्त्ते, स्यातां तावेव दुःखदौ ॥ १५१ ॥
सर्जादिक्षारसदृशरसवाःपूरवर्षिणः । करीषरसतुल्याम्बुमुचोऽम्लरसवारयः ॥ १५२ ॥
अग्निवद्दाहकृद्वारिकिरो विषमयोदकाः । वज्रोदकाः पर्वतादिप्रतिभेदप्रभूष्णवः ॥ १५३ ॥
विद्युत्पातकृतोऽभीक्ष्णं, कर्करादिकिरोऽसकृत् । जनानां विविधव्याधिवेदनामृत्युकृज्जलाः ॥ १५४ ॥
तदा चण्डानिलोद्धूततीव्रधारातिपातिनः । कर्णद्रोहिध्वनिकृतोऽसकृद्वर्षन्ति वारिदाः ॥ १५५ ॥

एषां क्षारादिमेघानां श्रीजम्बूद्वीपप्रज्ञप्तिसूत्रवृत्त्योः कालमानमुक्तं न दृश्यते–'अभिक्खणं अभिक्खणं अरसमेहा विरसमेहा खारमेहा खत्तमेहा यावत् वासं वासं वासिहिंति' एतद् वृत्तावपि अभीक्ष्णं पुनः पुनरित्यादि. कालसप्ततौ तु एतेषां कालमानमेवं दृश्यते–"तो खारग्गिविसंबिलविज्जूघणा सगदिणा पिहु कुपवणं । वरिसिअ बहुरोगिजलं काहंति समं गिरिथिलाइं" ॥ [श्लो. ५५]

ग्रन्थान्तरे तु–'एते क्षारमेघादयो वर्षशतोनैकविंशतिवर्षसहस्रप्रमाणदुष्षमाकालातिक्रमे वर्षिष्यन्तीति' दृश्यते ।

ये जगज्जीवनास्तापच्छिदः सर्वेप्सितागमाः । एवं तेऽपि प्रवर्त्तन्ते, मेघाः कालविपर्यये ॥ १५६ ॥
नगरग्रामखेटादीन्, द्विपदांश्च चतुष्पदान् । अपदान् खेचरान् भूमिचरान्नभश्चरानपि ॥ १५७ ॥
अरण्यवासिनो द्वीपवासिनः शैलवासिनः । विद्याधरान्नैकविद्यासाधनोर्जितशक्तिकान् ॥ १५८ ॥
त्रसान् द्वित्रिचतुःपञ्चेन्द्रियांश्च स्थावरानपि । वृक्षगुल्मलतागुच्छौषधीर्नानातृणादिकान् ॥ १५९ ॥
विना वैताढ्यवृषभकूटेभ्योऽन्यान् धराधरान् । गङ्गासिन्ध्वादिसिन्धुभ्यः, परान् सर्वात् जलाश्रयान् ॥ १६० ॥
विध्वस्येत्यादिकान् सर्वान्, भावांस्ते विषमा घनाः । भस्मीकुर्वन्ति दशसु, क्षेत्रेषु भरतादिषु ॥ १६१ ॥
वर्षन्ति वैताढ्यादीनामुपर्यपि घना अमी । तत्रस्था अपि नश्यन्ति, खेचरास्तत्पुराणि च ॥ १६२ ॥
किंतु ते भूधरास्तेषां, प्रासादाः शिखराणि च । न मनागपि भिद्यन्ते, शाश्वतं ह्यविनश्वरम् ॥ १६३ ॥
अस्मिंश्च भरतक्षेत्रे, श्री शत्रुञ्जयपर्वतः । तत्रापि काले भविता, शाश्वतप्राय एव यत् ॥ १६४ ॥
अशीतिं योजनान्येष, विस्तृतः प्रथमेऽरके । द्वितीये सप्ततिं षष्टिं, तृतीये कथितोऽरके ॥ १६५ ॥
योजनानि च पञ्चाशत्तुरीये पञ्चमे पुनः । योजनानि द्वादश स्युः, सप्तहस्तास्ततोऽन्तिमे ॥ १६६ ॥

उत्सर्पिण्यां करा: सप्तारके ह्याद्ये द्वितीयके । योजनानि द्वादश स्युर्मानमेवं परेष्वपि ॥ १६७ ॥
पञ्चाशतं योजनानि, मूले यो विस्तृतोऽभवत् । दशोपरि तथाऽष्टोच्चो, विहरत्यादिमेऽर्हति ॥ १६८ ॥
विच्छिन्नेऽपि हि तीर्थेऽस्मिन्, कूटमस्यर्षभाभिधम् । सुरार्चितं स्थास्यतीह, पद्मनाभजिनावधि ॥ १६९ ॥
अस्मिन्नृषभसेनाद्या:, संख्यातीता जिनेश्वरा: । निर्वाणैश्च विहारैश्च, बहुशोऽपावयन्महीम् ॥ १७० ॥
भाविन: पद्मनाभाद्या, अर्हन्तोऽत्र महागिरौ । निजैर्विहारनिर्वाणै:, पावयिष्यन्ति मेदिनीम् ॥ १७१ ॥
वर्त्तमानावसर्पिण्यामस्यां नेमिजिनं विना । त्रयोविंशतिरर्हन्तो, निन्युरेनं कृतार्थताम् ॥ १७२ ॥
पञ्चभिर्मुनिकोटीभि:, सहात्र वृषभप्रभो: । निर्वृतश्चैत्रराकायां, पुण्डरीको गणाधिप: ॥ १७३ ॥
चतुर्मासीं स्थितावत्राजितशान्ती जिनेश्वरौ । क्षेत्रमेतदनन्तानां, सिद्धानां विशदात्मनाम् ॥ १७४ ॥
श्रीनेमिगणभृन्नन्दिषेणो यात्रार्थमागत: । सत्प्रभावाश्रयं यत्राजितशान्तिस्तवं व्यधात् ॥ १७५ ॥
जनकोटौ यथाकामं, भोजितायां यदर्ज्यते । तदेकेनोपवासेन, सुकृतं सिद्धभूधरे ॥ १७६ ॥

इत्याद्यर्थत: श्रीशत्रुञ्जयकल्पादौ–

प्राय: पापविमुक्ता: स्युस्तिर्यञ्चोऽत्र निवासिन: । प्रयान्ति सद्गतावेव, स्पृष्ट्वैनं श्रद्धया गिरिम् ॥ १७७ ॥
सर्वेषामपि तीर्थानां, यात्रया विश्ववर्त्तिनाम् ॥ यावदुत्पद्यते पुण्यं, तावत्सिद्धाद्रियात्रया ॥ १७८ ॥
यश्चैत्यं जिनबिम्बं वा, कारयेत्सिद्धपर्वते । स भुक्त्वा सार्वभौमत्वं, भवेद्देवो महर्द्धिक: ॥ १७९ ॥
ध्वजं छत्रं पताकां च, स्थालभृङ्गारचामरान् । विद्याधरो भवेद्दत्त्वा, रथं दत्त्वा च चक्रभृत् ॥ १८० ॥
आहुर्विद्याप्राभृते च, नामान्यस्यैकविंशतिम् । यथाऽनुभावं कल्पितानि, मुनिस्वर्गिनरादिभि: ॥ १८१ ॥

तथाहु:–"विमलगिरि १ मुत्तिनिलओ २ सित्तुंजो ३ सिद्धखित्त ४ पुंडरिओ ५ । सिरिसिद्धसेहरो ६ सिद्धपव्वओ ७ तित्थराओ य ८ ॥ बाहुबली ९ मरुदेवो १० भगीरहो ११ सहसपत्त १२ सयपत्तो १३ । कूडसयट्टुत्तरओ १४ नगाहिराओ १५ सहसकमलो १६ ॥ ढंको १७ कवडिनिवासो १८ लोहिच्चो १९ तालज्झओ २० कयंबुत्ति २१ । सुरनरमुणिकयनामो सो विमलगिरी जयउ तित्थं ॥ १९४ ॥

एष चाऽशाश्वतो नाशान्मूलाऽनाशाच्च शाश्वत: । तत: सोभयधर्मत्वाच्छाश्वतप्राय उच्यते ॥ १८२ ॥
अथ प्रकृतं–अङ्गारमुर्मुरप्राया, भूमिर्भस्ममयी तदा । देहिभिर्दुष्करस्पर्शा, सतीव व्यभिचारिभि: ॥ १८३ ॥
कुरूपाश्च कुवर्णाश्च, दुर्गंधा दुष्टलक्षणा: । हीनदीनस्वरा दुष्टगिरोऽनादेयभाषिता: ॥ १८४ ॥
निर्लज्जा: क्लेशकपटवैरद्रोहपरायणा: । निर्मर्यादा मिथो युद्धवधबन्धविसंस्थुला: ॥ १८५ ॥
अकार्यकारिणो नित्यमन्यायोत्पाततत्परा: । पित्रादिविनयाज्ञादिव्यवहारविवर्जिता: ॥ १८६ ॥
भूम्ना काणान्धबधिरा, न्यूनाङ्गुल्यादय: कृशा: । कुणय: पङ्गव: श्यामा:, कामार्त्ता बाल्यतोऽपिहि ॥ १८७ ॥

प्ररूढप्रौढकठिनरोमाणः शूकरादिवत् । असंस्कृतश्मश्रुकेशाः, प्रवृद्धनखराः खराः ॥ १८८ ॥
कृतान्तसदृशाः काला, नीलीकुण्डोद्गता इव । स्थूलव्यक्तस्नसाजालनद्धाः स्फुटितमौलयः ॥ १८९ ॥
बाल्येऽपि कपिलश्वेतमूर्द्धजा वलिभिः श्लथाः । अशक्ता निपतद्दन्ता, जरसा जर्जरा इव ॥ १९० ॥
घटोद्भटमुखा वक्रनासिकाः कुटिलेक्षणाः । उत्कण्डूयाः क्षतशतविगलत्पूयशोणिताः ॥ १९१ ॥
खरोष्ट्रगतयः संहननेनान्त्येन निर्बलाः । कुसंस्थानाः कुप्रमाणाः, कुस्थानशयनासनाः ॥ १९२ ॥
सदाऽप्यशुचयः स्नानब्रह्मचर्यादिवर्जिताः । शास्त्रसंस्काररहिता, मूर्खा विकृतचेष्टिताः ॥ १९३ ॥
निस्सत्त्वाश्च निरुत्साहाः, सोच्छिष्टा नष्टतेजसः । शीतोष्णपवनव्याधिप्रमुखार्त्तिशताश्रयाः ॥ १९४ ॥
प्रस्वेदमलसन्दोहबीभत्सा धूलिधूसराः । बहुक्रोधमानमायालोभमोहभयोदयाः ॥ १९५ ॥
व्रतैर्मूलोत्तरगुणैः, प्रत्याख्यानैश्च वर्जिताः । सम्यक्त्वेनापि रहिताः, प्रायः स्युर्मनुजास्तदा ॥ १९६ ॥
कदाचिदेषां केषाञ्चित्, सम्यक्त्वं संभवत्यपि । संक्लिष्टाध्यवसायत्वाद्विरतिस्तु न सर्वथा ॥ १९७ ॥

तथोक्तं भगवत्यां– 'ओसण्णं धम्मसन्नपब्भट्ठा' जम्बूद्वीपप्रज्ञप्त्यां च– 'ओसण्णं धम्मसन्नसम्मत्तपरिब्भट्ठा' ओसन्नमिति प्रायोग्रहणात्क्वचित्सम्यक्त्वं प्राप्यतेऽपीति भावः ।

प्रायः कच्छपमत्स्यादिमांसक्षौद्रादिभोजिनः । तुच्छधान्याशिनः केऽपि, बह्वाहारा बहुक्षुधः ॥ १९८ ॥
प्रायो विपद्योत्पद्यन्ते, तिर्यक्षु नरकेषु ते । तिर्यग्भ्यो नरकेभ्यश्च, ते प्रायेण स्युरागताः ॥ १९९ ॥
चतुष्पदा मृगव्याघ्रसिंहाश्चौतुवृकादयः । पक्षिणो ढङ्ककङ्काद्याः, सरटाद्याः सरीसृपाः ॥ २०० ॥
एतेऽपि सर्वे नरकतिर्यग्दुर्गतिगामिनः । स्युर्मांसभक्षिणः क्रूराध्यवसायाश्च निर्दयाः ॥ २०१ ॥
षष्ठस्य चारकस्यादौ, नरा हस्तद्वयोच्छ्रिताः । हीयमानाः क्रमादन्ते, चैकहस्तोच्छ्रिता मताः ॥ २०२ ॥
उत्कृष्टमायुस्तेषामादौ वर्षाणि विंशतिः । अन्ते षोडश वर्षाणि, हीयमानं शनैः शनैः ॥ २०३ ॥

तथोक्तं–'सोलसवीसइवासपरमाउआ समणाउसो' इति श्रीजम्बू० प्र० सूत्रे, एतद्वृत्तावपि– इह कदाचित् षोडश वर्षाणि, कदाचिच्च विंशतिर्वर्षाणि परममायुर्येषां ते इति. वीरचरित्रे तु षोडश स्त्रीणां वर्षाणि, विंशतिः पुंसां परमायुरिति ।

वैताढ्यपर्वतादर्वाग्गङ्गायास्तटयोर्द्वयोः । बिलानि स्युर्नव नव, तावन्ति सिन्धुकूलयोः ॥ २०४ ॥
षट्त्रिंशति बिलेष्वेवं, दक्षिणार्द्धनिवासिनः । वसन्ति मनुजाः पक्षिपशुगोधोरगादयः ॥ २०५ ॥
वैताढ्यात्परतः सिधुगङ्गयोः कुलयोर्द्वयोः । षट्त्रिंशति बिलेष्वेते, वसन्त्युत्तरपार्श्वगाः ॥ २०६ ॥
द्वासप्ततिर्बिलान्येवं, स्युः क्षेत्रेषु दशस्वपि । तेषु तिष्ठन्ति बीजानि, सर्वेषामपि देहिनाम् ॥ २०७ ॥
स्थचक्राक्षमात्रोंडो, स्थाध्वमात्रविस्तृतः । तदा जलप्रवाहः स्यात्, सरितोः सिंधुगङ्गयोः ॥ २०८ ॥
तावदप्युदकं तासां, भूरिभिर्मत्स्यकच्छपैः । आकीर्णं पङ्किलं भूरिजीवमल्पतमाम्बुकम् ॥ २०९ ॥

ननु क्षुल्लहिमवदादिषु शैलेषु नैधते । अरकाणां परावर्त्तंस्ततस्तज्जातजन्मनाम् ॥ २१० ॥
गङ्गादीनां निम्नगानां, हानिः षष्ठेऽरके कथम् ? । किं चैवं कथमेतासां, विघटेत न नित्यता ? ॥ २११ ॥
अत्रोच्यते—हिमवत्पर्वतोत्थस्य, हानिर्न स्यान्मनागपि । गङ्गादीनां प्रवाहस्य, स्वकुण्डनिर्गमावधि ॥ २१२ ॥
ततः परं त्वेष यथा, शुभकालानुभावतः । नद्यन्तरसहस्रानुषङ्गेण वर्द्धते क्रमात् ॥ २१३ ॥
तथा नद्यन्तराऽसङ्ख्यद्भूरितापात्तथा क्षितेः । शुष्यत्यपि प्रवाहोऽयं, दुष्टकालानुभावतः ॥ २१४ ॥
पद्मादिह्रदनिर्गच्छत्प्रवाहापेक्षयैव च । स्याच्छाश्वतत्वमेतासां, ततो युक्तं यथोदितम्[1] ॥ २१५ ॥
निवसन्ति मनुष्यास्ते, प्रागुक्तेषु बिलेष्वथ । भीष्मेषु घोरध्वान्तेषु, स्तेनाः कारागृहेष्विव ॥ २१६ ॥
कृताऽकार्या इव बहिस्तेहि नागन्तुमीशते । गोपतेरुत्प्रतापस्य, करसंतापभीरवः ॥ २१७ ॥
निशायामपि नेशास्ते, निर्गन्तुं बिलतो बहिः । असह्यं ददतो जाड्यं, विधोर्भीता निशाचरात् ॥ २१८ ॥
रजनी गतचन्द्रापि, निशाचरवधूरिव । भवेत्प्राणोपघाताय, तेषां शीतार्त्तिवेपिनाम् ॥ २१९ ॥
ततः प्रातः प्रदोषे च, नात्युष्णे नातिशीतले । निर्गच्छन्ति बिलेभ्यस्ते, शृगाला इव भीलवः ॥ २२० ॥
उपेत्य गङ्गासिन्धुभ्यो, गृहीत्वा मत्स्यकच्छपान् । स्थले क्षिपन्ति पाकार्थं, सद्यस्का दुर्जरा हि ते ॥ २२१ ॥
दिवा तरणितापेन, रात्रौ शैत्येन भूयसा । तेषामाहारयोग्याः स्युः, कथिता नीरसाश्च ते ॥ २२२ ॥
मन्दाल्पजठराग्निनामपक्वाः सरसाश्च ते । न जीर्यन्तेऽग्न्यभावाच्च, तेषां पाकोऽप्यसम्भवी ॥ २२३ ॥
आदाय पूर्वनिक्षिप्तान्, प्सान्ति ते मत्स्यकच्छपान् । भविष्यद्भोजनार्थं च, निक्षिपन्ति पुनर्नवान् ॥ २२४ ॥
जीविका स्यात्सदाऽप्येषां, यदेवं पापसाधनम् । स्युस्तिर्यञ्चो नारकाश्च, प्रायस्ततेऽपि पापिनः ॥ २२५ ॥
सूत्रे च प्रायः शब्दोक्तेः, क्षुद्रान्नकृतजीविकः । अक्लिष्टाध्यवसायश्च, कश्चित्स्वर्गेऽपि गच्छति ॥ २२६ ॥

तथाहुः— 'ओसण्णमंसाहारा मच्छाहारा खुड्डाहारा' इत्यादि. तथा 'ओसण्णं णरगतिरिक्खजोणिएसु उववज्जिहिंतित्ति' श्रीजम्बू० प्र० सूत्रे ।

तदा षड्वर्षवयसो, गरभं दधते स्त्रियः । सकृच्छ्रं सुवतेऽभीक्ष्णमपत्यानि बहूनि ताः ॥ २२७ ॥
बहूभिः पुत्रपौत्राद्यैः, क्लिष्यन्तेऽल्पायुषोऽपि ते । पापिनः पापिभिर्बालविट्चरैर्विट्चरा इव ॥ २२८ ॥
यूकामत्कुणलिक्षाद्या, येऽप्यमी क्षुद्रजन्तवः । तुदन्ति तेऽपि दुष्टास्तानजीर्णान्नान् गदा इव ॥ २२९ ॥
एवं षष्ठेऽरके पूर्णे, संपूर्यतावसर्पिणी । उत्सर्पिणी प्रविशति, ततोऽमुष्या विलक्षणा ॥ २३० ॥
आरंभसमये योऽयमुत्सर्पिण्या भवेदिह । पञ्चदशानां कालानां, स एवादिक्षणो भवेत् ॥ २३१ ॥
ते चामी—आवल्या १ ऽऽनप्राण २—स्तोक ३ लव ४, मुहूर्त्त ५ दिन ६ निशाः ७ करणम् ८ ।
नक्षत्र ९ पक्ष १० मास ११—त्वर्य १२, नानि च १३ हायन १४ युगे १५ च ॥ २३२ ॥

१ हिमवतो भरतनैकट्यात् तत्र नैव सिन्धुगङ्गाप्रवाहहान्यादि इति नैव क्वचिदाम्नोक्तं ।

यद्यपि ग्रन्थान्तरे ऋतोराषाढादित्वेन कथनादत्र श्रावणमासे ऋतोरारम्भो न घटते, तथापि भगवतीवृत्त्युक्तस्य ऋतौ श्रावणादिपक्षस्याश्रयणान्न दोष इति जंबू० प्र० वृ० ।

एवं च—नभः श्यामप्रतिपदि, करणे बालवाभिधे । उत्सर्पिणी प्रविशति, नक्षत्रेऽभिजिदाह्वये ॥ २३३ ॥
तदैव च प्रविशति, दुष्षमदुष्षमाभिधः । अरकः प्रथमोऽमुष्या, उत्सर्पिण्या मुखाधमः ॥ २३४ ॥
अस्मिन् सर्वपदार्थानां, वर्णगन्धादिपर्यवाः । क्षणे क्षणे विवर्द्धन्ते, प्रभृति प्रथमक्षणात् ॥ २३५ ॥
प्राग्भावितोऽवसर्पिण्यां यथाऽनन्तगुणक्षयः । वर्णादीनामुपचयो, भाव्योऽत्रानुक्षणं तथा ॥ २३६ ॥
मनुजाः प्राग्वदत्रापि, बिलवासिन एव ते । आयुर्देहादिपर्यायैः, किंतु वर्द्धिष्णवः क्रमात् ॥ २३७ ॥
प्रथमं षोडशाद्धानि, जनानामिह जीवितम् । वर्षाणि विंशतिं चान्ते, वर्द्धमानं शनैः शनैः ॥ २३८ ॥
एकहस्तोच्चवपुषः, प्रथमं मनुजा इह । वर्द्धमानाः क्रमादन्ते, भवन्ति द्विकरोच्छ्रिताः ॥ २३९ ॥
आहारादिस्वरूपं तु, तेषामत्रापि पूर्ववत् । प्रयान्ति दुर्गतावेव, मांसाहारा अमी अपि ॥ २४० ॥
एवमाद्येऽरके पूर्णे, द्वितीयः प्रविशत्यरः । दुःषमाख्यः प्रातिलोम्यात्प्रागुक्तदुष्षमोपमः ॥ २४१ ॥
प्रथमे समयेऽथास्य, पुष्करावर्त्तवारिदः । प्रादुर्भवेन्महीमाश्वासयन्नर्हन्निवामृतैः ॥ २४२ ॥
पुष्करं नाम शस्ताम्बु, तेनावर्त्तयति क्षितेः । संहरत्यशुभावस्थां, पुष्करावर्त्तकस्ततः ॥ २४३ ॥
तत्तत्क्षेत्रप्रमाणः स्याद्विष्कम्भायामतः स च । तीव्रार्कतापच्छेदाय, चन्द्रोदय इव क्षितेः ॥ २४४ ॥
क्षणात्क्षेत्रमभिव्याप्य, सर्वं स मृदु गर्जति । सान्त्वयन्निव भूलोकं, दुष्टमेघैरुपद्रुतम् ॥ २४५ ॥
स चाभितः प्रथयति, विद्युतो द्युतिमालिनीः । शुभकालप्रवेशार्हा, इव मङ्गलदीपिकाः ॥ २४६ ॥
मुशलस्थूलधाराभिः, स च वर्षन् दिवानिशम् । निर्वापयति भूपीठं, स्वादुस्वच्छहितोदकः ॥ २४७ ॥
स सप्तभिरहोरात्रैरन्तः स्नेहामृतार्द्रिताम् । क्ष्मां कुर्याच्छान्तसंतापां, प्राणेश इव वल्लभाम् ॥ २४८ ॥
ततस्तस्मिन्नुपरते, पुष्करावर्त्तकाम्बुदे । प्राप्तवार इव प्रादुर्भवति क्षीरवारिदः ॥ २४९ ॥
सप्त प्राग्वदहोरात्रान्, सोऽपि वर्षन् दिवानिशम् । चारु गोक्षीरतुल्याम्बुर्वर्णादीन् जनयेत्क्षितौ ॥ २५० ॥
क्षीराब्दे विरते तस्मिन्, घृतमेघो घृतोदकः । सप्त वर्षन्नहोरात्रान्, स्नेहं जनयति क्षितेः ॥ २५१ ॥
अहोरात्रांस्ततः सप्त, वर्षन्नमृतवारिदः । नानौषधीर्जनयति, नानावृक्षलताङ्कुरान् ॥ २५२ ॥
रसमेघस्ततः सप्ताहोरात्रान् सुरसोदकः । वनस्पतिषु तिक्तादीन्, जनयेत्पञ्चधा रसान् ॥ २५३ ॥
पञ्चानामेव भेदानां, यद्रसेषु विवक्षणम् । तल्लवणमधुरयोरभेदस्य विवक्षया ॥ २५४ ॥
माधुर्यरससंसर्गो, लवणे स्फुटमीक्ष्यते । स्वादुत्वं लवणक्षेपे, भवेत्सर्वरसेषु यत् ॥ २५५ ॥
अत्युत्तमा अमी मेघाः, पुष्करावर्त्तकादयः । जनयन्ति जगत्स्वास्थ्यं, पञ्चेव परमेष्ठिनः ॥ २५६ ॥
आद्योऽत्र शमयेद्दाहं, द्वितीयो जनयेच्छुभान् । वर्णगन्धरससस्पर्शान्, भुवः स्नेहं तृतीयकः ॥ २५७ ॥

तुर्यो वनस्पतीन् सर्वान्, पञ्चमस्तद्गतान् रसान् । आहुः प्रयोजनान्येवं, पञ्चानामप्यनुक्रमात् ॥ २५८ ॥
ततः क्रमाद्भवेद्भूमिर्भूरिभिर्नवपल्लवैः । वृक्षगुच्छलतागुल्मतृणादिभिरलङ्कृता ॥ २५९ ॥
तदा प्रसन्ना तृप्ता च, भूमिर्भाति नवाङ्कुरा । रोमाञ्चितेव भूयिष्ठकालेन कृतपारणा ॥ २६० ॥
प्राप्तधातुक्षया शुष्का, या मृतेवाभवन्मही । सा पुनर्यौवनं प्रापि, सत्कालेन रसायनैः ॥ २६१ ॥
मनोरमां सुखस्पर्शां, प्रोत्फुल्लद्रुममण्डिताम् । तदा विलोक्य ते भूमिं, मोदन्ते बिलवासिनः ॥ २६२ ॥
ततो बिलेभ्यस्ते मातृगर्भेभ्य इव निर्गताः । अपूर्वमिव पश्यन्ति, विश्वं प्राप्तमहासुखाः ॥ २६३ ॥
गणशस्तेऽथ सम्भूय, वन्दत्येवं परस्परम् । जातो भोः सुखकृत्कालो, रमणीयं च भूतलम् ॥ २६४ ॥
वनस्पतिभिरेभिश्च, दलपुष्पफलाञ्चितैः । मधुरैः पावनैः पथ्यैराहारो नो भवत्वथ ॥ २६५ ॥
अतः परं च यः कोऽपि, मत्स्यकूर्मादिजाङ्गलैः । करिष्यत्यशुभैर्वृत्तिं, स पापोऽस्मद्गणाद्बहिः ॥ २६६ ॥
तस्य नामापि न ग्राह्यं, वीक्षणीयं मुखं न च । छायाऽप्यस्य परित्याज्या, दूरेऽङ्गस्पर्शनादिकम् ॥ २६७ ॥
इति व्यवस्थां संस्थाप्य, ते रमन्ते यथासुखम् । भूतलेऽलङ्कृते विष्वग्, रम्यैस्तृणलतादिभिः ॥ २६८ ॥
कुतश्चित्पुरुषात्तेऽथ, जातिस्मृत्यादिशालिनः । क्षेत्राधिष्ठातृदेवाद्वा, कालानुभावतोऽपि च ॥ २६९ ॥
ते जनाः प्राप्तनैपुण्या, व्यवस्थामपरामपि । कुर्वन्ति नगरग्रामनिकायरचनादिकाम् ॥ २७० ॥
अन्नपाकाङ्गसंस्कारवस्त्रालङ्करणान्यपि । विवाहराजनीत्यादि, क्रमात्सर्वं प्रवर्त्तते ॥ २७१ ॥

तथोक्तं जम्बूद्वीपप्रज्ञप्तिवृत्तौ एतदरकवर्णने–"द्वितीयारे पुरादिनिवेशराजनीतिव्यवस्थादिकृज्जातिस्मारकादिपुरुषद्वारा वा क्षेत्राधिष्ठायकदेवप्रयोगेण वा कालानुभावजनितनैपुण्येन वा तस्य सुसम्भवत्वादिति." कालसप्ततौ तु–द्वितीयारके नगरादिस्थितिकारिणः कुलकरा भवन्तीत्युक्तं ।

तथाहि– "बीए उ पुराइकरो जाइसरो विमलवाहन १ सुदामो २ । संगम ३ सुपास ४ दत्तो ५ सुमुह ६ सुमई ७ कुलगरत्ति ॥ [कालसप्तति श्लो. ६२]

स्थानाङ्गसप्तमस्थानेऽप्युक्तं– "भरहे वासे आगमेस्साए ओसप्पिणीए सत्त कुलकरा भविस्संति, तं जहा–मित्तवाहणे १ सुभोमे २ य सुप्पभे ३ य सयंपभे ४ । दत्ते ५ सुहुमे ६ सुबन्धू ७ य आगमेसाण होक्खत्ति ॥

षट् संस्थानानि ते दध्युः, क्रमात्संहननानि च । यान्ति कर्मानुसारेण, जना गतिचतुष्टये ॥ २७२ ॥
उत्कर्षादरकस्यादौ, ते विंशत्यब्दजीविनः । अन्ते च त्रिंशदधिकशतवर्षायुषो जनाः ॥ २७३ ॥
आदौ स्युर्द्विकरोत्तुङ्गवपुषस्ते ततः क्रमात् । वर्द्धमानोच्छ्रया अन्ते, सप्तहस्तसमुच्छ्रिताः ॥ २७४ ॥
वर्णगन्धरसस्पर्शजीवितोच्चत्वपर्यवैः । वर्द्धमानैर्वर्द्धमानैः, पूर्णेऽस्मिन् दुष्षमारके ॥ २७५ ॥
तृतीयोऽरः प्रविशति, दुःषमसुषमाभिधः । स प्रातिलोम्यात्पूर्वोक्तचतुर्थारकसन्निभः ॥ २७६ ॥
अरकस्यास्य पक्षेषु, गतेषु प्रथमक्षणात् । एकोननवतावाद्यजिनोत्पत्तिः प्रजायते ॥ २७७ ॥

तथाहुः—कालदुगे तिचउत्थारएसु एगूणनवइपक्खेसु । सेसगएसु सिज्झंति हुंति पढमंतिमजिणिंदा ॥ [क्षेत्रसमास गा. १००]

एषोऽवसर्पिणीजातचतुर्विंशजिनोपमः । प्रायोऽगमानवर्णायुःकान्तिप्रभृतिपर्यवैः ॥ २७८ ॥
इत्युत्सर्पिण्यवसर्पिण्यर्हच्चक्र्यादयोऽखिलाः । प्रातिलोम्यानुलोम्याभ्यां, भाव्यास्तुल्या मनीषिभिः॥ २७९ ॥
मिथोऽतरं तावदेव, यस्योत्पत्तिर्यदोदिता । शेषेऽरकेऽवसर्पिण्यां सोत्सर्पिण्यां गतेऽरके ॥ २८० ॥
गतेऽरकेऽवसर्पिण्यां यस्योत्पत्तिर्यदोदिता । शेषेऽरके सोत्सर्पिण्यां, स्वयं भाव्या विवेकिभिः ॥ २८१ ॥
त्रयोविंशतिरर्हन्तस्तथैकादश चक्रिणः । अरकेऽस्मिन् भवन्त्येवं, सर्वेऽपि केशवादयः ॥ २८२ ॥
आयुरब्दशतं त्रिंशमादावत्राङ्गिनां भवेत् । पूर्वकोटिमितं चान्ते, वर्द्धमानं शनैः शनैः ॥ २८३ ॥
आदौ स्युः सप्तहस्तोच्चवपुषो मनुजास्ततः । वर्द्धमानाः पञ्चचापशतोच्चाङ्गाः स्मृताः श्रुते ॥ २८४ ॥
एवं पूर्णे तृतीयेऽरे, चतुर्थः प्रविशत्यरः । स प्राक्तनतृतीयाभः, सुषमदुष्षमाभिधः ॥ २८५ ॥
एकोननवतौ पक्षेष्वतीतेष्वादिमक्षणात् । चतुर्विंशस्यार्हतोऽस्मिन्नुत्पत्तिः स्याज्जिनेशितुः ॥ २८६ ॥
अरकेऽस्मिन् भवत्येवं, द्वादशाश्चक्रवर्त्त्यपि । तत्पद्धतिस्तु सर्वापि, विज्ञेया पूर्ववर्णिता ॥ २८७ ॥
उत्सर्पिण्यां स्युस्त्रिषष्टिः, शलाकापुरुषा इति । दशक्षेत्र्यां तृतीयारे, तुर्याऽऽद्यांशसंयुते ॥ २८८ ॥
एवं पञ्चमषष्ठारावपि भाव्यौ विपर्ययात् । पूर्वोदितावसर्पिण्या, द्वितीयाद्यारकोपमौ ॥ २८९ ॥
उत्सर्पिण्यां यथैष्यंत्यां, क्षेत्रेऽस्मिन् भरताभिधे । पद्मनाभाभिधः श्रीमान्, प्रथमोऽर्हन् भविष्यति ॥ २९० ॥
स च श्रेणिकराजस्य, जीवः सीमन्तकेऽधुना । नरके वर्त्तते रत्नप्रभायां प्रथमक्षितौ ॥ २९१ ॥
स्थितिं स तत्र चतुरशीतिवर्षसहस्रिकाम् । मध्यमामनुभूयाब्दैः, कियद्भिरधिकां ततः ॥ २९२ ॥
पादमूले भारतस्य, वैताढ्यस्य महागिरेः । देशे दूरगतक्लेशे, पाण्डुवर्द्धनसंज्ञके ॥ २९३ ॥
शतद्वाराभिधपुरे, सुतरत्नं भविष्यति । सुमतेः कुलकरस्य, भद्रास्त्रीकुक्षिसम्भवः ॥ २९४ ॥

श्रीवीरपद्मनाभयोरन्तरं चैवं—"चुलसीवाससहस्सा, वासा सत्तेव पञ्च मासा य । वीरमहापउमाणं अंतरमेयं वियाणाहि" ॥ इति नंदीवृत्तौ ।

इदं वीरमहापद्मयोर्निर्वाणोत्पादयोरन्तरं ज्ञेयं. श्रेणिकराजजीवस्य तु नरके किञ्चिदुक्तान्तरकालादधिकमेवायुः सम्भवि, श्रेणिके मृते तु कियत्कालं वीरार्हत इह विहारात्तावतः कालस्य तदायुष्यधिकत्वादिति ।

स चतुर्दशभिः स्वप्नैः, सूचितः शक्रपूजितः । जनिष्यते दिने यस्मिन्, तस्मिंस्तत्र पुरेऽभितः ॥ २९५ ॥
अंतर्बहिश्च पद्मानां, रत्नानां चातिभूयसाम् । वृष्टिर्भविष्यति प्राज्या, वारामिव तपात्यये ॥ २९६ ॥
ततः पित्रादयस्तस्य, मुदिता द्वादशे दिने । करिष्यन्ति महापद्म, इति नाम गुणानुगम् ॥ २९७ ॥

साधिकाष्टाब्दवयसमथैनं सुमतिः पिता । स्थापयिष्यति राज्ये स्वे, ततो राजा भविष्यति ॥ २९८ ॥
राज्यं पालयतस्तस्य, शक्रस्येव महौजसः । देवौ महर्द्धिकावेत्य, सेविष्येते पदद्वयम् ॥ २९९ ॥
यक्षाणां दाक्षिणात्यानां, पूर्णभद्राभिधः प्रभुः । माणिभद्रश्चौत्तराहयक्षाधीशः सुरेश्वरः ॥ ३०० ॥
एतौ द्वावपि यक्षेन्द्रौ, प्रभोस्तस्य करिष्यतः । सेनान्याविव सैन्यस्य, कार्यं शत्रुजयादिकम् ॥ ३०१ ॥
सामन्तादिस्ततस्तस्य, श्रेष्ठिपौरजनादिकः । मिथः परिच्छदः सर्वः, सम्भूयैवं वदिष्यति ॥ ३०२ ॥
अहो सुरेन्द्रौ कुर्वाते, अस्यास्माकं महीपतेः । सेनाकार्यं महाश्चर्यपुण्यप्राग्भारशालिनः ॥ ३०३ ॥
महापद्मनृपस्याथ, देवसेन इति स्फुटम् । नामास्तु गुणनिष्पन्नं, द्वितीयं रुचिरं ततः ॥ ३०४ ॥
देवसेननृपस्याथ, राज्यं पालयतः क्रमात् । उत्पत्स्यते हस्तिरत्नं, चतुर्दन्तं महोज्ज्वलम् ॥ ३०५ ॥
शक्रमैरावणारूढमिव तं तेन हस्तिना । विचरन्तं शतद्वारपुरे वीक्ष्य जनाः समे ॥ ३०६ ॥
वदिष्यन्ति मिथस्ते यद्देवसेनमहीपतेः । वाहनं विमलो हस्ती, ततो विमलवाहनः ॥ ३०७ ॥
तृतीयमिति नामास्तु, त्रिनामैवं भविष्यति । महापद्मो देवसेनो, राजा विमलवाहनः ॥ ३०८ ॥
एवं त्रिंशतमब्दानि, राज्यं भुक्त्वा महाशयः । दानं दत्त्वाऽब्दिकं प्रौढोत्सवैः स प्रव्रजिष्यति ॥ ३०९ ॥
द्वादशाब्दानि सार्द्धानि, पक्षेणाभ्यधिकान्यथ । छद्मस्थत्वे तपः कृत्वा, स केवलमवाप्स्यति ॥ ३१० ॥
सप्रतिक्रमणो धर्मो, यथा पञ्चमहाव्रतः । मुनीनां श्रावकाणां च, द्वादशव्रतबन्धुरः ॥ ३११ ॥
महावीरेण जगदे, जगदेकहितावहः । महापद्मोऽपि भगवांस्तथा सर्वं वदिष्यति ॥ ३१२ ॥
अस्य प्रभोर्गणधरा, एकादश गणा नव । श्रीवीरवद्भविष्यन्ति वर्णलक्ष्मोच्छ्रयाद्यपि ॥ ३१३ ॥
कल्याणकानां पञ्चानां, तिथिमासदिनादिकम् । श्रीवर्द्धमानवद्भावि, पद्मनाभप्रभोरपि ॥ ३१४ ॥
सार्द्धषण्मासहीनानि, वर्षाणि त्रिंशतं च सः । पालयिष्यति सर्वज्ञपर्यायं सुरसेवितः ॥ ३१५ ॥
द्विचत्वारिंशदब्दानि, श्रामण्यमनुभूय च । द्विसप्तत्यब्दसर्वायुः, परमं पदमेष्यति ॥ ३१६ ॥
सुपार्श्वो वर्द्धमानस्य, पितृव्यो यः प्रभोरभूत् । सूरदेवाभिधो भावी, स द्वितीयो जिनोत्तमः ॥ ३१७ ॥
पोट्टिलस्य च यो जीवः, स तृतीयो भविष्यति । सुपार्श्वनामा देहादिमानैर्नेमिजिनोपमः ॥ ३१८ ॥

यस्तु हस्तिनापुरवासी भद्रासार्थवाहीपुत्रो द्वात्रिंशद्भार्यात्यागी वीरशिष्यः सर्वार्थसिद्धोत्पन्नो महाविदेहान्तःसेत्स्यन्नौपपातिकोपाङ्गे प्रोक्तः स त्वन्य एव ।

जीवो दृढायुषस्तुर्यो, जिन भावी स्वयम्प्रभः । कार्त्तिकात्मा च सर्वानुभूतिः पञ्चमतीर्थकृत् ॥ ३१९ ॥
श्रावस्त्यां शङ्खशतकावभूतां श्रावकोत्तमौ । तत्र कोष्ठकचैत्ये च, श्रीवीरः समवासरत् ॥ ३२० ॥
भगवन्तं नमस्कर्त्तुं, शङ्खाद्याः श्रावका ययुः । ततो निवर्त्तमानांस्तान्, श्राद्धः शङ्खोऽब्रवीदिति ॥ ३२१ ॥
उपस्कारयत प्राज्यमाहारमशनादिकम् । यथा तदद्य भुञ्जानाः, पाक्षिकं पर्व कुर्महे ॥ ३२२ ॥

ते च शङ्खवचः श्राद्धास्तथेति प्रतिपेदिरे । शङ्खश्च निर्मलमतिर्गृहेगत्वा व्यचिन्तयत् ॥ ३२३ ॥
न श्रेयानद्य भुक्त्वा मे, पौषधः पाक्षिकेऽहनि । तत्कुर्वेऽपोषणेनैव, विशुद्धं पर्वपौषधम् ॥ ३२४ ॥
शङ्खमागमयन्ते स्म, श्राद्धास्ते सज्जभोजनाः । अनागच्छति तस्मिंश्च, तदाह्वानाय तद्गृहे ॥ ३२५ ॥
शतकापरनामा द्राक्, पुष्कली श्रावको ययौ । शङ्खभार्योत्पला चास्य, चकाराभ्यागतोचितिम् ॥ ३२६ ॥
ततः पौषधशालायां, शङ्खाढ्यायां विवेश सः । प्रतिक्रम्येर्यापथिकं, शङ्खश्रावकमित्यवक् ॥ ३२७ ॥
सिद्धमन्नादि तच्छीघ्रमागच्छ श्रावकव्रजे । तद् भुक्त्वाऽद्य यथा पर्वपौषधं प्रतिजागृमः ॥ ३२८ ॥
ऊचे शङ्खः पौषधिकोऽपोषणेनास्मि सोऽप्यथ । न्यवेदयत्तत्सर्वेषां, तत्ते बुभुजिरे ततः ॥ ३२९ ॥
शङ्खोऽथापारयित्वैव, पौषधं प्राणमज्जिनम् । प्रातः श्राद्धाः परेऽप्येवं, शुश्रुवुर्देशनां प्रभोः ॥ ३३० ॥
देशनाऽन्ते श्रावकास्ते, गत्वा शङ्खस्य सन्निधौ । अवादिषुरुपालम्भं, ह्यः साध्वस्मानहीलयः ॥ ३३१ ॥
ततस्तान् भगवानूचे, मा शङ्खं हीलयन्तु भोः । सुदृष्टिर्दृढधर्माऽयं, सुष्ठु जागरितो निशि ॥ ३३२ ॥
एवं यो वर्द्धमानेन, स्तुतस्तादृशपर्षदि । विदेहे सेत्स्यमानोऽसौ, पञ्चमाङ्गे उदीरितः ॥ ३३३ ॥
स्वर्गेऽस्यायुरपि प्रोक्तं, श्रुते पल्यचतुष्टयम् । षष्ठो जिनस्तु श्रीमल्लिजिनस्थाने भविष्यति ॥ ३३४ ॥
ततश्च—संख्येय एव कालः स्याद्भाविषष्ठजिनोदये । तत् षष्ठजिनजीवो यः, शङ्खोऽन्यः सेति बुध्यते ॥ ३३५ ॥
स्थानांगवृत्तौ त्वयमेव शङ्खो भावितीर्थकृत्तया प्रोक्तस्तदाशयं न वेद्मीति[1] ।
जीवः शङ्खस्य षष्ठोऽर्हन्, भावी देवश्रुताभिधः । भविष्यत्युदयाख्योऽर्हन्नन्दीजीवश्च सप्तमः ॥ ३३६ ॥
अष्टमोऽर्हन् सुनन्दस्य, जीवः पेढालसंज्ञकः । आनन्दजीवो नवमः, पोट्टिलाख्यो जिनेश्वरः ॥ ३३७ ॥
दशमः शतकस्यात्मा, शतकीर्त्तिर्भविष्यति । शङ्खस्यायं सहचरः, पुष्कलीत्यपराह्वयः ॥ ३३८ ॥
श्रीहैमवीरचरित्रे तु नवमः कैक्कसीजीवो दशमस्तु रेवतीजीव इति दृश्यते ।
सुता चेटकराजस्य, सुज्येष्टा स्वीकृतव्रता । आतापनां करोति स्म, निवस्त्राऽन्तरुपाश्रयम् ॥ ३३९ ॥
इतः परिव्राट् पेढालो, विद्यासिद्धो गवेषयन् । विद्यादानोचितं पात्रमपश्यत्तां महासतीम् ॥ ३४० ॥
यद्यस्या ब्रह्मचारिण्याः, कुक्षिजस्तनयो भवेत् । तस्यार्हः स्यात्तदा व्याघ्रीदुग्धस्य स्वर्णपात्रवत् ॥ ३४१ ॥
विचिन्त्यैवं धूमिकया, व्यामोहं विरचय्य सः । तद्योनावक्षिपद्बीजं, क्रमाज्जातश्च दारकः ॥ ३४२ ॥
सह मात्राऽन्यदा सोऽगाज्जिनाभ्यर्णं तदा जिनम् । विद्याभृत्कालसन्दीपः, को मां हन्तेति पृष्टवान् ?॥ ३४३ ॥
स्वामिनोक्ते सत्यकिनि, तमुपेत्य जहास सः । मारयिष्यसि मां त्वं रे, इत्युक्त्वाऽपातयत्पदोः ॥ ३४४ ॥
अपहृत्यान्यदा साध्वीसकाशाज्जनकेन सः । समग्रा ग्राहितो विद्या, धीरः साधयति स्म ताः ॥ ३४५ ॥
रोहिण्या विद्यया व्यापादितो जन्मसु पञ्चसु । षष्ठे जन्मनि षण्मासायुषा तुष्टाऽपि नादृता ॥ ३४६ ॥

---

१ श्रीस्थानाङ्गवृत्तौ हि शङ्खस्य भावितीर्थकृत्त्वोक्तावपि न षष्ठजिनतयोक्तिः ततो नामान्तरेणान्यजिनपूर्वभवः स्यात् ।

प्राग्जन्मसाधनात्तुष्टा, भवेऽस्मिन् सप्तमे च सा । ललाटे विवरं कृत्वा, हृदि तस्य विवेश च ॥ ६४७ ॥
ललाटविवरं त्वक्षि, जातं दिव्यानुभावतः । जघान कालसन्दीपं, स पेढालं च दाम्भिकम् ॥ ३४८ ॥
प्राप्तो विद्याधरेन्द्रत्वं, नत्वा सर्वान् जिनेश्वरान् । नाट्यपूजां प्रभोः कृत्वा, रमते स्म यथासुखम् ॥ ३४९ ॥
महादेव इति ख्यातो, रुद्र एकादशः स च । एकादशो जिनो भावी, सत्यकी सुव्रताभिधः ॥ ३५० ॥
द्वारकाधिपतिः कृष्णवासुदेवो महर्द्धिकः । भक्तः श्रीनेमिनाथस्य, सद्धर्मः श्रावकोऽभवत् ॥ ३५१ ॥
अष्टादशसहस्राणि, वन्दमानोऽन्यदा मुनीन् । स वन्दनेन गुरुणा, सम्यक्त्वं क्षायिकं दधौ ॥ ३५२ ॥
सप्तमक्षितियोग्यानि, दुष्कृतान्यपवर्त्तयन् । चक्रे तृतीयक्ष्मार्हाणि, तीर्थकृन्नाम चार्जयत् ॥ ३५३ ॥

तथोक्तं–"तित्थयरत्तं सम्मत्तखाइयं सत्तमीइ तइयाए । वंदणएणं विहिणा बद्धं च दसारसीहेण" ॥

[संबोधसत्तरि गा. १०६]

कृष्णजीवोऽममाख्यः स, द्वादशो भविता जिनः । सुरासुरनराधीशप्रणतक्रमपङ्कजः ॥ ३५४ ॥

वसुदेवहिण्डौ तु–"कण्हो तइयपुढवीओ उव्वट्टित्ता भारहे वासे सयदुवारे नयरे पत्तमंडलियभावो पव्वज्जं पडिवज्जिय तित्थयरनामं पवज्जित्ता वेमाणिए उवज्जित्ता दुवालसमो अममनाम तित्थयरो भविस्सइ" इत्युक्तमिति ज्ञेयं ।

बलदेवस्य जीवोऽर्हन्निष्कषायस्त्रयोदशः । कृष्णाग्रजः कृष्णतीर्थे, सेत्स्यतीत्यन्य एव सः ॥ ३५५ ॥

'भवसिद्धिओ य भयवं ? सिज्झिस्सइ कण्हतित्थंमि' इत्यावश्यकनिर्युक्तिवचनात् ।

श्रीनेमिचरित्रेऽपि'—'गच्छन्त्यवश्यं तेऽधस्तात्त्वं गामी वालुकाप्रभाम् । श्रुत्वेति कृष्णः सद्योपि नितान्त विधुरोऽभवत् ॥ भूयोऽभ्यधत्त सर्वज्ञो, मा विषीद जनार्दन ! । तत उद्धृत्य मर्त्यस्त्वं, भावी वैमानिकस्ततः ॥ उत्सर्पिण्यां प्रसर्पन्त्यां, शतद्वारपुरेशितुः । जितशत्रोः सुतोऽर्हंस्त्वं, द्वादशो नामतोऽमः ॥ ब्रह्मलोकं बलो गामी, मर्त्यो भावी ततश्च्युतः । ततोऽपि देवतश्च्युत्वा, भाव्यत्र भरते पुमान् ॥ उत्सर्पिण्यां प्रसर्पन्त्याममममाख्यस्य केशव ! । तीर्थनाथस्य ते तीर्थे, स मोक्षमुपयास्यति ॥ [त्रिषष्ठिशलाका पर्व. ८. सर्ग. ११. श्लो. ५० थी ५४]

भावी जीवश्च रोहिण्या, निष्पुलाकश्चतुर्दशः । जिनो वृजिनहृद्देवनरदेवनतक्रमः ॥ ३५६ ॥
पुरे राजगृहेऽथासीत्प्रसेनजिन्महीपतेः । नागाख्यो रथिकस्तस्य, प्रेयसी सुलसाभिधा ॥ ३५७ ॥
तया सुतार्थी स्वपतिरिन्द्रादीन्मानयन् सुरान् । अन्यां परिणयेत्युक्तो, न मेनेऽत्यन्ततन्मनाः ॥ ३५८ ॥
तस्याः सम्यक्त्वविषयां, प्रशंसां शक्रनिर्मिताम् । अश्रद्दधत्सुरः कोऽपि, मुनिरूपः समेत्य ताम् ॥ ३५९ ॥
ऊचे तव गृहे लक्षपाकं तैलं यदस्ति तत् । दीयतां भिषजोक्तं मे, ततः सा मुमुदे भृशम् ॥ ३६० ॥
आहरन्त्याश्च तत्तूर्णं, भग्नं देवेन भाजनम् । एवं द्वितीयं तृतीयं, नाखिद्यत तथाऽप्यसौ ॥ ३६१ ॥
ततस्तुष्टेन देवेन, द्वात्रिंशद्गुटिका ददे । आसां प्रभावाद् द्वात्रिंशद्भविताः सुतास्तव ॥ ३६२ ॥
प्रयोजनेऽहं स्मर्त्तव्य, इत्युक्त्वा स तिरोदधौ । सर्वाभिरेकः पुत्रोऽस्त्वित्याजह्रे गुटिकास्त्वसौ ॥ ३६३ ॥

द्वात्रिंशत्यथ गर्भेषु, कुर्वत्सु जठरव्यथाम् । स्मृतः स देवश्चक्रे द्राक्, स्वास्थ्यं सा सुषुवे सुतान् ॥ ३६४ ॥
सा चेयं सुलसा पञ्चदशोऽर्हन्निर्ममाभिधः । षोडशो रेवतीजीवश्चित्रगुप्तो भविष्यति ॥ ३६५ ॥
तथाहि—गोशालमुक्तया तेजोलेश्यया कृशिताङ्गकः । अन्येद्युर्मेढिकग्रामे, श्रीवीरः समवासरत् ॥ ३६६ ॥
अभूत्सलोहितं वर्चस्ततो वार्त्ता जनेऽभवत् । गोशालकतपस्तेजोदग्धोऽर्हन्मृत्युमेष्यति ॥ ३६७ ॥
तत् श्रुत्वा सिंहनामानमनगारं महारवैः । रुदंतं प्रभुराहूयेत्येवं स्माह कृपानिधिः ॥ ३६८ ॥
त्वया किं खिद्यते नाहं, मरिष्याम्यधुना भुवि ? । विहृत्याद्धान् पञ्चदशाध्यर्द्धान् गन्तास्मि निर्वृतिम् ॥ ३६९ ॥
किञ्च त्वं गच्छ नगरे, रेवतिश्राविकागृहे । द्वे कुष्माण्डफले ये च, मदर्थं संस्कृते तया ॥ ३७० ॥
ताभ्यां नार्थः किन्तु बीजपूरपाकः कृतस्तया । स्वकृते तं च निर्दोषमेषणीयं समाहर ॥ ३७१ ॥
ततश्च मुनिना तेन, याचिता रेवती मुदा । कृतार्थं मन्यमाना स्वं, ददौ तस्मै तदौषधम् ॥ ३७२ ॥
भगवानपि नीरागमनास्तदुदरेऽक्षिपत् । तत्क्षणात्क्षीणरोगोऽभूत्सङ्घः सर्वश्च पिप्रिये ॥ ६७३ ॥
अर्जितानेकसुकृतसञ्चया रेवती तु सा । षोडशस्तीर्थकृद्भावी, चित्रगुप्तोऽभिधानतः ॥ ३७४ ॥
गवालिजीवः समाधिर्भावी सप्तदशो जिनः । संवराख्योऽष्टादशोऽर्हन्, भावी जीवश्च गार्गलेः ॥ ३७५ ॥
एकोनविंशतितमो, जीवो द्वीपायनस्य च । यशोधराख्यस्तीर्थेशो, भविता भवितारकः ॥ ३७६ ॥
जिनोऽथ विंशतितमः, कर्णजीवो भविष्यति । जीवोऽर्हन्नारदस्यैकविंशो मल्लजिनेश्वरः ॥ ३७७ ॥
विद्याधरः श्रावकोऽभूत्परिव्राडम्बडाभिधः । सोऽन्यदा देशनां श्रुत्वा, वर्द्धमानजिनेशितुः ॥ ३७८ ॥
गच्छन् राजगृहं चम्पानगर्याः प्रभुणोदितः । सुलसाया मम क्षेमकिंवदन्तीं निरूपयेः ॥ ३७९ ॥
इति स्थानाङ्गवृत्तौ. क्वचिद्धर्मलाभमवीवददिति श्रूयते ।
अम्बडोऽचिन्तयत्पुण्यवतीयं सुलसा सती । संदेशं संदिशत्येवं, यस्यै श्रीत्रिजगद्गुरुः ॥ ३८० ॥
करोम्यस्याः परीक्षां च, गुणस्तस्याः क ईदृशः? । ध्यात्वेति गत्वा तेनोचे, परिव्राड्वेषधारिणा ॥ ३८१ ॥
भक्त्या मे भोजनं देहि, धर्मस्ते भविता महान् । ततो जगाद सा शुद्धसम्यक्त्वैकदृढाशया ॥ ३८२ ॥
प्रदत्ते भोजने येभ्यो, धर्मः सञ्जायते महान् । विदिता एव ते भ्रातः !, साधवो विजितेन्द्रियाः ॥ ३८३ ॥
साऽन्तरिक्षे ततः पद्मासनासीनो जनान् बहून् । विस्मापयामास मासतपस्वीति जनार्चितः ॥ ३८४ ॥
लोकः पप्रच्छ भगवंस्तपः पारणयाऽनया । पावयिष्यसि कं धन्यं ? स प्राह सुलसामिति ॥ ३८५ ॥
दिष्ट्या तव गृहे भाग्यैस्तपस्वी पारयिष्यति । सुलसोक्ता जनैरूचे, किं नः पाखण्डिकैरिति ? ॥ ३८६ ॥
अम्बडोऽपि तदाकर्ण्याचिन्तयद्युक्तमादिशत् । संदेशं जिनराजोऽस्यै, यस्याः सम्यक्त्वमीदृशम् ॥ ३८७ ॥
ततः परिवृत्तः पौरैरुपेत्य सुलसागृहे । एनां प्रोक्ताप्तसंदेशः, प्रशशंस मुहुर्मुहुः ॥ ३८८ ॥
भविष्यन्नम्बडः सोऽयं, द्वाविंशो देवतीर्थकृत् । त्रयोविंशोऽनन्तवीर्यो, जीवो द्वारमदस्य सः ॥ ३८९ ॥

यस्त्वम्बडो महाविदेहे सेत्स्यन्नौपपातिकेऽभिहितः सोऽन्य एव सम्भाव्यते इति स्थानाङ्गवृत्तौ । चतुर्विंशः स्वातिजीवो, भद्रकृन्नाम तीर्थकृत् । भविष्यति चतुर्थारस्यादौ श्रीवृषभोपमः ॥ ३९० ॥

अयं भाविजिननामक्रमः श्रीवीरचरित्रोद्धृतपद्यबद्धदीवालीकल्पानुसारेण.

श्रीजिनप्रभसूरिकृतप्राकृतगद्यदीवालीकल्पाभिप्रायस्त्वेवं–तइओ उदाइजीवो सुपासो, चउत्थो पोट्टिलजीवो सयंपभो, पञ्चमो दढाउजीवो सव्वाणुभूई, छट्ठो कत्तियजीवो देवसुओ, सत्तमो संखजीवो उदओ, अट्ठमो आणंदजीवो पेढालो, नवमो सुनंदजीवो पुट्टिलो, दसमो सयंगजीवो सयकित्ती, इगारसमो देवईजीवो मुणिसुव्वओ, बारसमो कण्हजीवो अममो, तेरसमो सच्चईजीवो निक्कसाओ, चउद्दसमो बलदेवीजीवो निप्पुलाओ, पन्नरसमो सुलसाजीवो निम्ममो, सोलसमो रोहिणीजीवो चित्तगुत्तो, केई भणंति –"कक्किपुत्तो सित्तुंज्जे उद्धारं करित्ता जिणभवणमंडियं पुहविं काउं अज्जियतित्थयरनामो सग्गं गंतुं चित्तगुत्तो जिणवरो होही. इत्थ य बहुसुयमयं पमाणं. सत्तरसमो रेवईजीवो समाही, अट्ठारसमो सयलजिवो संवरो, तेवीसइमो अस्जीवो अणंतविरिओ, चउवीसइमो बुद्धजीवो भद्दंकरो. उक्तशेषाः प्राग्वत् ।

अत्र तृतीयो य उदायी उक्तः, स तु स्थानाङ्गसूत्रोक्तवीरशासननिबद्धतीर्थकृन्नामनवजीवान्तःपाती कोणिकपुत्रः, यः कोणिकेऽपक्रान्ते पाडलिपुत्रं नगरं न्यवीविशत्, यश्च स्वभवने पर्वदिनेषु सद्गुरूनाहूय परमसंविग्नः पौषधाद्यन्वतिष्ठत्, एकदा च देशनिर्घाटितरिपुराजपुत्रेण द्वादशवार्षिकव्रव्यसाधुना अभव्येन पौषधिकः कङ्कायःकर्त्तिकया कण्ठकर्त्तनेन विनाशितः सोऽयमिति ।

समवायाङ्गसूत्रे तु–महापउमे १ सुरादेवे २ सुपासे य ३ सयंपभे ४ । सव्वाणुभूति ५ अरहा, देवगुत्ते ६जिणुत्तमे ॥ उदए ७ पेढालपुत्ते य ८, पोट्टिले ९ सतएति य १० । मुणिसुव्वते य अरहा ११, सव्वभावविदु जिणे ॥ अममे १२ णिक्कसाए य १३. णिप्पुलाए य १४ निम्ममे १५ । चित्तगुत्ते १६ समाही य १७, आगमेस्साए होक्खई ॥ संवरे १८ अणिअट्टी य १९, विजए २० विमलेति य २१ । देवोववाए २२ अरहा, अणंतविरिए २३ भद्देति य २४ ॥

इति नामक्रमो दृश्यते ।

तेषां पूर्वभवनामान्यपि तत्रैवेत्थं दृश्यन्ते– "सेणिअ १ सुपास २ उदए ३ पोट्टिल ४ अणगार तह दढाऊ ५ अ । कत्तिअ ६ संखे अ ७ तहा नंद ८ सुनंदे ९ अ सयए अ १० ॥ बोधव्वा देवई चेव ११ सच्चई १२ तह वासुदेव १३ बलदेवे १४ । रोहिणी १५ सुलसा १६ चेव तत्तो खलु रेवती १७ चेव ॥ तत्तो हवइ सयाली १८ बोधव्वे खलु तहा भयाली य १९ । दीवायणे अ २० कण्हो २१ तत्तो खलु नारए चेव ॥ अंबडे अ २३ तहा साइबुद्धे अ २४ होइ बोधव्वे । उस्सप्पिणी आगमेस्साए तित्थयराणं तु पुव्वभवा ॥

इति, प्रवचनसारोद्धारेऽप्येवं दृश्यते, किं चात्र वासुदेवजीवस्वयोदशजिनः प्रोक्तः, अंतकृत्सूत्रे तु द्वादशस्तदुक्तं "आगमेस्साए उस्सप्पिणीए पुंडेसु जणवएसु सतदुवारे नयरे बारसमो अममो णाम अरहा भविस्सइत्ति ।"

अत्र द्वादशतीर्थकरोत्पत्तिः साधिकषोडशाब्धिव्यतिक्रमे स्यात्, विमलजिनस्थानीयत्वात्तस्य, इयांश्च कालो नारकभवाद्यैश्चतुर्भिर्भवैः पूर्वोक्तैः सुपूरः स्यात्, त्रयोदशजिनस्तु वासुपूज्यस्थानीयः, तदुत्पत्तिस्तु साधिकषट्चत्वारिंशदब्धिव्यतिक्रमे, तावान् कालस्तु पूर्वोक्तैर्भवैर्दुष्पूरो[1] वासुदेवजीवस्येति ध्येयं, अत्र चैतेषां पक्षाणां विसंवादे बहुश्रुताः सर्वविदो वा प्रमाणमिति ज्ञेयं ।

ये च नोक्ता व्यतिकरा, जिनानां भाविनामिह । केचित्तेऽत्यन्तविदिताः, केचिच्चाविदिता इति ॥ ३९१ ॥

दीर्घदन्तो १ गूढदन्तः २, शुद्धदन्तस्तृतीयकः ३ । श्रीदन्त ४ श्रीभूति ५ सोमाः ६, पद्मः ७ सप्तमचक्रभृत् ॥ महापद्मश्च ८ शमश्च ९, चक्री च विमलाभिधः १० । विमलवाहनो ११ रिष्टो १२, भाविनश्चक्रवर्त्तिनः ॥

इति पद्मदीवालीकल्पकालसप्ततिकयोः, किंतु दीवालीकल्पे श्रीदन्तस्थाने श्रीचन्द्रो दृश्यते. पूर्वोक्तप्राकृतदीवालीकल्पे तु अष्टमो नायको नवमो महापद्म उक्तः, शेषाः प्राग्वत् ।

समवायाङ्गे तु—भरहे य १ दीहदंते य २, गूढदंते य ३ सुद्धदंते य ४ । सिरिगुत्ते य ५ सिरिभूई ६, सिरिसोमे य ७ सत्तमे ॥ पउमे य ८ महापउमे ९, विमलवाहणे १० विपुलवाहणे ११ चेव । रिट्ठे १२ बारसमे वुत्ते, आगमेस्साण होक्खंति ॥

नन्दिश्च १ नन्दिमित्रश्च २, तथा सुन्दरबाहुकः ३ । महाबाहु ४ रतिबलो ५, महाबल ६ बलाभिधौ ७ ॥ द्विपृष्ठश्च ८ त्रिपृष्ठश्च ९, वासुदेवा अमी नव । उत्सर्पिण्यां भविष्यन्त्यां, भविष्यन्ति महर्द्धिकाः ॥

इति पद्मदीवालीकल्पकालसप्ततिकयोः, प्राकृतदीवालीकल्पे तु—सुन्दरबाहुरित्यत्र सुन्दरो बाहुश्चेति द्वावुक्तौ, त्रिपृष्ठश्च नोक्त इति, शेषं प्राग्वदिति ।

"नन्दे य १ नंदिमित्ते य २, दीहबाहू ४ तहा महाबाहू ४ । अतिबल ५ महब्बले ६ बलभद्दे य ७ सत्तमे ॥ दुविट्ठू य ८ तिविट्ठू य ९ आगमिस्साण विण्हुणो ।" इति समवायांगे । रामा बलो १ वैजयन्तो २ ऽजितो ३ धर्मश्च ४ सुप्रभः ५ । सुदर्शनः ६ स्यादानन्दो ७ नन्दनः ८ पद्म ९ इत्यपि ॥ इति प्रागुक्तग्रन्थयोः ।

प्राकृतदीवालीकल्पे तु—आद्यो वैजयन्तो नवमः संकर्षणाख्यः, शेषं प्राग्वत् ।

जयंत १ विजए २ भद्दे ३, सप्पभे य ४ सुदंसणे ५ । आणंदे ६ णंद ७ पउमे ८, संकरिसणे य ९ अपच्छिमे ॥ इति तु समवायाङ्गे । तिलको १ लोहजङ्घश्च २, वज्रजङ्घश्च ३ केसरी ४ । बलि ५ प्रह्लादनामानौ ६, तथा स्यादपराजितः ७ ॥ भीमः ८ सुग्रीव ९ इति च, भाविनः प्रतिकेशवाः ।

इहापि समवायाङ्गे बलिर्नास्ति. सप्तमो भीमोऽष्टमो महाभीमश्चेति दृश्यते । उत्सर्पिण्यां भविष्यन्तः शलाकापुरुषा अमी ॥

एकषष्टिर्भाविनोऽमी, अरकेऽत्र तृतीयके । शलाकापुरुषौ च द्वौ, चतुर्थेऽरे भविष्यतः ॥ ३९२ ॥

---

१ अत्रान्यत्रापि नामभेदे संज्ञाभेदः, अनेकनामत्वादनेकेषां, द्वादशत्रयोदशमाधानं तु पूर्वानुपूर्वीपश्चानुपूर्वीविलोकने न दुष्करः ।

अथ प्रकृतं–

सिद्धे जिने चतुर्विंशे, चक्रिणि द्वादशे मृते । संख्येयपूर्वलक्षाणि, धर्मनीति प्रवर्त्स्यतः ॥ ३९३ ॥

यदुक्तं प्रवचनसारोद्धारे–"उस्सप्पिणि अंतिमजिण तित्थं सिरिरिसहनाहपज्जाया । संखिज्जा जावइया तावयमाणं धुवं भविही ॥ [श्लोक १४३८]

इह तीर्थप्रवृत्तिकालमानमिदमुक्तं, नीतिरपि पञ्चमारकपर्यन्त इव धर्मं यावदेव स्थास्यतीति सम्भाव्यते ।

क्रमात्कालानुभावेन, स्वल्पस्वल्पकषायकाः । नापराधं करिष्यन्ति, मनुष्या भद्रकाशयाः ॥ ३९४ ॥
शास्तारोऽपि प्रयोक्ष्यन्ते, न सौम्या दण्डमुल्बणम् । अभावादपराधानां, नापि दण्डप्रयोजनम् ॥ ३९५ ॥
तेषामल्पापराधानां, दण्डनीतिप्रवर्त्तकाः । चक्रिवंश्याः कुलकराः, क्रमात्रिः पञ्च भाविनः ॥ ३९६ ॥
तेषां हाकारमाकारधिक्कारा दण्डनीतयः । पञ्चानां प्रथमानां स्युस्तिस्रो मन्त्वनुसारतः ॥ ३९७ ॥
द्वितीयानां च द्वे नीत्यौ, स्यातामन्त्यविवर्जिते । तृतीयानां च पञ्चानां, हाकार एव केवलम् ॥ ३९८ ॥
एवं कुलकरेष्वेषु, व्यतिक्रान्तेषु कालतः । जनाः सर्वेऽहमिन्द्रत्वं, प्रपत्स्यन्ते पराऽवशाः ॥ ३९९ ॥
स्वत एव प्रवर्त्तन्ते, ते न्यायेष्वेव मानवाः । न ते शासितुमर्हन्ति, तेषां शास्ता न कश्चन ॥ ४०० ॥

एवं चात्रावसर्पिणीप्रातिलोम्यौचित्येनोत्सर्पिणीषु चतुर्थारकस्यादौ चतुर्विंशतितमजिननिर्वाणनन्तरं पञ्चदश कुलकरा उक्ताः, परमेतन्निर्णेतुं न शक्यते यदुत्सर्पिण्यां द्वितीयारकपर्यन्ते कुलकरा भवन्ति उत चतुर्थारकस्यादौ भवन्ति ? यत एष निर्णयो ह्यनन्तरभविष्यदुत्सर्पिण्यनुसारेण कर्त्तुं शक्यते, भविष्यदुत्सर्पिण्यां च कुलकरानाश्रित्य शास्त्रे भूयान् विसंवादो दृश्यते ।

तथाहि–कालसप्ततिकादीपालिकाकल्पादिषु च द्वितीयारकपर्यन्ते विमलवाहनादयः सप्त कुलकरा उक्ताः, स्थानाङ्गे तु सप्तमे स्थानके सप्त कुलकरा उक्ताः, तत्र सुमतिनामापि नोक्तं, दशमे तु सीमङ्करादयो दशोक्तास्तत्र सुमतिनामोक्तं, परं प्रान्ते न, समवायाङ्गे तु सप्त तथैव, दश तु विमलवाहनादयः सुमतिपर्यन्ता उक्ताः । स्थानाङ्गनवमस्थानके च सुमतिपुत्रत्वेन पद्मनाभोत्पत्तिरुक्ता, तथा जम्बूद्वीपप्रज्ञप्तिसूत्रे च द्वितीयारके कुलकरा मूलत एव नोक्ताः, चतुर्थारके तु एकस्मिन् पक्षे मूलतो नोक्ताः, पक्षान्तरे च पञ्चदशोक्तास्तथाहि–"जाव ओसप्पिणीए पच्छिमे तिभागे वत्तव्वया सा भाणियव्वा कुलगरवज्जा उसभसामिवज्जा. अण्णे पढंति तीसे णं समाए पढमे तिभाए इमे पण्णरस कुलगरा समुप्पज्जिस्संति, तं जहा–सुमइ जाव उसभे सेसं तं चेव । दंडनीईओ पडिलोमाओ णेयव्वाओ." अत्र च ऋषभनामा कुलकरो न तु ऋषभस्वामिनामातीर्थकृदिति तद्वृत्तौ. एवं च कुलकरानाश्रित्य दुष्षमाकालानुभावाद्वाचनाभेदजनितेषु उत्सर्पिणीकालभाविकुलकराणां भिन्नभिन्ननामताव्यस्तनामतान्यूनाधिकनामताभिन्नारकभावितामिधायकेषु[1] शास्त्रवाक्येषु सत्सु तत्त्वं सर्वविद्वेद्यमिति ज्ञेयं ।

---

१ उत्सर्पिण्यामाद्यारकेऽराजकता स्पष्टैव, द्वितीयारकान्त्यभागे राजव्यवस्थाऽत आवश्यकी, युक्तास्तत्र कुलकराः, तुर्यारकादिभागे तु तत्तद्दण्डविसर्जकत्वेन ते, उक्तानुक्ती तु विवक्षाधीने ।

अथ प्रकृतं–

क्रमेणात्यन्तसारस्याद्युच्छिन्ने पावके सति । अग्निपक्वान्नाशनादिस्थितिर्विच्छेत्स्यतेऽखिला ॥ ४०१ ॥
क्रीडिष्यन्ति यथेच्छं ते, प्रादुर्भूतैरनुक्रमात् । कल्पद्रुमैर्दशविधैः, पूर्यमाणमनोरथाः ॥ ४०२ ॥
पञ्चचापशतोत्तुङ्गाः स्युर्नित्यमशनार्थिनः । उत्कर्षतः पूर्वकोट्यायुषोऽत्र प्रथमं जनाः ॥ ४०३ ॥
एकपल्योपमोत्कृष्टायुषः क्रोशोच्चभूघनाः । चतुर्थभक्ते भोक्तारः, पर्यन्ते ते च भाविनः ॥ ४०४ ॥
प्रवर्द्धमानपर्याये, पूर्णे तुर्येऽरके क्रमात् । सुषमा नाम सुखकृत्, पञ्चमारः प्रवेक्ष्यति ॥ ४०५ ॥
एकक्रोशोच्छ्रिता एकपल्योपमपरायुषः । तत्रैकाहान्तराहारा, भाविनः प्रथमं जनाः ॥ ४०६ ॥
द्विक्रोशोच्चाश्च पर्यन्ते, द्विपल्यपरमायुषः । षष्ठभक्तकृताहारा, भविष्यन्ति नरोत्तमाः ॥ ४०७ ॥
अरके पञ्चमे पूर्णेऽथैवं पर्यायवृद्धितः । षष्ठोऽरकोऽथ सुषमसुषमाख्यः प्रवेक्ष्यति ॥ ४०८ ॥
द्विक्रोशतुङ्गाश्चात्रादौ, द्विपल्योत्कृष्टजीविताः । द्विदिनान्तरभोक्तारो, भाविनो भुवि युग्मिनः ॥ ४०९ ॥
अन्ते क्रोशत्रयोत्तुङ्गास्त्रिपल्यपरमायुषः । भवितारो युगलिनस्त्रिदिनान्तरभोजिनः ॥ ४१० ॥
उत्कृष्टं ह्यरकप्रान्ते, युग्मिनामुच्छ्रयादिकम् । तेभ्यः पूर्वेषां तु तेषां, किञ्चिदूनोनमेव तत् ॥ ४११ ॥
एवं पंशुलिकादीनां, वृद्धिरप्यूह्यतां स्वयम् । कल्पवृक्षादिभावानां, पर्यायाणां च भूयसाम् ॥ ४१२ ॥
एवं पूर्णे कालचक्रे, पुनरप्यवसर्पिणी । पुनरुत्सर्पिणीत्येवं, कालचक्रं पुनः पुनः ॥ ४१३ ॥
उन्मज्य विनमज्य सन्ततं, पारिणामिकगुणेन सङ्गतम् । चक्रमेतदसकृद्विवर्त्तयन्, क्रीडतीव भुवि कालबालकः ॥ ४१४ ॥
विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे सर्गः प्रापदशेषतां परिमितश्चारुश्चतुस्त्रिंशता ॥ ४१५ ॥

॥ इति श्रीलोकप्रकाशे चतुस्त्रिंशत्तमः सर्गः समाप्तः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

॥ अथ पञ्चत्रिंशत्तमः सर्गः ॥

स्यात्पुद्गलपरावर्त्तः, कालचक्रैरनन्तकैः । द्रव्यक्षेत्रकालभावभेदात्स च चतुर्विधः ॥ १ ॥
एकैकश्च भवेद् द्वेधा, सूक्ष्मबादरभेदतः । अष्टानामप्यथैतेषां स्वरूपं किञ्चिदुच्यते ॥ २ ॥
औदारिकवैक्रियाङ्गाहारकतैजसोचिताः । भाषोच्छ्वासमनःकर्मयोग्याश्चेत्यष्टवर्गणाः ॥ ३ ॥
सजातीयपुद्गलानां, समूहो वर्गणोच्यते । मौक्तिकानां मिथस्तुल्यगुणानामिव राशयः ॥ ४ ॥
कुचिकर्णो यथा नानावर्णासंख्येयधेनुकः । चक्रे गवां सवर्णानां, समुदायान् पृथक् पृथक् ॥ ५ ॥

तथाकृते चाभूवंस्ताः, सुज्ञानाः सुग्रहा यथा । तथा तीर्थङ्करोद्दिष्टाः, पुद्गलवर्गणा अपि ॥ ६ ॥
तथाहि—एकाकिनः सन्ति लोके, येऽनन्ताः परमाणवः । एकाकित्वेन तुल्यानां, तेषामेकात्र वर्गणा ॥ ७ ॥
द्व्यणुकानामनन्तानां, द्वितीया वर्गणा भवेत् । त्र्यणुकानामनन्तानां, तृतीया किल वर्गणा ॥ ८ ॥
यावदेवमनन्तानां, गण्यप्रदेशशालिनाम् । स्कन्धानां वर्गणा गण्या, द्व्यणुकत्वादिजातिभिः ॥ ९ ॥
असंख्येयप्रदेशानामप्येकैकाणुवृद्धितः । असंख्येया वर्गणाः स्युः, प्राग्वज्जातिविवक्षया ॥ १० ॥
तथाऽनन्ताणुजातानां, स्कन्धानामपि वर्गणाः । भवन्त्येकैकाणुवृद्ध्याऽनन्ता इति जिनैः स्मृतम् ॥ ११ ॥
अत्यल्पाणुमयत्वेन, स्थूलत्वादखिला अपि । ग्रहे नायान्ति जीवानां, ग्रहणानुचिता इति ॥ १२ ॥
अथोल्लङ्घ्याखिला एताः, सिद्धानन्तांशसंमितैः । अभव्येभ्योऽनन्तगुणैः, परमाणुभिरुद्भटैः ॥ १३ ॥
स्कन्धैर्याः स्युः समारब्धा, वर्गणा विस्रसावशात् । जघन्या ग्रहणार्हाः स्युस्ताः किलौदारिकोचिताः ॥ १४ ॥
आभ्यश्चैकैकाणुवृद्धा, मध्यमा ग्रहणोचिताः । तावद् ज्ञेया यावदौदारिकार्होत्कृष्टवर्गणाः ॥ १५ ॥
उत्कृष्टौदारिकार्हाभ्यश्चैकेनाप्यणुनाऽधिकाः । भवन्ति पुनरप्यौदारिकानर्हा जघन्यतः ॥ १६ ॥
ततश्चैकैकाणुवृद्धा, अनर्हा मध्यमा बुधैः । तावद् ज्ञेया पुनर्यावदुत्कुष्टाः स्युरनर्हकाः ॥ १७ ॥
एता बह्वणुनिष्पन्नत्वात्सूक्ष्माः परिणामतः । तत औदारिकानर्हाः, स्थूलस्कन्धोद्भवं हि तत् ॥ १८ ॥
यथा यथाऽणुभूयस्त्वं, परिणामस्तथा तथा । स्कन्धेषु सूक्ष्मः स्यात्तेषामल्पत्वे स्थूलमिष्यते ॥ १९ ॥
औदारिकापेक्षयैव, किलैताः प्रचुराणुकाः । स्युः सूक्ष्मपरिणामाश्च, वैक्रियापेक्षया पुनः ॥ २० ॥
स्वल्पाणुजातत्वात्स्थूलपरिणामा अमूस्ततः । वैक्रियानुचिताः सूक्ष्मस्कन्धोत्थं प्राच्यतो हि तत् ॥ २१ ॥
उत्कृष्टौदारिकानर्हा, यास्ता एकाणुनाऽधिकाः । जघन्या वैक्रियार्हाः स्युस्ततो द्व्याद्यणुभिर्युताः ॥ २२ ॥
मध्यमा वैक्रियार्हाः स्युस्तदर्होत्कृष्टकावधि । जघन्यमध्यमोत्कृष्टा, वैक्रियानुचितास्ततः ॥ २३ ॥
वैक्रियापेक्षया भूयोऽणुकाः सूक्ष्मा अमूः किल । आहारकापेक्षया च, स्थूलाः स्तोकाणुका इति ॥ २४ ॥
एवमग्रेऽपि भाव्यं ।
जघन्यमध्यमोत्कृष्टास्तत आहारकोचिताः । तदनर्हास्ततस्त्रेधा, ततश्च तैजसोचिताः ॥ २५ ॥
ततस्तथैव त्रिविधास्तैजसानुचितास्ततः । त्रेधा भाषोचिता भाषानुचिताश्च ततस्त्रिधा ॥ २६ ॥
आनप्राणोचितास्त्रेधा, तदनर्हास्ततस्त्रिधा । मनोऽर्हास्तदनर्हाश्च, त्रिविधाः स्युस्ततः क्रमात् ॥ २७ ॥
जघन्यमध्यमोत्कृष्टाः, कर्मणामुचितास्ततः । भवन्ति वर्गणास्त्रेधा, याभ्यः कर्म प्रजायते ॥ २८ ॥
इतोऽप्यूर्ध्वं ध्रुवाचित्तादयो याः सन्ति वर्गणाः । नार्थाभावात्ता इहोक्ताः, प्रोक्तास्त्वावश्यकादिषु ॥ २९ ॥
तदर्थिना च ते ग्रन्था, भावनीयाः सवृत्तयः । क्षेत्रावगाहाद्युक्तानां, वर्गणानामथोच्यते ॥ ३० ॥
एता यथोत्तरं सूक्ष्मा, ज्ञेया बह्वणुका अपि । प्रथमौदारिकानर्हवर्गणायाः प्रभृत्यथ ॥ ३१ ॥

सर्वा अप्यङ्गुलासंख्यभागमात्रावगाहनाः । यथोत्तरं च सूक्ष्मत्वात्स ऊनोनो विभाव्यताम् ॥ ३२ ॥
औदारिकोचिता यावत्, क्षेत्रं स्पृशति वर्गणा । तदनर्हा ततो न्यूनं, भाव्या इत्यखिला अपि ॥ ३३ ॥
औदारिकवैक्रियाद्यन्तरालेष्वत्र वर्गणाः । उक्ता एकैकाणुवृद्ध्याऽनर्हा या उभयोरपि ॥ ३४ ॥
ताश्च सिद्धानामनन्ततमभागेन संमिताः । अभव्येभ्योऽनन्तगुणा, मानतः परिकीर्तिताः ॥ ३५ ॥
औदारिकाद्यष्टकस्य, जघन्या ग्रहणोचिताः । उक्ता या वर्गणास्ताभ्य, उत्कृष्टा ग्रहणोचिताः ॥ ३६ ॥
स्वस्वानन्ततमे भागे, यावन्तः परमाणवः । एकैकवृद्धैस्तावद्भिरधिकाः स्युः किलाणुभिः ॥ ३७ ॥
अत एवान्तराले स्युर्जघन्योत्कृष्टयोस्तयोः । अनन्ता वर्गणा मध्या, एकैकाणुविशेषिताः ॥ ३८ ॥
सर्वाः परिणमन्त्येता, वर्गणा विस्रसावशात् । यथास्वमुपयुज्यन्ते, ततश्चौदारिकादिषु ॥ ३९ ॥
अयोग्याः स्युः पुनर्योग्याः, योग्याः पुनरयोग्यकाः । परिणामपरावर्त्ताद्विवर्त्तन्ते हि वर्गणाः ॥ ४० ॥
औदारिकप्रभृतय, एताश्चाहारकावधि । अष्टस्पर्शाः पञ्चवर्णारसा गन्धद्वयान्विताः ॥ ४१ ॥
एकवर्णरसगन्धः, स्याद् द्विस्पर्शश्च यद्यपि । परमाणुस्तथाप्येते, समुदायव्यपेक्षया ॥ ४२ ॥
तैजसाद्या वर्गणा अप्येवं वर्णादिभि स्मृताः । स्पर्शतस्तु चतुःस्पर्शास्तेषां मृदलघुधुवौ ॥ ४३ ॥
अन्यौ द्वौ च स्निग्धशीतौ, स्निग्धोष्णौ वा प्रकीर्त्तितौ । रूक्षोष्णौ रूक्षशीतौ वा, विज्ञैर्वेद्यौ यथागमम् ॥ ४४ ॥

अयं पञ्चसंग्रहवृत्तिशतकबृहट्टीकाद्यभिप्रायः, कर्मप्रकृतिप्रज्ञप्त्याद्यभिप्रायेण त्वेतासु स्निग्धोष्णारूक्षशीतरूपमेव स्पर्शचतुष्टयं स्यान्नान्यदिति.[1]

सर्वलोकगतान् सर्वानणूनेकोऽसुमानिह । औदारिकादिसप्तकत्वेन स्वीकृत्य मुञ्चति ॥ ४५ ॥
कालेन यावता कालस्तावानुक्तो जिनेश्वरैः । द्रव्यतःपुद्गलपरावर्त्तो बादर आगमे ॥ ४६ ॥
आहारकाङ्गभावेन, स्वीकृत्योत्सर्जनं पुनः । न संभवेत्समाणूनां, मितवारं हि तद्भवेत् ॥ ४७ ॥
सप्तानामथ चौदारिकादीनां मध्यतः पुनः । भावेनैकेनैव चौदारिकाङ्गत्वादिनाऽसुमान् ॥ ४८ ॥
सर्वान् परिणमय्याणूनेक एव विमुञ्चति । कालेन यावता तावान्, द्रव्यतः सूक्ष्म इष्यते ॥ ४९ ॥
सर्वस्य लोकाकाशस्य, प्रदेशा निरनुक्रमम् । स्पृश्यन्ते मरणैः सर्वे, जीवेनैकेन यावता ॥ ५० ॥
तावान् कालो बादरः स्यात्, क्षेत्रतः पुद्गलोऽत्र च । खांशा अपूर्वस्पृष्टास्ते, गण्याः स्पृष्टचरास्तु न ॥ ५१ ॥
यस्मिन् विवक्षिते व्योमप्रदेशे स्यान्मृतोऽसुमान् । पुनस्तदव्यवहितप्रदेशे म्रियतेऽथ सः ॥ ५२ ॥
कालान्तरे पुनरपि, तृतीये तदनन्तरे । म्रियते गण्यते सैष, प्रदेशः खलु लेख्यके ॥ ५३ ॥

---

१ स्पर्शनेन्द्रियग्राह्यानां गुरुलघुत्वमृदुकर्कशानामभावात् एवं, प्राक्तु पुद्गलस्वरूपापेक्षयोक्तं, तत्पक्षे गुरुत्वलघुत्वयोर्मृदुत्वकर्कशत्वयोः परस्परपरिहारेणावस्थानात् एकतरावस्थाननियमात्, चतुःस्पर्शताऽपि व्यवहार्यलघुत्वादेरभावात्, प्रोक्तवत् स्निग्धशीतादि तु न नियतं, परिणमनाद्वा तथेति ।

एवं लोकाभ्रप्रदेशैः, सर्वैरपि यथाक्रमम् । जीवेन मृत्युना स्पृष्टैः, सूक्ष्मोऽसौ क्षेत्रतो भवेत् ॥ ५४ ॥
खप्रदेशे व्यवहिते, एकद्व्यादिप्रदेशकैः । भवेद्यन्मरणं तच्च, गण्यते नात्र लेख्यके ॥ ५५ ॥
जीवो यद्यप्यसंख्येयान्, खांशान् जघन्यतोऽपि हि । अवगाह्यैव म्रियते, संख्येयान्न तु कर्हिचित् ॥ ५६ ॥
तथाऽप्यत्रावधीभूत, एक एव विवक्ष्यते । नभःप्रदेशो मरणस्पृष्टोऽन्येऽस्पृष्टका इति ॥ ५७ ॥
कालचक्रस्य समयैर्निरवलैर्निरनुक्रमम् । मरणेनाङ्गिना स्पृष्टैः, कालतो बादरो भवेत् ॥ ५८ ॥
कालचक्रस्य कस्यापि, म्रियते प्रथमक्षणे । अन्यस्य कालचक्रस्य, द्वितीयसमयेऽसुमान् ॥ ५९ ॥
तृतीयस्य पुनः कालचक्रस्यैव तृतीयके । समये म्रियते दैवात्तदैवायुःक्षये सति ॥ ६० ॥
कालचक्रस्य समयैः, सर्वैरेवं यथाक्रमम् । मरणेनाङ्गिना स्पृष्टैः, सूक्ष्मः स्यादेष कालतः ॥ ६१ ॥
यत्र चाद्यद्वितीयादिक्षणक्रममतीत्य च । मरणं स्यात्कालचक्रं, लेख्यके तन्न गण्यते ॥ ६२ ॥
भावतः पुद्गलपरावर्त्तं सूक्ष्मं तथापरम् । उपदेष्टुं यथाशास्त्रं, वक्तव्यान्तरमुच्यते ॥ ६३ ॥
एकस्मिन् समये जीवा, ये पृथ्वीकायिकादयः । प्रविशन्त्यवशाः कर्मनुन्नाः सूक्ष्माग्निकायिषु ॥ ६४ ॥
लोकाकाशप्रमाणानां, खखण्डानां महीयसाम् । असंख्यानां खप्रदेशैः, प्रमितास्तेऽङ्गिनः स्मृताः ॥ ६५ ॥
ये पुनः पूर्वमुत्पन्नास्तेजस्कायतयाङ्गिनः । पुनर्विपद्योत्पद्यन्ते, स्वकायेष्वेव कर्मभिः ॥ ६६ ॥
ते पूर्वोद्दिष्टसूक्ष्माग्निप्रविशज्जीवराशिषु । न लेख्यके समायान्ति, ते हि पूर्वप्रविष्टकाः ॥ ६७ ॥
एकक्षमप्रविशद्भ्य, एभ्यः सूक्ष्माग्निकायिकाः । पूर्वप्रविष्टा ये ते स्युरसंख्येयगुणाधिकाः ॥ ६८ ॥
यतो जघन्यतोऽप्येतेऽन्तर्मुहूर्त्तायुषोऽङ्गिनः । प्रतिक्षणं चासंख्येया, उत्पद्यन्ते नवा नवाः ॥ ६९ ॥
तेभ्यः कायस्थितिस्तेषामसंख्येयगुणाधिका । एकैकस्य ह्यसंख्येयकालचक्राणि सा गुरुः ॥ ७० ॥
ततोऽप्यस्या अनुभागबन्धस्थानानि तानि च । असंख्येयगुणानि स्युः, संयमस्थानकानि च ॥ ७१ ॥
कायस्थितौ ह्येकैकस्यां, स्थितिबन्धा असंख्यशः । यथा जघन्यतः कायस्थितिरन्तर्मुहूर्त्तिका ॥ ७२ ॥
ततः परैकसमयाधिकाऽन्या द्विक्षणाधिका । त्रिक्षणाभ्यधिका यावदुत्कृष्टा सर्वतोऽन्तिमा ॥ ७३ ॥
एकैकस्मिन्ननुभागबन्धस्थानान्यसंख्यशः । स्थितिबन्धे भवन्तीति, निर्दिष्टं तत्त्ववेदिभिः ॥ ७४ ॥

तथाहुः– "एगसमयंमि लोए, सुहुमगणिजिआउ जे उ पविसंति । ते हुंतऽसंखलोगप्पएसतुल्ला असंखिज्जा ॥ तत्तो असंखगुणिया अगणिक्कायाउतेसिं कायठिई । तत्तो संजमअणुभाग-बंधट्ठाणाणिऽसंखगुणिआणि" ॥ [प्रवचनसारोद्धार श्लो. १०५०, १०५१]

एवं च प्रवचनसारोद्धारसूत्रवृत्त्याद्यभिप्रायेण सूक्ष्माग्निकायिकजीवकायस्थितेरनुभागबन्ध-स्थानानि भावपुद्गलपरावर्त्तनिरूपणायोपक्रान्तानि, पञ्चसंग्रहकर्मग्रन्थसूत्रवृत्त्यादिषु तु सामान्यत एवानुभागबन्धस्थानान्युक्तानि । तथाहि–भावपुद्गलपरावर्त्तमाह–

अणुभागट्ठाणेसुं, अणंतरपरंपराविभत्तेहिं । भावंमि बायरो सो सुहुमो सव्वेसऽणुक्कमसो ॥

इति पञ्चसंग्रहे [द्वितीयद्वार श्लो. ४१] । अथात्रानुभागबन्धस्थानस्वरूपनिरूपणायोपक्रम्यते–

प्राग् यानि कर्मयोग्यानि, द्रव्याण्युक्तानि तान्यथ । स्वाधिष्ठिताभ्रप्रदेशावगाढानीह चेतनः ॥ ७५ ॥
उपादाय कर्मतया, द्राक् परिणमयत्ययम् । किञ्चित्साधर्म्यतो वह्निदृष्टान्तोऽत्र निरूप्यते ॥ ७६ ॥
यथा दहनयोग्यानि, द्रव्याणि ज्वलनोऽपि हि । स्वगोचरस्थितान्येव, प्रापयेद्वह्निरूपताम् ॥ ७७ ॥
न तु स्वविषयातीतान्यग्नितां नेतुमीश्वरः । जीवोऽपि स्वप्रदेशेभ्यो, द्रव्यमेवं बहिः स्थितम् ॥ ७८ ॥
नैव कर्मयोग्यमपि, कर्मतां नेतुमीश्वरः । गृह्णाति तानि जीवश्च, सर्वैरात्मप्रदेशकैः ॥ ७९ ॥
तथाहि–जीवप्रदेशाः सर्वेऽपि, शृङ्खलावयवा इव । स्युः परस्परसंबद्धाः, प्रतीका वपुषीव वा ॥ ८० ॥
एकस्मिन्नपि तज्जीवप्रदेशे व्यापृते सति । सर्वेऽपि व्याप्रियन्तेऽन्ये, ग्रहीतुं कर्मणां दलम् ॥ ८१ ॥
यथा घटाद्युपादातुं, करागे व्यापृते सति । मणिबन्धकूर्परांसादयोऽप्यवयवाः परे ॥ ८२ ॥
व्याप्रियन्ते मन्दमन्दतरमन्दतमं ध्रुवम् । एवं सर्वात्मप्रदेशव्यापारः कर्मसंग्रहे ॥ ८३ ॥
इदं च कर्मद्रव्याणां, ग्रहणं सादि भाव्यताम् । तद्द्रव्यदेशकालाद्यैः, स्यादनादिप्रवाहतः ॥ ८४ ॥
एषां च कर्मद्रव्याणां, भागप्राप्तिर्यथा भवेत् । एकेनाध्यवसायेन, गृहीतानां तथोच्यते ॥ ८५ ॥
क्रमान्महत्तरो भागो, महास्थितिककर्मणाम् । एवं स्थित्यनुसारेण, भागोऽष्टास्वपि कर्मसु ॥ ८६ ॥
आयुषस्तत्र सर्वेभ्यः, स्तोको भागो भवेदिह । सर्वेभ्योऽल्पस्थितिकत्वाद्विशेषाभ्यधिकस्ततः ॥ ८७ ॥
कर्मांशानां भवेद्भागः, कर्मणोर्नामगोत्रयोः । परस्परापेक्षया तु, द्वयोः स्यादेतयोस्समः ॥ ८८ ॥
ज्ञानदर्शनावरणान्तरायाणां बृहत्तमः । भागः स्यान्नामगोत्राभ्यां, त्रयाणां च मिथः समः ॥ ८९ ॥
तेभ्योऽपि मोहनीयस्य, भवेद्भागो बृहत्तमः । न्याय्यो महास्थितेरस्य, महतां ह्यखिलं महत् ॥ ९० ॥
वेदनीयस्य भागः स्यान्मोहादल्पस्थितेरपि । सर्वेभ्योऽपि महीयान् यत्तत्र हेतुर्निशम्यताम् ॥ ९१ ॥
भागेऽल्पे वेदनीयस्य, स्फुटत्वं सुखदुःखयोः । नानुभावयितुं शक्तमिदं तादृक् स्वभावतः ॥ ९२ ॥
वेदनीयं च भवति, प्रभूतदलिकं यदि । तदा स्वफलभूते ते, सुखदुःखे स्फुटात्मके ॥ ९३ ॥
ईष्टे व्यक्त्या दर्शयितुं, नान्यथेत्यंशकल्पना । एकाध्यवसायोपात्तकर्मद्रव्येषु भाव्यताम् ॥ ९४ ॥
स चैकोऽध्यवसायः स्यान्नानावैचित्र्यभाजनम् । अस्मिन्नेकस्वरूपे हि, भवेत्कर्मापि तादृशम् ॥ ९५ ॥
विना कारणभेदं हि, कार्यभेदो न संभवेत् । कर्मवैचित्र्यबीजस्य, तदस्यापि विचित्रता ॥ ९६ ॥
अयं विचित्रतागर्भोऽध्यवसायः स्वयं व्रजेत् । संक्लेशं वा विशुद्धिं वा, तादृक्सामग्र्यपेक्षया ॥ ९७ ॥
सामग्री च द्रव्यक्षेत्रकालभावात्मिका तया । संक्लिष्टो वा विशुद्धो वाऽध्यवसायः शरीरिणाम् ॥ ९८ ॥
कदाप्यष्टविधे बन्धे, हेतुर्भवति कर्हिचित् । सप्तविधे षड्विधे च, कदाऽप्येकविधेऽपि सः ॥ ९९ ॥

उक्तं च–"कहं एगज्झवसायगहियं दलियं अट्ठविहाइ बंधत्ताए परिणमइ ? उच्यते–तस्स अज्झवसाणमेव तारिसं, जेण अट्ठविहाइ बंधत्ताए परिणमइ, जहा कुंभगारो मिइपिंडेण सरावाईणि परिणामेइ, तस्स तारिसो परिणामो, तेणं परिणामेणं संजुत्तस्स दलियं अट्ठविहाइत्ताए परिणमइ ।"

प्राग्वच्च रचनांशानां, सप्तषट्विधबन्धयोः । सर्वत्र वेदनीयांशो, ज्येष्ठोऽन्येषां यथास्थिति ॥ १०० ॥
यदा त्वेकं वेदनीयं, कर्म बध्नात्यसौ तदा । सर्वं योगवशोपात्तं, दलं तस्यैव भाव्यताम् ॥ १०१ ॥

तथोक्तं पञ्चसंग्रहे—"जं समयं जावइयाइं बंधए ताण एरिसविहीए । पत्तेयं पत्तेयं भागे निव्वत्तए जीवो" ॥ [पञ्चमद्वार श्लो. ७९]

बध्नाति मूलप्रकृतीर्यथाऽल्पाल्पास्तथा तथा । प्रदेशबन्धमुत्कृष्टं, कुरुतेऽल्पिष्टमन्यथा ॥ १०२ ॥
न्याय्यमेतच्च खण्डादेर्यथांशः प्राप्यते महान् । विभाजकेषु स्तोकेषु, तेषु भूयस्सु चाल्पकः ॥ १०३ ॥

आहुश्च–"जह जह य अप्पपगईण बंधगो तहतहत्ति उक्कोसं । कुणइ पएसबंधं जहन्नयं तस्स वच्चासे" ॥ [पञ्चसंग्रह पञ्चमद्वार श्लो. ८०]

इह पूर्वं कर्मयोग्यवर्गणावर्त्तिनोऽणवः । स्वाभाविकरसाढ्याः स्युर्हेतवः सर्वकर्मणाम् ॥ १०४ ॥
यदा तु जीवैर्गृह्यन्ते, तदा तेषु किलाणुषु । कषायाध्यवसायेन, ग्रहणक्षण एव वै ॥ १०५ ॥
अविभागपरिच्छेदा, रससंबन्धिनोऽमिताः । प्रादुर्भवन्ति सर्वेभ्यो, जीवेभ्योऽनन्तसंगुणाः ॥ १०६ ॥
विविधाश्च स्वभावाः स्युर्ज्ञानावारकतादयः। जीवानां पुद्गलानां चाचिन्त्यशक्तिकता यतः ॥ १०७ ॥
यथा शुष्कतृणादीनां, पूर्वं ये परमाणवः । प्रायेणैकस्वरूपाः स्युः, स्वाभाविकरसास्तथा ॥ १०८ ॥
गवादिभिर्गृहीतास्ते, क्षीरादिरसरूपताम् । सप्तधातुपरीणामाद्यान्ति चानेकरूपताम् ॥ १०९ ॥
तथैकाध्यवसायात्तेष्वपि कर्मदलाणुषु । रसोद्भेदोऽनन्तभेदो, भवेत्तद्दृश्यते स्फुटम् ॥ ११० ॥
तथाहि–अभव्येभ्योऽनन्तगुणैः, सिद्धानन्तांशसंमितैः । निष्पन्नानणुभिः स्कन्धानात्मादत्ते प्रतिक्षणम् ॥ १११ ॥
अविभागपरिच्छेदान्, करोत्येषु रसस्य च । सर्वजीवानन्तगुणान्, प्रत्येकं परमाणुषु ॥ ११२ ॥
योऽर्द्धार्द्धेन छिद्यमानो, रसांशः सर्वविद्धिया । न दत्तेऽंशं सोऽविभागपरिच्छेद इह स्मृतः ॥ ११३ ॥
तत्रैकसमयोपात्ते, कर्मस्कन्धेऽत्र येऽणवः । सर्वाल्पिष्ठरसाश्छिद्यमानास्तेऽपि रसांशकैः ॥ ११४ ॥
सर्वजीवानन्तगुणान्, प्रयच्छति रसांशकान् । एषां चाल्परसाणूनां, निचयो वर्गणाऽऽदिमा ॥ ११५ ॥
अन्यासां वक्ष्यमाणानां, वर्गणानामपेक्षया । स्युर्भुयांसोऽणवोऽत्राल्परसा हि बहवोऽणवः ॥ ११६ ॥
रसाविभागभागेन, तत एकेन येऽधिकाः । द्वितीया वर्गणा तेषामणूनामिह कीर्त्तिता ॥ ११७ ॥
इयं च वर्गणा हीना, परमाणुव्यपेक्षया । आद्याया वर्गणाया यदेते तेभ्यो रसाधिकाः ॥ ११८ ॥
रसाविभागभागस्येत्येकैकस्य प्रवृद्धितः । वर्गणाः परमाणूनां, तावद्वाच्या मनीषिभिः ॥ ११९ ॥

भवन्ति वर्गणा यावत्सिद्धान्तांशसंमिताः । अभव्येभ्योऽनन्तगुणास्ता रसांशविशेषिताः ॥ १२० ॥
रसभागांश्च यच्छन्ति, सर्वान्त्यवर्गणाणवः । सर्वाद्यवर्गणाणुभ्यः, किलानन्तगुणाधिकान् ॥ १२१ ॥
राशिश्चासां वर्गणानां, स्पर्द्धकं प्रथमं भवेत् । समूहो हि वर्गणानामिह स्पर्द्धकमुच्यते ॥ १२२ ॥
एकैकेन रसांशेन, वृद्धाश्च परमाणवः । अथैतस्मान्न लभ्यन्ते, प्रथमस्पर्द्धकात्परम् ॥ १२३ ॥
सर्वजीवानन्तगुणै, रसांशैरेव चाधिकाः । संप्राप्यन्तेऽत एवेदं, पूर्णं स्पर्द्धकमादिमम् ॥ १२४ ॥
क्रमाद्रसनिरंशांशैर्वृद्धौ हि स्पर्द्धकं भवेत् । स्यादन्यस्पर्द्धकारम्भो, निरंशांशक्रमत्रुटौ ॥ १२५ ॥
आद्यस्पर्द्धकपर्यन्ताणुभ्यो येऽथ रसांशकैः । सर्वजीवानन्तगुणैः, प्रवृद्धाः परमाणवः ॥ १२६ ॥
तेषां च समुदायः स्यात्, प्रथमा वर्गणा किल । द्वितीयस्य स्पर्द्धकस्य, ततः स्यात्पूर्ववत्क्रमः ॥ १२७ ॥
एकैकेन रसांशेन, प्रवृद्धैः परमाणुभिः । आरब्धा वर्गणा यावत्सिद्धानन्तांशसंमिताः ॥ १२८ ॥
एतासां वर्गणानां च, समुदायो भवेदिह । द्वितीयं स्पर्द्धकं पूर्णीभूतेऽस्मिन् स्पर्द्धके पुनः ॥ १२९ ॥
एकद्व्याद्यैः रसच्छेदैर्न प्राप्यन्तेऽणवोऽधिकाः । प्राप्यन्ते किं तु ते सर्वजीवानन्तगुणैर्ध्रुवम् ॥ १३० ॥
अणूनां प्राग्वदेतेषां, समूहो वर्गणाऽऽदिमा । तृतीयस्य स्पर्द्धकस्य, ततः स्यात्पूर्ववत्क्रमः ॥ १३१ ॥
भवन्ति स्पर्द्धकान्येवं, प्रवृद्धानि रसांशकैः । सिद्धानन्ततमभागतुल्यानीति जिना विदुः ॥ १३२ ॥
अनुग्रहाय शिष्याणां, दृष्टान्तोऽत्र निरूप्यते । असद्भावस्थापनया, वर्गणास्पर्द्धकानुगः ॥ १३३ ॥
आद्यस्य स्पर्द्धकस्याद्या, वर्गणा कल्प्यते यथा । रसांशशतसंयुक्तैरारब्धा परमाणुभिः ॥ १३४ ॥
अथैकैकरसच्छेदवृद्धाणूत्थाभिरादितः । दशभिर्वर्गणाभिः स्यात्पूर्णं स्पर्द्धकमादिमम् ॥ १३५ ॥
ततो दशोत्तरशतरसांशैः परमाणुभिः । नाप्यते वर्गणारब्धा, नापि द्व्याद्यंशकाधिकैः ॥ १३६ ॥
किंतु त्रिंशशतरसच्छेदाढ्यैः परमाणुभिः । प्राप्यते वर्गणाऽऽरब्धा, द्वितीये स्पर्द्धकेऽग्रिमा ॥ १३७ ॥
ततः पुनरपि प्राग्वद्रसैकैकलवाधिकैः । परमाणुभिरारब्धा, लभ्यन्ते खलु वर्गणाः ॥ १३८ ॥
क्रमवृद्धौ रसांशानां, समाप्तानां समाप्यते । द्वितीयं स्पर्द्धकमिति, स्युरनन्तान्यमून्यहो ॥ १३९ ॥
रसांशवृद्धैरणुभिरारब्धाश्च यथोत्तरम् । अल्पाणुका वर्गणाः स्युः, स्थापनाऽत्र विलोक्यताम् ॥ १४० ॥
इति प्रतिज्ञातं अनुभागस्वरूपं निर्व्यूढं ।
एतेषां चानुभागानां, बन्धस्थानान्यसंख्यशः । तेषां निष्पादका येऽध्यवसायास्तेऽप्यसंख्यशः ॥ १४१ ॥
तथाहि—एकप्रादेशिकी श्रेणीर्या लोकस्य घनाकृतेः । असंख्येयतमे तस्या, भागे येऽभ्रप्रदेशकाः ॥ १४२ ॥
तावन्ति योगस्थानानि, तेभ्योऽसंख्यगुणाधिकाः । तीव्रमन्दादयो भेदा, एकैकप्रकृतेः स्मृताः ॥ १४३ ॥
प्रकृत्योरवधिज्ञानदर्शनावरणाख्ययोः । स्युर्लोकानामसंख्यानां, खप्रदेशैर्मिता भिदः ॥ १४४ ॥
भेदा असंख्या एवानुपूर्वीष्वपि चतसृषु । एवं भाव्या भिदोऽसंख्याः, प्रकृतिष्वपरास्वपि ॥ १४५ ॥

तथोक्तं—ओहिणाणावरणओहिदंसणावरणपगईओ असंखेज्जलोगागासप्पएसमित्ताओ तेसिं खओवसभेया वि तत्तिया चेव, चउण्हमाणुपुव्वीणं असंखेज्जाओ लोगस्स असंखेज्जइ भागे जत्तिया आगासपएसा तत्तियाओ ।

एकैकस्मिन्नुक्तयोगस्थाने प्राप्यन्त एव यत् । सकला बन्धमाश्रित्य, पूर्वोक्ताः प्रकृतेर्भिदः ॥ १४६ ॥
ततः प्रकृतिभेदाः प्रागसंख्येयगुणाधिकाः । योगस्थानेभ्यो यदुक्तास्तद्युक्तमुपपद्यते ॥ १४७ ॥

उक्तं च—"जोगट्ठाणेहिंतो असंखेज्जगुणाओ पगईओ । एक्केक्के जोगट्ठाणे वट्टमाणे एयाओ सव्वाओ ॥ बंधइत्तिकाउं" ।

तेभ्यः प्रकृतिभेदेभ्यश्चासंख्येयगुणाधिकाः । स्थितिभेदा जघन्याद्या, ज्येष्ठान्ताः क्षणवृद्धितः ॥ १४८ ॥
स्थितिर्लघ्वी स्थितिस्थानं, प्रथमं परिकीर्त्तितम् । सैकक्षणा द्वितीयं सा, तृतीयं द्विक्षणाधिका ॥ १४९ ॥

इत्यादि ।

प्रतिप्रकृतिभेदं यत्स्थितिभेदा असंख्यकाः । ततः प्रकृतिभेदेभ्यस्तेऽसंख्येयगुणा इति ॥ १५० ॥
स्थितिबन्धाध्यवसायास्तेभ्योऽसंख्यगुणाधिकाः । एकैकस्मिन् स्थितिस्थाने, बध्यमाने हि देहिभिः ॥ १५१ ॥
तद्धेतवोऽध्यवसाया, नानाजीवव्यपेक्षया । असंख्येयलोकवियत्प्रदेशप्रमिताः स्मृताः ॥ १५२ ॥
एभ्यश्चाध्यवसायेभ्योऽप्यसंख्येयगुणानि च । जिनैर्दृष्टान्यनुभागबन्धस्थानानि कर्मसु ॥ १५३ ॥
जन्तोर्लेश्यापरिणामविशेषाः संभवन्ति ये । कषायोदयसंमिश्रास्तीव्रमन्दादयोऽमिताः ॥ १५४ ॥
जघन्यादेकसमयस्थितिकास्ते जिनैः स्मृताः । उत्कर्षतोऽष्टसमयस्थितिकाः समवेदिभिः ॥ १५५ ॥
स्युः साधकतमास्ते चानुभागबन्धनं प्रति । ततोऽनुभागबन्धस्य, स्थानान्युच्यन्त उत्तमैः ॥ १५६ ॥
एकैकस्मिन् स्थितिबन्धाध्यवसाये ह्यसंख्यशः । दृष्टाः केवलिभिर्नानानुभागबंधहेतवः ॥ १५७ ॥
कषायमिश्रलेश्यानां, तीव्रमंदादयो भिदः । स्थितिबंधाशयेभ्यः स्युःस्तदसंख्यगुणा हि ते ॥ १५८ ॥
अनुभागसृजो जीवाध्यवसायाश्च ते द्विधा । कषायमिश्रलेश्यानां, परिणामात् शुभाशुभाः ॥ १५९ ॥
शुभैराधत्तेऽनुभागं, क्षीरखंडरसोपमम् । जीवः कर्मपुद्गलानामन्यैर्निम्बरसोपमम् ॥ १६० ॥
प्रत्येकमध्यवसाया, अशुभाश्च शुभाश्च ते । संख्यातिगानां लोकानां, प्रदेशैः प्रमिताः स्मृताः ॥ १६१ ॥
शुभा विशेषाभ्यधिकाः, केवलं कथिता जिनैः । अशुभाः किञ्चिदूनाः स्युर्युक्तिस्तत्र निशम्यताम् ॥ १६२ ॥
यानेव रसबन्धस्याध्यवसायान् क्रमस्थितान् । संक्लिश्यमाान ऊर्द्ध्वोर्द्ध्वमारोहत्यसुमानिह ॥ १६३ ॥
विशुद्ध्यमानस्तानेवावरोहति क्रमादधः । शुभानां प्रकृतीनां तु, रसबन्धे विपर्ययः ॥ १६४ ॥
संक्लिश्यमानोऽवरोहेदारोहेच्छुध्यमानकः । उभये च ततस्तुल्याः, सौधसोपानपङ्क्तिवत् ॥ १६५ ॥
केवलं क्षपको येष्वध्यवसायेषु संस्थितः । क्षपकश्रेणिमारोहेत्तेभ्यो नासौ निवर्त्तते ॥ १६६ ॥
क्षपकस्य ततः श्रेष्ठाध्यवसायव्यपेक्षया । ऊचिरेऽध्यवसायाः प्रागशुभेभ्योऽधिकाः शुभाः ॥ १६७ ॥

एभ्योऽनुभागबन्धस्य, स्थानेभ्योऽनन्तसंगुणाः । एकाध्यवसायोपात्ताः, कर्मार्हदलिकाणवः ॥ १६८ ॥
तेभ्योऽप्यनन्तगुणिताः, कर्माणुषु रसांशकाः । तच्च भावितमेव प्राक्, वर्गणास्पर्द्धकोक्तिभिः ॥ १६९ ॥

तथोक्तं पञ्चसंग्रहे–"सेढिअसंखेज्जंसे जोगट्ठाणा तओ असंखिज्जा । पगडीभेया तत्तो ठिइभेया होंति तत्तोवि ॥ ठिइबंधज्झवसाया तत्तो अणुभागबंधठाणाणि । तत्तो कम्मपएसाणंतगुणातो रसच्छेया" ॥ [पञ्चमद्वार श्लोक ७५, ७६]

अथ प्रकृतं–जीवोऽनुभागबन्धाध्यवसायस्थानकान्यथ । मरणेन स्पृशत्येकः, सर्वाणि निरनुक्रमम् ॥ १७० ॥
कालेन यावता कालस्तावान् केवलिनोदितः । भावतः पुद्गलपरावर्त्तो बादर आगमे ॥ १७१ ॥
एतान्ये स्पृशत्येकः, क्रमात्कालेन यावता । भावतः पुद्गलपरावर्त्तः सूक्ष्मश्च तावता ॥ १७२ ॥
अयं भावः–
कश्चित्सर्वजघन्येऽङ्गी, यः कषायोदयात्मके । वर्त्तमानोऽध्यवसायस्थाने प्राप्तो मृतिं ततः ॥ १७३ ॥
भूयसापि हि कालेन, स एवाङ्गी द्वितीयके । आद्यात्परेऽध्यवसायस्थानके म्रियते यदि ॥ १७४ ॥
तदेव मरणं तस्य, गण्यते लेख्यके बुधैः । नान्यान्युत्क्रमभावीनि, तान्यनन्तान्यपि स्फुटम् ॥ १७५ ॥
कालान्तरे चेद्भूयोऽपि, द्वितीयस्मादनन्तरे । तृतीये म्रियते सोऽध्यवसायस्थानके स्थितः ॥ १७६ ॥
तदा तृतीयं मरणं, गण्यते तस्य लेख्यके । त्यक्तक्रमाणि शेषाणि, नानन्तान्यपि तान्यहो ॥ १७७ ॥
एवं क्रमेण सर्वाणि, तानि कालेन यावता । स्पृश्यन्ते म्रियमाणेन, तेन संसारवारिधौ ॥ १७८ ॥
तावान् कालः स्यादनन्तकालचक्रमितो महान् । भावतः पुद्गलपरावर्त्तः सूक्ष्मो जिनोदितः ॥ १७९ ॥
क्षेत्रतः पुद्गलपरावर्त्तो यः सूक्ष्म ईरितः । उपयोगी मार्गणायां, स एवाद्रियते श्रुते ॥ १८० ॥

तथोक्तं जीवाभिगमसूत्रे सादि सान्तमिथ्यादृष्टिस्थितिनिरूपणाधिकारे–'जे से साइए सपज्जवसिए मिच्छद्दिट्ठी से जहण्णेणं अंतोमुहुत्तं, उक्कोसेणं अणंताओ ओसप्पिणिउसिप्पिणिओ कालओ, खेत्तओ अवड्ढं पोग्गलपरियट्टं देसूणमित्यादि ।'

येऽन्ये च पुद्गलपरावर्त्ताः सप्तात्र दर्शिताः । ते स्युः प्ररूपणामात्रं, न क्वाप्येषां प्रयोजनम् ॥ १८१ ॥
बादरेषु चतुर्ष्वेषु, दर्शितेषु यथाविधि । भवन्ति सुगमाः सूक्ष्मा, इत्येवैषां प्रयोजनम् ॥ १८२ ॥
नन्वत्र पुद्गलपरावर्त्तोऽणूनां दशान्तरम् । तद्द्रव्यपुद्गलपरावर्त्त एवास्ति नापरे ॥ १८३ ॥
तत्कथं पुद्गलपरावर्तशब्दः प्रवर्त्तते । क्षेत्रकालादिभेदेषु, ब्रूमहे श्रूयतामिह ॥ १८४ ॥
परावर्त्तः पुद्गलानां, शब्दव्युत्पत्तिकारणम् । प्रवृत्तिहेतुस्त्वनन्तकालचक्रप्रमाणता ॥ १८५ ॥
द्वावर्थधर्मौ भजतः, शब्दसंबन्धहेतुताम् । शब्दव्युत्पादकः शब्दप्रवृत्तिजनकोऽपि च ॥ १८६ ॥
यो गच्छति स गौरत्र, शब्दव्युत्पत्तिकृद्गतिः । शृङ्गसास्नादिमत्त्वं तु, सार्थं शब्दप्रवृत्तिकृत् ॥ १८७ ॥

व्युत्पत्तिहेतुसत्त्वेऽपि, प्रवृत्तिहेत्वभावतः । गच्छत्यपि गजाश्वादौ, गोशब्दो न प्रवर्त्तते ॥ १८८ ॥
व्युत्पत्तिहेत्वभावेऽपि, गत्यभावात् स्थिते गवि । प्रवृत्तिहेतुसद्भावात्, गोशब्दोऽसौ प्रवर्त्तते ॥ १८९ ॥
तथा क्षेत्रादिभेदेषु, शब्द एव प्रवर्त्तते । व्युत्पत्तिहेत्वभावेऽपि, प्रवृत्तिर्हेतुयोगतः ॥ १९० ॥

एतच्च पुद्गलपरावर्तस्वरूपं प्रायः पञ्चसंग्रहकर्मग्रन्थप्रवचनसारोद्धारसूत्रवृत्याद्यनुसारेण प्रोक्तं श्रीभगवतीसूत्रद्वादशशतकचतुर्थोद्देशकवृत्तौ तु—"औदारिकार्हद्रव्याणि, सर्वाण्यप्येकदेहिना । अनुभूय विमुच्यन्ते, औदारिकवपुष्टया ॥ कालेन यावता तावान् भवत्यौदारिकाभिधः । पुद्गलानां परावर्त, इत्युक्तं तत्त्वदर्शिभिः[1] ॥

भाव्याः शेषाः षडप्येवं, विबुधैर्वैक्रियादयः । आहारकशरीरार्हपुद्गलानां त्वसंभवी ॥ १९१ ॥
प्रत्येकमेते चानन्तकालचक्रमिता मताः । पुद्गलानामनन्तत्वादेकत्वाद्ग्राहकस्य च ॥ १९२ ॥
अतीताश्च भवन्त्येतेऽनन्ताः सर्वशरीरिणाम् । भविष्यन्तश्च भाव्यन्तां, पूर्वोक्तेन्द्रिययुक्तिवत् ॥ १९३ ॥
सा चैवं—
न भवन्त्येव केषाञ्चित्, केषाञ्चिच्च भवन्ति ते । एकद्वित्र्यादिसंख्येयाऽसंख्यानन्ता यथाभवम् ॥ १९४ ॥
कार्मणस्तैजसश्चौदारिकानप्राणसंभवौ । मानसो वाचिकश्चाथ, वैक्रियश्चेत्यनुक्रमात् ॥ १९५ ॥
यथोत्तरं कालतोऽमी, सप्तानन्तगुणाधिकाः । उपपत्तिं वदन्त्येवं, तत्र प्राचीनसूरयः ॥ १९६ ॥
सूक्ष्मत्वात्कार्मणाणूनां, ग्रहणाच्च प्रतिक्षणम् । अचिरेण समाप्यन्ते, ते तत्कालस्ततोऽल्पकः ॥ १९७ ॥
तैजसाः पुद्गलाः स्थूलाः, कार्मणापेक्षया ततः । कालोऽस्य भूयानल्पं हि, गृह्यते स्थूलमेकदा ॥ १९८ ॥
सर्षपबदरन्यायादिति शेषः ।
औदारिकाणां स्थूलत्वादशश्वद्ग्रहणादपि । भूयान् कालोऽस्य ते ग्राह्या, यदौदारिकदेहिना ॥ १९९ ॥
आनप्राणाणवः सूक्ष्मा, यद्यप्येभ्यस्तथापि ते । पर्याप्तैरेव गृह्यन्ते, तत्कालोऽस्य ततो बहुः ॥ २०० ॥
सूक्ष्मत्वेऽपि मनःपुद्गलानां स्याद्भूरिकालता । एकाक्षादिमहाकायस्थितौ तेषामनादृतेः ॥ २०१ ॥
भाषा द्व्यक्षाद्यवस्थायां, यद्यप्यस्ति तथाप्यसौ । भृशं स्थूला मनोऽणुभ्यस्तदत्रानल्पकालता ॥ २०२ ॥
भूयिष्ठकाललभ्यत्वाद्वैक्रियाङ्गस्य सर्वतः । वैक्रियः पुद्गलपरावर्त्तोऽनन्तगुणाधिकः ॥ २०३ ॥
पश्चानुपूर्व्या सप्तामी, भूरिभूरितराः स्मृताः । जीवस्य दीर्घकालीनाः, स्तोकाः स्युर्बहवः परे ॥ २०४ ॥
इत्याद्यधिकं भगवतीवृत्तितो १ श० उ० ३ ७वसेयं ।
एवं वर्णितरूपपुद्गलपरावर्तैरनन्तैर्मितस्त्रैलोक्याखिलवस्तुवृन्दविदुरैः कालो व्यतीतः स्मृतः ।
एतस्माच्च भवेदनन्तगुणितः कलः किलानागतोऽनादिः सान्त इहादिमस्तदपरोऽनन्तः सहादिः पुनः ॥ २०५ ॥

---

१ सर्वौदारिकपरिणमनकाले अन्यासामपि वर्गणानां विपरिणामेन तथाभावमपेक्ष्य सदृशमुभयमपि ।

तथाहुः—"ओसप्पिणी अणंता पुग्गलपरियट्टओ मुणेयव्वो । तेऽणंतातीयद्धा अणागयद्धा अणंतगुणा" ॥ [नवतत्त्व गा. ५४]

यत्पञ्चमाङ्गे गदितं त्वनागते काले, व्यतीतात्समयाधिकत्वम् ।
आनन्त्यसाम्यादुभयोरनागते तद्वर्त्तमानक्षणसंगतेश्च ॥ २०६ ॥

एवं च—अतीतकालादिह सर्वकालः, क्षणाधिकः स्याद् द्विगुणस्तथैव ।
कालो व्यतीतोऽपि च सर्वकालाज्जिनैःप्रणीतः समयोनमर्द्धम् ॥ २०७ ॥

कालोऽखिलोऽनागतकालतः स्यात्, पूर्वोक्तयुक्त्या द्विगुणः क्षणोनः ।
क्षणाधिकार्द्धं किल सर्वकालात्कालो भविष्यन् भवतीति सिद्धम् ॥ २०८ ॥

तथोक्तं—'अणागतद्धाणं तीतद्धाणं समयाहितातीतद्धाणं अणागतद्धातो समयूणा' अत्र वृत्तिः—अतीतानागतौ कालावनादित्वानन्तत्वाभ्यां समानौ, तयोश्च मध्ये भगवतः प्रश्नसमयो वर्त्तते, स चाविनष्टत्वेनातीते न प्रविशति, इत्यविनष्टत्वसाधर्म्यादनागते क्षिप्तः, ततः समयातिरिक्ता-ऽनागताद्धा भवति,

इह कश्चिदाह—अतीताद्धातोऽनागताद्धाऽनन्तगुणा अत एवानन्तेनापि कालेन गतेन नासौ क्षीयते इत्यत्रोच्यते—इह समत्वमुभयोरप्यन्ताभावमात्रेण विवक्षितमिति भगवती श० २५ उ० ५. ।

शिष्टोपदिष्टार्थवचोगरिष्ठः, क्षणाद्यनेकात्मविधो वरिष्ठः ।
स्वहेतुतोज्जीवितसर्वलोको, दिष्ट्या समाप्तः किल दिष्टलोकः ॥ २०९ ॥

विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयश्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे पञ्चत्रिंश इहैव पूर्तिमगमत्सर्गो निसर्गोज्ज्वलः ॥ २१० ॥

इति श्रीलोकप्रकाशे पञ्चत्रिंशत्तमः सर्गः समाप्तः ।
तत्समाप्तौ च समाप्तोऽयं दिष्टलोकः ।

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

॥ ॐ ह्रीँ अर्हं नमः ॥

॥ ऐं नमः ॥

महामहोपाध्यायश्रीमद्विनयविजयगणिवरविरचितः

श्री लोकप्रकाशः

भावलोकः

॥ अथ षट्त्रिंशत्तमः सर्गः ॥

शङ्खेश्वरं प्रणिदधे प्रकटप्रभावं, त्रैलोक्यभावनिवहावगमस्वभावम् ।
भावारिवारणहरिं हरिसेवनीयं वामेयमीश्वरममेयमहोनिधानम् ॥ १ ॥

स्वरूपं भावलोकस्य, यथाऽऽगममथ ब्रुवे । गुरुश्रीकीर्त्तिविजयदीपोद्योतितहृद्गृहः ॥ २ ॥
स्वतस्तैस्तैर्हेतुभिर्वा, तत्तद्रूपतयाऽऽत्मनाम् । भवनान्यौपशमिकादयो भावाः स्मृता इति ॥ ३ ॥
भवन्त्यमीभिः पर्यायैर्यद्वोपशमनादिभिः । जीवानामित्यमी भावास्ते च षोढा प्रकीर्त्तिताः ॥ ४ ॥
आद्यस्तत्रौपशमिको, द्वितीयः क्षायिकाह्वयः । क्षायोपशमिको भावस्तार्तीयीको निरूपितः ॥ ५ ॥
तुर्य औदयिको भावः, पञ्चमः पारिणामिकः । द्व्यादिसंयोगनिष्पन्नः, षष्ठः स्यात्सान्निपातिकः ॥ ६ ॥
यः प्रदेशविपाकाभ्यां कर्मणामुदयोऽस्य यत् । विष्कम्भणं स एवौपशमिकस्तेन वा कृतः ॥ ७ ॥
क्षयः स्यात्कर्मणामात्यन्तिकोच्छेदः स एव यः । अथवा तेन निर्वृत्तो, यः स क्षायिक इष्यते ॥ ८ ॥
अभावः समुदीर्णस्य, क्षयोऽथोपशमः पुनः । विष्कम्भितोदयत्वं यदनुदीर्णस्य कर्मणः ॥ ९ ॥
आभ्यामुभाभ्यां निर्वृत्तः, क्षायोपशमिकाभिधः । भावस्तृतीयो निर्दिष्टः, ख्यातोऽसौ मिश्र इत्यपि ॥ १० ॥
उदयावलिकायां यत्प्रविष्टं क्षीणमेव तत् । तदन्यत्तु भवेत्कर्म, शेषमत्रोपशान्तिमत् ॥ ११ ॥
वह्नेर्विध्यातशेस्य भस्मच्छन्नस्य साम्यभृत् । क्षीणोपशान्तं स्यात्कर्मेत्यवस्थाद्वितयान्वितम् ॥ १२ ॥
नन्वौपशमिकाद्भावो, भिद्यते नैष कर्म यत् । तत्रापि क्षीणमुदितमुपशान्तं भवेत्परम् ॥ १३ ॥
अत्रोच्यते—स्यात्क्षयोपशमे कर्मप्रदेशानुभवात्मकः । उदयोऽप्यनुभागं तु, नैषां वेदयते मनाक् ॥ १४ ॥
प्रदेशैरप्युपशमे, कर्मणामुदयोऽस्ति न । विशेषोऽयमुपशमक्षयोपशमयोः स्मृतः ॥ १५ ॥

आगमश्चात्र—"से णूणं भंते ! णेरइयस्स वा तिरिक्खजोणियस्स वा मणुस्सस्स वा देवस्स वा जे कडे कम्मे, णत्थि णं तस्स अवेयइत्ता मोक्खो ? हंता गो० ! से केणट्ठेणं भंते ! एवं वुच्चति ? एवं खलु गो० ! मए दुविहे कम्मे पन्नत्ते, तं० पदेसकम्मे य अणुभावकम्मे य, तत्थ णं जं पदेसकम्मं तं नियमा वेदेइ, तत्थ णं जं तं अणुभावकम्मं तं अत्थेगतियं वेदेति,

अत्थेगतियं नो वेदेति, णातमेयं अरहता, विण्णायमेतं अरहता, अयं जीवे इमं कम्मं अज्झोवगमियाय वेदणाए वेदिस्सति, अयं जीवे इमं कम्मं उवक्कमियाए वेदणाए वेदिस्सति, अहाकम्मं अहानिकरणं जहा जहा तं भगवया दिट्ठं, तहा तहा विपरिणमिस्सतीति, से तेणेट्ठेणं एवं वुच्चति ।

यः कर्मणां विपाकेनानुभवः सोदयो भवेत् । स एवौदयिको भावो, निवृत्तस्तेन वा तथा ॥ १६ ॥
य एव जीवाजीवानां, स्वरूपानुभवं प्रति । प्रह्वीभावः परीणामः, स एव पारिणामिकः ॥ १७ ॥
परिणामेन निवृत्त, इति चात्र न संभवेत् । अस्यां निरुक्तौ सादित्वं, जीवत्वादेः प्रसज्यते ॥ १८ ॥
अत्र चाद्यास्त्रयः प्रादुर्भवेयुः कर्मघाततः । रजोऽभ्रविगमे तिग्मरश्मिकान्तिकलापवत् ॥ १९ ॥
सर्वतो देशतश्चेति, विघातः कर्मणां द्विधा । आद्यः स्ववीर्यापेक्षोऽन्यः, सकर्मात्मप्रयोगजः ॥ २० ॥
तुर्यस्तु भावः स्वोपात्तकर्मोदयसमुद्भवः । सुरामदोदयाद्गीतनृत्तहास्यादिभाववत् ॥ २१ ॥
पारिणामिकभावस्तु, निर्दिष्टो निर्निमित्तकः । अत एव स्वार्थिकोऽत्र, प्रत्ययो राक्षसादिवत् ॥ २२ ॥
आदिमाश्च त्रयो भावा, जीवानामेव निश्चिताः । अन्तिमौ तौ पुनर्जीवाजीवसाधारणौ स्मृतौ ॥ २३ ॥
एकत्र द्व्यादिभावानां, सन्निपातोऽत्र वर्त्तनम् । यो भावस्तेन निर्वृत्तः, स भवेत्सान्निपातिकः ॥ २४ ॥

कर्मग्रन्थसूत्रवृत्तितत्त्वार्थभाष्यभावप्रकरणादिष्वयमेव भावषट्कोद्देशक्रमः, अनुयोगद्वार-सूत्रमहाभाष्यसूत्रवृत्त्यादिषु तु औदयिकौपशमिकक्षायिकक्षायोपशमिकपारिणामिकसान्निपातिका भावा इति. तत्र कर्मग्रन्थादिसूत्रेषु यत्प्रवचनोक्तक्रमलङ्घनं तत्र लाघवं कालस्वामिभेदतारतम्यं च हेतुमामनन्ति ।

आन्तर्मौहूर्त्तिकत्वेन, यत आद्योऽल्पकालिकः । तथाऽल्पस्वामिक इति, प्रथमं स प्ररूपितः ॥ २५ ॥
न प्राप्नुयुर्यद्बहवः, परिणाममिहेदृशम् । भावस्तदौपशमिको, मितस्वामिक इष्यते ॥ २६ ॥
भूरिभेदो भूरिकालो, भूरिस्वामिक एव च । क्षायिको ह्यौपशमिकात्तदुक्तस्तदनन्तरम् ॥ २७ ॥
क्षायोपशमिकः पश्चात्क्षायिकात्तत एव च । एवमौदयिकः प्रोक्तः, क्षायोपशमिकादनु ॥ २८ ॥
ततो भूरिकर्मयोगात्, स्वामिसाधर्म्यतोऽपि च । युक्तं क्षायोपशमिकादन्वौदयिकशंसनम् ॥ २९ ॥
अत्यन्तभिन्नः पूर्वेभ्यो, महाविषय एव यत् । पारिणामिक इत्युक्तो, भावादौदयिकादनु ॥ ३० ॥
पूर्वेषां द्व्यादिसंयोगादाविर्भवति यन्ननु । तद्युक्तमुदितः सर्वपर्यन्ते सान्निपातिकः ॥ ३१ ॥
द्वौ नवाष्टादशाथैकविंशतिश्च त्रयः क्रमात् । एषामुत्तरभेदाः स्युस्त्रिपञ्चाशच्च मीलिताः ॥ ३२ ॥

औ० २ क्षायि० ९ क्षायो० १८ औद० २१ पा० ३ सर्व० ५३ ।

सान्निपातिकभावस्तु, षड्विंशतिविधो भवेत् । तत्रोपयुक्ताः षड्भेदा, विंशतिस्त्वप्रयोजकाः ॥ ३३ ॥
सम्यक्त्वं यद्भवत्यादौ ग्रन्थिभेदादनन्तरम् । स्याद्यच्चोपशमश्रेण्यां, सम्यक्त्वं चरणं तथा ॥ ३४ ॥
द्वावौपशमिकौ भावौ, प्रोक्तावेतौ महर्षिभिः । ब्रूमहे क्षायिकस्याथ, नवभेदान् यथागमम् ॥ ३५ ॥
ये ज्ञानदर्शने स्यातां, निर्मूलावरणक्षयात् । सम्यक्त्वं यच्च सम्यक्त्वमोहनीयक्षयोद्भवम् ॥ ३६ ॥
चारित्रं यच्च चारित्रमोहनीयक्षयोत्थितम् । याश्च दानाद्यन्तरायपञ्चकक्षयसंभवाः ॥ ३७ ॥

दानलाभभोगवीर्योपभोगलब्धयोऽद्भुताः । नवामी क्षायिका भावा, भवेयुः सर्ववेदिनाम्[1] ॥ ३८ ॥
मतिश्रुतावधिमनःपर्यायाणां चतुष्टयम् । मत्यज्ञानश्रुताज्ञानविभङ्गा इति च त्रयम् ॥ ३९ ॥
यतो ज्ञानावरणीयक्षयोपशमसंभवा । ततः क्षायोपशमिका, भावाः सप्तोदिता अमी ॥ ४० ॥
ज्ञानी सम्यक्त्वयोगेनाऽज्ञानी मिथ्यात्ववांश्च सः । क्षायोपशमिकत्वं तदज्ञानानामपि स्फुटम् ॥ ४१ ॥
अचक्षुश्चक्षुरवधिर्दर्शनानीति च त्रयम् । दर्शनावरणीयाख्यक्षयोपशमसंभवम् ॥ ४२ ॥
सम्यक्त्वं यदनन्तानुबन्धिदर्शनमोहयोः । भवेत्क्षयोपशमतः, क्षायोपशमिकं ततः ॥ ४३ ॥
यद् द्वादशकषायादिचारित्रमोहकर्मणः । भवेत्क्षयोपशमतः, चारित्रं तादृशं ततः ॥ ४४ ॥
संकल्पक्लृप्तात्प्राणातिपातादेर्यन्निवर्त्तनम् । आरम्भोत्थादनिवृत्तिः, संयमासंयमो ह्ययम् ॥ ४५ ॥
एष चारित्रमोहस्य, यत्कषायाष्टकात्मनः । भवेत्क्षयोपशमतः, क्षायोपशमिकस्ततः ॥ ४६ ॥
दानादिलब्धयः पञ्च, छद्मस्थानां भवन्ति याः । क्षायोपशमिक्यो विघ्नक्षयोपशमज हि ताः ॥ ४७ ॥
भावा अष्टादशाप्येवं क्षायोपशमिका इमे । कर्मक्षयोपशमतो, यद्भवन्त्युक्तया दिशा ॥ ४८ ॥
अथाज्ञानमसिद्धत्वमसंयम इमे त्रयः । लेश्याषट्कं कषायाणां, गतीनां च चतुष्टयम् ॥ ४९ ॥
वेदास्त्रयोऽथ मिथ्यात्वं, भावा इत्येकविंशतिः । कर्मणामुदयाज्जातास्तत औदयिकाः स्मृताः ॥ ५० ॥
अतत्त्वे तत्त्वबुद्ध्यादिस्वरूपं भूरिदुःखदम् । मिथ्यात्वमोहोदयजमज्ञानं तत्र कीर्तितम् ॥ ५१ ॥

यदभ्यधायि—"जह दुव्वयणवयणं कुच्छियसीलं असीलमसईए । भन्नइ तह नाणंपि हु मिच्छद्दिट्ठिस्स अन्नाणं" ॥ [विशेषावश्यक श्लो. ५२३]

असिद्धत्वमपि ज्ञेयमष्टकर्मोदयोद्भवम् । प्रत्याख्यानावरणीयोदयाच्च स्यादसंयमः ॥ ५२ ॥
लेश्याः कषायनिष्यन्द, इति येषां मतं मतम् । तेषां मते कषायाख्यमोहोदयभवा इमाः ॥ ५३ ॥
येषां मते त्वष्टकर्मपरिणामात्मिका इमाः । अष्टकर्मोदयात्तेषां, मतेऽसिद्धत्ववन्मताः ॥ ५४ ॥
येषां योगपरीणामो, लेश्या इति मतं मतम् । तेषां त्रियोगिजनककर्मोदयभवा इमाः ॥ ५५ ॥

इति कर्मग्रन्थवृत्त्यभिप्रायः, तत्त्वार्थवृत्तौ च मनोयोगपरीणामो लेश्या इत्युक्तं, तथाहि—"ननु कर्मप्रकृतिभेदानां द्वाविंशं शतं प्रकृतिगणनया प्रसिद्धमाम्नायेन च तत्र लेश्याः न परिपठितास्तदेतत्कथमुच्यते—वक्ष्यते नामकर्मणि मनःपर्याप्तिः, पर्याप्तिश्च करणविशेषो, येन मनोयोग्यपुद्गलानादाय चिन्तयति, ते च मन्यमानाः पुद्गलाः सहकरणान्मनोयोग उच्यते, मनोयोगपरिणामश्च लेश्या" इति ।

---

१ संपूर्णतया समस्ता नव केवलिनामिति, क्षायिकसम्यक्त्वस्यासर्ववेदिनां भवनेऽपि न क्षतिः ।

२ आदिशब्देनात्र दर्शनमोहग्रहणे चारित्रमोहताविरोधः, नोकषायग्रहणे तु श्रेणी क्षायोपशमिकप्रसंग इति चेन्न, क्षायोपशमिकचारित्रे संज्वलनस्यापि मान्यात् तन्मान्यत्वे एवातिचाररहितताभावात्, यावच्च न द्वादशं गुणस्थानं तावदस्त्येव क्षायोपशमिकचारित्रं, आदिना वा आद्याश्चारित्रमोहप्रकृतयः ।

एवं मतत्रयेऽपि यथास्वं लेश्यानामन्तर्भावो वाच्यः । अत्र मतत्रयेऽन्त्यं[1] पटीयोऽन्ये चानीदृशे इत्यादि द्रव्यलोके लेश्याधिकारे प्रपञ्चितमस्ति ।

कषायाः स्युः क्रोधमानमायालोभा इमे पुनः । कषायमोहनीयाख्यकर्मोदयसमुद्भवाः ॥ ५६ ॥
गतयो देवमनुजतिर्यग्नरकलक्षणाः । भवन्तीह गतिनामकर्मोदयसमुद्भवाः ॥ ५७ ॥
नोकषायमोहनीयोदयोद्भूताभवन्त्यथ । स्त्रीपुंनपुंसकाभिख्या, वेदाः खेदाश्रया भृशम् ॥ ५८ ॥
मिथ्यात्वमपि मिथ्यात्वमोहनीयोदयोद्गतम् । एवमौदयिका भावा, व्याख्याता एकविंशतिः ॥ ५९ ॥
ननु निद्रादयो भावास्तत्तत्कर्मोदयोद्गताः । अन्येऽपि संति तत्केयं, गणनाऽत्रैकविंशतेः ? ॥ ६० ॥
अत्रोच्यते–
यथासंभवमेष्वेवान्तर्भाव्या अपरेऽपि ते । सावर्ण्यसाहचर्याभ्यामाक्षेपाद्वोपलक्षणात् ॥ ६१ ॥
निद्रापञ्चकमाक्षिप्तमज्ञानग्रहणाद्यतः । स्यादज्ञानं मोहनीयावरणद्वितयोदयात् ॥ ६२ ॥
गतिग्रहणतः शेषनामकर्मभिदां व्रजः । आक्षिप्यतेऽविनाभावात्सावर्ण्याद्वोपलक्ष्यते ॥ ६३ ॥
आयूंषि वेदनीये द्वे, गोत्रे द्वे इत्यमून्यपि । आक्षिप्यन्तेऽत्र गत्यैवाऽनन्यथाभावतः खलु ॥ ६४ ॥
जात्यादिनामगोत्रायुर्वेद्यानां कर्मणां ध्रुवम् । भवधारणहेतूनामसत्येकतरेऽपि यत् ॥ ६५ ॥
गतिर्न संभवत्येवाऽव्यभिचारि ततः स्फुटम् । ज्ञेयमेषां साहचर्यमर्हत्यपि तथेक्षणात् ॥ ६६ ॥
हास्यादि षट्कमाक्षिप्तं, वेदानां ग्रहणादिह । यदेतेऽव्यभिचारेण, वेदोपग्रहकारिणः ॥ ६७ ॥
यद्वा कषायग्रहणाद्धास्यादीनां परिग्रहः । सावर्ण्यात्सहचाराच्च, कषायनोकषाययोः ॥ ६८ ॥

इत्यर्थतस्तत्त्वार्थवृत्तौ. कर्मग्रन्थवृत्तावप्युक्तं–ननु निद्रापञ्चकसातादिवेदनीयरत्यरतिप्रभृतयः प्रभूततरभावा अन्येऽपि कर्मोदयजन्याः सन्ति, तत्किमित्येतावन्त एवेति निर्दिष्टाः ? सत्यं, उपलक्षणत्वादन्येऽपि दृष्टव्याः, केवलं पूर्वशास्त्रेषु प्राय एतावन्त एव निर्दिष्टा दृश्यन्ते, इत्यत्राप्येतावन्त एवास्माभिः प्रदर्शिता इति ।

जीवत्वमथ भव्यत्वमभव्यत्वमिति त्रयः । स्युः पारिणामिका भावा, नित्यमीदृक्स्वभावतः ॥ ६९ ॥
यदभव्यो न भव्यत्वं, भव्यो वा नैत्यभव्यताम् । कदाप्यजीवा जीवत्वं, जीवो वा न ह्यजीवताम् ॥ ७० ॥
जीव एवात्र जीवत्वं, स्वार्थिकः प्रत्ययो ह्ययम् । भाविसिद्धिर्भवेद्भव्यः, सिद्ध्यनर्हस्त्वभव्यकः ॥ ७१ ॥
भावाः सन्ति परेऽप्यस्तित्वादयः पारिणामिकाः । किंतु जीवाजीवसाधारण इत्यत्र नोदिताः ॥ ७२ ॥
जीवस्यैव परं ये स्युर्न त्वजीवस्य कर्हिचित् । ते त्रिपञ्चाशदत्रोक्ताः, सदौपशमिकादयः ॥ ७३ ॥

तथोक्तं तत्त्वार्थभाष्ये–"जीवत्वभव्यत्वाभव्यत्वादीनि च । जीवत्वं भव्यत्वमभव्यत्वमित्येते त्रयः पारिणामिका भावा भवन्ति । [अध्याय २. सूत्र. ७]

---

१ अन्त्यं योगपरिणामो लेश्येत्यात्मकं मतं, न तु मनोयोगपरिणामो लेश्येत्यात्मकं, तस्य तुर्यमतत्वात्, पृथगगणना तु तस्य योगपरिणाम एवान्तर्भावात् ।

आदिग्रहणं किमर्थमित्यत्रोच्यते—अस्तित्वमन्यत्वं कर्तृत्वं भोक्तृत्वं गुणवत्त्वमसर्वगतत्व-मनादिकर्मसंतानबद्धत्वं प्रदेशवत्त्वमरूपत्वं नित्यत्वमित्येवमादयोऽप्यनादिपारिणामिका जीवस्य भावा भवन्ति । धर्मादिभिस्तु समाना इत्यादिग्रहणेन सूचिता इति ।

अजीवानां कर्तृत्वभोक्तृत्वादिकं चैवं तत्त्वार्थटीकायां—कर्तृत्वं सूर्यकान्तेऽपि सवितृकिरण-गोमयसंगमादुपलभ्यतेऽग्निनिर्वृत्तावेतत्सामान्यं,

भोक्तृत्वं मदिरादिष्वप्यत्यन्तं प्रसिद्धं, भुक्तोऽनया गुड इति ।

क्रोधादिमत्त्वाद्गुणवत्त्वं ज्ञानाद्यात्मकत्वाद्वा परमाण्वादावपि गुणवत्त्वमेकवर्णादित्वात्समानं,

अनादिकर्मसंतानबद्धत्वमिति कार्मणशरीरमप्यनादिकर्मसंतानबद्धमिति चेतनाचेतनयोर्धर्मसाम्यं, भाष्यकारः पुनरप्यादिग्रहणं कुर्वन् ज्ञापयत्यत्रानन्तधर्मकमेकं, तत्राशक्याः प्रस्तारयितुं सर्वे धर्माः प्रतिपदं, प्रवचनज्ञेन पुंसा यथासंभवमायोजनीयाः, क्रियावत्त्वं पर्यायोपयोगिता प्रदेशाष्टकनिश्चलता एवंप्रकाराः सन्ति भूयांस इति ।

सान्निपातिकभावानां, कुर्महेऽथनिरूपणम् । तत्र स्युर्द्विकसंयोगा, दश ते नामतस्त्वमी ॥ ७४ ॥
आद्यः स्यादौपशमिकक्षायिकाख्यसमन्वये । द्वितीयस्त्वौपशमिकक्षायोपशमिकान्वये ॥ ७५ ॥
तृतीयश्चौपशमिकौदयिकाख्यसमागमे । चतुर्थ औपशमिकपारिणामिकसयुंतौ ॥ ७६ ॥
क्षायिकक्षायोपशमिकान्वयोत्थस्तु पञ्चमः । क्षायिकौदयिकाभ्यां च, षष्ठो भङ्गः समन्वये ॥ ७७ ॥
सप्तमस्तु क्षायिकेण, पारिणामिकसंगमे । अष्टमः स्यादौदयिकक्षायोपशमिकान्वये ॥ ७८ ॥
पारिणामिकमिश्राभ्यां, मिश्राभ्यां नवमो मतः । दशमः स्यादौदयिकपारिणामिकयोगजः ॥ ७९ ॥
त्रिकसंयोगजा भङ्गा, दश तत्रायमादिमः । क्षयक्षयोपशमजोपशमोत्थैः समागतैः ॥ ८० ॥
क्षायिकौदयिकाख्यौपशमिकाख्यैर्द्वितीयकः । तृतीयश्चोपशमिकक्षायिकपारिणामिकैः ॥ ८१ ॥
औदयिकौपशमिकक्षायोपशमिकैः परः । पारिणामौपशमिकक्षायोपशमिकैः परः ॥ ८२ ॥
स्यात्षष्ठश्चौपशमिकौदयिकपारिणामिकैः । क्षायिकौदयिकक्षायोपशमिकैस्तु सप्तमः ॥ ८३ ॥
पारिणामिकमिश्राख्यक्षायिकैरष्टमः स्मृतः । नवमः स्यादौदयिकक्षायिकपारिणामिकैः ॥ ८४ ॥
पारिणामिकमिश्राख्यौदयिकैर्दशमोऽपि च । चतुःसंयोगजाः पञ्च, भङ्गकास्ते त्वमी श्रुताः ॥ ८५ ॥
क्षायिकश्चौपशमिकः, क्षायोपशमिकोऽपि च । औदयिकश्चेत्यमीभिर्योगे प्रथमभङ्गकः ॥ ८६ ॥
क्षायिकोऽथौपशमिकः, क्षायोपशमिकाह्वयः । पारिणामिक इत्येषां, योगे भङ्गे द्वितीयकः ॥ ८७ ॥
क्षायिकौपशमिकाख्यौ, पारिणामिक इत्यपि । औदयिकश्चेत्यमीषां, योगे भङ्गस्तृतीयकः ॥ ८८ ॥
क्षायोपशमिकश्चौपशमिकौदयिकाह्वयौ । पारिणामिक इत्येषां योगे भङ्गस्तुरीयकः ॥ ८९ ॥
क्षायिकौदयिकाभिख्यौ, क्षायोपशमिकाह्वयः । पारिणामिक एतेषां, योगे भङ्गस्तु पञ्चमः ॥ ९० ॥
पञ्चसंयोगजश्चैकः, स्यादौपशमिकादिभिः । पञ्चभिः सन्निपतितैः, षड्विंशतिरमी समे ॥ ९१ ॥
सप्तमो द्विकयोगोत्थो, नवमो दशमोऽपि च । त्रियोगजौ चतुर्योगे, भङ्गौ चतुर्थपञ्चमौ ॥ ९२ ॥

एकः पञ्चकसंयोगी, षडमी सान्निपातिकाः । जीवेषु संभवन्त्यन्ये, विंशतिः संभवोज्झिताः ॥ ९३ ॥

यत्तु तत्त्वार्थवृत्तावेवमुक्तं, "एषामेवौपशमिकादीनां द्विकादियोगेन सान्निपातिको निष्पद्यते षड्विंशतिविकल्पः तत्रैकादश विरोधित्वादसंभवन्तस्त्यक्ता विकल्पाः पञ्चदशोपात्ताः[1] संभविनः, प्रशमरतौ "षष्ठ इत्यन्यः पञ्चदशभेद" इति वचनादिति" तदभिप्रायं सम्यग् न विद्मः, यतोऽनुयोगद्वारवृत्तावेवमुक्तं, "तदेवमेको द्विकसंयोगभङ्गको, द्वौ द्वौ त्रिकयोगचतुष्कयोगभङ्गकौ, एकस्त्वयं पञ्चकयोग इत्येते षड्भङ्गका अत्र संभविनः प्रतिपादिताः, शेषास्तु संयोगमात्रतयैव प्ररूपिता इति स्थितं ।

एतेषु च षट्सु भङ्गकेषु मध्ये एकस्त्रिकसंयोगो, द्वौ चतुष्क योगावित्येते त्रयोऽपि प्रत्येकं चतसृष्वपि गतिषु संभवन्तीति निर्णीतमिति, गतिचतुष्टयभेदात्ते किल द्वादश वक्ष्यन्ते. ये तु शेषा द्विकत्रिकपञ्चकयोगलक्षणास्त्रयो भङ्गाः सिद्धकेवल्युपशान्तमोहानां यथाक्रमं निर्णीतास्ते च यथोक्तैकस्थानसंभवित्वात्त्रय एवेत्यनया विवक्षया सान्निपातिको भावः स्थानान्तरे पञ्चदशविध उक्तो दृष्टव्यः यदाह–"अविरुद्धसन्निवाइयभेया एते पणरसत्ति' ।"

संभवत्सु च षट्स्वेषु, सप्तमो द्विकयोगजः । सिद्धानामेव निर्दिष्टः, क्षायिकपारिणामिकः ॥ ९४ ॥
ज्ञानादि क्षायिकं ह्येषां, जीवत्वं पारिणामिकम् । सिद्धानामन्यभावानां, हेत्वभावादसंभवः ॥ ९५ ॥
त्रिकसंयोगजो यस्तु, नवमः प्राग्निरूपितः । स सर्वज्ञे क्षायिकाख्यौदयिकपारिणामिकः ॥ ९६ ॥
जीवत्वादि अतस्तस्य, वर्त्तते पारिणामिकम् । औदयिकी नरगतिर्ज्ञानादि क्षायिकं तथा ॥ ९७ ॥
त्रिकसंयोगजो यस्तु, दशमः प्राक् प्रदर्शितः । स चतुर्धा भवेन्मिश्रौदयिकपारिणामिकः ॥ ९८ ॥
यतः क्षायोपशमिकानीन्द्रियाणि भवन्त्यथ । औदयिकी श्वभ्रगतिर्जीवत्वं पारिणामिकम् ॥ ९९ ॥
एवं तिर्यगादिगत्यभिलापेन त्रयः परे । भवन्ति भङ्गकास्ते च, स्वयं वाच्या विवेकिभिः ॥ १०० ॥
चतुस्संयोगजौ यौ च भङ्गौ तुरीयपञ्चमौ । प्रत्येकं तावपि स्यातां, गतिभेदाच्चतुर्विधौ ॥ १०१ ॥
तथाहि–सम्यक्त्वमौपशमिकं, कृत्तत्रिपुञ्जदेहिनाम् । ज्ञानि मिश्राणि जीवत्वं, स्यात्तेषां पारिणामिकम् ॥ १०२ ॥
गतिर्भवत्यौदयिकी, यदेषां नरकादिका । चतुःसंयोगजस्तुर्यश्चतुर्भेदो भवेदिति ॥ १०३ ॥
सम्यक्त्वं क्षायिकं ज्ञानि, मिश्राणि पारिणामिकम् । जीवत्वमेवौदयिकी, गतिः स्यान्नरकादिका ॥ १०४ ॥
चतुःसंयोगजश्चैवं, पञ्चमोऽपि चतुर्विधः । नृणामुपशमश्रेण्यां, पञ्चसंयोगजः पुनः ॥ १०५ ॥
यो हि क्षायिकसम्यक्त्वी, मनुजः प्रतिपद्यते । विशुद्ध्योपशमश्रेणीं, क्षायिकं तस्य दर्शनम् ॥ १०६ ॥
चारित्रं चौपशमिकं, तन्मोहोपशमाद्भवेत् । गतिरौदयिकी ज्ञानि, क्षायोपशमिकान्यथ ॥ १०७ ॥
जीवत्वमथ भव्यत्वं, भवेतां पारिणामिके । पञ्चसंयोगजस्यैकविधस्यैवं हि संभवः ॥ १०८ ॥
सान्निपातिकभेदानां, षण्णां संभविनामिति । उक्ता भेदाः पञ्चदश, प्रतिभेदविवक्षया ॥ १०९ ॥
जीवेषु षडमी भावा, यथासंभवमाहिताः । अजीवेषु त्वौदयिकपारिणामिकसंज्ञकौ ॥ ११० ॥

१ सान्निपातिकमूलभेदषट्कस्यावान्तरभेदा एव पञ्चदशेति, स्पष्टं भविष्यति चैतदत्रैव, गतिभेदेन भावभेदोऽत्र ।

तथाहि--धर्माधर्माभ्रास्तिकायकालेषु पारिणामिकः । एक एवानाद्यनन्तो, निर्दिष्टः श्रुतपारगैः ॥ १११ ॥
चलनस्थित्युपष्टम्भावकाशदानधर्मकाः । सर्वदाऽमी परिणताः, परिणामेन तादृशाः ॥ ११२ ॥
आवल्यादिपरिणामोरसीकारान्निरन्तरम् । अनाद्यनन्तो भावः स्यात्कालस्य पारिणामिकः ॥ ११३ ॥
वर्त्तनालक्षणः कालः, क्षणावल्यादिकः परः । इति द्वेधा निगदितः, कालः केवलशालिभिः ॥ ११४ ॥
तेन तेन स्वरूपेण, वर्त्तन्तेऽर्था जगत्सु ये । तेषां प्रयोजकत्वं यद्वर्त्तना सा प्रकीर्त्तिता ॥ ११५ ॥
सा लक्षणं लिङ्गमस्य, वर्त्तनालक्षणस्ततः । सर्वक्षेत्रद्रव्यभावव्यापी कालो भवत्ययम् ॥ ११६ ॥
समयावलिकादिस्तु, समयक्षेत्रवर्त्तिषु । द्रव्यादिष्वस्ति न ततो, बहिर्वर्त्तिषु तेष्वयम् ॥ ११७ ॥
अन्यान्यसमयोत्पत्तेरेकक्षणात्मकोऽप्ययम् । आवल्यादिपरीणामं, सदा परिणमत्यहो ॥ ११८ ॥
स्यात्पुद्गलास्तिकाये तु, साद्यन्तः पारिणामिकः । भवदौदयिकोऽप्यस्मिन्, भावः स्कन्धेषु केषुचित् ॥ ११९ ॥
स्कन्धानां द्व्यणुकादीनां, साद्यन्तः पारिणामिकः । तेन तेन स्वरूपेण, साद्यन्तपरिणामतः ॥ १२० ॥
स्यादेवं परमाणूनां, साद्यन्तः पारिणामिकः । स्कन्धान्तर्भावतो वर्णगन्धादिव्यत्ययादपि ॥ १२१ ॥
अनन्ताण्वात्मकाः स्कन्धा, ये जीवग्रहणोचिताः । स्यात्पारिणामिको भावस्तेषामौदयिकोऽपि च ॥ १२२ ॥
शरीरादिनामकर्मोदयेन जनितो यथा । औदारिकादिस्कन्धानां, तत्तद्देहतयोदयः ॥ १२३ ॥
ये जीवग्रहणानर्हाः, स्कन्धाः सूक्ष्माश्च येऽणवः । तेषां नौदयिको भावः, केवलं पारिणामिकः ॥ १२४ ॥
उदय एवौदयिक, इति व्युत्पत्त्यपेक्षया । कर्मस्कन्धेष्वौदयिको, भावो भवति तद्यथा ॥ १२५ ॥
क्रोधादीनां य उदयो, जीवानां जायते स वै । कर्मस्कन्धोदयो ज्ञेयः, कर्मस्कन्धात्मका हि ते ॥ १२६ ॥
कर्मस्कन्धाश्रिता एवं, नन्वौपशमिकादयः । संभवन्तः कथं भावा, अजीवेषु न कीर्त्तिताः ? ॥ १२७ ॥
सत्यं ते संभवन्त्येव, तेषां किञ्च निरूपणे । अविवक्षैव हेतुत्वं, बिभर्त्ति प्राक्तनादृता ॥ १२८ ॥
भवत्वौदयिकोऽप्येवं, संभवन्नविवक्षितः । समाने संभवे षड्भक्तिभेदोऽयं कथमर्हति ? ॥ १२९ ॥
सत्यमेष षड्भक्तिभेदो, विज्ञैः कैश्चिन्निराकृतः । अजीवेषूदितो यत्तैः, केवलं पारिणामिकः ॥ १३० ॥

तथोक्तं कर्मग्रन्थवृत्तौ--"नन्वेवं कर्मस्कन्धाश्रिता औपशमिकादयो भावा अजीवानां संभवन्त्यतस्तेषामपि भणनं प्राप्नोति, सत्यं, तेषामविवक्षितत्वादत एव कैश्चिदजीवानां पारिणामिक एव भावोऽभ्युपगम्यत" इति ।

जीवाजीवाश्रिता भावा, इति सम्यग्निरूपिताः । अधिकृत्याथ कर्माणि, कुर्मो भावप्ररूपणम् ॥ १३१ ॥
क्षायिकश्चौपशमिको, मिश्रश्च पारिणामिकः । तथौदयिक इत्येते, पञ्चापि मोहनीयके ॥ १३२ ॥
ज्ञानदर्शनावरणान्तरायेषु च कर्मसु । भावा भवन्ति चत्वार, एवौपशमिकं विना ॥ १३३ ॥
तत्रापि केवलज्ञानदर्शनावरणाख्ययोः । विपाकोदयविष्कम्भाभावान्मिश्रो न संभवेत् ॥ १३४ ॥
वेदनीयनामगोत्रायुषां तु त्रय एव ते । विना मिश्रौपशमिकौ, परिणामक्षयोदयाः ॥ १३५ ॥
तत्र च--क्षय आत्यन्तिकोच्छेदः, स्वविपाकोपपादकः । उदयः परिणामस्तु, जीवांशैर्मिश्रताभृशम् ॥ १३६ ॥

यद्वा—तत्तद्द्रव्यक्षेत्रकालाध्यवसायव्यपेक्षया । संक्रमादितया वा यः, परिणामः स एव सः ॥ १३७ ॥
उपशमोऽत्रानुदयावस्था भस्मावृताग्निवत् । स मोहनीय एव स्यान्न जात्वन्येषु कर्मसु ॥ १३८ ॥
सर्वोपशम एवायं, विज्ञेयो न तु देशतः । यद्देशोपशमस्तु स्यादन्येषामपि कर्मणाम् ॥ १३९ ॥
चतुर्णां घातिनामेव, क्षयोपशम इष्यते । कर्मस्वष्टास्वपीह स्युः, परिणामक्षयोदयाः ॥ १४० ॥
नृतिर्यग्देवनरकरूपे गतिचतुष्टये । पञ्चापि भावा ज्ञेया यज्जीवत्वं पारिणामिकम् ॥ १४१ ॥
सम्यक्त्वमौपशमिकं, क्षायिकं चेन्द्रियाणि च । क्षायोपशमिकान्यासु, गतिरौदयिकी भवेत् ॥ १४२ ॥
तौ द्वावेव सिद्धगतौ, क्षायिकपारिणामिकौ । ज्ञानादि क्षायिकं तत्र, जीवत्वं पारिणामिकम् ॥ १४३ ॥
एवं च—
गत्यादिमार्गणाद्वारेष्वेवं स्युर्नियतास्त्रयः । क्षायिकौपशमिकौ तु, भजनीयौ यथायथम् ॥ १४४ ॥
यत्क्षायिकौपशमिकभावयोः सति संभवे । वाच्याः पञ्चान्यथा मिश्रौदयिकपारिणामिकाः ॥ १४५ ॥
एवं कर्मस्वमी भावा, यथाऽऽम्नायं निरूपिताः । अथो गुणस्थानकेषु, कुर्मो भावप्ररूपणाम् ॥ १४६ ॥
सम्यग्दृष्टयादिषु गुणस्थानकेषु चतुर्ष्विह । भावास्त्रयोऽथ चत्वारो, लभ्यन्ते किल तद्यथा ॥ १४७ ॥
त्रयः क्षायोपशमिकसम्यग्दृष्टेर्भवन्ति यत् । गतिरौदयिकी तेषां, जीवत्वं पारिणामिकम् ॥ १४८ ॥
क्षायोपशमिकं सम्यग्दर्शनं चेन्द्रियाणि च । चत्वारश्चौपशमिकक्षायिकदर्शनस्पृशः ॥ १४९ ॥
सम्यक्त्वमौपशमिकं, तेषां वा क्षायिकं भवेत् । मिश्राणि खानि जीवत्वं, गतिश्चात्रापि पूर्ववत् ॥ १५० ॥
अनिवृत्तिबादराख्यसुसूक्ष्मसंपराययोः । चत्वारः पञ्च वा भावास्त्रयस्तत्र च पूर्ववत् ॥ १५१ ॥
सम्यक्त्वमौपशमिकं, श्रेणावुपशमस्पृशि । क्षायिकं क्षपकश्रेण्यां, द्विधाप्येवं चतुष्टये ॥ १५२ ॥
पञ्चमस्त्वौपशमिकचारित्रान्वय इष्यते । शास्त्रान्तरे तत्कथितमनयोर्गुणयोरपि ॥ १५३ ॥

तथोक्तं कर्मग्रन्थवृत्तौ—"एषामेव चतुर्णांमध्येऽनिवृत्तिबादरसूक्ष्मसंपरायगुणस्थान-कद्वयवर्त्तिनोऽप्यौपशमिकचारित्रस्य शास्त्रान्तरे प्रतिपादनादौपशमिकचारित्रप्रक्षेपे पञ्चम" इति ।

तथोपशान्त मोहेऽपि, चत्वारः पञ्च वा स्मृताः । पञ्च क्षायिकसम्यक्त्वभृतोऽन्यस्य चतुष्टयम् ॥ १५४ ॥
चत्वारोऽपूर्वकरणे, क्षीणमोहे च ते स्मृताः । त्रयस्तु पूर्ववन्मिश्रौदयिकपारिणामिकाः ॥ १५५ ॥
सम्यक्त्वं क्षायिकं क्षीणमोहे भावस्तुरीयकः । क्षायिकं चौपशमिकमपूर्वकरणे पुनः ॥ १५६ ॥
मिथ्यादृष्टौ तथा सास्वादने मिश्रगुणेऽपि च । सयोगिकेवल्याख्ये, चाऽयोगिकेवलिसंज्ञके ॥ १५७ ॥
पञ्चस्वमीषु प्रत्येकं, त्रयो भावा उदाहृताः । तत्राद्यत्रितये मिश्रौदयिकपारिणामिकाः ॥ १५८ ॥
अन्त्यद्वये त्वौदयिकक्षायिकपारिणामिकाः । ज्ञानादि क्षायिकं शेषौ, गतिजीवत्वगोचरौ ॥ १५९ ॥
भावाः स्वाम्यादिभेदेन, विशिष्यैवं निरूपिताः । सामान्यतः संभविनो, भावान् वच्मि गुणेष्वथ ॥ १६० ॥
त्रयस्त्रिषु गुणस्थानेष्वाद्येषु ते च पूर्ववत् । तुर्यादिष्वष्टसु पुनः, प्रत्येकं पञ्च कीर्त्तिताः ॥ १६१ ॥
तथाहि—सम्यकत्वमौपशमिकं, चतुर्थादिगुणाष्टके । क्षायिकं च चतुर्थादिष्वेकादशसु संभवेत् ॥ १६२ ॥

मिश्रं सम्यक्त्वेन्द्रियादि, चतुर्थादिचतुष्टये । खचारित्रे चाष्टमादौ, त्रय एकादशे तु खम् ॥ १६३ ॥
गतिः सर्वत्रौदयिकी, जीवत्वं पारिणामिकम् । एवं भावित एतेषु, भावपञ्चकसंभवः ॥ १६४ ॥
क्षीणमोहे च चत्वारस्त औपशमिकं विना । अन्त्यद्वये त्रयो भावा मिश्रोपशमिकौ विना ॥ १६५ ॥
पञ्चाप्येवं मूलभेदा, गुणस्थानेषु भाविताः । एतेष्वेवाथ भावानां, प्रतिभेदान् प्रतन्महे ॥ १६६ ॥
दश मिथ्यादृष्टिसास्वादनयोर्गुणयोः स्मृताः । क्षायोपशमिकाख्यस्य, प्रतिभेदा जिनैर्यथा ॥ १६७ ॥
विघ्नक्षयोपशमजाः, पञ्च दानादिलब्धयः । अज्ञानत्रितयं चक्षुरचक्षुर्दर्शने इति ॥ १६८ ॥
भेदा द्वादश मिश्राख्ये, सम्यक्त्वं मिश्ररूपकम् । दानादिपञ्चकं ज्ञानदर्शनानां त्रयं त्रयम् ॥ १६९ ॥
ज्ञानाज्ञानान्यतरांशबाहुल्यमिह संभवेत् । क्वचित्क्वचिच्चोभयांशसमता वाऽत्र यद्यपि ॥ १७० ॥
तथापि विज्ञैर्ज्ञानांशबाहुल्यस्य विवक्षया । उक्तं ज्ञानत्रयं मिश्रगुणस्थाने गुणाश्रयैः ॥ १७१ ॥
अस्मिंश्च यद्गुणस्थाने, दर्शनत्रयमीरितम् । तच्च सैद्धान्तिकमतापेक्षयेति विभाव्यताम् ॥ १७२ ॥
स्युर्द्वादशैवाविरतसम्यग्दृश्यपि मिश्रवत् । क्षायोपशमिकं मिश्रस्थाने सम्यक्त्वमत्र तु ॥ १७३ ॥
द्वादशस्वेषु सद्देशविरतिक्षेपतः स्मृताः । क्षायोपशमिका भावास्त्रयोदशैव पञ्चमे ॥ १७४ ॥
एतेभ्यो देशविरतित्यागे द्वादश ये स्थिताः । तेष्वेव सर्वविरतिमनोज्ञानसमन्वये ॥ १७५ ॥
षष्ठसप्तमयोर्भावा, भवन्त्येते चतुर्दश । क्षायोपशमिकाख्येन, सम्यक्त्वेन विना त्वमी ॥ १७६ ॥
त्रयोदशाष्टमे भावा, नवमे दशमेऽपि च । अष्टमादिषु सम्यक्त्वं, क्षायोपशमिकं न यत् ॥ १७७ ॥
एकादशद्वादशयोर्गुणस्थानकयोरमी । विना क्षायोपशमिकं, चारित्रं द्वादशोदिताः ॥ १७८ ॥
एकादशे गुणस्थाने, यदौपशमिकं परम् । चारित्रं क्षायिकं च स्यात्, केवलं द्वादशे गुणे ॥ १७९ ॥
दर्शनत्रितयं ज्ञानचतुष्कं लब्धिपञ्चकम् । अमी भावा द्वादशोपशान्तक्षीणविमोहयोः ॥ १८० ॥
इति क्षायोपशमिकप्रतिभेदा विभाविताः । गुणस्थानेष्वौदयिकप्रतिभेदान् ब्रवीम्यथ ॥ १८१ ॥
अज्ञानाद्या औदयिका, भावा य एकविंशतिः । सर्वेऽपि ते स्युर्मिथ्यात्वगुणस्थाने शरीरिणाम् ॥ १८२ ॥
सास्वादने च मिथ्यात्वं, विना त एव विंशतिः । अज्ञानेन विनैकोनविंशतिर्मिश्रतुर्ययोः ॥ १८३ ॥
वेदाः कषाया गतयो लेश्याश्चासंयमोऽपि च । असिद्धत्वममी तुर्यतृतीयगुणयोः स्मृताः ॥ १८४ ॥
एकोनविंशतेरेभ्यो, देवश्वभ्रगतीविना । शेषाः सप्तदश ख्याता, गुणस्थाने हि पञ्चमे ॥ १८५ ॥
नरतिर्यग्गती लेश्या, असिद्धत्वमसंयमः । वेदाः कषाया इत्येते, स्युर्गुणे देशसंवरे ॥ १८६ ॥
प्रमत्ते च पञ्चदश, भावा औदयिकाः स्मृताः । उदयेऽत्र भवेतां यन्नतिर्यग्गत्यसंयमौ ॥ १८७ ॥
अप्रमत्ते द्वादशाद्यलेश्यात्रयविनाकृताः । कषायः वेद नृगतित्र्यन्त्यलेश्यमसिद्धत्ता ॥ १८८ ॥
नवमाष्टमयोस्तेजःपद्मलेश्ये विना दश । नृगत्यसिद्धता शुक्ललेश्यावेदकषायकाः ॥ १८९ ॥

लोभः संज्वलनः शुक्ललेश्या नृगत्यसिद्धते । चत्वार एवौदयिका, भवन्ति दशमे गुणे ॥ १९० ॥
आद्यास्त्रयः कषाया यत्त्रयो वेदा षडप्यमी । भावा औदयिकाः सूक्ष्मसंपराये भवन्ति न ॥ १९१ ॥
एकादशे विना लोभं, द्वादशेऽपि त्रयोदशे । त्रयोऽन्त्यलेश्यासिद्धत्वमनुष्यगतिलक्षणाः ॥ १९२ ॥
असिद्धत्वं च नृगतिर्द्वे गुणस्थानकेऽन्तिमे । लेश्या न स्यात्तत्र यस्मादयोगित्वमलेश्यता ॥ १९३ ॥
एवमौदयिका भावा, गुणस्थानेषु भाविताः । तथौपशमिकौ भावौ, भावयामो गुणेष्वथ ॥ १९४ ॥
सम्यक्त्वमौपशमिकमेकं तुर्यादिपञ्चके । तादृक्सम्यक्त्वचारित्रे, नवमादित्रये पुनः ॥ १९५ ॥
चारित्रमौपशमिकं, नवमादिगुणत्रये । शास्त्रान्तरेषु यत्प्रोक्तं, कैश्चित्तेषां मतं ह्यदः ॥ १९६ ॥
येषां मते तु नवमे, दशमे च गुणास्पदे । मिश्रोत्थं स्याद्व्रतं कृत्स्नं, तन्मोहानुपशान्तितः ॥ १९७ ॥
तन्मते त्वौपशमिकं, व्रतमेकादशे गुणे । पूर्वे तु मन्वते सद्वत्सत्सामीप्यादनागतम् ॥ १९८ ॥
इत्यौपशमिकौ भावौ, गुणस्थानेषु भावितौ । प्रतिभेदा विभाव्यन्ते, क्षायिकस्य गुणेष्वथ ॥ १९९ ॥
सम्यक्त्वं क्षायिकं प्रोक्तं, तुरीयादिगुणाष्टके । क्षीणमोहे च चारित्रसम्यक्त्वे क्षायिके उभे ॥ २०० ॥
लब्धयः पञ्च दानाद्याः, केवले ज्ञानदर्शने । तथा सम्यक्त्वचारित्रे, नवेत्यन्त्यगुणद्वये ॥ २०१ ॥
इत्येवं क्षायिका भेदा, गुणस्थानेषु भाविताः । पारिणामिकभावस्य, प्रतिभेदानथ ब्रुवे ॥ २०२ ॥
अभव्यत्वं च भव्यत्वं, तथा जीवत्वमित्यमी । मिथ्यादृष्टिगुणस्थाने, भावाः स्युः पारिणामिकाः ॥ २०३ ॥
द्वितीयादिक्षीणमोहपर्यन्तेषु गुणेषु च । स्यातां जीवत्वभव्यत्वे, अभव्यत्वविनाकृते ॥ २०४ ॥
स्यादेकमेव जीवत्वं, चरमे च गुणद्वये । सप्रभेदा गुणस्थानेष्वेवं भावाः प्ररूपिताः ॥ २०५ ॥
कथं न ननु भव्यत्वभावोऽन्तिमगुणद्वये । निर्वाणगमनार्हो हि, भव्योऽर्हद्भिर्यतः स्मृतः ॥ २०६ ॥
अत्रोच्यते–
प्रत्यासन्नभाविसिद्धावस्थायां तदभावतः । अत्रापि भव्यत्वाभावः, शास्त्रकृद्भिर्विवक्षितः ॥ २०७ ॥
यद्वाऽपरेण केनापि, हेतुना न विवक्षितम् । भव्यत्वमिह शास्त्रेषु, नोक्तमस्माभिरप्यतः ॥ २०८ ॥
सान्निपातिकभावोऽथ, गुणस्थानेषु भाव्यते । अनेकधा स च यथागुणस्थानं परापरैः ॥ २०९ ॥
यावतां यत्र भावानां, भेदा यावन्त ईरिताः । तेषां तत्र गुणस्थाने, कृते संकलने सति ॥ २१० ॥
स्यात्तावद्भेदनिष्पन्नो, भावोऽयं सान्निपातिकः । नामग्राहं गुणस्थानेष्वेषोऽथ परिभाव्यते ॥ २११ ॥
मिथ्यादृष्टावौदयिकभावा यथैकविंशतिः । दश क्षायोपशमिकास्त्रयश्च पारिणामिकाः ॥ २१२ ॥
एवं भावाश्चतुस्त्रिंशज्जाताः संकलिताः समे । चतुस्त्रिंशद्भेदजातस्ततोऽत्र सान्निपातिकः ॥ २१३ ॥
भवेत्सास्वादने चैष, द्वात्रिंशद्भेदभावितः । त्रयस्त्रिंशद्भेदजातो, मिश्रे स्यात्सान्निपातिकः ॥ २१४ ॥
पञ्चत्रिंशद्भेदभूतो, गुणस्थाने तुरीयके । पञ्चमे च चतुस्त्रिंशत्प्रतिभेदसमुद्भवः ॥ २१५ ॥

प्रमत्ते च त्रयस्त्रिंशद्भेदजः सान्निपातिकः । अप्रमत्तगुणस्थाने, त्रिंशद्भेदसमुत्थितः ॥ २१६ ॥
सप्तविंशतिभेदोत्थो, गुणस्थानेऽयमष्टमे । नवमे च गुणस्थाने, सोऽष्टाविंशतिनिर्मितः ॥ २१७ ॥
स सूक्ष्मसंपराये स्याद्, द्वाविंशतिसमुद्भवः । तथोपशान्तमोहेऽयं, भेदविंशतिभावितः ॥ २१८ ॥
क्षीणमोहेऽयमेकोनविंशतिप्रतिभेदजः । स सयोगिनि सर्वज्ञे, त्रयोदशभिदुद्भवः ॥ २१९ ॥
अयोगिनि द्वादशभिर्भेदैः स्यात्सान्निपातिकः । ज्ञेया भेदास्तु सर्वेऽमी, सर्वत्रोक्तानुसारतः ॥ २२० ॥

अत्र नवमदशमयोर्गुणस्थानयोरौपशमिकचारित्राङ्गीकारपक्षे द्वावौपशमिकौ भावौ, अन्यथा त्वेक एवेति ज्ञेयं ।

चतुर्भंग्याऽथ भाव्यन्ते, भावा औदयिकादयः । साद्यन्त साद्यनन्ताऽनादिसान्ताऽनाद्यनन्तकाः ॥ २२१ ॥
गत्यादिस्त्रौदयिकः, सादिः सान्तो भवेद्यतः । नृदेवतिर्यग्नरकगतीनां सादिसान्तता ॥ २२२ ॥
सादिश्चानन्त इत्येष, भङ्गस्त्वत्र न संभवेत् । सादिकानां गतीनां यदनन्तत्वमसंभवि ॥ २२३ ॥
अनादयोऽपि मिथ्यात्वादय औदयिकाश्च ये । भव्यानाश्रित्य विज्ञेयास्तेऽत्र भङ्गे तृतीयके ॥ २२४ ॥
अभव्यापेक्षया त्वेते, भाव्या भङ्गे तुरीयके । भावनैवं कषायादिभावानां क्रियते यथा ॥ २२५ ॥
वेदत्रयं च मिथ्यात्वं, कषायाणां चतुष्टयम् । लेश्याश्च षडसिद्धत्वमज्ञानासंयमावपि ॥ २२६ ॥
अमी औदयिकाः सप्तदश भव्यव्यपेक्षया । भङ्गे तृतीये तुर्ये च, भङ्गेऽभव्यव्यपेक्षया ॥ २२७ ॥
सम्यक्त्वमौपशमिकं, चारित्रमपि तादृशम् । द्वावौपशमिकावेतौ, केवलं सादिसान्तकौ ॥ २२८ ॥
आदि सम्यक्त्वलाभे यच्छ्रेण्यां वेदमवाप्यते । चारित्रमप्युपशमश्रेण्यामेवेदमाप्यते ॥ २२९ ॥
तयोश्चावश्यपातेन, भङ्गोऽत्र प्रथमः स्थितः । तदाश्रित्यौपशमिकं, शून्या भङ्गास्त्रयः परे ॥ २३० ॥
चारित्रं क्षायिकमथ, दानादिलब्धिपञ्चकम् । आश्रित्य क्षायिको भावो, भङ्गे स्यात्सादिसान्तके ॥ २३१ ॥

तथोक्तं महाभाष्ये–"सम्मत्तचरित्ताई साईसंतो य उवसमिओऽयं । दाणाइलद्धिपणगं चरणं पि अ खाइओ भावो" ॥ [श्लोक - २०७८]

ननु चारित्रमस्त्येव, सिद्धस्यापीति तत्कथम् । तत्साद्यनन्ते भङ्गे, स्यादत्राकर्णयतोत्तरम् ॥ २३२ ॥
न चरित्री नाचरित्री, न चरित्राचरित्र्यपि । सिद्धा एवंविधाः प्रोक्ताः, पञ्चमाङ्गे जिनेश्वरैः ॥ २३३ ॥

'सिद्धे नो चारित्ती' इत्यादि च तत्सूत्रं ।

सम्यक्त्वं क्षायिकमथ, केवले ज्ञानदर्शने । इत्येतत्त्रयमाश्रित्य, क्षायिकः साद्यनन्तकः ॥ २३४ ॥
शेषौ तु भङ्गकावत्र, शून्यावेव स्थितावुभौ । अनादिसान्तोऽनाद्यन्तो, क्षायिकः सम्भवेन्न यत् ॥ २३५ ॥
इच्छन्ति सिद्धस्याप्यन्ये, चारित्रं लब्धिपञ्चकम् । सिद्धत्वेऽपि हि निर्मूलमेतदावरणक्षयात् ॥ २३६ ॥
एषामावरणाभावेऽप्यसत्त्वं यदि कल्प्यते । क्षीणमोहादिकेष्वेवं, तदभावः प्रसज्यते ॥ २३७ ॥

तदेतन्मतमाश्रित्य, चारित्रे लब्धिपञ्चके । सिद्धेषु स्वीकृते साद्यनन्तः स्यात्क्षायिकः परम् ॥ २३८ ॥
शेषा भङ्गास्त्रयः शून्याः, क्षायिकस्याप्यपेक्षया । भङ्गव्यवस्था क्रियते, क्षायोपशमिकेष्वथ ॥ २३९ ॥
छाद्मस्थिकानि ज्ञानानि, चत्वार्याश्रित्य निश्चितम् । क्षायोपशमिको भावः, सादिः सान्त इति स्मृतः ॥ २४० ॥
भङ्गे द्वितीयः शून्योऽत्राप्येषां सम्यक्त्वसंश्रयात् । यदुत्पातोऽन्तश्च पुनर्मिथ्यात्वे केवलेऽपि च ॥ २४१ ॥
मत्यज्ञानश्रुताज्ञाने, स्यातां भव्यव्यपेक्षया । अनादिसान्ते तुर्ये च, भङ्गेऽभव्यव्यपेक्षया ॥ २४२ ॥
क्षायोपशमिकोऽचक्षुर्दर्शनापेक्षया भवेत् । भङ्गे तृतीये भव्यानामभव्यानां तुरीयके ॥ २४३ ॥
विभङ्गज्ञानमवधिचक्षुषी किल दर्शने । दानाद्या लब्धयः पञ्च, संयमौ देशसर्वतः ॥ २४४ ॥
सम्यक्त्वमेषामित्येकादशानां च व्यपेक्षया । क्षायोपशमिको भावः, साद्यन्तः केवलं भवेत् ॥ २४५ ॥

विशेषावश्यकसूत्रवृत्त्योस्तु केनापि हेतुना षण्णामेव क्षायोपशमिकानां भङ्गकव्यवस्थोक्ता, ततः शेषाणामचक्षुर्दर्शनादीनां द्वादशानां यथासम्भवमस्माभिर्लिखितेति ज्ञेयम् ।

पारिणामिकभावोऽपि, सर्वपुद्गलगोचरः । सादिः सान्तश्च विज्ञेयः, पर्यायपरिवृत्तितः ॥ २४६ ॥
शून्य एव भवेद्भङ्गे, द्वितीयोऽत्रापि पूर्ववत् । सादीनां द्व्यणुकादीनां, ह्यन्तत्वमसम्भवि ॥ २४७ ॥
तथा भवति भव्यत्वमाश्रित्य पारिणामिकः । अनादिसान्तः सिद्धा हि, नाभव्या न च भव्यकाः ॥ २४८ ॥
तथोक्तं– 'सिद्धे न भव्वे नो अभव्वे' इति.
अभव्यत्वं च जीवत्वं, चाश्रित्यानाद्यनन्तकः । स्यात्पारिणामिको भावोऽनयोर्यन्नोद्भवक्षयौ ॥ २४९ ॥
एवमुक्तचतुर्भङ्ग्या, या भावानामवस्थितिः । सा भावकाल इत्युक्तो, महाभाष्यप्रणेतृभिः ॥ २५० ॥

साईसपज्जवसिओ चउभंगविभागभावणा एत्थ । उदइयाईयाणं तं जाणसु भावकालं तु ॥

इत्याद्यर्थतो विशेषावश्यकसूत्रवृत्त्योः ।

भावानां भगवदुपज्ञशास्त्रदृष्ट्या, दिग्मात्रं गदितामिहातिमात्रतुष्ट्या ।
पूर्णेऽस्मिन्निति गुणभाजि भावलोके, ग्रन्थोऽयं समुदवहत्समाप्तिलक्ष्मीम् ॥ २५१ ॥
विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः ।
काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे, षट्त्रिंशत्तम एष निर्भरसः सर्गः समाप्तः सुखम् ॥ २५२ ॥

॥ इति श्रीलोकप्रकाशे षट्त्रिंशत्तमः सर्गः भावलोकवर्णनमयः समाप्तः ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

।। अथ सप्तत्रिंशत्तमः सर्गः ।।

पार्श्वं शङ्खेश्वरोत्तंसं, प्रणम्य परमेश्वरम् । लोकप्रकाशग्रन्थस्य, करोम्युक्तार्थबीजकम् ।। १ ।।
मङ्गलाचरणं तावदभिधेयप्रयोजने । शिष्टप्रसादनौद्धत्यत्यागो ग्रन्थस्य नाम च ।। २ ।।
अङ्गुलयोजनरज्जुपल्याब्धिनिरूपणानि गुणकारः । भागाहृतिसंख्येयासंख्यानन्तानि चादिमे सर्गे ।। ३ ।।
द्रव्यक्षेत्रकालभावलोकानां नाममात्रतः । आख्याऽथ धर्माधर्माभ्रसिद्धाख्यातिर्द्वितीयके ।। ४ ।।
द्वारैः सप्तत्रिंशता यैरुक्ताः संसारिणोऽङ्गिनः । सर्गे तृतीयके तेषां, द्वाराणामस्ति विस्तृतिः ।। ५ ।।
पृथ्वीकायादयः सूक्ष्माः, सर्गे तुर्येऽथ पञ्चमे । त एव बादराः षष्ठे, तिर्यञ्चो द्वीन्द्रियादयः ।। ६ ।।
मनुष्याः सप्तमे देवा, अष्टमे नवमे पुनः । नारका दशमे जन्मसंवेधः सर्वदेहिनाम् ।। ७ ।।
महाल्पबहुताकर्मप्रकृतीनां च कीर्तनम् । एकादशे पुद्गलास्तिकायस्वरूपवर्णनम् ।। ८ ।।
इति द्रव्यलोकः ।

क्षेत्रलोकेऽथ लोकस्य, सामान्येन निरूपणम् । दिशां निरूपणं लोके, रज्जुखण्डुककीर्तनं ।। ९ ।।
संवर्त्तितस्य लोकस्य, स्वरूपं च निदर्शनम् । महत्तायामस्य रत्नप्रभापृथ्वीनिरूपणाम् ।। १० ।।
व्यन्तराणां नगरादिसमृद्धिपरिकीर्त्तनम् । इत्यादि द्वादशे सर्गे, सविशेषं निरूपितम् ।। ११ ।।
स्वरूपं भवनेशानां, तदिन्द्राणां च वर्णिता । सामानिकाग्रपत्न्यादिसंपत्सर्गे त्रयोदशे ।। १२ ।।
चतुर्दशे च सप्तानां, नरकाणां निरूपणम् । प्रस्तटस्थितिलेश्यायुर्वेदनाद्युक्तिपूर्वकम् ।। १३ ।।
सर्गे पञ्चदशे तिर्यग्लोके द्वीपाब्धिशंसनम् । जम्बूद्वीपस्य जगतीद्वारतत्स्वामिवर्णनम् ।। १४ ।।
क्षेत्रस्य भरतस्याथ, वैताढ्यस्य च भूभृतः । सगुहस्य सकूटस्य, गिरेर्हिमवतोऽपि च ।। १५ ।।
पद्महृदस्य श्रीदेव्या, गङ्गादिसरितामपि । दाढानगान्तरद्वीपतद्वासियुग्मिवर्णनम् ।। १६ ।।
ततो हैमवतक्षेत्रतद्वैताढ्याद्रिवर्णनम् । ततो महाहिमवतः, सरिच्छुल्लहृदस्पृशः ।। १७ ।।
क्षेत्रस्य हरिवर्षस्य, निषधाद्रेश्च वर्णनम् । शीताशीतोदयोः पञ्चहृदवत्योश्च षोडशे ।। १८ ।।
देवकुरूत्तरकुरुपूर्वापरविदेहकाः । सामान्यतश्चतुर्धेति, महाविदेहवर्णनम् ।। १९ ।।
विजयानां वक्षस्कारान्तर्नदीनां च कीर्त्तनम् । विजयेषु च वैताढ्यषट्खण्डनगरीस्थितिः ।। २० ।।
गन्धमादनसन्माल्यवतोश्च गजदन्तयोः । उत्तराणां कुरूणां च, विस्तरेण निरूपणम् ।। २१ ।।
यमकाद्योर्हृदानां च, काञ्चनक्ष्माभृतामपि । जम्बूतरोः सकूटस्य, साधिपस्य निरूपणम् ।। २२ ।।
सौमनसविद्युत्प्रभगजदन्तनिरूपणम् । स्थितिर्देवकुरूणां च, विचित्रचित्रभूभृतोः ।। २३ ।।
हृदानां काञ्चनाद्रीणां, तरोः शाल्मलिनोऽपि च । इत्यादि वर्णनं व्यक्त्या, सर्गे सप्तदशे कृतम् ।। २४ ।।

मेरुश्चतुर्वनः कूटमेखलाचूलिकादियुक् । साभिषेकशिलश्चाष्टादशे सर्गे निरूपितः ॥ २५ ॥
गिरेर्नीलवतः कूटहृददेव्यादिशालिनः । शीतानारीकांतयोश्च, नाममात्रेण वर्णनम् ॥ २६ ॥
क्षेत्रस्य रम्यकाख्यस्य, रुक्मिणोऽपि च भूभृतः । हैरण्यवतवर्षस्य, गिरेः शिखरिणोऽपि च ॥ २७ ॥
क्षेत्रस्यैरवताख्यस्य, षट्खण्डस्य पुरीस्पृशः । वर्णनं च क्षेत्रशैलादीनां साम्यनिरूपणम् ॥ २८ ॥
सर्वाग्रमद्रिकूटानां, खेटश्रेणीपुरामपि । नदीकुण्डहृदादीनां, चक्रिरत्नार्हतामपि ॥ २९ ॥
चन्द्रसूर्यग्रहादीनां, सज्जम्बूद्वीपवर्तिनाम् । एकोनविंशे सर्गेऽत्र, सर्वमित्यादि वर्णितम् ॥ ३० ॥
विस्तृता पञ्चभिद्वरैः, सूर्येन्दोर्मण्डलादिभिः । चारनीतिर्भयोगश्च, दिनवृद्धिक्षयादि च ॥ ३१ ॥
ध्रुवराहोः पर्वराहोस्तिथ्युत्पत्तेश्च शंसनम् । द्वारैश्च पञ्चदशभिर्नक्षत्राणां निरूपणम् ॥ ३२ ॥
इत्यादि विंशतितमे, सर्वं सर्गे निरूपितम् । एकविंशेऽत्र सर्गेऽथ, वर्णनं लवणोदधेः ॥ ३३ ॥
सशिखस्य सपातालकुम्भस्य द्वीपशालिनः । सुस्थितादिसुराढ्यस्य, चन्द्रार्कादिद्युतिस्पृशः ॥ ३४ ॥
धातकीखण्डकालोदवर्णनं पूर्ववत्ततः । द्वाविंशे वर्णितं सर्गे, पृथक्क्षेत्रादिकीर्त्तनैः ॥ ३५ ॥
तथैव पुष्करार्द्धस्य, मानुषोत्तरभूभृतः । ततोऽखिलनरक्षेत्रे, क्षेत्रशैलादिसङ्ग्रहः ॥ ३६ ॥
ततः शाश्वतचैत्यानां, सर्वसङ्ख्यानिरूपणम् । त्रयोविंशेऽखिलं सर्गे, विविच्येत्यादि वर्णितम् ॥ ३७ ॥
नृक्षेत्रात्परतश्चन्द्रसूर्यादिश्रेणिकीर्त्तनम् । पुष्कराब्धिक्षीरवरद्वीपाढ्यादिनिरूपणम् ॥ ३८ ॥
क्रमान्नन्दीश्वरद्वीपचैत्याद्याख्यानविस्तृतिः । इत्याद्युक्तं चतुर्विंशे, स्वयम्भूरमणावधि ॥ ३९ ॥
पञ्चविंशे स्थिरचन्द्रज्योतिश्चक्रव्यवस्थितिः । ऊर्ध्वलोकेऽथ सौधर्मेशानयोर्देवलोकयोः ॥ ४० ॥
विमानावलयः पुष्पावकीर्णाश्च यथास्थितिः । विमानमानप्रासादपरिपाट्यः सभा अपि ॥ ४१ ॥
उत्पद्यन्ते यथा देवा, अभिषिच्यन्त एव ते । पूजयन्ति यथा सिद्धान्, यथा भोगांश्च भुञ्जते ॥ ४२ ॥
यादृक्स्वरूपाभाषां च, यां भाषन्ते सुधाभुजः । भवन्ति देव्यो यादृश्यः, सेवन्ते च रतं यथा ॥ ४३ ॥
आहारो यादृगेषामुच्छ्वासश्च यावदन्तरः । यथा मनुष्यलोकेऽमी, आयान्ति स्नेहयन्त्रिताः ॥ ४४ ॥
प्रेम्णा वशीकृता यान्ति, यावतीषु महीष्वधः । मध्ये महर्द्धिकं यान्ति, यथाऽवधिदृशो यथा ॥ ४५ ॥
लोकपालाग्रमहिषीसामानिकादिशालिनोः । शक्तिसम्पद्विवरणं, सौधर्मेशाननाथयोः ॥ ४६ ॥
षड्विंशतितमे सर्गे, इत्याद्यखिलमीरितम् । सप्तविंशे ततः सर्गे, तृतीयतुर्यनाकयोः ॥ ४७ ॥
वर्णनं ब्रह्मलोकस्य, तमस्कायस्य मूलतः । कृष्णराजी तद्विमानलोकान्तिकसुधाभुजाम् ॥ ४८ ॥
स्वर्गस्य लान्तकस्याथ, सकिल्बिषिनाकिनः । जमालेश्चरितं शुक्रसहस्रारादिवर्णनम् ॥ ४९ ॥
यावदच्युतनाकस्य, कीर्तनं रामसीतयोः । चरितं तदनु ग्रैवेयकानुत्तरवर्णनम् ॥ ५० ॥
ततः सिद्धशिलाख्यानं, लोकान्तस्य च संशनम् । इत्यादिवर्णनैरेवं, क्षेत्रलोकः समापितः ॥ ५१ ॥

इति क्षेत्रलोकः ॥

दिष्टलोकेऽथ कालस्य, युक्तिव्यक्तिर्मतद्वये । ऋतूनां वर्णनं षण्णां, निक्षेपाः कालगोचराः ॥ ५२ ॥
समयावलिकाक्षुल्लभवादिपरिकीर्तनम् । घटीमुहूर्त्तदिवसपक्षमासादिशंसनम् ॥ ५३ ॥
सूर्यर्त्तुचन्द्रनक्षत्राभिवर्द्धिताह्वयाः क्रमात् । मासा वर्षाण्यथैतेषामुपपत्त्यादिवर्णनम् ॥ ५४ ॥
युगस्यादिर्युगे मासर्त्वयनानि दिनानि च । अधिमासावमरात्रावृत्तयो विषुवन्ति च ॥ ५५ ॥
करणान्यृत्वयनादेर्नक्षत्रानयनं विधोः । रवेश्च करणान्येषां, बवादिकरणाण्यपि ॥ ५६ ॥
पौरुष्यादिपरीमाणं, तस्मात्तिथ्यादिनिश्चयः । सर्गेऽष्टाविंशतितमे, इत्यादि युगवर्णनम् ॥ ५७ ॥
युगोत्प्रभृत्यब्दशतसहस्रादिक्रमेण च । शीर्षप्रहेलिकान्तांकस्वरूपप्रतिपादनम् ॥ ५८ ॥
अस्त्रयस्याद्यस्यावसर्पिण्यां वर्णनं स्थितेः । कल्पद्रुयुग्मिलोकादेरेकोनत्रिंश आदृतम् ॥ ५९ ॥
अर्हतां पद्धतिः सर्वा, निर्वाणावधि जन्मतः । उक्ता त्रिंशत्तमे सर्गे, एकत्रिंशे ततः पुनः ॥ ६० ॥
चक्रिदिग्विजयः सम्पन्निधिरत्नादिरस्य च । सामान्यतः शार्ङ्गिसीरिप्रतिविष्ण्वादिकीर्तनम् ॥ ६१ ॥
सर्गे द्वात्रिंशत्तमेऽथ, सङ्क्षेपात्प्राग्भवादितः । जिनानां वृषभादीनां, चरित्रस्य निरूपणं ॥ ६२ ॥
एतस्यामवसर्पिण्यां, वर्णनं जातजन्मनाम् । त्रयस्त्रिंशे चक्रिविष्णुबलदेवादिसन्नृणाम् ॥ ६३ ॥
अरस्य पञ्चमस्याथ, स्वरूपेण निरूपणम् । अरेऽस्मिन् पञ्चमे ये, चोदयास्तत्सूरयश्च ये ॥ ६४ ॥
तेषां नामानि सर्वाग्रमाचार्यादिमहात्मनाम् । ख्याता ततोऽरके षष्ठे, धर्मोच्छेदादिका स्थितिः ॥ ६५ ॥
गिरेः शत्रुञ्जयस्याथ, वृद्धिहान्यादिशंसनम् । बिलवासिजनावस्थोत्सर्पिण्यां च तथोत्क्रमात् ॥ ६६ ॥
षण्णामराणां पर्यायवृद्ध्याख्यानं यथाक्रमम् । एतदुत्सर्पिणीभाविजिनचक्र्यादीकीर्तनम् ॥ ६७ ॥
इत्यादिकं चतुस्त्रिंशे, सर्गे सर्वं निरूपितम् । पञ्चत्रिंशेऽथ पुद्गलपरावर्त्तश्चतुर्विधः ॥ ६८ ॥
औदारिकादिका कार्मणान्ता या वर्गणाऽष्टधा । अनुभागस्पर्द्धकानि, कर्मणां परमाणुषु ॥ ६९ ॥
एषां स्वरूपं मानं चातीतानागतकालयोः । सम्पूर्णो दिष्टलोकोऽयमित्यादिपरिकीर्त्तने ॥ ७० ॥

इति दिष्टलोकः ॥

भावलोकेऽथ भावानां, षण्णां सम्यग्निरूपणम् । सर्गे षट्त्रिंश इत्येवं, भावलोकः समर्थितः ॥ ७१ ॥

इति भावलोकः ॥

एभिर्विचारैर्मणिरत्नसारैः, पूर्णं सुवर्णोद्यदलङ्कृतिश्च ।
समौक्तिकश्रीर्विबुधादृतोऽयं, ग्रन्थोऽस्तु सिद्ध्यै जिनराजकोशः ॥ ७२ ॥

अनाभोगो भूयान्न सदनुभवः शास्त्रविभवो, न सामग्री तादृग् न पटुघना वाक्यरचना ।
श्रियं सत्यप्येवं यदयमभजद् ग्रन्थनृपतिः, कृती हेतुस्तत्रोल्लसति सुमनः कोविदकृपा ॥ ७३ ॥

सन्तः शास्त्रसुधोर्मिधौतरुचयो ये पूर्णचन्द्रग्रजा, वन्द्यास्तेऽद्य मया कवित्वकुमुदोल्लासेऽनवद्योद्यमाः ।
येऽपि द्वेषसितित्वषोऽतिकठिनास्तान्वस्तुतः संस्तुतान्, मन्ये प्रस्तुतकाव्यकाञ्चनकषान् सम्यक्परीक्षाक्षमान् ॥ ७४ ॥
विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः
काव्यं यत्किल तत्र निश्चितजगत्तत्त्वे श्रितः पूर्णताम् । सप्तत्रिंश उदीतचित्रविरुचिः सर्गाः निसर्गोज्जवलः॥ ७५ ॥

॥ इति श्रीलोकप्रकाशे सप्तत्रिंशत्तमः सर्गः समाप्तः ॥

तत्समाप्तौ च समाप्तोऽयं श्रीलोकप्रकाशः ॥ श्रीरस्तु ॥

◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆◆

॥ अथ ग्रन्थकर्तुः प्रशस्तिः ॥

श्रेयः श्रीवर्द्धमानो दिशतु शतमखश्रेणिभिः स्तूयमानः, स क्ष्माभृत्सेव्यपादः कृतसदुपकृतिर्गोपतिनूर्तनो वः ।
कालेऽप्यस्मिन् प्रदोषे कटुकुमतिकुहूकल्पितध्वान्तपोषे,
प्रादुष्कुर्वन्ति गावः प्रसृमरविभवा मुक्तिमार्गं यदीयाः ॥ १ ॥
तत्पट्टेऽथेन्द्रभूतेरनुज उदभवच्छ्रीसुधर्मा गणीन्द्रो, जम्बूस्तत्पट्टदीपः प्रभव इति भवाम्भोधिनौस्तस्य पट्टे ।
सूरिः शय्यम्भवोऽभूत्स मनकजनकस्तत्पदाम्भोजभानुस्तत्पट्टैरावतेन्द्रो जनविदितयशाः श्रीयशोभद्रसूरिः॥ २ ॥
तत्पट्टभारधुर्यौ, गणधरवर्यौ श्रियं दधाते द्वौ । सम्भूतविजयसूरिः सूरिः श्रीभद्रबाहुश्च ॥ ३ ॥
श्रीस्थूलभद्र उदियाय तयोश्च पट्टे, जातौ महागिरिसुहस्तिगुरु ततश्च ।
पट्टे तयोः श्रियमुभौ दधतुर्गणीन्द्रौ, श्रीसुस्थितो जगति सुप्रतिबद्धकश्च ॥ ४ ॥
तत्पट्टभूषणमणिर्गुरुरिन्द्रदिन्नः, श्रीदिन्नसूरिरथ तस्य पदाधिकारी ।
पट्टे राज गुरुसिंहगिरिस्तदीये, स्वामी च वज्रगुरुरस्य पदे बभूव ॥ ५ ॥
श्रीवज्रसेनसुगुरुर्बिभराम्बभूव, पट्टं तदीयमथ चन्द्रगुरुः पदेऽस्य ।
सामन्तभद्रगुरुरुन्नतिमस्य पट्टे, चक्रेऽस्य पट्टमभजद्गुरुदेवसूरिः ॥ ६ ॥
प्रद्योतनस्तदनु तस्य पदे च मानदेवस्तदीयपदभृद्गुरुमानतुङ्गः ।
वीरस्ततोऽथ जयदेव इतश्च देवानन्दस्ततश्च भुवि विक्रमसूरिरासीत् ॥ ७ ॥
तस्माद्बभूव नरसिंह इति प्रतीतः, सूरिः समुद्र इति पट्टपतिस्तदीयः ।
सूरिः पदेऽस्य पुनरप्यजनिष्ट मानदेवस्ततश्च विबुधप्रभसूरिरासीत् ॥ ८ ॥
जयानन्दः पट्टे श्रियमपुषदस्यास्य च रविप्रभस्तत्पट्टेशः समजनि यशोदेवमुनिराट् ।
ततः प्रद्युम्नाख्यो गुरुरुदयति स्माथ पुनरप्यभून्मानाद्देवो गुरुविमलचन्द्रश्च तदनु ॥ ९ ॥

तस्मादुद्योतनाख्यो गुरुरभवदितः सर्वदेवो मुनीन्द्रस्तस्माच्छ्रीदेवसूरिस्तदनु पुनरभूत्सर्वदेवस्ततश्च ।
जज्ञाते सूरिराजौ प्रगुणगुणयशोभद्रसन्नेमिचन्द्रौ, विख्यातौ भूतलेऽस्मिन्नविरतमुदितौ नूतनौ पुष्पदन्तौ ॥ १० ॥

मुनिचन्द्रमुनिस्ततोऽद्भुतोऽथाऽजितदेवश्च तदन्तिषद्वरेण्यः ।
अपरः पुनरस्य शिष्यमुख्यो, भुवि वादी विदितश्च देवसूरिः ॥ ११ ॥

अजितदेवगुरोरभवत्पदे, विजयसिंह इति प्रथितः क्षितौ ।
तदनु तस्य पदं दधतावुभावभवतां गणभारधुरन्धरौ ॥ १२ ॥

सोमप्रभस्तत्र गुरुः शतार्थी, सतां मणिः श्रीमणिरत्नसूरिः ।
पट्टे मणि श्रीमणिरत्नसूरेर्जज्ञे जगच्चन्द्रगुरुर्गरीयान् ॥ १३ ॥

तेषामुभावन्तिषदावभूतां, देवेन्द्रसूरिर्विजयाच्च चन्द्रः ।
देवेन्द्रसूरेरभवच्च विद्यानन्दस्तथा श्रीगुरुधर्मघोषः ॥ १४ ॥

श्री धर्मघोषादजनिष्ट सोमप्रभोऽस्य शिष्याश्च युगप्रमेयाः ।
चतुर्दिगुत्पन्नजनावनाय, योधा इव प्राप्तविशुद्धबोधाः ॥ १५ ॥

श्रीविमलप्रभसूरिः, परमानन्दश्च पद्मतिलकश्च । सूरिवरोऽप्यथ सोमप्रभपट्टेशश्च सोमतिलकगुरु : ॥ १६ ॥

शिष्यास्त्रयस्तस्य च चन्द्रशेखरः, सूरिर्जयानन्द इतीह सूरिराट् ।
स्वपट्टसिंहासनभूमिवासवः शिष्यस्तृतीयो गुरु देवसुन्दरः ॥ १७ ॥

श्री देवसुन्दरगुरोरथ पञ्च शिष्याः, श्रीज्ञानसागरगुरुः कुलमण्डनश्च ।
चञ्चद्गुणश्च गुणरत्नगुरुर्महात्मा, श्रीसोमसुन्दरगुरुर्गुरुसाधुरत्नः ॥ १८ ॥

श्रीदेवसुन्दरमुनीश्वरपट्टनेतुः श्रीसोमसुन्दरगुरोरपि पञ्च शिष्याः ।
तत्र स्वपट्टवियदङ्गणभानुमाली, मुख्योऽन्तिषद्गणधरो मुनिसुन्दराख्यः ॥ १९ ॥

अन्ये श्रीजयचन्द्रः सूरिः श्रीभुवनसुन्दराह्वश्च । श्रीजिनसुन्दरसूरिर्जिनकीर्त्तिश्चेति सूरीन्द्राः ॥ २० ॥

मुनिसुन्दरसूरिपट्टभानुर्गुरुरासीदथ रत्नशेखराख्यः ।
दधदस्य पदं बभूव लक्ष्मीपदयुक् सागरसूरिरीश्वरार्च्यः ॥ २१ ॥

सुमतिसाधुगुरुस्तदनु प्रभामुदवहद्दधदस्य पदं प्रभुः ।
पदमदीदिपदस्य च हेमयुगविमलसूरिरुदात्तगुणोदयः ॥ २२ ॥

पट्टे तस्य बभूवुरुग्रतपसो वैरङ्गिकाग्रेसरा, आनन्दाद्विमलाह्वया गणभृतो भव्योपकारोद्धुराः ।
ये नेत्रेभशरामृतद्युतिमिते (१५८२) वर्षे क्रियोद्धारतश्चक्रुः
स्वां जिनशासनस्य शिखरे कीर्तिं पताकामिव ॥ २३ ॥

प्रमादाभ्रच्छन्नं चरणतरणिं मन्दकिरणं, पुनश्चक्रे दीप्रं रुचिररुचिरब्दात्यय इव ।
सृजन् पद्मोल्लासं सुविशदपथश्चन्द्रमधुरो, दिदीपे निष्पंङ्कः स इह गुरुरानन्दविमलः ॥ २४ ॥
विजयदानगुरुस्तदनु द्युतिं, तपगणेऽधिकभाग्यनिधिर्दधौ ।
श्रुतमहोदधिरेधितसद्धिधिर्विधुयशा जिनधर्मधुरन्धरः ॥ २५ ॥
अभूत्पट्टे तस्योल्लसितविजयो हीरविजयो, गुरुर्गीर्वाणौघप्रथितमहिमाऽस्मिन्नपि युगे ।
प्रबुद्धो म्लेच्छेशोऽप्यकबरनृपो यस्य वचसा, दयादानोदारो व्यतनुत महीमार्हतमयीम् ॥ २६ ॥
तदनु विजयसेनसूरिराजस्तपगणराज्यधुरं दधार धीरः ।
अकबरनृपतेः पुरो जयश्रीर्यमववरीदुरुवादिवृन्ददत्ता ॥ २७ ॥
जयति विजयदेवः सूरिरेतस्य पट्टे, मुकुटमणिरिवोद्यत्कीर्त्तिकान्तिप्रतापः ।
प्रथितपृथुतपः श्रीः शुद्धधीरिन्द्रभूतेः, प्रतिनिधिरतिदक्षो जङ्गमः कल्पवृक्षः ॥ २८ ॥
तेन श्रीगुरुणाहितो निजपदे दीपोपमोऽदीदिपत्, सूरिः श्रीविजयादिसिंहसुगुरुः प्राज्यैर्महोभिर्जगत् ।
भूमौ स प्रतिबोध्य भव्यनिवहान् स्वर्गेऽप्यथ स्वर्गिणः,
प्राप्तो बोधयितुं गुरौ विजयिनि प्रेमाणमुत्सृज्य नः ॥ २९ ॥
तदनु पट्टपतिर्विहितोऽधुना, विजयदेवतपागणभूभृता ।
गुणगणप्रगुणोऽतनुभाग्यभूर्विजयते गणभृद्विजयप्रभः ॥ ३० ॥
निर्ग्रन्थः श्रीसुधर्माभिधगणधरतः कोटिकः सुस्थितार्याच्चन्द्रः श्रीचन्द्रसूरेस्तदनु च वनवासीति सामन्तभद्रात् ।
सूरेः श्रीसर्वदेवाद्धटगण इति यः श्रीजगच्चन्द्रसूरेर्विश्वे ख्यातस्तयाख्यो जगति विजयतामेष गच्छो गरीयान् ॥ ३१ ॥
इतश्च-श्रीहीरविजयसूरीश्वरशिष्यौ सौदरावभूतां द्वौ । श्रीसोमविजयवाचकवाचकवरकीर्त्तिविजयाख्यौ ॥ ३२ ॥
तत्र कीर्त्तिविजयस्य किं स्तुमः, सुप्रभावममृतद्युतेरिव ।
यत्करातिशयतोऽजनिष्ट मत्प्रस्तरादपि सुधारसोऽसकौ ॥ ३३ ॥
प्रतिक्रियां कां यदुपक्रियाणां, गरीयसीनामनुसर्त्तुमीशे ।
ज्ञानादिदानैरुपचर्य सोऽयं, यैः कल्पितः कीटकणोऽपि कुम्भी ॥ ३४ ॥
विनयविजयनामा वाचकस्तद्विनेयः, समदृभदणुशक्तिर्ग्रन्थमेनं महार्थम् ।
तदिह किमपि यत्स्यात्क्षूण्णमुत्सूत्रकाद्यं, मयि विहितकृपैस्तत्कोविदैः शोधनीयम् ॥ ३५ ॥
सच्छाये सुमनोरमेऽतिफलदे काव्येऽत्र लीलावने, प्राज्ञेन्दिन्दिरमोदके सहृदयश्रेणीमरालाश्रिते ।
दोषः कण्टकिशाखिवद्यदि भवेन्मन्ये गुणत्वेन तं, येन व्यर्थमनोरथस्तदनुदृग् नोष्ट्रः खलः खिद्यते ॥ ३६ ॥

उत्तराध्ययनवृत्तिकारकैः, सुष्ठु भावविजयाख्यवाचकैः ।
सर्वशास्त्रनिपुणैर्यथागमं, ग्रन्थ एष समशोधि सोद्यमैः ॥ ३७ ॥
जिनविजयाभिधगणयो, ग्रन्थेऽस्मिन्नकृषतोद्यमं सुतराम् ।
लिखितप्रथमादर्शाः शोधनलिखनादिपटुमतयः ॥ ३८ ॥
वसुखाश्वेन्दुप्रमिते (१७०८), वर्षे हर्षेण जीर्णदुर्गपुरे ।
राधोज्जवलपञ्चम्यां, ग्रन्थः पूर्णोऽयमजनिष्ट ॥ ३९ ॥
एतद्ग्रन्थग्रथनप्रचितात्सुकृतान्निरन्तरं भूयात् । श्रीजिनधर्मप्राप्तिः, श्रोतुः कर्तुश्च पठितुश्च ॥ ४० ॥
द्रव्यक्षेत्रादिभावा य इह निगदिताः शाश्वतास्तीर्थकृद्भिर्जीवा
वा पुद्गलो वा कलितनिजकलाः पर्यवापेक्षया ते ।
यावत्तिष्ठन्ति तावज्जगति विजयतां ग्रन्थकल्पद्रुमोऽयं,
विद्वद्वृन्दारकार्च्यः प्रमुदितसुमनाः कल्पितेष्टार्थसिद्धिः ॥ ४१ ॥
इति श्रीलोकप्रकाशनामा ग्रन्थः सम्पूर्णः ।
श्रीरस्तु । ग्रन्थाग्रं (श्लोकसंख्या) २०६२१ ॥

परिशिष्ट-१

अर्थतो प्रतिपादितपदार्थानां मूलस्थानम् ।

पदार्थः	ग्रन्थः	पृष्ठः
पञ्चास्तिकायाः	भगवतीसूत्र शत. १३	12
पुद्गलानां परिणामः	भगवतीसूत्र शत. १३ उ. ४	13
औदारिकाद्यवगाहनावर्णनम्	प्रज्ञापनासूत्रे पद-२१	29
कषायाः	प्रज्ञापनासूत्र पद-३	42
चक्षुविषयः	विशेषावश्यकभाष्यः	49
संज्ञिता	,,	51
पुरुषादिलक्षणानि	प्रज्ञापनावृत्तिः, स्थानाङ्गवृत्तिः	51
अपूर्वकरणम्	विशेषावश्यकवृत्तिः	55
आकर्षः	आवश्यकसूत्रवृत्तिः	56
अवग्रहलक्षणम्	तत्त्वार्थसूत्रवृत्तिः	58
धीचतुष्कः	नन्दीसूत्रवृत्तिः, स्थानाङ्गसूत्रवृत्तिः	61
मनःपर्यायज्ञानम्	आवश्यकचुर्णिः	70
निगोदगोलकः	भगवतीसूत्र शतक ११ उ. १०	96
अनादिनिगोदः	प्रज्ञापनासूत्रम् पद-१८	97
बादरपृथ्वीवर्णनम्	प्रज्ञापनावृत्तिः	102-103
अचित्तता	भगवतीसूत्रम्, प्रवचनसारोद्धारः	105
एकजीवकर्तृके मूलप्रथमपत्रे	प्रज्ञापनावृत्ति, आचाराङ्गवृत्तिः	106
वनस्पतिवर्णनम्	प्रज्ञापनावृत्तिः	110
अग्निकायस्थानम्	तृतीय-तुर्योपाङ्गौ	112
गतिः	भगवतीशतक-१ उद्देशक-२	129
भवस्थितिः	भगवतीशतक-२ उद्देशक-५	135
आगतिः	श्री पञ्चसङ्ग्रहः	137
परमाधार्मिकाख्यानम्	श्री महानिशीथचतुर्थाध्ययनम्	140
चमरेन्द्रवर्णनम्	भगवतीसूत्र शत. २ उ. ८	182
चमरेन्द्रोत्पातः	स्थानाङ्गसूत्रम्	184
जम्बूद्वीपः	वीरंजयसेहरक्षेत्रविचारवृत्तिः	210
रविमण्डलम्	जम्बूद्विपप्रज्ञप्तिवृत्तिः	288

नरक्षेत्रम्	जीवाभिगमसूत्रम्	347
पुष्करार्द्धः	जीवाभिगमः/चन्द्रप्रज्ञप्त्यादिः	353
नक्षत्रपटलम्	जम्बूद्वीपप्रज्ञप्तिवृत्तिः	371
हरिणैगमेषीदेवः	भगवतीसूत्रम्	411
ईशानेन्द्रवर्णनम्	ज्ञाताधर्मकथाङ्गम्	420
देवलोकवर्णनम्	भगवतीसूत्रं शत-१६ उ. ५	437
कालस्वरुपम्	जम्बूद्वीपप्रज्ञप्तिवृत्यादिः	470
युगलिकवर्णनम्	जम्बूद्विपप्रज्ञप्तिवृत्तिः	514
परिषहाः	स्थानाङ्गसूत्रवृत्तिः	539
जिननिर्वाणम्	ज्ञाताधर्मकथाङ्गम्	567
चक्रवर्तिनां समृद्धिः	जम्बूद्वीपप्रज्ञप्तिसूत्रं, शान्तिनाथस्तोत्रम्	594
नारदस्वरुपम्	ज्ञाताधर्मकथाङ्गम्	597
पञ्चमारकः	दीपालिकाकल्पम्	667
शत्रुञ्जयपर्वतः	श्री शत्रुञ्जयकल्पादि	669
पुद्गलपरावर्तस्वरुपं	पञ्चसंग्रहः, कर्मग्रन्थः, प्रवंचनसारोद्धारवृत्तिः	691

परिशिष्ट - 2

ग्रन्थे प्रतिपादितानि पृथग्मतानि ।

विषय:	ग्रन्था:	पृष्ठा:
उत्श्लक्ष्णश्लक्ष्णिका	भगवतिसूत्रादि / जीवसमासवृत्ति:	2
लिक्षामानम्	संग्रहणीबृहद्वृत्ति: प्रवचनसारोद्धारवृत्ति: / जम्बूद्वीपप्रज्ञप्तिसूत्रवृत्त्यादि	2
केशाग्रमानम्	क्षेत्रसमासबृहद्वृत्ति:, जम्बूद्वीपप्रज्ञप्तिवृत्ति: / सङ्ग्रहणीबृहद्वृत्ति: क्षेत्रविचारस्वोपज्ञवृत्ति:	5
अस्पृशद्गति:	महाभाष्यवृत्ति: / पञ्चसङ्ग्रहवृत्ति:	16
एकसमयसिद्धा:	उत्तराध्ययनसूत्र/सङ्ग्रहणी/सिद्धप्राभृत:	17
मरुदेवीदेहमानम्	महाभाष्य:/सङ्ग्रहणीवृत्ति:, सिद्धप्राभृत:	19
इन्द्रियपर्याप्ति:	सङ्ग्रहणीवृत्ति:/प्रज्ञापनासूत्रम्	21
सचित्ताचित्तमिश्रत्वम्	जीवाभिगमसूत्रम् / प्रवचनसारोद्धारवृत्ति: तत्त्वार्थवृत्ति: अध्या-२	23
वैकुर्विकस्थिति:	जीवाभिगमसूत्रम् / सूत्रकृताङ्गम्	30
अभ्यन्तरनिवृत्ति:	प्रज्ञापनावृत्ति: / आचाराङ्गवृत्ति:	44
ग्रन्थिभेद:	कर्मग्रन्थ: / आगमिक:	54
अवग्रहलक्षणम्	तत्त्वार्थवृत्ति: / रत्नाकरावतारिका	57
अक्षरानक्षरश्रुतम्	विशेषावश्यकवृत्ति: / कर्मग्रन्थवृत्ति:	62
अनवस्थितावस्थितावधि:	कर्मग्रन्थवृत्ति: / तत्त्वार्थभाष्य:	66
मतिज्ञाने प्रत्यक्षपरोक्षप्रमाणत्वम्	तत्त्वार्थवृत्ति: / रत्नाकरावतारिकादि:	71
मतिश्रुतसहचारित्वम्	तत्त्वार्थवृत्ति: / नन्दीसूत्रादि:	72
केवलीनां ज्ञानदर्शनोपयोग:	नन्दीसूत्रवृत्ति: / सम्मतितर्कादि:	73
अवधिदर्शनम्	आगमिकमत: / कार्मग्रन्थिका:	77
उपशमश्रेणि:	कर्मग्रन्थावचूरी / केचिदाचार्या:	83
शुक्लध्यानम्	कर्मग्रन्थलघुवृत्ति: / विशेषावश्यकवृत्ति:	84
क्षपकश्रेणौ कर्मक्षय:	आगमिकमतम् / कर्मग्रन्थवृत्ति:	85
त्रसत्वम्	जीवाभिगमसूत्रम् / आचाराङ्गनिर्युक्तिवृत्ति:	95
निगोदसंस्थान:	जीवाभिगमवृत्ति: / सङ्ग्रहणीवृत्ति:	98
गण्डी	उत्तराध्ययनवृत्ति: / प्रज्ञापनावृत्ति:	125
संमूर्च्छिम पञ्चाक्ष-तिरश्चां संहननं संस्थानञ्च	श्रीजीवाभिगमसूत्रवृत्ति : श्री षष्ठकर्मग्रन्थ:	130

चक्रीनरकगमनम्	श्री भगवतीसूत्रम् / दशवैकालिकवृत्तिः	136
	हैमवीरचरित्रम् - नवपदप्रकरणवृत्तिः	
स्त्यानगृद्धौ बलम्	कर्मग्रन्थवृत्तिः / जीतकल्पवृत्तिः	155
जगतीभित्तौ गवाक्षकटकम्	जम्बूद्वीपप्रज्ञप्तिवृत्तिः, जम्बूद्वीपसङ्ग्रहणीवृत्तिः	211
विजयद्वारे भौमानि	जीवाभिगमसूत्रम्, समवायाङ्गसूत्रम्	213
राजधानी प्राकारोच्चत्वम्	जीवाभिगमसूत्रम्, समवायाङ्गसूत्रम्	214
मणिपीठिकामानम्	मूलग्रन्थः / क्षेत्रसमासबृहद्वृत्तिः	216
मणिपीठिकोच्चत्वम्	,, ,, ,, ,,	,,
महेन्द्रध्वजोच्चत्वम्	जीवाभिगमसूत्रवृत्तिः, क्षेत्रसमासबृहद्वृत्तिः	,,
देवच्छंदकमानम्	जीवाभिगमवृत्तिः / क्षेत्रसमासबृहद्वृत्तिः	217
खेचरश्रेणौ मुख्यनगरम्	जम्बूद्वीपप्रज्ञप्तिवृत्तिः / ऋषभचरित्रादिः	221
प्रासादावतंसकमानम्	जम्बूद्वीपप्रज्ञप्तिवृत्तिः / बृहद्क्षेत्रसमासः,	224
	जम्बूद्वीपसमासः	
वैताढ्यगुहायां मण्डलानि	क्षेत्रविचारबृहद्वृत्तिः, आवश्यकबृहद्वृत्तिटीप्पनकः	225
	प्रवचनसारोद्धारबृहद्वृत्तिः	
मण्डलावस्थितिः	प्रवचनसारोद्धारवृत्तिः / त्रिषष्टीयाजितचरित्रम्	226
जाम्बूनदवर्णः	जम्बूद्वीप प्रज्ञप्तिसूत्रम् / बृहद्क्षेत्रविचारवृत्तिः, क्षेत्रविचारवृत्तिः	228
गङ्गानदीप्रवाहः	जम्बूद्वीपप्रज्ञप्तिसूत्रम् / समवायाङ्गसूत्रम्	230
देवनाम	क्षेत्रसमासः / जम्बूद्वीपप्रज्ञप्तिः	234
महाहिमवानपर्वतवर्णः	जम्बूद्वीपप्रज्ञप्तिः / बृहद्क्षेत्रविचारादिः	234
गन्धमादनपर्वतवर्णः	,, ,, / ,, ,, , जम्बूद्वीपसमासः	246
जम्बूवृक्षेषु जिनभवनम्	जम्बूद्वीपप्रज्ञप्तिः क्षेत्रविचारादिः	252
	जीवाभिगमः / श्राद्धप्रतिक्रमणचूर्णिः, शाश्वतजिनस्तोत्रम्	
कूटमानम्	जम्बूद्वीपप्रज्ञप्तिः / जीवाभिगमः	254
दिक्कुमारीनाम	जम्बूद्वीपप्रज्ञप्तिः, बृहत्क्षेत्रसमासः, क्षेत्रसमासः	254
कूटशाल्मली	स्थानाङ्गसूत्रम्, सूत्रकृताङ्गम्	256
मेरुपर्वतमानम्	जम्बूद्वीपप्रज्ञप्तिसूत्रम्:, बृहत्क्षेत्रसमासः, समवायाङ्गम्	258
मेरोः लक्षयोजनमानम्	जम्बूद्वीपप्रज्ञप्तिः / समवायाङ्गम्	260
दिक्कुमारी नाम	जम्बूद्वीपप्रज्ञप्तिवृत्तिः बृहत्क्षेत्रसमासवृत्तिः	264
	क्षेत्रसमासवृत्तिः / स्थानाङ्गम्, कल्पान्तर्वाच्यटीका	
देवीनाम	क्षेत्रसमासबृहद्वृत्तिः / जम्बूद्वीपप्रज्ञप्तिसूत्रम्	264
पण्डकवने चतस्रः शिलाः	जम्बूद्वीपप्रज्ञप्तिसूत्रम् / क्षेत्रसमासः	266
शिलावर्णः	जम्बूद्वीपप्रज्ञप्तिः / बृहत्क्षेत्रसमासवृत्तिः	267

रुक्मीवर्षधरवर्ण:	जम्बूद्वीपप्रज्ञप्ति: / क्षेत्रसमासवृत्ति:	271
वृत्तवैताढ्यव्यवस्थाभेद:	,, / क्षेत्रविचारवृत्ति:	272
कूटसंख्यापरिवर्तनम्	,, / क्षेत्रसमास:	273
महानद्यरन्तर्नद्य:	,, ,,	277
दाक्षिणात्यकलशस्य नाम	बृहत्क्षेत्रसमासवृत्ति: / स्थानाङ्गम्, प्रवचनसारोद्धार:	315
लघुपातालकलशाधिष्ठायका:	क्षेत्रसमासवृत्ति: / जीवाभिगमवृत्ति:	317
पुष्करिणीयानम्	जीवाभिगमवृत्ति:, प्रवचनसारोद्धारवृत्ति: नन्दीश्वरस्तोत्रम्, नन्दीश्वरकल्प:, स्थानाङ्गसूत्रम्	360
पुष्करिणीनां नामक्रम:	नन्दीश्वरस्तव:, नन्दीश्वरकल्प: स्थानाङ्गं, जीवाभिगमसूत्रम्	361
दधिमुखपर्वतमानम्	जीवाभिगम: / समवायाङ्गसूत्रम्	362
वापिकावर्ण:	प्रवचनसारोद्धारवृत्ति: / स्थानाङ्गवृत्ति:	362
सूर्यचन्द्रविमाने स्थिति:	जीवाभिगम: / जम्बूद्वीपप्रज्ञप्ति:, सङ्ग्रहण्यादि:	376
देवीविकुर्वणाशक्ति:	जीवाभिगमसूत्रम् / जम्बूद्वीपप्रज्ञप्ति:	378
प्रासादपरिपाटी	मतत्रयम्	389
देवीशरीरवर्णनम्	औपपातिकसूत्रम् / सङ्ग्रहणीसूत्रम्	397
मुकुटचिह्नानि	प्रज्ञापनासूत्रं, औपपातिकसूत्रम्	397
सौधर्मेशानेन्द्रचरित्रम्	कल्पवृत्ति:, भगवतीसूत्रं, स्थानाङ्गम्	409
लोकान्तिकशब्दव्याख्या	मतद्वयम्	433
कालाणव:	जम्बूद्वीपवृत्यादि: / योगशास्त्रवृत्ति:	462
ऋत्वारम्भमासानि	भगवतीवृत्ति:, जम्बूद्वीपप्रज्ञप्ति:, ज्योतिष्करण्डवृत्ति:	483
उत्सर्पिणीव्याख्या	ज्योतिष्करण्डवृत्ति: / जम्बूद्वीपप्रज्ञप्ति:	505
युगलिकानां सम्यक्त्वग्रहण:	जम्बूद्वीपप्रज्ञप्तिवृत्ति:, प्रज्ञापनावृत्ति:, आवश्यकवृत्ति:	513
चक्रीपूर्वजन्म	सङ्ग्रहण्यादि: / आवश्यकनिर्युक्ति:	569
चक्रीशरमोक्षणम्	जम्बूद्वीपप्रज्ञप्तिसूत्रं, हैमऋषभचरित्रम्	577
काकिणीरत्नम्	मतत्रयम्	583
तीर्थकरमातापित्रोर्गति:	प्रवचनसारोद्धार:, उत्तराध्ययनवृत्ति: योगशास्त्रवृत्ति:, आचाराङ्गम्	605
गणधरसङ्ख्या	आवश्यकसूत्रं, समवायाङ्गसूत्रम्	622
,,	,, ,,	623
,,	,, ,,	627
मल्ले: प्राग्भवनाम	ज्ञाताधर्मकथाङ्गं, सप्ततिशतस्थानकम्	629

अवधि-मनोज्ञानीनां मानम्	सप्ततिशतस्थानकं, ज्ञाताधर्मकथाङ्गं, स्थानाङ्गं	630
गणधर-ज्ञानवृक्षविषयः	कल्पसूत्रं, आवश्यकसूत्रं, सप्ततिशतस्थानकं, उत्तराध्ययनबृहद्वृत्तिः	635
चरित्रमतान्तरम्	आवश्यकसूत्रं, समवायाङ्गवृत्तिः	637
जिनायुरादिः	कल्पसूत्रं, समवायाङ्गं	639
देवदुष्यस्थितिः	जम्बूद्वीपप्रज्ञप्तिः, कल्पसूत्रं, सप्ततिशतस्थानकम्	639
प्रकीर्णकम्	मतत्रयम्	643
चक्रिणः जन्मपुरी	आवश्यकनिर्युक्तिः, उत्तराध्ययनवृत्तिः	648
नमुचिशिक्षा	उपदेशमालाकर्णिकादिः, त्रिषष्टीयपद्मचरित्रं, उत्तराध्ययनवृत्तिः	649
भावीजिनजीवाः	अनेकाग्रन्थाः	679
चतुः स्पर्शाः	पञ्चसङ्ग्रहवृत्तिः, शतकबृहट्टीका, कर्मप्रकृतिः, प्रज्ञप्तिः	684
लेश्याधिकारः	मतत्रयम्	695

परिशिष्ट-3

ग्रन्थे प्रतिपादितपदार्थानां विशेषविस्तारार्थिभिरवलोकनीयाः ग्रन्थाः ।

विषयः	ग्रन्थः	पृष्ठः
अङ्गुलमानं	श्री अङ्गुलसप्ततिका	3
पल्यरोमांशराशिसङ्ख्याङ्कसङ्ग्रहः	श्रीजम्बूद्वीपप्रज्ञप्तिवृत्तिः	5
तैजसकार्मणशरीरे	तत्त्वार्थभाष्यः	26
समुद्घातः	प्रज्ञापनासूत्रम्	33
चक्षुस्पर्शः	रत्नाकरावतारिकादिः	48
मति-श्रुतज्ञानम्	तत्त्वार्थवृत्तिः	62
ज्ञानदर्शनोपयोगः	नंदिसूत्रवृत्तिः, सम्मतितर्क	73
अवधिदर्शनम्	प्रज्ञापनावृत्ति पद-१८	77
संघातपरिशाटस्वरुपम्	आवश्यकवृत्त्यादिः	78
अनादिनिगोदः	प्रज्ञापना पद - १८	97
आर्याः	प्रज्ञापनादिः	134
तमसां पुद्गलत्वम्	रत्नाकरावतारिका	168
परिक्षेपाः	जम्बूद्वीपप्रज्ञप्तिवृत्तिः	229
पुद्गलपरावर्तः	भगवतीसूत्रवृत्तिः श. १ उ. ३	691

ग्रन्थकाराणां अन्यकृतयः

संस्कृतकृतयः

१. शांतसुधारसः
२. सुबोधिकाटीका
३. हैमलघुप्रक्रिया (स्वोपज्ञटीका सहिताः)
४. नयकर्णिका
५. इन्दुदूतः
६. षट्त्रिंशत्जल्पसंग्रहः
७. अर्हन्नमस्कारस्तोत्राणि
८. जिनसहस्रनामस्तोत्राणि

गुर्जरकृतयः

९. सूर्यपूरचैत्यपरिपाटी
१०. आनंदलेखः
११. विजयदेवसूरिलेखः
१२. उपमितिभवप्रपञ्चस्तवनम्
१३. पट्टावलीसज्झायः
१४. पञ्चसमवायस्तवनम्
१५. वर्तमान चतुर्विंशतिस्तवनम्
१६. विहरमानविंशतिस्तवनम्
१७. पुण्यप्रकाशस्तवनम्
१८. प्रत्याख्यानसज्झायः
१९. चतुर्दशगुणस्थानगर्भितश्रीवीरजिनस्तवनम्
२०. श्रीनेमिनाथद्वादशमासस्तवनम्
२१. विनयविलासः
२२. भगवतीसूत्रसज्झायः
२३. अध्यात्मगीता
२४. श्रीनेमिनाथभ्रमरगीतास्तवनम्
२५. आचाम्लसज्झायः
२६. श्रीआदिजिनविनतिस्तवनम्
२७. जिनपूजा चैत्यवंदनम्
२८. उपधानस्तवनम्
२९. श्रीपालरासः

साक्षीग्रन्थाः

१ अनुयोगद्वारसूत्रम्
२ अनुयोगद्वारचूर्णिः
३ अनुयोगद्वारवृत्तिः
४ अभिधानचिन्तामणिः
५ अंतकृत्सूत्रम्
६ अंगुलसप्ततिका
७ आचाराङ्गसूत्रम्
८ आचाराङ्गसूत्रवृत्तिः
९ आचाराङ्गनिर्युक्तिवृत्तिः
१० आचाराङ्गसूत्रलोकसारनिर्युक्तिः
११ आचाराङ्गनिर्युक्तिः
१२ आवश्यकसूत्रम्
१३ आवश्यकनिर्युक्तिः
१४ आवश्यकसूत्रवृत्तिः
१५ आवश्यकचूर्णिः
१६ आवश्यकसूत्रावचूर्णिः
१७ आवश्यकटीका
१८ आवश्यकबृहद्वृत्तिः
१९ आवश्यकसूत्रबृहत्टीका
२० आवश्यकहारिभद्री
२१ आवश्यकसूत्रटीप्पणी
२२ आरम्भसिद्धिटीका
२३ ओघनिर्युक्तिसूत्रम्
२४ औपपातिकसूत्रवृत्तिः
२५ औपपातिकउपाङ्गः
२६ उत्तराध्ययनबृहद्वृत्तिः
२७ उत्तराध्यनसूत्रम्
२८ उत्तराध्ययनसूत्रवृत्तिः
२९ उत्तराध्ययनसूत्रटीका
३० उत्तराध्ययनसूत्र लघुवृत्तिः
३१ उत्तराध्ययनसूत्र दीपिका
३२ उत्तराध्ययनावचूर्णिः
३३ उपदेशमालाकर्णिका
३४ उववाइसूत्रम्
३५ ऋषभचरित्रम्
३६ ऋषिमंडलस्तोत्रम्
३७ कर्मग्रन्थः
३८ कर्मग्रन्थवृत्तिः
३९ कर्मविपाकः
४० कर्मग्रन्थावचूरिः
४१ कर्मग्रन्थटीका
४२ कर्मग्रन्थलघुवृत्तिः
४३ कर्मस्तववृत्तिः
४४ कर्मप्रकृतिः
४५ कर्मप्रकृतिवृत्तिः
४६ कल्पसूत्रम्
४७ कल्पपुस्तकम्
४८ कल्पचूर्णिः
४९ कल्पान्तरवाच्यटीका
५० कल्पसूत्रवृत्तिः
५१ करुणावज्रायुधनाटकम्
५२ कालसप्ततिका
५३ काव्यानुशासनसूत्रम्
५४ काव्यानुशासनटीका
५५ गुणस्थानक्रमारोहः
५६ गुणस्थानक्रमारोहवृत्तिः
५७ गच्छाचारवृत्तिः
५८ गन्धहस्ती
५९ गन्धहस्तीटीका
६० गद्यप्राकृतदिपालीकल्प
६१ चन्द्रप्रज्ञप्तिः
६२ छेदसूत्रम्
६३ जम्बूद्वीपप्रज्ञप्तिसूत्रम्
६४ जम्बूद्वीपप्रज्ञप्तिवृत्तिः
६५ जम्बूद्वीपप्रज्ञप्तिटीका
६६ जम्बूद्वीपप्रज्ञप्तिचूर्णिः
६७ जम्बूद्वीपसमासः
६८ जम्बूद्वीपसमासवृत्तिः
६९ जम्बूद्वीपसंग्रहणीटीका
७० जनप्रवादसूत्रम्
७१ जीवाभिगमटीका
७२ जीवाभिगमसूत्रम्
७३ जीवाभिगमवृत्तिः
७४ जीवाभिगमचूर्णिः
७५ जीवसमाससूत्रम्
७६ जीवसमासवृत्तिः
७७ जीवविचारः
७८ जीवकल्पवृत्तिः
७९ ज्योतिष्करंडकग्रन्थः
८० ज्योतिष्करंडकटीका
८१ ज्योतिष्करंडकवृत्तिः
८२ तत्त्वार्थसूत्रम्
८३ तत्त्वार्थवृत्तिः
८४ तत्त्वार्थभाष्यम्
८५ तत्त्वार्थभाष्यवृत्तिः
८६ तत्त्वार्थभाष्यटीका
८७ तत्त्वार्थटीका
८८ दशवैकालिकसूत्रम्
८९ दशवैकालिकसूत्रनिर्युक्तिः
९० दशवैकालिकवृत्तिः
९१ दिपालिकाकल्प
९२ दुष्पमारकसंघस्तोत्रम्
९३ देशीशास्त्रम्
९४ देहाल्पबहुत्वोद्धारः
९५ देवेन्द्रस्तवः
९६ द्वीपसागरप्रज्ञप्तिसंग्रहणी
९७ तंदुलवैचारिकप्रकीर्णकः
९८ धनपालकविः
९९ ध्यानशतकवृत्तिः
१०० त्रिषष्टिपर्वपद्मचरित्रम्
१०१ त्रिषष्टिशलाकाद्वितीयपर्व
१०२ त्रिषष्टिशलकासप्तमपर्व
१०३ धर्मसंग्रहणीवृत्तिः
१०४ नवतत्त्वप्रकरणम्
१०५ नवतत्त्वावचूरिः
१०६ नवमपूर्व
१०७ नवपदप्रकरणवृत्तिः
१०८ नवीनबृहत्क्षेत्रसमासः
१०९ नन्दीसूत्रम्
११० नन्दीसूत्रवृत्तिः
१११ नन्दीसूत्रटीका
११२ नन्द्यध्ययनचूर्णिः
११३ नन्दीश्वर स्तोत्रम्
११४ नन्दीश्वरकल्प
११५ नन्दीश्वरस्तव
११६ नाममाला
११७ नेमिचरित्रम्
११८ नीतिशास्त्रम्
११९ प्रवचनसारोद्धारः
१२० प्रवचनसारोद्धारवृत्तिः
१२१ प्रज्ञापनासूत्रम्
१२२ प्रज्ञापना मूलटीकाकारः
१२३ पूर्वसंग्रहणी टीका
१२४ प्रज्ञापनाटीका
१२५ प्रज्ञापनावृत्तिः
१२६ प्रज्ञापनाविशेषपदवृत्तिः
१२७ पञ्चसंग्रहः
१२८ पञ्चसंग्रहवृत्तिः
१२९ पञ्चसंग्रहटीकाः
१३० पञ्चवस्तुकग्रन्थः
१३१ पञ्चनिर्ग्रंथीप्रकरणम्
१३२ पद्मचरित्रम्
१३३ पद्मानन्दकाव्यम्

१३४ पार्श्वनाथचरित्रम्
१३५ परिशिष्टपर्व
१३६ पद्यदिवालिकल्प
१३७ प्रशमरतिप्रकरणम्
१३८ प्रश्नव्याकरणसूत्रम्
१३९ प्रश्नव्याकरणवृत्तिः
१४० प्रज्ञप्तिटीका
१४१ बन्धस्वामित्वनामाकर्मग्रन्थः
१४२ बृहत्संग्रहणी
१४३ बृहत्संग्रहणीवृत्तिः
१४४ बृहत्क्षेत्रसमासः
१४५ बृहत्क्षेत्रसमासवृत्तिः
१४६ बृहत्क्षेत्रसमासटीका
१४७ बृहत्क्षेत्रविचारः
१४८ बृहत्संग्रहणीबृहद्वृत्तिः
१४९ बृहत्क्षेत्रविचारटीका
१५० भावप्रकरणम्
१५१ भाष्यकारगाथा
१५२ भाष्यसूत्रम्
१५३ भाष्यवृत्तिः
१५४ भगवतीसूत्रम्
१५५ भगवतीसूत्रवृत्तिः
१५६ भगवतीसूत्रटीका
१५७ भगवतीसूत्रचूर्णिः
१५८ भक्तामरस्तोत्रम्
१५९ भक्तामरस्तोत्रटीका
१६० भक्तामरस्तोत्रवृत्तिः
१६१ महाभाष्यसूत्रम्
१६२ महाभाष्यसूत्रवृत्तिः
१६३ महानिशीथसूत्रम्
१६४ माथुरवाचना
१६५ मरणसमाधिप्रकीर्णकः
१६५ मल्ल्यध्ययनवृत्तिः
१६७ मूलसंग्रहणी
१६८ मूलसंग्रहणीटीका
१६९ मृगापुत्रीयाध्ययनम्
१७० योगशास्त्रसूत्रम्
१७१ योगशास्त्रवृत्तिः
१७२ रत्नाकरावतारिका
१७३ राजप्रश्नीयोपाङ्गटीका
१७४ रामचरित्रम्
१७५ रत्नमालाभाष्य
१७६ राजप्रश्नीयसूत्रम्
१७७ राजप्रश्नीयसूत्रवृत्तिः
१७८ लीलावतीग्रन्थः
१७९ लघुक्षेत्रसमासः
१८० लघुक्षेत्रसमासवृत्तिः
१८१ लघुसंग्रहणीवृत्तिः
१८२ लोकनालिकास्तवः
१८३ लौकिकशास्त्रम्
१८४ लब्धिस्तोत्रम्
१८५ विशेषावश्यकसूत्रम्
१८६ विशेषावश्यकवृत्तिः
१८७ विशेषावश्यकमहाभाष्यः
१८८ विशेषावश्यकभाष्यवृत्तिः
१८९ विशेषणवतीसूत्रम्
१९० वनस्पतिसप्ततिका
१९१ वृद्धवादः
१९२ वृद्धशत्रुञ्जयमाहात्म्यः
१९३ वसुदेवचरित्रम्
१९४ वासुपूज्यचरित्रम्
१९५ विपाकसूत्रम्
१९६ विवेकविलासग्रन्थः
१९७ व्यवहारप्रकाशः
१९८ वास्तुशास्त्रम्
१९९ वास्तुसारग्रन्थः
२०० विचारसप्ततिका
२०१ विद्याप्राभृतः
२०२ वीरचरित्रम्
२०३ वीरचरित्रोद्धृतदिपालिकल्प
२०४ वसुदेवहिण्डि
२०५ विचारसप्ततिकावचूरिः
२०६ शृङ्गारतिलकः
२०७ शतकचूर्णिः
२०८ शक्रस्तवः
२०९ श्राद्धविधिचूर्णिः
२१० श्राद्धविधिप्रकरणटीका
२११ शान्तिनाथचरित्रम्
२१२ शत्रुञ्जयमाहात्म्यः
२१३ शत्रुञ्जयकल्प
२१४ शतकवृत्तिः
२१५ शतकबृहद्वृत्तिः
२१६ शतकनामा कर्मग्रन्थः
२१७ शाश्वतः
२१८ श्राद्धविधिवृत्तिः
२१९ श्रेणिकचरित्रम्
२२० संग्रहणी
२२१ संग्रहणीटीका
२२२ शिवशर्माचार्यकृतशतकग्रन्थः
२२३ संग्रहण्यावचूरिः
२२४ संग्रहणीवृत्तिः
२२५ संग्रहणीलघुवृत्तिः
२२६ संग्रहणीबृहद्वृत्तिः
२२७ स्थानाङ्गसूत्रम्
२२८ स्थानाङ्गसूत्रवृत्तिः
२२९ स्थानाङ्गसूत्रटीका
२३० समवायाङ्गमावश्यकञ्च
२३१ समवायाङ्गसूत्रम्
२३२ समवायाङ्गसूत्रवृत्तिः
२३३ समवायाङ्गसूत्रटीका
२३४ सिद्धांतः
२३५ सिद्धप्राभृतसूत्रम्
२३६ सिद्धप्राभृतटीका
२३७ सूयगडाङ्गसूत्रम्
२३८ सूयगडाङ्गसूत्रवृत्तिः
२३९ सूर्यप्रज्ञप्तिः
२४० सूर्यप्रज्ञप्तिटीका
२४१ सुपार्श्वनाथचरित्रम्
२४२ सम्मतितर्कः
२४३ समवसरणस्तोत्रम्
२४४ समवसरणस्तोत्रावचूर्णिः
२४५ सप्ततिशतस्थानग्रन्थः
२४६ सिद्धांतशिरोमणिग्रन्थः
२४७ सूत्रकृताङ्गटीकाचूर्णिश्च
२४८ सिद्धिदण्डीकास्तोत्रम्
२४९ सिद्धिदण्डीकास्तोत्रावचूर्णिः
२५० सिरिनिलयक्षेत्रसमासः
२५१ सिरिनिलयक्षेत्रसमासटीका
२५२ सिरिनिलयक्षेत्रविचारवृत्तिः
२५३ सेनप्रश्नः
२५४ हीरप्रश्नोत्तरम्
२५५ हैमवीरचरित्रम्
२५६ ज्ञाताधर्मकथा
२५७ ज्ञातधर्मकथावृत्तिः
२५८ ज्ञाताधर्मकथास्वावचूर्णिः
२५९ क्षेत्रविचारग्रन्थः
२६० क्षेत्रविचारसूत्रटीका
२६१ क्षेत्रविचारबृहत्टीका
२६२ क्षेत्रसमासटीका
२६३ क्षेत्रसमासबृहत्टीका
२६४ क्षेत्रसमासबृहद्वृत्तिः
२६५ क्षेत्रसमाससूत्रम्
२६६ क्षेत्रसमासवृत्तिः
२६७ षष्ठकर्मग्रन्थः
२६८ षष्ठकर्मग्रन्थवृत्तिः